परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

जिनवाणी-महोत्सव

सहस्रग्रन्थसंग्रह

❊ जन्मदिवस 19–03–1971 ❊ मुनिदीक्षा–11–05–1989 ❊ आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणाः–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

शब्दकल्पद्रुम

भाग – 01



लेखक

राजा राधाकान्त देव

प्रकाशक

चौखम्बा संस्कृत सीरीज

वाराणसी (उत्तरप्रदेश)

(परम्परानायक)

परम पूज्य चारित्र-चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)

परम पूज्य तीर्थभक्त-शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)

परम पूज्य सिद्धान्त-चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)

परम पूज्य तपश्चर्या-चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्रायः होता है। फलतः उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तृत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि-परिवार

॥ ओः ॥

शब्दकल्पद्रुमः

प्रथमो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

प्रथमो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

PK
925
D47
1967
V.1

LIBRARY
MAR 2 1970
UNIVERSITY OF TORONTO

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART ONE

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145

PUBLISHER'S NOTE.

This unique Encyclopaedia-cum-Dictionary of Sanskrit Language has been so well-known that it needs no introduction. It is, by far, the most comprehensive Dictionary which not only shows the Etymology, Gender, Meanings, and Synonyms of each word, but also gives profuse quotations to illustrate the usage and connotation of each of them. These quotations have been drawn from all the major sources of Sanskrit Literature, such as, Vedas, Vedangas, Vedanta, Nyaya, other Darshanas, Purana-Itihasa, Sangita, Shilpa, Soopakarashastra, Jyotisha, Tantra-Akhyana, Kavya-Alankara-Chhanda Shastras, and Medicine etc. This work has the major advantage over other similar works, such as, St. Petersburg Dictionary and Monier Williams-Sanskrit-English Dictionary, in as much as it incorporates all their achievements at the same time improving upon many of their deficiencies.

In our country the importance of such Sanskrit works cannot be overemphasized, because, besides being a unifying force, the Sanskrit language is the mother of all Indian languages of the country, from which they can draw upon to replenish their vocabularies.

Such an important work remained out of print for a long time, to the result that thousands of rupees were charged for its single set. In sheer spirit of dedication to the cause of advancement of Sanskrit Learning, we reprinted it in 1961 by photo offset process. Our edition, due to the importance of the work itself and the low price at which it was offered, completely sold out in a very short time, but the demands still continued. Under these circumstances, although we felt embarrassed in expressing our inability to fulfil the demands, yet we were slightly hesitant at the outset in undertaking a third edition because of the heavy financial implications involved in the venture. However, due to the persistent pressure of many of our patrons we had to ultimately decide to issue a third edition. As a result of the same this new edition is being presented to the readers.

We fully realize that such an ambitious venture cannot be successful without the blessings of the Government and Non-government Institutions, scholars, and students alike, and therefore hope that our present undertaking would also receive the same patronage and encouragement which the earlier edition was fortunate enough to receive.

शब्दकल्पद्रुमः

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृतिनाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-सुप्रशस्तपरिशिष्टेन च सार्द्धम्।

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः नागराक्षरैः प्रकाशितश्च।

प्रथमो भागः

कलिकाता-राजधान्यां

व्यासिस्तमिसनयन्त्रे मुद्रितः, ७१ न० पाथुरियाघाट-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८०८।

॥ श्रीजगदीशो जयति ॥

भूमिका

मङ्गलाचरणम् ।

उपास्महे शिवं सत्यं सर्व्वसर्व्वार्थसाधकम् ।
द्यावाभूमी स्थितं व्याप्य शब्दब्रह्म सनातनम् ॥ १ ॥

स्वरूपं देवभाषाया विष्णोर्विश्वात्मनो यथा ।
ईदृक्तयेयत्तया वा को नु निर्वक्तुमीश्वरः ॥ २ ॥

विष्णुवत् सा हि सत्त्वेन ब्रह्मवद् रजसा च सा ।
रुद्रवत् सा च तमसा व्यानशेऽशेषपिण्डपम् ॥ ३ ॥

अज्ञानतिमिराच्छन्नं तदाऽस्थास्यत् चराचरम् ।
नाऽभविष्यद् यदि ज्योतिः संस्कृताह्वं सुमङ्गलम् ॥ ४ ॥

तमोभूतमिदं विश्वं प्रसुप्तमिव सर्व्वतः ।
अरुणोदयवेलेव भाषेयं प्रत्यबोधयत् ॥ ५ ॥

एकमेवाऽद्वितीयं तत् सच्चिदानन्दमव्ययम् ।
परं वेद्यतमं ब्रह्म भाषेयं प्रथमं जगौ ॥ ६ ॥

इयमुन्मीलयामास प्रथमं विश्ववासिनाम् ।
आत्मज्ञानमयीं दृष्टिं नलिनीमिव भानुभा ॥ ७ ॥

अनया भाषयैवादावृषिभिर्ज्ञानदृष्टिभिः ।
प्रलय-स्थिति-सर्गाणां दर्शितं तत्त्वमद्भुतम् ॥ ८ ॥

विश्व-विश्वेशयोस्तत्त्वमियमेवाऽन्ववोधयत् ।
चतुर्व्वर्गफलं ज्ञानं गुणान् सत्त्वादिकांस्तथा ॥ ९ ॥

सिद्धचारणगन्धर्व्वैर्देवदानवमानवैः ।
इयमाराध्यते भाषा जननीव युगे युगे ॥ १० ॥

ब्रह्मकण्ठात् किल पुरा जाता ब्रह्माण्डपूजिता ।
जयत्यमरभाषेयमासंसाराद् युगे युगे ॥ ११ ॥

न ब्रह्मा न हरिर्नेशो यस्याः पारं परं गतः ।
गीर्व्वाणवाणीं तां वन्दामहे गीर्व्वाणवन्दिताम् ॥ १२ ॥

योनेरनन्तरज्ञानां तस्याः कोषाः सहस्रशः ।
पूर्व्वाचार्य्यकृताः शस्ता विलसन्ति महीतले ॥ १३ ॥

पर्य्यायवाचकाः केचित् केचित् नानार्थवाचकाः ।
लिङ्गानुशासनाः केचित् न तु सर्व्वार्थसाधकाः ॥ १४ ॥

अतिसंक्षिप्तजटिलाश्छन्दोवद्धा दुरन्वयाः ।
विनाचार्य्यं न शक्यास्ते मनागपि विगाहितुम् ॥ १५ ॥

युगपत् सर्व्वकोषाणां यथावत् स्मरणं विना ।
कार्य्यकालेऽभीप्सितार्थसम्प्राप्तिर्नोपपद्यते ॥ १६ ॥

स्थितेष्वपि पुरः सर्व्वकोषेष्वन्धैर्यथा जनैः ।
इष्टार्थोऽतद्रहस्यज्ञैर्यत्नतोऽपि न लभ्यते ॥ १७ ॥

सर्व्वाधिगम्यं निर्म्मातुं कोषं सर्व्वार्थसाधकम् ।
उदियाय कलौ वङ्गे राधाकान्तो नरेश्वरः ॥ १८ ॥

अकारादिक्रमन्यस्ते शब्दे शब्दे पृथक् पृथक् ।
तत्तच्छब्दार्थसम्पूर्त्तिः प्रथमं तेन दर्शिता ॥ १९ ॥

स एवादिगुरुस्तस्मात् कोषाणामीदृशात्मनाम् ।
यः सर्व्वभोग्यमकरोत् संस्कृतं देवदुर्लभम् ॥ २० ॥

मन्ये कल्याणनामाऽसौ शब्दकल्पं विनिर्म्ममे ।
एकत्र पिण्डपाशेषज्ञानैश्वर्य्यदिदृक्षया ॥ २१ ॥

नैकत्र परिनिष्ठाऽस्ति सर्व्वज्ञानस्य यद्यपि ।
कोषस्तस्य तथाप्येष कोऽपि ज्ञानमहानिधिः ॥ २२ ॥

वेदकर्त्ता विधातेव वाल्मीकिरिव काव्यकृत् ।
व्यासो भारतकर्त्तेव स लोके गौरवं गतः ॥ २३ ॥

दंष्ट्रादण्डेन दैत्यारिर्निमग्नां प्रलयाम्बुधौ ।
वराहरूपी भगवान् काश्यपीमुददीधरत् ॥ २४ ॥

कलौ तु धरणीकान्तो राधाकान्तः प्रदीप्यते ।
उद्धृत्याऽनन्तकालाब्धेर्देवभाषां महीयसीम् ॥ २५ ॥

न दृष्टं न श्रुतं क्वापि तद्धि शास्त्रं बुधैर्भुवि ।
यन्नैवोद्धृतमेतस्मिन् कोषे तेन महात्मना ॥ २६ ॥

वेदानुद्धृतवान् पूर्व्वं मत्स्यरूपी जनार्द्दनः ।
असौ त्वशेषशास्त्राणि विप्लुतानि समन्ततः ॥ २७ ॥

सुराः समेता दितिजैर्ममन्थुः क्षीरनीरधिम् ।
एक एव ममन्थाऽयमपारं शास्त्रसागरम् ॥ २८ ॥

सुधासिन्धुसुधां पीत्वा सुरा अमरतां गताः ।
पीत्वा त्विमां कोषसुधां देवदानवमानवाः ॥ २९ ॥

कौस्तुभाख्यमपां सारं शौरेरेव हि भूषणम् ।
कोषरत्नमिदं त्वस्य जातं त्रैलोक्यभूषणम् ॥ ३० ॥

पारिजातः सुरतरुः सुरभीकुरुते दिवम् ।
शब्दकल्पद्रुमस्त्वेष प्रीणाति भुवनत्रयम् ॥ ३१ ॥

धन्वन्तरिः स भगवान् स्वर्गस्यैव चिकित्सकः ।
अशेषाणान्तु लोकानां कोष एष चिकित्सकः ॥ ३२ ॥

समुद्रोद्भूतया लक्ष्म्या लक्ष्मीवान् केवलो हरिः ।
श्रीराधाकान्त-कोषेण लक्ष्मीवद् भुवनत्रयम् ॥ ३३ ॥

न केवलं सेव्यतेऽसौ कोषः शब्दार्थलिप्सुभिः ।
सर्व्वेषामेव सूतेऽयं कामान् कल्पद्रुमो यथा ॥ ३४ ॥

योगिनामप्ययं कोषो योगशास्त्रमनुत्तमम् ।
भोगिनां भोगशास्त्रं च रोगिणां च महौषधम् ॥ ३५ ॥

सर्व्वेषामेव धर्म्माणामाश्रमाणां च सर्व्वशः ।
कृत्यजातमशेषेण प्रोक्तमत्र प्रसङ्गतः ॥ ३६ ॥

जीविकामर्ज्जयन्त्यस्माद् विप्राः षट्कर्म्मशालिनः ।
क्षत्रिया वैश्यशूद्राश्च ये चाऽन्ये वर्णसङ्कराः ॥ ३७ ॥

कर्म्मकाण्डरतैर्नित्यं ज्ञानकाण्डरतैस्तथा ।
रागिभिर्वीतरागैश्च सर्व्वैरेवैष सेव्यते ॥ ३८ ॥

उपजीव्यो यथैवाऽयं गुरुभिर्मन्त्रदातृभिः ।
उपजीव्यस्तथैवाऽयं शिष्यैर्मन्त्रग्रहीतृभिः ॥ ३९ ॥

निदानं चाऽत्र रोगाणां लक्षणं च पृथक् पृथक् ।
संप्राप्तिश्च चिकित्सा च सर्व्वं प्रोक्तमशेषतः ॥ ४० ॥

ओषधीनामशेषाणां गुणपर्य्यायसंग्रहाः ।
नानाभाषाप्रचलिता आख्याश्चैवाऽत्र दर्शिताः ॥ ४१ ॥

इह संगीतविज्ञानं भुक्तिमुक्तिप्रदं नृणाम् ।
प्रसङ्गतः समासेन प्रोक्तं सर्व्वमतानुगम् ॥ ४२ ॥

आश्चर्य्याणामशेषाणां ज्ञानानामाकरो महान् ।
अहो कोऽपि यशोराशिः कोषोऽयं तस्य भूभृतः ॥ ४३ ॥

मन्दभाग्येऽपि वङ्गेऽस्मिन् जज्ञिरे बहवो बुधाः ।
विहीना अपि शौर्य्येण ज्ञानेनाऽमरतां गताः ॥ ४४ ॥

तन्त्रमन्त्रादिशास्त्राणि स्मृतयो न्यायविस्तराः ।
योगशास्त्राणि काव्यानि रूपकाख्यायिकास्तथा ॥ ४५ ॥

नानादेवार्च्चनकथा ऐन्द्रजालिकमेव च ।
उपदेवकथाश्चित्रा ग्राम्यदेवकथास्तथा ॥ ४६ ॥

व्रतोपवासनियमा बलिहोमजपादयः ।
पीठतीर्थादिमाहात्म्यं शक्तिपूजाः सहस्रशः ॥ ४७ ॥

एतच्चाऽन्यच्च बहुधा शास्त्रं वङ्गमनीषिभिः ।
नवद्वीपादिवास्तव्यैः प्रणीतं ज्ञानदृष्टिभिः ॥ ४८ ॥

अरक्षिष्यदयं कोषो ज्ञानं तद् वङ्गजं न चेत् ।
नामाऽपि तस्याऽद्य तदाऽगमिष्यद् विलयं ध्रुवम् ॥ ४९ ॥

एकेनाऽपि गुणेनाऽयमनेनाऽमरतां व्रजेत् ।
यदयं वङ्गदेशस्य कृतीः कीर्त्तीश्च रक्षति ॥ ५० ॥

पुण्यां द्रवमयीं धारामानिनाय भगीरथः ।
पुण्यां कीर्त्तिमयीं धारां राधाकान्तोऽवतारयत्॥ ५१ ॥

सोऽनर्घ्यं जीवितं दीर्घं विभवं चाऽतुलं निजम् ।
अकातरं शब्दकल्पद्रुमस्याऽर्थे न्ययोजयत् ॥ ५२ ॥

अस्य कोषमहासिन्धोर्वहोः कालात् परं नृपः ।
स प्रपेदे परं पारं भवाब्धेरिव निर्म्ममः ॥ ५३ ॥

सोऽशेषकोषव्ययजं स्वकोषं त्यागिनां वरः ।
अमूल्यं व्यतरन्मूल्यं विना विद्वद्भ्यो महायशाः ॥ ५४ ॥

स जीवन्नेव सुकृती स्वकृतेरतुलं फलम् ।
विलोक्य सफलं मेने नरजन्म सुदुर्लभम् ॥ ५५ ॥

आमेरिकास्या यूरोपवासिनोऽशेषपण्डिताः ।
शब्दकल्पद्रुमं दृष्ट्वा ययुः परमविस्मयम् ॥ ५६ ॥

धीरेन्द्राश्च नरेन्द्राश्च ये यत्रासन् तदा भुवि ।
तमभ्यवर्षन् सम्मानैर्मेघाः शस्यमिवाऽम्बुभिः ॥ ५७ ॥

वङ्गभूर्भुवने धन्या शब्दकल्पद्रुमेण या ।
कल्पद्रुमवतीं नित्यं स्पर्द्धते ह्यमरावतीम् ॥ ५८ ॥

स शब्दकल्पद्रुमकृद् यत्र जज्ञे तमालयम् ।
शोभावाजारभूपानां सन्तस्तीर्थं प्रचक्षते ॥ ५९ ॥

साधारणोपकाराय मेलनं देशवासिनाम् ।
विदुषां सङ्गमो वाऽपि तत्रैवाऽद्याऽपि जायते ॥ ६० ॥

महावङ्गसमाजस्य तद्वंशोऽद्यापि कीर्त्यते ।
अविसंवादितं सर्व्वैश्चूडामणिरिति क्षितौ ॥ ६१ ॥

एवं प्रतिष्ठां गमयन् स्ववंशं यशसा नृपः ।
अगण्यपुण्यैर्धन्योऽसौ पुण्यलोकमुपेयिवान् ॥ ६२ ॥

गते बहुतिथे कालेऽकारि कोपेऽत्र दुर्लभे ।
वरदाकान्तमित्राद्यैः पुनर्मुद्राङ्कने ग्रहः ॥ ६३ ॥

मुद्रां नीतेऽथाऽविकलं शब्दकल्पद्रुमे च तैः ।
अचिरेणैव पुस्तानि तानि निःशेषतां ययुः ॥ ६४ ॥

पुनरेवाऽस्य दौर्लभ्यमुपलभ्याऽन्यदुर्लभान् ।
गुणांश्चाऽजनि नश्चित्ते पुनर्मुद्राङ्कने ग्रहः ॥ ६५ ॥

ततः स्वत्वाधिकारिभ्यः क्रीत्वा स्वत्वं यथाविधि ।
प्रवृत्ता दुष्करे कार्य्ये वयं सत्कार्य्यगौरवात् ॥ ६६ ॥

वङ्गाक्षरैरितः पूर्व्वं कोप एष प्रकाशितः ।
तेनाऽसौ सुखपाठ्योऽभूत् केवलं वङ्गवासिनाम् ॥ ६७ ॥

नागरी वर्णमाला तु संस्कृतैकोपयोगिनी ।
सर्व्वत्राद्रियते प्रायः सर्व्वैः संस्कृतपाठिभिः ॥ ६८ ॥

सर्व्वेषां बोधसौकर्य्यमतोऽस्माभिर्विधित्सुभिः ।
प्रशस्तैर्नागरैर्वर्णैरेष कोपः प्रकाश्यते ॥ ६९ ॥

शब्दकल्पद्रुमं कोपं प्रणिनाय यदा नृपः ।
संस्कृतं प्रचरद्रूपं नाऽधुनेव तदाऽभवत् ॥ ७० ॥

तदा प्रयोजनाभावात् स्वकोपे तेन भूभुजा ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिर्नैव दर्शिता ॥ ७१ ॥

जन्मभूमिं प्रति प्रेम्णा तेनोपादानलिप्सुना ।
अस्योपादानसामग्री स्वदेशाद् भूयसाहृता ॥ ७२ ॥

मुग्धबोधं व्याकरणं वङ्गदेशस्य गौरवम् ।
तन्मतेन ततस्तेन शब्दव्युत्पत्तयः कृताः ॥ ७३ ॥

पाणिनीयं व्याकरणं प्रायः संस्कृतपाठिभिः ।
सयत्नं सेव्यते सर्व्वैश्चिरमाद्रियते च तत् ॥ ७४ ॥

दिने दिने नृणां यावत् संस्कृते भक्तिरेधते ।
पाणिनीयस्य माहात्म्यं तावदेवोपचीयते ॥ ७५ ॥

अनुसृत्य ततोऽस्माभिः पाणिनीयानुशासनम् ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिः परिदर्श्यते ॥ ७६ ॥

प्रत्नतीर्थाश्रमसरिद्देशारण्यमहीभृताम् ।
सिद्धदेवर्षिभूपालशास्त्रशास्त्रकृतां तथा ॥ ७७ ॥

कलादर्शनविज्ञानज्योतिषां च नवं नवम् ।
अधुनाविष्कृतं तत्त्वं धन्यैः पाश्चात्यसूरिभिः ॥ ७८ ॥

अदृष्टपूर्व्वाः शब्दार्थाः प्रमाणानि बहूनि च ।
इदानीं ग्रन्थविस्ताराद् यान्ति दृष्टिपथं विदाम् ॥ ७९ ॥

मूलातिरिक्तं तत् सर्व्वं मूलेऽस्माभिर्निवेश्यते ।
वेष्टनाकारचिह्नान्तर्व्यवच्छेदचिकीर्षया ॥ ८० ॥

अनुचिन्त्य द्वयोरेव पक्षयोः सुखसाध्यताम् ।
अस्माकं ग्राहकाणां च खण्डशोऽयं प्रकाश्यते ॥ ८१ ॥

परिशिष्टे वक्तव्या विषयाः

परिशिष्टद्वयं चैव कोपस्याऽस्य विधीयते ।
एकं धात्वादिसम्बन्धि शब्दसम्बन्धि चाऽपरम् ॥ ८२ ॥

प्रथमपरिशिष्टे वक्तव्या विषयाः—

धातु-धात्वर्थ-रूपाणि लकारार्थाः पृथक् पृथक् ।
अनुबन्धाश्च धातूनां गणवाच्यभिदास्तथा ॥ ८३ ॥

कृत्तद्धितसमासानां लिङ्गानां विवृतिस्तथा ।
प्रथमे परिशिष्टेऽस्य सर्व्वमेतन्निवेश्यते ॥ ८४ ॥

द्वितीयपरिशिष्टे वक्तव्या विषयाः—

लौकिका बहवः शब्दा वैदिकाश्च विशेषतः ।
ग्रन्थप्रचारविरहादन्धकार इव स्थिताः ॥ ८५ ॥

पाश्चात्यविदुषां ज्ञानापूर्व्वालोकेन तेऽधुना।
दिने दिने प्रकाशन्ते चार्य्यकीर्त्तिं वितन्वते ॥ ८६ ॥

सार्थप्रमाणास्ते सर्व्वे परिशिष्टे द्वितीयके।
दीयन्ते बुधसहाय्यान्निजशक्त्यनुसारतः ॥ ८७ ॥

कोषेऽस्मिन् यानि शास्त्राणि प्रमाणायोद्धृतानि च।
मूलातिरिक्ताः शब्दा वै बहवः सन्ति तेष्वपि ॥ ८८ ॥

तेऽपि सर्व्वेऽत्र दीयन्ते यश्चाऽभावोऽस्ति यत्र च।
यथाज्ञानं यथास्थानं सोऽप्यस्माभिर्निरस्यते ॥ ८९ ॥

शब्दाब्धेस्तु परं पारं न जानाति सरस्वती।
अगाधं चाऽप्रमेयं तं को वा निर्वक्तुमीश्वरः ॥ ९० ॥

स्वशक्तिकाष्ठामाश्रित्य तथाप्यस्माद्दशैर्जनैः।
परिशिष्टस्य सम्पूर्त्तौ प्रयत्नोऽस्य विधीयते ॥ ९१ ॥

इत्येष मुद्राङ्कयितुं स राजा नागराक्षरैः।
पुनरेव स्वकं कोषं सर्व्वभोगविधित्सया ॥ ९२ ॥

परिशिष्टं च विस्तीर्णं वेदशब्दार्थबोधकम्।
निर्म्ममे सोऽस्य कोषस्य महान्तं यत्नमास्थितः ॥ ९३ ॥

दुर्व्विलासात्तु दैवस्य हस्तलेखाश्च तेऽखिलाः।
कीटैः कवलिता हन्त! नाशमापुरशेषतः ॥ ९४ ॥

चकमे च महात्माऽसौ सकाशात् परवर्त्तिनाम्।
संस्कृतज्ञानविस्तारेणाऽस्य संस्करणं पुनः ॥ ९५ ॥

अतो वयं संप्रवृत्ता अस्मिन् संस्करणे नवे।
पुण्यश्लोकस्य तस्यैव भूपस्येच्छानुसारतः ॥ ९६ ॥

शब्दकल्पद्रुमस्रष्टुः कुलात् तस्यैव भूभृतः।
पदे पदेऽत्र साहाय्यं कार्य्येऽस्माभिरवाप्यते ॥ ९७ ॥

देवदेव! महादेव! रक्ष रक्ष चिरं विभो!।
वंशावलीं तस्य राज्ञो धारां भागीरथीमिव ॥ ९८ ॥

हे विश्ववासिनः सर्व्वे सन्तो विद्यानुरागिणः!।
सहाया नो भवन्त्वस्मिन् भवन्तो ज्ञानगौरवात् ॥ ९९ ॥

करुणाकणया यस्य नरस्तरति दुस्तरम्।
सिद्धिदाता स भगवान् नः पूरयतु काङ्क्षितम् ॥१००॥

भक्तिमात्रसहायानां हीनानां साधनान्तरैः।
भक्तवाञ्छाप्रदो देवो वाञ्छितं प्रददातु नः ॥१०१॥

कलिकाता
७१, पाथुरियाघाटा ष्ट्रीट
शकाब्दाः १८०८

श्रीवरदाप्रसादवसोः
तदनुजस्य च
श्रीहरिचरणवसोः

OPINIONS OF LITERARY MEN ANENT THE CELEBRATED SANSKRIT ENCYCLOPEADIC LEXICON THE SABDAKALPADRUMA. BY THE LATE RENOWNED RAJAH SIR RADHAKANT DEB, BAHADUR, K. C. S. I., OF CALCUTTA.

Sir Hyde East, Chief Justice, has very great pleasure before he leaves India, in stating the high regard and estimation in which he holds Babn Radhakant Deb, the son of a worthy and respectable father, Gopeemohnn Deb; he has had the benefit of their assistance upon several interesting occasions calculated to promote the general good and advancement of their countrymen, and he has always found them both to be men of the highest probity and of sound good sense. Radhakant is also a considerable scholar, and is now engaged in compiling a very learned work. I quit these two most worthy men and my friends, with much regret, and I recommend them both to the protection and esteem of my successor.

Calcutta, 1822.

Extract of a letter from Professor Eugene Burnouf, Secy. to the Asiatic Society of Paris, dated 5th May, 1835.

I feel great pleasure in announcing to you that the Council of the Asiatic Society has enrolled you as a member, upon my proposition, which was supported by Dr. Mohl, one of the Members of the Council. You have been for a length of time nominated to become an Honorary Member of the Society, and the Council was not ignorant of the great services you rendered to Indian literature by the publication of your Sabdakalpadruma, a real philological, and religious treasure of India.

Extract of a letter from His Excellency W. Oxholme, Minister to His Majesty Frederic VII, King of Denmark, dated 10th May, 1854, *Danish Legation.*

The undersigned Minister to H. M., the King of Denmark to the Court of St. James, has been charged by his gracious Sovereign to transmit to the learned Radhakanta Raja Bahadur, the accompanying royal medal, *pro meritis* as a token of the sincere acknowledgment, and the high value placed by His Majesty upon the esteemed gift of two copies of the interesting and elaborate work called the Sabdakalpadruma, conferred by the author upon His Majesty's own, and the University's library, in Copenhagen.

Extract of a letter from Dr. Albrecht Weber, a Member of the Royal Academy of Sciences at Berlin, dated 26th March, 1858.

I have the pleasure to inform you that the Royal Academy of Sciences, yesterday, on my proposal, elected you, as an Honorary Member, on account of your merits as Author of the Sabdakalpadruma. It is one of the highest honours, our Academy can invest with, for the number of the Honorary Members is very small and restricted.

Extract of a letter from J. Prinsep, Esq., Secretary to the Asiatic Society of Bengal, dated 7th July, 1836.

The Society is already aware of the eminent services you have rendered to your countrymen, as well as to every student of Indian Literature by the compilation, and publication of your Sanscrit Encyclopædical Lexicon, and is satisfied that you will derive the truest sentiments of self-pride, and satisfaction from having accomplished so laudable and creditable an undertaking; while to posterity your name will be handed down, among those who have been most prominent in enriching and preserving your national literature.

Extract from the Minutes of the Proceedings of the Committee of Correspondence of the Royal Asiatic Society of Great Britain and Ireland. Transactions of the R. A. S. of G. B. and I., vol. 2nd Ap. P. LXIII.

Sir Alexander Johnston, having laid before the Committee, the first volume of a Sanscrit Encyclopædical Dictionary, and a Bengallee Spelling Book, compiled by Baboo Radhakant Deb, of Calcutta. It was resolved—"That in consequence of the talent displayed in those works, and the general exertions of Baboo Radhakant Deb, for the promotion of knowledge, he be recommended to the Council for election, as a Corresponding Member of the Royal Asiatic Society." "that a Report of the steps taken by this Society in relation to Capt. Low, and Baboo Radhakant Deb, be made to Lord William Bentinck, and Mr. Fullerton; and that those Governors be requested to afford their assistance to Capt. Low, and Baboo Radhakant Deb, in the attainment of the Society's objects."

Extract of a letter from P. Clarke, Esq., Secretary to the Royal Asiatic Society of Great Britain, and Ireland, dated 6th April, 1845.

In acknowledging the continuation of your learned and valuable work, allow me to assure you how highly the Royal Asiatic Society estimates the elaborate productions of learned Native gentlemen, and what marked approbation accompanies the recognition of their labours.

Extract from the Annual Report of the Asiatic Society of Paris, for 1846.

Le Rajah Radhakant Deb do Calcutta, a fait parâitre le cinquième volnme de son Dictionnaire encyclopediqne Sanscrit. Dans cet onvrage, chaqne mot est snivi de l'interpretation dn seus, des synonymes avec l'indication dn dictionnaire dont ils sont tires, de la description de l'objet anqnel il s'appliqne, et do citations empruntées aux livres classiqnes qui en ont fait usage. L'ntilité de cet onvrage pour les étndes en Europe est malheusement restriente par son excessive rareté; car l'antenr l'imprime à ses frais et ne le met pas en vente.—La systeme de distribner les ouvrages an lien de les vendre fait honnenr à la magnificience des anteurs on des Gonvernements, mais quelqne soin qn'on mette à les faire parvenir dans les mains de ceux en feraint nsage, on n'y reussit jamais completment, et il vandrait meux, je dirais même, il serait plns généreux de les mettre en vente à un prix assez bas ponr que tous ceux qui en ont besoin pnssent se les procnrer.

L'enterprise de Radhakant Deh est, an reste, d' antant plns meritoire qne l'étnde dn Sanscrit, commc, en général, celle des langnes savantes de l'Orient, ne jamais été aussi pen encouragée dans l' Inde qn'elle l'est actnellement.

Translation.

Rajah Radhakant Deh of Calentta has issned the 5th volume of his Sanscrit Encyclopedic Dictionary. In this work each word is followed by the explanation of its meaning, hy synonyms, the Dictionary being indicated from which they are taken; hy the description of the object to which the word applies; and hy qnotations from the classical works in which it is used.

The ntility of this work for the purposes of stndy in Europe is unfortnnately limited hy reason of its great scarcity, for the anthor presents it at his own cost and does not put it forward for sale. The system of distribnting works instead of selling them, does hononr to the generosity of anthors and Governments, bnt in spite of the care they may take to cause their books to reach the hands of those who can make use of them, they never sncceed completely in effecting their pnrpose, and it would be mnch hetter, and I may even say more genernns, to cause the works to he sold at a price snfficiently low to enahle all those to procnre them who have need of them.

Finally the nndertaking of Radhakant Deb, is so mnch the more meritorions, as the study of the Sanscrit, as that of the learned languages of the East generally, has never been so little encouraged in India as at the present time.

Extract from the Journal of the American Oriental Society, Vol. I, No. 1, *p.* 77.

The learned Radhakant Deb, at Calentta, continnes the printing of his *Thesaurus* of the Sanscrit language and literature; the 4th volnme reached Paris two years ago.

Extract of a letter from G. A. Bushby, Esq., Secretary to the Government of India, dated 15*th January*, 1848.

They (the Conrt) have reqnested the Government to convey to yon their thanks for the presentation of the Dictionary, and to signify their high sense of the industry and learning exhibited in the work.

Extract of a letter from George Cowper, Esq., Secretary to the Government of India, dated 5*th August*, 1853.

I am directed to inform yon that in a despatch recently received, the Hon'hle Court direct the Governor-General in Conncil to convey to yon their acknowledgments for your very valuable and learned work, and to express their satisfaction in finding that yon have jnstly appreciated the motives by which they are actuated in giving encouragement to the cultivation of the ancient language and literature of India.

Extract from the Preface to the Sanscrit and English Dictionary of Dr. Horace Hayman Wilson, Professor of Sanscrit in the University of Oxford, 1*st edition*, 1819, *P. XXXVIII.*

A compilation of a snperior character to any of these modern works and indeed to any of the more ancient works is now in progress in Calcutta, it is entitled the Sabdakalpadruma, and is a Sanscrit Dictionary alphabetically arranged, with reference to the authorities, and with copions explanations in the Sanscrit langnage, it is printed in the Bengali character, it is the work of a young native gentleman of fortnne and family, Radhakanta Deva, with the assistance of the best Pandits, and is printing at his own expense, and is an occupation which singularly contrasts with the low luxury, in which Hindoos of his age and rank ordinarily spend their time and money; the politeness of the anthor has favoured me with the first sheets of the work, bnt I regret, it has not snfficiently advanced for me to benefit by its contents, he has also obliged me with many critical remarks on the earlier part of my own Dictionary, of which, where practicable, I have availed myself. The Sabdakalpadruma mnst take some considerable time before it is completed.

Extract from an article by Dr. H. H. Wilson, published in the Journal of the Asiatic Society of Great Britain and Ireland, Vol. 13, *Pt.* 2, *P.* 209.

Besides the laudable efforts which are being made in India to preserve the memorials of Antiqnity, very meritorious activity prevails there in the promotion of Sanscrit literatnre. Foremost amongst its resnlts, we may place the completion of a volnminous Sanscrit Lexicon, by Rajah Radhakanta Deva, a native gentleman of Calcutta of the highest respectability and well-known as combining a devoted attachment to the institntions and religion of his conntry, with a liberal participation in all public measures for improving the education of his conntrymen by the efficient cultivation of the English language and European literature and science.

Extract of a letter from the same, dated London, 16th August, 1852.

Your perseverance and disinterestedness in this great work are entitled to the highest credit, and it will no doubt perpetuate your name for ever amongst the students of Sanscrit.

Extract of a letter from the same, dated 18th May, 1859.

Your work is an immense storehouse of valuable materials and will be consulted whilst Sanscrit is studied; I wish it were reprinted in a smaller type and on better paper.

Extract of a letter from A. Stirling, Esq., Persian Secretary to the Government of India, dated 23rd January, 1826.

The highest consideration appears to be due to the author for engaging in so useful and at the same time laborious a literary undertaking, and the manner of its execution will afford the most important facilities to the study of Sanscrit letters.

Extract of a letter from William Butterworth Bayley, Vice-president of the Supreme Council of India, dated the 27th January, 1826.

I am well pursuaded that a work to which *you* have devoted much of your time and attention must be highly valuable and useful, and it is gratifying to observe, that your talents and labours are directed to numerous important objects tending to advance the knowledge, to raise the character, and to promote the best interests of your countrymen.

Extract of a letter from G. F. Gordon, Esq., dated 8th February, 1826.

The proof of your munificent application of time and fortune, to the promotion of the literature of your countrymen which your valuable Dictionary affords, in addition to the many other instances exhibited in your zealous support of every public institution that has education for its object, cannot fail to place you high in the esteem of liberal-minded Englishmen * * * and I beg to add my earnest hope that you may long live not merely to complete the work, but to enjoy the well-earned reputation to which it will so justly entitle you.

Extract from the Preface to the Rev. Mr. Morton's Dictionary of the Bengali and English language.

The Sabdakalpadruma now in course of publication by Baboo Radhakanta Deva, whose talents and useful labours reflect the greatest credit on himself and his fellow-countrymen of this Province, and promise to be of eminent service to the students of Hindoo Literature, has been consulted as far as published. The compiler having with equal kindness and liberality been favoured by that gentleman with the copy of the extant portion of his elaborate work, takes this opportunity of offering his grateful acknowledgments to him for the aid thence derived.

Extract of an article by Dr. R. Lenz, published in the Journal of the Royal Asiatic Society of Great Britain and Ireland, Vol. II, P. 188 (1835).

Three volumes of this valuable work comprising each nearly 1000 pages in large quarto, are now in the library of the Royal Asiatic Society, presented to it by the learned author. This portion perfectly justifies the high character, which Professor Wilson gave the work in the first edition of his Dictionary in 1819; anticipating only from a few sheets, then printed, how inestimable a store of authentic information on a variety of subjects connected with Sanscrit literature would be laid open by this admirable undertaking, the expensiveness of which did not however admit a hope of its speedy accomplishment. Radhakanta's work is very distinctly, and generally speaking, accurately printed in the Bengali character; and deserves certainly not the least part of its superior character to the generality of Indian printings from being alphabetically arranged in the European method. A great part of its articles have indeed become comparatively of inferior importance since the appearance of the 2nd edition of Mr. Wilson's Dictionary, where every additional information, supplied by the learned Hindoo on the different meanings of words, has of course been carefully reproduced by the celebrated lexicographer, who was then already in possession of the three volumes before us, except a few sheets at the end of the last. Our recommendation of these volumes is not so much founded on the lexicographical as on the Encyclopædical portion; which forms by far, the most copious and interesting part of the whole; although the first mentioned articles have a fair claim to the attention of the Sanscrit student on account of their ample specification of synonyms, collected from all *coshas* of celebrity and their commentaries, so as to supply in some measure, the deficiency of a dictionary, English and Sanscrit, or that of an index pointing out for any meaning all the variety of Sanscrit expressions. The method adopted by the author in articles of a merely lexicographical nature, is, next to the word in question, to note its gender if a noun, or if not, its grammatical character, then to give a short definition of its meaning by mentioning the class of beings or ideas to which it belongs, next to explain it by corresponding expressions in Bengali; sometimes also in Persian; after which he proceeds to the *Paryáya* or list of synonyms in Sanscrit, which sometimes amount as in the article *Chandra* to the number of one hundred and more, noticing always their respective authorities. * *

We beg to conclude our present remarks on this important work with the prediction, that in its remaining portion the author will probably continue to extend its articles in the same proportion as he has evidently done during his preparation of the present volumes, the third of which contains an article of no less than 162 pages on *Práyaschitta* analogous in form and nature to that on *karmavipaka* which we mentioned above: we only wish he would no longer prevent his European admirers from reaping the advantage of the portion hitherto printed, but at once make up his mind to send to Europe these three volumes, valuable as are their contents, to be sold separately.

Extract of a letter from Eugene Burnouf, Membre de l' Institut de France, dated 5th May, 1835.

J'eprouve une grande satisfaction à vous annoncer que le Conseil de la Sociôté Asiatique de Paris vous a reçn an nombre des membres honoraires, sur la proposition que j'en ai faite et qui a été appuyée par M. Le Dr. Mohl, l'un des membres du conseil. Vous étiez depuis long temps appellé, Monsieur, a faire partie des membres honoraires de la Société, et le conseil n'ignorait pas les grands services qne vous rendez à la litterateur Indienne par la publication de votre Sabda Kalpa Druma, veritable trezor philologique, philosophique et religeux de l'Inde. * * * mais, j'ai deja pu voir parle examen rapide de plusieurs articles etendus, tels que *Prayaschitta Brahmana et* antres, qnelle riche instruction contien cet ouvrage qnè est fait pour placer le rom de son auteur an premier rang des Savants Brahmanes qni ont consaire leurs veillcs à rehut honorable de populariser la belle langue et la litterateur interessante de leurs pères.

Translation.

I feel great pleasure in annonncing to yon, that the Counoil of the Asiatic Socicty has enrolled you as a member npon my proposition, which was supported by Dr. Mohl, one of the members of the Council, yon have been for a length of time nominated to hecome an Honorary Member of the Society, and the Council was not iguorant of the great services yon rendered to Indian Literatnre, by the publication of your Sabdakalpadrnma, a real philological, philosophical and religious treasure of India * * *

I can already see from a brief examination of many excellent articles, such as *Prayaschitta*, *Brahmana* and others, what great instruction can he derived from this work which mnst place the name of its anthor on the first rank of learned Brahmins, who have consecrated their labours to the honourable end for making popular the fine language and interesting literature of their fathers.

Extract of a letter from the same, dated 25th October, 1840.

Je pense que vous n'aviez pas hesoin de cet homage pour être convainen des sentiments de respect et de gratitude que je vous porte ; et du plaisir avec leqnel je me sonviens du heau present que vous avez hien voulu me faire de votre précieux et si utile Sabdakalpadruma. Je ne puis me servir de votre excellent lexiqne sans vous remercier de cœur du service que vous avez rendu à la connaissance de l'Inde en le composant, et à mes études particulierès, en voulant hien m'en adresser un exemplaire.

Translation.

I think you don't reqnire any homage to be convinced of the sentiments of respect and gratitude which I entertain for yon, and of the pleasure with which I remember the beautifnl present which you have been good enough to mako to me of your very valnable and nsefnl Sabdakalpadruma. I cannot make use of your excellent lexicon without thanking you heartily for the service which you have rendered to the literature of India by its preparation, and to my particular studies, in being good enough to present me with a copy of it.

Extract of a letter from Major A. Troyer, Member of the Asiatic Society of Paris, editor of the Raja Tarangini, &c., dated — June, 1837.

Be snre that we expect with great impatience the continuation of your valnahlo Dictionary, honourable mention of which was mado in several philosophical Journals of the Continent.

Ditto, dated Paris, 12th January, 1847.

I have in my last letter expressed to yon his (M. Gorressio's) desire to carry with your name, your excellent Dictionary to Turin, the capital of one of the Italian kingdoms ; your work will be the only one in Italy, which conntry will not then have to envy France and Germany, where your merit is already justly appreciated.

Ditto, dated 18th December, 1849, *quoted in a letter from H. Piddington, Esq., dated 7th February*, 1849.

Onr worthy friend Major Troyer, in a letter from Paris, 18th December, says : "Will you be so kind as to remember me kindly to my friend Rajah Radhakant Deb, and to tell him that Monsr. Gorressio has received his Dictionary, and that the continuation of this most valnahle work is anxiously expected by all the Sanscrit scholars ; tell him, I heg you, that his Sabdakalpadruma shall be a "*Namayasdruma*."

Ditto. Dated Paris 20th March, 1859.

Your very valuable work, the Sabdakalpadruma, perpetnally strikes my eyes among my books, and is often consulted by me. I congratulate yon very sincerely upon the well deserved testimonies of honour which you have received from so many learned Societies of Enrope * * * * . Yon have completed the great service which your lexicon renders, and will for ever render, to Sanscrit literatnre by an Appendix.

Extract of a letter from Dr. Nathaniel Wallich, dated London, 6th June, 1838.

There is a Latin qnotation which I may in perfect truth apply to you : *Exergiste monumentum ære perennius*, that is to say, yon have raised to yourself a trophy more lasting than hrass or other transitory things. I cannot conceive a more stnpendons and noble undertaking than your Sanscrit Dictionary, which jndging from the awfnl labonr of the four first volumes ending with ৎ will at least require another final very big volume. All who have any respect for literature, all who have the least pretension to jndge of the sublimity of the Sanscrit language, and all who not knowing

tho least of it, have at least the decency to suppose that the admiration for the venerable language expressed by such men as a Colebrooke, a Jones, a Mill, a Wilson, a Schlegel, a Wilford, a Carey and the other great foreigners (not to say a word of the natives of this country,) is well founded, all, I say, must feel tho deep gratitude that is due to the great and learned author of such a work as the Sabdakalpadruma.

Extract of a letter from George Norton, Esq., dated 25th September, 1844.

In my position as President of the Madras University, I must bring your splendid work to useful account, and in every way I feel gratified by such a mark of esteem paid to me by a fellow labourer in the cause of native education and advancement.

Extract of a letter from Dr. E. Roer, dated 7th June, 1847.

Accept my sincerest thanks for your kindness in presenting me with a copy of the Dictionary which will be of the highest value to me. I owe to it already a great debt of gratitude for the assistance I derived from it when all other resources failed me. When translating the *Bhásháparichchheda*, the technical terms of which I had sometimes great difficulty in understanding exactly, I found always my doubts removed on referring to the Dictionary, when the Pandit whom I consulted could not give me a satisfactory explanation.

Extract of a letter from H. B. Koenig, Esq., to Dr. E. Roer published in the Journal of the Asiatic Society of Bengal, Vol. 17, Part 1, P. 33.

To the celebrated Radhakanta, I shall by the same opportunity, transmit a copy of all my publications, which I have sent to the Society, for which consignment, yon sir, will be kind enough to procure one or two copies of the celebrated Sanscrit Dictionary published by Radhakanta. The distinguished author, will perhaps be the more inclined to comply with my wishes as he will benefit by it, in a high degree, the Oriental Students in Germany, as I do not design this work for sale, but shall religiously keep it for the numerous applications made to me for its use.

Extract of a letter from the same to the Rajah, dated Bonn, 21st December, 1847.

The applications made to me for the use of this treasure, are already very numerous, though it has not as yet arrived here, and willingly as I would further science, by fulfilling all requests, and granting all wishes, this of course is impossible as the number of those, who devote themselves at present to this branch of science is already too vast even in Germany alone, to allow the use of it to all, however urgent their requests, however desirous and able, they themselves may be, I must be content by granting the use of this work only to the most eminent of the eminent students of Sanscrit, to whom it will be an inexhaustible source of knowledge and wisdom, as it will be a great gratification to me, to be thus instrumental in furthering and increasing science.

Extract of a letter from F. E. Hall, Esq., Assistant Principal, Benares College, dated 26th April, 1850.

In a letter from Dr. Wilson, which Dr. Ballantyne received a short time ago, the learned Oxford Professor expresses himself in much about the same terms respecting your most laudable compilation, that he employs in the Preface to the first Edition of his dictionary, commendation from such a quarter you must of course, in company with all Indian scholars, esteem at its value, which is not light.

Extract of a letter from Dr. Herman Brockhaus, Professor of Sanscrit Literature in the University of Leipzig, and Secretary to the German Oriental Society, dated 5th December, 1850.

You are not unacquainted with the deep interest which has been awakened in Europe by the introduction of the study of the ancient sacred language and literature of your nation, that this interest is heightened every year as new sources of this grand object are opened and become the object of deep and scientific investigation. * * * *

But alas! the necessary resources to bring light and order into this world so new to us often fail us. One of the most important of these resources is your inestimable Sabdakalpadruma. Astonishing is the learning displayed in this great work, so rich in its contents, so invaluable as the most complete collection of the most valuable results of the Indian mind, but alas! it is extremely rare in the Continent of Europe. It is quite impossible to obtain it through booksellers, and as I find myself so often at a loss in my studies from the want of it, I hope you will excuse the request that I here venture to make, *viz.*, to send me a copy of your Sabdakalpadruma.

Extract of a letter from the same, dated 15th December, 1851.

It is a source of heartfelt delight to me, that your obliging and ready compliance, with my request, will put me in possession of the invaluable treasures contained in your Encyclopedia of the Indian language and wisdom.

I shall consider this precious work the gift of your generosity as a deposit presented in some measure to the learned men in Germany, and shall willingly extend my communications to all, who may wish to quaff from this inexhaustible spring. I hope thus to make the most honorable use of your valuable present, and at the same time to comply most worthily with the views and wishes of the generous donor.

Extract of a letter from Edward E. Salisbury, Professor of Sanscrit in Yale College U. S. A. Secretary to the American Oriental Society, dated 28th September, 1850.

While I beg you to receive my gratefnl acknowledgments, I would faiu hope that the fulfilment of your desires, respecting the cultivation of Sauscrit learning iu the Western world, may be promoted hy the introduction of your work into our libraries.

Extract of a letter from Pandita Radhakrishna of the Court of the late Maharaja Ranajita Sinha, dated Lahore, 9th June, 1852.

The 7th Vol. of the said work has not yet reached this station, hut is expected within a very short time. The other volumes of the work have lately occupied my close attention and been found to be an invaluable production in the literary world; your indefatigable labour I firmly believe, will be amply rewarded hy the inestimable advantages, which students will derive from its perusal. * * * * * * * * As I have caused the work to he transcribed in the *Devanagara* character, the Literati, of this Province have thereby an easy access to it; all the Pandits of this country, who have seen it, have expressed their approbation of it in high terms of eulogium.

Extract of a letter from Dr. Charles Lassen, Professor of Sanscrit Literature in Bonn, dated 7th August, 1852.

By the completion of the Sabdakalpadruma one of the most arduous and important literary enterprises, has been brought to a successful conclusion, and thereby a vast treasure of information, on a great number of subjects connected with Indian religion, science, arts, geography, and material productions, has been opened to the literary men who occupy themselves with their study. By this performance your Highness has rendered your name, immortal amongst those of the patrons of Sanscrit philology, and proved to the present age, that India still possesses luminaries of science, which may vie with the most celebrated Hindus of yore for glory, your Highness speaks too moderately of your work by saying, that it may be only useful to the novice in Sanscrit, I have on the contrary by frequently referring to it, after having in vain sought for the desired information in other works, and found which I wanted in your Sabdakalpadruma, convinced myself that it is a rich source of information, on a multitude of subjects. * * * The Sabdakalpadruma forms the chief ornament of my library, and I need hardly add, that I shall ever cherish in grateful memory the benevolence your Highness has bestowed on me by deigning to present me with such an inestimable gift.

Extract of a letter from the same, dated 4th October, 1853.

By this accomplishment your Highness has made an in exhaustible mine, of hitherto hidden treasures accessible to Sauscrit scholars, and placed your name amongst those of the munificent patrons of Indian philology, the cultivators of which will, for ever, venerate your memory as that of one of their greatest benefactors. Your Highness may rest assured that I shall always regard your donation, as a most precious reward for my labours in the field of Hindu Antiquities, and I ardently wish that the 8th volume may soon be published by which this grand, and incomparable work will be completed.

Extract of a letter from Dr. Albrecht Weber, Docent of the Sanscrit language in the University of Berlin, and Editor of the White Yajurveda, &c., dated 21st October, 1855.

The Sabdakalpadruma will remain for ever a monument of your industry and perseverance and a valnable mine of of useful informatlon about the later Hindu notions and literature.

Extract from the Preface to the Sanscrit Worterbuch being published under the auspices of the Imperial Academy of Sciences at St. Petersburgh, by Rudolph Roth and Otto Bohtlingk, Vol. 1, 1855.

Radhakanta's Sabdakalpadruma, eine Werk, welches dem gelehrten Inder in vielfacher Beziehung zur grössten Ehre gereicht, hat uns in den Stand gesetzt, eine grosse zahl von unedirten indischen wörterbucheru nnd von commentaren zu diesen wörterbücheru, welche uns anch handschriftlich nicht zu Gebote stauden, zu benutzen. Arch Anführungen ans editen und unedirten Schriften, vor allem aber die reiche synonymik von Pflauzennamen ist uns sehr zu Statten gekommen. Ein exemplar dieses durch den Buchhandel nicht erreichbaren schätzbaren werkes verdankt die Kaiserliche Akademie der Wisseuschaften der Freigebigkeit des Verfassers.

Translation.

Radhakant's Sabdakalpadruma, a work which in many respects, reflects the highest credit on the learned Indian, has enabled us to make use of a great number of unedited Indian Dictionaries and of commentaries to these Dictionaries of which we possess no copies. It is very useful likewise for its reference to edited and unedited manuscripts containing all the copious synonyms of plants. This precious work is not obtainable through Booksellers, the Imperial Academy of Sciences is indebted for a copy of it to the liberality of the Author.

Extract of a letter from Dr. Max Müller, Editor of the Rig Veda &c. to Dr. E. Roer, dated — 1847. *Published in the Journal of the Asiatic Society of Bengal, Vol.* 17, *Part I, P.* 331.

I would especially be gratified to hear the opinion of learned men above the prejudices of their country as Raja Radhakanta Deva for instance, who by his Dictionary has acquired the lasting gratitude of all Sanscrit scholars, and who best knows that the ancient literature of India need not to be screened from the light of publicity, but may boldly challenge the comparison of the literature of all nations, the history of which shews the same progress of intellectual development.

Extract from Dr. M. Müller's Preface to the Rig Veda Sanhita, Vol. 2.

I have heen also hononred hy that distinguished scholar and nohle patron of Sanscrit literature Raja Radhakant Deva of Calcutta with a most valuable present the Sahdakalpadruma, a work which by its comprehensive range and its excellent arrangement stands unrivalled in Indian Philology.

Extract of a letter from the same, dated London, 30th March, 1856.

I also felt it my dnty to express puhlicly in the preface to my second volnme of the Rig Veda, my personal obligation to you for the valnable present which yon made me of your magnificent work, the Sabdakalpadruma, a work which does infinite credit to your pnhlic spirit, your reverence for the antiqnities of yonr own nation and yonr comprehensive knowledge of all that is truly valuable in the literature of your ancestors. This work will make your name for ever revered among your countrymen and highly respected among the Scholars of Enrope.

तथा च श्रुतिः यावदस्मिंल्लोके पुरुषपुष्पेन कर्म्मणा यूयते तावदयं स्वर्गे लोके वसतीति।

Extract of a letter from Dr. Chütz dated Bielefeld, 21st October, 1857.

Till now I honoured yon deeply as a great scholar, the author of the Sabdakalpadruma, now I love yon as one of the kindest hearts on the earth.

Extract from Art. VI of the Journal of the Royal Asiatic Society of Great Britain and Ireland, read by Professor H. H. Wilson, 19th March, 1859.

The writer, a friend of many years, Raja Radhakanta Deb is well known as a leading member of the Native Society of Calcutta, who adds to the distinction of rank and station, that of a foremost place amongst Sanscrit scholars, as evinced by his great Lexicon or Literary Encyclopædia of the Sanscrit languago, in seven quarto volnmes, the Sabdakalpadrnma, which enjoys a Enropean as well as Indian celebrity. Any opinion coming from him on subjects connected with the ancient literature of his country is entitled to the greatest defcrence.

Her Majesty Qneen Victoria has been graciously pleased to confer on Raja Radhakanta Bahadnr, a distinguished mark of Royal favour by the gift of a splendid gold medal, hearing on one side the head of Her Majesty and on the reverse the words "From Her Majesty Qneen Victoria to Raja Radhakant Bahadnr" and it was accompanied with the following letter from the Right Honorable Sir Charles Wood, Secretary of State for India.

Secretary of State for India in Council.

India Office, 28th July, 1859.

Sir,

I havo laid hefore tho Qneen yonr letter with the copy of the Sabdakalpadruma forwarded hy yon for presentation to Her Majesty; and I am commanded to acquaint yon that Her Majesty has received tho work very graciously, and fnlly appreciating the spirit of loyalty in which you have transmitted it, has directed me to forward to yon the accompanying medal.

I have the honor to he,
Sir,
Your most obedient humble servant,
CHARLES WOOD.

Raja Radhakant Deh Bahadnr.

Extract of a letter from Pundita Vitthala Sastri of the Benares College, dated Samvat 1908.

अद्यमत्र पाठशालायां हालसाहिब् समीपे भवदीयं महान्तं समस्तप्रमाणभूतकोशगणातिवर्तिनम् सर्वेषशास्त्रविषयसंग्रहमनोहरं कोशमवालोकयम् सम्यक् परिचित मुद्रित यन्त्राक्षरतयाच हालसाहिबेन तदालोचनाय नियोजितः प्रथमं सप्तमकाण्डमुखोपन्यस्त मुखबंधनाभिधप्रकरणं यथातथम् चक्षुरादम् तत्रच श्रीमतां भवतां एतत्कोशसमर्पणविषयं सततवर्द्धमान औदार्य्यातिशयम् उपलभ्य एतत्कोशप्राप्तावुत्कण्ठितचेता इमं वर्षदूतं भवत् सविधे प्रस्थापयम् ॥

Translation.

I have seen in this College, with Mr. Hall, yonr grand Lexicon, which surpasses all ancient and modern Dictionaries and derives its excellence from its comprehending the topics of an infinite variety of *Sastras*. As I am well familiar with printed Bengali characters, he has engaged me to examine the work: I have read the Preface at the heginning of the 7th Volnme; observing therein your ever increasing liherality in the distribution of the book, I have, with an anxious heart to obtain it, sent yon this *Literal* Messenger.

Extract of a letter from Raja Vijayagovinda Sinha of Purnia, dated

दैन्यध्वान्तविनाशनैकविलसत् चिद्भास्करप्रक्रमम् ।
प्राविर्भूतं चरणु नान्तमेव नितरां श्रीशब्दकल्पद्रुमम् ॥

Translation.

Excepting only the last volume, I have received the Sabdakalpadruma, which alone exists to dispel the gloom of doubt and furnishes us with the jewel of demonstrated truth.

Extract of a letter from Maharaja Madanamohana of Vishnupura, dated 2nd Aswina.

भवत् प्रेरिताभिरचित शब्दकल्पद्रुमपत्थं दर्शं दर्शं वयमाकम् वयम् सदोमण्डकपण्डितानाञ्च भूयोभूयोऽवधिता परमतुष्टिर्जायते श्रुत्वा तमपि वाक्षीक्यच वयमाभिः नैव नानादर्शनपरिशीलिततत्त्वम् ववगन्तव्यम् ।

Translation.

Myself and the Panditas of my *Sabha* have derived perfect and supreme satisfaction from the perusal of your Sabdakalpadruma sent to us; by applying to it and hearing it recited, we must acquaint ourselves with the result of your extensive researches.

Extract of a letter from Professor Rudolph Roth, dated Tubingen, 14th March, 1859.

— habe ich zunächst um Entschuldigung zu bitten dass ich nicht schon früher den richtigen Empfang des Sabdakalpadruma anzeigte. Genehmigen Sie meinen besten Dank für dieses werthvolle Geschenk, das nicht nur einen Schmuck meiner Bücher sammlung bildet und mir die trefflichsten Dienste leistet, sondern auch mich an die freundlichen Gesinnungen des Gebers erinnert.

Translation.

I have first of all to beg to apologize, that I did not earlier, duly inform you of the Sabdakalpadruma. Accept my best thanks for the precious gift which not only forms an ornament of my library and renders admirable service to me but reminds me of the friendly feeling of the Donor.

Extract of a letter from Pandita Radhakrishna, dated Lahore, 10th May, 1859.

यावच्चन्द्रदिवाकरौ क्षितितले खेलाक्रमा राजत-
स्तावद्देववरस्य कीर्तिरतुला कल्पद्रुमात् स्थास्यति ।
राधाकान्त वपस्य भूपसुमणे भूमण्डले सम्मुदा
जीयाद्दे सच पुत्रपौत्रसहितः श्रीशेन संरक्षितः ॥

धनात् सर्व्वं सर्व्वं नच धनयुताः पण्डितगणाः ।
कथंवेषां सर्वं विदितमिव स्यात् पुस्तक मतात् ॥
सुखात्सारं प्राप्ताः सुगमविधिना यस्य कृतितः ।
क्षितौ राधाकान्तो जयतिहि विद्येषान्नरपतिः ॥

Translation.

As long as the sun and moon will shed on earth the radiance emanating from them so long will the Kalpadruma derived unparalleled glory of Raja Radhakanta, the chief of the Devas and the gem amongst the Rajas, continue in this world, may he, protected by *Srisa*, live delighted with his son, and grandson. Wealth commands everything, but all Panditas are not wealthy, how could they know the contents of hundreds of works. May success attend Radhakanta, the distinguished among the Rajas, by whose felicitously referable work, the essence of knowledge can be easily obtained.

मुखबन्धनं ।

तत्रादौ मङ्गलाचरणश्लोकाः ।

योऽद्वैतसच्चिदानन्दपरब्रह्मेति कीर्त्तितः ।
उपासकानां कार्य्यार्थं कृपया पञ्चधाभवत् ॥
शक्तिः शिवस्तथा सूर्य्यो गणेशो विष्णुरेव च ।
अशेषविघ्ननाशाय भक्तिश्रद्धासमन्वितः ॥

साष्टाङ्गं तं प्रणम्यादौ शिष्टाचारानुसारतः ।
राजावाहादुरोपाधि-श्रीराधाकान्त-देवजः ॥
परेषामुपकाराय शब्दकल्पद्रुमाभिधं ।
कोषं नव्यक्रमयुतं कृतवान् बद्धयत्नतः ॥

ग्रन्थसमाप्तौ मङ्गलाचरणबीजं ।

संस्कृतग्रन्थानामेतादृशी रीतिः सर्व्वत्र प्रचलिता यन्मङ्गलाचरण-श्लोकानुक्रमणिकादिकं ग्रन्थादावेव लेखनीयं भवितुमर्हति । किन्त्वस्मिन् कोषे तन्नाचरितं । तस्यैतत्कारणं । उक्तश्लोकादि-रचन-प्रागेव प्रथम-काण्डादि-मुद्राङ्कन-समापनमात्रेण तल्लिप्सवो स्वदेशविदेशीयमहात्मानः पुनः पुनः प्रार्थयित्वा सर्व्वमेव गृहीतवन्तः । इदानीं एतत्कोषस्य प्रथमादिकाण्डं नोपस्थितं । तेन हेतुना एतन्मङ्गलाचरणादि-रूप-मुखबन्धनं शेषकाण्डपुरोवर्त्ति कृतं । किन्त्वेतद्ग्रन्थारम्भे अथ शब्दकल्पद्रुमो मुद्र्यते इति लिखनेन मङ्गल-वाचकाथ-शब्दप्रयोगादेव एतत्कोषस्य मङ्गलाचरण-सिद्धिर्जाता । तदुक्तं श्राद्धतत्त्व-धृतश्रुतौ,—

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभौ" ॥

ग्रन्थरचनप्रयोजनं ।

अष्टादशसंख्यकासु शास्त्रीयभाषासु संस्कृतभाषा गीर्व्वाणवाणी । अतः सर्व्वाश्रेष्ठा सर्व्वत्र समरूपा सर्व्वजनमान्या च । देवैर्ऋषिभिश्च तद्भाषया अष्टादशविद्याः प्रणीताः । किन्त्वस्मिन् भारतवर्षे उक्तविद्या-सम्बन्धि-पारिभाषिक-शब्दादीनां प्रकाशक-कोषो न प्राप्यते । ते च तत्तद्भाष्य-टीकादिभिरेव चरितार्था भवन्ति । किञ्च महा-महोपाध्यायैः प्राचीन-नवीन-कवि-कोविदगणैः पद्येन पर्य्यायनानार्थ-युक्त-बहुविधाभिधानरचना कृता । किन्तु तत्तद्-ग्रन्थीयैकार्थ-शब्दसंग्रहस्य वर्गस्मरणाभावात् प्रयोजनीय-पर्य्याय-शब्दप्राप्तिः सुदुष्करी । एवं अनेकार्थ-शब्दसंग्रहस्य एकादि-षड्वर-पर्य्यन्त-काम्तादि-हान्तशब्द-निबद्ध-निखिल-श्लोकानां पाठव्यतिरेकेण प्रार्थनीय-नानार्थ-शब्दं-निर्गमोऽतिदुर्गमश्च । विशेषतः तत्तदेकैक-कोषे समग्र-शब्दार्थयोर्लाभाभावः । इत्यादि-दोषमहामालोच्य परोपकाराय पठद्भ्यावधि-वर्त्तमानकाल-पर्य्यन्तं बहुतरपरिश्रमैः धीरवर-निकर-साहाय्यैरेतद्देशप्राप्य-समस्तकोष-वेद-वेदान्तवेदाङ्गभाष्य-व्याकरण-च्छन्दोज्योतिष-साहित्य-नाटक-काव्यालङ्कार-वैद्यक-सङ्गीत-न्याय-सांख्य-पातञ्जल-वैशेषिक-मीमांसा-स्मृति-पुराणेतिहास-तन्त्रागम-निगम-शिल्प-सूपकार-नीतिशास्त्र-कुलाचार्य्य-गोस्वामि-ग्रन्थादिभ्यः शब्दसमूहं संगृह्य कविकल्पद्रुम-नामक-धातुपाठ-ग्रन्थात् धातुनिवहञ्च सङ्कलय्य सकलशब्द-धात्वर्थानामनायासेन लाभार्थं विना पद्येन वर्णव्यवस्थाक्रमेण शब्दकल्पद्रुमाभिधानाभिनवाभिधानं कृतवान् । इमं सप्तकाण्डात्मक-बृहत्कोषं स्वीयकोष-व्ययेन मुद्राङ्कयित्वा मुद्राव्यतिरेकेण नानादिग्देशीय-विशिष्ट-पात्रेभ्यो बन्धुवर्गेभ्यो याचकेभ्यश्च दत्तवान् ॥

ग्रन्थस्य नामकारणं ।

एतत्कोषस्य शब्दकल्पद्रुम-नाम-करण-कारणमेतत् । स्वर्गीय-कल्पद्रुम-सन्निधाने यो यत् प्रार्थयते तस्य तत्प्राप्ति-र्भवत्येव । मत्कृतमर्त्त्यीय-शब्दकल्पद्रुम-समीपे यानि यानि समीहित-शब्दादीनि प्रार्थयन्ते तानि तान्यवश्यं प्राप्नुवन्ति । अतः कल्पवृक्ष-सादृश्यमेव नामकारणं । प्राचीनसंग्रहकृद्भिरपि स्वकृतग्रन्थानां कल्पद्रुम-कल्पतरु-कल्पलता-प्रभृति नामधेयं कृतं । तत्सदृशार्थक-कामधेनु-चिन्तामण्यादि-पुस्तकानि च प्रचलन्ति एतद्ग्रन्थस्य वृक्षरूपकत्वात् अस्य खण्डस्य काण्डेति संज्ञां कृतवान् ॥

अथ ग्रन्थपरिपाटी ।

अतः परमहमेतत्कोषस्यानुक्रमं विशेष-नियमञ्च विवृणोमि । निखिलाभिधानिक-शास्त्रिक-लौकिक-व्यवहारिक-साधुशब्दानां धातुगणानाञ्च झटिति प्राप्तये तेषामानुपूर्व्विकाकारादि-हकारान्त-पञ्चाशद्वर्णानां यथाक्रमं सूचीं कृत्वा विन्यासमकुर्व्वं । तत्र प्रथमं स्वरवर्णादिशब्दानां परे हलवर्णादि-शब्दानां शेषे युक्ताक्षरादि-शब्दानाञ्च वर्णक्रमेणैव यथास्थानं प्रथमा-विभक्त्यन्तत्वेन संस्थापनमकार्षं । पदसाधने येषामनयाक्षराणां विकारो लोपो वा अभवत् ते वर्णास्तत्तच्छब्दोपरि विन्यस्ताः । अनुस्वार-विसर्गाणां षोड़श-स्वरान्तर्गतत्वेन तदुभयवदाद्य-वर्णयुक्त-शब्दान् स्वरवर्णस्थलाभिषिक्तान् चकार । तत्पश्चात् प्रत्येक-शब्दस्य लिङ्गं प्रत्येक-धातोरनुबन्धञ्च निर्णीतवान् । येषां धातूनामनुबन्धो नास्ति तत्स्थानं विन्दुयुक्तमथवा शून्यमास्ते । तदनन्तरं सकल-शब्दानामर्थवाचक-पदानि प्रथमाविभक्त्यन्तत्वेन एवं समस्त-धात्वर्थवाचक-पदानि सप्तमीविभक्त्यन्तत्वेन लिखितानि । प्रत्येक-प्रसिद्ध-शब्दोत्तरं

तदीयपर्य्यायाः देशभाषास्च तथा प्रत्येक-धात्वर्थानन्तरं तट्टीका धातुदीपिकोक्तव्याख्यापदादीनि विहितानि सर्व्वशेषे तेषां प्रमाणानि तदभावे तत्प्रयोगाः तद्विरहे तद्व्युत्पत्ति-लिखिता ॥

वर्णमालायां च वर्ग्य-जकारान्तःस्थयकारौ मूर्द्धन्य-णकार-दन्त्यनकारौ वर्ग्यवकारान्तःस्थवकारौ तालव्यशकार-मूर्द्धन्यषकारदन्त्यसकाराः सन्ति । एतदखिल-वर्णादि-शब्दानां धातूनाञ्च प्रभेदं कृत्वा सूचीपूर्व्वकं यथास्थानं संस्थापनं कृतवान् । वङ्गदेशे उक्तवर्णानामुच्चारण-भेदाभावः । विशेषतो वकार-द्वयस्याकारोच्चारणयोर्भेदो नास्ति पश्चिमादिदेशे वर्त्तते । किन्तु सुग्धबोधटीकायां दुर्गादासविद्यावागीशधृता वकार-भेदिकैकप्राचीनकारिकास्ति । सा यथा,—

"उदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः । अन्तःस्थं तं विजानीयात्तदन्यो वर्ग्य उच्यते" ॥

एतत्कारिकया सकलवकार-प्रभेदो न भवति । इति हेतोरहं धातूनां शब्दाकरत्वादोऽयदन्त्य-वकारादिधातुद्वारा पदसाधनं कृत्वा बङ्ग-प्रयुक्तै-र्वकारद्वय-भेदं प्रकाशितवान् रेफयुक्तवर्णन्तु रवर्णात् परं शब्द-सूचीमध्ये विन्यस्तवान् ॥

पूर्व्वतन-कोषकार-वर्गैः स्वस्वकोषे धातुसङ्ख्यो न कृतः शब्दमात्रसंग्रहः कृतः । किन्तु शब्दानामुत्पत्ति-स्थानं धातुः । अतएवाहं सर्व्वोत्तम-वोपदेवीय-धातुपाठ-कविकल्पद्रुमात् (१०५४) चतुःपञ्चाशदधिक-सप्तदशशत-संख्यक-धातून् सङ्कलय्य एतत्कोषान्तर्गतान् कृतवान् । तच्च १३२ अकारान्त-धातवः । २४ आकारान्त-धातवः । १८ इकारान्त-धातवः । २५ ईकारान्त-धातवः । ३३ उकारान्त-धातवः । १३ ऊकारान्त-धातवः । २१ ऋकारान्त-धातवः । १६ ॠकारान्त-धातवः । ६ एकारान्त-धातवः । २५ ऐकारान्त-धातवः । ५ ओकारान्त-धातवः । ५८ ककारान्त-धातवः । २१ खकारान्त-धातवः । २७ गकारान्त-धातवः । २० घकारान्त-धातवः । ५० चकारान्त-धातवः । १८ छकारान्त-धातवः । ७२ जकारान्त-धातवः । ३ झकारान्त-धातवः । ७१ टकारान्त-धातवः । २३ ठकारान्त-धातवः । ७६ डकारान्त-धातवः । १ ढकारान्त-धातुः । ५० णकारान्त-धातवः । ३१ तकारान्त-धातवः । २८ थकारान्त-धातवः । ७८ दकारान्त-धातवः । ३७ धकारान्त-धातवः । २८ नकारान्त-धातवः । ६४ पकारान्त-धातवः । १५ फकारान्त-धातवः । ४५ बकारान्त-धातवः । ३८ भकारान्त-धातवः । ३३ मकारान्त-धातवः । ३१ यकारान्त-धातवः । ४२ रान्त-धातवः । ८३ लकारान्त-धातवः । ६८ वकारान्त-धातवः । ३८ तालव्यशकारान्त-धातवः । ११६ मूर्द्धन्यषकारान्त-धातवः । ६५ दन्त्यसकारान्त-धातवः । ५० हकारान्त-धातवः । ४२ सौच-धातवः सन्ति । एषां मध्ये संख्याया एकषष्टकारान्त-धातुरेवमेको लकारान्त-धातुर्नास्ति । सौच-धातूनां नियत-प्रयोगाभावः । एतत्समुदाय-धातुर्गणभेदे विभक्तोभूतस्तस्माद्धेतोर्धातु-पाठस्य गणसंज्ञा अभवत् । तन्मध्ये प्रसिद्ध-गणा दश । अवान्तर-गणा अनेके विद्यन्ते । यथा,—

भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्र्यादि-चुरादयः ॥

इति दुर्गादास-विद्यावागीश-कृत-कविकल्पद्रुम-टीका धातुदीपिका ॥ उक्तगणे वोपदेव-विप्रेण अकाराद्यादि-धातुपाठ-क्रमेण अकारान्तादि-धातु-सकलं कथितवान् । किन्त्वहमेतत्क्रमानुगमनमकृत्वा निजकोष-रीत्यनुसारेण शब्दसूचीमध्ये धातुगणान् लिखितवान् ॥

सांकेतिकवर्णचिह्नादीनां विवरणं ।

एतत्पुस्तकस्य प्रतिपत्रस्य प्रत्येक-पृष्ठ-मध्यस्थाने युग्मरेखा-प्रदानेन द्विभागं कृत्वा तद्भागद्वये शब्दादिर्लिखितः । तस्यान्तिम-शब्दादेर्व्वर्णं व्यञ्जन-पर्य्यन्तं उक्तभागद्वयोपरि विन्यस्तमभवत् । तदृष्टिमात्रेण यदक्षर-पर्य्यन्त-शब्द-स्तत्पृष्ठारूढो भूतस्तदोधो भविष्यति । तेनेष्ट-शब्दानामनायासेन लाभो भविता ॥

पुंलिङ्गस्य सङ्केतः "पुं" । स्त्रीलिङ्गस्य संक्षेपः "स्त्री" । क्लीवलिङ्गस्य चिह्नं "क्ली" । वाच्यलिङ्गस्य अर्थात् त्रिलिङ्गस्य लक्ष्म "त्रि" । एवम-व्ययशब्दस्यैक-देशस्य "व्य" इत्यक्षरस्य ग्रहणं कृतं ॥

यस्मिन् स्थले एक-शब्द-घटकी-भूत-वर्णाः पंक्तिद्वये पतितास्तज्ज्ञापनार्थं तत्प्रथमपंक्तिशेषे एका क्षुद्र-समरेखा (-) प्रदत्ता भूता ॥

एकार्थ-शब्दस्योत्तरं एवं प्रमाणस्य पूर्व्वं एका विषम-रेखा (।) प्रदत्ता । भिन्नार्थक-शब्दस्य एवं प्रमाणस्य परं विषम-रेखाद्वयं (॥) विन्यस्तं । प्रथमकाण्डे क्वचिदस्य व्यतिक्रमो जातः ॥

समानार्थक-दि-व्यादि-शब्देष्वेकस्थले उपस्थितेषु तदुत्तरं तज्ज्ञापकं एवम्प्रकार-वेष्टन-चिह्नं " } " दत्तं ॥

विशेषदृष्टान्तसमापनात् परं विशेष-शब्दार्थारम्भात् पूर्व्वञ्च पुष्पाकारचिह्नं (*) कृतं । एवं विस्तारित-विषयान्तर्गत-प्रकरणभेदस्थले पुष्पा-कारेणाङ्कितं ॥

येषां प्रसिद्ध-शब्दानामुत्तरं तत्पर्य्याय-शब्दा लिखितास्तत्संख्यानामङ्कपातः कृतः । तत्रोक्त-प्रसिद्ध-शब्दमेकत्वेन गणयित्वा तत्पर्य्याये द्वयादि-संख्याङ्काः स्थापिताः ॥

पूर्व्वोदित-चतुःपञ्चाशदधिक-सप्तदशशत-धातूनां षट्चत्वारिंशदनुबन्धवर्णानां फलानि लिख्यन्ते ॥

अः—अनुबन्धेषु मध्ये अकारः सुखोच्चारणार्थः । यथा धक्ष नक्ष क नाशने इति ॥

आः—निष्ठाभावादि-कर्म्मवेट् । आकारेतो धातोर्भावे आदिकर्म्मणि च विहिताया निष्ठाया वा इडित्यर्थः । यथा दृम्भिद्या स्नेहे भावादिढे वेति भिन्नं भेदितं तेन । प्रभिन्नः प्रभेदितः सः । भावादिकर्म्मभ्यामन्यत्र निष्ठाया न इम् इत्यर्थः । यथा आदित इति भिन्नः भिन्नवान् ॥

दः—नुन्वान्। वदिङ् नुत्यभिवादयोः। अतएवेदितो नुन् वन्द्यते विष्णुः॥

दर्—वा आङ्वान्। च्युतिर् क्षरणे दरितस्तु वेति अच्युतत् अच्योतीत्॥

दृः—अनिङ्निष्ठः। दीपीङ् यृ दीपने। नेमडीत्येति दीप्तः दीप्तवान्॥

उः—क्वावेट्। चमु भक्षणे। पु क्लिशूदित इम् इति चमित्वा चान्त्वा॥

ऊः—वेट्कः। यस्य सामान्यविधिना इम्विहितः ऊदितः परस्य तस्य वा इम् इत्यर्थः। षिधू शिवे शास्त्रे। वेमूदिदिति असेधीत् असेत्सीत्॥

ऋः—चङ्यृङ्क्षः। चङि ञेः परे अङि परे अङ्क्षः ङ्क्षाभाववान्। यथा ढौक्रङ् गत्यां। अरडृरङ्क्ष इत्यत्र ऋदिद्वर्जनात् अडूढौकत्॥

ॠः—वा चङि अङ्क्षः इत्यनुवर्त्तते। कॄण् आर्त्तस्वरे। भ्राज भ्राशेति अचीकणत्। अचकाणत्। येषां सप्तम-स्वरानुबन्धः कैश्चित् पठ्यते कैश्चिन्न पठ्यते तेषां ङ्क्ष-विकल्पनार्थोऽयमनुबन्धः॥

ऌः—अङ्वान्। ऐागम्ल्ल गत्यां। ग्लास्ल्ह्युत्पुषादेरिति अगमत्॥

एः—सिचि अवृद्धिः। सिचि ञ्यांविहितौ। ए कट् वृतौ वृषि। हसादेः सेम इत्यत्र एदिद्वर्जनात् अकटीत्॥

ऐः—यजादिः स्यात्। यजै ञौ देवार्चने। व्यथग्रहेति जिः इयाज। ग्रहस्वपाद्योरिति इज्यात्॥

ओः—निष्ठातनः। निष्ठायास्तो निष्ठातः निष्ठातेा नेा यस्मात् स निष्ठातनः। रुजेा शौ भङ्गे। स्फुल्लाद्योदिदिति रुग्नः रुग्नवान्॥

औः—अनिट्। ऐा गम्ल्ल गत्यां। वसोरस्येत्यत्र ऋदिद्वर्जनात् गन्ता॥

कः—चुरादिः। गणत्क संख्याने। चुर्भ्यो ञिर्व्वेति गणयति॥

किः—चुरादिर्व्वा। पक्षे गणान्तरनियमाभावात् भ्वादिरित्यर्थः। युज कि संयमे योजयति योजति। यद्यपि चुरादिभ्यो ञिर्व्विकल्प्यते तथाप्यन्येषामनुरोधादिदमुक्तं। अन्येषां मते तु चुरादिभ्यो ञिर्नित्यः। तत्रापि युजप्रभृतिभ्यो वेति। स्वमते तु चुर्भ्यो ञिर्व्वेत्यत्र वाग्रहस्य व्यवस्थावाचित्वात् चुरादिभ्यो ञिर्नित्यः। अत्र युज-प्रभृतिभ्यो वेति॥

गः—क्र्यादिः। डु क्रीञ् ग द्रव्यपर्य्यये। दिवस्तुदेति क्रीणाति॥

गिः—घ्वादिरपि। अपिशब्दात् क्र्यादिश्च। पू ञ गि शोधे। घ्वादेः स्व इतिह्रस्वः पुनाति। अपूः स स्वादिः। पूवर्ज्जितः स घ्वादिर्स्वादिश्च स्यात्। लू ञगि छिदि लुनाति। स्फुल्लाद्योदिदिति लूनः लूनवान्। कॄ गॄ ज्या ग्लाह्लाद्यादेरिति लूनिः॥

घः—रुदादिः। लघिर रुद रोदे। रुद्भ्योऽयोहस्वस्येम इति रोदिति। रुदाद्यस्तीति ईम् अरोदीत्॥

ङः—तङ्वान् कर्त्तरि। कर्त्तरि वाच्ये तङ्वान् आत्मनेपदी। एध ङ वृद्धौ। नवग्रः पमे इति एधते॥

जः—ज्वलाद्यः। ज्वल ज्म चलविषेः। दूनीभूज्वलाद्येति णः ज्वालः। पक्षे पचादित्वादन् ज्वलः। एवं कुच ज रोधपर्ङ्कौटिल्यलेखने। दूनीभूज्वलाद्येति णः कोचः। पक्षे कॄ गॄ ज्ञा प्रीति कः कुचः॥

झः—ज्वलाद्यः। इति केचित्॥

ञः—आत्मने। आत्मने आत्मार्थं फलवति कर्त्तर्य्यात्मनेपदं अफलवति परस्मैपदमिति शेषः यज ञौ देवार्चायां यजते यजमानः यजति याजकः। चुरादेस्तु स्वार्थविहित-ञेर्ज्कारेण ञित्वेऽपि उभयपदं न स्यात् अन्यथा स्वम ञक् वितर्के इत्यादे र्ञानुबन्धो व्यर्थः स्यात्॥

ञिः—अद्यक्षः। अद्य वर्त्तमाने क्षो यस्मात् स अद्यक्षः। ञि ष्ठा स्थाने। ज्ञार्वेच्छार्थञीच्छीलादेरिति स्थितो विष्णुस्तिष्ठतीत्यर्थः॥

टुः—साधुः। टु ङ वेप चलने। द्वितेोऽथुरिति वेपथुः॥

ठः—फणादिः। इति केचित्॥

डुः—चिमगयुतः। छ ञ द डु छतौ। द्वितस्त्रञ्जे इति छत्रिमं॥

णः—फणादिः। फण ण निस्तेहे। ट फल भजेति फेणतुः पफणतुः फेणिथ पफणिथ॥

तः—अदन्तः। अदन्तानां पृथग्वर्गविधानेनैव ज्ञाने सिद्धे तानुबन्धोऽनभ्यासानामङ्गादिषु कान्तत्वादिभ्रमनिरासार्थः।

दः—तनादिः। तन दु ञ विस्तृतौ। तनभ्यः ष्टुविति तनेाति। सेर्लुक् तथासेारिति अतत अतनिष्ट अतथाः अतनिष्टाः। वसतनाद्यनिमामिति प्रतत्य॥

धः—रुधादिकः। रुधिर्धौ ञि ञ आवृतौ। दिवस्तुदेति रुणद्धि॥

नः—स्वादिः। पु ञ्ण सन्ध्याक्लेदपीड़नयेा। दिवस्तुदेति सुनेाति॥

पः—सुचादिः। सुच्ल्ल ग प ञौ मेाचे। तुण्रधेासुचामिति सुञ्चति॥

भः—शमादिः। शमुभिर्य शमे। यन्येाशमादीति शाम्यति॥

मिः—घटादिः। निचिन्नमेादीर्घो वा। दीर्घो दीर्घवान्। घट य म ङ चेष्टे। श्रीस्वमेासुर्घश्चेति अघटि अघाटि घटं घटं घाटं घाटं। निचि ह्रस्वः मेाऽनुवर्त्तते। निचि ञौ ह्रस्वः ह्रस्ववान्। घटादि जनीति घटयति॥

मिः—वा। निचि ह्रस्व इत्यनुवर्त्तते। फण मि ण गतौ। वा सम यम फणेति फणयति फाणयति॥

यः—दिवाद्यः। दिव्यु जिगीषेच्छादौ। दिवसु तुदेति दौव्यति॥

रः—वैदिकः। वेदेष्वेव प्रयुज्यन्ते नतु भाषायामित्यर्थः। गार्लिस्तुतौ जन्मनि। जगाति॥

लः—अदादिकः। अदूौ भक्षे। लुगघ्नोऽपः अत्ति॥

लिः—क्रादिः। क्रादेरदाद्यन्तर्गणत्वेन ख्यातत्वाददादिखसूचकानुबन्धो न कृतः। अथवा लुः स्वपादिश्च लिर्क्रादिरित्येकं वाक्यं। लु लि एतदुभयानुबन्धौ धातू क्रमात् स्वपादिक्रादीनाः। चकारस्योभयत्र सम्बन्धाददादौ चेत्यर्थः। क्रादिः पृथक्गण इत्येके। अतएव पठन्ति च।

"क्राद्यदादौ जुहोत्यादिर्दिवादिः स्वादिरेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः"॥ इति।

ऊलि होमेऽदने। क्रादौ रे दिः जुह्वोति।

लुः—स्वपादिश्च। चकाराददादिश्च। स्वमते स्वपादेः प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादजादौ सार्व्वधातुके। आद्युदात्तत्वमिति वोपदेवः॥

वः—वृतादिः। वृत ङ व ङ वर्त्तने। वृङ्वोनेम पे इति तेनैव परस्मैपदे वर्त्स्यति विवृत्सति। आत्मनेपदे तु वर्त्स्यते विवर्त्सिषते। अन्यत्र विवर्त्सिषा विवृत्सा॥

शः—तुदादिकः। तुदौ ञ श व्यथे। दिवसुतुदेति तुदति॥

शिः—कुटादिश्च। चकारात् तुदादिश्च। कुटां नुम्नौ ञ्जिनि इति नियमात् कुट शि कौटिल्ये इत्यादीनां अकुटीत् इत्यादौ न गुणः। णू शि स्तवने इत्यादीनां अनुवौदित्यादिषु न वृद्धिः। अगुणत्वादुव् च॥

षः—क्षदङ्वान्। आख्यातिकस्याङोऽप्राप्त्यर्थं क्षदिति विशेषणं। खमते तूभयत्र ङ एव। डु ओ श पच पाके। भौषि चिन्नीति पचा॥

चः—जक्षादिः। जक्ष च लु घ भक्षहासयोः। द्विरुक्त जक्षादीति द्विसंज्ञायां शचन्तस्य भ्रिदचोऽङेरिति न नुण् जक्षत्। क्लीवे जक्षश्चेत्तु दः अतुर्नुण् इति जक्षति जक्षन्ति। आख्यातिकेऽन्तोऽन्तो ङेरिति जक्षति। अनुस् भिदेरिति अजक्षुः। इति धातुदीपिकायां अनुबन्धफलनिरूपणं॥

आदिकोषविवरणं।

सर्व्वेषां कोषाणामादि अग्निपुराणोक्ताभिधानं। तत्रादौ स्वर्गपातालादिवर्गः। ततोऽव्ययवर्गः। ततो नानार्थवर्गः। ततो भूपुराद्रिवनौषधिसिंहादिवर्गाः। ततो नृब्रह्मक्षत्रविट्शूद्रवर्गाः। शेषे सामान्यानि नामलिङ्गानि सन्तीति मया दृष्टं। अमरसिंहस्तु उक्ताग्निपुराणीयाभिधानस्य कस्यचित् कस्यचित् वर्गस्य व्यतिक्रमं कृत्वा तत्रोदित-सामान्य-नामलिङ्गानां विशेष्य-निघ्न-वर्गभङ्गीर्णवर्गाविति संज्ञां स्थापयित्वा अन्ते लिङ्गादिसंग्रहवर्गस्य योगं कृत्वा स्वीयकोषं रचितवान्। एवं जटाधरोऽपि अमरकोषस्यानुकरणं कृतवान्। इति विरलप्रचारः॥

प्राप्तकोषादिनामानि।

अत्राभिधाने मत्प्राप्तयद्यत्कोषादितः शब्दादयः संगृहीतास्तेषां संज्ञाः पश्चाल्लिख्यन्ते॥

अमरसिंहकृतं	नामलिङ्गानुशासनं ..	१	पुरुषोत्तम देवकृतः	त्रिकाण्डशेषः	१५
अजयपालकृतः	नानार्थसंग्रहः	२	तत्सुता	हारावली	१६
गदसिंहकृता	नानार्थध्वनिमञ्जरी ..	३	भावमिश्रकृतः	भावप्रकाशः	१७
चक्रपाणिदत्तकृता	शब्दचन्द्रिका	४	मधुरेशपण्डितकृता	शब्दरत्नावली	१८
जटाधराचार्य्यकृतः	पर्य्यायनानार्थकोषः ..	५	महेश्वरवैद्यकृतः	विश्वप्रकाशः	१९
दण्डाधिनाथकृता	नानार्थरत्नमाला ..	६	मेदिनीकरवैद्यकृतः	नानार्थशब्दकोषः ..	२०
दुर्गादासविद्यावागीशकृता	धातुदीपिका	७	रामेश्वरशर्म्मकृता	शब्दमाला	२१
धनञ्जयकविकृता	नाममाला	८	रत्नमालाकरवैद्यकृता ..	आयुर्वेदार्णवोत्थितपर्य्यायरत्नमाला	२२
धरणिदासब्राह्मणकृतः ..	सारसंग्रहनामकानेकार्थसमुच्चयः	९	वोपदेवविप्रकृतः	कविकल्पद्रुमः	२३
नरसिंहकाश्मीरपण्डितकृतः ..	निर्घण्टुराजः अर्थात् राजनिर्घण्टः	१०	श्रीनन्दनभट्टाचार्य्यकृतं ..	वर्णाभिधानं	२४
नारायणदासकविराजकृतः ..	राजवल्लभः	११	श्रीरामशर्म्मकृतः	उणादिकोषः	२५
पद्मनाभदत्तद्विजकृतः ..	भूरिप्रयोगाः	१२	सिद्धान्तकौमुदीसंक्षिप्तसारकारकृते	उणादिवृत्तौ ..	२६।२७
पुरुषोत्तमदेवकृतः	एकाक्षरकोषः	१३	हलायुधभट्टकृता	अभिधानरत्नमाला ..	२८
तत्कृतः	द्विरूपकोषः	१४	हेमचन्द्रजैनकृतः	अभिधानचिन्तामणिः	२९

अप्राप्तकोषनामानि।

एतद्भिन्नानेकप्राचीनाभिधानानि सन्ति। यद्यपि तानि मया अप्राप्तानि तथापि तेषां मध्ये बहुकोषाणां प्रयोगप्रमाणानि अमरटीकाधृतानि आमादितानि। एवं विश्वमेदिनीकोषे तत्सकलाभिधानानां शब्दाः समाहृताः। उक्तकोषद्वयशब्दानां शब्दकल्पद्रुमाभ्यन्तरितत्वेन वक्ष्यमाणसमस्तप्राचीनकोषाणां शब्दाः एतत्कोषान्तर्गता भूताः।

विश्वधृतप्राचीनकोषाः ।

भोगीन्द्र १	वाचस्पति ४	मङ्गल ७	भागुरिरचितकोषाः .. १०
कात्यायन २	व्याडि ५	शुभाङ्ग ८	
साहसाङ्क ३	विश्वरूप ६	वोपालित ९	

मेदिनीधृतप्राचीनकोषाः ।

उत्पलिनी .. १	रन्तिदेव ७	गङ्गाधर १३	चन्द्र १९
शब्दार्णवः २	रत्नापरनामहर .. ८	वाभट १४	विक्रमादित्य .. २०
संसारावर्त्तः .. ३	गोवर्द्धन ९	माधव १५	गोमिरचितकोषाः .. २१
नाममालाख्यः .. ४	रभसपाल १०	धर्म्म १६	पाणिनिपदानुशासनञ्च .. २२
वररुचि ५	रुद्र ११	तारपाल १७	
शाश्वत् ६	अमरदत्त १२	वामन १८	

एतदन्ये बलहड्डप्रभृतिकृतकोषाः सन्ति ॥

लभ्यालभ्यामरकोषटीकानामानि ।

अमरकोषश्च भृशप्रामाणिकः व्युत्पादकश्च । तस्मात् बहुतरटीकाकारैस्तस्य नानाविधा टीका कृता । तन्मध्ये कतिपयलभ्यटीकानां प्रमाणानि शब्दकल्पद्रुमे दत्तानि । किन्तु तत्समुदायटीकाकृन्नामानि टीकानामधेयानि चाहं व्यक्तीकरोमि ॥

क्षीरस्वामी .. १	माधवी ११	कोलाहलाचार्य्यः .. २१	कृता व्याख्यासुधीः .. ३०
सुभूतिः २	मधुमाधवी १२	ध्रुवस्वामी .. २२	अच्युतोपाध्यायकृतव्याख्या-
हड्डुचन्द्रः ३	सर्व्वानन्दः १३	रामतर्कवागीशः .. २३	प्रदीपः ३१
कलिङ्गः ४	अभिनन्द १४	नयनानन्दः २४	मथुरेशविद्यालङ्कारकृता
कोङ्कटः ५	मल्लिनाथः १५	विद्याविनोदः .. २५	सारसुन्दरी .. ३२
सर्व्वधरः ६	रायमुकुटमणिः .. १६	रघुनाथचक्रवर्त्ती .. २६	नारायणचक्रवर्त्तिकृता पदार्थ-
राजदेवः ७	नीलकण्ठः १७	व्याख्यामृतः .. २७	कौमुदी ३३
गोवर्द्धनः ८	अरुणः १८	टीकासर्व्वस्वः .. २८	रमानाथविद्यावाचस्पतिकृत-
द्राविड़ः ९	भगीरथः १९	सन्देहभञ्जिका .. २९	चिन्ताङ्गविवेक .. ३४
भोजराजः १०	जयादित्यः २०	रामाश्रमापरनामभानुदीक्षित-	भरतमल्लिककृता मुग्धबोध
			सम्मता टीका .. ३५

एतद्भिन्ना अपि टीका वर्त्तन्ते ॥

अत्राहृतविषयवृन्दं शब्दसिन्धुदुस्तरत्वञ्च विज्ञापयामि ।

कोषगणातिरिक्तनानाशास्त्रोक्तशब्दप्रमाणप्रयोगोपाख्यानादीनि । चातुर्व्वेदिकषाड्दर्शनिकमतविवरणपदार्थकर्म्मोपासनाज्ञानकाण्डब्रह्मनिरूपण-वेदाङ्गशिक्षादीनि । शाब्दिककाव्यालङ्कारिकछान्दसिकसूत्रवृत्तिमात्रानामलक्षणोदाहरणचित्रकाव्यनवरसरतिवन्धादयः । स्मार्त्तयज्ञमलमासादि-लक्षणदायभागशौचसंस्कारप्रायश्चित्तोद्वाहतिथिकृत्यजन्माष्टमीदुर्गोत्सवाष्टादशविवादपद-चतुष्पाद्व्यवहारैकादश्याद्युपवासनिर्णयतड़ागभवनवृषोत्सर्गव्रतप्र-तिष्ठापरीक्षाज्योतिःशुभाशुभदिनादिवास्तुयागदीक्षाङ्किकाचारमासकृत्यपुरुषोत्तमादिमाहात्म्यश्राद्धप्रयोगकृत्यकर्म्मविपाकदाद्यश्याधिकरणदत्तकव्यवस्था-दयः । पौराणिकतान्त्रिकवर्णतत्त्वषट्कर्म्मस्नानतर्पणपूजामुद्रामन्त्रयन्त्रजपहोमबलिध्यानस्तवकवचमाहात्म्यभुवनस्वर्गनरकदेतवादानवतीर्थावतारनदनदीदे-शभेदपीठपर्वतवृत्तराजनीतिवर्णाश्रमधर्म्मवर्णसङ्करद्रव्यशुद्धिमहादाननिधिरत्नाद्युत्पत्तिसृष्टिप्रलयदुर्गपुरमन्दिरश्रीमूर्त्तिनिर्म्माणप्रमाणादीनि । ज्यौतिषिक-सैद्धान्तिकवारतिथिनक्षत्रयोगकरणसंक्रान्तिमासवर्षायनजातफलाकालग्रहणनक्षत्रधूमकेतुस्त्रीपुरुषादिशुभाशुभलक्षणशकुनस्वरोदयगणिताङ्कलेख-व्यवहारराशिचक्रभुगोलखगोलदृग्गोलवर्णनादीनि । आयुर्व्वेदीयजन्मक्रमशरीरस्थानरोगनिदानपूर्वरूपसम्प्राप्त्युपशयचिकित्सौषधद्रव्यगुणपाचनजारणमा-रणपथ्यापथ्यनाड़ीमूत्रजिह्वापरीक्षापञ्चकर्म्मषड्रसोत्पत्त्याख्यानादयः । गान्धर्व्ववेदीयनृत्यगीतवाद्यस्वरताललयतानमानग्रामश्रुतिमूर्च्छनारागरागिणीत-त्पुत्रतद्भार्य्यागानसमयध्रुवकगमकनायकनायिकानिरूपणादीनि । युक्तिकल्पतरुयन्त्रीयनौतिद्वन्दनगरीवास्तुराजगृहविशेषसामान्यासनोपकरणालङ्कारास्त्र-याचायुक्तयः तथा चतुष्पद्द्विपदनिष्पदयानोद्देशाः । पत्रकौमुदीयपत्रप्रमाणभङ्गरचनलेखननयनपटनचिह्नकोणच्छेदनपदन्यास श्रीशब्दविन्यासप्रश्न-स्तिप्रकरणादीनि । कुलाचार्य्यादिग्रन्थीयब्राह्मणवैद्यकायस्थानामुत्पत्तिवंशगोत्रप्रवरपर्य्यायश्रोत्रियकुलीनमौलिकगोष्ठीपतिनिर्णयादीनि च शब्दकल्पद्रुमस्य सप्तकाण्डे मया समाहृतानि । यान्यवशिष्टानि तानि परिशिष्टे प्रवक्ष्यामि । तत्तद्ग्रन्थनामानि वाहुल्यभिया नोक्तानि । तथापि शब्दसमुद्रस्य पारगमनं दुष्करतरं । तदुक्तं कलापमुग्धबोधटीकाधृतश्लोके ।

अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ । नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः ॥

परिशिष्टकरणकारणम्।

अस्मिन् सप्तकाण्डात्मकशब्दकल्पद्रुमपुस्तके ये ये शब्दार्थप्रमाणप्रयोगादयः पूर्वं प्राप्त्यभावेन न संगृहीताः। अथवा भ्रमवशात् पतिताः। एवं यस्य यस्य रोगस्य निदानमात्रं लिखितं तत्तद्दौषधानि न विहितानि। एवं येषां शब्दानां अमरातिरिक्तकोषोक्तपर्य्यायशब्दसङ्कलनं न कृतं। एवं दीकारोत्तरचकारादिवर्णयुक्तकतिपयशब्दानां मुद्राङ्कनप्रमादेन स्खलनं जातं। एवं अकाराद्यादिवर्ग्यवकारादिपर्य्यन्तधातूनां तत्तद्दीकाधृतपदोदाहरणादयः पुरा न लिखिताः। एतत्सर्वमवशिष्टं परिशिष्टमध्ये लिपिबद्धीकरिष्यामि। अतःपरमेतत्परिशिष्टीयापुनरुक्तशब्दादीन् प्रागुदितसप्तकाण्डीयशब्दसूचीमध्ये यथास्थानं स्थापयित्वा ग्रन्थसमाप्तौ मङ्गलाचरणबीजं परिशिष्टकरणकारणञ्च हित्वा एतन्मुखबन्धनं प्रथमकाण्डस्य पूर्वं योजयित्वा पुनर्मुद्राङ्कने कृते एष कोषः सुसम्पूर्णः भविष्यति। किञ्च पश्चिमदेशीयलोकानां महोपकाराय देवनागराक्षरेण एतत्कोषमुद्राङ्कनार्थं पाश्चात्या महत्सुवर्णा ममान्तिके बहुशः प्रार्थयन्ते। किन्तु तत्प्रार्थनापूरणे मदीयायुषोऽनुकूलतायां सन्दिहानो विहितोऽस्मि। यद्यपि कश्चित् विपश्चित् किम्वा विषयी स्वोपलाभार्थं मत्कृतैतद्ग्रन्थाधिकारं यथारीति गृहीत्वा अस्मिन् कर्म्मणि प्रवर्त्तेत तत्र ममापत्तिर्नास्तीति॥

शाके वह्निमसुद्रशैलधरणीमानेऽरुणे कर्कटे, याते खाग्निमिताब्दतः परममौ मत्शब्दकल्पद्रुमः।
काण्डैः सप्तभिरन्वितो भगवतोऽनुक्रोशतः, पूर्णतां प्राप्तो दूषणमस्ति किञ्चिदिह चेत् तत् क्षम्यतां साधुभिः॥

अथ सर्व्वोपासकसम्मतमङ्गलाचरणोनविंशतिपद्यानि।

वेदा वदन्ति यं सत्यमानन्दमद्वितीयकम्।
तथाम्नतञ्चैकरूपमवाङ्मनसगोचरम्॥
सर्वातीतं सर्वगतं चिदेकरसमेव च
देशकालापरिच्छिन्नमपादमपि शीघ्रगम्॥
सर्वग्रहमपाणिञ्च सर्वेषां दर्शकं तथा।
अचक्षुषमपि श्रोत्रहीनं श्रोतारकं पुनः॥
अचिन्त्यमपि सर्वज्ञं सर्वेषाञ्च नियामकम्।
सर्वशक्तियुतं सृष्टिस्थितिप्रलयकारकम्॥१॥
तथौपनिषदा यं हि शुद्धबुद्धस्वभावकम्॥२॥
कथयन्त्यादिविद्वांसं सिद्धं यं कापिला विदुः॥३॥
क्लेशकर्म्मविपाकाशयापरामृष्टमेव यं।
निर्म्माणकायमास्थाय सम्प्रदायप्रवर्त्तकम्॥
तथानुग्राहकमपि प्रभाषन्ते पतञ्जलाः॥४॥
लोकवेदविरुद्धैर्यं निर्लेपञ्च स्वतन्त्रकम्॥
महापाशुपताः सर्वे ब्रुवन्ति सततं भुवि।५।
शैवाः शिवं यं वदन्ति वैष्णवाः पुरुषोत्तमम्॥६।७॥
पितामहमिति प्राज्ञः पौराणिकजना विदुः।८।
याज्ञिका यज्ञपुरुषं सर्वज्ञमिति सौगताः॥९।१०॥
निरावरणमित्येव प्रलपन्ति दिगम्बराः।११।
यमुपास्यस्वरूपेण देशितं हि निरन्तरम्॥
मीमांसका वै भाषन्ते चार्वाकाः प्रवदन्ति यं।
लोकानां व्यवहारेण सिद्धं सन्ततमेव च॥१२।१३॥
यावदुक्तोपपन्नं हि न्यायज्ञाः सम्प्रचक्षते।१४।
शिल्पिनो विश्वकर्म्मेति यं भणन्ति सुनिश्चितम्॥१५॥
शाक्ता वदन्ति यं नित्यामाद्याप्रकृतिरूपिणीम्।१६।
सौरास्तेजोमयं सूर्य्यं गाणपत्या गणेश्वरम्॥१७।१८॥
रामानुजा यं वदन्ति विशिष्टाद्वैतवादिनः।
लक्ष्मीनारायणं भक्ताधीनं नित्यशरीरिणम्॥१९॥
निम्बादित्यास्तथा माध्वाचार्य्याद्या द्वैतवादिनः।
विष्णुं सशक्तिं सन्मूर्त्तिं धर्माऊर्भक्तवत्सलम्॥२०॥
रामानन्दा रामचन्द्रं भक्तानुग्रहकारकम्।
सीतया सहितं प्रोचुर्यं नित्यं नित्यविग्रहम्॥२१॥
श्रीमन्माध्वानुयायि श्रीनित्यानन्दादिवंशजाः।
गोस्वामिनो नन्दसूनुं श्रीकृष्णं प्रवदन्ति यं॥२२॥
कायेन मनसा वाचा भक्त्या च प्रणिपत्य तम्।
श्रीराधाकान्तदेवेन राज्ञातिविनयेच्छतः।
शब्दादीन्यवशिष्टानि संगृह्य बहुशास्त्रतः।
परिशिष्टः शब्दकल्पद्रुमस्य क्रियतेऽधुना॥

अथ ग्रन्थप्रतिज्ञानवश्लोकाः।

शब्दकल्पद्रुमग्रन्थे सप्तकाण्डमयेऽखिले।
येषामेव हि शब्दार्थपर्य्यायाणां तथैव च॥
प्रमाणानां प्रयोगाणां धातुसम्बन्धिनां पुनः।
पदोदाहरणानाञ्च चिकित्सानां गदस्य च॥
न संग्रहोऽभवत् पूर्वग्रन्थे कारणकूटतः।
तेषां सङ्कलनञ्चास्मिन् परिशिष्टे करोम्यहम्॥

तथा वेदनिघण्टाख्यः पञ्चाध्यायसमन्वितः ।
वैदिकानाञ्च शब्दानामतिप्राचीनकोषकः ॥
तस्याच्च देशे विरलप्रचारत्वेन तद्धृतः ।
पर्य्यायशब्दसन्दोहः केनापि कोषकारिणा ॥
न संगृहीतस्तद्धेतोर्दुरूहोऽयुत एव च ।
प्रायो वैदिकशब्दार्थो बोधगम्यो भवेन्नहि ॥

अतस्तत्प्रथमाध्याये द्वितीये च तृतीयके ।
येषां स्थितानां शब्दानां पर्य्यायान् परिशिष्टगान् ॥
करिष्यामस्य निम्ने हि तेषां वर्गस्तु नाम च ।
तथा सङ्ख्या विलिख्यन्ते लोकानां ज्ञानहेतवे ॥
चतुर्थे पञ्चमाध्याये यदस्ति पदवृन्दकम् ।
तत्पर्य्यायस्य बोधस्य चाभावान्नात्र गृह्यते ॥

तत्र प्रथमाध्याये ४१४ नामानि यथा ।

वर्गः	नाम	सङ्ख्या
१	पृथिवीनामधेयानि ..	२१
२	हिरण्यनामानि	१५
३	अन्तरीक्षनामानि ..	१६
४	साधारणनामानि ..	६
५	रश्मिनामानि	१५
६	दिङ्नामानि	८
७	रात्रिनामानि	२३
८	राज्युपनामानि ..	१६
९	अहर्नामानि	१२
१०	मेघनामानि	३०
११	वाङ्नामानि	५७
१२	उदकनामानि ..	१००
१३	नदीनामानि	३७
१४	अश्वनामानि	२६
१५	आदिष्टोपयोजनानि	१०
१६	ज्वलतिकर्म्माणः ..	११
१७	ज्वलतो नामधेयानि	११

इति वेदनिघण्टौ प्रथमाध्यायः ॥

द्वितीयाध्याये ५१६ नामानि ।

वर्गः	नाम	सङ्ख्या
१	कर्म्मनामानि	२६
२	अपत्यनामानि ..	१५
३	नृनामानि	२५
४	बाहुनामानि	२२
५	अङ्गुलिनामानि ..	२२
६	कान्तिकर्म्माणः ..	१८
७	अन्ननामानि	२८
८	अस्तिकर्म्माणः ..	१०
९	बलनामानि	२८
१०	धननामानि	२८
११	गोनामानि	९
१२	क्रुध्यतिकर्म्माणः ..	१०
१३	क्रोधनामानि	११
१४	गतिकर्म्माणः	१२२
१५	क्षिप्रनामानि	२६
१६	अन्तिकनामानि ..	११
१७	संग्रामनामानि ..	४६
१८	व्याप्तिकर्म्माणः ..	१०
१९	बधकर्म्माणः	३३
२०	वचनामानि	१८
२१	ऐश्वर्य्यकर्म्माणः ..	४
२२	ईश्वरनामानि ..	४

इति वेदनिघण्टौ द्वितीयाध्यायः ॥

तृतीयाध्याये ४१० नामानि ।

वर्गः	नाम	सङ्ख्या
१	बऊनामानि	१२
२	क्षत्रनामानि	११
३	मनुष्यनामानि	२५
४	स्तृहनामानि	२२
५	परिचरणकर्म्माणः ..	१०
६	सुखनामानि	२०
७	रूपनामानि	१६
८	प्रशस्यनामानि ..	१०
९	प्रज्ञानामानि	११
१०	सत्यनामानि	६
११	पशुगतिकर्म्माणः ..	८
१२	उत्तराणि पदानि सर्व्व-पदसमाम्नाय ..	९
१३	उपमानामानि ..	१२
१४	अर्चतिकर्म्माणः ..	४४
१५	मेधाविनामानि ..	२४
१६	स्तोटनामानि	१३
१७	यज्ञनामानि	१५
१८	ऋत्विङ्नामानि ..	८
१९	याच्ञाकर्म्माणः ..	१७
२०	दानकर्म्माणः	१०
२१	अध्येषणाकर्म्माणः ..	४
२२	स्वपितिकर्म्माणः ..	२
२३	कूपनामानि	१४
२४	स्तेननामानि	१४
२५	निर्णीतान्तर्हितनामधेयानि	६
२६	दूरनामानि	५
२७	पुराणनामानि ..	६
२८	नूतननामानि	६
२९	दिग्व उत्तराणि नामानि	२६
३०	द्यावापृथिव्योर्नामधेयानि	२४

इति वेदनिघण्टौ तृतीयाध्यायः ॥

चतुर्थाध्याये २७८ पदानि ।

वर्गः	पदं	सङ्ख्या
१	अहा इत्यादिपदानि	६२
२	सखिमित्यादिपदानि	८४
३	आसुसुक्षणिरित्यादि-पदानि	१३२

इति वेदनिघण्टौ चतुर्थाध्यायः ॥

पञ्चमाध्याये १५१ पदानि ।

वर्गः	पदं	सङ्ख्या
१	अग्निरित्यादिपदानि	३
२	इविणोदा इत्यादि-पदानि	१३
३	अश्व इत्यादिपदानि ..	३६
४	वायुरित्यादिपदानि ..	३२
५	श्येन इत्यादिपदानि ..	३६
६	अश्विनावित्यादिपदानि	३१

इति वेदनिघण्टौ पञ्चमाध्यायः ॥

अथ ग्रन्थस्यानुक्रमणिकादिलेखनाभावकारणं वृत्तद्वयम् ।

ग्रन्थस्यानुक्रमणिका साङ्केताक्षरलक्ष्म च । परिशिष्टस्य करणे कारणादिकमेव हि ॥
पूर्वं सप्तमकाण्डीयमुखबन्धे प्रकीर्त्तितम् । अतो न लिख्यतेऽत्रैव पुनरुक्तिभयान्मया ॥

अथादर्शपत्राणां वल्मीकभक्षणजन्यमनस्तापतन्निवारणहेतुपद्यानि ।

इदानीं परिशिष्टीयबऊलादर्शपत्रिकाः । तापो जामाढदौहित्रगणैरेव निवारितः ॥
यन्त्रालयमसुत्पन्नवल्मीकगणभक्षिताः ॥ यतस्ते परिशिष्टीयशब्दैरन्यैश्च संयुतम् ।
अतस्तद्गतशब्दानां नाभवन्मुद्रयाङ्कनम् । देवनागरवर्णेन शब्दकल्पद्रुमं पुनः ॥
तच्चेद्भूतं तदा ग्रन्थबाऊल्यं समजायत ॥ मुद्राङ्कितं प्रकुर्वन्ति यत्नेनातिशयेन च ।
किन्तु सांप्रतमादर्शनाशजन्यो मनोगतः । तस्य प्रकाशाल्लोकानामुपकारो भविष्यति ॥

अथ ग्रन्थकर्तुर्व्वंशवर्णनश्लोकाः।

आसीत् श्रीहरिदेवाख्यः श्रीहरेरंशरूपकः।
कायस्थानां कुले देववंशस्योद्भवहेतुकः॥
मुरशिदावादनगरामन्ने खजनपालकः।
कर्णसुवर्णनामधेयसमाजे वासकारकः॥
सदा हरिपदाम्भोजयुगलध्यानकारकः।
मौद्गल्यगोत्रजातानामेष बीजाभिधानकः॥ १॥
तस्य दूर्गावरो नाम सुतः सर्वगुणान्वितः। २।
तस्माद्विश्वेश्वरो जातस्तस्य विप्रेश्वरः सुतः॥ ३। ४॥
सदानन्देन संपूर्णः पूर्णानन्दोऽभवत्ततः। ५।
खानोपाधिस्तत्तनयः पीताम्बर इति स्मृतः॥
अदभ्रशालिशालित्वाद्धान्यपीताम्बरेति च।
विख्यातो भुवि सर्वत्र गोष्ठीपतिवरः स च॥ ६॥
पृथ्वीधरस्तत्तनूजस्तस्माच्च कुरुनन्दनः। ७। ८।
चत्वारस्तनयास्तस्य चतुर्दिग्निवासिनः॥
प्रथमः शिवदासाख्यश्चौखण्डिख्यातिसंयुतः।
मलुयीनामके देशे वासस्तेन सदा कृतः॥
नित्यानन्दो द्वितीयस्तु रायोपाधिः सुविश्रुतः।
कृतसौदपुरावासो नित्यानन्देन पूरितः॥
चतुर्भुजस्तृतीयो यः सोऽपि रायेत्युदाहृतः।
तालायामकृतावासश्चतुर्भुजपदाश्रितः॥
चतुर्थः श्रीनाथरायो धुले पुरकृतायनः।
सदा श्रीनाथचरणाम्भोजार्चनपरायणः॥ ९॥
नित्यानन्दात्मजः श्रीमान् श्रीमन्तेतिसमीरितः॥१०॥
चण्डीवरस्तस्य पुत्रश्चण्डिकापूजने रतः॥ ११॥
तज्जातः परमानन्दः परमानन्ददायकः॥ १२॥
काशीनाथश्च विजयावक्षभस्तत्कुमारकः।
ज्येष्ठस्तु मल्लिकोपाधी रायोपाधिः कनिष्ठकः। १३।
विजयावक्षभाज्जातः कृष्णानन्दोद्विजार्चकः॥ १४॥
रघुनन्दनदेवस्तत्तनयः परिकीर्त्तितः। १५।
विद्याधरस्तस्य सूनू रायेतिख्यातिमागतः॥
आदौ नाजरायामवासी निताड़ावासकृत्ततः। १६।
तस्यात्मजो हरिहरो जातो हरिहराश्रितः॥ १७॥
षट् सुतास्तस्य विज्ञेयाः सर्वलोकप्रशंसिताः।
ज्येष्ठस्तु यादवानन्दः सदा यादवसेविता॥
द्वितीयोरामचन्द्राख्यस्तृतीयो लक्ष्मणो मतः।
देवीदासस्तुरीयोऽभूत् मजुमदार उपाधितः॥
परोपकारनिरतः सदा बन्धुभिरावृतः।
मुड़ागाछादिदेशानां कानुनगोपदमागतः॥
स च तस्मिन् जनपदे कर्णसुवर्णसमाजतः।
उत्थाय वासमकरोत् पुत्रदारादिभिर्यतः॥
दुर्गादासः पञ्चमस्तु सदा दुर्गाप्रपूजकः।
षष्ठस्तु माधवानन्दः सर्वानन्दप्रदायकः॥ १८॥
देवीदासमजुमदारतनयाः षट् प्रजाभृतः।
गौरीकान्तो ज्येष्ठपुत्रः स च वंशविवर्जितः॥
चण्डीशरणसंज्ञस्तु मध्यमश्चण्डिकार्चकः।
तृतीयः पुण्डरीकाक्षः सहस्राक्षश्चतुर्थकः॥
महावङ्गकृतो यो हि पदे पैत्र्ये नियोजितः।
सरकारोपाधियुतो राजेन्द्रः पञ्चमः सुतः॥
कामारपोलयामान्तर्वासस्तेन विनिर्म्मितः।
कनिष्ठो रुक्मिणीकान्तो बन्धुभिर्ज्ञातिभिर्वृतः॥
मुड़ागाछाप्रदेशे तु पञ्चग्रामे ह्यधिष्ठितः।
स च केशवरायस्य चचियस्य विशेषतः॥
अप्राप्तव्यवहारस्य विख्यातस्य समन्ततः।
तद्देशाधिपते राज्ये नवाबेन नियोजितः॥
अपश्यद्व्यवहारांश्च तद्राज्यशासने रतः।
अतोऽस्मिन् भूतले लोकैर्व्यवहर्त्तेति कीर्त्तितः॥ १९॥
तस्यैव तु कनिष्ठस्य चत्वारो देहसम्भवाः।
धार्म्मिकाः कर्म्मकुशला लोके संप्राप्तगौरवाः॥
ज्येष्ठो रामेश्वरः पैत्र्यं पदं प्राप्तः कृताश्रमः।
महावङ्गकृतस्तेषु कृष्णरामस्तु मध्यमः॥
राजारामस्तृतीयस्तु तेषां रुद्रेश्वरोऽन्तिमः।
अनपत्यतया सोऽपि रुद्राराधकसत्तमः॥ २०॥
रामेश्वरस्य षट् पुत्रास्तेषां ज्येष्ठो महागुणः।
रामचन्द्रस्तथा रामचरणो मध्यमः पुनः॥
तृतीयो रघुनाथाख्यः श्रीरामस्तु तुरीयकः।
रामकेशवनामा च पञ्चमः केशवार्चकः॥
बलरामाभिधः षष्ठो बलवान् बलिनां यतः।
एषां ज्येष्ठः कनिष्ठस्य वंशाभावमुपागतः॥ २१॥
मध्यमो रामचरणो गुणैर्बन्धुभिरन्वितः।
व्यवहर्त्तोपाधियुक्तो गोविन्दपुरमंस्थितः॥
स च हिज्लीतमोलिप्तमहिषादलदेशतः।
लवणस्य तथा राज्ञः करादाने नियोजितः॥
कटकादिप्रदेशस्य महावङ्गकृतस्ततः।
देवानीसंज्ञकपदं प्राप्तवान् बन्धुमानितः॥
बन्धुभिर्वर्गिभिः सार्द्धं मेदिनीपुरमध्यतः।
संग्रामं तुमुलं कृत्वा रणमध्ये निपातितः॥ २२॥
देवानरामचरणव्यवहर्त्तृमहाशयात्।
समुत्पन्नास्त्रयः पुत्रा अशेषकुशलालयात्॥

व्यवहर्त्तापाधियुक्तो रामसुन्दर आदिमः ।
विद्यान्नौषधदानेन गणनीयः स चाग्रिमः ॥
पञ्चकोटादिदेशे सोऽभवदध्यक्षमत्तमः ।
माणिक्यचन्द्रदेवस्य मध्यमः पुण्यकृत्तमः ॥
अङ्कर्षिधरणीचन्द्रमाणे हिजरिहायने ।
दिल्लीश्वरप्रसादेन सम्प्राप्तौ तौ शुभक्षणे ॥
फरमाननामकलिपिं रायोपाधिं तथैव च ।
मन्सबानां सहस्रं सादिपञ्चशतमेव च ॥*॥
कनिष्ठो नवकृष्णाख्यदेवो जातो गुणाकरः ।
आसीत् किलकिलारूपामरावत्यां पुरन्दरः ॥
रूपवान् धनवान् मान्यो वदान्यः पण्डिताश्रयः ।
कुलशीलादिसम्पन्नो गोष्ठीपतिमहाशयः ॥
रसेषुसिन्धुशुभ्रांशुमाने दूरेजिहायने ।
कोम्पानिना मुन्सिपदे नियुक्तोऽसौ शुभे दिने ॥
सोऽभवत् कारणं तस्यां बङ्गराज्यस्य शासने ।
ततः किलकिलापुर्य्यां वाणिज्यकार्य्यसाधने ॥
स्थितान् दूरेजनिचयान् नवाबो बलमाश्रितः ।
सेराजद्दौलाभिधानो दूरीकृत्य गतस्ततः ॥
अथ तत्परवर्षे तु कर्णेल् क्लाइव् महाबलः ।
आगत्य नवकृष्णेन मुन्सिना सहितः किल ॥
योद्धुं ययौ नवाबेन सार्द्धं स्वबलसंवृतः ।
गत्वा पलाशियामे स युद्धं कृत्वाजयत् ततः ॥
धरणीरसवाजीन्दुमित दूरेजिवत्सरे ।
काममालीखाननामा नवाबोऽभूत्ततः पुरे ॥
स एवंरेजपत्नीयान् प्रधानराजपूरुषान् ।
निहत्य साधयामास निखिलान् स्वमनोरथान् ॥
मेजर् आदम् ततः शीघ्रं सार्द्धं तेनैव मुन्सिना ।
गत्वा तूदयनालायां रणं कृत्वा दुरात्मना ॥
विजित्य बलवन्तं तं नवाबं सेनया सह ।
निष्कण्टकमिदं राज्यं कृतवान् स भयापहः ॥
बाणर्तुसिन्धुशशभृन्मितदूरेजिवत्सरे ।
भूत्वा गवर्णरो लार्ड क्लाइव् किलकिलापुरे ॥
समेत्य मुन्सिना सार्द्धं परामृश्य च विस्तरं ।
जाफरालीखानसंज्ञं नवाबं मतिमत्तरं ॥
बङ्गदेशस्य च सुबादारं कृत्वा ततः परं ।
मेजफ्फरजङ्गनामानमतिबुद्धिमतां वरं ॥
तं नायेबसुबादारं चकार गुणसागरं ।
पञ्चविंशतिलक्षन्तु मुद्राणां कृतवान् स्थिरं ॥
तयोर्व्ययार्थं प्रत्यब्दं ततः क्लाइव् गुणाकरः ।
तेनैव मुन्सिना सार्द्धं दिल्लीं गत्वा च सत्वरः ॥
शाहालमबादशाहेन नवाबेन च धीमता ।
सुजाद्दौला नामकेन स सन्धिमकरोत् सदा ॥
अङ्काब्धिचन्द्रभुमाने हिजरिसंवत्सरे ततः ।
शौषालस्य द्वितीयाह्ने नवकृष्णाय तोषतः ॥
श्रीशाहालमबादशाहो फरमानाख्यं लिपिं मुदा ।
दत्तवान् यत्र लिखितं दिल्लीशेन सुसम्पदा ॥
सहस्रपञ्चकञ्चैव मन्सबानां हि सादिनां ।
सहस्रचितयं वीर्य्ययुतानां शीघ्रगामिनां ॥
उत्तमं शिविकायानं झल्लरेण सुशोभितं ।
नकाराख्यं वाद्ययन्त्रं ध्वजं तोगेतिनामितं ॥
राजवाहादुरोपाधिं मानवृद्धियशस्करं ।
कृपया दत्तवानस्मै बङ्गमानपुरःसरं ॥
सुजाद्दौला नवाबस्य समीपात् राजयोग्यकं ।
खेलातनामकं प्राप्तो वसनं भूषणादिकं ॥
तस्मिन् वर्षे स भूपालो नवकृष्णोऽतिधीमते ।
नवदीपाधिपश्रीलकृष्णचन्द्राय भूभृते ॥
महाराजेन्द्रबाहादुरोपाधिं मानवृद्धितः ।
दापयामास शाहालम् बादशाहसमीपतः ॥
ततः स सहितो लार्ड क्लाइवेन महात्मना ।
काशीधाम समागम्य बभूवासौ महामनाः ॥
महाराजोपाधिकश्रीबलवन्ताङ्गयेन च ।
सिंहेन हि सुवे वाराणस्याः सुनियमं स च ॥
कृत्वा विश्वेश्वरस्याग्रे नाट्यमन्दिरमध्यतः ।
नवकृष्णेश्वरं लिङ्गं स्थापयामास भक्तितः ॥
ततः पाट्नानामदेशे महाराजेन तत्र च ।
श्येतावरायेण सह सुवे बेहारकस्य च ॥
कृत्वा सुनियमं तत्र तेनैव सहितो हि सः ।
कलिकाताख्यनगरे समायातो गतालसः ॥
ततस्तुष्टमनाः क्लाइव् कोम्पानेर्दत्तवान् पदं ।
देवानीसंज्ञकं तस्मै राज्ञे बङ्गलमानदं ॥
रसर्तुसिन्धुभूमाने दूरेजिहायने पुनः ।
शाहालमबादशाहस्य प्रागुक्तस्य महात्मनः ॥
समीपतः फरमानाख्यलिपिमानीय यत्नतः ।
तस्मै राज्ञे ददौ प्रीत्या प्रीतये तस्य धीमतः ॥
यत्रास्तीदं विलिखितं दिल्लीशेन सता स्वयं ।
मन्सबानां षट्सहस्रं सहस्राणां चतुष्टयं ॥
सादिनाञ्च महाराजोपाधिमस्मै प्रदत्तवान् ।
एवं सुवर्णघटितं पदकञ्च ददौ महान् ॥
यत्र मुद्रितपारस्यभाषयास्तीति वर्णितं ।
दूरेजकोम्पानिकर्म्मोत्तमरूपेण साधितं ॥
पश्यतो बादशाहस्य समीपात् सननामके ।
सप्ताशीत्यधिके चैव रुद्रसङ्ख्यशतेऽब्दके ॥

राजोपाधिस्तथा वाहादुरोपाधेस्तथैव च ।
भूपालनवकृष्णाभिधानवाहादुराय च ॥
दातुं दयाभवत् लार्ड क्लाइवस्य महामतेः ।
तगमया सहितं चिह्नं कोम्पानेस्तन्महीभृते ॥
दत्तं तथा दशविधं खेलातं वस्त्ररूपकं ।
किरीटं कुण्डलं रत्नभूषां हारञ्च मौक्तिकं ॥
फलकं करवालञ्च दण्डं चामरमुत्तमं ।
मयूरपुच्छव्यजनं घटीयन्त्रं मनोरमं ॥
हस्त्यश्वं भद्रैर्युक्तं शिविकायानमेव च ।
लार्ड क्लाइव् ददौ राज्ञे सदा हितकराय च ॥
एवं सिपाइसंज्ञानां नृणां तद्वारपालने ।
आज्ञां दत्त्वा तस्य हस्तं गृहीत्वा तु वरासने ॥
हस्तिपृष्ठे समारोह्य पुरं प्रेरितवांस्ततः ।
हस्त्यश्वपत्तिनिकरैर्बन्दीनैश्च संवृतः ॥
स च राजा रौप्यमुद्रां क्षिपन् मार्गेति हर्षतः ।
विवेश स्वं पुरं रम्यं सर्व्वलोकैः प्रशंसितः ॥
समुद्ररसवाजीन्दुमाने दूरेजिहायने ।
स लार्ड क्लाइवो मेस्तर् वार्लेष्टाय महात्मने ॥
राज्यभारं समर्प्याथ स्वस्थाने प्रस्थितोऽभवत् ।
चकार च महाराजो देवानीकर्म्म पूर्व्ववत् ॥
तस्मिन्नस्मिन् समये माता स्मृत्वा विष्णोः पदं गता ।
अनेकलक्षमुद्राभिस्तेनाद्या तत्क्रिया कृता ॥
ततः कोम्पानिसंक्रान्तं कर्म्म त्यक्त्वा स भूपतिः ।
पारमार्थिकचिन्तायां नियुक्तोऽभून्महामतिः ॥
अथ कोम्पानिना गिर्जानिर्म्माणार्थं प्रयाचितः ।
मूल्यं विनार्थितां भूमिं दत्तवानतिमोदतः ॥
वसुसिन्धुमुनिक्षौणीमाने दूरेजिहायने ।
सुतानुव्यादिकं ग्रामं प्राप्तवानिह पत्तने ॥
तेनैव तस्य राज्ञस्तु धनिविज्ञानिमानिनः ।
प्रजा भूता हि बङ्गला एतन्नगरवासिनः ॥
समुद्रवसुभूमीन्दुमाने वङ्गाख्यकाब्दके ।
हेष्टिंस् गवर्णरस्याक्लावर्द्धमानाभिधानके ॥
देशे तस्य महाराजं राजाश्रोलीतिनामके ।
कार्य्यं नियोजयामास स गत्वा तत्र देशके ॥
राज्यस्य शासनस्यैवं राज्ञो राज्यास्तथैव च ।
समग्रविषयस्यैव सुन्दरं नियमं स च ॥
कृत्वा राजकरान् सर्व्वानादाय बङ्गलक्ष्मृतः ।
खालिसानामके स्थानेऽर्पितवान् सुसमाहितः ॥
एवं रसवसुक्षौणीन्दुमे वङ्गाख्यवर्षतः ।
महाराजाधिराजो यस्तेजश्चन्द्रेतिसंज्ञितः ॥
चतुःसप्ततिसाहस्राधिकाष्टलक्षमुद्रिकाः ।
तथा सप्तशतं मुद्राः सप्तविंशतिकाधिकाः ॥
ऋणं कृत्वा महाभागो महाराजसकाशतः ।
राज्ञः करं राजकोषे प्रेषयामास यत्नतः ॥
ततो गवर्णरस्यैव ह्यनुमत्यनुसारतः ।
खालिसासंज्ञकात् स्थानात् महाराजोऽतिबाधितः ॥
क्रमशः क्रमशश्चैव मुद्रास्ताः प्रतिवर्षतः ।
आदानमकरोत् राजाधिराजस्तोपकारतः ॥
रामर्षिशशिभूमाने वङ्गसंवत्सरे स च ।
श्रीमद्राधावल्लभस्य सेवनार्थं चिराय च ॥
दत्तवान् वल्लभपुरं कृत्वा देवोत्तरं मुदा ।
श्रीमन्नन्ददुलालस्य सेवार्थमपि सर्व्वदा ॥
आनरपुरेतिख्यातायां परगणायां प्रयत्नतः ।
चारग्रामं तथा देवोत्तरं कृत्वा ददौ ततः ॥
तथाग्रद्वीपतः श्रीमद्गोपीनाथं मनोहरं ।
विग्रहं वल्लभपुरात् श्रीराधावल्लभं परं ॥
एवञ्च खड्दहग्रामात् श्रीश्यामसुन्दराङ्कयं ।
श्रीमन्नन्ददुलालाख्यं शाँदवनाग्रामतः स्वयं ॥
स्वकं पुरं समानीय स राजा बङ्गयत्नतः ।
विधिबोधितरूपेण चिरं संसेव्य संयतः ॥
नानाविधानलङ्कारान् मुक्तावज्रविभूषितान् ।
तापनीयान् मणिमयान् दत्त्वा प्रेरितवांस्च तान् ॥
पिपीतकाख्यद्वादश्यां समाहूयाथ पण्डितान् ।
दानमानैः पुरस्कृत्य दिग्विदिक्षु समाश्रितान् ॥
श्रीमद्गोपीनाथसंज्ञं श्रीगोविन्दं तथा परं ।
विग्रहं संप्रतिष्ठाप्याकरोदाराधनं वरं ॥
वेहालाग्राममारभ्य कुलपीं यावदुत्तमं ।
स स्वव्ययेन पन्थानं कृतवान् सर्व्वतः समं ॥
तथा स्वकीयपुरतः पुरोऽतिशयविस्तृतं ।
चकार राजपन्थानं मञ्जुलं सुपरिष्कृतं ॥
नेत्राम्बराब्धिभूमाने शकसंज्ञकहायने ।
कुलाचार्य्यान् बुधगणांश्चानीय स्वनिकेतने ॥
स च द्वाविंशपर्य्यायिमुख्यानां बङ्गयत्नतः ।
कुलीनानामेकयायीमकरोद्भूरिदानतः ॥
आब्धायाम्बरपक्षेन्दुमानेऽसौ वङ्गवत्सरे ।
विहाय देहमगमत्पादाम्भोजयुगं हरेः ॥२२॥

रामसुन्दरदेवस्य रायख्यातियुतस्य च ।
अशेषगुणसम्पन्नाः पुत्त्रा जाता हि पञ्च च ॥
कृष्णमोहनदेवस्तु तेषां ज्येष्ठः प्रकीर्त्तितः ।
व्रजमोहनदेवो यः स धीमान् मध्यमः स्मृतः ॥
गोपीमोहनदेवश्च तृतीयो भुवि विश्रुतः ।
भूपतेर्नवकृष्णस्य स एव दत्तकः सुतः ॥

चतुर्थो निरपत्योऽभूद्देवो गोलोकमोहनः ।
कनिष्ठो वैष्णवोऽपुत्त्रो देवो भुवनमोहनः ॥ * ॥
माणिक्यचन्द्रराय्स्य द्वौ सुतौ च तयोः पुनः ।
ज्येष्ठो राधाकृष्णदेवो निरपत्यो महागुणः ॥
गोपीकृष्णाख्यदेवस्तु कनिष्ठो देवतार्चकः ।
शुद्धाचारः कृती दान्तो बुद्धिमान् वंशकारकः ॥ २३ ॥
पुत्त्राबभौ महाराजनवकृष्णस्य चाग्रिमः ।
गोपीमोहनदेवस्तु तयोर्यः स च दत्तिमः ॥
कौन्सेलाधत्तजान् दृष्टे विल्साभिधानकस्य च ।
एवमादिमजेन्रेल् जान् कार्णकस्य तथैव च ॥
गवर्णरमेकफार्ग्गनस्य देवानीसंज्ञकं पदं ।
स प्राप्य तत्र कर्त्तव्यं कृतवानतिमानदं ॥
तथात्र मत्स्यविपणेर्व्वर्त्मार्थं बहुमूल्यकं ।
कोम्पानये ददौ स्थानं सर्व्वेषां हितकारकं ॥
अङ्केन्दुपक्षभूमाने वङ्गसंज्ञकहायने ।
पौत्त्रोद्वाहार्थमाहूय स तु यत्नात् शुभे दिने ॥
कुलाचार्य्यान् कुलीनांश्च गृहीत्वा तत्सुसम्मतिं ।
कनिष्ठषड्भ्रातृजयोः कुलयोश्चिरसंस्थितिं ॥
कृतवानथ मात्रा स तुलापुरुषदानकं ।
कारयामास यत्नेन यथोक्तविधिपूर्व्वकं ॥
ततश्च मातृकृत्ये स सुवर्णदानसागरं ।
कृत्वा ददौ द्विजाग्र्येभ्यस्तानाहूय च सादरं ॥
रामाग्निनागभूमाने दूरेजाब्दे स मानदं ।
गवर्णरस्य कारुण्यात् प्राप्तवानुत्तमं पदं ॥
राजबाहादुरोपाधिं सुवर्णाम्बरसंज्ञकं ।
अनेकरत्नघटितं शिरोभूषणयुग्मकं ॥
तथा सन्मौक्तिकं हारं फलकं करवालकं ।
शस्त्रिषट्सङ्ख्यपत्तीनां शिविकाग्रगमार्थकं ॥
आज्ञाञ्च प्राप्तवान् सोऽपि बहुसम्मानपूर्व्वकं ।
चिरमाध्यादिरहितः कृत्वा राज्यमकण्टकं ॥
वह्निवेदाब्धिशशभृन्माने वङ्गाख्यहायने ।
सौरचैत्रे शुक्लपक्षस्यैकादश्यां तिथौ दिने ॥
अर्द्धं नारायणक्षेत्रेऽन्यार्द्धं कारणजीवने ।
देहस्याधायात्मजनैर्गीयमाने जनार्दने ॥
भावयन्निष्टदेवस्य रूपं हृदयसंस्थितं ।
ज्ञानतः स महीपालः संप्राप्तोऽथ मृतोऽमृतं ॥ * ॥
कनिष्ठो राजकृष्णाख्य औरस्यो गुणिमानकृत् ।
राजाग्रगण्यो मान्यश्च वदान्यो गानशास्त्रवित् ॥
स च त्रयोविंशमंख्यपर्य्यायाणां महात्मनां ।
कुलीनानामेकयायीं कृतवान् गुणशालिनां ॥
तथा कुलप्रदीपाख्यं कुलशास्त्रं प्रयत्नतः ।
कुलीनानन्दजनकं चकार कीर्त्तिखाभतः ॥
यथा चैतन्यदेवेन कृतं नगरकीर्त्तनं ।
तथा राज्ञा कृतञ्चेति जनाः कुर्व्वन्ति कीर्त्तनं ॥
रामाग्निवसुशुभांशुमाने दूरेजिवत्सरे ।
गङ्गातीरे ज्ञानपूर्वं मृतोऽगात् हरिमन्दिरे ॥ २३ ॥
कृष्णमोहनदेवस्य तनयौ द्वौ सुशीलकौ ।
राजनारायणाख्यानश्रीनारायणदेवकौ ॥ * ॥
व्रजमोहनदेवस्याप्युभौ पुत्त्रौ तयोः परः ।
धार्म्मिको रामरत्नाख्यो हरनारायणोऽवरः ॥ * ॥
गोपीकृष्णस्य देवस्य पुत्त्राश्चत्वार एव च ।
तेषां ज्येष्ठस्तु गोपालकृष्णोऽतिसात्त्विकः स च ॥
श्रीलगोकुलकृष्णस्तु मध्यमो गुणसागरः ।
वाङ्गालवेङ्के नायेवदेवानीकर्म्मतत्परः ॥
गोपेन्द्रकृष्णगोपेशकृष्णौ सन्तानवर्ज्जितौ ।
तृतीयकतुरीयौ च बाल्ये देहान्तरं गतौ ॥ २४ ॥
वाणाम्बरर्षिभूमानसमायां शकभूपतेः ।
गोपीमोहनदेवस्य गोष्ठीपतिमहीपतेः ॥
श्रीराधाकान्तदेवेति नाम्नः पुत्त्रोऽभ्यजायत ।
वङ्गविद्यां तथा हिन्दीं पारसीमारवीं ततः ॥
दूरेजीं संस्कृतञ्चैवाधीतवान् सोऽतियत्नतः ।
तथा चतुर्धुरीणस्य गोपीकान्तस्य धीमतः ॥
सर्व्वायमान्यस्य गोष्ठीपतेर्मौलिकराजतः ।
सिंहेत्युपाधियुक्तस्य प्रपौत्त्रीं स उपायत ॥
गोष्ठीपतिरभूत्तेन कुलाचार्य्यादिसम्मतः ।
वङ्गेलण्डफ्रान्सजर्म्मान्डेन्मार्कादिप्रदेशतः ॥
रूषियामेरिकासंज्ञदेशानाञ्चैव मध्यतः ।
विद्यादिविषयाणान्तु सभानां सभ्यतामितः ॥
एवं धर्म्मसभायाञ्च तथान्यासां सभापतिः ।
बभूव बहुसम्मानपूर्व्वकं स महामतिः ॥
स वाणाग्नीभशशभृन्मिते दूरेजिवत्सरे ।
प्राप्तः किलकिलानामनगरेऽस्मिन् मनोहरे ॥
गवर्णरस्यैवेच्छातो माजिष्ट्रेटीयकं पदं ।
यदेवैकान्तमान्यानां गुणिनामपि मानदं ॥
सुन्यग्निनागभूमाने ऐरेजाब्दे तु पैतृकं ।
राजोपाधिञ्च कौन्सेलात् वसनं भूषणादिकं ॥
मानवर्द्धनपत्रेण सहितं बहुमूल्यकं ।
तथा गवर्णरस्यैव सभायामादिपीठकं ॥
प्राप्तवानतिदुष्प्राप्य यशोदं मानदायकं ।
अङ्कवेदाब्धिभूमाने वङ्गाब्दे विधिपूर्व्वकं ॥
गयातीर्थप्रयाणार्थं प्रस्थितः पथिमध्यतः ।
मुरशिदाबादनगरे श्रीनवाबसभाङ्गतः ॥

सम्मानितः स च समादरतस्तत्समीपतः ।
राजार्हं हेमवसनं सप्तकं सप्तरूपतः ॥
हेमाख्यपक्षिपुच्छेन युक्तं युग्मं किरीटकं ।
कुण्डलं मौक्तिकं हारं फलकं करवालकं ॥
यत् सदा भूपतीनां हि भूरिसम्भ्रमवर्द्धकं ।
प्राप्तवांस्तत्तु दुष्प्राप्यं बहुसम्मानपूर्ब्बकं ॥
अथेन्दुरसपक्षाब्जमाने वङ्गाब्दहायने ।
पौत्राद्वाहोपलक्षेण सभां कृत्वा शुभे दिने ॥
समाहूय कुलाचार्य्यान् कुलीनान् पण्डितान् स च ।
कार्य्यस्थानां चतुर्विंशपर्य्यायाणां तथैव च ॥
सुमुख्यानां कुलीनानां कनिष्ठानाञ्च सर्व्वशः ।
एवं षड्भ्राट्जातानामेकयायी चकार सः ॥
तत्पत्रिकां कारिकायाः पुस्तकञ्चापि मुद्रितं ।
कुलीनघटकादिभ्यः कृत्वा तत्र समर्पितं ॥
पाठशालाध्यापनाय ग्रन्थनिर्म्म एहतुतः ।
स्कुलबुक् सोसाइटीनाम या सभास्मिन् प्रदेशतः ॥
स तदर्थं नीतिकथा बालाशिक्षादिपुस्तकं ।
कृतवान् हेक्मते आशुजार् वृत्तायुर्व्वेदवाचकं ॥
पुस्तं पारस्यभाषात इंरेजीभाषया पुनः ।
अनुवाद्य ग्रेटवृटनदेशे राज्ञो महात्मनः ॥
स च राइयल् एसियाटिक् समाजे प्रेरयत्ततः ।
तत्र मुद्राङ्कितं कृत्वा तत्शतं परिमाणतः ॥
अनुवादकसाचिध्ये तस्यैव दर्शनार्थतः ।
कृपया प्रेषयामासुस्तत्सदःस्थाः प्रयत्नतः ॥
तथाऽऽ वय्ययायामकालसम्पादनीयकं ।
ब्रह्मकल्पद्रुमाख्याभिधानञ्च सप्तकाण्डकं ॥
परोपकृतये कृत्वा गुणिभ्योऽभवदर्पिता ।
यत्प्राप्यालोक्य मन्तुष्टाः सर्व्वदेशीयपण्डिताः ॥
प्रत्येके प्रेरयामासुः सुख्यातिपत्रिकादिकं ।
विशेषतो दिनेमारराज्येगोहेमहारकं ॥
स्वीयास्यचिह्नसंयुक्तपदकोत्तमधारकं ।
प्रीत्या संप्रेषयामास राज्ञोऽर्थे मानदायकं ॥
पुनस्तदभिधानस्य परिग्रिष्टमतिश्रमात् ।
निर्म्माय मुद्रितं तेन प्रदानार्थं बहुव्ययात् ॥ २४ ॥

अत्रैव कथयामीमं इतिहासं पुरातनं ।
सङ्क्षेपेण च तद्राज्ञो लोकविस्मयकारणं ॥
नागवेदाष्टभूमाने इंरेजाब्दे हि वैरिणा ।
टाकीयामनिवासेन केनचित् ख्यातमुन्मिना ॥
दुष्टेनाभीष्टसिद्ध्यर्थं दण्डपारुष्यसंज्ञके ।
विवादस्य पदे मान्यजनानां मानभञ्जके ॥
कारितो मिथ्याभियोगस्तस्य निर्द्दोषभूभृतः ।
ऊलीयामस्य मेजिष्ट्रेट् नामकेनाविचारतः ॥
पोलिसुपरिण्टेनडेण्टसंज्ञकस्य समीपतः ।
क्रुधा तन्मिथ्यापवादः पत्रेण प्रकटीकृतः ॥
तेन सेक्रेटरिद्वारा गवर्णराय वेदितः ।
सोऽपि तैर्ब्बहुधा चेष्टां कृतवान् तद्दमार्थतः ॥
किन्तु सेशन्जजाख्यस्य प्राड्विवाकस्य धीमतः ।
अतिसूक्ष्मविचारेण राजा निर्द्दोषतां गतः ॥
तस्माद्विपक्षपक्षाणां क्रूराणाञ्च विशेषतः ।
तेषामुद्यमभङ्गेन लज्जाधिक्यमजायत ॥
तेन सर् हरवर्ट मेडाक् डेपिउटी गवर्णरः ।
स्नेहेनाक्लिन्नहृदयः सदयश्चातिसत्वरः ॥
आह्वानार्थं तस्य राज्ञः प्रेषयामास पत्रकं ।
स चानीय स्वभवने तस्य सम्मानपूर्ब्बकं ॥
सान्त्वयित्वा जयात्तस्मै धन्यवादं प्रदत्तवान् ।
एवं गवर्णरो जेन्रेल् लार्डडेल्हौसिरात्मवान् ॥
स्वदेशयानसमये सभामध्येऽतिहर्षितः ।
तद्राज्ञो दक्षिणं हस्तं गृहीत्वातिप्रयत्नतः ॥
लार्डेन च तथा लेडी केनिङ्गेन महोत्सुकः ।
साक्षात् तं कारयामास मानिनां मानवर्द्धकः ॥
पूर्ब्बोक्तमिथ्याभियोगे दण्डार्हकरणाय च ।
उद्योगजन्यदोषस्याप्यकरोत् क्षालनं स च ॥
स तु मुन्सी पुनरपि दण्डपारुष्यवादतः ।
फरासडाङ्गानगरे पलायित्वा मृतस्ततः ॥

राजकृष्णस्य नृपतेर्जाता वसुमिताः सुताः ।
शिवकृष्णो नृपो ज्येष्ठो यस्यास्ति शिवतुल्यता ॥
रूपवान् गुणवांश्चापि कालीकृष्णस्तु मध्यमः ।
दयालुर्बुद्धिमान् मान्यो धार्म्मिको मानवोत्तमः ॥
इंरेजीभाषया सोऽपि महानाटवनामकं ।
तथा रमलमेत्याख्यमिं रेजानाञ्च पुस्तकं ॥
बङ्गीयभाषया चैवानुवादमकरोत्ततः ।
राजवाहादुरोपाधिं प्राप्तो गवरन्मेण्टतः ॥
देवीकृष्णोऽतिसरलो देवभक्तस्तृतीयकः ।
अपूर्ब्वगुणसंयुक्तोऽपूर्ब्वकृष्णस्तुरीयकः ॥
देवान् कुडर् नामधेयं ग्रन्थं स चोर्दुभाषया ।
निर्म्माणं कृतवान् सोऽपि निजायासव्ययेच्छया ॥
ततो माधवकृष्णस्तु सुशीलः पुत्रवर्ज्जितः ।
पञ्चमो देवताभक्तः सोऽल्पे वयसि संस्थितः ॥
कृतवान् स च वेतालपञ्चविंशतिनामकं ।
ग्रन्थं पारस्यभाषातोऽनुवादं यत्नपूर्वकं ॥
षष्ठः कमलकृष्णस्तु दैवे पैत्र्ये सदा रतः ।
कार्य्ये बहुगुणोपेतस्तथा पण्डितमण्डितः ॥

एवं गङ्गासागरयोः सङ्गमे तेन निर्म्मितं ।
श्रीमत्कपिलदेवस्य मन्दिरं सुपरिष्कृतं ॥
तुलापुरुषदानञ्च श्रीमद्भागवतस्य च ।
पारायणं वागवाजारस्थ घट्टे तथैव च ॥
शिवस्य स्थापनं माचा कारयामास सोत्सुकः ।
बहुवित्तव्ययेनैव कुलकीर्त्तिविवर्द्धकः ॥
नरेन्द्रकृष्णेतिसंज्ञो यः सुतः स तु सप्तमः ।
रूपवान् गुणवांश्चैव नरेन्द्रेण पुनः समः ॥
स च डेपिउटीमेजिष्ट्रेट् बभूव सदाशयः ।
यो हि यादवकृष्णस्तु कनिष्ठोऽतिदयामयः ॥
तेन देवान् मोशफकाख्यं पुस्तकञ्चोर्दुभाषया ।
निर्म्माय मुद्रितं तच्च कृत्वा दत्तं निजेच्छया ॥
गयाधामस्थतः सोऽपि पुत्रहीनोऽस्तं गतः ।
चन्द्रेषुपक्षभूमाने वङ्गसंज्ञकवर्षतः ॥
राजराधाकान्तदेवसाहाय्येन मुदान्वितैः ।
स्वपर्य्यायकुलीनानामेकयायी कृता च तैः ॥२४॥

श्रीराधाकान्तदेवस्य राजवाहादुरस्य च ।
चयः सुताः सिङ्गगोष्ठीपतयः स्वकुलेषु च ॥
यतो गोष्ठीपतेः पुत्रा दौहित्राश्च विशेषतः ।
तेषां ज्येष्ठः श्रीमहेन्द्रनारायण इतीरितः ॥
देवब्राह्मणभक्तः स बुद्धिमांश्च गुणान्वितः ।
मध्यमः श्रीलराजेन्द्रनारायण इति श्रुतः ॥
धार्म्मिकः सत्यवादी स कर्म्मदक्षश्च सत्तमः ।
यस्तु श्रीदेवेन्द्रनारायणो देवः स चान्तिमः ॥
व्यवहारज्ञानयुतः प्रतापादिसमन्वितः ।
मन्त्रणादाननिपुणो धीमान् धीमद्भिरादृतः ॥
एते भारतवर्षीयगवर्णरसमाजतः ।
तत्र यानस्याधिकारं कुमारोपाधिकं ततः ॥
पञ्चप्रकारं वसनं भूषणञ्च मनोरमं ।
चयः सहोदराः सर्व्वे प्रत्येके लेभिरे समं ॥२५॥

जाताः पुत्राश्चयः श्रीमच्छिवकृष्णस्य भूभृतः ।
तेषां श्रीयुतभूपेन्द्रकृष्णो ज्येष्ठः प्रकीर्त्तितः ॥
चत्वारस्तनयाः श्रीलकालीकृष्णस्य भूपतेः ।
तेषां ज्येष्ठः श्रीहरेन्द्रकृष्ण इत्यभिधीयते ॥
बभूव यो डेपिउटीमेजिष्ट्रेटिपदे स्थितः ।
श्रीदेवीकृष्णदेवस्य तनयौ द्वौ च धीमतः ॥
श्रीमदानन्दकृष्णो यस्तयोर्ज्येष्ठः स च स्मृतः ।
श्रीयुतापूर्ब्बकृष्णस्य चत्वारस्तनयास्ततः ॥
श्रेष्ठो ज्येष्ठः श्रीकुमारकृष्णेतिख्यातिसंयुतः ।
श्रीमन्नरेन्द्रकृष्णो यः सम्भूतास्तस्य देहतः ॥
चयः पुत्रास्तेषु मध्ये ज्येष्ठपुत्रोऽभवत् पुनः ।
श्रीमद्व्रजेन्द्रकृष्णेति नाम्ना ख्यातः सुलक्षणः ॥२५॥

राजनारायणस्यैव देवोपाधियुतस्य च ।
पुत्रोऽभवज्जगत्कृष्णनामेदानीं मृतः स च ॥
श्रीनारायणदेवस्य चयः पुत्रा गुणैर्युताः ।
तेषां ज्येष्ठः श्रीप्रसन्ननारायण इति श्रुतः ॥
गवरन्मेण्टस्य तोशाखानायां प्रथमं स हि ।
अध्यक्षोऽभूत्तच कर्म्मनिर्व्वाहकरणेन हि ॥
तस्मै गवर्णरो लार्डहार्डिञ्जः कृपयान्वितः ।
रायबाहादुरोपाधिं दत्तवानतितोषतः ॥
ततो मुरशिदाबादे नवाबस्य समीपतः ।
नेजामतस्य देवानीं प्राप्तवान् बहुभाग्यतः ॥
तत्रापि च नवाबस्य सन्निधौ लब्धवानयं ।
राजबाहादुरोपाधिमेकान्तमानतः स्वयं ॥२५॥

गोपालकृष्णदेवस्य पुत्राश्चत्वार एव तु ।
श्रीलश्रीकृष्णदेवो यः सर्व्वेषामग्रजः स तु ॥
श्रीमद्गोकुलकृष्णस्य तनयौ द्वौ महात्मनः ।
श्रीमन्नृपेन्द्रकृष्णस्तु ज्येष्ठोऽतिनन्दिवर्द्धनः ॥२५॥

श्रीमन्महेन्द्रादिनारायणदेवस्य धीमतः ।
नाद्यापि तनयो जातो गृहदैवगुणदोषतः ॥
तथा श्रीयुतराजेन्द्रनारायणस्य कायतः ।
श्रीमद्गिरीन्द्रादिनारायणः पुत्रो व्यजायत ॥
एवं श्रीयुतदेवेन्द्रनारायणशरीरतः ।
संजातश्च श्रीव्रजेन्द्रनारायणेतिसंज्ञितः ॥२६॥

श्रीमद्भूपेन्द्रकृष्णस्य पुत्रो जातोऽतिसुन्दरः ।
श्रीजितेन्द्रियकृष्णेतिख्यातियुक्तः प्रियङ्करः ॥
श्रीमद्धरेन्द्रकृष्णस्य तनयश्चातिशोभनः ।
श्रीमद्धरेन्द्रकृष्णोऽयजातः सरसिजानन ॥२६॥

जगत्कृष्णस्यात्मजस्तु ज्येष्ठोऽभूद्धतिशीलवान् ।
श्रीमत्तारणकृष्णेतिनाम्ना ख्यातोऽतिबुद्धिमान् ॥
श्रीलप्रसन्नादिनारायणस्य सुत उत्तमः ।
श्रीमद्भूपेन्द्रादिनारायणः प्रथमधरोपमः ॥२६॥

इत्येकादिकषड्विंशपुरुषान्तातिनिर्म्मला ।
देववंशावली या सा समाप्ता मौलिकातुला ॥

वर्णमाला।

नागरी।	English.	বাঙ্গালা।	ওড়িয়া।
अ ...	a ...	অ ...	ଅ
आ (ा) ...	á ...	আ (া) ...	ଆ (ା)
इ (ि) ...	i ...	ই (ি) ...	ଇ (ି)
ई (ी) ...	í ...	ঈ (ী) ...	ଈ (ୀ)
उ (ु) ...	u ...	উ (ু) ...	ଉ (ୁ)
ऊ (ू) ...	ú ...	ঊ (ূ) ...	ଊ (ୂ)
ऋ (ृ) ...	ṛi ...	ঋ (ৃ) ...	ଋ (ୃ)
ॠ (ॄ) ...	ṛí ...	ৠ (ৄ) ...	ୠ (ୄ)
ऌ (ॢ) ...	lṛi ...	ঌ (ঌ) ...	ଌ (ଌ)
ॡ (ॣ) ...	lṛí ...	ৡ (ৡ) ...	ୡ (ୣ)
ए (े) ...	e ...	এ (ে) ...	ଏ (େ)
ऐ (ै) ...	ai ...	ঐ (ৈ) ...	ଐ (ୈ)
ओ (ो) ...	o ...	ও (ো) ...	ଓ (ୋ)
औ (ौ) ...	au ..	ঔ (ৌ) ...	ଔ (ୌ)
ं ...	ṇ or ṃ ...	ং ...	ଂ
ः ...	ḥ ...	ঃ ...	ଃ
क ...	k ...	ক ...	କ
ख ...	kh ...	খ ...	ଖ
ग ...	g ...	গ ...	ଗ
घ ...	gh ...	ঘ ...	ଘ
ङ ...	ṅ ...	ঙ ...	ଙ
च ...	c' ...	চ ...	ଚ
छ ...	c'h ...	ছ ...	ଛ
ज ...	j ...	জ ...	ଜ
झ ...	jh ...	ঝ ...	ଝ

नागरी।	English.	বাঙ্গালা।	ওড়িয়া।
ञ ...	ṅ ..	ঞ ...	ଞ
ट ...	ṭ ..	ট ...	ଟ
ठ ...	ṭh ..	ঠ ...	ଠ
ड ...	ḍ ..	ড ...	ଡ
ढ ...	ḍh ..	ঢ ...	ଢ
ण ...	ṇ ..	ণ ...	ଣ
त ...	t ..	ত ...	ତ
थ ...	th ..	থ ...	ଥ
द ...	d ..	দ ...	ଦ
ध ...	dh ..	ধ ...	ଧ
न ...	n ..	ন ...	ନ
प ...	p ..	প ...	ପ
फ ...	ph ..	ফ ...	ଫ
ब ...	b ..	ব ...	ବ
भ ...	bh ..	ভ ...	ଭ
म ...	m ..	ম ...	ମ
य ...	y ..	য ...	ଯ
र ...	r ..	র ...	ର
ल ...	l ..	ল ...	ଲ
व ...	v ..	ব ...	ବ
श ...	ś ..	শ ...	ଶ
ष ...	sh ..	ষ ...	ଷ
स ...	s ..	স ...	ସ
ह ...	h ..	হ ...	ହ
क्ष ...	ksh ..	ক্ষ ...	କ୍ଷ

शब्दकल्पद्रुमः।

अ,

अ, अकारः। आद्यस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स तु ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणं॥ अस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली भूत्वा कुक्षिता वामतो गता।
ततोर्द्धसंकृता रेखा दक्षोर्द्धा तासु शङ्करः॥
विधिर्नारायणश्चैव सन्तिष्ठेत् क्रमतः सदा।
अर्द्धमात्रा शक्तिरूपा ध्यानमस्य च कथ्यते॥"

इति वर्णोद्धारतन्त्रं॥ अस्य तत्त्वं यथा,—

"शृणु तत्त्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा॥
पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितं।
निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमान्॥
विन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपिणी"।

इति कामधेनुतन्त्रं॥ अस्य पर्य्यायः।

"अः श्रीकण्ठो माढकाद्योऽनन्तो विष्णुरनुत्तरः"।

इति बीजवर्णाभिधानं॥ अन्यच्च।

"अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः।
पूर्णोदरी रुद्रिमेधौ सारस्वतः प्रियम्बदः॥
महाब्राह्मी वासुदेवो धनेशः केशवोऽमृतं।
कीर्त्तिर्निवृत्तिर्व्योमगौरी नरकारिर्हरो मरुत्॥
ब्रह्मा वामाद्यजो ह्रस्वः करसुः प्रणवाद्यकः"।

प्रणवाद्यावयव इत्यर्थः।

"ब्रह्माणी कामरूपश्च कामेशी वासिनी वियत्॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिर्धिरग्निनी।
अर्कमण्डलवर्णाद्यौ ब्राह्मणः कामकर्षिणी"॥

इति वर्णाभिधानतन्त्रं॥

अ, अ, अभावः। अल्पः। निषेधः। अनुकम्पा। इति मेदिनी। (नञोऽयमकारः षड्विधान् नञर्थान् बोधयति। यथा,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥

इति। सादृश्ये यथा—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः। अभावे यथा—अभोजनं भोजनाभावः। अन्यत्वे यथा,—पटः अघटः, पटः घटभिन्न इत्यर्थः। अल्पत्वे यथा—अनुदरी कन्या अल्पोदरी इत्यर्थः। अप्राशस्त्ये यथा,—अधनं धन्यधनं, धन्यधनम् अप्रशस्तधनम् इत्यर्थः। विरोधे यथा—अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।)

अः, पुं, (अतति सर्व्वं व्याप्नोति इति अततेडः) विष्णुः। इति मेदिनी।

अंश

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मताः"॥

इति दुर्गादासधृतवचनं। (क्ली। ब्रह्म। यथा,—

अ इ उ ए ओ ओम् कलाश्च मूलं ब्रह्म इति कीर्त्तितम्, इति अग्निपुराणम्।)

अक्षणी, [न्], त्रि, (न क्षणी, नञ्समासः। अत्र अक्षशब्दो न नञ्जातः, तथात्वे अक्षणी इत्येव स्यात्। अपितु स्वप्रकृतिरेव ततश्च अक्षमात्रनिपातनात् नात्र सन्धिरिति ज्ञेयम्।) अनक्षी। अक्षक्षग्रस्तः। अधारी। यथा,—

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अक्षणी चाप्रवासी च स वारिचर मोदते"॥

इति महाभारतं।

अंश, तृ क विभाजने। अंशकरणे। इति कविकल्पद्रुमः। तालव्योपधः। विभाजन इति भाज तृ क तु एषकृत्यां इत्यस्य रूपं। अंशयति अंशापयति धनं वणिक्। इति दुर्गादासधृतधातुदीपिका॥

अंशः, पुं, (अंश विभाजने, अदन्तचुरादिः। कर्म्मणि घञ्।) विभाजनं। तत्पर्य्यायः। भागः २। वण्टकः ३। इत्यमरः॥ विभागः ४ भक्तिः ५। इति जटाधरः॥ अंशशब्दो दन्त्यसान्तोऽपि। अंशांस तृ क विभाजने इति कविकल्पद्रुमदर्शनात्। स्कन्धः। इति विद्याविनोदादयः॥ (वस्त्रैकदेशः। रिक्थविभागः। चतुर्थभागः। भाव्यङ्गः। रविमूर्त्तिविशेषः। आदित्यविशेषः, यथा,—

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरेव च।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"॥

इति महाभारतम्। कृतस्य यद्यधिकत्रिंशततमभागः। यदुवंशीयः नृपविशेषः, यथा,—ततः कुरुवत्सः ततश्च अनुरथः ततः पुरुहोत्रो जज्ञे ततश्च अंशु इति।)

अंशकं, क्ली, दिनं। इति त्रिकाण्डशेषः॥

अंशकः, पुं, (अवश्यमंशं हरति इति अंशं हारीति कन्।) ज्ञातिः। दायादः। इति त्रिकाण्डशेषः॥ (अल्पांशः। अल्पार्थे कन्।)

अंशभाक्, [ज्], त्रि, (अंशं भजते इति अंश + भज + क्विः।) अंशी। (दायादः) यथा। नौधायनः।

"सवर्णास्वनिरुद्धासु त्रयो वर्णा द्विजातयः।

अंशु

प्रातरुत्थाय कर्त्तव्यं देवर्षिपितृतर्पणं"॥
निरुद्धासु न कुर्व्वीरन्नंशभाक् तत्र सेतुजित्।

इति प्रायश्चित्ततत्त्वं॥

अंशलः, त्रि, (अंशः प्रशस्तस्कन्धः अस्ति अस्य इति अंश + लच्।) अंसलः। बलवान्। इत्यमरटीकायां रमानाथः॥ (प्रशस्तस्कन्धविशिष्टः)

अंशी, [न्], त्रि, (अंशोऽस्यास्तीति अंश + इनि।) अंशयोग्यः। वण्टकविशिष्टः। भागी। यथा याज्ञवल्क्यः।

"विभागस्तेन पितरि कुर्य्यात् स्वेच्छया विभजेत् सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः"॥

इति। सति तु पितरि पार्ब्बणाधिकारात् पुत्राणां नांशिता। एवं धनिनः पौत्रस्तत्पोषरमे तदंशमात्रे प्रपौत्राणामंशिता। इति दायतत्त्वं॥

अंशुः, पुं, (अंशयति इति अंश विभाजने। भृञादित्वात् कुः।) किरणः॥ प्रभा॥ इति मेदिनी॥ वेशः॥ इति धरणी॥ सूत्रादिसूक्ष्मांशः। इति हेमचन्द्रः॥ वेशः॥ सूर्य्यः॥ इति विश्वः॥ (ऋषिविशेषः। लतावयवः। सोमलतावयवः। भागः।)

अंशुकं, क्ली, (अंशून् कायति। कै शब्दे। आतइति कः। यद्वा अंशुभिः काश्यते। काश दीप्तौ। अन्येष्वपीति डः।) वस्त्रमात्रं। सूक्ष्मवस्त्रं। उत्तरीयवस्त्रं॥ इति मेदिनी॥ शुभ्रवस्त्रं॥ इत्यमरटीकायां रमानाथः॥ (अधोवस्त्रं।) पत्रं। तेजपात इति भाषा। इति राजनिर्घण्टः॥

अंशुधरः, पुं, (अंशूनां धरः। धरति इति धरः॥ पचाद्यच्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥

अंशुमत्फला, स्त्री, (अंशुमन्ति सूक्ष्मावयववन्ति फलानि अस्याः। अंशुमानिव फलानि अस्याः इति वा। अजादित्वात् टाप्।) कदलीवृक्षः। इत्यमरः॥

अंशुमती स्त्री, (अंशवः सन्ति अस्याः। मतुप् ङीप् च। अंशुमत्याः फलं मूलञ्च अंशुमती। अनुदात्तादेरिति अञ्। फलपाकमूलेषु इति लुपि युक्तवद्भावः।) सालपर्णीवृक्षः। इत्यमरः॥ (परदेवता।)

अंशुमान् [त्] पुं, (अंशवो विद्यन्ते अस्य इति। तदस्यास्तीति मतुप्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥ असमञ्जसपुत्रः सूर्य्यवंशीयराजविशेषः॥ यथा।

"सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः"॥

इति रामायणे बालकाण्डे ७० सर्गः ॥ सूर्य्यवंशीयासमञ्जोराजपौत्रः । यथा,—
"ततश्चकारासमञ्जा गङ्गानयनकारणं ।
लक्षवर्षं तपस्तप्त्वा ममार कालयोगतः ॥
दिलीपस्तस्य तनयो गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं यथौ लोकान्तरं नृपः ॥
अंशुमांस्तस्य पुत्रोऽभूद्गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः ॥
भगीरथस्तस्य पुत्रो महाभागवतः सुधीः ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः" ॥
इत्यादि ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥ (विश्वव्यापिप्रकाशः परमात्मा ।) अंशुयुक्ते त्रि ॥ सोमलतायां अवयवविशिष्टः ।)

अंशुमाली, [न्] पुं, (अंशूनां माला अस्ति अस्य इति । व्रीह्यादित्वात् इनिः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (आदित्य इवांशुमाली बभार, इति विष्णुपुराणम् ।)

अंशुलः, पुं, (अंशुः विद्याज्योतिः अस्ति अस्य । इति । अंशु + लच् ।) चाणक्यमुनिः । इति त्रिकाण्डशेषः ॥

अंशुहस्तः, पुं, (अंशुरेव हस्तः यस्य सः ।) सूर्य्यः । इति जटाधरः ॥

अंस, त् क विभाजने । अंशकरणे । इति कविकल्पद्रुमः ॥ दन्त्योपधः । विभाजन इति भाजत्क तु पृथक्कृत्वा इत्यस्य रूपं । अंसयति अंसापयति धनं वणिक् । इति दुर्गादासः ॥

अंसः, पुं, क्ली, (अंस्यते समाहन्यते । अंस समाघाते । घञ् । यद्वा अमति अभ्यते वा भारादिना । अम गतौ । असेः सन् ।) स्कन्धः । इत्यमरः ॥ विभागे पुं । इति विश्वो हेमचन्द्रश्च ॥ (अन्यत् सर्व्वम् अंशशब्दे द्रष्टव्यम् ।)

अंसकूटः पुं, (अंसे स्कन्धे कूटइव इति ।) ककुद् । बाँड़ेर झूँट इति भाषा । इति हेमचन्द्रः ॥

अंसलः, त्रि, (अंसोऽस्यास्तीति । वत्वांसाभ्यां कामबले इति मत्वर्थीयलच् ।) बलवान् । इत्यमरः ॥

अंहः, [स्] क्ली, (अमति गच्छति प्रायश्चित्तादिना । अम गत्यादिषु । असेः ऊङ् च इति असुन् ऊङागमश्च । अमति गच्छति अधोऽनेन वा । अहेरसुना सिद्धे अघेरसुनि अह इति मा भूदिति असेः ऊङ् चेति सूत्रं । तथा च—
"स्यान्मध्योऽघचतुर्थंतमंहसोरंहसस्तथा" ।
इति द्विरूपकोषः । एवञ्च 'दत्ताधीः सिद्धसङ्घैर्विदधतु हृदयः श्रोत्रमङ्गोविघातम्' इति सूर्य्यशतके पाठः अनुप्रासरसिकानां प्रामादिक इति वदन्ति ।) पापं । इत्यमरः ॥ (दुःखं । विघ्नः । स्वधर्म्मत्यागः ।)

अंहतिः, स्त्री, (हन्तेरंहच इति अतिः ।) दानं । इत्यमरः ॥ हिंसा ॥ त्यागः । इति मेदिनी ॥

अंहती, स्त्री, (हन्तेरंहच इति अतिः, वृद्धादित्वात् ङीष् ।) दानं । इत्यमरटीकासारसुन्दरी ॥

अंहितिः, स्त्री, (अंहन् + अति । अंहादेशः इड़ागमश्च) दानं । इत्यमरटीकायां रायमुकुटः ॥

अंक्रिः, पुं, (अंहि + क्रिण् । वंक्रादयश्च इति उणादिसूत्रम् ।) पादः ॥ वृक्षमूलं । इत्यमरः ॥

अंक्रिपः, पुं, (अंक्रिभिः पिबति इति । पा पाने । सुपोति योगविभागात् कः । वृक्षः । इति हलायुधः ॥

अंक्रिस्कन्धः, पुं, (अंक्रिः पादः । तस्य स्कन्ध इव ।) गुल्फः । (कुर्च्छशिरः ।) इति हेमचन्द्रः ॥

अक, म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः ॥ म अकयति अकति सर्पः । इति दुर्गादासः ॥

अक, इ क लक्ष्मणि । इति कविकल्पद्रुमः । लक्ष्म चिह्नयुक्तकरणं । इ क अङ्क्यति वस्त्रं रजकः । नोपधपाठेऽपि ञेर्नित्यत्वाद्धस्वेऽपि नाम्नित्यस्याप्राप्तौ यगादौ अङ्कते इत्यादौ सिद्धे इदित् पाठस्वरादेर्ञेरनित्यत्वज्ञापनार्थः । तेन अङ्कतीत्यपि स्यात् । तथाच वोपदेवः ।
"सिद्धे नित्यणिजन्तत्वान्नित्यनुन्धे कितामिदित् ।
निजनित्यत्वबोधार्थं न दृष्टोऽनुबिधिःक्वचिदिति" ।
अस्यार्थः । कितां कानुबन्धानां नित्यणिजन्तत्वान्नित्यञन्तत्वान्नित्यनुन्धे नित्यनकारवत्त्वे सिद्धे इदित् इदनुबन्धकरणं णिचो ञेरनित्यत्वबोधार्थं । किन्तु अनुबिधिर्नकाराभावः क्वचिदपि न दृष्टः । इति दुर्गादासः ॥

अक, इ ङ गत्यां । लक्ष्मणि । इति कविकल्पद्रुमः ॥ इ अङ्कते । ङ अङ्कते पुण्यतीर्थेषु दृषयुग्मान्यग्निहोत्रं । इति हलायुधः ॥ इति दुर्गादासः ॥

अकं, क्ली, (न कं सुखं । तद्विरुद्धं वा । नञ्समासः । नञः न लोपः ।) पापं । दुःखं । इति मेदिनी ॥

अकचः, पुं, (नास्ति कचः केशः यस्य सः ।) केतुग्रहः । इति हारावली ॥ वाचस्पतिस्तु केशशून्ये ॥

अकथ्यः, त्रि, न कथ्यः । नञ्समासः ।) अकथनीयः । अवक्तव्यः ॥

अकनिष्ठः, पुं, (न कनिष्ठः नञ्समासः । वृद्धः । इति शब्दरत्नावली ॥ (बहूनि शतसहस्राणि यावदकनिष्ठानां देवानां सन्निपतितान्यभूवन् इति ललितविस्तरः ।) कनिष्ठभिन्ने वाचस्पतिः ॥

अकनिष्ठगः, पुं, (अकनिष्ठ + गम् + डः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

अकम्पितः, पुं, (न कम्पितः । नञ्समासः ।) बौद्धगणाधिपविशेषः । इति हेमचन्द्रः ॥ कम्परहिते वाचस्पतिः ॥ (असंदिग्धान् स्थिरान् ब्रूयादविचलानकम्पितान् । इति ऋग्वेदीयप्रातिशाख्यसूत्रम् ।)

अकरणिः, स्त्री, (न + कृञ् अनि ।) आलोचनविशेषः । आपः । यथा तस्याकरणिरेवास्तु । इत्यमरः ॥

अकरा, स्त्री, (न + कृञ् + अच् । स्त्रियां ङीप् ।) आमलकी । इति शब्दचन्द्रिका ॥ वाचस्पतिस्तु करराहिते ॥

अकरण्ड, त्रि, (नास्ति करण्डो यस्य इति ।) करण्डशून्यः । निर्दयः । अल्पः । यथा,—
"रघोर्वंशे कुत्सामकरण्ड समुत्सारयति कः" ।
इति महानाटकं ॥

अकर्कशः, त्रि, (न कर्कशः । नञ्समासः ।) कार्कश्यरहितः । कोमलः । इति हेमचन्द्रः । (अकर्कशा अपरुषा । इति ललितविस्तरः ।)

अकर्णः, त्रि, (नास्ति कर्णौ यस्य सः ।) कर्णरहितः । यथा,—
"अपाणिपादो जवनो गृहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः" ।
इति श्वेताश्वतरश्रुतिः ।) बधिरः । इति हेमचन्द्रः ॥

अकर्त्तनः, पुं, (न + कृत् + ल्युट् ।) वामनः । खञ्जः । इति जटाधरः ॥

अकर्त्तव्य, त्रि, (न + कृत् + तव्य । न कर्त्तव्यं । नञ्समासः ।) अकरणीयं । अकरणार्हं । अकार्य्यं । यथा,—
"अविरोधी भवाब्धौ च सर्व्वमङ्गलमङ्गलं ।
विरोधी नाशवीजञ्च सर्व्वोपद्रवकारणं ॥
अकर्त्तव्यो विरोधश्च दारुणैः क्षत्रियैः सह" ।
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्यायः ॥

अकर्त्ता, [तृ] त्रि, (न कर्त्ता । नञ्समासः ।) अकारकः । यथा,—
"चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययं" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १३ श्लोकः ॥ (कर्म्मनिर्लिप्तः साङ्ख्योक्तः पुरुषः । कुकर्म्मकारी ।)

अकर्म्म, [न्] क्ली, (न कर्म्म । नञ्समासः ।) अकरणीयकार्य्यं । यथा,—
"किं कर्म्म किमकर्म्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः ।
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः ॥
कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत्" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १६ । १७ । १८ श्लोकाः ॥ (अप्रशस्तं कर्म्म । कर्म्माभावः । दुष्कर्म्म ।)

अकर्म्मण्य, त्रि, (न कर्म्मणि साधुः । न + कर्म्मन् + यत् । कर्म्मायोग्यं । कार्य्यानर्हं । निष्कर्म्मण्यं । अकेजुया इति भाषा । यथा,—
"षष्टिदण्डात्मिकायाश्च तिथेर्निष्क्रमणे परे ।
अकर्म्मण्यं तिथिमलं विद्यादेकादशीं विना" ॥
इति तिथ्यादितत्त्वं ॥

अकर्म्मा, [न्] त्रि, (नास्ति कर्म्म यस्य; बहुव्रीहिः । कार्य्यात्तमः । निष्कर्म्मा । कार्य्यानुपयुक्तः ॥ (क्रियामन्दः । कुकर्म्मा । स्वेच्छाचारी ।)

अकर्म्मान्वितः, त्रि, (कर्म्मणा अन्वितः न भवतीति । न + कर्म्मन् + क्तान्वितः ।) कुकर्म्मान्वितः । अकर्म्मविशिष्टः । दुष्कर्म्मयुक्तः ॥

अकल्कनः, त्रि, (नास्ति कल्कनं दम्भः यस्य सः । न + कल्कन ।) दम्भरहितः । तत्पर्य्यायः । दीत-

दम्भः २। इति हेमचन्द्रः॥ (ग्राव्यरहितः। सरलः।) अकल्कल इत्यपि पाठः।

अकल्का, स्त्री, (नास्ति कल्कः अन्धकारमालिन्यं यस्याम् इति।) ज्योत्स्ना। इति शब्दचन्द्रिका॥ वाचलिङ्गस्तु कल्करहिते॥ (ग्राव्यशून्यः। दम्भशून्यः। सरलः। निर्म्मलः।)

अकल्पितः, त्रि, (न कल्पित इति। नञ्समासः।) कल्पनारहितः। अकाल्पनिकः। अकृत्रिमः। अरचितः। (सत्यः। प्रकृतः। अवितथः।)

अकल्यः, त्रि, (न कल्यः सुस्थः। नञ्समासः।) रोगी॥ (यथा,—

"अकल्यबालस्यविरविषमस्थक्रियाकुलान्।
... ... नाङ्गाययेन्नृपः"॥

इति मिताक्षराधृतवचनम्॥ असमर्थः। यथा,—

"अकल्यः खाङ्गचेष्टायां शकुन्त इव पञ्जरे"।

इति भागवते।) कल्यो निरामयः तत्र नञ्समासः॥

अकल्याणं, क्ली, (न कल्याणं। नञ्समासः।) अमङ्गलं। अशुभं॥ (त्रि। कल्याणरहितः।)

अकस्मात्, व्य, अतर्कितं। हठात् १। तत्पर्य्यायः। सहसा २ सद्यः ३ सपदि ४ तत्क्षणे ५ एकपदे ६। इति हेमचन्द्रः॥ नञ्समस्तकिमुशब्दस्य पञ्चम्यन्तप्रयोगोऽयं। इति केचित्॥

अकारणं, त्रि, (नास्ति कारणं यस्य सः। न+कारणं।) कारणशून्यं। निर्हेतु। अनिमित्तं। यथा,—

"कुतः पुनः शश्वदभद्रमीश्वरे,
न चार्पितं कर्म्म यदप्यकारणम्"।

इति श्रीभागवतं॥ (कारणं विना। कारणाभावः। यथा,—"कारणसामान्ये द्रव्यकर्म्मणां कर्म्माकारणमकृतम्"। इति वैशेषिकसूत्रम्।)

अकारणगुणोत्पन्नगुणः, पुं, (विना कारणगुणं उत्पन्ना जाताः ये गुणाः। अकारणगुण+उत्पन्न+गुण।) स्वाभाविकगुणः। न्यायमते विभुनिष्ठविशेषगुणाः यथा,—बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावना ९ शब्दः १०।

("अतीन्द्रिया विभूनान्तु ये स्युर्विशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः"॥

इति भाषापरिच्छेदे। अकारणेति कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते। बुद्ध्यादयस्तु न तादृशाः। आत्मादेः कारणाभावात्।) इति सिद्धान्तमुक्तावली॥

अकार्पण्यं, क्ली, (न कार्पण्यम्। नञ्समासः।) कृपणतारहित्यं। यथा,—

"स्तोकादपि च दातव्यमदीनेनैव चात्मना।
अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत् स्मृतम्"॥

इत्येकादश्यां तत्त्वम्॥

अकार्य्यं, क्ली, (न कार्य्यम्। नञ्समासः।) कार्य्याभावः। अकृत्यं। अकर्म्म। (दुष्कर्म्म। कुकार्य्यम्।) यथा,—

किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनां"।

इति श्रीभागवतं॥

अकालः, पुं, (न कालः, अप्रशस्तः कालो वा। नञ्समासः।) असमयः। अप्रशस्तकालः। यथायोग्यकालातिरिक्तसमयः। अशुद्धकालः। यथा,—गुरोरस्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्यास्ते द्वात्रिंशद्दिनं। तस्योदयात् परं बालत्वे पञ्चदशाहः। गुर्व्वादित्ययोगे स्थितिकालः दशत्रिंशद्दिनादिः।

सिंहे गुरोः स्थितिकालः सम्वत्सरस्थूलः। अस्य विश्लेषः यदि माघपौर्णमास्यां मघानक्षत्रं प्राप्यते तदैवं भाव्यं। वक्रिगुरौ अष्टाविंशतिदिनं। पूर्व्वराशावनागतातिचारिगुरौ एकवर्षः। अयमेव लुप्तसम्वत्सरः। पूर्व्वराशिगन्तातिचारिगुरौ पञ्चचत्वारिंशत् दिनं। नीचस्थगुरोः स्थितिकालः संवत्सरस्थूलः। राजयुक्तगुरोः स्थितिसमयः एकाब्दः स्थूलः। भृगोर्मौढ्यात्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्य मौढ्यात्ते द्विसप्ततिदिनं। तस्योदयात् परं बालत्वे दशाहः। एतत्त्रयं श्रीघ्रास्तमुच्यते॥ भृगोः पादास्तात् प्राक् वृद्धत्वे दशाहः। तस्य पादास्ते द्वादशाहः। तस्योदयात् परं बालत्वे दिनत्रयं। एतत्त्रयं वक्रास्तमुदितं। मलमासे मासमेकं॥ भानुलङ्घितमासे त्रयमासे च तदेव॥ भूकम्पाद्यद्भुते सप्ताहः॥ पौषादिचतुर्मासे एकदिनचरणाङ्कितवर्षेऽब्दे तद्दिनं। दिनद्वयचरणाङ्कितवर्षेऽब्दे दिनत्रयं। दिनत्रयचरणाङ्कितवर्षेऽब्दे सप्ताहः॥ दक्षिणायने षण्मासाः॥ श्रीहरिशयने चतुर्मासः॥ चन्द्रसूर्य्यग्रहणे कर्म्मविशेषे एकत्रिंसप्तदिनानि॥ इति ज्योतिषतत्त्वं॥

अकालजः, त्रि, (अकाले जायते इति। अकाल+जन+ड। अकालजातः। असमयोत्पन्नः। अपूर्णकालोद्भवः। यथा,—

"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतं"॥

इति राजवल्लभः॥

अकालजलदोदयः, पुं, कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥ यथा रघुवंशे—

"यवनीमुखपद्मानां सेहे मधमदं न सः।
बालातपमिवाज्ञानामकालजलदोदयः"॥

अकालमेघोदयः, पुं, (अकाले यः मेघानाम् उदयः।) कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥

अकिञ्चनः, त्रि, (नास्ति किञ्चन यस्य। मयूरव्यंसकादित्वात् षष्ठीसमासः।) दरिद्रः। नास्ति किञ्चिदपि यस्य। इति हेमचन्द्रः॥ (यथा,—'अकिञ्चनः सन् प्रभवः स सम्पदाम्' इति कुमारसम्भवे।)

अकिञ्चनता, स्त्री, (अकिञ्चनस्य भावः। अकिञ्चन+तल्।) अकिञ्चनस्य भावः। सा तु परिग्रहत्यागरूपयमविशेषः। इति हेमचन्द्रः॥

अकिल्बिषः, त्रि, (नास्ति किल्बिषं यस्य। षष्ठीसमासः।) किल्बिषशून्यः पापरहितः। यथा,—

"न मां दोषेण सुग्रीव गन्तुमर्हस्यकिल्बिषं"।

इति रामायणं॥

अकीर्त्तिः, स्त्री, (न कीर्त्तिः। नञ्समासः।) अयशः। यथा,—

"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते"॥

इति श्रीभगवद्गीतायां २ अध्याये ३४ श्लोकः॥

अकीर्त्तिकरं, त्रि, (अकीर्त्तिं करोति जनयति इति। यद्वा कीर्त्तिकरं न भवतीति नञ्समासः।) अयशस्करं। यथा,—

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्জ্জুন"॥

इति श्रीभगवद्गीतायां २ अध्याये २ श्लोकः॥

अकुतोभयः, त्रि, (नास्ति कुतोऽपि भयं यस्य सः। मयूरव्यंसकादिगणान्तर्गतः। न+कुतः+भयं।) नास्ति कस्माद्भयं यस्य। निर्भयः। यथा। इच्छतामकुतोभयमिति भक्तिरसामृतसिन्धुः॥

अकुप्यं, क्ली, (न कुप्यं, कुप्यादन्यदित्यर्थः। नञ्समासः।) स्वर्णं। रूप्यं इति हलायुधः॥ यथा—

कुरून्नकुप्यं वसु वासवोपमः'। इति भारविः)॥

अकूपारः, पुं, (न कूपारः। नञ्समासः। कुं पृथिवीं पिपर्त्ति इति कूपारः। पॄ पालनपूरणयोः। कर्म्मणि अण्। अन्येषामपीति दीर्घः।) समुद्रः। इत्यमरः॥ कूर्म्मराजः। पायायादिः। इति मेदिनी॥ कमठः। इति चिकाण्डशेषः॥

अकूर्चः, पुं, (नास्ति कूर्चः कैतवं यस्य। बहुव्रीहिः।) बुद्धः। इति चिकाण्डशेषः। कैतवशून्ये त्रि। (दम्भशून्ये)।

अकृतं, त्रि, (न+कृ+क्त।) न कृतं। अनिष्पादितं। यथा—

"कालातीतन्तु यत् कुर्य्यादकृतन्तद्विनिर्द्दिशेत्"

इति स्मृतिः॥ (नित्यः। प्रमाणाविषयः। (स्त्री) मोक्षः। कारणं। (स्त्री) प्रकृतिविशेषः। यथा—"अपां निम्नदेशगमनादिलक्षणा प्रकृतिः सा न केनचित्कृता"।)

अकृतघ्नः, त्रि, (न+कृत+घ्न+क।) न कृतघ्नः इति नञ्समासः।) कृतघ्नः। हितास्मर्त्ता। उपकारामानी। उपकारहन्ता। यथा,—

"भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः।
आत्मारामाः पूर्णकामा अकृतज्ञा गुरुद्रुहः"॥

इति श्रीभागवतं॥

अकृतित्वं, क्ली, (न+कृतिन्+त्व।) अक्षमता। अपटुता। कर्म्माकुशलत्वं। अयोग्यत्वं॥

अकृती, [न्] त्रि, (न+कृती। नञ्समासः।) कर्म्माक्षमः। कार्य्याकुशलः। क्रियानुपयुक्तः।

अकृत्रिमं, त्रि, (करणात् जातः कृत्रिमः। स न भवतीति नञ्समासः।) अकरणजं। अजन्यं। सिद्धं। अकरणजातं। यथा दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।
तिलपुष्यकुशादीनि स्नानाकृत्रिमे जले"॥

इत्याह्निकाचारतत्त्वं॥ • ॥ किञ्च। कात्यायनः।

"पूर्व्वपक्षं स्वभावोक्तं प्राश्निकोऽथ लेखयेत्।

बोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनं" ॥ स्वभावोक्तं अकृत्रिमं। इति शब्दरत्नावली ॥ (अक्रियोत्पन्नः। नैसर्गिकः। अयत्नलभ्यः। यथा,— "तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति"। इति हितोपदेशः।)

अकृपः, त्रि, (नास्ति कृपा यस्य सः।) कृपाशून्यः। निर्दयः। अकरुणः। यथा,— "वनजौ वनजौ कृतस्मिरामी सकृपोऽकृपः"। इत्यनुप्रासाचार्य्यः ॥

अकृपणः, त्रि, (न कृपणः। नञ्समासः।) कार्पण्यरहितः। दीनताशून्यः। यथा,— "महता व्यसनं प्राप्तो दीनः कृपण उच्यते। कुलेऽप्यकृपणे राम संभूतः सर्वकामदे" ॥ इति रामायणं ॥ (पुष्कलः। बहुलः। यथा,— "भूयस्यां नवपल्लवैरकृपणैरतिष्ठ यामो वयम्"। इति वैराग्यशतके।

अकृष्णकर्म्मा, [न्] त्रि, (न कृष्णं मलिनं कर्म्म यस्य सः। न+कृष्ण+कर्म्मन्।) दुष्कर्म्मरहितः। निष्पापः। शुद्धाचारः। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य। इत्यमरटीकायां भरतः ॥

अकेशः, त्रि, (नास्ति केशो यस्य। अल्पः अप्रशस्तो वा केशो यस्य सः।) केशरहितः। अल्पकेशयुक्तः अप्रशस्तकेशविशिष्टः ॥

अकैतवं, क्ली, (न कैतवम्। नञ्समासः।) कैतवाभावः। अकपटता। अधूर्त्तता। अवञ्चना ॥

अकोटः, पुं, (न+कुट+भावे घञ्।) गुवाकः। इति त्रिकाण्डशेषः ॥

अकोविदः, त्रि, (न कोविदः। नञ्समासः।) अपण्डितः। मूर्खः ॥

अकौटिल्यं, क्ली, (न+कौटिल्यं। नञ् समासः।) कौटिल्याभावः। सरलता ॥

अक्का, स्त्री, (अकं दुःखं कायति शब्दायति इति कै शब्दे।) माता। इति शब्दरत्नावली ॥

अक्तः, त्रि, (अञ्जेर्गतौ क्तः। अक्तपरिमाणस्य वाचक इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात्। अनक्ति अज्यते वा। अञ्जू व्यक्त्यादौ। अञ्जिवृसिभ्यः क्तः इति औणादिकः क्तः।) युक्तः ॥ गतः ॥ व्यक्तः ॥ अनज अक्तिगतिम्रक्षणे इत्यस्मात् कर्म्मणि क्तः। यथा,— "स्निग्धाम्बुवासातुरे पूर्व्वं तैलाक्ते खेद इष्यते"। इति चक्रदत्तः। (स्त्रियां अक्ता इति पदं रात्रिवाचकम् वेदे प्रसिद्धम्।)

अक्तुः, स्त्री, रात्रिः। अनक्ति प्रतिदिनं गच्छति अक्तुः। अञ्जू धातु अक्तिगतिम्रक्षणे बाहुलकात् कुः अनिदितामिति नलोपः। वेदप्रचुरप्रयोगोऽयं ॥ (आयुधं। किरणः। कान्तिः। नक्षत्रं। स्रोतः। अञ्जनघृतं। एते अर्थाः वैदिकग्रन्थे प्रसिद्धाः।)

अक्रव्यादः, त्रि, (न क्रव्यादः। नञ्समासः।) अमांसभक्षकः। यथा,— "क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीं। अक्रव्यादान वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं" ॥

इति मानवे ११ अध्याये १३३ श्लोकः ॥

अक्रमः, त्रि, (न क्रमः। नञ् समासः। नास्ति क्रमो यस्य इति वा।) क्रमरहितः। व्यतिक्रमः। यथा,— "अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः"। इति माधवकरः ॥ (क्रमाभावः। क्रमविपर्य्ययः। यथा,—'इदमनुचितमक्रमञ्च पुंसां यदिह जरासपि मान्मथा विकाराः' इति शृङ्गारशतकम्।)

अक्रान्ता, स्त्री, (न+क्रम्+क्त+टाप्।) दहती। इति कात्यिद्रत्नमाला ॥ अनाक्रान्ते त्रि ॥

अक्रियः, त्रि, (नास्ति क्रिया यस्य। अप्रशस्ता वा क्रिया यस्य।) अक्रियान्वितः। कुकर्म्मविशिष्टः। क्रियारहितः। यथा 'अक्रियत्वाच्च सर्व्वदा'। इति चरकः ॥ (निश्चेष्टः। स्पन्दरहितः। कर्म्मत्यागी। यथा,— "अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः" ॥ इति गीतायाम्।) (स्त्री। क्रियाभावः। क्रियात्यागः। अयथाक्रिया। यथा,— "अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः सर्वकर्म्मिणाम्। अक्रिया च परोक्ता च तृतीया चायथाक्रिया" ॥ इति काव्यसङ्कलितः।)

अक्रूरः, पुं, (क्रौर्य्यवान् क्रूरः, स न भवति इति अक्रूरः। यद्वा क्रूर इति भावप्रधानो निर्देशः। न विद्यते क्रौर्य्यम् इति अक्रूरः।) गान्दिनीपुत्रः। श्वफल्कात्। तस्य पिता श्वफल्कः। (तस्य माता गान्दिनी।) इति श्रीभागवतं ॥ क्रूरताशून्ये त्रि ॥ (सरले। यथा,— "स्त्रीणां सुखोद्यमक्रूरं विस्रब्धार्थं मनोरमम्"। इति मनुः। पुंसि विष्णुः। यथा,— "अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः"। इति भारते।)

अक्रोधः, पुं, (न क्रोध इति नञ् समासः। नास्ति क्रोधो यस्य इति वा।) क्रोधचित्तविकारः तद्विपरीतः। स तु आश्रमिणां दशधर्म्मान्तर्गतधर्म्मः। इति जटाधरः ॥ (यथाह मनुः— "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" ॥ इति।) वाच्यलिङ्गस्तु क्रोधरहितवाच्यौ ॥

अक्लान्तः, त्रि, (न+क्लम्+क्त। न क्लान्त इति नञ्समासः।) क्लान्तिरहितः। अनवसन्नः। अग्लानः ॥

अक्लिका, स्त्री, नीलीवृक्षः। इति शब्दचन्द्रिका ॥

अक्लिष्टकर्म्मा, [न्] त्रि, (अक्लिष्टम् अनायाससाध्यं कर्म्म यस्य। बहुव्रीहिः।) अक्लेशेन कर्म्मकर्त्ता। यथा,— "दूतोऽहं कोशलेन्द्रस्य रामस्याक्लिष्टकर्म्मणः"। इति रामायणं।

अक्लैब्यं, क्ली, (न क्लैब्य इति नञ् समासः।) क्लैब्याभावः। यथा,— "यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः। अप्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयं" ॥ इति मानवे ४ अध्याये २ श्लोकः ॥ क्लैब्याभाववति त्रि ॥

अक्लेशः, त्रि, (नास्ति क्लेशो यस्य इति बहुव्रीहिः।) क्लेशशून्यः। अनायासः। अकष्टः ॥

अक्ष, न ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। न अक्ष्णोति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिप्तौ। आक्षौ। इति दुर्गादासः।

अक्ष, ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। अक्षति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिप्तौ। आक्षौ। इति दुर्गादासः॥

अक्षं, क्ली, (अक्ष्णोति अक्षति वा अक्ष्यते वा अनेन अक्ष वा अक्षू व्याप्तौ। पचाद्यच् घञ् वा। अक्षते अक्षर्थं अक्षू व्याप्तौ। अक्षेर्देवने इति सेो वा।) इन्द्रियं। (यथा विष्णुपुराणे,— "शब्दादिष्वनुरक्तानि निगृह्यात्मानि योगवित्। कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः" ॥) सौवर्च्चलं। तुत्थं। इति मेदिनी। (चक्षुः। यथा रामायणे,— "सर्व्वे तेऽनिमिषैरक्षैस्तमनुव्रतचेतसः"। इति।)

अक्षः, पुं, कर्षपरिमाणं। (यथा,— "ते षोड़शाक्षाः कर्षोऽस्त्री पलं कर्षचतुष्टयं" ।) पाशकः। (अक्षैरत्तान् वा दीव्यति। इति सिद्धान्तकौमुदी।) (पाशक्रीड़ा। यथाह मनुः)— 'मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः'।) कलिद्रुमः। इत्यमरः। (विभीतकवृक्षः। यथा छान्दोग्ये—यथा वै द्वे आमलके द्वे कोले द्वौ वाक्षौ मुष्टिमनुभवति।) ज्ञातार्थः। शकटः। अवहारः। रथाङ्गः। इन्द्राक्षः। सर्पः। चक्रं। इति मेदिनी। (चक्रधारणदारुभेदः। यथा,— "छिन्नाक्षे भग्नयुगे तिर्य्यक् प्रतिमुखागते। अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च" ॥) आत्मा। रावणपुत्रः। इति हेमचन्द्रः। (यथा रामायणे—'निगृह्य राजा समरे सहोत्सुकं कुमारमक्षं प्रसभैश्चताथ वै'।) जातान्धः। गरुड़ः। इति शब्दरत्नावली। (शिवः। यथा भारते— "अक्षस्त्र रथयोगी च सर्व्वयोगी महाबलः"। इति) संस्कृतपलभा। यथा,— "चन्द्रार्किनिघ्ना पलभार्द्धिता च लङ्कावधिः स्यादिह दक्षिणोक्षः"। इति भास्करी ॥ "प्रभा शरघ्ना खतुरीययोगा- दक्षः सदा दक्षिणदिक् प्रदिष्टः"। इति जातकार्णवः— "दक्षिणोत्तररेखायां सा तत्र विषुवत् प्रभा। ध्रुवच्छाया हते चिह्ने विषुवत् कर्णभाजिते ॥ लम्बाक्षाख्ये तयोर्व्यापे लम्बाक्षौ दक्षिणौ सदा"। इति सूर्य्यसिद्धान्तः ॥

अक्षकः, पुं, (अक्ष+क) तिनिशवृक्षः। इति रत्नमाला।

अक्षक्रीड़ा, स्त्री, (अक्षैः या क्रीड़ा) द्यूतक्रीड़ा पाशकक्रीड़ा। यथा। अक्षक्रीड़ायां व्यासयुधिष्ठिरसंवादः प्रचरति। इति तिथ्यादितत्त्वं॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यं॥ * ॥ कार्त्तिकशुक्लप्रतिपदि तत्क्रीड़ाविधिर्यथा। ब्रह्मपुराणे,—

"शङ्करस्य पुरा द्यूतं ससर्ज सुमनोहरं।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोचिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धस्तु सञ्जनाशकरो भवेत्"।

द्यूतञ्चाप्राणिभिः क्रीड़नं। यथा मनुः,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।

इति तिथ्यादितत्त्वं॥ * ॥ दशम्यादिदशम्यन्तकरणनिषेधो यथा। स्मृतिः,—

"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत्"॥

कूर्म्मपुराणं,—

"कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यताम्।
द्यूतक्रीड़ां दिवानिद्रां व्यायामं क्रोधमैथुनं॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्"।

इत्येकादशीतत्त्वं॥ * ॥ अन्यत् द्यूतशब्दे द्रष्टव्यं॥

अक्षजः पुं, (अक्ष+जन्+ड) वचः। इति पुरुषोत्तमः। अस्यिज इति क्वचित् पाठः। (विष्णुः। यथा भागवते,—

"जघानोत्पत्य गदया हनावसुरमक्षजः"।

अक्षतं, क्ली, (क्षण हिंसायां। नपुंसके भावेक्तः। अनुदात्तोपदेशेत्यादिना नलोपः।) लाजाः। नपुंसकं। इति मेदिनी।

अक्षतः, त्रि, (न+क्षण्+क्त) अहिंसितः। इति मेदिनी। अखण्डितः। इति शब्दरत्नावली। (यथाह मनुः,—

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु स्थानेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्"॥)

अक्षतः, पुं, यवः। इति मेदिनी। (यथा आश्वलायनगृह्यसूत्रे,—

"अक्षतसक्तूनां नवं कलसं पूरयित्वा"।)

ह्रस्वमात्रं। इति अमरटीकायां भानुदीक्षितः॥

अक्षता, पुं भू क्षीति स्वामी॥ (न क्षताः येषां ते इति अक्षताः। मुकुटस्तु अमरव्याख्यानावसरे लाजाः पुं भूम्नितेऽक्षतमिति पठित्वा कर्म्मणि क्तः। क्षतं खण्डितं। न क्षतमक्षतमिति विग्रहे नित्यपुंलिङ्गाः नित्यबहुवचनान्ताश्च लाजा अक्षतमिति व्याख्यौ॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहुः।)

अक्षता स्त्री, कर्कटशृङ्गी। काँकड़ाशृङ्गी इति भाषा। इति शब्दचन्द्रिका॥ पतिपुत्रसंसर्गरहिता स्त्री। स्मृतिः॥ यथाह याज्ञवल्क्यः—

"अक्षतायां क्षतायां वा जातः पौनर्भवः पुनः"।

अक्षदर्शकः, पुं, (अक्षाणां व्यवहाराणां दर्शकः। अक्ष+दृश्+ण्वुल्।) व्यवहारद्रष्टा व्यवहाराणां ऋणादानादिविवादानां द्रष्टा निर्णेता। धर्म्माध्यक्ष इत्यर्थः। इत्यमरः तट्टीका च॥ जज् इति इंराजीयभाषा॥

अक्षदृक्, (श्) पुं, (अक्ष+दृश्+क्विप्।) अक्षदर्शकः। (व्यवहारस्य ज्ञाता।)

अक्षदेवी, (न्) त्रि, (अक्षैर्देव्यति। दिवु क्रीड़ादौ। सुपीति णिनि।) द्यूतक्रीड़ाकारकः। इत्यमरः॥

अक्षद्यूः, पुं, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। अक्ष+दिव्+क्विप्+ऊट्।) अक्षक्रीड़कः। इति व्याकरणं॥

अक्षधरः पुं, (अक्ष+धृ+अच्।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

अक्षधूर्त्तः पुं, (अक्षेषु धूर्त्तः। सप्तमी शौण्डैरिति समासः।) द्यूतक्रीड़कः। तत्पर्य्यायः। धूर्त्तः २ अक्षदेवी ३ कितवः ४ द्यूतकृत् ५। इत्यमरः॥ जुयारी इति भाषा।

अक्षधूर्त्तिल पुं, (अक्ष+धुर्+तिल्।) वृषः। इति हारावली॥

अक्षपाटकः पुं, (अक्ष+पाट+वुन्।) धर्म्माध्यक्षः। इति जटाधरः॥ जज् इति भाषा॥

अक्षपादः पुं, (अक्ष+पाद।) तार्किकः। तत्पर्य्यायः। नैयायिकः २। इति हेमचन्द्रः॥

अक्षपीड़ा स्त्री, (अक्ष+पीड़ा।) यष्टिक्षता लता। इति राजनिर्घण्टः॥

अक्षमः त्रि, (नास्ति क्षमा यस्य सः।) क्षमारहितः। क्षमाशून्यः। (असमर्थः।)

"विष्णुसेवी च श्वपचो वंशानां कोटिमुद्धरेत्।
हरेरभक्तो विप्रश्च स्वञ्च रक्षितुमक्षमः"॥

इति ब्रह्मवैवर्त्ते ३३ अध्यायः॥

अक्षमा स्त्री, (न क्षमा इति नञ्समासः।) अक्षान्तिः। ईर्षा। इति शब्दरत्नावली॥ (यथा किरातार्জ্জुनीये—

"अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापिनी।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति"॥

अक्षमाला स्त्री, (अक्षाणां माला।) अक्षसूत्रं। वशिष्ठपत्नी। इति मेदिनी॥ (यथाह मनुः—

"अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा"।

अक्षसूत्रेति तान्त्रिकभाषया अकारादिक्षकारान्तवर्णमाला रुद्राक्षमाला च। यथा गौतमीये,—

"पञ्चाशल्लिपिभिर्भाला विहिता जपकर्म्मसु।
अकारादिक्षकारान्ता अक्षमाला प्रकीर्त्तिता॥
क्षौं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति तन्त्रसारः॥ * ॥ अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यं॥

अक्षयः त्रि, (नास्ति क्षयो यस्य सः। बहुव्रीहिः।) क्षयरहितः। अव्ययः। कल्पान्तस्थायी। यथा—

"अक्षराणि पलाल्याऽऽरमरांस्यिदशानिव।
कल्पान्तस्थानसम्बन्धान्नजन्या नाशवर्জ্জिनः"॥

इति मीमांसककारिका॥ अपि च। भविष्यपुराणं।

"चतुर्दश्यां तथाऽमायां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां।
तत् पुण्यं सफलं तस्य शिवलोकञ्च गच्छति"॥

इति तिथ्यादितत्त्वं॥ * ॥ पापपुण्याक्षयजनकयोगविशेषः। यथा ज्योतिषे,—

"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी।
चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रति जन्म तदक्षयं"॥

इति तिथ्यादितत्त्वं॥ (अनन्तः। अक्षयकालानिमानी। अः वासुदेवः तस्मिन् क्षयो निवासोऽस्य इति व्युत्पत्त्या ब्रह्मणिष्ठः।)

अक्षयतृतीया स्त्री, (अक्षया या तृतीया तिथिः।) वैशाखशुक्लतृतीया। सा तु सत्ययुगाद्या। तत्र स्नानदानादावक्षयफलं। इति। स्मृतिः। यथा,—

"वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यमक्षयं समुदाहृतं"।

इति तिथ्यादितत्त्वं॥ * ॥ विवरणं तु वैशाखशब्दे द्रष्टव्यं॥

अक्षया स्त्री, (नास्ति क्षयो यस्याः सा।) वारतिथिघटितयोगविशेषः। यथा,—

"अमा वै सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया"॥

इति भविष्यपुराणम्॥

अक्षरः पुं, (न क्षरति। क्षर सञ्चलने। पचाद्यच्। यद्वा। अश्नुते। अशूङ् व्याप्तौ। अशेः सरः।) शिवः। विष्णुः। इति शब्दरत्नावली। यथा महाभारते,—

"विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च"॥

इति।) (अजः। जीवः।)

अक्षरं क्ली, (न क्षरति इति व्युत्पत्त्या।) ब्रह्म। (अविनाशि निर्व्विशेषं प्रणवाख्यं ब्रह्म। कूटस्थः नित्यः आत्मा। यथा,—

"क्षरादिरुद्धधर्म्मत्वादक्षरं ब्रह्म मण्यते।
कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते॥
यत्किञ्चिदिह लोकेऽस्मिन् वाचो गोचरतां गतं।
प्रमाणस्य च तत्सर्व्वमक्षरे प्रतिषिध्यते॥
यदप्रबोधात् कार्य्यण्यं ब्राह्मण्यं यत्प्रबोधतः।
तदक्षरं प्रबोद्धव्यं यथोक्तेश्वरवर्त्मना"॥

अकारादिक्षकारान्तैकपञ्चाशद्वर्णः। इति मेदिनी॥ अस्योत्पत्तिकारणं। यथा बृहस्पतिः,—

"मागसिके तु सम्प्राप्ते भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा"॥

इत्याह्निकतत्त्वं॥ तच्च पञ्चविधं। यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुणिका वर्णसम्भूता लिपयः पञ्चधा स्मृताः"।

इति वाराहीतन्त्रं॥ * ॥ अन्यत् मुद्राशब्दे वर्णशब्दे च द्रष्टव्यं॥ गगनं। धर्म्मः। तपस्या॥

अपामार्गः । इति हेमचन्द्रः ॥ मोक्षः । इत्यमरः ॥ जलं । इति वेदप्रयोगः ।

अक्षरः त्रि, (न क्षरतीति ।) अक्षरणीयः । अच्युतः । यथा,—

"तस्मै स विद्यानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमन्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तं तत्त्वतो ब्रह्मविद्यां" ॥

इति वेदान्तसारधृता श्रुतिः ॥

अपिच ।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥

इति श्रीभगवद्गीतायां १५ अध्याये १७ श्लोकः ॥ क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ । तावेवाह । तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः । कूटो राशिः शिलाराशिः पर्व्वतइव एकदेशेष नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः । इति तट्टीकायां श्रीधरस्वामी ॥

अक्षरचञ्चुः पुं, (अक्षरैर्वित्तः । तेन वित्त इति चञ्चु ।) लेखकः । इत्यमरटीकायां वाचस्पतिः ॥

अक्षरचणः पुं, (अक्षरैर्वित्तः । तेन वित्त इति चणप् ।) लिपिकरः । इत्यमरः । मुन्शी इति भाषा ॥

अक्षरचुञ्चुः पुं, (अक्षरैर्वित्तः । तेन वित्त इति चुञ्चुप् ।) अक्षरचञ्चुः । लेखकः । इत्यमरः ।

अक्षरजननी स्त्री, (अक्षराणाम् अक्षरस्य वा जननी उत्पादिका ।) लेखनी । कलमः । यथा,—

"लेखन्यक्षरजननी वर्णमाला मसिप्रसूः" ।

इति हारावलीति केचित् ॥

अक्षरजीवकः पुं, (अक्षर + जीवक ।) लिपिकरः । इति हेमचन्द्रः ॥

("लेखकेऽक्षरपूर्व्वाः स्युरक्षरजीवकचुञ्चव" ।
इति हेमचन्द्रः ॥)

अक्षरजीविकः पुं, (अक्षरैर्जीविका यस्य सः ।) कायस्थः ।

"लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीवकः" ॥

इति हलायुधः । अक्षरजीविनि त्रि ॥

अक्षरतूलिका स्त्री, (अक्षराणां तूलिका लेखनसाधनमित्यर्थः ।) लेखनी । इति जटाधरः ॥

अक्षरविन्यासः पुं, अक्षराणां विन्यासः । लिपिः । लिखनं । इत्यमरटीकायां भरतादयः ॥

अक्षरमुखः पुं, (अक्षराणि मुखे तुण्डाग्रे यस्य सः ।) शिष्यः । छात्रः । इति त्रिकाण्डशेषः ॥

अक्षरसंस्थानं क्ली, (अक्षराणां संस्थानं विन्यासः ।) लिपिः । लिखनं । इत्यमरः ॥

अक्षवती स्त्री, (अक्षाः पाशकाः सन्ति अस्यां इति मतुप् । ङीत्वात् स्त्रीत्वं ।) द्यूतक्रीड़ा । पाशाखेला इति भाषा । इत्यमरः ॥ (यथा महाभारते,—

"पराजितं सौबलेनाक्षवत्यां" ।)

अक्षवाटः पुं, (अक्षस्य मल्लयुद्धस्य वाटः परिसरः ।) मल्लभूमिः । तत्पर्य्यायः । नियुद्धभूः २ । इति हेमचन्द्रः ॥ कुस्तिर आखड़ा इति भाषा ॥

अक्षवित् [द्] त्रि, (अक्षं व्यवहारं द्यूतं वा वेत्ति इति विदः क्विप् ।) द्यूतज्ञः । व्यवहारज्ञः ॥

अक्षसूत्रं क्ली, (अक्षाणां सूत्रं माला ।) अक्षमाला । जपमाला । इति जटाधरः । यथा—

"पाणौ कार्मुकमक्षसूत्रवलयं दक्षोऽपरः पैप्पलः" ।

इति महावीरचरिते ।)

अक्षाग्रकीलकः पुं, (अक्षस्य नाभिक्षेप्यकाष्ठस्य अग्रे अन्ते बन्धनार्थं कीलकः ।) शकटचक्रपुरोवर्त्तिकीलकः । तत्पर्य्यायः । अणिः २ । इत्यमरः ॥ अणी ३ आणिः ४ । इति भरतः ॥ चाकारखिल् इति भाषा ॥

अक्षान्तिः स्त्री, (न क्षमणम् । क्षमूसहने । दिवादिः । अस्यायित्वात् क्तिन् । अनुनासिकस्येति दीर्घे नञ्समासः ।) पराभ्युदयासहिष्णुत्वं । भार्य्याद्देः परदर्शनाद्यसहिष्णुत्वं । इति भरतः ॥ तत्पर्य्यायः । ईर्ष्या २ । इत्यमरः ॥ ईर्षा ३ अक्षमा ४ । इति शब्दरत्नावली ॥

("अक्षान्तिसारसर्व्वस्वं दुर्व्वाससमवेहि माम्" ।
इति विष्णुपुराणे ।)

अक्षारलवणं क्ली, (न क्षारलवणम् इति नञ्समासः ।) हविष्यान्नविशेषः । महाहविष्यमिति ख्यातं । यथा । "अग्नौचादिमरुद्यगोद्गीरगोघृतधान्यमुद्गतिलयवसैन्धवसामुद्रलवणात्मकहव्यं । क्षत्रित्रिमात् लवणात् भिन्नमक्षारलवणं मतं" । इदं मतन्तु स्मार्त्तस्य । रत्नाकरमतं । यथा—

"गोक्षीरं गोघृतं चैव धान्यमुद्गयवास्तिलाः ।
सामुद्रं सैन्धवञ्चैवमक्षारलवणं मतं" ॥

इति नारायणवन्द्यघटीयकृतशुद्धिकारिका ॥

(यथाह मनुः—

"मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं ।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते" ॥)

अक्षि क्ली, (अश्नुते अनेन । अशू व्याप्तौ संघाते च । अशेर्निदिति क्सिः । यद्वा । अक्षति । अक्ष व्याप्तौ । इन् ।) चक्षुः । इत्यमरः । चक्षुर्गोलकः । इति केचित् ॥

अक्षिकः पुं, रञ्जनद्रुः । आच् इति भाषा । इति रत्नमाला ॥

अक्षिकूटकः पुं, (अक्षि + कूटक ।) चक्षुस्तारा ॥

अक्षिगतः त्रि, (अक्षि गतः, अक्षिविषय इव खेदः इत्यर्थः ।) द्वेष्यः । इत्यमरः ॥

अक्षिभेषजः पुं, (अक्षि + भेषज ।) पृष्टिकालोध्रः । इति राजनिर्घण्टः ॥ (क्ली, नेत्रौषधम् ।)

अक्षिवः पुं, (अक्षि वाति वायति वा । वा गतिबन्धनयोः । आतोऽनुपेति कः ।) शोभाञ्जनवृक्षः । सामुद्रलवणे क्ली । इत्यमरटीकायां भरतः ॥

अक्षिविकूणितं क्ली, (अक्षि + वि + कूण + भावे क्त ।) कटाक्षः । अपाङ्गदृष्टिः । इति हेमचन्द्रः ॥

अक्षीकः पुं, रञ्जनद्रुः । आच् इति भाषा । इति रत्नमाला ॥

अक्षीवं क्ली, (न क्षीवति अनेन वा अक्षीवयति वा । क्षीव मदे । घञ्यच् ।) समुद्रलवणं । इत्यमरः ।

अक्षीवः त्रि, (न क्षीवति माद्यति इति न + क्षीव + अच् ।) अमत्तः । इति मेदिनी ।

अक्षीवः पुं, शोभाञ्जनवृक्षः । इत्यमरः ॥

अक्षुण्णः त्रि, (न क्षुण्ण इति नञ्समासः ।) अक्षोदितः । अचूर्णितः । इति क्षुदधात्वर्थदर्शनात् । अच्छिन्नः । यथा । अक्षुण्णं परिवप । इति चूड़ाकरणे पशुपतिः ॥

अक्षुब्धः त्रि, क्षोभरहितः । अक्षोभितः । इति क्षुभधातोः क्तप्रत्यये क्षुब्धः । ततो न क्षुब्धः अक्षुब्ध इति नञ्समासनिष्पन्नः ॥

अक्षेमं क्ली, (न क्षेमम् इति नञ्समासः ।) अमङ्गलं । यथा—

"किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम् ।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः" ॥

इति देवीमाहात्म्ये १ अध्यायः ॥

अक्षोटः पुं, (अक्ष्णोति । अक्ष व्याप्तौ संघाते च । बाहुलकादोटः ॥ अक्षस्येव उटाः पर्णानि यस्य इति वा ।) अक्षोड़वृक्षः । स च पर्व्वतजपीलुवृक्षः । इत्यमरटीकायां भरतः ॥ आखरोट् इति हिन्दीभाषा । इति राजनिर्घण्टः ॥

"पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः ।
अक्षोटकोऽपि वातादसदृशः कफपित्तहृत्" ॥

इति भावप्रकाशः ॥

अक्षोड़ः पुं, (अक्ष्णोति इति अक्ष + ओड़प्रत्ययः ।) पर्व्वतोत्पन्नपीलुवृक्षः । तत्पर्य्यायः । कर्परालः २ कन्दरालः ३ अक्षोड़ः ४ अक्षोटः ५ अक्षोटः ६ । इत्यमरः तट्टीका च ॥

अक्षोड़कः पुं, (अक्षोड़ एव इति स्वार्थे कन् ।) पर्व्वतोत्पन्नपीलुवृक्षः । इति रत्नमाला ॥

अक्षोभः पुं, (न क्षोभ इति नञ्समासः । नास्ति क्षोभो यस्येति वा ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । आलानं २ प्रग्रहः ३ । इति त्रिकाण्डशेषः ॥ क्षोभरहिते त्रि ॥

अक्षौरिभं क्ली, क्षुरिकर्म्माविहितनक्षत्रं । यथा,—

"उत्तराचित्तयायाम्यरोहिणी-
रौद्रसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान् नरः ॥
चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः ।
अक्षौरिभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने" ॥

इति ज्योतिस्तत्त्वं ॥

अक्षौहिणी स्त्री, (ऊहः समूहः अस्ति यस्या इति इनिः । अक्षाणाम् ऊहिनी । पूर्व्वपदादिति णत्वम् । अक्षादूहिन्यामिति ङीप् ।) सङ्ख्याविशेषयुक्तसेना । तद्यथा । २१८७० हस्तिनः । २१८७० रथाः । ६५६१० घोटकाः । १०९३५० पदातयः । समुदायेन २१८७०० ।

तथा चोक्तं ।

"अक्षौहिण्यामित्यधिकैः सप्तत्यन्ताश्चभिः शतैः ।

संयुक्तानि सहस्राणि गजानामेकविंशतिः ॥
एवमेव रथानान्तु सङ्ख्यानं कीर्त्तितं बुधैः ।
पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु ।
सङ्ख्यातास्तुरगास्तज्ज्ञैर्विना रथ्यैस्तुरङ्गमैः ।
नृणां शतसहस्रन्तु सहस्राणि नवैव तु ।
शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः" ।
इत्यमरभरतौ ॥ (अक्षौहिणीपरिमाणं। यथा महाभारते आदिपर्व्वणि,—
"अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन ।
एतदिच्छामहे श्रोतुं सर्व्वमेव यथायथम् ॥
अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनाम् ।
यथावच्चैव नो ब्रूहि सर्व्वं हि विदितं तव" ॥
सौतिरुवाच ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
सृतास्त्रिसप्त वाहिन्यः एतनेति विचक्षणैः ॥
चमूस्तु एतनास्त्रिसप्तसम्बन्धनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥
अक्षौहिण्याः प्रसङ्ख्याता रथानां द्विजसत्तमाः ।
सङ्ख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ।
गजानाञ्च परीमाणमेतदेव विनिर्द्दिशेत् ॥
ज्ञेयं शतसहस्रन्तु सहस्राणि नवैव तु ।
नराणामपि पञ्चाशच्छतानि त्रीणि चानघाः ॥
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च ।
दशोत्तराणि षट् प्राहुर्यथावदिह सङ्ख्यया ॥
एतामक्षौहिणीं प्राहुः सङ्ख्यातत्त्वविदो जनाः ।
यथा कथितवानस्मि विस्तरेण तपोधनाः" ॥

अक्षं क्ली, (अश्नुते । अशू व्याप्तौ संघाते च । क्षत्यशूभ्यां कित्सः । कापः । इत्युणादिकोषः ॥

अखट्टः, पुं, पियालवृक्षः । इति राजनिर्घण्टः ॥ पियासाल इति भाषा ॥

अखट्टिः, पुं, असह्यवहारः । आखुटि इति ख्यातः । इति चिकाण्डशेषः ॥

अखण्डः, चि, (न खण्डयते इति। खडि भेदने घञ्। नास्ति खण्डो यस्य इति वा ।) खण्ड रहितः। पूर्णः। इत्यमरः ॥ ("अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्" इति शाकुन्तले ।)

अखण्डनः, पुं, (नास्ति खण्डनं विच्छेदो यस्य सः।) कालः। इति शब्दचन्द्रिका ॥

अखण्डितव्रतुः, चि, (न खण्डितः ऋतुरस्य इति । बहुव्रीहिः ।) सफलवृत्तादिः । इति शब्दचन्द्रिका ॥

अखातं, क्ली, पुं, (न खातं नञ्समासः । खातभिन्नम् इत्यर्थः ।) देवखातं । अकृत्रिमजलाशयः । इत्यमरः ॥ अखातमिति स्वामी ॥ पुंसि यथा,—अखातो देवखातक इत्यमरदत्तः ॥

अखाद्यं, चि, (न खाद्यं। अप्रशस्तं विरुद्धं वा खाद्यम् ।) खाद्यानर्हं । अभक्ष्यं ॥

अखिलं, चि, (न खिलम् अस्य । न+खिल ।) सर्व्वं । इत्यमरः ॥ (खिलमप्रहतं स्थानं । तत् न भवति इति अक्षतस्थानं ।)

अख्यातः, चि, (न ख्यातः विरुद्धार्थे वा नञ् ।) अख्यातिविशिष्टः । अप्रतिष्ठितः ॥ अप्रसिद्धः ।

अग, म वक्रगतौ ; कुटिलगमने । इति कविकल्पद्रुमः ॥ म अगयति अगति सर्पः । इति दुर्गादासः ॥

अग, इ गतौ । इति कविकल्पद्रुमः ॥ गत्यां इ अङ्गते । इति दुर्गादासः ॥

अगः, पुं, (न गच्छति। गम गतौ। अन्येभ्योऽपीति अन्येष्वपि इति वा डः । न गोऽप्राणिषु इति पाक्षिको ऽप्रकृतिभावः ।) पर्व्वतः। वृक्षः । सर्पः । सूर्य्यः । इति हेमचन्द्रः ॥ (सरीसृपः ।)

अगच्छः, पुं, (न+गच्छ ।) वृक्षः । इति चिकाण्डशेषः ॥

अगजं, क्ली, (अग+जन्+ड ।) शिलाजतु । इति रत्नमाला ॥ पर्व्वतवृक्षजे त्रि ॥ (गिरिजाते ।)

अगण्यं, त्रि, (न गण्यं। नञ् समासः ।) अगणनीयं । अगणेयं । अगणितव्यं । यथा,—
"गुणैरगण्यैरतिशीलशालिभिरिति भारविः" ।

अगदः, पुं, (गदविरुद्धः । न गदः अस्मात् इति वा ।) औषधं । इत्यमरः ॥ आयुर्व्वेदोक्ताष्टशाखान्तर्गतशाखाभेदः । यथा,—
"औषधान्यगदो विद्या दैवी च विविधा स्थितिः"। तपसैव प्रसिध्यन्ति"। इति मनुः ।) नीरोगे त्रि । इति रभसाश्वः ॥

अगदङ्कारः, पुं, (अगदम् अरोगं करोति इति। अगद+कृ+अण् । मुमागमः ।) वैद्यः । इत्यमरः ॥

अगमः, पुं, (न गच्छतीति। न+गम+अच्। पचाद्यच् ।) वृक्षः । इत्यमरः ॥ पर्व्वतः । न गच्छतीत्यगमः ॥

अगम्यं, त्रि, (न गम्य इति। न+गम्+यत् ।) अगन्तव्यं । अगमनीयं । गमनायोग्यं । यथा,—
"अगम्या सा भवत्तच्च यच्चाभूत् स महारणः" ।
इति देवीमाहात्म्यं ॥

अगम्या, स्त्री, अमैथुनार्हा नारी । गम्यागम्याविवरणं यथा, यम उवाच,—
"या या गम्या नृणामेव निबोध कथयामि ते ।
स्वस्त्री गम्या च सर्व्वेषामिति वेदनिरूपिता ॥
अगम्या च तदन्या या इति वेदविदो विदुः ।
सामान्यं कथितं सर्व्वं विशेषं शृणु सुन्दरि ! ॥
अगम्याश्चैव या याश्च निबोध कथयामि ताः ।
शूद्रायां विप्रपत्नी च विप्रायां शूद्रकामिनी ॥
अत्यगम्या च निन्द्या च लोके वेदे पतिव्रते ।
शूद्रस्य ब्राह्मणीं गच्छेद् ब्रह्महत्याशतं लभेत् ॥
तत्समं ब्राह्मणी चापि कुम्भीपाकं व्रजेद्ध्रुवं ।
यदि शूद्रां व्रजेद्विप्रो हविषीपतिरेव सः ॥
स भवो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणं ॥
तत् पितॄणां सुराणाञ्च पूजने तत् समं सति ।
कोटिजन्मार्ज्जितं पुण्यं सन्ध्यार्हातपसार्ज्जितं ॥
द्विजस्य हविषीभोगान्नश्यत्येव न संशयः ।
ब्राह्मणश्च सुरापीतो विड्भोजी वृषलीपतिः ॥
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवं ।
गुरुपत्नीं राजपत्नीं सपत्नीमातरं प्रसूं ॥
सुतां पुत्रवधूं श्वश्रूं सगर्भां भगिनीं सति ।
सोदरभ्रातृजायाञ्च भगिनीभ्रातृकन्यकां ॥
शिष्याञ्च शिष्यपत्नीञ्च भागिनेयस्य कामिनीं
भ्रातृपुत्रप्रियाञ्चैवात्यगम्यामाहुः पद्मजः ॥
एतासेकामनेकां वा यो व्रजेन्मानवाधमः ।
स भ्रातृगामी वेदेषु ब्रह्महत्याशतं लभेत् ॥
अकर्म्माहोंऽपि सोऽस्पृश्यो लोके वेदेऽतिनिन्दितः ।
स याति कुम्भीपाकञ्च महापापी सुदुष्करं" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अगरी, स्त्री, (न+गृ+अच्+ङीष् ।) देवसाङ्वृक्षः । इत्यमरटीकायां भरतः ॥

अगर्हितः, चि, (न गर्हितः। नञ्समासः) अनिन्दितः । यथा,—
"ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः" ॥
इति मानवे ९ अध्याये १०९ श्लोकः ॥

अगरु, क्ली पुं, (न गरुः दुर्भरः अस्मात् इति ।) अगुरु । इति हेमचन्द्रः ॥

अगस्तिः, पुं, (विन्ध्याख्यम् अगम् अस्यति इति अगस्तिः । अस्यतेः क्तिच् । बाहुलकात् तिर्वा ।) वकवृक्षः । अगस्त्यमुनिः । इति मेदिनी ॥ यथा वैद्यके,—
"अगस्तिः पित्तकफजित् चतुर्थकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः" ॥

अगस्तिद्रुः, पुं, वकपुष्पवृक्षः । इति चिकाण्डशेषः ॥

अगस्त्यः, पुं, (अगं विन्ध्यं स्त्यायति स्तभ्नाति वा । स्त्यै संघाते । आतोऽनुपसर्गे इति कः। अग+स्त्यै+क।) वकपुष्पवृक्षः । इति राजनिर्घण्टः ॥ मित्रावरुणयोः पुत्रः मुनिविशेषः । तस्य पर्य्यायः । कुम्भसम्भवः २ मैत्रावरुणिः ३ । इत्यमरः ॥ अगस्तिः ४ पीताब्धिः ५ वातापिद्विट् ६ आग्नेयः ७ और्व्वशीयः ८ आग्निमारुतः ९ घटोद्भवः १० इति हेमचन्द्रः ॥ (तदुत्पत्तिर्यथा यास्कनिरुक्ते,—
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतत् वाप्सतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधा पतितं रेतः कलसे च जले स्थले ।
स्थले वशिष्ठस्तु मुनिः सम्बभूवर्षिसत्तमः ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः ग्रस्यामाचो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यदा कुम्भादृषिर्जातः कुम्भेनापि महीयते" ॥

अगस्त्योदयः, पुं, (अगस्त्यस्य नक्षत्रस्य उदयः प्रत्यूषकाले गगने आविर्भावः ।) आकाशे नक्षत्ररूपेण अगस्त्यमुनेरुदयः । स तु सौरमाद्रस्य सप्त-

दग्रदिने भवति। अस्यार्घ्यदानं तन्मासीयशुक्लैकादिनत्रये कर्त्तव्यं। यथा,—
"अगस्त्यार्घ्यदानं सौरेण सिंहराशौ विधानात्"।
यथा ब्रह्मवैवर्त्ते,—
"अप्राप्ते भास्करे कन्यां शुक्लभूतैस्त्रिभिर्दिनैः।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः"॥
यथा भीमपराक्रमे।
"यस्तु भाद्रपदस्यान्ते उदिते कलसोद्भवे।
अर्घ्यं दद्यादगस्त्याय सर्व्वान् कामान् लभेत सः"॥
यथा नारसिंहे।
"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतं।
मन्त्रेणानेन वै दद्यात् दक्षिणाशामुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते"॥
प्रार्थनन्तु।
"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु"॥
गन्धादिकन्तु अगस्त्याय नमः इत्यनेन देयं। विशेषानुपदेशे सामान्यतः प्राप्तत्वात् दक्षिणाशामुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्त्तव्यधर्म्मत्वादिति रत्नाकरः॥*॥ तत्पत्न्यर्घ्यमन्त्रस्तु।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
गृहाणार्घ्यं मया दत्तं मित्रावरुणिवल्लभे"॥
इति मलमासतत्त्वं॥ (अगस्त्योदये जलानि प्रसीदन्ति इत्यागमः। तथा च रघौ,—
"प्रससादोदयादम्भः कुम्भयोनेर्महौजसः।

अगाधः, त्रि, (नास्ति गाधः स्थितिरत्र। नञोऽस्त्यर्थानामिति बहुव्रीहिः।) अतिगभीरः। अतलस्पर्शः। इत्यमरः॥ (अतिगम्भीरः। दुर्बोधाशयः।)

अगाधं, क्ली, छिद्रं। इति मेदिनी॥

अगाधजलः, पुं, (अगाधं जलं यस्मिन्। बहुव्रीहिः।) ह्रदः। इत्यमरः॥ त्रि। अपरिच्छेद्यजलविशिष्टः।)

अगारं, क्ली, (अगान् ऋच्छति। ऋ गतौ। कर्म्मण्यण्।) आगारं। गृहं। इत्यमरटीकायां भरतः॥
शून्यानि चाप्यगाराणि वनान्युपवनानि च"।
इति। 'खलात् क्षेत्रादगारादा' इति मनुः।)

अगिरः, पुं, (अग + इर।) अग्निः॥ सूर्य्यः॥ राक्षसः॥ इति जटाधरः॥

अगुः, पुं, (नास्ति गौः किरणो यस्य सः। बहुव्रीहिः।) राजग्रहः इति दीपिका॥ किरणरहिते त्रि॥

अगुरु, क्ली, (न गुरु दुर्भरः अस्मात् इति। बहुव्रीहिः।) घ्रिण्यपाक्तज्ञः॥ कालागुरु। स्वनामप्रसिद्धसुगन्धिकाष्ठविशेषः। अगर इति ख्यातः। अस्य पर्य्यायः। वंशिकं १ राजार्हं २ लोहं ३ हृमिजं ४ जोङ्गकं ५। इत्यमरः॥ हरूजं ६ कृष्णं ७ लोहाख्यं ८ लघु ९। इति रत्नमाला॥ पीतकं १० वर्षाप्रसादनं ११ अनार्य्यकं १२ असारं १३ कृमिजग्धं १४ काष्ठकं १५। इति राजनिर्घण्टः॥ अस्य गुणाः। तिक्तत्वं। उष्णत्वं। कटुत्वं। लेपे रूक्षत्वं। व्रणकफवायुवान्तिमुखरोगनाशित्वञ्च। इति राजवल्लभः राजनिर्घण्टश्च॥
अगुरुर्वा पुंसीति वोपालितः॥ पुमान् इति सर्व्वानन्दः॥ गन्धद्रव्यविशेषः। यथा,—
अगुरु प्रवरं लोहं राजार्हं योगजं तथा।
वंशिकं कृमिजञ्चापि कृमिजग्धमनार्य्यकं॥
अगुरूष्णं कटुत्वं च तिक्तं तीक्ष्णञ्च पित्तलं।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत्॥
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः"॥
इति भावप्रकाशः॥

अगुरुः, त्रि, (न गुरुः। नञ् समासः।) गुरुभिन्नः। लघुः। इति मेदिनी॥

अगुरुघ्रिण्यपा, स्त्री, घ्रिण्यपाक्तज्ञः। इत्यमरटीकायां स्वामी॥

अगूढ़गन्धं, क्ली, (न गूढ़ः व्यक्तकटः गन्धः यस्य। बहुव्रीहिः।) हिङ्गु। इति राजनिर्घण्टः॥

अगोचरः, त्रि, (न गोचरः। नञ् समासः।) इन्द्रियजन्यप्रत्यक्षाविषयः॥ अज्ञातः। यथा,—
"अगोचरहतं व्याढ़्मदितंमांसमुत्सृजेत्"।
इति राजवल्लभः॥ (वाचामगोचरचरित्रविचित्रिताय इति रघुकारश्लोकः।)

अगोकः [स्] पुं, (अगः ओकः यस्य सः। बहुव्रीहिः।) शरभः। सिंहः। पक्षी। इति मेदिनी॥ (त्रि। पर्व्वतवासी।)

अग्नायी, स्त्री, (अग्नेः स्त्री इत्यस्मिन् अर्थे कृषाकप्यग्निकुसितेत्यादिसूत्रेण अग्निशब्दस्यैकारादेशो ङीष् च।) अग्निभार्य्या। इत्यमरः॥ चेतायुगं। इति जटाधरः॥ ('अग्नायी स्वाहा च ऋतभुक्प्रिया' इत्यमरः।)

अग्निः, पुं, (अङ्क्तयन्ति अग्र्यं जन्म प्रापयन्ति इति व्युत्पत्त्या हविः प्रक्षेपाधिकरणेषु गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसथ्यौपासनाख्येषु षड्ग्निषु। यद्वा अङ्क्ति ऊर्द्धं गच्छति इति। अञ्चि गतौ। अङ्केर्नलोपश्चेति निः नलोपश्च।) तेजःपदार्थविशेषः। आगुन इति भाषा। धर्म्मस्य वसुभार्य्यायां जातः प्रथमोऽग्निः। तस्य पत्नी स्वाहा। पुत्रास्त्रयः पावकः १ पवमानः २ शुचिः ३। षष्ठमन्वन्तरे अग्नेर्वैसोर्धारायां द्रविणादयः पुत्राः। एतेभ्यः पञ्चचत्वारिंशदग्नयो जाताः। सर्व्वे मिलित्वा एकोनपञ्चाशदग्नयः। इति पुराणं॥ अस्य पर्य्यायः। वैश्वानरः १ वह्निः २ वीतिहोत्रः ३ धनञ्जयः ४ रूपोटयोनिः ५ ज्वलनः ६ जातवेदाः ७ तनूनपात् ८ तनूनपाः ९ वह्निःशुश्रा १० वह्निः ११ शुश्रा १२ कृष्णवर्त्मा १३ शोचिष्केशः १४ उषर्बुधः १५ आश्रयाशुः १६ आशयाशुः १७ बृहद्भानुः १८ कृशानुः १९ पावकः २० अनलः २१ रोहिताश्वः २२ वायुसखा २३ वायुसखः २४ शिखावान् २५ शिखी २६ आशुशुक्षणिः २७ हिरण्यरेताः २८ ऋतभुक् २९ हव्यभुक् ३० दहनः ३१ हव्यवाहनः ३२ सप्तार्च्चिः ३३ दमुनाः ३४ दमूनाः ३५ शुक्रः ३६ चित्रभानुः ३७ विभावसुः ३८ शुचिः ३९ अग्नित्तं ४०। इत्यमरस्तटीका च॥ हयाकपिः ४१ जुह्वबालः ४२ कपिलः ४३ पिङ्गलः ४४ अरुणिः ४५ अगिरः ४६ पाचनः ४७ विश्वमुखः ४८ क्रोधवाहनः ४९ कृष्णार्च्चिः ५० जुह्वारः ५१ उदर्च्चिः ५२ भास्करः ५३ वसुः ५४ शुभ्रः ५५ हिमारातिः ५६ तमोनुत् ५७ सुशिखः ५८ सप्तजिह्वः ५९ अपपारिकः ६० सर्व्वदेवमुखः ६१। इति जटाधरः॥*॥ अस्य गुणाः। वायुकफरक्तमशीतकम्यनाशकत्वं। आमाशयाजनकत्वं। रक्तपित्तप्रकोपकत्वञ्च। इति राजवल्लभः॥ अपिच।
"अग्नेर्दुर्द्धर्षता ज्योतिस्तापः पाकः प्रकाशनम्।
शोको रोगो लघुस्तैक्ष्णं सततञ्चोर्द्धभासिता"॥
इति मोक्षधर्म्मः॥०॥
अथ कर्म्मविशेषेऽग्नेर्नामानि। यथा,—
"लौकिके पावको ह्यग्निः प्रथमः परिकीर्त्तितः"१।
लौकिके नवग्रहप्रवेशादौ।
"अग्नेस्तु मारुतो नाम गर्भाधाने विधीयते २।
पुंसवने चन्द्रनामा ३ शुङ्गाकर्म्मणि शोभनः ४॥
सीमन्ते मङ्गलो नाम ५ प्रगल्भो जातकर्म्मणि ६।
नाम्नि स्यात् पार्थिवो ह्यग्निः ७ प्राशने च शुचिस्तथा ८
सत्यनामाथ चूड़ायां ९ व्रतादेशे समुद्भवः १०"।
व्रतादेशे उपनयने।
"गोदाने सूर्य्यनामा च ११ केशान्ते ह्यग्निरुच्यते १२"।
गोदाने गोदानाख्यसंस्कारे। केशान्ते समावर्त्तने।
"वैश्वानरो विसर्गे तु १३ विवाहे योजकः स्मृतः १४"।
विसर्गे सामिकर्त्तव्यकर्म्मविशेषे।
"चतुर्थ्यान्तु शिखीनाम १५ धृतिरग्निस्तथापरे १६"।
चतुर्थ्यां विवाहान्ते चतुर्थीहोमे। अपरे धृतिहोमादौ।
"प्रायश्चित्ते विधुश्चैव १७ पाकयज्ञे तु साहसः १८"।
प्रायश्चित्ते प्रायश्चित्तात्मकमहाव्याहृतिहोमादौ। पाकयज्ञे पाकाङ्गकहोमे वृषोत्सर्गगृहप्रतिष्ठादौ।
"लक्षहोमे च वह्निः स्यात् १९ कोटिहोमे ऋताशनः २०।
पूर्णाऋचां स्रुड़ो नाम २० शान्तिके वरदस्तथा २२॥
पौष्टिके बलदश्चैव २३ क्रोधाग्निश्चाभिचारिके २४।
वश्यर्थे शमनो नाम २५ वरदानेऽभिदूषकः २६॥
कोष्ठे तु जठरो नाम २७ क्वथादौऽमृतभक्षने २८"॥
इति गोभिलपुत्रकृतसंग्रहः॥*॥ अथ तस्य रूपं। यथा,—
"पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्च्चिः शक्तिधारकः"॥
इत्यादित्यपुराणं॥*॥ अथ होमीयाग्नेः शुभलक्षणानि। यथा,—
"अर्च्चिष्मान् पिङ्गिताक्षिश्च सर्पिःकाञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये"॥
इति वायुपुराणं॥*॥ वैद्यकमते अग्निस्त्रिधा भौमः १ दिव्यः २ उदर्य्यः ३ तत्राद्यः काष्ठेन्धनप्रभवः ऊर्द्ध्वज्वलनस्वभावः पचनक्लेदादिसमर्थश्च।

द्वितीय उदकेन्धनः पर्य्यगुज्ज्वलनशीलो वाड़वः। तृतीय उभयेन्धनः पर्य्यगुज्ज्वलनशीलः भुक्तस्याहारस्य रसादिपरिणामनिमित्तञ्च विद्युदादिश्च। इति विजयरक्षितोपरि सन्देहभञ्जिका ॥ * ॥

अपिच,—

"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः। कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः" ॥

तेषां कार्य्यं यथा,—

"विषमोवातजान्रोगान् तीक्ष्णः पित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥ समासमाग्नेरश्निता मात्रा सम्यग्विपच्यते। स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥ कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते। तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते"॥

इति माधवकरः॥ अत्यन्ततीक्ष्णाग्निरेव हि भस्मक उच्यते। स तु आहाराभावे श्लेष्मशोणितादीन् धातून् पाचयित्वा आशु मारयति। इति रक्षितः॥*॥

(देहजन्याग्नेः नादोत्पादकत्वं यथा सङ्गीतदर्पणे,—

"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम्। ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥ पावकप्रेरितः सोऽथ क्रमादूर्द्ध्वपथे चरन्। अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥ पुष्टं शीर्षे त्वपुष्टञ्च क्षत्रिमं वदने तथा। आविर्भावयतीत्येवं पञ्चधा कीर्त्यते बुधैः ॥ नकारं प्राणनामानं दकारमनलं विदुः। जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते"

अग्नेः सर्व्वसाक्षित्वादि यथा रामायणे,—

"त्वमग्ने सर्व्वदेवानां शरीरान्तरगोचरः। त्वं साक्षी मम देहस्थस्त्राहि मां देवसत्तम"।

यथा च भारते,—

"आदित्यचन्द्रावनिलोऽनलश्च। दौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च सन्ध्ये। धर्म्मश्च जानाति नरस्य वृत्तम्" ॥

अस्य सर्व्वप्रथमाराधत्वं ऋग्वेदस्य सर्व्वप्रथमसूक्ते उक्तं यथा,—"अग्निमीले पुरोहितम्"। इत्यादि। विष्णुः। सूर्य्यः।) अग्निकोणाधिपतिः। इत्यमरः। चित्रकवृक्षः। रक्तचित्रकः। भल्लातकः। निम्बुकः॥ पित्तं। स्वर्णं। इति राजनिर्घण्टः।

अग्निकः, पुं, (अग्नि + सादृश्ये कप्रत्ययः) इन्द्रगोपनामरक्तवर्णकीटः। इति हेमचन्द्रः॥

अग्निकणः, पुं, (अग्नेः कणः। अग्नि + कण।) अग्निकणा। स्फुलिङ्गः। इत्यमरः॥

अग्निकारिका, स्त्री, (अग्नि + कारिका।) अग्निकार्य्यं। इति हेमचन्द्रः॥

अग्निकार्य्यं, क्ली, (अग्नि + कार्य्यं।) अग्नावग्नेर्वा कार्य्यं। हविर्दानादिपूर्व्वकाग्निज्वालनं। तत्पर्य्यायः। अग्नीन्धनं २ अग्नीधा ३ अग्निकारिका ४। इति हेमचन्द्रः॥ (होमादौ हविर्दानादिपूर्व्वकाग्निज्वालनं। अग्नौ सायं प्रातः समिद्धोमानुष्ठानं। यथा—

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च" ॥

इति मनुः।)

अग्निकाष्ठं, क्ली, (अग्नि + काष्ठं।) अगुरु। इति राजनिर्घण्टः॥

अग्निकुक्कुटः, पुं, (अग्नेः कुक्कुटइव।) ज्वलदग्निदग्धोल्का। ज्वलन्त नुड़ा इति ख्यातः। इति चिकित्साशेषः॥

अग्निकोणं, क्ली, (अग्नेः अग्निदेवेन अधिष्ठितमित्यर्थः कोणं।) पूर्व्वदक्षिणकोणं। तत्कोणाधिपतिरग्निः। इति ज्योतिषं॥ यथा हलायुधधृतं,—

"गत्वैव तीर्थं कर्त्तव्यं आर्द्रं तत्प्रीतिहेतुकम्। पूर्व्वार्द्रेऽप्यथवा प्रातर्दक्षिणे स्यात् पूर्व्वदक्षिणे" ॥

पूर्व्वदक्षिणे अग्निकोणे। इति प्रायश्चित्ततत्त्वं॥

अग्निक्रीड़ा, स्त्री, (अग्निभिः क्रीड़ा।) अग्निखेला। खधूपादित्यागः। आतशबाजीति ख्याता॥

अग्निगर्भः, पुं, (अग्निः गर्भे अभ्यन्तरे यस्य सः।) अग्निजारवृक्षः। सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥ (शमीवृक्षः। त्रि। अग्नियुक्तगर्भविशिष्टः। यथा,—"अग्निगर्भां शमीमिव"। इति शाकुन्तले।)

अग्निगर्भा, स्त्री, (अग्निः गर्भे यस्याः सा।) महाज्योतिष्मतीवृक्षः। इति राजनिर्घण्टः॥ (शमीवृक्षः।)

अग्निचित्, पुं, (अग्निं चितवान् स्वयम् इति चि चयने। अग्नौ चेरिति क्विप् तुगागमश्च।) अग्निहोत्री। साग्निकः। इत्यमरः॥ (यथा रघुवंशे—

"विदधे विधिमस्य नैष्ठिकं। यतिभिः सार्द्धमनग्निमग्निचित्"।)

अग्निजः, पुं, (अग्नि + जन् + ड।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥ (त्रि। अग्निजातमात्रे।)

अग्निजातः, पुं, (अग्नेः जातः। अग्नि + जन् + क्त।) अग्निजारवृक्षः। इति राजनिर्घण्टः। (त्रि। अग्निजातमात्रे।)

अग्निजारः, पुं, (अग्नि + जार, अग्निं जठराग्निं जारयति परिपाकशक्तिं प्रदाय वर्द्धयति जॄ कर्म्मण्यण् इति पाणिनिसूत्रं) औषधविशेषः। अस्य पर्य्यायः। अग्निनिर्य्यासः २ अग्निगर्भः ३ अग्निजः ४ वड़वाग्निमलः ५ जरायुः ६ अर्णवोद्भवः ७ अग्निजातः ८ अग्निजालः ९ सिन्धुफलः १०। अस्य गुणाः। कटुत्वं। उष्णत्वं। कफवायुसन्निपातशूलातिशीतरोगनाशित्वं। पित्तप्रदत्वञ्च। इति राजनिर्घण्टः॥

अग्निजालः, पुं, (अग्नि + जाल।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥

अग्निज्वाला, स्त्री, (अग्नेरिव ज्वाला यस्याः। अग्नेः ज्वाला इति वा।) जलपिप्पली। धातकीवृक्षः। इति राजनिर्घण्टः॥ अग्निशिखा॥ (लाङ्गलिकी।)

अग्निजिह्वा, स्त्री, (अग्नेः जिह्वा।) लाङ्गलीवृक्षः। विषलाङ्गला इति भाषा। इति राजनिर्घण्टः॥ अग्नेः काल्यादिसप्तार्च्चींषि। इति जटाधरः॥ अग्नेः सप्तशिखाः। तासां नामादिकं सप्तजिह्वशब्दे द्रष्टव्यं॥ (योगविशेषः। यथा,—

"सप्तषष्ट्यादितिथयः सोमवारादिभिर्युताः। अग्निजिह्वाः सप्त योगा मङ्गलेष्वतिगर्हिताः" ॥

इति। योगशास्त्रे।)

अग्निदमनी, स्त्री, (अग्नेः जठरानलस्य दमनी।) क्षुपविशेषः। अस्य पर्य्यायः। वह्निदमनी २ वह्निकण्टकी ३ वह्निकण्टारिका ४ गुच्छफला ५ क्षुद्रफला ६ क्षुद्रदुःस्पर्शा ७ क्षुद्रकण्टारिका ८ सर्व्वेन्द्रमाता ९ दमनी १०। अस्या गुणाः। कटुत्वं। उष्णत्वं। रूक्षत्वं। वातकफगुल्मशीहनाशित्वं। रुचिकरत्वं। अग्निदीपनत्वं। हृद्यत्वञ्च। इति राजनिर्घण्टः॥

अग्निदीपनः, त्रि, (अग्नेः जठरानलस्य दीपनः।) अग्निवर्द्धकः। जठराग्निकारकौषधविशेषः। यथा रसेन्द्रचिन्तामणौ,—

"पारदाभ्रतलवङ्गगन्धकं, भागयुग्ममरिचेन मिश्रितम्। तच्च जातिफलमर्द्धभागिकं, तित्तिड़ीफलरसेन मर्दितम् ॥ वह्निमान्दयशवह्ननाशनो, रामवाण इति विश्रुतो रसः। संग्रहग्रहणिकुम्भकर्णक- मामवातखरदूषणं जयेत् ॥ दीयते तु गुणकानुमानतः, सद्य एव जठराग्निदीपनः"।

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा। सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी" ॥

इति च भावप्रकाशः॥

अग्निदीप्ता, स्त्री, (अग्नि + दीप्ता) महाज्योतिष्मतीवृक्षः। इति राजनिर्घण्टः॥ (त्रि। वह्निज्वलितः। यथा,—"नापि कण्ठीकारफलकैः बाणैः नापि विषाक्तैः नाप्यग्निदीप्तफलकैः" इति कुल्लूकभट्टः।)

अग्निदेवा, स्त्री, (अग्निः देवः अधिष्ठात्री देवता अस्या इति) क्षत्तिकानक्षत्रं। इति हेमचन्द्रः॥ (पुं, अग्निदेवः अग्निरूपो देवः। अग्निः देवः अस्य इति विग्रहे त्रि। अग्निपूजकः।)

अग्निनिर्य्यासः, पुं, अग्निजारवृक्षः। इति राजनिर्घण्टः॥

अग्निप्रस्तरः, पुं, अग्निजनकपाषाणः। चकमकीर पाथर इति भाषा॥

अग्निवर्द्धनं, क्ली, (अग्नेः जठरानलस्य वर्द्धनं वृद्धिकारकम्।) जठराग्निवृद्धिकारकम्। तथा,—

"जीरकं रुचिकृत् स्वर्य्यं गन्धाढ्यं कफवातनुत्। पाके च कटुतीक्ष्णोष्णं लघुमित्ताग्निवर्द्धनम्" ॥

इति राजवल्लभः॥

अग्निभं, क्ली, (अग्निरिव भाति इति। अग्नि + भा + क।) स्वर्णं। इति राजनिर्घण्टः॥

अग्निभूः, पुं, (अग्नेर्भवतीति। अग्नि + भू + क्विप्।) कार्त्तिकेयः। इत्यमरः॥ (पुरा किल तारकासुरेण उत्पीड़ितानां देवानां रक्षार्थं शिवेन

अग्निरूपं स्वबीजं वह्निमुखे क्षिप्तं। तेन अग्निना क्षत्रिकासु क्षिप्तं। तास्च दैवागतगर्भरक्षार्थं शूरवनं प्रविश्य प्रसूताः। तेन अग्निभूरिति कार्त्तिकेयः। जले क्ली। इति वेदपुराणे॥ यथाह मनुः,—

"अग्नौ दत्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः"॥

अग्निभूतिः, पुं, (अग्नि+भू+क्तिच्।) बौद्धभेदः। सच गोशलजैनाचार्य्यशिष्यः। इति हेमचन्द्रः॥

अग्निमणिः, पुं, सूर्य्यकान्तमणिः। इति जटाधरः॥

अग्निमन्थः, पुं, (अग्निं मन्नाति इति। मन्थ विलोड़ने। कर्म्मणि अण्।) गणिकारिकावृक्षः। इत्यमरः॥ (यथा वैद्यके,—

"अग्निमन्थः श्वयथुहृद्वीर्य्याणः कफवातहृत्। पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः"॥

अग्निमन्थकुसुमशाकस्तु—

"अग्निमन्थभववालसुनीता सप्तरात्रमुदके सुसाधिता। तक्रतप्ततयुक्तापाचिता हिङ्गुना जनितवासवासिता"॥

अपिच—

"अग्निमन्थोऽथ हृद्यश्च त्रिदोषघ्नमनः सरः। आध्मानच्छर्द्दिहृद्रोगचक्षूरोगविषापहः"॥)

अग्निमारुतिः, पुं, (अग्नौ जठराग्निविषये मारुतिः हनूमान् इव। तस्य जठराग्नौ वातापिप्रभृतयो राक्षसाः भस्मीभूता आसन्। इत्यसौ अग्निमारुतिरुच्यते) अगस्त्यमुनिः। इति हेमचन्द्रः॥

अग्निमुखः, पुं, (अग्निः मुखं यस्य, बहुव्रीहिः।) देवता। ब्राह्मणः। इति मेदिनी॥ चित्रकवृक्षः। भल्लातकः। इति विश्वः॥ (क्ली। अग्नेः पञ्चसु मुखेषु।)

अग्निमुखी, स्त्री, (अग्निरिव मुखं यस्याः। बहुव्रीहिः।) भल्लातकी (भेला)। इत्यमरः॥ लाङ्गलिकी। इति राजनिर्घण्टः॥

अग्निरक्षणं, क्ली, (अग्नेः रक्षणम्। षष्ठीतत्पुरुषः।) अग्न्याधानं। अग्निहोत्रं। इति हेमचन्द्रः॥

अग्निरजाः, [स्] पुं, (अग्नेः रजः स्फुलिङ्गइव।) इन्द्रगोपाख्यकीटः। इति हेमचन्द्रः॥ (क्ली— अग्निवीर्य्यं। स्वर्णं)।

अग्निरुहा, स्त्री, मांसरोहिणी। इति राजनिर्घण्टः॥

अग्निवर्द्धकः, त्रि, (अग्निं जठरानलं वर्द्धयति इति) अग्नि+वृध्+ण्वुल्। अग्निवर्द्धिकारकौषधादिः। आग्नेयः। इति वैद्यकं॥

अग्निवल्लभः, पुं, (अग्नेः वल्लभः उद्दीपकत्वात् प्रियः।) सालवृक्षः। राल। इति राजनिर्घण्टः॥

अग्निवाहः, पुं, (अग्नेः वाहः।) धूमः। इति त्रिकाण्डशेषः॥ (छागः)।

अग्निवाऽः, पुं, (अग्नेः वाऽरिव।) धूमः। इति जटाधरः॥ (प्रियव्रतपुत्रः। स्वायम्भुवमन्वन्तरपुत्रः।)

अग्निवित्, पुं, (अग्निं वेत्ति इति विदः क्विप्।) अग्निचित्। अग्निहोत्री। इति हेमचन्द्रः॥ (अग्निसंस्कारज्ञः।)

अग्निवीजं, क्ली, (अग्निः वीजं उत्पत्तिस्थानं यस्य तत्। अग्नेः स्वर्णस्य उत्पत्तिं यथाह मनुः,—

"यथामग्नेश्च संयोगात् हेम रूप्यञ्च निर्बभौ। तस्मात् तयोः क्षयेन्नैव निर्णेको गुणवत्तरः"॥) स्वर्णं। इति त्रिकाण्डशेषः॥

अग्निवीर्य्यं, क्ली, (अग्नेः वीर्य्यं सारइव।) स्वर्णं। इति राजनिर्घण्टः॥ (त्रि, अग्नितुल्यबले)।

अग्निशिखं, क्ली, (अग्नेरिव शिखा केशरः अस्य।) स्वर्णं। इति राजनिर्घण्टः॥ कुङ्कुमं। कुसुम्भपुष्पं। इति मेदिनी॥ (जाङ्गलिकवृक्षः)।

अग्निशिखः, पुं, (अग्नेरिव शिखा रक्तवर्णः केशरः अस्य।) कुसुम्भवृक्षः। कुङ्कुमं। दीपः। नागः। इति शब्दरत्नावली॥

अग्निशिखा, स्त्री, (अग्नेरिव शिखा केशरः अस्याः।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा। वृक्षविशेषः। तस्य पर्य्यायः। विशल्या १ अनन्ता २ फलिनी ३ शूकशुष्पी ४। इत्यमरः॥ (अग्नेः शिखा।) ज्वाला। आगुनेर शिष इति भाषा॥

अग्निशेखरं, क्ली, (अग्नेरिव शेखरं केशरः अस्य।) कुङ्कुमं। इति राजनिर्घण्टः॥

अग्निष्टोमः, [ष्] पुं, (अग्नीनां स्तोमः। अग्नेः स्तुत्स्तोमसोमा इति षः।) यज्ञविशेषः। इति शब्दरत्नावली॥ तस्य विधिः। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यविहितज्योतिष्टोमनामकयागविशेषस्य गुणविकारोऽग्निष्टोमो नाम। तस्य कालो वसन्तः। तत्राधिकारी अधीतवेद आहिताग्निश्च। इत्थं सोमः। देवता इन्द्रवाय्वादयः। ऋत्विजः षोडशः। तेषाञ्च चत्वारो गणाः। होतृगणः १ अध्वर्य्युगणः २ ब्रह्मगणः ३ उद्गातृगणः ४। एकैकस्य गणस्य चत्वारश्चत्वारः। तत्र होतृगणे होता १ प्रशास्ता २ अच्छावाकः ३ ग्रावस्तोता ४। अध्वर्य्युगणे अध्वर्य्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेता ४। ब्रह्मगणे ब्रह्मा १ ब्राह्मणाच्छंसी २ अग्नीध्र ३ पोता ४। उद्गातृगणे उद्गाता १ प्रस्तोता २ प्रतिहर्त्ता ३ सुब्रह्मण्यः ४। स च पञ्चाहसाध्यः। प्रथमदिने दीक्षा दीक्षणीयादितदङ्गानुष्ठानं। तत्र द्वितीयदिवसे प्रायणीययागः सोमलताक्रयणं। ततो द्वितीयतृतीयचतुर्थदिवसेषु प्रातःकाले सायंकाले च प्रवर्ग्योपसन्नामकयागानुष्ठानं। चतुर्थदिवसे प्रवर्ग्योद्वासनानन्तरं अग्नीषोमीयपशवनुष्ठानं। तत्र यस्य यजमानस्य गृहे पितृपितामहप्रपितामहानां मध्ये केनापि वेदो नाधीतोऽग्निष्टोमो वा न कृतः स दुर्ब्राह्मणो भवति। तस्य दौर्ब्राह्मण्यपरिहारायाग्निनपशुः कर्त्तव्यः। यस्य यजमानस्य पितृपितामहप्रपितामहानां मध्ये केनापि सोमपानं न कृतं स्यात् तस्य सोमपानविच्छेददोषपरिहारार्थमैन्द्राग्नपशवनुष्ठानं कर्त्तव्यं। इत्थं त्रयाणां पशूनां युगपदालम्भपक्षे एकस्मिन्नेव यूपे त्रयाणां पशूनां बन्धनं। इत्थं पशुत्रयानुष्ठानं चतुर्थदिवसे तस्मिन्नेव दिने वा तृतीयभागे उत्थाय प्रयोगारम्भः कार्य्यः। तत्र पात्रासादनं। पात्राणि च ग्रहपात्रचमसपात्राणि स्थाल्यश्चेति। तत्र ग्रहपात्राणि वितस्तिमात्राणि उलूखलाकाराणि। ऊर्द्धपात्राणि चमसपात्राणि तावत्परिमितान्येव तिर्य्यगाकृतीनि कोणचतुष्टयविशिष्टानि धारणार्थदण्डयुक्तानि। स्थाल्यो मार्त्तिक्यः। ततः आरभ्य सोमलताक्रयणेन सोमरसं निष्कास्य निष्कास्य ग्रहैश्चमसैश्च होमः कर्त्तव्यः। तत्र सूर्य्योदयानन्तरं आग्नेयपशुयागः कर्त्तव्यः। एवमुक्त्यपर्य्यायान्ते कृते प्रातःसवनसमाप्तिः। ततो मध्यन्दिनसवनं। तत्र दक्षिणादानं। दक्षिणा च द्वादशोत्तरशतं गावः। ततस्तृतीयसवनं। इत्थं प्रातःसवनमाध्यन्दिनसवनतृतीयसवनरूपसवनत्रयात्मकः अग्निष्टोमः प्रधानयागः। इतरेऽङ्गयागाः। तृतीयसवनसमाप्युत्तरमवभृथयागः। उदके वरुणदेवताकपुरोडाशहोमः। तदनन्तरमनुबन्ध्या पशुयागः। तत्र गौः पशुः। तस्य कलिनिषिद्धत्वात् तस्य च नित्यत्वात् तत् स्थाने आमीक्षायागः। तत उदयनीया तत उदवसानीया। सा च पञ्चमदिवसे यावद्रात्रि कर्त्तव्या। तत्समाप्तावग्निष्टोमयागसमाप्तिः। इत्यग्निष्टोमयागीयपदार्थकलासूची॥

अग्निष्ठः, पुं, (अग्नौ तिष्ठतीति। अग्नि+स्था+कः)। लौहमयतण्डुलादिभर्जनपात्रं। इति त्रिकाण्डशेषः॥ (कड़ा इति भाषा)।

अग्निसखः, पुं, (अग्नेः सखा इति समासे राजाहःसखिभ्यष्टच् इति समासान्तष्टच्।) वायुः। वायुसखोऽग्निरिति दर्शनात्॥

अग्निसन्दीपनं, त्रि, (अग्नेः सन्दीपनम्। सम्+दीप्+ल्युट्।) वह्निवर्द्धकौषधादि। यथा,—

"एला त्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता। मरिचं पिप्पली शुण्ठी चतुःपञ्चषडुत्तरा॥ द्व्यक्षोणितानि यावन्ति तावती सितशर्करा। चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं"॥

इति भावप्रकाशः॥

अपि च।

"अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणं"।

इति राजवल्लभः॥

अग्निसम्भवः, पुं, (अग्निः सम्भवो यस्य सः। अग्नि+सम्+भू+अप्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः॥ (कार्त्तिकेयः। त्रि। अग्निसमुत्पन्नः।)

अग्निसहायः, पुं, (अग्नेः जठरानलस्य सहायः उद्दीपकः। कपोतमांसस्य अग्निवर्द्धकत्वात्।) वनकपोतः। इति राजनिर्घण्टः॥ (अग्नेः सहायः बन्धुः। वायुः।)

अग्निसारं, क्ली, (अग्नेरिव सारः बलं यस्मं।) रसाञ्जनं। इति राजनिर्घण्टः॥

अग्निस्तम्भनं, क्ली, (अग्नेः स्तम्भनम्। षष्ठीतत्पुरुषः।) मन्त्रौषधिद्वारा अग्नेर्दाहिकाशक्तिनिवारणं। तद्यथा,—

"मालूरस्य वसां गृह्य जलौकां तत्र पेषयेत्।

हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमं ॥
मालूरस्य स्थाने मानुषस्य इति वा पाठः ॥१॥
ग्राह्यगोरसमादाय खरमूत्रे निधापितं ।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमं ॥२॥
वायसी उदरं मृद्वा मण्डूकवसया सह ।
गुटिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेदग्नौ ॥
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमं ॥३॥
रक्तपाटलमूलन्तु अवश्यञ्च मूलकैः ॥
दिव्यं स्तम्भयते क्षिप्रं पयःपिण्डं जलान्तकं ॥४॥
मुण्डीतकां वचा कुष्ठं मरीचं नागरं तथा ॥
चर्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत् ॥५॥
गोरोचनां भल्लराजं चूर्णयित्वा घृतं समं ॥
दिव्यस्तम्भञ्च पीत्वा स्यात्मन्त्रेणानेन वै तथा" ॥६॥
ओमह्नं अग्निस्तम्भनं कुरु । इति गारुडे १८६ अध्यायः ॥

अग्निखात्ताः, पुं, (अग्निना सक्षु यथा स्यात् एवम् आत्ताः भक्षिताः, औतस्नात्तात्रिदग्धा इत्यर्थः । मन्वादिस्मृतिषु मूर्द्धन्यषकारवान् एव पाठः । मूर्द्धन्यादेशस्तु न युक्तः ।) मरीचिपुत्रलपिण्डगण-विशेषः । नित्यबहुवचनान्तशब्दोऽयं । इति शब्दमाला,—
"विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः ।
अग्निखात्ताश्च देवानां मारीचा लोकविश्रुताः" ॥
इति मनुः ।

अग्निहोत्रं, क्ली, (अग्नये होत्रम् अत्र इति बहुव्रीहिः ।) यज्ञविशेषः । तत् द्विविधं । माससाध्यं यावज्जीवनसाध्यञ्च । द्वितीये वि-शेषोऽयं । तदग्नौ यावज्जीवं प्रत्यहं प्रातः सायं हवनं । तदग्निना यागकर्त्तुर्दाहश्च । इति स्मृतिः ॥ तत्र क्रमो यथा । ब्राह्मणक्षत्रिय-वैश्यानां क्षतदारपरिग्रहाणां कायत्वान्यत्व-वधिरत्वपङ्गुत्वादिदोषरहितानां वर्णक्रमेण वस-न्तग्रीष्मशरत्सु अग्न्याधानं विहितं । अग्न-यस्त्रयः गार्हपत्यः १ दक्षिणाग्निः २ आहवनीयः ३ । एषामाधानं नाम देशविशेषे तत्तन्मन्त्रैः स्थापनं । तेष्वग्निषु सायंकाले प्रातःकाले चा-ग्निहोत्रहोमः कर्त्तव्यः । अग्निहोत्रं नाम होमस्य नामधेयं । अग्नये होत्रं होमो यस्मिन् कर्म्मणीति व्यधिकरणबहुव्रीहिः । तत्र द्रव्याणि दश । पयः १ दधि २ यवागूः ३ घृतं ४ ओदनः ५ तण्डुलाः ६ सोमरसः ७ मांसं ८ तैलं ९ माषाः १० । सम्प्रति कलियुगे पयसा तण्डुलैर्यवागूवा च होम-प्रतिष्ठाचारप्रसिद्धः । तत्र एक ऋत्विक् नित्यं होमः यजमानेन वा कर्त्तव्यः ऋत्विजा वा कारयितव्यः । अमावास्यायान्तु रात्रौ यवा-गूद्रव्येण यजमानेनैव कर्त्तव्यः । स चाग्निहोत्र-होमः आरम्भप्रभृति यावज्जीवनं कर्त्तव्यः । प्रथमदिने पूर्व्वोक्तानां दशानां द्रव्याणां मध्ये सम्प्रति प्रचलद्रूपायाञ्च मध्ये येन द्रव्येण प्रथमाग्निहोत्रहोमः क्षतः तेनैव द्रव्येण या-वज्जीवनं कर्त्तव्यः । प्रथमहोमस्य यस्मिन् दिने अग्न्याधानं क्षतं तस्मिन् दिने सायं-काले आरम्भणीयः । तत्र घृतहोमे सूर्य्यो देवता सायंकाले अग्निर्देवता । आधानानन्तरं प्रथमपौर्णमास्यां दर्शपूर्णमासयागारम्भः क-र्त्तव्यः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिवाक्यं । तत्र षड्यागाः । पौर्णमास्यां त्रयः । अमायां त्रयः । पौर्णमास्यामाग्नेयाग्नी-षोमीयोपांशुयागाख्ये यागाः । अमावस्या-यामाग्नेयैन्द्रदधिपये यागाख्ययः । तत्रामायां कर्त्तव्ययागत्रयस्य दर्शपदं नामधेयं । पौर्ण-मास्यां कर्त्तव्ययागत्रयस्य पूर्णमासपदं नाम-धेयं । दर्शश्च पूर्णमासश्च दर्शपूर्णमासाविति द्वन्द्वः । पौर्णमासयागस्य प्राथमिकत्वेऽपि अस्या-च्चतरमिति पाणिनीयानुशासनानुसारेण दर्श-शब्दस्याल्पाच्कत्वात् पूर्व्वनिपातः । दर्शपूर्ण-मासावपि यावज्जीवं कार्य्यौ । तत्रापि त्रयाणां वर्णानामुपरि लिखितान्धत्वाद्यधिकारप्रतिबन्ध-कीभूतदोषसम्बन्धाभाववतां क्षताग्निधानानां स-पत्नीकानामधिकारः । सामान्यतः पर्व्वण्यारम्भः प्रतिपदि याग इति परिभाषा । तत्राक्षत-सोमयागस्य यजमानस्य पौर्णमास्यामाग्नेयपुरो-डाशयागः आज्येनोपांशुयाजयागः । अमायान्तु आग्नेयपुरोडाशयागः ऐन्द्राग्नपुरोडाशयागः । क्षतसोमयागस्य यजमानस्य तु पौर्णमास्यामा-ग्नेयपुरोडाशयागः आज्येनोपांशुयाजयागः अग्नी-षोमीयपुरोडाशयागः । अमायान्तु आग्नेयपुरो-डाशयागः ऐन्द्रपयोयागः ऐन्द्रदधियागश्चेति त्रयः । तत्र ऋत्विजश्चत्वारः । अध्वर्य्युः १ ब्रह्मा २ होता ३ अग्नीदिति ४ । यजुर्वेदैकशाखिकर्त्ता अध्वर्य्युः । ऋग्यजुःसामवेदत्रयकर्म्मैककर्त्ता ब्रह्मा । ऋग्वेदैकशाखिकर्त्ता होता । अग्नीत्तु प्रायशो-ऽध्वर्य्योरेवानुयायी तत्प्रेरितकर्म्मैककर्त्ता । पुरो-डाशो व्रीहितण्डुलैर्यवतण्डुलैर्वा कर्त्तव्यः । अग्नि-होत्रवदर्शेन द्रव्येणारम्भः क्षतसोमेन द्रव्येण याव-ज्जीवं यागः कर्त्तव्यः । आरम्भवेलायामिच्छेत् नियामिकेत्यादिदिक्षाक्यमिदं । इति यजुर्वेदः ॥
यज्ञाग्निसञ्चयः । तत्पर्य्यायः । अग्न्याधानं २ अ-ग्निरक्षणं ३ । इति हेमचन्द्रः ॥

अग्निहोत्र, पुं, अग्निः । घृतं । इति मेदिनी ॥

अग्निहोत्री, [न्] पुं, (अग्निहोत्रम् अस्यास्तीति । अत इनिठनाविति नीनिः ।) अग्निहोत्रयागकर्त्ता । तत्पर्य्यायः । अग्निवित् २ आहिताग्निः ३ । इति हेमचन्द्रः ॥ अग्निचित् ४ । इत्यमरः ॥ साग्निकः ५ । इति पुराणं ॥
("अग्निहोत्र्यविद्याग्नीन् ब्राह्मणः कामकारतः ।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्" ॥
इति मनुः ।)

अग्नीध्रः, पुं, (अग्नि + इन्ध + रन् ।) ऋत्विग्विशेषः । तस्य कर्म्माग्निरक्षणं । इत्यमरः ॥ (अग्निद्वारा वरणीयो ऋत्विग्विशेषः । काम्यायां प्रियव्रतात् उत्पन्नो नृपभेदः । स्वायम्भुवमनुपुत्रो राजभेदः ।)

अग्नीध्रा, स्त्री, अग्निकार्य्यं । इविर्हागादिपूर्व्वकाग्नि-ध्यानं । इति हेमचन्द्रः ॥

अग्नीन्धनं, क्ली, (अग्नौ इन्धनम् । अग्नि + इन्धु + करणे ल्युट् ।) अग्निकार्य्यं । इविर्हागादिपूर्व्व-काग्निज्वालनं । इति हेमचन्द्रः ॥ यथाह मनुः—
"अग्नीन्धनं भैक्षचर्य्यामधः शय्यां गुरोर्हितम् ।
आसमावर्त्तनात् कुर्य्यात् क्षतोपनयनो द्विजः" ॥

अग्न्यस्त्रं, क्ली, (अग्निमयम् अस्त्रम् । कर्म्मधारयः ।) आग्नेयास्त्रं । अग्निघटितास्त्रं । वन्दूकबामान इत्यादिभाषा ॥

अग्न्याधानं, क्ली, (अग्नेः आधानं । अग्नि + आ + धा + ल्युट् ।) श्रुतिविहिताग्निसंस्कारः । अग्नि-रक्षणं । अग्निहोत्रं । इति हेमचन्द्रः ॥

अग्न्यालयः, पुं, (अग्नेः आलयः ।) यज्ञाग्न्याधार-कुण्डं । इति जटाधरः ॥

अग्न्युत्पातः, पुं, (अग्नेः उत्पातः ।) आकाशादिषु अग्निविकारः । धूमकेतूल्कापातादिः । अग्नि-शिखोत्पातो वा । स तु मन्त्रादिद्वारा अग्ने-र्दाहशक्तिनिवारणं । तत्पर्य्यायः । उपाहितः २ । इत्यमरटीकाकृच्च ॥

अग्रं, क्ली, (अग्यते अगति वा । अग गतौ ऋचेन्द्रेति साधु ।) उपरिभागः । आगा इति भाषा । अस्य पर्य्यायः । शिरः २ शिखरं ३ इत्यमरः ॥ पुरस्तात् । अवलम्बनं । पलपरि-माणं । प्रान्तं । समूहः । इति मेदिनी ॥ (भिक्षाविशेषः । यासचतुष्टयम् । "यासप्र-माणा भिक्षास्यादग्रं यासचतुष्टयम्" ॥ इति स्मृतेः ।)

अग्रः, त्रि, श्रेष्ठः । उत्तमः । इत्यमरः ॥ प्रधानं । अधिकः । प्रथमः । इति मेदिनी ॥

अग्रगण्यः, त्रि, (अग्रे गण्यः । गणसङ्ख्याने, यत् ।) अ गणनीयः । यथा,—
"भ्रमणभवनयाने यद्भवानग्रगण्यः" ।
इति महाजाटकं ॥

अग्रगामी [न्] त्रि, (अग्रे गच्छतीति । अग्र + गम् + णिन् ।) अग्रे गमनकर्त्ता । अग्रेसरः । इति हेमचन्द्रः ॥

अग्रजः, पुं, (अग्रे जात इति सप्तम्यां जनेः डः ।) ज्येष्ठभ्राता । तत्पर्य्यायः । पूर्व्वजः २ अग्रियः ३ । इत्यमरः ॥ (यथाह मनुः,—
"सर्व्वेषां धनजातानामाददीताग्रमग्रजः" ।)
ब्राह्मणः । इति हेमचन्द्रः ॥ अग्रे जाते त्रि ॥

अग्रजङ्घा, स्त्री, (अग्रा जङ्घा अवयवावयविनोर-भेदात् (कर्म्मधारयः । अथवा जङ्घाया अयं षष्ठी-तत् राजदन्तादित्वात् परनिपातः) प्रतिजङ्घा । जङ्घाग्रभागः । इति हेमचन्द्रः ॥

अग्रजन्मा, [न्] पुं, (अग्रे जन्म यस्य स बहुव्रीहिः,) (जन् + भावे मनिन्) ब्राह्मणः ॥ इत्यमरः ॥
"अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः" ॥
मनुः । ज्येष्ठभ्राता । ब्रह्मा । इति विश्वः ॥

अग्रजातकः, पुं, (अग्रे जातं जन्म यस्य स बहुव्रीहिः, (जन् + भावे क्तः) ब्राह्मणः । समासान्त क इति शब्दरत्नावली ॥

अग्रजातिः, पुं, (अग्रे जातिर्जन्म यस्य सः) (जन् + भावे क्तिन्) ब्राह्मणः। इति हेमचन्द्रः॥

अग्रणीः, त्रि, (अग्रे नीयतेऽसौ अग्र + नी + क्विप् अग्रयामाभ्याञ्च इति पाणिनिसूत्रेण णत्वं।) (वह्नौ च पुं, यथा चास्याग्रणीत्वं तथाग्निशब्दे निरुक्तव्याख्यायामुक्तम्) अग्रिमः। श्रेष्ठः। इति हेमचन्द्रः॥

अग्रतः, [स्] (अग्रे अग्र + सप्तम्यर्थे तस् अग्रं) अग्रे। प्रथमे। तत्पर्य्यायः। पुरतः २ पुरः ३। इत्यमरः॥

अग्रतःसरः, त्रि, (अग्रतः अग्रे सरति गच्छति यः सः अग्रतः + सृ + टः। स्त्रियां ङीप् अग्रतःसरी) (पुरोऽग्रतोऽग्रेषु सर्त्तेः इति पाणिनिसूत्रम्) अग्रगामी। इत्यमरः॥

अग्रदानी, [न्] पुं, (अग्रे दानं प्रेतोद्देशेन तिलादेर्यत्र याह्यत्वेन विद्यतेऽस्य अग्र + दान + विद्यमानार्थे इन्) पतितब्राह्मणविशेषः। स च प्रेतसम्बन्धदानकषड्रूतिलादिद्रव्यग्राही। यथा,—
"लोभी विप्रश्च शूद्राणामग्रे दानं गृहीतवान्।
यद्गृहे मृतदानानामग्रदानी बभूव सः"॥
इति ब्रह्मवैवर्त्तपुराणं॥ तत्पर्य्यायः। आग्रहारिकः २। इति स्मृतिः॥

अग्रपर्णी, स्त्री, (अग्रे पर्ण पत्रं यस्याः सा जातित्वात् ङीप्) अजलोमवल्लः। इति रत्नमाला॥ आलकुशी इति केचित्॥
अग्रमांसं, क्ली, (अग्रं प्रधानं मन्यते ज्ञायते यत् अग्र + मन् + स। षोदरादित्वात् दीर्घः।) हृदयं। इत्यमरः॥ उदरमध्यवर्त्तिमांसवर्द्धनरूपरोगविशेषः। इति वैद्यकं॥

अग्रयानं, क्ली, (अग्रं प्रथमं यानं सेनागमनं) नासीरं। सेनाग्रगमनं। इति हेमचन्द्रः॥

अग्रलोहिता, स्त्री, (अग्रमग्रभागः लोहितं रक्तवर्णं यस्याः सा बहुव्रीहिः) चिल्लीशाकं। इति राजनिर्घण्टः॥

अग्रबीजः, पुं, (अग्रं शाखाग्रं बीजमुत्पत्तिकारणं यस्य सः बहुव्रीहिः। कलम इति भाषायाम्) बीजाग्रवल्लमात्रं। स च कुरण्टादिः। इति हेमचन्द्रः॥

अग्रसन्धानी, स्त्री, (अग्रे फलभोगात्पूर्व्वं सन्धीयते अन्विष्यते कार्य्यमनया अग्र + सम् + धा + करणे ल्युट् स्त्रियां ङीप्) यमपञ्जिका। जीवानां शुभाशुभकर्म्मलिखितं यमस्य पुस्तकं। इति त्रिकाण्डशेषः॥

अग्रसरः, त्रि, (अग्रे सरति गच्छति अग्र + सृ + टः।) अग्रेसरः। अग्रगामी। इति हेमचन्द्रः॥ (यथा,—"अग्रेसरो जघन्यानां")। इति भट्टिकाव्ये।

अग्रहः, पुं, (नास्ति ग्रहः गार्हस्थ्याश्रमस्वीकारो यस्य सः बहुव्रीहिः। वानप्रस्थे। नास्ति ग्रहो ज्ञानं यस्य सः।) ज्ञानशून्ये च। वानप्रस्थः। इति त्रिकाण्डशेषः। अग्रह इति पाठे गार्हस्थ्याश्रमबहिर्भूतः॥

अग्रहायणः, पुं, (हायनस्य वर्षस्य अग्रः। ह्रस्वो ब्रीह्यकालयोरिति सूत्रेण ह्रा + ल्युट् युक् च।) मासविशेषः। तस्य व्युत्पत्तिर्यथा,—"हायनस्याग्रोऽग्रहायणः निपातनात् परनिपातनत्वञ्च"। इत्यमरटीकायां भरतः॥ मार्गशीर्षमासः। इति शब्दरत्नावली॥ अस्य पर्य्यायः आग्रहायणिके जातफलं तत्कृत्यञ्च मार्गशीर्षे द्रष्टव्यम्॥

अग्राह्यं, त्रि, (न ग्राह्यं ग्रहणीयं ग्रह + कर्म्मणि। ण्यत् ग्रहणायोग्ये) अग्रहणीयं। ग्रहणायोग्यं यथा,—
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं।
सालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रतां"॥
इति तिथ्यादित्तत्त्वं॥

अग्रिमः, त्रि, (अग्रे भवः अग्र + डिमन्) प्रधानं। उत्तमः। इति हेमचन्द्रः॥ ज्येष्ठः। अग्रजः। इति जटाधरः॥

अग्रिमा, स्त्री, (अग्रे भवा अग्र + डिमन्) लवणीफलं। लोणा इति ख्याता। इति शब्दचन्द्रिका॥

अग्रियं, त्रि, (अग्रे भवम् अग्र + घ) प्रधानं। इत्यमरः॥

अग्रियः, पुं, (अग्रे भव अग्र + घ) अग्रजः। ज्येष्ठभ्राता। इत्यमरः॥

अग्रीयं, त्रि, (अग्रे भवः अग्र + छ) प्रधानं। इत्यमरः॥ अग्रजे पुं,। इति तट्टीकायां रमानाथः॥

अग्रुः, स्त्री, (अङ्क्ते द्रव्यं गृह्यतेऽनया अगि + क्रु ऊङुत इति स्त्रियां वा ऊङ्। निपातनात् नलोपः।) अङ्गुलिः। वेदप्रचुरप्रयोगोऽयं॥

अग्रेगाः, पुं, अग्रगामी। इति मुग्धबोधव्याकरणं॥

अग्रेगूः, पुं, (अग्रे गच्छति यः अग्रे + गम् + क्विप् ऊचगमादीनामित्युपसङ्ख्यानमिति पाणिनिवार्त्तिकेन मलोपः अकारस्य ऊकारः।) अग्रगामी। इत्युणादिवृत्तिः॥

अग्रेदिधिषुः, पुं, (दिधिं धैर्य्यं स्यति इन्द्रियदौर्ब्बल्यात् त्यजति दिधि + सो + अन्युदृनकूजन्भ्रुकन्थुकङ्कोलूकर्कन्धूदिधिषु इत्युणादिसूत्रेण कु धत्वञ्च दिधिषुः पुनर्भूर्योषित् अग्रे गमनोद्यादिधिषुः द्विरूढा स्त्री यस्य सः बहु० ह्रस्वदन्तात् सप्तम्याः संज्ञायामिति पाणिनिसूत्रेण अलुक् पुनर्भूविवाहकारिणि जने) द्विरूढैव यस्य कुटुम्बिनी स द्विजः। द्विज इत्युपलक्षणं। दिधिषुः परपूर्व्वाग्रे दिधिषुस्तत्पुरन्ध्रिकः। इति सामान्येन नाममालादर्शनात्। द्वितीयवारविवाहितपुत्रादिमती गृहिणीह स्वामी इति भाषा। इत्यमरः॥

अग्रेदिधिषुः, स्त्री, (प्रागूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां। अग्रे प्रथमे ज्येष्ठायां भगिन्यां विद्यमानायां गमनोद्यादिधिषुः ज्येष्ठा विवाहकालासहनरूपधैर्य्यलोपकारिणीति विग्रहे प्राक्पार्थिवादित्वात् समासः मध्यपदलोपश्च।) अविवाहितज्येष्ठभगिनीसत्त्वे अग्रे विवाहिता कनिष्ठा। यथा,—
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा।
सा चाग्रे दिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता"॥
इति देवलः। दिधिषूर्दैर्घीकारान्तोऽपि॥

अग्रेवणं, क्ली, (वनस्याग्रे राजदन्तादित्वात् परनिपातः अलुक्। वनं पुरगे आदित्वात् णत्वम्।) वनस्याग्रभागः। इति शब्दमाला॥

अग्रेसरः, त्रि, (अग्रे सरति गच्छतीति अग्रे + सृ + टः।) अग्रे गमनकर्त्ता। तत्पर्य्यायः। पुरोगः २ प्रष्ठः ३ अग्रतःसरः ४ पुरःसरः ५। इत्यमरः॥ अग्रगामी ६ अग्रसरः ७ अग्रगः ८ पुरोगमः ९ पुरोगामी १०। इति हेमचन्द्रः॥

अग्रेसरिकः, त्रि, (अग्रेसरणं गमनम् अग्रे + सृ + भावे अप् अग्रेसरे गमने प्रहृतः अग्रेसर + ठन् अग्रगामिनि।) अग्रगामी। इति त्रिकाण्डशेषः॥

अग्र्यः, त्रि, (अग्रे भवः अग्र + यत्।) प्रधानं। उत्तमः इत्यमरः। ज्येष्ठभ्रातरि पुं इति तट्टीकायां रमानाथः॥

अघ इ ङ गतौ (अधि गतौ कर्म्मणि लट् ते इदितो नुम् धातोरिति पाणिनिसूत्रेण नुम् अङ्घते। कर्त्तरि लट् ते अङ्क्ते)। निन्दायां। आरम्भे। जवे। इति कविकल्पद्रुमः॥ जवो वेगगतिः। इ अङ्घते। ङ अङ्क्ते वायुर्वेगेन गच्छतीत्यर्थः। जवे एव कैश्चित् पठ्यते। इति दुर्गादासः॥

अघ त् क तत्कृतौ। इति कविकल्पद्रुमः॥ तत्कृतिः पापकृतिः। अघयति व्याधः। कर्म्मणोऽर्थमध्यपाठादकर्म्मकोऽयं। तथा च,—
"धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया"॥
इति गोयीचन्द्रः॥ धात्वर्थेन सह कर्म्मण उपसङ्ग्रहादित्यर्थः। क्रमेणोदाहरणानि। नदी वहति क्षरतीत्यर्थः। अघयति व्याधः। भवति घटः। आहते जनः। इति दुर्गादासः॥

अघं, क्ली, (अघ पापकरणे चुरां अघयति अघ + णिच् + अच्।) पापं। दुःखं। व्यसनं। इत्यमरः॥

अघमर्षणं, त्रि, (अघं पापं मृष्यते उत्पन्नत्वेऽपि नाशनेन कर्म्मात्मत्वात् सह्यतेऽनेन अघ + मृष् + करणे ल्युट्।) पापनाशनं। सर्व्वपापध्वंसिजप्यं। इत्यमरः॥ (उत्पन्नपापनाशार्थं जप्ये मन्त्रभेदे यथा सन्ध्यामन्त्रे द्रुपदादिवेत्यादि) अश्वमेधयज्ञावभृथस्नानमन्त्रः। वैदिकसन्ध्यान्तर्गतमन्त्रकरणकाघातजलप्रक्षेपरूपपापनाशनक्रियाविशेषः। इति स्मृतिः॥ तान्त्रिकसन्ध्यायान्तु,—
"षड्रन्यासमाचर्य्य वामहस्ते जलं ततः।
गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः॥
शिववायुजलस्थ्वेवह्निवीजैस्त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
निःक्षिपेत् तज्जलं मूर्द्ध्नि शेषं दत्त्वा निधाय च।
इड़यात्मन्य देहान्तःस्थालितं पापसञ्चयं॥
कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत्।
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च॥
पुरतो वध्यपाषाणे निक्षिपेदस्त्रमुच्चरन्"॥
इति तन्त्रसारः॥

अघवान्, [त्] त्रि, (अघं पापं विद्यतेऽस्य अघ + मतुप्) अघविशिष्टः। पापी॥

अङ्क

अघासुरः, पुं, (अघनामा असुरः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च) अघनामासुरः। स च कंसराजसेनापतिः। इति श्रीभागवतं॥

अघोः, [स्] त्र, सम्बोधनं। यथा अघो यज्ञ इति वेदे॥

अघोरः, पुं, (न घोरः सौम्यरूपः "या ते रुद्र! शिवा तनूरघोरा पापनाशिनी" इति वेदः।) महादेवः। इति शिवचतुर्दशीव्रतपूजायां॥ अतिभयानके अभयानके च त्रि॥

अघोरा, स्त्री, (नास्ति घोरा भयानका मूर्त्तिर्यस्याः। अतिभयानका इति व्युत्पत्त्यर्थः) भाद्रकृष्णचतुर्दशी। यथा,—

"भाद्रे माससिते पक्षे अघोराख्या चतुर्दशी।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवं"॥

इति स्मृतिः॥

अघोषः, त्रि, (नास्ति घोषः शब्दो यत्र बहुव्रीहिः शब्दशून्ये, न अल्पः घोषः शब्दो यत्र बहुव्रीहिः अल्पध्वनियुक्ते। तथाहि,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥

इति स्मरणात्।) आभीरशून्यदेशादिः। शब्दरहितः। अल्पध्वनियुक्तः। कलापादिव्याकरणस्य संज्ञाविशेषे पुं। स तु वर्गप्रथमद्वितीयवर्णाः शषसाश्च॥

अघ्न्यः, पुं, (न हन्ति विनाशयति खण्डयत्वात् न+हन्+कर्त्तरि यक्। निपातनात् साधुः) ब्रह्मा। इत्युणादिकोषः॥

अघ्न्या, स्त्री, (न हन्यते या हन्+कर्म्मणि यक् स्त्रियामाप्। पतिं वो अघ्न्यानां धेनूनाम् इति वेदः। "अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि"॥ इति निषेधात्।) स्त्रीगवी। इत्यमरः॥

अङ्क् त् क पदे। लक्ष्मणि। इति कविकल्पद्रुमः॥ कण्ठ्यवर्गाद्योपधः। पदं सङ्ज्ञासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च,—

"अर्थक्रियैव धातूनां कर्त्तव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु"॥

इति बोपदेवः॥

"अङ्क्यत्वरिसैन्यानि युधि एष्टेषु शायकैः"। इति हलायुधः॥ अङ्कयति अङ्कापयति। इति दुर्गादासः॥

अङ्कः, पुं, (अङ्कयति चिह्नयति, अङ्क+अच्) चिह्नं। (स्वनामकाङ्कां निचखान शायकं इति रघुवंशे।) क्रोडं। (सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकं। इति विष्णुपुराणे॥) रूपकविशेषः। अपराधः। रेखा। विभूषणं। समीपं। स्थानं। नाटकांशः। इति मेदिनी॥ (प्रत्यक्षनेक्षचरितो रसभावसमुज्ज्वलः। भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः॥ अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः। इति साहित्यदर्पणे)। चित्रयुद्धं। इति विश्वः॥ शरीरं। इत्युणादिकोषः॥ नवसङ्ख्या। इति ज्योतिषं॥ (कुचभूमायां। प्रकरणे। अगे। कटिप्रदेशे। कलङ्के। एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। इति कुमारसम्भवे।)

अङ्कतिः, पुं, (अच्यते पूज्यतेऽसौ अन्च+कर्म्मणि अति न्यङ्क्वादीनाञ्च इति पाणिनिसूत्रेण चस्य कः। वायुपक्षे अञ्चति गच्छति इति व्युत्पत्त्या) ब्रह्मा। अग्निः। अग्निहोत्री। इति विश्वः॥ वायुः। इति चिकाण्डशेषः॥

अङ्कनं, क्ली, (अङ्क+णिच् भावे ल्युट्) सङ्ज्ञासंस्थानं। चिह्नयुक्तीकरणं। आँकन् दागन इति भाषा। चिह्नकरणं। यथा पशुशरादिरसौ।

"अन्यत्राङ्कनलक्ष्माभ्यां वाहनिर्भोजने क्षते।
सायं संयमनार्थन्तु न दुष्येद्दोषबन्धयोः"॥

अङ्कनं चिह्नशूलादिचिह्नकरणं। लक्ष्म स्थिरचिह्नकरणं। इति प्रायश्चित्ततत्त्वं॥

अङ्कपालिका, स्त्री, (अङ्कपालि+स्वार्थे कः स्त्रियामाप्।) आलिङ्गनं। इति शब्दमाला॥

अङ्कपाली, स्त्री, (अङ्केन क्रोडेन पालयति अङ्क+पा+अलि स्त्रियां वा ङीप् पक्षे अङ्कपालिः।) आलिङ्गनं। धात्री। वेदिकाख्यगन्धद्रव्यं। तस्य नामान्तरं कोटिः। इति मेदिनी॥

अङ्कलोडः, पुं, (अङ्केन लोढते ऽसौ लोढ+घञ्) चिञ्चोटकवृक्षः। चेँचको इति भाषा। चिञ्चोड़मूल इति केचित्॥ अस्य गुणाः। गुरुत्वं। अजीर्णकारित्वं। शीतलत्वञ्च। इति राजवल्लभः॥

अङ्कितः, त्रि, (अङ्क+क्त।) लाञ्छितः। चिह्नितः। इति व्याडिः॥

अङ्की, स्त्री, (अङ्कः+स्त्रियां ङीप्।) अङ्कः। मृदङ्गविशेषः। इति शब्दरत्नावली॥

अङ्कुरः, पुं, (अङ्क+उरच्) बीजोद्भवः। नूतनोत्पन्नवृक्षादिः। (दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा। इति शाकुन्तले। अस्य पर्य्यायः। अभिनवोद्भिद् २। इत्यमरः॥ उद्भेदः ३ प्ररोहः ४ (चूताङ्कुरास्वादकषायकण्ठः॥ इति कुमारसम्भवे।) अकुरः ५। इति राजनिर्घण्टः। रोहः ६ अङ्करः ७। इति हेमचन्द्रः॥ जलं। रक्तं। लोम। इति मेदिनी॥

अङ्कुरकः, पुं, (अङ्क्यते लक्षणादिभिर्निर्म्मीयतेऽसौ अङ्क+उरच् ततः स्वार्थे कः) नीडः। पक्षिवासस्थानं। इति शब्दमाला॥

अङ्कुशः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+उशच्।) हस्तिचालनार्थलोहमयवक्राग्रास्त्रं। डाङ्कुश इति भाषा। तत्पर्य्यायः। प्रहणिः २। इत्यमरः॥ हणिः ३। इति तट्टीका॥ अङ्कूशः ४। इत्युणादिकोषः॥ (रामायणे,—

"उष्ट्रान् हयान् खरान् नागान् जघ्नुर्दण्डकषाङ्कुशैः॥
कम्पना अङ्कुशा भल्लाः कालचक्रा गदास्तथा"॥)

अङ्कुशदुर्धरः, पुं, (अङ्कुशेन दुर्धियते दुर्ह्रियतेऽसौ दुर्+धृ+कर्म्मणि खल्।) दुरन्तहस्ती। इति चिकाण्डशेषः॥

अङ्कुशी, स्त्री, (अच्यते आराध्यतेऽसौ गौडविशेषैः

अङ्क

अङ्क+उशच् स्त्रियां ङीप्। व्यङ्गादीनाञ्च इति चस्य कः।) जिनानां चतुर्विंशतिशासनदेवयन्तर्गतदेवीविशेषः। इति हेमचन्द्रः॥

अङ्कूरः, पुं, (अङ्क+खर्जूरादित्वात् ऊरच् वा उरच्) अङ्कुरः। अभिनवोद्भिद्। इति हेमचन्द्रः॥

अङ्कूषः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+ऊषच् करणे) अङ्कुशः। इत्युणादिकोषः॥

अङ्कोटः, पुं, (अङ्क+ओटच्) अङ्कोठवृक्षः। इति रत्नमाला॥

अङ्कोठः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओठच्) वृक्षविशेषः। आकोड़ इति ख्यातः। धलआँकूड़ा इति केचित्। अस्य पर्य्यायः। निकोचकः २। इत्यमरः॥ निकोठकः ३ निकोचकः ४। इति भरतः॥ अङ्कोलकः ५ बोधः ६ नेदिष्ठः ७ दीर्घकीलकः ८। इति जटाधरः॥ अङ्कोटः ९ रामठः १०। इति रत्नमाला॥ कोठरः ११ रेचो १२ गूढपत्रः १३ गुप्तस्नेहः १४ पीतसारः १५ मदनः १६ गूढवल्लिका १७ पीतः १८ ताम्रफलः १९ दीर्घकीलः २० गुणाढ्यकः २१ कोलकः २२ लम्बकर्णः २३ गन्धपुष्पः २४ रोचनः २५ विघ्नान्तकेलगर्भः २६। अस्य गुणाः। कटुत्वं। स्निग्धत्वं। विषलूतादिदोषनाशित्वं। कफवायुहारित्वं। सूतशुद्धिकारित्वं। रेचकत्वञ्च॥ * ॥ तत्फलगुणाः। शीतलत्वं। स्वादुत्वं। श्लेष्मनाशित्वं। गुरुत्वं। बलकारित्वं। धातुपोषकत्वं। विरेचकत्वं। वातपित्तदाहक्षयदुष्टरक्तनाशित्वञ्च। इति राजनिर्घण्टः॥

अङ्कोलः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओलच्) अङ्कोठवृक्षः। आकोड़ यस्य प्रसिद्धिः। इत्यमरटीकायां स्वामी॥

अङ्कोलकः, पुं, (अङ्कोल+स्वार्थे कः) अङ्कोठवृक्षः। इति जटाधरः।

अङ्कोलिका, स्त्री, आलिङ्गनं। इति शब्दमाला॥

अङ्कोल्लसारः, पुं, (अङ्कोल्लस्य सारः षष्ठीतत्पुरुषः।) स्थावरविषप्रभेदः। इति हेमचन्द्रः॥

अङ्क्षः, पुं, (अङ्क्यते वाद्यते हरीतक्याकृतिर्वाद्यविशेषः यः। अङ्क+णत्।) हरीतक्याकृतिमृदङ्गः। पाखओयाज इति भाषा। इत्यमरः॥ तदुक्तं,—

"सार्द्धतालत्रयायामश्चतुर्द्व्यङ्गुलाननः।
हरीतक्याकृतिर्यः स्यादङ्क्षोऽङ्गे स हि वाद्यते॥

इति भरतः॥ (अपराधिविशेषाणां ललाटादिषु राज्ञा अङ्कनीयः। मनुः,—

"प्रायश्चित्तन्तु कुर्व्वाणाः सर्व्वे वर्णा यथोदितं।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसं"॥)

अङ्क्, त् क पदे। (अङ्क्यति चेष्टयति अङ्क+णिच् अच्।) लक्ष्मणि। इति कविकल्पद्रुमः॥ कण्ठ्यवर्गद्वितीयोपधः। पदं सङ्ज्ञासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च।

अर्थक्रियैव धातूनां कर्त्तव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु॥

इति बोपदेवः। अङ्क्यति अङ्कापयति, इति दुर्गादासः॥

अङ्ग

अङ्ग, य सम्बोधनं। इत्यमरः॥ (रामायणे,—
"अङ्गवेत्तस्य सौमित्रे कस्येमां मन्यसे चमूं"।
पुनरर्थः।)

अङ्गं, क्ली, शरीरादेरेकदेशः। आं इति हिन्दीभाषा। तत्पर्य्यायः। अवयवः २ प्रतीकः ३ अघनः ४। इत्यमरः॥ गात्रं। (भट्टारतिलके,—
"अङ्गानि चम्पकदलैः स विधाय धाता"।)
अप्रधानं। (साहित्यदर्पणे,—
"एक एव भवेदङ्गी भट्टारो वीर एव वा।
अङ्गमन्ये रसाः सर्व्वे कार्य्यनिर्वहणेऽद्भुतं"॥
उपायः। इति मेदिनी॥ (अङ्गते विषयो बुध्यते अनेन अङ्ग + करणे घञ् इति व्युत्पत्त्या) मनः। अङ्गं मनसि काये चेत्यभिधानान्तरदर्शनात्। यथा। "हिरण्यगर्भोऽङ्गसुवं मुनिं हरिरिति माघः"॥ वेदाङ्गशास्त्राणि षट्। यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षड़ेव तु"॥
शिक्षा १ कल्पः २ व्याकरणं ३ निरुक्तं ४ ज्योतिषं ५ छन्दः ६। इत्यमरः॥ अङ्गस्य लक्षणं यथा। तदीयप्रधानपलजनकव्यापारजनकत्वे सति तदीयप्रधानफलाजनकत्वं। इति तिथ्यादितत्त्वटीका॥

अङ्गः, पुं, खनामख्यातदेशः। इति हेमचन्द्रः॥ मेदिनीकारमते नित्यबहुवचनान्तशब्दोऽयं। देशविशेषः। यथा,—
"वैद्यनाथं समारभ्य सुवनेशान्तगं शिवे।
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यते॥
इति शक्तिसङ्गमतन्त्रे ७ पटलः॥ (अयञ्च देशः सरस्वाः सङ्गमे अवस्थितः, अत्र महादेवस्य ऊङ्कारेण कामस्य अङ्गत्यागात् अयं अङ्गनाम्ना ख्यातः। यथा रामायणे,—
"अनङ्ग इति विख्यातस्ततःप्रभृति राघव।
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह"॥

अङ्गः, त्रि, (अङ्गं विद्यतेऽस्य अङ्ग + अर्श आद्यच् तथा मेदिन्यां अङ्गं गात्रे प्रतीकोपाययोः पुं भूम्नि नीलति। क्लीवैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके इति मेदिनी।) अङ्गविशिष्टः। निकटः। इति मेदिनी॥

अङ्गग्रहः, पुं, (ग्रह + भावे अप्। अङ्गानां रोगादिना ग्रहः वेदना) गात्रवेदना। इति वैद्यकं॥

अङ्गजं, क्ली, (अङ्गे जायते अङ्ग + जन् + सप्तम्यां जनेर्डः इति पाणिनिसूत्रेण डः कर्त्तरि) रक्तं। इति मेदिनी॥ शरीरजे वाच्यलिङ्गं॥

अङ्गजः, पुं, पुत्रः। वेगः। कामः। मदः। इति विश्वमेदिन्यौ॥ मदस्थाने गदः। इति काचिन्मेदिनी॥ (स्त्रीणां यौवने सात्त्विकभावविशेषः। यथा साहित्यदर्पणे,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः॥

अङ्गजा, स्त्री, कन्या। अङ्गाज्जात इतस्तात् स्त्रियामाप्॥

अङ्गणं, क्ली, (अङ्गते गम्यते अत्र + अधिकरणे ल्युट् एषोदरादित्वात्साधुत्वम्) अङ्गनं। चत्वरं। इत्यमरटीकायां भरतः॥ (देवीमाहात्म्ये, विमानं हंससंयुक्तमेतत्तिष्ठतितेऽङ्गने।)

अङ्गतिः, पुं, (अङ्गते सेवायै गम्यते अग्नि + कर्म्मणि अति। ब्रह्मणि विष्णौ अग्नौ च।) ब्रह्मा। विष्णुः। अग्निः। अग्निहोत्री। इति शब्दरत्नावली॥ (अग्निहोत्रिपक्षे तु कर्त्तरि अति। अङ्गते गम्यते ऽनेन इति व्युत्पत्त्या वाहने।)

अङ्गदं, क्ली, (अङ्गं द्यति खण्डयति अङ्ग + दो + कः उपपदसमासः) केयूरं। ताड़ बाजू इत्यादि भाषा। इत्यमरः॥ (रामायणे,—
"धूयमानैश्च वासोभिः श्लक्ष्णैरङ्गदमूषणैः"।)

अङ्गदः, पुं, (अङ्गं द्यति शुद्धकाले अवखण्डयति अङ्ग + दो + कर्त्तरि कः) कपिभेदः। स च बालिनामवानरराजपुत्रः। इति मेदिनी॥ (रामायणे,—
"कुमदं पद्मदमभिर्जाम्बवन्तञ्च सप्तभिः।
अशीत्या बालिनः पुत्रमङ्गदं बिभिदे शरैः"॥

अङ्गदा, स्त्री, अङ्गं देहं ददाति खण्डयति या अङ्ग + दा + कर्त्तरि कः स्त्रियामाप्) दक्षिण दिग्हस्तिभार्य्या। इति मेदिनीकरहेमचन्द्रौ॥

अङ्गनं, क्ली, अङ्गनभूमिः। आङ्गन् उठान इति भाषा। तत्पर्य्यायः। चत्वरं २ अजिरं ३। इत्यमरः॥ अङ्गणं ४। इति तट्टीका॥ प्राङ्गणं। (रामायणे,—
"महाराजाङ्गनं शूराः प्रविशन्तु महोदयं"।)
५। यानं। गमनं। इति मेदिनी॥

अङ्गना, स्त्री, प्रशस्तानि अङ्गानि अस्या इति अङ्गात् कल्याण इति नः। कामिनी। सुन्दराङ्गी स्त्री। इति मेदिनी। (मनुः—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः"।)
सार्व्वभौमनाम्न उत्तरदिग्गजस्य पत्नी। इत्यमरः॥ कर्कटकन्यालक्षिकमकरमीनराशयः। इति ज्योतिषतत्त्वम्॥

अङ्गनाप्रियः, पुं, (अङ्गनानां प्रियः प्रीतिप्रदः। स्त्रियश्च अशोकपुष्पेण स्वीयमङ्गमलङ्कुर्व्वन्ति इति लोके प्रसिद्धिः। अङ्गनाया दक्षिणदिक्पत्न्याः प्रियः इतिव्युत्पत्त्या तत्स्वामिनि) अशोकवृक्षः। इति शब्दमाला॥

अङ्गपालिः, पुं, (अङ्गेन पाल्यते संरक्ष्यतेऽनेन अङ्ग + पा + अलिः) आलिङ्गनं। इति त्रिकाण्डशेषः॥ स्त्रियां ङीप् वेदिकाख्यगन्धद्रव्ये।)

अङ्गमर्द्दः, पुं, (अङ्गं मर्द्दयति यः अङ्ग + मर्द्द + कर्म्मण्यण् उपपदसमासः।) अङ्गमर्द्दनकारकभृत्यः। तत्पर्य्यायः। संवाहकः २। इति हेमचन्द्रः॥ अङ्गमर्द्दकः ३। इति त्रिकाण्डशेषः॥ अङ्गमर्द्दी ४। इति हलायुधः॥

अङ्गमर्द्दकः, पुं, (अङ्गस्य मर्द्दकः संवाहकः षष्ठीतत्।) अङ्गमर्द्दः। इति त्रिकाण्डशेषः॥

अङ्गमर्द्दी [न्] पुं, अङ्गं साधु मर्द्दयति संवाहयति यः अङ्ग + मर्द्द + णिनि।) अङ्गमर्द्दः। इति हलायुधः॥

अङ्गरक्षः, पुं, (रक्षं रक्षावर्णं अङ्गं यस्य स बहुव्रीहिः वाहितागन्यादिषु इति सूत्रेण परं पूर्व्वं वा निपात्यते।) वृक्षविशेषः। गुग्गारोचनी इति ख्यातः। तत्पर्य्यायः। पिकाक्षः २ रोचनी ३ लघुपत्रकः ४। इति शब्दचन्द्रिका॥ कम्बिलक्षः ५ कर्कशः ६ चन्द्रः ७ रक्ताङ्गः ८। इत्यमरः॥

अङ्गरक्षिणी, स्त्री, अङ्गं रक्षति पालयति या अङ्ग + रक्ष + णिनि।) अङ्गरक्षार्थं। साँजोया इति भाषा। तत्पर्य्यायः। जालिका २ जालप्राया ३ आयसी ४। इति हेमचन्द्रः॥

अङ्गरागः, पुं, रज्यतेऽङ्गमनेनेति रज्यतेऽनेन रञ्ज + करणे घञ् घञि च भावकरणयोरिति नलोपोऽदुपधत्वञ्च। अङ्गस्य रागः षष्ठीतत्पुरुषः।) गात्ररञ्जनं। अङ्गे चन्दनादिलेपनं। तत्पर्य्यायः। विलेपनं २। इति हेमचन्द्रः॥ (रामायणे,—
"स्नानानि चाङ्गरागांश्च माल्यानि विविधानि च"।)

अङ्गराट्, पुं, (अङ्गे तद्देशे राजते यः अङ्ग + राज् + क्विप् उपपदसमासः)। अङ्गदेशाधिपतिः। स च कर्णः। इति हेमचन्द्रः॥ (दशरथसखः लोमपादश्च रामायणे,—
"सखा तस्याङ्गराजेन भविष्यति महात्मनः।
कन्या चास्य महाभागा शान्ता नाम भविष्यति॥
अङ्गराजोऽपत्यलुब्धस्तु लोमपादो भविष्यति।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः"॥

अङ्गलोध्रः, पुं, (अङ्गेन अङ्गुल्यादिना लोध्रते छिद्यतेऽसौ लोढि + कर्म्मणि यत् अङ्गेन लोध्रः तृतीयातत् पुरुषः। अङ्गलोध्र इति पाठे अङ्गेन तद्वृक्षस्थितचिह्नविशेषेण लोध्रः अनुमेयः धातूनामनेकार्थत्वादत्र लोढिधातुरनुमानार्थः।) चिल्हाटकवृक्षं। इति रत्नमाला॥ अङ्गलोध्र इति च पाठः॥

अङ्गवः, पुं, अङ्गे खदेहे वाति अतिशुष्कत्वात् क्षीनमिव भवति अङ्ग + वा + कर्त्तरि कः। शुष्कफलं। इति शब्दचन्द्रिका॥

अङ्गविक्षतिः, पुं, (अङ्गानां विक्षतिर्व्विकारो यस्मात् बहुव्रीहिः।) अपस्मारोगः। इति राजनिर्घण्टः॥

अङ्गविक्षेपः, पुं, (वि + क्षिप् + भावे घञ्। अङ्गस्य विक्षेपः एकस्थानादन्यस्थाने चालनं षष्ठीतत्पुरुषः अङ्गहारोऽङ्गविक्षेप इत्यमरः।) अङ्गहारः। अङ्गचालनरूपनृत्यं। इत्यमरः॥

अङ्गवैक्षतं, क्ली, (विक्षति + प्रज्ञादिभ्यश्च इति स्वार्थे अण् अङ्गस्य वैक्षतम्) आकारः। इङ्गितं। इति जटाधरः

अङ्गसंस्कारः, पुं, (अङ्गस्य संस्कारः शोभा षष्ठीतत्। सम् + कृ + भावे घञ् संपर्य्युपेभ्यः इत्यादिना इति सुट्।) कुङ्कमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादिः, इति स्वामी॥ शरीरसंस्कारमात्रं। इत्यन्ये॥ स्वेदादिकृतदौर्गन्ध्यहरणाय चन्दनादिना उद्वर्त्तनानुलेपनादिः। इति सारसुन्दरी॥ तत्पर्य्यायः। परिकर्म्म २। इत्यमरः॥ प्रतिकर्म्म ३। इति क्वचित् पाठः॥

अङ्गहारः, पुं, (अङ्गानां हारः एकस्थानादन्यस्थाने

चालनं षष्ठीतत्पुरुषः।) अङ्कानां स्थानात् स्थानान्तरनयनं। तत्पर्य्यायः। अङ्कविक्षेपः २। इत्यमरः॥ अङ्कहारिः ३। इति तट्टीका॥ स्थिरहस्तपर्य्यस्तकादिको दार्ढिंग्रहप्रकारः। इति मधुः॥ वृश्चिकभ्रमरादिदार्ढिंग्रहरूपः। इति रायः। अङ्कुल्यादिविन्यासस्थिरंग्रहरूपः। इति कौमुदी॥

अङ्कहारिः, पुं, (अङ्कानि क्रियन्ते चाल्यन्तेऽत्र अङ्क + हृ + इञ् अजादिभ्यश्च इति पाणिनिसूत्रेण अधिकरणे इञ्। रङ्गभूमिः, नृत्यभूमिश्च।) अङ्कहारः। इति भरतधृतहडुचन्द्रः॥

अङ्कहीनः, त्रि, (अङ्केन हीनः रहितः ३तीया तत्पुरुषः। हा + कर्म्मणि क्तः।) अवयवरहितः। अङ्कहानिर्विग्रिष्टः। (यथा, याज्ञवल्क्यः,—
"कालकर्म्मात्मवीजानां दोषैर्भातुस्तथैव च।
गर्भस्य वैकृतं दृष्टमङ्कहीनादि जन्मतः॥)
अङ्कहीनं क्रियाहीनं विधिहीनञ्च यद्भवेत्"॥
इति स्मृतिः॥ कामदेवे पुंलिङ्गः॥

अङ्काधिपः, पुं, (अङ्कस्य देशविशेषस्य अधिपः षष्ठीतत्पुरुषः।) अङ्कदेशाधिपतिः। स च कर्णः। इति भूरिप्रयोगः॥

अङ्गारः, पुं, क्ली, (अगि + आरन् इदितो नुम्धातोरिति नुम्।) दग्धकाष्ठखण्डं। तत्तु निरग्नि साग्नि च। कयला आङ्गरा इति भाषा। तत्पर्य्यायः। अलातं २ उल्मुकं ३। इत्यमरः॥ आलातं ४ उल्मुकं ५। इति तट्टीका।
("घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्"।)
अङ्गारः, पुं, (रक्तं रक्तवर्णमङ्गं यस्य स बहुव्रीहिः पृषोदरादित्वात् साधुः) मङ्गलग्रहः। इति मेदिनी॥ हितावली। इति वैद्यकं॥

अङ्गारकः, पुं, (अङ्गार + स्वार्थे कः।) मङ्गलग्रहः इत्यमरः,—
("धरात्मजः कुजो भौमो भूमिजोभूमिनन्दनः।
अङ्गारको यमश्चैव सर्व्वरोगापहारकः"॥
इति वराहपुराणम्।) (रामायणे,—
"दिवीव ग्रहयोर्घोरं बुधाङ्गारकयोर्महत्।
कौशलानाञ्च नक्षत्रं ज्येष्ठा मैत्राग्निदैवतं।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे"॥)
अङ्गारः। कुशरटकवृक्षः। इति मेदिनी॥ भृङ्गराजः। इति राजनिर्घण्टः॥

अङ्गारतैलं, क्ली, (अङ्गारेण पक्वं तैलं शाकपार्थिवादित्वात् समासः। मध्यपदलोपश्च) खनामख्यातपक्वतैलं। तस्य पाकप्रकारो गुणश्च। यथा,—
"मूर्व्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी।
वृहती सैन्धवं कुष्ठं राला मांसी घृतावरी॥
आरनालाढ्यकेनैव तैलप्रस्थं विपाचयेत्।
तैलमङ्गारकं नाम सर्व्वज्वरविमोचनं"॥
इति सुखबोधः॥

अङ्गारकमणिः, पुं, (रक्तवर्णत्वादङ्गारकवत् मणिः अथवा अङ्गारकस्य मणिः षष्ठीतत्पुरुषः। माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्यादित्यादिना तत्कृतासुभप्रतिकाराय प्रवालदानोक्तेः तत्प्रियत्वं।) प्रवालः। इति राजनिर्घण्टः॥

अङ्गारकुष्ठकः, पुं, (अङ्गारवर्णं कुष्ठमिव कन्) हितावली। इति राजनिर्घण्टः॥

अङ्गारधानिका, स्त्री, (अङ्गाराणि धीयन्ते धार्य्यन्तेऽत्र धा + अधिकरणे ल्युट् स्त्रियां ङीप्। अङ्गाराणां धानी ततः स्वार्थे कः। पक्षे अङ्गारधानी।) अङ्गारधारणपात्रं। आङ्टा इति ख्याता। साँजाल इति केचित्। तत्पर्य्यायः। अङ्गारशकटी २ हसन्ती ३ हसनी ४। इत्यमरः॥

अङ्गारपरिपाचितं, क्ली, (अङ्गारेण परिपाच्यते परि + पच् + स्वार्थे णिच् ततः कर्म्मणि क्तः।) अङ्गारपक्वं। शूलविङ्गाङ्गारदग्धमांसं। कागाव इति ख्यातं। इति शब्दचन्द्रिका॥

अङ्गारपर्णः, पुं, (अङ्गारवत् पर्णं पत्रं यस्य स बहुव्रीहिः। वनभेदे। सोऽस्यास्ति ततः अर्शं आद्यच् तत्स्वामी) चित्ररथगन्धर्व्वः। इति महाभारतं॥

अङ्गारपुष्पः, पुं, (अङ्गारवत् रक्तवर्णं पुष्पं यस्य सः बहुव्रीहिः।) इङ्गुदीवृक्षः। जियापुता। इति ख्यातः। इति रत्नमाला॥

अङ्गारमञ्जी, स्त्री, (अङ्गारवत् रक्तवर्णा मञ्जी मञ्जरी यस्याः सा बहुव्रीहिः। समासान्तविधेरनित्यत्वात् कबभावः।) करञ्जविशेषः। इति शब्दरत्नावली॥ अस्य नामान्तरं अङ्गारमञ्जरी॥

अङ्गारवल्लरी, स्त्री, करञ्जविशेषः। इत्यमरः॥ भार्गी। गुञ्जा। इति राजनिर्घण्टः॥

अङ्गारवल्ली, स्त्री, (अङ्गारवत् रक्तवर्णा वल्ली कर्म्मधारयः। गुञ्जालता, स्वार्थे कन् अङ्गारवल्लिका।) महाकरञ्जः। भार्गी। इति राजनिर्घण्टः॥

अङ्गारशकटी, स्त्री, (शक्नोति वोढुं शकटं। शकट + स्त्रियां ङीप् अल्पार्थे शकटी। अङ्गारस्य शकटी षष्ठीतत्पुरुषः। आङ्टा इति भाषा। धुनाचो इति) अङ्गारधानिका। इत्यमरः॥

अङ्गारिः, स्त्री, (अङ्गारमस्या अस्ति अङ्गार + अत इन् ठनाविति ठन् तस्य इ कः पृषोदरादित्वात् कलोपः) अङ्गारधानिका। इति जटाधरः॥

अङ्गारिका, स्त्री, (अङ्गारवत् रक्तवर्णा अङ्गार + इवार्थे कन् स्त्रियां टाप्) इक्षुकाण्डं। पलाशकलिका। इति मेदिनी॥ (अङ्गारमस्या अस्ति अङ्गार + मत्वर्थे ठन् तस्य इ कः स्त्रियां टाप् इति व्युत्पत्त्या अङ्गारपाचम्।)

अङ्गारिणी, स्त्री, (अङ्गारमस्या अस्ति अङ्गार + मत्वर्थे इन् स्त्रियां ङीप्।) अङ्गारधानिका। भास्करत्यक्ता दिक्। (सूर्य्यत्यक्ततया अङ्गारवत् रक्तवर्णा दिक्।) इति मेदिनी॥

अङ्गारितं, क्ली, (अङ्गारमिवाचरति अङ्गार + क्विप् ततः क्तः।) पलाशकलिकोद्गमः। (अङ्गारं करोति अङ्गार + णिच् कर्म्मणि क्तः। मत्वर्थे इतच् वा दग्धप्रायकाष्ठं) दग्धे त्रि। इति विश्वः।

अङ्किका, स्त्री, कञ्चुकः। काँचली इति ख्याता। इति हेमचन्द्रः॥

अङ्गिरा, [स्] पुं, (अङ्गति ब्रह्मणो मुखान्निःसरति अगि गतौ + असुन् इरस् च) मुनिविशेषः। स च ब्रह्मणो मुखाज्जातः। तस्य भार्य्या कर्दममुनिकन्या श्रद्धा। पुत्राः उतथ्यः १ बृहस्पतिः २। कन्या सिनीवाली १ कुहूः २ राका ३ अनुमतिः ४। इति श्रीभागवतं॥

अङ्गी, [न्] त्रि, (अङ्गं विद्यतेऽस्य अङ्ग + मत्वर्थे इन्।) अङ्गविशिष्टः। अवयवी। यथा येनाङ्गेनाङ्गी विज्ञातो भण्यते तस्मादङ्गाच्च त्रि। इति मुग्धबोधटीकायां दुर्गादासः॥ प्रधानं। मुख्यः। यथा। "यद्यङ्गी स्यादसान्तरे"। इति ध्वनिकारः॥

अङ्गीकारः, पुं, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ + घञ्) स्वीकारः। तत्पर्य्यायः। सम्बित् २ आगूः ३ प्रतिज्ञानं ४ नियमः ५ आश्रवः ६ संश्रवः ७ अभ्युपगमः ८ समाधिः ९ प्रतिश्रवः १०। इत्यमरः॥

अङ्गीकृतं, त्रि, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ + कर्म्मणि क्तः) स्वीकृतं तस्य पर्य्यायः। ऊरीकृतं २ उररीकृतं ३ आश्रुतं ४ प्रतिज्ञातं ५ संगीर्णं ६ विदितं ७ संश्रुतं ८ समाहितं ९ उपश्रुतं १० उपगतं ११ प्रतिश्रुतं १२ अभ्युपगतं १३। इत्यमरः॥

अङ्गुरिः, स्त्री, (अगि गतौ + उ णिच् रलयोरेकत्वस्मरणात् लस्य रत्वम्) पाणिपादाङ्गुली। इत्युणादिकोषः॥

अङ्गुरिः, स्त्री, (अङ्ग + उणिच् पक्षे ङीप्) अङ्गुली। इत्यमरटीका॥

अङ्गुरीयः, पुं, क्ली, (अङ्गुरेरिदं तत्र भवं वा अङ्गुरि + ङः तस्य ईयः) अङ्गुलीयकं। आङ्टी इति भाषा। अङ्गुलौ भवं अङ्गुलीयं मनोषादित्वात् लस्य रः। इति भरतः॥ (यथा रामायणे,—
"ददौ चास्य तदा प्रीतः स्वनामाङ्कमभिचिह्नितं।
अङ्गुरीयमभिज्ञानं राजपुत्र्याः परन्तपः"॥)

अङ्गुरीयकं, क्ली, पुं, (स्वार्थे कः) अङ्गुलीयकं। इत्यमरटीकायां मुकुटादयः॥ रामायणे,—
"रामनामाङ्कितञ्चेदं प्रगृह्याङ्गुरीयकं"।

अङ्गुलः पुं, (अङ्ग + उन् अङ्गौ हस्ते लीयते अङ्ग + ली + डः) हेमचन्द्रः॥ अङ्गुली॥ इत्यमरटीकायां रमानाथः॥ अवयवपरिमाणं। इत्यमरटीकायां वाचस्पतिः॥ (अष्टसंख्यकयवोदरपरिमाणे यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्य्योक्तेः नः।) (यथा रामायणे,—
"न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरं"।)

अङ्गुलिः, स्त्री, (अङ्ग + उलिच्) करशाखा। आङ्गुल इति भाषा। (यथा मनुः,—
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः"।)
गजकर्णिका। हस्तिसुखाग्रभागः। इति हेमचन्द्रः॥ अङ्गुष्ठः। इत्युणादिकोषः॥

अङ्गुलितोरणं क्ली, (अङ्गुलेः तोरणं बहिर्द्वारमिव षष्ठीतत्पुरुषः) चन्दनादिद्वारा ललाटे कृतोर्द्धचन्द्रः। इति हारावली॥

अङ्गुलिमुद्रा, स्त्री, (अङ्गुलेः मुद्रं लक्षणया धारयितुर्ईषं राति ददाति या अङ्गुलिमुद्+रा+कर्त्तरि कः) साक्षरोर्म्मिका। प्रभुनाम्ना खनाम्ना वा अङ्कितमङ्गुरीयकं। छापेर आङ्गुटी मोहरखोदा आङ्गुटी इति भाषा। इत्यमरः॥

अङ्गुलिमुद्रिका, स्त्री, (अङ्गुलिमुद्रा+स्वार्थे कः) अङ्गुलिमुद्रा। इत्यमरटीकायां रमानाथः॥

अङ्गुलिमोटनं, क्ली, (अङ्गुल्योर्म्मोटनं मर्द्दनं यस्मिन् तत् बहुव्रीहिः) अङ्गुलिद्वयमर्द्दनजातशब्दः। आङ्गुलमट्कान इति भाषा। तत्पर्य्यायः। पुच्छटी २। इति चिकाण्डशेषः॥ खच्छटी ३ अङ्गुलिसन्देशः ४। इति हारावली॥ मुच्छुटी ५। इति जटाधरः॥ मुच्छुटीतु मुष्टिपर्य्याये हेमचन्द्रेण लिखिता।

अङ्गुलिसन्देशः, पुं, (अङ्गुल्या अङ्गुलिध्वनिना सन्देशः मोटनं षष्ठीतत्पुरुषः सम्+दिश्+भावे घञ्) अङ्गुलिमोटनं। इति हारावली॥

अङ्गुली, स्त्री, (अङ्ग+उलिच् स्त्रियां वा ङीप् पक्षे अङ्गुलिः) शरीरावयवविशेषः। आङ्गुल इति भाषा। (रामायणे,—
"कनिष्ठायामप्यङ्गुल्यां भ्रातुर्मम स राक्षसः॥
ज्वालाङ्गुलीभिर्भगवान् विरुरुचः स ऊताशनः"॥)
तत्पर्य्यायः। करशाखा २। इत्यमरः॥ (अङ्गुलिः ३ अङ्गुरिः ४ अङ्गुरी ५ अङ्गुलः ६।) इति तट्टीका॥ सा क्रमेण पञ्चधा, यथा—अङ्गुष्ठः १ तर्ज्जनी २ मध्यमा ३ अनामिका ४ कनिष्ठा ५ इत्यमरजटाधरौ॥ हस्तियुग्डाग्रं। इति मेदिनी॥

अङ्गुलीकः, पुं, क्ली, (अङ्गुल्यां कायते निधीयतेऽसौ अङ्गुली+कै+धञर्थे कन्भेदे कः) अङ्गुलीयकं। इति चिकाण्डशेषः॥

अङ्गुलीपञ्चकं, क्ली, (पञ्चानामङ्गुलीनां समाहारः द्विगुसमासः राजदन्तादित्वात् पञ्चशब्दस्य परनिपातः) हस्तस्य पञ्चाङ्गुलानि यथा,—अङ्गुष्ठः १ प्रदेशिनी २ मध्यमा ३ अनामिका ४ कनिष्ठिका ५। इति राजनिर्घण्टः॥

अङ्गुलीयः, पुं, क्ली, (अङ्गुल्या अयं तत्र भवो वा अङ्गुली+छ तस्येयः) अङ्गुलीयकं। इत्यमरटीका॥

अङ्गुलीयकं, क्ली पुं, (अङ्गुलीय+स्वार्थे कः) अङ्गुलिभूषणं। आङ्गुटी इति भाषा। तत्पर्य्यायः। ऊर्म्मिका २। इत्यमरः॥ अङ्गुरीयकं ३ अङ्गुरीयः ४ अङ्गुलीयः ५। इति तट्टीका॥ करारोटः ६ अङ्गुलीकः ७। इति चिकाण्डशेषः॥ पुंसि प्रमाणं। अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुलीयकः। इति भट्टिः॥

अङ्गुलीसम्भूतः, पुं, (अङ्गुल्यां सम्भूतः जातः सप्तमीतत्पुरुषः) नखः। इति राजनिर्घण्टः॥

अङ्गुष्ठः, पुं, (अङ्गौ हस्ते मुख्यत्वेन तिष्ठति यः अङ्गु+कर्त्तरि कः अस्मास्वगोभू इत्यादिना घत्वम्) वृद्धाङ्गुलिः। इत्यमरः। बुड़ो आङ्गुल इति भाषा। (मनुः,—
"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते"।)

अङ्गुषः, पुं, (अङ्गति गच्छति अगि+ऊषन्) नकुलः। बाघः। इत्युणादिकोषः॥

अङ्घः, [स्] क्ली, (अङ्घ्यते दुर्गतिं गच्छत्यनेन अघि+सर्व्वधातुभ्योऽसुन् इति असुन्) अंहः। पापं। इत्युणादिकोषः॥ (सूर्य्यशतके,—
"विदधतु भृगवः प्रीग्रमङ्घोर्विघातं"।)

अङ्घ्रिः, पुं, (अङ्घ्यते गच्छत्यनेन अघि+करणे रिः) पादः। (सूर्य्यशतके,—"ग्रीर्णाघ्राणाङ्घ्रिपाणीन्"।) वृक्षमूलं। इति चिकाण्डशेषः॥

अङ्घ्रिनाम, [न्] क्ली, (अङ्घ्रिरूपेण नमते जलाद्याकर्षणेन कल्पते यत् अङ्घ्रि+नम्+अन् णिच्) वृक्षमूलं। इति हेमचन्द्रः॥

अङ्घ्रिनामकः, पुं, (अङ्घ्रिनाम+स्वार्थे कः) वृक्षमूलं। इत्यमरः॥

अङ्घ्रिपः, पुं, (अङ्घ्रिणा पिबति अङ्घ्रि+पा+ड) वृक्षः। इति हेमचन्द्रः॥

अङ्घ्रिपर्णी, स्त्री, (अङ्घ्रिवत् पर्णं पत्रं यस्याः सा बहुव्रीहिः स्त्रियां ङीप्) एरण्डपर्णी। चाकुलिया इति ख्याता। इत्यमरटीकायां रमानाथः॥

अङ्घ्रिवल्लिका, स्त्री, (अङ्घ्रिवत् वल्लिः उपमितिकर्म्मधारयः। स्वार्थे कः) चिरपर्णीवृक्षः। चाकुलिया इति भाषा। इत्यमरः॥ अस्या रूपान्तरं अङ्घ्रिवल्लिः अङ्घ्रिवल्ली॥

अच इ पूजायां। इति कविकल्पद्रुमः॥ इ अञ्चते। अञ्चु गतिपूजनयोरिति पूजार्थो यः स एवायं। इदित् पाठः पूजायां रूढोपाभावात्। उदनुबन्धाभावश्च क्षुधवसपजार्थाश्चेत्यादिना क्त्वाप्रत्ययस्य निष्ठायाश्च नित्येम्बिधानात्। इति दुर्गादासः॥

अच इ अ गतौ। क्षिप्तौ। इति कविकल्पद्रुमः॥ इ अञ्चते। अ अञ्चति अञ्चते। इति दुर्गादासः॥

अच उ अ गतौ क्षिप्तौ। इति कविकल्पद्रुमः॥ अचति अचते। उ अचित्वा (उदितो वा इतीड़भावपक्षे) अक्त्वा। क्षिप्तौ क्षिरश्चक्षब्दः। इति दुर्गादासः॥

अचण्डी, स्त्री, (चडि कोपने पचाद्यच् इदित्त्वात् नुम् स्त्रियां ङीप् न चण्डी नञ्समासः) सुशीला गौः। शान्त गाइ इति भाषा। तत्पर्य्यायः सुकरा २। इत्यमरः॥ अकोपना स्त्री॥

अचलः, पुं, (चलति यः चल्+पचाद्यच् न चलः नञ्समासः) पर्व्वतः। (रामायणे,—
"आससाद ततो रामः स्थितं शैलमिवाचलं"।)
कीलकः। इति मेदिनी॥ अकम्पे त्रि॥ (स्थिरः, स्थिरः। यदुक्तं,—
"न स्वरूपात् न सामर्थ्यात्
नच भावादिकात् गुणात्।
चलनं विद्यते यस्ये-
त्यचलः कीर्त्तितोऽच्युतः"॥
अविकारी, कूटस्थः)।

अचलकीला, स्त्री, (अचलः सुमेरुपर्व्वतः कीलः स्तम्भस्वरूपो यस्याः सा बहुव्रीहिः। कीलो लेशे द्वयोः स्तम्भ इति मेदिनी) पृथिवी। इति शब्दरत्नावली॥

अचलस्थित्, [ष्] पुं, (अचला स्थिरा स्थित् यस्य सः बहुव्रीहिः) कोकिलः। इति शब्दचन्द्रिका॥

अचलभ्राता, [भ्रातृ] पुं, बौद्धगणाधिपविशेषः। स तु शैवजैनाचार्य्यस्य एकादशशिष्यान्तर्गतः। इति हेमचन्द्रः॥

अचला, स्त्री, (न चला नञ्समासः) पृथिवी। इति मेदिनी॥ यथा रामायणे,—
"पृथिवीमपि कामं तं ससागरवनाचलां"।

अचिरद्युतिः, स्त्री, (अचिरा क्षणस्थायिनी द्युतिः कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति चिकाण्डशेषः॥

अचिरप्रभा, स्त्री, (अचिरा क्षणस्थायिनी प्रभा कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हेमचन्द्रः॥

अचिररोचिः, [स्] स्त्री, (अचिरा रोचिः कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति जटाधरः॥

अचिरा, स्त्री, (अर्चिं ज्ञानोपदेशं राति ददाति या अर्चि+रा+कर्त्तरि क उपपदसमासः अच्+भावे इक्) अर्हतां मातृविशेषः। इति हेमचन्द्रः॥

अचिरांशुः, स्त्री, (अचिराः क्षणस्थायिनः अंशवः किरणा प्रभाः यस्याः सा बहुव्रीहिः।) विद्युत्। इति हलायुधः॥ अचिरात् व्य अचिरं। शीघ्रं। अविलम्बं। यथा,—
"अचिरादुपकर्त्तुराचरे-
दथवात्मौपयिकीमुपक्रियां"।
इति नैषधं॥

अचिरामा, स्त्री, (अचिरा क्षणस्थायिनी आभा दीप्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हारावली॥

अचेतनः, त्रि, (नास्ति चेतना ज्ञानं यस्य स बहुव्रीहिः) चेतनारहितः। चैतन्यशून्यः। अज्ञानः। यथा,—
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु"।
इति मेघदूतकाव्यं॥ सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनं। इति चरकः॥

अचैतन्यं, क्ली, (न चैतन्यं चेतना नञ्तत्पुरुषः) निश्चेतना। चेतनाभावः। अज्ञानं। यथा,—
"अचैतन्यमिदं विश्वं चैतन्यं देवमेव यत्।
न जानन्त्यपि शास्त्रज्ञा भ्रमन्त्येव हि केवलं"॥
इति चैतन्यचन्द्रामृतं॥ तद्वति त्रि॥

अच्छं, व्य, (न च्छति सम्मुखत्वात् दृष्टिं नाटयतीति न छो+धञर्थे कः नञ्तत्पुरुषः) आभिमुख्यं। साम्मुख्यं। इति मेदिनी॥

अच्छः, त्रि, (न च्छति निर्म्मलत्वात् दृष्टिं नाटयतीति नञ्+छो+कर्त्तरि कः उपपदसमासः) स्वच्छः। निर्म्मलः। इत्यमरः॥ (अमरशतके, अच्छकपोलमूलगलितैः)।

अच्छः, पुं, (न च्छति निर्म्मलत्वात् दृष्टिं नाटयतीति न+छो+कर्त्तरि कः उपपदसमासः) स्फटिकः। भालूकः। इति मेदिनी॥

अच्छभल्लः, पुं, (अच्छा निर्म्मलाः भल्लाः शस्त्राणीव नखा यस्य सः बहुव्रीहिः यथा—मेदिन्यां भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः) भालूकः। इत्यमरः। तट्टीकाकारमते अच्छो भल्लश्चेति शब्दद्वयमपि ॥

अच्छा, स्त्री,(अविद्यमुच्छायते आच्छाद्यतेऽनया,च्छो + करणे अङ्। अस्य विष्णोः छा आच्छादनं षष्ठी-तत्पुरुषः। अकारो वासुदेवः स्यादित्येकाक्षरीय-कोषे।) विष्णोराच्छादन। इति मुग्धबोधव्याकरणं॥

अच्छिद्रं, त्रि, (नास्ति छिद्रं यत्र बहुव्रीहिः) छिद्र-रहितं। दोषाभावविशिष्टं। यथा शातातप-पराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति द्विजदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निहोमफलैः समं"॥

इति श्राद्धतत्त्वं॥

अपि च। वशिष्ठः।

"ततः शान्तिं प्रकुर्व्वीत अवधारणवाचनं"।

अवधारणं अच्छिद्रावधारणं। इति तिथ्यादि-तत्त्वं॥ तद्वाक्यं यथा,—अद्यामुके मासि अमुक-पक्षे अमुकतिथौ मत्कृतैतदमुककर्म्माच्छिद्रमस्तु॥

अच्छिन्न, त्रि, (छिद + कर्म्मणि क्तः न छिन्नं नञ्-समासः) छेदरहितं। अकर्त्तितं। यथा गर्गः,—

"श्रुत्वा पुत्रस्य वै जन्म कृत्वा वेदोदिता क्रियाः।
अच्छिन्ननालं पश्येत्तं दत्त्वा रुक्मं फलान्वितं"॥

इति शुद्धितत्त्वं॥

अपि च। शङ्खः।

"अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः"॥

अच्छिन्नसंशयः फलोपायेतिकर्त्तव्यतासु निश्चय-शून्यः। इति प्रायश्चित्ततत्त्वं॥

अच्युतः, पुं, (न च्यवते स्वरूपतो न गच्छति यः नित्य इति यावत्। च्यु + कर्त्तरि क्तः न च्युतः नञ्-समासः। पीताम्बरोऽच्युतः शार्ङ्गीत्यमरः) विष्णुः। इत्यमरः॥ (यथा कुमारसम्भवे,—तत्रावतीर्य्या-च्युतदत्तहस्तः।) स्थिरे त्रि॥ सोऽन्यवेलायामेत-त्त्रयं प्रतिपद्येताच्छितमस्यच्युतमसि प्राणसंशित-मसीति छान्दोग्योपनिषत्।

अच्युताग्रजः, पुं, (अच्युतस्य अग्रजः) बलरामः। इत्य-मरः॥ इन्द्रः। इति हेमचन्द्रः॥

अच्युतावासः, पुं, (ओप्यते वासः क्रियतेऽत्र आ + वस् + अधिकरणे घञ् यद्वा अच्युतस्य आवासः। 'अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः' इति भगवद्गीतायाम्।) अश्वत्थवृक्षः।

इति राजनिर्घण्टः॥

अज क्षेपे। गतौ। इति कविकल्पद्रुमः॥ अजति। इति दुर्गादासः॥

अज इक भासि (अजि दीप्तौ चुरा इदित्वान्नुम्।) इति कविकल्पद्रुमः॥ इक अञ्जयति। भासि दीप्तौ। इति दुर्गादासः॥

अजः, पुं, (न जायते नोत्पद्यते यः नञ् + जन् + अन्ये-ष्वपि दृश्यत इति कर्त्तरि डः उपपदसमासः।)

("न हि जातो न जायेऽहं न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः"॥

इति भारते।

"योमामजमनादिञ्च वेत्ति लोकमहेश्वरम्"।

इति भगवद्गीतायाम्।) ब्रह्मा। विष्णुः। शिवः। कामदेवः। सूर्य्यवंशीयराजविशेषः। स च रघु-राजपुत्रः दशरथपिता च। मेषः। इति ज्यो-तिषं॥ माञ्जिकधातुः। इति हेमचन्द्रः॥ जन्म-रहिते वाच्यलिङ्गः। छागः। इति मेदिनी॥ तत्-परीक्षा। यथा,—

"नक्षत्राणां विभेदेन नराणान्तु गणत्रयं।
तेषां शुभाय निर्द्दिष्टं पशुवस्त्रत्रयं बलौ॥
ये क्षणाः शुचयश्छागाः पशवोऽन्ये तथैव च।
देवजातिभिरुत्पन्नास्ते सर्व्वार्थोपसिद्धये॥
ये पीता हरिता वापि नरजातेरुदीरिताः।
ये शुक्लाश्च महान्तो वा रक्तोजातेः शुभप्रदाः॥
यो मोहादथवाज्ञानादबलिमन्यं प्रयच्छति।
बध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत्"॥

इति युक्तिकल्पतरुः॥

अजकर्णः, पुं, (अजस्य छागस्य कर्णवत् पत्रं यस्य सः) असनवृक्षः। इति रत्नमाला॥ यथा वैद्यके।

("अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्"॥)

अजकर्णकः, पुं, (अजकर्णः + स्वार्थे कः) सालवृक्षः। इति राजनिर्घण्टः॥

अजकवः, पुं, क्ली, (अजो विष्णुश्च कः ब्रह्मा च द्वन्द्वः तौ वाति शिवः त्रिपुरासुरवधे प्रीणयत्यनेन अज क + वा + करणे कः।) "कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितं" इत्येकाक्षरीयकोषे) शिव-धनुः। इति त्रिकाण्डशेषः॥

अजकावः, पुं, क्ली, शिवधनुः। इति त्रिकाण्डशेषः॥

अजगन्धा, स्त्री, (अजस्य गन्धवत् गन्धो यस्याः सा) वनयवानी। तत्पर्य्यायः। अजमोदा २। खराश्वा ३ कारवी ४। इति रत्नमाला॥ उग्रगन्धा ५। इत्य मरः॥ वृक्षविशेषः। ववरी इति हिन्दीभाषा॥ इति मदनविनोदः॥ तिलौञ्जि इति राजनिर्घण्टः॥ तत्पर्य्यायः। वस्तगन्धा २ खरपुष्पा ३ अवि-गन्धिका ४ उग्रगन्धा ५ ब्रह्मगर्भा ६ ब्राह्मी ७ भूति-मयूरिका ८। अस्या गुणाः। कटुत्वं। उष्णत्वं। वातगुल्मोदररोगवर्णव्रणार्त्तिशूलनाशित्वं। पीता चेदङ्गने हिता। इति राजनिर्घण्टः॥

अजगन्धिका, स्त्री, (अजस्य गन्धः षष्ठीतत्पुरुषः तद्वत् गन्धोऽस्यास्ति अजगन्ध + मत्वर्थे ठन् ठस्येक इति ठस्य इकः) वर्व्वरीवृक्षः। इत्यमरः॥ बावरि इति भाषा।

अजगन्धिनी, स्त्री, (अजगन्धोऽस्यास्ति अजगन्ध + मत्वर्थे इन् स्त्रियां ङीप्) अजशृङ्गीवृक्षः। इति रत्नमाला॥

अजगरः, पुं, (अजं गिरति ग्रसते यः गॄ + पचाद्यच् अजस्य गरः षष्ठी तत्पुरुषः) स्थानमख्यातवृहत्-सर्पः। तत्पर्य्यायः। भुजगः २ वाहसः ३। इत्यमरः॥

अजगवं, क्ली, (अजयोर्विष्णुब्रह्मणोर्गं त्रिपुरासुरवधे गीतं षष्ठी तत्पुरुषः। तादृशं गीतं वाति सम्बध्नाति यत् अजग + वा + कर्त्तरि क उपपद-समासः। "गश्च गीतश्च गौश्चैव गूश्च धेनुः सरस्वती" इत्येकाक्षरीयकोषे) पिनाकः। शिवधनुः। इत्य-मरः॥ तस्य रूपान्तरं। अजकवं। अजकावं। अजोकवं। अजगावं॥

अजगावं, क्ली, (अजयोर्व्विष्णुब्रह्मणोर्गं गीतं षष्ठी तत्पुरुषः। तादृशं गीतमवति सम्पादयति यत् अजग + अव + कर्म्मण्यण् उपपदसमासः) शिव-धनुः। इति शब्दमाला॥

अजजीविकः, पुं, (अजः जीविका जीवनोपायो यस्य सः) अजाजीवी। छागपालकः। तत्पर्य्यायः। जावालः २। इति हेमचन्द्रः॥

अजटा, स्त्री, (नास्ति जटा यस्याः सा) भूम्यामलकी इति राजनिर्घण्टः॥ तस्या रूपान्तरं। अजड़ा। अज्झटा॥

अजड़ा,स्त्री,(अजड़ां जाड्याभावं सम्पादयति या अज-ड़ा + करोत्यर्थे णिच् ततः पचाद्यच्) कपिकच्छुः। आलकुशी इति भाषा॥ इति राजनिर्घण्टः॥

अजथ्या, स्त्री, (अजानां समूहः अज + थ्यन् स्त्रियां टाप् अजसमूहः। तद्वानावर्त्तनात्) स्वर्ण-यूथिका। इति दीक्षितः॥

अजदण्डी, स्त्री, (अजस्य ब्रह्मणो यज्ञाय दण्डः काष्ठ-मस्याःसा स्त्रियां ङीप्। ब्रह्मदण्डीवृक्षकाष्ठेनयज्ञ-विधानात्) ब्रह्मदण्डीवृक्षः इति राजनिर्घण्टः॥

अजनकः,त्रि,(न जनकः नोत्पादकः नञ्समासः। जन-यति जन् + णिच् ण्वुल्) अनुत्पादकः। अजन्मदः। अस्रष्टा। अकारकः॥

अजननिः, पुं, (न + जन् + आक्रोशे नञ्यनिरिति सूत्रेण निन्दायां भावे अनिः। तस्याजननिरेवास्तु जननीक्लेशकारिण इति प्रसिद्धप्रयोगोऽप्यस्ति) जन्मराहित्यं। उत्पत्त्यभावः। अकरणिः। ह्रासः। यथा। अजननिरस्तु तस्य। इत्यमरटीकायां रायमुकुटः॥

अजन्यं, क्ली, (न जन्यते सम्पाद्यते केनापि न + जन् णिच् यत्) उत्पातः। शुभाशुभसूचकभूकम्पादिः। इत्यमरः॥ अजननीये त्रि॥

अजपः, पुं,(अप्रशस्तं जपति पठति यः। जप् + पचा-द्यच् न जपः नञ्समासः।) असदध्येता। कुपाठकः। इति हेमचन्द्रः॥ (अजं पाति रक्षति यः + अज + पा + कर्त्तरि क उपपदसमासः) छागपालकः। यथा,—

"ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने"।

इति चरकः॥

अजपा, स्त्री, (न जप्यते नोच्चार्य्यतेऽसौ अपितु श्वास-

प्रश्वासयोर्गमनागमनाभ्यां सम्पाद्यते जप् + घञ् अर्थे कः स्त्रियां टाप् नञपा नञ्समासः।) हंसमन्त्रः। यथा,—
"वियदर्द्धेन्दुललितस्तदादिसर्गसंयुतः।
अजपाख्यो मनुः प्रोक्तो ह्यक्षरः सुरपादपः"॥*॥
अस्य देवताऽर्द्धनारीश्वरमूर्त्तिः। यथा,—
"उद्यद्भानुस्फुरिततडिदाकारमूर्द्ध्वाम्बिकेशं
पाशाभीतिं वरदपरमुं संदधानं कराब्जैः
दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु नश्चन्द्रचूड़ं त्रिनेत्रं"॥
इति तन्त्रसारः॥*॥ स्वाभाविकनिःश्वासप्रश्वासरूपेण जीवजप्यहंसमन्त्रः।
तथाच दक्षिणामूर्त्तिसंहितायां।
"अथ वक्ष्ये महेशानि प्रत्यहं प्रजपेन्नरः।
मोहबन्धं न जानाति मोक्षस्तस्य न विद्यते॥
श्रीगुरोः कृपया देवि ज्ञायते जप्यते यदा।
उच्छ्वासनिःश्वासतया तदा बन्धक्षयो भवेत्॥
उच्छ्वासैरेव निःश्वासैर्हंस इत्यक्षरद्वयं।
तस्मात् प्राणस्य हंसाख्य आत्माकारेण संस्थितः॥
नाभेरुच्छ्वासनिःश्वासात् हृदयाग्रे व्यवस्थितः।
षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता॥
षष्टिनाड्या ह्यहोरात्रं जपसंख्याक्रमो मतः।
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि॥
जपते प्रत्यहं प्राणी सच्चिदानन्दमयीं परां।
उत्पत्तिर्जपमारम्भो मृत्युस्तत्र निवेदनं॥
विना जपेन देवेशि जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी"॥
अन्यत्रापि।
"षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिं।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्व्वदा"॥*॥
सन्ध्यावन्दनहीना। इति महाभारतं॥

अजभक्षः, पुं, (अजानां भक्षः खाद्यः षष्ठीतत्पुरुषः। भक्ष + कर्म्मणि घञ्।) वर्व्वूरवृक्षः। इति राजनिर्घण्टः॥

अजमीढः, पुं, (अजः छागः यज्ञे मीढः सिक्तो यत्र सः तद्देशाधिपः अजमीढ + अण् संज्ञापूर्व्वकवृद्धेरनित्यत्वात् वृद्धभावः।) राजा युधिष्ठिरः। इति त्रिकाण्डशेषः॥

अजमोदा, स्त्री, (अजानां खाद्यतया मोदो हर्षो यस्याः सा अजानां मोदो गन्ध इव गन्धो यस्याः सा) यवानिका। तत्पर्य्यायः। उग्रगन्धा २ ब्रह्मदर्भा ३ यवानिका ४॥ इत्यमरः। यमानी द्विविधा।
एका श्वेतयमानी सा अजमोदेत्येव ख्याता। अपरा यमानीत्येव ख्याता। अविशेषात् द्वयोरपीति भरतः॥ केचित्तु अजमोदादिदं वनयमान्याः। ब्रह्मदर्भादिदं यमान्यामित्याहुः। उग्रगन्धाऽजमोदाख्या स्मृतश्वेतयमानिकेति। यमानी दीपको दीप्यो भूतिकश्च यमानिकेति च रत्नमाला॥ इति भरतः॥*॥ वैद्यके तु वनयमानी इति ख्याता। तत्पर्य्यायः। खराह्वा २ वक्रमोदा ३ मर्कटी ४ मोदा ५ गन्धदला ६ हस्तिकारवी ७ गन्धपत्रिका ८ मायूरी ९ अग्निमोदा १० मोदाख्या ११ वह्निदीपिका १२ ब्रह्मकोशी १३ विशाखी १४ हयगन्धा १५ उग्रगन्धिका १६ मोदिनी १७ फलमुख्या १८ विप्रख्या १९। अस्या गुणाः। कटुत्वं। उष्णत्वं। रूक्षत्वं। रुचिकारित्वं। कफवायुशूलाध्मानारुचिजठरामयनाशित्वञ्च। इति राजनिर्घण्टः॥ यमानी। यथा,—
"अजमोदा खराश्वा च मयूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तकः॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या दृष्या बलकरी लघुः॥
नेत्रामयक्षमिच्छर्द्दिहिध्मवस्तिरुजो हरेत्"॥*॥
अथ खुरासानीयवानीनामगुणाः।
"पारसीययवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रूक्षा ग्राहिणी मादिनी गुरुः"॥
इति भावप्रकाशः॥

अजमोदिका, स्त्री, (अजं मोदयति हर्षयति या। मुद + णिच् ण्वुल् स्त्रियां टाप्। अजस्य मोदिका षष्ठीतत्पुरुषः) यवानी। इति वैद्यकं॥

अजम्भः, पुं, (न सन्ति जम्भा दन्ता यस्य सः) (सूर्य्ये च) भेकः। इति शब्दरत्नावली॥ न सन्ति जम्भा दन्ता अस्य॥

अजयः, पुं, (जि + भावे अच् न जयः नञ्समासः।) पराजयः। यथा,—
"सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ"।
इति भगवद्गीता॥ राढ़देशप्रसिद्धनदविशेषः॥

अजया, स्त्री, (न जीयते पराजीयतेऽसौ जि + कर्म्मणि अच् स्त्रियां टाप् न जया नञ्समासः।) विजया। भाङ्ग सिद्धि इति ख्याता। इति राजनिर्घण्टः॥

अजय्य, त्रि, (जेतुमशक्यं जि + कर्म्मणि "ऋज्यजय्यौ शक्यार्थे इति यत्" न जय्यं नञ्समासः।) जेतुमशक्यं। अजेयं। इति मुग्धबोधव्याकरणं॥ (यथा रघुवंशे,—"राज्ञामजय्योऽजनि पुण्डरीकः"।)

अजरः, त्रि, (जॄ + भावे अच् गुणः स्त्रियां टाप्, नास्ति जरा जीर्णावस्था यस्य सः) जरारहितः। वार्द्धक्यशून्यः। यथा,—
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्"।
इति हितोपदेशः॥

अजरा, स्त्री, (नास्ति जरा यस्याः सा।) जीर्णपल्लीलता। क्षुद्रदारकप्रभेदः। यष्टिकन्या। घृतकुमारीति ख्याता। इति राजनिर्घण्टः॥

अजर्य्यं, क्ली, (न जीर्य्यति जॄ + कर्त्तरि अजर्य्यं सङ्गतमिति सूत्रेण यत्। तेन सङ्गतमार्य्येण रामाजर्य्यं द्रुतमिति भट्टिः) सङ्गतं। सौहार्दं। इति हेमचन्द्रः॥ अजरार्हे त्रि॥ (यथा रघुवंशे,—
"मृगराजस्य जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध"।

अजलम्भनं, क्ली, (अज इव लभ्यते छाग्यवर्षत्वात् आयतेऽसौ लभ + कर्म्मणि ल्युट्) खोतोद्भवं। इति शब्दचन्द्रिका॥

अजलोमा, [न] पुं, (अजस्य लोमेव लोम मञ्जरी यस्य सः) वृक्षविशेषः। गुयाग्निषा। गूयाग्निम्बी इति च भाषा। तत्पर्य्यायः। अग्निखी २ केशी ३ महाकक्षा ४ अग्रपर्णी ५। इति रत्नमाला॥

अजवृक्षी, स्त्री, (अजस्य छागस्य वृक्षमिव वृक्षं यस्याः सा स्त्रियां ङीप्) वृक्षविशेषः। गाड़रग्निङ्गी मेढ़ाग्निङ्गी। इति ख्याता। तत्पर्य्यायः। विषाणी २। इत्यमरः॥ विषाणिका ३ चक्रश्रेणी ४ अजगन्धिनी ५ मौर्व्वी ६ नेत्रौषधी ७ आवर्त्तिनी ८। इति रत्नमाला॥ मेषवृक्षी ९ वर्त्तिका १० सर्पदंष्ट्रिका ११ चक्षुष्या १२ तिक्तदुग्धा १३ कृष्णवृक्षी १४ कर्णिका १५। अस्या गुणाः। कटुत्वं तिक्तत्वं। कफवायूशूलश्वासहृद्रोगविषरोगकासकुष्ठनाशित्वं। चक्षुर्हितकारित्वञ्च॥ तत्फलस्य गुणाः। तिक्तत्वं। उष्णत्वं। कटुत्वं कफवायुनाशित्वं। जठरानलरुचिकारित्वं। हृद्यत्वं। लवणाक्षारसत्वञ्च। इति राजनिर्घण्टः॥ (यथा सुश्रुते,—
"अजगन्धाश्वगन्धा च काला सरलया सह।
एकैषिकाजवृक्षी च प्रलेपः श्लेष्मशोथहृत्"॥

अजस्रं, क्ली, (नञ् + जस् + नमिकम्पिस्मजसइत्यादिना रक् नञ्समासः) निरन्तरं। सततं। इत्यमरः॥ (यथा रघुवंशे, "अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे"।)

अजहल्लक्षार्था, स्त्री, (न जहत् न त्यजन् स्वार्थं यां वृत्तिं यदा न जहती स्वार्थं या लक्षणा सा।) लक्षणाख्यवृत्तिविशेषः। उपादानलक्षणा। स्वीयार्थात्यागिनी लक्षणा। यथा। कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिपुरुषे लक्षणा इत्यलङ्कारशास्त्रं॥

अजहल्लिङ्गः, पुं, (न जहत् लिङ्गं यं शब्दं यदा न जहत् लिङ्गं यः शब्दः इति।) विशेषणभूतोऽपि स्वलिङ्गात्यागी शब्दः। इति व्याकरणं॥

अजहा, स्त्री, (न जहाति परित्यजति शुक्लान्, अनुपसर्गाल्लिम्पविन्दधारिपारि वेदेजिचेति सातिसाहिभ्यश्च इति पाणिनिसूत्रेण चकारस्य अनुक्तसमुच्चयार्थात् घः हित्वं नञ्तत्, स्त्रियां टाप्) शूकशिम्बी। इत्यमरटीकायां स्वामी॥ अत्यल्पे त्रि॥

अजा, स्त्री, (न जायते नोत्पद्यते अपि तु उत्पद्यते न + जन् + कर्त्तरि ड नञ् समासः। अच नञ्शब्दः शिरःस्खलने। आद्याशक्तिपक्षे नञ्निषेधार्थः, अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम् अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोग्यामजोऽन्यः"—इति श्वेताश्वतरोपनिषद्॥) ओषधिभेदः। (यथा सुश्रुते,—
"अजा महौषधी ज्ञेया शुक्लकुन्देन्दुपाण्डुरा"।)

अजागरः, पुं, (न जागरयति सेवनेन लोकान् निद्रापयति यः, जागृ + णिच् जागोऽविचिण्णल्ङित्सु इति

नोऽडित्सु इति गुणः ततः पचाद्यच् नञ्समासः।) भृङ्गराजवृक्षः। इति शब्दरत्नावली॥ जागरण-रहिते त्रि॥

अजाजी, स्त्री, (अजेन वीयते अत्युत्कटगन्धतया त्यज्यतेऽसौ अज्+इञ् अजादिभ्यश्च इति कर्म्मणि इञ्। अजेन व्याजिः क्षतीया तत्। स्त्रियां वाङीष्) श्वेतजीरकः। कृष्णजीरकः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

अजाजीवः, पुं, (अजेन अजव्यवसायेन आजीवति सम्यक् प्राणान् धारयति यः, आ+जीव+घञ् अजेन आजीवः क्षतीयातत्पुरुषः) जावालः। छागोपजीवी। इत्यमरः॥

अजातः, त्रि, (जन्+कर्त्तरि क्तः न जातः नञ्समासः।) अजन्मविशिष्टः। अनुत्पन्नः। यथा। अजातपक्षा इव मातरं खगाः। इति श्रीभागवतं॥ (यथा दायभागे,—

"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपोविगर्हितः"॥)

अजातशत्रुः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति हेमचन्द्रः॥ (यथा महाभारते,—

"अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत्"।)
(शिवः। काशीपुत्रः। शमीकपुत्रः।)(यथा हरिवंशे,

"श्यामपुत्रः शमीकस्तु शमीको राज्यमावहत्।
जुगुप्समानो भोजत्वाद्राजसूयमवाप सः।
अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः"॥)
(बिम्बिसारपुत्रः स च शाक्यमुनिसमकालीनः॥)

अजातारिः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः अरिः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति भूरिप्रयोगः॥

अजातौल्वलिः, पुं, (अजया उपजीवी तौल्वलिः मुनिविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च। तुल्वलस्यापत्यं तुल्वल+अत इञिति इञ्) अजोपजीविमुनिविशेषः। इति मध्यपदलोपिकर्म्मधारयसमासे सुपद्मव्याकरणं॥ तुल्वलस्यापत्यं तौल्वलिः अजोपजीवी चासौ तौल्वलिश्चेति। इति तट्टीका॥

अजादनी, स्त्री, (अजेन क्षयधर्म्मयते भक्ष्यतेऽसौ अद्+कर्म्मणि ल्युट् स्त्रियां ङीप् अजस्य अदनी खाद्या षष्ठीतत्पुरुषः) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

अजानेयः, पुं, (अजवत् शिवस्यवत् यथास्थानमारोहिणं नयति प्रापयति। आ+नी+क्षयल्युटो बहुलमिति सूत्रेण कर्त्तरि यत्। अजश्छागे हरिब्रह्मधातुस्मरहरे रवे इति मेदिनी) उत्तमघोटकः। तत्पर्य्यायः। हयोत्तमः २ वाताश्वजात्यः ३। इति त्रिकाण्डशेषः॥ अजानेयः ४ कुलीनः ५। इत्यमरः॥ निर्भये त्रि। इति त्रिकाण्डशेषः॥

अजान्त्री, स्त्री, (अजस्य अन्त्रमिव देहबन्धनमिव अन्त्रं तदाकारमञ्जरी यस्याः सा षिद्गौरादिभ्यश्च इति ङीष्) वृक्षविशेषः। नीलवर्णवोना इति भाषा तत्पर्य्यायः। नीलवृक्षा २ नीलपुष्पी ३ अतिलोमशा ४ नीलिनी ५ छगलान्त्री ६ अन्तःकोटरपुष्पी ७। इति रत्नमाला॥ वस्तान्त्री। वृद्धदारकः। इति राजनिर्घण्टः॥

अजापालकः, त्रि, (अजानां पालकः रक्षकः षष्ठीतत्पुरुषः) अजाजीवी। छागरक्षकः। इति शब्दरत्नावली॥

अजितं, त्रि, (न जितं न पराजितं नञ्समासः। जि+कर्म्मणि क्तः) अनिर्जितं। इति हेमचन्द्रः॥ अतिपराजितश्च॥

अजितः, पुं, (न जितः न केनापि पराजित ऐश्वर्य्येण। "वेधाः शार्ङ्गोऽजितः क्षेमो धृवः शुङ्गधर्मणोऽच्युत" इति सहस्रनाम पर्य्याये।) विष्णुः। बुद्धः। तीर्थङ्कर्जैनविशेषः। इति हेमचन्द्रः॥ शिवः। इति तस्य सहस्रनाममध्ये पठितः॥

अजिनं, क्ली, (अजति धूल्यादि आदत्तेऽति यत् अज्+कर्त्तरि इनन् बाहुलकात् अजेर्व्यत्ययश्च पोश्च इति नवी आदेशः) (अजाजिनं शोणितविन्दुवर्षि चेति कुमारसम्भवे) चर्म्म। ब्रह्मचार्य्यादिधार्य्यक्षय्यासारादित्वक्। इत्यमरः॥ जिनभिन्ने वाच्यलिङ्गं।

अजिनपत्रा, स्त्री, (अजिनं चर्म्म पत्रं पक्षो यस्याः सा) चर्म्मचटिका। चामचिका इति ख्याता। तत्पर्य्यायः। जतुका २। इत्यमरः॥ जतुका ३। इति तट्टीका।

अजीनपत्री, स्त्री, (अजीनं चर्म्म पत्रं यस्याः सा गौरादित्वात् ङीष्) जतुका। इति राजनिर्घण्टः॥

अजिनयोनिः, पुं, (अजिनानां चर्म्मणां योनिः आकरः षष्ठीतत्पुरुषः। योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे इति मेदिनी) हरिणः। इत्यमरः॥

अजिरं, क्ली, (अजति गच्छन्ति यत्र अज+अधिकरणे किरच्। उठान इति भाषा। अजति गच्छति यः इति वायुः। अजति गच्छति क्षणभङ्गुरमिति यावत् इति शरीरं। अजन्ति इन्द्रियाणि गच्छन्त्यत्र इति व्युत्पत्त्या विषयः।) चत्वरं। (यथा विष्णुपुराणे,—

"पुनश्च भरतस्याभूदाश्रमस्थोटजाजिरे"।)
वायुः। शरीरं। मण्डूकः। विषयः। इति मेदिनी॥

अजिह्मं, त्रि, (जिहि वक्रतायां जिहि+मक् न जिह्मं नञ्समासः) अवक्रं। सरलं। इत्यमरः॥ भेके पुं। इति शब्दरत्नावली॥ (यथा मनुः,—

"अजिह्मामशठां शुद्धां जीवेद् ब्राह्मणजीविकां"।)

अजिह्मगः, पुं, (अजिह्मं सरलं गच्छति यः अजिह्म+गम्+डः उपपदसमासः) बाणः। इत्यमरः॥ अवक्रगे वाच्यलिङ्गः॥ (यथा रामायणे,—

"ते तस्य कायं निर्भिद्य रक्तपुङ्खा अजिह्मगाः।
निष्पेतुर्लोहितादिग्धा रक्ता इव महोरगाः॥
न ह्यभिद्यं तयोर्गात्रे बभूवांगुलमन्तरं।
नानिर्भिन्नं न चाभ्यक्तमपि सूक्ष्मजिह्मगैः"॥)

अजिह्मः, पुं, (नास्ति जिह्मा यस्य सः) भेकः। इति त्रिकाण्डशेषः॥ जिह्मारहिते त्रि॥

अजीर्णं, क्ली, (जॄ+क्तः, नञ्जीर्णं नञ्समासः) अपाकः। तत्पर्य्यायः। वायुगुल्मः २ अन्तर्वमिः ३ पलताप्रयः ४। इति त्रिकाण्डशेषः॥ अथाजीर्णस्य विप्रकृष्टं निदानमाह। अत्यम्बुपानादिषमाशनाच्च सन्धारणात् स्वप्नविपर्य्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥ सन्धारणात् क्षुद्गातमूत्रपुरीषादीनां। स्वप्नविपर्य्ययात् दिवाशयनाद्रात्रौ जागरणात्। लघु चापीत्यपिशब्दात् स्निग्धोष्णादिगुणयुक्तमपि॥*॥ अन्यच्च।

"ईर्षाभयक्रोधपरिप्लुतेन
लुब्धेन रुग्दैन्यनिपीडितेन।
प्रद्वेषयुक्तेन च सेव्यमान-
मन्नं न सम्यक् परिपाकमेति"॥

परिप्लुतेन व्याप्तेन। उक्तकारणेभ्योऽतिमात्रभोजनं विशेषादजीर्णस्य कारणमजीर्णञ्च बहुव्याधीनां कारणमित्याह।

"अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि"॥

अनात्मवन्तः अबुद्धिमन्तः। रोगानीकस्य विसूच्यादेः। मूलं कारणं॥*॥ अन्यच्च।

"प्रायेणाहारवैषम्यादजीर्णं जायते नृणां।
तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति"॥

तद्विनाशाद्विनश्यति अजीर्णविनाशात् विनश्यति रोगसंघात इत्यर्थः। यदा तत् अजीर्णं आशात् भक्षणात् विना भक्षणाभावे विनश्यति निवर्त्तते इत्यर्थः॥*॥ अजीर्णस्य सामान्यस्य लक्षणमाह।

"ग्लानिर्गौरवमाटोपो भ्रमो मारुतमूढ़ता।
विबन्धोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्षणं"॥

मारुतमूढ़ता वायोरवरोधः। विबन्धः मलाप्रवृत्तिः॥*॥ सन्निपातकारणैः सहितानजीर्णस्य भेदानाह।

"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः"।

त्रिभिरित्येकशो न तु मिलितैः।

"अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः"॥

केचित् सुश्रुतादयः। रसशेषतः भुक्तस्य पक्वस्य सारभूतो यो द्रवः स रसः सोऽपि पच्यते। भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्वः स रसशेषः तस्मात् चतुर्थमजीर्णं मन्वामाजीर्णं॥*॥ मन्वामाजीर्णादिरसशेषस्य को भेद उच्यते। आमं मधुरतागतमपक्वं अन्नमेव। रसशेषस्तु भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्व इति भेदः। अजीर्णं पञ्चमं केचित् निर्द्दोषं दिनपाकि च। निर्द्दोषं गौरवभ्रमशूलादिदोषाजनकं। दिनपाकि च आहारोऽहोरात्रेण पाकं यातीति स्वभावः। यत्तु मात्राकालसात्म्यादिदोषाद्दिनान्तरे पाकं याति तद्दिनपाकि। अतएव यामसंख्ये न भोक्तव्यमिति वचनं,—

वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं"।

प्राकृतं अविकारकं। प्रतिवासरं प्रतिदिनभावि। मुक्तं यावन्मात्रं तावदजीर्णमित्यर्थः। एतदभिधानस्य प्रयोजनं पाक्यार्थं यामषट्कंप्रयन-

प्रियशब्दादिसेवनादिकं। न चाऽऽहारस्य निषेधः। प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥*॥ आमाजीर्णस्य लक्षणमाह,—

"तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः।
उद्गारस्य यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

गुरुता उदराङ्गयोः। उत्क्लेशः उपस्थितं वमनमिव। अक्षिकूटोऽक्षिपुटकः। अविदग्धः अनस्रो निर्गन्धश्च ॥*॥ विदग्धाजीर्णस्य लक्षणमाह,—

"विदग्धे भ्रमदग्धमूर्च्छापित्तास्य विविधा रुजः।
उद्गारस्य सधूमास्लः खेदो दाहश्च जायते" ॥

विविधा रुजः शौथचोषदाहादयः ॥*॥ विष्टब्धाजीर्णस्य लक्षणमाह,—

"विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः।
मलवातापवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनं" ॥

वातवेदनाः तोदभेदादयः॥ स्तम्भो गात्राणां। मोहो मूर्च्छा ॥*॥ रसशेषाजीर्णस्य लक्षणमाह,

"रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे" ॥*॥

एतस्य उपद्रवानाह,—

"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः।
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः" ॥*॥

अतिग्रथितेभ्यः आमाद्यजीर्णेभ्यो विसूच्यादिरोगानाह,—

"आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितं।
विसूचलसकौ तस्माद्भवेचापि विलम्बिका" ॥

नात्र यथासङ्ख्यं तदा विष्टब्धाद्विलम्बिका भवितुमर्हति। सा च कफवाताभ्यां भवतीत्येकैकतोऽजीर्णादिसूच्यादित्रयोत्पत्तिः ॥*॥ विसूच्यादिनिरुक्तिमाह,—

"सूचीभिरिव गात्राणि तुदन्त्यस्यतेऽनिलः।
यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते" ॥*॥

विसूच्या निदानमाह,—

"न तां परिमिताहारा लभन्ते विदितागमाः।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः" ॥

विदितागमाः ज्ञाताऽऽयुर्वेदाः ॥*॥ विसूच्या लक्षणमाह,—

"मूर्च्छातिसारोवमथूः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः" ॥

उद्वेष्टनं हस्तपादयोः। शिरसो भेदः शिरःशूलं॥ विसूच्या उपद्रवानाह,—

"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः" ॥

अमी उपद्रवा घोरा अमी निद्रानाशादयः उपद्रवाः सर्वेषामेव रोगाणां घोरा भयङ्कराः। विसूच्याः पञ्च दारुणा विसूच्यास्तु पञ्चापि यदि सुखदा दारुणाः प्राणभयङ्कराः ॥*॥ अलसकलक्षणमाह,—

"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्चो निरोधश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे दक्षोद्गारौ च यस्य तु" ॥

आनह्यते आध्मायते। प्रताम्येत् ग्लायति। परिकूजति आर्त्तनादं करोति। कुक्षौ अजीर्णेन निरुद्धो मारुतः उपरि धावति हृदयकण्ठादिकं गच्छतीत्यर्थः। काश्यपस्त्वाह,—

"नाधो याति न चाप्यूर्द्धमाहारो न च पच्यते।
कोष्ठे स्थितोऽलसीभूतस्तत्तोऽसावलसः स्मृतः" ॥

विसूचलसयोररिष्टमाह,—

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः
कृष्णेक्षणोऽभ्यन्तरयातनेत्रः।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय" ॥

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥*॥ विलम्बिकाया लक्षणमाह,—

"दुष्टश्च भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्धमधश्च यत्र।
विलम्बिकां तां भृशदुश्चिकित्सा-
माचक्षते शास्त्रविदः पुराणाः" ॥

भृशदुश्चिकित्सां प्रत्याख्यायोपचरणीयम्। इयमसाध्यैवेति जेज्जटः ॥*॥ जीर्णस्याहारस्य लक्षणमाह,—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितं।
लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं" ॥*॥

अथ चिकित्सा,—

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यां त्वचीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चो विबन्धेषु च नित्यमद्यात्॥
श्लोणं दन्ती चित्रचित्रं कृष्णामूलं विचूर्णितं
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनं।
श्लोणीदावर्त्तशूलघ्नं ग्रीहपाण्डुामयापहं॥

सर्व्वचूर्णसमो गुडो देयः। केचित्तु द्विगुणं गुडं दत्त्वा गुटिकां कुर्व्वन्ति। रेचकोऽयं योगः। गुडाष्टकम् ॥*॥ दहनाजमोदसैन्धवनागरमरिचानि चाक्षतक्रोण। सप्ताहादग्निकरं पायङ्गर्शोनाशनं परमं ॥ औषधमित्यथाहार्य्यं,—

"तत्रामे वमनं कार्य्यं विदग्धे लङ्घनं हितं।
विष्टब्धे स्वेदनं शस्तं रसशेषे शृतीत च ॥
वचा लवणतोयेन वान्तिरामे प्रशस्यते ॥
कणादिकल्कं वा पीत्वा वान्तिरामे प्रशस्यते"
इत्यनेनान्वयः ॥*॥

"धान्यनागरसिद्धं वा तोयं दद्यादिचक्षणः।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥
भवेद् यदि प्रातरजीर्णशङ्का
तदाभयां नागरसैन्धवाभ्यां।
विचूर्णितां शीतजलेन भुक्ता
भुक्तामशङ्को मितमन्नकाले ॥
विदह्यते यस्य तु भुक्तमात्रं
दंदह्यते हृच्च गलश्च यस्य।
द्राक्षां सितामाक्षिकसम्प्रयुक्तां
लिह्याभयां चातिसुखं लभेत ॥
त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठरेऽग्निं वातरोगांश्च हन्ति" ॥

अजमोदात्र यवानी। अन्तःसंमार्ज्जकत्वात्। जीरके द्वे शुक्लं कृष्णञ्च। धरणमत्र मानं। तेन समधरणं धृतानां तुल्यमानं गृहीतानां शुण्ठ्यादीनां भागाः सप्त। तृतीयो भागो हिङ्गुनः। हिङ्ग्वष्टकम् ॥*॥

"शुद्धं सूतं गन्धकञ्च पलमानं पृथक् पृथक्।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं।
चतुष्पला च विजया मर्द्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि घर्म्ममध्ये पुनः पुनः।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्धृदयेदपि।
अजीर्णारिः ॥*॥

"द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च।
सूक्ष्मैलापत्रकं भार्गी क्षमित्रं हिङ्गु पौष्करं॥
शुटी दार्व्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा।
वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥
अम्लवेतसमस्लीका यवानी देवदारु च।
अभयातिविषा श्यामा हपुषारग्वधं समं ॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः।
क्षाराणि लौहकिट्टञ्च तत्रं गोमूत्रसेचितं ॥
सूक्ष्मचूर्णानि कृत्वा तु समभागानि कारयेत्।
मातुलुङ्गरसेनैतद्भावयेद्दिवसत्रयं ॥
दिनत्रयन्तु शुक्लेन तथार्द्रकरसेन च।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं ॥
उपयुक्तं विधानेन नाशयत्यचिराद्गदान्।
अजीर्णमथ गुल्मांश्च ग्रीहानं गुदजानि च॥
उदराण्यन्तर्द्विद्रधिञ्च अर्शोलां वातशोणितं।
प्रसुदत्यन्ननान्दोषान्नरमग्निं प्रदीपयेत्॥

द्वौ क्षारौ सर्ज्जिका यवक्षारश्च। लवणानि पञ्च। वृक्षाम्लं विषाम्बिल इति लोके। श्रेयसी हरीतकी। उपकुञ्चिका मगरैला। अम्लवेतसाभावे शुक्लं दातव्यं। श्यामा सातुः। मुष्ककः मोच इति लोके। कोकिलाक्षः कोइलखा इति लोके। वृद्धदारुमुखचूर्णं ॥*॥

"क्षुद्रार्कचित्रकैरण्डवरुणं सपुनर्नवं।
तिलापामार्गकदलीपलाशं तिन्तिडी तथा ॥
गृहीत्वा ज्वालयेदेतत् प्रस्थं भस्माखिलञ्च तत्।
जलाढके विपक्तव्यं यावत् पादावशेषितं ॥
सुप्रसन्नं विनिःस्राव्य लवणप्रस्थसंयुतं।
पक्वं विधूमकठिनं सूक्ष्मचूर्णीकृतं पुनः ॥
यवानीजीरकव्योषस्थूलजीरकहिङ्गुभिः।

एषगर्दभलैरेभिश्चूर्णितैस्तत् विमिश्रयेत् ॥
आर्द्रकस्य रसेनापि भावयेच्छोषयेत् पुनः ।
शीतोदकेन तच्चूर्णं पिबेत् प्रातर्हि मात्रया ॥
तस्मिन् जीर्णेऽन्नमश्नीयादयुषैर्जाङ्गलजै रसैः ।
दूषदस्लैः सलवणैः सुखोष्णैर्वह्निदीपनैः ॥
एतेनाग्निर्विवर्द्धेत बलमारोग्यमेव च ।
तत्रानुपानं शस्तं हि तक्रं वा भोजनं हितं ॥
मन्दाग्नयर्शोविकारेषु वातश्लेष्मामयेषु च ।
सर्व्वाङ्गशोथरोगेषु शूलगुल्मोदरेषु च ॥
अश्मर्य्यां शर्करायाञ्च विन्मूत्रानिलरोगिषु ।
वज्रवानरक्षारः ॥ * ॥
"सामुद्रं लवणं ग्राह्यमथकर्षमितं बुधैः ।
सौवर्च्चलं पञ्चकर्षं विड्सैन्धवधान्यकं ॥
पिप्पली पिप्पलीमूलं पञ्चकं कृष्णाजीरकं ।
तालीशं केशरं चव्यमस्तवेतसकं तथा ॥
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ।
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकं ॥
दाड़िमं स्याच्चतुःकर्षं त्वगेले चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधं ॥
भक्षयेच्छाणमानं तत्तक्रमस्तुकाक्षिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयं ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरं ।
शूलं शोथं श्वासकासावामदोषञ्च हृद्रुजं ॥
अश्मरीं शर्करायापि पाण्डुरोगं कृमीनपि ।
मन्दाग्निं नोऽयेदेतद्दीपनं पाचनं परं ॥
हिताय सर्व्वलोकानां भास्करेणैतदीरितं ।
हन्यात् सर्व्वान्यजीर्णानि भुक्तमात्रमसंशयं ॥
निम्बु रसादिकं दत्त्वा गुटिकामप्यकेकुर्व्वन्ति"॥
अथ दाड़िमस्य बीजानां चूर्णं कर्षचतुष्टयमितं देयं । भास्करलवणचूर्णं ॥*॥ सैन्धवं समूलमगधा चव्यानलनागरं पथ्या । क्रमवृद्धि मग्निवृद्धौ वड़वानलनामचूर्णं स्यात् ॥ वड़वानलचूर्णं ॥ * ॥ पथ्यानागरकृष्णाकरञ्जविल्वाग्निभिः सितातुल्यैः । वड़वानल इव जरयति बज्रगुर्व्वपि भोजनं चूर्णं द्वितीयं वड़वानलचूर्णं ॥ * ॥
"एलात्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता ।
मरिचं पिप्पली शुण्ठी चतुःपञ्च षडुत्तरं ॥
द्रव्याण्येतानि यावन्ति तावती सितशर्करा ।
चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं" ॥
समशर्करचूर्णं ॥ * ॥
"इन्द्रासनं सप्तपलं त्रिफलायाः पलत्रयं ।
पलत्रयं त्र्यूषणस्य सितायाश्च चतुःपलं ॥
त्रपुता घृतपुची च तथा कृष्णापराजिता ।
त्रासां चूर्णं समादाय पलमात्रं पृथक् पृथक् ॥
भावयेदेकतः सर्व्वं भृङ्गराजरसेन तु ।
स्वभाविकमिदं चूर्णं स्निग्धभाण्डे विनिक्षिपेत् ॥
विलिहन् मधुसर्पिर्भ्यां मन्दाग्निः सहसा नरः ।
मुच्यते ग्रहणीरोगात् गुदरोगात् सजाठरात् ॥
मेहं कुष्ठञ्च वीसर्पवातरोगान् सशोणितान् ।
न चात्र परिहारोऽस्ति भोजनं सर्व्वकामिकं ॥
रोगानीकप्रशान्त्यर्थं मुनिभिः परिकीर्त्तितं ।
अस्याभ्यासात् बलं वीर्य्यं पुष्टिर्दृष्टिश्च जायते ॥
त्रिसप्ताहप्रयोगेण जायते नात्र संशयः ।
ज्वालामुखीचूर्णं ॥ * ॥ अथ अजीर्णे रसाः,—
"द्विपलं गन्धकं शुद्धं पलमेकन्तु पारदं ।
मृतं लोहं तथा ताम्रं कर्षद्वयमितं पृथक् ॥
संचूर्ण्य सर्व्वं संमिश्र द्रावयित्वाग्नियोगतः ।
सम्यग्द्रुतं समस्तं तत्त्वाङ्कुलदले क्षिपेत् ॥
पुनः संचूर्ण्य तत्सर्व्वं लोहपात्रे निधाय च ।
जम्बीरस्य रसं तत्र पूतं पलशतं क्षिपेत् ॥
चुल्ल्यां निवेश्य तत्पात्रात् मृदुना वह्निना पचेत् ।
रसे तस्मिन् घनीभूते तत्संशोष्य विचूर्णयेत् ॥
पञ्चकोलकषायस्य चुक्रेण सहितस्य च ।
भावनास्तत्र दातव्याः पञ्चाशत्संख्यया मुनैः ॥
भृष्टटङ्गचूर्णेन तुल्येन सह मेलयेत् ।
मरिचेनापि तुल्येन तदर्द्धेन विड़ेन च ॥
भावयेत् सप्तकृत्वस्तच्चणकाम्लजलेन च ।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत् ॥
रसः क्रयादनामायं भैरवानन्दयोगिना ।
उक्तः सिंहलराजाय बज्रमांसाग्निने पुरा ॥
भक्षयेद्भोजनस्यान्ते मात्रयमितं रसं ।
भक्षयित्वा रसं पश्चात् पिबेत्तक्रं ससैन्धवं ॥
अतीवगुरु यद्भुक्तमतिमात्रमथापि वा ।
तत्सर्व्वं जीर्य्यति क्षिप्रं रसस्यैतस्य भक्षणात् ॥
शूलं गुल्मञ्च विष्टम्भं प्लीहानमुदरं तथा ।
रसः क्रयादनामायं विनिहन्ति न संशयः"
क्रयादो रसोऽजीर्णे ॥ * ॥ रसेन्द्रचिन्तामणौ रसरत्नप्रदीपे रसप्रदीपे च ॥
"क्षारत्रयं सूतगन्धौ पञ्चकोलमिदं शुभं ।
सर्व्वैस्तुल्या त्रया भृष्टा तदर्द्धा शिग्रुजा जटा ॥
एतत् सर्व्वं त्रयाश्रिग्रुवह्निमार्क्षवजैर्द्रवैः ।
भावयेत्तिदिनं धर्म्मे ततो लघुपुटे क्षिपेत् ॥
सप्तधार्द्रद्रवैर्भृष्टो रसो ज्वालानलो भवेत् ।
निष्कोऽस्य मधुना लीढ़ोऽनुपानं गुड़नागरं ॥
हन्त्यजीर्णमतीसारं ग्रहणीमग्निमार्द्दवं ।
श्लेष्महृल्लासवमनमालस्यमरुचिं श्वात्" ॥
पञ्चकोलं,—
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं । त्रयाश्च विजया । मार्क्षवो भृङ्गराजः । लघुपुटे गजपुटे । आर्द्रमार्द्रकं । निष्कः टङ्कः । ज्वालानलो रसोऽजीर्णे ॥ * ॥ रसप्रदीपे,—
"टङ्कणं रसगन्धौ च समं भागत्रयं विधात् ।
कपर्दः खर्ज्जिकाक्षारौ मागधी विश्वभेषजं ॥
पृथक् पृथक् कर्षमात्रं वसुभागमिहोषणं ।
जम्बीरास्त्रैर्दिनं घृष्टं भवेदग्निकुमारकः ॥
विसूचीशूलवातादिवह्निमान्द्यप्रशान्तये" ।
क्षारोयवक्षारः । अग्निकुमारो रसो विसूच्याद्यजीर्णे ॥* ॥ रसेन्द्रचिन्तामणौ,—
"शुद्धसूतं गन्धकञ्च पलमानं पृथक् पृथक् ।
हरीतकी च त्रिफला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं ।
चतुष्पला च विजया मर्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि धर्म्ममध्ये पुनः पुनः ।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्देवयेदपि ।
अजीर्णारिः ॥ * ॥
"पारदाम्रतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितं ।
तच्च जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितं ॥
वह्निमान्द्यदग्धवनाक्षग्नेः
रामबाण इति विश्रुतो रसः ।
सङ्ग्रहग्रहणि कुम्भकर्णक-
मामवातखरदूषणं जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः ॥
पारा भाग १ विष भाग १ लवङ्ग भाग १ गन्धक भाग १ मरिच भाग ८ जायफल भाग २। रामबाणरसोऽजीर्णे ॥ * ॥
रसेन्द्रचिन्तामणौ,—
"पलं चित्राक्षारः पलपरिमितं पञ्चलवणं त्रयं सम्यक्पिष्टं भवति लघु निम्बुफलरसैः । ततस्तानं तस्मिन् पलपरिमितं शुद्धशुकलं क्षिपेदारान् सप्त द्रवति तदनेनैव विधिना ॥ पलप्रमाण कटुकत्रयञ्च पलार्द्धमानेन च हिङ्गुभागः । विषं पलद्वादशभागयुक्तं तावान्सो गन्धक एव चोक्तः—
"बदराक्षिप्रमाणेन वटीमेतस्य कारयेत् ।
भक्षयेत् सर्व्वदा सा स्यात् सर्व्वागीर्ष्वप्रशान्तये ॥
सर्व्वोदरेषु शूलेषु विसूच्यां विविधेषु च ।
अग्निमान्द्येषु गुल्मेषु सदा शुक्लवटी हिता" ॥
शुक्लवटी अजीर्णे ॥ * ॥ रसप्रदीपे,—
"खुरकाक्षिचित्रापामार्गरम्भातिलपलाशजान् ।
जवखारान् भिषगादद्यात् प्रत्येकं पलमात्रया ॥
लवणानि पृथक् पञ्च ग्राह्याणि पलमात्रया ।
खर्ज्जिका च यवक्षारश्चूर्णं चितयं पलं ॥
सर्व्वं त्रयोदशपलं सूक्ष्मचूर्णं विधाय तु ।
निम्बूफलरसे प्रस्थसंमिते तत् परिक्षिपेत् ॥
तत्र शुद्धस्य शुकलं पलं वह्नौ प्रताप्य तु ।
वारान्निर्व्वापयेत् सप्त सर्व्वं द्रवति तद्यथा ॥
नागरं त्रिपलं ग्राह्यं मरिचञ्च पलद्वयं ।
पिप्पली पलमाना स्यात् पलार्द्धं भृष्टहिङ्गुनः ॥
यवानिकं चित्रकं चापि यवानी जीरकं तथा ।
जातीफलं लवङ्गञ्च पृथक् कर्षद्वयोन्मितं ॥
रसोगन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि सर्व्वं संचूर्ण्य मिश्रयेत् ।
शरावार्द्धेन चुक्रेण संनीय वटिकाश्चरेत् ॥
माषप्रमाणां सा वैद्यैर्दृष्टशुक्लवटी स्मृता ॥
सर्व्वाजीर्णप्रशमनी सर्व्वशूलनिवारिणी ।
विसूच्यलसकादीनां सद्यो भवति नाशिनी" ॥
दृष्टशुक्लवटिका अजीर्णे ॥ * ॥
"टङ्गणकणाम्लतानां सहिङ्गुलानां समभागाः ।
मरिचस्य भागयुगलं निम्बुनीरैर्वटी कार्य्या ॥
वटिकां कलायसदृशीमेकां वा समश्नीयात् ।

अजीर्ण

सत्वरमजीर्णघ्ने वह्नेर्दीप्ते कफभस्मनि" ॥
अजीर्णकण्टको रसः ॥ *॥
"जलपीतमपामार्गमूलं हन्यादसूचिकां ।
सतैलं कारवेल्लाम्बु विधुनोति विसूचिकां ॥
बालमूलस्य निःक्वाथः पिप्पलीचूर्णसंयुतः ।
विसूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥
विल्वनागरनिःक्वाथो हन्याच्छर्दिं विसूचिकां ।
विल्वनागरकैडर्य्यक्वाथस्तदधिको गुणैः" ॥
कैडर्य्यं कट्फलम्,—
"श्योनं करञ्जस्य फलं हरिद्रे
मूलं समावाप्य च मातुलुङ्गाः ।
छायाविशुष्का गुटिकाः कृतास्ता
हन्युर्विसूचीं नयनाञ्जनेन" ॥
मातुलुङ्गी मधुकर्कोटी । अनुभूतमिदम्,—
"अपामार्गस्य पत्राणि मरिचानि समानि च ।
अश्वस्य लालया पिष्टान्यञ्जनाद् घ्नन्ति सूचिकां ॥
विसूच्यामतिसृष्टायां तक्रं दधिसमं जलं ।
गारिकेलाम्बु पेयं वा प्राग्जाताय योजयेत् ॥
त्वक्पत्रराखागुरूशियुकुष्ठै-
रक्षप्रपिष्टैः सवचाशृताक्षैः ।
उद्वर्त्तनं खल्लिविसूचिकाघ्नं
तैलं विपक्वञ्च तदर्थकारि" ॥
त्वक् तैलम् ॥ * ॥
"कुष्ठसैन्धवयोः कल्कः शुक्तं तैलं तु तच्छृतं ।
विसूच्या मर्दनं तेन खल्लीशूलनिवारणम्" ॥
कुष्ठतैलम् ॥ * ॥
"पिप्पल्यां तण्डुलीये लवङ्गस्याम्बु शस्यते ।
जातीफलस्य वा घृतं घृतं भद्रघनस्य वा ॥ * ॥
उत्क्लेशग्रहणम्,—
"उत्क्लेशयन्नन्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितं ।
हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेदिति ॥
सरूपवागडमुदरमक्षपिष्टैः प्रलेपयेत् ।
दारूहैमवतीकुष्ठशृताक्षाहिङ्गुसैन्धवैः" ॥
हैमवती श्वेतवचा । दारूषट्कम् ॥ * ॥
"तक्रेण युक्तं यवचूर्णमुष्णं
सक्षारमार्क्षिं जठरे निहन्यात् ।
खेदो घटैर्वा बडवास्यपूर्णै-
रूष्मौस्तथान्यैरपि पाणितापैः ॥
विलम्बिकालसकयोरयमेव क्रियाक्रमः ।
अतएवैतयोरुक्तं पृथक् नेह चिकित्सितम् ॥
तद्वल्लकं गुरूस्निग्धसान्द्रमन्दहिमस्थिरैः ।
अन्नपानैर्नयेच्छान्तिं पित्तश्लेष्म विरेचनैः ॥
अल्पोद्धतामिग्रन्थ्ये माहिषदधिदुग्धसर्पींषि ।
संसेवेतयवागूं समधूच्छिष्टां ससर्पिष्कां ।
अस्रजित् पित्तहरणं पायसं प्रतिभोजनं ॥
श्यामात्रिवृद्विपक्वञ्च पयोदद्याद्विरेचनं ।
यत् किञ्चित् मधुरं मेध्यं स्नेहनं गुरू भीजनं ।
सर्व्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा" ॥
सितशुण्ठं सितकमलं छागीक्षीरेण पायसं खिडं । भुक्त्वा घृतेन पुरुषो दाहग्रदिवसादुत्थितो भवेत् ॥* ॥ अथ विशिष्टद्रव्याजीर्णे विशिष्टपाचनद्रव्यमाह,—

"अलं घनसपाकाय फलं कदलसम्भवं ।
कदलस्य तु पाकाय बुधैरभिहितं घृतं ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ।
नारिकेलफलतालबीजयोः
पाचकं सपदि तण्डुलं विदुः ।
क्षीरमाशु सहकारपाचनं
चारमज्जनि हरीतकी हिता ॥
मधूकमालूरभृष्टपादनानां
परूषखर्ज्जूरकपित्थकानां ।
पाकाय पेयं पिचुमर्द्दबीजं
घृतेऽपि तक्रेऽपि तदेव देयं ॥
खर्ज्जूरभृष्टकाटकयोः प्रशस्तं
विश्वौषधं कुत्र च भद्रमुस्तं ।
यष्ट्याह्वबेधिदुपलेषु घृतं
क्षत्ते तथा वार्ध्युषितं प्रशस्तं ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कषायुतं ।
धन्यिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गीर्य्यते" ॥
सुमनेषु गोधूमेषु । गीर्य्यते कथ्यते ।
"गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेत् झटिति मातुलपुत्रकेषु ।
खण्डश्च खण्डयति माषभवं त्वजीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णं" ॥
मातुलपुत्रकः धत्तूरफलं ।—
"कङ्गुश्यामाकनीवाराः कुलत्थाश्चाविलम्बितं ।
दग्धो जलेन जीर्य्यन्ति वैदलाः काञ्जिकेन तु ॥
पिष्टान्नं घृतलं वारि क्षुण्णरान् सैन्धवं पचेत् ।
माषखेडरी निम्बमूलं पायसं मुद्गयूषकैः" ॥
वटोदुम्बराश्वत्थवञ्जुलेन फेणीशृतं पर्पटः शिग्रुवीजेन याति । कदलीमूलतो लड्डुकापूपशष्कुलीविपाको भवेच्छष्कुली भक्षयेच्च ॥ वेणुवारः वेगर इति लोके । तद् यथा ।—
"खेहो निशाहिङ्गुलवङ्गकैला-
धान्याकजीराद्रकनागराणि ।
अस्रोषणं सैन्धवपूर्णमन्ने
यथोचितं संस्कृतये प्रयोज्यम्" ॥ इति ॥
शष्कुली शष्कुलः पानकविशेषः । भक्षयेः भाखे इति लोके ।—
"किमत्र चित्रं वडमत्स्यमांस
भोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥
आममाम्रफलं मीने तद्वीजं पिण्डिते हितं ।
कूर्म्ममांसं यवक्षाराच्छीघ्रं पाकमुपैति हि ॥
कपोतपारावतनीलकण्ठ
कपिञ्जलानां पिण्डितानि भुक्त्वा ।
काश्मर्य्य मूलं परिपीय पिष्टं
सुखी भवेन्नात्र वडश्च हि दृष्टं ॥
कपोतो धवलः पाण्डुः ।
"शाकानि सर्व्वाण्यपि यान्ति
पाकं क्षारेण सद्यस्तिलनालजेन ।
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्वथितेन पाकः" ॥
चञ्चूकं चेचूरु इति लोके । गायत्री खदिरः ।
"पलङ्कीकाकेमुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानां ॥
उपोदिकालाबुपटोलकानां
सिद्धार्थको मेघरवस्य पक्षा" ॥
मेघरवः चवराई इति लोके ।—
"विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलजोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कसेरुपाकः किल नागरेण ॥
लवणक्षारगुडलोपात् सर्पिर्जम्बीरकाद्यक्षात् ।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिकात्तैलं ॥
क्षीरं जीर्य्यति तक्रेण तद्वत्यं कोष्णमण्डकात् ।
माहिषं माणिमत्थेन शुण्ठीचूर्णेन तद्दधि" ॥
मण्डकः माण्डे इति लोके,—
"रसाला जीर्य्यति शीघ्रात् खण्डं नागरभक्षणात्
सिता नागरमुस्तेन तथेक्षुक्षारकारसात् ।
जरामिरागैरिकचन्दनाभ्या-
मभ्येति शीघ्रं मुनिभिः प्रयोगैः ।
उष्णेन घृतं स्निग्धिरेण चोष्णं
जीर्णो भवेत् क्षारगणास्तथाक्षैः" ॥
हरा मदिरा ।
"तप्तं तप्तं हेम वा तारमग्नौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तत्र क्षौद्रं भद्रयुक्तं विशेषात्" ॥
तत्र तोयाजीर्णे । इति जठराग्निविकाराजीर्णं विसूचिकालसविलम्बिकाचिकित्सा । इति भावप्रकाशः ॥

अजीवः, त्रि, (नास्ति जीवः आत्मा यस्य स बहुव्रीहिः) मृतः । अवसन्नः । इति त्रिकाण्डशेषः ॥

अजीवनिः, स्त्री, (नञ् + जीव + आक्रोशेगम्यानि रिति सूत्रेण अनिः) जीवनाभावः । अकरणिः । शापः । यथा । तस्याजननिरेवास्तु । इत्यमरटीकायां भरतः ॥ अजीवनिस्तव भूयात् । इति सुग्धबोधः ॥

अजुगुप्सितः, त्रि, (गुप् + सन् + क्त न जुगुप्सित नञ् समासः) अनिन्दितः । यथा,—
"उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान् ।
गन्धमाल्यैः सुरभिरर्चयेद्देवपूर्वकं" ॥
इति मानवे ३ अध्याये २०९ श्लोकः ॥

अजेयः, त्रि, (न जेयः नञ् समासः) इति नञ् पूर्व्वकजिधातोः कर्म्मणि यत्प्रत्ययः । अजेतव्यः । अजयनीयः । यथा ।—
"अजेयस्त्वञ्च संग्रामे ममापि हि भविष्यति" ।
इति स्कान्दे काशीखण्डे २३ अध्यायः ।

अज्येष्ठवृत्तिः, पुं, (ज्येष्ठस्य वृत्तिः आचरणं षष्ठीतत्पुरुषः नास्ति ज्येष्ठवृत्तिः ज्येष्ठाचरणं यस्य सः बहुव्रीहिः) ज्येष्ठवृत्तिरहितः । भ्रातृषु पितृवद्वर्त्तनाभाववान् । यथा,—

"यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।
अज्येष्ठवर्त्तिर्यस्तु स्यात् स सम्पूज्यस्तु बन्धुवत्" ॥
इति मानवे ९ अध्याये ११० श्लोकः ॥
यो ज्येष्ठोऽनुजेषु पितृवद्वर्त्तते स पितेव मातेव अगर्हणीयो भवति। यः पुनस्तथा न वर्त्तते स मातुलादिवदर्च्चनीयः। इति तट्टीकायां कुल्लूकभट्टः।

अजैकपात्, [द्] पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः बहुव्रीहिः अलोपः) एकादशरुद्रान्तर्गतरुद्रविशेषः। इति शब्दमाला ॥ (हरिवंशे,—
"अजैकपादहिर्बुध्न्य ऋतश्च भारत।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः" ॥)

अजैकपादः, पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः विकल्पे अलोपः) रुद्रविशेषः। इति जटाधरः ॥ छन्दोऽनुरोधादसन्धिरपि विष्णुपुराणे चन्द्रकलाप्रस्तावे अजएकपादिति ॥ (यथा भारते।—
"अजैकपादहिर्बुध्नो विरूपाक्षः सुरेश्वरः।
जयन्तो बहुरूपश्च त्र्यम्बकोऽपराजितः।
वृषाकपिश्च सावित्रोहरश्चरुद्रा इमे स्मृताः")

अञ्जुका, स्त्री, (अर्ज्जयति नायकादर्थमुपार्ज्जयति या अर्ज्जि+सन्निक स इति बाहुलकादुकन् रस्य ञ) नाय्योत्तौ वेश्या। इत्यमरः ॥ (एसा अञ्जु आ हि अ एन किन्पि आलिहन्ती चिट्ठदि मच्छकटिके।)

अञ्झटा, स्त्री, (करट इति वत् उज्झति सर्व्वदोषान् नाशयति या उज्झ+कर्त्तरि अटन् स्त्रियां टाप् एषोदरादित्वात् उकारस्य अः। यद्वा, अदव्ययमाश्वर्य्ये अत् आश्चर्य्यकारी झटः सङ्घातोऽस्याः। अत्ति क्षिप् झटति झटसंघाते अच्। टाप्। अथासौ झटा च वा ॥
("अम्लं समधुरं तिक्तं कषायं कटुकं सरम्।
चक्षुष्यं सर्व्वदोषघ्नं वृष्यमामलकीफलम्" ॥
इति सुश्रुते।) भूम्यामलकी। इत्यमरः ॥

अञ्झर्ण, क्ली, उज्झति अम्लं वारयति या उज्झ+कर्त्तरि अलच् एषोदरादित्वात् उकारस्य अकारः) फलकं। ढाल इति ख्यातं। इति हेमचन्द्रः ॥ (पुं, अङ्कारः, कोकिलः।)

अज्ञः, त्रि, (ज्ञा+कर्त्तरि कः नञ्सः नञ्समासः।) जड़ः। मूर्खः। इत्यमरः। (यदुक्तं,—
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदं" ॥
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचेऽफलः।
इदं शरणमज्ञानां।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥")

अज्ञानं, क्ली, (ज्ञा+भावे ल्युट् नञ्सः नञ्समासः) विपरीतज्ञानं। तत्पर्य्यायः। अविद्या २ अहम्मतिः ३। इत्यमरः ॥ सृष्टिकाले ब्रह्मा प्रथमं पञ्चप्रकारमज्ञानं ससर्ज्ज। यथा। तमः १ मोहः २ महामोहः ३ तामिस्रं ४ अन्धतामिस्रं ५।

इति श्रीभागवतं ॥ वेदान्तमते सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चित्। ज्ञानरहिते त्रि ॥ (यथा मनुः—
अज्ञानात् वारुणीं पीत्वा संस्कारेणैव शुद्धति।
अज्ञानात्प्राश्य विण्मूत्रं।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥)

अञ्चतिः, पुं, (अञ्चति गच्छति यः अञ्च+कर्त्तरि अति) वायुः। इति त्रिकाण्डशेषः ॥

अञ्चलः, पुं, (अञ्चति प्रान्तभागं गच्छति अञ्च+अलच्) वस्त्रप्रान्तभागः। आँचल इति भाषा। इति हलायुधः ॥ (यथा साहित्यदर्पणे।—
"ऊरुः कुरङ्गकदृशश्चञ्चलचेनाञ्चलोभाति" ॥

अञ्चितः, त्रि, (अञ्च+कर्म्मणि क्तः नाञ्चेः पूजायामिति नलोपाभावः) पूजितः। इत्यमरः ॥ (यथा रघुवंशे।—
"उभावलञ्चक्रतुरञ्चिताभ्यां
तपोवनाद्वृत्तिपथं गताभ्यां ॥)

अञ्चितभ्रूः, स्त्री, (अञ्चिते उत्कृष्टे भ्रुवौ यस्याः सा बहुव्रीहिः) सुन्दरभ्रूयुक्तनारी। इति स्त्रीपर्य्याये राजनिर्घण्टः ॥

अञ्जनं, क्ली, (अनज+भावे ल्युट्, कर्म्मणि तु गम्यमाने करणे ल्युट्) भक्षणं। गमनं। व्यक्तीकरणं। इत्यनट् प्रत्ययान्तान्जधातवश्च। कज्जलं। तत्तु षड्विधं। यथा,—
"सौवीरं ताम्रजं तुत्थं मयूरश्रीकरं तथा।
दर्व्विका नीलमेघश्च अञ्जनानि भवन्ति षट् ॥
तत्तत्स्थानानि यथा"—
"सवदूषन्तु सौवीरं ताम्रजं प्रस्तरं तथा।
मयूरश्रीकरं रत्नं मेघनीलन्तु तैजसं ॥
दृष्ट्वा निगाह्य चैतानि श्लिलायां तैजसेऽथवा।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥
सर्व्वाभावे तु तां दद्यात् देवीभ्यो दर्व्विकाञ्जनं।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा।
आप्नुवन्ति महातोषं षड्भिरेभिः सदाञ्जनैः ॥
विधवा नाञ्जनं कुर्य्यात् महामायार्थमुत्तमं।
नादत्ते त्वञ्जनं देवी वैष्णवी विधवाकृतं ॥
न मृत्पात्रे योजयेत्तु साधको नेत्ररञ्जनं।
न यूनाफलमाप्नोति मृत्पात्रविहिताञ्जनैः ॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनं।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः" ॥
इति कालिकापुराणे ६८ अध्यायः ॥ अस्य गुणः। तारानैर्म्मल्यकारित्वं। निर्म्मलचन्द्रतुल्यनिराकुलदृष्टिकारित्वञ्च। इति राजवल्लभः ॥ सौवीराञ्जनं। रसाञ्जनं। अक्षिः। मसी। इति हेमचन्द्रः ॥ अग्निः इति विश्वः ॥ आलङ्कारिकभाषया व्यञ्जनाख्यवृत्तिः। यथा,—
"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनं ॥
इति काव्यप्रकाशः ॥

अञ्जनः, पुं, (अनक्ति प्रतीच्यां दिशि रक्तत्वेन प्रकाशते यः अनज+कर्त्तरि ल्युट्) पश्चिमदिग्हस्ती। अञ्जयति स्वेषु शुभाशुभे सूचयति अनज+णिच्+ल्युट्) जेष्ठी। जेठी इति भाषा। इति विश्वमेदिन्यौ, (दिवा नतु प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनं। विरेकदुर्बलादृष्टिरादित्यं प्राप्य सीदति ॥ इति आगमः)।

अञ्जनकेशी, स्त्री, (अञ्जनवत् केशोयस्याः सा बहुव्रीहिः स्त्रियां ङीप् यत्संयोगेन केशस्य कृष्णता भवेत्) हनूमन्मातृविलासिनीनामगन्धर्व्वस्त्री। इत्यमरः ॥

अञ्जना, स्त्री, (अनक्ति स्वकान्त्या शोभते अनज+युच् कर्त्तरि) वानरीविशेषः। सा च हनूमन्माता। इति मेदिनी ॥ (रामायणे,—
"अञ्जनेति परिख्याता पत्नी केशरिणः कपेः।
अभिशापात्पत्नयाज्ञाता पुत्रञ्च दिवि धारिणी" ॥)

अञ्जनाधिका, स्त्री, (अञ्जनात् कज्जलादधिका कृष्णवर्णा) अञ्जनिका। इति हेमचन्द्रः ॥

अञ्जनावती, स्त्री, (अञ्जनं विद्यतेऽस्याः अतिकृष्णवर्णत्वात् अञ्जन+मतुप् स्त्रियां ङीप्) मतौ च वक्ष्योऽञ्जनाजरादीनामिति दीर्घः मस्य वः) सुप्रतीकनामदिग्गजभार्य्या। इत्यमरः ॥

अञ्जनिका, स्त्री, (अञ्जनम् अञ्जनवत् वर्णोविद्यतेऽस्याः सा अञ्जन+अर्शआद्यच् स्त्रियां टाप् स्वार्थे कः।) व्यक्तीविशेषः आँजनाइ इति। आञ्जिना इति च भाषा तत्पर्य्यायः। अञ्जनाधिका २ हालिनी ३ हलाहलः ४। इति हेमचन्द्रः ॥ क्षुद्रमूषिका। इति जटाधरः ॥

अञ्जनी, स्त्री, (अनक्ति चन्दनकुमकुमादिभिः शोभते अनज+कर्त्तरि ल्युट् स्त्रियां ङीप्) लेप्यनारी। चन्दनादिलेपयोग्या। इति विश्वमेदिन्यौ ॥ कटुकाहल्याः। कालाञ्जनीहल्याः। इति राजनिर्घण्टः।

अञ्जलिः, पुं, (अनज+अलि अवश्याञ्जखिपुटयोरिति वेणीसंहारनाटके) हस्तसम्पुटः। आँजुला इति भाषा। कुडवपरिमाणं। इति मेदिनी ॥ (यथा रामायणे। न प्रभातं त्वयेच्छामि निशे नक्तञ्चभूषिते। क्रियतां मे दया भद्रे मयाऽयं रचितोऽञ्जलिः) ॥

अञ्जलिका, स्त्री, (अञ्जलि+स्वार्थे क) वाद्यभूषिका। इति जटाधरः ॥ अञ्जनिका। इति च पाठः ॥

अञ्जलिकारिका, स्त्री, (अञ्जलेः कारिका) लज्जालुलता। इति राजनिर्घण्टः ॥ पुत्तलिका। इति हेमचन्द्रः ॥

अञ्जसः, त्रि, (अञ्ज+असच्) अवक्रः। ऋजुः ॥ इति हेमचन्द्रः।

अञ्जसा अ (अञ्जं गतिं विलम्बा स्यति नाशयति अञ्ज+सो+कर्त्तरि का) द्रुतं, शीघ्रं, यथार्थं, प्रकृतं, इत्यमरः। (यथामनुः,—
"आसमाप्तेः शरीरस्य यस्तु सुश्रूषते गुरुं।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतं" ॥)

अञ्जिः, पुं, (अनज+इन् णिलोपादिश्च) प्रेषणिकः। प्रेरकः। इत्युणादिकोषः ॥

अञ्जिरुः, पुं, (अनक्ति स्वतेजोभिर्जगत् प्रकाशयति

अन्न + इष्ठ।) सूर्य्यः। इत्युणादिकोषः॥

अन्नीरं, क्ली, (अन्न + भावे इन् स्त्रियां वा ङीप् अन्नीम् अन्निकारित्वादि गुणं राति ददाति अन्नी आतोऽनुपसर्गे इति कर्त्तरि कः। अथवा अन्न + ईरम्) खनामख्यातफलवृक्षविशेषः। औंजिर + इति पेयारा इति च भाषा। तत्पर्य्यायः। मञ्जुलं २ काकोदुम्बरिकाफलं ३। अस्य गुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। वायुपित्तरक्तक्षतभ्रमशूलक्षत्पीड़ाकफमुखवैरस्यनाशित्वं। अन्निकारित्वञ्च। लघ्वन्नीरं तस्मादल्पगुणं। इति राजवल्लभराजनिर्घण्टौ॥

अटनं, क्ली, (अट् + भावे ल्युट्) भ्रमणं। (यथा सर्व्वत्रगतेश्वरत्वमगमत् त्वां मार्ग्य भिक्षाटनं। इति घण्टाकर्णः॥)

अटनिः, स्त्री, (अटति तया गच्छति यत्र अट् + अधिकरणे अनि) धनुरग्रभागः। धनुकेर ऊल् इति भाषा। इत्युणादिकोषः॥

अटनी, स्त्री, (अटनि + स्त्रियामा ङीप्) अटनिः। धनुष्कोटिः। इत्यमरः॥ (यथा उत्तरचरिते। ध्वनदगुरुगुणाटगीद्धतकराकलोलाहतं)॥

अटरूषः, पुं, पतत्यनेन वासकस्यत्तः। इत्यमरः॥

अटरूषः, पुं, (अटति मत्युग्रासे पतत्यनेन अट + घञर्थे कः। अटं कासास्खरोगं रोषति नाशयति रुष् + कर्त्तरि कः अटस्य रूषो वा षष्ठीतत्पुरुषः। वासकः कासनाशक इति वैद्यके) वासकवृक्षः। इत्यमरटीकायां रायमुकुटः॥

अटविः, स्त्री, (अटति वार्द्धक्ये गच्छति यत्र अट् + अधिकरणे अवि पक्षाद्यत्वं वनं व्रजेदिति।) वनं। इति रायमुकुटः॥

अटवी, स्त्री, (अटवि + स्त्रियां ङीप्) वनं। इत्यमरः। (यथा रामायणे। आनर्त्तांश्चैव मार्गांश्च कान्तारारण्यटवीस्तथा)॥

अटा, स्त्री, (अट् + भावे अङ् ततष्टाप्) पर्य्यटनं। भ्रमणं। इति रत्नकोषः नीलकण्ठश्च॥

अटाट्या, स्त्री, (पौनः पुन्येन अटनं भ्रमणम् अट् + सूचिसूचिमूत्रयत्यर्त्तीत्यादिना यङ् + भावे ष्यञ् स्त्रियां टाप्) पर्य्यटनं। इत्यमरः॥ पुनःपुनर्भ्रमणं। अतिशयभ्रमणं। इति व्याकरणं॥) अट्ट क तौच्छ्ये। अनादरे। इति कविकल्पद्रुमः॥ टहयान्तः। क अट्टयति। एकटकार उति रामः॥ तौच्छ्यमल्पीभावः। इति दुर्गादासः॥

अट्ट ड अतिक्रमे। वधे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गाद्योपधः। ड अटिट्टिषते दन्त्यवर्गाद्योपधः। ड अतिट्टिषते। दन्त्यवर्गष्ठतीयोपधः। ड अट्टितिषते खलं राजा। इति दुर्गादासः॥

अट्टं, क्ली, (अट्ट + अच्) मुख्यं। भक्षं। अन्नं। इति मेदिनी भूरिप्रयोगश्च॥

अट्टः, पुं, (अट्टते एकं गृहमतिक्रम्य यत्र गृहे गच्छति अट्ट + अधिकरणे घञ्) क्षौमः। इत्यमरः॥ तन्मयादिगृहं। इति भरतः॥ प्राकारायस्थितरणगृहं। इति कौटिल्यः। अट्टेति ख्यातगृहविशेषः। इति कोङ्कटः॥ प्राकारमण्डपस्योपरि शाला। इति केचित्॥ हर्म्यादिवातकुटिका। इति केचित्॥ मण्डपोपरि हर्म्यगृहं। इति केचित्॥ प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः। इति भट्टः॥ अतिशयः। इति मेदिनी॥ हट्टः इति हेमचन्द्रः॥

अट्टट्ट य (वीप्सायाद्विर्व्वचनम् शकन्ध्वादित्वात् पररूपत्वमस्य अट्टट्टहासमग्निं शिवदूती चकार हेति घण्टो) अत्युच्चं। इति जटाधरः॥

अट्टनं (क्ली) चक्रफलास्त्रं। इति चिकाण्डशेषः॥

अट्टहासः, पुं, महत्तरो हासः। शब्दयुक्तहास्यं। इति हेमचन्द्रः॥ (यथा देवीमाहात्म्ये। देवीननादोचैः साट्टहासं मुहुर्मुहुः॥ व्यम्बकस्याट्टहासः॥ मेघदूते)॥

अट्टहासकः, पुं, (अट्टं सातिशयं हासकः अतिश्वेतपुष्पत्वात् हास्यकारीव द्वितीयातत् पुरुषः) कुन्दपुष्पवृक्षः। इति राजनिर्घण्टः॥

अट्टहासी [न्] पुं, (अट्टं सदानन्दत्वात् सातिशयं हसति अट्ट + हस + णिनि उपपद समासः) शिवः। इति हेमचन्द्रः॥

अट्टालः, पुं, (अट्टवत् प्रासादसदृशवत् अलति भवति अल + अच्) प्राकारादुपरितनमुन्नतस्थानं। इति श्रीधरस्वामी॥ यथा। भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं। इति श्रीभागवतं॥

अट्टालकः, पुं, (अट्टवत् प्रासादसदृशवत् अलति भवति अल + अच् स्वार्थे कन्) उपरितनसदृशं। अट्टालिकोपरि गृहं। तत्पर्य्यायः। क्षौमः २ अट्टः ३। इति हेमचन्द्रः॥

अट्टालिका, स्त्री, (अट्टाल + स्वार्थे कन् स्त्रियां टाप्) राजसदृशं। तत्पर्य्यायः। हट्टागारं २ हर्म्यं ३ सौधं ४ धवलागारं ५। इति जटाधरः॥ (राजतरङ्गिणी, अटित्वाट्टालिकादिभ्यो देशेभ्यः।)

अट्टालिकाकारः, पुं, (अट्टालिकां करोति यः अट्टालिका + कृ + अण् उपपद समासः प्रासादकारकः) शूद्रागर्भे चित्रकारौरसजातजातिविशेषः। तस्य कर्म्म गृहनिर्म्माणादि। राज इति थैकर इति च भाषा।

"कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः।
बभूवाट्टालिकाकारः पतितो जारदोषतः"।
इति ब्रह्मवैवर्त्तपुराणं॥

अट्टा, स्त्री, (अटनम् अट् + भावे क्यप् स्त्रियां टाप् समस्या इति वत्) परिभ्रमणं। पर्य्यटनं। इत्यमरटीकायां रायमुकुटः॥ यथा,—

"तौर्य्यत्रिकं वृथाट्टा च कामजो दशको गणः"।
इति स्मृतिः॥

अठ इ ड गतौ इति कविकल्पद्रुमः॥ इ (कर्म्मणि) अण्ठाते ड अण्ठते। इति दुर्गादासः॥

अठ गते। इति कविकल्पद्रुमः॥ अठति। इति दुर्गादासः॥

अड र न व्याप्तौ (स्वादिं सेट्।) इति कविकल्पद्रुमः॥ र वैदिकः। न अड्नोति। इति दुर्गादासः॥

अड उद्यमे। (भ्वादिं सेट् परं।) इति कविकल्पद्रुमः॥ अडति लोकः सुखाय। इति दुर्गादासः॥

अड्ड अभियोगे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गष्ठतीयोपधः। (भ्वादिं सेट् परं अड्ड + सन् लट् तिप्) अडिड्डिषति। ङिपि संयोगान्तलोपे अड्ड। अभियोगः समाधानं। अड्डति पक्षं विद्वान्। अभि समन्तात् योगोऽभियोग इति गोविन्दभट्टः॥ इति दुर्गादासः।

अण स्वे। इति कविकल्पद्रुमः॥ अणति। स्वः शब्दः। इति दुर्गादासः॥

अण य ड जीवने। प्राणने। इति कविकल्पद्रुमः॥ य ड अण्यते जनो दुःखेन जीवतीत्यर्थः। इति दुर्गादासः॥

अणकः, त्रि, (अण् + अच् कुत्सायां कन्) कुत्सितः अधमः। इत्यमरः॥

अणव्यं, क्ली, (अणोः सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अणु + यत्) आणवीनं (अणोः, सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अण् + घञ् तस्य इनः आदिवृद्धिश्च)। अणधान्योत्पादकक्षेत्रं। इति रायमुकुटः॥

अणिः, पुं, स्त्री (अणति शब्दायते अण् + इन् स्त्रियां वा ङीप्) अग्राग्रकीलकः। रथचक्राग्रस्थितकीलः। इत्यमरः॥ अस्रिः। सूच्याद्यग्रभागः। सीमा। इति मेदिनी॥ तस्य रूपान्तरं। अणी। आणिः (अणति शब्दायते अण् + इञ्, अजादिभ्यश्च इति इञ्, आजि इति वत्)। इत्यमरटीका॥

अणिमा [न्] पुं, (अणु + भावे इमनिच। अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वञ्च वशित्वञ्च तथा कामावसायिता इति सांख्यतत्त्वकौमुद्याम्) अणोर्भावः। अणुत्वं। सूक्ष्मता। इति व्याकरणं। अष्टविधैश्वर्य्यमध्ये ऐश्वर्य्यविशेषः। इत्यमरः॥ यत्प्रभावात् देवाः सिद्धाश्च सूक्ष्मीभूय सर्व्वत्र विचरन्ति केचिदपि न लक्ष्यन्ते। इति तट्टीका॥

("अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"॥
इति आगमः।)

अणीयः, [स्] त्रि, अतिशयेन अणुः अणु + ईयसुन्) अत्यल्पं। अतिसूक्ष्मं। इत्यमरः॥ (यथा मनुः,—

"प्रशासितारं सर्व्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परं"॥)

अणु, त्रि, (अणति सूक्ष्मत्वं गच्छति अण् + उन्। अवलेसशकलाणवः इत्यमरः) क्षुद्रं। सूक्ष्मं। इति मेदिनी॥

अणुः, पुं, (अण् + उन्) लेशः। व्रीहिविशेषः। सूक्ष्मधान्यं। चिना इत्यादि भाषा। इत्यमरः। (यथा मनुः। न गृह्णीयात् शुल्कमणुष्वपि॥)

अणुकः, त्रि, (अणुप्रकारः अणु + स्वार्थादित्वात्

प्रकारार्थे कन्। अणुप्रकारे, अणुशब्दार्थे चीनादिधान्ये) चतुरः। निपुणः। अल्पः। स्तोकः। इति मेदिनी॥

अणुमा, स्त्री, (अणुः सूक्ष्मा भा दीप्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति चिकाण्डशेषः॥

अणुरेवती, स्त्री, (अणुः सूक्ष्मा रेवती नक्षत्रमिव।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

अणुव्रीहिः, पुं, (अणुः सूक्ष्मः व्रीहिः, कर्म्मधारयः, चीनादि।) सूक्ष्मधान्यं। तत्पर्य्यायः। प्रसातिका २। इति रत्नमाला॥

अण्डं, क्ली, (अम् संयोगे भावे क्विप् अमं संयोगं डयन्ते गच्छन्त्यनेन अम्+डी+करणे डः। पुंसोऽवयवभेदे मुष्के, पक्षिडिम्बे। "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः।) पक्ष्यादिप्रादुर्भावकोषः। अण्डा। डिम्। इति भाषा। तत्पर्य्यायः। पेशी २ कोषः ३। इत्यमरः॥ पेशिः ४ कोशः ५ पेशीकोषः ६। इति तट्टीका॥ डिम्बः ७। इति मेदिनी॥ मत्स्यपक्षिकूर्म्माण्डानां गुणाः,—

("नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च। वातघ्न्यतिसुक्रकाणि गुरूण्यण्डानि पक्षिणाम्"॥ इति वैद्यके॥)

स्वादुत्वं। कटुपाकित्वं। रुचिसुक्रकारित्वं। वातश्लेष्मनाशित्वञ्च। इति राजवल्लभः॥ मुष्कः। वीर्य्यं। इति विश्वः॥ मृगनाभिः। इति केचित्॥

अण्डकः, पुं, (अण्ड+स्वार्थे कन्) अण्डकोषः। इति हेमचन्द्रः॥

अण्डकोटरपुष्पी, स्त्री, (अण्डवत् कोटरे अभ्यन्तरे पुष्पं यस्याः सा बहुव्रीहिः, स्त्रियां ङीप्।) अजान्त्रीवृक्षः। नीलराखा। नीलवृक्षा इति ख्याता। इति काचिन्नलमाला॥ अन्तःकोटरपुष्पी इत्यपि पाठः॥

अण्डकोशः, पुं, (अण्डस्य मुष्कस्य कोशः, षष्ठीतत्।) अण्डकोषः। इत्यमरटीका॥

अण्डकोषः, पुं, (अण्डस्य मुष्कस्य कोषः, षष्ठीतत्पुरुषः।) स्वनामख्यातशरीरावयवविशेषः। तत्पर्य्यायः। मुष्कः २ वृषणः ३। इत्यमरः॥ अण्डं ४ पेशं ५ अण्डकः ६। इति हेमचन्द्रः॥ बीजपेशिका ७। इति राजनिर्घण्टः॥ सीमा ८। इति जटाधरः॥ फलकोषकः ९। इति त्रिकाण्डशेषः॥ फलं १०। इति रामायणं॥ कोषकोषकमुष्काण्डवृषणा अण्डकोषकः। सीमा च पेशसीमानौ फलमित्यपि क्वचित्॥ इति शब्दरत्नावली॥

अण्डकोषकः, पुं, (अण्डकोष+स्वार्थे कन्) अण्डकोषः। इति शब्दरत्नावली॥

अण्डजः, पुं, (अण्डे जायते अण्ड+जन्+कर्त्तरि, ड उपपदसमासः) पक्षी। सर्पः। मत्स्यः। छकलासः। इति विश्वमेदिन्यौ॥ अण्डजातमात्रे त्रि। इत्यमरः॥

("अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः। यानि चैवंप्रकाराणि स्थलजान्यौदकानि च"॥ इति मनुः।)

अण्डजा, स्त्री, (अण्डे जायते इति अण्ड+जन्+कर्त्तरि ड, उपपदसमासः, स्त्रियां टाप्।) मृगनाभिः। कस्तूरी। इति विश्वमेदिनीहेमचन्द्राः॥

अण्डालुः, पुं, (अण्डं विद्यते अस्य अण्ड+मतर्थे आलुच्) मत्स्यः। इति शब्दचन्द्रिका॥

अण्डीरः, पुं, (अण्ड+मतर्थे ईरन्, विशिष्टसामर्थ्यवान्।) पुरुषः। शुक्रः। इति मेदिनी॥

अण्वी, स्त्री, (अणु+वेतेर्गुणवचनादिति पक्षे ङीप्) अङ्गुलिः। अस्याः प्रचुरप्रयोगो वेदे। छीवा॥

अत, इ बन्धने (इदित्वात् नुम् भ्वादिः सेट् परं) इति कविकल्पद्रुमः॥ अतीति बन्धे। श्रेषो दीर्घादिरित्यन्यः। अतएव अन्यते ईन्यते। खमते तु अन्यते इन्यते। छन्दोऽनुरोधादुभयत्र इकारः॥ इति दुर्गादासः॥

अत ईं बन्धने। इति कविकल्पद्रुमः॥

अत सातत्यगते। इति कविकल्पद्रुमः॥ सातत्यगतं नैरन्तर्य्येण भ्रमणं प्रापणञ्च। अतति वायुः। अतति सूर्य्यो गगनं प्राप्नोतीत्यर्थः। इति दुर्गादासः।

अतः, [स्] अ, (एतस्मात्, एतद्+एतदोऽश्निति पञ्चम्यर्थे तस् एतद्शब्दस्य अशादेशः) कारणं। अपदेशः। निर्देशः। इति विश्वः॥

अतएव, अ, (एतद्+तस् पञ्चम्यर्थे तस्। एतदः अन् इति एकारस्य अकारः।) अस्मादेव। एतत्कारणेनैव। अनेनैव हेतुना। यथा,—

"अतएव महेशानि रजयोः समता भवेत्"।

इति सारदातिलकटीकायां राघवभट्टः॥ अतएव पं। इति वोपदेवः॥

अतटः, पुं, (तट्यते आहन्यते जलेन इति तट्+घञर्थे कः, तटं जलप्रपातस्थानं न विद्यते अस्य बहुव्रीहिः) पर्व्वतस्योच्चस्थानं। तत्पर्य्यायः। प्रपातः २ भृगुः ३। इत्यमरः॥ (यथा शाकुन्तले। मनोरथानामतटप्रपातः॥)

अतर्कः, पुं, (तर्क्यतेऽनेन तर्क+घञर्थे कः। तर्कस्तर्कहेतुः स नास्ति यस्य स बहुव्रीहिः) अहेतुकः। मुक्ततर्कपरः। इति महाभारते दानधर्म्मः॥

अतलं, क्ली, (नास्ति तलं गाधभागो यस्य तत् बहुव्रीहिः। अतलस्पर्शमिति व्युत्पत्त्यर्थः॥) प्रथमखण्डपातालं। भूरिप्रयोगः॥

अतलस्पर्शः, त्रि, (नास्ति तलस्य अधोभागस्य स्पर्शो यस्य स बहुव्रीहिः।) अगाधः। अतिगभीरः) इत्यमरः॥

अतलस्पृक् [ग्] त्रि, (न तलं गाधभागः नञ्समासः, तत् स्पृशति यः अतल+स्पृश्+कर्त्तरि क्विन् अतलस्पर्शकारी। कर्म्मणि क्विन् तत् स्पृश्यते येन।) अतलस्पर्शः। तत्पर्य्यायः। आस्थार आस्थागं३ अस्ताघं ४ अगाधं ५। इति हेमचन्द्रः॥

अतसः, पुं, (अतति सततं गच्छति यः अत्+कर्त्तरि असच्, स्त्रियां ङीष्।) (अतसीवृक्षविशेषः) वायुः। इत्युणादिकोषः॥ आत्मा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ वल्कलनिर्म्मितवस्त्रं। वस्त्रं। यथा—"अतसः क्षौमं प्रच्छदं वायुश्चेति धातुवृत्तौ" माधवः॥

अतसी, स्त्री, (अत्+असच्, स्त्रियां ङीप्।) क्षुद्रपुष्पक्षुपवृक्षभेदः। मसिना इति ख्याता। तत्पर्य्यायः। चणका २ उमा ३ क्षौमी ४ रुद्रपत्नी ५ सुवर्षला ६। इति रत्नमाला॥ पिच्छिला ७ देवी ८ मदगन्धा ९ मदोत्कटा १० क्षुमा ११ हैमवती १२ सुनीला १३ नीलपुष्पिका १४। अस्या गुणाः। उष्णत्वं। तिक्तत्वं। वातहारित्वं। श्लेष्मपित्तकारित्वञ्च। अन्यास्तीसस्य गुणाः। मधुरत्वं। पिच्छिलत्वं। मदगन्धित्वं। कषायत्वं। वायुकफकासनाशित्वं॥ स्वादुत्वं। उष्णत्वं। अम्लत्वं। पाके कटुत्वञ्च। इति राजवल्लभराजनिर्घण्टौ॥ यथा,—

"अतसी नीलपुष्पी च पार्व्वती स्यादुमा क्षमा।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः।
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी"॥

इति भावप्रकाशः॥ शुक्लवृक्षः। इत्यमरटीका॥

अति, य, प्रशंसा। (अत्+इ। पूजायां। अतिरतिक्रमणे चेति। अत्यादयः क्रान्ताद्यर्थे इति पाणिनिसूत्रम्।) प्रकर्षं। लङ्घनं। इति विश्वमेदिन्यौ॥ अतिशुद्धं। क्रान्तं। पूजनं। असम्भावना। इति दुर्गादासः। प्रादिविंशत्युपसर्गान्तर्गतोऽयं॥

अतिकथः, त्रि, (कथामतिक्रान्तः कुगतिप्रादय इति समासः। कथनायोग्यं।) अश्रद्धेयः। नष्टः। इति मेदिनी॥ नष्टधर्म्मः। इति हेमचन्द्रः॥

अतिकथा, स्त्री, (अयुक्तश्चासौ कथा कर्म्मधारयः।) अपार्थवाक्यं। व्यर्थभाषणं। इति विश्वः हेमचन्द्रश्च॥

अतिकन्दकः, पुं, (अतिरिक्तः कन्दो मूलं यस्य कप्) हस्तिकन्दवृक्षः। इति राजनिर्घण्टः॥

अतिकेशरः, पुं, (अतिरिक्ताः केशराः किञ्जल्काः यस्य सः।) कुलकवृक्षः। इति राजनिर्घण्टः॥

अतिक्रमः, पुं, (अतिक्रान्तः क्रमः नियमः, अति क्रम्+भावे घञ् वृद्ध्यभावः) क्रमोल्लङ्घनं। तत्पर्य्यायः। अतिपातः २ (अति पत्+भावे घञ्) उपात्ययः ३ पर्य्यायः ४। अभिक्रमः। राज्ञे शत्रून् प्रति अभीतयोधादेर्गमनं। इत्यमरः॥

अतिक्रान्तः, त्रि, (अति+क्रम्+कर्त्तरि क्तः) कृतातिक्रमः। कृतक्रमोल्लङ्घनः। राजानमतिक्रान्ता अतिराजी। इति वोपदेवः॥ अतीतः। यथा। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। इति रुचितः॥

अतिक्रामकः, त्रि, अतिक्रमकर्त्ता। क्रमोल्लङ्घकः। अतिपूर्व्वक्रमधातोः कर्त्तरि ण्वुल्॥

अतिगण्डः, पुं, (गण्डमतिक्रान्तः अत्यादयः क्रान्ताद्यर्थे।) विंशुभादिसप्तविंशतियोगमध्ये षष्ठयोगः। तत्र जातफलं।

"कलिप्रियो वेदविनिन्दकश्च
धूर्त्तः कृतघ्नो गलरोगयुक्तः।

सरोमदेहः पुरुषोऽतिदीर्घः
प्रकाण्डगण्डस्त्वतिगण्डजन्मा" ॥
इति कोष्ठीप्रदीपः ।

अतिगन्धः, पुं, (अतिरिक्तो गन्धो यस्य सः ।) भूतटृणं । चन्यकः । मुद्गरवृक्षः । गन्धकः । इति राजनिर्घण्टः ॥ (अतिगर्व्वितः ।)

अतिगन्धालुः, पुं, (अतिगन्धो विद्यतेऽस्य अतिगन्ध + मत्वर्थे आलु । अतिशयितगन्धयुक्ते) पुत्रदात्रीलता । इति राजनिर्घण्टः ॥

अतिगर्व्वितः, त्रि, (अति अधिको गर्व्वः कर्म्मधारयः सोऽस्य जातः अतिगर्व्व + इतच् ।) महाहंकृतः । अतिशयगर्व्वयुक्तः । तत्पर्य्यायः । समुन्नद्धः २ । इति हलायुधः ॥

अतिगृहा, स्त्री, (गृहमतिक्रान्ता कुगतिप्रादीति समासः ।) एतन्नामविशेषः । क्षुद्रचाकुलिया इति भाषा । इति रत्नमाला ॥ गृहातिक्रामके त्रि ॥

अतिचरा, स्त्री, (गन्धविस्तारेण स्वस्थानमतिक्रम्य चरति गच्छतीव अति चर + कर्त्तरि अच् स्त्रियां टाप् ।) पद्मचारिणीवृक्षः । स्थलपद्मिनी । इत्यमरः ॥ राजनिर्घण्टश्च ॥

अतिचारः, पुं, (अतिक्रम्य चरणं गमनम् अति + चर + भावे घञ् ।) शीघ्रगमनं । अतिक्रम्य गमनं । कुजादिपञ्चग्रहाणां राशिभोगकालासमाप्तौ राश्यन्तरगमनं । तत्र पूर्ब्बराशिगमने वक्रातिचारः । परराशिगमने अतिचारः । एतौ गुरोरुच्छेदकालो भवति । गुरुस्तु यदि पुनः पूर्ब्बराशिं नायाति तदा महातिचारः । तेन लुप्तसम्वत्सरो भवति । ग्रहाणां स्वभोज्यमानराशावपि वक्रातिचारौ भवतः ॥ तत्र नाकालः । इति स्मृतिज्योतिषे ॥

अतिच्छत्रः, पुं, (छाद्यते आच्छाद्यतेऽनेन छद् + णिच् + करणे ष्ट्रन् । अतिक्रान्तश्छत्रम् इति व्युत्पत्त्या छत्रातिक्रमकारी ।) भूतटृणं । इति राजनिर्घण्टः ॥ जलटृणविशेषः । अखण्डवर्णकुल्याखाड़ा इति ख्यातः । इति रत्नमाला ॥ छत्रा । काटछाति । भुँइछाति । पोयालछाति इति ख्याता । इत्यमरः ॥

अतिच्छत्रकः, पुं, (अति + छत्र + स्वार्थे कन्) छत्रवृक्षः । छातारियाविष इति ख्यातः । तस्य मूले पत्रे वचाकारः कटुरसश्च । इति रत्नमाला ॥ भूतटृणं । इति राजनिर्घण्टः ॥

अतिच्छत्रा, स्त्री, (छत्रमतिक्रान्ता, अन्यादय इति समासः ।) अवाक्पुष्पी । मौरी इति ख्याता । इत्यमरः ॥ घृताङ्गा । गुलुपा इति प्रसिद्धा । इति रत्नमाला ॥ (छत्रातिछत्रे लाङ्गली जटिला ब्रह्मचारिणी ॥ इति सुश्रुते ॥)

अतिजवः, त्रि, (अतिशयितो जवो वेगो यस्य सः ।) अतिशीघ्रगामी । अतिवेगवान् । (दवयदतिजवेन प्राप्तमुर्व्वीविभागं ॥ इति भट्टिकाव्ये) ॥ तत्पर्य्यायः । जङ्घालः २ । इत्यमरः ॥ जङ्घिलः ३ अतिबलः ४ । इति तट्टीका ॥

अतिजागरः, पुं, (जागृ + भावे घञ् अतिशयितो जागरो जागरणं यस्य सः । अतिजागरणयुक्ते त्रि ।) नीलक्रौञ्चः । कालवकः । इति राजनिर्घण्टः ॥

अतिडीनं, क्ली, (डी + भावे क्तः तस्य नः । अत्यन्तं डीनं गमनं कर्म्मधारयः ।) पक्षिणां प्रचण्डगमनं । इति महाभारतं ॥

अतितीव्रा, स्त्री, (अतिशयेन तीव्रा) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

अतिथिः, पुं, कुशपुत्रः । स च श्रीरामचन्द्रस्य पौत्रः । इति मेदिनी ॥ कोपः । इति विश्वः ॥

अतिथिः, त्रि, (अतति सातत्येन गच्छति न तिष्ठति अत् + इथिन्) अज्ञातपूर्ब्बमुद्दागतव्यक्तिः । इति श्रीधरस्वामी ॥ अतिथ् इति भाषा । तत्पर्य्यायः । आगन्तुः २ आवेशिकः ३ गृहागतः ४ । इत्यमरः ॥ स्त्रीलिङ्गे आवेशिकी ५ अतिथी ६ । इति तट्टीकासारसुन्दरी ॥ आगान्तुः ७ । इति हलायुधः । प्रघूर्णः ८ अभ्यागतः ९ प्राघूर्णिकः १० । इति हेमचन्द्रः ॥ प्राघुणिकः ११ । इति विश्वः ॥ प्राघुणः १२ । इति त्रिकाण्डशेषः ॥ * ॥ तस्य लक्षणं । यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः । अकस्मात् गृहमायाति सोऽतिथिः प्रोच्यते बुधैः ॥ * ॥ तस्य निवर्त्तने गृहस्थस्य दोषः यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति" ॥
इति पुराणं ॥ * ॥ तस्य ग्रहणकालः । "ततो गोदोहमात्रन्तु कालं तिष्ठेद्गृहाङ्गने । अतिथिग्रहणार्थाय तदूर्द्धं वा यदृच्छया" ॥ इति विष्णुपुराणं ॥ * ॥ गोदोहकालश्च मुहूर्त्तार्द्धमभागः । यथा । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनं । मुहूर्त्तस्यार्द्धमं भागमुदीच्यो ह्यतिथिर्भवेत्" ॥ इति मार्कण्डेयपुराणं ॥ * ॥ तस्य मूर्खत्वादिविचारो नास्ति । "प्रियो वा यदि वा द्वेष्यो मूर्खः पतित एव वा । संप्राप्ते वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः" ॥ इति प्रातातपः ॥ * ॥ तस्य वेदादयो न प्रष्टव्याः ।
"स्वाध्यायगोत्रचरणमप्यपि तथा कुलं ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही" ॥
इति विष्णुपुराणं ॥ * ॥ तस्य देशादौ एष्टे दोषः ।
"देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति ।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति" ॥
इति स्मृतिः ॥ * ॥ अतिथये गृहस्थानुसारेण दातव्यं ।
"भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा नैव भोक्तव्यं यथा विभवमात्मनः" ॥
इति मार्कण्डेयपुराणं ॥ * ॥ भिक्षादिलक्षणं ।
"ग्रासप्रमाणा भिक्षास्यादग्रं ग्रासचतुष्टयं ।
अर्द्धाचतुर्गुणं प्राऽहुरेन्तकारं द्विजोत्तमाः" ॥
इति मार्कण्डेयपुराणम् । इत्थाङ्कितत्त्वं ॥

अतिथिपूजनं, क्ली, (अतिथेः पूजनं सेवा षष्ठीतत्पुरुषः ।) अतिथिसेवा । आतिथ्यक्रिया । तत्पर्य्यायः । नृयज्ञः २ । इति हेमचन्द्रः ॥

अतिदानं, क्ली, (दा + भावे ल्युट्, अत्यन्तं दानं खण्डनपूर्ब्बकपरस्वत्वोत्पत्तिः, कर्म्मधारयः ।) बहुदानं । अपरिमितदानं । यथा,—
"अतिदाने बलिर्बद्धः अतिमाने च कौरवाः ।
अतिरूपे हृता सीता सर्व्वमत्यन्तगर्हितम् ॥
इति चाणक्यः ॥

अतिदिशः, त्रि, (अति + दिश् + क्विप् । अन्यधर्म्माणामन्यत्रारोपणमतिदेशः यथा,—"तिङ्शित् सार्व्वधातुकमित्यातिदेशिकसूत्रम् ।) अतिदेशविशिष्टः । यथा,—"न समानगोत्रां भार्य्यां विन्देतेत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यते" इति चेदत्र उपदिश्यातिदिश्यगोत्रस्यैव निषेधो नत्वतिदिश्यातिदिश्यशूद्रगोत्रादेः । इत्युद्धाहतत्त्वं ॥

अतिदीप्यः, पुं, (अत्यन्तं दीप्यते विचित्रवर्णतया आत्मना प्रकाशते अति + दीप् + कर्त्तरि ण्यत् ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

अतिदेशः, पुं, (अति + दिश् + भावे घञ्) अन्यधर्म्मस्यान्यत्र आरोपणं । यथा,—"इखदिकः" इत्यादिः । इति दुर्गादासः ॥ कारिका यथा,—
"प्रकृतात् कर्म्मणो यस्मात् तत्समानेषु कर्म्मसु ।
धर्म्मोऽतिदिश्यते येन अतिदेशः स उच्यते" ॥
इति मलमासतत्त्वम् ॥ स तु पञ्चविधः । शास्त्रातिदेशः । १ यथा,—"नित्येन तुल्यं श्रेषं स्यात् इत्यत्र तुल्यशब्देन अतिदेशः" । १ । कार्य्यातिदेशः २ यथा,—"अप्रयाजास्तः इत्यत्र कार्य्येण निषेधेन दर्शपौर्णमासधर्म्मातिदेशः" । २ । निमित्तातिदेशः ३ यथा,—"विकृतौ मौद्गचरुयागे व्रीहिकार्य्यकारिणि मुद्गे व्रीहिकार्य्यनिमित्तत्वात् धर्म्माः प्रोक्षणादयः कल्प्यन्ते" । ३ । व्यपदेशातिदेशः ४ यथा,—"मासमग्निहोत्रं जुहोति इत्यत्र माससाध्यायनाख्ययागे अग्निहोत्रपदव्यपदेशात् अग्निहोत्रधर्म्मातिदेशः" । ४ । "रूपातिदेशः" ५ यथा,—"यजमानाद्भिन्नो यूपः इत्यत्र यूपे यजमानादन्यत्वरूपावगमात् यजमानधर्म्मस्य तदीयपरिमाणस्यातिदेशः" । इति श्राद्धविवेकटीकायां श्रीकृष्णः ॥

अतिनु, त्रि, (कुगतिप्रादीतिसमासः । गोस्त्रियोरुपसर्जनस्येति ह्रस्वः ।) अतीतनौकं । नावमतिक्रान्तं । नावोत्तीर्णं । इत्यमरः । तस्य पुंस्त्रीलिङ्गयोः अतिनौः इति रूपं ॥

अतिपतनं, क्ली, (अति + पत् + भावे ल्युट्) अत्ययः । अतिक्रमणं । इति शब्दरत्नावली ॥

अतिपत्त्राः [न्] पुं, (अत्युत्कृष्टः पत्त्राः कर्म्मधारयः । अतेः पूजार्थत्वान्न समासान्तप्रत्ययः ।) सन्मार्गः । सुपथः । इत्यमरः ॥

अतिपत्रः, पुं, (अतिबृहत् पत्रं यस्य सः बहुव्रीहिः ।) हस्तिकन्दवृक्षः । शाकवृक्षः । इति राजनिर्घण्टः ॥

अतिपातः, पुं, (अति + पत् + भावे घञ्) अतिक्रमः । उपायव्ययः । पर्य्ययः । इत्यमरः ॥ (यथा शाकुन्तले—न चेदन्यकार्य्यातिपातः) ॥

अतिपातकं, क्ली, (अतिदुष्टतया अन्यत् पातकं पापमतिक्रान्तं प्रादिसमासः ।) नवविधपापमध्ये गुरुतरपातकं । तत् त्रिविधं । पुंसः माद्दुहित्र-

सुखागमनजन्यं। स्त्रियास्तु पुत्रपिटश्वसुरगमनजन्यं। इति प्रायश्चित्तविवेकः॥

अतिबलः, त्रि, (अतिशयितं बलं यस्य सः बहुव्रीहिः।) प्रबलः। अतिशयबलवान्। प्रकृष्टबलविशिष्टः। इति मेदिनी॥ (विजृम्भमाणोऽतिबलः प्रत्यबुध्यत राक्षसः॥ इति रामायणम्)॥

अतिबला, स्त्री, अत्यन्तं बलं यस्याः सा बहुव्रीहिः।) विश्वामित्रेण रामाय दत्ते अस्त्रविद्याविशेषे यथा,—

"महाबले इमे विद्ये बलामतिबलां तथा"।

इत्यादि रामायणे।) पीतबला। पीतवर्णवाड़ियाला इति ख्याता। पिटारणी। इति मदनविनोदः॥ गुरुशकरीभेदः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। बलिका २ बल्या ३ विकङ्कता ४ वाद्यपुष्पिका ५ घण्टा ६ शीता ७ शीतपुष्पा ८ भूरिचला ९ दृष्यगन्धिका १०। तस्या गुणाः। तिक्तत्वं। कटुत्वं। वातक्लमिनाशित्वं। दाहतृष्णाविषच्छर्द्दिक्लेदोपशमकारित्वञ्च। इति राजनिर्घण्टः॥

अतिभारगः, पुं, (अतिभारेण वेगेन गच्छति अतिभार + गम् + कर्त्तरि ड, उपपदसमासः।) (खरः। अश्वतरः। गर्द्दभात् वड़वाजातः अश्वभेदः।) खेसरः। खचर इति भाषा। इति राजनिर्घण्टः॥

अतिभीः, पुं, (अतिबिभेत्यस्याः अति भी + अपादाने क्विप्।) वचाज्वाला। इति हलायुधः॥

अतिभूमिः, स्त्री, (अतिशयिता भूमिर्मर्य्यादा कर्म्मधारयः, अतिमर्य्यादा।) आधिक्यं। यथा। प्राप्य मन्मथमदातिभूमिं दुःसहस्तनभराः सुरतस्येति माघः॥ अतिशयितभूमिः॥

अतिमङ्गल्यः, पुं, (अतिमङ्गलाय हितः अतिमङ्गल + यत्।) विल्ववृक्षः। इति रत्नमाला॥ अतिशयमङ्गलजनके त्रि॥

अतिमर्य्यादः, त्रि, (मर्य्यादामतिक्रान्तः प्रादिसमासः।) अतिशयितः। इति हेमचन्द्रः॥ अतिशये स्त्री॥

अतिमात्रं, क्ली, (मात्रामल्पमतिक्रान्तं प्रादिसमासः।) अतिशयः। तद्युक्ते त्रि। इत्यमरः॥ (यथा ग्राकुन्तले। अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्॥)

अतिमुक्तः, (पुं) माधवीलता। इत्यमरः॥ तिनिशवृक्षः। इति हेमचन्द्रः॥

अतिमुक्तः, त्रि, (अतिशयेन मुक्तः निर्व्वाणमुक्तिं गतः अति + मुच् + कर्त्तरि क्तः, निर्व्वाणमुक्तिविशिष्टः।) निष्कलः। निःसङ्गः। इतिविश्वमेदिन्यौ॥ प्राप्तनिर्व्वाणः॥

अतिमुक्तकः, पुं, (मुच् + भावे क्तः, अतिशयेन मुक्तं बन्धशैथिल्यं यस्य सः बहुव्रीहिः, कप्।) तिनिशवृक्षः। इत्यमरः॥ तिन्दुकवृक्षः। पुष्पवृक्षविशेषः। तत्पर्य्यायः। पुण्ड्रकः २ मल्लिनी ३ भ्रमरानन्दा ४ कामुककान्ता ५। तस्य गुणाः। कषायत्वं। शीतलत्वं। भ्रमनाशित्वं। पित्तदाहज्वरोन्मादहिक्काच्छर्द्दिनिवारकत्वञ्च। इति राजनिर्घण्टः॥ (कर्णिकारान् कुरुवकान् चम्पकानतिमुक्तकान्॥ इति रामायणे)॥

अतिमोदा, स्त्री, (अत्यन्तो मोदो गन्धो यस्याः सा।) नवमल्लिका। इति राजनिर्घण्टः॥

अतिरसा, स्त्री, अत्यन्तो रसो यस्याः सा।) मूर्व्वालता। राखा। स्त्रीतनकं। इति राजनिर्घण्टः॥

अतिरिक्तः, त्रि, (अति रिच् + कर्त्तरि क्तः। श्रेष्ठे भिन्ने शून्ये च। भावे क्तः, अतिरेके आधिक्ये च।) अधिकः। अतिशयितः। तत्पर्य्यायः। समधिकः २। इत्यमरः॥

अतिरेकः, त्रि, (अति रिच् + भावे घञ्। आधिक्ये श्रेष्ठत्वे च।) अतिशयः। यथा,—

"सम्पूर्णे तूभयोर्ज्ञेयमतिरेके परेऽहनि"।

इति तिथ्यादितत्त्वं॥

अतिरोगः, पुं, (अत्यन्तोरोगः व्याधिः अति रुज् + भावे घञ्।) क्षयव्याधिः। इति राजनिर्घण्टः॥

अतिरोमशः, पुं, (अतिशयितं रोम तदेव विद्यतेऽस्य अतिरोमन् + मत्वर्थे श) वनच्छागलः। इति हारावली॥ दृढत्वानर इति केचित्॥ अतिशयलोमयुक्ते त्रि॥

अतिलोमशा, स्त्री, (अतिशयितं लोम अतिलोमन् + मत्वर्थे श, स्त्रियां टाप्।) नीलबुक्का। इति रत्नमाला॥

अतिवर्त्तुलः, पुं, (अतिशयितो वर्त्तुलः कर्म्मधारयः।) कलायविशेषः। वाँटुला कड़ाइ इति भाषा। इति रत्नमाला॥ अस्य गुणाः सतीलग्रब्दे द्रष्टव्याः॥

अतिवादः, पुं, (अति + वद् + भावे घञ्।) अभिवादः। परुषोक्तिः। इत्यमरटीकायां रमानाथः॥ ("अतिवादांस्तितिक्षेत नावमन्येत कञ्चनः। नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥ मनुः।)

अतिविकटः, पुं, (अतिशयितो विकटः भीषणः) दुरुहस्थली। इति शब्दमाला॥ अतिकराले त्रि॥

अतिविषा, स्त्री, (विषमतिक्रान्ता प्रादिसमासः। वा विषमतिक्रान्तं यया बहुव्रीहिः।) वृक्षविशेषः। आतइच। आतैच इति भाषा। तत्पर्य्यायः। विश्वा २ विषा ३ प्रतिविषा ४ उपविषा ५ अरुणा ६ शृङ्गी ७ महौषधं ८। इत्यमरः॥ काश्मीरा ९ श्वेता १०। इति रत्नमाला॥ श्वेतकन्दा ११ भङ्गी १२ भङ्गुरा १३ विरूपा १४ श्यामकन्दा १५ विषरूपा १६ वीरा १७ भार्द्दी १८ श्वेतवचा १९ अमृता २०। इति राजनिर्घण्टः॥ तस्या गुणाः। पाचकत्वं। ग्राहित्वं। दोषनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वं। कफपित्तज्वरामातिसारकासविषच्छर्द्दिनाशित्वञ्च।

"त्रिविधातिविषा ज्ञेया शुक्ला कृष्णा तथारुणा।
रसवीर्य्यविपाकेषु निर्व्विशेषेव गुणाधिका"॥

इति राजनिर्घण्टः॥

"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा।
शुक्लकन्दा चोपविषा भङ्गुरा ग्रन्थवल्लभा॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत्।
कफपित्तातिसारामविषकासवमिक्रिमीन्"॥

इति भावप्रकाशः॥

अतिविस्रब्धनवोढ़ा, स्त्री, (अतिविस्रब्धा अतिप्रश्रययुक्ता नवोढ़ा प्रणयिनी नायिका इति यावत् कर्म्मधारयः।) स्त्रीयान्तर्गतमध्यनायिकाभेदः। तस्याः लक्षणं। नायकातिशयप्रश्रययुक्ता। अस्याश्चेष्टा। सधैर्य्यसापराधनायके वक्रोक्तिः। अधैर्य्यसापराधनायके परुषवाक्। इति रसमञ्जरी॥

अतिवृष्टिः, स्त्री, (अतिशयेन वृष्टिः वर्षणं।) अतिशयवृष्टिः। इतिविशेषः। स तु महद्वर्षणरूपः क्षुधीणामुत्पातः। यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥

इति पराशरः॥

अतिवेलं, क्ली, (वेलां मर्य्यादां कूलं वा अतिक्रान्तं प्रादिसमासः, क्लीवः।) अतिशयिते त्रि। इत्यमरः॥ (जलमतिवेलं पयोराशेः॥ नीतिमाला)।

अतिव्यथा, स्त्री, (अत्यन्ता व्यथायातना कर्म्मधारयः। व्यथ + भावे अङ् स्त्रियां टाप्।) अतिशययातना। तीव्रवेदना। इति शब्दरत्नावली॥

अतिव्याप्तिः, स्त्री, (अतिशयेन व्याप्तिर्व्याप्तनं।) अतिशयव्यापनं। अलक्ष्ये लक्षणस्य गमनं। यथा साध्याभाववदवृत्तित्वमिति व्याप्तिलक्षणे धूमवान् वह्नेरित्यत्र धूमाभावाधिकरणह्रदवृत्तित्वाभावमादाय अतिव्याप्तिः। इति तार्किकाः॥ खाद्यवहितप्राक्क्षणावच्छेदेन रविमुच्यमानराशीयरविसंयोगविशिष्टखान्तिमक्षणकत्वं मलमासत्वं भानुसङ्क्रिते अतिव्याप्तिवारणाय औत्पातिकभिन्नत्वेन विशेषणीयं। इति मलमासतत्त्वटीका॥ मुख्यफलजनकव्यापारजनकत्वे सति मुख्यफलाजनकत्वं अङ्गत्वं घटादावतिव्याप्तिवारणाय सत्यन्तं इति तिथ्यादितत्त्वटीका च॥

अतिशक्तिता, स्त्री, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं यस्य बहुव्रीहिः, तस्य भावः तल् स्त्रियां टाप्) विक्रमः। महाबलं। इत्यमरः॥

अतिशक्तिभाक् [ज्] पुं, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं कर्म्मधारयः। तां भजते अतिशक्ति + भज् + कर्त्तरि क्विप्, उपपदसमासः।) अतिशयशक्तिविशिष्टः। अतिसमर्थः। सवीर्य्यमतिशक्तिभाक्। इत्यमरः॥

अतिशयः, पुं, (अति + शी + अच्) अधिकः। तत्पर्य्यायः। भरः २ अतिवेलं ३ भृशं ४ अत्यर्थं ५ अतिमात्रं ६ उद्गाढ़ं ७ निर्भरं ८ तीव्रं ९ एकान्तं १० नितान्तं ११ गाढ़ं १२ बाढ़ं १३ दृढ़ं १४। इत्यमरः॥ अतिमर्य्यादः १५ उत्कर्षः १६। इति हेमचन्द्रः॥ बलवत् १७ सुष्ठु १८ किमुत १९ सु २० अतीव २१ अति २२। इत्यव्ययवर्गे अमरः॥ अतिरिक्तः २३ समधिकः २४। इति विशेष्यनिघ्नवर्गे अमरः॥

अतिशयनं, क्ली, (अति + शी + भावे ल्युट्) अतिशयः। तद्युक्ते त्रि। इत्यमरटीकायां रमानाथः। (शयनमतिक्रान्तं अत्यादीतिसमासः। अतिक्रान्तशयनम्॥)

अतिशायनं, क्ली, (अति शी + स्वार्थे णिच् भावे

ल्युट्।) अतिशयनं। इति शब्दरत्नावली॥ (आधिक्यं। प्रकर्षः। प्रशंसा।)

अतिशोभनः, त्रि, (अतिशोभते अति+शुभ+कर्त्तरि ल्युः।) अतिशयशोभायुक्तः। अतिप्रशस्यः। श्रेष्ठः। इत्यमरः॥

अतिसर्ज्जनं, क्लो, (अतिशयेन सर्जनं दानं अति+सृज्+भावे ल्युट्) अतिशयदानं। तत्पर्य्यायः। विलम्भः २। इत्यमरः॥ दानं। वधः। इति मेदिनी॥ (विधुरां ज्वलनातिसर्ज्जनात् ननु मां प्रापय पत्युरन्तिकं॥ इति कुमारसम्भवे॥)

अतिसारः, पुं, (अतिशयेन मलं द्रवीकृत्य सरति निःसारयति अति+सृ+घञ्धिमत्त्वबलेष्विति वक्तव्यमिति वार्त्तिकसूत्रेण कर्त्तरि घञ् दृद्धिः दीर्घश्च।) बहुद्रवमलनिःसरणरोगः। तत्पर्य्यायः। अन्नगन्धिः २ उदरामयः ३। इति चिकाण्डशेषः॥ अतीसारः ४। इति वैद्यकं॥ * ॥ तस्य निदानं।

"गुर्व्वतिस्निग्धरूक्षोष्णद्रवसूलातिशीतलैः।
विरुद्धाध्यशनाजीर्णैर्विषमैरपि भोजनैः॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विरेचनैः।
शोकाद्युत्थाम्बुमद्यातिपानैः सात्म्यर्तुपर्य्ययैः॥
जलाभिरमणैर्व्वेगविघातैः क्रिमिदोषतः।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते"॥

संप्राप्तिर्यथा,—

"संश्रुत्यापां धातुरग्निं प्रदूष्य
श्लक्ष्णस्निग्धो वायुनाधः प्रणुन्नः।
सरत्यतीवातिसारं तमाहु-
र्व्याधिं घोरं षड्विधं तं वदन्ति॥
एकैकशः सर्व्वशश्चापि दोषैः
शोकेनान्यः षष्ठ आमेन चोक्तः"॥ * ॥

पूर्व्वरूपं यथा,—

"हृन्नाभिपायूदरकुक्षितोद-
गात्रावसादानिलसन्निरोधाः।
विट्सङ्ग आध्मानमथाविपाको
भविष्यतस्तस्य पुरःसराणि॥"

इति माधवकरः॥ अथ सामान्यातिसारस्य चिकित्सामाह।

"आमपक्वक्रमं हित्वा नातिसारक्रिया यतः।
अतोऽतिसारे सर्व्वस्मिन्नामं पक्वञ्च लक्षयेत्॥
क्रमश्चिकित्सा। तत्रामपक्वयोर्लक्षणं।
"संदुष्यमानैर्दोषैस्तु न्यस्तमस्मु निमज्जति।
पुरीषं श्लक्ष्णदुर्गन्धि पिच्छिलं चामसंज्ञितं॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य वै।
लाघवञ्च विशेषेण तत्तु पक्वं विनिर्दिशेत्॥
न च संग्राहयं दद्यात् पूर्व्वमामातिसारिणे।
अकाले संगृहीतो हि विकारान् कुरुते बहून्॥
दद्यात्कालसकाश्चानग्रहण्यर्शोभगन्दरान्।
शोथं पाण्डामयं श्लीहगुल्ममेहोदरज्वरान्॥
डिम्भस्य स्थविरस्यश्च वातपित्तात्मकश्च यः।
क्षीणधातुबलस्यापि षड्दोषोऽतिविश्रुतः॥
आमोऽपि लङ्घनोयः स्यात् पाचनान्मरणं भवेत्।
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं वै जिनैः।
समुदीर्णदोषनिचयं तत् पाचयते तथा शमयेत्॥
लङ्घनएव दोषदुःसहपिपासायां दोषपाकार्थं षड्विधिनार्द्धमृतं योगचतुष्टयमाह,—
"धान्योदीच्यमृतं तोयं तृष्णादाहातिसारिणे।
श्रीवेरमृडुकवेराभ्यां मुस्तपर्पटकेन वा॥
मुस्तोदीच्यमृतं शीतं प्रदातव्यं पिपासवे।
हितं लङ्घनमेवादौ पूर्व्वरूपेऽतिसारिणः॥
कार्य्यं वानशनस्यान्ते प्रदवं लघुभोजनं।
पथ्यादाडिमवत्सकामुस्तैर्नागरातिविषान्वितैः॥
आमातीसारनाशाय क्वाथमेभिः पिबेन्नरः।
पथ्यादिक्वाथः॥ * ॥
"पाठाहिङ्ग्वजमोदोग्रायष्टिकोलाब्दजं रजः।
उष्णाम्बुपीतं सरुजं जयत्यामं ससैन्धवं॥"
पाठादिचूर्णं॥ * ॥
"हरीतकीं सातिविषां हिङ्गु सौवर्चलां वचां।
सैन्धवञ्चापि संपिष्य पाययेदुष्णवारिणा॥
आमातिसारं योगोऽयं पाचयित्वा चिकित्सति।
आमातिसारो योगेन यत्नेतेन न शाम्यति।
न तं योगशतेनापि चिकित्सति चिकित्सकः॥"
चिकित्सति अपनयति। हरीतक्यादिकल्कः॥*॥
"वत्सकातिविषा बिल्वमुस्तबालकजं मृतं।
अतीसारं जयेत् सामं चिरजं रक्तशूलजित्॥"
वत्सकादिक्वाथः॥ * ॥
"एरण्डरससंपिष्टं पक्वमामञ्च नागरं।
आमातिसारशूलघ्नं दीपनं पाचनं परं॥"
नागरस्य पुटपाकः कल्कश्च॥ * ॥
"धान्यबालकबिल्वाब्दनागरैः पाचितं जलं।
आमशूलविबन्धघ्नं पाचनं नित्यसेवितं॥"
धान्यपञ्चकं॥ * ॥
"पित्ते धान्यचतुष्कन्तु मुण्ठीत्यागाद्वदन्ति हि।
रक्तेऽपि पित्तसाधर्म्याद्धितं धान्यचतुष्टयं॥"
धान्यचतुष्कं॥ इति आमातिसारस्य चिकित्सा॥*॥
"सलोध्रं धातकीबिल्वं मुस्तामास्थिकलिङ्गकं।
पिबेन्माहिषतक्रेण पक्वातीसारनाशनं॥"
लोध्रादिचूर्णं॥ * ॥
"अम्बष्ठा धातकी लोध्रं समङ्गा पद्मकेशरं।
मधुकारुबिल्वञ्च पक्वातीसारहा गणः॥"
अरुः श्योनाकः। पाठादिर्गणः॥ * ॥
"समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रएव च।
शाल्मलीवेष्टको लोध्रो दाड़िमद्रुफलत्वचौ॥
आम्रास्थिमध्यं लोध्रञ्च बिल्वमध्यं प्रियङ्गु च।
मधूकं मृडुकवेरञ्च दीर्घवृन्तत्वगेव च॥
चत्वार एते योगाः स्युः पक्वातिसारनाशनाः।
ते योगा उपयोग्याः स्युः सद्योद्रास्तरुलाम्बुना॥"
समङ्गाच लज्जालुः। शाल्मलीवेष्टको मोचरसः। दाड़िमस्य द्रुमफलयोस्त्वचौ। प्रियङ्गोर्नपुंसकत्वमत्र फले वर्त्तमानत्वात् तु मृडुकवेरमत्र मुण्ठी। दीर्घवृन्तः श्योनाकः तस्य त्वक्। समङ्गादीनि चत्वारि चूर्णानि॥
"कच्चटजम्बूदाड़िममृडुकाटकमत्रबिल्ववर्हिष्ठं। जलधरनागरसहितं गङ्गामपि वेगवाहिनीं रुन्ध्यात्"॥
कच्चटं चवराई शाकस्य भेदः। कच्चटादिभिश्चतुर्भिः पत्रशब्दः सम्बध्यते। वर्हिष्ठं बालकं गङ्गाधरक्वाथः॥ * ॥
"मोचरसमुस्तनागरपाठारुधातकीकुसुमैः।
चूर्णं मथितसमेतं रुणद्धि गङ्गाप्रवाहमपि"॥
अरुः श्योनाकः। मथितं निर्ज्जलं दधि वस्त्रपूतं।
गङ्गाधरचूर्णं॥ * ॥
"मुस्तावत्सकबीजं मोचरसो बिल्वधातकीलोध्रं।
गुड़मथितसंप्रयुक्तं गङ्गामपि वेगवाहिनीं रुन्ध्यात्"॥
द्वितीयं गङ्गाधरचूर्णं॥ * ॥
"मुस्तारुकशुण्ठीभिर्धातकीलोध्रबालकैः।
बिल्वमोचरसाभ्याञ्च पाठेन्द्रयववत्सकैः॥
आम्रबीजसमङ्गातिविषायष्टीर्बिचूर्णितैः।
मधुतण्डुलपानीयपोतैर्नश्येत् प्रवाहिकां॥
सर्व्वेऽतिसारा ग्रहणी प्रशमं याति वेगतः।
दृढगङ्गाधरं चूर्णं रुन्ध्याद्गौर्व्वाणवाहिनीं॥"
समङ्गा लज्जालुः। दृढगङ्गाधरचूर्णं॥ * ॥
अङ्कोटमूलकल्कः तण्डुलपयसा समाक्तिकः पीतः।
सेतुरिव वारिवेगं झटिति रुन्ध्यादतीसारं"॥
अङ्कोटकल्कः॥ * ॥
"कुटजत्वग्बलामार्द्रा द्रोणनीरे पचेत् भिषक्।
पादशेषं मृदं नीत्वा वस्त्रपूतं पुनः पचेत्॥
लज्जालुर्धातकी बिल्वं पाठा मोचरसस्तथा।
मुस्तं प्रतिविषा चैव चूर्णान्येषां पलं पलं॥
निक्षिप्य विपचेत्तावत् यावत् दर्व्वी प्रलिप्यते।
जलेन छागदुग्धेन पीतो मद्येन वा जयेत्॥
घोरान् सर्व्वानतीसारान् नानावर्णान् सवेदनान्।
अङ्गमर्दं समस्तञ्च तथार्शांसि प्रवाहिकां॥"
कुटजावलेहः॥ * ॥
"क्षत्वालबालं सुदृढं पिष्टैरामलकैर्भिषक्।
आर्द्रकस्य रसेनाशु पूरयेन्नाभिमण्डलं॥
नदीवेगोपमं घोरं प्रदुद्रं दुर्द्धरं नृणां।
सद्योऽतिसारमजयं नाशयत्येष योगराट्॥
पाठा पिष्टा च गोदुग्धा तथा मध्यत्वगाम्रजा।
अतीसारं व्यथादाह्युक्तं हन्युदरे धृता॥ * ॥
अथ वातातिसारस्य लक्षणं।
"अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः।
श्लक्ष्णदामं सरुक्कृच्छ्रं मारुतेनातिसार्य्यते"॥
अरुणमीषदक्तं। श्लक्ष्णं पुरीषं। सरुक्कृच्छ्रं शब्दो गुदे। तत्साहचर्य्यात् रुगपि गुद एव बोद्धव्या॥ * ॥ तस्य चिकित्सा।
"वचा चातिविषा मुस्तं बीजानि कुटजस्य च।
श्रेष्ठः कषाय एतेषां वातातिसारशान्तये"॥ * ॥
अथ पित्तातीसारस्य लक्षणं।
"पित्तात् पीतं श्लक्ष्णदुर्गन्धि हरितं द्रुतं।
गुदपाकोष्णमूर्च्छादाह्युक्तं प्रवर्त्तते"॥ * ॥
तस्य चिकित्सा।
"बिल्वशुक्रयवाम्बोदबालकातिविषाशृतः।
कषायोऽन्यतीसारं सामं पित्तसमुद्भवं"।
बिल्वादिकषायः॥ * ॥
"रसाञ्जनं सातिविषं कुटजस्य फलं त्वचं।
धातकीपुष्पकवेरञ्च पाययेत्तण्डुलाम्बुना॥
निहन्ति मधुना पीतं पित्तातीसारमुल्बणं।
अचिरं सन्दीपयत्येतत् शूलमाशु निवारयेत्॥
रसाञ्जनादिचूर्णं॥ * ॥ अथ पित्तातिसारभेदस्य

रक्तातीसारस्य संप्राप्तिमाह,—
"पित्तक्रुन्ति यदात्यर्थं द्रव्याण्यत्राति पैत्तिके ।
तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥*॥"
तस्य चिकित्सा ।
वत्सकत्वक्गार्द्धा दाड़िमफलरुम्भवा त्वक् च ।
त्वगयुगलं पलमानं विपचेदष्टांशसम्मिते तोये ॥
अष्टमभागं पेयं क्वाथं मधुनापिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतं ॥
कुटजदाड़िमक्वाथः ॥ * ॥
"कुटजातिविषा मुस्तं बालकं लोध्रचन्दनं ।
धातकी दाड़िमं पाठा क्वाथमेषां समाक्षिकं ॥
पिबेद्रक्तातिसारे तु दाहशूलामसंयुते ।
कुटजादिकषायोऽयं सर्व्वातीसारनाशनः ॥"
चन्दनमत्र रक्तचन्दनं कुटजादिक्वाथः ॥ * ॥
"गुड़ेन भक्षयेद्विल्वं रक्तातीसारनाशनं ।
आमशूलविबन्धघ्नं कुक्षिरोगहरं परं ॥"
विल्वं सुस्निग्धं बालविल्वगर्भं शीतं तत्स्वेदनोदकं चानुपेयं । गुड़विल्वं ॥ * ॥
"जम्ब्वाम्रामलकीनान्तु कुट्टयेत् पल्लवान् नवान् ।
संग्रह्य स्वरसं तेषां अजाक्षीरेण योजयेत् ॥"
तत्पिबेन्मधुना युक्तं रक्तातीसारनाशनं ।
जम्ब्वादिस्वरसः ॥ * ॥
"निष्क्वाथ्य मूलममलं गिरिमल्लिकायाः
सम्यक् पलद्वितयमम्बुचतुःप्रसृते ।
तत्पादशेषसलिलं खलु शोषणीयं
क्षीरे पलद्वयमिते कुशलैरजायाः ॥
प्रक्षिप्य माषकानष्टौ मधुनस्तत्र शीतले ॥
रक्तातिसारी तत्पीत्वा नैरुज्यं क्षिप्रमाप्नुयात्" ॥
कुटजक्षीरं ॥ * ॥
"पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत् ।
रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥"
शतावरीकल्कस्तद्घृतञ्च ॥ * ॥
"गोदुग्धनवनीतन्तु मधुना सितया सह ॥
लीढ़ं रक्तातिसारे तु ग्राहकं परमं मतं" ॥
नवनीतावलेहः ॥ * ॥
"पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्तदाहमपहन्ति" ॥
चन्दनमत्र श्वेतं । चन्दनकल्कः ॥ * ॥
"विरेकैर्बहुभिर्यस्य गुदं पित्तेन दह्यते ।
पच्यते वा ततोः कार्य्यं सेकप्रक्षालनादिकं" ॥
आदिशब्देन लेपादिग्रहः ।
"पटोलयष्टीमधुककाक्वाथेन घृतप्लुतैः ।
गुदप्रक्षालनं कार्य्यं तेनैव गुदसेचनं ॥
दाहे पाके हितं क्वाथीदुग्धं सच्छौद्रशर्करं ।
गुदस्य क्षालने सेके युक्तं पाने च भोजने ॥
गुदस्य दाहपाकयोः ।
"गुदनिःसरणे प्रोक्तं चाङ्गेरीघृतमुत्तमं ।
अतिप्रवृत्त्या महती भवेद्यदि गुदव्यथा ।
स्विन्नमूषकमांसेन तदा संस्वेदयेद्गुदं ॥
अथ गोधूमचूर्णस्य संनीतस्य तु वारिणा ।
साद्धास्य गोलकं कृत्वा मृदु संस्वेदयेद्गुदं ॥
(गुदव्यथायां)गुदभंगे गुदं स्नेहैरभ्यक्ताःप्रवेशयेत् ।
प्रविष्टं स्वेदयेन्मन्दं मूषकस्यामिषेण हि ॥"
मूषकस्यामिषेण काञ्जिकेनोत्स्विन्नेन शरख-पत्रादिस्थापितेन स्वेदयेत् ।
"मूषकस्याथ वसया पायुं सम्यक् प्रलेपयेत् ।
गुदभंशाभिधो व्याधिः प्रशाम्यति न संशयः ॥
चाङ्गेरीकोलदध्यम्लक्षारनागरसंयुतं ।
घृतं विपक्वं पातव्यं गुदभ्रंशगदापहं ॥
चाङ्गेरी चतुष्पत्रा अम्लशोनिका तस्याः स्वरसः कोलस्य क्वाथः दध्यम्लं दधिरूपमम्लं एतत्त्रयं मिलितं घृतात्चतुर्गुणं । क्षारनागरयोः कल्कः ।
चाङ्गेरीघृतं ॥ * ॥
"कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितं ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
पद्मिनीपत्रं पुरइनिपत्रं तत्संशोष्य संचूर्ण्य शर्करा युक्तं खादेत् । अयन्तु गुदभ्रंशोऽतीसारं विनापि भवति । ततः क्षुद्ररोगेषु लिखितः । अत्र तु गुदस्य दाहपाकव्यथाप्रसङ्गात् भ्रंशोऽपि लिखितः।
चिकित्सा तूभयत्र तुल्यैव ॥ * ॥ अथ श्लेष्मातिसारस्य लक्षणं ।
"श्वेतं स्निग्धं घनं विस्रं शीतलं मन्दवेदनं ।
गौरवारुचिसंयुक्तं श्लेष्मणा सार्य्यते शकृत् ॥
विस्रं स्वादामगन्धि यत् ॥*॥ अथ तस्य चिकित्सा।
"श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं ।
योज्यस्वामातिसारघ्नो यथोक्तो दीपनो गणः ॥
चव्यश्चातिविषा कुष्ठं बालबिल्वं सनागरं ।
वत्सकत्वक्फले पथ्या छर्द्दिश्लेष्मातिसारनुत्" ॥
चव्यादिक्वाथः ॥ * ॥
"हिङ्गु सौवर्चलं श्योषमभयातिविषा वचा ।
पीतमुष्णाम्बुना चूर्णमेषां श्लेष्मातिसारनुत् ॥"
हिङ्ग्वादिचूर्णं ॥ * ॥
"क्षमिश्रक्रवचाविल्वपेशीधान्याककट्फलं ।
एषां क्वाथं भिषग्दद्यात् अतीसारे बलासजे" ॥
विड़ङ्गादिक्वाथः ॥ * ॥ अथ द्विदोषजातिसाराणां लक्षणानि चिकित्सा च ।
"द्विदोषलक्षणैर्विद्यादतीसारं द्विदोषजं ।
तेषां चिकित्सा प्रोक्तैव विश्लिष्टा च निगद्यते ॥
कट्फलं मधुकं लोध्रत्वक् दाड़िमफलस्य च ।
सतण्डुलजलं चूर्णं वातपित्तातिसारनुत्" ॥
वातपित्तातिसारे ॥ * ॥
"चित्रकातिविषा मुस्तं बालबिल्वं सनागरं ।
वत्सकत्वक्फलं पथ्या वातश्लेष्मातिसारनुत्" ॥
वातश्लेष्मातिसारे ॥ * ॥
"मुस्ता सातिविषा मूर्व्वा वचा चकुटजः समाः ।
एषां कषायः सक्षौद्रः पित्तश्लेष्मातिसारनुत्" ॥
पित्तश्लेष्मातिसारे॥ अथ सन्निपातातिसारस्य लक्षणं ।
"तन्द्रायक्तो मोहसादास्यशोषी
वर्चं कुर्य्यान्नेकरूपं दवर्त्तः ।
सर्व्वोद्भूते सर्व्वलिङ्गोपपत्तिः
क्षुद्रोऽसाध्यो बालवृद्धाबलानां" ॥
अथ तस्य चिकित्सा ॥ * ॥
"पञ्चमूलीबलाबिल्वगुड़ूचीमुस्तनागरैः ।
पाटाभूनिम्बवर्हिष्ठकुटजत्वक्फलैः घृतं ॥
सर्व्वजं हन्त्यतीसारं ज्वरञ्चापि तथा वमिं ।
शूलोपद्रवं श्वासं कासं वापि सुदुस्तरं ॥
पञ्चमूल्यत्र सामान्या पित्ते योज्या कनीयसी ।
वाते पुनर्ब्बलासे च सा योज्या महती मता" ॥
वर्हिष्ठं बालकं । पञ्चमूल्यादिक्वाथः ॥ * ॥
"अभया नागरं मुस्तं गुड़ेन सह योजितं ।
चतुःसमेयं गुटिका स्यात्त्रिदोषातिसारनुत् ॥
आमातिसारमानाहं सविबन्धं विसूचिकां ।
ह्रदीनरोचकं हन्याद्दीपयत्याशु चानलं" ॥
चतुःसमो मोदकः ॥ * ॥
"तत्क्षणाक्षतकुटजत्वचं तण्डुलवारिणा ।
पिष्टां चतुःपलमितां जम्बुपल्लववेष्टितां ॥
सूत्रेण बद्धा गोधूमपिष्टेन परिवेष्टितां ।
लिप्तान्च घनपङ्केन निर्द्दहेद्गोमयाग्निना ॥
अङ्गारवर्णान्च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ।
ततो रसं समादाय शीतं क्षौद्रयुतं पिबेत् ॥
उक्ताः क्षय्याश्चिपुचेण पुटपाकास्तु कौटजः ।
जयेत् सर्व्वानतीसारान् दुस्तरान् सुचिरोत्थितान्
कुटजपुटपाकः ॥ * ॥
"कुटजत्वक्कृतः क्वाथो वस्त्रपूतो घनीकृतः ।
स लीढ़ोऽतिविषायुक्तः स्यात्त्रिदोषातिसारनुत् ॥
इच्छन्त्यन्यत्र मांसेन क्वाथादतिविषारजः ।
प्रक्षिपेद्वा चतुर्थांशमिति केचिद्वदन्ति हि" ॥
कुटजावलेहः ॥ * ॥
"पलमङ्कोठमूलस्य पाठां दार्व्वीञ्च तत्समां ।
पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान् ॥
क्षायशुष्कांश्च तान् कुर्य्यात्तेष्वेकं तण्डुलाम्बुना ।
पेषयित्वा प्रदद्यात्तं पानाय गदिने भिषक् ॥
वातपित्तकफोद्भूतान् द्वन्द्वजान् सान्निपातिकान् ।
हन्यात् सर्व्वानतीसारान् वटकोऽयं प्रयोजितः"॥
अङ्कोठवटकः ॥ * ॥ अथागन्तुजस्य शोकातिसारस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।
तैस्तैर्भावैः शोचतोऽत्याशनस्य
वाय्वोष्मा वै वह्निमाविश्य जन्तोः ।
कोष्ठं गत्वा क्षोभयेत् तस्य रक्तं
तच्चाधस्तात् काकयन्तीप्रकाशं ॥
निर्गच्छेद्वै विड्विमिश्रं क्वचिच्च
निर्गन्धं वा गन्धवद्वातिसारः ।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं
रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥
अयमर्थः।तैस्तैर्भावैर्बन्धुवित्तक्षयादिभिः शोचतः शोकं कुर्व्वतः। जन्तोः प्राणिनः। वाय्वोष्मा वाय्वः शोकजदेहोष्मणा जनितं नेत्रनासागलादिषु जलं तेन सहितः उष्मा शोकजं देहतेजः। स कोष्ठं गत्वा वह्निमाविश्य जठराग्निं मन्दीकृत्य। वाय्वग्निसाहित्यादुष्णाग्नेरपि वह्नेर्मन्दीभाव इति न दोषः।वह्नेर्मन्दीभावादेव अस्याशनस्येति जन्तोर्विशेषणं। ततश्चास्य जन्तोः रक्तं क्षोभयेत् स्वस्थानाच्चालयेत्। इति संप्राप्तिः॥ अथ लक्षणं। तच्च रक्तं अधस्तात् गुदात् काकयन्तीप्रकाशं गुञ्जाफलसदृशं विड्विमिश्रं गन्धवच्च। अविट् निर्गन्धं वा निर्गच्छेत्। शोकोत्पन्नोऽतिसारः अतिमात्रं दुश्चिकित्स्यः। शोकाप-

नोदनं विना केवलेन भेषजेन प्रतिकर्त्तुमशक्यत्वात्। एषोऽतिसारः वैद्यैः कष्टः कष्टेन साध्यः। प्रदिष्टः कथित इत्यर्थः ॥ * ॥ अथागन्तुजत्वेन साम्यात् भयातिसारस्यापि संप्राप्तिपूर्ब्बकं लक्षणमत्रैवाह।

"भयेन क्षोभिता दोषा दूषयन्ति मलं यदा।
तदातिसार्य्यते तन्तु क्षिप्रमुष्णजलप्लवं ॥
वातपित्तातिसारस्य प्रायो लिङ्गैः समन्वितं।
न भयोपशमाच्छम्भैर्यस्मिन्स्यात् सभयात् स्मृतः॥

प्लवत इति प्लवं जले प्लवमानं। ननु भयातिसारस्य कथमागन्तुजत्वमयमपि दोषज एव। यत आह। भयेन क्षोभिता दूषिता दोषा मलं दूषयन्ति। तन्मलमतिसरति। अत्र पूर्ब्बमेव दोषसम्बन्धः। उच्यते।

"रागद्वेषभयात् ये च ते स्युरागन्तवो गदाः"।

इति वचनाद्भयातीसार आगन्तुज एव। श्लोकस्य त्वयमर्थः। भयेनैव हेतुभूतेन दोषा वातपित्तकफा अतीसारणाय क्षोभिताः सञ्चालिताः न दूषिता भयेन त्रयाणामपि दोषाणां दूषणासम्भवात्। अतिसर्त्तुं चलिता वातपित्तकफा मलं दूषयन्ति तत् सर्व्वं वातपित्तकफमलं भयेनैवातिसार्य्यते। पश्चाद्दातसम्बन्धो भयादायुरिति वचनात्। अतएव भयातिसारे वातहर्य्यव क्रिया कथितेति समाधिः ॥ * ॥ अथ तयोश्चिकित्सा।

"भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत्।
तयोर्व्वातहरी कार्य्या हर्षणाश्वासनैः क्रिया" ॥

वातातिसारवत् वातातिसारलक्षणैः। तयोश्चिकित्सा च हर्षणाश्वासनपूर्ब्विका वातहरी कार्य्या ॥ * ॥ अथामातीसारस्य संप्राप्तिपूर्ब्बकं लक्षणमाह।

"अन्नाजीर्णात् प्रदुताः क्षोभयन्तो-
दोषाः कोष्ठे धातुसंघान् मलांश्च।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षण्मलेनं वदन्ति ॥

अन्नं भुक्तं तदजीर्णं चेति कर्म्मधारये अन्नाजीर्णात् तस्मात् प्रदुता उपदुताः। क्षोभयन्तः चालयन्तः। नैकश इत्यत्र नाकादित्वान्नात्तरविपर्य्ययः। नन्वामेन दोषा दूष्यन्ते गुर्व्वादिभक्षणादिभिरिव ते चातीसारमुत्पादयन्ति। नत्वाममेवातीसारमुत्पादयति। तेनामातीसारोऽपि दोषज एव किमर्थमयं पृथगुच्यते। उच्यते। आमातीसारस्य चिकित्साविशेषार्थं सम्प्राप्तिपूर्ब्बको लक्षणविशेषः पृथगुक्तः। कः स चिकित्साविशेषस्तमाह। अतिसारेषु सर्व्वेष्वेव संग्राहकमौषधमुक्तमामातीसारे तु ग्राहकं विरुद्धं। यत उक्तं।

"नामे संग्राहकं विद्यादतीसारे कदाचन।
संगृह्णीतो बलादामो विकारान् कुरुते बहून्" ॥

इति। बलाद्भेषजबलात्। विकारान् ग्रहण्याध्मानशूलगुल्मप्लीहोदरज्वरादीन् ॥ * ॥ तस्य चिकित्सा।

"वत्सकातिविषा मुस्ता बिल्वहिङ्गुयवाम्बुदाः।
चित्रकेण युता एषां क्वाथ आमातिसारनुत्" ॥

आमातिसारस्य चिकित्सा पूर्ब्बमुक्तैव ॥ * ॥

"शोथघ्नीन्द्रयवाः पाठा विड़ङ्गातिविषा घनाः।
क्वथिताः सोषणाः पीताः शोथातिसारनाशनाः"॥

शोथघ्नी पुनर्नवा। उषणं मरिचं। सशोथातीसारे ॥ * ॥

"आम्रास्थिमध्यमालूरफलक्वाथः समाक्षिकः।
शर्करासहितो हन्यात् कुर्य्यतीसारमुल्बणं ॥"

मालूरफलं बिल्वफलं।

"कषायो भक्षसुद्गस्य सलाजमधुशर्करः।
निहन्याच्छर्द्यतीसारं तृष्णादाहं ज्वरं भ्रमं" ॥

कुर्य्यतीसारे ॥ * ॥

"दध्ना ससारेण समाक्षिकेण
भुञ्जीत निःसारकपीडितस्तु।
सतप्तकुष्माण्डकथितेन चापि
क्षीरेण शीतेन मधुप्लुतेन" ॥

निःसारकः निढ़ाही इति लोके। सतप्तकुष्माण्डकथितेन। सतप्तसुवर्णरजतेतरलोहनिर्व्वापणकथितेन। भुञ्जीत पथ्यमिति शेषः ॥ निःसारके ॥ * ॥

"दीप्ताग्निर्निष्पुरीषो यः सार्य्यते फेनिलं शनैः।
स पिबेत् फाणितं शुण्ठीं दधि तैलं पयो घृतं ॥
बला विश्वाप्लुतं क्षीरं गुड़तैलानुयोजितं।
दीप्ताग्निं पाययेत् प्रातः सुखदं वर्च्चसक्षये" ॥

पुरीषक्षये ॥ * ॥

"तुलां संकुच्य विल्वस्य पचेत् पादावशेषितं।
सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः ॥
विल्वं सधातकीकुष्ठं शुण्ठी रास्ना पुनर्नवा।
देवदारु वचा मुस्तं लोध्रमोचरसान्वितं ॥
एभिर्म्मर्दग्निना पक्वं ग्रहण्यर्शोऽतिसारनुत्।
विल्वतैलमिति ख्यातमत्रिपुत्रेण भाषितं ॥
ग्रहण्यर्शोऽधिकारे ये खेहाः समुपदर्शिताः।
प्रयोज्याश्चेऽतिसारेऽपि त्रयाणां तुल्यहेतुता" ॥

त्रयाणां ग्रहण्यर्शोऽतिसाराणां। विल्वतैलं ॥ * ॥ अथातिसारभेदस्य प्रवाहिकाख्यस्य संप्राप्तिपूर्ब्बकलक्षणमाह।

"वायुः प्रदुष्टो निचितं बलासं
नुदत्यधस्तादहिताशनस्य।
प्रवाहतोऽल्पं बहुशो मलाक्तं
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः" ॥

अस्यायमर्थः। अहिताशनस्य अतिशयेन वातलभक्ष्यभोजिनः। प्रदुष्टो वायुः प्रवाहतः कण्ठहृद्वलेन सशब्दं वायुमपानमार्गेण त्यजतः। निचितं सञ्चितं। बलासं कफं। मलाक्तं पुरीषयुक्तं अल्पं। बहुशः वारंवारं। अधस्तात् गुदमार्गेण। नुदति प्रेरयति। तज्ज्ञाः पुराणा वैद्याः। तां प्रवाहिकां। प्रवदन्ति कथयन्ति ॥ * ॥

तस्या वातजादिभेदेन रूपमाह।

"प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च।
सशोणिता शोणितसम्भवाच्च
ताः स्नेहरूक्षप्रभवा मतास्तु" ॥

तत्र रूक्षप्रभवा वातजा। स्नेहप्रभवा कफजा। तु शब्दात्तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च। तासामतीसारवदादिशेच लिङ्गं क्रमं चामविपक्वताच्च। क्रमं चिकित्सां ॥ * ॥ तस्याश्चिकित्सामाह।

"बिल्वपेशीं गुड़ं लोध्रं तैलं मरिचसंयुतं।
लीढ्वा प्रवाहिकाक्रान्तः सत्वरं सुखमाप्नुयात्" ॥

बिल्वादिरवलेहः ॥ * ॥

"धातकीवदरीपत्रकपित्थरसमाक्षिकं।
सलोध्रमेकतो दध्ना पिबेन्निर्व्वाहिकार्दितः" ॥

एकतः प्रत्येकं दध्ना पिबेदित्यर्थः। निर्व्वाहिका प्रवाहिका। धातक्यादिः ॥ * ॥ अथ असाध्यातिसारिणोलक्षणमाह।

"पक्वजाम्बवसंकाशं यस्तत्खण्डनिभं तनुं।
घृततैलवसामज्जवेसवारपयोदधि।
मांसधावनतोयाभं क्षय्यं नीलारुणप्रभं ॥
कृष्णं सक्तदालोक्य नातिसारमुपक्रमेत्।
तृष्णादाहरुचिश्वासहिक्कापार्श्वास्थिशूलिनं" ॥

संमूर्च्छारतिसंमोहयुक्तं पक्वबलीगुदं।
प्रलापयुक्तञ्च भिषक् वर्ज्जयेदतिसारिणं॥ संमूर्च्छा सकलेन्द्रियमनसां स्वस्वविषयग्रहणाग्रहणहेतुरवस्थाविशेषः। संमोहः विप्लुतमतित्वं।

"असंदृतगुदं क्षीणं शूलाध्मानैरुपद्रुतं।
गुदे पक्वे गतोष्माणमतीसारिणमुत्सृजेत् ॥
असंदृतगुदं गुदसंवरणाक्षमं।
गुदे पक्वे गतोष्माणं गुदपाकारम्भके पित्ते विद्यमानेऽपि शीतगात्रं नष्टाग्निं वा।

"श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितं।
विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥
शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकं।
हृद्हिक्कार्त्तञ्च हिक्काच्च दृष्ट्वातिसारिणं त्यजेत् ॥
हृत्पादाङ्गुलीसन्धिप्रपाको मूत्रनिग्रहः।
पुरीषस्योष्णातातीव मरणायातिसारिणां ॥
अतीसारी राजरोगी ग्रहणीरोगवानपि।
मांसाग्निबलहीनो यो दुर्लभं तस्य जीवनं ॥
बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरुपद्रुतः।
अपि यूनामसाध्यः स्यादतिदुष्टेषु धातुषु" ॥

एतैर्लिङ्गैः पर्व्वोक्तैः पक्वजाम्बवसंकाशत्वादिभिः॥ * ॥

अथातिसारयुक्तस्य लक्षणं।

"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्लघु कोष्ठस्य स्थितस्तस्योदरामयः" ॥

उच्चारं पुरीषं विना स्थितः निरुद्ध उदरामयोऽतीसारः ॥ * ॥ अथातीसारिणो वर्ज्जनीयानाह।

"स्नानावगाहनाभ्यङ्गगुरुस्निग्धादिभोजनं।
व्यायाममग्निसन्तापमतीसारी विवर्ज्जयेत्" ॥

स्नानमुद्वृतजलेन। अवगाहनं नद्यादौ। इत्यतीसाराधिकारः। इति भावप्रकाशः ॥

अतिसारकी, [न्] त्रि, (अतिसार + स्वार्थे कन् ततो मत्वर्थे इन्) सातिसारः। अतिसाररोगयुक्तः। उदरामयी। इत्यमरः ॥

अतिसाम्या, स्त्री, (साम्यं समतामतिक्रान्ता अत्यादीति समासः अतुल्यस्थलयुक्ता इति यावत्।)

लतायष्टिमधु। इति राजनिर्घण्टः॥ अस्या गुणाः क्लीतनकशब्दे द्रष्टव्याः॥ (यष्टिमधु इति भाषाः।)

अतिस्किरः, त्रि, (स्कायी ओप्यायी वृद्धौ अति + स्काय + स्कायितञ्चिवञ्चिशकीत्यादिसूत्रेण रक् एषोदरादित्वात् आयभागस्य इ अतिवृद्धः) अतिस्फूर्त्तिशाली। तत्पर्य्यायः। स्फोरः २। इति जटाधरः॥

अतिहसितं, क्ली, (अतिशयेन हसितं हास्यं हस् + भावे क्तः।) अतिशयहास्यं। इति जटाधरः॥ (ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च। नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥ "मधुरस्वरं विहसितं सांसस्मिरः कम्पनमवहसितं। अपहसितं साश्रुत्वं वित्तिमाङ्गं भवत्यतिहसितं"॥ इति साहित्यदर्पणे॥)

अतिहासः, पुं, (अतिशयेन हासः हास्यम् अति + हस् + भावे घञ्।) सशब्दहासः। तत्पर्य्यायः। अनुस्यूतः २। इति हेमचन्द्रः॥

अतीतं, त्रि, (अति + इण् + क्तः) भूतकालः। तच्च तिखो धी टी ठी विभक्तयो भवन्ति। यथा भवद्भूतभव्ये त्रिभ्यः क्यादयः। क्यादयः क्रमात्तिखस्त्रिस्त्रः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः। इति मुग्धबोधव्याकरणं॥ तस्य लक्षणादि यथा। वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं। लङ्लुङोरतीतत्वं। लिट्लक्षणोर्व्वक्तुः परोक्षत्वं अतीतत्वञ्च। लुङोऽतीतत्वं क्रियातिक्रमश्च। कुतश्चिद्धेतुगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः। क्तक्तवत्वोरतीतत्वं। इति सारमञ्जरी॥

अतीतः, त्रि, (अति इण् कर्त्तरि क्तः।) मतः। भूतः। अतिक्रान्तः। यथा,—
"न नस्यं न्यूनसम्बन्धे नातीताग्रीतिवत्सरे"।
इति वैद्यकपरिभाषा॥ सङ्गीतशास्त्रमते मानप्रभेदः॥

अतीन्द्रियं, त्रि, (इन्द्रियमतिक्रान्तम् अत्यादीति समासः।) अप्रत्यक्षं। प्रत्यक्षाविषयं। इन्द्रियागोचरं। इन्द्रियायाह्यं। इत्यमरः॥ ("योऽसावतीन्द्रियग्राह्यःसूक्ष्मोऽव्यक्तः सनातनः"। इति मनुः।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः"॥ इति रघुवंशे॥)

अतीव, व्य, (अत्येव इव अवधारणे प्रादिसमासः, अवधृतातिशयेऽत्यन्तातिशये च।) अतिशयः। इत्यमरः॥
("अहं हि कारणं श्रुत्वा वैरस्यातीवमानद"॥ इति रामायणे॥)

अतीसारः, पुं, अतिसाररोगः। इति वैद्यकं॥

अतुलः, पुं, (नास्ति तुला सादृश्यं यस्य सः।) तिलवृक्षः। इति शब्दचन्द्रिका। तुलनारहिते त्रि॥ ("राज्ञसेन्द्रप्रभावेण श्रिया चातुलया तथा"॥ इति रामायणे॥)

अतुल्यं, त्रि, (न तुल्यं सदृशं नञ्समासः।) निस्तुल्यं। अनुपमं। असाम्यं। असदृशं। यथा,—
"अतुल्यमहसा साकं मम रामेण विग्रहः"।
इति भट्टिः॥

अतुष्टिकरं, त्रि, (तुष्टिं सन्तोषं करोति तुष्टि + कृ + कर्त्तरि टच् उपपदसमासः स्त्रियां ङीप् अतुष्टिकरी।) सन्तोषाजनकं। यथा मनुः,—
"अनिर्देशञ्च प्रेताग्नं अतुष्टिकरमेव च"॥
इत्याङ्किकतत्वं।

अतृप्तिः, स्त्री, (तृप् + भावे क्तिन् न तृप्तिः सन्तोषः नञ्समासः। बहुव्रीहौ तु तृप्तिरहितः असन्तोषकरः।) तृप्त्यभावः। अपरितुष्टिः। अज्ञानाभिलाषः। यथा,—
"उष्णाद्दग्धितमः प्रवेशदहनं कङ्क्षतिक्ता रसा।
वर्णः पाण्डुविवर्जितः क्षपितता कर्म्माणि पित्तस्यवै"
इति रक्षितः॥ अतृप्तेऽपि च॥

अतेजः, [स्] क्ली, (न तेजः तेजोविरोधितमः नञ्समासः।) क्षाया इति राजनिर्घण्टः॥ तेजोरहिते त्रि॥

अत्कः, पुं, शरीरावयवः। अङ्गं। इत्युणादिकोषः॥

अत्कः, त्रि, (अतति सततमनित्यतया विकारं गच्छति अत् + कन् अतति सततं गच्छति अत् + कन्) पथिकः। भाग्यः। इत्युणादिकोषः॥

अत्तट ड अतिक्रमे। बधे। इति कविकल्पद्रुमः॥ दन्त्यवर्गाद्योपधः। ड अतिदृष्टिषते। इति दुर्गादासः॥

अत्ता, स्त्री, (अतति सततं स्नेहं संबध्नाति अत् + तक् स्त्रियां टाप्।) माता। ज्येष्ठा भगिनी। इत्यमरटीकायां रमानाथः॥ अत्ता मातायज्ञसा। इति नानार्थकोषः॥ प्राकृतभाषायां श्वश्रूः। इति साहित्यदर्पणटीका॥

अत्तिः, स्त्री, (अत्यते सततं कर्म्मणि सम्बध्यतेऽनया, अत् करणे क्तिन् माता च।) नाद्योक्तौ ज्येष्ठा भगिनी। इति शब्दरत्नावली।

अत्तिका, स्त्री, (अत्ति + स्वार्थे कन्) अन्तिका। नाद्योक्तौ ज्येष्ठा भगिनी। इति भरतः द्विरूपकोषश्च।

अत्नुः, पुं, (अतति सततं गच्छति अत् + कर्त्तरि नु वायुः सततगन्ता पथिकः।) सूर्य्यः। इत्युणादिकोषः॥

अत्यः, पुं, (अतति शीघ्रं गच्छति अत् + कर्त्तरि यत्, क्वचिदपवादविषयेऽप्युत्सर्गोऽप्यभिनिविशते इति न्यायात् अन्यथा हलन्तात् ण्यति आत्य इति स्यात् द्रुतगामी अश्वः।) अश्वः। वैदिकशब्दोऽयं॥

अत्यन्तं, क्ली, (अन्तं सीमामतिक्रान्तम् अत्यादीति समासः।) अतिशयः। यथा। अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोरुहौ। इति नरहरिकविः॥

अत्यन्तकोपनः, त्रि, (अत्यन्तं कोपनः क्रोधशीलः द्वितीयातत्, कुप् + कर्त्तरि युच्।) अतिशयक्रोधी। तत्पर्य्यायः। चण्डः २। इत्यमरः॥

अत्यन्तगामी, [न्] त्रि, (अत्यन्तं शीघ्रं गच्छति अत्यन्त + गम् + णिनि उपपदसमासः।) अतिशयगमनशीलः। अतिशीघ्रगमनकर्त्ता। तत्पर्य्यायः। अत्यन्तिकः २। इति हेमचन्द्रः॥

अत्यन्तः सुकुमारः, पुं, (अत्यन्तः सुकुमारः कर्म्मधारयः।) कङ्कनीवृक्षः। इति राजनिर्घण्टः॥

अत्यन्तिकः, पुं, (अत्यन्तं गच्छति अत्यन्त + ठन् ठस्येक इति ठस्य इकः अति सातिशयमन्तिकं कर्म्मधारयः, अतिनिकटम्।) अतिशयभ्रमणकर्त्ता। अत्यन्तगामी। इति हेमचन्द्रः॥

अत्यन्तीनः, त्रि, (अन्तस्यात्ययः अव्ययीभावसमासः। अत्यन्तं गामी द्वितीयातत्पुरुषः। लक्ष्मीं परम्परोणां त्वमत्यन्तीनत्वमुन्नये इति भट्टिः।) भृशङ्गामी। अतिशयगमनशीलः। इत्यमरः॥

अत्यम्लं, क्ली, (अत्यन्तः अम्लोरसः फलपत्रादौ यस्य सः।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेंतुल इति भाषा॥

अत्यम्लपर्णी, स्त्री, (अत्यम्लं पर्णं पत्रं यस्याः सा जातित्वात् ङीप्।) लताविशेषः। तत्पर्य्यायः। तीक्ष्णा २ काण्डरा ३ वल्लिपूरणः ४ करवेल्लो ५ वयस्था ६ अरण्यवासिनी ७। अस्या गुणाः। तीक्ष्णाम्लत्वं। प्लीहशूलविनाशित्वं। वातहारित्वं। अग्निरुचिकारित्वं। गुल्मश्लेष्मरोगापहारित्वञ्च। इति राजनिर्घण्टः॥

अत्यम्ला, स्त्री, (अत्यन्तः अम्लरसो यस्याः सा स्त्रियां टाप्) वनबीजपूरः। मधुरलेबु। मधुटाबा इति ख्याता। इति रत्नमाला॥

अत्ययः, पुं, (अति + इण् + भावे अच्।) मृत्युः। अतिक्रमः। दण्डः। दोषः। छद्मं। इत्यमरः॥ ("जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। आकाशमिव पङ्केन न स पापेन लिप्यते॥ इति मनुः॥)

अत्यर्थं, क्ली, (अर्थमतिक्रान्तं अत्यादीति समासः।) अतिशयः। तद्विशिष्टे वाच्यलिङ्गः। इत्यमरः॥। ("लक्ष्मणो रामभत्यर्थमुवाच हितकाम्यया"। इति रामायणे॥)

अत्यल्पं, त्रि, (अत्यन्तमल्पं मनाक्।) यत्किञ्चित्। अतिसूक्ष्मं। तत्पर्य्यायः। अल्पिष्ठं २ अल्पीयः ३ कणीयः ४ अणीयः ५। इत्यमरः॥

अत्याकारः, पुं, (अति आधिक्येन आकारः तिरस्कारः। आ + कृ + भावे घञ्।) अतिशयितः आकारो देहः कर्म्मधा। वृहद्देहः। अतिशयितः आकारो यस्य सः तद्विशिष्टः।) न्यक्कारः। तिरस्कारः। इति हेमचन्द्रः॥

अत्याचारं, क्ली, (आचारमतिक्रान्तं अत्यादीति समासः।) विरुद्धाचरणं। आचारमतिक्रम्य इत्यव्ययीभावसमासनिष्पन्नं॥

अत्याचारः, पुं, (अति अनुचित आचारः कर्म्मधा।) अनुचिताचारः। असङ्गताचरणं। आचारोल्लङ्घनं। अन्यायः॥ (अति अनुचितः आचार आचरणं यस्य सः अन्यायाचरणकारी।)

अत्याज्यं, त्रि, (त्यक्तुं न शक्यं अति त्यज् + शक्यार्थे ण्यत्, कुत्वाभावः।) त्यागानर्हं। अत्यक्तव्यं। अत्यजनीयं। यथा, यत्तु पतितस्त्रीगमनस्य लघुत्वं प्रायश्चित्तविवेकस्तद्भिन्नं तदत्याज्यापरं। इति प्रायश्चित्ततत्त्वं॥

अत्याजः, पुं, (अति अत्याग्रयेण याति चतुर्दिक्षु अजति भूषति अति + आ + अज + कर्त्तरि अच्। लालचिता इतिभाषा) रक्तचित्रकवृक्षः। इति राजनिर्घण्टः॥

अत्याशा, स्त्री, (अतिशयेन आशा) अतिशयाशा। अत्यन्तस्पृहा। असम्भावनीयवाञ्छा। यथा,—
"अत्याशाभिरुपागताध्वगगणान् धन्यावनौ तापितान्नोपचर्त्तयितुं त्तमोऽस्मि मम तद्दुःखैर्मनो दूयते"। इत्युद्भटः॥

अत्याहारी [न्] त्रि, अतिपूर्ब्बाऽपूर्ब्बहृधातोः कर्त्तरि णिन् प्रत्ययनिष्पन्नः। अतिशयाहारकर्त्ता। बह्वाशी। अपरिमितभोजी॥

अत्याहितं, क्ली, (अत्यन्तमाधीयते तन्निवारणाय चित्तं निधीयते ऽत्र अति आ + धा + क्तोऽधिकरणे द्रव्यगतिप्रत्ययवसानार्थेभ्यश्च इति सूत्रेण क्त अधिकरणे) महाभीतिः। अतिशयभयं। जीवानपेक्षि कर्म्म। जीवनाशारहितसाहसकर्म्म। इत्यमरः॥ (अत्याहितं किमपि राक्षसकर्म्म कुर्य्यात्। इति रामायणं।)

अत्युक्तिः, स्त्री, (अतिशयेन उक्तिः कथनम् अति + वच् + भावे क्तिन्) आरोपितकथनं। अतिशयोक्तिः। असम्भवोक्तिः। अलङ्कारविशेषः। यथा।
"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः"॥
इति चन्द्रालोकः॥

अत्यूहः, पुं, (अतिशयेन ऊह्यते रवजनितलक्षणावर्त्तकरूपं यथा तथा शब्द्यायते यः अति + ऊह + कर्त्तरि अच्। अतिशयितः ऊहस्तर्कः प्रादीति समासः, अतितर्कः) कालकण्ठः। दात्यूहपक्षी। इति मेदिनी॥ अतिशयवितर्कः॥ (अत्यूहा गौलिकायां स्त्री कलकण्ठखगे पुमान्॥ इति मेदिनी॥)

अत्यूहा, स्त्री, (अतिशयितः ऊहः पुण्योत्कर्षेण तर्को यस्याः सा स्त्रियां टाप्) नीलिका। श्रेयस्किका। इति मेदिनी॥

अत्र, व्य, एतद् + सप्तम्यर्थे त्रल् एतदशब्दस्य अआदेशः) एतस्मिन्। एखाने इति भाषा। एतच्छब्दस्य सप्तम्यास्त्रादेशे रूपोऽयं॥ (अपि सन्निहितोऽत्र कुलपतिः॥ इति शाकुन्तले॥)

अत्रभवान्, [त्], त्रि, (एतद् + अन्येभ्योऽपीति प्रथमार्थे त्रल् अत्र अयं भवान् कर्म्मधारयः।) पूज्यः। आद्यः। मान्यः। नाटकेऽस्य प्रयुरप्रयोगः। इति हेमचन्द्रः॥ (नूनमत्रभवतः शरीरावस्थितिं सर्व्वथायमनुयाति सायकः॥ इति भारविः॥)

अत्रिः, पुं. (अत्ति स्म एकगरुडवेगेव सर्व्वमेव गच्छाजलं पीतवान् अद् + कर्त्तरि ट्रन् दस्य तः।
"मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
ब्रह्मणोः मानसाः पुत्राः वशिष्ठश्चेति सप्त ते"॥
इति) सप्तर्षिमध्ये ऋषिविशेषः। स च ब्रह्मणश्चक्षुषो जातः। तस्य भार्य्या कर्दममुनिकन्या अनसूया। पुत्राः दत्तः १ दुर्व्वासाः २ चन्द्रश्च ३। इति श्रीभागवतं॥ (यथा मनुः,—
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुं।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च"॥)

अत्रिजातः, पुं, (अत्रेर्जात उत्पन्नः पञ्चमीतत्पुरुषः।) चन्द्रः। द्विजन्मा। यथा,—
"अत्रिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च।
क्व सा चैवात्रिजातस्य तमसो दुर्जनस्य च"॥
इति त्रिविक्रमभट्टः॥

अत्रिदृग्जः, पुं, (अत्रेः दृक्चक्षुः षष्ठीतत्पुरुषः तस्मात् जातः अत्रि दृक् + जन् + ड उपपदसमासः।) चन्द्रः। इति हेमचन्द्रः॥

अत्रिनेत्रजः, (पुं,) चन्द्रः। इति जटाधरः॥

अत्रिनेत्रप्रसूतः, पुं, (अत्रिनेत्रात् प्रसूतः पञ्चमीतत्पुरुषः) चन्द्रः। इति हलायुधः॥

अत्रिनेत्रभूः, पुं, (अत्रिनेत्रात् भवति यः अत्रिनेत्र + भू + कर्त्तरि क्विप्) चन्द्रः। इति त्रिकाण्डशेषः॥

अत्रिभारद्वाजिका, स्त्री, अत्रिश्च भरद्वाजश्च द्वन्द्वः तयोः स्त्रीपुंसयोर्म्मैथुनात् जाता अत्रि भरद्वाज + "द्वन्द्वादुन् वैरमैथुनयोरिति" वुन् तस्य अकः स्त्रियां टाप्) अत्रिभारद्वाजी विवाहः। इति शब्दरत्नावली॥

अथ, व्य, (अर्थ + ड एषोदरादित्वात् रस्य लोपः।) मङ्गलं। अनन्तरं। आरम्भः। प्रश्नः। कार्त्स्न्यं। इत्यमरः॥ अधिकारः। संशयः। विकल्पः। समुच्चयः। इति मेदिनी॥ (अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः॥ इति रघुवंशे॥)

अथकिं (अथं पूर्ब्बोक्तं वाक्यं कवते स्वीकरोति अर्थ + कु + डिम् एषोदरादित्वात् रस्य लोपः। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः।) व्य, स्वीकारः। इति शब्दरत्नावली॥

अथर्ब्ब [न्] क्ली, (अथ लोकमङ्गलाय अर्ब्बते प्राप्नोति यत् अथ + अर्ब्ब + कर्म्मणि अनिप् शकन्ध्वादित्वात् पररूपं। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरः) वेदविशेषः। इति मेदिनी॥ तत्तु चतुर्थवेदः नवशाखायुक्तः। अस्य विवरणं वेदशब्दे द्रष्टव्यं॥

अथर्ब्बणः, पुं, (अथर्ब्ब विद्यतेऽस्य न प्रत्ययः।) शिवः। इति त्रिकाण्डशेषः॥

अथर्ब्बणिः, पुं, (अथर्ब्ववेदं नयति ज्ञानविषयं प्रापयति अथर्ब्वन् + नी + कर्त्तरि क्विप्। एषोदरादित्वात् ह्रस्वः) अथर्ब्ववेदज्ञब्राह्मणः। पुरोहितः। इति मेदिनी॥

अथर्ब्वा [न्] पुं, (अथ लोकमङ्गलाय अर्ब्वति वेदविशेषं प्रस्तौति अथ + अर्ब्व + अनिप् शकन्ध्वादित्वात् पररूपं) ब्राह्मणः। इति मेदिनी॥ (ब्रतपदपंक्तिरथर्ब्वणेव वेदः॥ इति भारविः॥)

अथो, व्य, (अर्थ + डो एषोदरादित्वात् रलोपः) मङ्गलं। आनन्तर्य्यं। समुच्चयः। प्रश्नः। आरम्भः। कार्त्स्न्यं। अधिकारः। संशयः। विकल्पः। इति मेदिनी॥
("स्त्रियो रत्नान्यथो विद्या धर्म्मः शौचं सुभाषितं।
विविधानि च शिल्पानि समादेयानि सर्व्वतः"॥
इति मनुः॥)

अद इ बन्धे। (भ्वादि परस्मैपदी सेट् इदित्) इति कविकल्पद्रुमः॥ इ अन्द्यते। इति दुर्गादासः॥

अद ल आ भक्षणे (अनिट् परस्मैपदी अदादि।) इति कविकल्पद्रुमः॥ ल अत्ति। आ अत्ता। गमाहनतमनित्यमिति न्यायात् घसिभसोरिति अतीत्यपीति वररुचिः। इति दुर्गादासः॥

अदः [स्] त्रि, (न दस्यते अङ्गुलिरत्त्यिप्यते यत्र न + दस् + बाहुलकात् क्विप् चिलिङ्गत्वञ्च।) एतत्। पुरोवर्त्ति। एइ इति भाषा। परं। परोक्षभूतं। इति मेदिनी। सेइ इति भाषा।

अदत्तं, त्रि, (न दत्तम् उत्सृष्टं नञ्समासः नञश्च अप्राशस्त्ये यथा कारिकायां।
"तत् साहश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥
इति।) अन्यायेन दत्तं। यथा। यत् पुनरन्यायेन दत्तं तददत्तं। षोड़शप्रकारमपि प्रत्याहर्त्तव्यमेव इत्यर्थादुक्तं भवति। नारदेन च। दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं।
"अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः।
तथोन्मत्तापरीहासव्यत्यासच्छलयोगतः॥
बालमूढ़ार्त्तदत्तत्वात्तमत्तोन्मत्तापवर्জितं।
कर्त्ता ममेदं कर्म्मेति प्रतिज्ञाभेच्छया च यत्॥
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति॥
अयमर्थः। भयेन वन्दिग्राहादिभ्यो दत्तं। क्रोधेन पुत्रादिवैरनिर्य्यातनायान्यस्मै दत्तं। पुत्रवियोगादिनिमित्तशोकाविष्टेन दत्तं। उत्क्रोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तं। परिहासेनोपहासेन दत्तं। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः श्रुतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोड़शवर्षेण। मूढ़ेन लोकवेदानभिज्ञेन। अस्वतन्त्रेण पुत्रदासादिना। आर्त्तेन रोगाभिभूतेन मत्तेन मदनीयप्रमत्तेन। उन्मत्तेन वातिकाद्युन्मादयस्तेन। अपवर्জितं दत्तं। तथायं मदीयमिदं कर्म्म करिष्यतीति प्रतिज्ञाभेच्छया दत्तं। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तं। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि नूनमदत्तमित्युच्यते। प्रत्याहरणीयत्वात्। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयं।
"सस्नेहार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात्।
अदत्त्वा तु मृते दाप्यस्तत्सुतौ नात्र संशयः॥
इति कात्यायनस्मरणात्। यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति यस्मादेयं प्रयच्छति। तयोर्दोषो नारदेनोक्तः।
"गृह्णात्यदत्तं यो लोभात् यस्मादेयं प्रयच्छति।
अदेयदायको दण्ड्यस्तथा दत्तप्रतीच्छकः"॥
इति मिताक्षरा॥ कन्यकानां त्वदत्तानां। इति कात्यायनः॥

"नह्यदत्तां महीं पित्रा भरतः शास्तुमिच्छति" इति रामायणं ।)

अदत्ता, स्त्री, (न दत्ता नोत्सृष्टा नञ्समासः, नञ्च निषेधार्थः ।) अविवाहिता । इति स्मृतिः ।

अदनं, क्ली, (अद् भोजने भावे ल्युट् ।) भक्षणं । भोजनं । इति हेमचन्द्रः ॥

("इन्धनार्थमशुष्काणां द्रुमाणामवपातनं ।
आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनं तथा" ॥
इति मनुः ।)

अदभ्रः, त्रि, (दम्भ + रक् । दम्भमल्पं नदभ्रं नञ्समासः ।) प्रचुरः । बहुः । इत्यमरः ॥ (अदभ्रदर्भामविश्रय्य स स्थलीं जहासि निद्रामग्निवैः श्रिवारुतैः ॥ इति किरातार्জ্জुनीयं ॥)

अदर्शनं, क्ली, (दृश् दर्शने, भावे ल्युट्, नञ्समासः ।) दर्शनाभावः । (अदर्शनञ्च ते वीर भूयो मां तापयिष्यति ॥ इति रामायणं ।) असाक्षात् । दृष्ट्यगोचरं । तत्पर्य्यायः । विनाशः २ । इत्यमरः । (व्याकरणमते लोपः यथा ऋग्वेदप्रातिशाख्ये,— "विरुत्तिषु प्रत्ययादेरदर्शनम्" । इति ।)

अदलः, पुं, (न दल्यते भिद्यते यत्, न दल् + घञर्थे कन् ।) हिञ्जलवृक्षः । इति शब्दचन्द्रिका ॥ दलरहिते त्रि ॥

अदला, स्त्री, (नास्ति दलं पत्रं यस्याः सा ।) घृतकुमारी । इति शब्दचन्द्रिका ॥

अदाता, त्रि, (न दाता नञ्समासः । दा + तृच् ।) कृपणः । दानशक्तिरहितः । यथा,—
"अदाता पुरुषस्त्यागी स्वधनं त्यज्य गच्छति" ।
इति प्राचीनाः ॥
("कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता" ॥
इति मनुः ॥)

अदान्तः, त्रि, (न दान्तः नञ्समासः ।) तपःक्लेशासहिष्णुः । अकृतबाह्येन्द्रियनिग्रहः । इति पुराणं ॥

अदितिः, स्त्री, (दितिर्भिन्ना अदितिः । नञो दाञो डितिरिति शाकटायनोक्तेर्डितिप्रत्ययान्तो वा । अदनाददितिः वा ।) दक्षप्रजापतिकन्या । सा कश्यपपत्नी । देवमाता च । इति त्रिकाण्डशेषः ॥ भूमिः । अखण्डः । इति शब्दरत्नावली ॥

अदितिनन्दनः, पुं, (अदितेर्नन्दनः पुत्रः, षष्ठीतत्पुरुषः ।) देवता । इत्यमरः ॥

अदृक्, [ग्] त्रि, (नास्ति दृक् चक्षुर्यस्य सः ।) दृष्टिरहितः । अन्धः । इत्यमरः ॥

अदृश्यं, त्रि, (दृश् + कर्म्मणि क्यप् न दृश्यं, नञ्समासः ।) अदर्शनीयं । अदृश्यं । "यथा,— कन्यादेरतिकोमला त्रिभुवनव्याप्याप्यदृश्या जनैः" । इत्युद्भटः ॥

अदृश्यं, क्ली, (न दृश्यं नञ्समासः ।) अग्निजलादिद्वारा जातं भयं । इत्यमरः ॥ जन्मान्तरीयसंस्कारः । भाग्यं । यथा । "अदृश्यमप्यर्थमदृश्यवैभवात् करोति सुश्लिष्टनदर्शनातिथिं ॥ इति श्रीहर्षः । तच्च आत्मनोऽतीन्द्रियगुणः । इदं वासनाजन्यं । तत्त्वज्ञाननाश्यं । भोगनाश्यञ्च । धर्म्माधर्म्मभेदेन तत् द्विविधं । धर्म्मस्तु स्वर्गादिकारणं । गङ्गास्नानयागादिजन्यः । कर्म्मनाश्यजलादिस्पर्शनाश्यश्च । अधर्म्मस्तु नरकादिकारणं । प्रायश्चित्तादिनाश्यश्च । इति भाषापरिच्छेदः ॥

अदृष्टः, त्रि, (न दृष्टः ।) अकृतदर्शनः । अवीक्षितः । "अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता" । इति रसतरङ्गिण्यां भानुदत्तः ॥

अदृष्टवान्, [त्] त्रि, (अदृष्टं भाग्यं विद्यतेऽस्य, अदृष्टं मतुप् ।) भाग्यवान् । कपालिया इति भाषा । (स्त्रियां ङीप् अदृष्टवती) ।

अदृष्टिः, स्त्री, (न दृष्टिः नञ्समासः ।) प्रतिकूला दृष्टिः । कुत्सिता दृष्टिः । सरोषवक्रदृष्टिः । कुटिलचक्षुः । असौम्यात्ति । वक्रदृष्टियुक्तचक्षुः । इत्यमरः ॥

अदृष्टिका, स्त्री, (विरुद्धा दृष्टिः नञ्समासः । नञ्च विरोधार्थे, स्वार्थे कन् स्त्रियां टाप् ।) सरोषवक्रदृष्टिः । इति शब्दरत्नावली ॥

अदेवमाढकः, पुं, (देवो वृष्ट्यम्बु माता माढतुल्यो यत्र सः, समासान्तः कः, ततो नञ्समासः ।) देवमाढकभिन्नदेशः । नदीमाढकदेशः । यथा । (वितन्वति क्षेममदेवमाढकाः ॥ इति भारविः ॥)

अद्गः, पुं, (अद्यते भुज्यते यत्, अद् कर्म्मणि गन् ।) घृतं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अद्ट ड अतिक्रमे बधे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गद्वितीयोपधः । (अड्टितुं अतिक्रमितुमिच्छति—अद्ट् + सन् + लट् ते ।) ड अड्टिटिषते । इति दुर्गादासः ॥

अद्ड, अभियोगे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गद्वितीयोपधः । (अड्डितुं अभियोक्तुमिच्छति अद्ड् + सन् + लट् तिप् ।) अड्डिडिषति । क्विपि संयोगान्तलोपे अद् । अभियोगः समाधानं । अड्डति पद्यं विद्वान् । अभि समन्तात् योगोऽभियोगः इति गोविन्दभट्टः ॥ इति दुर्गादासः ॥

अद्धा, व्य, (अतं सततं गमनं ज्ञानं वा दधाति अत् + धा + क्विप् ।) यथार्थं । तत्पर्य्यायः । तत्त्वं २ अञ्जसा ३ । इत्यमरः ॥ (अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः ॥ इति रघुः ।)

अद्भुतं, क्ली, अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ आश्चर्य्यं ३ चित्रं ४ । तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः ॥

अद्भुतं, त्रि, (अततीति अत् + क्विप् आकस्मिकार्थमव्ययं तथा भाति-भा + डुतच् ।) आश्चर्य्यं । तत्पर्य्यायः । इङ्गं २ । इति जटाधरः ॥ * ॥ अथाद्भुतं । अद्भुतसागरे आथर्व्वणाद्भुतवचनं । प्रलयेति-विरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति । तेन आपज्ज्ञानाय भूम्यादीनां पूर्व्वं स्वभावप्रत्यवेदेवकर्त्तकोऽद्भुत इति ॥ एवञ्च बुधोदयपर्व्वग्रहणादीनां गणितागतत्वेन प्रकृतानामपि यदुत्पातत्वं तद्भ्रान्तं ।
तत्कारणञ्च गर्गसंहितावार्हस्पत्ययोः ॥
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्জ্জन्ति देवताः ।
ताः सृजन्त्यद्भुतां स्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च" ॥
तांश्च परं न दर्शयेदित्याह विष्णुः ॥ नोत्पातं दर्शयेदिति ॥ * ॥ तच्च वेलानक्षत्रमण्डलनिरूपणं । यथा दीपिकायां ॥
"प्राक्दिक्चित्रचतुर्भागेषु द्युनिशोरद्भुतेषु सर्व्वेषु ।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभेषु ॥
वेलामण्डलं ॥ * ॥
"अर्य्यम्णादित्यतुष्ट्वष्टचन्द्रतुरगादित्येषु वायुर्भवेत् ।
देवेज्याजविशाखयाम्ययुगले पित्रद्वये चानलः ॥
विश्वादित्यधाढमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः ।
सर्पोपान्त्यमघान्त्यमूलयुगलेष्वग्नेय्यपामीश्वरः ॥
पवनदहनौ नेर्ऋतौ योगस्तयोरतिदुष्करः ।
सुरपवरुणौ शस्तौ योगस्तयोरतिशोभनः ॥
सवरुणमरुन्मित्रः शक्रस्तथाग्निसमायुतः ।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः ॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्देवताश्रया ।
तथा शान्तिहयं कार्य्यं मण्डलद्वयजाद्भुते" ॥ * ॥
विष्णुधर्म्मोत्तरे ।
"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेषस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा ।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दिशेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजं ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितं ॥
भौमश्चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकालफलप्रदं ॥
दिव्यं तीव्रफलं ज्ञेयं क्षीघ्रकारि तथैव च ॥ * ॥
भीतोत्पाता विपर्य्यासश्चर्तूनां रिपुजं भयं ॥
पुष्पे फले च विकृते राज्ञो मृत्युं तथादिशेत् ।
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा ॥
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा क्षयः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देहस्य कुलस्य च विनिर्द्दिशेत् ॥ * ॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः ।
अर्कोदये ऽर्कोभिमुखश्चारावो भयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
क्षेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पायुश्च एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ।
पक्षान्मासात्तथा वर्षान्मृत्युः स्यादृग्रहेमेधिनः ॥
पत्नीपुत्रस्य वा मृत्युर्द्रव्यस्यापि विनश्यति ।
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा ॥
गृहीयाद्यदि रोचेत शान्तिश्चेमां प्रयोजयेत् ।
मांसास्थीनि समादाय श्मशानादग्निवायसाः ॥
श्वा शृगालोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत् ।
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ।

चौरेण हन्यते लोकः परचक्रसमागमः ।
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा ॥
अद्भुतानि प्रसूयन्ते तत्र देशस्य विप्लवः ।
अकाले फलपुष्पाणि देशविप्लवकारणं" ॥ * ॥
मत्स्यपुराणे ।
"अतिरुधिरनाहरिर्दुर्भिक्षादिभयं मतं ।
अन्तौ तु दिनार्द्धं रुधिरेणैव भयाय च ॥
निरभ्रे वाथ रात्रौ वा श्वेतं यान्योत्तरेण तु ।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेषौ च गन्धर्वनगरं तथा ।
परचक्रभयं विद्यात् देशोपद्रवमेव च" ॥
भासो वनकुक्कुटः ॥ * ॥ कंसनिधनसूचनेहरिवंशः;—
"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः ।
चलत्यपर्व्वणि मही गिरीणां शिखराणिच" ॥ * ॥
बाणोत्पाते स एव ।
"दक्षिणां दिशमास्थाय धूमकेतुः स्थितो भवेत् ।
वक्रमङ्गारकश्चक्रे क्षत्तिकासु भयङ्करः" ॥ * ॥
क्षत्यचिन्तामणौ ।
"यक्षाग्नौचविवेकतत्त्वसुधा लोकाः क्षुधापीड़िताः ।
विप्रा वेदहतास्तथा प्रचलिता वह्न्यग्निनोदुःखिताः ।
क्ष्मौगी मन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा देवेज्यराक्षोर्युतौ ॥
रक्षे शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ।
धान्यहिरण्यतक्रफलकुसुमाद्ये वर्धिते भयं विद्यात् ॥
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरं ।
उपलं विना जलधरैर्विप्लुता वा यदा प्राणिनो दृष्ट्वा ॥
छिद्रं वाप्यतिरुष्टिं शस्यानामीतिसंजननं" ॥ * ॥
बुधकौशिकसम्वादे ।
"पक्षाग्राः प्रपाते च फलं शस्टस्य प्ररोहणे ।
शीर्षे राजश्रियोऽयाप्तिर्भाले चैश्वर्यमेव च ।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्हर्षसुदर्शनं ॥
नासिकायाश्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनं ।
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् ॥
धनलाभो बाहुमूले करयोर्धनलब्धयः ।
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनं ॥
एष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनं ।
कटिदेये वस्त्रलाभो गुह्ये मृत्युसमागमः ॥
ऊरौ चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ।
उर्व्वोस्तु वाहनावाप्तिर्जानुजङ्घेऽर्थसंचयः ॥
वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत् ।
पक्षाग्राः प्ररोहणे चैव पतने शस्टस्य च ॥
व्यत्यासाच्च फलञ्चैव तद्देवं प्रजायते ।
पक्षाग्राः प्ररोहणं रात्रौ शस्टस्य प्रपातनं ॥
निधनार्थाय भवति व्याधिपीड़ाविपर्य्यये ।
पतनागन्तरञ्चैवारोहणं यदि जायते ॥
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ।
आरोहणमूर्द्धवक्त्रे अधोवक्त्रे च पतनं ॥
भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवं ।
स्पृष्टमात्रेण यः सद्यः सचेलं जलमाविशेत् ॥
पक्षगण्यप्राशनञ्च कुर्य्यादर्कावलोकनं ।
पक्षीरूपं सुवर्णस्य रक्तवस्त्रेण वेष्टयेत् ।
पूजयेदन्नपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ।

पक्षगण्यं पक्षरत्नं पक्षाम्रतं सपल्लवं ॥
पक्षवृक्षकषायञ्च निःक्षिप्याबाह्येत् ततः ।
पूजयेदन्नपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ॥
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकं" ॥
पक्षी ग्रहगोधिका । मृत्युञ्जयमन्त्रस्त्र्यम्बकमन्त्रः ।
इति विद्याकरः ॥ * ॥ गर्गसंहितायामाहस्त्र्यर्थयोः ।
"ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति पराभवं ।
ये तु न प्रतिकुर्व्वन्ति क्रियया श्रद्धयान्विताः ॥
दाम्भिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात्' ॥ * ॥
अत्र निमित्तनिश्चयवतोऽधिकारः । अन्यथा दोषः । इत्याह मत्स्यपुराणं,—
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ।
एतच्च तत्तद्विशेषविहितशान्तिविषयं । अन्यथा वेलामण्डलसन्देहे शान्तिर्न स्यात् साधारणशान्तिश्च निर्विघ्नया स्यात् । अतएवोक्तं योगियाज्ञवल्क्येन,—
"यच्च यच्च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमन्त्रतैः शुचिः ॥
हन्तुकामश्च नृपतेर्हतेन जुहुयात् शुचिः ।
सावित्र्याशान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः ॥
प्रणवाद्याहृतिभ्याश्च स्वाहान्ता होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारके ॥ *"
विश्वामित्रेणापि निमित्तसन्देहे क्षत्रादीन्युक्तानि । यथा,—
"क्षत्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणं ।
प्रकाशे च रहस्ये च संग्रयेऽनुक्तकेऽस्फुटे ॥ * ॥
मार्कण्डेयपुराणं ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभं ॥
परस्पराभिवादश्च ग्रहदोषेषु जायते" ॥
तथा,—
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ॥
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ।
भूदोहानुपवासांश्च शस्त्रं चैत्याभिवन्दनं ॥
कुर्य्यात् होमं तथा दानं आढ्यं क्रोधविवर्जनं ।
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ॥
वर्जयेदुषतीं वाचमतिवादांस्तथैव च । •
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीड़ासु मानवः ॥
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः" ॥ * ॥
लोकवादाश्च तत्रैवोक्ताः । यथा,—
"आकाशाद्देवतानाञ्च देव्यादीनाञ्च सौहृदात् ।
एथिव्यां प्रतिलोके च लोकवाद इति स्मृतः ॥"
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकिकौषधमन्त्रादयः विषहरीमङ्गलचण्डिकागीतादयः चैत्यवृक्षादौ क्षेत्रपालदेवतापूजा च । तथाचापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्म्मश्रेष्ठान्

प्रतीयादित्येक इति । धर्म्मश्रेष्ठान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धानिति नारायणोपाध्यायः ।
भूदोहस्य पात्रं विना भूमौ गोस्तनं निष्पीड्य दुग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्यातो ग्रामस्य वृक्षः । तथा च बाणोत्पाते हरिवंशः,—
"अनेकशाखश्चैत्यस्य निपपात महीतले ।
अर्चितः सर्व्वकन्याभिर्दानवानां महात्मनां ॥"
उपतीमकल्याणी । अतिवादश्च पूज्यमतिक्रम्य भाषणं ॥ * ॥ मत्स्यपुराणं,—
"काकस्यैकरवश्चावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
ज्ञेयो ग्रहपतेर्मृत्युर्धननाशस्तथैव च ॥ * ॥"
वराहसंहितायां,—
क्रीड़ानुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नासौ ग्रहस्यस्य विनाशहेतु-
र्दोषः समुत्पद्यत आऽरार्य्याः ॥ * ॥
अद्भुतशान्तिमाह मात्स्ये,—
"गृहे यच्चिविकारेषु कुर्य्याच्चामरतर्पणं ।
देवाः कपोता इति वा जप्तव्यं सप्तरिर्द्विजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
सर्गैर्द्विजैर्व्वा विनिवेदितं यत् ॥"
द्विजैः यच्चिभिः । अपिवा अन्यैरपि ॥ * ॥ भुजबलभीमे ।
"एको वत्सत्रयो गावः सप्ताश्वा नव दन्तिनः ।
सिंहप्रसूतिका गावः कथिताः स्वामिघातकाः ॥ *"
मत्स्यपुराणे ।
"अङ्के दक्षिणभागे तु शस्त्रं विष्फुरणं भवेत् ।
अप्रशस्तं तथा वामे एतस्य हृदयस्य च ॥
लाञ्छनं पिटकं चैव ज्ञेयं विष्फूर्जितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा" ॥ *
अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च तर्पणं स्यात् । गुरुः । "दुःस्वप्नानिष्टदर्शनादौ घृतं हिरण्यञ्च दद्यात्" इति । मात्स्ये ।
"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तुते ॥
एवं शुक्रोदये कुर्व्वन् याचादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानामभयाय नमो नमः ॥
संक्रान्तावपि कौन्तेय याचासभ्युदयेषु च ।
कुर्व्वन् बृहस्पतेः पूजां सर्व्वान् कामान् समश्नुते" ॥
वैष्णवाश्चते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ।
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तानेकशः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते वज्ररूपाय विष्णवे परमात्मने स्वाहा"

इति ॥ * ॥ छन्दोगपरिशिष्टं । अथातो रजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजजनने विजातीययजने वा काककङ्कश्येनबकगृध्रेनभासचिल्लकपोतानां गृहप्रवेशे मानुषस्योपरि विश्रामणे एषामेव क्रियमाणे गृहद्वारारोहणे वाङ्मनस्तेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्रायश्चित्ताव्याऽऽहुतीर्जुहोति अङ्गुताय अग्नये स्वाहा सोमाय विश्वाय रुद्राय वायवे सूर्य्याय मृत्यवे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकवृतान्यदिति ॥ * ॥ कपोतं विशेषयति शौनकः ।

"रक्तपादः कपोताख्यः अरण्यौकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ॥
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु" ।

कल्पदृष्टेन विधिना गृह्योक्तेन । प्रायश्चित्ताः व्याऽऽहुतीः अद्भुतदोषप्रशमनार्था सप्ताव्याऽऽहुतीः । अङ्गुताय अग्नये स्वाहा इत्यादिमन्त्रैः । तच्च स्थालीपाकेतिकर्त्तव्यतायां पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टं । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठं दक्षिणां तां गां दत्त्वा दोषशान्तिर्भवतीति । तथाचोक्तं,—

"गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यदयं यस्मात् तस्माद्गौर्वरमुच्यते" ॥ * ॥

छन्दोगपरिशिष्टं । यस्येषामन्यतममापन्नः प्रायश्चित्तं न कुर्य्यात् तस्य गृहपतेर्मरणं सर्व्वधनाग्नी वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गो समाप्तौ । वामदेव्यगानं शान्तिः कर्त्तव्या आवृत्तिप्रकरणसमाप्त्यर्था । वार्हस्पत्ये । शमयन्त्यासन्नादात् कर्म्मादिकृतं निमित्तमाश्वेव । अतिवर्षयोः पवासव्रतदीक्षाजप्यहवनानि ॥ * ॥ वराहः ।

ये च न दोषं जनयन्त्यत्यांस्तान्तुखभावकृतान् ।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेभिः समासोक्तैः ॥

तथा च मत्स्यपुराणं ।

"वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्वनाः ।
परिवेषरजोधूमरक्तार्कास्तमयोदयाः ॥
द्रुमेभ्योऽथ रसक्षेमधुपुष्पफलोद्गमाः ।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ * ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलं ।
अनग्निज्वलनं स्फोटं धूमरेणुनिराकुलं ॥
रक्तपद्मारुणा सन्ध्या नभः शुभ्रार्णवोपमं ।
सरिताद्यम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ * ॥
शक्रायुधपरीवेषौ विद्युच्चुल्कविरोहणं ।
कन्योद्वर्त्तनवैक्लव्यं रसनं दरणं क्षितेः ॥
नद्युदपानसरसां दर्शनार्द्रा भवन्नवाः ।
पतनश्चाद्रिगेहानां वर्षासु न भयावहं" ॥

हरिवर्षे वर्षावर्णनायां,—

"क्वचित् कन्दरहासाढ्यं झिल्लीझाभरणं क्वचित्"।

इति दर्शनात् वर्षासु झिल्लीझोद्गमो न भयावहः ॥ * ॥

"दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनं ।
ग्रहनक्षत्रतारानां दर्शनञ्च दिवाम्बरे ॥
गीतवादित्रनिर्घोषो वनपर्व्वतसानुषु ।
शून्यरुद्विरसोत्पत्तिरपापाः शरदि स्मृताः ॥*॥
शीतानीलतुषारत्वं नर्दनं मृगपक्षिणां ।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी॥
दिशो धूमान्धकाराश्च शुभा वनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तत्वं हेमन्ते शोभना मताः ॥ * ॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनं ।
दृष्ट्वाभ्रनाभमाकाशं तारोल्कापातपिञ्जरं ॥
चित्रा गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिणां ।
पक्षाङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्गे शुभावहाः ।
ऋतावन्यत्र चोत्पाता दृष्टास्ते भयदारुणाः" ॥*॥
उन्मत्तानाञ्च या गाथाः शिशूनाञ्चेष्टितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति व्यतिक्रमः ॥
पूर्व्वं चरति देवेषु पश्चाद्गच्छति निघ्नान् ।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती ॥*॥

बृहस्पतिः,—

"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणां ।
आवयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥

विनेया दण्डनीयाः । इति ज्योतिस्तत्त्वं ॥

अद्भुतः, पुं, (अद्भुतकारादिनवरसानां मध्ये रसविशेषः । तस्य स्थायिभावो विस्मयः । देवता गन्धर्व्वः । वर्णः पीतः । आलम्बनं लोकातीतवस्तु । उद्दीपनं तद्गुणमहिमा । अनुभावाः स्तम्भस्वेदरोमाञ्चगद्गदस्वरविभ्रमनेत्रविकाशादयः । अस्य व्यभिचारिभावाः वितर्कावेगसम्भ्रान्तिहर्षादयः । इति साहित्यदर्पणं ॥

अद्भुतखनः, पुं, (अद्भुतः अतिशयितः खनः शब्दो यस्य सः ।) महादेवः । इति त्रिकाण्डशेषः । (अद्भुतः खन इति कर्म्मधारये आश्चर्य्यशब्दः) ।

अद्भुतसारः, पुं, (अद्भुतः अतिकठिनः सारः स्थिरांशो यस्य सः ।) खदिरसारः ॥ इति केचित् ॥

अद्यनिः, पुं, (अत्ति भक्षयति सर्व्वान् अदेर्मुट् चेत्य नेः ।) अग्निः । इत्युणादिकोषः ॥

अद्यरः, त्रि, (अद भक्षणे, क्वसदः क्मरच् ।) भक्षकः । भक्षणपरः । इत्यमरः ॥

अद्य व्य, (सद्यपरुत् परार्य्यैषम इति इदमोऽशुभावो द्यच् निपात्यते ॥) वर्त्तमानदिनं । आजि इति भाषा । इत्यमरः ॥

अद्यतनः, पुं, (सायञ्चिरमित्यादिना द्युद्युभ्यां ट्युटच् ॥) कालविशेषः । स च भाष्यमते दुर्गसिंहमते च पूर्व्वरात्रिशेषदण्डचतुष्टयावधिकपररात्रिसार्द्धयामपर्य्यन्तः । पूर्व्वरात्रिशेषाद्धावधिपररात्रिप्रथमार्द्धपर्य्यन्तो वा । भट्टहरिक्रमदीश्वरमते पूर्व्वरात्रिशेषप्रहरावधिपररात्रिप्रथमप्रहरपर्य्यन्तः । अद्य जातवस्तुनि त्रि ॥

अद्यश्वीन, त्रि, (अद्य श्वस् + ख तस्य ईन टिखलोपः) आसन्नमरणादि । अद्य श्वो वा भवति अद्यश्वीनं मरणं । इति संक्षिप्तसारव्याकरणपरिशिष्टं ॥

अद्यश्वीना, स्त्री, (अद्यश्वस् + "अद्यश्वीनावष्टब्धे" इति सूत्रेण ख तस्य ईन टिलोपश्च स्त्रियां टाप् ।) आसन्नप्रसवा अद्य श्वो वा सूते अद्यश्वीना-गौः इति संक्षिप्तसारपरिशिष्टं ।

अद्यावधि, स्त्री, (अद्य अवधिः सीमा यस्य तत् ।) अद्यारभ्य । आजि इत्यत्र । इति भाषा । वर्त्तमानदिवसपर्य्यन्तं । आजि नागाइत इति भाषा ॥

अद्रिः, पुं, (अदिशृदीति क्रिन् ॥) सूर्य्यः । पर्व्वतः । वृक्षः । इत्यमरः ॥ परिमाणविशेषः । इति शब्दरत्नावली ॥ (शाखी । मानभेदः । सप्ताङ्कः । पर्व्वतमूषिका ॥)

अद्रिकर्णी, स्त्री, (पर्व्वतमूषिकायाः कर्णवत् पुष्पमध्यस्थपत्रं यस्याः सा स्त्रियां ङीप् ।) अपराजिता । इति राजनिर्घण्टः ॥

अद्रिकीला, स्त्री, (अद्रयः कीलाः स्तम्भवत् यस्यां सा पृथिवी ।) भूमिः । इति त्रिकाण्डशेषः ॥

अद्रिज, क्ली, (अद्रौ जातं इति जनेर्डः ।) शिलाजतु इति रत्नमाला ॥ पर्व्वतजातवस्तुनि त्रि ॥

अद्रिजा, स्त्री, (अद्रेर्जाता इति जनेर्ड तत्रस्याप्, पार्व्वती ।) दुर्गा । इति हेमचन्द्रः ॥ सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

अद्रितनया, स्त्री, (अद्रेः तनया ।) पार्व्वती । यथा— एषोऽहमद्रितनयासुखपद्मजन्मेति काव्यप्रकाशः ॥ (अथैनमद्रेस्तनया शुशोच ॥ इति रघुः ॥)

अद्रिनन्दिनी, स्त्री, (अद्रेर्नन्दिनी । पार्व्वती ।) दुर्गा ॥ हिमालयाद्रिजातत्वात् ॥

अद्रिभिद्, पुं, (अद्रीन् पर्व्वतान् भिनत्ति अद्रि + भिद् + क्विप् तुक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

अद्रिभूः, पुं, (त्रि, अद्रौ भवति अद्रि + भू + क्विप् । पर्व्वतजातमात्रे ।) आखुकर्णोलता । इति राजनिर्घण्टः ॥

अद्रिराजः, पुं, (अद्रीनां राजा इति समासे राजाह॥ खखिभ्यश्च ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ।

अद्रिसारः, पुं, (अद्रेः सारः स्थिरांशः ।) खदिरः । इति रत्नमाला ॥

अद्रीशः, पुं, (अद्रेः ईशः) शिवः । हिमालयः । इति धरणी ॥

अदयः, पुं, (नास्ति दयं हितं यस्य ।) बुद्धः । इति हेमचन्द्रः ॥ (आत्मा । अद्वैतवादी ।)

अदयवादी, [न्] पुं, (अदयं सर्व्वमेव चित्स्वरूपं नात्मनोऽन्यत् किञ्चनेति वदति अदय + वद् + णिनि । वेदान्तिकः ।) बुद्धः । इत्यमरः ॥

अदारं, क्ली, (अप्रशस्तं प्रवेशायोग्यं दारं ।) द्वारव्यतिरिक्तप्रदेशः । यथा—

"अदारेण च नातीयाद् ग्रामं वा वेश्म वावृतं ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्ज्जयेत् ॥"

इति मानवे ४ अध्याये ७३ श्लोकः ॥ प्राचीराद्यावृतं ग्रामं गृहञ्च द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलङ्घनं कृत्वा न विशेत् । रात्रौ च वृक्षमूलावस्थानं दूरतस्त्यजेत् । इति तट्टीकायां कुल्लूकभट्टः ॥ द्वाररहिते त्रि ॥

अद्वितीयः, त्रि, (न विद्यते द्वितीयं यस्य ।) द्वितीयरहितः । (सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं इति श्रुतेः ।) अतुल्यः । यथा,— एकमेवाद्वितीयं ब्रह्म । इति वेदान्तः ॥ नचाग्नि-

नेयः सहि नाद्रितोयः । इति नैषधं ॥

अद्वैतः, त्रि, (द्विधाभेदमितः प्राप्तः । द्वित + स्वार्थे अण् न द्वैत । द्वितीयरहितः ।) एकः । यथा,—
यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा । इति श्रीचैतन्यचरितामृतं ॥

अद्वैतः, पुं, (द्विधाभेदमितः प्राप्तः द्वितीयातत्, प्रज्ञादित्वात् स्वार्थे अण ततोभिन्नः नञ्समासः ।) द्वैतरहितः विष्णुः । यथा,—
"विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुं ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयं ॥"
इति गारुडे २३८ अध्यायः ॥ ० ॥ शिवावतारविशेषः । यथा,—
"नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः ।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः ॥०॥"
तत्पित्रादिविवरणं यथा,—
"महादेवस्य मित्रं यः कुबेरो गुह्यकेश्वरः ।
कुबेरपण्डितः सोऽद्य जनको ऽस्य विदांवरः ॥
पुरा कुबेरः कैलासे सिध्यसाध्यनिषेविते ।
जजाप परमं मन्त्रं शैवं श्रीशिववल्लभः ॥
ततो दयालुर्भगवान् वरं दास्यति सोऽब्रवीत् ।
ततः कुबेरो वरयामास त्वं मे सुतो भव ॥
प्रार्थितस्तेन देवेशो वरदेशः सदाशिवः ।
जन्मजन्मान्तरे पुत्र प्राप्स्यामि पुत्रतां तव ॥
इति प्राप्य वरं कश्चं कियन्तं कालमाश्रितः ।
कार्य्यादीश्वरभक्त्या सोऽद्यादैतस्य जनकोऽभवत् ॥
योगमाया भगवती गृहिणी तस्य साभवत् ।
सीतारूपेणावतीर्णा श्रीनाम्नी तत्प्रकाशतः ॥
तस्य पुत्रोऽच्युतानन्दः कृष्णचैतन्यवल्लभः ।
श्रीमत्यञ्चितगोखामिशिष्यप्रिय इति श्रुतं ॥
यः कार्त्तिकेयः प्रागासीदिति।जल्पन्ति केचन" ।
इति गौरगणोद्देशदीपिका ॥

अद्वैतवादी, [न्] त्रि, (अद्वैतं "चिदेव सत्यं नान्यत् किञ्चिन" इति वदति, अद्वैत + वद् + णिनि उपपदसमासः ।) एकब्रह्मवादी । तस्य मतं यथा,—
ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितं । यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति । तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति प्रकृतिर्ज्जीवाश्च पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सदस्तु नास्ति । अत्र प्रमाणं शारीरिकसूत्रस्य भाष्यराचार्य्यकृतभाष्यतट्टीकाकल्पतरुभावरत्नप्रभादि ॥

अधः [स्] अव्य, (अधरस्य अधादेशः ततः असिच् ।) तलं । नीचं । अधोभागः । यथा,—
"लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽधि च माधवः" ।
इति वोपदेवः ॥ पातालं । योनिः । इति त्रिकाण्डशेषः ॥

अधःपुष्पी. स्त्री, (अधः अधोमुखं पुष्पं यस्याः । अधस् + पुष्प + ङीप् ।) गोजिह्वा । इति राजनिर्घण्टः ॥ द्वयविशेषः । हेठाऊली । चोरखड़िका । भाँटुइ इति भाषा । तत्पर्य्यायः । अवाक्पुष्पी २ मङ्गल्या ३ अमरपुष्पिका ४ । इति रत्नमाला ॥

अधःक्षिप्तः, त्रि, (अधः अधोभागे क्षिप्तः पतितः ।) अधस्थक्षत्रवत्तु । इति जटाधरः ॥

अधमः, त्रि, (अव पालने + अम, वस्य धादेशः ।) न्यूनः । निन्दितः । अपकृष्टः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ खर्व्वः ४ रेफः ५ याप्यः ६ अवमः ७ कुत्सितः ८ अवद्यः ९ कुपूयः १० खेटः ११ गर्ह्यः १२ अणकः १३ । इत्यमरः ॥ रेपः १४ अरमः १५ आगकः १६ अनकः १७ । इति तट्टीका ॥ (याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा । इति मेघदूते) ॥

अधमः, पुं, (अव पालने + अम, वस्य धादेशः ।) उपपतिभेदः । तस्य लक्षणं । भयदयालज्जाशून्यत्वं । कामक्रीड़ाविषये कर्त्तव्याकर्त्तव्याविचारकत्वञ्च । इति रसमञ्जरी ॥

अधमभृतकः, त्रि, (अधम + भृ + क्त + स्वार्थे कन् ।) (अधमः । निकृष्टः । भृतकः । भृत्यः ।) अधमभृत्यः । नीचदासः । दौवारिकभारवाहकादयः ॥

अधमर्ण, त्रि, (अधम + ऋण ऋणविषये अवश्यदेयविषये अधमः निन्दितः राजदन्तादित्वात् परनिपातः । वा अधमं ऋणमवश्यदेयत्वेन विद्यते यस्य ।) ऋणग्रहीता । ऋणी । इत्यमरः ॥ खातक इति भाषा ।
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितं ॥
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि ।
अभियोक्ता दिशेद्देयं करणं वान्यदुद्दिशेत्" ॥
इति मनुः ।) ॥

अधमर्णिकः, त्रि, (अधममवश्यदेयत्वेन निन्दितं ऋणं । तदेव दाढ्यत्वेन विद्यते अस्य । अधमर्ण + अत इनिठनाविति ठन् । तस्य इक ।) अधमर्णः । यथा,—
"ग्रहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरं ॥"
इति मिताक्षरा ॥
("यै र्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः ।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं" ॥
इति मनुः ।) ॥

अधमा, स्त्री, (अधम + स्त्रियां टाप् ।) स्त्रीयाद्यन्तर्गतनायिकाभेदः । अस्या लक्षणं । हितकारिप्रियतमे अहितकारित्वं । अस्याः क्रिया अधमा । अस्या निष्कारणकोपत्वात् चण्डीति नाम । इति रसमञ्जरी ॥

अधमाङ्गं, क्ली, (अधमम् अङ्गं कर्म्मधारयः ।) पादः । चरणः । इति शब्दचन्द्रिका ॥

अधरं, क्ली पुं, (न ध्रियते कामुकस्य धैर्य्यं न तिष्ठति यत्र, न + धृ + पुंसि संज्ञायां घः प्रायेणेति अधिकरणे घः ।) स्मरागारं । रतिमन्दिरं । योनिरिति यावत् । इति शब्दरत्नावली त्रिकाण्डशेषश्च ॥

अधरः, पुं, (न ध्रियतेऽसौ धृ + अच् ततो नञ्समासः ।) मुखावयवविशेषः । नावो ठोंट । इति भाषा । ओष्ठः । उपर ठोंट । इति भाषा । तयोः पर्य्यायः । रदनच्छदः २ दशनवासः ३ । इत्यमरः ॥ परन्तु द्वयोरपि ओष्ठाधरप्रयोगः यथा । रदनच्छदौ दशनवाससी उभयत्र वर्त्तेते तथा ओष्ठाधरावपि उभयत्रेति गयदासानन्दः ॥ रायमुकुटोऽप्याह उपरिवर्त्ती अधोवर्त्ती च ओष्ठः अधरोऽप्येवं । पुरुषस्य रक्ताधरः प्रशस्तः । यथा,—
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्त रक्तं प्रशस्यते ॥"
स्त्रियास्तु यथा,—
"पाटलावर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मलग्नो मस्तकाग्न्याद्योत्तरोष्ठः सुभोगदः ॥"
इति सामुद्रकं ॥

अधरः, त्रि, (न धरः नञ्समासः । नीचः ।) अधः । तलं । हीनः । अपकृष्टः । इति मेदिनी ॥ हीनवादी । इति हेमचन्द्रः ॥ (यथा प्राकुन्तले । पिबसि रतिसर्व्वस्वमधरं ।) ॥

अधरतः, अव्य, [स्] (अधर + तसिल् प्रथमापञ्चमीसप्तम्यर्थवृत्तौ ।) अधस्तात् । अधोभागः । इति हलायुधः ॥

अधरमधु, क्ली, (अधरस्य मधु यद्वीतत् ।) वक्त्रासवः । अधरामृतं । अधररसः । इति त्रिकाण्डशेषः ॥

अधरस्तात् अव्य, अधरतः । इति हलायुधः ॥

अधरस्तात्, अव्य, (अधर + अस्ताति विकल्पे अधरस्य अधादेशः ।) अधस्तात् । अधरात् । दिग्वाचकशब्दात् दिग्देशकालवाचे प्रथमापञ्चमीसप्तमीनां स्थाने तात् प्रत्ययोभवति । इति व्याकरणं ॥

अधरा, स्त्री, (न धरा नञ्समासः ।) अधोदिक् । इति व्याकरणं ॥ नीचा । यथा । अधराथ कृता यथैव सा । इति नैषधं ॥

अधरात्, अव्य, अधरतः । अधरेण । अधरस्तात् । इत्यमरटीका ॥

अधरामृतं, क्ली, (अधरस्य अमृतम् ।) अधरसुधा । यथा,—
"सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निं ।
नो चेदयं विरहजागरुयुपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

अधरीकृतः, त्रि, (अधरःकृतः तिरस्कृतः अधर् + च्वि तस्य ईत्वं ।) धिक्कृतः । तिरस्कृतः । इति जटाधरः ॥

अधरेण, अव्य, (अधरे देशे अधरस्यां दिशि वा अधर + एनप् ।) अधोदिग्देशकालः । अधोदिक्देशकाले । इति व्याकरणं ॥

अधरेद्यु, [स्] अव्य, (अधरे परे दिवसे अधर + एद्युस् ।) अधरदिवसः । परदिनं । इति शब्दरत्नावली ॥

अधर्म्मः, पुं, (न ध्रियतेऽनेन धृ + मनिन् ततो नञ्समासः, नञर्थविरोधार्थः ।) धर्म्मविरोधी । स तु ब्रह्मणः एष्टाज्जातः । इति श्रीभागवतं ॥ पापं ।

अपराधः । श्रुतिस्मृतिविरुद्धाचारः । यथा,—
"अधर्म्मेणैधते राजन् ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥"
इति महाभारतम् ।
("अधर्म्ममिदमत्यन्तं कथं भीष्मोऽनुमन्यते" ।
इति महाभारतं ॥)

अधर्म्मी, [न्] त्रि, (अधर्म्मः पापं विद्यतेऽस्य ।) अधार्म्मिकः । अधर्म्मात्मा । अधर्म्मशब्दादस्यर्थे इन् ॥

अधश्चरः, पुं, (अधश्चरति इति अधस् + चर + अच् ।) चौरः । इति हारावली ॥ अधोगामिनि त्रि ॥

अधश्चौरः, पुं, (अधः चौरः अधस् + चुर + अच् + स्वार्थे अण्) नीचचौरः । सिंदालचोर इति भाषा । इति केचित् ॥

अधस्तात् अ, (अधर + अस्ताति ।) अधोभागः । इति हलायुधः ॥ (तस्याधस्तात् वयमपि रतान्तेषु पर्य्यंटजेषु । इति उत्तरचरितं ।) (तथा "निमज्जतोऽधस्तादन्यौ दाढ्यप्रतीच्छकौ" ॥ इति मनुः ।) पश्चाद्भागः । इत्यमरटीका ॥ रतिगृहं । भगं । इति त्रिकाण्डशेषः ॥

अधामार्गवः, पुं, (न धीयतेऽसौ अधाः न + धा + किप् । तादृशं मार्गं वाति गच्छति । अधा + मार्ग + वा + कः ।) (अपामार्गः । इति क्षीरस्वामी ।) धामार्गवदृक्षः । इत्यमरटीकायां रायमुकुटः ॥

अधार्म्मिकः, त्रि, (धर्म्मं चरति । धर्म्म + ठक् । न धार्म्मिकः ।) अधर्म्मी । अधर्म्मात्मा । पापी । तत्पर्य्यायः । आधार्म्मिकः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"यस्तु पञ्च महायज्ञविहीनः स निराकृतः ।
अधार्म्मिकः स्वादृषलः अवकीर्णी व्रतव्रती" ॥
इति जटाधरः ॥ अतो नाधार्म्मिके वसेद्ग्रामे ।
इति कुल्लूकभट्टश्च ॥

अधि अ, (न धीयते धार्य्यते । नञ् + धा + कि ।) प्रादिविंशत्युपसर्गमध्ये उपसर्गविशेषः । अस्यार्थः । उपरिभागः । इति दुर्गादासः ॥ अधिकारः । ईश्वरः । इति मेदिनी ॥ अधिकं । यथा अधिमासः अधिको मासः इत्यर्थः । इति स्मृतिः ॥

अधिः, पुं, आधिः । मनःपीड़ा । इत्यमरटीकायां भरतः ॥

अधिकं, क्ली, (अधि + स्वार्थे कन् ।) काव्यालङ्कारभेदः । तस्य लक्षणं । अधिकं एधुलाधारादाधेयाधिक्यवर्णनं । उदाहरणं यथा । ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ॥ इति कुवलयानन्दे अप्पयदीक्षितः ॥

अधिकः, त्रि, (अध्यारूढ़ एव अधि + स्वार्थे कन् ।) अतिरिक्तः । अनेकः । इति हेमचन्द्रः । (पुमान् पुंसोऽधिके शुक्रे । स्त्री भवत्यधिके स्त्रियाः । इति मनुः ।)

अधिकरणं, क्ली, (अधि + कृ + अधिकरणे ल्युट् ।) एकन्यायोपपादनं । इति हेमचन्द्रः ॥ अधिक्रियते अत्र । विषयादिपञ्चावयवविवेचनोपेतग्रन्थः । यथा,—

"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरं ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचाराईवाक्यं । विशयोऽस्यायमर्थो न वेति संशयः । पूर्व्वपक्षः प्रकृतार्थविरोधितर्कोपन्यासः । उत्तरं सिद्धान्तानुकूलतर्कोपन्यासः । निर्णयो महावाक्यार्थतात्पर्य्यनिश्चयः । एवं क्रमेण विवेचनमत्राधिक्रियते इत्यधिकरणं । इति तिथ्यादितत्त्वं ॥ अधिक्रियतेऽर्थोऽनेनेति वा अधिकरणं वेदविचारग्रन्थात्मिका मीमांसा । सा च द्विधा कर्म्ममीमांसा ब्रह्ममीमांसा चेति । कर्म्मकाण्डवेदविचारग्रन्थः कर्म्ममीमांसा जैमिनिप्रणीता सैव मीमांसालेन प्रसिद्धा पूर्व्वमीमांसा इत्युच्यते । ब्रह्मकाण्डवेदविचारग्रन्थश्च ब्रह्ममीमांसा वेदव्यासप्रणीता सा च वेदान्तलेन प्रसिद्धा उत्तरमीमांसा इत्युच्यते । इत्यत्र मीमांसापदमपि करणाधिकरणव्युत्पत्त्या ग्रन्थपरं ज्ञेयं । भावव्युत्पत्त्या तु विचारपूर्व्वकनिर्णयपरमिति । यत्तु अधिक्रियते विचारोऽस्मै इति व्युत्पत्त्या अधिकरणं मीमांसासिद्धान्त इत्यादीचेनाभिहितं तन्न । सिद्धान्तस्याधिकरणावयवत्वेनाधिकरणाङ्गत्वात् अधिकरणत्वानुपपत्तेः । यथा न्यायमते निगमनस्य न्यायावयवत्वं न तन्मात्रस्य न्यायत्वं तथेहापीति सुधीभिर्भाव्यं । तस्य चाधिकरणस्य पञ्चाङ्गानि । तदुक्तं,—
"विषयोऽविषयश्चैव पूर्व्वपक्षस्तथोत्तरं ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचाराईवाक्यं । यथा । खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इत्यादि संयोगपृथक्त्वाधिकरणादेः । एवं विषयो निश्चयस्तद्विन्नस्तद्विरोधी वा अविषयः संशयः । तदुक्तं,—
"विशब्दस्य विशेषार्थः सिनोतिर्बन्धनार्थकः ।
विशेषेण सिनोतीति विषयोऽर्थनियामकः" ॥
नियामकः कोटिनिश्चायकतया विशेषदर्शनात्मकव्याप्यवत्त्वादिनिश्चय एव । एवमेव न्यायगुरुन्यायवागीशभट्टाचार्य्यचरणाः ॥ अन्ये तु विशय इति विपूर्व्वस्य शीतेः संशयार्थकत्वमालोच्य तालव्यमध्यपाठं वदन्तः विशयः संशयः इति व्याचक्षते तच्च विपूर्व्वशीतेः संशयार्थकत्वे मानमनुसन्धेयं । संशयः अस्यायमर्थो न वेत्याकारकः । पूर्व्वपक्षः सिद्धान्तविरुद्धतर्कोपन्यासेन सिद्धान्तविरुद्धसंशयैककोटित्वव्यवस्थापनं । उत्तरं प्रकृतसिद्धान्तानुकूलतर्कोपन्यासेन प्रकृतसिद्धान्तसिद्धसंशयापरकोटित्वव्यवस्थापनं । निर्णयः सिद्धान्तसिद्धविचार्य्यवाक्यतात्पर्य्यावधारणं । कर्म्ममीमांसाधिकरणानि सहस्रसंख्यकानि जैमिनिप्रणीतानि शास्त्रदीपिकादौ पार्थसारथिमिश्रादिभिर्बहुधा विहितानि । इति चन्द्रशेखरशततत्त्वसम्बोधिनी ॥*॥
व्याकरणमते आधाररूपकारकं । तच्चतुर्व्विधं । सामीप्यं १ यथा गङ्गायां घोषः । कालिन्द्यां रेमे ॥ औपश्लेषः २ यथा दिवि देवाः । कायने रेमे ॥ विषयः ३ यथा शास्त्रे निपुणः । मोक्षौ

कुशलः ॥ व्यापिः ४ यथा तिलेषु तैलं । सकले स्थितः ॥ * ॥
अधिकर्द्धिः, त्रि, (अधिका ऋद्धिः सम्पत्तिर्यस्य सः ।) अतिशयसम्पत्तियुक्तः । तत्पर्य्यायः । सम्मुदः २ । इत्यमरः ॥
अधिकर्म्मिकः, पुं, (अधिकृत्य दृष्टं कर्म्मणि प्रभवति अधिकर्म्मन् + ठन् तस्य इक) दृष्टार्थव्यक्तः । इति हेमचन्द्रः ॥ हाटेर दारोगा इति भाषा ।
अधिकाङ्गं, क्ली, (अङ्गादधिकं मयूरव्यंसकादित्वात् समासः ।) सकचुकाः मध्ये यद्बध्नन्ति तत् । कञ्चुकादिदार्ढ्यार्थं शूरैर्मध्यकाये निबध्यपट्टिकादि । तत्पर्य्यायः । सारसनं २ । इत्यमरः ॥ विंशत्यङ्गुल्याद्यतिरिक्ताङ्गविशिष्टे त्रि ॥ (यथा मनुः ।—
"नोद्वहेत् कपिलां कन्यां
नाधिकाङ्गीं न रोगिणीं" ॥)
अधिकारः, पुं, (अधि + कृ + घञ् ।) राजादीनां चामरधूननच्छत्रधारणादिव्यापारः । तत्पर्य्यायः । प्रक्रिया २ । इत्यमरः ॥ प्रकरणं । यथा नैमित्तिकोऽयं प्रायश्चित्ताधिकार इति मिताक्षरा ॥ स्वामित्वं । यथा "सर्व्वे सुरधिकारिणः" इति स्मृतिः ॥ अधिक्रियतेऽर्थादिः । यथा निजाधिकारः भिन्नाधिकारः इत्यादि बहवः शिष्टप्रयोगाः ॥ (यथा मनुः ।—
"तस्य शास्त्रेऽधिकारोऽस्मिन्
ज्ञेयो नान्यस्य कस्यचित्" ॥)
अधिकारी, [न्] त्रि, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि ।) प्रभुः । स्वामी । अधिपतिः । अधिकारविशिष्टः । स्वत्ववान् । इति स्मृतिः ॥ यथा,—
"इत्यापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके" ॥
इति मलमासतत्त्वं ॥ अपिच ।
"स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि" ।
इत्याह्निकाचारतत्त्वं ॥ वेदान्तमते विधिवदधीतवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्জनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता । इति वेदान्तसारः ॥ * ॥ धनाधिकारिणो दायभागशब्दे दृश्याः ॥ ' ॥ श्रीमूर्द्धादीनां वेष्टकर्त्ता । इति लोकप्रसिद्धं ॥
अधिकारी, [न्] पुं, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि ।) वेदान्तशास्त्रवेत्ता । अधिगताखिलवेदार्थोऽनितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता । इति वेदान्तसारः ॥ पुरुषः । इति राजनिर्घण्टः ॥
अधिक्षतः, पुं, (अधि + क्षि + क्तः ।) अधःक्षतः । आयव्ययवेक्षकः ॥ इत्यमरः ॥ (आचार इत्यधिक्षतेन मया स्थीता या वेश्यस्त्रिवरोधस्वेषु राज्ञः । इति शाकुन्तले ।) क्षताधिकारशब्दे वाचस्पतिः ।
अधिक्रमः, पुं, (अधि + क्रम् + घञ् दृद्धभावः ।) आक्रमणं । इति हेमचन्द्रः ॥

अधित्यका, स्त्री, (अधिरूढा पर्व्वतोपरिभागम् अधि + त्यकन् स्त्रियां टाप्।) पर्व्वतोपरिभूमिः। इत्यमरः॥ (उपत्यकाद्रेरासन्ना भूमिरूर्द्धमधित्यका॥ अमरकोषः। यथा रघुवंशे,—"अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं"॥)

अधिपः, त्रि, (अधिपाति रक्षति अधि + पा + क।) अधिपतिः। स्वामी। इत्यमरः॥ राजा। इति त्रिकाण्डशेषः॥ (यथा रघुवंशे —अथ प्रजानामधिपः प्रभाते॥)

अधिपतिः, पुं, (अधिपाति रक्षति अधि + पा + डति।) प्रभुः। स्वामी। इति हलायुधः॥ (यथा रघुवंशे। "वचो निशम्याधिपतिर्दिवौकसां"॥)

अधिभूः, पुं, (अधि + भू + कर्त्तरि क्विप्।) स्वामी। प्रभुः। इत्यमरः॥

अधिमासः, पुं, (मासात् रविसंक्रान्तिमासादधिकमयूरव्यंसकादित्वात् समासः।) रविसंक्रान्तिद्वयमध्यवर्त्तिचान्द्रमासः। रविसंक्रान्तिशून्यशुक्लप्रतिपदादिदर्शान्तमासः। तत्पर्य्यायः। अधिकमासः २ असंक्रान्तमासः ३ मलमासः ४ मलिम्लुचः ५ विनामकः ६ नपुंसकः ७। इति मलमासतत्त्वं॥

अधिमांसकः, पुं, (अधिकं मांसं यत्र सः, समासान्तः कः।) दन्तरोगविशेषः। यथा,—

"दन्तरुक् पश्चिमे दन्ते
महान् शोथो महान् स्रवः।
लालास्रावी कपर्द्दतो
विज्ञेयः सोऽधिमांसकः"॥

इति भावप्रकाशः॥ अस्य चिकित्सा दन्तरोगशब्दे द्रष्टव्या॥

अधिरथः, पुं, (रथमधिरूढः अत्यादीति समासः।) कर्णपिता। स तु सूतजातिः। तस्य कर्म्म सारथ्यं। यथा। विवेशाधिरथो रङ्गं यष्टिप्राणो ह्यनिम्ब। इति महाभारतं॥ (यथा हरिवंशे। "सत्कर्म्मसूतत्वापि सूतत्वधिरथस्तु वै।
यः कर्णं प्रतिजग्राह तेन कर्णस्तु सूतजः"॥)

अधिराज्यभाक्, पुं, (अधिकं राज्यं कर्म्मधारयः, तत्भजते अधिराज्य + भज् + क्विप् उपपदसमासः।) अधिराट्। यथा। अत्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभाक्। इति महाभारतं।

अधिराट्, [ज्] पुं, (आधिक्येन राजते अधि + राज् + कर्त्तरि क्विप्।) सम्राट्। चक्रवर्त्ती। इति महाभारतं॥ (यथा रघुवंशे। इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।)

अधिरोहिणी, स्त्री, (अधिरोहः आरोहणं तदेव साधनत्वेन विद्यतेऽस्य अधि + रोह + इन् स्त्रियां ङीप्।) (अधिरोहणी इति पाठे अधिरुह्यते अनया अधि + रुह + करणे ल्युट् स्त्रियां ङीप्।) वंशकाष्ठादिनिर्म्मितारोहणमार्गः। सिंड़ि इति भाषा। तत्पर्य्यायः। निःश्रेणिः २। इत्यमरः॥ निःश्रेणी ३। इति तट्टीका॥ अधिरोहणी इत्यपि पाठः॥

अधिवचनं, क्ली, (अधि + वच् + ल्युट्। पक्षपातेन कथनं। "अधिकं वचनं पक्षपातेन वचनं" इति माधवाचार्य्यः।) नाम। संज्ञा। इति त्रिकाण्डशेषः॥

अधिवासः, पुं, (अधि + वस् + घञ्।) निवासः। धूपनादिभिः संस्कारः। इति मेदिनी॥ तद्द्रव्याणि। मृत्तिका १ गन्धः २ शिला ३ धान्यं ४ दूर्व्वा ५ पुष्पं ६ फलं ७ दधि ८ घृतं ९ स्वस्तिकं १० सिन्दूरं ११ शृङ्गः १२ कज्जलं १३ रोचना १४ श्वेतसर्षपः १५ स्वर्णं १६ रौप्यं १७ ताम्रं १८ चामरं १९ दर्पणं २० दीपः २१ प्रशस्तपात्रं २२। इति भवदेवः॥ क्वचित् पुस्तके श्वेतसर्षपस्थाने सिद्धान्नं क्वचिच्च चामरस्थाने। तत्रानुष्ठानं। *दुर्गापूजादोलयात्रायागादौ पूर्व्वदिने सायंकाले आचारात् संस्कारकर्म्मणि तद्दिने पूर्व्वाह्णे मन्त्रं पठित्वा क्रमेणोक्तद्रव्याणि आदौ देवादीनां ललाटे पश्चाद्भ्रुवौ स्पर्शयित्वा प्रशस्तपात्रे स्थापयित्वा तत्पात्रं पूर्व्वोक्तक्रमेण वारत्रयं स्पर्शयेत्। द्रव्यविशेषेण संस्कारः। तत्र यजुर्व्वेदोक्तमन्त्रास्त्रयोविंशतिद्रव्याणि च यथा। तैलहरिद्रां गृहीत्वा,—

"ॐ कोसि कतमोसि कस्मैत्वा काय त्वा सुश्लोकः सुमङ्गलः सत्यराजन्। अनया तैलहरिद्रया अस्य शुभाधिवासनमस्तु। एवं सर्व्वत्र"। १।

गन्धं गृहीत्वा,—

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्व्वभूतानां तामिहोपाह्वये श्रियं"। २।

मृत्तिकां गृहीत्वा,—

"ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः"। ३।

पुनर्गन्धेन गन्धद्वारामिति।

शिलां गृहीत्वा,—

"ॐ प्रपर्व्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति खसि च प्लवानाः ता आवृत्र वधरा गुदक्ता अहिं बुध्नमनुरीयमानाः। विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि"। ४।

धान्यं गृहीत्वा,—

"ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यं"। ५।

दूर्व्वां गृहीत्वा,—

"ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परिएवानो दूर्व्वे प्रतनु सहस्रेण शतेन च"। ६।

पुष्पं गृहीत्वा,—

"ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्निषाण मुम्मइषाण सर्व्वलोकम्मइषाण"। ७।

फलं गृहीत्वा,—

"ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः"। ८।

दधि गृहीत्वा,—

"ॐ दधिक्रावण्नोऽकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरोत् प्रणआयुꣳषितारिषत्"। ९।

घृतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि"। १०।

स्वस्तिकं गृहीत्वा,—

"ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः स्वस्तिन स्तार्क्ष्यो रिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु"। ११।

सिन्दूरं गृहीत्वा,—

"ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमीय पतयन्ति यह्वाः। घृतस्य धारा अरुषोण वाजी काष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः"। अत्र "वातप्रमीय पतयन्ति जङ्घा"। इत्यपि पठन्ति। १२।

शृङ्गं गृहीत्वा,—

"ॐ प्रतिश्रुत्काया अर्चनं घोषाय भयमन्ताय बऋवादिनमनन्ताय मूकꣳ शब्दायाऽम्बराघातं महसे वीणावादं क्रोशाय तूणवद्धमवरस्पराय शृङ्खं वनाय वनपमन्यतोऽरण्याय दावधं"। १३।

कज्जलं गृहीत्वा,—

"ॐ समिद्धोऽग्न ऋदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजीवहन् वाजिनं जातवेदो देवानां वक्षिप्रियमासधस्थं"। १४।

रोचनां गृहीत्वा,—

"ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः रोचन्ते रोचना दिवि"। १५।

सिद्धान्नं गृहीत्वा,—

"ॐ अन्नपते अन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रदातारं तारिषऊर्জ नो धेहि द्विपदे चतुष्पदे। सिद्धान्नमस्त्र आतपतण्डुलाः"। १६।

काञ्चनं गृहीत्वा, —

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारः पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। १७।"

रजतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनं"। १८।

ताम्रं गृहीत्वा,—

"ॐ असौ यस्ताम्रोरुण उतबभ्रुः सुमङ्गलः ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेड ईमहे"। १९।

सिद्धार्थं गृहीत्वा,—

"ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनो वलयामि वैष्णवान् रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान् रक्षोहणौ वनगहना उपधामि वैष्णवी रक्षोहणौ वनगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवाय"। २०।

दर्पणं गृहीत्वा,

"ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्यन्"। २१।

दीपं गृहीत्वा,—

"ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सु बर्हिषि"। २२।
सर्व्वद्रव्ययुक्तडल्लकं गृहीत्वा,—
"ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदसि अनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा। २३।
इति यजुर्व्वेदीयदुर्गोत्सवपद्धतिः॥ *॥ सामवेदिनामधिवासमन्त्रास्तत्तद्द्रव्याणि च यथा। प्रथमं गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः योऽस्य कामं विधतो नरोषति मनोदानाय चोदयन्"। १।
"ॐ महिन्नीलामवरस्तु चुल्लमित्रस्यार्य्यम्नः दुराधर्षं वरुणस्य"। २।
इति मह्या।
पुनर्गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः इत्यादि"। ३।
"ॐ वित्तदापो न पर्व्वतस्य एकादुक्थेभिरग्ये जनयन्त देवाः तत्वाग्निरः॥ सुश्रुतयो वाजयत्या जिन्नग्निर्व्वरेण्यो जिग्युरश्वाः"। ४।
इति शिलया।
"ॐ धानावन्तं करम्भिण मपूप्यवन्तमुक्थिनं इन्द्रप्रातर्जुषस्व नः"। ५।
इति धान्येन।
"ॐ जज्ञायथा मपूर्व्य मघवन् वृत्रहत्याय। तत्पृथिवी मप्रथयस्तदस्तभ्ना उतो दिवम्"। ६।
इति दूर्व्वया।
"ॐ पवमान व्यश्नुहि रश्मिभिर्व्वाजसातमः। दधत्स्तोत्रे सुवीर्य्यम्"। ७।
इति पुष्पेण।
"ॐ इन्द्रश्चरोने मधिता हवन्ते यत्पार्य्या युज्यते धियस्ताः शूरो नृषाता श्रवसश्च कामत्वा गोमति व्रजे भजात्वद्रिः"। ८।
इति फलेन।
"ॐ दधिक्राव्नोऽकारिषं जिष्णोरश्वस्य वाजिनः सुरभिनो मुखाकरोत् प्रणतायुंषि तारिषत्"। ९।
इति दध्ना।
"ॐ घृतवती भुवनानामधिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभितेऽजरे भूरिरेतसा"। १०।
इति घृतेन।
"ॐ अस्ति सोमोऽयं सुतः पिबन्त्यस्य मरुतः उतस्वराजोऽश्विना"। ११।
इति खस्तिकेन।
"ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावा पशुमप्सु गृभ्णते"। १२।
इति सिन्दूरेण।
"ॐ खसृन्वयो वसूनां यो राया मानेता य इड़ानां सोमो यः सुक्षितीनां"। १३।
इति गन्धेन।
"ॐ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते"। १४।
इति कज्जलेन।
"ॐ आयन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागन्नदीधिमः"। १५।
इति रोचनया।
"ॐ प्रतीउषा अपूर्व्या व्युच्छति प्रिया दिवस्तुबे वा मश्विना बृहत्"। १६।
इति सिद्धार्थेन।
"ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं। सनिं मेधा मयासिषं"। १७।
इति कार्च्चनेन।
"ॐ यदर्चीो हिरण्यस्य यद्वा वर्चो गवामुत। सत्यस्य ब्रह्मणो वर्च्चसेन मा संसृजामसि"। १८।
इति रौप्येण।
"ॐ रन्नहांति सूर्य्य वड़ादित्य महां असि महस्ते सतो महिमापनिष्ट समद्रा देवमहां असिः"। १९॥
इति ताम्रेण।
"ॐ मनुज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं। यन्नः समिमं दधातु विश्वे देवाः स इह मादयन्तां मों प्रतिष्ठ"। २०।
इति दीपेन।
"ॐ आदित्य व्रतस्य वेत्तसो ज्योतिः पश्यन्ति वासरं पावाय दिव्यं तोदिवि"। २१।
इति दर्पणेन।
"ॐ उद्यल्लोकानरोचय प्रभभूतमरोचय होइ इमान् लोकानरोचय होइ विश्वभूतमरोचय। होइा ऐवात्र धर्म्मो ज्योतीषि"। २२।
इति प्रशस्तपात्रेण। प्रशस्तपात्रं पूर्व्वोक्तसर्व्वद्रव्यस्थापितैकपात्रं। इति सामवेदीयदुर्गोत्सवपद्धतिः॥

अधिवासनं, क्ली, (अधिवासयति स्थापयति देवता अनेन अधि + वस् + णिच् + करणे ल्युट्।) अधिवासः। गन्धमाल्यादिभिः संस्कारकरणं। इत्यमरः॥ (अनया तैलहरिद्रया अस्याः शुभाधिवासनमस्तु॥ इति दुर्गोत्सवपद्धतिः॥)

अधिविन्ना, स्त्री, (अधिविद्यते लभ्यतेऽसौ, अधि + विद् + कर्म्मणि क्तः स्त्रियां टाप्।) अध्यूढ़ा। प्रथमविवाहिता स्त्री। कृतानेकविवाहस्यामिनः आपेक्षिकप्रथमोढ़ा भार्य्या। इत्यमरः॥
("अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं"॥ इति मनुः।)

अधिश्रयणी, स्त्री, (अधि श्रियते पच्यतेऽत्र अधि + श्रि + अधिकरणे ल्युट् स्त्रियां ङीप्।) चुल्ली। इत्यमरः॥ चुला इति भाषा।

अधिष्ठानं, क्ली, (अधिष्ठीयतेऽत्र अधि + स्था + अधिकरणे ल्युट्।) नगरं। चक्रं। प्रभावः। अध्यासनं। अवस्थानं। इत्यमरः॥ (यथा रामायणे,—
"यद्भूयात् सम्परित्यज्य स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्व्वतश्रेष्ठमध्यास्ते नरवाहनः"॥)

अधिक्षिप्तः, त्रि, (अधि + क्षिप् + कर्म्मणि क्तः।) प्रतिक्षिप्तः। इत्यमरः॥ प्रेरितः। इति भरतः॥ प्रणिहितः। स्थापितः। कुत्सितः। भर्त्सितः। इति मेदिनी॥

अधीतः, त्रि, (अधि + इङ् + कर्म्मणि क्तः।) कृताध्ययनः। पठितः। यथा,—
"अधीते श्रुतसाहस्रमनन्तं वेदपारगे"।
इति स्मृतिः॥ पठितशास्त्रं। पाठे क्ली॥

अधीतिः, स्त्री, (अधि + इङ् + भावे क्तिन्।) अध्ययनं। पठनं। इति जटाधरः॥

अधीती, [न्] त्रि, (अधीतमनेन अधीत + इन्।) अध्ययनविशिष्टः। कृताध्ययनः। इति व्याकरणं॥

अधीनः, त्रि, (इनं प्रभुमधिगतः आश्रादीति समासः।) परवशः। तत्पर्य्यायः। निघ्नः २ आयत्तः ३ वशच्छन्दः ४ गृह्यकः ५। इत्यमरः॥ (यथा कुमारसम्भवे,—
"त्वदधीनं खलु देहिनां सुखं"॥)

अधीरः, त्रि, (न धीरः स्थिरः नञ्समासः।) चञ्चलः। इति हलायुधः॥ कातरः। इत्यमरः॥ (यथा नागानन्दे,—
"निर्व्याजं विधुरेष्वधीर इति
मां येनाभिधत्ते भवान्"॥)

अधीरा, स्त्री, (न धीरा क्षणस्थायिनी, नञ्समासः।) विद्युत्। इति हारावली॥ मानावस्थायां मध्याप्रगल्भनायिकयोर्भेदः॥ तस्या लक्षणं। अव्यक्तकोपप्रकाशकत्वं। मध्याधीरायाः परुषवाक् कोपप्रकाशिका॥ प्रौढ़ाधीरायास्तर्জ্জনताड़नादिकं कोपप्रकाशं। सा द्विधा। ज्येष्ठा कनिष्ठा च। इति रसमञ्जरी॥

अधीश्वरः, त्रि, (अधिक ईश्वरः कर्म्मधारयः।) अधिपतिः। प्रभुः। इति हलायुधः॥ (यथा पञ्चतन्त्रे,—
"चन्द्रे मण्डलसंस्थे विस्पष्टते राऊणा दिनाधीश्वरः॥)

अधीश्वरः, त्रि, (अधिक ईश्वरः कर्म्मधारयः।) प्रशस्ताश्चेषसामन्तः। महाराजः। चक्रवर्त्ती। इत्यमरः॥

अधुतं, त्रि, अकम्पितं। धुञ्नकम्पे इत्यस्मात् कर्म्मणि क्तः, पञ्चात्रञ्समासः। दीर्घमध्योऽपि॥

अधुना, अ, (अस्मिन् काले इदमशब्दस्य रूपमिति निपातनात्।) अस्मिन्काले। इदानीं। सम्प्रति। इत्यमरः॥

अधुनातनं, त्रि, (अधुना भवम् अधुना + ट्युल् तुट् च।) इदानीन्तनं। वर्त्तमानकालवर्त्ति। एतत्कालीनं। इति व्याकरणं॥

अधृतः, पुं, (धृ क्तः, न धृतः नञ्समासः।) विष्णुः। इति तस्य सहस्रनाममध्ये पठितः। अक्षतधारणवस्तुनि त्रि॥

अधृष्टः, त्रि, (धृष् + क्तः, न धृष्टः नञ्समासः।) सलज्जः। तत्पर्य्यायः। अप्रगल्भः २। इति शब्दरत्नावली॥ शारदः ३ अप्रतिभः ४। इति जटाधरः॥ शालीनः ५। इत्यमरः॥

अधृष्यः, त्रि, (धृष् + कर्म्मणि क्यप्।) प्रगल्भः। अधर्म्मणीयः। इति मेदिनी॥ (यथा रघुवंशे,—
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः"॥)

अधृष्या, स्त्री, (न + धृष् + संज्ञायां क्यप्। यस्यां

स्थाने पराभवो न भवति तादृशी नदी।) नदी-विशेषः। इति मेदिनी॥

अधैर्य्यं, त्रि, (नास्ति धैर्य्यं यस्य सः।) धैर्य्यशून्यः। धैर्य्याभावे क्ली। यथा,—

"धैर्य्याधैर्य्यपरिग्रहद्विजयोरेकीवृणोः प्रीतये"। इति भानुभट्टः॥

अधोऽंशुकं, क्ली, (अधः नीचदेशग्रस्थम् अंशुकं वस्त्रं, कर्म्मधारयः।) परिधानवस्त्रं। इत्यमरः॥

अधोघण्टा, स्त्री, (अधः अधोदेशादारभ्य घण्टेव फलं यस्याः सा।) अपामार्गः। इति रत्नमाला॥

अधोजिह्विका, स्त्री, (अल्पा जिह्वा कन् स्त्रियां टाप्, अधः अधरा जिह्विका कर्म्मधारयः।) तालु-मूलस्थक्षुद्रजिह्वा। इति हारावली॥ आलजिव इति भाषा।

अधोभुवनं, क्ली, (अधः नीचदेशग्रस्थं भुवनं लोकः कर्म्मधारयः।) पातालं। इत्यमरः॥

अधोमर्म्म, [न्] क्ली, (अधः अधरं मर्म छिद्रं।) गुह्यद्वारं। इति हेमचन्द्रः॥

अधोमुखः, त्रि, (अधोमुखं यस्य सः।) अधोवदनः। पातालमुखः। तत्पर्य्यायः। अवाङ्मुखः २। इत्यमरः॥ अवाचीनः ३। इति जटाधरः॥ अधोमुखनक्षत्रगणो यथा,—

"अश्लेषवक्रियमपित्र्यविशाखयुक्तं
पूर्व्वत्रयं श्रुतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शुभानि नित्यं
विद्यार्थ्यभूमिखननेषु च शोभितानि"॥

इति ज्योतिःसारसंग्रहः।

अधोमुखा, स्त्री, (अधोमुखं यस्याः सा, स्त्रियां टाप्।) गोजिह्विकावृक्षः। इति राजनिर्घण्टः॥

अधोवायुः, पुं, (अधः अधरः वायुः कर्म्मधारयः।) अपानवायुः। यथा,—

"च्युतेऽधोवायुगमने क्षम्भने जपमुत्सृजेत्"। इति तन्त्रसारे योगिनीहृदयं॥

अधोक्षजः, पुं, (अधः आटत्वाभावात् हीनम् अक्षजं प्रत्यक्षज्ञानं यस्य सः। अक्षात् इन्द्रियात् जायते अक्ष+जन् ड, पञ्चमीतत्।) विष्णुः। इत्यमरः॥ (यथा महाभारते। अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः।)

अध्यग्नि, क्ली, (अग्नेः समीपे अव्ययीभावः।) विवाह-काले अग्निसमीपे स्त्रियै दत्तं धनादि। यथा,—

"विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।
तदध्यग्निकृतं सद्भिः स्त्रीधनन्तु प्रकीर्त्तितं"॥

इति दायभागे कात्यायनः॥

अध्यर्द्धा, स्त्री, (अधिकमर्द्धं बीजं यस्याः सा, स्त्रियां टाप्) कर्पिकच्छः। इत्यमरः॥ आरुग्दुरी इति भाषा। भूम्यामलकी। इति रत्नमाला॥

अध्ययनं, क्ली, (अधि+इङ्+भावे ल्युट्।) गुरुमुखा-दानुपूर्व्व्याऽध्ययनं। पठनं। ब्राह्मणस्य षट्कर्म्मा-न्तर्गतमिदं। इति शब्दरत्नावली॥

अध्यवसायः, पुं, (अधि+अव+सो+भावे घञ्।) उत्साहः। इत्यमरः॥ कर्म्मसु सुकरः प्रत्ययः। इति मधुः॥ कर्म्मसु दृढ़यत्नकारको भावः। इति रमानाथः॥ कर्म्मसु प्रत्ययः इति नयनानन्दः॥ अध्यवसे वसोद्यमः। इति केचित्॥ उद्योगोद्यमौ चात्र। इति भरतः॥

अध्यशनं, क्ली, (अधिकमशनं भोजनं कर्म्मधारयः।) अजीर्णे भोजनं। यथा। अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते। इति भावप्रकाशः॥

अध्यक्षः, पुं, (अधीक्षते समन्तात् व्याप्नोति अधि+अक्ष्+अच्।) (क्षत्रधारणादि व्यवहारे-ऽधिकृतः। व्यापकः।) क्षीरिकावृक्षः। इति शब्दरत्नावली॥

अध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्रादि-समासः।) प्रत्यक्षः। इन्द्रियजन्यज्ञानं।

(यदध्यक्षेव जगतां वयमारोपिताक्षया॥
इति कुमारसम्भवे।) अधिकृतः।
आयव्ययादिनिरीक्षकः। इत्यमरः॥

अध्यापकः, त्रि, (अधि+इङ्+णिच्+ण्वुल्।) अध्यापनकर्त्ता। पाठगुरुः। अध्यापयिता। तत्पर्य्यायः। उपाध्यायः २। इत्यमरः॥

अध्यापनं, क्ली, (अधि+इङ्+णिच्+भावे ल्युट्।) पाठनं। विद्यादानं। ब्राह्मणानां षट्कर्म्मान्तर्गत-कर्म्मेदं। इति शब्दरत्नावली॥ (यथा मनुः,—

"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः"॥)

अध्यायः, पुं, (अधि+इङ्+भावे घञ् अध्ययनम्।) वेदपुराणादिपरिच्छेदः। ग्रन्थसन्धिः। तन्मानान्त-राणि यथा। सर्गः। वर्गः। परिच्छेदः। उद्घातः। अङ्कः। संग्रहः। उच्छ्वासः। परिवर्त्तः। पटलः। काण्डं। स्थानं। प्रकरणं। पर्व्व। आह्निकं। इति त्रिकाण्डशेषः॥ स्कन्धः। स्तबकः। उल्लासः। पादः। उद्योतः। विरचनं। इत्यादयपि॥

यदुक्तम्।

("सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च॥
स्थानं प्रकरणं चैव पर्व्वोल्लासाह्निकानि च।
पुराणादौ परिच्छेदा अनेके परिकीर्त्तिताः॥")

अध्यारूढः, त्रि, (अधि+आङ्+रुह्+क्तः।) समारूढः। ज्ञातारोहणः। अभ्यधिकः। अति-शयः। इति मेदिनी॥

अध्यारोपः, पुं, (अधि+आ+रुह्+णिच्भावे अच्।) वस्तुन्यवस्तुतारोपः। सच्चिदानन्दाद्वयब्रह्मणि अज्ञानादिसकलजडसमूहस्यारोपणमित्यर्थः। अ-सर्पभूतरज्जौ सर्पारोपवत्। इति वेदान्तसारः॥

अध्यावाहनिकं, क्ली, (अध्यावाहनं पितृस्वात् स्वामिस्वागमनं तत्काले लब्धं अध्यावाहन+ लब्धार्थे ठन् तस्य इकः। अधि+आ+वह्+णिच् ल्युट्।) स्त्रीधनविशेषः। यथा,—

"दत्तं पुनर्ल्लभते नारी गीयमाना हि पैतृकात्।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं॥"
इति दायभागे कात्यायनः॥

अध्याहरणं, क्ली, (अधि+आ+हृ+भावे ल्युट्।) अध्याहारः। तर्कणं। ऊहनं। इति शब्द-रत्नावली॥

अध्याहारः, पुं, (अधि+आ+हृ+भावे घञ्।) तर्कः। ऊहः। इत्यमरः॥ असरूढार्थस्य शब्दा-न्तरेण स्फुटीकरणं। आकाङ्क्षासमापकपदानु-सन्धानं। वाक्यसम्पूर्णार्थपदयोजनं। युक्तिप्राप्तस्य पदान्तरमुद्राहृत्य व्यक्तीकरणं। इति तट्टीका॥

अध्युग्रः, त्रि, (अधि+वस्+क्तः, आगमशास-विधेरनित्यात् इड़ागमाभावः। क्तक्तवतुसमा-साच्च अभिधाननियामका इति प्रसिद्धेः।) सार्द्ध-त्रिसङ्ख्या। ३॥ साड़े तिन इति भाषा। यथा,—

अवाप्य खां भूमिं भुजगनिभमध्युष्टवलयं।
इति आनन्दलहरी॥

अध्युष्ट्रः, पुं, (उष्ट्रमधिगतः प्रादिसमासः।) उष्ट्र-युक्तरथः। उष्ट्रवाह्यप्रेक्षा। इति हारावली॥

अध्यूढः, पुं, (अधि+वह्+क्तः।) महेश्वरः। इति मेदिनी॥ (अधिरोपितः। समूढः। अभ्युदय-शाली।)

अध्यूढः, त्रि, (आधिक्येन ऊढिं गतः अधि+वह+ क्तः।) अधिकरूढियुक्तः। समूढः। इति धरणी॥

अध्यूढा, स्त्री, (अधि+वह+कर्म्मणि क्तः, स्त्रियां टाप्।) प्रथमविवाहिता स्त्री, क्षतसापत्निका। क्षतानेकविवाहस्य प्रथमोढा स्त्री। इत्यमर-मेदिनीकरौ॥

अध्येषणा, स्त्री, (अधि+इष्+णिच्+भावे युच, स्त्रियां टाप्।) याच्ञा। इति हेमचन्द्रः॥ आराध-स्यादरपूर्व्वकं कर्म्मणि नियुक्तकरणं। गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनं। तत्पर्य्यायः। सनिः २। इत्यमरः॥ सनी ३। इति तट्टीका॥

अध्वगः, पुं, (अध्वना यथा गच्छति अध्वन्+गम्+ ड, उपपदसमासः।) पथिकः। इत्यमरः॥ उड़ुः। इति त्रिकाण्डशेषः॥ सूर्य्यः। इति हेमचन्द्रः॥ खेसरः। इति राजनिर्घण्टः॥ खबर इति भाषा।

अध्वगभोग्यः, पुं, (अध्वगेन पथिकेन भोग्यः, अना-यासलभ्यफलत्वात्, द्वितीयातत्पुरुषः।) आम्रा-तकवृक्षः। इति त्रिकाण्डशेषः॥

अध्वगा, स्त्री, (अध्वन्+गम्+ड, उपपदसमासः। स्त्रियां टाप्।) गङ्गा। इति त्रिकाण्डशेषः॥

अध्वजा, स्त्री, (अध्वनि जायते अध्वन्+जन्+ड, उपपदसमासः, स्त्रियां टाप्।) सर्षपशोकवृक्षः। इति राजनिर्घण्टः॥

अध्वनीनः, त्रि, (अध्वनि साधुः अध्वन्+ख तस्य ईनङ्।) पथिकः। इत्यमरः॥

अध्वन्यः, त्रि, (अध्वनि साधुः अध्वन्+यत्।) पथिकः। इत्यमरः॥ (अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं॥ इति अमरशतके॥)

अध्वरः, पुं, (अध्वानं सन्मार्गं राति ददाति अध्वन्+ रा+कः उपपदसमासः।) यज्ञः। वसुभेदः। सावधानः। इति मेदिनी॥ ("तमध्वरे विश्वजिति क्षितीशं"। इति रघुवंशे।)

अध्वरथः, पुं, (अध्वैव रथो गमनसाधनं यस्य सः।) पथरथः। अध्वगमनोपयुक्तरथः। तत्पर्य्यायः। परिधातिकः २। इति हेमचन्द्रः॥

अध्वर्य्युः, पुं, (अध्वरं यज्ञं यौति सम्मादयति अध्वर + यु + कर्त्तरि क्विप्, एषोदरादित्वात् तुम्भावः रस्याकारलोपः, हेमकारी ऋत्विक्।) यजुर्वेदवेत्ता। इत्यमरः॥ (यथा कुमारसम्भवे,—

"विवाहयज्ञे वितते ऽग्नि यूय-
मध्वर्य्यवः पूर्व्वहुता मयेति"।)

अध्वश्रम्यः, पुं, (अध्वनि पथि श्रम्यति आचरति सकर्म्मकतया अध्वश्रम्य + क्विप् ततोऽण्।) अपामार्गः। इति राजनिर्घण्टः॥

अध्वा [न्] पुं, (अक्ति गमनेन वर्त्मं नाशयति, अद् + वाऽऽलुत्वात् क्वनिप्, एषोदरादित्वात् दकारस्य धः।) पन्थाः। कालः। संस्थानं। अवस्कन्दः। इति मेदिनी॥ श्राद्धं। स्कन्धः। इति च पाठान्तरं॥ अध्वगमनजन्यश्रमः। मेदःकफस्थूलतासौकुमार्य्यनाशित्वं। इति राजवल्लभः॥

अध्वान्तशावचः, पुं, (अध्वान्तस्य वर्त्मसीमायाः शावचः शुचुवत्, षष्ठीतत्पुरुषः।) श्लोनाकवृक्षः॥ इति शब्दचन्द्रिका॥

अन घ लु प्राणने। जीवने। इति कविकल्पद्रुमः॥ घ लु अनिति लोको जीवति इत्यर्थः। इति दुर्गादासः॥

अन ड य प्राणने। जीवने। इति कविकल्पद्रुमः॥ य ड अन्यते। इति दुर्गादासः॥

अनंशुमत्फला, स्त्री, (न अंशुमत् मोचान्तर्व्वर्त्तितया सूर्य्यकिरणशून्यं फलं यस्याः सा।) अंशुमत्फला। कदली। इति शब्दार्थः॥

अनः [स्] क्ली, (अनिति जीवत्यनेन जीविकोपायत्वात् अन् + असुन्।) शकटं। इत्यमरः॥ (यथा मनुः,—

"होता वापि हरेदश्वमुद्गाता चाप्यनःऋये"।)

अन्नं। इत्युणादिकोषः॥ जननी। जन्म। जन्मी। इति कोषान्तरं॥

अनकः, त्रि, (अन् + अच् + कुत्वायां कन्।) अणकः। अधमः। इत्यमरटीकायां भरतः॥

अनगारः, पुं, (नास्ति अगारं गृहं यस्य सः, गृहस्याश्रमशून्यः।) ऋषिः। मुनिः। इति हेमचन्द्रः॥ अगारशून्ये वाच्यलिङ्गः॥

अनग्निः, पुं, (नास्ति श्रौतः स्मार्त्तो वा अग्निर्यस्य सः।) श्रौतस्मार्त्तकर्म्महीनः॥ इति महाभारते दानधर्म्मः॥ (अनाहिताग्निर्ब्राह्मणः। यथाह मनुः,

"अग्नीनात्मनि वैतानान् समारोप्य यथाविधि।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः"॥)

अनघः, त्रि, (नास्ति अघं पापं यस्य सः।) अपापः। निर्म्मलः। मनोज्ञः। इति मेदिनी॥ (यथा शाकुन्तले—

"अखण्डं पुण्यानां फलमिव च तद्रूपमनघं"॥)

अनङ्गं, क्ली, (नास्ति अङ्गमवयवो यस्य तत्।) आकाशं। मनः। इति मेदिनी।

अनङ्गः, पुं, (नास्ति अङ्गं कायो यस्य सः।) कामदेवः। इत्यमरः॥ (यथा मेदिनी। "अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि"॥) अङ्गरहिते वाच्यलिङ्गः॥

अनङ्गकं, क्ली, (नास्ति अङ्गमाकारो यस्य तत्, ततः स्वार्थे कः।) चित्तं। मनः। इति शब्दरत्नावली॥

अनङ्गासुहृत् [द्] पुं, (अनङ्गस्य कामदेवस्य असुहृत् शत्रुः शिवललाटाग्निना तद्देहभस्मीकरणात्।) शिवः। इति हेमचन्द्रः॥

अनच्छः, त्रि, (न अच्छः निर्म्मलः।) आविलः। अनिर्म्मलः। इत्यमरः॥

अनञ्जनं, क्ली, (नास्ति अञ्जनं खमूर्त्तिप्रकाशो यस्य तत्, निराकारत्वात्, अनञ् + भावे ल्युट्।) आकाशं। इति शब्दचन्द्रिका॥ अञ्जनशून्ये त्रि॥ (यथा साहित्यदर्पणे,—

"नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः"।)

अनडुच्छिक्षा, स्त्री, (अनडुहो वृषभस्य जिह्वेव जिह्वा यस्याः सा स्त्रियां टाप्।) गोजिह्वावृक्षः। इति राजनिर्घण्टः॥

अनडुही, स्त्री, (अनडुह् + गौरादित्वात् ङीष् पक्षे आम्।) अनड्वाही। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनड्वान्, [डुह्] पुं, (अनडुह् + प्रथमैकवचनम्।) वृषः। एंड़े इति भाषा। तत्पर्य्यायः। गौः २ भद्रः ३ बलीवर्द्दः ४ दम्यः ५ दान्तः ६ स्थिरः ७ बली ८ उक्षा ९ कक्षुमान् १० ऋषभः ११ वृषभः १२ वृषः १३ धुर्य्यः १४ धुरीयः १५ धौरेयः १६ शाकटिकः १७ शिववाहनः १८ रोहिणीरमणः १९ वोढा २० गोनाथः २१ सौरभेयकः २२। इति राजनिर्घण्टः॥ (यथा मनुः,—

"अजमेषावनड्वाहं खरं हत्वैकहायनम्"॥)

अनड्वाही, स्त्री, (अनडुह् + गौरादित्वात् ङीष्, आमागमस्य आमभावपक्षे केवलं ङीष्।) अनडुही। स्त्रीगवी। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनद्यः, पुं, (अद् + कर्म्मणि ण्यत् संज्ञापूर्व्वकविधेरनित्यत्वात् दृद्भावः, न अद्यः अप्रशस्तखाद्यः, नञ्समासः, नञश्च अप्राशस्त्ये।) गौरसर्षपः। इति राजनिर्घण्टः॥

अनधिगतः, त्रि, (अधि + गम् + कर्म्मणि क्तः, न अधिगतः ज्ञातः, नञ्समासः। गतभिन्नः प्राप्तभिन्नः।) अनवगतः। यथा,—"अरे विद्वन्मन्याह्यनधिगतवेदार्थविभवाः"। इति भगवदाचार्य्यमिति प्रामाणिकाः॥

अनध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्राप्तिसमासः, प्रत्यक्षः तद्भिन्नः नञ्समासः।) अप्रत्यक्षः। इत्यमरटीकायां रमानाथः॥ अध्यक्षभिन्नः॥

अनन्तं, क्ली, (नास्ति अन्तः सीमा यस्य तत्।) आकाशं। इत्यमरः॥ अभ्रकं। इति राजनिर्घण्टः॥

अनन्तः, पुं, (नास्ति अन्तः विनाशो यस्य सः, तथाहि भागवते "लोके नष्टे द्विपरार्द्धावसाने महानेकः शिष्यते शेषसंज्ञः"।) विष्णुः। इति मेदिनी॥ बलदेवः। अनन्तजिन्नाम जिनः। इति हेमचन्द्रः॥ शेषनागः। इत्यमरः॥ वाहुकिः। इति शब्दमाला॥ सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

अनन्तः, त्रि, (नास्ति अन्तः सीमा विनाशो वा यस्य सः।) अन्तरहितः। अनवधिः। अशेषः। असीमः। इत्यमरो मेदिनी च॥ (यथा कुमारसम्भवे।—"अनन्तरत्नप्रभवस्य यस्य"।)

अनन्तजित्, पुं, (जयतीति जि + कर्त्तरि क्विप्, अनन्तो नाम जित् जयो बौद्धविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) जिनानां चतुर्व्विंशत्यन्तर्गतचतुर्दशजिनः। तत्पर्य्यायः। अनन्तः २। इति हेमचन्द्रः॥

अनन्ततीर्थकृत्, पुं, (अनन्तानि असङ्ख्यानि तीर्थानि शास्त्राणि कर्म्मधारयः, तानि कृतवान् अनन्ततीर्थ + कृ + क्विप्, उपपदसमासः।) अनन्तजित्। इति हेमचन्द्रः॥ (अनन्तजित् नाम जिनः॥)

अनन्तरं, त्रि, (नास्ति अन्तरमवकाशो यस्य तत्।) अनवकाशं। अन्तररहितं। तत्पर्य्यायः॥ अव्यवहितं २ संसक्तं ३ अपटान्तरं ४। इति हेमचन्द्रः॥ पश्चादर्थे क्ली॥ (पश्चात्। ततःपरं। यथा रघुवंशे,—"पितुरनन्तरमुत्तरकोशलान्"॥)

अनन्तविजयः, पुं, (विजयतेऽनेन वि + जि + करणे अच्, ततोऽनन्तानामसङ्ख्यानां शत्रूणां शब्देन विजयः विजयसाधनम् षष्ठीतत्पुरुषः।) युधिष्ठिरराजस्य शङ्खः। इति श्रीभगवद्गीता॥

अनन्तवीर्य्यः पुं, (अनन्तमसीमं वीर्य्यं तेजो यस्य सः।) भाविकल्पे जिनानां चतुर्व्विंशत्यन्तर्गतत्रयोविंशतीर्थंकरजिनः। इति हेमचन्द्रः॥

अनन्तव्रतं, त्रि, (अनन्तस्य तन्नामकदेवस्य व्रतं षष्ठीतत्पुरुषः।) भाद्रशुक्लचतुर्दश्यां कर्त्तव्यमनन्तदेवस्य व्रतं। तद्विधिर्यथा। भविष्ये,—

"अनन्तव्रतमेतद्धि सर्व्वपापहरं शुभं।
सर्व्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर॥
तथा शुक्लचतुर्दश्यां मासि भाद्रपदे भवेत्।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति"॥ *॥

व्रतारम्भप्रतिष्ठयोर्वर्ज्ज्यकालमाह ज्योतिषे,—

"गुरोर्भेगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ।
वक्रिजीवास्तविंशेऽक्षि गुर्व्वादित्ये दशाहिके॥
पूर्व्वराशावनायातातिचारिगुरुवत्सरे।
प्राग्राशिगन्तृजीवस्य चातिचारे चिपत्तके॥
कम्पाद्यद्भुतसप्ताहे नीचस्थेऽब्दे मलिम्लुचे।
भानुलङ्घितके मासि क्षये राड्युते गुरौ॥
पौषादिकचतुर्म्मासे चरणाङ्गितवर्षगे।
एकेनाङ्का चैकदिने द्वितीयेन दिनत्रये॥
तृतीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः।
विद्यारम्भकर्म्मवेधौ चूड़ोपनयनोद्वहान्॥
तीर्थस्नानमनाद्यन्तं तथानादिसुरेज्यगं।
परीक्षारामयज्ञांश्च पुरश्चरणदीक्षणे॥
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने।
प्रतिष्ठारम्भणे देवकूपादेर्वर्ज्ज्यन्ति हि॥
द्वात्रिंशद्दिवसास्त्रीणां जीवस्य भार्गवस्य च।
द्वासप्ततिर्मर्त्यलग्ने पादास्ते द्वादशक्रमात्॥
अस्तात् प्राक् परयोः पक्षं गुरोर्वार्द्धकबालते।
पक्षं दद्यो मङ्गले तु भृगुर्बालो दशाहिकः॥
पादास्ते तु दशाहानि दद्योबालो दिनत्रयं"॥ *॥

"मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे" ।
ददर्श भीला सा स्त्रीणां समूहं रक्तवाससां ॥
चतुर्दशामर्चयन्तं भक्त्या देवं पृथक् पृथक्" ।
इति भविष्योत्तरीयान्मध्याह्नव्यापिनी तिथिर्ग्राह्येति वाच्यं । पूर्वाह्णो वै देवानामिति श्रुत्यादिभिः पूर्वाह्णे देवत्वविधानात् । विश्वसमभिव्याहृतार्घवादेन तद्बाधायोगात् किन्तु तस्यैव गौणकालबोधकं तत् । कालमाधवीयोऽप्येवं । भविष्येऽपि पूजाविधायको मध्याह्नो नोक्तः । यथा,—
"स्नात्वा दर्भमयानन्तं वारिधान्यां निवेश्य च ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥
चतुर्दशफलैर्मूलैर्जलजैः कुसुमैरपि ।
यवगोधूमशालीनां चूर्णेनैकतरस्य च ।
कृत्वा पूपदयं तस्मै दद्यादेकं घृतान्वितं ।
स्वयमेकन्तु भुञ्जीत करे बद्ध्वा सुडोरकं ॥
चतुर्दशग्रन्थियुक्तं कुङ्कुमेन विलेपितं ।
सुवित्तस्तं विष्णुनामप्रतिग्रन्थिसमन्वितं ।
चतुर्दशसूत्रमयं सूत्रं कार्पासमेव च" ॥ * ॥
पूजाडोरकबन्धनमन्त्रस्तु रत्नाकरे,—
"अनन्तसंसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते" ॥
इति गन्धमुद्रा ।
"अनेन डोरकं बद्ध्वा भोक्तव्यं सुस्थमानसैः" ।
इत्यङ्गं भविष्योत्तरीयं कालकौमुद्यां लिखितमिति ॥ * ॥ तथा,—
"पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्व्वपापहरो भव ॥
अद्य मे सफलं जन्म जीवितञ्च सुजीवितं ।
यत्तवाङ्घ्रियुगाब्जाग्रे मूर्द्धा मे भ्रमरायते" ॥
इत्याभ्यां नमस्कुर्य्यात् । अनन्तकथामप्यत्र श्रवन्ति । इति तिथ्यादितत्त्वं ॥ * ॥ * ॥ अथ प्रयोगः । आचम्य खस्तिवाच्य सङ्कल्पं कुर्य्यात्,—
"अद्य भाद्रे मासि शुक्ले पक्षे चतुर्दश्यां तिथावारभ्य अमुकगोत्रः श्रीअमुकः धनधान्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा चतुर्दशवर्षपर्य्यन्तं भगवदनन्तभट्टारकपूजाचतुर्दशग्रन्थियुक्तडोरकमूलबन्धनकथाश्रवणब्राह्मणसंप्रदानकातपसिततण्डुलप्रस्थद्वयघटितपूपार्द्धोपकल्पनतदर्द्धात्मकार्द्धभोजनरूपमनन्तव्रतमहं करिष्ये" इति सङ्कल्प्य सूक्तं पठेत् ॥ * ॥ ततो गृहिणीकरा अष्टदलपद्मं निर्म्माय तन्मध्ये घटमारोप्य ग्रामयामं वा चतुर्दिक्षु ध्वजां निवेश्य यथोक्तविधिना गणेशग्रहदिक्पालग्रिवदुर्गालक्ष्मीनारायणपूजां कृत्वा शक्रं ध्यायेत्,—"ॐ महेन्द्रं मत्तैरावतस्कन्धस्थं सहस्रनयनोज्ज्वलं । मणिकाञ्चनघटितनानालङ्कारभूषितं वज्रहस्तं ग्रथन्वितं देवगन्धर्व्वगणैर्वृतं मुनिगणैः स्तूयमानं" ॥ एवं ध्यात्वा महेन्द्राय नमः एवं क्रमेण संपूज्य प्रणमेत्,—

"ॐ शक्रः सुरपतिश्चैव वज्रहस्तो महाबलः ।
ऐरावतगजारूढः सहस्राक्षो नमोऽस्तु ते" ॥
ततो दत्त्वार्घ्यं जलं संस्थाप्य हस्तं दत्त्वा समुद्रमावाहयेत्,—
ॐ गङ्गेचेत्यादिनावाह्य समुद्रं पूजयेत् ॥ * ॥
ततो भूतशुद्ध्यादिप्राणायामान्तं कृत्वा अनन्तं ध्यायेत्,—
"ॐ दिव्यसिंहासनासीनं देवेशं गरुडध्वजं ।
शुक्लवर्णं चतुर्बाहुं नागयज्ञोपवीतिनं ॥
शङ्खचक्रगदापद्मधरं पीताम्बरं विभुं ।
श्रिया वाण्या च संश्लिष्टं किरीटादिसमुज्ज्वलं ॥
फणाशतसमायुक्तं जगन्नाथं जगद्गुरुं ।
अनन्तं चिन्तयेद्देवं नारदाद्यैरुपस्तुतं" ॥
एवं ध्यात्वा खड्गिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य ।
आं हृदयाय नमः एवं षडङ्गानि विन्यस्य पुनर्ध्यात्वावाहयेत् ।
"ॐ आगच्छानन्त देवेश पत्नीभ्यां वाहनान्वित ।
गन्धर्व्वादिगणोपेत सान्निध्यमिह कल्पय" ॥
ततः पूजयेत् ।
पाद्यं गृहीत्वा,—
"ॐ पाद्यं गृहाण देवेश सुरासुरमनोहरं ।
तुष्टो मे भव देवेश नरसिंह नमोऽस्तु ते" ॥
अर्घ्यं गृहीत्वा,—
"अर्घ्यं गृहाण देवेश सुगन्धिकुङ्कुमान्वितं ।
दूर्व्वाक्षतसमायुक्तं नमस्ते विश्वमूर्त्तये" ॥
आचमनीयं गृहीत्वा,—
"ॐ इदमाचमनीयन्ते दिव्यतोयोद्भवं प्रभो ।
भक्त्या दत्तं मयानन्त नमस्ते पन्नगाधिप" ॥
एवं मधुपर्कं पुनराचमनीयं स्नानीयं वस्त्रयुग्मञ्च दद्यात् ॥ * ॥
गन्धः,—
"ॐ गन्धोऽयं देवदेवेश कुङ्कुमागुरुसम्भवः ।
यथागृह्यता मया दत्तो देवेश प्रतिगृह्यतां" ॥
पुष्पं,—
"ॐ पुष्पं गृहाण भोऽनन्त सुगन्धिद्रव्यमुत्तमं ।
पद्मनाभ नमस्तेऽस्तु कुशलं कुरु सर्व्वदा" ॥
धूपः,—
"ॐ धूपोऽयं ते महाभाग दशाङ्गोऽगुग्गुलो सह ।
मया दत्तः प्रभो विष्णो गृह्यतां सुरनायक" ॥
दीपः,—
"ॐ दीपं गृहाण भोऽनन्त जाज्वल्यमानमद्भुतं ।
त्वं गृहाण सदा देव रक्ष मां घोरसागरात्" ॥
यज्ञोपवीतं,—
"ॐ ऋग्यजुःसाममन्त्रेण चित्रसूत्रं पद्मयोनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवानघ" ॥
नैवेद्यं,—
"ॐ नानाभक्ष्यसमायुक्तं चतुर्दशफलैर्युतं ।
भक्त्या सम्पादितं देव सपूपं गृह्यतां विभो" ॥ * ॥
ततो बलभद्रं संपूज्य स्तुतिं कुर्य्यात्,—
"ॐ बलभद्रं महाभागं हलिनं लाङ्गलायुधं ।
कादम्बरीमदोन्मत्तं नमामि बलदेवकं" ॥

ततः आवरणदेवताः पूजयेत् ।
ॐ गणेशाय नमः । एवं लोकपालेभ्यः । नवग्रहेभ्यः । अष्टवसुभ्यः । एकादशरुद्रेभ्यः । द्वादशादित्येभ्यः । अनन्तादिनागेभ्यः । मत्स्यादिदशावतारेभ्यः । मासेभ्यः । ऋतुभ्यः । वत्सरेभ्यः । धर्म्माय । अधर्म्माय । ज्ञानाय । अज्ञानाय । वैराग्याय । अवैराग्याय । ऐश्वर्य्याय । अनैश्वर्य्याय । शिवाय । दुर्गायै । पृथिव्यै । गङ्गायै । यमुनायै । महालक्ष्म्यै । सरस्वत्यै । गरुडाय । गङ्गाय । चक्राय । गदायै । पद्माय । कौस्तुभाय । सूर्य्यमण्डलाय । सोममण्डलाय । वह्निमण्डलाय । वायुमण्डलाय । सर्व्वेभ्यो देवेभ्यः । सर्व्वाभ्यो देवीभ्यः ॥ * ॥
ततः स्तुतिं पठेत्,—
"ॐ अनन्तसंसारमहासमुद्रे
मग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥
हृदिस्थं सर्व्वदेवानां इन्द्रियाणां गुणातिगं ।
सर्व्वपापहरं देवं प्रणमामि जनार्द्दनं ॥
अनन्तरूपेण विभर्षि पृथ्वीं
अनन्तलक्ष्मीं विदधासि तुष्टः ।
अनन्तभोगान् प्रददासि तुष्टः
अनन्तमोक्षं पुरुषे प्रहृष्टः ॥
प्रणमामि हृषीकेशं वासुदेवं जगद्गुरुं ।
स्थितिसृष्टिविनाशानां कर्त्तारं प्रणमाम्यहं ॥
राक्षसानामरिं नौमि नौमि दैत्यविमर्द्दकं ।
जगतां हितकर्त्तारं नौमि पद्मेक्षणं सदा ॥
जन्मजन्मकृतं यच्च बाल्ययौवनवार्द्धके ।
तद्विनाशमुतं तत् पुण्यं पापं हर हलायुध ॥
भक्तिहीनं क्रियाहीनं मन्त्रहीनं यदर्चितं ।
यथोद्दिष्टमिमां पूजां परिपूर्णां कुरुष्व मे ॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष हरे संसारसागरात्" ॥
ततो घटस्थजलेन संप्रोक्ष्य करमूले डोरकं बध्नीयात् ।
"ॐ इदं डोरमनन्ताख्यं चतुर्दशगुणात्मकं ।
सर्व्वदेवमयं विष्णो करे धारयाम्यहं" ॥
ततो भोक्तुमुत्सृजेत् ॥ * ॥
ततः कथां शृणुयात् ।
यथा,—
अरण्यवासमुचितो युधिष्ठिरस्तपो वशी ।
प्राप्तस्त्रैलोक्यनाथेन कृष्णेन परमात्मना ॥
कथोपकथनं जातं तयोस्तत्र प्रियाप्रियं ।
विशेषेण च गोविन्दं पप्रच्छ च युधिष्ठिरः ॥ * ॥
युधिष्ठिर उवाच ।
केन व्रतेन देवेश वाञ्छितं प्राप्यते बलं ।
निष्पापाः सकलाः लोकाः भवन्ति जन्मजन्मनि ॥ * ॥
श्रीकृष्ण उवाच ।

अस्ति व्रतमनन्ताख्यं यत्कृतं सुरसद्मनि ।
इन्द्राद्यैर्लोकपालैश्च तन्मे कथयतः प्रभो ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे तथा ।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति ॥ * ॥

युधिष्ठिर उवाच ।

कृष्ण कोऽयं त्वयाख्यातो योऽनन्त इति संज्ञितः ।
कोऽयं शेषश्च नागश्च अनन्तस्तक्षकः स्मृतः ॥
परमश्चोत्तमं वापि उताहो ब्रह्म उच्यते ।
क एषोऽनन्तसंज्ञो वै तन्मे ब्रूहि जनार्द्दन ॥ * ॥

श्रीकृष्ण उवाच ।

अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ।
आदित्यगतिरूपेण यः काल उपपद्यते ॥
कलाकाष्ठामुहूर्त्तादिदिनरात्र्यवस्थया ।
पक्षो मास ऋतुर्व्वर्षं युगकल्पव्यवस्थया ॥
सोऽहं कालोऽवतीर्णोऽस्मि भुवो भारावतारणात् ।
दानवानां विनाशाय वसुदेवतनूद्भवं ॥
अनन्तं विद्धि मां पार्थ कृष्णं विष्णुं हरिं शिवं ।
ब्रह्माणं भास्करं शेषं सर्व्वव्यापिनमीश्वरं ॥
प्रत्ययार्थं मया पार्थ विश्वरूपं निबोध तत् ।
पूर्व्वमेव महाबाहो योगिध्येयमनुत्तमं ॥ * ॥

युधिष्ठिर उवाच ।

अनन्तव्रतमाहात्म्यं विधिं विधिविदां वर ।
किं पुण्यं किं फलं तस्य अनुष्ठानञ्च तस्य किं ॥
केन वा तत्कृतं पूर्व्वं लोके केन प्रकाशितं ।
तत्सर्व्वं वक्तुमिच्छामि ब्रूहि नारायण प्रभो ॥ * ॥

श्रीकृष्ण उवाच ।

आसीत्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ।
वशिष्ठगोत्रजो विद्वान् शीलवान् विजितेन्द्रियः ॥
पत्नी तस्याभवद्दीक्षा सती सत्यव्रते स्थिता ।
चारित्रशीलसम्पन्ना सुरूपा भृगुवंशजा ॥
तस्याः कालेन संजाता दुहिता सर्व्वलक्षणा ।
शीला नाम्ना सुशीला सा वर्द्धते पितृवेश्मनि ॥
माता तस्यास्तु कालेन ज्वरदाहप्रपीड़िता ।
समागत्य नदीतोये मृता स्वर्गपुरं ययौ ॥
कृतं सुमन्तुना तस्याः कर्म्म यत् पारलौकिकं ।
ततः सुमन्तुः संत्यज्य दुःखं शोकं क्रमात् पुनः ।
नापत्नीको गृही धर्म्मं कर्त्तुमर्हति वै क्वचित् ।
इति सञ्चिन्त्य मनसा विवाहोत्सुकमानसः ॥
देवलस्य मुनेः कन्यां कर्कशां परिणीतवान् ।
सा कर्कशातिदुःशीला सदा निष्ठुरभाषिणी ॥
कोपना प्रतिकूला च निर्ल्लज्जा कलहप्रिया ।
अदत्ता गृहकृत्येषु दत्ता भोजनकर्म्मणि ॥
कलहेन तु सन्तुष्टा रुष्टा बन्धुजनान् प्रति ।
सा तु शीला पितुर्गेहे वर्द्धिता च दिने दिने ॥
करोति सखिभिः सार्द्धं शिशुक्रीड़ामनुत्तमां ।
गृहान्तरस्थलद्वारदेहलीतोरणादिषु ॥
चतुरङ्गकवर्णैश्च रक्तपीतसितासितैः ।
स्वस्तिकं पद्मशङ्खौ च मण्डयन्ती पुनः पुनः ॥
कुर्व्वन्ती प्रत्यहं बाला देवतातिथिपूजनं ।
गृहकृत्ये सदा दक्षा पितुरत्यन्तवल्लभा ॥
कालेन कियता विप्रस्तां दृष्ट्वा यौवनोद्गतां ।
कस्मै देया मया कन्या इति चिन्तान्वितोऽभवत् ॥

ततो देववशात्तत्र कौण्डिन्यः समुपागतः ।
मुनिश्रेष्ठो महाभागः कुलीनो धर्म्मतत्परः ॥
मनसा चिन्तयामास सुमन्तुः सुतपाः सुधीः ।
अस्मै भाग्यवशाच्छीला प्रतिपाद्या प्रयत्नतः ॥
इति ज्ञात्वा मतिं विप्रो ददौ कन्यां शुभे दिने ।
कन्यामलङ्कृतां साध्वीं शीलां चन्द्रनिभाननां ॥
गृह्योक्तवेदविधिना विवाहमकरोत्तदा ।
ततो होमादिकं कर्म्म समाप्य समये मुनिः ॥
सुमन्तुः कर्कशां प्राह जामात्रे देहि दक्षिणां ।
सफलं कुरु मे दानं प्रिये मुनिकुलोद्भवे ॥
दक्षिणारहितं कर्म्म निष्फलं जायते यतः ।
सा तु तद्वचनं श्रुत्वा कर्कशा कुपिताभवत् ॥
सुमन्तुं भर्त्सयामास कर्कशैर्व्वचनैः पतिं ।
अलङ्कारं समानीय स्वकीयञ्चापि बन्धनं ॥
निक्षिप्य निभृते स्थाने कर्कशान्यगृहं ययौ ।
सुमन्तुश्चातिदीनात्मा लज्जितश्चाभवत्तदा ॥
यत्किञ्चिदर्थयोग्यञ्च द्रव्यमानीय यौतुकं ।
जामात्रे प्रददौ विप्रः परिचार्य्य पुनः पुनः ॥
ततो विवाहं निर्व्वर्त्य कौण्डिन्योऽपि निजाश्रमं ।
गोयाने तां समारोप्य शीलामादाय वै ययौ ॥
ततः सा पथि गच्छन्ती शीला चन्द्रनिभानना ।
मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे ॥
ददर्श शीला नारीणां समूहं व्रतचारिणां ।
पुंसां वृन्दञ्च तत्रैव रक्तपीताम्बरासनं ॥
चतुर्दश्यामर्चयन्तं भक्त्यानन्तं पृथक् पृथक् ।
दृष्ट्वा समूहं नारीणां सती पप्रच्छ सादरं ॥
विनयावनता साध्वी प्रणिपत्य सुरेश्वरं ।
किमिदं क्रियते कार्य्यं भवतीभिस्तदुच्यतां ॥ * ॥

स्त्रिय ऊचुः ।

भाद्रे मासि सिते पक्षे उत्थिते वासवध्वजे ।
आराधिते महेन्द्रे च ध्वजाकारासु यष्टिषु ॥
नत्वा सरसि यः स्नात्वा अनन्तार्च्चनमारभेत् ।
कृत्वा दर्भमयं देवं वारिवाजसमन्वितं ॥
अनन्तं देवदेवेशं चतुर्बाहुं किरीटिनं ।
अतसीपुष्पसंकाशं काञ्चनाङ्गदभूषणं ॥
शङ्खचक्रगदाशार्ङ्गं विविधायुधधारिणं ।
गृह्णेहि भगवन् कृष्ण तव यज्ञः प्रवर्त्तते ॥
वारिधान्यां तथानन्तं भगवन्तं नियोजयेत् ।
मण्डले पुष्पनैवेद्यं धूपवस्त्रानुलेपनं ॥
दत्त्वा च पूजयेद्भक्त्या अनन्तं विश्वरूपिणं ।
पिष्टकार्थं व्रीहिचूर्णं यवगोधूमयोश्च वा ॥
एतेषां प्राप्यते यत्तु तद्ग्राह्यं प्रस्थसंज्ञितं ।
अर्द्धं विप्राय दातव्यमर्द्धमात्मनि योजयेत् ॥
पूजयित्वा तथा देवं गन्धपुष्पैर्यथाक्रमं ।
श्रुत्वा कथां ततस्तस्य कुङ्कमाक्तं सडोरकं ॥
चतुर्दशग्रन्थियुक्तं नारी वामकरे न्यसेत् ।
पुमांस्तु दक्षिणे बाहौ तदानन्तं प्रपूजयेत् ॥
निर्व्वर्त्य पूजां देवस्य पूपं भुक्त्वा यथासुखं ।
विसृज्य दक्षिणां दत्त्वा प्रणम्य च यथासुखं ॥
शीला श्रुत्वा वचस्तासां यथा ताभिरुदाहृतं ।
व्रतं चकार सा बाहौ बद्ध्वा डोरकमुत्तमं ॥
पूपप्रस्थञ्च सा त्यक्त्वा भुक्त्वा चैव तथैव च ।

पुनर्जगाम तेनैव गोरथेन समन्विता ॥
तेनानन्तप्रसादेन गृहं गोधनसङ्कुलं ।
ददर्शाश्रमं श्रिया युक्तं धनधान्यसमन्वितं ॥
विविधातिथिसम्पूर्णं नानारत्नैर्विभूषितं ।
वराश्वमत्तमातङ्गमहिषैर्गोधनान्वितं ॥
शीला च मणिकाञ्चीभिर्मुक्ताभरणभूषिता ।
दिव्याङ्गी शीलसम्पन्ना सावित्रीप्रतिमा यथा ॥
कदाचिदुपविष्टा सा वह्निकुण्डं समागता ।
कौण्डिन्योऽपि विशेदोषात् दृष्ट्वा डोरमनन्तकं ।
शीलायाः करमूले च बद्धमेव प्रयत्नतः ।
पप्रच्छ क्रोधवचसा भ्रुकुटीकुटिलं मुखं ॥
किमिदं डोरकं हस्ते बद्धा भार्य्येऽच तिष्ठसि ।
प्रमेयः कस्य देवस्य दुर्ब्बुद्धे ब्रूहि सत्वरं ॥ * ॥

शीलोवाच ।

अनन्तं देवदेवस्य प्रमेयं डोरकं शुभं ।
करे बद्धं विधानेन शृणु मे वचनं प्रभो ॥
प्रसादाद् यस्य देवस्य भुङ्क्ते सुविपुलं धनं ।
न जानासि कथं नाथ तदेवं जगदीश्वरं ॥
शीलावाक्यं ततः श्रुत्वा कौण्डिन्यः कुपितोऽभवत् ।
कोऽसावनन्तसंज्ञो वै न श्रुतोऽपि वरानने ॥
इत्युक्त्वाहस्य कुपितो भुजाडोरमनन्तकं ।
क्षिप्रं ज्वालाकुले वह्नौ निर्भर्त्स्य बहुधा प्रियां ॥
ततः सा संभ्रमात् शीला हाहा कृत्वा प्रधाविता ।
वह्नेः सूत्रं समादाय क्षीरमध्ये ततोऽक्षिपत् ॥
ततस्त्वया करे वामे पुनर्बद्धं सडोरकं ।
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥
न कैश्चित् वर्ण्यते लोकैः सोऽपि विप्रो युधिष्ठिर ।
गात्रे मलिनता प्राप्ता चक्षुर्निद्रां तथैव च ॥
शून्यानि गृहरूपाणि दग्धानि वह्निना क्वचित् ।
निरीक्ष्य खपुरं विप्रश्चिन्तयामास चेतसा ॥
अथ शीला विवर्णा सा दुःखिता पतिदोषतः ।
विचचार पुरीं सर्व्वां शून्यागारसमन्वितां ॥
अथ कौण्डिन्यविप्रस्य संजाता बुद्धिरुत्तमा ।
ममापि दुष्कृतं कर्म्म कृतं वा मे विगर्हितं ॥
अनन्ताक्षेपदोषेण ममापि गतिरीदृशी ।
अनन्तं यत्र पश्यामि तत्र यास्यामि दुर्म्मतिः ॥
ततो जगाम कौण्डिन्यो वनं व्याघ्रादिसङ्कुलं ।
व्रतस्यान्वेषणं कर्त्तुं यादो द्रष्टुं तथा हरेः ॥
विह्वलः स ययौ मार्गे जनजन्तुविवर्जिते ।
तत्रापश्यच्च तं वृक्षं फलपुष्पसमन्वितं ।
वर्त्तितं पक्षिसङ्घातैः कीटैश्चैव विशेषतः ।
तमपृच्छत् त्वयानन्तः क्वचिद्दृष्टो महाद्रुम ॥
स चोवाच महावृक्षो नानन्तं वेद्मि भो द्विज ।
ततो गच्छन् ददर्शाग्रे हयमध्ये सवत्सिकां ॥
हयमध्ये प्रधावन्तो न खादति न जिघ्रति ।
हे महाधेनुके ब्रूहि किमनन्तस्त्वयेक्षितः ॥
सवत्सा तमुवाचाथ नानन्तं वेद्मि हे द्विज ।
ततो गच्छन् ददर्शाग्रे वृषभश्रेष्ठं वने स्थितं ॥
तमपृच्छदयं विप्रः अनन्तो वीक्षितस्त्वया ।
वृषभस्तमुवाचेदं विषण्णं ब्राह्मणं प्रति ॥
यद्यनन्तमहं जाने तदा मे गतिरीदृशी ।
ततो व्रजन् ददर्शाग्रे गर्द्दभं कुञ्जरं तथा ॥

नानामायाप्रचरन्तं मदगर्ब्बमदर्पितं ।
स तं दृष्ट्वा द्विजोऽप्यच्छदनन्तं दृष्टवान् किमु ॥
प्रत्युत्तरमुवाचेदं नानन्तं वेद्मि हे द्विज ।
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीहयं ।
अन्योन्यजलसंघातैर्व्वीचिभिरुपशोभितं ।
शुभैः कुमुदकह्लारैः कमलोत्पलशोभितं ॥
भ्रमरैश्चक्रवाकैश्च हंसकारण्डवैर्युतं ।
तमपृच्छत् द्विजोऽनन्तो भवतीभ्याञ्च लक्षितः ॥
पुष्करिण्यावूचतुस्तं न जानीवो हरिं क्वचित् ।
निपपात ततो विप्रो हाहा कृत्वा रुदन् भुवि ॥
किं करोमि क्व गच्छामि कथं पश्यामि तं विभुं॥*॥
ततः कृपालुहृदयो देवेशो देवपूजितः ॥
तत्त्वज्ञाङ्गवान् विष्णुर्द्विजप्रत्यक्षमागतः ।
वृद्धब्राह्मणरूपेण प्रोवाच वचनं द्विजं ॥
उत्तिष्ठोत्तिष्ठ विप्रेन्द्र त्यज दुःखं सुखी भव ।
अनन्तं दर्शयिष्यामि कृष्णं विष्णुं हरिं शिवं ॥
ब्राह्मणं तं समादाय पातालवर्त्मना पुरीं ।
तां पुरीं दर्शयामास ततस्तान्तर्दधे द्विजः ॥
स तां ददर्श कौण्डिन्यः पुरीं त्रैलोक्यदुर्ल्लभां ॥
दिव्यनारीनरैर्युक्तां मणिरत्नविभूषितां ॥
सुवर्णरचितां सर्व्वां वेष्टितां तत्तटादिभिः ।
तत्राप्यपश्यत् स कौण्डिन्यो देवदेवमनन्तकं ॥
विश्वरूपं जगन्नाथं चतुर्ब्बाहुं किरीटिनं ।
शङ्खचक्रगदापद्मधारिणं गरुडध्वजं ॥
दक्षिणे विलसल्लक्ष्मीं वामे क्रीड़त्सरस्वतीं ।
सप्तफणासमायुक्तं दिव्यसिंहासनस्थितं ॥
एवं रूपं जगन्नाथं दृष्ट्वा भक्त्या स्तुतिः कृता ।
जगाम भूमौ शिरसा अनन्तस्य समीपतः ॥

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

अज्ञानेन मया देव यत् कृतं पापकर्म्मणा ।
तत्सर्व्वं क्षपया शंस क्षमस्व मधुसूदन ॥ * ॥
अथ कौण्डिन्यविप्रस्य स्तुतिं श्रुत्वा जनार्द्दनः ।
प्रसन्नो भगवान्देवस्तानन्तोऽनन्तरूपधृक् ॥
कथं मे प्रियमाख्यातमिहागच्छेति भूसुर ॥*॥

अनन्त उवाच ।

तुष्टोऽहं ब्राह्मणश्रेष्ठ भक्त्या तव विशेषतः ।
वरं गृहाण विप्रेन्द्र तुष्टोऽस्मि त्यज विस्मयं ॥ * ॥

कौण्डिन्य उवाच ।

स्वकर्म्मफलभोगेन यां यां योनिं व्रजाम्यहं ।
तस्यां तस्यां हृषीकेश हरिभक्तिर्दृढास्तु मे ॥
अतिप्रमादान्मोहाद्वा यन्मया दुष्कृतं कृतं ।
तदागः क्षम्यतां नाथ प्रणमामि पुनः पुनः ॥
श्रुत्वानन्तस्तु तद्वाक्यं ददौ तस्मै वरत्रयं ।
दारिद्र्यनाशनं धर्म्मं विष्णुलोकं तथाक्षयं ॥०॥

कौण्डिन्य उवाच ।

पूर्णो मनोरथो देव मम चाद्य विशेषतः ।
किञ्चित् पृच्छामि देवेश तन्मे ब्रूहि जगत्पते ॥
कश्छत्रः को रथः का गौः किन्तत् पुष्करिणीहयं ।
कः खरः कुञ्जरः को वा को वा वृद्धद्विजोत्तमः ॥
कृपया कथयस्वाद्य यदि दृष्टो मया विभो ।

श्रीअनन्त उवाच ।

यस्मान्नवरुद्धो दृष्टो हि विप्रो विद्यासु गर्व्वितः ।
उपस्थिताय शिष्याय विद्यां यस्मान्न दत्तवान् ॥
तेन कर्म्मविपाकेन वृक्षत्वं प्राप्य तिष्ठति ।
वृषभो यस्त्वया दृष्टो लोभकर्म्मकृतः पुरा ॥
दत्तं पर्य्युषितं द्रव्यं स्वादु भुक्तं स्वयं यतः ।
वृषभत्वं समासाद्य ततस्तिष्ठति निर्ज्जने ॥
विप्राय वसुधां दत्त्वा निष्फलां शून्यवर्ज्जितां ।
तेनासौ गोत्वमासाद्य क्षणमध्ये प्रधावति ॥
धर्म्माधर्म्मौ विजानीयाद्यत्तत् पुष्करिणीहयं ।
गर्द्दभोऽज्ञानसम्पन्नः कुञ्जरो मदगर्व्वितः ॥
ब्राह्मणोऽसावनन्तोऽहं यस्त्वया दर्शितो मुने ।
एतत्ते कथितं सर्व्वं गच्छ विप्र निजाश्रमं ॥
पुनः सम्वृद्धिस्ते विप्र भविष्यति न संशयः ।
भुक्त्वा भोगांश्च विपुलान् संप्राप्स्यसि महत् पदं ॥
इति दत्त्वा वरं तस्मै तत्रैवान्तरधीयत ।
कौण्डिन्योऽपि गृहं गत्वा करोति व्रतमुत्तमं ॥
अनन्ताख्यं महापुण्यं वर्षाणाञ्च चतुर्दशं ।
श्रीलया सह धर्म्मात्मा सुखं भुक्त्वा मनोरथान् ॥
विष्णुलोकं समासाद्य रराज श्रीलया सह ।
अनन्ताख्यव्रतेनेह समाप्तेनैव पार्थिव ॥
सर्व्वपापविनिर्म्मुक्ता यास्यन्ति परमां गतिं ।
एवमेवं हि नियमात् स्त्रियोऽनन्तव्रतान्नृप ॥
पुत्रपौत्रधनैर्युक्ता भुक्त्वा भोगान् मनोरथान् ।
विष्णुलोकमाप्नुवन्ति यावच्चन्द्रदिवाकरौ" ॥
इति भविष्यपुराणे अनन्तव्रतं समाप्तं ॥

अनन्तश्रीर्षा, स्त्री, (अनन्तानि बहूनि श्रीर्षाणि शिरांसि यस्याः सा ।) वासुकिपत्नी । इति शब्दमाला ॥

अनन्ता, स्त्री, (नास्ति अन्तो यस्याः सा ।) पार्व्वती । पृथिवी । अग्निशिखावृक्षः । श्यामालता । दूर्व्वा । पिप्पली । दुरालभा । हरीतकी । आमलकी । गुडूची । इति मेदिनी ॥ यवासः । श्वेतदूर्व्वा । नीलदूर्व्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥ अनन्तमूलं । तत्पर्य्यायः । गोपवल्ली २ कारावला ३ सुगन्धा ४ भद्रवल्लिका ५ भद्रा ६ नागजिह्वा ७ । इति रत्नमाला ॥ गोपी ८ श्यामा ९ शारिवा १० उत्पलशारिवा ११ । इत्यमरः ॥ गोप्यादिपद्मश्यामलतायां नागजिह्वायां इति केचित् । गोप्यादिद्वयं श्यामलतायां अनन्तोत्पलशारिवेति द्वयं अनन्तमूले इति केचित् । इति तट्टीकायां भरतः ॥ तस्या गुणाः । मलबन्धकारित्वं । रक्तपित्तनाशित्वं । शीतलत्वञ्च । इति राजवल्लभः ॥

अनन्यगतिकः, त्रि, (नास्ति अन्या गतिः यस्य। समासान्तः कः ।) गत्यन्तररहितः । एकाश्रयः । "अनन्यगतिके जने विगतपातके घातके यथारुचि तथा कुरु प्रिय तथापि मान्यं भजे" । इत्युद्भटः ॥

अनन्यजः, पुं, (नास्ति अन्यत् यस्मात् सः अनन्यो विष्णुः, तस्मात् जात इति, अनन्य + जन् + ड ।) कामदेवः । इत्यमरः ॥

अनन्यवृत्तिः, त्रि, (न अन्या वृत्तिरस्य इति ।) एकमात्रवृत्तिः । तत्पर्य्यायः । एकतानः २ एकाग्रः ३ एकायनः ४ एकसर्गः ५ एकाग्रः ६ एकायनगतः ७ । इत्यमरः ॥

अनपायी, [न्] त्रि, (नास्ति अपायः विनाशोऽस्य इति, न + अपाय + इनि ।) निश्चलः । अपायशून्यः । अनश्वरः । यथा,—

"अनपायिभिरस्माभिर्गुमायाश्च गृहे प्रभो" ।
इति श्रीभागवतं ॥
("अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी" ।
इति कुमारे ॥)

अनभिज्ञः, त्रि, (अभि जानाति इति अभिज्ञः, अभि + ज्ञा + कः, न अभिज्ञ इति नञ्समासः ।) मूर्खः । प्रज्ञारहितः । बुद्धिहीनः । यथा,—

"धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान्"
इति भ्रमराष्टकं ॥

अनभिलाषः, पुं, (न अभिलाष इति नञ्समासः ।) अरुचिः । इति राजनिर्घण्टः ॥ अनिच्छा ॥ (त्रि, नास्ति अभिलाषो यस्य इति समासे अभिलाषशून्यः ।)

अनमः, पुं, (नमति प्रणमति इति नमः, नम् + पचाद्यच्, न नमः अनम इति नञ्समासः ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

अनमितम्यचः, त्रि, (मितं परिमितं पचति इति, मित + पच् + खच्, न मितम्यच इति अमितम्यचः, न अमितम्यच इति अनमितम्यचः, नञ्समासः ।) मितम्यचः । क्षपणः । इत्यमरटीकायां रमानाथः ॥

अनम्बरः, पुं, (नास्ति अम्बरं परिधेयं यस्य सः ।) बौद्धविशेषः । इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनयः, पुं, (अयः सुभावहो विधिस्तद्विन्नः नञ्समासः ।) दैवं । असुखं । व्यसनं । विपद् । इति मेदिनी ॥
("अनयो नयसम्पन्ने यत्र ते विहता मतिः" ।
इति रामायणे ।)

अनर्गलं, त्रि, (नास्ति अर्गलं प्रतिबन्धो यस्य तत् ।) निरर्गलं । प्रतिबन्धकरहितं । तत्पर्य्यायः । अवाधं २ उच्छृङ्खलं ३ उद्दाम ४ नियन्त्रितं ५ निरङ्कुशं ६ । इति हेमचन्द्रः ॥
("ततः परं तेन मखाय यज्वना
तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
इति रघुवंशे ।)

अनर्थकं, क्ली, (नास्ति अर्थः यस्य तत्, समासान्तः कः ।) निरर्थकं । अर्थशून्यवाक्यं । तत्पर्य्यायः । अवद्यं २ । इत्यमरः ॥ अबध्यं ३ । इति तट्टीका ॥

अनलः, पुं, (नास्ति अलः बडबाह्यवस्तुदहनेऽपि दृप्तिर्यस्य सः, कृत्तिकानक्षत्रे, वत्सरे भगवति वासुदेवे ।) अग्निः । वसुभेदः । इति मेदिनी ॥ चित्रकः । रक्तचित्रकः । भल्लातकः । पित्तं । इति राजनिर्घण्टः ॥

अनलप्रभा, स्त्री, (अनलस्य वह्नेः प्रभेव प्रभा यस्याः,

सा ।) ज्योतिष्मतीलता । इति राजनिर्घण्टः ॥
अनलप्रिया, स्त्री, (अनलस्य अग्नेः प्रिया षष्ठीतत् ।) अग्निभार्य्या । आग्नेयी । इति जटाधरः ॥
अनलिः, पुं, (अनिति अन् + पचाद्यच् अनः तन्मधुपानेन जीवनधारयिता अलिः भ्रमरो यत्र सः ।) वकवृक्षः । इति त्रिकाण्डशेषः ॥
अनवधानं, क्ली, (न अवधानं मनोयोगः नञ्समासः ।) चित्तस्याविक्षेपः । अमनोयोगः । अप्रणिधानं । इति हलायुधः ॥ तद्विशिष्टे त्रि ॥
अनवधानता, स्त्री, (नास्ति अवधानं मनोयोगो यस्य सः, तस्य भावः ततस्तल् स्त्रियां टाप् ।) मनोयोगशून्यता । चित्तस्थानन्यविषयाभावत्वं । कार्य्ये अनवहितत्वं । तत्पर्य्यायः । प्रमादः २ । इत्यमरः ॥
"कर्त्तव्याकरणं यच्च समर्थस्य क्वचिद्भवेत् ।
उच्यते द्वितयं तच्च प्रमादोऽनवधानता" ॥
इति शब्दरत्नावली ॥
अनवरः, त्रि, (न अवरः, नञ्समासः ।) अकनिष्ठः । अन्यूनः । श्रेष्ठः । प्रधानः । यथा,—
"सोऽयमिन्द्रादनवरो वासुदेवाच्च भारत" ।
इति विराटपर्व्व ॥
अनवरतं, क्ली, (अव + रम् + भावे क्तः, नास्ति अवरतं विरतिर्यत्र तत् ।) निरन्तरं । तत्पर्य्यायः । सततं २ अनारतं ३ अश्रान्तं ४ सन्ततं ५ अविरतं ६ अनिशं ७ नित्यं ८ अजस्रं ९ प्रसक्तं १० आसक्तं ११ अनद्धं १२ । इति जटाधरः ॥
तद्विशिष्टे वाच्यलिङ्गः । इत्यमरः ॥
("अनवरतधनुर्ज्यास्फालनक्रूरकर्म्मा" ।
इति शाकुन्तले ।)
अनवरार्द्धः, त्रि, (अवरमद्ध, कर्म्मधारयः, तत्र भवः, अवरार्द्ध + यत्, ततो नञ्समासः ।) उत्तमः । प्रधानः । इत्यमरः ॥
अनवलम्बः, त्रि, (नास्ति अवलंबः आश्रयो यस्य सः ।) अवलम्बनशून्यः । निराश्रयः । यथा,—
"न परं पथि पक्षपातिता-
नवलम्बे किमु मादृशेऽपि सा" ।
इति नैषधं ॥
अनवसरः, त्रि, (नास्ति अवसरः अवकाशो यस्य सः ।) निरवकाशः । अवसराभावे पुं । यथा,—
"अतर्क्येश्वर्ये त्वय्यनवसरदुःस्था हतधियः" ।
इति महिम्नः स्तोत्रं ॥
अनवस्करं, त्रि, (अव अधोवर्त्मना कीर्य्यते क्षिप्यते अव + कृ + अप्, "वर्च्चस्कोऽवस्कर इति सुड़ागमः" नास्ति अवस्करो मलं यस्य तत् ।) निर्म्मलं । शोधितं । इत्यमरः ॥
अनवस्था, स्त्री, (अव + स्था भावे अङ्, न अवस्था अवस्थानं नञ्समासः ।) तर्कविशेषः । तस्य लक्षणं । अप्रामाणिकानन्तप्रवाहमूलकप्रसङ्गत्वं । यथा,—
"घटत्वं यदि यावद्घटहेतुवृत्ति स्यात् घटान्यवृत्ति स्यात्" । इति तार्किकाः ॥ उपपाद्योपपादकयोरविश्रान्तिः । इति मीमांसकाः । दक्षाभावः । स्थित्यभावः ॥
("एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी" ।
इति काव्यप्रकाशे ।)
अनवस्थानः, पुं, (न अवस्थानमवस्थितिर्यस्य सः ।) वायुः । इति राजनिर्घण्टः ॥ अवस्थितिशून्ये त्रि ॥ (चञ्चलः । अव्यवस्थितः ।)
अनवस्थितिः, स्त्री, (न अवस्थितिः अवस्थानं नञ्समासः ।) चापल्यं । चाञ्चल्यं । अस्थिरता । अधैर्य्यं । इति हेमचन्द्रः ॥
अनशनं, क्ली, (अश् भावे ल्युट्, न अशनं भोजनं, नञ्समासः ।) भोजनाभावः । उपवासः । इति हलायुधः ॥ वदति त्रि ॥ (प्रायोपवेशनं । "तदहमनशनं कृत्वा प्रातः प्राणानुत्सृजामि" । इति पञ्चतन्त्रे ।)
अनश्वरं, त्रि, (नश् + कर्त्तरि वरच् न नश्वरं, नञ्समासः ।) सनातनं । नित्यं । ध्रुवं । शाश्वतं । इति हेमचन्द्रः ॥
("मत्वा विश्वमनश्वरं निविशते संसारकाराग्रहे" ।
इति वैराग्यशतके ।)
अनसूया, स्त्री, (असु क्षेपणादित्वात् यक् + भावे अ, स्त्रियां टाप्, न असूया नञ्समासः ।) असूयाभावः । तस्या लक्षणं यथा बृहस्पतिः ।
"न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता" ॥
इत्येकादशीतत्त्वं ॥ अत्रिमुनिपत्नी । इति गारुड़े २९ अध्यायः ॥ कर्द्दममुनिकन्या । इति श्रीभागवतं ॥ असूयाशून्ये त्रि ॥
अनहंवादी, [न्] त्रि, (अहमिति गर्व्वं वदति यः, अहं + वद् + णिनि, उपपदसमासः, ततो नञ्समासः । अहमित्यव्ययं ।) गर्व्वरहितः ।
"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्विक उच्यते" ।
इति श्रीभगवद्गीता । अनहंवादी गर्व्वरहितः । इत्याह्निकतत्त्वं ॥
अनहङ्कृतिः, स्त्री, (न अहङ्कृतिः अहङ्कारः नञ्समासः ।) अहङ्काराभावः । तत्पर्य्यायः । अग्रोचः २ । इति त्रिकाण्डशेषः ॥ (त्रि नास्ति अहङ्कृतिः यस्य इति समासे अहङ्कारशून्यः ।)
अनक्षः, त्रि, अक्षिहीनः । अन्धः । न विद्यते अक्षिणी यस्य इत्यर्थे ष प्रत्ययः । अक्षभिन्नः ॥
अनक्षरं, क्ली, (न सन्ति प्रशस्तानि अक्षराणि यत्र तत् ।) दुर्व्वचनं । इति भरतः ॥ अवचनार्हे । इति मधुः ॥ गालिप्रभृति । गुणाक्षेपकदोषाविष्कारित्वाक्यं । इति केचित् ॥ तत्पर्य्यायः । अवाच्यं २ । इत्यमरः ॥
अनक्षि, क्ली, (अप्रशस्तमक्षि नेत्रं, नञ्समासः ।) कुत्सितचक्षुः । तत्पर्य्यायः । असौम्याक्षि २ । इति हेमचन्द्रः ॥
अनाकुलः, त्रि, (न आकुलः नञ्समासः ।) स्थिरः । एकाग्रः । अव्याकुलः । अव्ययः । इति जटाधरः ।
("अनाकुलाऽविक्लवा च सुसम्भ्रान्ता च मे मतिः" ।
इति रामायणे ।)
अनाक्रान्ता, स्त्री, (कैरपि न आक्रान्ता आक्रमितुमयोग्या कण्टकव्याप्तत्वात्, नञ्समासः ।) कण्टकारीवृक्षः । इति रत्नमाला ॥ अनाक्रमणविशिष्टे त्रि ॥
अनागतं, त्रि, (आङ् + गम् + कर्त्तरि क्तः, न आगतं नञ्समासः ।) भविष्यत् । इति राजनिर्घण्टः ॥ अनायातं । अनुपस्थितं । अज्ञातं । यथा—
("तावद्भयस्य भेतव्यं यावद्भयमनागतं" ।
इति पञ्चतन्त्रे ।)
"अनागतादिलिङ्गेन न स्यादनुमितिस्त्रिदा" ।
इति भाषापरिच्छेदः ॥
अनागतार्त्तवा, स्त्री, (न आगतमप्राप्तमार्त्तवं स्त्रीपुष्पविकाशनं यस्याः सा, स्त्रियां टाप् । ऋतु + अण् ।) अप्राप्तऋतुका । अरजस्का । तत्पर्य्यायः । गौरी २ नग्निका ३ । इत्यमरः ॥
अनाचारः, पुं, (न कुत्सित आचारः नञ्समासः । नञ्च अप्राशस्त्ये अभावार्थे तु आचाराभावः ।) कदाचारः । अशुद्धाचारः । श्रुतिस्मृतिविरुद्धकर्म्मकरणं । यथा,—
"सर्व्वदेशेष्वनाचारः पथि ताम्बूलचर्व्वणं" ॥
इति स्मृतिः ॥ तद्विशिष्टे त्रि ॥
अनातपः, पुं, (आङ् + तप् + अच्, आतपस्य रौद्रस्याभावः नञ्समासः ।) रौद्राभावः । छाया । इति राजनिर्घण्टः ॥ (त्रि छायाविशिष्टे ।
"खल्वाटोदिवसेश्वरस्य किरणैः सन्तापिते मस्तके ।
वाञ्छन् देशमनातपं विधिवशात् विल्वस्य मूलं गतः" ॥ इति नीतिशतके ।)
अनातुरः, त्रि, (न आतुरः रोगी नञ्समासः ।) अरोगी । यथा,—
"तेषामनातुराः पूर्व्वे वातलाद्याः सदातुराः" ।
इति चरकः । ("भेजे धर्म्ममनातुरः" । इति रघुवंशे ।)
अनाथः, त्रि, (नास्ति नाथः आश्रयो यस्य सः ।) प्रभुहीनः । नाथशून्यः । यथा,—
"वना वना वनाश्चवत् स्वजीवना वनामवत्" ।
इति नलोदयः ।
("नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे" ।
इति उत्तरचरिते ।)
अनादरः, पुं, (आ + दृ + भावे अप्, न आदरः नञ्समासः ।) निरादरः । तत्पर्य्यायः । परिभवः २ परिभावः ३ तिरस्क्रिया ४ रीढ़ा ५ अवमानना ६ अवज्ञा ७ अवहेलं ८ असूत्तणं ९ । इत्यमरः ॥ असुत्तणं १० असूर्त्तणं ११ असूर्त्तणं १२ । इति भरतः ॥ ("गुणेषु रागो व्यसनेष्वनादरः" । इति पञ्चतन्त्रे ।)
अनादिः, त्रि, (नास्ति आदिः कारणं यस्य सः ।) आदिरहितः । उत्पत्तिशून्यः । स्वयम्भूः । यथा,—
"अनादिरादिर्गोविन्दः सर्व्वकारणकारणं" ।
इति ब्रह्मसंहिता ॥
अनादृतः, त्रि, (आ + दृ + कर्म्मणि क्तः, न आदृतः नञ्समासः ।) निरादरः । अवज्ञातः । अवमानितः । इति हेमचन्द्रः ॥

"सर्व्व तस्यादृता धर्म्मा यस्यैते त्रय आदृताः। अनादृतास्तु यस्येते सर्व्वास्तस्याफलाः क्रियाः" ॥ इति मनुः।)

अनामकं, क्ली, (अनम् अन्+घञर्थे कः, अनं जीवनं आमयति, रोगग्रस्तं करोति, अम्+णिच्+ण्वुल् अनस्य आमकं षष्ठीतत्पुरुषः।) अर्शोरोगः। इति शब्दरत्नावली ॥ मलमासे पुं। इति मलमासतत्त्वं ॥ दुर्नामके निर्नामके च त्रि।

अनामयं, क्ली, (आ+अम्+भावे घञ्, आमं रुमावस्थां याति प्राप्नोत्यनेन, आम+या क, आमस्य अभावः अव्ययीभावः।) रोगाभावः आरोग्यं। इत्यमरः ॥ ("ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयं"। इति मनुः।) तद्विशिष्ट त्रि ॥

अनामा, [न्] पुं, (नास्ति ब्रह्मशिरश्छेदनसाधनतया अप्रशस्तं नाम यस्य सः। अनया अङ्गुल्या शिवेन ब्रह्मशिरश्छिन्नं। इति पुराणे।) अनामिकाङ्गुली। इति शब्दरत्नावली ॥

अनामिका, स्त्री, (नास्ति ब्रह्मशिरश्छेदनसाधनतया प्रशस्तं नाम यस्याः सा। स्त्रियां डाप् ततः स्वार्थे कन् टाप् च।) कनिष्ठामध्यमयोर्मध्यवर्त्यङ्गुली। इत्यमरः ॥ ("वस्त्रान्तानामिकाकेशनखरोमदशास्पृशः"। इति सुश्रुते ॥)

अनायत्तः, त्रि, (आ+यत्+क्तः, न आयत्तः नञ्समासः।) अवशीभूतः। अनधीनः। यथा,— "एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता।" इति हितोपदेशः ॥

अनायासः, पुं, (आ+यस्+घञ् ततो नञ्समासः) अक्लेशः। तस्य लक्षणं यथा। बृहस्पतिः ॥ "शरीरं पीड्यते येन सुखेनापि कर्म्मणा। अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते" ॥ इत्येकादशीतत्त्वं ॥ श्रमश्चतिरेकः। यत्नाभावः। यथा,— "अनायासेन मरणं विना दैन्येन जीवनं। अनाराधितगोविन्दचरणस्य कथं भवेत्" ॥ इति प्रामाणिकाः ॥

अनायासकृतं, त्रि, (अनायासेन अक्लेशेन कृतं तृतीयातत्पुरुषः।) अनायासेन यत् क्रियते स्म तत्। विना यत्नेन कृतं। तत्पर्य्यायः। फाण्टं २। इत्यमरः ॥

अनारतं, क्ली, (आ+रम्+क्तः, ततो नञ्समासः) अनवरतं। सततं। नित्यं। इत्यमरः ॥ ("अनारतं तेन पदेषु लम्भिताः। विभज्य सम्यग्विनियोगसत्क्रिया" ॥ इति किरातार्জ্জुनीये।)

अनारम्भः, पुं, (आ+रभ्+भावे घञ्, ततो नञ्समासः।) आरम्भाभावः। यथा,— "न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते"। इति भगवद्गीता ॥

अनार्জ্জवं, क्ली, (ऋजोर्भावः ऋजु+भावे अण्, ततो नञ्समासः।) रोगः। इति राजनिर्घण्टः ॥ ऋजुत्वाभावः ॥

अनार्य्यः, त्रि, (ऋ+ण्यत्, न आर्य्यः श्रेष्ठः, नञ्समासः।) अश्रेष्ठः। यथा,— "अनार्य्यजुष्टमस्वर्य्यमकीर्त्तिकरमर्জ্জुन"। इति श्रीभगवद्गीता ॥

अनार्य्यकं, क्ली, (नास्ति आर्य्यो यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे भवं अनार्य्य+कन्।) अगुरुकाष्ठं। इति राजनिर्घण्टः ॥

अनार्य्यजं, क्ली, (नास्ति आर्य्यो यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे जायते यत्, अनार्य्य+जन्+ड, उपपदसमासः।) अगुरु। इति हेमचन्द्रः ॥

अनार्य्यतिक्तः, पुं, (अनार्य्यप्रियत्वासौ तिक्तश्चेति शाकपार्थिवादिः।) भूनिम्बः। इत्यमरः ॥ चिरात इति भाषा।

अनालोचितः, त्रि, (न आलोचितः कर्त्तव्यतया अवधारितः।) अकृतालोचनः। इतिकर्त्तव्यतयानवधारितः। अविवेचितः। यथा,— "किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा"। इति देवीमाहात्म्यं ॥

अनाविलः, त्रि, (न आविलः, नञ्समासः।) आविलशून्यः। निर्म्मलः। इति हलायुधः ॥ (स्वच्छः, स्वास्थ्यकरः।) ("पद्मगन्धि शिवं वारि सुखं शीतमनाविलं"। इति रामायणे। "आङ्गल्यं शस्यसम्पन्नमार्य्यप्रायमनाविलम्"। इति मनुः।)

अनाहृतः, त्रि, (आ+हृ+कर्म्मणि क्तः न आहृतः, नञ्समासः।) आवरणशून्यः। अनाच्छादितः। यथा। "अनाहृतत्वाद्धरिन्तरं न ते"। इति श्रीभागवतं ॥

अनाहृष्टिः, स्त्री, (न आहृष्टिर्वर्षणं, नञ्समासः।) ईतिविशेषः। वर्षणाभावः। इति स्मृतिः ॥ शुका इति भाषा। ("अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" ॥ इति प्रसिद्धम्।)

अनाद्यः, त्रि, (याचिनिमित्ते तु नञ्+णिच् कर्म्मणि यत् ततो नञ्समासः।) नाद्यायोग्यः। नञ्धातोर्घञि नञ्समासः ॥

अनासिकः, त्रि, (नास्ति नासिका यस्य सः।) नासिकारहितः। तत्पर्य्यायः। विखः २ विखुः ३ विग्रः ४। इति हेमचन्द्रः ॥

अनाहतं, क्ली, (आ+हन्+क्तः नास्ति आहतं छेदो यस्य तत्।) तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं। तत्तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभद्वादशदलपद्माकारं। तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति। इति तन्त्रसारः ॥

अनाहतं, त्रि, (आ+हन्+भावे क्तः, न सन्ति आहतानि छेदच्छालनभोगा यस्य तत्।) नूतनवस्त्रं। छेदच्छालनभोगरहितवस्त्रं। इत्यमरः ॥ अगुणितं। इत्यजटाधरः ॥ अक्षतोपाघातं ॥ (अक्षतः। आघातरहितः। अक्षतश्चः। तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं, तत् तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभद्वादशदलपद्माकारं, तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति। "शब्दोब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते। अनाहताख्यं तत्पद्मं मुनिभिः परिकीर्त्तितं" ॥

अनाहारः, पुं, (आ+हृ+भावे घञ् ततो नञ्समासः।) भोजनाभावः। यथा,— "ऋतावनाहारतया भयेनेति" चरकः ॥

अनाहूतः, त्रि, (आ+हे+कर्म्मणि क्तः ततो नञ्समासः।) अकृताह्वानः। अनिमन्त्रितः। यथा,— "अनाहूतैरेत्य प्रचुरगुणलोभेन भवतः"। इत्युद्भटः ॥ क्षमध्योऽपि यथा— "अनाऽऽहूता अप्यभियान्ति सौहृदं"। इति श्रीभागवतं ॥

अनिगीर्णः, त्रि, (नि+गॄ+क्तः ततो नञ्समासः।) अनुक्तः। यथा,— "विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्"। इति साहित्यदर्पणं ॥

अनिच्छुः, त्रि, (इष्+कर्त्तरि उ विन्दुरिच्छुरिति सूत्रेण निपातनात् साधु।) अनिच्छाविशिष्टः। अनाकाङ्क्षी। अस्पृहः। इच्छतीति इच्छुः ततो नञ्समासः ॥

अनित्यः, त्रि, (नि+त्यप् ततो नञ्समासः।) नश्वरः। अस्थायी। जन्यवस्तु। यथा,— "धर्म्मो नित्यः सुखदुःखेऽप्यनित्ये। जीवो नित्यो हेतुरस्याप्यनित्यः"। इति महाभारते भारतसावित्री ॥

अनिन्दितः, त्रि, (निदि+कर्म्मणि क्तः ततो नञ्समासः।) निन्दारहितः। अगर्हितः। तत्पर्य्यायः। प्रशस्यः २ साधुः ३। इति त्रिकाण्डशेषः ॥ ("अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्জ্জयेत्" ॥ इति मनुः ॥)

अनिपुणः, त्रि, (न निपुणः पटुः नञ्समासः।) अप्रवीणः। अविज्ञः। अपटुः। यथा,— "यः शास्त्रादिष्वनिपुणः श्रद्धावान् स तु मध्यमः"। इति भक्तिरसामृतसिन्धुः ॥

अनिमिषः, पुं, स्त्री, (नास्ति निमिषः निमेषः चक्षुःस्पन्दनं यस्य सः।) देवता। मत्स्यः। इत्यमरः ॥ (निमेषरहितः। स्थिरदृष्टिः। सावधानः। अप्रमत्तः। "सुरेषु नाम्नश्चदवैक्षतास्रणो- र्न्दृपे निमेषं निजसम्मुखे सति"। इति नैषधे।)

अनिमिषाचार्य्यः, पुं, (अनिमिषाणां देवानां आचार्य्यः गुरुः षष्ठीतत्।) बृहस्पतिः। देवगुरुः। इति शब्दरत्नावली ॥

अनिमेषः, पुं, (नास्ति निमेषः चक्षुःस्पन्दनं यस्य सः।) देवता। मत्स्यः। इति हेमचन्द्रः ॥

अनियतं, त्रि, (नि+यम्+क्तः, न नियतं नञ्समासः।) अनित्यं। अस्थायि। यथा,— "रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः"।

इति साहित्यदर्पणं ॥ "रिक्तं त्रिविधं मुनयो नियतमनियतं योगजञ्च" । इति ज्योतिषं ॥

अनियमः, पुं, (न नियमः, नञ्समासः ।) नियमाभावः । अनिश्चयः । अनिर्द्धारः । यथा,—
"गुरुषट्च पादानां शेषेष्वनियमो मतः" ।
इति छन्दोमञ्जरी ॥ तद्विशिष्टे त्रि ॥

अनिराकृतः, त्रि, (निर्+आ+कृ कर्म्मणि क्तः, ततो नञ्समासः ।) अनिवारितः । यथा,—
"अनिराकृततापसम्पदं
फलहीनां सुमनोभिरुज्झितां" ।
इति माघः ॥

अनिरुद्धं, क्ली, (नि+रुध्+भावे क्तः, नास्ति निरुद्धं यस्मात् तत् ।) सन्तानं । पश्चादिबन्धनरज्जुः । इति त्रिकाण्डशेषः ॥

अनिरुद्धः, पुं, (न निरुध्यतेऽसौ नि+रुध्+कर्म्मणि क्तः, ततो नञ्समासः ।) कामदेवपुत्रः । तत्पर्य्यायः । उषापतिः २ ब्रह्मसूः ३ विश्वकेतुः ४ । इत्यमरः ॥ स तु भगवतश्चतुर्व्यूहान्तर्गतादित्यूहः । तस्मात् सृष्टिर्भवति यथा,—
"तमसो ब्रह्मसम्भूतं तमोमूलात्मतात्मकं ।
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमाश्रितं ॥
सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधानं प्रचक्षते ।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम ॥
विद्यासहायवान् देवो विश्वक्सेनो हरिः प्रभुः ।
अम्भस्येव शयनञ्चक्रे निद्रायोगमुपागतः ॥
जगतश्चिन्तयन् सृष्टिं महानात्मगुणः स्मृतः" ।
इति महाभारते मोक्षधर्म्मः ॥

अनिरुद्धः, त्रि, (नि+रुध्+कर्म्मणि क्तः, ततो नञ्समासः ।) रोधशून्यः । अप्रतिबद्धः । चरः । इति विश्वः ॥

अनिरुद्धपथं, क्ली, (अनिरुद्धः प्रतिबन्धरहितः पन्था यत्र सः ।) आकाशं । इति शब्दचन्द्रिका ॥ अरुद्धवर्त्म ॥

अनिरुद्धभाविनी, स्त्री, (अनिरुद्धस्य कामपुत्रस्य भाविनी पत्नी, षष्ठीतत् ।) उषा । सा च कामपुत्रपत्नी । बाणराजकन्या । इति शब्दरत्नावली ॥

अनिर्णयः, पुं, (निर्+नी+भावे अच्, ततो नञ्समासः ।) अनिर्द्धारः । अनिश्चयः । निर्पूर्व्वकनीञ्धातोरलि नञ्समासः ॥

अनिर्धारितः, त्रि, (निर्+धृ+णिच् कर्म्मणि क्तः, ततो नञ्समासः ।) अकृतनिर्धारणः । अनिश्चितः । यथा । "अनिर्धारितैकत्वानेकत्वविशेषस्य पूर्व्वरूपमात्रस्य व्यक्तस्य व्याधिलिङ्गत्वं" । इति रोगपूर्व्वरूपलक्षणे रक्षितः ॥

अनिर्म्मलः, त्रि, (न निर्म्मलः परिष्कृतः नञ्समासः ।) मलिनः । आविलः । अपरिष्कृतः । निर्म्मलाभावे क्ली ॥

अनिर्म्माल्या, स्त्री, (निर्+मल्+ण्यत् स्त्रियां टाप्, ततो नञ्समासः ।) एकानामकौषधिः । इति शब्दरत्नावली ॥

अनिर्व्वचनीयः, त्रि, (निर्+वच्+कर्म्मणि अनीयः, ततो नञ्समासः ।) निर्व्वचनायोग्यः । अनिर्व्वाच्यः । वाक्यागम्यः । यथा, "सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चिदिति वदन्ति" । इत्यज्ञानलक्षणे वेदान्तसारः ॥

अनिर्व्वाहः, पुं, (निर्+वह्+भावे घञ्, ततो नञ्समासः ।) निर्व्वाहाभावः । अनिष्पत्तिः । असङ्गतिः । यथा । मुख्यार्थबाधे तद्योगे इति कारिकायां मुख्यार्थस्यान्वयबाधोऽपि तात्पर्य्यविषयस्यान्वयस्य मुख्यार्थतावच्छेदकरूपेणानिर्व्वाह एव । इति काव्यप्रकाशटीकायां महेश्वरः ॥

अनिर्व्विण्णः, त्रि, (निर्+विद्+क्तः, ततो नञ्समासः ।) निर्व्वेदशून्यः । वत्रे निर्व्विण्णमानस इत्यत्र निर्व्विण्णं विरक्तं इति देवीमाहात्म्यटीका तद्विन्नः अविरक्तः विषयासक्त इति यावत् ॥ निर्व्विण्णोतिममत्वेन इत्यत्र निर्व्विण्णो दुःखितः इति देवीमाहात्म्यटीका तद्विन्नः अदुःखितः ॥ बहुव्रीहौ तु अतिदुःखितः ॥

अनिर्ऋतिः, स्त्री, (नि निर्ऋतिः, खाच्छन्द्यं, नञ्समासः ।) निर्ऋत्यभावः । दरिद्रता । यथा । "अनिर्ऋतिनिशाचरी मम गृहान्तरालं गता" । इत्युद्भटः ॥

अनिलः, पुं, (अनिति जीवत्यनेन अन्+इलच् ।) वायुः । इत्यमरः ॥ वसुविशेषः । इति मेदिनी ॥ (शरीरस्थप्राणादिवायुः । वातरोगः । खातिनक्षत्रं ।)

अनिलघ्नकः, पुं, (अनिलं वातरोगं हन्ति इति, अनिल+हन्+टक्+स्वार्थे कन् ।) विभीतकवृक्षः । इति राजनिर्घण्टः ॥

अनिलसखः, पुं, (अनिलस्य सखा इति राजाहःसखिभ्यष्टच् इति समासान्तः टच् ।) अग्निः । इति हेमचन्द्रः ॥

अनिलान्तकः, पुं, (अनिलस्य अन्तकः ।) इक्ष्वाकवृक्षः । इति राजनिर्घण्टः ॥

अनिलामयः, पुं, (अनिलः वात एव आमयः रोगः, रूपकसमासः ।) वातरोगः । इति राजनिर्घण्टः ॥

अनिर्लोचितः, त्रि, (न निर्लोचित इति नञ्समासः, निर्+लोचि+क्त ।) अनालोचितः । अविवेचितः । यथा,—
"अनिर्लोचितकार्य्यस्य वाग्जालं वाग्मिनो वृथा" ।
इति माघः ॥

अनिशं, क्ली, (निशा रात्रिः, उपचारात् व्यापारराहित्यम्, नास्ति निशा यस्मिन् तत्, क्रियाविशेषणत्वे अस्य क्लीवत्वं, द्रव्यविशेषणत्वे तु त्रिलिङ्गत्वं ।) अनवरतं । सततं । इत्यमरः ॥ ("निजमैच्छि मन्दमनिशं निशितैः क्षपितं शरीरमशरीरशरैः" । इति माघे ।)

अनिश्चितः, त्रि, (निर्+चि+कर्म्मणि क्तः, न निश्चित इति नञ्समासः ।) निश्चयरहितः । अनिरूपितः । अनिर्णीतः । यथा, "कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः" । इति श्रीभागवतं ॥

अनिष्टः, त्रि, (इष्+कर्म्मणि क्तः, न इष्ट इति नञ्समासः ।) अनभिलषितः । अवाञ्छितः । यथा, "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्" । इति साहित्यदर्पणं ॥

अनिष्टा, स्त्री, (इष्+क्त, +टाप्, नञ्समासः) नागबला । इति राजनिर्घण्टः ॥

अनिष्णातः, त्रि, (नि+स्ना+कर्त्तरि क्तः, न निष्णात इति नञ्समासः ।) अकुशलः । अप्रवीणः । अनभिज्ञः । अज्ञानी । निपूर्व्वात् स्नाशौचे इत्यस्मात् कर्त्तरि क्ते नञ्समासः ॥

अनिष्पन्नः, त्रि, (पाणिनिमते तु नि+स्ना+कर्त्तरि क्तः, निनदीभ्यां स्नातेः कौशले इति षत्वं, ततो नञ्समासः ।) निष्पत्तिरहितः । असमाप्तः । असम्पूर्णः । निर्पूर्व्वकपदधातोः कर्म्मणि क्ते निष्पन्नः पश्चान्नञ्समासः ॥

अनिक्षुः, पुं, (इक्षुसदृशः नञ्समासः, नञश्च सादृश्ये । "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥
इति कारिकायां ।)
इक्षुविशेषः । आनाखु । खाकड़ा इति ख्यातः । तत्पर्य्यायः । इक्षुतुल्या २ इक्षुशालिका ३ इक्षुवालिका ४ । इति रत्नमाला ॥

अनीकः, पुं, क्ली, (नास्ति नीः स्वर्गप्रापको यस्मात् । कप्, अर्द्धर्चादित्वात् पुंस्त्वं क्लीवत्वञ्च ।) युद्धं, सैन्यं । इति मेदिनी ॥

अनीकस्थः, पुं, (अनीके युद्धे तिष्ठति, अनीक+स्था+कर्त्तरि डः, उपपदसमासः ।) रणगतः । संग्रामस्थः । हस्तिशिक्षाविधज्ञश्च । राजरक्षकः । चिक्रं । वीरमर्द्दकः । इति मेदिनी ॥ जयढाक इति भाषा ।

अनीकिनी, स्त्री, (अनीको रणोऽस्ति प्रयोजनत्वेन अस्या इति, अनीक+इनि+स्त्रियाम् ।) सैन्यसंख्याविशेषः । तद्यथा । ६५६१ अश्वाः । २१८७ हस्तिनः । १०९३५ पदातयः । २१८७ रथाः । समुदायेन सप्तत्यधिकाष्टशताधिकसहस्राधिकायुतद्वयं । २१८७० अक्षौहिणीदशमांशेयं । इत्यमरभरतौ ॥

अनीचिदर्शी, [न्] पुं, (नीचात् नीचकार्य्यात् अन्यत्, नञ्समासः, तदेव विद्यतेऽस्य अनीच+इनि, तादृशसत्कर्म्मशालिजनवत् पश्यति अनीची+दृश्+णिनि, उपपदसमासः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥

अनीतिः, स्त्री, (न नीतिः, नञ्समासः ।) दुर्नीतिः । अन्यायः । अत्याचारः । यथा,—
"विप्लवो व्यतिपातश्च ये चान्येऽनीतिसम्भवाः" ।
इति वामनपुराणं ॥

अनीशः, पुं, (नास्ति ईशः नियन्ता यस्य सः ।) विष्णुः । इति तस्य सहस्रनाममध्ये पठितः ॥ ईश्वरभिन्ने त्रि । यथा,—
"अनीशो वा कुर्य्याद्भुवनजनने कः परिकरं" ।
इति पुष्पदन्तः ॥

अनु, व्य, उपसर्गविशेषः । अस्यार्थाः । पश्चात् । सादृश्यं । लक्षणं । वीप्सा । इत्यमरभावः । भागः ।

हीनः। सहार्थः। आयामः। समीपं। परिपाटी। इति मेदिनी॥ पुनरर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

अनुकः, त्रि, (अनु कामयते, अनु+कन्। कामुकः। कामी। इत्यमरः॥

अनुकम्पा, स्त्री, (अनु+कम्प्+भावे अः, स्त्रियां टाप्।) दया। कृपा। इत्यमरः॥ ("भूतानुकम्पा तव चेदियं गौरेका भवेत् खलिमती त्यदन्ते"। इति रघुवंशे।)

अनुकम्प्यः, त्रिः (अनुकम्पामर्हति अनुकम्पा+अर्हार्थे यत्। अथवा अनु+कम्प् णिच्+कर्म्मणि यत्।) तरस्वी। वेगवान्। इति हारावली॥ कृपायोग्यः। दयापात्रं।

"अनुकम्प्योऽनुकम्पस्य स जातः स च जीवति"। इति काव्यप्रकाशः॥

("दुहितरमनुकम्पामदिरादाय दोर्भ्यां"।) इति कुमारसम्भवे।)

अनुकरणं, क्ली, (अनु+कृ+ल्युट्।) अनुकारः। सदृशीकरणं। व्याकरणमते तत् द्विविधं। यत्रार्थरहितकेवलशब्दस्य सदृशकरणं तत् शब्दानुकरणं १। यत्रार्थविशिष्टस्य सदृशकरणं तदर्थानुकरणं २। इति गोयीचन्द्रटीकोपरि विद्यालङ्कारटीप्पनी॥

अनुकर्षः, पुं, (अनुक्रष्यते स्वसम्बन्धेन चक्रेण, अनु+कृष+घञ्।) रथाधःस्थितकाष्ठं। इत्यमरः॥ रथेर तला इति भाषा। रथस्याधस्तनभागे यद्वा रथाधारणकाष्ठं तिष्ठति यतोऽधश्चक्रं उपरि पट्टकर्म्म यत्र चक्रं तदनुकर्षशब्दवाच्यं। इति भरतः। आकर्षणं। इति मेदिनी॥

अनुकर्षणं, क्ली, (अनु+कृष्+भावे ल्युट्।) अवकर्षणं। आकर्षणं। इति मेदिनी॥

अनुकर्षा, [न्] पुं, (अनु+कृष्+अन्।) अनुकर्षः। रथाधःस्थितकाष्ठं। इत्यमरटीकायां रायमुकुटः॥

अनुकल्पः, पुं, (अनुकल्प्यते गौणत्वेन विधीयते, अनु+कृप्+णिच्+अच्।) मुख्यकल्पादधमः। गौणकल्पः। मुख्यस्यानापन्नप्रतिनिधिः। यथा, "व्रीह्यभावे नीवार्यैर्यजेत"। इत्यमरभरतौ॥ ("प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। न साम्परायिकं तस्य दुर्मतेर्विद्यते फलं"॥ इति मनुः।)

अनुकामीनः, त्रि, (कामस्य इच्छायाः सदृशं, सादृश्यार्थे अव्ययीभावः, ततो गच्छतीत्यर्थे खः तस्य ईनः।) कामगामी। स्वेच्छागमनशीलः। इत्यमरः॥

अनुकारः, पुं, (अनु+कृ+घञ्।) सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। तत्पर्य्यायः। अनुहारः २। इत्यमरः॥ उपमा ३। इति हेमचन्द्रः॥ ("भवेदभिनयोऽवस्थानुकारः स चतुर्विधः"। इति साहित्यदर्पणे।)

अनुकूलः, त्रि, (अनुकूलं करोति, अनुकूल+कृ+ण्यर्थे णिच् पचाद्यच्।) अप्रतिकूलः। दक्षिणः। सहायः। यथा, "मयानुकूलेन नभस्वतेरितं"। इति श्रीभागवतं॥

अनुकूलः, पुं, (अनुकूलयति केवलस्वपत्नीं सुखयति, अनुकूल+कृ+ण्यर्थे णिच् अच्।) पतिभेदः। तस्य लक्षणं।

"सदा पराङ्मुखापराङ्मुखत्वे सति स्वस्यानुरक्तत्वं"। इति रसमञ्जरी॥ (यथा साहित्यदर्पणे,—

"एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः। किन्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विस्मयिवता मन्यामहे दुःस्थितं"।)

अनुकूलता, स्त्री, (अनुकूलस्य भावः, अनुकूल+भावे तल् स्त्रियां टाप्।) आनुकूल्यं। तत्पर्य्यायः। दाक्षिण्यं २। इति हेमचन्द्रः॥ (अनुग्रहः। दया। प्रसादः। "मुहृदिव प्रकटय्य मुखप्रदां प्रथममेकरसामनुकूलतां"। इति उत्तरचरिते।)

अनुकूला, स्त्री, (अनुकूल+स्त्रियां टाप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

अनुक्रमः, पुं, (क्रममनुगतः, प्रादिसमासः।) यथाक्रमं। तत्पर्य्यायः। आनुपूर्व्वी २ परिपाटी ३ आवृत् ४ पर्य्यायः ५। इत्यमरः॥ प्रतिसंक्रमणं। अनुक्रमणिका। यथा,—

"द्वादशे तु पुराणोक्तसर्व्वार्थानुक्रमः कृतः। प्रथमस्कन्धमारभ्य प्राधान्येन समासतः"॥ इति श्रीभागवते १२ स्कन्धे १२ अध्यायटीकायां श्रीधरस्वामी॥

("कनिष्ठादेश्चिन्यङ्कुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" इति याज्ञवल्क्यः।)

अनुक्रमणिका, स्त्री, (अनुक्रम्यते उत्तरोत्तरं परिपाट्या आरभ्यतेऽनया, अनु+क्रम+करणे ल्युट्, स्त्रियां ङीप्, ततः स्वार्थे कन् स्त्रियां टाप्।) भूमिका। ग्रन्थादेर्मूखबन्धः। पुराणादेरुक्तविवरणस्य संक्षेपेण पुनः कथनं। इति पुराणं॥ ("अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्व्वणाम्"। इति महाभारते।)

अनुक्रोशः, पुं, (अनु+क्रुश्+घञ्।) करुणा। दया। इत्यमरः॥ ("सौहार्दाद्वा विदुर इति वा मय्यनुक्रोशबुद्ध्या"। इति मेघदूते।)

अनुगः, त्रि, (अनुगच्छति, अनु+गम्+डः।) पश्चाद्गामी। अनुचरः। अनुसरः। तत्पर्य्यायः। अन्वक् २ अन्वञ्चः ३ अनुपदः ४। इत्यमरः॥ सेवकः ५। दासः ६। इति हलायुधः॥ ("येषां श्रीश्चानुगा बुद्धिर्न ते मुह्यन्ति भारत"। इति महाभारते।)

अनुगतः, त्रि, (अनुगच्छति अनु+गम्+कर्त्तरि क्तः।) अनुगः। आश्रितः। अधीनः। पश्चादागतः। यथा,—

"आगच्छद् यत्र काकुत्स्थः स्वर्गाय समुपस्थितः। विमानवरकोटीभिर्देवैरनुगतस्तदा"॥ इति रामायणं॥ नियतः। यथा, "न च तदनुगतमेव अभिधावलम्बने नापि तस्य भावात्"। इति पञ्चमोल्लासे काव्यप्रकाशकारः॥

अनुगवीनः, पुं, (गोः पश्चात् अव्ययीभावः अनुगु+खः, तस्य ईनः।) गोपः। गोरक्षकः। गोः पश्चात् यष्टेर्गामी। इति संक्षिप्तसारव्याकरणपरिशिष्टं।

अनुगमः, पुं, (अनु+गम्+भावे अप्।) पश्चाद्गमनं। उपसर्पणं। यथा,—

"क्षते तु दीयते गत्वा चेतायामाहुताय वै। द्वापरे याचमानाय कलौ त्वनुगमान्विते"॥ इति स्मृतिः॥ न्यायमते येन रूपेण तावत्पदार्थग्रहः तदेव रूपं तावत्पदार्थानुगमकं तस्य क्रिया॥

अनुगमनं, क्ली, (अनु साहित्येन गमनं, अनु+गम्+भावे ल्युट्।) सहगमनं। यथा, "अथौ लोकपाला आदित्यचन्द्रानिलाम्बाकाशभूमिजलहृदयावस्थितान्तर्यामिपुरुषयमदिनरात्रिसन्ध्याधर्म्माः! यूयं साक्षिणो भवत ज्वलच्चितारोहणेन भर्त्तुश्शरीरानुगमनमहं करोमि"। इति शुद्धितत्त्वं॥

अनुगामी, [न्] त्रि, (अनुगच्छति, अनु+गम्+णिनि।) कामंगामी। इति हेमचन्द्रः॥ सहचरः २। पश्चाद्गामी ३। यथा,—

"दृष्ट्वा श्रियमिवायान्तीं ब्रह्माणमनुगामिनीं"। इति रामायणं॥

अनुग्रहः, पुं, (अनु+ग्रह्+अप्।) दुःखदूरकरणेच्छा। अनिष्टवारणपूर्व्वकेष्टसाधनं। तत्पर्य्यायः। अभ्युपपत्तिः २। इत्यमरः॥ ("विज्ञपोन्मत्तनिःस्वानामकृत्सापूर्व्वकं हि यत्। पूरणं दानमानाभ्यामनुग्रह उदाहृतः"॥ इत्युक्तलक्षणा दारिद्र्यादिजनितदुःखहरणेच्छा। ("महाननुग्रहो मे स्यादाज्ञप्तस्य महात्मना"। इति रामायणे।)

अनुचरः, त्रि, (अनु साहित्येन चरति गच्छति, अनु+चर+ट।) सहचरः। सहायः। इत्यमरः॥ दासः। इति हलायुधः॥ ("अनुचरेण धनाधिपतेरथो"। इति भारविः। "पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा वधुः"। इति रामायणं।)

अनुच्छिष्टः, त्रि, (उत्+शिष्+क्त, नञ्समासः।) उच्छिष्टभिन्नः। पवित्रः। इति हलायुधः॥ ("लक्ष्मा निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा"। इति रघुवंशे।)

अनुजं, क्ली, प्रपौण्डरीकनामसुगन्धिद्रव्यं। इति राजनिर्घण्टः॥

अनुजः, पुं, (अनु पश्चात् जायते, अनु+जन्+ड।) कनिष्ठभ्राता। तत्पर्य्यायः। जघन्यजः २ कनिष्ठः ३ यवीयान् ४ अवरजः ५। इत्यमरः॥ कनीयान् ६ यविष्ठः ७। इति जटाधरः। जघन्यः ८। इति शब्दरत्नावली॥

अनुजा, स्त्री, (अनु पश्चात् जाता, अनु+जन्+ड+स्त्रियां टाप्।) कनिष्ठा भगिनी। यथा,—

"भ्रातस्त्वानुजातोहं भुङ्क्ष्व भक्तमिदं मयः"। इति तिथ्यादितत्त्वं॥

अनुजीवी, [न्] त्रि, (अनुजीवति, अनु + जीव् + णिनि ।) दासः । तत्पर्य्यायः । सेवकः २ अर्थी ३ । इत्यमरः ॥ अनुचरः । इति हलायुधः ॥ ("अनुजीविना पराधिकारचर्चा न कर्त्तव्या" । इति हितोपदेशः ।)

अनुज्ञा, स्त्री, (अनु + ज्ञा + भावे अङ् ।) आज्ञा । अनुमतिः । यथा, "नान्योन्यं ब्राह्मणयोर्न गुरुशिष्ययोरन्तरा व्यपेयात् अनुज्ञया तु व्यपेयात्" । इति तिथ्यादितत्त्वं ॥

अनुतरं, क्ली, (अनुतीर्य्यते नदी उत्तीर्य्यते अनेन, अनु + तॄ + अप् ।) आतरः । तरपण्यं । इत्यमरटीकायां रायमुकुटः ॥ पाराणी कड़ी । इति भाषा ।

अनुतर्षः, पुं, (अनु + तृष् + भावे घञ् ।) तृष्णा । अभिलाषः । मद्यपानपात्रं । इति मेदिनी ॥

अनुतर्षणं, क्ली, (अनु + तृष् + करणे ल्युट् ।) चषकः । सुरापानपात्रं । इत्यमरः ॥

अनुतापः, पुं, (अनु + तप् + भावे घञ् ।) पश्चात्तापः । इत्यमरः ॥ पस्तान इति भाषा ।
("चिरसम्मोहजश्चायनादुत्थितस्य य आत्मनः ।
हाहाकारोऽनुतापः स्यात् स्वकर्म्मस्मृतिसम्भवः"॥
इति सङ्क्षेपे ।)
("ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात् तथा दानेन चापदि" ॥
इति मनुः ।)

अनुत्तमः, त्रि, (नास्ति उत्तमः उत्कृष्टो यस्मात् सः ।) श्रेष्ठः । प्रधानः । इत्यमरः ॥
("श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्" ।
इति मनुः ।) नञ्समासे तु अधमः ॥

अनुत्तरं, त्रि, (नास्ति उत्तरं प्रधानं यस्मात्, न उत्तरं इति नञ्समासो वा ।) मुख्यं । इति हेमचन्द्रः ॥ श्रेष्ठं । प्रतिजल्पविवर्जितं । प्रत्युत्तरहीनं । इति मेदिनी ॥ स्थिरं । इति धरणी ॥ अधः । दक्षिणदिक् । इत्यमरटीकायां स्वामी ॥ प्रत्युत्तराभावे क्ली । यथा, "भवत्यवज्ञा च भवत्यनुत्तरात्" । इति नैषधं ॥

अनुदग्रः, त्रि, (नास्ति उदग्रं उन्नतं यस्मात्, न उदग्रः इति वा ।) अनुच्चः । बहुव्रीहौ तु अल्पोच्चः ॥

अनुदात्तः, पुं, (न उत् + आ + दा + क्त, न उदात्तः इति नञ्समासः ।) वेदगाने नीचस्वरः । यथा, "उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः" । इति शब्दरत्नावली ॥
("उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः" इति पाणिनिः ।)

अनुदारः, त्रि, (न उदार इति नञ्समासः नास्ति उदारो यस्मात् इति वा ।) अतिशयदाता । अदाता । अतिमहान् । अमहान् । अनुगतदारः । यथा, "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्च" । इति मम्मटभट्टः ॥

अनुदिनं, क्ली, (दिने दिने इति वीप्सायामव्ययीभावः ।) प्रतिदिनं । प्रत्यहं । यथा,—

"पारावत खलु शिखाकणमात्रभोगी
कामी भवेदनुदिनं वद कोऽत्र हेतुः" ।
इति श्रीचैतन्यदेवः ॥

अनुद्रुतं, क्ली, (अनु + द्रु + क्तः ।) तालविशेषः । स तु द्रुतार्द्धो मात्राचतुर्थभागो वा । यथा,—
"अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धञ्चाप्यनुद्रुतं" ।
इति शब्दरत्नावली ॥ अनुधावित इति । यथा,—
"अनुद्रुतः संयति येन केवलं
बलस्य शत्रुः प्रशशंस शीघ्रतां" ।
इति माघः ॥

अनुधावनं, क्ली, (अनु + धाव् + भावे ल्युट् ।) पश्चाद्धावनं । अनुसन्धानं । यथा,—
"तस्मिन् कुरङ्गशावाक्षी मुग्धचित्तं निवारय ।
न तन्मनस्तवाधीनं यथा तत्रानुधावनं" ॥
इत्युद्भटः ॥

अनुनयः, पुं, (अनु + नी + भावे अच् ।) विनयः ।
("कथं नु शक्योऽनुनयोमहर्षे-
र्विश्राणनाच्चान्यपयस्विनीनाम्" ।
इति रघुवंशे ।) तत्पर्य्यायः । प्रणिपातः २ प्रणतिः ३ । इति हेमचन्द्रः ॥ (सदाचारः । क्रोधोपनयः ।
"एवं रामवचः श्रुत्वा लक्ष्मणानुनयं तथा" ।
इति रामायणं ।)

अनुपदं, क्ली, (अनु पश्चात् पद्यते गच्छति, अनु + पद् + पचाद्यच् ।) अनुगः । पश्चाद्गामी । इत्यमरः ॥ (य, पदस्य पश्चात् इति अव्ययीभावे अन्वक् । अनन्तरं । अव्यवहितोत्तरकालं ।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ।
आशिषामनुपदंसमस्पृशत्
दर्भपाटिततलेन पाणिना" ।
इति रघुवंशे ।)

अनुपदी, [न्] त्रि (अनुपदमन्वेषा अनुपद + इन् ।) अन्वेषा । अन्वेषणकर्त्ता । इति हलायुधः ॥

अनुपदीना, स्त्री, (अनुपद + अनुपदं बद्धा इत्यर्थे खः तस्य ईनः स्त्रियां टाप् ।) पदायतोपानत् । इत्यमरः ॥ बुट् इत्यादिभाषा ।

अनुपमः, त्रि, (नास्ति उपमा सादृश्यं यस्य सः ।) उपमाशून्यः । उत्तमः । इति मेदिनी ॥ (सर्व्वोत्कृष्टः । सादृश्यरहितः ।
"बलं प्रमाणं शक्तिश्च परैरनुपमं मम" ।
इति रामायणे ।)

अनुपमा, स्त्री, (नास्ति उपमा सादृश्यं यस्याः सा ।) कुमुदनामदिग्गजयोषा । इत्यमरः ॥ सुप्रतीकनामदिग्गजस्त्री । "भवेदनुपमा सुप्रतीकिन्यां स्त्री त्रिभूत्तमे" । इति मेदिनी ॥

अनुपातः, पुं, (अनु + पत् + भावे घञ्, अनुरूपः त्रैराशिकेन पातः । पाटिगणितोक्तेन त्रैराशिकेन युक्तः संख्यायातः ।) पश्चात्पतनं । पूर्व्वाङ्गपातानुसारेण अपराङ्गपातः । यथा,—
"पुरान्तरं चेदिदमुत्तरं स्यात्
तदत्तविश्लेषलवैस्सदा किं ।
चक्राङ्गकैरित्यनुपातयुक्त्या

युक्तं निरुक्तं परिधेः प्रमाणं" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनुपातकं, क्ली, (पातयति निरयं प्रेरयति, पत् + णिच् + ण्वुल् । पातकं ब्रह्महत्यादि तत्सदृशं प्रादिसमासः । वेदनिन्दादिजन्यपापविशेषः । तानि च विष्णुना दर्शितानि, यथा,—"यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्तर्व्वत्नाश्चाक्षत्रियोपायाश्चाविज्ञातस्य गर्भस्य भ्रूणागतस्य च घातनं ब्रह्महत्यासमानमिति" ।) महापातकसदृशपापविशेषः ।
तत् पञ्चत्रिंशत्प्रकारं, यथा,—

समुत्कर्षे मिथ्यावचनं	१
तत् द्विविधं । आत्मगामि ।	
असूयापूर्ब्बकपरगामि च ।	
राजगामि पैशुन्यं	१
पितुर्म्मिथ्यादोषकथनं	१
एतत्त्रयं ब्रह्महत्यासमं ॥	३
वेदत्यागः । स तु अधीतवेदविस्मरणं ।	१
वेदनिन्दा	१
कौटसाक्ष्यं	१
तद्विविधं । ज्ञातस्याकथनं । मिथ्याकथनञ्च ।	
सुहृद्वधः	१
स तु ब्राह्मणव्यतिरिक्तमित्रवधः ।	
ज्ञानपूर्ब्बकाभ्यासेन गर्हितान्नस्य अर्थात् अन्यजान्नस्य भक्षणं	१
ज्ञानपूर्ब्बकाभ्यासेन गर्हिताद्यस्य अर्थात् छत्राकादेर्भक्षणं	१
एतत् षड्विधं सुरापानसमं ॥	६
निक्षेपहरणं	१
नरहरणं	१
अश्वहरणं	१
रजतहरणं	१
भूमिहरणं	१
हीरकहरणं	१
मणिहरणं	१
एतानि सप्त स्वर्णस्तेयसमानि ॥	७
सपीठस्त्रीगमनं	१
कुमारीगमनं	१
अन्त्यजागमनं	१
सख्युः स्त्रीगमनं	१
औरसेतरपुत्रस्त्रीगमनं	१
पुत्रस्यासवर्णस्त्रीगमनं	१
एतानि षट् विमाढ्यगमनसमानि ॥	६
माढ्व्यस्त्रगमनं	१
पिढ्व्यस्त्रगमनं	१
स्वस्रूगमनं	१
मातुलानीगमनं	१
शिष्यस्त्रीगमनं	१

भगिनीगमनं १
आचार्य्यभार्य्यागमनं १
गुरुत्यागतत्यागमनं १
राज्ञीगमनं १
प्रव्रजितागमनं १
धात्रीगमनं १
साध्वीगमनं १
वर्णोत्तमागमनं १
एतानि त्रयोदश गुर्व्वङ्गना-गमनसमानि ॥ १३

इति प्रायश्चित्तविवेकसङ्ग्रहः ॥ १५

अनुपानं, क्ली, (अनु + पा + कर्म्मणि ल्युट् ।) औषधाङ्गपेयविशेषः । औषधेन सह तत्पश्चाद्दा पीयते यत् । यथा,—
"अनुपानविशेषेण करोति विविधान् गुणान्" ।
इति वैद्यकं ॥

अनुपुष्यः, पुं, (पुष्यमनुगतः तत्पुष्यविकसनेनैव तत्काशात् प्रादिसमासः ।) ग्रहः । इति शब्दचन्द्रिका ॥

अनुप्रासः, पुं, (रसाद्यनुगतत्वेन प्रकर्षेण वर्णानामासः न्यासः, अनु + प्र + अस् + घञ् ।) तुल्यवर्णविन्यासः । यथा,—"वर्णसाम्यमनुप्रासः" इति काव्यप्रकाशः ॥
"वर्णावृत्तिरनुप्रासः पदे पादे विधीयते" ।
इति काव्यचन्द्रिका । अस्य विवरणं अलङ्कारशब्दे द्रष्टव्यम् ॥ ("वर्णसाम्यरूपः शब्दालङ्कारविशेषः, अत्र वर्णानामेव सादृश्यं ज्ञेयं, स्वरसाम्येऽपि सादृश्यं वैचित्र्याभावात् न गणितं । स तु पञ्चविधः, छेकानुप्रासो वृत्त्यनुप्रासः श्रुत्यनुप्रासोऽन्त्यानुप्रासो लाटानुप्रासश्चेति । अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" । इति साहित्यदर्पणे ।)

अनुप्लवः, पुं, (अनु साहित्येन प्लवते गच्छति, अनु + प्लु + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥ ("सानुप्लवः प्रभुरपि क्षणदाचराणाम्" । इति रघुवंशे ।)

अनुबन्धः, पुं, (अनु + बन्ध + यथासम्भवं भावादौ घञ् ।) दोषोत्पत्तिः । प्रक्रत्यादिः । आदिशब्देन प्रत्ययागमादेग्रहः । विनश्वरः । उच्चरितप्रध्वंसी इत्संज्ञको वर्णः ॥ मुख्यानुयायिशिष्यः । विवाहामन्त्रणयात्रादिषु मुख्यं पित्रादिकमनुयाति यः । मुख्यानुयायी शिष्यश्चेति हयंखतन्त्रमिति स्वामी । प्रक्रतस्यानुवर्त्तनं । प्रक्रान्तस्य अनिवर्त्तनं । इत्यमरभरतौ ॥ दोषोत्पादे यथा,—
"अनुबन्धं बुद्धास्य दण्डो विधीयतामिति" ।
विनश्वरे यथा । औट् टकारानुबन्धे लोपः ॥ प्रक्रतस्यानुवर्त्तने यथा । भोक्तुमनुबन्धः क्रतः । शिष्यौ यथा । "बालकानुबन्धेन यात्रामङ्गो माभूत्" । इत्यमरटीकासारसुन्दरी ॥ ० ॥ बन्धः । इति मेदिनी ॥ आरम्भः । इति शब्दरत्नावली ॥ लेशः । इति त्रिकाण्डशेषः ॥ ० ॥ वेदान्तमते अधिकारिविषयसम्बन्धप्रयोजनानि । वैद्यकमते वातादिदोषाणामप्राधान्यं ॥

अनुबन्धी, स्त्री, (अनुबध्यते अतिनिश्वासेन व्याप्रियतेऽनया, अनु + बन्ध + करणे घञ्, ततो गौरादित्वात् ङीष् ।) हिक्का । तृष्णा । इति मेदिनी ॥ ("अनुबन्धः शिष्यौ दोषे पादे मुख्यानुयायिनि । विनश्वरे प्रक्रत्यादौ प्रक्रतस्यानुवर्त्तने ॥ अनुबन्धी तु हिक्कायां तृष्णायामपि योषिति" । इति मेदिनी ।)

अनुबोधः, पुं, (अनु + बुध् + णिच् + भावे अच् ।) गन्धोद्दीपनं न्यूनपूर्व्वगन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्व्वसौगन्धोत्पादनं । तत्पर्य्यायः । प्रबोधनं २ । इत्यमरः ॥ पश्चाद्बोधः ॥

अनुभवः, पुं, (अनु + भू + भावे अप् ।) स्मृतिभिन्नज्ञानं । अनुमानादि । धारावाहिज्ञानं । तत्पर्य्यायः । उपलब्धिः २ इत्यमरः ॥

अनुभावः, पुं, (अनुभावयति बोधयत्यनेन, अनु + भू + णिच् करणे अच् ।) प्रभावः । कोषदण्डजं तेजः । सतां मतिनिश्चयः । सतां अभिप्रायस्य निश्चयः । निश्चयमात्रेऽपि । भावबोधकः । रत्यादिसूचकगुणक्रियादिः । स च लोचनचातुर्य्यभ्रूक्षेपमुखरागादिरूपः । एवमन्यत्रापि । इत्यमरभरतौ ॥ (स्थिरता । निर्द्धारः । अवश्यम्भाविता । तेजः । यथा,—
"नरपतिकुलभूत्यैर्गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः" ।
इति रघुवंशे ।)

अनुभूतिः, स्त्री, (अनुभवनं अनु + भू + क्तिन् ।) अनुभवः । सा चतुर्व्विधा । प्रत्यक्षं १ अनुमितिः २ उपमितिः ३ शाब्दबोधः ४ । इति भाषापरिच्छेदः ॥

अनुभूताद्यविस्मृतिः, स्त्री, (अनुभूतादीनि व्याकरणादीनां पदपदार्थप्रभृतीनि न विस्मर्य्यन्तेऽनया, न + वि + स्मृ + करणे क्तिन् ।) संस्कारः । अनुभूतानां स्मृतानाञ्च अविस्मृतिर्यस्मात् स भावनाख्यसंस्कार इति यावत् ॥

अनुमतकर्म्मकारी, [न्] त्रि, (अनुमतमनुज्ञातं कर्म्म कर्म्मधारयः, तत्करोति यः अनुमतकर्म्म + क्र + णिनि उपपदसमासः ।) लिखितपत्राद्यनुसारेण कर्म्मकर्त्ता । आज्ञया कार्य्यकर्त्ता च ॥ इति व्यवहारकाण्डं ॥ अक्की इति आरबी भाषा ।

अनुमतिः, स्त्री, (अनु + मन् + भावे क्तिन् । कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणाय अनुज्ञायतेऽस्यां अनु + मन् + अधिकरणे क्तिन् ।) सम्मतिः । अनुज्ञा । न्यूनेन्दुकला पूर्णिमा । चतुर्दशीयुक्ता पूर्णिमा । इति मेदिनी ॥ ("कुहूं चैवानुमतिं च प्रजापतय एव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" ॥ इति मनुः ।)

अनुमरणं, क्ली, (अनु + मृ + भावे ल्युट् ।) पश्चान्मरणं । भर्त्तरि मृते तत्पादुकादिकमादाय ज्वलिताग्निप्रवेशपूर्व्वकं स्त्रिया मरणं । यथा—
"देशान्तरस्थे पत्यौ साध्वी तत्पादुकादयं ।
निधायोरसि संशुद्धा प्रविशेत् ज्ञातवेदसं" ॥
इति ब्रह्मपुराणं ॥ ब्राह्मण्या निषेधमाह, स्मृतिः ।
"पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति" ॥
सहमरणं । मृतभर्त्रा सह ज्वलच्चितारोहणपूर्व्वकं स्त्रिया मरणं । यथा,—
"भर्त्रानुमरणं काले याः कुर्व्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्व्वाः पूता भवन्ति ताः" ॥
इति महाभारतं ॥

अनुमा, स्त्री, (अनु + मा + भावे अङ् ।) अनुमितिः । अनुमानं । इति त्रिकाण्डशेषः ॥

अनुमानं, क्ली, (अनु + मा + ल्युट् ।) अनुमितिकरणं । अनुमितिः । इति चिन्तामणिः ॥ तत्पर्य्यायः । अनुमा २ इति त्रिकाण्डशेषः ॥

अनुमानोक्तिः, स्त्री, (अनुमानेन उक्तिः कथनं तत्पुरुषः ।) तर्कः । ऊहः । इति हलायुधः ॥

अनुमितिः, स्त्री, (अनु + मा + क्तिन् ।) अनुभवविशेषः । व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यज्ञानं । यथा,—"धूमदर्शनाद्वह्निमान् पर्व्वत इत्याकारज्ञानं । अस्या व्यापारकरणं परामर्शः । अस्याः करणं व्याप्तिज्ञानं" । इति भाषापरिच्छेदः ॥

अनुमोदितं, त्रि, (अनु + मुद् + णिच् + कर्म्मणि क्तः ।) क्रतानुमोदनं । अनुमतं । यथा,—
"भवता यद्यवसितं तन्मे साध्वनुमोदितं" ।
इति श्रीभागवतं ॥
("गान्धर्व्वेण विवाहेन वक्रोऽथ मुनिकन्यकाः । श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः" ॥ इति शाकुन्तले ।)

अनुयायी, [न्] त्रि, (अनुयाति पश्चात् गच्छति, अनु + या + णिनि ।) सदृशः । पश्चाद्गामी । यथा । मुख्यानुयायिनि शिष्यावित्यनुबन्धशब्दार्थे अमरः ॥

अनुयुक्तः, पुं, (अनु + युज् + क्तः ।) भ्रष्टकाध्यापकः । इति महाभारतं । (अभियुक्तः । निन्दितः । जिज्ञासितपदार्थः । क्रतप्रश्नः ।)

अनुयोक्ता, [क्तृ] पुं, (अनु + युज् + तृच् ।) भ्रष्टकाध्यापकः । इति महाभारतं ॥ (प्रश्नकर्त्ता ।)

अनुयोगः, पुं, (अनु + युज् + घञ् ।) प्रश्नः । इत्यमरः ॥

अनुयोगक्रत्, पुं, (अनुयोगं प्रश्नविषयसन्देहं क्रन्तति क्रिनत्ति, अनुयोग + क्रत् + क्विप् ।) आचार्य्यः । इति हेमचन्द्रः ॥

अनुयोजनं, क्ली, (अनु + युज् + णिच् + ल्युट् ।) प्रश्नः । इति हेमचन्द्रः ॥

अनुयोज्यं, त्रि, (अनुयुज्यते नियुज्यते, अनु + युज् + ण्यर्थे ण्यत् ।) निन्दार्हं । अनुपूर्व्वकनिन्दार्थयुजधातोः कर्म्मणि यप्रत्ययः ॥ (प्रश्नयः । जिज्ञास्यः ।
"ममेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधिः"
इति मनुः ।)

अनुरक्तः, त्रि, (अनु + रञ्ज + कर्त्तरि क्तः ।) आसक्तः । अनुरागयुक्तः । यथा,—
"अनुरक्तो गुणान् ब्रूते विरक्तो दूषणानि च" ।
इत्युद्भटः ॥

अनुरञ्जनं, क्ली, (अनु + रञ्ज + भावे ल्युट्।) अनुरागः। हर्षजननं। यथा,—विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवरेति जयदेवः॥ (प्रीतिजननं। आह्लादनं। आराधनं। "युक्तः प्रजानामनुरञ्जने स्यात्तस्मात् यशो यत् परमं धनं वः"। इति उत्तरचरिते।)

अनुरक्तः, त्रि, (अनु + रम् + कर्त्तरि क्तः।) अनुरागविशिष्टः। प्रीतः। अनुरञ्जकः। अनुपूर्ब्बरमधातोः कर्त्तरि क्तः॥
("धर्म्मानुरक्तमत्यर्थं शान्तं सूनृतभाषिणम्"। इति भारते)॥

अनुरतिः, स्त्री, (अनु + रम् + भावे क्तिन्।) अनुरागः। इति हेमचन्द्रः॥

अनुरागः, पुं, (अनु + रञ्ज + भावे घञ्।) प्रीतिः। आसक्तिः। तत्पर्य्यायः। रतिः २ रागः ३ अनुतिः ४। इति हेमचन्द्रः॥
("कण्डकितेन प्रथयति मय्यनुरागं कपोलेन"। इति शाकुन्तले।)

अनुरागी, [न्] त्रि, (अनु + रञ्ज + कर्त्तरि घिनुण् कुत्वं निपातनात् नलोपश्च।) अनुरागविशिष्टः। अनुरक्तः। इति शब्दरत्नावली॥

अनुराधा, स्त्री, (राधां विशाखामनुगता, कुगतिप्रादयइति सूत्रेण समासः।) सप्तदशनक्षत्रं। तस्या रूपं। सर्पाकृतिसप्ततारात्मयं। इति कालिदासः। "बलिनिभताराचतुरश्रात्मकं"। इति दीपिकाटीका॥ अस्या अधिदेवता मित्रः। तत्र जातफलं। यथा,—
"सत्कीर्त्तिकान्तिश्च सदोत्सवःस्याज्जेता रिपूणाञ्च कलाप्रवीणः।
स्यात्सम्भवे यस्य किलानुराधा सम्पत्प्रमादौ विविधौ भवेतां॥"
इति कोष्ठीप्रदीपः॥

अनुरूपः, त्रि, (रूपमनुगतः प्रादिसमासः।) तुल्यरूपः। सदृशः। यथा,—
"देवानामनुरूपा हि चरन्त्येते महीतले"।
इति रामायणं॥ (तुल्यगुणः। योग्यः।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः"।
इति रघुवंशे।)॥

अनुरोधः, पुं, (अनु + रुध् + घञ्।) आराध्यादेरिङ्गितसम्पादनं। उपरोधः। ("तदनुरोधात् कठोरगर्भामपि बधूं जानकीं विसृज्य गुरुजनस्तत्र गतः"। इति उत्तरचरिते।) तत्पर्य्यायः। अनुवर्त्तनं २। इत्यमरः॥

अनुलापः, पुं, (अनु वारं वारं लपनं, अनु + लप् + भावे घञ्।) पुनः पुनः कथनं। पुनरुक्तिः। इत्यमरः॥

अनुलेपनं, क्ली, (अनु + लिप् + भावे ल्युट्।) गात्रे गन्धद्रव्यादिलेपनं। तद्द्रव्यञ्च। तस्य गुणाः। प्रीत्योजःशुक्रवृद्धिकारित्वं। घर्म्मदौर्गन्ध्यतन्द्रातापश्रमनाशित्वञ्च। इति राजवल्लभः॥ ("निरस्तमाल्याभरणानुलेपनाः"। इति ऋतुसंहारे।)

अनुलोमः, पुं, (अनुपूर्ब्बात् लोमशब्दात् अच्, प्रत्यन्वेति अच्।) यथाक्रमं। अविलोमः। यथा,—
"वर्णमाला समाख्याता अनुलोमविलोमिका"।
इति तन्त्रसारे नारदवचनं॥ (क्रमानुगतः। अनुकूलः।
"जड़ानप्यनुलोमार्थान् प्रवाचः श्रुतिनां गिरः"।
इति शिशुपालवधे।)

अनुलोमजः, त्रि, (अनुलोमेन यथाक्रमेण जातः, अनुलोम + जन + डः, उपपदसमासः)। अनुलोमजातः। अप्रतिलोमजः। यथा। ब्राह्मणात् क्षत्रियागर्भजातः। क्षत्रियात् वैश्यायां जातः। इत्यादि उत्तमादधमायां जातः। यथा,—
"सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योऽन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः"॥
इति मनुः॥

अनुवत्सरः, पुं, (अनुकूलोवत्सरः, दानादिविशेषाय।) वर्षः। इति हेमचन्द्रः॥ संवत्सरादिपञ्चकान्तर्गतवत्सरविशेषः। अस्मिन् वर्षे धान्यदाने महाफलं। शकाब्दात् पञ्चभिर्हते यः शेषस्तिथिहते तेन एकादिक्रमेणार्क-परि-इदा-अनु-उदा-पूर्ब्बकवत्सरसंज्ञका वत्सरा भवन्ति। इति मलमासतत्त्वं॥

अनुवर्त्तनं, क्ली, (अनु + वृत् + भावे ल्युट्।) अनुरोधः। इत्यमरः॥ व्याकरणमते पूर्ब्बसूत्रस्थितपदादेरनुवृत्तिः॥ (पश्चादगमनं। अनुसरणं।
"इदानीं तदाज्ञानुवर्त्तनं उचितम्"। इति हितोपदेशः।)

अनुवाकः, पुं, (अनूच्यते अनु + वच् + घञ्, कुत्वं।) ऋग्यजुःसामसमूहः। इत्यमरः॥ वेदविशेषः। इति सुभूतिः॥ ("जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाकान्"। इति महावीरचरिते।)

अनुवादः, पुं, (अनु + वद् + घञ्।) कुत्सितार्थवाक्यं। इति शब्दरत्नावली॥ पुनरुक्तिः। उक्तस्य पुनः कथनं। यथा,—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः"॥
इति शुद्धितत्त्वटीका॥ वाचारम्भनमात्रं। यथा,—
"विनानुवादं न च तन्मनीषितं
सम्यग्यतस्यक्षमुपाददत् पुमान्"।
इति श्रीभागवतं॥

अनुवासनं, क्ली, (अनु + वास + सौरभ्ये भावे ल्युट्।) स्नेहनं। धूपनं। इति हेमचन्द्रः॥ स्नेहवस्तिः। यथा,—
"अथानुवासनं स्नेहवस्तिधूपनयोरपि"।
इति मेदिनी॥
"द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनं।
कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनं"॥
इति वैद्यकं॥

अनुवृत्तिः स्त्री, (अनु + वृत् + क्तिन्। अनुवर्त्तनं। अनुरोधः। इति। हेमचन्द्रः। व्याकरणमते,—
"पूर्ब्बसूत्रस्थितपदस्य परसूत्रेष्वपस्थितिः"। तत्पर्य्यायः। अधिकारः २। सा त्रिविधा यथा,—
"सिंहावलोकितास्यस्य मण्डूकप्लुतिरेव च।
गङ्गास्रोत इति ख्यातः अधिकारास्त्रयो मताः"॥
सिंहावलोकितो यथा। वावगोर्दान्ते इत्यस्मात् दान्त इति पदस्य ऋत्यगित्यन्तेष्वुपस्थितिः॥ मण्डूकप्लुतिर्यथा। टा ङिस् ङे ङसोत्यस्मात् अत इति पदस्य आङ्गिमभवीत्यत्रोपस्थितिः॥ गङ्गास्रोतो यथा। ङेः सि औ जसित्यस्मात् ङेरिति पदस्य तद्धितपर्य्यन्तेष्वुपस्थितिः॥ इति मुग्धबोधटीकायां दुर्गादासः॥ (अनुवर्त्तनं। अनुसरणं। अनुमोदनं। अनुरञ्जनं।
"अमङ्गलाभ्यासरतिं विचिन्त्यतं
तवानुवृत्तिं न च कर्त्तुमुत्सहे"।
इति कुमारसम्भवे। अनुकरणं। "यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा"। इति साहित्यदर्पणे।
"कान्तानुवृत्तिचातुर्य्यमपि अनुशिक्षितं वत्सेन"।
इति उत्तरचरिते।)

अनुव्रजनं, क्ली, (अनु + व्रज + भावे ल्युट्।) अनुव्रज्या। प्रस्थागतानां स्निग्धानां गमनसमये कियद्दूरपर्य्यन्तपश्चाद्गमनरूपस्निग्धाचारः। आग वाड़ान इति भाषा। यथा,—
"आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत्"।
इति तन्त्रसारे निगमकल्पद्रुमः॥

अनुशयः, पुं, (अनु + शी + भावे अच्, शयं दुःखमनुगतः प्रादिसमासः, दुःखानुगते वि।) दीर्घद्वेषः। पूर्ब्बवैरता। अनुतापः। इत्यमरः।("अनुशयादनुरोदिमि चोत्सुकः"। "अनुशयदुःखायेदं हृतहृदयं सम्प्रति विबुद्धम्"। इति शाकुन्तले।) द्वेषः। अनुबन्धः। इति मेदिनी॥ (क्रोधः। पश्चात्तापादिकारणात् विप्रतिपत्तिः। यथा,—
"क्रयविक्रयानुशयो विवादः स्वामिपालयोः"।
इति मनुः।)

अनुशयाना, स्त्री, (अनु + शी + शानच्, अनुतापकर्त्तरि वि।) परकीयान्तर्गतनायिकाभेदः। तस्या लक्षणं। इष्टहानिजनितानुतापवती। सा त्रिधा। वर्त्तमानसङ्केतस्थानविघट्टनेन १ भाविसङ्केतस्थानाभावज्ञया २ स्वाधिष्ठितसङ्केतस्थाने भर्त्तुर्गमनानुमानेन ३। इति रसमञ्जरी।

अनुशयी, स्त्री, (अनुशय्यते अनुतप्यतेऽनया, अनु + शी + अच्, गौरादित्वात् ङीष्।) क्षुद्रोगान्तर्गतपादरोगविशेषः। तस्य लक्षणं। यथा,—
"गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम्।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिनीं"॥
इति माधवकरः॥ तच्चिकित्सा यथा,—
"हरेदनुशयीं वैद्यः क्रियया श्लेष्मविम्बधेः"।
इति भावप्रकाशः॥

अनुशयी, [न्] त्रि, (अनु + शी + इनि।) दण्डवत्प्रणामैस्वरणमूले शेते यः। यथा। "यं संपद्य जहात्यजामनुशयी मुह्यः कुजायं यथा"। इति श्रीभागवतं॥ (अत्यर्थमासक्तः। अनुरक्तः। पश्चात्तापयुक्तः। अनुशोचनपरः।)

अनुशरः, पुं, (अनुहन्त्यनेन हिंसति, अनु + हन् + पचाद्यच्।) राक्षसः। इति शब्दमाला॥

अनुशासनं, क्ली, (अनु + शास् + भावे ल्युट्।) आदेशः। आज्ञा। यथा,—
"इत्येते ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं"।
इति श्रीभागवतं॥ श्रुत्यादनं। यथा नामलिङ्गानुशासनमित्यमरः॥ (उपदेशः। नियोगकरणं।
"अहिंसयैव भूतानां कार्य्यं श्रेयोनुशासनम्"।
इति मनुः।)

अनुशीलनं, क्ली, (अनु पौनःपुन्येन शीलनमभ्यासः, अनु + शीलि + भावे ल्युट्।) पुनःपुनरभ्यासः। मुहुः सेवनं। यथा,—
"आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"।
इति भक्तिरसामृतसिन्धुः॥

अनुशोचनं, क्ली, (अनु + शुच् + भावे ल्युट्।) अनुशोचना। तत्पर्य्यायः। मन्युः २ शोकः ३ शुक् ४। इति जटाधरः॥

अनुषङ्गः, पुं, (अनु + सन्ज + भावे घञ्।) कारुण्यं। दया। इति हलायुधः॥ एकान्वितपदस्यान्यान्वयः। यथा। कोषोबलश्चापहृतमित्यादौ बलान्वितापहृतस्य कोषेऽन्वयः॥ न्याये उपनयस्यायम्यदस्य निगमनेऽनुषङ्गः। यथा। वह्नियाप्यधूमवांश्चायं तस्माद्वह्निमान्॥ प्रसङ्गः। अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः। यथा,—
"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिं"।
इति स्मृतिः॥

अनुष्टुप्, [भ्] स्त्री, (अनु सततं स्तुभ्यतेऽनया, अनु + स्तुभ + क्विप् यत्वं।) सरस्वती। इति शब्दरत्नावली॥ अष्टाक्षरपदं छन्दः। सा तु समार्द्धसमविषमवृत्तभेदेन त्रिधा तत्र श्लोकस्य प्रायिकप्रयोगः। तस्य लक्षणं।
"पञ्चमं लघु सर्व्वत्र सप्तमं द्वितुर्थयोः।
गुरु षष्ठन्तु पादानां श्लोकेष्वनियमो मतः"॥
इति छन्दोमञ्जरी॥ अस्याः प्रस्तारः २५६। इति पिङ्गलः॥

अनुष्ठानं, क्ली, (अनु + स्था + भावे ल्युट्)। कर्म्मारम्भः। करणं। यथा,—
"श्रुता श्रीभवदेवेन कर्म्मानुष्ठानपद्धती"।
(उपपादनं। व्यवस्थापनं। उपयोगिता। आनुरूप्यं। कार्य्यकरणं। अभ्यासः। अनुशीलनं। चर्चा।
"उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः"।
इति राजतरङ्गिणी।
"अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः"।
इति मनुः। शास्त्रविहितकर्त्तव्यादिसम्पादनम्।
"किन्त्वनुष्ठानमित्यत्वं स्वातन्त्र्यमपकर्षति"।
इति उत्तरचरिते।)

अनुष्णं, क्ली, (न उष्णं, नञ्समासः।) उत्पलं। इति राजनिर्घण्टः॥

अनुष्णः, त्रि, (न उष्णः, नञ्समासः।) अशीतः। इत्यमरः॥ उष्णभिन्नः। शीतलः। बहुव्रीहौ तु अन्यार्थः॥

अनुष्णवल्लिका, स्त्री, (अनुष्णा शीतला वल्लीव, कर्म्मधारयः।) नीलदूर्व्वा। इति राजनिर्घण्टः॥

अनुसन्धानं, क्ली, (अनु + सम् + धा भावे ल्युट्।) अन्वेषणं। चेष्टा। इत्यादिकाव्यानुसन्धानबलादिति काव्यप्रकाशः॥

अनुसारः, पुं, (अनु + सृ + भावे घञ्।) अनुसरणं। अनुयानं। अनुक्रमः। यथा,—
"अथ लौहविधिं वक्ष्ये लौहशास्त्रानुसारतः"।
इति वैद्यकसुखबोधः॥

अनुहारः, पुं, (अनु + हृ + घञ्।) अनुकारः। सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। इत्यमरः॥ उपमा। इति हेमचन्द्रः॥
("तद्रूपानुहारस्तु हेतौ सत्यप्यतद्गुणः"।
इति साहित्यदर्पणे।)

अनुक्षणं, क्ली, (क्षणे क्षणे वीप्सायामव्ययीभावः।) प्रतिक्षणं। सर्व्वदा। अनवरतं। क्षणशब्दस्य वीप्सार्थानुपसर्गेणाव्ययीभावसमासः॥

अनूकं, क्ली, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) कुलं। वंशः। शीलं। स्वभावः। इति मेदिनी॥

अनूकः, पुं, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) गतजन्म। पूर्व्वजन्म। इति मेदिनी॥ (वंशः। कुलं। स्वभावः। शीलं।
"अनूकं तु कुले शीले पुंसि स्यात् गतजन्मनि"।
इति मेदिनी।)

अनूचानः, पुं, (अनु + वच् + लिट् तस्य कानच्।) साङ्गवेदविच्छ्रोत्रियः। शिक्षादिषडङ्गसहितवेदवेत्ता। इत्यमरः॥
("इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः"।
इति कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः।)

अनूचानः, त्रि, (अनु + वच् + लिट् तस्य कानच्। वेदस्यानुवचनं कृतवान्, उपेयिवानित्यादिना साधुः।) विनीतः। सविनयः। इति मेदिनी॥ (साङ्गवेदविच्छ्रोत्रियः;
"अनूचानो विनीते स्यात् साङ्गवेदविच्छ्रोत्रियः"।
इति मेदिनी॥
शिक्षाकल्पादिषडङ्गसहितवेदाध्ययनकारी, यथा,
"इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः"।
इति कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः)॥

अनूढः, त्रि, (वह + कर्म्मणि क्तः संप्रसारणं ततो नञ्समासः।) अविवाहितः। आइबड़ इति भाषा। यथा,—
"परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्"।
इत्यमरः॥

अनूद्यं, त्रि, (अनु + वद् + क्यप् संप्रसारणं।) अनुवाद्यं। अनुवदनीयं। अवदनीये क्लमध्यं। इति संक्षिप्तसारव्याकरणं॥

अनूनं, त्रि (न ऊनं, नञ्समासः।) अखण्डं। समग्रं। पूर्णं। इति जटाधरः॥ (अहीनः। अन्यूनः।
"इमामनूनां सुरभेरवेहि"। इति रघुवंशे।)

अनूनकं, त्रि, (न ऊनं, नञ्समासः, ततः स्वार्थे कन्।) सकलं। पूर्णं। अखण्डं। इत्यमरः॥

अनूपं, त्रि, (अनुगता आपोऽत्र, समासान्त अच्, अस्य उत्वं।) जलबहुलदेशः। जलप्लावितस्थानं। तत्पर्य्यायः। जलप्रायं २। इत्यमरः॥ अस्य गुणाः। शीतलत्वं। स्निग्धत्वं। वातश्लेष्मकारित्वं। गुरुत्वञ्च। इति राजवल्लभः॥ एतद्देशीयजलगुणाः। गुरुत्वं॥ घनत्वं। पिच्छिलत्वं। मधुरत्वं। श्लेष्मजनकत्वं। स्निग्धत्वं। अग्निनाशित्वं। प्रमेहगलगण्डश्लीपदच्छर्द्दिप्रभृतिरोगकारित्वञ्च। इति राजनिर्घण्टः।

अनूपः, पुं, (अनुगता आपोऽत्र, प्रादिभ्यो धातुजस्य वाच्योवाचोत्तरपदलोपश्चेति बहुव्रीहिः) महिषः। इति त्रिकाण्डशेषः॥ (जलप्रायः। जलबहुलः। बहुभुयुक्तः। "अनूपो महिषे नाम्नुप्रायदेशे तु वाच्यवत्"। इति मेदिनी॥)

अनूपजं, क्ली, (अनूपे जलप्रायदेशे जायते, अनूप + जन् + डः उपपदसमासः।) आर्द्रकं। इति राजनिर्घण्टः॥

अनूपदेशः, पुं, (अनूपः जलप्रायः देशः कर्म्मधारयः।) जलप्रायदेशः। तस्य लक्षणं यथा,—
"नदीमल्वलशैलाद्यपुल्लोत्पलकुलैर्युतः।
हंससारसकारण्डचक्रवाकादिसेवितः॥
सरोवराहमहिषशरभोद्दिकुलाकुलः।
प्रभूतद्रुममुख्याढ्यो नानाशस्यफलान्वितः॥
अनेकशालिकेदारकदलीक्षुविभूषितः।
अनूपदेशो ज्ञातव्यो वातश्लेष्ममयार्त्तिमान्"॥
इति भावप्रकाशः॥

अनूरुः, पुं, (नास्ति ऊरू यस्य सः।) सूर्य्यसारथिः। अरुणः। इत्यमरः॥ (ऊरुहीनः।)॥

अनूरुसारथिः, पुं, (अनूरुः अरुणः सारथिः रथचालको यस्य सः।) सूर्य्यः। यथा,—
"गतं तिरश्चीनमनूरुसारथेः"।
इति माघः॥

अनृजुः त्रि, (न ऋजुः सरलः, नञ्समासः।) असरलः। शठः। इत्यमरः॥
("न प्राणिपादचपलो न नेत्रचपलोऽनृजुः"।
इति मनुः।)

अनृणी, [न्] त्रि, (ऋणं विद्यतेऽस्य, ऋण + इनि ऋणी, नञ्समासः।) अऋणी। अधारी। यथा,—
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेत्"।
इत्याह्निकतत्त्वं॥ ऋणाभावविशिष्टः। यथा यज्ञ उवाच।
"को मोदते किमाश्चर्य्यं कः पन्थाः का च वार्त्तिका
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः"॥
युधिष्ठिर उवाच।
"पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे।
अनृणी चाप्रवासी च स वारिचर मोदते॥
अहन्यहनि भूतानि गच्छन्तीह यमालये।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरं॥
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणं।

धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥
अस्मिन् महामोहमये कटाहे
सूर्य्याग्निना रात्रिदिवेन्धनेन ।
मासर्त्तुदर्व्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्त्ता" ॥
इति सुप्रसिद्धितमहाभारते वनपर्व्वणि ३१२ अध्यायः ॥ अपि च ।
"देवानामन्तको जन्तुर्यच्चैर्भवति मानवः" ।
इत्यादि शुद्धतत्त्वं ।

अनृतं, क्ली, (न ऋतं नञ्समासः ।) क्षुधिः । मिथ्या । इत्यमरः ॥ विवाहादिपञ्चकेष्वनृतं न पापजनकं । यथा,—
"विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्व्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याऽऽहुरपातकानि" ॥
इति महाभारते कर्णपर्व्वणि अर्জुनं प्रति श्रीकृष्णवचनं ॥

अनेकं, त्रि, (एकस्मात् अन्यत् नञ्समासः ।) एकातिरिक्तसंख्यानं तद्विशिष्टञ्च । बहु । यथा,—
"अनेकराजन्यरथाश्वसङ्कुलं" ।
इति भारविः ॥

अनेकजः, पुं, (अनेकं जायते, अनेक + जन् + डः उपपदसमासः ।) पक्षी । इति त्रिकाण्डशेषः ॥ बहुजाते त्रि ॥

अनेकधा, अ, (अनेक + प्रकारार्थे धा ।) अनेकप्रकारं । बहुधा । यथा,—
"पाटीसूत्रोपमं बीजं गूढमित्यवभाषते ।
नास्ति गूढमगूढानां नैव योढ़ेत्यनेकधा" ॥
इति लीलावती ॥ अनेकवारार्थेऽपि क्वचित्प्रयोगः ॥

अनेकपः, पुं, (अनेकाभ्यां मुखशूण्डाभ्यां पिबति, अनेक + पा + कः, उपपदसमासः ।) हस्ती इत्यमरः ॥

अनेकाश्रितगुणः, पुं, (अनेकानि आश्रितः, द्वितीयाश्रितातीत इत्यादिना समासः, तादृग्गुणः कर्म्मधारयः ।) बहुनिष्ठगुणः । तद्यथा । संयोगः १ विभागः २ द्विपृथक्त्वादिः ३ एकत्वान्यसङ्ख्या ४ । इति सिद्धान्तमुक्तावली ॥
("संयोगश्च वियोगश्च सङ्ख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" ।
इति भाषापरिच्छेदे ।)

अनेड़मूकः, त्रि, (नास्ति एड़ः वधिरः मूकः वाक्शक्तिरहितश्च यस्मात् सः ।) धूर्त्तः । भ्रष्टः । श्रुतिवाग्विहीनः । इति मेदिनी ॥ काला बोबा इति भाषा ।

अनेहाः, [स्] पुं, (न हन्यते, न + हन् + असुन् एषोदरादित्वात् हन् स्थाने एहादेशः, ततः सौत्रते अनङादेशः ।) कालः । समयः । इत्यमरः ॥
("तस्यूतस्यान्तिके द्रोहश्चिह्नमानेहःप्रतीक्षितः" ।
इति राजतरङ्गिणी ।)

अनैक्यं, क्ली, (न एक भावे ष्यञ् ।) ऐक्याभावः । अनेकता । एकस्य भावः ऐक्यं पृषोदरादित्वात् नञ्समासः ॥

अनो, अ, (न नी डो) निषेधार्थः । अभावः । इत्यमरटीकायां नीलकण्ठः ॥

अनोकहः, पुं, (अनसः शकटस्य अकं गमनं षष्ठीतत्, तत् हन्ति अनोक + हन् + डः ।) वृक्षः । इत्यमरः ॥
("एकस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी" ।
इति रघुवंशे ।)

अनृच उ गतिपूजनयोः । इति मुग्धबोधे वोपदेवः ॥

अनृच उ पूजने । गमने । स्निग्धोक्तौ । इति कविकल्पद्रुमः ॥ उ अञ्चित्वा अङ्क्त्वा । स्निग्धोक्तिरव्यक्तशब्दः । इति दुर्गादासः ॥

अनृज उ ध ञि व्यक्तौ । गतौ । सत्त्वे । इति कविकल्पद्रुमः ॥ व्यक्तिरिह विशेषणं । क अञ्चयति बुद्धिं सुधीः । विशिनष्टीत्यर्थः । इति दुर्गादासः ॥

अनृज उ ध ञि व्यक्तौ । गतौ । सत्त्वे । इति कविकल्पद्रुमः ॥ उ अञ्जिष्यति अङ्क्ष्यति । ध अनक्ति । ञि अक्तोस्ति । व्यक्तिः स्फुटीकरणं ।
"शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यतां" ।
इति माघः ॥ अनक्ति गात्रं तैलेन जनः । इति दुर्गादासः ॥

अन्तं, क्ली, (अम् + तन् ।) स्वरूपं । स्वभावः । इति मेदिनी त्रिकाण्डशेषश्च ।

अन्तं, क्ली, पुं, (अम् + तन् ।) शेषः । इति मेदिनी ॥ तत्पर्य्यायः । जघन्यं २ चरमं ३ अन्त्यं ४ पाश्चात्यं ५ पश्चिमं ६ । इत्यमरः ॥

अन्तः, पुं, (अम् + तन् ।) नाशः । इत्यमरः ॥ स्वरूपः । प्रान्तः । सीमा । निश्चयः । अवयवः । इति हेमचन्द्रः ॥

अन्तः, त्रि, (अम् + तन् ।) अन्तिकः । निकटः । इति मेदिनी ॥ अतिमनोहरः । इति विश्वः ॥

अन्तःकरणं, क्ली, (अन्तर्मध्यवर्त्ति करणं ज्ञानसाधनं, कर्म्मधारयः, कृ + करणे ल्युट् ।) अन्तरिन्द्रियं । धीन्द्रियं । तत्पर्य्यायः । मनः २ निगुः २ । इति त्रिकाण्डशेषः ॥ अस्य कार्य्यभेदान्नामभेदस्तुक्यं, यथा,—
"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरं ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी" ॥
इति वेदान्तः ॥ (अस्योत्पत्तिर्यथा,—"मिलितैस्तु तैः अन्तःकरणमेकं स्यात्" इति । तैः पञ्चभूतस्यसत्त्वांशैर्मिलितैः अन्तःकरणं भवतीत्यर्थः ।)
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशुद्धैः" ।
इति रघुवंशे ।)

अन्तःकुटिलः, पुं, (अन्तरभ्यन्तरे कुटिलः वक्रः ।) शठः । इति राजनिर्घण्टः ॥ कुटिलान्तःकरणे त्रि ॥

अन्तःपुरं, क्ली, (अन्तर्मध्यवर्त्ति पुरं गृहं, कर्म्मधारयः ।) राज्ञः स्त्रीगृहं । तत्पर्य्यायः । अवरोधनं २ अवरोधः ३ शुद्धान्तः ४ । इत्यमरः ॥ अन्तःपुरादयो राजदारेष्वपि तात्स्थ्यात् वर्त्तन्ते ।

अन्तःपुराध्यक्षः, पुं, (अन्तःपुरस्य अध्यक्षः रक्षकः, षष्ठीतत्पुरुषः ।) राज्ञामन्तःपुररक्षकः । तल्लक्षणं यथा,—
"वृद्धः कुलोद्गतः शक्तः पिङ्गपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" ॥
इति युक्तिकल्पतरुः ॥

अन्तःसत्वा, स्त्री, (अन्तर्मध्ये सत्त्वं प्राणी सारो वा यस्याः सा, स्त्रियां टाप् ।) भल्लातकः । इति शब्दचन्द्रिका ॥ गर्भवती । अन्तरुदरमध्ये सत्वं प्राणी यस्याः सा ॥

अन्तःस्वेदः, पुं, (अन्तः मध्ये स्वेदः मदजलं यस्य सः ।) हस्ती । इति त्रिकाण्डशेषः ॥

अन्तकः, पुं, (अन्तं विनाशं करोति, अन्त + कृ + ण्वुल् ।) यमः । इत्यमरः । ("ऋषिप्रभावात् मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंसाः" । इति रघुवंशे ।)

अन्तगः, त्रि, (अन्तं पारं गच्छति, अन्त + गम् + डः, उपपदसमासः ।) अन्तगामी । पारगः । यथा, "वेदान्तगोब्राह्मणः स्यात् त्रिणचियो विजयी भवेत्" इति महाभारते विष्णुसहस्रनामफलं ॥ मृतः । अन्तं नाशं गच्छतीति ॥

अन्ततः, [स्] अ, (अन्त + तस् ।) सम्भावना । अवयवः । पञ्चम्यर्थः । शासनं । इति विश्वः ॥ (शेषादारभ्य । प्रान्तभागेन । अग्रभागेन ।
"वैश्योऽद्भिः प्राशितास्याभिश्च शूद्रः स्पृष्टाभिरन्ततः" इति मनुः ।)

अन्तर्, अ, (अम् + अरन् तुड़ागमश्च ।) मध्यं । प्रान्तं । स्वीकारः । इति विश्वः ॥

अन्तरं, क्ली, (अन्तं याति ददाति, अन्त + या + कः, उपपदसमासः ।) अवकाशः । अवधिः । परिधानं । अन्तर्धानं । भेदः । तादर्थ्यं । अवसरः । मध्यं । अन्तरात्मा । छिद्रं । आत्मीयः । विना । बहिः । इत्यमरः ॥ सदृशः । इति तट्टीका मेदिनी च ॥* ॥ अवकाशे यथा । "मृणालसूत्रान्तरमप्यलभ्यं" । इति कुमारसम्भवे ॥ अवधौ यथा । "निरन्तराभ्यन्तरवातरन्ध्रिषु" ॥ परिधाने यथा । अन्तरे शाटकाः परिधानीया इत्यर्थः ॥ अन्तर्द्धौ यथा, "पर्व्वतान्तरितो रविः" ॥ भेदे यथा,—
"यदन्तरं सर्षपशैलराजयो-
र्यदन्तरं वायसवैनतेययोः" ।
इति रामायणं ॥ तादर्थ्ये यथा । त्वामन्तरेण ऋणं गृहीतं त्वदर्थमित्यर्थः ॥ छिद्रे यथा । "प्रहरेदन्तरे रिपुं" ॥ आत्मीये यथा । "अयमत्वन्तरो मम" ॥ विनार्थे यथा । "हरे त्वदालोकनमन्तरेण" ॥ बहिरर्थे यथा । अन्तरे षण्डालस्य वाह्या इत्यर्थः ॥ अवसरे यथा । "अत्रान्तरे च जुजटा कुलवर्त्मपातेत्यादि" ॥ मध्ये यथा । "आवयोरन्तरे जाताः पर्व्वताः परितो द्रुमाः" ॥ सदृशे

यथा "इकारस्य धकारोऽन्तरतमः"। इति भरतः॥

अन्तरङ्गः, त्रि, (अन्तः सदृशं अङ्गं यस्य सः।) आत्मीयः। स्वसम्पर्कः। यथा,—

"चरमगिरिकुरङ्गी मुग्धकण्डूयनेन
क्षपिति सुखमिदानीमन्तरङ्गः कुरङ्गः"।

इति कालिदासः॥

अन्तरा,व्य, (अन्तरेति अन्तर + इन् + डा, टिभागलोपः।) वर्ज्जनं। विना। यथा,—

("न द्रक्ष्यामः पुनर्जातु धार्म्मिकं राममन्तरा"। इति रामायणे।) मध्यं। निकटं। इति मेदिनी॥

अन्तरापत्या, स्त्री, गर्भिणी। अन्तरे उदरमध्ये अपत्यं यस्याः सा॥

अन्तरायः, पुं, (अन्तरं व्यवधानं एति, अन्त + इन् + अच्, षष्ठीतत्पुरुषः।) विघ्नः। इत्यमरः॥

("स चेत् स्वयं कर्म्मसु धर्म्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः"।

इति रघुवंशे।)

अन्तरालं, क्ली, (अन्तरा मध्यं लाति, अन्तरा + ला + कः।) मध्यप्रदेशः। अभ्यन्तरं। इत्यमरः॥

("मुञ्चरन्तरालमुभयत्रगिरिः सवितुश्च योषिदमिमीत दृशा"। इति माघः। "उदेति भानुर्गगनान्तरालं"। इति पद्यमाला।)

अन्तरालकं, क्ली, (अन्तराल + स्वार्थे कन्।) अभ्यन्तरं। इति राजनिर्घण्टः॥

अन्तरितं, त्रि, (अन्तरं इतं प्राप्तं द्वितीयातत्, अथवा अन्तरं व्यवधानं जातमस्य, अन्तर + तारकादित्वात् इतच्।) अन्तर्द्धानप्राप्तं। व्यवहितं। तत्पर्य्यायः। प्रच्छन्नं २। इति त्रिकाण्डशेषः। व्यवकलितार्थः। वाकि इति भाषा। इति लीलावती॥

अन्तरिक्षं, क्ली, (अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्, एषोदरादित्वात् ऋकारस्य इकारः। अन्तरीक्षमिति पाठे ऋकारस्य ईकारः।) अन्तरीक्षं। आकाशं। इति छान्दसं। इत्यमरटीकायां पुरुषोत्तमजातरूपसभूतिरायादयः॥

("अन्तरिक्षगतांश्चैव मुनीन् देवांश्च पीड़येत्"। इति मनुः।)

अन्तरीपं. क्ली, पुं, (अन्तर्गता आपोऽत्र, तत्, समासान्तः अः, इन्तरुपसर्गेभ्य इति अपईदादेशः।) द्वीपं। इत्यमरः॥

अन्तरीयं, क्ली, (अन्तरस्य परिधानस्य इदं अन्तर् + छः तस्य ईयः।) अधोवस्त्रं। परिधानवस्त्रं। इत्यमरः॥

("नाभौ हृतच्च यदस्त्रं आच्छादयति जानुनी। अन्तरीयं प्रच्छन्नं तत् अच्छिन्नमुभयोस्तयोः"॥ इत्येवं लक्षणं)

अन्तरीक्षं, क्ली, (अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्, एषोदरादित्वात् ऋकारस्य ईकारः।) गगनं। इत्यमरः। अभ्रकधातुः। इति राजनिर्घण्टः॥

अन्तरीक्षजलं, क्ली, (अन्तरीक्षस्य आकाशस्य जलं षष्ठीतत्।) आकाशजलं। दिव्योदकं। इति राजनिर्घण्टः॥

अन्तरे, व्य (अन्तरेति अन्तर + इङ् + विच् तस्य लोपः।) मध्यं। अभ्यन्तरं। इत्यमरः॥

अन्तरेण, व्य (अन्तरेति अन्तर + इण + णः तस्य नेत्वं एषोदरादित्वात्।) मध्यं। विना। व्यतिरेकः। इत्यमरः॥

अन्तर्गण्डः, त्रि, (अन्तर्मध्ये गण्डुः ग्रीवाप्रदेशजातगलमांसपिण्डमिव निरर्थकः।) निरर्थकः। वृथा। इति हेमचन्द्रः॥

("काव्यान्तर्गण्डभूता या सा तु नेह प्रपञ्च्यते"। इति साहित्यदर्पणे।)

अन्तर्गतं, त्रि, (अन्तः अन्तःकरणात् गतं, अथवा अन्तर्मध्ये गतं प्राप्तम्।) विस्मृतं। मध्यप्राप्तं। इति हेमचन्द्रः॥("अन्तर्गतश्चये यामे"। इति मनुः। "सागरान्तर्गताः केचित् केचित् पर्व्वतमाश्रिताः"। इति रामायणम्। आभ्यन्तरः। हृदयमध्यस्थितः। अन्तःकरणस्थः। "अन्तर्गतप्रार्थनमन्तिकस्थं"। इति शाकुन्तले।

"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः"॥
इति मनुः।)

अन्तर्गेहं, क्ली, (गृहस्य मध्ये, अव्ययीभावः।) गृहमध्यं। इति नानार्थकोषशब्दार्णवे अमरः॥ घरेर भितर इति भाषा। (वाराणसीक्षेत्रे सप्तावरणवति स्थानविशेषे।

"अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति।
वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति॥
पञ्चक्रोश्यां कृतं पापं अन्तर्गेहे विनश्यति"।
इति काशीमाहात्म्यम्।)

अन्तर्जठरं, क्ली, (जठरस्य उदरस्य मध्ये अव्ययीभावः।) कुक्षिमध्यं। कोष्ठं। इत्यमरः॥

अन्तर्दधनं, क्ली, (अन्तर्मध्ये दधते मन्यते क्रियतेऽनेन, अन्तर् + दध् + करणे ल्युट्।) सरावीजं। इति शब्दचन्द्रिका॥

अन्तर्दाहः, पुं, (अन्तर्मध्ये दाहः सन्तापः।) कोष्ठसन्तापः। शरीराभ्यन्तरज्वाला। इति राजनिर्घण्टः॥

अन्तर्द्धा, स्त्री, (अन्तर्द्धानं, अन्तर् + धा + भावे अङ् स्त्रियां टाप्।) अन्तर्द्धानं। इत्यमरः॥

अन्तर्द्धानं, क्ली, (अन्तर्धानं, अन्तर् + धा + भावे ल्युट्।) आच्छादनं। इति शब्दरत्नावली॥ तत्पर्य्यायः। अन्तर्द्धा २ व्यवधा ३ अन्तर्द्धिः ४ अपवारणं ५ अपिधानं ६ तिरोधानं ७ पिधानं ८ छदनं ९। इत्यमरः॥

("अन्तर्द्धानं स्मृतिः कान्तिर्दृष्टिः श्रोतञ्च तथा" इति याज्ञवल्क्यः।)

अन्तर्द्धिः, पुं, (अन्तर्द्धानम् अन्तर् + धा + भावे कि।) अन्तर्द्धानं। इत्यमरः॥

अन्तर्द्वारं, क्ली, (अन्तर्गृहमध्यस्थं द्वारं।) प्रकोष्ठद्वारं। इति भरतः॥ गृहाभ्यन्तरद्वारं। गृहाभ्यन्तरप्रकोष्ठादिद्वारं जालद्वारं वा। इति स्वामी॥ तत्पर्य्यायः। प्रच्छन्नं २। इत्यमरः॥ पक्षद्वारं खड़्किकाद्वारं। यथा,—

"प्रच्छन्नमन्तर्द्वारञ्च पक्षद्वारं तदुच्यते"।
इति श्रुवरस्वामी॥

अन्तर्भूतः, त्रि, (अन्तर्मध्ये भूतः स्थितः, अन्तर् + भू + कर्त्तरि क्तः।) गुणीभूतः। अन्तःस्थः। अन्तरस्थः। अन्तर्गतः। यथा,—

"स एव भगवान् विष्णुरन्तर्भूतः सनातनः"।
इति पद्मपुराणे माघमाहात्म्यं॥

अन्तर्म्मनाः, [स्] त्रि, (बाह्यव्यापारशून्यतया अन्तर्गमनः चेतो यस्य सः।) दुर्म्मनाः। विमनाः। व्याकुलचेताः। इत्यमरः॥

अन्तर्यामी, [न्] पुं, (अन्तर्मध्ये यमयति स्वस्वकार्य्येषु इन्द्रियादीनि नियोजयति, अन्तर् + यम् + णिच् + उपपदसमासः।) अन्तःकरणनियामकः। तत्पर्य्यायः। आत्मा २ जीवः ३ पुरुषः ४ पुद्गलः ५ ईश्वरः ६। इति त्रिकाण्डशेषः॥ विशुद्धसत्वप्रधानाज्ञानोपहितचैतन्यं। इति वेदान्तसारः॥ मनोगतज्ञे त्रि॥

("अन्तराविश्य भूतानि योबिभर्त्त्यात्मकेतुभिः। अन्तर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम्"।

अन्तर्वंशिकः, पुं, (वंशः स्तावलम्बनयष्टिर्विद्यतेऽस्य, वंश + ठक् तस्य इकः, अन्तः क्षपान्तःपुरे वंशिकः यष्टिधारी नियुक्तः पुरुषः।) अन्तःपुराधिकृतः। अन्तःपुराध्यक्षः। इत्यमरः॥

अन्तर्व्वत्नी, स्त्री, (अन्तर्गर्भमध्यस्थमपत्यं विद्यतेऽस्याः, अन्तर् + मतुप्, अन्तर्व्वत्यतिवतोर्नुक् इति ङीप्नुगागमौ।) गर्भिणी। इत्यमरः॥

("तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती।
सुतावसूत सम्पन्नौ कोषादण्डाविव श्रितिः"॥
इति रघुवंशे।)

अन्तर्व्वमिः, पुं (अन्तः कुक्षिमध्यात् वमयति उद्गारयति अन्तर् + वम् + णिच् + इक् ह्यग्यादिभ्य इति बाहुल्यात् इक्।) अपाकः। अजीर्णः। इति त्रिकाण्डशेषः॥

अन्तर्व्वाणिः, त्रि, (अन्तः अन्तःकरणे वाणी शास्त्रविहिता वाक् यस्य सः, ऋक्षः।) शास्त्रवित्। शास्त्रज्ञः। इत्यमरः॥

अन्तर्व्विगाहनं, क्ली, (अन्तर्मध्ये विगाहनं प्रवेशः, अन्तर् + वि + गाह् + ल्युट्।) प्रवेशनं। इति हेमचन्द्रः॥

अन्तर्व्वेदी, स्त्री, (अन्तः एथ्वीमध्यस्थतया वेदीव। अन्तर्वेदि इति पाठे अन्तर्मध्ये वेदिर्यत्र देशे सः।) ब्रह्मावर्त्तदेशः। गङ्गायमुनयोर्म्मध्यदेशः। आप्रयागहरिद्वारपर्य्यन्तदेशः। दोयाव इति पश्चिमदेशे ख्याता। तत्पर्य्यायः। गृह्यस्थली २। इति त्रिकाण्डशेषः॥

अन्तर्हासः, पुं, (अन्तरव्यक्तोहासः हास्यं।) अव्यक्तहासः। गूढ़हास्यं। तत्पर्य्यायः। उद्दर्ढनं २। इति त्रिकाण्डशेषः॥ तद्वति त्रि॥("ततोऽन्तर्हासविकासमुखः स तदुचितमाचचार"। इति पञ्चतन्त्रं। "सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे"। इति मेघदूतम्।)

अन्तर्हितं, त्रि, (अन्तर् + धा + क्तः ।) लुक्कायितं । गुप्तं । तत्पर्य्यायः । संवीतं २ रुद्धं ३ आवृतं ४ संवृतं ५ पिहितं ६ छन्नं ७ स्थगितं ८ अपवारितं ९ तिरोधानं १० । इति हेमचन्द्रः ॥ ("अन्तर्हिते शशिनि सैव कुमुदती मे दृष्टिं न नन्दयति संस्मरणीयशोभा" । इति शाकुन्तले ।)

अन्तवासी, [न्] पुं, (अन्तेऽध्येतुमध्यापकसमीपे वसति, अन्त + वस् + णिनि उपपदसमासः ।) अन्तेवासी । शिष्यः । इत्यमरटीकायां भरतः ॥

अन्तशय्या, स्त्री, (अन्ताय नाशाय शय्या शयनं यत्र + भावे क्यप् । स्त्रियां टाप्) भूमिशय्या । मृत्युः । श्मशानं । इति मेदिनी ॥
("अन्तशय्या मृतौ भूमिशय्यायां पिटकानने" । इति मेदिनी ।)

अन्तावशायी, [न्] पुं, (अन्ते नीचजातितया ग्रामसीमायामवशेते तिष्ठति, अन्त + अव + शी + णिनि उपपदसमासः ।) चण्डालः । मुनिविशेषः । इति हेमचन्द्रः ॥ नापितः । इत्यमरः ॥

अन्तिः, स्त्री, (अन्यते ज्येष्ठभगिनीत्वेन सम्बध्यतेऽसौ, अन्त + करोत्यर्थे णिच् + इक् । अन्तिकेतिपाठे स्वार्थे कन् स्त्रियां टाप् ।) नाद्योक्तौ ज्येष्ठा भगिनी । इति शब्दरत्नावली ॥ (अन्तिका भगिनी ज्येष्ठेत्यमरः ।) समीपे व्य । यथा । "मुग्धप्रभीतवदुपेयतुरन्तिकान्नोः" । इति श्रीभागवतं ॥

अन्तिकं, त्रि, (अन्तः सामीप्येन विद्यतेऽस्य, अन्त + ठन् तस्य इकः ।) निकटं । इत्यमरः ॥ सामीप्ये क्ली । इति धरणी ॥ ("अन्तर्गतप्रार्थनमन्तिकस्थं" । "स्तनसि मृदुकर्णान्तिकचरः" । इति शाकुन्तले । "ननु मां प्रापय पत्युरन्तिकम्" । इति कुमारसम्भवे ।)

अन्तिकतमः, त्रि, (अतिशयेन अन्तिकः, अन्तिक + तम ।) अतिनिकटः । तत्पर्य्यायः । नेदिष्ठः २ । इत्यमरः ॥ नेदीयान् ३ अन्तितमः ४ । इति जटाधरः ॥

अन्तिका, स्त्री, (अन्तः नाशाय अभिनेढसामीप्यमस्याः अस्ति, अन्त + ठन् तस्य इकः स्त्रियां टाप् ।) नाद्योक्तौ ज्येष्ठा भगिनी । इत्यमरः ॥ तत्पर्य्यायः । अन्तिका २ अर्न्तिका ३ । इति तट्टीका । चुल्ली । शातलानामौषधं । इति मेदिनी ॥ चामारकन्या इति ख्याता ।
("अन्तिकं निकटे वाच्यलिङ्गं स्त्री शातलौषधौ । चुल्यां ज्येष्ठभगिन्यान्च नाद्योक्त्या कथ्यतेऽन्तिका" ॥ इति मेदिनी ।)

अन्तिकाश्रयः, पुं, (अन्तिकस्य आश्रयः अवलम्बनं, षष्ठीतत्पुरुषः ।) निकटाश्रयः । समीपस्थावलम्बनं । तत्पर्य्यायः । उपघ्नः २ । इत्यमरः ॥

अन्तिमः, त्रि, (अन्त + डिमच् ।) अन्ते भवः । चरमः । अन्त्यः । इति जटाधरः ॥
("अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः । सकृत् दुःखकरावाद्यावन्तिमस्तु पदे पदे" ॥ इति हितोपदेशः ।) अतिनिकटः । इत्यमरटीकायां नीलकण्ठः ॥

अन्तेवासी, [न्] पुं, (अन्ते विद्यामध्येतुमध्यापकसमीपे वसति । चण्डालपक्षे तु नीचजातितया ग्रामप्रान्ते वसति शयवासेत्यलक्, अन्त + वस् + णिनि ।) शिष्यः ।
("क्षत्रशास्त्रान्तेवासी कुशिकपतिराज्ञापयति वः" । इति महावीरचरिते ।
"तात ! प्राचेतसान्तेवासी लवोऽभिवादयते" । इति उत्तरचरिते ।) चण्डालः । इत्यमरः ॥ प्रान्तस्थायिनि च ॥ इति विश्वः ॥

अन्त्यं, क्ली, (अन्ते भवं, अन्त + यत् ।) दशसागरसंख्या । सप्तखलक्षकोटिः । इति लीलावती ॥ द्वादशलग्नं । इति ज्योतिषं ॥

अन्त्यः, त्रि, (अन्ते भवः, अन्त + यत् ।) अन्ते भवः । शेषोत्पन्नः । अधमः । जघन्यः । इति मेदिनी ॥ (अन्तिभः । चरमः । शेषः ।
"असह्यपीडं भगवन् ऋणमन्त्यमवेहि मे" । इति रघुवंशे ।)

अन्त्यः, पुं, (अन्ते भवः अन्त + यत् ।) मुक्ता । इति मेदिनी ॥ मुता घास इति भाषा । म्लेच्छः । इति प्रायश्चित्ततत्त्वं ॥

अन्त्यजः, पुं, (अन्त्यो भूत्वा जायते, अन्त्य + जन् + डः ।) शूद्रः । इति हलायुधः ॥ रजकादिसप्तजातयः । यथा,—
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥
इति यमवचनं ॥ जघन्यजे च ॥

अन्त्यजन्मा, [न्] पुं, (अन्त्यं ब्राह्मणक्षत्रियविशां जन्मानन्तरं जन्म यस्य सः ।) चतुर्थवर्णः । शूद्रः । इति रत्नावली ॥
("प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः" । इति मनुः ।)

अन्त्यजातिः, पुं, (अन्त्या जातिर्जन्म यस्य सः ।) चाण्डालादिः । यथापस्तम्बः ।
"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि ।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तत्र विशोधनं ॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनं ।
प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे ॥
यैस्तत्र भुक्तं पक्वान्नं क्षुद्रं तेषां विनिर्दिशेत् ।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते" ॥
इति प्रायश्चित्ततत्त्वं ॥

अन्त्यभं, क्ली (अन्त्यं शेषस्थितं भं नक्षत्रं कर्म्मधारयः ।) रेवतीनक्षत्रं । मीनराशिः । इति ज्योतिषं ॥

अन्त्यवर्णः, पुं, (अन्त्यः वर्णः जातिः कर्म्मधारयः ।) शूद्रः । इति हेमचन्द्रः ॥

अन्त्यावसायी, [न्] पुं, (अन्त्यः सन् अवस्यति, अन्त्य + अव + सो + णिनि उपपदसमासः ।) चाण्डालादिसप्तजातयः । यथा,—
"चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" ॥
इति अङ्गिराः ॥ (निषादस्त्रियां चण्डालजातौ मुद्राफरास इति ख्यातः संकीर्णजातिविशेषः ।
"निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनं ।
श्मशानगोचरं सूते वाह्यानामपि गर्हितम्" ॥
इति मनुः ।)

अन्त्येष्टिः, स्त्री, (अन्त्या अन्ते भवा इष्टिः, कर्म्मधारयः ।) चरमसंस्कारः । स तु शवदाहादिरूपः । यथा,—
"सपिण्डादिभिदाशौचसंक्षेपोऽन्त्येष्टिपद्धतिः" ।
इति शुद्धितत्त्वप्रतिज्ञायां स्मार्त्तभट्टाचार्य्यः ॥ तत्प्रयोगो दाहशब्दे द्रष्टव्यः ॥ तदनन्तरं पूरकपिण्डप्रमाणं पिण्डशब्दे द्रष्टव्यं ॥ तस्य प्रयोगोऽत्र लिख्यते । ततः पिण्डदानं तच्च क्रमः । तण्डुलप्रस्थतिद्वयं द्विः प्रक्षाल्य ऐशान्यां दिशि सुस्थिरं पचेत् । ततः पवित्रपाणिः प्राचीनावीती पातितवामजानुर्दक्षिणामुखो हस्तप्रमाणां चतुरङ्गुलोच्छ्रायां दक्षिणप्लवां पिण्डिकां कृत्वा तदुपरि रेखां कृत्वा दर्भानास्तीर्य्य तिलान् प्रक्षिप्य । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नेनवनेनिक्ष्व इत्यास्तीर्णकुशोपरि सतिलजलेनावनेजयेत् । ततस्तिलमधुघृतादिमिश्रं तत्पिण्डं गृहीत्वा अद्यामुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणः एतत् प्रथमपिण्डं पूरकं इत्यवने जनस्थाने दद्यात् । ततः पिण्डपात्रक्षालनजलेन पुनरवनेजयेत् । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नेतत्ते ऊर्णातन्तुमयं वासः । ततः आमन्मण्मयपात्रे जलाञ्जलिं पिण्डसमीपे स्थापयेत् । गन्धं माल्यञ्च यथाशक्ति दद्यात् । वाक्यपर्य्यन्तं पिण्डं पश्यंस्तिष्ठेत् । ततः पिण्डादिकं जले क्षिपेत् । कालेऽप्यकृतचूडोपनयनानां अनूढकन्यानाञ्च कुशास्तरणं विनेति शेषः । एवं कृतचूडानामुपनयनकालात् प्राक् दर्भोपरि पिण्डदानं । उपनयनकाले आगते कृतोपनयनानां दर्भोपरि पिण्डदानं । एवं अष्टवर्षविवाहकाले आगते ऊढस्त्रीणां दर्भोपरि पिण्डदानं । राजावाचम्य दक्षिणामुखः प्राचीनावीती पातितवामजानुः त्रिकाष्ठिकोपरि मृण्मयपात्रे उदकं तथा पात्रान्तरे क्षीरं निधाय प्रेतात्र स्नाहि पिब चेदं क्षीरमिति ब्रूयात् । तदेकरात्रमावश्यकं दशरात्रं फलभूयस्त्वार्थमिति । द्वितीयपिण्डादिषु द्वितीयं पिण्डं पूरकं इत्यादिविशेषः । द्वितीयपिण्डे मृण्मयपात्रद्वये जलाञ्जलिद्वयं । तृतीयादिपिण्डे पात्रादिवृद्धिः । येन पञ्चपञ्चाशत् पात्राण्यञ्जलयश्च तावन्ति । अहाशौचप्रथमदिने पिण्डानां त्रयं । द्वितीयदिने चतुष्टयं । तृतीये त्रयं । प्रथममेकं द्वितीये चतुष्टयं । तृतीये पञ्चमं वा कार्य्यः । चतुरहाशौचे प्रथमचतुर्थयोर्द्वौ द्वौ । द्वितीयतृतीययोस्त्रयस्त्रयः । पञ्चाहाशौचे तु प्रथमपञ्चमदिनयोरेकैकमूनः पिण्डः । द्वितीयचतुर्थयोर्द्वौ द्वौ । तृतीये चत्वारः । षड्हाशौचे द्वितीयचतुर्थदिनयोस्त्रयस्त्रयः । शेषेष्वेकैकः । सप्ताहाशौचे तृतीयचतुर्थपञ्चमदिनेषु द्वौ द्वौ । शेषेष्वेकैकः । अष्टाहाशौचे चतुर्थपञ्चमदिनयोर्द्वौ द्वौ । शेषेष्वेकैकः । नवाहाशौचे तु पञ्चमदिने द्वौ । शेषेष्वेकैकः । पक्षिणीह्यहाशौचयोस्त

आद्यद्वितीयदिनयोः पञ्च पञ्च पिण्डाः। द्वादशाह्याद्यौचे नवदिनेषु नवपिण्डाः। शेषदिने दशमः। सद्यःशौचैकाहयोरेकाह एव दशमपिण्डाः। अशौचान्तमध्ये पिण्डो देयः रात्रावपि ॥ * ॥

गङ्गाम्भस्यस्थिप्रक्षेपप्रयोगस्तु। ततः स्नात्वाचम्य उदङ्मुखः कुशत्रयजलान्यादाय ॐ तत्सदित्युच्चार्य्य अद्यामुकेत्यादि अमुकस्य एतदस्थिसमसंख्यकवर्षसहस्रावच्छिन्नस्वर्गाधिकरणकमहीयमानत्वकामोऽमुकस्यैतान्यस्थिखण्डानि गङ्गायां प्रक्षिपामीति सङ्ख्यापूर्वकं सङ्कल्पं कृत्वास्थीनि पञ्चगव्येन सिक्त्वा हिरण्यमध्याज्यतिलैः संयोज्य मृत्तिकापुटे स्थापयित्वा दक्षिणहस्तेन तत्पुटकमादाय दक्षिणां दिशं पश्यन् ॐ नमोऽस्तु धर्म्मराजायेति वदन् जलं प्रविश्य स मे प्रीतो भवत्वित्युक्त्वास्थि प्रक्षिपेत्। ततो मज्जनं कृत्वोत्थाय सूर्य्यं दृष्ट्वा दक्षिणामुत्सृजेत्। इति शुद्धितत्त्वं ॥ * ॥ किञ्च शातातपः।

"जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये"।

पारस्करः। मृण्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः। प्रेतास्त्वं स्नाहीत्युदकं पिब चेदं क्षीरं। इदं रात्राविति गौड़ाः। गारुड़े तु।

"अपक्वे मृण्मये पात्रे दुग्धं दद्यात् दिनत्रयम्"।

इत्युक्तं। हेमादौ पात्रे तु दशाहमुक्तं।

"तस्मान्निधेयमाकाशे दशरात्रं पयो जलं।
सर्व्वतापोपशान्त्यर्थमध्वश्रमविनाशनं" ॥

देवजानीये कारिकायां।

"तत्र प्रेतोपकृतये दशरात्रमखण्डितं।
कुर्य्यात् प्रदीपं तैलेन वारिपात्रञ्च मार्त्तिकं ॥
भोज्यात् भोजनकाले तु भक्तमुद्दिश्य निर्व्वपेत्।
नामगोत्रेण सम्बुध्य धरित्र्यां पिण्डवत्सवत्" ॥

इति निर्णयसिन्धौ ५ परिच्छेदः ॥

अन्त्रं, क्ली, (अन्त्यते कायः सम्बध्यतेऽनेन अति बन्धने करणे ष्ट्रन्।) पुरीतत्। इत्यमरः ॥ आँतड़ी (आँत् इति भाषा। आँत् इति ख्यातः देहबन्धको नाड़ीभेदः।

उक्ताः सार्द्धास्त्रयो यामाः पुंसामन्त्राणि सूरिभिः।
अर्द्धयामेन हीनानि स्त्रीणामन्त्राणि निर्दिशेत् ॥

इति वैद्यकम्।)

अन्त्रवृद्धिः, स्त्री, पुं, (अन्त्रजन्या वृद्धिः, शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) रोगविशेषः। तन्निदानादि यथा,—

"वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणे रथभाराध्वविषमाक्षप्रवर्त्तनैः ॥
क्षोभणैः क्षोभितान्त्रेण क्षुद्रान्त्रावयवं यदा।
पवनो दिगुणीकृत्य स्वनिवेशादधो नयेत् ॥
कुर्य्यादन्त्रगसन्धिस्थो गुल्मगाभं चयं तदा"।

धारणं उपस्थितस्य वेगस्य। ईरणं अनुपस्थितस्य वेगस्य प्रेरणं।

"विषमाक्षप्रवर्त्तनं वक्त्रेणाक्षमोटनं"।

अन्यानि क्षोभणानि च बलवद्विग्रहकठोरधनुरादीनि। तैः क्षोभितः संदूष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं दिगुणीकृत्य स्वनिवेशादधो नयेत्। तदा वंक्षणसन्धिस्थः सन् वंक्षणसन्धौ ग्रन्थिरूपं चयं कुर्य्यात् इत्यर्थः ॥ * ॥

उपेक्षितायां अन्त्रवृद्धेरवस्थामाह।

"उपेक्षमाणस्य मरुद्विवृद्धि-
माध्मानरुक् स्तम्भवतीञ्च कुर्य्यात्।
स पीड़ितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥

उपेक्षमाणस्य वृद्धिमित्यर्थः। मरुद्वृद्धिं मुष्कवृद्धिं। आध्मानरुक् स्तम्भवतीं कुर्य्यात्। तत्राध्मानमुदरे रुक् वृद्धयोर्मुष्कयोः स्तम्भो गात्रे तद्युक्तां कुर्य्यात् इत्यर्थः। भोजोऽप्याह।

"अन्त्रं हिगुणमादाय वातो नयति वंक्षणं।
वंक्षणात्तद्युजा युक्तं फलकोष्यां प्रपद्यते" ॥
स मुष्कवृद्धिः। अन्तः उदरे प्रध्मापयन् आगमनमार्गमुच्छ्रूनं कुर्व्वन् इति प्रयाति ॥ * ॥ असाध्यमाह।

"यस्यान्त्रावयवश्चिरान्मुष्कयोर्व्वातसञ्चयात्।
स्यादन्त्रवृद्धिः सोऽसाध्यो वातवृद्धिसमाह्वयः" ॥

स कीदृक् स्यादित्याकाङ्क्षायामाह। वातवृद्धिसमाह्वयः ॥ * ॥ सामीप्यादैव ब्रध्नमाह।

"अत्यभिष्यन्दिगुर्व्वन्नशुष्कपूत्यामिषाशनात्।
करोति ग्रन्थिवच्छोथं दोषो वंक्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत्" ॥ * ॥

अथ वृद्धेश्चिकित्सा।

"वृद्धावन्त्रासनं मार्गमुपवासं गुरूणि च।
वेगाघातं एष्ठयानं व्यायामं मैथुनं त्यजेत् ॥
वातवृद्धौ पिबेत् स्निग्धं यथाप्राप्तं विरेचनं।
सक्षीरं वा पिबेत् तैलं मासमेरण्डसम्भवं ॥
गुग्गुलुक्षेरवृक्षजं तैलं गोमूत्रेण पिबेन्नरः।
वातवृद्धिं जयत्याशु चिरकालानुबन्धिनीं ॥
पित्तग्रन्थिक्रमेणैनं पित्तवृद्धिमुपाचरेत्।
जलौकाभिर्हरेद्रक्तं वृद्धौ पित्तसमुद्भवे ॥
चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलं।
क्षीरपिष्टप्रलेपेन दाहशोथरुजापहं ॥
त्रिकटुं त्रिफलाक्षारं सक्षारं लवणं पिबेत्।
विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनं ॥
लेपनं कटुतीक्ष्णोष्णं स्वेदनं रूक्षमेव च।
परिषेकोपनाहौ च सर्व्वमुष्णमिहेष्यते ॥
मुञ्जमुञ्जजलौकाभिः शोणितं रक्तजे हरेत्।
पिबेद्विरेचनं वापि शर्करात्रौद्रसंयुतं ॥
शीतमालेपनं सर्व्वं सर्व्वं पित्तहरं तथा।
पित्तवृद्धिक्रमं कुर्य्यादामे पक्वे च रक्तजे ॥
स्वेदोभेदः समुत्थे तु लेपयेत् सुरसादिना।
शिरो विरेचनद्रव्यैः सुखोष्णैर्मूत्रसंयुतैः ॥
संस्वेद्य मूत्रप्रभवं वस्त्रपट्टेन वेष्टयेत्।
सीवन्याः पार्श्वतोऽधस्तात् विध्येद्दोहिमुखेन वै ॥
मुष्कशोथमगच्छन्त्यामन्त्रवृद्धौ विचक्षणः"।

दोहिमुखेन शस्त्रविशेषेण। अगच्छन्त्यां अखण्डायां ॥

"तैलमेरण्डजं पीत्वा बलासिद्धं पयोन्वितं।
आध्मानशूलोपचितमन्त्रवृद्धिं जयेन्नरः ॥
राल्लाया च्छमतैरण्डबलारग्वधगोक्षुरैः।
पटोलेन वृषेणापि विधिना विहितं हितं ॥

रण्डतैलेन संयुक्तमन्त्रवृद्धिं व्यपोहति"।

राजादिकाद्यः ॥ * ॥

"गन्धर्व्वहस्ततैलेन वृषेणापि युतं पिबेत्।
विशालामूलजं चूर्णं वृद्धिं हन्यान्न संशयः"।

विशाला इन्द्रवारुणी ॥ * ॥

"वचासर्षपकल्केन प्रलेपः शोथनाशनः।
शिग्रुत्वक्सर्षपैः पिष्टैः शोथश्लेष्मानिलापहः ॥
शुद्धसूतं विधागन्धं मृतान्येतानि योजयेत्।
लोहं रङ्गं तथा ताम्रं कांस्यञ्चाथ विशोधितं ॥
तालकं तुत्थकं वापि तथा शुल्बं वराटकं ॥
त्रिकटु त्रिफला चव्यं विड़ङ्गं वृद्धदारकं ॥
कर्च्चूरं मागधीमूलं पाठां सहचरां वचां।
एलाबीजं देवकाष्ठं तथा लवणपञ्चकं ॥
एलादिसमभागानि चूर्णयेदथ कारयेत्।
कषायेण हरीतक्या वटिकां टङ्कसम्मितां ॥
एकां तां वटिकां यस्तु निगिलेद्वारिणा सह।
अण्डवृद्धिरसाध्योऽपि तस्य नश्यति सत्वरं" ॥

वृद्धिवाधिका वटी ॥ * ॥ अथ ब्रध्नस्य चिकित्सा।

"भल्लातैरण्डतैलेन सम्यक् कल्कोऽभयाभवः।
क्षुण्णासैन्धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजीहपुषाकुष्ठं गोमेदवदरान्वितं।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः" ॥

गोमेदं पत्रं। तथा च निर्घण्टौ धन्वन्तरिः।

"पत्रं हलाङ्क्यं रामं गोमेदं वसनाङ्क्ययं"।

इतिवृद्धिब्रध्नाधिकारः। इति भावप्रकाशः ॥

अन्दिका, स्त्री, (अन्दति नाद्याय व्येष्ठभगिनीत्वं सम्बध्नाति, अदि + ण्वुल् स्त्रियां टाप्। नाद्योक्तौ व्येष्ठभगिनी इत्यमरटीकायां।) अन्तिका। शुल्की। इत्यमरटीकायां नीलकण्ठः ॥ चुला इति भाषा।

अन्दुः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण्बाहुलकात्।) हस्तिनिगड़ः। आँदुया इति भाषा। स्त्रीपादभूषणं। इति हेमचन्द्रो भूरिप्रयोगश्च ॥ मल पञ्चम इत्यादि भाषा।

अन्दुकः, पुं, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण्, ततः स्वार्थे कन्।) हस्तिपादबन्धनशृङ्खलः। तत्पर्य्यायः। निगड़ः २। इत्यमरः ॥ पादालङ्कारविशेषः। तत्पर्य्यायः। पादकटकः २। इति त्रिकाण्डशेषः ॥

अन्दूः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + उण्, ततः ऊङुत इति स्त्रियां ऊङ्।) हस्तिपादबन्धनलौहनिगड़ः। आन्दुया इति भाषा। स्त्रीपादभूषणं। भल गुजरी इत्यादि भाषा। इति मेदिनी ॥ (निगड़ः। शृङ्खला। बन्धनरज्जुः। अन्दः स्त्रियां स्यान्निगड़े प्रभेदे भूषणस्य च। इति मेदिनी।)

अन्दूकः, पुं, (अन्दू + स्वार्थे कन्, पृषोदरादित्वात् पक्षे केहण इति ह्रस्वाभावः। स्वार्थिकप्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिक्रामन्ति इति पुंस्त्वं मन्यथा अन्दूका इति स्यात्।) अन्दूः। इत्यमरटीकायां स्वामी ॥ अन्यत् कदृक्छब्दे। इति कविकल्पद्रुमः ॥ (पाणिनिमते तु अन्धदृष्टि

विघाते चुरादि सेट्।) दृक्त्वयो दृष्टिरहिनीभावः। तेनाकर्म्मकोऽयं। सत्ताजीवनदर्पभीतिशून्यनक्रीडानिवासत्वयाव्यक्तध्वाननभोगतिस्थितिजरालज्जाप्रमादोदये। मोहे खोटनवेगयुद्वदहनख्यातिक्षरोन्मादके शुद्धिखेदपलायनभ्रमणके ग्लानौ श्रुतौ मज्जने॥ दृप्तौ जागरशोषवक्रगमनोत्साहे मतौ संशये स्नानौ मन्दगतौ च नृत्यपतने चेष्टाक्रुधौ रोदने। वृद्धौ हावक्षतौ च सिद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभङ्गयतनाद्ये धातवोऽकर्म्मकाः॥ दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य यतस्तस्मादकर्म्मकाः॥ कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातवः। तद्भावेऽकर्म्मकाः स्युस्तदृत्ताख्यां सकर्म्मकाः॥ इति। अन्धयति अन्धापयति वृद्धः। इति दुर्गादासः॥

अन्धं, क्ली, (अन्ध + अच्।) अन्धकारः।
("सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा"। इति उत्तरचरिते।) जलं। इति मेदिनी।

अन्धः, त्रि, (अन्ध + अच्।) चक्षुर्दयहीनः। आन्धा आँधुला इति हिन्दी भाषा। तत्पर्य्यायः। अदृक् २। इत्यमरः। ("वृद्धोऽन्धः पतिरेष मक्षकगतः"। इति साहित्यदर्पणे।
"अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह। यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभाङ्गतः"।
इति मनुः।)

अन्धः, [स्] क्ली, (अन्ध + असुन्।) अन्नं। इत्यमरः॥

अन्धकः, पुं, (अन्ध + ण्वुल्।) देशभेदः। इति शब्दरत्नावली॥ नृपभेदः।
("सुदंष्ट्रं च सुचारुं च कृष्णमित्यन्धकास्त्रयः "। इति हरिवंशे।) असुरभेदः। इति महाभारतं॥
("स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत। तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः"। इति हरिवंशे।) मुनिविशेषः। इति याज्ञवल्क्याः॥ (दृष्टिहीनः। चक्षुर्दयहीनः।
"अन्धकः कुब्जकश्चैव राजकन्या च त्रिलनी। त्रयोऽप्यन्यायतः सिद्धाः सम्मुखे कर्म्मणि स्थिते"॥
इति पञ्चतन्त्रे।,

अन्धकरिपुः, पुं, (अन्धकस्य असुरस्य रिपुः नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इत्यमरः॥ श्लेषकाव्यादौ अन्धकारनाशकत्वात् सूर्य्याग्निचन्द्रेषु च वर्त्तते॥

अन्धकारः, पुं, क्ली, (अन्धमन्धकवत् करोति, अन्ध + कृ + अण्।) तेजःसामान्याभावः। आँधार इति भाषा। तत्पर्य्यायः। ध्वान्तं २ तमिस्रं ३ तिमिरं ४ तमः ५। इत्यमरः॥ ("अथान्धकारं गिरिगह्वराणां"। इति रघुवंशे।) भूच्छायं ६। इति राजनिर्घण्टः॥ महान्धकारे अन्धतमसं। ७ सर्व्वव्यापकान्धकारे सन्तमसं। ८ अल्पान्धकारे अवतमसं ९। इत्यमरः॥ अस्य गुणाः। भयदृष्टितेजोऽवरोधकारित्वं। तिक्तत्वं। सर्व्वव्याधिकरत्वञ्च। इति राजवल्लभः॥

अन्धकासुहृद्, पुं, (अन्धकस्य असुरस्य असुहृत्, नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इति हेमचन्द्रः॥

अन्धकूपः, पुं, (अन्धमन्धकारं करोति, अन्ध + करोत्यर्थे णिच् + पचाद्यच्, तादृशः कूपः।) सान्धकारकूपः। इति त्रिकाण्डशेषः॥ आँधुया पातुया इति भाषा।
("मज्जत्यात्मा भक्तिहीनो महामोहमये भवे। अन्धकूपे निरालम्बश्छिन्नरज्जुर्यथा घटः"॥ इति सद्भावे।)

अन्धतमसं, क्ली, (अन्धयति, अन्ध + अच्, अन्धं तमः कर्म्मधारयः, समासान्त अच्।) निविड़ान्धकारं। इत्यमरः॥
("प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः"। इति शिशुपालबधे।)

अन्धतामसं, क्ली, (तम एव तामसं प्रज्ञादित्वात् स्वार्थे अण्।) निविड़ान्धकारं। महान्धकारं। इत्यमरटीकायां स्वामी॥

अन्धतामिस्रं, क्ली, (तमिस्रैव तामिस्रं, स्वार्थे अण्, अन्धं निविड़ं तामिस्रं कर्म्मधारयः।) निविड़ान्धकारमयनरकविशेषः। पञ्चप्रकाराज्ञानान्तर्गताज्ञानविशेषः। देहनाशे अहमेव मृतोऽस्मीति बुद्धिः। इति भारतभागवते,—
("एकविंशतिविधनरकान्तर्गतद्वितीयनरकविशेषः" स च निविड़ान्धकारमयः। "तस्यां धर्म्मपत्न्यामन्धतामिस्रमभ्यधायत्"। इति महावीरचरिते।)

अन्धमूषिका, स्त्री, (अन्ध दृष्टिविघाते, अन्ध + भावे घञ्, अन्धं दृष्टिविघातं मुष्णाति तत्सेवनेन नाशयति, मुष् + ण्वुल् एषोदरादित्वात् दीर्घः स्त्रियां टाप्।) देवताड़हुछुः। इति शब्दचन्द्रिका॥

अन्धाहिः, पुं, स्त्री, (अन्धः अहिः सर्पइव।) मत्स्यभेदः। इति त्रिकाण्डशेषः॥ कुँचिया इति ख्यातः।

अन्धिका, स्त्री, (अन्ध + ण्वुल् स्त्रियां टाप्।) द्यूतविशेषः। रात्रिः। इति मेदिनी॥ सर्षपी। इति हेमचन्द्रः॥ स्त्रीविशेषः। चक्षूरोगविशेषः। इति शब्दरत्नावली॥

अन्धुः, पुं, (अन्ध + उण्।) कूपः। इत्यमरः॥

अन्धुलः, पुं, (अन्ध + उलच्।) शिरोषड़ङ्गः इति शब्दचन्द्रिका॥

अन्ध्रः, पुं, (अन्धयति गीतेन मृगान् अन्धवत् करोति, अन्ध + कर्त्तरि रः।) व्याधः। मृगयाजीवी। इति कश्चित् संग्रहकारः। (वैदिहिकात् कारावरस्त्रियां जातो जातिविशेषः, स तु सततं ग्रामबहिर्वासो मृगयाजीवी च।
"कारावरनिषादात् तु चर्म्मकारः प्रसूयते। वैदिहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ"॥
इति मनुः।)

अन्न, क्ली, (अद् + कर्म्मणि क्तः।) खिन्नतण्डुलं। यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतं"।

इति आह्निकतत्त्वधृतवशिष्ठवचनं॥ तत्पर्य्यायः। भक्तं २ अन्धः ३ भिस्सा ४ ओदनं ५ दीदिविः ६। इत्यमरः॥ भिस्सा ७। इति तट्टीका॥ क्रूरं ८। इति राजनिर्घण्टः॥ अट्टं ९ कसिपुः १० जीवातुः ११। इति जटाधरः॥ कूरं १२ आपूपिकं १३ जीवन्तिः १४ प्रसादनं १५। इति शब्दरत्नावली॥ * ॥ अस्य गुणाः। बुद्धिशुक्रप्रीतिपुष्टिधात्विन्द्रियबलकारित्वं। गुरुत्वं। क्षुधात्ययरोगश्रमकार्श्यनाशित्वञ्च॥ * ॥ नवान्नगुणाः। श्लेष्मकारित्वं। स्वादुत्वं। सुस्निग्धत्वं। दृंहणत्वं। गुरुत्वञ्च॥ * ॥ पुराणान्नगुणाः। विरसत्वं। रूक्षत्वं। पथ्यत्वं। अग्निकारित्वञ्च॥ * ॥ उष्णान्नगुणाः। प्रशंसनीयत्वं। हृद्यत्वं। अग्निकारित्वं। वायुश्लेष्मनाशित्वं। रक्तपित्तप्रकोपकारित्वञ्च॥ * ॥ अत्युष्णान्नगुणाः। बलनाशित्वं॥ * ॥ शीतशुष्कान्नयोर्गुणाः। दुर्ज्जरत्वं॥ * ॥ अतिस्निग्धान्नगुणाः। ग्लानिकारित्वं॥ * ॥ तण्डुलान्वितान्नगुणाः। दुर्जरत्वं॥ * ॥ जलधौतसद्योऽन्नगुणाः। शीघ्रपाकित्वं। हिमत्वं। लघुत्वञ्च॥ * ॥ रात्रिस्थितजलयुक्तान्नगुणौ। त्रिदोषकोपकारित्वं। रूक्षत्वञ्च॥ * ॥ भृष्टतण्डुलान्नगुणौ। लघुत्वं। अग्निप्रदीपनत्वञ्च। इति राजवल्लभः॥ * ॥ धान्यं। इति राजनिर्घण्टः॥ विष्णुः। इति तस्य सहस्रनाममध्ये पठितं॥ अदनीयद्रव्यमात्रं॥ अन्नसाधनं यथा,—
"सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्। तद्भक्तं प्रहृतं श्रेष्ठं विधिवं गुणवन्मतं"॥
तद्गुणाः।
"भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु। अधौतमसुतं स्फीतं गुर्व्वशुचं कफप्रदं"॥
इति भावप्रकाशः॥ * ॥ तद्दानफलं यथा,—
"वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः"॥
अन्नस्य प्रजापतिर्देवता। अक्षयसुखप्राप्तिः फलं। प्रतियहे मुह्यिद्दयं। इति शुद्धितत्त्वं। अपि च,
"ब्रह्महत्याकृतं पापं अन्नदानात् प्रणश्यति। अन्नदः पापकर्म्मापि पूतः स्वर्गे महीयते"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ अथ प्रजापतिदैवताऽन्नदानावर्त्तः। तत्र अन्नदानस्तुतिः। ब्रह्मपुराणे।
"अन्ने प्रतिष्ठिता लोका अन्नमाश्चयं परं। तस्मादन्नं प्रशंसन्ति सदैव पितृमानवाः॥
अन्नस्य हि प्रदानेन नरो याति परां गतिं। सर्व्वकामसमायुक्तः प्रेत्य चेहाधिकं सुखं"॥
तथा,—
"अन्नमूर्ज्जस्वलं लोके दत्त्वोर्ज्जस्वी भवेन्नरः। सतां पन्थानमाश्रित्य सर्व्वपापैः प्रमुच्यते"॥
महाभारते।
"अन्नदः पशुमान् पुत्री धनवान् भोगवानपि। प्राणवांश्चापि भवति रूपवांश्च तथा नृप"॥
तथा,—
"अन्नदस्य मनुष्यस्य बलमोजो यशांसि च। कीर्त्तिश्च वर्द्धते श्रद्धास्त्रिषु लोकेषु पार्थिव"॥
आग्नेयपुराणे। अन्नस्तुत्यनन्तरं।
"तस्मादन्नं सदा देहि श्रद्धया नृपसत्तम।

ब्रह्महत्यादिकं पापं अन्नदस्य प्रणश्यति" ॥
तथा,—
"अन्नदानात् परं दानं न भूतं न भविष्यति ।
पुण्यं यशस्यमायुष्यं बलपुष्टिविवर्द्धनं ॥
सर्व्वमन्नस्य दानेन भवतीति विनिश्चयः ।
महाकाञ्चनचित्राणि सेवितान्यप्सरोगणैः ॥
अन्नदस्योपतिष्ठन्ति विमानानि सुरालये ।
भक्ष्यभोज्यमयाः शैला दिव्यरूपाश्चलद्भृताः ॥
दृश्यपुरुजना नित्यमुपतिष्ठन्ति चाग्रतः ।
हस्त्यश्वरथयानैश्च क्रीड़मानाश्च ते नराः" ॥
पद्मपुराणे ।
"आपर्व्वतनदी वापी पृथिवी सर्व्वकामदा ।
विधिना तेन सा दत्ता योऽन्नं ददाति सर्व्वदा ।
क्षुधिते यः प्रयच्छेत अन्नं श्रद्धासमन्वितः ।
ब्रह्मणो भवने स वै ब्रह्मणा सह मोदते ॥
चान्द्रवारुणलोकाश्च याम्याः कौबेरकास्तथा ।
गोलोको ब्रह्मलोकश्च सर्व्वे चान्ने प्रतिष्ठिताः ॥
ददत् कन्यामलङ्कृत्य हस्त्यश्वञ्च महाधनं ।
अन्नदानस्य चैतानि कलां नार्हन्ति षोड़शीं" ॥
विष्णुधर्म्मोत्तरे ।
"यावतो ग्रसते ग्रासान् विद्वान् विप्रः सुसंस्कृतः ।
अन्नप्रदस्य तावन्तः क्रतवः परिकीर्त्तिताः" ॥ * ॥
अथान्नदानधर्म्माः । यमः ।
"आदरेण च भक्त्या च यदन्नमुपदीयते ।
तत् प्रीणयति पात्राणि मात्सर्यं मानवर्জ्जितं ॥
दुर्लभन्तु मुदा दाता मुदा भोक्ता च दुर्लभः ।
मुदा दाता च भोक्ता च तावुभौ स्वर्गगामिनौ ॥
योऽन्नं बहुमतं भुङ्क्ते यच्चान्नं नावमन्यते ।
यच्चान्नं प्रीतितो दद्यात् तस्यान्नमुपतिष्ठते ॥
प्रीतितोऽन्नञ्च यो दद्यात् स्वकीयात् योऽभिपूज्य च ।
प्रीतितोऽक्षयमश्नाति पूजितः स्वर्गमश्नुते ॥
यो दद्यादप्रियेणान्नं यच्चान्नं नाभिनन्दति ।
तावुभौ नरके मग्नौ वसेतां शरदां शतं" ॥ * ॥
अथान्नदानविशेषफलविशेषपरिभाषा ।
कूर्म्मपुराणे ।
"गृहस्थायान्नदानेन फलं नाप्नोति मानवः ।
आममेवास्य दातव्यं दत्त्वाप्नोति परां गतिं" ॥
अन्नदानेन पक्वान्नदानेन फलं नाप्नोति ।
इति गृहस्थायान्नदानेन यादृशं फलं तादृशं पक्वान्नदानेन नाप्नोतीत्यर्थः । गृहस्थस्यान्नदाने सति तस्य पक्वयज्ञनिष्पत्तेः ॥ * ॥

अथ सामान्यान्नदानं नन्दिपुराणे ।
"अन्नाद्भुतानि जातानि देवा ह्यन्नाद्यकाङ्क्षिणः ।
न तस्य पात्रादिविधिर्व्विना श्राद्धं प्रकीर्त्तितः" ॥
तथा,—
"अपि कीटपतङ्गानां शुनां चाण्डालयोनिनां ।
दत्त्वान्नं लोकमाप्नोति प्राजापत्यं समासतः ॥
बान्धवेभ्योऽतिथिभ्योऽन्नं पुत्रेभ्योऽन्नं प्रयच्छतः ।
दीनान्धकृपणानाञ्च स्वर्गः स्यादन्नदायिनां ॥
ग्रासमात्रं वरो दत्त्वा अन्नानामन्नमश्नुते ।
स्वर्गे वसेत् समानान्तु शतं भोगैर्म्मनोरमैः ॥
ग्रासे ग्रासे फलं ह्येतदधिवत् परिकीर्त्तितं ।
एतदेवायने प्रोक्तं द्विगुणं पुण्यगौरवं ॥
अन्नं विना क्षुधार्त्तस्य दत्त्वान्नं देशकालतः ।
फलं षड्गुणं प्रोक्तं सर्व्वभावसमन्वित" ॥
सर्व्वभावसमन्वित इति सम्बोधनं । अत्र यजमानः प्राणिमात्रेभ्यो गृहीतोदपूर्णताम्रपात्रः उदङ्मुखः सङ्कल्प्य यथेष्टकालावधि अन्नं दद्यात् । तद्यथा । ॐ नन्दिपुराणोक्तप्राणिमात्रान्नदानफलप्राप्तिकामोऽहं प्राणिभ्योऽन्नं दास्ये । तदवधि यथासम्भवं प्राणिमात्रेभ्यः स्वगृहे अन्यत्र वा भक्तशालां कृत्वा अविच्छिन्नमन्नं देयं । अतएव धार्म्मिकास्ताम्रपट्टविलिखितां भूमिं समुपकल्प्य आचन्द्रार्कस्थायिनीं भक्तशालां ददाति ॥ * ॥
वायुपुराणे ।
"क्षिप्रमन्नमक्लिष्टं दद्यादन्नं बुभुक्षिते ।
सव्यञ्जनं सदा स्निग्धं भक्ष्यं सत्कृत्य यत्नतः" ॥
क्षिप्रमतिथिप्राप्त्यनन्तरमेव । अक्लिष्टमनुपहतं । भक्ष्यमप्रतिषिद्धं ।
"तरुणादित्यसङ्काशं विमानं हंसवाहनं ।
अन्नदो लभते नित्यः कल्पकोटीस्तथैव च ॥
अन्नदानात् परं दानं न भूतं न भविष्यति ।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः ॥
जीवदानात् परं दानं न किञ्चिदपि विद्यते ।
अन्नाज्जीवति चैलोक्यं चैलोक्यस्येह तत्फलं" ॥
बुभुक्षितेभ्योऽन्नं पूर्ब्बवत् संकल्प्य दद्यात् ।
ॐ वायुपुराणोक्तान्नदानफलप्राप्तिकामोऽहं बुभुक्षितेभ्यः सव्यञ्जनं स्निग्धमन्नं दास्ये । एवं सङ्कल्प्य बुभुक्षितानन्विष्य तेभ्यो यथोक्तमन्नं दद्यात् ॥ * ॥
महाभारते ।
"आन्ताय क्षुधितायान्नं यः प्रयच्छति भूमिप ।
स्वायम्भुवं महत् स्थानं स गच्छति नराधिप" ॥
आन्ताय क्षुधितायान्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ स्वायम्भुवस्थानप्राप्तिकामोऽहं आन्ताय क्षुधितायान्नं दास्ये । इति सङ्कल्प्य यथाकाले आन्तं क्षुधितमनुसन्धायान्नं तस्मै दद्यात् ॥ * ॥ तथा,—
"सङ्घो ददाति यच्चान्नं सदैकायमना नरः ।
न स दुर्गाण्यवाप्नोति ह्येवमाह पराशरः" ॥
अभीष्टसमये सद्ब्राह्मणक्षत्रियवैश्यशूद्रेभ्योऽन्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ महाभारतोक्तसङ्घोचरान्नदानफलप्राप्तिकामोऽहं सङ्घेभ्योऽन्नं दास्ये । ततः प्रभृति अभिमतकाले सङ्घो ब्राह्मणादिभ्योऽन्नं दद्यात् ॥ * ॥ तथा,—
"यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्त्तते ।
श्रान्तायादृष्टपूर्ब्बाय तस्य पुण्यफलं महत्" ॥
अपरिक्लिष्टमनुपहतं । यथोक्तप्राणिनेऽन्नं पूर्ब्बवत् सङ्कल्पयेत् । ॐ महापुण्यफलप्राप्तिकामोऽहं श्रान्तायाध्वगाय अदृष्टपूर्ब्बायान्नं दास्ये । इति सङ्कल्प्य यथाकालमध्वगमन्विष्य यथोक्तमन्नं तस्मै दद्यात् । अध्वनि वर्त्तते इति शब्दनिर्द्देशात् पथि गच्छते पथिकाय वर्त्मनि कुटीं कृत्वा तरुतले वान्नं दद्यात् ॥ * ॥ विष्णुधर्म्मोत्तरे ।
"सक्तून् मानवो दत्त्वा सक्तूनार्द्रेण काङ्क्षितं ।
अक्षयं फलमाप्नोति स्वर्गलोकञ्च गच्छति" ॥
सक्तून् संस्कृतं । सव्यञ्जनमन्नं पूर्ब्बवत् सङ्कल्प्य तदर्थिभ्यो दद्यात् । विष्णुधर्म्मोत्तरोक्तसक्तून्नाकाङ्क्षिगोचरसक्तून्नदानफलप्राप्तिकामोऽहं यथाशक्ति सक्तूनार्थिभ्यो सक्तूनं दास्ये । इति सङ्कल्प्य सक्तूनार्थिनोऽनुसन्धाय तेभ्यो यथाशक्ति सक्तून् दद्यात् ॥ * ॥ तथान्नदानप्रकरणे ।
"सहस्रपरिवेशस्तु नरकान्तु न गच्छति ।
विमानेनार्कवर्णेन स्वर्गलोके महीयते" ॥
सहस्रपरिवेशः सहस्राय मनुष्येभ्योऽन्नप्रदः ॥ यथासम्भवं सहस्राय मनुष्येभ्यो नित्यमन्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ विष्णुधर्म्मोत्तरोक्तसहस्रपरिवेशनफलप्राप्तिकामोऽहं यथासम्भवं सहस्राय मनुष्येभ्यो व्यञ्जनादिसहितमन्नं दास्ये । इति सङ्कल्प्य यथाशक्ति नानादिनैः सहस्रं मनुष्यान् भोजयेत् । देवलः ।
"कृत्वापि पातकं कर्म्म यो दद्यादन्नमीप्सितं ।
ब्राह्मणानां विशेषेण स निहन्यात्मनस्तमः" ॥
विशेषेण इत्यभिधानात् अब्राह्मणेऽपि फलमेतद्भवत्येव । एवञ्च सामान्येनान्नदानमिदं । ईप्सितमित्यर्थिनं दृष्ट्वा यथायथमभिमतमन्नमुत्पाद्य तेभ्यःपूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ ब्राह्मणप्रमुखनानावर्णेभ्य आत्मीयतमःक्षयकामोऽहं यथासम्भवं ईप्सितमन्नं दास्ये । ततः प्रभृति यथायथमुपस्थितेभ्य ईप्सितमन्नं दद्यात् । इत्यादि वल्लालसेनकृतदानसागरे अन्नदानावर्त्तः ॥

अन्नः, पुं, (अनित्यनेन अन + नन्, अद्यते इति अद् + क्तः वा ।) सूर्य्यः । इति सिद्धान्तकौमुदी ॥
अन्नः, त्रि, (अनित्यनेन अन + नन् ।) भुक्तः । खादितः । इति मेदिनी ॥
अन्नकोष्ठकः, पुं, (कोष्ठमिव, कोष्ठ + कन् अन्नस्य तण्डुलादेः कोष्ठकः रक्षणस्थानं ।) तण्डुलादिरक्षणस्थानं । इति हेमचन्द्रः ॥ गोला करइ इत्यादि भाषा ।
अन्नगन्धिः, पुं, (अन्नस्येव अपक्वतया गन्धोयस्य सः । उपमानाच्च इति णिनिसूत्रेण इच् समासान्तः ।) उदरामयरोगः । इति चिकित्साशेषः ॥
अन्नपूर्णा, स्त्री, (अन्नं पूर्णं यस्याः सा राजदन्तादित्वात् परनिपातः ।) खनामख्यातदेवीविशेषः । तन्मन्त्रादि यथा,—
"माया हृद्भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ठयुगलं मनुः सप्तदशाक्षरः" ॥
कल्पे च ।
"प्रणवाद्या यदा देवी तदा सप्तदशाक्षरी ।
अन्नप्रदा मोक्षदा च सदा विभवदायिनी ॥
मायाद्या च यदा देवी तदा सा सकलेष्टदा ।
श्रीबीजाद्या यदा देवी तदा सुखविवर्द्धिनी ॥
वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी ।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी ॥
तारमायादिका विद्या भोगमोक्षैकदायिनी ।
माया श्रीयुग्मबीजाद्या सदा विभवदायिनी ॥

श्रीमाया युग्मबीजाद्या सर्व्वसम्पत्तिपूरणी"॥ * ॥
एवं पूजा प्रातःस्नात्यादिपीठन्यासान्तं विधाय हृत्पद्मस्थ केशरेषु मध्येषु च भुवनेश्वरीपीठमन्त्रान्तं पीठशक्तीर्न्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ब्रह्मणे ऋषये नमः। मुखे पङ्क्तिश्छन्दसे नमः। हृदि अन्नपूर्णायै देवतायै नमः। तत्रैव।
"एतेषां मन्त्रराजीनां ऋषिर्ब्रह्मा उदाहृतः।
पङ्क्तिः छन्दः समाख्यातं देवता चान्नपूर्णिका"॥
ततः कराङ्गन्यासौ। क्रीं अङ्गुष्ठाभ्यां नमः। क्रीं हृदयाय नमः। इत्यादि सर्व्वत्र मायाबीजेन कुर्य्यात्। तथा च निबन्धे।
अङ्गानि मायया कुर्य्यात् ततो देवीं विचिन्तयेत्। कल्पे च।
"यद्यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना"॥१॥
ततो ध्यानं।
"रक्तां विचित्रवसनां नवचन्द्रचूड़ा-
मन्नप्रदाननिरतां स्तनभारनम्रां।
न्यस्तन्मिन्दुसकलाभरणं विलोक्य
हृष्टां भजे भगवतीं भवदुःखहन्त्रीं"॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः सामान्योक्तपीठपूजां विधाय भुवनेश्वरीमन्त्रोक्तजयादिपीठमन्त्रान्तां पीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत। यथा केशरेष्वग्निकोणे क्रीं हृदयाय नमः। नैर्ऋते क्रीं शिरसे स्वाहा। वायव्ये क्रीं शिखायै वषट्। ऐशान्यां क्रीं कवचाय हुं। मध्ये नेत्रत्रयाय वौषट्। चतुर्दिक्षु क्रीं अस्त्राय फट्। अष्टदलेषु पूर्व्वादिषु ब्राह्म्यै माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै प्रणवादिनमोऽन्तेन पूजयेत्। तत्रैव।
"दलेषु पूजयेदेता ब्राह्म्याद्याः क्रमशः सुधीः"।
भूपुरस्य प्रणवश्चतुर्द्वारेषु विन्दुयुक्तः॥ कालिकापुराणे मन्त्रस्य सेतुकरणे उक्तत्वात्। तत इन्द्रादीन् वज्रादींश्च पूजयित्वा धूपादि विसर्জ্জनान्तं कर्म्म समापयेत्॥ * ॥ अस्य पुरश्चरणजपः षोड়शसहस्रसङ্খ্যः। तथा च।
"यथाविधि जपेन्मन्त्रं वसुयुग्मसहस्रकं।
साज्येनान्नेन शुद्धयात्तद्दशांशमनन्तरं"॥
अयं मन्त्रः प्रणवादिरुदाद्यात्तरः। मायादिः श्रीबीजादिश्च। तथा मायां विना प्रणवादिः कामादिः श्रीबीजादिः वाग्भवादिश्च सप्तदशाक्षरः। कवचे तथा प्रतिपादनात्। विशेषस्तु यद्यद्बीजादिको मन्त्रस्तेनैवाङ्गप्रकल्पना॥ * ॥

अथान्नपूर्णास्तोत्रं।

"नमः कल्याणदे देवि नमः शङ्करवल्लभे।
नमो भक्तप्रिये देवि अन्नपूर्णे नमोऽस्तु ते॥
नमो मायाग्रहीताङ्गि नमः शङ्करवल्लभे।
माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते॥
महामाये शिवधर्म्मपत्नीरूपे हरप्रिये।
वाञ्छादात्रि सुरेशानि अन्नपूर्णे नमोऽस्तु ते॥

उद्यद्भानुसहस्राभे नयनत्रयभूषिते।
चन्द्रचूड़े महादेवि अन्नपूर्णे नमोऽस्तु ते॥
विचित्रवसने देवि अन्नदानरतेऽनघे।
शिवनृत्यद्धतामोदे अन्नपूर्णे नमोऽस्तु ते॥
साधकाभीष्टदे देवि भवदुःखविनाशिनि।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते॥
षट्कोणपद्ममध्यस्थे षड়ङ्गयवतीमये।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते॥
देवि चन्द्रकृतापीड़े सर्व्वसाम्राज्यदायिनि।
सर्व्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते॥
इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि।
सर्व्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरं।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन।
प्रकाशात् कार्य्यहानिः स्यात्तस्माद्यत्नेन गोपयेत्"॥
इत्यन्नपूर्णास्तोत्रं समाप्तं॥ * ॥

अथ अन्नपूर्णाकवचं॥

"कथिताद्यान्नपूर्णाया या या विद्याः सुदुर्ल्लभाः।
त्वया कथिताः सर्व्वा श्रुताश्चाधिगता मया॥
साम्प्रतं श्रोतुमिच्छामि कवचं यत् पुरोदितं।
त्रैलोक्यरक्षणं नाम कवचं मन्त्रविग्रहं"॥

ईश्वर उवाच।

"शृणु पार्व्वति वक्ष्यामि सावधानावधारय।
त्रैलोक्यरक्षणं नाम कवचं ब्रह्मरूपकं॥
ब्रह्मविद्यास्वरूपञ्च महदैश्वर्य्यदायकं।
पाठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य्यभाग्भवेत्॥
त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः।
छन्दो विराडन्नपूर्णा देवता सर्व्वसिद्धिदा॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
क्रों नमो भगवत्यन्ते माहेश्वरिपदं ततः।
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी॥
पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये।
विभाया प्रणवाद्यैषा तथा सप्तदशाक्षरी॥
पातवन्नपूर्णा सर्व्वाङ्गं रत्नकुम्भान्नपात्रदा।
श्रीबीजाद्या तथा चैषा विरन्ध्रार्णा तथा मुखं॥
प्रणवाद्या भ्रुवौ पातु कण्ठं वाग्बीजपूर्व्विका।
कामबीजादिका चैषा हृदयन्तु महेश्वरी॥
तारं श्रीं क्रीं नमोऽन्ते च भगवति पदं ततः।
माहेश्वरि पदं चान्नपूर्णे स्वाहेति पातु मे॥
नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा।
तारं माया रमा कामः षोड়শार्णास्ततःपरं॥
शिरःस्था सर्व्वदा पातु विंशत्यर्णात्मिका च या।
करौ पादौ सदा पातु रमा कामोध्रुवस्तथा॥
ध्वजश्च सर्व्वदा पातु विंशत्यर्णात्मिका च या।
अन्नपूर्णा महाविद्या क्रीं पातु भुवनेश्वरी॥
शिरः श्रीं क्रीं तथा स्त्रीञ्च त्रिपुटा पातु मे गुदं।
षड়्दीर्घभाजा बीजेन षड়ङ्गानि पुनन्तु मां॥
इन्द्रो मां पातु पूर्व्वे च वह्निकोणेऽवतु।
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च मां।

पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु।
कुबेरश्चोत्तरे पातु मामैशान्यां शिवोऽवतु॥
ऊर्द्धाधः सततं पातु ब्रह्मानन्तो यथाक्रमात्।
वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमात्॥
इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं।
यद्धृत्वा पठनाद्देवाः सर्व्वैश्वर्य्यमवाप्नुयुः॥
ब्रह्मा विष्णुश्च रुद्रश्च कवचं धारणादृषयः।
स्रष्टृत्वादि हन्त्वेव कल्पे कल्पे पृथक् पृथक्॥
पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव पठेत्ततः।
युगायुतकृतायास्तु पूजायाः फलमाप्नुयात्॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे।
वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः॥
अष्टोत्तरशतं चास्य पुरश्चर्य्याविधिः स्मृतः।
भूर्ज्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि॥
कण्ठे वा दक्षिणे बाहौ सोऽपि सर्व्वतपोमयः।
ब्रह्मास्त्रादीनि शस्त्राणि तद्वात्रं प्राप्य पार्व्वति।
माल्यानि कुसुमान्येव भवन्त्येव न संशयः"॥
इति भैरवतन्त्रे भैरवभैरवीसंवादे अन्नपूर्णाकवचं समाप्तं। इति तन्त्रसारः॥ * ॥ तस्याः स्तुत्यन्तरं यथा। ॐ नमोऽन्नपूर्णायै।
"ॐ नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥१॥
नानारत्नविचित्रभूषणकरी हेमाम्बराड়म्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी।
काश्मीरागुरुवासिताङ्गरुचिरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥२॥
योगानन्दकरी रिपुक्षयकरी धर्म्मैकनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी।
सर्व्वैश्वर्य्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥३॥
कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ॐकारबीजाक्षरी।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥४॥
दृश्यादृश्यविभूतिभावनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी।
विश्वाधीशमनःप्रमोदनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥५॥
गुर्व्वी सर्व्वजनेश्वरी जयकरी मातान्नपूर्णेश्वरी
नारीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी।
सर्व्वानन्दकरी सदा शिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥६॥
आदिक्षान्तसमस्तवर्णनकरी चन्द्रप्रभा भास्करी
काश्मीरा त्रिपुरेश्वरी त्रिलहरी नित्याङ्कुरी निर्ज्जरी।
कामाकाङ्क्षकरी महोत्सवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥७॥
चन्द्रार्कानलकोटिपूर्णवदना बालार्कवर्णेश्वरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कविम्बाधरी।
मालापुस्तकपाशाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥८॥

दर्व्योपाकसुवर्णरत्नघटिका दत्ते करे संस्थिता
वामे चारुपयोधरी रसभरी सौभाग्यमाहेश्वरी।
भक्ताभीष्टकरी फलप्रदकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥९॥
सर्व्वत्राणकरी महाभयहरी माता कृपासागरी
ज्ञानानन्दकरी निरामयकरी विश्वेश्वरी श्रीधरी।
साक्षान्मोक्षकरी सदाशिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१०॥
अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि नमोऽस्तु ते ॥११॥
इति श्रीशङ्कराचार्य्यविरचितमन्नपूर्णास्तोत्रं समाप्तं ॥ क्वचित् पुस्तके शङ्कराचार्य्यस्थाने वेदव्यास इति पाठः ॥

अन्नप्राशनं, क्ली, (अन्नस्य प्राशनं भोजनं यस्मिन् तत्। अन्न + प्र + अश + भावे ल्युट्।) षष्ठे मासि अष्टमे वा बालकस्य पञ्चमे मासि सप्तमे वा बालिकायाः प्रथमान्नभक्षणरूपसंस्कारः। इति स्मृतिः ॥ तस्य क्रमः। शोभनदिने कृतस्नानः कृतवृद्धिश्राद्धः पिता शुचिनामागमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। ततः आज्येन तत्तन्मन्त्रैः पञ्चाहुतीर्जुहुयात्। ततः पञ्चप्राणानां होमः। ततो महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं श्राद्धीयनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्त्य मन्त्रेण कुमारस्य मुखे अन्नं दद्यात्। ततः कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात्। इति भवदेवभट्टः ॥ तस्य विहितदिनादि यथा,—
"ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि।
अष्टमे वाथ कर्त्तव्यं यदेष्टं मङ्गलं कुले" ॥
षष्ठ इति मुख्यः कल्पः प्रागुक्तन्यायात्। कृत्यचिन्तामणौ।
"अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजनौ मुनिः ॥
द्वादशीसप्तमीनन्दारिक्तासु षष्टपर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभक्षणं" ॥
भुजबलभीमे।
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च शुक्लेतरे।
प्राजेशादिति पौष्णवैष्णवयुगैर्ईशादिषट्कोत्तरै-
राग्नेयाग्नितिपित्र्यभैश्च नितरामन्नादिभक्तं शुभं" ॥
युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते। तथाचापि तिथ्यादिविरुद्धमप्यत्र विवर्জ্জयेत्।
"कृष्णद्वन्द्वधनुर्म्मीनकन्यालग्नेऽन्नभक्षणं।
त्रिकोणाष्टकयुकान्त्यद्या यदृक्षद्यामलं ॥
दुष्टः शुक्रधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे" ॥
मार्कण्डेयः।
"देवता पुरतस्तस्य पितुरङ्कगतस्य च।
अलङ्कृतस्य दातव्यमन्नं प्राप्ते च काञ्चने ॥
मध्याह्नकनकोपेतं प्राश्नीयात् पायसं ततः।
क्षुत्प्राश्नमुत्सङ्गे मातुर्बालन्तु तं न्यसेत् ॥
देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणं ॥
प्रथमं यत् स्पृशेद्बालः शिल्पभाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति" ॥
इति ज्योतिस्तत्त्वं ॥

अन्नमयकोषः, पुं, (अन्नस्य विकारः अन्न + विकारार्थे मयट्। "आनन्दमयोऽभ्यासादिति" शारीरकसूत्रे भाष्यकारेणोक्तम्।) स्थूलशरीरं। इति वेदान्तसारः ॥

अन्नमलं, क्ली, (अन्नस्य मलं षष्ठीतत्पुरुषः।) मद्यं। यथा,—
"सुरा वै मलमन्नानां पुरीषं मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्" ॥
इति प्रायश्चित्तविवेकः ॥

अन्नविकारः, पुं, (अन्नस्य विकारः षष्ठीतत्पुरुषः।) शुक्रं। इति राजनिर्घण्टः ॥ (अन्नकृतशोणितमांसादिपरिणामजन्यरसधातुः। रेतः।)

अन्नादः, पुं, (अन्नमत्ति भुङ्क्ते अन्न + अद् + अण्।) विष्णुरन्नमन्नखादकश्च जगदभिन्नतया, तथाहि श्रुतौ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेय इत्यादि शङ्करभाष्ये। "यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च"।)
विष्णुः। इति तस्य सहस्रनाममध्ये पठितः ॥ अन्नभोक्तरि त्रि। (परान्नभोजनकारी।)

अन्यः, त्रि, (अन् + बाहुल्यात् यः।) असदृशः। इति मेदिनी ॥ परः।
("चातकतापहरणो जलधरभिन्नो भवे भवेत्सोऽन्यः"। इति नीतिमाला।
"सोऽयमन्येन वेगादुद्दामेन
हिरदंपतिना सन्निपत्याभियुक्तः"।
इति उत्तरचरिते।) तत्पर्य्यायः। भिन्नः। २ अन्यतरः। ३ एकः। ४ त्वः। ५ इतरः ६। इत्यमरः ॥ विलक्षणः। ७। इति जटाधरः ॥ एकतरः ८। नोमः ९। इति शब्दरत्नावली ॥

अन्यत्, अ, (अन् + बाहुल्यात् यत्।) इतरं। भिन्नं। यथा देवदत्त आयातोऽन्यद्यज्ञदत्तः।
"अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यं महीयते"।
इत्यादौ तु क्लीवलिङ्गप्रथमैकवचनान्तान्यशब्दस्वीकारेणाप्युपपत्तिरिति बोध्यं।

अन्यतः, [स्] अ, (अन्य + "सर्व्वविभक्तिभ्यस्तसिलिति" तसिल्।) अन्यच्च। अन्यस्मात्। यथा—
"एकतो हि धिगमूमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः"। इति नैषधं ॥

अन्यतमः, त्रि, (अन्य + अतमच्।) भिन्नतमः। बहूनां मध्ये निर्द्धारितैकः। इति व्याकरणं ॥ अनेकेर मध्ये एक इति भाषा।
("एषामन्यतमे स्थाने यः साध्यमनृतं वदेत्।
आसां महर्षिचर्य्याणां त्यक्तान्यतमया तनुम्" ॥
इति मनुः।) न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदः ॥

अन्यतरः, त्रि, (अन्य + अतरच्।) अन्यः। इत्यमरः ॥ भिन्नतरः। द्वयोर्मध्ये निर्द्धारितैकः। इति व्याकरणं ॥ दुयेर मध्ये एक इति भाषा।
("अधर्म्मेण च यः प्राह यश्चाधर्म्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति" ॥
इति मनुः।) न्यायमते द्वयावच्छिन्नप्रतियोगिताकभेदः ॥

अन्यतरेद्युः, [स्] अ, (अन्यतरस्मिन् दिवसे निपातनात् द्यादेशः।) अन्यतरदिने। दिनद्वययोरेकतरदिने। इत्यमरः ॥

अन्यत्र, अ, (अन्यस्मिन् + अन्य + त्रल्।) वर्জ্জनं। विना। यथा,—
"अन्यत्र निधनात् पत्युः पत्नी केशान्न वापयेद्"।
इति प्राचीनाः। पत्युर्निधनादन्यत्र पतिमरणं विनेत्यर्थः। स्थानान्तरं। यथा।
"अन्यत्र यूयं कुसुमावचायं
कुरुध्वमस्मिन् करोमि सख्यः"।
इति काव्यप्रकाशः। (कार्य्यान्तरे। क्रियान्तरे।
"मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः" ॥
इति मनुः।
विषयान्तरे। शास्त्रान्तरे।
"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥
इति मनुः।)

अन्यथा, अ, (अन्येन प्रकारेण अन्य + प्रकारार्थे थाल्।) परार्थः। मिथ्या। इति मेदिनी ॥ दुष्टं। इति शब्दरत्नावली ॥ अन्यप्रकारं। इति व्याकरणं ॥
("स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा"।
इति पञ्चतन्त्रं। अन्यायेन। शास्त्रविरोधेन। अयथायथम्।
"अमात्याः प्राड्विवाको वा यत्कुर्य्युः कार्य्यमन्यथा।
तत् स्वयं नृपतिः कुर्य्यात् तान् सहस्रञ्च दण्डयेत्" ॥
इति मनुः।)

अन्यथासिद्धिः, स्त्री, (अन्यथा अन्यप्रकारेण सिद्धिः।) कार्य्याव्यवहितपूर्ब्ववर्त्तित्वे सति कार्य्यानुत्पादकत्वं। सा पञ्चविधा। यथा। यत्कार्य्यं प्रति कारणस्य पूर्ब्ववर्त्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धं। यथा घटं प्रति दण्डत्वं ॥ १ ॥ यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः किन्तु कारणमादायान्वयव्यतिरेकौ तदन्यथासिद्धं। यथा घटं प्रति दण्डरूपं ॥ २ ॥ अन्यं प्रति पूर्ब्ववर्त्तितां गृह्णीत्वेव यस्य यत्कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं। यथा घटादिकं प्रति आकाशस्य ॥ ३ ॥ यत्कार्य्यजनकं प्रति पूर्ब्ववर्त्तित्वं गृह्णीत्वेव यस्य यत्कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं। यथा कुलालपितुर्घटं प्रति ॥ ४ ॥ अवश्यसृष्टनियतपूर्ब्ववर्त्तिनश्च कारणत्वसम्भवे तद्भिन्नमन्यथासिद्धं। यथा घटं प्रति रासभादिः ॥ ५ ॥ इति सिद्धान्तमुक्तावली ॥

अन्यदा, व्य, (अन्यस्मिन् काले अन्य + दा ।) कालान्तरे । अन्यसमये । यथा,—
"अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैजात्यं सुरतेष्विव" ॥
इति माघः ॥

अन्यपुष्टः, पुं, (अन्यया स्वमाढभिन्नया पुष्टः ।) कोकिलः । यथा,—
"अप्यन्यपुष्टाः प्रतिकूलशब्दाः
श्रोतुर्व्वितन्वोरिव ताडयमानाः" ।
इति कुमारसम्भवे ॥

अन्यपूर्ब्बा, स्त्री, (अन्यः पूर्ब्बो यस्याः सा ।) पौनर्भवा कन्या । एकस्मै वागादिना दत्ता पुनरन्येन विवाहिता कन्या । सा सप्तधा यथा,—
"सप्त पौनर्भवाः कन्या वर्জ्जनीयाः कुलाधमाः" ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिग्रहीतिका ।
अग्निं परिगता या तु पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" ।
इत्युद्वाहतत्त्वं ॥

अन्यभृत्, पुं, (अन्यान् कोकिलान् बिभर्त्ति पालयति अन्य + भृ + क्विप् ।) काकः । इति हेमचन्द्रः ॥ (कोकिलः ।)

अन्यभृतः, पुं, (अन्यया स्वमाढभिन्नया भृतः पालितः ढतीयातत्पुरुषः ।) कोकिलः । इति हलायुधः ॥
("कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतं" । इति रघुः ।)

अन्यमनस्कः, त्रि, भिन्नचित्तः । अन्यमनाः । अन्यस्मिन् मनो यस्य स इति बहुव्रीहौ कप्रत्ययेन सिद्धः ॥ (विषयान्तरासक्तचित्ततया उपस्थितकार्य्येऽनवहितहृदयः । अस्थिरः । चञ्चलचित्तः ।)

अन्यवर्द्धितः, त्रि, (अन्यया योषिता वर्द्धितः पुष्टः ।) अन्यपुष्टः । परैधितः । अन्येन प्रतिपालितः । इति जटाधरः ॥

अन्यवादी, [न्] त्रि, (अन्यत् पूर्ब्बस्वीकृतवाक्यात् भिन्नं वदति, अन्य + वद् + णिनि उपपदसमासः ।) इतरवादी । अस्थिरवादी । अन्यथावादी । यथा,—
"अन्यवादी क्रियादेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्यशाखकः, पुं, (अन्या स्वशाखेतरा शाखा यस्य सः, समासान्तः कः ।) स्ववेदशाखामुत्सृज्यापरशाखाश्रयकर्म्म कुर्व्वाणः । तत्पर्य्यायः । शाखारूढः २ । इति हेमचन्द्रः ॥

अन्यादृक्, [श्] त्रि, (अन्यमिव पश्यति अन्य +, दृश् + क्विन्, उपपदसमासः । "दृक् दृशवतुषु" इति आकारः ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यादृशः, त्रि, (अन्यइव पश्यति अन्य + दृश् + कञ् आत्वञ्च ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यायः, पुं, (न्यायः । सङ्गतिः । युक्तिः । औचित्यं, तत्प्रदन्यः नञ्समासः ।) न्यायभिन्नः । अनौचित्यं । अयुक्तिः । यथा,—
"अन्यायेनापि यद्भुक्तं पित्रा पूर्ब्बतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्पुरुषागतं" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्याय्यः, त्रि, (न्यायादनपेतः, न्याय + अनपेतार्थे यत्, ततो नञ्समासः ।) अनुचितः । अयोग्यः । यथा,—दृष्टार्थसत्त्वे अदृष्टकल्पनाया अन्याय्यत्वादित्यधिकरणमालायां माधवाचार्य्यः ॥ (असङ्गतः । गर्हितः । धर्म्मविरुद्धः । युक्तिविरोधी ।
"न्याय्यं सन्नेच्छते कर्त्तुमन्याय्यं वा करोति यः" ।
इति कात्यायनसंहिता ।)

अन्यूनः, त्रि, (न न्यूनः, नञ्समासः ।) न्यूनतारहितः । सम्पूर्णः । इति जटाधरः ॥

अन्येद्युः, [स्] व्य, (अन्यस्मिन् दिवसे निपातनात् सिद्धम् ।) अन्यस्मिन्नहनि । दिवसान्तरे । अन्यदिने । इत्यमरः ॥
("अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः" ।
इति रघुवंशे ।)

अन्योदर्य्यः, पुं स्त्री, (अन्यस्याः स्वमाढभिन्नविमातुरुदरे जातः अन्योदर + यत् एकपितृकः भिन्नमाढको भ्राता ।) वैमात्रेयः । यथा,—
"अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्" ।
इति याज्ञवल्क्यः ॥ (अन्यमाढजः ।)

अन्योन्यं, त्रि, (अन्य + व्यतिहारार्थे द्वित्वं, ततः पूर्ब्बपदात्यरः सुच् ।) उभयतः । तत्पर्य्यायः । इतरेतरं । २ परस्परं । ३ । इति हेमचन्द्रः ॥
("अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः" इति उत्तरचरिते ।)

अन्योन्याश्रयः, त्रि, (अन्योन्यमाश्रयति, अन्योन्य + आ + श्रि + पचाद्यच् ।) परस्परज्ञानसापेक्षज्ञानाश्रयः । इति स्मार्त्ताः ॥ स्वग्रहसापेक्षग्रहसापेक्षग्रहकः । इति तार्किकाः ॥ तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापेक्षितत्वनिबन्धनप्रसङ्गत्वं । अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा । घटोऽयं यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् तदैतद्घटभिन्नः स्यात् । द्वितीया यथा । घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटजन्यभिन्नः स्यात् । तृतीया यथा । घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत ।इति जगदीशः ॥

अन्वक्, [च्] त्रि, (अनु पश्चात् अञ्चति गच्छति अनु + अञ्च + क्विन्) पश्चाद्गामी । इत्यमरः ॥ (अनु पदं । पश्चात् । "तां देवतापित्रतिथिक्रियार्थामन्वक् ययौ मध्यमलोकपालः" । इति रघुवंशे ।)

अन्वयः, पुं, (अनु + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥
("तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः" । इति रघुवंशे । वंशपरम्परा ।
"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्" ।
इति रघुवंशे ।
"काव्यदेव्यभिधा सूरबधूः शुद्धान्वया" ॥
इति राजतरङ्गिणी । वंशजाताः पुत्रपौत्रादयः ।
"मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" ।
इति नारदः ।
"स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ।
इति मनुः ।) पदानां परस्पराकाङ्क्षा योग्यता च । इति दुर्गादासः ॥ परस्परसम्बन्धः । इति रामतर्कवागीशः ॥

अन्ववायः, पुं, (अनु + अव + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥ ("कथमेकान्ववायोऽयमसञ्जाकं" । इति शाकुन्तले ।)

अन्वष्टका, स्त्री, (अष्टौ परिमाणान्यस्याः, अष्टन् + कन्, इत्वाभावः, अष्टकामनुगता प्रादिसमासः ।) अष्टकापश्चात्तिथिः । सा तु गौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तत्र सामान्यानां माढकश्राद्धं । इति श्राद्धविवेकः ॥ तत्र साग्निकर्त्तव्यमाढपत्रश्राद्धं । यथा शङ्खः ।
"पित्रादित्रिकपत्नीषु भोज्या मातृः प्रतिद्विजाः ।
स्त्रीणामेव तु तच्छस्तमाढश्राद्धमिहोच्यते" ॥
एतच्चान्वष्टकाश्राद्धं साग्निमाचेण कर्त्तव्यं ।
तथा च विष्णुः । अन्वष्टकाकृष्णकावदभौ ऊढ्वा माचे पितामहौ प्रपितामहौ पूर्ब्ववद्ब्राह्मणान् भोजयित्वा इति । अत्र होमलादेवाग्निप्राप्तेरग्रिग्रहणं तन्नियमार्थं । न चाग्नौ करणाहोमे विप्रपाण्यादेर्व्विधानादत्रापि तथेति वाच्यं । प्रकृतीभूतश्राद्धविधुक्तस्याधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात् । शरमयवर्हिषा कुशमयवर्हिर्बाधवत् । न वा लौकिकाग्नौ होमः । "न पैत्र्यग्नियो होमो लौकिकाग्नौ विधीयते" । इति मनुवचनेन निषेधात् । श्राद्धचिन्तामणावप्येवं । इति श्राद्धतत्त्वं ॥

अन्वञ्चः, त्रि, (अनु + अञ्च + पचाद्यच् । अञ्चतिरिन्द्रियमनुगतम्, प्रादिसमासः, प्रत्यक्षे, अनुगते अनुपदे ।) पश्चाद्गामी । इत्यमरः ॥

अन्वाधिः, पुं, (अनु पश्चात् आधीयते न्यस्यते, अनु + आ + धा + कि ।) एकस्मिन् यदर्पितं वस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति निक्षिप्तं तत् । इति विवादार्णवसेतुः ॥ कार्य्येषु वाचनेन अमुष्मिन् पुरुषे त्वं दद्या इति परिभाष्य यत् समर्पितं तत् । इति हलायुधः ॥ यथा,—
"अर्थमार्गणकार्य्येषु अन्यस्मिन् वचनान्मम ।
दद्यास्त्वमिति यो दत्तः स ह्यन्वाधिरुच्यते" ॥
इति कात्यायनः ॥ पुनर्बन्धकः । पश्चान्मानसी व्यथा । अनुपूर्ब्बकस्य आधिशब्दस्य इत्यर्थद्वयमपि सम्भवति ॥

अन्वाधेयं, क्ली, (अनु विवाहानन्तरमाधेयं समर्पणीयं, अनु + आ + धा + कर्म्मणि यत् ।) विवाहानन्तरपितृमाढभर्तृकुललब्धस्त्रीधनं । यथा,—
"विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया ।
अन्वाधेयं तदुक्तन्तु लब्धं बन्धुकुलात्तथा" ॥
इति कात्यायनः,—

अन्वासनं, क्ली, (अनु + आस् + ल्युट्) स्नेहवत्तिः । अनुशोचनं । उपासना । इति विश्वमेदिन्यौ । श्लिष्यादिस्नेहं । इति हलायुधः ॥ (अनुवासनं ॥

पश्चात् तापः ।)
अन्वाहार्य्यं, क्ली, (प्रतिमासमाहरणीयं, अनु + आ + हृ + ण्यत् ।) मासिकश्राद्धं । इत्यमरः ॥ तत्तु प्रत्यमावास्याविहितं पार्व्वणश्राद्धं अक्षतसपिण्डीकरणस्य वत्सरान्ते प्रतिमासं यत् श्राद्धं तदिति केचित् । इति भरतः ॥ गोभिलस्त्वौत्पत्तिकमेकोद्दिष्टमाद्यश्राद्धं । तदनाङ्गदक्षिणा च । यथा,—
"यत् श्राद्धं कर्म्मणामादौ याचान्ते दक्षिणा भवेत् ।
अमावास्यं हितीयं यदन्वाहार्य्यं विदुर्बुधाः" ॥
इति गोभिलस्मृतिः ॥
अन्वाहार्य्यकं क्ली, (प्रतिमासमाहरणीयं, अनु + आ + हृ + ण्यत्, ततः स्वार्थे कन् ।) अन्वाहार्य्यं । यथा,—
"पित्र्यमन्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं" ।
इति मनुः ॥
अन्वाहितं, त्रि, (अनु + आ + धा + कर्म्मणि क्त ।) यदेकस्य हस्ते निहितं द्रव्यं तेनापि पश्चादन्यस्य हस्ते स्वामिने देहीति निहितं तत् । इति मिताक्षरा ॥
("याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः" । इति याज्ञवल्क्यः,—
"एष एव विधिर्दृष्टो याचितान्वाहितादिषु" ॥
इति नारदः ।) गच्छित द्रव्य ताहार स्वामिके दिते अन्यहस्ते अर्पणकरा इति भाषा ॥
अन्वितः, त्रि, (अनु + इण् + क्त ।) युक्तः । मिलितः । इति जटाधरः ॥ ज्ञतान्वयपदादिः । यथा,—
"पदार्थान्तरैरन्विताना सङ्गेतो ग्रह्यते" ।
इति काव्यप्रकाशः ॥
(पदाना योग्यताकाङ्क्षादिरूपान्वयसहितः । परस्परं सम्बद्धः ।
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः" ॥
इति साहित्यदर्पणे ।)
अन्विष्टः, त्रि, (अनु + इष् + क्त ।) अन्वेषितः । ज्ञतान्वेषणः । इत्यमरः ॥ ("यदायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हैः" । इति कुमारसम्भवे ।)
अन्वीतः, त्रि, (अनु + ईङ् गतौ + कर्त्तरि क्तः ।) अन्वितः । युक्तः । इति जटाधरः ॥
अन्वेषणं, क्ली, (अनु + इष् + ल्युट्) अन्वेषणा । अनुसन्धानं । यथा । "सुग्रीवो राममित्रं च जनकतनयान्वेषणे प्रेषितोऽहं" । इति महानाटकम् । ("दोषान्वेषणमेव मत्सरयुजां नैसर्गिको दुर्ग्रहः" । इत्युद्भटः ।)
अन्वेषणा, स्त्री, (अनु + इष् + णिच् + भावे युच् तस्य अनः, ततः टाप् ।) तर्कादिना यथाबोधितधर्म्मान्वेषणं । अन्वेषणमात्रं । तत्पर्य्यायः परीष्टिः २ पर्य्येषणा ३ गवेषणा ४ । इत्यमरः ॥
अन्वेषितः, त्रि, (अनु + इष् + णिच् + कर्मणि क्त ।) ज्ञतान्वेषणः । तत्पर्य्यायः ॥ गवेषितः । २ अन्विष्टः । ३ मार्गितः । ४ मृगितः । ५ इत्यमरः ॥ ६ परीष्टः । ७ पर्य्येषितः । इति अन्वेषणापर्य्याये परीष्टिपर्य्येषणापदद्वयोक्तात् ॥
अन्वेष्टा, (ऋ) त्रि, (अनु + इष् + ट्वच् ।) अन्वेषणकर्त्ता । तत्पर्य्यायः ॥ आनुपदः २ । इति हेमचन्द्रः ॥ ("अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति ग्रतशोमहीं" । इति गलोपाख्यानं ।)
अप, य, (न पाति, न + पा + ड "वादयोऽसत्त्वे" इति निपातसंज्ञया स्वरादिनिपातमव्ययमिति अव्ययम् ।) उपसर्गविशेषः । अस्यार्थः । अनादरः । भंशः । असाकल्यं । वैरूप्यं । त्यागः । नञर्थः । इति दुर्गादासः ॥ अपह्नवार्थः । वर्ज्जनार्थः । वियोगः । विपर्य्ययः । विच्छित्तिः । चौर्य्यं । निर्देशः । हर्षः । इति मेदिनी ॥
अपः, [स्] क्ली, (आप् + असुन्, पृषोदरादित्वात् रुत्वं ।) यज्ञकर्म्म । इत्युणादिकोषः ।
अपकर्म्म, क्ली, (अपह्नवं कर्म्म ।) दुष्क्रिया । मन्दकर्म्म । अपह्नवार्थापोपसर्गेण कर्म्मशब्दस्य कर्म्मधारयसमासः ।
अपकारः, पुं, (अप + कृ + भावे घञ् ।) द्रोहः । अनुपकारः । मन्दकरणं । इति हलायुधः । (अनिष्टसाधनं । असद्व्यवहारः । अत्याचारः । देषः । "उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" ।
इति माघः ।)
अपकारगोः, [र्] स्त्री, (अपकारेण गीः वाक्यं ।) अपकारवाक्यं । भर्त्सनं । इत्यमरः ।
अपकारी, [न्] त्रि, (अपकरोति, अप + कृ + णिनि ।) अपकारकः । द्रोहकः । यथा,—
"अपकारिणि चेत् क्रोधः क्रोधः क्रोधे कथं न ते ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि" ॥
इत्युद्भटः । (अहितकारी । अनिष्टसाधकः । पीड़कः । दुर्वृत्तः । कुकर्म्मकारी ।
"किं भक्षेनासमर्थेन किं ग्रक्षेनापकारिणा" ।
इति पञ्चतन्त्रम् ।)
अपक्षयः, त्रि, (अप + क्षय् + क्तः ।) जघन्यं । तत्पर्य्यायः । अधमं । २ निकृष्टं । ३ अपाकं । ४ गर्ह्यं । ५ अवद्यं । ६ काण्डं । ७ कुत्सितं । ८ प्रतिक्षृष्टं । ९ याप्यं । १० वेषः । ११ अवमं । १२ ब्रुवं । १३ खेटं । १४ पापं । १५ अपशब्दं । १६ कुपूयं । १७ चेलं । १८ अर्व्वयं । १९ । इति हेमचन्द्रः ।
अपक्रमः, पुं, (अप + क्रम + भावे घञ्, "नोदात्तोपदेशे मान्तस्येत्यादिना वृद्धिनिषेधः" ।) पलायनं । इत्यमरः ।
अपक्रिया, स्त्री, (अप् + कृ + भावे श ।) द्रोहः । अपकारः । इति हेमचन्द्रः ॥ (विपरीतप्रयोगः । "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया" । इति माघः ।)
अपक्रोशः, पुं, (अप् + क्रुश् + भावे घञ् ।) निन्दनं । जुगुप्सनं । भर्त्सनं । इति शब्दरत्नावली ।
अपक्वः, त्रि, (न पच्यते, पच् + कर्म्मणि क्तः, ततो नञ्समासः ।) पक्वभिन्नः । काँचा इति भाषा । यथा,—
"तैले विपर्य्ययं विद्यात् पक्वे चापक्व एव च" ।
इति वैद्यकपरिभाषा । तत्पर्य्यायः । २ असिद्धं । ३ आमं । ४ अरुक्षं । इति रत्नमाला ।
("अपक्वे स्रवणं दद्यात् पक्वे दद्यात् मरीचकम्" ॥
इति आमवाक्ये ।)
अपगतः, त्रि, (अप + गम् + कर्त्तरि क्तः, अपयाते पलायिते च ।) मृतः । इति हेमचन्द्रः । गतः । दूरीभूतः । यथा,—"तापोनापगतस्तृषा न च हृता धूली न धौता तनोः" इत्यादि वल्लालसेनः ।
अपगा, स्त्री, (अधोमुखेन गच्छति, अप + गम् + कर्त्तरि डः, स्त्रियां टाप् ।) आपगा । नदी । इत्यमरटीकायां भरतः । (स्रोतस्वती दीपवती स्रवन्ती निम्नगापगा इत्यमरः ।)
अपघनः, पुं, (अपहत्य मिलित्वा वियुज्यते, अप + हन् + "अपघनोऽङ्ग"-मिति पाणिनिसूत्रेण अप् हस्याने घ ।) अवयवः । अङ्गं । इत्यमरः । ("हृणिभिरपघनैर्घनैरव्यक्तघोषान्" । इति सूर्य्यशतके ।)
अपघातः, पुं, अपहननं । अपह्नवार्थापोपसर्गात् हनधातोर्भावे घञ् हस्य घः नस्य तः । अपह्नवमृत्युफलकव्यापारः । अपहन्यते इति व्युत्पत्त्या अपपूर्व्वक हनधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥
अपचयः, पुं, (अप + चि + भावे अच् । अपहरणं ।) क्षतिः । हानिः । तत्पर्य्यायः । अपहारः २ । इत्यमरः ॥ (पूजा सम्माननं । क्षयः । "देहस्यापचयो-मतौ निविशते गाढ़ो गृहेषु ग्रहः" । इति भ्रान्तिशतके ।) [पूजितः । इत्यमरः ।
अपचायितः, त्रि, (अप + चाय + कर्म्मणि क्तः ।)
अपचारः, पुं, (अप + चर् + भावे घञ्, अपथ्यसेवनं ।) अहिताचरणं । यथा, "योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधाश्चपचारैः" ।
इति माधवकरः ।
("ज्ञतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" ॥
इति माघः ।)
अपचितः, त्रि, (अप + चाय + पूजार्थे कर्म्मणि क्तः । अपचितस्येति पाणिनिसूत्रेण पचे चायस्याने चिभावः । अप + चि + क्तः ।) हीनः । क्षयितः । अवयवाद्यपचययुक्तः । स्त्रीयः । क्षुद्रः । "अपचितमपि गात्रं व्याधतत्वादलक्ष्यं" । इति शाकुन्तले ।
अपचितिः, स्त्री, (अप + चि + भावे क्तिन् । हानिः । क्षयः । पूजा । निष्कृतिः । इति मेदिनी । (क्षयः । ध्वंसः । सम्माननं ।
"अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमां" ।
इति रामायणे ।)
अपच्छायः, त्रि, (अपगता छाया यस्मात् सः ।) देवः । उपदेवः । निष्प्रभः । अपगता छाया यस्मात् इति बहुव्रीहौ क्रुधः । (अपह्नवच्छायाविशिष्टः । मिश्रादिः ।
"अजाखुरं खुरोत्सर्गमार्ज्जनीरेणुवर्ज्जनैः ।
दीपच्छायापच्छायेव त्यज्यते निर्धनोजनः" ।)
अपञ्चीकृतं, क्ली, (अपञ्चात्मकं पञ्चात्मकं कृतं, पञ्च + अभूततद्भावे चि कृ + क्तः, ततो नञ्समासः । सूक्ष्मभूतं । पञ्चीकृतभिन्नाकाशादिपञ्चभूतं । इति वेदान्तसारः ।

("पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं" ॥
इति पञ्चदश्यां ।)

अपटान्तरं, त्रि, (पटेन वस्त्रेण तिरस्करिण्या इति यावत् अन्तरं व्यवधानं यत्र तत्, ततो नञ्समासः।) आसन्नं। संसक्तं। अपदान्तरं। अव्यवहितं। इत्यमरटीकायां स्वामी ॥

अपटी, स्त्री, (अल्पः पटः अल्पार्थे नञ्समासः, गौरादित्वात् ङीष्।) वस्त्रप्रावरणं। इति हेमचन्द्रः। कानात्। इति भाषा। (यवनिका। पर्दा। इत्यादि भाषा।)

अपटुः, स्त्री, (न पटुः, नञ्समासः।) व्याधितः। रोगी। इत्यमरः। पटुतारहितः। कार्य्याक्षमः। यथा,—
"सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतं"।
इत्यमरुकविः ॥

अपतर्पणं, क्ली, (अप + तृप् + भावे ल्युट्। लक्षणं। रोगादौ भोजनाभावः। इति हेमचन्द्रः। (अपगतं तर्पणं तृप्त्यभावो यस्य तत्। गतलोभः। तृप्तिशून्यः।)

अपत्यं, क्ली, (न पतति वंशो यस्मात्, पत + बाहुल्यात् यत्, ततो नञ्समासः।) पुत्रः। कन्या। तत्पर्य्यायः। २ सन्तानः। ३ तोकं। ४ सन्ततिः। ५ प्रसूतिः। इति जटाधरः।
("अस्मिंस्तु निर्गुणे गोत्रे नापत्यमुपजायते")।
इति हितोपदेशे।
"महीभृतः पुत्रवतोऽपि दृष्टिं
तस्मिन्नपत्ये न जगाम तृप्तिं"।
इति कुमारसम्भवे।)

अपत्यदा, स्त्री, (अपत्यं गर्भं तत्सेवनेन ददाति, अपत्य + दा + कर्त्तरि कः, उपपदसमासः।) गर्भदात्रीवृक्षः। इति राजनिर्घण्टः।

अपत्यपथः, पुं, (अपत्यस्य गर्भान्निःसारणस्य पन्था मार्गः, षष्ठीतत्पुरुषः, समासान्त अच्।) भगं। योनिः। इति हेमचन्द्रः।

अपत्यशत्रुः, पुं, (अपत्यस्य शत्रुः, षष्ठीतत्पुरुषः।) कर्कटः। इति शब्दचन्द्रिका। काँकड़ा। इति भाषा।

अपत्रपः, त्रि, (अप + त्रप् + भावे अच्, ।) त्रपारहितः। निर्लज्जः। अपगता त्रपा यस्येति बहुव्रीहौ आकारस्य ह्रस्वः ॥ ("सापत्रपः कुलगुरुर्विहितस्त्वया नः"। इति धनञ्जयविजय व्यायोगे।)

अपत्रपा, स्त्री, (अपगता त्रपा अन्यतो लज्जा यस्याः सा, स्त्रियां टाप् लज्जाहीना। लज्जाशून्या।) अन्यतो लज्जा। परस्मात् लज्जा। इत्यमरः। लज्जामात्रं। इति रत्नकोषः।

अपत्रपिष्णुः, त्रि, (अप + त्रप् + क्षीणार्थे कर्त्तरि इष्णुच्।) स्वभावसत्रपः। लज्जाशीलः। इत्यमरः। लाजुक इति भाषा।

अपथं, क्ली, व्य, (न प्रशस्तः पन्थाः मार्गः, नञ्समासः। नास्ति पथ्यः प्रशस्तः मार्गो यत्र तत्। प्रशस्तवर्त्मशून्ये नगरादौ।) अपथ्यः। मार्ग एव यो न भवति तत्। इत्यमरः। योनिः। इति शब्दरत्नावली। (विमार्गः। कुपथः। असन्मार्गः। साधुविगर्हितः पन्थाः। "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः"। इति रघुवंशे।
"न कथञ्चित् वर्णानामपथमपक्वोऽपि भजते"।
इति शाकुन्तले।)

अपथ्यं, त्रि, (पथ्ये वैद्योक्तभोजनादिनियमाय नीतुं क्षमाधाराय वा हितं यत् ततो नञ्समासः।) पथ्याभिन्नं। अहितं। यथा,—
"यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां"।
इति पथ्यापथ्यग्रन्थः।

अपदानं, क्ली, (अप + दैप्शोधने भावे ल्युट्, विद्यमानार्थे अर्थं आद्यच्। अथवा अपदायति परिशुध्यत्वेन कर्म्मणा, अप + दैप् + शोधने करणे ल्युट्।) अवदानं। वृत्तं कर्म्म। वृत्तिः प्रवर्त्तनं सा प्रशस्ता विद्यते यत्र तत्। यत्र कर्म्मणि वृत्तिः सर्व्वैः प्रशस्यते तत् इत्यर्थः। इत्यमरटीकायां स्वामी ॥
("गण्यत्यपदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमां"।
इति शाकुन्तले।)

अपदान्तरः, त्रि, (नास्ति पदान्तरं व्यवधानं यत्र सः।) अव्यवहितः। संयुक्तः। इत्यमरः। अभिन्नपदे क्ली। (सन्निकर्षः। सान्निध्यं। सामीप्यं। नैकट्यं।)

अपदिग्, क्ली, व्य, (दिशोर्मध्ये, अव्ययीभावः, समासान्त अच्।) दिक्कोणः। दिशोर्मध्यं। तत्पर्य्यायः। विदिक् २। इत्यमरः।
("क्लीवाव्ययं त्वपदिग्दिशोर्मध्ये विदिक् स्त्रियां"।
इत्यमरः।)

अपदेशः, पुं, (अप + दिश् + घञ्। ख्यानं।) निमित्तं। व्याजं। रूपाच्छादनं। तत्पर्य्यायः। २ व्याजः। ३ लक्ष्यं। इत्यमरः। परानिष्टकारिभिन्नघटना। इति महाभारतटीका। (ख्यातिः। कीर्त्तिः। छलं।
"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्"।
इति रघुवंशे।)

अपध्वंसजः, पुं, (अपध्वस्यतेऽनेन, अपध्वंस + करणे घञ्, अपध्वंसो जातीनां भिन्नतासम्पादकः सङ्करस्तस्माज्जायते, अपध्वंस + जन् + ड, उपपदसमासः।) वर्णसङ्करः। यथा,—
"शूद्राक्रान्ता सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः"।
इति मनुः। (प्रतिलोमजातः। भिन्नवर्णसङ्कमजातः। करणादिसंकीर्णवर्णः।)

अपध्वस्तः, त्रि, (अप + ध्वनृस + क्तः।) परित्यक्तः। निन्दितः। चूर्णीकृतः। इति मेदिनी। (अतिदुराचारः।) परित्यक्तः। "अपध्वस्तः परित्यक्ते निन्दिते ऽप्यवचूर्णिते"। इति मेदिनी।

अपनयनं, क्ली, (अप + नी + भावे ल्युट्।) खण्डनं। दूरीकरणं। यथा,—"इति श्रीशाम्बपुराणे रोगापनयने श्रीसूर्य्यवक्त्रविनिर्गतस्तवराजः समाप्तः" इति।
("नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रं"।
इति शाकुन्तले।)

अपनोदनं, क्ली, (अप + नुद् + भावे ल्युट्।) खण्डनं। दूरीकरणं। यथा,—"मानापनोदनविनोदमते गिरीशे"। इति श्रीहर्षः। (अपनुदति दूरीकरोति, अप + नुद् + कर्त्तरि बाहुल्यात् ल्युटि।) खण्डकः। दूरीकारकः।
"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
तथाघमर्षणं जप्यं सर्व्वपापापनोदनं"।
इति मनुः।)

अपपथः, [थिन्] पुं, (न पथः, नञ्समासः, समासान्तविधेरनित्यत्वात् अच् अजभावः।) अपथं। इत्यमरः।

अपपात्रितः, त्रि, (अपक्वं पात्रं भोजनपात्रं यस्य सः, येन जनेन भुक्ते भोजनपात्रमस्वक्वं भवतीति यावत् षण्ढादादिः, अपपात्र + करोत्यर्थे णिच् + क्तः।) उत्कटदोषैर्जातिभिर्भिन्नोदकीकृतः। यथा,—अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते"। इति शुद्धितत्त्वं ब्रह्मपुराणम्।

अपभ्रंशः, पुं, (अप + भ्रनृस + घञ्।) ग्राम्यभाषा। अपभाषा। तत्पर्य्यायः। अपशब्दः २। इत्यमरः॥ पतनं। यथा,—
"अत्यारूढिर्भवति महतामप्यभ्रंशनिष्ठा"।
इत्यभिज्ञानशाकुन्तले। (अधः पतनं। ध्वंसः। अधोगतिः।)

अपमः, पुं, (अपक्वतया मीयते, अप + मा + घञर्थे कः।) क्षान्तिः। इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

अपमानं, क्ली, (अप + मा + भावे ल्युट्।) अनादरः। अमर्य्यादा। इति शब्दरत्नावली॥ तत्पर्य्यायः।
"स्यादवज्ञा परीहारः परिभवः पराभवः।
अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया।
अवहेला च हेला स्यादवहेलनहेलने।
क्षेपो निकारधिक्कारौ पर्य्यायः स्यादनादरे" ॥
इति शब्दरत्नावली ॥ ० ॥ तस्य अधमकार्य्यत्वं यथा,—
"अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्" ॥
इति चाणक्यः ॥
("अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः।
स्वकार्य्यमुद्धरेत् प्राज्ञः कार्य्यध्वंसे हि मूढता")॥

अपमित्यकं, क्ली, (अपमित्यपमानं स्वीकृत्य गृह्यते, अप + मेङ् प्रणिदाने + क्त तस्य ल्यप्, "मयतेरिदन्यतरस्यामिति आख्याने इतक्, ततः कन्।) ऋणं। इति हलायुधः ॥

अपमृत्युः, पुं, (अपक्वः रोगेण विना मृत्युः मरणं

कर्म्मधारयः।) अपघातमरणं। विना रोगेण मरणं। यथा,—
"अपमृत्युभयं नास्ति मृतो मोक्षमवाप्नुयात्"।
इति देवीमाहात्म्यकीलकं॥ यत्तु शुद्धितत्त्वे प्रोक्तं पक्षिमत्स्यमृगदंष्ट्रिदृङ्निखिपतनानशनवह्निविषबन्धनजलप्रवेशशस्त्राघातादिजन्यमरणं तदेवापमृत्युरिति सुधीभिर्विभाव्यं॥

अपयानं, क्ली, (अपा या + भावे ल्युट्) पलायनं। इत्यमरः॥ प्रमाणं। प्रस्थानं। "मानस्य द्रुतमपयानमास्थितस्य"। इति माघः।)
"अपयानेऽपि च भवान् समर्थोऽलघुविक्रमः"।
इति रामायणे।

अपरं, क्ली, (न पूर्य्यते, पृ + अप् ततो नञ्समासः।) हस्तिपश्चाद्भागः। गजान्त्यजङ्घादिभागः। इति मेदिनी॥

अपरः, त्रि, (न एषाति प्रीणयति, पॄ + पचाद्यच, ततो नञ्समासः।) अन्यः। इतरः। अर्व्वाचीनः। इति मेदिनी॥

अपरत्वं, क्ली, (अपरस्य भावः भावे त्व।) न्यायमते तत् द्विविधं। दैशिकं कालिकञ्च। दैशिकं यथा। अल्पसूर्य्यसंयोगज्ञानजन्यगुणः। तस्यासमवायिकारणं दिक्संयोगः॥ कालिकं यथा॥ अल्पस्वर्थपरिस्पन्दज्ञानजन्यगुणः। तस्यासमवायिकारणं कालपिण्डसंयोगः। तदुभयं अपेक्षाबुद्धिजन्यं। अपेक्षाबुद्धिनाशादेव तदुभयोर्नाशः। इति सिद्धान्तमुक्तावली॥

अपरतिः, स्त्री, (अप + रम् + भावे क्तिन्।) निवृत्तिः। विरतिः। इति हेमचन्द्रः॥ (अपगता रतिः प्रीतिर्यस्य सः त्रि, प्रीतिरहितः। अपगता रतिः प्रीतिर्यस्य सः त्रि, कुत्सितप्रीतियुक्तः।)

अपरपक्षः, पुं, (अपरः श्रेष्ठः पक्षः अथवा अपरः शुक्लादितरः पक्षः, कर्म्मधारयः।) कृष्णपक्षः। स तु पितृपक्षः। यथा। पूर्व्वः पक्षो देवानामपरः पक्षः पितॄणामिति श्रुतिः॥ पक्षौ पूर्व्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ। इत्यमरः॥ मनुः। अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् पञ्चमीप्रभृति वापरपक्षस्य यदहर्व्वा सम्पद्यते। इति श्राद्धतत्त्वम्॥

अपररात्रः, पुं, (रात्रेः अपरः श्रेष्ठावयवः, एकदेशिसमासः, अच् समासान्तः "रात्राह्नाहाः पुंसि" इति पुंस्त्वं।) रात्रिश्रेष्ठः। तत्पर्य्यायः। उषःकः २। इति त्रिकाण्डशेषः॥

अपरस्परं, त्रि, (अपरे च परे च इन्द्वः, अपरस्पराः क्रियासातत्ये" इति सुड़ागमः, क्रियावतां साहित्ये।) क्रियासातत्यं। कर्म्मनिरन्तरता। इत्यमरः॥

अपरा, स्त्री, (न पूर्य्यतेऽनया, पॄ + अपादाने अप्, ततो नञ्समासः।) जम्बूः। इति मेदिनी॥ पश्चिमदिक्। इति हेमचन्द्रः॥

अपराङ्गं, क्ली, (अपरस्य रसादेरङ्गम्, षष्ठीतत्पुरुषः।) गुणीभूतव्यङ्ग्यभेदः। यथा अगूढमपरस्याङ्गमिति भरतमुनिः॥ अस्यार्थः। अपरस्य रसादेर्वाच्यार्थीभूतस्य वा वाच्यस्याङ्गं रसादि अनुरञ्जनरूपं वा। इति काव्यप्रकाशः॥ तत्रैवोदाहरणं।
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"॥ अत्र गृद्धेरः करुणस्याङ्गमिति॥

अपराङ्मुखः, पुं, (परा + अञ्च + क्विन्, पराक् मुखं यस्य सः, ततो नञ्समासः।) अविमुखः। संमुखीभूतः। यथा,—
"आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः। युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः"॥
इति मानवे ७ अध्याये ८९ श्लोकः॥

अपराजितः, पुं, (परा + जि + क्तः, ततो नञ्समासः।) शिवः। विष्णुः। ऋषिविशेषः। अनिर्ज्जिते त्रि। इति मेदिनी॥

अपराजिता, स्त्री, दुर्गा। जयन्तीवृक्षः। अश्वगन्धा। इति मेदिनी॥ खल्वपला। विष्णुक्रान्ता। इति राजनिर्घण्टः॥ श्वेतालता। शमीभेदः। शुक्लिनी। हपुषाभेदः। इति वैद्यकं॥ खनामख्यातपुष्पलताविशेषः। शुक्लनीलभेदेन सा द्विधा। तस्याः पर्य्यायः। आस्फोता २ गिरिकर्णी। ३ विष्णुक्रान्ता ४। इत्यमरः॥ आस्फोटा ५। इति तट्टीका॥ गवाक्षी ६ अश्वखुरी ७ श्वेता ८ श्वेतभण्डा ९ गवादनी १०। इति रत्नमाला॥ अद्रिकर्णी ११ कटभी १२ दधिपुष्पिका १३ गर्दभी १४ सितपुष्पी १५ श्वेतस्पन्दा १६ भद्रा १७ सुपुत्री १८ विषघ्नी १९ नगपर्य्यायकर्णी २० अश्वाङ्गादिखुरी २१। अस्या गुणाः। हिमत्वं। तिक्तत्वं। पित्तोपद्रवविषदोषनाशित्वं। चक्षुर्हितत्वं। त्रिदोषघ्नमतोकारित्वञ्च। इति राजनिर्घण्टः॥ शोथकासनाशित्वं। कण्ठहितकारित्वञ्च। इति राजवल्लभः॥
("दक्षैश्च नरैः सम्यक् पूजनीयाऽपराजिता। मोक्षार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः। नवमीश्रेष्ठयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्द्धिनी"॥
इति स्कान्दे।)

अपराद्धपथकः, त्रि, (अपराद्धः लक्ष्यात् च्युतः पृषत्कोवाणो यस्य सः।) लक्ष्यच्युतशरयुक्तः। यस्य बाणो लक्ष्यात् च्युतः सः। इत्यमरः॥
("क्षतहस्तः सुप्रयोगविशिक्षितः क्षतपुङ्खवत्। अपराद्धपथकोऽसौ लक्ष्यात् यच्युतसायकः"॥
इत्यमरः।)

अपराधः, पुं, (अप + राध् + भावे घञ्।) अकार्य्यादिदोषः। तत्पर्य्यायः॥ आगः २ मन्तुः ३। इत्यमरः॥ स च द्वात्रिंशद्विधो यथा। आगमे।
"यानैर्व्वा पादुकैर्व्वापि गमनं भगवद्गृहे। देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥ उच्छिष्टे वाथवाशौचे भगवद्दर्शनादिकं। एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणं॥ पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम्। शयनं भक्षणं वापि मिथ्याभाषणमेव च॥ उच्चैर्भाषामिथोजल्पो रोदनानि च विग्रहः। निग्रहानुग्रहे चैव नृषु च क्रूरभाषणम्। कम्बलावरणञ्चैव परनिन्दा परस्तुतिः। अश्लीलभाषणं चैव अधोवायुविमोक्षणम्॥ शक्तौ गौणोपचारश्च अनिवेदितभक्षणं। तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणं॥ विनियुक्तावधिस्थस्य प्रदानं व्यञ्जनादिके। एष्टीकृत्यासनं चैव परेषामभिवादनं॥ गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः"॥*॥
वाराहे।
"द्वात्रिंशदपराधा ये कीर्त्यन्ते वसुधे मया। वैष्णवेन सदा ते तु वर्जनीया प्रयत्नतः॥ ये वै न वर्जयन्त्येतान् अपराधान् मयोदितान्। सर्व्वधर्म्मपरिभ्रष्टाः पच्यन्ते नरके चिरं॥ राजान्नभक्षणञ्चैकमापद्यपि भयावहं। ध्वान्तागारे हरेः स्पर्शः परं सूतकनाशनः॥ तथैव विधिमुल्लङ्घ्य सहसा स्पर्शनं हरेः। द्वारोद्घाटो विना वाद्यं क्रोडमांसनिवेदनं॥ पादुकाभ्यां तथा विष्णोर्मन्दिरायोपसर्पणं। कुक्कुरोच्छिष्टस्खलनं मौनभङ्गोऽच्युतार्च्चने॥ तथा पूजनकाले च विड्तुत्सर्गाय सर्पणं। श्राद्धादिकमकृत्वा च नवान्नस्य च भक्षणं॥ अदत्त्वा गन्धमाल्यादि धूपनं मधुघातिनः। अकर्म्मण्यप्रसूनेन पूजनञ्च हरेस्तथा॥ अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा। स्पृष्ट्वा रजस्वलां दीपं तथा मृतकमेव च॥ रक्तं नीलमधौतञ्च पारक्यं मलिनं पटं। परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतं॥ क्रोधं कृत्वा श्मशानञ्च गत्वा भूत्वाप्यजीर्णभुक्। भक्षयित्वा क्रोडमांसं पिण्याकं जालपादकं॥ तथा कुसुम्भशाकञ्च तैलाभ्यङ्गं विधाय च। हरेः स्पर्शी हरेः कर्म्मकरणं पातकावहं॥*॥
किञ्च तत्रैव।
मम शस्त्रं वहिष्कृत्य अस्माकं यः प्रयच्छते। मुक्त्वा च मम शस्त्राणि शस्त्रमन्यत् प्रमाद्यते॥ मद्यपस्तु समासाद्य प्रविशेद्भवनं मम। यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः॥
अपि च।
"मम दृष्टेरभिमुखं ताम्बूलं चर्व्वयेत्तु यः। कुरवकपलाशस्रग्भिः पुष्पैः कुर्य्यान्ममार्च्चनं॥ ममार्द्रामासुरे काले यः करोति विमूढधीः। माठाशनोपविष्टो यः पूजयेद्वा निरासनः॥ वामहस्तेन मां कृत्वा स्नापयेद्वा विमूढधीः। पूजार्थ्युचितैः पुष्पैः स्रोवनं गर्व्वकल्पनं॥ तिर्य्यक् पुण्ड्रधरो भूत्वा यः करोति ममार्च्चनं। याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्च्चनं॥ अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरं। अवैष्णवस्य पक्वान्नं यो मह्यं विनिवेदयेत्॥ अवैष्णवेषु पश्यत्सु मम पूजां करोति यः। अपूजयित्वा विघ्नेशं सम्भाष्य च कयालिनं॥ नरः पूजान्तु यः कुर्य्यात् स्वपनञ्च नखाम्भसा। अमौनी धर्म्मलिप्साढ्यो मम पूजां करोति यः॥

ज्ञेयाः परेऽपि बहवोऽपराधाः सदसंमतैः।
आचारैः शास्त्रविहितनिषिद्धातिक्रमादिभिः"॥"॥
अथापराधशमनं।
"संवत्सरस्य मध्ये च तीर्थे शौकरके मम।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात्॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत्।
अनयोस्तीर्थयोरङ्गे यः सेवेत् सुकृती नरः॥
सहस्रजन्मजनितानपराधान् जहाति सः"।
स्कान्दे।
"अहन्यहनि यो मर्त्यो गीताध्यायन्तु संपठेत्।
द्वाविंशदपराधेस्तु अहन्यहनि मुच्यते"॥
अथ कार्त्तिकमाहात्म्ये।
"तुलस्या कुरुते यस्तु शालग्रामशिलार्चनं।
द्वाविंशदपराधांश्च क्षमते तस्य केशवः"॥
तत्रैवान्यत्र।
"द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवं।
द्वाविंशदपराधानि क्षमते तस्य केशवः॥
यः करोति हरेः पूजां श्रद्धयाशस्त्राङ्कितो नरः।
अपराधसहस्राणि नित्यं हरति केशवः"॥
इति श्रीहरिभक्तिविलासे ८ विलासः॥

अपराह्णः, पुं, (अह्नः अपरः एकदेशिसमासः, समासान्तः टच्, अहःस्थाने अह्नादेशः।) शेषं अहः। दिनशेषभागः। इत्यमरः।
("रामाणां रमणीयतां विदधति ग्रीष्मापराह्णागमे" इति अमरशतके।
"तथा आद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते"। इति मनुः।) विकाल इति भाषा। तस्य भेदाः। द्विधा विभक्तदिनस्य शेषभागः॥ त्रिधा विभक्तदिनस्य तृतीयभागः॥ स तु त्रिंशद्दण्डदिनमाने विंशतिदण्डात् परं दशदण्डं यावत्। पञ्चधा विभक्तदिनस्य चतुर्थभागः। स तु अष्टादशदण्डात् परं षड्दण्डं यावत्। इति श्रुतिस्मृती॥

अपराह्णतनं, त्रि, (अपराह्णे भवम् सप्तम्येकवचनान्त अपराह्ण+ञ्यु तुट्च, "सकालतनेषु कालनाम्न इति" पक्षे अलुक्।) अपराह्णभववस्तु। अपराह्णजातं। इति सिद्धान्तकौमुदी॥

अपराह्णेतनं, त्रि, (अह्नोऽपरः एकदेशिसमासः, तत्र भवम् अपराह्णे+ञ्यु तुट्च, "सकालतनेषु कालनाम्न" इति पक्षे अलुक्।) अपराह्णेतनं। इति सिद्धान्तकौमुदी॥

अपरिकलितः, त्रि, (परि+कल्+कर्म्मणि क्तः, ततो नञ्समासः।) अज्ञातः। अदृष्टः। यथा,—
"अपरिकलितपूर्व्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव"॥
इति ललितमाधवः॥

अपरिच्छन्न, त्रि, परिच्छदशून्यं। परिपूर्व्वछदधातोः कर्त्तरि क्ते नञ्समासः॥

अपरिच्छिन्न, त्रि, (परि+छिद्+क्त ततो नञ्समासः।) परिच्छेदरहितं। असीम। बहिरन्तरशून्यं। यथा,—"किञ्च परिच्छिन्नस्य नीड़े पक्ष्यादेरिव प्रवेशो भवेत् तव त्वनाहतत्वात् अपरिच्छिन्नत्वेन बहिरन्तरभेदो नास्ति कुतः प्रवेशः"। इति श्रीधरस्वामी॥

अपरिपक्व, त्रि, परिपाकरहितं। किञ्चित्पक्वं। परिपूर्व्वपचधातोः कर्त्तरि क्ते तस्य वले चस्य च कले परिपक्वं ततो नञ्समासः॥

अपरिमितं, त्रि, (परि+मा+क्त, ततो नञ्समासः।) परिमाणरहितं। मानतुलासंख्याशून्यं। यथा,—"अपरिमिता ध्रुवास्तनुभृतो यदि सर्व्वगतास्तर्हि न शास्यतेति नियमो ध्रुवनेतरथा"। इति श्रुत्यध्यायः।

अपरिस्नानः, पुं, (परि+स्ना+क्त तस्य नत्वं, ततो नञ्समासः।) रक्तास्नानदुष्टः। इति राजनिर्घण्टः॥ स्नानिरहिते वाच्यलिङ्गः॥ (नूतनः। अपरिशुष्कः। निर्म्मलः।)

अपरिष्कारः, पुं, ("संपर्य्युपेभ्यः करोतौ भूषणे इति" सुड़ागमः।) परिष्काराभावः। अनिर्म्मलत्वं। तद्वति त्रि। परिपूर्व्वकृधातोर्भावे घञि नञ्समासः।

अपरिष्कृतं, त्रि, अमार्जितं। अनिर्म्मलं। अभूषितं। अनलङ्कृतं। परिपूर्व्वकृधातोः कर्म्मणि क्ते नञ्समासः। यथा,—
"मलपूतिसमायुक्तश्लेष्मविण्मूत्रपिच्छिलं।
रेतोनिष्ठीवमानाभिः स्रवद्भिरपरिष्कृतं"॥
इति कालिकापुराणे ५६ अध्यायः॥

अपरिहार्य्य, त्रि, (परि+हृ+कर्म्मणि ण्यत्, ततो नञ्समासः।) अपरिहरणीयं। अत्याज्यं। यथा,
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि"॥
इति श्रीभगवद्गीता॥

अपरूपं, त्रि, (अपह्नुतं रूपं कर्म्मधारयसमासः।) अपह्नुतरूपं। विकृतरूपं। अपोपसर्गेण रूपशब्दस्य बहुव्रीहिसमासः॥ कर्म्मधारयसमासे क्लीं॥ लोके तु आश्चर्य्यमिति प्रसिद्धं॥

अपरेद्युः, [स्] व्य, (अपरस्मिन् दिवसे दिवसस्य एद्युश्चादेशः)। अपरेऽह्नि। अपरदिने। इत्यमरः॥ ("पूर्व्वेद्यरपरेद्युर्व्वाश्राद्धकर्म्माण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः।)

अपर्णा, स्त्री, (नास्ति पर्णं तपस्यायां पर्णभक्षणवृत्तिर्व्वा यस्याः सा, टाप्।)
दुर्गा। इत्यमरः॥
("स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदा
वदन्त्यपर्णेति च तां पुरा विदः"। इति कुमारसम्भवे।)
पत्रशून्ये त्रि॥

अपर्य्याप्त, त्रि, (परि+आप्+क्त, नञ्समासः।) पर्य्याप्तिशून्यं। असीम। असमर्थं। यथा,—
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितं।
पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं"॥
इति श्रीभगवद्गीता॥

अपर्य्युषितं, क्ली, (परि+वस्+क्त, नञ्समासः।) अद्युष्टं। सद्योभवं। यथा नारसिंहे,—
"अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः।
स्त्रीबालामोदुवैर्वापि पुष्पैः संपूजयेद्धरिं"॥
इत्याह्निकाचारतत्त्वम्॥

अपर्व्वदण्डः, पुं, (अपर्व्वः पर्व्वरहितः ग्रन्थिशून्य इति यावत् दण्डः कर्म्मधारयः।) रामशरदण्डं। इति राजनिर्घण्टः॥

अपलं, क्ली, (अपलाति अपराक्रमणं रक्षति येन, अप+ला+करणे क। नास्ति पलं मांसं यस्य सः, मांसशून्यं।) कीलकं। इति शब्दमाला॥ पलशून्ये त्रि॥

अपलपनं, क्ली, अपलापः। अपोपसर्गात् लपधातोर्भावे अनट् प्रत्ययः॥ (पाणिनिमते तु अप+लप्+भावे ल्युट्।)

अपलापः, पुं, (अप+लप्+भावे घञ्।) सतोऽप्यसत्त्वेन कथनं। ज्ञातस्य गोपनं। तत्पर्य्यायः। २ निह्नुतिः। ३ अपह्नुतिः। ४ अपह्नवः। ५ निह्नवः। इति शब्दरत्नावली॥ प्रेम। इति। मेदिनी॥

अपलाषिका, स्त्री, (अप+लष्+भावे ण्वुल्।) दृष्या। इति हेमचन्द्रः॥

अपवनं, क्ली, (अपह्नुतं छद्मिमत्वात् अल्पत्वाच्च वनं कर्म्मधारयः।) उपवनं। छद्मिमवनं। इति हेमचन्द्रः॥

अपवरकः, पुं, (अपव्रियन्ते लोकाः सम्भज्यन्तेऽत्र, अप+वृ+"गृहवृनिश्चिगमश्च" इति अप्, ततः स्वार्थे कन्, अथवा अप+वृ+क्रादिभ्यः संज्ञायां वुन् तस्य अकः।) अन्तर्गृहं। तत्पर्य्यायः। २ गर्भागारं ३ वासौकः ४ शयनास्पदं। इति हेमचन्द्रः॥ ("दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभा बहिः"।)

अपवर्गः, पुं, (अपवृज्यते संसारः मुच्यतेऽनेन, अप+वृज्+घञ् कुत्वं।) मोक्षः। त्यागः। क्रियावसानसाफल्यं। कर्म्मफलं। इति विश्वमेदिन्यौ॥ क्रियान्तः। कार्य्यसमाप्तिः। इति जटाधरो रत्नावली च॥ पूर्णता। इति धरणी। (निर्व्वाणं। मुक्तिः। "अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्म्मयोर्गतौ" इति रघुवंशे। समाप्तिः। शेषः। अवसानं। "क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः"। इति भारविः।)

अपवर्ज्जनं, पुं, (अप+वृज्+भावे ल्युट्।) दानं। मोक्षः। त्यागः। इति मेदिनी॥

अपवादः, पुं, (अप+वद्+भावे घञ्।) आज्ञा। निन्दा। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ उपक्रोशः ६ जुगुप्सा ७ कुत्सा ८ गर्हणं ९ इत्यमरः॥ (वचनीयं। "लोकापवादाद्भयं" इति नीतिशतके। "देव्यामपि हि वैदेह्यां सापवादो यतो जनः"। "हा कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि"। इति उत्तरचरिते। आज्ञा। अनुमतिः। आदेशः। "ततोऽपवादेन पताकिनीपतेश्चचाल निर्हादवती महाचमूः"। इति भार

विः ।) विश्वासः । इति मेदिनी ॥ विश्लेषः । बाधकः । यथा,—
"क्वचिदपवादविषये ऽप्युत्सर्गोऽभिनिविशते" ।
इति कलापपरिशिष्टं ॥ रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वं । तदुक्तं ।
"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतः" ॥
अस्य मूलं । आभ्यां अधारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति । इति वेदान्तसारः ॥

अपवारणं, क्ली, (अप + वृ + णिच् भावे ल्युट् ।) अवधानं । अन्तर्द्धानं । इत्यमरः ॥

अपवारितं, त्रि, (अप + वृ + णिच्, कर्म्मणि क्तः ।) अन्तर्हितं । इति हेमचन्द्रः ॥

अपवित्रं, त्रि, (पू + इत्रच्, ततो नञ्समासः ।) पवित्रतारहितं । अशुद्धं । यथा,—
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः" ॥
इति स्मृतिः । (अविशुद्धः । अनिर्म्मलः । दूषितः । मलिनः ।
"अपवित्रमिदं कर्म्म कृतं मोहान्मया तया" ।
इति रामायणे । "यदेष सारमेयोऽपवित्रः स्खन्याद्वो नीयते" । इति पञ्चतन्त्रे ।)

अपविद्धः, त्रि, (अप + व्यध् + क्तः ।) प्रत्याख्यातः । निराकृतः । इति हेमचन्द्रः ॥ (त्यक्तः । प्रतिक्षिप्तः ।
"कुवेरस्य मनःशल्यं शंसतीव पराभवं ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः" ॥
इति कुमारसम्भवे । चूर्णीकृतः । दलितः ।
"मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः" ।
इति रामायणे ।)

अपविद्धपुत्रः, पुं, (अपविद्धः पुत्रः, कर्म्मधारयः,) क्षेत्रजत्वविधिपुत्रभिन्ने पुत्रविशेषः । स तु पोषणाद्यसमर्थमातापितृभ्यां त्यक्तः तयोरन्यतरस्मरणे अन्यतरेण वा त्यक्तः अनन्तरं अन्येन गृहीत्वा पुत्रत्वेन परिकल्पितः । यथा,—
"मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" ॥
इति मनुः ॥

अपविषा, स्त्री, (अपं अपगतं विषं यस्याः सा, स्त्रियां टाप् ।) निर्व्विषीवृक्षं । इति राजनिर्घण्टः ॥

अपशब्दः, पुं, (अप + शब्द + कर्त्तरि अच् । अपसद इति पाठे अप + सद् + अच् ।) अपसदः । नीचः । इत्यमरटीकायां भरतः ॥

अपशब्दः, पुं, (अप असंस्कृतः शब्दः, कर्म्मधारयः ।) असंस्कृतशब्दः । अप्राकृतशब्दः । लौकिकशब्दः । ग्राम्यभाषा । तत्पर्य्यायः । अपभ्रंशः २ । इत्यमरः ॥
("तत्र च प्रकृतिवैकल्यात् प्रमादाच्चतादिभिः ।
अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिताः" ॥
इति हरिवंशे ।)

"आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृतः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितं" ॥
इति दण्डी ॥

अपशुक्[च्] पुं, (शुच् + भावे क्विप्, अपगता शुक् शोको यस्य सः ।) आत्मा । यथा । "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनापशुग्घ्नात्" । इति श्रीभागवते ॥

अपशोकः, पुं, (अपगतः शोको यस्मात् सः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ ("शोकरहितः । दुःखहीनः ।
"हरप्रीतिकरो वृक्षो ह्यशोकः शोकनाशनः ।
दुर्गाप्रीतिकरोऽसित्वं मामशोकं सदा कुरु" ॥
देवीपूजापद्धतिः ।)

अपस्नं, क्ली, (अप + स्ना + कः, अम्बाम्बागोसख्यापत्यादिना घत्वं ।) अङ्गुष्ठाग्रं । इति हेमचन्द्रः ॥

अपस्नु, व्य, (अप + स्ना + "अपदुःसुभ्यः स्नः कुः, इति कु, सुखमादित्वात् घत्वम् ।) निरवद्यं । विपरीतं । शोभनं । इति शब्दमाला ॥

अपस्नुः, पुं, (अप + स्ना + कु, सुखमादित्वात् घत्वं ।) कालः । वामे च । इति मेदिनी ॥ (समयः । असत्यः । विरुद्धार्थः । प्रतिकूलः । विपरीतः ।
"तव धर्म्मराज इति नाम कथमिदमपस्नु पश्यते ।
भीमदिनमभिदधत्यथवा भग्नमप्रगल्भमपि मङ्गलं जनाः ।" इति माघः । वामः । दक्षिणेतरः ।)

अपस्नुरं, त्रि, (अप + स्ना + कुरच्, सुखमादित्वात् घत्वं ।) प्रतिकूलं । इति हेमचन्द्रः ॥

अपस्नुलं, त्रि, (अप + स्ना + कुरच्, रस्य लत्वं ।) प्रतिकूलं । विपरीतं । इति त्रिकाण्डशेषः ॥

अपसदः, पुं, (अपसीदति अपकृष्टत्वं प्राप्नोति, अप + सद् + पचाद्यच् ।) नीचः । इतरलोकः । इत्यमरः ॥
("विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् वर्त्तेतऽपसदाः स्मृताः" ॥
इति मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुं स्त्रीं ।)

अपसरः, पुं, (अप + सृ + भावे अप् ।) अपसरणं । स्थानात् स्थानान्तरगमनं । अपोपसर्गात् गत्यर्थसृधातोर्भावे अण्प्रत्ययः ॥
("निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषं" ।
इति मनुः ।)

अपसर्ज्जनं, क्ली (अप + सृज + भावे ल्युट् ।) मोक्षः । परित्यागः । दानं । इति भूरिप्रयोगः ॥ (वधः । हत्या । परिवर्जनं ।)

अपसर्पः, त्रि, (अपसर्पति, अप + सृप् + कर्त्तरि अच् ।) चरः । हरकरा इति प्रसिद्धः । इत्यमरः ॥ (गूढचरः । स्पशः ।
"यथार्हवर्गः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्चाप्रः प्रत्ययितश्चिषु" ॥
इत्यमरः ।
"सर्व्वाधिराजोरुभुजोऽपसर्पं
यमस्य भर्त्तुं विजितारिभर्त्तुः" ।
इति रघुवंशे ।)

अपसवि, व्य, (अप + सव् + बाहुल्यात् अवि ।) प्रदेशिन्यङ्गुष्ठयोरन्तरा । पितृतीर्थं । यथा ।
"प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसवि अपसव्यं वा तेन पितृभ्यो निदधाति" । इति श्राद्धतत्त्वे भट्टभाष्यधृतश्रुतिः ॥

अपसव्यं, क्ली, (सव्यादपक्रान्तं, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) अपसवि । पितृतीर्थं । इति श्राद्धतत्त्वे भट्टभाष्यधृतश्रुतिः ॥

अपसव्यः, त्रि, (सव्यादपक्रान्तः, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) शरीरदक्षिणभागः । प्रतिकूलः । इति मेदिनी ॥ (विपरीतः ।
"वाता मरुद्भिनस्तैनमपसव्यं प्रचक्रमुः" ।
इति रामायणे ।)

अपस्करः, पुं, (अपकीर्य्यते, अप + कृ + अप्, "अपस्करो रथाङ्गमिति" पाणिनिसूत्रेण सुडागमः ।) रथाङ्गं । तच्च अक्षायुगचक्रादि । इत्यमरः ॥ गुह्यद्वारं । विष्ठा । इति धरणी ॥

अपस्नातः, त्रि, (अपक्षरत्तेन स्नातः अमङ्गलार्थत्वात्, अप + स्ना + कर्त्तरि क्तः ।) मृतमुद्दिश्यस्नातस्नानो जनः । इत्यमरः ॥ ("अपस्नातस्नानिष्पीड़ितमौलिरेव भवनमाजगाम" इति हर्षचरिते ।) संस्कारार्थं स्नापितो मृतः । इति स्नामी ॥

अपस्नानं, क्ली, (अप + स्ना + भावे ल्युट् ।) मृतस्नानं । मृतोद्देश्यकस्नानं । इति हेमचन्द्रः ॥ (अपविद्धस्नानं । स्नानावशिष्टजलेन स्नानं । स्नानोदकं । स्नानावशिष्टं जलं ।
"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठूतवान्तानि नाधितिष्ठेत्तु कामतः" ।
इति मनुः ।)

अपस्मारः, पुं, (अपस्मर्य्यते पूर्व्वरूपं विस्मर्य्यतेऽनेन, अप + स्मृ + करणे घञ् ।) रोगविशेषः । मृगी इति भाषा । तत्पर्य्यायः । अकस्मितिः २ जाड्यः ३ भूतविक्रिया ४ । इति राजनिर्घण्टः ॥*॥ तस्य सामान्यरूपं ।
"तमःप्रवेशः संरम्भो दोषोद्रेकश्रुतेर्भृशं ।
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्व्विधः" ॥*॥
तस्य निदानपूर्व्विका सम्प्राप्तिः ।
"चिन्ताशोकादिभिः क्षुद्रा दोषा हृत्स्रोतसि स्थिताः ।
ज्ञात्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्व्वते" ॥*॥
तस्य पूर्व्वरूपं । यथा,—
"हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढ़ता ।
निद्रागमश्च तस्मिंश्च भविष्यति भवत्यथ" ॥*॥
वातिकस्य रूपं ।
"कम्पते प्रदशेत् दन्तान् फेनोद्गमी श्वसित्यपि ।
परुषारुणरूक्षाणि पश्येद्भूयांसि चानिशात्" ॥*॥
पैत्तिकस्य रूपं ।
"पीतफेनाऽरुवक्त्राक्षः पीतहृद्याङ्गमूत्रनः ॥
सद्यःशोषानलक्ष्यान्नलोकदर्शी च पैत्तिकः" ॥*॥
श्लैष्मिकरूपं ।
"शुक्लफेनाऽरुवक्त्राक्षः शीतहृद्याङ्गजो गुरुः ।
पश्यन् शुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात्" ॥*॥
त्रिदोषजरूपं ।

"सर्व्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः" ॥ * ॥
असाध्यलक्षणं ।
अपस्मारः स चासाध्यो यः क्षीणस्यानवस्य यः ॥*॥
अरिष्टलक्षणं ।
"प्रस्फुरन्तं सुबहुशः क्षीणं प्रचलितभ्रुवं ।
नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्" ॥*॥
तस्य वेगकालः ।
"पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः ।
अपस्माराय कुर्व्वन्ति वेगं किञ्चिदथान्तरं ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित् ।
शरदि प्रतिरोहन्ति तथा व्याधिसमुच्चयाः" ॥
इति माधवकरः ॥ * ॥ तस्य चिकित्सा । यथा,—
"तैलेन लशुनः सेव्यः पयसा च शतावरी ।
ब्राह्मीरसश्च मधुना सर्व्वापस्मारभेषजं ॥ * ॥
चूर्णैः सिद्धार्थकादीनां भक्षितैरथवापि तैः ।
गोमूत्रपिष्टैः सर्व्वाङ्गलेपैः स्नाय्वपस्मृतिः" ॥
सिद्धार्थकादिः उन्मादोक्तः ॥ * ॥
"शिग्रुकट्वङ्गकिणिहीनिम्बत्वग्रसपाचितं ।
चतुर्गुणे गवां मूत्रे तैलमभ्यङ्गने हितं" ॥
कट्वङ्गः शोनापाठा । किणिही चिरिचिरा ॥*॥
"निर्गुण्डीभवबन्दाकनावनस्य प्रयोगतः ।
उपैति सहसा नाशमपस्मारो महागदः ॥ * ॥
मनोज्ञा तार्क्ष्यविष्ठा वा शुक्लत् पारावतस्य च ।
अञ्जनाद्धन्त्यपस्मारमुन्मादञ्च विशेषतः" ॥
मनोज्ञा मनःशिला । तार्क्षी गरुड़ः । शुक्लत् विष्ठा ॥ * ॥
"यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः ।
अपस्मारं महाघोरं चिरोत्थं स जयेदध्रुवं" ॥
वचा घुरवच् ॥ * ॥
"कुष्माण्डकफलोत्थेन रसेन परिषेचितं ।
अपस्मारविनाशाय मद्याक्तं च पिबेत् घृतं" ॥
घृतमिति एतस्य पानादिदिवसत्रयेणैवापस्मारोपशमो भवतीत्यभिप्रायः ॥ * ॥
"ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीशृतं घृतं ।
पुराणं स्यादपस्मारोन्मादग्रहहरं परं" ॥
एतस्य प्रक्रिया । पुराणं गोघृतं प्रस्थमितं वचाकुष्ठशङ्खपुष्पीणां समुदितानां कुड़वमितानां कल्केन प्रस्थमितब्राह्मीरसपिष्टेन पचेत् । ब्राह्मीघृतं ॥ * ॥
"कुष्माण्डकरसे सर्पिरर्द्धादशगुणे पचेत् ।
यच्चाक्तकल्कं तत्पानमपस्मारविनाशनं" ॥
कुष्माण्डकघृतं ॥ * ॥
"द्वौ कीटमेषौ विधिवदानीय रविवासरे ।
कण्ठे भुजे वा संधार्य्य जयेदुग्रमपस्मृतिं" ॥
अयन्तु कीटो नदीतीरे सिकतामध्ये तिष्ठति ॥*॥
"शिग्रुकुष्ठजलाजाजीलशुनव्योषहिङ्गुभिः ।
वस्तमूत्रे घृतं तैलं नावनं स्यादपस्मृतौ" ॥
जलं बालकं । अजाजी जीरकः । वस्तः छागः । नावनं नस्यं ॥ * ॥ इत्यपस्माराधिकारः । इति भावप्रकाशः ॥

अपहारः, पुं, (अप + हृ + भावे घञ् ।) अपचयः । हानिः । इत्यमरः ॥ अपहरणं । चौर्य्यं । संगोपनं । धनस्वाम्यनुपयोगित्वयः । इति दायभागः ॥ (वि नाशः ।
"कर्णनासापहारेण भगिनी मे विरूपिता" ।
इति रामायणे । स्तेयं । यद्धान्यापहारादिकं कर्म्म द्रव्यस्वामिसमक्षं बलात्कृतं तत्साहसं स्यात् ।
इति कल्लूकभट्टः । निह्नवः । "कथं वा आत्मनः अपहारं करोमि" । इति शाकुन्तले ।)

अपहारकः, त्रि, (अप + हृ + ण्वुल् ।) अपहारी । अपहरणकर्त्ता । यथा,—
"परापवादनिरतः परद्रव्यापहारकः" ।
इति पुराणं ॥
("द्विविधान् तस्करान् विद्यात् परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ॥
"अन्यहर्त्तामयाचित्वं मौक्यं वागपहारकः ।
वस्त्रापहारकः श्वैत्यं पङ्गुतामन्नहारकः" ॥
इति मनुः । चौरः ।
"योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमोलोके स्तेन आत्मापहारकः" ।
इति मनुः ।)

अपहासः, पुं, (अप + हस् + भावे घञ् ।) अकारणहास्यं । इति हेमचन्द्रः ॥

अपक्लवः, पुं, (अप + क्लु + भावे अप् ।) अपलापः । स्नेहः । इति मेदिनी ॥
("ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपक्लवे तद्द्विगुणं तन्मनोरनुशासनम्" ॥
इति मनुः ।)

अपक्लृतिः, स्त्री, (अप + क्लृ + भावे क्तिन् ।) अपलापः । अपक्लवः । इति शब्दरत्नावली ॥ उपमेयासत्यकरणपूर्ब्बकोपमानसत्यतात्पर्य्यवस्थापिकालङ्कृतिः । तस्याः लक्षणं ।
"प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपक्लृतिः" ।
उदाहरणं ।
"अवाप्तः प्रागल्भ्यं परिणतवचः श्मश्रुनयने ।
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ॥
अमुष्येयं मन्ये विगलदमृतस्यन्दिशिशिरे ।
रतिश्रान्ता शेते रजनिरमणी गाढ़मुरसि" ॥
इति काव्यप्रकाशः ॥
("प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपक्लृतिः ।
गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ॥
यदि श्लेषेणान्यथा वाऽन्यथयेत् साप्यपक्लृतिः" ।
इति साहित्यदर्पणे ।)

अपांनाथः, पुं, (अपां नाथः अलुक्समासः ।) समुद्रः । इति राजनिर्घण्टः ॥

अपांनिधिः, पुं, (निधीयतेऽत्र, नि + धा + अधिकरणे किः, अपां निधिः आधारः ।) समुद्रः । वारांनिधिः इति दर्शनात् ॥

अपांपतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्पतिरित्यमरशेषोक्तत्वात् ॥

अपांपित्तं, क्ली, (अपां पित्तमिव तदुत्पन्नत्वात् तस्य पित्तत्वं, अलुक्समासः ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरशेषोक्तत्वात् ॥

अपाक्, [च्] त्रि, (अप + अञ्च + क्विन्, नलोपः ।) दक्षिणदिग्भववस्तु । तत्पर्य्यायः । अपाचीनं २ । इति हेमचन्द्रः ॥

अपाकः, पुं, (पच + भावे घञ्, ततो नञ्समासः ।) पाकाभावः । अजीर्णता । यथा,—
"अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः ।
अपाकः शून्यतास्थानामामवातस्य लक्षणं" ॥
इति माधवकरः ॥ पाकाभावविशिष्टे त्रि । यथा,—
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य ।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरदुःखपाकं" ॥
इति माधवकरः ॥

अपाकशाकं, क्ली, (न पच्यते, पच् + घञ्, नञ्समासः, अपाकः शाको यस्य तत् ।) आर्द्रकं । इति राजनिर्घण्टः ॥

अपाङ्गः, पुं, (अपाञ्चति वक्रं गच्छति चक्षुर्यत्र, अप + अञ्च + अधिकरणे घञ् ।) नेत्रयोरन्तः । चक्षुःकोणः ।
("चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं" ।
इति शाकुन्तले । "कुवलयदृशां लोललोलैरपाङ्गैः" ।
इति भान्तिशतके ।) तिलकः । इत्यमरः ॥ अङ्गहीने त्रि । इति मेदिनी ॥

अपाङ्गकः, पुं, (अपाञ्चदङ्गं यस्य समासान्तः कः ।) अपामार्गवृक्षः । इति शब्दरत्नावली ॥ आपां इति भाषा । अङ्गहीने त्रि ॥

अपाङ्गदर्शनं, क्ली, (अपाङ्गेन नेत्रप्रान्तेन दर्शनं तृतीयातत्पुरुषः ।) कटाक्षः । इति हेमचन्द्रः ॥

अपाची, स्त्री, (अप + अञ्च + क्विन्, स्त्रियां ङीप् ।) दक्षिणदिक् । इति हलायुधः ॥

अपाचीनं, त्रि, (अपाच्यां दक्षिणस्यां दिशि भवं, अपाच् खः तस्य ईनः ।) अपागधं । दक्षिणदिग्भववस्तु । विपर्य्यस्तं । विपरीतं । इति विश्वमेदिन्यौ ॥

अपाच्यं, त्रि, दक्षिणदिग्भववस्तु । अपाची दक्षिणदिक् ततो भवार्थे ष्यञ्प्रत्ययः ॥ पचनायोग्यं । पचधातोः कर्म्मणि ण्यति पाच्यं पश्चान्नञ्समासः ॥

अपाटवं, क्ली, (पटोर्भावः पटु + भावे अण्, नास्ति पाटवं पटुता यत्र तत् ।) रोगः । इति हेमचन्द्रः ॥ अपटुता । जड़ता । पटोर्भावः पाटवं ततो नञ्समासः ॥

अपात्रं, क्ली, (कुत्सितं पात्रं अप्राशस्त्ये नञ्समासः ।) कुपात्रं । असत्पात्रं । यथा । "अपात्रे पतितेदत्तं सुवर्णं नरकार्णवे" । इति मलमासतत्त्वं ॥ (योग्यताहीनं । निन्दितं । विद्यातपोहीनं । दानादियोग्यताहीनं ।
"विद्येव कन्यका मोहादपात्रे प्रतिपादिता ।
यशसे न न धर्म्माय जायेतानुशयाय तु" ॥
इति कथासरित्सागरे ।)

अपात्रीकरणं, क्ली, (अनपात्रं अपात्रं कुत्सितपात्रं क्रियतेऽनेन, अपात्र + च्वि + कृ + करणे ल्युट् ।) नवविधपापमध्ये पापविशेषः । तच्चतुर्व्विधं ।

निन्दितधनादानं १ वाणिज्यं २ शूद्रसेवनं ३ असत्यभाषणं ४ । इति प्रायश्चित्तविवेकः ॥
("निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं ।
अपात्रीकरणं क्षेयमसत्यस्य च भाषणं" ॥
इति मनुः ।)

अपादानं, क्ली, (अपादीयते विश्लिष्यतेऽस्मात्, अप + आ + दा + ल्युट् ।) यस्मादवधेर्नो यस्यन्तरस्य चलनं भवति तत् । षट्कारकमध्ये पञ्चमकारकं । तच्चैकादशार्थे पञ्चमी स्यात् यथा । यतोऽपायः । यथा वृक्षात् पर्णं पतति १ । यतो भीः । यथा व्याघ्रात् बिभेति २ । यतो जुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ । यतः पराजयः । यथा सिंहात् पराजयते हस्ती ४ । यतः प्रमादः । यथा धर्म्मात् प्रमाद्यति नीचः ५ । यत आदानं । यथा भूपात् धनमादत्ते विप्रः ६ । यतो भूः । यथा पितुः पुत्रो जायते ७ । यतस्त्राणं । यथा व्याघ्रात् गां रक्षति गोपः ८ । यतो विरामः । यथा जपादिरमति विप्रः ९ । यतोऽन्तर्द्धिः । यथा गुरोरन्तर्द्धत्ते शिष्यः १० । यतो वारणं । यथा यवेभ्यो गां वारयति ११ । इति मुग्धबोधटीकायां दुर्गादासः ॥

अपानं, क्ली, (अपनयति मलादि निःसारयति, अप + अन् + णिच् + पचाद्यच् ।) मलद्वारं । तत्पर्य्यायः । गुदं २ । पायुः ३ । इत्यमरः ॥ गुह्यं ४ । गुदवर्त्म ५ । इति जटाधरः ॥ तनुरुहः ६ । मार्गः ७ । इति शब्दरत्नावली ॥

अपानः, पुं, (अपानिति अधोदेशात् निःसरति, अप + अन् + अच् ।) गुदस्थवायुः । इत्यमरः ॥ अवाग्गमनवान् पाय्वादिस्थानवर्त्ती वायुः । इति वेदान्तसारः ॥
("अधोनयत्यपानस्तु आहारञ्च नृणामधः ।
मूत्रशुक्रवहो वायुरपान इति कीर्त्यते" ॥
इत्युक्तलक्षणोऽवाग्गमनवान् लकाटिकाष्ठपार्श्वपायूपस्थवृत्तिवायुः । गुदस्थवायुः ।)
("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ" । इति भगवद्गीता ।)

अपापः, त्रि, (नास्ति पापं यस्य सः ।) निष्पापः । पापशून्यः । यथा,—
"इयं दाशरथे सीता सुव्रता ब्रह्मचारिणी ।
अपापा हि त्वया त्यक्ता ममाश्रमसमीपतः" ॥
इति रामायणं ।

अपामार्गः, पुं, (अपामृज्यते रोगो दूरीक्रियते अनेन, अप + आ + मृज् + कर्म्मणि घञ् ।) वृक्षविशेषः । आपां इति भाषा । तत्पर्य्यायः । शैखरिकः २ धामार्गवः ३ मयूरकः ४ प्रत्यक्पुष्पी ५ कीशपर्णी ६ किणिही ७ खरमञ्जरी ८ । इत्यमरः ॥ शैखरेयः ९ अधामार्गवः १० केशपर्णी ११ इति तट्टीका ॥ खरमञ्जरी १२ प्रत्यक्पुष्पी १३ क्षारमध्यः १४ अधोघण्टा १५ शिखरी १६ इति रत्नमाला ॥ दुर्ग्रहः १७ अध्वशूल्यः १८ काण्डीरकः १९ मर्कटी २० दुरभिग्रहः २१ वाशिरः २२ पलाकपुष्पी २३ कण्टटी २४ मर्कटपिप्पली २५ कटुमञ्जरिका २६ अघाटः २७ क्षारकः २८ पाण्डुकण्टकः २९ नालकण्टटः ३० कुब्जः ३१ । अस्य गुणाः । तिक्तत्वं । उष्णत्वं । कटुत्वं । कफार्शःकण्डूदरामयविषरोगनाशित्वं । धारकत्वं । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवर्द्धकत्वं । क्लेदकारित्वं । स्रंसनत्वञ्च । इति राजवल्लभः ॥*॥ तत्फलगुणाः । रसे स्वादुत्वं । पाके दुर्ज्जरत्वं । विष्टम्भित्वं । वायुकारित्वं । रूक्षत्वं । रक्तपित्तप्रसादनत्वञ्च । इति भावप्रकाशः ॥ (अपामार्गं ओषधीनां सर्व्वासामेक इद्वशीति अथर्ववेदः ।)

अपाम्पतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्यतिरित्यमरश्लोकात्वात् ॥

अपाम्पित्तं, क्ली, (अपां पित्तमिव अलुक्समासः तत्तुल्यत्वात् ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरश्लोकात्वात् ।

अपायः, पुं, (अप + इण् + भावे अच् ।) विश्लेषः । इति रामतर्कवागीशः ॥ चलनं । इति दुर्गादासः ॥ विनाशः । यथा,—
"सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्" । इति काशीखण्डं ॥

अपारं, क्ली, (नास्ति पारं यस्य तत् ।) अवारं । नद्यादेरर्व्वाक्पारं । इति हलायुधः ॥ असीमे त्रि ॥

अपावृतं, त्रि, (अप + आ + वृ + आच्छादने क्तः ।) पिहितं । आवृतं । खतन्त्रं । स्वाधीनं । इति मेदिनी ॥ (उद्घाटितं । अनावृतं । अपसारितावरणं ।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं" ।
इति गीता ।)

अपाश्रुतं, त्रि, (अप + आ + श्रु + क्तः ।) लुठितं । इति हेमचन्द्रः ॥ लोटा । गड़ागड़ि इति भाषा । (अन्तर्गितं । पराश्रुतं । निश्रुतं ।
"प्रतिग्रहादपाश्रुतः सन्तुष्टो येन केनचित्" ।
इति महाभारते ।)

अपाश्रयः, पुं, (अपाश्रियते आच्छाद्यतेऽनेन, अप + आ + श्रि + करणे अच् ।) प्राकृणावरणं । सामियाना । चाँदोया इति भाषा । तत्पर्य्यायः । मत्तालम्बः २ प्रग्रीवः ३ मत्तवारणः ४ । इति हेमचन्द्रः ॥ आश्रयशून्ये त्रि ॥ (चन्द्रातपः । निराश्रयः । आश्रितः । अधीनः ।
"ब्राह्मणापाश्रयो नित्यमुत्कृष्टां जातिमश्नुते" ।
इति मनुः ।)

अपासङ्गः, पुं, (अप + आ + सन्ज + घञ् ।) उपासङ्गः । तूणः । इत्यमरटीकासारसुन्दरी ॥

अपासनं, क्ली, (अप + अस + भावे ल्युट् ।) मारणं । इत्यमरः ॥

अपास्तं, त्रि, (अप + अस + क्तः ।) निरस्तं । यथा । एतेन नातिसन्ध्यासमीपत इत्यनेन रात्रसीवेलामात्रं निषिध्यते इति मैथिलमतमपास्तं । इति तिथ्यादितत्त्वं ॥

अपाक्तं, त्रि, (अक्तमिन्द्रियमपगतमनुगतमिति यावत्, प्रादिसमासः । अपक्तमक्ति चक्षुः कर्म्मधारयः, अच् समासान्तः । अपगतमक्ति चक्षुः कर्म्मधारयः, अच् समासान्तः ।) प्रत्यक्षं । इति चिकाण्डशेषः । कुत्सितचक्षुः । लोचनशून्यं । एतावर्थौ व्युत्पत्तिलभ्यौ ॥

अपि व्य, (न पिबति पिगतौ क्विप्, आगमशास्त्रस्यानित्यत्वान्न तुक् ।) उपसर्गविशेषः । अस्यार्थाः । आहरणं । सम्भावनं । निन्दा । अनुज्ञा । अल्पत्वं । समुच्चयः । इति दुर्गादासः ॥ प्रश्नः । शङ्का । युक्तपदार्थः । कामाचारक्रिया । इति विश्वमेदिन्यौ ।
("अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु" इति पाणिनिसूत्रम्) ॥

अपिगीर्णं, त्रि, (अपि + गॄ + कर्म्मणि क्तः ।) स्तुतं । वर्णितं । इत्यमरः ॥

अपिच्छिलः, त्रि, (न पिच्छिलः नञ्समासः ।) पैच्छिल्याभावविशिष्टः । पिच्छिलतारहितः । यथा ।
"प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलं" ।
इति माधवकरः ॥ (परिष्कृतः । अमलिनः । निर्मलः । गाढ़ः ।)

अपितु व्य, (अपि + तु ।) यद्यर्थे । यद्यपि । इति चिकाण्डशेषः ॥

अपिधानं, क्ली, (अपि + धा + भावे ल्युट् ।) आच्छादनं । अन्तर्द्धानं । इत्यमरः ॥ (आवरणं । "द्वारे पुरस्योद्घटितापिधाने" । इति कुमारसम्भवे ।
"शिलापिधाना काकुत्स्थ दुर्गे चास्याः प्रवेशनं" ।
इति रामायणे ।)

अपिनद्धं, त्रि, (अपि + नह् + कर्म्मणि क्तः, अस्य वालोपे पिनद्धश्च ।) परिहितवस्त्रादि । तत्पर्य्यायः । आमुक्तः २ प्रतिमुक्तः ३ पिनद्धः ४ । इत्यमरः ॥

अपीतः, पुं, (पा + कर्म्मणि क्तः । न पीतः, नञ्समासः ।) पीतभिन्नवर्णः । तद्विशिष्टे अक्षतपाने च त्रि इति नञ्समस्तपीतशब्दस्तावर्थौ ॥

अपीनसं, क्ली, (अपीनाय अस्थूलत्वाय सीयते कल्पते, अपीन + सो + कर्म्मकर्त्तरिकः । पीनसात् रोगविशेषात् भिन्नं नञ्समासः ।) पीनसरोगः । इति रभसः ॥ तद्रहिते त्रि ॥

अपीव्यं, त्रि, अतिसुन्दरं । यथा,—
"अपीव्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतं ।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरं" ॥
इति श्रीभागवतं ॥

अपुच्छा, स्त्री, (नास्ति पुच्छमस्याभागो यस्याः सा, टाप् ।) शिंशपावृक्षः । इति शब्दचन्द्रिका ॥ (त्रि, लाङ्गूलहीनः । शिखरहीनः ।)

अपुनर्भवः, पुं, (न पुनर्भवति न पुनरुत्पद्यतेऽस्मात्, न पुनर् + भू + अपादाने अप्, मयूरव्यंसकादित्वात् समासः ।) मुक्तिः । कैवल्यं । इति हेमचन्द्रः ॥ पुनर्जन्माभावः । यथा,—
"हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे ।
ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः" ॥
इति चरकः ॥ (कर्त्तरि अचि तु पुनर्जन्मशून्यः मुक्त इति यावत् ।)

अपुष्पफलदः, पुं, (अपुष्पं, पुष्पं विना फलं ददाति,

अपुष्पफल + दा + कर्त्तरि कः, उपपदसमासः ॥) पनसवृक्षः । इति राजनिर्घण्टः ॥ पुष्पव्यतिरेकजातफलवृक्षमात्रं ॥ (अहेतुकफलदातरि त्रि)

अपूपः, पुं, (न पूयते विशीर्य्यति, न + पूय + पः, यलोपः ।) पिष्टकः । इत्यमरः ॥ गोधूमः । इति राजनिर्घण्टः ॥

("हयाश्वसरसं यावं पायसापूपमेव च" । इति मनुः ।)

अपूप्यः, पुं, (अपूपाय हितः "विभाषा हविरपूपादिभ्यः" इति पाणिनिसूत्रेण यत् ।) गोधूमचूर्णं । इति जटाधरः ॥ मयदा इति भाषा ।

अपूरणी, स्त्री, (न पूरयति पुष्पगन्धेन मनःप्रीतिं पूर्णां करोति निर्गन्धत्वात्, पूर + णिच् + कर्त्तरि ल्युट्, स्त्रियां ङीप् ततो नञ्समासः ।) शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥

अपूर्ब्ब, क्ली, (नास्ति पूर्ब्बं पूर्ब्बकालभवं दृष्टं यस्य तत् ।) कर्म्मजन्यमदृष्टं । तत्पर्य्यायः । अनुशयः २ नियोगः ३ अतिशयः ४ कार्य्यं ५ प्रयोगः ६ । इति स्मृतिः ॥ तच्चतुर्विधं यथा । फलापूर्ब्बं १ समुदायापूर्ब्बं २ उत्पत्त्यपूर्ब्बं ३ अङ्गापूर्ब्बं ४ । येन स्वर्गं आरभ्यते तत् फलापूर्ब्बं । अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्यामपरः तयोर्भिन्नकालवर्त्तिनोः संहत्यफलापूर्ब्बारम्भायोगात्तदारम्भाय समुदायद्वयजन्यमपूर्ब्बद्वयं कल्पनीयं । तयोरेकैकस्यारम्भाय एकैकसमुदायवर्त्तिनां त्रयाणां यागानां भिन्नवृत्तिवर्त्तित्वेन संघातापत्त्यभावात् यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्ब्बाणि कल्पनीयानि । तेषाञ्चाङ्गोपकारमन्तरेणानिष्पत्तेरङ्गानां चानेकवृत्तिवर्त्तिनां संघातासम्भवात् अङ्गापूर्ब्बाणि कल्पनीयानि । तच्च त्रयं विभागः । इत्यधिकरणमाला ॥

अपूर्ब्ब, त्रि, (नास्ति पूर्ब्बं यस्य, न पूर्ब्बः नञ्समासः) आश्चर्य्यं । यथा,—

"अपूर्ब्बेयं हरेर्माया चिगुणा रज्जुरूपिणी ।
यया मुक्तो न चलति बद्धो धावति धावति" ॥

इति उद्भटः ॥ पूर्ब्बदिग्देशकालभिन्नं ॥

अपेतराक्षसी, स्त्री, (अपेतः राक्षस इव पातकं यस्याः सा, गौरादित्वात् ङीष् ।) तुलसीवृक्षः । इति राजनिर्घण्टः ॥

अपेयं, त्रि, (पा + कर्म्मणि अर्हार्थे यत् ।) पानायोग्यं । अपानीयं । यथा,—"मद्यमपेयमदेयमनियाह्यं" । इति तिथ्यादितत्त्वे उशनःसूत्रं ॥ ("जलधिस्त्वमपेयं परिदृते निर्धनत्वं" ।) ("यैः कृतः सर्व्वभक्ष्योऽग्निरपेयश्च महोदधिः ।
त्वयी चाप्यायितः सोमःको न नश्येत्प्रकोप्यतान्" ॥ इति मनुः ।)

अपेक्षणीय, त्रि, (अप + ईक्ष + कर्म्मणि अनीयर् ।) अपेक्षायोग्यं । अपेक्ष्यं । अपेक्षितव्यं । यथा,—"आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः" । इति नवरत्नमध्ये भृर्तृः ॥

अपेक्षा, स्त्री, (अप + ईक्ष + भावे अ, स्त्रियां टाप् ।) कार्य्यनिमित्तयोरन्योन्याभिसम्बन्धः । इति सुपद्मटीकायां विष्णुमिश्रः ॥ आकाङ्क्षा । यथा,—"सा प्रक्रिया या कथमित्यपेक्षा" । इति वेदान्तटीकायां वाचस्पतिमिश्रः ॥ (आकाङ्क्षा । अभिलाषः । आशा ।

"अपेक्षा भिक्षायामपि किमपि चेतः स्खलयति" । इति शान्तिशतके । प्रयत्नः । अनुरागः । सम्माननं ।

"अलब्धं चैव लिप्सेत लब्धं रक्षेदवेक्षया ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्" ॥

इति मनुः । पर्य्यालोचनं । विचारः । अनुचिन्तनं ।

"सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" ।
इति रघुवंशे ।

"न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय" ।
इति मेघदूते ।)

अपेक्षाबुद्धिः, स्त्री, अनेकैकत्वविषयकबुद्धिः । नानैकत्वावगाहिबुद्धिः । अयमेकः अयमेक इत्याकारबुद्धिः । इति भाषापरिच्छेदः ॥

("अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" इति "अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः" इति च भाषापरिच्छेदे ।)

अपोगण्डः, त्रि, (अपगतश्चरकर्म्मणि वेदविहितकार्य्यादन्यकर्म्मणि गण्डः उद्यतः, गडि उद्यमे + पचाद्यच्, निपातनात् अपशब्दस्याकारस्य उकारः, अपसि कर्म्मणि गण्डः अतिभीरुत्वात् त्याज्यः ।) स्वभावतो न्यूनाधिकाङ्गविशिष्टः । तत्पर्य्यायः । पोगण्डः २ विकलाङ्गः ३ अङ्गहीनकः ४ । इति शब्दरत्नावली ॥ श्रिंशुः । वलिभः । त्रिवलियुक्तः । इति मेदिनी ॥ अतिभीरुः । इति विश्वो हेमचन्द्रश्च ॥ द्वे स्वभावतो न्यूनाधिकाङ्गे ऊनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादौ जने वर्त्तते इत्यर्थः । विकलं स्वभावहीनं अङ्गमस्य विकलाङ्गः । अपङ्गुलं गच्छति अपोगण्डः । नास्तीति गमेर्डः निपातनात् पस्य पोभावः ।

"अपोगण्डस्तु श्रिंशुके विकलाङ्गे च भीरुके" ।
इति विश्वः ॥ निपातनादपस्यादिलोपे पोगण्डोऽपि । पोगण्डो विकलाङ्गे स्यादिति हलायुधः ॥ पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इति तट्टीकायां भरतः ।

अपोदिका, स्त्री, (अपगतमुदकं यस्याः सा, स्त्रियां टाप्, एषोदरादित्वात् दित्वं ।) उपोदिका । पूतिकाशाकं । इत्यमरटीकायां स्वामी ॥

अपोहः, पुं, (अप + ऊह + भावे घञ् ।) अपगतऊहः । वितर्काभावः । शुश्रूषाद्यष्टधाधीगुणान्तर्गतषष्ठगुणः ।

("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः") ॥ इति हेमचन्द्रः ॥ अतद्व्यावृत्तिः । इति काव्यप्रकाशटीकायां महेश्वरः ॥

अप्नः, [स्] क्ली, (आप्यते स्वर्गो लभ्यतेऽनेन, आप + करणे तस् हस्वः ।) यज्ञकर्म्म । इत्युणादिकोषः ॥

अप्नुः, पुं, (आप्यते भोगाय प्राप्यते यः, आप् + कर्म्मणि तुः हस्वः ।) शरीरं । अङ्गं । इत्युणादिकोषः ॥ ("अथाग्नये द्वितीये यामाहुतिं जुहोति" । इति शतपथब्राह्मणः ।)

अप्नः, [स्] क्ली, (आप् + असुन् नुट् हस्वश्च ।) जलं । वेदप्रयोगोऽयं ॥

अप्पतिः, पुं, (अपां पतिः, षष्ठीतत्पुरुषः ।) वरुणः । इत्यमरः ॥ समुद्रः । अपाम्पतिरिति दर्शनात् ॥

अप्पित्त, क्ली, (अपां पित्तमिव ।) अग्निः । इत्यमरः ॥ चित्रकवृक्षः । वह्निसंज्ञकत्वात् ॥

अप्रकटः, त्रि, (न प्रकटः व्यक्तः नञ्समासः ।) अव्यक्तः । अप्रकाशः । यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते" ।
इति भागवतामृते पद्मपुराणं ॥ अस्य विवरणं लीलाशब्दे द्रष्टव्यं ॥

अप्रकाण्डः, पुं, (नास्ति प्रशस्तः काण्डः स्तम्भो यस्य सः ।) काण्डरहितवृक्षः । स तु भिण्टिकादिः । तत्पर्य्यायः । स्तम्बः २ गुल्मः ३ । इत्यमरः ॥

अप्रकाशः, पुं, (न प्रकाशः नञ्समासः ।) प्रकाशाभावः । तत्पर्य्यायः । जनान्तिकं २ । इति त्रिकाण्डशेषः ॥ (गुप्तः । अप्रकाशितः । गूढः ।

"द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् ।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ॥

इति मनुः । न प्रकाशते इति अप्रकाशः, पचाद्यच् । अन्धकारावृतः, अदृश्यः ।

"प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः" ।
इति रघुवंशे । निहितः । प्रच्छादितः । प्रोथितः ।

"यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्" ॥

इति मनुः । रहसि । परोक्षं ।

"नातताय्यिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" ॥

इति मनुः ।) तद्विशिष्टे त्रि ॥

अप्रशस्तः, पुं, (न प्रशस्तः नञ्समासः ।) काकः । इति शब्दरत्नावली ॥ अधमे त्रि ॥

अप्रखरः, त्रि, (न प्रखरः तीक्ष्णः नञ्समासः ।) प्राखर्य्यरहितः । अतीक्ष्णः । तद्धर्म्मे क्ली । खं रातीति कः खरः प्रशस्तः खरः प्रखरस्ततो नञ्समासः । (मृदुः । शान्तः ।)

अप्रगुणः, त्रि, (न प्रशस्तो गुणो धैर्य्यरूपो यस्य सः, गुणमप्राप्तः प्रादिसमासः ततो नञ्समासः ।) व्याकुलः । त्रस्तः । इत्यमरः ॥

अप्रतिकरः, त्रि, (प्रति करोति विश्वासं नोत्पादयति प्रति + कृ + कर्त्तरि अच्, न प्रतिकरः ततो नञ्समासः ।) विश्वस्तः । विश्वासपात्रं । इति जटाधरः ॥

अप्रतिपत्तिः, त्रि, अप्रतियोगी । विपत्तिशून्यः । नास्ति प्रतिपत्तो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

अप्रतिभः, त्रि, अप्रत्युत्पन्नमतिः । अप्रगल्भः । नास्ति प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा यस्य सः । इति प्रतिभान्वितशब्दार्थे भरतः ॥ (मृदुः । लज्जाशीलः । हतज्ञानः ।) (स्त्रियां उत्तरस्याप्रतिपत्ति-

रूपो नियहस्थानविशेषः, उत्तरार्हं परोक्तं बुद्धापि यत्रोत्तरामेये उत्तरं न प्रतिपद्यते तत्र अप्रतिभानिग्रहस्थानम्।)

अप्रतिरथं, क्ली, (नास्ति प्रतिरथः समः सङ्गलार्थत्वेन यस्य तत्।) यात्रा। सामवेदः। मङ्गलं। इति भूरिप्रयोगचिकाण्डशेषौ ॥ (युद्धार्थयानं। युद्धसमये यात्राकृतमङ्गलं।
"यद् यात्रा मङ्गलं साम तदप्रतिरथं विदुः" ॥ इति हारावली।)

अप्रतिरथः, पुं, (नास्ति प्रतिरथः प्रतियोद्धा यस्य सः।) योद्धा इति भूरिप्रयोगः ॥ तुल्ययोद्धृरहितः। इति पुराणं ॥
("दौष्मन्तिमप्रतिरथं तनयं प्रसूय"।
इति शाकुन्तले।
"एतेषां तमसामिवाप्रतिरथैस्तेजोभिः"।
इति महावीरचरिते।)

अप्रतिरूपकथा, स्त्री, (नास्ति प्रतिरूपा अनुरूपा कथा यस्यां सा।) अप्रतिवचना वाक्। अतुल्या कथा। तत्पर्य्यायः। सङ्गनिका २। इति त्रिकाण्डशेषः ॥

अप्रतिष्ठः, त्रि, अप्रतिष्ठितः। प्रतिष्ठारहितः। नास्ति प्रतिष्ठा यस्येति बहुव्रीहौ इखः। यथा। हयशीर्षपञ्चरात्रीयसङ्कर्षणकाण्डे।
"सर्व्वसूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते" ॥
इति मठादिप्रतिष्ठातत्त्वं ॥
("अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः"।
इति उत्तरचरिते।)

अप्रतुलं, क्ली, (प्रस्तुतस्य तुलाया अभावः, अव्ययीभावः।) प्रस्तुतपरिमाणाभावः। अनिर्द्देतिरिति लोकप्रसिद्धिः। प्रस्तुततुलारहिते त्रि। नास्ति प्रकर्षा तुला यस्य धनादेः धनादेर्वस्य वा ॥

अप्रत्ययः, पुं, (प्रति + इन् + भावे अच्, ततोनञ्समासः। नास्ति प्रत्ययः विश्वासो यस्य वा) (सन्देहः। संशयः।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" ॥
इति शाकुन्तले।) प्रत्ययाभावः। अविश्वासः। यथा "दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां"। इति श्रीशिक्षनः।

अप्रत्यक्षः, त्रि, (अक्षमिन्द्रियं प्रतिगतः प्राप्तिसमासः, न प्रत्यक्षः नञ्समासः।) प्रत्यक्षशून्यः। इन्द्रियागोचरः। तत्पर्य्यायः। अतीन्द्रियः २। इत्यमरः। ("किन्तु तस्य बलज्ञोऽहं भ्राष्टरूपस्य वैरिणः।
अप्रत्यक्षं च मे वीर्य्यं समये तव राघव" ॥)
प्रत्यक्षाभावे क्ली ॥

अप्रधानं, क्ली, (न प्रधानं, नञ्समासः।) प्राधान्यरहितं। तत्पर्य्यायः। अप्राग्र्य २ उपसर्ज्जनं ३। इत्यमरः ॥ वाच्यलिङ्गोऽप्ययं। इति भरतः ॥

अप्रमत्तः, त्रि, (प्र + मद् + क्तः, ततोनञ्समासः।) व्यवधानविशिष्टः। सावधानः। यथा,—
"पापात् पराजितो दुःखादप्रमत्तो विधेः सतः"।
इति बोपदेवः ॥

अप्रयोगः, पुं, (प्र + युज् + घञ्, ततो नञ्समासः) प्रयोगाभावः। अनुल्लेखादिः। यथा। "उक्तार्थानामप्रयोगः"। इति दुर्गादासः ॥

अप्रलम्बं, क्ली, (प्र + लम्ब + घञ्, नञ्समासः।) अविलम्बं। शीघ्रं। इति हलायुधः ॥ तद्वति त्रि। (सत्वरः। विलम्बरहितः। झटिति।)

अप्रशस्तं, त्रि, (प्र + शंस् + क्तः, नञ्समासः।) असत्। अश्रेष्ठं। अविहितं। यथा,—
"अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्"।
इति तिथ्यादितत्त्वे पराशरः ॥ (मूत्रपुरीषादिकं।
"अप्रशस्तन्तु कृत्वापु मासमादीत भक्तभुक्"।
इति मनुः।)

अप्रसन्नं, त्रि, (प्र + सद् + क्तः, नञ्समासः।) व्याविलं। अनच्छं। इति शब्दरत्नावली ॥ अतुष्टं। यथा,—
"त्वयि प्रसन्ने परशर्म्मभिः किं
त्वय्यप्रसन्ने परशर्म्मभिः किं"।
इति प्राचीनाः ॥ (अतुष्टः। अप्रफुल्लः। विषण्णः। विरक्तः। प्रतिकूलः। "अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः"। इति रामायणे।)

अप्रसिद्धं, त्रि, (प्र + सिध् + क्तः, नञ्समासः।) प्रसिद्धतारहितं। अविख्यातं। यथा,—
"लिङ्गं सामर्थ्यं रूढिगतं प्रसिद्धं न त्वप्रसिद्धं"।
इति तिथ्यादितत्त्वं ॥ ("अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्म" इति कुमारसम्भवे।)

अप्रस्तुतं, त्रि, (न प्रस्तुतं नञ्समासः।) अप्रक्रान्तं। प्रकरणाप्राप्तं। यथा,—"अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया"।
इति काव्यप्रकाशः ॥ अप्रशंसितं। प्रपूर्ब्बस्तुत्यर्थस्तुधातोः कर्म्मणि क्ते नञ्समासः ॥
"अप्रस्तुतप्रस्तुतयोर्द्वीपकन्तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" ॥
इति साहित्यदर्पणे।)

अप्रस्तुतप्रशंसा, स्त्री, काव्यालङ्कारविशेषः। सा च अप्राकरणिकस्यार्थस्य अभिधानेन प्राकरणिकस्याक्षेपः। तस्या लक्षणं। "अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया। सा च कार्य्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति"।
"तदन्यस्य वचस्तुल्ये तुल्यस्येति च षड्विधा" ॥
आद्यायाः उदाहरणं यथा,—
"यातः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्य्यातितरां दृशाऽसि कथयत्येवं सवाष्पे मयि। लब्धामभ्यरतारकेण निपतद्धाराश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्त्वया सूचितः" ॥
इति काव्यप्रकाशः ॥ इतरासां उदाहरणानि बाहुल्यान्नोक्तानि ॥

अप्रहतं, त्रि, (न प्रहन्यते स्म, प्र + हन् + क्तः, नञ्समासः।) अक्षतभूमिः। खिला भूमिः। इत्यमरः ॥ (वस्त्रभेदः। तल्लक्षणं तथा,—
"ईषद्धौतं नवं श्वेतं सदशं यन्त्वधारितं।
निर्नेजकाच्चालितं चाप्रहतं वास उच्यते" ॥
इति।)

अप्राग्र्यं, त्रि, (प्राग्र्यः प्रधानं नञ्समासः।) अप्रधानं। इत्यमरः ॥

अप्राचीनं, त्रि, अपुरातनं। नव्यं। प्राचीतरदिग्जातं। प्राग्भवं प्राचीनं ततो नञ्समासः ॥

अप्राप्तः, त्रि, (प्र + आप् + कर्म्मणि क्तः, नञ्समासः।) अलब्धः। यथा। "अप्राप्तप्रापको विधिः"। इति सङ्कल्पकौमुदी दुर्गादासश्च ॥ (अनधिगतः।
"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः"।
इति भाषापरिच्छेदे। अनुपस्थितः। अनागतः। न्यूनवयाः। अप्राप्तकालः।
"उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां तस्मै कन्यां दद्यात् यथाविधि" ॥
इति मनुः।)

अप्राप्तव्यवहार, पुं, (अप्राप्तः व्यवहारो येन सः, अथवा अप्राप्तः व्यवहारः व्यवहारयोग्यं वयो येन सः।) व्यवहारानभिज्ञः। अप्राप्तवयस्कः। नाबालग् इति आरबी भाषा। यथा,—
"अप्राप्तव्यवहाराणां धनं व्ययविवर्ज्जितं।
न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" ॥
इति दायतत्त्वधृतकात्यायनवचनं ॥ किञ्च।
"गर्भस्थैः सदृशो ज्ञेयः षष्ठाब्दात्सप्तमाद्भवेत् शिशुः।
बाल आषोडशाद्वर्षात् पौगण्डोऽपि निगद्यते ॥
परतो व्यवहारज्ञः स्वतन्त्रः पितराहृते" ॥
इति व्यवहारतत्त्वधृतनारदवचनं ॥

अप्राप्तिः, स्त्री, (प्र + आप् + भावे क्तिन्, नञ्समासः।) अप्रापणं। अलाभः। तद्वति त्रि। यथा,—
"तदप्राप्तिमहादुःखविलीनाग्नेयपातका" ।
इति काव्यप्रकाशकारः ॥

अप्राप्यं, त्रि, (प्र + आप् + कर्म्मणि ण्यत्, नञ्समासः।) अप्रापणीयम्। अप्राप्तव्यं। प्रपूर्ब्बादापधातोः कर्म्मणि ये नञ्समासः ॥

अप्रामाणिकः, त्रि, (प्रमाणेन सिद्धः, प्रमाण + ठक् तस्य इकः, नञ्समासः) प्रमाणानभिज्ञः। प्रमाणासिद्धः। प्रामाण्यरहितः। यथा। "अतोऽविभक्तार्जितत्वमात्रेण धनस्य साधारणत्वाभिधानमप्रामाणिकं"। इति दायभागः ॥

अप्रामाण्यं, क्ली, (प्रमाणस्य भावः, प्रमाण + भावे ष्यञ्, नञ्समासः।) प्रामाण्याभावः। यथा,—
"अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगः"।
इति पदाङ्कदूतं ॥

अप्रियं, त्रि, (प्री + कर्त्तरि कः, नञ्समासः।) अनभीष्टं। अनीप्सितं। अप्रीतिकरं। अहृद्यं। यथा,— [इति पुराणं ॥
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियं"।

अप्रियवचः, क्ली, (अप्रियं अप्रीतिकरं वचः वाक्यं कर्म्मधारयः।) निष्ठुरवाक्यं। इति पारुष्यशब्दार्थे भरतः ॥

अप्रिया, स्त्री, (न प्रिया न प्रीतिकरी लोकानां, नञ्समासः।) दुष्टस्त्रीभेदः। इति शब्दरत्नावली ॥ (अप्रीतिकरी नारी।)

अप्रीतं, त्रि, प्रीतिरहितं। असन्तुष्टं। प्रीत्यर्थप्रीधातोः कर्त्तरि क्ते नञ्समासः॥

अप्रेतराक्षसी, स्त्री, (न प्रेता प्राप्ता राक्षसमिव पातकं प्रादिसमासः, गौरादित्वात् ङीष्।) अपेतराक्षसी। तुलसी। इति रत्नमाला॥

अप्सरसः, स्त्री, (अप्सु समुद्रजलेभ्यः सरन्ति उद्यान्ति, अप्+सृ+असुन्।) सर्व्वेशाः। उर्व्वशीमेनकाद्याः। बहुवचनान्तोऽयं शब्दः। इत्यमरः॥ ("अप्सु निर्मथनादेव रसात् तस्मात् वरस्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्" ॥)

अप्सरा, स्त्री, सर्व्वेशा। इति शब्दरत्नावली। ("स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि"। इति शब्दार्णवे।)

अफलः, त्रि, (नास्ति फलं वृक्षोत्पन्नं धर्म्मोत्पन्नं वा यस्य सः।) विफलः। निष्फलः। इति हेमचन्द्रः॥ फलकाले अनुत्पन्नफलकवृक्षः। तत्पर्य्यायः। बन्ध्यः२ अवकेशी३। इत्यमरः॥ भावुकवृक्षः। इति शब्दचन्द्रिका॥

अफला, स्त्री, (नास्ति फलं यस्या सा।) भूम्यामलकी।

अफेनं, क्ली, (निन्दितं फेनं निर्य्यासो यस्य तत्।) वृक्षनिर्य्यासविशेषः। आफिं इति भाषा। तत्पर्य्यायः। खसखसरसं २ निफेनं ३ अहिफेनकं ४ अस्य गुणाः। सन्निपातनाशित्वं। शुक्रबलमोहकारित्वञ्च॥ तत्तु चतुर्व्विधं। एकं श्वेतवर्णं। अग्निजीर्णताकारकत्वान्नाम जारणं। द्वितीयं कृष्णवर्णं। मृत्युकारकत्वान्नाम मारणं। तृतीयं पीतवर्णं। वयःस्तम्भनकारकत्वान्नाम धारणं। चतुर्थं कर्व्बूरवर्णं। मलसारकत्वान्नाम सारणं। इति राजनिर्घण्टः॥ (त्रि, फेनरहितः। "अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्म्मवित्"। इति मनुः।)

अब इ ड शब्दे। इति कविकल्पद्रुमः॥ इ अभ्यते। ड अभ्यते अभ्यां पुत्रः। इति चतुर्भुजः दुर्गादासश्च॥

अबद्धं, त्रि, (बन्ध+क्तः, नञ्समासः।) प्रकृतानुपयोगिवचनं। समुदायार्थशून्यवाक्यं। अनर्थककथा। इत्यमरः॥

("जरद्गवः कम्बलपादुकाभ्यां।
द्वारि स्थितो गायति मङ्गलानि॥
तं ब्राह्मणी पृच्छति पुत्रकामा।
राजन् रुमायां लशुनस्य कोऽर्थः"॥
इत्याद्यस्य विषयः। अनियन्त्रितः। स्वाधीनः। मुक्तः।) बन्धनशून्यं॥

अबद्धकं, त्रि, (बन्ध+क्तः, नञ्समासः, स्वार्थे कन्।) समुदायार्थशून्यवाक्यं। इति शब्दरत्नावली॥

अबद्धमुखः, त्रि, (न बद्धं नञ्समासः, अबद्धं यथाभिलाषकथनेन अप्रतिबद्धं मुखं यस्य सः।) अप्रियवादी। दुर्म्मुखः। इत्यमरः॥ (स्त्रियां वा ङीप् अबद्धमुखी अबद्धमुखा)।

अबध्यं, त्रि, (हन्तुमयोग्यं हन्+अर्हार्थे कर्म्मणि यत्, "हनोवा वधच" इति वधादेशे। वधमर्हति इति वध्यः, न वध्यः, नञ्समासः।) अनर्थकवाक्यं। बधायोग्यं। इति मेदिनी॥ ("अबद्धाश्च स्त्रियं प्राऽऽहुस्तिर्य्यग्योनिगतामपि"। इति स्मृतिः। बधदण्डायोग्ये ब्राह्मणे च, "बधः सर्व्वस्वहरणं पुरान्निर्व्वासनाङ्कने"। "तदङ्गच्छेदइत्युक्तो दण्ड उत्तमसाहसः। अविशेषेण सर्व्वेषामेष दण्डविधिः स्मृतः॥ बधादृते ब्राह्मणस्य न बधं ब्राह्मणोऽर्हति"॥ इति मिताक्षरायां।)

अबन्ध्यः, त्रि, (बन्ध+ण्यत्, न बन्ध्यः अफलः नञ्समासः।) सफलः। फलकाले फलयुक्तवृक्षः। तत्पर्य्यायः। फलेग्रहिः २। इत्यमरः॥ फलग्रहिः ३। इति तट्टीका॥ अमोघफलोदयः ४। इति राजनिर्घण्टः॥ ("इयेष सा कर्त्तुमबन्ध्यरूपतां"। इति कुमारसम्भवे। "याच्ञामाग्रं सितावन्ध्यप्रार्थनं"। "कर्म्मभिरप्यबन्ध्यैः"। इति रघुवंशे।)

अबलं, त्रि, (नास्ति बलं सामर्थ्यं यस्य तत्।) बलरहितं। दुर्ब्बलं। यथा। "अबलस्कुलाग्निनो भसात्"। इति नैषधं॥

अबलः, पुं, (नास्ति बलं यस्य सः, क्षणभङ्गुरत्वात् तस्य तथात्वं।) वरुणवृक्षः। इति शब्दचन्द्रिका॥

अबला, स्त्री, (नास्ति बलं यस्याः सा।) नारी। इत्यमरः॥ ("तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी"। इति मेघदूते।)

अबाधं, त्रि, (नास्ति बाधा यस्य तत्।) बाधशून्यं। अनिवारितं। तत्पर्य्यायः। निरर्गलं२। इत्यमरः। अनर्गलं३ उच्छृङ्खलं४ उद्दाम५ अनियन्त्रितं६ निरङ्कुशं७। इति हेमचन्द्रः॥ बाधा पीड़ा तया हीनञ्च॥ (अङ्गशास्त्रे त्रिभुजांशविशेषः। अस्फुटत्वं। अविष्पटता। जटिलीभावः।)

अबिन्धनः, पुं, (आपस्य इन्धनमुद्दीपनसाधनं यस्य सः।) वाड़वाग्निः। इति सन्देहभञ्जिका॥ ("अबिन्धनं वह्निमसौ बिभर्त्ति"। इति रघुवंशे।)

अबोधः, पुं, (बुध+भावे घञ्, नञ्समासः।) अज्ञानं। यथा। "निसर्गदुर्बोधमबोधविक्लवाः"। इति भारविः॥ बहुव्रीहौ त्रि॥ (अज्ञानः। मूढः॥ अनभिज्ञः। हतबुद्धिः। किङ्कर्त्तव्यविमूढः।)

अब्ज, क्ली, (अप्सु जायते, अप्+जन+कर्त्तरि डः, उपपदसमासः।) पद्मं। इति मेदिनी॥ दशार्व्बुदसंख्या। शतकोटिः। इति लीलावती॥

अब्जः, पुं, (अब्जः जायते, अप्+जन्+डः।) चन्द्रः। धन्वन्तरिः। निचुलवृक्षः। इति मेदिनी॥

अब्जः, पुं, क्ली, (अब्जः जायते, अप्+जन+डः।) शङ्खः। इति मेदिनी॥ (जलभवशुक्तिमुक्तादिकं।) "अब्जमश्ममयञ्चैव राजतञ्चानुपस्कृतं"। "अब्जेषु चैव रत्नेषु सर्व्वेष्वश्ममयेषु च"। इति मनुः।)

अब्जजः, पुं, (अब्जात् विष्णुनाभिपद्मात् जायते, अब्ज+जन्+कर्त्तरि डः।) ब्रह्मा। इति त्रिकाण्डशेषः॥

अब्जभोगः, पुं, (अब्जस्य शङ्खस्य भोग इव शरीरमिव भोगो यस्य सः।) पद्मकन्दः। इति शब्दचन्द्रिका॥

अब्जयोनिः, पुं, (अब्जं विष्णुनाभिपद्ममेव योनिरुत्पत्तिस्थानं यस्य सः।) विधाता। ब्रह्मा। इत्यमरः॥

अब्जवाहनः, पुं, (अब्जमिव शङ्खवत् शुभ्रं वाहनं रथो यस्य सः।) शिवः। इति त्रिकाण्डशेषः॥

अब्जहस्तः, पुं, (अब्जं पद्मं हस्ते यस्य सः।) सूर्य्यः। इति हेमचन्द्रः॥

अब्जिनी, स्त्री, (अब्जानां समूहः, अब्ज+पुष्करादित्वात् इनि, स्त्रियां ङीप्।) पद्मिनी। इति राजनिर्घण्टः॥ पद्मसमूहः। पद्मलता। पद्मयुक्तदेशः। इति नलिनीशब्दटीकायां भरतः॥

अब्जिनीपतिः, पुं, (अब्जिन्याः पद्मसमूहस्य पतिः, षष्ठीतत्पुरुषः।) सूर्य्यः। इति हेमचन्द्रः॥

अब्दः, पुं, (अवति सीमानं रक्षति अव+"अज्ञादय" इति दन् नेषपर्व्वतविशेषपक्षे तु अपो ददाति, अप्+दा+कर्त्तरि कः।) वत्सरः। मेघः। मुस्ता। इति मेदिनी॥ पर्व्वतविशेषः। इति विश्वः॥

अब्दसारः, पुं, (अब्दस्य मुस्तायाः सारः मूलनिर्य्यासः।) कर्पूरभेदः। इति राजनिर्घण्टः॥

अब्धिः, पुं, (आपो जलानि धीयन्तेऽत्र, अप्+धा+अधिकरणे किः, उपपदसमासः।) समुद्रः। इत्यमरः॥

अब्धिकफः, पुं, (अब्धेः समुद्रस्य कफ इव कफाकारतया तस्य तादृशत्वं।) समुद्रफेनः। तत्पर्य्यायः। हिण्डीरः २। फेनः ३। इत्यमरः॥

अब्धिजौ, पुं, (अब्धौ जायेते अब्धि+जन+कर्त्तरि डः, उपपदसमासः।) अश्विनीकुमारौ। द्विवचनान्तोऽयं शब्दः। इति हेमचन्द्रः॥

अब्धिद्वीपा, स्त्री, (अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा यस्याः सा।) पृथिवी। इति त्रिकाण्डशेषः॥

अब्धिनगरी, स्त्री, (अब्धेः समुद्रस्य सन्निहिता नगरी।) द्वारकापुरी। इति त्रिकाण्डशेषः।

अब्धिनवनीतकः, पुं, (अब्धेः समुद्रस्य नवनीतमिव, षष्ठीतत्पुरुषः।) चन्द्रः। इति शब्दरत्नावली॥

अब्धिफेनः, पुं, (अब्धेः समुद्रस्य फेनः, षष्ठीतत्पुरुषः।) समुद्रफेनः। इति राजनिर्घण्टः॥

अब्धिमण्डूकी, स्त्री, (अब्धिं समुद्रं मण्डयति, अब्धि+मण्ड+ऊक, स्त्रियां ङीष्।) मुक्ताक्षोटः। शुक्तिः। इति हेमचन्द्रः॥ झिनुक इति भाषा॥

अब्धिशयनः, पुं, (अब्धौ प्रलये समुद्रे शेते, शी+बाहुलयात् कर्त्तरि ल्युट्, सप्तमीतत्पुरुषः।) विष्णुः। इति हेमचन्द्रः॥ (नारायणोहि प्रलये अब्धौ शेते, यदुक्तं,—
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः"।
इति मनुः।)

अब्धिसम्भवः, पुं, (अब्धेः समुद्रस्य अग्निः, षष्ठीतत्पुरुषः।) वड़वानलः। इति हेमचन्द्रः॥

अभक्तः, पुं, (अपोभक्षयति, अप+भक्ष+शिलिकाभिभक्षाचरिभ्यो ण इति कर्त्तरि णः, उपपदसमासः।) सर्पः। इति त्रिकाण्डशेषः।

अम्भं, क्ली, (अपो बिभर्त्ति, अप्+भृ+कर्त्तरि कः।) मेघः। इत्यमरः। मुस्ताटङ्गं। अभ्रकधातुः। इति राजनिर्घण्टः॥

अम्भ्रमातङ्गः, पुं, (अम्भस्, मेघस्य अधिपः मातङ्गः शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च।) ऐरावतः। इत्यमरः॥

अम्भिः, स्त्री, (अपः नौकामलापनयनाय बिभर्त्ति धारयति, अप्+भृ+किः।) काष्ठकुद्दालः। नौकामलापनयनार्थकुद्दालाद्यतिकाष्ठं। इत्यमरः॥ (परशादिद्रव्याणां समर्थीकरणपात्रं। तीक्ष्णाग्रो लोहदण्डः।

"अम्भिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः। पलालभारकं षण्ढे मैसकञ्चैकमासकं"॥

इति मनुः।)

अम्भेयं, त्रि, (अम्भे मेघे भवं, अभ्र+घ तस्य इय।) मेघोद्भववस्तु। इत्यमरः॥

अब्रह्मचर्य्यकं, क्ली, (ब्रह्मचर्य्यविरोधि, विरोधे नञ्समासः। ततः स्वार्थे कन्।) मैथुनं। इति त्रिकाण्डशेषः॥ ब्रह्मचर्य्यशून्ये च॥

अब्रह्मण्यं, क्ली, (ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु, ब्रह्मण्+यत्, नञ्समासः।) नाथोक्तौ नायं वध इत्याकारोक्तिः। अवधयाच्ञा। तत्पर्य्यायः। अवधोक्तिः २। इत्यमरः॥ ("नेपथ्ये अब्रह्मण्यमब्रह्मण्यं। अन्यान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितं"।

इति उत्तरचरिते। वेदविरुद्धं अतिनिन्दितं कर्म्म। निरतिशयव्यसनशोकादिप्रकाशोक्तिरियं।)

अभ इ ड ध्वनौ। इति कविकल्पद्रुमः॥ इ अभ्यते। ड अभ्यते। इति दुर्गादासः॥

अभयं, क्ली, (भयस्याभावः इत्यव्ययीभावः, यद्वा नास्ति भयं यस्मात् तत्, हरीतक्यां दुर्गामूर्त्तिभेदे च स्त्री।) वीरणमूलं। इत्यमरः॥ भयाभावः। ("नातः परतरो धर्म्मो नृपाणां यद्दयार्द्रितं"। विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा"।

इति याज्ञवल्क्यः।

"योदत्वा सर्व्वभूतेभ्यः प्रव्रजत्यभयं गृहात्। तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः"॥

इति मनुः।)

"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी"॥

इति श्रीभगवद्गीता॥ भयरहिते त्रि। इति विश्वः॥

अभयडिण्डिमः, पुं, (अभयाय स्वयोद्भूभयाभावायडिण्डिमः।) युद्धढक्का। सङ्ग्रामपटहः। इति त्रिकाण्डशेषः॥

अभया, स्त्री, (नास्ति भयं यस्याः सा।) हरीतकी। इत्यमरः॥ चम्पादेशजातपद्मगिरा हरीतकी। सा नेत्ररोगे प्रशस्ता। इति राजवल्लभः॥ (दुर्गा।)

अभक्ष्यं, त्रि, (भक्ष+कर्म्मणि ण्यत्, नञ्समासः। अभक्ष्यणीयं। अखाद्यं। यथा,—

"अधार्य्यं चर्म्म मे सद्भिः करिष्यसि किमस्थिभिः। अभक्ष्यं चैव मे मांसं त्वादृशैर्ब्रह्मचारिभिः"॥

इति रामायणं॥ (भोजनायोग्यं वस्तु, भक्षणाय मन्वादिभिः शास्त्रकारैः निषिद्धं द्विजातिभिः वर्ज्जनीयं वस्तु। तानि च यथा, लशुनगृञ्जनपलाण्डुाख्यानि चीणि स्थूलकन्दशाकानि। विष्ठादिजातानि तण्डुलीयादीनि च। लोहितवृक्षनिर्य्यासः। क्षेदनोद्भववृक्षनिर्य्यासः। ग्रेलुफलं। गव्यं। पेयुषञ्च। देवाद्यनुद्देशेन आत्मार्थं पक्वाः क्षुसरसंयावपायसापूपाः। असंस्कृत पशुमांसं। नैवेद्यार्थमन्नानि निवेदनात् प्राक्। हवींषि च होमात् प्राक् इत्यादि।)

अभाजनं, क्ली, (न भाजनं, नञ्समासः।) अपात्रं। अयोग्यं। यथा,—

"दीधीवेवीट्समः कश्चित् गुणवद्ब्रोरभाजनं। क्षिप्रप्रत्ययनिभः कश्चिच्च सन्निहित न ते"॥

इति काव्यप्रकाशः॥ पात्ररहिते त्रि॥

अभावः, पुं, (भू+भावे घञ्, नञ्समासः।) मरणं। असत्ता। इति विश्वमेदिनौ॥

"अस्ति पुत्रो वशे यस्य भृत्योभार्य्या तथैवच। अभावे सति सन्तोषः स्वर्गस्थोऽसौ महीतले"॥

इति चाणक्यः।

("अन्यभावे तु विप्रस्य प्राणावेवोपपादयेत्। साध्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः"॥

इति मनुः।) द्रव्यादिषट्कभिन्नः। स द्विविधः। संसर्गाभावः १ अन्योन्याभावश्च २। इति भाषापरिच्छेदः॥ भावशून्यः भावः स्थायिभावादिरिति अलङ्कारशास्त्रं॥

अभावनीयः, त्रि, अचिन्तनीयः। चौरादिकचिन्तनार्थभूधातोः कर्म्मण्यनीये नञ्समासः॥

अभाषणं, क्ली, (भाष्+ल्युट्, नञ्समासः।) अकथनं। मौनं। इत्यमरः॥

अभि, व्य, (न भाति, न+भा+कि।) उपसर्गविशेषः। अस्यार्थाः। समन्तात्। उभयार्थः। वीप्सा। इत्यमरभावः। धर्षणं। इति दुर्गादासः॥ अभिलाषः। आभिमुख्यं। इति मेदिनी॥ चिह्नं। इति वोपदेवहेमचन्द्रौ॥

अभिकः, त्रि, (अभिकामयते इति अनुकाभिकेति साधुः।) कामी। कामुकः। इत्यमरः॥

अभिक्रमः, पुं, (अभि+क्रम+घञ्। नोदात्तेति वृद्धभावः। अभिक्रम्यते कर्म्मणा प्रारभ्यते इति व्युत्पत्त्या कर्म्मारब्धफले प्रारम्भे च।) अभीतयोधादेर्युद्धे शत्रुसम्मुखगमनं।

आरोहणं। इति हेमचन्द्रः॥

अभिख्या, स्त्री, (अभि+ख्या+अङ्।) नाम। शोभा। कीर्त्तिः। इति मेदिनी॥ आख्यानं। इति शब्दरत्नावली॥ (शोभा। सौन्दर्य्यं। रमणीयता। [इति रघुवंशे।

"काव्यभिख्यां तयोरासीत् व्रजतोः शुद्धवेशयोः"।

"कामप्यभिख्यां स्फुरितैरपुण्यदासन्नलावण्यफलोऽधरोष्ठः"।

इति कुमारसम्भवे। यक्षः॥)

अभियुक्तः, त्रि, (अभि+युज्+कर्म्मणि क्तः।) शत्रुणाक्रान्तः। इत्यभियुक्तशब्दार्थे अमरः। (अभियुक्तः।)

अभिग्रहः, पुं, (अभि+ग्रह्+भावे अप्।) अभियोगः। इत्यमरः॥ कलहाह्वानं। अपचिकीर्षया अतिक्रम्याक्रमणं। आभिमुख्येन युद्धादिप्रवृत्तिः। इति तट्टीकायां भरतः॥ गौरवं। अभिग्रहणं। इति मेदिनी॥ लुट् इति भाषा। (चौर्य्यकरणं।)

अभिग्रहणं, क्ली, (अभि+ग्रह+भावे ल्युट्।) अभिहारः। इत्यमरः॥ चौर्य्यकरणं। सम्मुखे हरणं। इति तट्टीकायां भरतः॥ (साहसं। अपचिकीर्षया अतिक्रम्याक्रमणं।)

अभिघातः, पुं, (अभि+हन्+भावे घञ्।) दण्डादिभिरभिहननं। आघातः। यथा,—

"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।

इति माधवकरः॥ प्रत्यादौ कवर्गादिवर्गाणां पूर्व्वस्थितचतुर्थद्वितीयतृतीयचतुर्थवर्गाः क्रमेण परस्थितवर्गैकैकद्विचिवर्णयुक्ताः। तत्र क्ली। यथा—

"अभिघातं स्यात् पूर्व्वं वेदद्वित्र्यब्धिवर्गाश्चेत्। नगवर्गाणां परतो धरणीचन्द्रद्विरामाख्याः"॥

इति केरलग्रन्थः॥ (प्रहारः। अभिहननं। आघातः।

"चक्षद्भुजभ्रमितचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य"।

इति वेणीसंहारे। सङ्घर्षणं। संमर्द्दः। पीड़नं। क्लेशदानं। शोकक्षोभः।

"सम्भवांश्च वियोनीषु दुःखप्रायासु नित्यशः। शीतातपाभिघातांश्च विविधानि भयानि च"॥

इति मनुः। प्रतीकारः। अपसारणं।)

अभिघाती, [न्] पुं, (आभिमुख्येन हन्ति, अभि+हन्+णिनि।) शत्रुः। इत्यमरः॥ (विपक्षः॥ आक्रमणकारी।

"एकदा न विगर्ह्यीयात् बह्वन् राजाभिघातिनः। सदर्पोऽप्युरगः कीटैर्बहुभिर्नश्यति ध्रुवं"॥

इति हितोपदेशे। पीड़ाजनकः। आघातकारी।

"सुव्यवस्थितमन्त्रेण परमर्म्माभिघातिना। भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना"।

इति रामायणे। प्रतीकारः। अपसारणं।)

अभिघारः, पुं, (अभि घार्य्यते समन्तात् वह्नौ सिच्यते, अभि+घृ क्षरणे णिच्+अच्।) घृतं। इति राजनिर्घण्टः॥

अभिचरः, पुं, (आभिमुख्येन सेवायै चरति, अभि+चर्+ट।) दासः। भृत्यः। इति हेमचन्द्रः॥

अभिचारः, पुं, (आभिमुख्येन शत्रुबधार्थं चारः कार्य्यकरणं अभि+चर+भावे घञ्।) हिंसाकर्म्म। इत्यमरः॥ अथर्ब्ववेदोक्तमन्त्रयन्त्रादिनिर्य्यादितमारणोच्चाटनादिहिंसात्मककर्म्म। इति भरतः॥ मारणादिफलकतान्त्रिकप्रयोगविशेषः। स षड्विधः। मारणं १ मोहनं २ स्तम्भनं ३ विद्वेषणं ४ उच्चाटनं ५ वशीकरणं ६। इति तन्त्रसारः॥ उपपातकविशेषः। इति प्रायश्चित्तविवेकः॥ स तु श्येनादियज्ञेनानपराधस्य मारणं। इति कुल्लूकभट्टः॥ यथा,—

"हिंसौषधीनां स्त्रीजीवोऽभिचारो मूलकर्म च"। इति मनौ ११ अध्यायः ॥ * ॥ अथाभिचारः। "ॐ विरूढे रूपिणि चण्डिके वैरिणममुकं देहि देहि स्वाहा"। इति खड्गमभिमन्त्र्य खड्गमन्त्रांश्च पठित्वा खड्गं संपूज्य छागादिकमसुकोऽसि इति वैरिनाम्नाभिमन्त्र्य रक्तसूत्रेण त्रिधा मुखं बद्धा वैरिनाम्ना प्राणप्रतिष्ठां कृत्वा।

"ॐ अयं स वैरी यो द्वेष्टि तमिमं पशुरूपिणं। विनाशय महादेवि स्त्रीं स्त्रीं खादय खादय"॥

इति पठित्वा बलिशिरसि पुष्पं दत्त्वा बलिमन्त्रं पठित्वा बलिं संपूज्य अद्यास्मिन् मासि महानवम्यां अमुकगोत्रोऽमुकदेवशर्म्मा अमुकशत्रुनाशाय इमं छागं महिषं वा अमुकदेवतं भगवत्यै दुर्गायै तुभ्यमहं सम्प्रददे। इत्युत्सृज्य आं क्रूं फट् इति क्षिप्त्वा मूलं पठित्वा एतद्रुधिरं दुर्गायै नमः। इति रक्तं शिरश्च दत्त्वा अष्टाङ्गमांसैर्होमं मूलमन्त्रेण कुर्य्यादिति तन्त्रसारः॥

अभिचारी, [न्] त्रि, (अभिचरति शत्रुवधार्थं कर्म्म करोति, अभि + चर + णिनि।) अभिचारकर्त्ता। तन्त्रादिशास्त्रोक्तानिष्टकारी। अभिपूर्ब्बचरधातोः कर्त्तरि णिन्॥

अभिजनः, पुं, (अभिजायतेऽत्र, अभि + जन् + आधारे घञ्, डुड्यभावः।) ख्यातिः। जन्मभूमिः। कुलश्रेष्ठः। वंशः। इति मेदिनी॥ (अन्वयः। "अभिजनतपोविद्यावीर्य्यक्रियातिशयैर्निजैः"। इति महावीरचरिते।

"कथं दशरथाज्जातः शुद्धाभिजनकर्म्मणः"। इति रामायणे।)

अभिजातः, त्रि, (अभिजन् + भावे क्तः, अभिमतं प्रशस्तं जातं जन्म यस्य सः।) सुन्दरः। न्याय्यः। इति विश्वः॥ कुलजः। कुलीनः। बुधः। पण्डितः। इत्यमरः॥ (श्रेष्ठवंशोद्भवः।

"जात्यन्तेनाभिजातेन शूरः शौर्य्यवता कुशः। अमन्यतैकमात्मानमनेकं वह्निनां वशी"॥

इति रघुवंशे।

"न स्त्रेच्छितव्यं यज्ञादौ स्त्रीषु नापक्वतं वदेत्। सङ्कीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतं"॥

इति मनुः। उचितः। उपयुक्तः। योग्यः। सुरूपः। मनोहरः। मान्यः। पूज्यः। धन्यः। श्राघ्यः। भगवान्। सम्भ्रान्तः।)

अभिजित्, क्ली, (अभि + जि + क्विप्।) दिवसस्याष्टममुहूर्त्तः। कुतपकालइति प्रसिद्धः॥ यथा,—

"अपराह्णे तु संप्राप्ते अभिजिद्रोहिणोदये। यदत्र दीयते जन्तोस्तदक्षयमुदाहृतं"॥

इति मत्स्यपुराणं॥ नक्षत्रविशेषः। तत्तु तारकाचयात्मकषड्भाटकाकृति। उत्तराषाढायाः शेषपञ्चदशघटिकाः श्रवणायाः प्रथमदण्डचतुष्टयं एतदूनविंशतिदण्डात्मकमभिजिद्भवति॥ इति ज्योतिषं॥ तत्र जातफलं।

"अतिसुललितकान्तिः सम्मतः सज्जनानां ननु भवति विनीतस्त्यागकीर्त्तिः सुवेषः। द्विजवरसुरभक्तो व्यक्तवाङ्मानवः स्याद-भिजिति यदि सूतिर्भूपतिः खस्रवंशे"॥

इति कोष्ठप्रदीपः॥

अभिज्ञः, त्रि, (अभि साकल्येन जानाति, अभि + ज्ञा + कर्त्तरि कः।) प्रवीणः। निपुणः। विज्ञः। इत्यमरः॥ (बोद्धा। दक्षः। कुशलः।

"अभिज्ञाश्चेदपातानां क्रियन्ते नन्दनद्रुमाः"।

"अनभिज्ञास्त्वभिसाणां दुर्दिनेष्वभिसारिकाः"।

इति कुमारसम्भवे।)

अभिज्ञानं, क्ली, (अभिज्ञायतेऽनेन, अभि + ज्ञा + करणे ल्युट्।) चिह्नं। इति हेमचन्द्रः। (अङ्कः। लक्षणं।

"एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः"।

इति मेघदूते। स्मृतिः। ज्ञानभेदः।

"एवमुक्त्वा तु रामेण हनूमान् वानरर्षभः। पूर्ब्बवृत्तमभिज्ञानं भूयः संप्रत्यभाषत"॥

इति रामायणे। सोऽयमितिज्ञानसाधनं चिह्नं। स्मरणार्थमङ्गुरीयादिकं चिह्नं। "अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुरीयकः"। इति भट्टिकाव्ये।)

अभितः, [स्] अव्य, (अभि + तसिल्।) प्रीप्सां। साकल्यं। आभिमुख्यं। उभयतः। "अङ्गान्यद्याद्दीदभितः प्रधानं"। इति भट्टिकाव्ये।) समीपं। इति मेदिनी॥

अभिधर्षणं, क्ली, (अभि + धृष् + भावे ल्युट्।) रक्षःपिशाचभूतादेरभिभङ्गः। इति महाभारतं॥ सर्व्वतोभावेन धर्षणञ्च॥

अभिधा, स्त्री, (अभि + धा + करणे भावे च अङ्, स्त्रियां टाप्।) नाम। इति हेमचन्द्रः॥ न्यायमते शब्दशक्तिः। मीमांसामते विधिसमवेतविधिव्यापारीभूतपदार्थः। तस्या लक्षणं। "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते"। इति काव्यप्रकाशः॥ * ॥ तत्र "सङ्केतितार्थस्य बोधनादग्रिमाभिधा"। इति साहित्यदर्पणं॥ (आख्या। आज्ञा। अभिधानं। नामधेयं।)

अभिधानं, क्ली, (अभिधीयते अनेन, अभि + धा + करणे ल्युट्।) नाम। इत्यमरः॥ कथनं। यथा। "तवाभिधानाद्व्यथते ननाननः"। इति भारविः॥ शब्दकोषः। यथा। "क्षुत्तद्धितसमासानामभिधानं नियामकं"। इति वोपदेवः॥ (आख्या। नामधेयं।

"आख्याज्ञ अभिधानञ्च नामधेयञ्च नाम च"।

इत्यमरः। "शिखरिणि क्षणु नाम कियच्चिरं किमभिधानमसावकरोत्तपः"। इति साहित्यदर्पणे। उक्तिः। उल्लेखः। निर्देशः।)

अभिधेयं, क्ली, अभिधानं। नाम। ("इति प्रयोजनाभिधेयसम्बन्धाः" इति वोपदेवः।) अभिधीयते अनेनेति करणे यः॥

अभिधेयं, त्रि, (अभि + धा + कर्म्मणि यत्।) अभिधागम्यं। वाच्यं। प्रतिपाद्यं। यथा। "इति प्रयोजनाभिधेयसम्बन्धाः"। इति वोपदेवः॥

अभिध्या, स्त्री, (अभि + ध्यै ड + अङ् + टाप्।) परस्वे विषयस्पृहा। इत्यमरः॥ परद्रव्ये निस्पृहा। दोषचिन्तापूर्ब्बकं परस्वे लिप्सा इत्येके। विषयप्रार्थना। इति स्वामी। विषयस्य लाभस्य स्पृहा विषयस्पृहा विषयेण चौर्य्यादिना स्पृहा इति तृतीयासमासः इत्यन्ये। विषयिस्पृहेतिपाठे परस्वविषये विषयितया स्पृहा निस्पृहाभावः। इति कश्चित् इति कौमुदी। इत्यमरटीकायां भरतः॥ अभिलाषः। इति रायमुकुटः॥

अभिनन्दनः, पुं, (अभिनन्दयति, अभि + नदि + णिच् + ल्युट्) बुद्धविशेषः। चतुर्थस्तीर्थंकरजिनोऽयं। इति हेमचन्द्रः॥ सर्व्वतोभावेनानन्दजनके त्रि॥

अभिनयः, पुं, (अभिनीयते हृद्गतक्रोधादिभावः प्रकाश्यतेऽनेन अभि + नी + करणे अच्। हृद्गतक्रोधादिभावाभिव्यञ्जकः। अङ्गुल्यादिना व्यक्तीकृतमनःकार्य्यं। तत्पर्य्यायः। व्यञ्जकः २। इत्यमरः॥ दृश्यकाव्यं। रङ्गादिभिर्नटैः रामयुधिष्ठिरादीनामवस्थानुकरणं। स चतुर्व्विधः। आङ्गिकः १। वाचिकः २। आहार्य्यः ३। सात्त्विकः ४। इति साहित्यदर्पणं॥ ("तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्"। इति उत्तरचरिते।)

अभिनवः, त्रि, (अभि + नु + भावे अप्।) नूतनः। इत्यमरः॥

("अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्"।

इति शाकुन्तले।)

अभिनवोद्भित्[द्] पुं, (अभिनवं यथातथा उद्भिनत्ति उद्भिद्य जायते, अभिनव + उत् + भिद् + कर्त्तरि क्विप्।) अङ्कुरः। इत्यमरः॥

अभिनिर्मुक्तः, पुं, (अभि साकल्येन सायन्तनकार्य्येण निर्मुक्तः।) सूर्य्यास्तकालशायी। यस्मिन् मुने सूर्य्योऽस्तं याति सः। इत्यमरः॥

("सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः। प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा"॥

इति मनुः।)

अभिनिर्याणं, क्ली, (शत्रुमभिलक्षीकृत्य निर्य्याणं निर्गमः।) विजिगीषोः प्रयाणं। यात्रा। इत्यमरः॥ (जिगीषया गमनं।

"यत्नेनयाभिनिर्य्याणं स्मृतं तदभिषेणनम्"।

इति हलायुधः।)

अभिनिवेशः, पुं, (अभि + नि + विश् + भावे घञ्।) मनःसंयोगविशेषः। मनोनिवेशः। आवेशः। शास्त्रादौ प्रवेशः। तत्पर्य्यायः। निबन्धः २। इति हेमचन्द्रः॥ योगशास्त्रमते मरणजन्यभयजनकाविद्याविशेषः॥ (आग्रहः। अवश्यमिदं कर्त्तव्यमित्यादिरूपोऽध्यवसायः। दृढ़सङ्कल्पः।

"इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशं"।

इति रघुवंशे।

"अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा"

इति कुमारसम्भवे। आसक्तिः। अनुरागः। अभिलाषः। "बलीयान् खलु मेऽभिनिवेशः"। इति शाकुन्तले।)

अभिनिष्ठानः, पुं (अभि + नि + ष्ठन् + घञ्, अभिनिसः स्तनः शब्दसंज्ञायां इति षत्वं।) विसर्गः। अक्षरं। इति मेदिनी॥

अभिनीतः, त्रि, (अभि + नी + क्तः।) युक्तः। न्याय्यः। अतिसंस्कृतः। प्रशस्तो भूषितो वा। अमर्षी। क्रोधनः अल्पभाग्यवान् वा। इत्यमरः॥ ("अस्मिन्नेव प्रकरणे धनञ्जयमुदारधीः। अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः"। इति महाभारते। विज्ञः। धीरः।

"स भवान् वित्तसम्पन्नः स्थितः पथि निरत्यये। मित्रार्थमभिनीतत्वं यथावत् कर्त्तुमर्हसि"। इति रामायणे।)

अभिनेता, [तृ] त्रि, (अभि + नी + कर्त्तरि तृच्।) अभिनयकर्त्ता। केचो संओयाला इत्यादि भाषा। इति नाटकप्रसिद्धं॥

अभिपन्नः, त्रि, (अभि + पद् + कर्त्तरि क्तः।) अपराद्धः। अपराधवान्। आपदृतः। प्राप्तविपत्तिः। अभियस्तः। ग्रहगणाक्रान्तः। इत्यमरः॥ (स्त्रीकृतः। अङ्गीकृतः। अभिभूतः। पीड़ितः।

"दाहप्रपाकौ शिशिराभिनन्दाः। पित्ताभिपन्नेनयने भवन्ति"।

"दृष्टिर्दोषाभिपन्ना"। इति सुश्रुते।)

अभिप्रायः, पुं, (अभि + प्र + इण् + भावे अच्।) इच्छाविशेषः। तत्पर्य्यायः। आशयः २ छन्दः ३। इत्यमरः॥ आकूतं ४ भावः ५। इति जटाधरः। (अभिसन्धिः। हृद्गतो भावः।

"दुर्य्योधन ममाप्येतत् हृदि संपरिवर्त्तते। अभिप्रायस्य पापत्वात् नैवं तु विहतोऽस्म्हं"। इति महाभारते। [इति मनुः।)

"तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्"।

अभिप्रेतं, त्रि, (अभि + प्र + इण् + क्तः।) अभिप्रायविषयीभूतं। अभीष्टं। यथा,—

"कामाय तु हितं काम्यमभिप्रेतार्थसिद्धये। पार्व्वणेन विधानेन तदप्यक्षं खगाधिप"॥ इति भविष्यपुराणं॥ (वाञ्छितः। सम्मतः।)

अभिभवः, पुं, (अभि + भू + भावे अप्।) गर्व्वनाशः। परिभवः। पराभवः। इति शब्दरत्नावली हेमचन्द्रश्च॥ (पराजयः। तिरस्कारः।

"रघोरभिभवाशङ्कि सुप्तभे दिवतां मनः"। इति रघुवंशे।

"बलवानपि निस्तेजाः कस्य नाभिभवास्पदं"। इति हितोपदेशे।)

अभिभूतः, त्रि, (अभि + भू + क्तः।) ज्ञानरहितः। तत्पर्य्यायः। इतिकर्त्तव्यतामूढ़ः २ विहस्तः ३ व्याकुलः ४ अभिभायः ५ विप्लवः ६ विह्वलः ७। इति जटाधरः॥ पराभूतः। भग्नदर्पः। तत्पर्य्यायः। आत्तगर्व्वः २। इति जटाधरः॥ आत्तगन्धः ३। इत्यमरः॥ अभिहतः ४। इति तट्टीका॥

("दैत्याभिभूतस्य युवामवोढ़ं मग्नस्य दोर्भिर्भुवनस्य भारम्"। इति भट्टिः।)

अभिभूतिः, स्त्री, (अभि + भू + भावे क्तिन्।) अनादरः। अवज्ञा। इति शब्दरत्नावली। (पराभवः। पराजयः। मानभङ्गः। निकारः।

"अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः"। इति भारविः।)

अभिमतं, त्रि, (अभि + मन् + कर्म्मणि क्तः।) इष्टं। सम्मतं। यथा,—

"अभिमतफलशंसी चारु पुष्कोर बाहुस्तरुषु चुकुवुरुच्चैः पक्षिणस्त्वानुकूलाः"। इति भट्टिः॥ (हृद्यः। प्रियः। हृदयङ्गमः।

"स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः"। इति कुमारसम्भवे।

"अनिशमपि मकरकेतुर्मनसो-रुजमावहन्नभिमतो मे"॥ इति शाकुन्तले।)

अभिमन्त्रणं, क्ली, (अभि + मन्त्र + करणे ल्युट्।) आह्वानं। आकारणं। इति हेमचन्द्रः॥ डाकन् इति भाषा। (मन्त्रपाठेन संस्कारकरणं। यथा,—

"दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्"। इति याज्ञवल्क्यः।)

अभिमन्थ्यं, क्ली, (अभि मथ्यते चक्षुः पीड्यतेऽनेन, अभि + मन्थ + करणे घञ्।) चक्षूरोगः। इति चिकित्साशेषे॥ अधिमन्थ इति वैद्यके पाठः। तस्य निदानसम्प्राप्तिरूपाणि।

"दृष्टैरेतैरभिष्यन्दैर्नराणामक्रियावतां। तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः॥ उत्पाद्यत इवात्यर्थं नेत्रं निर्म्मथ्यते तथा। शिरसोऽर्द्धञ्च तं विद्यादधिमन्थं खलक्षणैः"॥ स तु चतुर्विधः। यथा। "हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात्। षड्रात्राद्वै वातिकः संनिहन्यान्मिथ्याचारात् पैत्तिकः सद्य एव"॥ इति माधवकरः॥

अभिमन्युः, पुं, (अभिमन्यते युद्धार्थं, अभि + मन् + युच्, निपातनात् अनादेशाभावः।) अर्জ্জুনपुत्रः। स तु सुभद्रागर्भजातः। इति महाभारतं॥

अभिमरः, पुं, (अभिम्रियतेऽस्मात्, अभि + मृ + अप्) युद्धं। वधः। खसैन्यभयं। इति विश्वमेदिन्यौ॥ बन्धनं। इति जटाधरः॥ (संहारः। समरः। अवरोधः। खपक्षाद्भयं। सङ्कटस्थजनिर्गमः। प्राणनिरपेक्षो यो द्रव्य हेतोः याड़ हस्तिनं वा योधयति सः अभिमरः इत्येके।)

अभिमर्दः, पुं, (अभि + मृद् + भावे घञ्।) अवमर्दः। पीड़नं। सम्परायः। युद्धं। इति मेदिनी॥ (शत्रुकृतपीड़नं। विपक्षराजस्य उच्छेदसाधनं।

"कृतोऽभिमर्दः कुरुभिः प्रसह्य"। इति महाभारते।)

अभिमातिः, पुं, (अभि + मा + कर्त्तरि क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभिमानः, पुं, (अभि + मन् + भावे घञ्।) अर्थादिना दर्पः। तत्पर्य्यायः। अहङ्कारः २ गर्व्वः ३ ज्ञानं ४ बोधः ५ प्रणयः ६ प्रेमप्रार्थना ७ हिंसा ८ हननं ९। इत्यमरभरतौ॥ स्मयः १० अवलेपः ११ दर्पः १२ अवष्टम्भः १३ टङ्कः १४। इति जटाधरः॥ अपि च।

"गर्व्वो मदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः। स्यादुद्धतमनस्कत्वे मानश्चित्तसमुन्नतिः। अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥ इति शब्दरत्नावली॥

अभिमानितं, क्ली, (अभिमानः जातोऽस्य, अभिमानः + इतच्। अभिमान्यतेऽत्र, अभि + मन् + णिच् + आधारे क्तः।) सुरतं। मैथुनं। इति चिकित्साशेषः॥ अभिमानयुक्ते त्रि॥ (गर्व्वः। मदः। दर्पः।)

अभिमानी, [न्] त्रि, (अभिमन्यते, अभि + मन् + णिनि।) अभिमानयुक्तः। अभिमानग्रस्तः। यथा,—

"कर्त्ता शतच्छलानां शतमयशरणोद्दीपितः सोऽभिमानी"। इति वेणीसंहारः॥

अभिमायः, त्रि, (मायामविद्यामधिगतः, प्रादिसमासः।) इतिकर्त्तव्यतामूढ़ः। अभिभूतः। इति जटाधरः॥

अभिमुखं, त्रि, (अभिगतो मुखं। अव्ययादयः क्रान्ताद्यर्थे द्वितीयया इति समासः।) सम्मुखं। इति जटाधरः॥

अभियातिः, पुं, (युद्धार्थमभिमुखं यातिः गमनं, अभि + या क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभियाती, [न्] पुं, (युद्धार्थमभियानं गमनं, अभि + या + भावे क्तः; इनि।) शत्रुः। इत्यमरटीकायां रायमुकुटः॥

अभियुक्तः, त्रि, (अभि + युज् + क्तः।) तत्परः। परकार्य्यकरुद्यतः। इति मेदिनी॥

("उद्दामेन दिरदपतिना सन्निपत्याभियुक्तः"। इति उत्तरचरिते।

"अभियुक्तो यदा पश्येत् न किञ्चिद्धितमात्मनः। युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह"। इति हितोपदेशे।) स्मृतिशास्त्रमते अभियोगविषयीभूतः। आसामी इति ख्यातः। तत्पर्य्यायः। प्रत्यर्थी २ प्रतिवादी ३। यथा,—

"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवं। मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"॥ इति व्यवहारतत्त्वे नारदः॥

अभियोक्ता, [क्तृ] त्रि, (अभि + युज् + कर्त्तरि तृच्।) अभियोगकर्त्ता। विवादकर्त्ता। फरियादी इति ख्यातः। तत्पर्य्यायः। वादी २ अर्थी ३। यथा,—

"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि। तदा कालः प्रदातव्यः कार्य्यशक्त्यनुरूपतः"॥ इति व्यवहारतत्त्वे नारदः॥

अभियोगः, पुं, (अभि + युज् + भावे घञ्।) अप-

राधादियोजनं। अन्येन विरोधे स्वार्थसम्बन्धितया राजसमीपे कथनं। आह्वास नालिश इति ख्यातः। यथा,—
"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्"।
इति याज्ञवल्क्यः॥ युद्धार्थाह्वानं। इति रायमुकुटः॥ अपकारकरणेच्छापूर्ब्बकाक्रमणं। तत्पर्य्यायः। अभिग्रहः २। इत्यमरः॥ उद्योगः। इति हेमचन्द्रः॥
("स प्रापदप्राप्तपराभियोगं
नरेन्द्रगुप्तं नगरं मङ्कर्त्तात्"।
इति कुमारसम्भवे।)

अभिरामः, त्रि, (अभिरमते मनोऽत्र, अभि + रम् + आधारे घञ्।) रुचिरः। सुन्दरः। इति हेमचन्द्रः॥ (मनोहरः। मनोज्ञः। रमणीयः। आनन्दकरः।
"मनोऽभिरामाः हरयस्तो रथनेमिस्वनोन्मुखैः"।
इति रघुवंशे।)

अभिरूप, पुं, (अभिलक्ष्यं रूपमस्य।) पण्डितः। इति हेमचन्द्रः॥ कामदेवः। चन्द्रः। शिवः। विष्णुः। इति शब्दरत्नावली॥

अभिरूपः, त्रि, (अभिरूपयति शास्त्रार्थं निरूपयति, अभिरूप + णिच् + अच्।) मनोहरः। पण्डितः। इति मेदिनी॥ ("इयं हि रसभावविशेषदीक्षागुरोः विक्रमादित्यस्याभिरूपभूयिष्ठा परिषद्"। इति शाकुन्तले।)

अभिलापः, पुं, (अभिलप्यते मानसं कर्म्म कथ्यतेऽनेन, अभि + लप् + करणे घञ्।) शब्दः। इति चिकाण्डशेषः॥ सङ्कल्पाङ्गवाक्यं। यथा। "काम्याभिलाषसहितः कुशतिलजलत्यागरूपः सङ्कल्पः शास्त्रार्थः"। इति प्रक्रमाधिकरणं॥ (वचनं। कथनं। वाक्यं।
"तथाभिलाषसंसर्गयोग्यत्वविरहान्न च।
सविकल्पकसंवेद्यः"। इति साहित्यदर्पणे।)

अभिलावः, पुं, (अभि + लू + भावे घञ्।) छेदनं। इत्यमरः॥

अभिलाषः, पुं, (अभि + लष + भावे घञ्।) लोभः। तत्पर्य्यायः। इच्छा २ आकाङ्क्षा ३ स्पृहा ४ ईहा ५ वट् ६ वाञ्छा ७ लिप्सा ८ कामः ९ तर्षः १० मनोरथः ११। इत्यमरः॥ काङ्क्षा १२ कान्तिः १३ रुक् १४ रुचिः १५ दोहदः १६ अभिलासः १७। इति शब्दरत्नावली॥ श्रद्धा १८ हृष्या १९ मतिः २० छन्दः २१। इति जटाधरः॥ ("भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः"। इति शाकुन्तले। "अतोऽभिलाषे प्रथमं तथाविधे"। इति रघुवंशे।) सङ्गमेच्छा २२। इति रसमञ्जरी॥

अभिलाषी, [न्] त्रि, (अभि + लष् + णिनि।) अभिलाषयुक्तः। यथा,—
"जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत्"।
इति रघुवंशे॥

अभिलाषुकः, त्रि, (अभि + लष् + शीलार्थे उकञ्।) अभिलाषयुक्तः। तत्पर्य्यायः। लुब्धः २ गृध्नुः ३ गर्द्धनः ४ हृष्णुक् ५। इत्यमरः॥ लोभी ६ विलासविभवानसः ७। इति जटाधरः॥
("जयमत्रभवान् नूनमरातिष्वभिलाषुकः"।
इति भारविः।)

अभिलासः, पुं, (अभि + लस् + भावे घञ्।) अभिलाषः। इच्छा। इत्यमरटीकासारसुन्दरी॥

अभिवादः, पुं, (अभि + वद + भावे घञ्।) अप्रियवाक्यं। तत्पर्य्यायः। पारुष्यं २। इत्यमरः॥ (वन्दना। प्रणतिः। प्रणामः।
"अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्"॥
इति मनुः।)

अभिवादकः, त्रि, (अभि + वद् + णिच् + ण्वुल्।) वन्दनशीलः। तत्पर्य्यायः। वन्दारुः २। इत्यमरः॥ अप्रियवक्ता। पारुष्यार्थाभिपूर्ब्बवदेः कर्त्तरि ण्वुकः॥ (प्रणामकारी। अभिवादनकारी।
"आगतोऽस्मीत्युवाचैनं भवन्तमभिवादकः"।
इति शकुन्तलोपाख्यानं।)

अभिवादनं, क्ली, (अभिमुखीकरणाय वादनं नामोच्चारणपूर्ब्बकनमस्कारः, अभि + वद् + णिच् भावे ल्युट्।) नामोच्चारणपूर्ब्बकनमस्कारः। अभिवादये भो अमुकशर्म्माहमित्येवंरूपः। तत्तु पादस्पर्शपूर्ब्बकनमस्कारः। तत्पर्य्यायः। पादग्रहणं २। इत्यमरः॥
("अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि संप्रवर्द्धन्ते आयुर्विद्यायशोबलं"॥
इति मनुः।)

अभिव्याप्तिः, स्त्री, (अभि + वि + आप् + भावे क्तिन्।) सर्व्वावस्थानं। सर्व्वतोवृत्तिः। तत्पर्य्यायः। संमूर्च्छनं २। इत्यमरः॥

अभिशपनं, क्ली, (अभि + शप् + भावे ल्युट्।) मिथ्याभिशंसनं। अभिशापः। अभिपूर्ब्बशपधातोर्भावेऽनट्॥

अभिशप्तः, त्रि, (अभि + शप् + क्तः।) प्राप्ताभिशापः। शापयुक्तः। यथा,—
"न नामग्रहणं कुर्य्यात् कृपणस्य गुरोस्तथा।
भार्य्याया अभिशप्तस्य जनकस्य विशेषतः"॥
इति मेघदूतटीका॥
("न क्रुध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्ज्जयन्"।
इति रामायणे। "अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्"। इति कुमारसम्भवे।)

अभिशस्तः, त्रि, (अभि + शंस् + क्तः।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितः। मैथुनं प्रति याचितः। इति केचित्। उपपन्नपातकः। इति केचित्। मिथ्यादूषितमात्रं। इति केचित्। इति भरतः॥ तत्पर्य्यायः। आचारितः २ ख्यापितः ३। इत्यमरः॥ (प्राप्तापवादः। अभिशप्तवृत्तः।
"वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा।
नाग्निर्ददाह रोमाणि सत्येन जगतः सृप्रः"॥
इति मनुः। विनिन्दितः। विगर्हितः। पातककर्त्ता। [इति मनुः।)
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयीः"।

अभिशस्तिः, स्त्री, (अभि + शंस् + भावे क्तिन्।) लोकापवादः। इति हेमचन्द्रः॥ ("स्यमन्तकं च सत्राजिताय दत्त्वा मिथ्याभिशस्तिविमुक्तम् अवाप"। इति विष्णुपुराणे।) याच्ञा। इत्यमरः॥

अभिशापः, पुं, (अभि + शप् + घञ् वृद्धिः।) स्वर्गस्तेयं त्वया कृतमित्यादिमिथ्यादूषणं वाक्यं। मिथ्यापवादः। तत्पर्य्यायः। मिथ्याभिशंसनं २। इत्यमरः॥ क्रोधात् द्विजादिभिर्दुःखाभिधारणं। इति पुराणं॥ ब्राह्मणगुरुवृद्धसिद्धानां अनिष्टाभिशंसनं। इति विजयरक्षितः॥
("यस्याभिशापात् दुःखार्त्तो दुःखं विन्दति नैषधः"।
इति नलोपाख्याने।)

अभिषङ्गः, पुं, (अभि + सञ्ज + घञ् उपसर्गादितियः।) पराजयः। आक्रोशः। शपथः। इति मेदिनी॥ मिथ्यापवादः। इति मधुरानाथः॥ आलिङ्गनं। इत्यमरटीकायां रायमुकुटः॥ सर्व्वतोभावेन सङ्गः। इति हलायुधः॥ भूताद्यावेशः। यथा,—
"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।
इति माधवकरः॥ (पराभवः। परिभूतिः।
"जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः"।
इति रघुवंशे।
"तीव्राभिषङ्गप्रभवेन वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणां"।
इति कुमारसम्भवे। शोकः। दुःखं। "अभिषङ्गजड़ं विजज्ञिवागिति शिष्येण किलान्ववोधयत्"। इति रघुः।)

अभिषवः, पुं, (अभि + सु + अप्, गुणः षत्वञ्। यज्ञः। स्नानं। मद्यसन्धानं। तत्तु चिरस्थापितमदेत्यादिकक्षयं। इति मेदिनी॥ यज्ञस्नानं सोमलतापानञ्च। तत्पर्य्यायः। सूत्या २ सवनं ३। इत्यमरः॥
("भवेदभिषवः स्नाने मद्ये सन्धानयज्ञयोः"।
इति मेदिनी)

अभिषवं, क्ली, काञ्जिकं। इति हलायुधः॥ काँजि इति भाषा।

अभिषुतं, क्ली, (अभि + सु + क्तः षत्वं।) काञ्जिकं। इत्यमरः॥

अभिषेकः, पुं, (अभि + सिच् + भावे घञ्।) स्नानं।
इति चिकाण्डशेषः॥
("एकदा सोऽभिषेकार्थमाजगाम महानदीं"।
इति विष्णुपुराणे।
"निर्वृत्तयर्थ्यन्यजलाभिषेकां।
वासोवसानामभिषेकयोग्यं"।
इति कुमारसम्भवे।)
अथ ७दोलयाचाभिषेकदव्याणि लिख्यन्ते। शीतलजलं १ गोमयं २ गोमूत्रं ३ दुग्धं ४ दधि ५ घृतं ६ कुशोदकं ७ शङ्खोदकं ८ चन्दनोदकं ९ कुङ्कुमोदकं १० फलोदकं ११ पुष्पोदकं १२ चन्दनपिष्टमलयुद्वर्त्तनं १३ सुगन्धिजलं १४ तेनाष्टवारस्नानं तत्र द्वितीयसप्तमाष्टमवारेषु दुग्धघृत-

अभि

मधुयोजनं । गन्धोदकं १५ । तेन पञ्चधा स्नानं । तीर्थजलं १६ गङ्गोदकं १७ वल्मीकतोयं १८ सर्व्वौषधिजलं १९ सहस्रधाराजलं २० घटोदकं २१ केषाञ्चिन्मते अष्टोत्तरशतघटोदकं । इति उत्कलखण्डं ॥ * ॥ अथ रुद्रयन्दिकेश्वरपुराणोक्तानि ७दुर्गापूजाभिषेकद्रव्याणि लिख्यन्ते । पिष्टामलकीयुक्तहरिद्रा १ । तया दर्पणप्रतिबिम्बे देवीमुद्दिश्य यथाक्रमं वक्ष्यमाणप्रत्येकद्रव्येण मन्त्रं पठित्वा स्नापयेत् । शुद्धजलं २ शुद्धजलं ३ गङ्गाजलं ४ गन्धोदकं ५ पञ्चगव्यं प्रत्येकं यथा—गोमूत्रं ६ गोमयं ७ दुग्धं ८ दधि ९ घृतं १० कुशोदकं ११ पञ्चामृतं १२ शिशिरोदकं १३ मधु १४ पुष्पोदकं १५ इक्षुरससागरोदके १६ सर्व्वौषधिमहौषधिजलं १७ पञ्चकषायोदकं १८ अष्टमृत्तिकाः १९ फलोदकं २० उष्णोदकं २१ सहस्रधाराजलं २२ अष्टकलसोदकं यथा । व्योमगङ्गाम्बुपूर्णोऽयकलसः २३ मेघतोयपूर्णद्वितीयकलसः २४ सारस्वततोयपूर्णतृतीयकलसः २५ सागरोदकपूर्णचतुर्थकलसः २६ पद्मरेणुमिश्रितजलपूर्णपञ्चमकलसः २७ निर्झरोदकपूर्णषष्ठकलसः २८ सर्व्वतीर्थाम्बुपूर्णसप्तमकलसः २९ शुद्धजलपूर्णाष्टमकलसः ३० ॥ * ॥ नानापद्धतिषु द्रव्याणां व्युत्क्रमपुनरुक्त्याधिक्यानि सन्ति यत्र यान्युक्तातिरिक्तद्रव्याणि तानि लिख्यन्ते । यथा । नदी १ नारिकेल २ रत्न ३ दृष्टि ४ कर्पूर ५ चन्दन ६ अगुरु ७ स्वर्ण ८ रजत ९ गोरोचना १० कुङ्कुम ११ श्रीफल १२ धान्य १३ दूर्व्वा १४ शर्करा १५ सरोवर १६ अक्ष १७ गङ्गासागर १८ पद्मपुष्प १९ तिल २० कृद २१ पुष्करिणी २२ कूप २३ फलमूल २४ अर्घ्य २५ घटचतुष्टय २६—जलानि । शीतलजल २७ । तिलतैलं १ गन्धतैलं २ । नदीकूल १ वराहदन्त २ वेश्याद्वार ३ राजद्वार ४ वृषशृङ्ग ५ वल्मीक ६ चतुष्पथ ७ गोद्वार ८ देवद्वार ९ गङ्गा १०—मृत्तिकाः । गजदन्त ११ नद १२ उभयकूल १३ नागर १४ गोष्ठ १५ त्रिपथ १६—मृत्तिका इति केचित् । पञ्चामृतं प्रत्येकं सर्व्वौषधिमहौषधी पृथक् । पञ्चकषायाः प्रत्येकं । पञ्चामृतातिरिक्तमधुघृतदुग्धानि ॥ उद्वर्त्तनद्रव्ये केवलहरिद्रा इति केचित् । तैलहरिद्रा इति केचित् । गन्धपिष्टपद्मपुष्पचूर्णमिति केचित् ॥ कालीपुराणदेवीपुराणोक्तपद्धतिष्वपि तथा । तासां मध्ये पूर्व्वोक्तातिरिक्तद्रव्याणि लिख्यन्ते । यथा । प्रवाल १ मरकत २ पद्मराग ३ मुक्ता ४ माणिक्य ५ वैदूर्य्य ६ पद्म ७ कह्लार ८ कुमुद ९ खड्ग १० अलक्त ११ वापी १२ रक्तचन्दन १३ नानातीर्थ १४ हरिद्रा १५ पिष्ट १६ शालितण्डुल १७ सिद्धार्थ १८—जलानि । पञ्चतीर्थमृत् १ । विष्णुतैलं १ ॥ उद्वर्त्तनद्रव्यं तैलहरिद्रायुक्तामलकी १ ॥ * ॥ अथ रुद्रयन्दिकेश्वरदेवीकालीपुराणपद्धत्युक्ताष्टकलसस्नानकालीनरागिणी रागवाद्यानि ॥

पुं । रागरागिण्यौ । वाद्यं ।

अभि

दं । मालसी १ मङ्गलोत्सवः १
दें । वाराड़ी १ इन्द्रविजयः १
कां । मालवः १ विजयः १

दं । देवकीरी २ भुवनविजयः २
दें । मालवगौड़ः २ मङ्गलविजयः २
कां । ललिता २ दुन्दुभिः २

दं । वाराड़ी ३ विजयः ३
दें । मालवः ३ देवोत्सवः ३
कां । विभाषा ३ दुन्दुभिः ३

दं । देशालः ४ राजाभिषेकः ४
दें । देशालः ४ घनतालः ४
कां । भैरवी ४ वंशी ४

दं । धानुषी ५ मधुरी ५
दें । मालवी ५ मधुकरः ५
कां । कोड़ा ५ इन्द्राभिषेकः ५

दं । भैरवी ६ करतालः ६
दें । भैरवी ६ ढक्का ६
कां । वाराड़ी ६ शङ्खः ६

दं । गुज्जरी ७ वंशी ७
दें । वसन्तः ७ शङ्खः ७
कां । वसन्तः ७ पञ्चशब्दः ७

दं । वसन्तः ८ पञ्चशब्दः ८
दें । कोड़ा ८ मृदङ्गः ८
कां । धानुषी ८ विजयः ८

अथ देवप्रतिष्ठाभिषेकद्रव्याणि । नदी १ नद २ सागर ३ निर्झर ४ -मेघजलानि ५ पञ्चामृतं ६ कुशोदकसहितपञ्चगव्यं ७ अश्वखुर ८ गजदन्त ९ पर्व्वत १० कुश ११ वल्मीकमृत्तिकाः १२ तिलतैलं १३ घृतं १४ पञ्चकषायोदकं १५ आम्र १६ चम्पक १७ शमी १८ पद्म १९—करवीरपुष्पाणि २० तुलसी २१ कुन्द २२—श्रीफलपत्राणि २३ तिलकल्कगालितगुडलिल्वपत्रामलकचूर्णान्यतममार्जनद्रव्यं २४ उष्णोदकं २५ तीर्थोदकं २६ अष्टोत्तरशतकुम्भाः तदर्द्धं वा विंशतिर्वा एको वा २७ । वैदिकाष्टोत्तरशतपलेन लौकिकषष्ट्यधिकशतत्रयतोलकमितेन जलेन पृथक् पृथक् घटेन द्रव्यमालोथ कार्य्यं ॥ अशक्तौ तु । वल्मीकमृत्तिका । गोमयं । शुष्कगोमयं । भस्मयुक्तपरिमितजलं । गन्धयुक्तजलञ्च । इति देवप्रतिष्ठातत्त्वं ॥ * ॥ अथ राजाभिषेकद्रव्याणि । व्याघ्रचर्म्मास्तीर्णालङ्कृतस्वर्णभद्रासनं १ गङ्गायमुनासङ्गमजलं २ यावत्पुण्यनदीजलं ३ पूर्व्वमुखनदीजलं ४ पश्चान्मुखनदीजलं ५ तिर्य्यङ्नदीजलं ६ सर्व्वसमुद्रजलं ७ क्षीरिवृक्षप्रवालयुक्तपद्मोत्पलविमिश्रितालङ्कृतकाञ्चनपूर्णकुम्भाः ८ छत्रं ९ रोचना १० घृतं ११ मधु १२ दुग्धं १३ दधि १४ पुण्यतीर्थमृत्तिका १५ पुण्यतीर्थजलं १६ मङ्गलद्रव्यं १७ मणिदण्डश्वेतचामरद्वयजनं १८ माल्यभूषितश्वेतच्छत्रं १९ श्वेतवृषः २० श्वेताश्वः २१ महागजवरः २२ वराभरणभूषितायकन्याः २३ सर्व्ववादित्राणि २४ अलङ्कृतवन्दी २५ । इति वाल्मीकिरामायणे अयोध्याकाण्डं ॥ * ॥ अथ राजाभिषेकविधिः । पुरोहितो राज्ञः प्रजापालनाधिकारसिद्ध्यर्थं परदिनेऽभिषेके कर्त्तव्ये पूर्व्वदिने गणेशमाटकापूजनपुण्याहवाचननान्दीप्रभृति पूर्व्वाह्णे कुर्य्यात् । राजा राज्ञी च नियमं कृत्वा उपवासं कुर्य्यात् । परदिने अमात्यसामन्तसहितः पुरोहितः कृतमङ्गलस्नानौ राज्ञीराजानौ मणिकाञ्चनपृथिवीपुण्याणि स्पर्शयित्वा नानारत्नचन्द्रातपोपशोभितमण्डपमध्ये व्याघ्रचर्म्माच्छादितासने उपवेशयेत् । ततः पूर्व्वोत्तरनीचां वेदीं कृत्वा तत्र स्वगृह्योक्तविधिनाग्निं संस्थाप्य घृताक्ताः पलाशाश्वत्थशमीसमिधो वैदिकैर्मन्त्रैर्जुहुयात् । तत औडुम्बरस्रुवेण वैदिकमन्त्रैर्घृताज्जुहुयात् । ततः सर्व्वतोभद्रमण्डपे स्थापितस्वर्णरजतताम्रमृण्मयकलसस्थसर्व्वौषधिपल्लवैलालवङ्गादि-सुगन्धिद्रव्यसंवासितपुण्यनदीतोयं सुवर्णविभूषितशङ्खेन ऋत्विग्भिः सह गृहीत्वा तूर्य्यघोषैर्मङ्गलपाठैः राजसूयवाजपेयमहाभिषेकोक्तसूक्तमन्त्रैः सस्त्रीकं राजानं प्राङ्मुखं मूर्द्धि कन्याभिः सहाभिषिञ्चेत् । ततोऽगात्यादयः सर्व्वे अभिषिञ्चेयुः । ततः पुरोहितमन्त्रिसामन्तप्रकृतिपुरुषा अलङ्कृताभिः कन्याभिः सह सुवासोगन्धमाल्याद्यलङ्कृतराज्ञीराज्ञोर्ललाटे कुङ्कुमागुरुकस्तूर्य्यादिद्रव्यैस्तिलकं दद्युः । ततो राज्ञो मूर्द्धि किरीटं दत्त्वा छत्रचामरादिराजचिह्नद्रव्याणि समुपकल्पयेयुः । ततो दुन्दुभिस्तिपुण्याहचतुर्व्वेदघोषैः स्वकुलक्रमागतनाम्ना त्वमुकत्वं राजा भव इत्युक्ता राजोपरि श्वेतकुसुमलाजाक्षतादि विकिरेयुः । ततो वन्दिनो मागधाश्च स्तुतिं कुर्य्युः । ततो ब्राह्मणा आशिषं कुर्य्युः । ततः अमात्यादयः राज्ञे उपायनानि दत्त्वा नमस्कुर्य्युः । इति महाभारतादयः ॥ * ॥

अभिषेचनं, क्ली, (सेनया अभियानम् । सेनाशब्दात् णिच्, ल्युट् । उपसर्गात् सुनोतीति षत्वम् ।) शत्रुं प्रति सेनासहितगमनं । सेनया सह करणभूतया वा विजिगीषोः शत्रोराभिमुख्येन गमनं । इत्यमरभरतौ ॥ ("यत् सेनयाभिगमनमरौ तदभिषेचनम्" । इत्यमरः ।)

अभिष्टुतं, त्रि, (अभि + स्तु + कर्म्मणि क्तः ।) वर्णितं । स्तुतं । इत्यमरः ॥ ("अभिष्टुतो विश्वसृजा प्रसूतेः" । इति भागवतपुराणे ।)

अभिष्यन्दः, पुं, (अभि + स्यन्द + घञ् । "अनुविपर्य्यभिनिभ्यः स्यन्देरप्राणिषु" इति षत्वं ।) अतिवृद्धिः । आस्रावः ।

"अलकामतिवाह्यैव वसतिं वसुसम्पदाम् ।
स्वर्गाभिष्यन्दमनं कृत्वेवोपनिवेशितम्" ॥
इति कुमारसम्भवे ।) चक्षूरोगविशेषः । इति मेदिनी ॥ तस्य निदानं सम्प्राप्तिश्च । यथा,—

"उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् स्वप्नविपर्य्ययाच्च ॥
खेदाद्रजोधूमनिषेवणाच्च

कूर्दैर्विघाताद्दमनात्तियोगात् ॥
द्रवात्तथान्नान्निशि सेवितात्च
विण्मूत्रवातक्रमनिग्रहाच्च ।
प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाच्च विपर्य्ययेण
क्लेशाभिघातादतिमैथुनाच ।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः" ॥
स च चतुर्व्विधः । यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्व्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥
निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यशिरोऽभितापाः ।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताच्छिशोथः
कण्डूप्रदेहावतिशीतता च ।
स्रावो बऋुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
तास्राश्रुता लोहितनेत्रता च
गाढ्यः समन्तादतिलोहितात्च ।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति" ॥
इति माधवकरः ॥ तस्य चिकित्सा यथा,—
"हे पादमध्ये एषुसन्निवेशे
शिरो गते हे बऋुधा हि नेत्रे ।
ताः प्रोक्षणोत्सादनलेपनादीन्
पादप्रयुक्तान्नयनं नयन्ति" ॥
प्रोक्षणं सेचनं । उत्सादनं उद्वर्त्तनं ।
"मलोग्रसंघट्टनपीड़नाद्यै-
स्ता दूषयन्ते नयनानि दुष्टाः ।
भजेन्महादृष्टिहितानि तस्मा-
दुपानदभ्यञ्जनधावनानि" ॥
मलं धूल्यादि । मलादिभिर्दुष्टाः ताः शिरानयनानि दूषयन्ते इत्यन्वयः ॥
"चक्षुष्याः शालयो मुद्गा यवा मांसन्तु जाङ्गलं ।
पक्किमांसं विशेषेण वास्तूकं तण्डुलीयकं ॥
घटोलकर्कोटकशारवेल्ल-
फलानि सर्पिःपरिपाचितानि ।
तथैव वार्त्ताकुफलं नवीनं
दृष्टेर्हितः स्वादु तथापि तिक्तः ॥
कट्वम्लगुरुतीक्ष्णोष्णमाम्रनिष्पावमैथुनं
मद्यवल्लूरपिण्याकमत्स्यशाकविरूढ़कं ।
विदाहीन्यन्नपानानि न हितान्यक्षिरोगिणः ॥
सेक आश्चोतनं पिण्डी विड़ालस्तर्पणं तथा ।
पुटपाकोऽञ्जनं चैभिः कर्ब्बैर्नेत्रमुपाचरेत्" ॥ *॥
कर्म्मविधिः । तत्र सेकविधिः ।
"सेकस्तु सूक्ष्मधाराभिः सर्व्वस्निग्धयने हितः ।
मीलितास्यस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः ॥
स चापि स्नेहनो वाते पित्ते रक्ते च रोपणः ।
लेखनस्तु कफे कार्य्यस्तस्य मात्रा विधीयते ॥
षड्भिर्वाचां शतैः स्नेहे चतुर्भिस्तैलु रोपणे ।
तैस्त्रिभिर्लेखने कार्य्यः सेको नेत्रप्रसादने ॥
निमेषोन्मेषणे पुंसामङ्गुल्याच्छोटिका तथा ।
गुर्व्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः" ॥
छोटिका टुटकी इति लोके ।
"सेकस्तु दिवसे कार्य्यो रात्रौ चात्यन्तिके गदे" ।
स यथा,—
"एरण्डदलमूलत्वक्पूतमाजं पयो हितं ।
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनं ॥
पथ्याक्षामलखस्खसवल्कलकल्केन सूक्ष्मवस्त्रेण ।
क्षत्वा पोटलिकां तामहिफेनोत्थद्रवेणाक्तां ॥
निदधीत लोचने स्यात् सर्व्वाभिष्यन्दसंक्षयः शीघ्रं ।
योगोऽयमखिलरुक्षो जगदुपकाराय कारुणिकैः ॥
शुक्ला पाणितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्दारि तिमिराणि व्यपोहति ॥
स्नानं क्षणतिलैश्चापि चक्षुष्यमनिलापहं ।
आमलैः सततं स्नानं परं दृष्टिबलावहं ॥
त्रिफलायाः कषायस्तु धावनान्नेत्ररोगजित् ।
कवलान्मुखरोगघ्नः पानतः कामलापहः" ॥ * ॥
अथाश्चोतनविधिः ।
"क्वाथश्चीरद्रवस्नेहविन्दूनां यत्तु पातनं ।
क्षुत्कुलोन्मीलिते नेत्रे प्रोक्तमाश्चोतनञ्च तत् ॥
विन्दवोऽष्टौ लेखनेषु रोपणे दशविन्दवः ॥
स्नेहने द्वादश प्रोक्तास्ते प्रीते कोष्णरूपिणः ।
उष्णे तु शीतरूपाः स्युः सर्व्वत्रैवैष निश्चयः ॥
वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलं ।
कफे तिक्तोष्णरूक्षं स्यात् क्रमादाश्चोतनं हितं ॥
आश्चोतनानां सर्व्वेषां मात्रा स्यादाकूपतोन्मिता ।
ततः परं लोचनाभ्यां भेषजाय नयो मतः ॥
आश्चोतनं न कर्त्तव्यं निशायां केनचित् क्वचित्" ।
तदुक्तं यथा,—
"विल्वादिपञ्चमूलेन स्नेहयेरण्डशिग्रुभिः ।
क्वाथ आश्चोतने कोष्णो वाताभिष्यन्दनाशनः ॥
त्रिफलाश्चोतनं नेत्रे सर्व्वाभिष्यन्दनाशनं" ॥ * ॥
अथ पिण्डीविधिः ।
"उक्तभेषजकल्कस्य पिण्डी च कोष्णमाचया ।
वस्त्रखण्डेन संबद्धाभिष्यन्दव्रणनाशिनी ॥
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता ।
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरक्तो बुधैरयं" ॥
सा यथा,—
"एरण्डपत्रमूलत्वङ्निर्म्मिता वातनाशिनी ।
धात्री विरचिता पित्ते शिग्रुपत्रकृता कफे ॥
निम्बपत्रकृता पिण्डी पित्तश्लेष्महरी भवेत् ।
मुरठी निम्बदलैः पिण्डी सुखोष्णा खल्वसैन्धवा ॥
भार्य्या नेत्रेऽनिलश्लेष्मशोथकण्डूव्यथाहरी ।
त्रिफला पिण्डिका नेत्रे वातपित्तकफापहा" ॥
'पथ्याक्षामलखस्खसवल्कलकल्कोऽहिफेनजलयुक्तः ।
तेन विरचिता पिण्डी शमयति सकलानभिष्यन्दान्" ॥

इति भावप्रकाशः ॥
अभिष्यन्दिरमणं, क्ली, (अभिष्यन्दः प्रधाननगरस्यातिदृढ्या तत्सन्निधाने स्थापनं स एव विद्यतेऽत्र इनि, रमतेऽत्र रम + आधारे ल्युट्, ततः कर्म्मधारयः ।) प्रधाननगरसन्निहितनगरं । तत्पर्य्यायः । शाखानगरं २ । इति जटाधरः ॥
अभिसन्तापः, पुं, (अभिसन्ताप्यतेऽत्र, अभि + सम् + तप् + णिच् + आधारे अच् ।) युद्धं । इति हलायुधः ॥
("जन्यं स्यादभिसन्तापः संमदोविग्रहस्त्रधा" । इति हलायुधः ।)
अभिसन्धानं, क्ली, (अभि + सम् + धा + भावे ल्युट् ।) वञ्चनं । प्रतारणं । इति हेमचन्द्रः ॥
("पराभिसन्धानपरं यद्यस्य विचेष्टितं ।
जिगीषोरश्वमेधाय धर्म्मायैव बभूव तत्" ॥
इति रघुवंशे ।)
अभिसन्धिः, पुं, (अभिसन्धानं अभि + सम + धा + भावे किः ।) अभिसन्धानं । उद्देशः । यथा,—
"पिण्डैरन्नमयैर्दिवि ये च मूर्त्ताः,
स्वधासुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां,
विमुक्तिदा येऽनभिसंहितेषु" ॥
इति रुचिस्तवः ॥
("अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरं ।
स्वर्गाभिसन्धिसुहृतं वज्रिणामिव मेनिरे" ॥
इति कुमारसम्भवे ।)
अभिसम्पातः, पुं, (अभिसम्पात्यते योद्धा यत्र, अभि + सम् + पत् + आधारे घञ् ।) युद्धं । इत्यमरः ॥
अभिसरः, पुं, (आभिमुख्येन सरति, अभि + सृ + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥ ("राजा राज्यवर्द्धनं महासामन्तैः श्रुत्वा साभिसरम् उत्तरापथं प्राहिणोत्" । इति हर्षचरिते ।)
अभिसर्ज्जनं, क्ली, (अभि + सृज् + भावे ल्युट् ।) दानं । वधः । इति धरणी ॥
अभिसारः, पुं, (अभि + सृ + आधारे घञ् ।) बलं । युद्धं । सहायः । साधनं । इति धरणी ॥ स्त्री-पुंसयोरन्यतरस्यान्यतरार्थं सङ्केतस्थलगमनं । इत्यजङ्गरक्षाख्यं ॥ ("रतिसुखसारे गतमभिसारे मदनमनोहरवेषं" । इति गीतगोविन्दे । "एवं श्रुत्वाभिसाराणां पुंश्चलीनां विनोदने" । इति साहित्यदर्पणे ।)
अभिसारिका, स्त्री, (अभिसरति कान्तनिर्द्दिष्टसंकेतस्थानं गच्छति या, अभि + सृ + ण्वुल्, स्त्रियां टाप् ।) स्त्रीयादिषोड़शनायिकामध्ये अष्टावस्थाविशिष्टाऽऽत्मनायिकान्तर्गतनायिकाभेदः । अस्या लक्षणं । सङ्केतस्थले स्वयं गमनकर्त्री एवं प्रियगमनकारयित्री । अस्याश्चेष्टा । समयानुरूपभूषणं । श्रद्धा । बुद्धिर्नैपुणं । कपटसाहसादिः । सा त्रिविधा । दिवाभिसारिका १ ज्योत्स्नाभिसारिका २ अन्धकाराभिसारिका ३ । इति रसमञ्जरी ॥

("कान्तार्थिनी तु या याति संकेतं साभिसारिका" इत्युक्तलक्षणा कान्तप्रार्थनया स्वयं संकेतस्थानगामिनी स्वस्थाने वा कान्तानयनकारिणी नायिका। यदुक्तं दर्पणकारैः।

"अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका" ॥)

अभिहारः, पुं. (अभि + हृ + घञ्।) चौर्य्यं। सम्मुखे हरणं। तत्पर्य्यायः। अभियहणं २। इत्यमरः ॥ सन्नहनं। कवचधारणं। अभियोगः। अपचिकीर्षयाभिगम्याक्रमणं। इति मेदिनी ॥ (साहसं। अपहरणं।

"यस्याभिहारं कुर्य्याच्च स्वयमेव नराधिपः"।

इति महाभारते।)

अभिहितं, त्रि, (अभि + धा + कर्म्मणि क्तः।) उक्तं। कथितं। इत्यमरः ॥

("अर्थिनाभिहितोयोऽर्थः प्रत्यर्थी यदि तं तथा।
सभ्योजिनो साभिहिता यैश्चाची दक्षिणा द्विजैः" ॥

इति मनुः।)

अभीकः, पुं, (अभि + कन्, "अनुकाभिकाभीकाः कामयिता" इति पाणिनिसूत्रम्।) कविः। इति मेदिनी ॥ स्वामी ॥ इति हलायुधः ॥ (पतिः। कामुकः। कामी।

"ददृशे पर्णशालायां राज्ञस्याभीकयाथ सः"।

इति भट्टिकाव्ये।

उत्सुकः। क्रूरः। निष्ठुरः। निर्भयः। निःशङ्कः।

("अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ"।

इति मेदिनी।)

अभीकः, त्रि, (अभि + कन्।) कामुकः। क्रूरः। उत्सुकः। निर्भयः। इति शब्दरत्नावली ॥

अभीप्सितं, त्रि, (अभ्याप्तुं प्राप्तुमिष्टं, अभि + आप् + सन् कर्म्मणि क्तः।) वाञ्छितं। अभीष्टं। इत्यमरः ॥

("मेने मेनापि तत्सर्व्वं पत्युः कार्य्यमभीप्सितं"।

इति कुमारसम्भवे।)

अभीरः, पुं, (अभीरयति गा अभिमुखीकृत्य गोष्ठं नयति, अभि + ईर + णिच् + अच्।) आभीरः। गोपः। इत्यमरटीकायां रमानाथः ॥

अभीरुः, पुं, (भी + कर्त्तरि ञीलार्थे क्रुः ततो नञ्समासः।) भैरवः। यथा,—

"अभीरुर्भैरवो भीरुभूतपो योगिनीपतिः"।

इति वटुकभैरवस्तवः ॥ निर्भये त्रि ॥ (निर्भीकः। भयहीनः। निःशङ्कः। "स्थाने युद्धे च कुशलानभीरूनविकारिणः"। इति मनुः।)

अभीरुः, स्त्री, (भी + कर्त्तरि क्रु ञीलार्थे, नञ्समासः।) शतमूली। इत्यमरः ॥

अभीरुपत्री, स्त्री, (भी + कर्त्तरि क्रु ञीलार्थे, नञ्समासः, वा स्त्रियां ऊङ् असंकुचितपत्रत्वात् तस्यास्तथात्वं, न भीरूणि पत्राणि यस्याः सा, स्त्रियां ङीप्।) शतमूली। इत्यमरः ॥

अभीशुः, पुं, (अभितः श्यति सुखं तनूकरोति, अभि + शो + कु, एषोदरादित्वात् दीर्घः।) प्रग्रहः। वाग्डोर इति भाषा। ("स्थिरा वसन्तु नेयोरघो

अस्या स एषां सुसंस्कृता अभीशवः"। इति ऋक्। वेदेऽस्य प्रचुरप्रयोगः ॥ किरणः। इति हलायुधः ॥

अभीशुः, स्त्री, (अभितः अश्नुते व्याप्नोति, अभि + अश् + कर्त्तरि उन्, एषोदरादित्वात् अलोपो दीर्घः।) अङ्गुलिः। वेदेऽस्य प्रचुरप्रयोगः ॥

अभीषङ्गः, पुं, (अभि + सन्ज घञ्, दीर्घः।) आक्रोशः। इत्यमरः ॥

अभीषुः पुं, (अभि + इष् + उ।) किरणः। इत्यमरः ॥ कामः। अनुरागः। इति शब्दरत्नावली ॥

अभीष्टं, त्रि, (अभि + इष् + कर्म्मणि क्तः।) वाञ्छितं। तत्पर्य्यायः। अभीप्सितं २ हृद्यं ३ दयितं ४ वल्लभं ५ प्रियं ६। इत्यमरः ॥

("प्राणायथात्मनोऽभीष्टा भूतानामपि ते तथा"।

इति हितोपदेशः।

"अभीष्टायामभूद्वत्स पितुरत्यन्तवल्लभः"।

इति विष्णुपुराणं।)

अभीष्टा, स्त्री, (अभि + इष् + क्त, स्त्रियां टाप्।) रेणुकानामगन्धद्रव्यं। इति शब्दचन्द्रिका ॥

("ताम्बूलवल्ली ताम्बूली नागवल्लीपय द्विजा।
हरेणुः रेणुका कौन्ती कपिला भस्मगन्धिनी ॥
ताम्बूल्यां कटुकाभीष्टा देवाभीष्टा महाफला"।

इति शब्दचन्द्रिका।)

अभीष्णं, क्ली, (क्षणमभिगतं, प्रादिसमासः एषोदरादित्वात् दीर्घः अलोपश्च।) भृशं। नित्यं। तदयुक्तक्रिययोऽस्त्रि। इति मेदिनी ॥ (पुनः पुनः। शश्वत्। अविरतं। निरन्तरं। "उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमज्ञसतयातिदुर्गमः"। इति माघः ॥

"इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि
न ज्ञातयस्तुल्यकुलस्य लक्ष्मीं"।

इति भट्टिकाव्ये।)

अभीक्ष्णं, व्य, (अभि + क्ष्णु तेजने डमु, एषोदरादित्वात् दीर्घः "स्वरादिनिपातमव्ययम्" इति अव्ययं।) पुनः पुनः। अनारतं। इत्यमरः ॥

अभुक्तः, त्रि, (भुज् + भावे क्तः अर्द्ध आद्यच् विद्यमानार्थे, नञ्समासः, वा भुज + कर्म्मणि क्तः, नञ्समासः।) उपवासी। यथा,—

"अभुक्तस्य दिवानिद्रा पायाणमपि जीर्य्यति"।

इति वैद्यकं ॥ अक्षतभोजनं वस्तु ॥ (भुक्ता ब्राह्मणाः पीता गाव इति पाणिनिभाष्यम्। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि' । इति पुराणम्।)

अभूमिः, स्त्री, (न भूमिः, नञ्समासः।) स्थानाभावः। अनाधारः। आश्रयाभावः। यथा। "अभूदभूमिः प्रतिपत्तजन्मनां भियाम्" इति माघः ॥ "नाभूदभूमिः स्मरशायकानाम्" इति नैषधं ॥

अभेदः, त्रि, (नास्ति भेदो यस्य सः।) भेदरहितः। अविशेषः। यथा,—"अभेदः शिवरामयोः" इति पुराणं ॥ (तादात्म्यम्।

"काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्ते समुपायाते काकः काकः पिकः पिकः" ॥

इति नीतिरत्ने। "भेदेऽप्यभेदः सम्बन्धे सम्बन्धस्तद्विपर्य्ययौ"। इति साहित्यदर्पणे।)

अभेद्यं, क्ली, (भेत्तुं न शक्यते, भिद् + शक्यार्थे ण्यत् नञ्समासः।) हीरकं। इति राजनिर्घण्टः ॥ अभेदनीयवस्तुनि त्रि। यथा,—

"अस्त्राण्यनेकरूपाणि तथाभेद्यश्च दंशनं"।

इति देवीमाहात्म्यं ॥

अभोजनं, क्ली, (भुज् + भावे ल्युट्, नञ्समासः।) भोजनाभावः। उपवासः। यथा,—

"अजीर्णे भोजनं येषां जीर्णे येषामभोजनं।
राज्ञावभोजनं येषां तेषां नश्यन्ति धातवः" ॥

इति वैद्यकं ॥ (अशनं।

"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं" ॥

इति मलमासतत्त्वं।)

अभ्यग्रं, त्रि, (अभिमुखमग्रं यस्य तत्।) समीपं। निकटं। इत्यमरः ॥

अभ्यङ्गः, पुं, (अभि + अञ्ज घञ् कुत्वं।) तैलमर्दनं। तत्पर्य्यायः। स्नेहनं २। इति राजनिर्घण्टः ॥ यथा,—

"तैलमत्यं यदङ्गेषु न च स्यादवाङ्मतर्पणं।
सा मार्द्धिः एषगन्धश्च मस्तकादौ प्रकीर्त्तितः ॥
अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत्" ॥

इत्यायुर्व्वेदः ॥ * ॥ अस्य गुणाः। मार्दवकारित्वं। कफवातनाशित्वं। धातुपुष्टिजनकत्वं। त्वग्वर्णबलप्रदत्वञ्च ॥ पादाभ्यङ्गगुणाः। निद्राचक्षुर्हितकारित्वं। पादरोगनाशित्वञ्च ॥ पादगते हे शिरे चक्षुषि सम्बद्धे स्तः अतश्चक्षुर्हितार्थिना पादाभ्यङ्गः करणीयः ॥ कफव्यस्तक्षतभेदवमनाजीर्णिभिर्नाभ्यङ्गः करणीयः। इति राजवल्लभः ॥ * ॥ अपरञ्च।

"मूर्द्धि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतं।
खोतोभिस्तर्पयेद्यस्माद्वाङ्ग स चाभ्यङ्ग उदाहृतः" ॥

तत्पर्य्यायः। अभ्यञ्जनं २। इति शुद्धितत्त्वधृतायुर्व्वेदः ॥ आभां इति भाषा।

अभ्यङ्गः, पुं, (अभि + अञ्च + अच्, एषोदरादित्वात् साधः।) तिलकल्कः। इति ऋग्वेदिश्राद्धप्रयोगः ॥

अभ्यञ्जनं, क्ली, (अभि + अनज् + कर्म्मणि ल्युट्।) तैलं। इति हेमचन्द्रः ॥ अभ्यङ्गः। इति राजनिर्घण्टः ॥ (तैलादिना शिरःसहितदेहमर्द्दनम्।

"भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः ॥
क्षमिभूतः श्वविष्ठायां पिष्टभिः सह मज्जति" ॥

इति मनुः।)

अभ्यन्तरं, क्ली, (अन्तरमभिगतं प्रादिसमासः।) मध्यं। तत्पर्य्यायः। अन्तरालं २। इत्यमरः ॥ अन्तः ३ अन्तरं ४ अन्तरालकं ५। इति राजनिर्घण्टः ॥

("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ"।

इति भगवद्गीता।)

अभ्यमितः, त्रि, (अभि + अम् + क्तः।) रोगी। इत्यमरः ॥

अभ्यमित्रीणः, पुं, (अमित्रस्याभिमुखं अव्ययीभावसमासः, अलङ्कारार्थेऽधिकारे अभ्यमित्र + ख तस्य ईनः।) अभ्यमित्यः। इत्यमरः ॥

अभ्य

("हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ।
उद्योगमभ्यमित्रीणो यथेष्टं त्वञ्च सन्तनु" ॥
इति भट्टिः।)

अभ्यमित्रीयः, पुं, (अमित्रस्य शत्रोरभिमुखं अभ्यीभावः, अभ्यमित्रमलङ्कामीत्यधिकारे अभ्यमित्र + कृ तस्य ईयः।) अभ्यमित्यः। इत्यमरः ॥

अभ्यमित्यः, पुं, (अभ्यमित्र + पूर्ब्ववत् यत्।) स्वसामर्थ्यवशेन शत्रुसम्मुखगमनकर्त्ता। युद्धस्थले शत्रुसम्मुखगामी। तत्पर्य्यायः। अभ्यमित्रीयः २ अभ्यमित्रीणः ३। इत्यमरः ॥
("तमुद्यतनिशातासिं प्रत्युवाच जिजीविषुः।
मारीचोऽनुनयंस्त्रासादभ्यमित्यीभवामि ते" ॥
इयि भट्टिकाव्ये।)

अभ्यर्ण, त्रि, (अभि + अर्द्द + क्तः, आविदूर्य्ये इड्भावः णत्वञ्च।) निकटं। इत्यमरः। (आसन्नः। निकटवर्त्ती। "तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने। तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः"। इति रत्नावली। "उच्यन्तां सैनिकाः न कैश्चिदाश्रमाभ्यर्णभूमयः परिक्राम्यन्तां"। इति महावीरचरिते। समीपं। सन्निधानं। अन्तिकं। "अभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया"। इति गीतगोविन्दे।)

अभ्यवकर्षणं, क्लीं, (अभि + अव + कृष् + भावे ल्युट्।) शस्यादेरुत्पाटनं। तत्पर्य्यायः। निर्हारः २। इत्यमरः ॥

अभ्यवस्कन्दः, पुं, (अभि + अव + स्कन्द + घञ्।) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। तत्पर्य्यायः। अभ्यासादनं २ प्रपातः ३ धाटी ४। इति हेमचन्द्रः ॥

अभ्यवस्कन्दनं, क्लीं, (अभि + अव + स्कन्द + भावे ल्युट्) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। शत्रुसम्मुखगमनं। इत्यमरभरतौ ॥

अभ्यवहारः, पुं, (अभि + अव + हृ + भावे घञ्।) भक्षणं। आहारः। इति हेमचन्द्रः ॥

अभ्यवहृतं, त्रि, (अभि + अव + हृ + क्तः।) भुक्तं। खादितं। इत्यमरः ॥

अभ्यसनं, क्लीं, (अभि + अस + ल्युट्।) अभ्यासकरणं। पौनःपुन्येन करणं चिन्तनञ्च। यथा,—
"स्यादभ्यासोऽभ्यसनेऽन्तिके"। इति मेदिनी ॥
(अभ्यासः। पौनःपुन्येनैकक्रियाकरणं। पुनःपुनः आवर्त्तनम्।
"विद्याभ्यसनेनेव प्रसादयितुमर्हसि"।
इति रघुः।
"स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते"।
इति गीता।)

अभ्यसूया, स्त्री, (असू उपतापे हिंसायाञ्च, कयङ्गादित्वात् यक् + भावे अ स्त्रियामाप्।) असूया। गुणेषु दोषारोपणं। यथा। "चैत्यस्य दानं तामसं"। इत्यमरटीकायां भरतः ॥ ("अनिर्हृतं भूतिषु गूढवैरं सत्कारकालेऽपि कृताभ्यसूयम्"। इति भट्टिकाव्ये"। ईर्ष्या। विद्वेषः। औद्धत्यादन्यगुणार्द्दोनामसहिष्णुता।

अभ्या

"कृताभ्यसूया पदकाङ्क्षिणा ते।
नितान्तदीर्घैर्जनिता तपोभिः"।
इति कुमारसम्भवे ॥
"प्रत्यादत्तत्त्वयि करधि स्यादनल्पाभ्यसूयः"।
इति मेघदूते।)

अभ्याकाङ्क्षितं, क्लीं, (अभि + आ + काङ्क्ष + भावे क्तः, इदित्वान्नुम्।) मिथ्याभियोगः। इति शब्दरत्नावली ॥ मिछादाओया इति भाषा।

अभ्याख्यानं, क्लीं, (अभि + आ + ख्या + ल्युट्।) मिथ्याभियोगः। मिथ्याविवादः। श्रुतं मे धारयसीत्यादि मिथ्योद्भावनं। इत्यमरभरतौ ॥

अभ्यागतः, पुं, (अभि + आ + गम् + कर्त्तरि क्तः।) अतिथिः। इति हेमचन्द्रः ॥ "स च ज्ञातपूर्ब्वमुपागतः" इति श्रीधरस्वामी ॥
"बालो वा यदि वा वृद्धो युवा वा गृहमागतः।
तस्य पूजा विधातव्या सर्ब्वत्राभ्यागतो गुरुः" ॥
इति हितोपदेशे।)

अभ्यागमः, पुं, (अभि + आ + गम् + अप्।) समीपं। मारणं। युद्धं। वैरं। अभ्युत्थानं। इति विश्वः ॥ (घातः। प्रहारः। शत्रुता। विरोधः। समीपं। अन्तिकं। सन्निधानं।
"अभ्यागमो विरोधाजिघातार्थभूदमनान्तिके"।
इति मेदिनी ॥ सम्मुखागमनं। उपस्थितिः।
"का त्वं शुभे कस्य परिग्रहो वा
किं वा मदभ्यागमकारणं ते"।
इति रघुवंशे।)

अभ्यागारिकः, त्रि, (अभ्यागारे तद्गृहकर्म्मणि व्याप्तः, ठन् तस्य इकः।) कुटुम्बव्याप्तः। पुत्रदारादिपोषणव्ययः। इत्यमरः ॥

अभ्यादानं, क्लीं, (अभि + आ + दा + भावे ल्युट्।) आरम्भः। इत्यमरः ॥ प्रथमारम्भः। इति रायमुकुटः ॥

अभ्यान्त, त्रि, (अभि + आ + अम + कर्त्तरि क्तः इड्भावः, पक्षे अभ्यामितः।) रोगी। इत्यमरः ॥

अभ्यामर्दः, पुं, (अभ्यामृद्यतेऽत्र, अभि + आ + मृद् + आधारे घञ्।) संग्रामः। इत्यमरः ॥

अभ्याप्तः, त्रि, (आभिमुख्येनाप्यते व्याप्यतेऽनेन, अप्लृ व्याप्तौ करणे घञ्।) समीपं। इत्यमरटीकायां रायमुकुटः ॥

अभ्यासः, पुं, (आभिमुख्येनास्यते क्षिप्यते, असुक्षेपे कर्म्मणि घञ्।) अभ्यसनं। आवृत्तिः। इति मेदिनी ॥ पुराभ्यासः। तत्पर्य्यायः। खुरली २ योग्या ३। इति त्रिकाण्डशेषः ॥ समीपे त्रि। इत्यमरः। चित्तस्यैकस्मिन्नन्यत्रे वाह्ये वा प्रतिमादावालम्बने सर्ब्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासः ॥ यथा,—
"अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय"।
इति भगवद्गीताटीकायां नीलकण्ठः ॥

अभ्यासादनं, क्लीं, (अभि + आ + सद् + णिच् + ल्युट्।) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। शत्रुसम्मुखगमनं। इत्यमरभरतौ ॥

अभ्याहारः, पुं, (अभि + आ + हृ + भावे घञ्।)

अभ्यु

अभिहारः। चौर्य्यं। इत्यमरटीका ॥ (अभिग्रहणं। भोजनं। आहारः।)

अभ्युत्थानं, क्लीं, (अभि + उत् + स्था + भावे ल्युट्।) गौरवं। इति हेमचन्द्रः ॥ आसनादेरुत्थानं। यथा,—
"यदा यदा च धर्म्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहं" ॥
इति श्रीभगवद्गीता ॥ (ख्यातिः। कीर्त्तिः। यशः। गौरवेणोत्थानादिना प्रत्युद्गमनं। "अलमलमभ्युत्थानेन, ननु सर्ब्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः"। इति नागानन्दः।
"नाभ्युत्थानं क्रिया यत्र नालापा मधुराक्षराः।
गुणदोषकथा नैव तत्र हर्षेण गम्यते" ॥
इति पञ्चतन्त्रे। अभ्युदयः। अभ्युन्नतिः।
"नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः" ॥
इति रघुवंशे। सूर्य्योदयः। उदयः। उद्भवः।)

अभ्युदयः, पुं, (अभि + उत् + इण् + अच्।) इष्टलाभः। विवाहादिः। इति आभ्युदयिकशब्दार्थे आद्यतत्त्वं ॥ सर्ब्वतोभावेनोदयः। अर्थाद्धनजनादिवृद्धिः। यथा,—
"राजन्नभ्युदयोऽस्तु वल्लनकवे हस्ते किमास्ते तव
श्लोकः कस्य कवेरमुष्य कृतिनस्तत् पश्यतां पश्यते।
किन्त्वासामरविन्दसुन्दरदृशां द्राक्चामरान्दोलनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्य्यतां" ॥
इत्यस्य पूर्ब्वार्द्धं वल्लनकविकर्णाटराजयोर्वाक्यं शेषार्द्धं कालिदासस्य ॥ (उन्नतिः। समृद्धिः।
"विपदि धैर्य्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः"। इति हितोपदेशे। पराक्रमः। वीर्य्यं। प्रभावः। "यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीराः"। इति भागवतपुराणं।)

अभ्युदितः, त्रि, (अभि + उत् + इण् + क्तः।) यस्मिन् सुप्ते सूर्य्य उदेति सः। सूर्य्योदयकालशायी। इत्यमरः ॥ उदयप्राप्तः। यथा,—
"माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ।
ब्रह्मन्नमपि चाण्डालं कं पतन्तं पुनीमहे" ॥
इति तिथ्यादितत्त्वं ॥ (अभितः सर्ब्वतः उदितशब्देन इतं गतं प्रातर्विहितं कर्म्मास्मादिति व्युत्पत्त्या सूर्य्योदयकाले निद्रया अननुष्ठिततत्कालोचितक्रियाकलापः।)

अभ्युपगतः, त्रि, (अभि + उप + गम् + क्तः।) स्वीकृतः। अङ्गीकृतः। इति हेमचन्द्रः ॥
("प्रियाभ्युपगते राज्ये पाण्डवा मधुसूदन।
जिताः शकुनिना राज्यं तत्र किं मम दुष्कृतं" ॥
इति महाभारते। समीपागतः। अन्तिकसमागतः। अनुमितः। निर्द्धारितः। सिद्धान्ततया निरूपितः। सङ्गीभूतः। सन्निकृष्टः।)

अभ्युपगमः, पुं, (अभि + उप + गम् + भावे अप्।) स्वीकारः। इत्यमरः ॥ निकटागमनं। इति मेदिनी ॥ (अङ्गीकारः। प्रतिज्ञा। "प्रसीदेति ब्रुवामिदमसति कोपे न घटते करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः"। इति रत्नावली। अनुमतिः। अनुमोदनं।

"सर्व्वदोषानभिष्वङ्गादाम्नायसमतां गताः।
युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः"।
इति महावीरचरिते।)

अभ्युपपत्तिः, स्त्री, (अभि+उप+पद्+क्तिन्।) अनुग्रहः। इत्यमरः॥ (अनिरुनिवारणपूर्ब्बकाभीष्टसम्पादनरूपोऽनुग्रहः। प्रसादः। "तदर्हस्याभ्युपपत्या जीवितमस्या अवलम्बितुम्"। इति शाकुन्तले। रक्षा। परिचर्य्या।
"कामिनीषु विवाहेषु गवाम्भक्षे तथेन्धने।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्"।
इति मनुः।)

अभ्युपायः, पुं, (अभि+उप+इण्+भावे अच्।) अङ्गीकारः। स्वीकारः। इति हेमचन्द्रः॥ उपायः। यथा। "तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः"। इति काव्यप्रकाशः॥ (कौशलं।
"अनेकैरभ्युपायैस्ते जिघांसन्ति स्म पाण्डवान्"।
"निपुणेनाभ्युपायेन नगरं वारणावतं"।
"निपुणेनाभ्युपायेन यदब्रवीमि तथा कुरु"॥
इति महाभारते।)

अभ्युपायनं, क्ली, (अभि+उप+इण्+ल्युट्।) उपायनं। उपढौकनद्रव्यं। यथा,—
"तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः"।
इति श्रीभागवतं॥

अभ्युपेतं, त्रि, (अभि+उप+इण्+कर्म्मणि क्तः।) स्वीकृतं। उपगतं। यथा,—
"अहमभ्युपेतस्वामर्थिभावादिति मे विषादः"।
इति रघुः॥ (अङ्गीकृतः।
"मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः"।
इति मेघदूते।)

अभ्युषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ अभि+उष्+बाहुल्यात् कर्म्मणि कः।) अभ्यूषः। पौलिः। इत्यमरटीकायां भरतः॥

अभ्यूषः, पुं, (अभि+ऊष+बाहुल्यात् कर्म्मणि कः।) पाकावस्थागतकलायादिः। आरब्धपाकावयवसर्षपादिः। वह्निना ईषद्दग्धः घुट घुट शब्दवान् इति केचित्॥ दरदग्ध इति श्रीधरः॥ तत्पर्य्यायः। आपक्वं २ पौलिः ३। इत्यमरः॥ अभ्युषः ४ अभ्योषः ५। इति भरतः॥*॥ प्रोलिका। रोटी इति प्रसिद्धा। अस्या गुणाः। मधुरत्वं। गुरुत्वं। रोचकत्वं। बलकारित्वं। श्लेष्मवर्द्धनकत्वं। पित्तरक्तप्रदायित्वञ्च॥*॥ अक्षारकृतायास्तस्या गुणाः। अग्निदीपनत्वं। वायुवर्द्धिकारित्वं। लघुत्वं। बलकारित्वञ्च।
"सा खट्वयुक्ता चेत् घनाघनगुणान्विता"।
इति राजनिर्घण्टः॥ ईषत्पक्वं। यथा,—
"आपक्वमवपक्वं स्यादाभ्युषः पौलिपौलिके।
अभ्यूषोऽभ्योष इत्येते ईषत्पक्वार्थवादिषु"॥
इति शब्दरत्नावली॥

अभ्योषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ, अभि+ऊष+कर्म्मणि घञ्।) अभ्यूषः। इत्यमरटीकायां भरतः॥

अभ्र गत्यां। इति कविकल्पद्रुमः॥ ओष्ठवर्गचतुर्थोपधः। अभ्रति। इति दुर्गादासः।

अभ्रं, क्ली, (अपोबिभर्त्तीति अप+भृ+क।) मेघः। आकाशं। स्वर्णं। अभ्रकधातुः। इति मेदिनी॥ उपधातुविशेषः। तस्योत्पत्तिनामलक्षणगुणाः।
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतं।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः॥
ते निपेतुर्घनघ्वानाच्छिखरेषु महीभृतां।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकं॥
तदभ्रं वज्रजातत्वादभ्रमभ्रस्वोद्भवात्।
गगनादलितं यस्माद्गगनञ्च ततो मतं॥
विप्रक्षत्रियविट्शूद्रभेदात्तत् स्याच्चतुर्विधं।
क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः॥
प्रशस्यते सितं तारे रक्तं तंतुरसायने।
पीतं हेमनि कृष्णन्तु गदेषु भूतयेऽपि च॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधं।
सुस्निग्धमौ विनिःक्षिप्तं पिनाकं दलसञ्चयं॥
अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकं।
दर्दुरं स्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिं॥
गोलकान् बज्रभृः कृत्वा स स्यान्मृत्युप्रदायकः।
नागन्तु नागवद्भक्षौ फुत्कारं परिमुञ्चति॥
तद्भक्षितमवश्यन्तु विदधाति भगन्दरं।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाशौ विद्धतिं व्रजेत्॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत्।
अभ्रमुत्तरपूर्व्वोत्थं बज्रसत्वं गुणाधिकं॥
दक्षिणाद्रिभवं स्वल्पसत्वमल्पगुणप्रदं"॥*॥
मारिताभ्रगुणाः।
"अभ्रं कषायं मधुरं सुशीत-
मायुष्करं धातुविवर्द्धनञ्च।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं
प्लीहोदरग्रन्थिविषक्षमींच॥
"रोगान् हन्ति द्रढ़यति वपुर्व्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव।
दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान्
मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रं"॥*॥
अशोधिताभ्रदोषाः।
"पीडां विधत्ते विविधां नराणां
कुष्ठं क्षयं पाण्डुगदञ्च घोरं।
हृत्पार्श्वपीडाञ्च करोत्यशुद्ध-
मभ्रं ह्यसिद्धं गुरुतापदं स्यात्"॥*॥
अस्य शोधनविधिर्यथा।
"क्षुण्णाभ्रकं धमेद्भक्षौ ततः क्षीरे विनिःक्षिपेत्।
भिन्नपन्तु तत् क्षुत्वा तण्डुलीयाम्लजैर्द्रवैः॥
भावयेदहयामं तदेवमभ्रं विशुध्यति"॥*॥
तस्य मारणं यथा॥
"क्षुत्वा धान्याभ्रकं तच्च शोधयित्वाथ मर्दयेत्।
अर्कक्षीरैर्दिनं खल्वे चक्राकारञ्च कारयेत्॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत्।
पुनर्म्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः॥
ततो वटजटाक्वाथैस्तदर्द्धेयं पुटत्रयं।
म्रियते नात्र सन्देहः प्रयोज्यं सर्व्वकर्म्मसु॥
तुल्यं घृतं मृताभ्रेण लौहपात्रे विपाचयेत्।
घृते जीर्णे तदभ्रन्तु सर्व्वयोगेषु योजयेत्"॥*॥
तच्च धान्याभ्रस्य विधिः।
"पादांशसलिलं युक्तमभ्रं बद्धाथ कम्बले।
चिरात्तं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेत् करैः॥
कम्बलाद्गलितं सूक्ष्मं वालुकारहितञ्च यत्।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये"॥
इति भावप्रकाशः॥

अभ्रंलिहः, पुं, (अभ्रं लेढि स्पृशति, अभ्र+लिह कर्त्तरि खश्, मुमागमः।) वायुः। इति यादवः॥ (मेघस्पर्शी। अत्युच्चः।
"अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः"॥
इति मेघदूते।)

अभ्रकं, क्ली, (अभ्र गतौ+ण्वुल्, तस्य अक।) स्वनामख्यातधातुः। आभ्र इति भाषा। तत्पर्य्यायः। गिरिजं २ अमलं ३। इत्यमरः॥ गिरिजामलं ४ गौर्य्यामलं ५। इति स्वामी॥ गिरिजाबीजं ६ गरुत्मध्वजं ७। इति वाचस्पतिः॥ शुभ्रं ८। इति जटाधरः॥ घनं ९ व्योम १० अब्दं ११। इति रत्नमाला॥ अभ्रं १२ भङ्गं १३ अम्बरं १४ अन्तरीक्षं १५ आकाशं १६ बज्रपत्रं १७ खं १८ अनन्तं १९ गौरीजं २० गौरीजेयं २१। इति राजनिर्घण्टः॥ अस्य गुणाः। रसायनत्वं। स्निग्धत्वं बलवर्णाग्निवर्द्धकत्वञ्च। इति राजवल्लभः॥ अपि च। गुरुत्वं। हिमत्वं। बल्यत्वं। कुष्ठमेहक्षिदोषनाशित्वञ्च॥*॥ तच्चतुर्व्विधं यथा,—
"श्वेतं पीतं लोहितं नीलमभ्रं
चातुर्व्विध्यं चातिभिन्नक्रियार्हं।
श्वेतं तारे काञ्चने पीतरक्ते
नीलं व्याधिव्यग्रमग्र्यं गुणाढ्यं"॥
इति मदनविनोदः॥
("अभ्रकस्त्वं वीजन्तु मम वीजन्तु पारदः।
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनं"॥
इति चक्रदत्तः।)

अभ्रङ्गषः, पुं, (अभ्रमाकाशं कषति गच्छति धातूनामनेकार्थत्वात् अभ्र+कष्+खच्+सुम्।) वायुः। इति यादवः॥ (मेघस्पर्शी। अत्युन्नतः। अभ्रंलिहः।
"सर्व्वाङ्गधयशृङ्गाख्यं रामकल्पतरुं कपिः।
आदायाभ्रङ्गषं प्रायान्मङ्गलं फलशालिनं"॥
इति भट्टिकाव्ये।)

अभ्रपिशाचः, पुं, (अभ्रे आकाशे पिशाच इव। तस्य क्षायात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वं।) राजयक्ष्मः। इति त्रिकाण्डशेषः॥

अभ्रपिशाचकः, पुं, (अभ्रे पिशाच इव इवार्थे कन्।) राजयक्ष्मः। इति हारावली॥

अभ्रपुष्पं, क्ली, (अभ्रं मेघ एव पुष्पं जलरूपफलस्य निदानं यस्य तत्, तस्य मेघप्रभवत्वात् तथात्वं।) जलं। यथा,—
"अभ्रपुष्पमपि दित्सति प्रीतं
सार्थिना विमुखता यदभाजि"। इति नैषधे॥

अभ्रपुष्पः, पुं, (अभ्रमिव शुभ्रं पुष्पं यस्य सः।) वेतसवृक्षः। इत्यमरः॥

अभ्रमः, त्रि, (न भ्रमः भ्रान्तिः, नञ्समासः।) (भ्रमाभावः।) भ्रमरहितः। अभ्रान्तः। नास्ति भ्रमो यस्येति बहुव्रीहिः॥

अभ्रमांसी, स्त्री, (अभ्रमिव जटायां मांसमस्याः सा गौरादीत्वात् ङीष्।) आकाशमांसीलता। इति राजनिर्घण्टः॥ (जटामांसी।)

अभ्रमातङ्गः, पुं, (अभ्रस्य मेघस्य अधिष्ठाता मातङ्गः, शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च।) ऐरावतः। इन्द्रहस्ती। इत्यमरः॥ (स च समुद्रजातः पूर्व्वदिङ्नागः।)

अभ्रमाला, स्त्री, (अभ्राणां माला श्रेणी, षष्ठीतत्पुरुषः।) मेघश्रेणी। मेघसमूहः। इति हलायुधः॥ (घनघटा। कादम्बिनी।)

अभ्रमुः, स्त्री, (न भ्राम्यति, भ्रम+उञ्, नञ्समासः, मान्तत्वात् ह्रस्वभावः।) ऐरावतस्त्री। सा पूर्व्वदिग्हस्तिनी। इत्यमरः॥

अभ्रमुप्रियः, पुं, (अभ्रमोः पूर्व्वदिक्हस्तिन्याः प्रियः।) ऐरावतहस्ती। इति हेमचन्द्रः॥ (अभ्रमातङ्गः।)

अभ्रमुवल्लभः, पुं, (अभ्रमोः वल्लभः प्रियः।) ऐरावतहस्ती। इत्यमरः॥

अभ्ररोहं, क्ली, (अभ्रात् मेघात् रोहः जन्म यस्य तत्, तस्य मेघशब्दोत्पन्नत्वात् तथात्वं।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

अभ्रवाटिकः, पुं, (अभ्रस्येव वाटी वक्रता यस्याः सा, समासान्तः कः, ह्रस्वः।) आम्रातकः। इति राजनिर्घण्टः॥

अभ्रान्तः, त्रि, (भ्रम्+कर्त्तरि क्तः, नञ्समासः।) भ्रान्तिशून्यः। यथा।
"आप्ताः श्रुतिर्विबुद्धास्ते तेषां वाक्यमसंशयम्" इत्यत्र "यतोऽभ्रान्तबुद्धयः"। इति चरकटीकाकारः॥ (यथार्थज्ञानयुक्तः। भ्रमशून्यः। स्थिरश्च।)

अभ्रिः, स्त्री, (अपो बिभर्त्ति, नौकामार्ज्जनार्थं धारयति, अप्+भृ+कर्त्तरि किः।) काष्ठकुद्दालः। नौकामार्ज्जनार्थकुद्दालाख्यतिकाष्ठं। इत्यमरः॥ (तीक्ष्णाग्रो लोहदण्डः।
"अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः"। इति मनुः।)

अभ्रियः, त्रि, (अभ्रे भवः, अभ्र+घ तस्य इय।) अभ्रोद्भववस्तु। तत्पर्य्यायः। मेघभवः २। इत्यमरः। (घनसम्भूतः। विद्युत्। मेघजलं। वज्रं। कुलिशं।)

अभ्री, स्त्री, (अभ्रति मलं गच्छति अभ्र+इन्, ह्रस्वादिकारादिति पक्षे ङीष्।) काष्ठकुद्दालः। इत्यमरटीकायां भरतः॥

अभ्रुः, पुं, (भ्रेष् चलने+घञ्, नञ्समासः।) उचितः। न्यायः। इत्यमरः॥

अभ्रोत्थं, क्ली, (अभ्रात् मेघात् उत्तिष्ठति उद्भवति, अभ्र+उत्+स्था+क।) वज्रं। इति त्रिकाण्डशेषः॥

अमक् रोगे। क आमयति व्याधिर्लोकं। इति दुर्गादासः॥

अम गतौ। भजने। शब्दे। अमति। इति दुर्गादासः॥

अम्, व्य, (अम्+क्विप्, स्वरादित्वादव्ययत्वमस्य।) शीघ्रता। अल्पं। इति व्याडिः॥

अमं, क्ली, (अम्+भावे घञ्, मान्तत्वान्न वृद्धिः, अंमो रोगो विद्यते अस्मात्, अर्शआद्यच्, प्रायेण अपक्वफलभक्षणेन रोगोत्पत्तेस्तस्य तथात्वं।) अपक्वफलादि। इति शब्दरत्नावली॥ रोगे पुं। इति मुग्धबोधव्याकरणं॥

अमङ्गलं, क्ली, (नास्ति मङ्गलं शुभं यस्मात् तत्।) अशुभसूचकं। तद्यथा,—
"सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसङ्ख्यकैः।
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि॥
ययौ तथापि समरं न जगाम गृहं पुनः।
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरां॥
छद्मवस्त्रपरीधानामपरां विधवामपि।
सुखदुःखां योनिदुःखां व्याधियुक्ताञ्च कुट्टिनीं॥
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो।
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनं॥
कुचेलमतिरूक्षाङ्गं नग्नं काषायवासिनं।
अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा॥
चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च।
सर्पेक्षतनरं सर्पं गोधाञ्च शशकं विषं॥
श्राद्धपात्रञ्च पिण्डञ्च मोटकं वानरं तथा।
देवलं शववाहञ्च शूद्रश्राद्धान्नभोजिनं॥
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकं।
कुम्भपुत्तलिकाञ्चैव शवदाहनकारिणं॥
शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च।
कार्पासं काक्षपं चूर्णं कुक्कुरं शूद्रकारिणं॥
दन्तिणे च शृगालञ्च कुर्व्वन्तं भैरवं रवं।
कपर्दकञ्च क्षौरञ्च छिन्नकेशं नखं मलं॥
कलहञ्च विलापञ्च विलापकारिणं जनं।
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणं॥
मिथ्यासाक्ष्यप्रदातारं चौरञ्च नरघातिनं।
पुंश्चलीपतिपुत्रञ्च पुंश्चल्योदनभोजिनं॥
देवतागुरुविप्राणां वस्तुवित्तापहारिणं।
दत्तापहारिणं दस्युं हिंसकं सूचकं खलं॥
पिटमाटविरक्तञ्च द्विजाश्वत्थविघातिनं।
सत्यघ्नञ्च कृतघ्नञ्च स्याप्यापहारिणं जनं॥
विप्रद्रोहं मित्रद्रोहं व्रतं विश्वासघातकं।
गुरुदेवद्विजानाञ्च निन्दकं खाङ्गघातकं॥
जीवानां घातकञ्चैव खाङ्गहीनञ्च निर्दयं।
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकं॥
गलितव्याधिगात्रञ्च कार्यं वधिरमेव च।
एकाक्षं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा॥
छिन्नं वमन्तं रुधिरं महिषं गर्द्दभं तथा।
मूत्रं पुरीषं श्लेष्माणं कश्मिनं नकपालिनं॥
भञ्जावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनं।
वृक्षञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकं॥
पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा।
अयदानिग्राह्यञ्च तन्त्रमन्त्रोपजीविनं॥
वैद्यञ्च रक्तपुष्पञ्चौषधं तुषसेव च।
कुवार्त्तां मृतवार्त्ताञ्च विप्रशापञ्च दारुणं॥
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि।
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरं॥
वामाक्षस्पन्दनं देहजाड्यं राज्ञो बभूव ह।
तथापि राजा निःशङ्को दर्शं दर्शममङ्गलं"॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥

अमङ्गलः, पुं, (नास्ति मङ्गलं यस्य) रराक्षवृक्षः॥ इति शब्दचन्द्रिका॥

अमङ्गलः, त्रि, (न मङ्गलः, नञ्समासः।) मङ्गलशून्यः। अकुशलः। यथा। "अमङ्गलं रूपमिदं दधत् कथं"। इति विद्वन्मोदतरङ्गिणी॥ मङ्गलाभावे स्त्री। यथा। "अमङ्गलाभ्यासरतिं विचिन्त्य तं"। इति कुमारसम्भवः॥

अमङ्गल्यः, त्रि, (मङ्गलाय हितः, मङ्गल+यत् ततो नञ्समासः।) अमङ्गलजनकः। यथा,—
"अमङ्गल्यं शीलं तव भवतु नामैवमखिलं"।
इति पुष्पदन्तः॥ (अशुभकरः। अग्निवस्तूचकः।
"देवि! मैवममङ्गल्यवादिनी भव"। इति नागानन्दः।)

अमण्डः, पुं, (नास्ति मण्डो भक्तावग्निष्टं भूषा वा यस्य सः।) रराक्षवृक्षः। इत्यमरः॥ (मण्डहीनभक्तादि। भूषणहीनञ्च।)

अमतः, पुं, (अम् रोगे+अतच्, अथवा मन्+भावे क्तः, नास्ति मतमभिप्रायो यत्र सः। अथवा मन्+कर्म्मणि क्तः, नञ्समासः।) रोगः। मृत्युः। कालः। इत्युणादिकोषः॥

अमतिः, पुं, (अम्+अति।) कालः। चन्द्रः। इति मेदिनी॥ दुष्टे त्रि। इति शब्दरत्नावली॥
"अमतिः पुंसि काले च दुष्टे हिमकरेऽपि च"।
इति शब्दरत्नावली। अबुद्धिः। अज्ञानं। अनभिसन्धिः।
"भुक्तातोऽन्नमस्यान्नममत्या क्षपणं त्वहं।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च"॥
इति मनुः।)

अमत्रं, क्ली, (अमति भुङ्क्तेऽन्नमत्र, अम् भोजने आधारे अत्रन्।) पात्रं। अस्य भाषा अमित्तिः। इत्यमरः॥ (भाजनं। स्थानं। भोजनपात्रं।)

अमत्सरः, पुं, अन्यशुभद्वेषाभावः। अत्र नञ्समासः॥ मात्सर्य्यरहिते त्रि। अत्र बहुव्रीहिसमासः॥

अमनिः, स्त्री, (अमति यात्यत्र, अम+आधारे अनि।) वर्त्म। पन्थाः। इत्युणादिकोषः॥

अमन्दः, पुं, (न मन्दः विरोधे नञ्समासः।) वृक्षः। इति शब्दचन्द्रिका॥ मन्दभिन्ने त्रि। यथा।
"दृष्ट्याभ्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः।" इति श्रीभागवतं॥ (भीषणः। घोरः। अतिगभीरः।
"आगृह्णद्भिरिवकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरम्
व्यानिर्घोषमसन्दुदुन्दुभिरवैराभातमुज्जृम्भयन्"।
इति उत्तरचरिते। प्रभुरः। बहुलः। अनल्पः।

"क्षणत्वनकिङ्किणीभगभगायितस्यन्दनै-
रमन्दमदर्दुरैनदिरदवारिदैरावृतः" ॥
इति उत्तरचरिते । "आनन्दममन्दमिमं कुवलय-
दलनोचने ददासि त्वं"। इति काव्यप्रकाशः ।
अजड़ः । कुशलः । उद्योगी ।)

अममः, पुं, (नास्ति ममेत्यभिमानो गृहादिषु यस्य ।)
भाविजिनविशेषः । इति हेमचन्द्रः ॥ ममताशून्ये
त्रि । (संसारमायारहितः । विषयासक्तिशून्यः ।
"अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरण्येष्वममश्चैव वृक्षमूलनिकेतनः" ॥
इति मनुः ।)

अमरः, पुं, (मृ + कर्त्तरि अच् नञ्समासः ।) देवः ।
इत्यमरः ॥
("विभौ देवगङ्गाशो वज्रपाणित्रिवामरैः"।
इति महाभारते ।
"फलं कर्म्मायत्तं किममरगणैः किञ्च विधिना"।
इति शान्तिशतके ।)
कुलिशवृक्षः । अस्थिसंहारवृक्षः ॥ इति मेदि-
नी ॥ पारदः । इति राजनिर्घण्टः ॥ मृत्युरहि-
ते त्रि । यथा,—
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्"।
इति हितोपदेशः ॥ अमरसिंहः । स चादिशा-
ब्दिकः नामलिङ्गानुशासननामककोषकारः विक्र-
मादित्यराजसभीयनवरत्नान्तर्गतरत्नविशेषश्च ।
यथा,—
"इन्द्रस्यन्द्रः काशकृत्स्ना पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥
इति कविकल्पद्रुमः ॥
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य" ॥
इति नवरत्नं ॥ स एव बौद्धमतावलम्बीति केचित् ॥

अमरजः, पुं, (अमर इव जायते, अमर + जन् +
डः ।) दुग्धदिरवृक्षः । इति राजनिर्घण्टः ॥
(कालस्कन्धः । पचतरुः ।)

अमरदारुः, पुं, (अमराणां दारुः, षष्ठीतत्पुरुषः ।)
देवदारुवृक्षः । इति राजनिर्घण्टः ॥

अमरद्विजः, पुं, (अमरपूजकोद्विजः प्राकृतपार्थिवादि-
त्वात् समासः, मध्यपदलोपश्च ।) देवलब्राह्मणः ।
इति चिकाण्डशेषः ॥ (देवाजीवः । देवपूजकः ।)

अमरपुष्पकः, पुं, (अमरमविशीर्णं पुष्पं यस्य समा-
सान्तः कः ।) काशवृक्षः । इति रत्नमाला ॥ केशः ।
इति भाषा ।

अमरपुष्पिका, स्त्री, (अमरमशीर्णं पुष्पं यस्याः सा-
जातित्वात् स्त्रियां ङीप्, स्वार्थे कन् ।) अधः-
पुष्पीवृक्षः । इति रत्नमाला ॥

अमररत्नं, क्ली, (अमराणां रत्नमिव ।) स्फटिकः ।
इति राजनिर्घण्टः ॥

अमरवल्लरी, स्त्री, (अमरा छेदनेऽपि न म्रियमाणा
वल्लरी वल्ली ।) आकाशवल्ली । इति वैद्यकं ॥

अमरा, स्त्री, (न म्रियते मृ + कर्त्तरि अच्, नञ्-
समासः ।) दूर्व्वा । गुडूची । इन्द्रपुरी । स्थूणा ।
जरायुः । इति मेदिनी ॥ इन्द्रवारुणीवृक्षः ॥ वटी-
वृक्षः । महानीलीवृक्षः । ग्रहकन्या । धृतकुमारी
इति ख्याता । इति राजनिर्घण्टः ॥ नाभिनाला ।
इति चिकाण्डशेषः ॥

अमराद्रिः, पुं, (अमराणां देवानामद्रिः पर्व्वतः,
देवालयत्वात् तस्य तथात्वं ।) सुमेरुः । इति
जटाधरः ॥

अमरावती, स्त्री, (अमरा विद्यन्तेऽस्यां, अमर +
मतुप् मस्याने व दीर्घश्च ।) इन्द्रनगरी । इत्यमरः ॥
अमराः सन्ति अस्यामिति मोक्षभूपादिति वतुः
नाम्नाप्यर्थे इति दीर्घः । इति भरतः ॥ तत्पर्य्या-
यः । पुष्पभासा २ देवपूः ३ । इति जटाधरः ॥
महेन्द्रनगरी ४ अमरा ५ सुरपुरी ६ । इति
शब्दरत्नावली ॥ तद्वर्णनं यथा । शिवशर्म्मोवाच ।
"रमयन्ती मनोऽतीव कैर्यं कस्येयमीप्सितुः ।
नयनानन्दसन्दोहदायिनी पूरनुत्तमा" ॥
गणावूचतुः ।
"शिवशर्म्मन् महाभाग सुतीर्थफलितद्रुम ।
लोकोऽत्र रमते विप्र सहस्राक्षपुरी त्विय ॥
तपोबलेन महता निर्म्मिता विश्वकर्म्मणा ।
दिवापि कौमुदी यस्याः सौधश्रेणीश्रियं श्रयेत् ॥
यदा कलानिधिः क्वापि दर्शेऽदृश्यत्वमावहेत् ।
तदा सप्रेयसीं ज्योत्स्नां सौधेष्वेषु निगूहयेत् ॥
यदच्छभित्तौ वीक्ष्य स्वमन्ययोषिदिहशङ्किता ।
मुग्धानासु विशेच्चित्रमपि स्वां चित्रशालिकां ॥
हर्म्येषु नीलमणिभिर्निर्म्मितेष्वत्र निर्भयं ।
खनीलिमानमाधाय तमोऽहःसपि तिष्ठति ॥
चन्द्रकान्तशिलाजालसुतमद्यामलं जलं ।
तत्र चादाय कलसैर्नेच्छन्त्यन्यजलं जनाः ॥
कुविन्दा न च सन्त्यत्र न च ते पश्यतो दृगाः ।
चेलान्यनङ्गतीरत्र यतः कल्पद्रुमोऽर्पयेत् ॥
गणाका नात्र विद्यन्ते चिन्ताविद्याविशारदाः ।
यतो जानाति सर्व्वेषां चिन्तां चिन्तामणिर्द्रुतं ॥
सूपकारा न सन्त्यत्र रसकर्म्मविचक्षणाः ।
दुग्धे सर्व्वरसानेका कामधेनुरतोऽनिशं ॥
कीर्त्तिरुच्चैरवा यस्य सर्व्वतो वाजिराजिषु ।
रत्नमुच्चैःश्रवाश्चात्र हयानां पौरुषाधिकः ॥
ऐरावतो दन्तिराजश्चतुर्दन्तोऽत्र राजते ।
द्वितीय इव कैलासो जङ्गमः स्फाटिकोज्ज्वलः ॥
तरुरत्नं पारिजातः स्त्रीरत्नं सेर्व्वशी त्विह ।
नन्दनं वनरत्नञ्च रत्नं मन्दाकिनी ह्यपां ॥
चयस्त्रिंशत् सुराणां या कोटिः अतिसमीरिता ।
प्रतीच्छते सावसरं सेवायै प्रत्यहं त्विह ॥
स्वर्गेऽस्मिन्नपदान्यत्रविद्यन्ते किञ्चन ।
यद्यत् त्रैलोक्यमैश्वर्य्यं न तत्तुल्यमनेन हि ॥
अश्वमेधसहस्रस्य लभ्यं विनिमयेन यत् ।
किन्तेन तुल्यमन्यत् स्यात् पवित्रमथवा महत् ॥
अर्चिष्मती संयमनी पुण्यवत्यमलावती ।
गन्धवत्यलकैश्वी च नैतत्तुल्या महर्द्धिभिः ॥
अयमेव सहस्राक्षस्त्वयमेव दिवस्पतिः ।
शतमन्युरयन्देवो नामान्येतानि नामतः ॥
सप्तापि लोकपाला ये त एनं समुपासते ।
नारदाद्यैर्मुनिवरैरयमाश्रीभिरीड्यते ॥
एतत्स्थैर्य्यं सर्व्वेषां लोकानां स्थैर्य्यमिष्यते ।
पराजयान्महेन्द्रस्य त्रैलोक्यं स्यात् पराजितं ॥
मनुजा दनुजा दैत्यास्तपस्यन्त्युग्रसंयमाः ।
गन्धर्व्वयक्षरक्षांसि महेन्द्रपदलिप्सवः ॥
सगराद्या महीपाला वाजिमेधविधायकाः ।
हुतवन्तो महायज्ञं शक्रैश्वर्य्यं जिघृक्षवः ॥
निष्प्रत्यूहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजां ॥
असमाप्तक्रतुशता वसन्त्यत्र महीभुजः ।
ज्योतिष्टोमादिभिर्यागैर्यैर्यजन्त्यपि ते द्विजाः ॥
तुलापुरुषदानादिमहादानानि षोड़श ।
ये यच्छन्त्यमलात्मानस्ते लभन्तेऽमरावतीं ॥
अक्षीववादिनो धीराः संग्रामेष्वपराङ्मुखाः ।
विक्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः ॥
इत्युद्देशात् समाख्याता महेन्द्रनगरीस्थितिः ।
यायजूका वसन्त्यत्र यज्ञविद्याविशारदाः ॥
एतस्या दक्षिणे भागे येयं दृश्यते पूः शुभा ।
इमामर्च्चिष्मतीं वीक्ष्य वीतिहोत्रपुरीं शुभां" ॥
इति स्कान्दे काशीखण्डे १० अध्यायः ॥

अमर्त्यः, पुं, (न मर्त्यः, इति नञ्समासः ।) देवता ,
इत्यमरः ॥ (मरणधर्म्मरहितः । अक्षयः । अवि-
नश्वरः ।)

अमर्त्यभुवनं, क्ली, (अमर्त्यानां देवानां भुवनं वास-
स्थानं ।) स्वर्गः । इति हलायुधः ॥

अमर्षः, पुं, (मृष + भावे घञ्, नञ्समासः । नास्ति
मर्षः क्षोधो यस्य, चि, क्षोधशून्यः ।) क्रोधः ।
इत्यमरः ॥
("कस्मित्पिटबधामर्षात् पुनर्नोत्सादयिष्यति" ।
इति रामायणे । अक्षमा । असहिष्णुता । इत्य-
घाते असहिष्णुत्वं ।
"यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः" ॥
इति भगवद्गीता ।)

अमर्षणः, त्रि, (मृष + बाहुल्यात् कर्त्तरि ल्युट्
नञ्समासः ।) क्रोधी । इत्यमरः ॥ (क्रोधनः ।
क्रोपनस्वभावः । अतिसंक्रुद्धः । प्रक्रोपितः ।
"रघोवरस्यमभयेन पत्रिणा
हृदि क्षतोगोत्रभिदप्यमर्षणः" ।
इति रघुवंशे । असहनः । असहिष्णुः ॥ पर-
क्षतापमानादेरसहनशीलः ।
"गत्वा क्रदे वासुदेवेन सार्द्धं
अमर्षणं धर्षयतः सुतं मे" । इति महाभारते ।
"अमर्षणः शोणितकाङ्क्षया किं
पदा स्पृशन्तं दशति द्विजिह्वः" । इति रघुवंशे ।)

अमलं, क्ली, (नास्ति मलं यस्य तत् ।) अभ्रधातुः ।
निर्म्मले त्रि । इति मेदिनी ॥

अमला, स्त्री, (नास्ति मलं यस्याः सा, अथवा अम्
+ कलच् स्त्रियां टाप् ।) लक्ष्मीः । इति मेदिनी ॥
सातलावृक्षः । इति राजनिर्घण्टः ॥ भूम्यामलकी ।
इत्यमरः ॥ नाभिनाला । इति चिकाण्डशेषः ॥

अमसः, पुं, (अम गतिरोगादौ असच्।) कालः। निर्बोधः। रोगः। इत्युणादिकोषः॥ ("अमसो वालिशे काले रोगभेदे पुमानयं"। इति अमरः।)

अमा, व्य,, (न मा + का खरादित्वादव्ययं।) सहार्थः। निकटं। इत्यमरः॥

अमा, स्त्री, (न मांति क्षयोदयविशेषं परिच्छिनत्ति, मा + क, नञ्समासः।) अमावस्या। इति त्रिकाण्डशेषः॥ चन्द्रमण्डलस्य षोड़शकला। तथा च स्कन्दपुराणीयप्रभासखण्डे।

"अमा षोड़शभागेन देवि प्रोक्ता महाकला। संस्थिता परमा माया देहिनां देहधारिणी"॥

अस्यार्थः। चन्द्रमण्डलस्य षोड़शभागेन परिमिता आधारशक्तिरूपा क्षयोदयरहितत्वात् नित्या सकलसूत्रवत् सर्व्वानुस्यूता अमा नाम्नी महाकला प्रोक्ता। इति रघुनन्दनः॥ (सह। सार्द्धं। समीपं। निकटं। अन्तिकं।)

अमांसः, त्रि, (नास्ति मांसं यस्य सः।) दुर्ब्बलः। इत्यमरः॥ अल्पमांसयुक्तः। मांसरहितश्च॥ (क्षुद्रः। क्षीणकायः। निरामिषमक्षवस्तु।)

अमात्यः, पुं, (अमा सह विद्यते, अमा + त्यप्।) मन्त्री। इत्यमरः॥ तत्परीक्षा। यथा,—

"शान्तो विनीतः कुशलः सत्कुलीनः शुभान्वितः। शास्त्रार्थतत्त्वगोऽमात्यो भवेद्भूमिभुजामिह"॥ इति युक्तिकल्पतरुः॥

("भृता हि पाण्डुनामात्या बलञ्च सततं भृतं। मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान्"॥ इति महाभारते।)

अमाननं, क्ली, (मन् + णिच् + भावे ल्युट्, नञ्समासः।) अनादरः। न्यक्कारः। इति शब्दरत्नावली॥

("अतुष्टिदानं कृतपूर्ब्बनाशन-
ममाननं दुश्चरितानुकीर्त्तनं।
कथाप्रसङ्गेन च नामविस्मृति-
र्विरक्तभावस्य जनस्य लक्षणं"॥

इति हितोपदेशे।)

अमानस्यं, क्ली,(मानसाय मनसे हितं मानस + यत्, नञ्समासः।) दुःखं। पीड़ा। व्यथा। तद्युक्ते त्रि। इत्यमरः॥ आमनस्यं आमानस्यमपि पाठः॥

अमान्यः, त्रि, (मन् + कर्म्मणि ण्यत्, नञ्समासः।) अमाननीयः। अनादृत्यः। मान्यशब्दस्य नञा समासः॥

अमामसी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष्। एषोदरादित्वात् ह्रस्वः।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमामासी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष्।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमायिकः, त्रि, (न + माया + ठन्, तस्य इक।) मायारहितः। माया विद्यते यस्य स मायिकः ततो नञा समासः॥

अमावसी, स्त्री, (अमा, साहित्येन वसतस्मिन्नर्कौ यस्यां, अमा + वस + अधिकरणे गौरादित्वात् ङीष्।) अमावास्या। इति शब्दरत्नावली॥

अमावस्या, स्त्री, (अमा साहित्येन वसतस्मिन्नर्कौ यस्यां, अमा + वस + आधारे ण्यत् स्त्रियां टाप्।) कृष्णपक्षान्तितिथिः। सा तु चन्द्रमण्डलस्य षष्ठदशकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा। इति तिथ्यादितत्त्वं॥ सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः सामावस्या। इति गोभिलः॥ परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन एकराश्यवच्छेदेन सहावस्थानरूपः। इति रघुनन्दनः॥ तत्पर्य्यायः। अमावास्या २। दर्शः ३। सूर्य्येन्दुसङ्गमः ४। इत्यमरः॥ षष्ठदशी ५। इति स्मृतिः॥ अमावसी ६। अमावासी ७। इति शब्दरत्नावली॥ अमामसी ८। अमामासी ९। इत्यमरटीकायां रमानाथः॥ सा दृष्टेन्दुकला सिनीवाली १०। नष्टेन्दुकला च कुहूः ११। इत्यमरः॥ तद्यवस्थादि यथा। अथामावस्या। सा च प्रतिपद्युता ग्राह्या युग्मात्। वराहपुराणे चाण्डालशब्दप्रबन्धे।

"षष्ठ्यष्टम्यमावास्या उभे पक्षे चतुर्द्दशी।
अख्यातानां गतिं यास्ये यद्यहं नागमे पुनः"॥

अतोऽत्र स्नानमावश्यकं। अतोऽत्र जीवत्पितृकेणापि स्नातव्यम्।

"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनं।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्"॥

इति वचनं रागप्राप्तस्नाननिषेधकं।

"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्नित्यं दर्शश्राद्धादौ नित्यनैमित्तिके न तु"॥

इति त्रयोदशीप्रकरणोक्तवचनाच्च॥*॥ पैठिनसिः। "न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावास्यायां हरितमपि छिन्द्यात्"। इति॥*॥

"पुत्रे तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ।
अमायाञ्च नदीस्नानं पुनात्यासप्तमं कुलं"॥

अत्र दहत्यजन्मदुष्कृतमिति ज्योतिषे पाठः॥*॥ व्यासः।

"अमावास्यां भवेद्यत्नो यदि भूमिसुतस्य च।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी"॥

"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत्।
गोसहस्रफलं दद्यात् स्नानं यन्नौनिना कृतम्"॥

सिनीवाली चतुर्द्दशीयुक्तामावास्या व्यक्तापि प्रशस्ता एवमन्यत्रापि वारविशिष्टविधौ न युग्मादरः निरवकाशत्वेन संज्ञायायोगात्। एतच्च मौनमरुणोदयकालमारभ्य स्नानपर्य्यन्तं। न तु स्नानकालमात्रे।

तत्र,

"उच्चारे मेथुने चैव प्रस्रावे दन्तधावने।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत्"॥

इति स्नान्देन तस्य सामान्यतः प्राप्तत्वात्। उच्चारे पुरीषोत्सर्गे॥*॥ स्मृतिः।

"करतोयाजलं प्राप्य यदि सोमयुता कुहूः।
अरुणोदयवेलायां सूर्य्यग्रहसमा मता"॥

स्नानमन्त्रः।

"करतोये सदानीरे सरित्श्रेष्ठे सुविश्रुते।
पौण्ड्रान् ज्ञापय से नित्यं पापं हर करोद्भवे"॥ पौण्ड्रान् देशविशेषान्॥*॥ मरीचिः।

"मासे नभस्यमावास्या तस्यां दर्भचयो मतः।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः"॥ अत्र।

"दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः।
अयातयामान्येतानि नियोज्यानि पुनः पुनः"॥

इति ग्रह्मपरिशिष्टवचनेनैव सिद्धौ आवश्यामावास्याया उपादानं।

"वार्षिकांश्चतुरो मासान्नाहरेत् कुशसन्ततिकाः।
आददीत त्वभावेऽपि सद्यो यस्योपयोजनं"॥

इति संवत्सरप्रदीपधृतशिवरहस्यीयस्यापवादकमिति॥ विद्याकरधृतं।

"सङ्कल्पादत्सरं यावत् शुद्धिः स्यादिधुवर्हिषां।
ततः परं न गृह्णीयात् जपादौ यज्ञकर्म्मणि"॥*॥ संवत्सरप्रदीपे।

"अमावास्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नरः।
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकं"॥

तत्प्रमाणप्रयोगौ षोड़शीशब्दे द्रष्टव्यौ॥*॥ अमावास्यायामपि मलमासे श्राद्धाभावमाह कौथुमिः।

"संवत्सरातिरेको वै मासो यः स्यात्त्रयोदशः।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्य्यादिन्दुसंक्षये"॥ सम्वत्सरप्रदीपे।

"एकराशिस्थिते सूर्य्ये यदि दर्शद्वयं भवेत्।
दर्शश्राद्धं तदादौ स्यान्न परत्र मलिम्लुचे"॥

यत्तु।

"जातकर्म्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च।
मलमासेऽपि तत्कार्य्यं व्यासस्य वचनं यथा"॥

इति व्यासवचनं तत्पिण्डपितृयज्ञाख्यश्राद्धपरं॥*॥ अमावास्याश्राद्धकालमाह छन्दोगपरिशिष्टं।

"पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि ग्रस्यते।
वासरस्य तृतीयांशे नातिसन्धासमीपतः"॥

पिण्डानां पितॄणां अन्वाहार्य्यं श्राद्धं मासैकदृष्टिजनकं यत्तत्तथा। तथा च मनुः।

"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः"।

राजनि चन्द्रे। ग्रस्यत इत्यनेन क्वचिच्चन्द्रक्षयाभावेऽपि अमावास्याश्राद्धं सूचितं। एतादृग्व्युत्पत्तेः साग्निरग्निसाधारणत्वात् वक्ष्यमाणकात्यायनोक्तरीत्या क्षीणाक्षभिन्नतावर्द्धमानभेदः साधारणः॥*॥ यत्तु,—

"पितृयज्ञन्तु निर्व्वर्त्त्य विप्रस्वन्नक्षयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं"॥

इति मनुवचनं तत्साग्निः पिण्डपितृयज्ञं निर्व्वर्त्य मासानुमासिकं प्रतिमासिकं श्राद्धं कुर्व्वीतेतिक्रमविधायकं। अत्रानुग्रहस्य वीप्सार्थकत्वं। तथा च।

"लक्षणवीप्सेत्यभूतेष्वभिर्भागे परिप्रती।
अनुरेषु सहार्थे च हीने उपसृ कथ्यते"॥

चन्द्रक्षयेऽमावास्यायां न तु कात्यायनोक्षक्षये

तथात्वे वर्द्धमानादौ प्रतिमासानुपपत्तेः। एवमेव आद्धविवेकः। अतएव तत्रैवामावास्याव्यतिरिक्तक्षयापत्तविहितपार्व्वणश्राद्धे ययास्तमिति वचनात् व्यवस्थेयुक्तं। तत्र साग्निकर्त्तृकत्वाविशेषितामावास्याव्यतिरेकाभिधानात् क्षीणादिभेदेन व्यवस्था साग्निनिरग्निसाधारण्येत्यवगम्यते। एवञ्चामावास्यायां मृताहनिमित्तक औरसक्षेत्रजगुप्तकर्त्तृव्यपार्व्वणे क्षीयमाणादिना न व्यवस्था किन्तु ययास्तमित्यनेन। एतदिहतं मलमासतत्त्वे ॥ * ॥

यत्तु दशममुहूर्त्तस्य मत्स्यपुराणोक्तापराह्णिकत्वेऽपि श्राद्धे तस्य त्यागः। पिण्डपित्र्ययार्थं एवेति वासरछतीयांशाभिधानं साग्निपरमेवेति परिशिष्टप्रकाशोक्तं तन्न युक्तं। पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पितॄणां इति श्रुत्या तन्मुहूर्त्तस्य मनुष्यकर्म्माङ्गत्वेन बोधनादेव श्राद्धे परित्यागः। एतच्छ्रुतिमूलकमेव वासरस्य छतीयांशे त्रिधा विभक्तस्य दिनस्य छतीयभागे नातिसन्ध्यासमीपत इति सन्ध्यासमीपैकमुहूर्त्तं श्रापद्यपि वर्ज्जनीय इत्यर्थः। तेन।

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परं॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु"॥

इति मत्स्यपुराणे निषिद्धमुहूर्त्तत्रये श्रापदि मुहूर्त्तद्वयमभ्यनुज्ञातं अतिशब्दस्वरसात्। "त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च वङ्गचैः"। इति हारीतवचनाच्च। तेन पूर्व्वदिने मुहूर्त्तत्रयमाप्तलाभे परदिने वासरस्य छतीयांशालाभे पूर्व्वदिने एव श्राद्धं। एतेन नातिसन्ध्यासमीपत इत्यनेन रात्रसीवेलामात्रं निषिध्यत इति मैथिलमतमपास्तं। सर्व्वकर्म्मसु स्नानदानादिष्वपि अनापदीत्यर्थः। इति श्राद्धविवेकः॥ तेनाग्नौ तस्यामपि तत्करणं। अतएव पराशरः।

"दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्"॥

इति ॥ * ॥ दर्शदैधे कुत्र श्राद्धमित्याह छन्दोगपरिशिष्टे कात्यायनः।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते"॥

चतुर्दशीयामं चतुर्दशीसम्बन्धिदिनयाममिति तद्दिनस्यामावास्यासम्बन्धेऽपि चतुर्दशीनिर्देशोऽधिकेन व्यपदेशा भवन्तीति न्यायात्। तेन यदा अमावास्याचतुर्दशीसम्बन्धिदिनस्य चतुर्थं प्रहरं छन्त्यं किञ्चिन्यूनं वा अनुपूरयेत् अत्रानुपूरयेदित्यभिधानात् तुरीययामस्य पादोनदण्डद्वयान्यूनप्रथममुहूर्त्तस्य बङ्गकालत्वं प्रतीयते। एतेन प्रहरत्रयाभ्यन्तरे किञ्चिदधिकप्रहरत्रये वा चतुर्दशी प्रतीयते। ततश्चोभयवासरीयछतीयांशसम्बन्धिपञ्चधाविभक्तापराह्णमुहूर्त्तयोर्मुहूर्त्तान्यूनदर्शलाभे दैधं न त्वेकदिनमात्रे तल्लाभे। तत्र पूर्व्वोक्तेन वासरस्य छतीयांशे इत्यनेनैव दैधानुदयात्। अतो यद्दिने वासरछतीयांशे तादृग्दर्शलाभस्तत्रैव श्राद्धं। मुहूर्त्तोनतिथेस्तु कर्म्मानर्हत्वान्न दैधावसरः। तथा च भविष्ये।

"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी"॥

इति। अत्र च प्रागुक्तजाबालिवचनोक्ता मुहूर्त्तात्मिका घटिका ग्राह्या योग्यत्वात् न त्वेकदण्डात्मिका। वक्ष्यमाणरौहिणादिग्रहणे तथा दृष्टत्वाच्च। ततश्च पूर्व्वोक्तदैधे तद्दिवसीयचतुर्दश्यपेक्षया परदिने अमावास्या क्षीयमाणा न्यूनकालव्यापिनी न तु पूर्व्वापरदिवसीययावच्चतुर्दश्यपेक्षया अनुपस्थितेः। एवं स्तम्भितावर्द्धमानयोरपि। तदैव पूर्व्वदर्श एव श्राद्धं। खोल्कचन्द्रक्षयानुरोधात्। यदा त्रिंशद्घटात्मकदिवसे चतुर्दश्यधिकचतुर्थयामपूरणे मुख्यापराह्णीयकिञ्चिन्यूनमुहूर्त्तलाभस्तदापि तदैवेत्यनेन चन्द्रक्षयानुरोधात् पूर्व्वदिने श्राद्धं न तु मुख्यापराह्णीयमुहूर्त्तलाभेऽपि परदिने। अत्र चन्द्रक्षयश्चतुर्दश्यमयामात् प्रभृति अमावास्यासप्तमयामपर्य्यन्तमिति वक्ष्यते। तदैवेत्येव श्रवणात्तिथिदैधे खण्डविशेषो नियम्यते कर्म्मणि खण्डान्तरव्युदासाय। एवञ्च यत्र पूर्व्वापरदिने वासरछतीयांशीयमुख्यापराह्णे मुहूर्त्तोनदर्शलाभस्तत्रापि पूर्व्वदिन एव श्राद्धं वासरछतीयांशचन्द्रक्षयातिशब्दस्वरसात्। त्रिमुहूर्त्तापीत्यनुरोधाच्च। यत्र तु पूर्व्वदिने त्रिमुहूर्त्तमात्रव्यापिन्यमावास्या परदिने छतीयांशमुहूर्त्तव्यापिनी सती क्षीयमाणा तत्र परदिने चन्द्रक्षयाभावेऽपि मुख्यापराह्णलाभात् श्राद्धम्। अन्यथा,—

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्"।

इति विशेषाभिधानं व्यर्थं स्यात् ॥ * ॥

अथ "यत्र पूर्व्वाह्णे श्राद्धं तत्र यदहस्त्वेव चन्द्रमा न दृश्येत ताममावास्यां कुर्व्वीत" इति गोभिलविरोधः। तथाविधचतुर्दशीयुक्तामावास्यायाः सिनीवालीत्वेन प्रातश्चन्द्रदर्शनात्। तत्राह सएव।

"यदुक्तं यदहस्त्वेव दर्शनं नेति चन्द्रमाः।
तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि"॥

"यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति यद्गोभिलसूत्रं तच्चन्द्रक्षयाभिप्रायिकम्। अन्यथा गोभिलीयतादृग्वसूत्रान्तरेण सह पौनरुक्त्यापत्तेः। तस्मात् प्रथमसूत्रं कुहूपरं तत्र वर्द्धमानापत्ते नियतं। क्षीणास्तम्भितयोस्तु यथायोग्यमनुसरणीयम्। एवञ्च "यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति श्रुतिरेतत्समानार्थकं श्रुत्यन्तरं वा तदपि वर्द्धमानादिपरं न तु कात्यायनवचनात्तत्र क्षयलक्षणा कल्पनरूपप्रवृत्तिविरुद्धायुक्ता।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसि"।

इति विरोधात्। क्षीण इति कात्यायनेन मया यत् क्षीणे राजनीत्युक्तं तदपि क्षयाभिप्रायकम्। अथैवं दृश्यमानेऽप्येकदा इति यद्गोभिलस्य सूत्रान्तरं तद्व्यर्थम्। "यदहस्त्वेव" इत्यादि द्वितीयसूत्रप्राप्ततिथेः सिनीवालीत्वेनैव चन्द्रदर्शनप्राप्तेरित्यत आह स एव।

"यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया।
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्व्वपेत्"॥

दृश्यमानेऽप्येकदेति यदुक्तं तच्चतुर्दश्यां श्राद्धाय पूर्व्वसूत्रममावास्यापदोपादानाच्चन्द्रक्षये सत्यमावास्याविषयं। इदं पुनरित्थम्भूतचतुर्दशीविषयमिति श्राद्धविवेकः। तत् किममावास्यावच्चतुर्दशीत्यत्राह अमावास्यां प्रतीक्षेत उभयतिथिप्राप्तौ श्राद्धायामावास्या प्रतीक्षणीया। यत्र पूर्व्वदिने दिवा सार्द्धमुहूर्त्तमात्रे अमावास्या परदिने च सार्द्धदशममुहूर्त्तमात्रे तत्र चोभयदिने श्राद्धयोग्यामावास्या न प्राप्यते तत्र तदन्त चतुर्दश्यन्ते निर्व्वपेत् दद्यात् ॥ * ॥ अत्रैव विषये साग्निनिरग्न्योर्व्विशेषमाह कालमाधवीये जाबालिः।

"अपराह्णव्याप्यापि यदि दर्शस्तिथिद्वये।
आहिताग्नेः सिनीवाली निरग्नेरादेः कुहूर्भवेत्"॥

आदिशब्दादनुपनीतशूद्रगोत्रहणं ॥ * ॥ क्षयमाह कात्यायनः।

"अष्टमेऽह्नि चतुर्दश्याः क्षीणो भवति चन्द्रमाः।
अमावास्यान्तमांशे च ततः किल भवेदृणुः"॥

चतुर्दश्यष्टमे यामे चन्द्रमाः क्षीण चतुर्थभागोनकलावशिष्टो भवति। "अर्द्धेन्दुराद्यप्रहरेऽवतिष्ठते" इत्यादिस्वरसात्। अमावास्याष्टमे यामे चागुर्भवति पुनरुत्पद्यते किलेत्यागमवार्त्तायां तेन अमावास्यायाः सप्तमे यामे क्षयत्वक्षय इत्यवगम्यते। "ततश्चान्त्यकलावयवनाशेत्पत्तिरेव क्षयः सा च सूक्ष्मतायां विनाशेऽप्यस्तीति" श्राद्धविवेकः॥ उत्पत्तिराद्यक्षणसम्बन्धः। तेन विनाशस्यानन्तत्वेऽपि नातिव्याप्तिः ॥ * ॥ अत्र विशेषमाह सएव।

"आद्यहायणमावास्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः"॥

आभ्यामिति ल्यब्लोपे पञ्चमी इमे प्राप्येत्यर्थः। चन्द्रचारविदो ज्योतिर्व्विदः। अत्र पौर्णमास्यान्तमास इति परिशिष्टप्रकाशः॥ अत्र बीजं ब्रह्मपुराणीयतिथिछत्यं। तथा च श्राद्धमधिछत्य ब्रह्मपुराणं।

"पयोमूलफलैः शाकैः छायापत्ते च सर्व्वदा"।

अत्र छायापत्ते चतुर्दशीव्यतिरिक्तायां यस्यां कस्यांचित् तिथौ श्राद्धविधानादमावास्यापि लभ्यत इति ॥ * ॥ को विशेषइत्यत्राह स एव।

"अर्द्धेन्दुराद्ये प्रहरेऽवतिष्ठते
चतुर्थभागोनकलावशिष्टः।
तदन्त एव क्षयमेति छत्व-
मेवं ज्योतिश्चक्रविदो वदन्ति"॥

अत्र मासद्वये अमावास्यायां चतुर्थभागोनकलावशिष्टः चतुर्थभागोना या कला तयावशिष्टः कलाभागत्रयमात्रः सन्नाद्ये प्रहरेऽवतिष्ठते। अर्थात् चतुर्दश्यष्टमयामे क्षयारम्भ इति। तदन्त एव अमावास्यान्तयाम एव क्षयं छत्वमेति। अन्य-

चामावास्या सप्तमयाम इति विशेषः। तेन मार्गशीर्षज्येष्ठयोरुभयदिने चन्द्रक्षयलाभे यद्यपि यदा चतुर्दशीयाममिति वचनात् पूर्व्वदिने एव आद्धं प्राप्नोति तथापि तद्वचनं चन्द्रक्षयानुरोधमूलमिति। क्षतक्षयानुरोधात् क्षीणायामपि परत्रापराह्णलाभे आद्धं अन्यथैतद्विशेषाभिधानं व्यर्थं स्यात्॥ * ॥ अत्रापि विशेषान्तरमाह स एव। यस्मिन्नब्दे द्वादशैकश्च यत्यस्मिंस्तृतीयया परिदृश्यो नोपलभ्येत। यथो मासः। तृतीयया मात्रया चतुर्थभागेनाकलया परिदृश्यश्चन्द्रो न भवति किन्तु तदधिकन्यूनकलयेति। तेन मलमासयुताब्दे अन्यमासवदनयोरपि चतुर्दश्यन्तयादि दर्शसप्तमयामपर्य्यन्तं क्षय इति। मलमासयुताब्दस्तु एकस्मान्मलमासादब्दद्वयानन्तराब्दतृतीयेऽब्दे मलमासस्यावश्यम्भावादिति ॥ * ॥ चन्द्रक्षयानुरुद्धं क्षीणापक्षमुपसंहरति स एव।

"एवं चारं चन्द्रमसो विदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात्"।

एवं चारं गतिविशेषं॥ * ॥ लम्भितायां व्यवस्थामाह स एव।

"सम्मिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित्।
खर्व्वितां तां विदुः केचिदुपेष्यमिति चापरे"॥

क्षीणायाः पूर्व्वमुक्तत्वात्। वर्द्धमानायाश्च वक्ष्यमाणत्वात् अस्य वचनस्य लम्भितापरत्वं। खर्व्वितां नीचां पिण्डलोकप्रापणानर्हां केचित् यजुर्व्वेदिनः। अपरे ऋग्वेदिनः तामेव उपेष्यमुपगच्छत श्राद्धायेति शेषः। उपेष्यमित्यत्र गताध्वामितिपाठे गतः प्राप्तः पिण्डलोकप्रापणाय अध्वा अनयेति गताध्वा प्रशस्तेत्यर्थः। "तस्माच्छन्दोगा उभयानुरोधादिच्छात उभयादरं कुर्व्वन्ति" इति कात्यायनसूत्रस्तः॥ * ॥ व्यक्तमाह लघुहारीतः।

"त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च वङ्गुभैः।
कुह्वरध्वर्युभिः कार्य्या यथेष्टं सामगैरिति"॥

अत्र त्रिमुहूर्त्तेत्युपादानात् लम्भितायां पूर्व्वदिने त्रिमुहूर्त्तमात्रलाभेऽपि बह्वृचानां श्राद्धं। न तु मुख्यापराह्णलाभादपि परदिने। सामगानां तत्रापि नियमः। एतादृग्विषय एव उभयत्रापराह्णलाभेऽपीयं व्यवस्थेति श्राद्धविवेकः॥ मुख्यापराह्णस्य एकदिनमात्रलाभेऽप्युभयदिनालाभात्॥ * ॥ वर्द्धमानायां व्यवस्थामाह कात्यायनः।

"वर्द्धमानाममावास्यां जन्तवेदपरेऽहनि।
यामांस्त्रीनधिकान् वापि पिण्डयज्ञस्ततो भवेत्"॥

यामांस्त्रीनिति पूर्व्वदिवसीययामत्रयन्यूनचतुर्दश्यपेक्षया। अथैवं वासरद्वतीयांश्राद्धानुरोधेन श्राद्धविधानात् कथममावास्याश्राद्धे पर्युदस्तरात्र्यादीतरकालपरिग्रहः। सत्यं। तिथिदैर्घ्ये क्षीणादिभेदेन खण्डविशेषपरिग्रहाय वासरद्वतीयांश्राप्तेच्छा अन्यथोभयदिने वासरद्वतीयांश्राप्राप्तौ श्राद्धलोपापत्तेः। प्रागुक्तनिरग्न्यादेः कुह्वर्म्मतेत्यस्य निर्विषयतापत्तेश्च अतः पर्य्युदस्तेतरकालस्यापि परिग्रहः। यदा तु पूर्व्वापरखण्डयोरन्यतरस्यैव परिग्रहस्तदा यथायोग्यं तत्रैव तथा-

क्रमुहूर्त्तदयपर्य्युदस्तेतरकालकुतपादिमुहूर्त्तपञ्चकरौहिण्यादिमुहूर्त्तचतुष्टयवासरद्वतीयांश्रीयापराह्णमुहूर्त्तदयकालाः। यथाक्रममापस्तम्बसामान्यप्रशस्तप्रशस्ततर-प्रशस्ततमत्वेन ज्ञेयाः। एवमखण्डतिथावपि नातिसन्ध्यासमीपत इति पूर्व्वोक्तत्वात्।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्धं तत्र न कारयेत्"। इति मत्स्यपुराणात्।

"रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते"॥

इति मनुवचनाभ्यां।

"ऊर्द्धं मुहूर्त्तात् कुतपात् यन्मुहूर्त्तचतुष्टयं।
मुहूर्त्तपञ्चकं वापि स्वधाभवनमिष्यते"॥

इति मत्स्यपुराणान्मुहूर्त्तपञ्चकमित्यत्र कुतपादिति ल्यब्लोपे पञ्चमी कुतपमारभ्येत्यर्थः। ततस्तेनैव।

"अपराह्णे तु सम्प्राप्ते अभिजिद्रौहिणोदये।
यदत्र दीयते जन्तोस्तदक्षयमुदाहृतं"॥

इत्युक्तं। "पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पितॄणां"। इति श्रुतिः। वासरस्य द्वतीयांश्च इति कात्यायनवचनं।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्धं तत्र न कारयेत्"
इत्येषामेकवाक्यत्वात् वासरद्वतीयांश्रीयापराह्णमुहूर्त्तदयस्य लाभः। इति तिथ्यादितत्त्वं॥

अमावासी, स्त्री, (अमा साहित्येन चन्द्रार्कौ यत्र वसतो यत्र तिथौ सा, अमा + वस + आधारे ण्यत्, स्त्रियां टाप्। णित्वात् वृद्धिः।) अमावस्या। इति शब्दरत्नावली॥

अमावास्या, स्त्री, (अमा सह चन्द्रार्कौ वसतो यत्र तिथौ सा, अमा + वस + आधारे ण्यत्, स्त्रियां टाप्। णित्वात् वृद्धिः।) अमावसीतिथिः। इत्यमरः॥

अमिचः, पुं, (अमरोगे इचच्।) शत्रुः। इत्यमरः॥ (रिपुः। विपक्षः। शत्रुपक्षीयः। प्रतिकूलः।

"भ्राद्रूपे ममामित्रे दृश्यसे राज्यकामुके।
अमित्रो मित्ररूपेण भ्रातुस्त्वमसि लक्ष्मण"॥

इति रामायणे।)

अमिषं, क्ली, (अम् रोगे कर्म्मणि इषन्) लौकिकसुखं। इत्युणादिकोषः॥ क्षुधाभावः॥ (न मिषश्चक्षुः नञ्समासः, क्षुधाभावः। नास्ति मिषश्चक्षुः यस्य तत्, क्षुधाशून्यः।)

अमी, [न्] त्रि, (अम् रोगे + भावे घञ्, मान्तत्वात् वृद्ध्यभावः, अमो रोगो विद्यतेऽस्य, इन्।) रोगी। यथा। अम्यर्यं। इति वेदे॥

अमीवं, क्ली, (अम + वन्, ईड्आगमः।) पापं। दुःखं। यथा,—

"तं त्वाहं भवभीतानां प्रपन्नानां भयापहं।
आपृच्छे शापनिर्म्मुक्तः पादस्पर्शादमीवहन्"॥

इति श्रीभागवतं॥

("न हि त्वमीदृशं ज्ञात्वा तस्यामीवं दशानन।
जीवितुं शक्यसि चिरं विषं पीत्वेव दुर्म्मतिः"॥

इति रामायणे।)

अमुकं, त्रि, बुद्धिस्थतोयनक्षितत्तत्तद्धर्म्मावच्छिन्नं। स्वस्ववृत्तिविशेषधर्म्मद्वारैव तत्तद्वस्तुवाचकं। यथा इति भाषा। अदस्शब्दस्य अकि कृते

सेरोत्त्वाभावे अकोऽकारस्य उत्त्वे अमुक इति भवति अमुक इत्यागमिकं। इति क्रमदीश्वरः॥ यथा,—

"अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः"।
इति आद्धतत्त्वं॥ (अभिवादये इति शब्दोच्चारणानन्तरं अमुकनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्। इति कुल्लूकभट्टः।

"संनिवेश्यं प्रमाणञ्च स्वहस्तेन लिखेत् स्वयम्।
मतं मेऽमुकपुत्रस्य अमुकस्य महीपते"॥
इति नारदः।)

अमुक्तं, क्ली, (मुच् + क्तः, न मुक्तः विरोधे नञ्समासः।) कुरिकाविशेषः। इति हलायुधः॥ हातकुरी इति भाषा। मुक्तिरहिते अत्यक्ते च त्रि॥ (अप्राप्तमोचनः। अखतन्त्रः।

"अमुक्ता भवता नाथ मुहूर्त्तमपि सा पुरा"।
इति साहित्यदर्पणे।

"अमुक्तो मानसैर्दुःखैरिच्छाद्वेषसमुद्भवैः"।
इति महाभारते। खड्गादिकं। यदुक्तम्,—

"खड्गादिकममुक्तञ्च नियुद्धं विगतायुधम्"।
इति।)

अमुत्र, व्य, (अमुष्मिन् अदस् + त्रल् उत्त्वमत्वे।) जन्मान्तरं। परलोकः। इत्यमरः॥ (अमुष्मिन् इत्यर्थस्य वाचकः।

"अनेनैवार्भकाः सर्व्वे नगरेऽमुत्र भक्षिताः"।
इति कथासरित्सागरे। भवान्तरे। जन्मान्तरे।

"तथैव यः त्वमाकाले त्वत्रियो नोपयास्यति।
अप्रियः सर्व्वभूतानां सोऽमुत्रेह च नश्यति"।

"इच्छद्भिः सततं श्रेय इह चामुत्र चोत्तमं"॥
इति महाभारते।)

अमुष्यपुत्रः, पुं, स्त्री, (अमुष्य पुत्रः निपातनात् अलुक् समासः।) प्रख्यातवंशोद्भवः। कुलीनः। इति जटाधरः॥

("स्यादामुष्यायणस्त्वार्थोऽमुष्यपुत्रो महाकुलः"।
इति जटाधरः।)

अमूर्त्तः, त्रि, (मूर्त्त्या + क्तः, नञ्समासः।) मूर्त्तिभिन्नः। मूर्त्तिरहितः। यथा। सङ्घाता अमूर्त्तत्वादिति वोपदेवः॥ न्यायमते। आकाशं। कालः। दिक्। आत्मा। एषां सामान्यगुणाः संख्या १ परिमितिः २ पृथक्त्वं ३ संयोगः ४ विभागः ५। आकाशस्य विशेषगुणः शब्दः। कालादिग्रोर्विशेषगुणो नास्ति आत्मनो विशेषगुणाः। बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ भावनाख्यसंस्कारः ७ धर्म्मः ८ अधर्म्मः ९। इति भाषापरिच्छेदः॥ (रूपहीनः। आकृतिरहितः। वायुः। अन्तरीक्षञ्च। यदुक्तं,—

"सन्निवेशो नेत्रदृश्यो यस्य तन्मूर्त्तमुच्यते।
क्षित्यम्बह्नित्रयं मूर्त्तममूर्त्तं वितरद्वयं"॥ इति।

"क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्त्तत्वक्रियायोगाश्रया अमी"॥
इति भाषापरिच्छेदः।)

अमूदृशः, त्रि, (यादृशिमते तु, अमुमिव पश्यति, अदस् + दृश् + क्विन्, दृश्यादेशे आत्वे कृते ततः

ऊत्वमत्वे ।) एवंप्रकारः । एतद्रूपः । इति मुग्धबोधं ॥ यथा,—"अमूदृशी तत् कविवन्दिवर्णितैः" । इति नैषधं ॥

अमूलक, त्रि, मूलरहितं । प्रमाणशून्यं । नास्ति मूलं यस्येति बहुव्रीह्यर्थे कप्रत्ययः ॥

अमूला, स्त्री, (नास्ति मूलं यस्याः सा, स्त्रियां टाप् ।) अग्निशिखावृक्षः । इति शब्दचन्द्रिका ॥ मूलरहिते त्रि । इति मुग्धबोधं ॥

अमृणाल, क्ली, (मृणालतुल्यं सादृश्ये नञ्समासः, तस्य मृणालसदृशकोमलत्वात् तथात्वं ।) वीरणमूलं । इत्यमरः ॥

अमृत, क्ली, (म्र + भावे क्तः, नास्ति मृतं मरणं यस्मात् तत्, तत्पायिनां मरणाभावात् तस्य तथात्वं ।) समुद्रोद्भवदेवभक्ष्यामरत्वजनकद्रव्यविशेषः । यदा पृथुराजभयेन पृथ्वी गौर्भूता तदा देवा इन्द्रं वत्सं कृत्वा हिरण्मयपात्रे अमृतरूपम्पयोऽदुदुहन् तत्तु दुर्व्वाससः शापात् समुद्रमध्यं गतं पश्चात् समुद्रमथने अमृतपूर्णकलसंग्रहीत्वा धन्वन्तरिरुत्थितः । इति भारतभागवते ॥ तत्पर्य्यायः ॥ पीयूषं २ सुधा ३ । इत्यमरः ॥ पेयूषं ४ । इति तट्टीकासारसुन्दरी ॥ * ॥ निर्जरं ५ । समुद्रनवनीतकं ६ । इति शब्दरत्नावली ॥ जलं । घृतं ॥ यज्ञीयद्रव्यं ॥ अयाचितवस्तु ॥ मुक्तिः । इति मेदिनी ॥ दुग्धं । औषधं । विषसामान्यं । वत्सनाभः । पारदः । इति राजनिर्घण्टः ॥ अन्नं । धनं । स्वर्गः । भक्ष्यीयद्रव्यं । हृद्यं । स्वादुद्रव्यं । इति हेमचन्द्रः ॥

अमृतः, पुं, (म्र + कर्त्तरि क्तः, नञ्समासः ।) धन्वन्तरिः । देवता । इति मेदिनी । वाराहीकन्दः । वनमुद्गः । इति राजनिर्घण्टः ॥ सुन्दरः । अतिहृद्यः । इति भरतधृतधाड़िः ॥ (आत्मा, यथा महाभारते,—

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तादमृतः परः ।
अमृतान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥

सूर्य्यः ॥ सुरपतिरिन्द्रः ॥ विष्णोः सहस्रनाममध्ये परिगणितो नामभेदः ॥) मरणरहिते त्रि । यथा । "अमृते जारजः कुणपः" । इत्यमरः ॥

अमृतजटा, स्त्री, (अमृतवत् सुस्वादुर्जटा यस्याः सा ।) जटामांसी । इति राजनिर्घण्टः ॥

अमृततरङ्गिणी, स्त्री, (अमृतस्य पीयूषस्य तरङ्गिणी नदीव ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥

अमृतदीधितिः, पुं, (अमृतवत् सन्तोषकारिण्यः दीधितयो यस्य सः ।) चन्द्रः । इति शब्दरत्नावली ॥ ("अमृतदीधितिरेष विदर्भजे भजति तापमुषम्" । इति नैषधे ।)

अमृतफलं, क्ली, पुं, (अमृतमिव स्वादु फलं ।) पारावतवृक्षः । पटोलः । इति राजनिर्घण्टः ॥ नासपाती । इति पारस्यभाषा । यथा । अथाम्रतफलं यदृक्कसातक्रविलप्रभृतिदेशेषु नासपाती इति प्रसिद्धं ।

"अमृतफलं लघु हृद्यं सुस्वादु त्रीन् हरेद्दोषान् ।
देशेषु मुद्गलानां बल्लं तल्लभ्यते लोकैः" ॥
इति भावप्रकाशः ॥

अमृतफला, स्त्री, (अमृतवत् स्वादु फलं यस्याः सा, स्त्रियां टाप् ।) द्राक्षा । आमलकी । इति राजनिर्घण्टः ॥ (लघुखर्ज्जूरीवृक्षः । बलविशेषः । नासपाती । इति पारस्यभाषा ।

अमृतवल्ली, स्त्री, (अमृतवत् वल्ली, तस्या रोगनाशकत्वात् तथात्वं ।) गुडूची । इति रत्नमाला ॥

अमृतरसा, स्त्री, (अमृतवत् स्वादुः रसो यस्याः सा, स्त्रियां टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥ (पक्वान्नविशेषः ॥ सा च
"तृतीयभागखण्डेन मिश्रितं घस्रिपिण्डकं ।
शुभ्रमीषद्घृतयुतं मर्द्दयेद्दृढपाणिना ॥
एवं समुद्धृतं कृत्वा स्थापयेद्भाजनीमितं ।
ततोऽन्यस्मिन्नहनि तु चित्रितं निस्वचैस्तिलैः ॥
विधायापूपकं तेन तम्बिकायां हृते पचेत् ।
ततोऽमृतरसा जाता वातहृद्बलवर्द्धिनी" ॥
इति भावप्रकाशे ।)

अमृतसम्भवा, स्त्री, (सम् + भू + भावे अप्, अमृतस्य मरणाभावस्य रोगाभावस्य इति यावत् सम्भव उत्पत्तिर्यस्याः सा, स्त्रियां टाप् ।) गुडूची । इति राजनिर्घण्टः ॥

अमृतसारजः, पुं, (अमृतस्य सारः तस्मात् जायते, अमृतसार + जन् + डः, उपपदसमासः ।) गुड़ः । तवराजोद्भवखण्डः । इति राजनिर्घण्टः ॥

अमृतसूः, पुं, (अमृतं तुषारं सूते, अमृत + सू + क्विप्, उपपदसमासः ।) (अमृतान् देवान् सूते, अमृत + सू + क्विप्, उपपदसमासः ।) चन्द्रः । इति हेमचन्द्रः ॥ देवमातरि स्त्री । अमृतानां देवानां सूः प्रसूतिः ॥

अमृतसोदरः, पुं, (अमृतस्य सोदरः सोदर्य्यः तस्य एकस्मादुत्पन्नत्वात् तथात्वं ।) घोटकः । इति राजनिर्घण्टः ॥ (उच्चैःश्रवा अश्वः ।
"सुरादेवी समुत्पन्ना तुरगः पाण्डरस्तथा" ।
इति भारते ।)

अमृतस्रवा, स्त्री, (स्रवति इति स्रु + अप् । स्त्रियां टाप् । अमृतस्य स्रवा षष्ठीतत्पुरुषः ।) रुदन्तीवृक्षः । लताविशेषः । तत्पर्य्यायः । वृक्षरुहा २ उपवल्लिका ३ घनवल्ली ४ सितलता ५ । अस्या गुणाः । पथ्यत्वं । ईषत्तिक्तत्वं । रसायनत्वं । व्रणनाशित्वं । विषकुष्ठकामकामलाश्वयथुजयकारित्वञ्च । इति राजनिर्घण्टः ॥
("उक्तामृतस्रवा पथ्या ईषत्तिक्ता रसायनी ।
व्रणघ्नी विषकुष्ठामं कामलां श्वयथुं जयेत्" ॥
इति राजनिर्घण्टः ।)

अमृता, स्त्री, (नास्ति मृतं मरणं यस्याः सा ।) गुडूची । मदिरा । इन्द्रवारुणी । ज्योतिष्मती । गोरक्षदुग्धा । अतिविषा । रक्तशिरुत् । दूर्व्वा । आमलकी । हरीतकी । इति राजनिर्घण्टः ॥ तुलसी । इति शब्दमाला ॥ पिप्पली । इति मेदिनी ॥ चम्पादेशजशालमांसा हरीतकी । सा

विरेचने प्रशस्ता । इति राजवल्लभः ॥ (सूर्य्यदीधितिविशेषाः ।
("सौरीभिरिव नाड़ीभिरमृताख्याभिरन्वयः" ।
इति रघुवंशे ।)

अमृतान्धः, [स्] पुं, (अमृतमन्धः अन्नमिव वह्निकरं यस्य सः ।) देवता । इत्यमरः ॥ (अमृतं सुधा अन्धो भक्ष्यं यस्य सः ।)

अमृतापलः, पुं, (अमृतमिव फलं यस्य, पृषोदरादित्वात् दीर्घः ।) पटोलः । इति त्र्यक्षराभिधानं ॥

अमृताशनः, पुं, (अमृतं अश्नाति भुङ्क्ते, अश्न + बाहुलकात् कर्त्तरि ल्युट् । अमृतस्य अशनः, षष्ठीतत्पुरुषः ।) देवता । इति हलायुधः ॥

अमृताष्टकं, क्ली, (अमृताप्रभृति अष्टकं यस्य तत् ।) हरितक्याद्यष्टद्रव्यं । यथा,—
"अमृता कटुकारिष्टपटोलघनचन्दनं ।
नागरेन्द्रयवश्वेतदमृताष्टकमीरितं ॥
क्षयितं सकणाचूर्णं पित्तश्लेष्मज्वरापहं ।
हृल्लासारोचकच्छर्द्दिष्टण्णादाहनिवारणं" ॥
इति भावप्रकाशः ॥

अमृतासङ्गः, क्ली, (अमृतस्येव आसङ्गो यस्य तत् ।) तुत्थविशेषः । तत्पर्य्यायः । कर्परिकातुत्थं २ अञ्जनं ३ । इति हेमचन्द्रः ॥

अमृताहरणः, पुं, (अमृतमाहरति, माङदाख्यापनयनार्थं स्वर्गात् भूलोकं नयति, आ + हृ + कर्त्तरि ल्युट्, ततः षष्ठीतत्पुरुषः ।) गरुड़ः । इति हारावली ॥ ("एरा किल गरुड़ो मातुर्विनतायाः सपत्नीदास्यनिवारणार्थं सर्व्वदेवान् विनिर्जित्य सोमरक्षकच्छेदनयन्त्रादिकञ्चातिक्रम्य स्वर्गादमृतं नागकुलाय दातुमाहृतवान्" । इति पौराणिकी कथा । महाभारतस्यादिपर्व्वणि ।
"श्रुत्वा तमब्रुवन् सर्पा आहरामृतमोजसा ।
ततो दास्यादिप्रमोक्षो भविता तव खेचर ! ॥
इत्युक्तो गरुड़ः सर्पैस्ततो मातरमब्रवीत् ॥
गच्छाभ्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुं ॥
.. ..
स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके ।
परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयं ॥
ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् ।
.. ..
अच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥
समुत्पाट्याऽमृतं तत्र वैनतेयस्ततो बली ।
उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्य्यवान् ॥
... ...
एवं तदमृतं तेन हृतमाहृतमेव च ।
द्विजिह्वाश्च कृताः सर्पा गरुड़ेन महात्मना" ॥)

अमृताक्त, क्ली, (अमृतमाक्तयते स्पर्द्धते, आ + क्त + कः, तस्य तुल्यस्वादत्वात् तथात्वं ।) लघुविल्वफलाक्षतिखोरासानदेशजनांसयातीनामफलं । तत्पर्य्यायः । रुचिफलं २ । अस्य गुणाः । गुरुत्वं । वातनाशित्वं । स्वादुत्वं । अम्लत्वं । रुचिशुक्रकारित्वञ्च ॥ तल्लघुफलगुणाः । हृद्यत्वं । सुस्वादुत्वं । त्रिदोषनाशित्वञ्च । तत् मुद्गलदेशे

बद्धलं लभ्यते। इति भावप्रकाशः॥
अमृतोत्पन्नं, क्ली, (अमृतं विषमिव उत्पन्नं नीलवर्णत्वात्।) खर्परीतुत्थं। इति राजनिर्घण्टः॥
अमृतोत्पन्ना, स्त्री, (अमृतं मधु उत्पन्नं यस्याः सा, "जातिकालसुखादिभ्यो निष्ठायाः परवचनमिति निष्ठायाः परनिपातः"।) मक्षिका। इति राजनिर्घण्टः॥
अमृतोद्भवं, क्ली, (अमृतं विषमिव उद्भवति क्षयवर्णत्वात्, उद्+भू+अप्।) तुत्थं। खर्परीतुत्थं। इति राजनिर्घण्टः॥
अमेधाः, [स्] पुं, (नास्ति मेधा यस्य सः, समासान्तः असिच्।) मूढः। मूर्खः। इति हेमचन्द्रः॥
("नमः समस्मात् पूर्व्वस्मा अन्तरस्मा अमेधसाम्। सुमेधसामन्तरस्मै सतां खस्मै स्वयम्भुवे"। इति वोपदेवः।)
अमेध्यं, क्ली, (न मेध्यं पवित्रं विरोधे नञ्समासः।) पुरीषं। इति शब्दरत्नावली॥ अपवित्रे त्रि॥ (अपवित्रं। मलमूत्रादिकं वस्तु।
"नाग्निं मुखेनोपधमेत् नग्नां नेक्षेत च स्त्रियं। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्"॥ इति मनुः।)
अमोघः, त्रि, (न मोघो निष्फलः, नञ्समासः।) सफलः। अव्यर्थः। इति मेदिनी॥ नदविशेषे पुं। इति शब्दरत्नावली॥ (इष्टफलप्रदः। अवन्ध्यः। अविफलः।
"यदमोघमपामन्तरग्नं वीजमजत्वया"। इति कुमारसम्भवे।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः"। इति रघुवंशे।
अमोघा, स्त्री, (न मोघा निष्फला, नञ्समासः।) पाटलिवृक्षः। विड्रङ्गं। इत्यमरः॥ हरीतकी। इति मेदिनी॥
अम्ब गतौ। (इति कविकल्पद्रुमः।) भ्वादिगणीयो-पधः। अम्बति। इति दुर्गादासः॥
अम्बकं, क्ली, (अम्बति गच्छत्यपर्य्यन्तं गच्छति, अम्ब+ण्वुल्। वा अम्बाते भूगर्भे प्राप्यते, अम्ब+कर्म्मणि घञ् स्वार्थे कन्।) नेत्रं। इति हेमचन्द्रः॥
"आसीनमासन्नशरीरपातं-
स्त्रियम्बकं संयमिनं ददर्श"।
इति कुमारसम्भवे।) ताम्रं। इति राजनिर्घण्टः॥
अम्बरं, क्ली, (अम्बि शब्दे+भावे घञ्, अम्बः शब्दस्तं राति आदत्ते अम्ब+रा+कः।) वस्त्रं। ("एवमुक्ता सुमित्रां सा विवर्णा मलिनाम्बरा"। इति रामायणे।)
आकाशं। ("दावाग्निः कथमम्बरे" इति साहित्यदर्पणे।) कार्पासः। खनामख्यातसुगन्धिद्रव्यं। इति विश्वः॥ अभ्रधातुः। इति राजनिर्घण्टः॥
अम्बरिषं, क्ली, (अम्बाते पच्यतेऽत्र, अबि+अरिष वा दीर्घः निपातनात्।) मर्द्दनपात्रं। भाजना खोला। इति भाषा। इत्यमरटीकायां रमानाथः॥
अम्बरीषं, क्ली, (अबि+गतौ+कर्म्मणि घञ्, अम्बा खल्वा ईर्ष्या यस्मात् तत्, सिंहवत् एषोदरादित्वात् रवर्णविपर्य्ययेण साधु।) भाङ्गः। भर्द्दनपात्रं। इत्यमरः॥ युद्धं। इति मेदिनी॥
अम्बरीषः, पुं, (अम्बाते पच्यते अत्र, निपातनात् साधुः।) विष्णुः। शिवः। इति त्रिकाण्डशेषः॥ किंशोरः। भास्करः। नृपभेदः। स तु सूर्य्यवंशीयनाभागराजपुत्रः।
("भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः॥ अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्"॥ इति हरिवंशे।) नरकभेदः॥ आम्रातकवृक्षः। अनुतापः। इति मेदिनी॥
अम्बष्ठः, पुं, (अम्बायां मातरि तिष्ठति, अम्बा+स्था+कः, आम्बाम्बेति यत्नं, आपोः संज्ञाच्छन्दसोर्बहुलमिति कः, असवर्णाजातत्वात् तस्य तथात्वं।) देशविशेषः। विप्रादैश्यायामुत्पन्नः। इति मेदिनी॥ अयं चिकित्साजीविः वैद्य इति ख्यातः। इत्यमरटीकायां भरतः॥ हस्तिपकः। यथा,—
"अम्बष्ठाम्बष्ठ मागं नौ देह्यपक्रम मा चिरं"। इति श्रीभागवतं॥ कायस्थजातिविशेषः। इति पश्चिमदेशे प्रसिद्धः॥
अम्बष्ठकी, स्त्री, (अम्बष्ठं कायति स्वग्रहणार्थमाकर्षति, अम्बष्ठ+कै+कः, गौरादित्वात् ङीष्।) लताविशेषः। आकनादि निसुखी इति च भाषा। तत्पर्य्यायः। पाठा २ अम्बष्ठा ३ कुचेली ४ पाषचेलिका ५ एकाष्ठीला ६ वरा ७ तिक्ता ८ प्राचीना ९ एकोग्निका १० वृका ११। इति रत्नमाला॥ विडङ्गकर्णी १२ स्थापनी १३ श्रेयसी १४ रसा १५ पाषचेली १६ वनतिक्तिका १७। इत्यमरः॥ अविडङ्गकर्णी १८ अविडङ्गकर्णा १९। इति तट्टीका॥ अम्बष्ठिका २० यूथिका २१ विडङ्गकर्णिका २२ दीपनी २३ तिक्तपुष्पा २४ वृहत्तिक्ता २५ गिरिशिरा २६ वृकी २७ मालती २८ देवी २९ वृत्तपर्णी ३०। इति राजनिर्घण्टः॥ अस्या गुणाः। अतीसारश्रमनत्वं। लघुत्वं। त्रिदोषनाशित्वञ्च। इति राजवल्लभः॥ तिक्तत्वं। गुरुत्वं। उष्णत्वं। वातपित्तज्वरपित्तदाहशूलनाशित्वं। भग्नसन्धानकारित्वञ्च। इति राजनिर्घण्टः॥
अम्बष्ठा, स्त्री, (अम्बायां मातरि स्तोत्पत्तिस्थाने इति यावत्, तिष्ठति, अम्बा+स्था+कः, अम्बेत्यादिना यत्वम् पूर्ब्बवत् ङीष्, स्त्रियां टाप्।) क्षुपविशेषः। अम्बाड़ा इति ख्याता। अस्याः पर्य्यायः। बालिका २ बाला ३ गुठाम्बा ४ अम्बालिका ५ अम्बिका ६ अम्बा ७ माचिका ८ वृद्धवल्का ९ मयूरिका १० गन्धपत्री ११ चित्रपुष्पी १२ श्रेयसी १३ मुखवाचिका १४ क्षिप्रपत्री १५ भूरिमञ्जी १६। अस्या गुणा। कषायत्वं। अम्लत्वं। कफकण्ठरोगवातरोगबलाग्नाशित्वं। व्रणभिकारित्वञ्च। इति राजनिर्घण्टः॥ पाठा। चाङ्गेरी। यूथिका। इत्यमरमेदिनीकरौ॥
अम्बष्ठिका, स्त्री, (अम्बष्ठा+संज्ञायां कन्, स्त्रियां टाप्।) अम्बष्ठा। आकनादि इति भाषा। इति राजनिर्घण्टः॥ ब्राह्मणी। वामनहाटी इति प्रसिद्धा। इति रत्नमाला॥
अम्बा, स्त्री, (अम्बाते स्नेहेनोपगम्यते, अबि गतौ+घञ्, स्त्रियां टाप्।) जननी। इति शब्दरत्नावली॥
"अम्ब! यत्त्वमिदं प्राप्य प्रभुमाय वचो मम"।
"नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा"।
इति विष्णुपुराणे।)
नाथोक्तौ सेव। इत्यमरः॥ पाण्डुराजमातुः स्वसा। इतिमहाभारतं॥ अम्बष्ठा। इति राजनिर्घण्टः। दुर्गा। इति केचित्॥
अम्बालिका, स्त्री, (अम्बेति शब्दं लाति गृह्णाति, अम्बा+ला+कः, उपपदसमासः, ह्रस्वे अतइत्वं स्वार्थे कन्, स्त्रियां टाप्।) माता। इति शब्दरत्नावली॥ अम्बष्ठा। इति राजनिर्घण्टः॥ पाण्डुराजमाता। इति भारतं॥ (काशीराजस्य कनिष्ठा दुहिता सा च विचित्रवीर्य्यपत्नी।
"अम्बालिका च राजेन्द्र! राजकन्या यवीयसी।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे॥
"भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा"।
इति महाभारते।)
अम्बिका, स्त्री, (अम्बा+स्वार्थे कन्, स्त्रियां टाप्।) दुर्गा।
"ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम्"॥
इति कुमारसम्भवे। माता। इति मेदिनी॥ जनदेवीविशेषः। इति हेमचन्द्रः॥ कटुकीवृक्षः। इति शब्दचन्द्रिका॥ अम्बष्ठा। इति राजनिर्घण्टः॥ काशीराजस्य मध्यमादुहिता। विचित्रवीर्य्यस्य पत्नी। धृतराष्ट्रस्य माता।
"अम्बा ज्येष्ठाऽभवत्तासामम्बिकात्वथ मध्यमा।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे॥
भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा"।
इति महाभारते।)
अम्बिकेयः, पुं, (पाणिनिमते तु अम्बिकाया अपत्यं पुमान्, अम्बिका+ठक् तस्य इयः, वृद्धभावः।) गणेशः। कार्त्तिकेयः। धृतराष्ट्रराजः॥ अम्बिकाया अपत्यमित्यर्थे ढ्योः॥
अम्बिकेयकः, पुं, (अम्बिकेय+स्वार्थे कन्।) गणेशः। इति जटाधरः॥
अम्बु, क्ली, (अबि शब्दे+उण्।) बालानामौषधिः। इत्यमरः॥ बाला इति भाषा। जलं ("भुक्ता मृणालपटली भवता निपीतान्यम्बूनि यच्च नलिनानि निषेवितानि"। इति भामिनीविलासे। "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्युद्भटः। "गाङ्गमम्बु सितमम्बु यामुनं"। इति काव्यप्रकाशे।)
अम्बुकण्टकः, पुं, (अम्बुनि जले कण्टकइव, सादृश्यार्थे कन्।) कुम्भीरः। इति त्रिकाण्डशेषः॥
अम्बुकिरातः, पुं, (अम्बुनि जले किरातः व्याध इव।) कुम्भीरः। इति त्रिकाण्डशेषः॥
अम्बुकीटः पुं, (अम्बुनि कीटः वानर इव।) मिश्र-

मारजन्तुः। इति हेमचन्द्रः॥ सुसुक इति भाषा।

अम्बुकूर्म्मः, पुं, (अम्बुनः कूर्म्म इव)। शिशुमारः। इति हेमचन्द्रः॥

अम्बुकेशरः, पुं, (अम्बुजातः केशरोऽस्य।) छोलङ्गच्छः। इति रत्नमाला॥

अम्बुचामरं, क्ली, (अम्बुनः चामरमिव।) शैवालं। इति जटाधरः॥ शेयाल इति भाषा।

अम्बुजं, क्ली, (अम्बुनि जायते, अम्बु+जन्+डः।) पद्मं। इति मेदिनी॥ "इन्दीवरेण नयनं मुखमम्बुजेन"। इति मृच्छकटिकस्य। "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्यद्भुटः।) वस्त्रं। इति त्रिकाण्डशेषः॥

अम्बुजः, पुं, (अम्बुसमीपे जातः।) हिज्जलवृक्षः। इत्यमरः॥ (निशुण्डवृक्षः॥

"अम्बुजं कमले क्लीवं हिज्जले तु पुमानयं"।
इति शब्दरत्नावली।
"अम्बुजो निशुले पुंसि कमले तु नपुंसकं"।
इति मेदिनी।)

अम्बुजन्मन्, [न्] क्ली, (अम्बुनो जन्मास्य।) पद्मं। इति राजनिर्घण्टः॥ (सारसविहङ्गः॥ शङ्खः। त्रि, जलजातः। सलिलोद्भवः।)

अम्बुतालः, पुं, (अम्बुनि जले तालयति प्रतिष्ठां गच्छति अम्बु+तल+अच्।) शैवालं। इति त्रिकाण्डशेषः॥

अम्बुदः, पुं, (अम्बु जलं ददाति, दा दाने+कः।) मेघः। इति रत्नमाला॥ ("सदा मनोज्ञाम्बुदनादसोत्सुकम्"। इति ऋतुसंहारे। "शशाक निर्व्वापयितुं न वासवः खतक्षुतं वह्निमिवाद्रिरम्बुदः"। इति रघुवंशे।) मुस्तकं। यथा। "कणीसविश्वानलदं सहाम्बुदं"। इति वैद्यकं॥

अम्बुधिः, पुं, (अम्बूनि धीयन्तेऽत्र, अम्बु+धा+कर्म्मण्यधिकरणे किः।) समुद्रः। इति शब्दरत्नावली॥ ("रे चाञ्चल्ययुषो मृगाः श्रितनगाः कल्लोलमालाकुलामेतामम्बुधिगामिनीं शर्वसितः सङ्गाहितुं वा कथम्"। इति भामिनीविलासे। "सुरासुराश्च गन्धर्व्वाः क्षोभयामासुरम्बुधिम्"। इति रामायणे।)

अम्बुधिसवा, स्त्री, (अम्बुधि+सु+अप्, स्त्रियां टाप्।) मद्यकन्या। इतकुमारी इति ख्याता। इति राजनिर्घण्टः॥

अम्बुपः, पुं, (अम्बूनि जलानि पाति पिबति वा, अम्बु+पा+कः।) चक्रमर्द्दकवृक्षः। इति शब्दचन्द्रिका॥ (जलेश्वरः। वरुणः।) घृतभिषाख्यं लवणं। त्रि, जलपानकारी।)

अम्बुपत्रा, स्त्री, (अम्बूनि पत्रे यस्याः सा।) उपटावृक्षः। इति रत्नमाला॥

अम्बुप्रसादः, पुं, (अम्बूनि प्रसादयति स्वच्छतां नयति अम्बु+प्र+सद+णिच्+अच्, उपपदसमासः।) कतकवृक्षः। इति राजनिर्घण्टः॥ निर्म्मली इति ख्यातः।

अम्बुप्रसादनं, क्ली, (अम्बूनि प्रसादयति, प्र+सद णिच्+ल्युट्।) कतकवृक्षः। इति त्रिकाण्डशेषः॥

अम्बुभृत्, पुं, (अम्बु बिभर्त्ति, अम्बु+भृ+क्विप्।) मेघः। मुस्तकं। इत्यमरः॥ समुद्रः। इति केचित्॥

अम्बुमात्रजः, पुं, (अम्बुमात्रे अल्पजले जायते, जन+डः) शम्बूकः। शामुक इति हेमचन्द्रः॥ इति भाषा।

अम्बुरः, पुं, (अम्बु+उरन्।) दारुधनःकाष्ठं। इति हेमचन्द्रः॥ गोदरट् इति भाषा।

अम्बुरुहा, स्त्री, (अम्बुनि रोहति, अम्बु+रुह+कः, ततष्टाप्।) स्थलपद्मिनी। इति राजनिर्घण्टः॥

अम्बुवाची, स्त्री, (अम्बु तद्वर्षणं वाचयति सूचयति, वच्+णिच्+अण्, उपपदसमासः, ङीप्।) ऋतुमती एथ्वी। यथा,—
"यद्वारे यत्काले मिथुनसंक्रमणं भूतं तद्वाराभ्यन्तरे तावत्कालावधि विंशत्यादिदण्डाधिकदिनत्रयमम्बुवाची। तत्राध्ययनं बीजवपनं न कार्य्यं। सर्पभयोपशमनाय दुग्धं पेयं"। इत्यतत्त्वं॥*॥
अपिच। ज्योतिषे।
"रजोयुक् स्याम्बुवाची च रौद्राद्यपादगे रवौ।
तस्यां पाठो बीजवापो नाहिभीर्दुग्धपानतः॥
मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची
ऋतुमति खलु एथ्वी वर्ज्जयेत्बीजहानि।
यदि वपति कृषाणः क्षेत्रमासाद्य बीजं
न भवति फलभागी गृह्यचाण्डालपाकः"॥
रजोयुक् स्या ऋतुमती एथ्वी। मत्स्यसूक्ते।
"धरण्यामृतुमत्यां च भूमिकम्पे तथैव च।
अन्तरागमने चैव विद्यां नैव पठेद्बुधः"॥
ज्योतिषे।
"यस्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत्।
अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः"॥
इदन्तु प्रायिकं। इति तिथ्यादितत्त्वं॥*॥ अन्यच्च।
"यदार्द्रत्वं समादाय भानोर्म्मन्थगामिता।
पुनस्तत्स्नेनमादाय यजनं चिदिनं त्यजेत्॥
काम्यनैमित्तिकञ्चैव यात्रां मन्त्रक्रियान्तथा।
ऋतुमत्यां न कुर्व्वीत पूर्व्वसङ्क्षिप्तादृते॥
न कुर्य्यात् खननं भूमेः सूच्यग्रेणापि शङ्करि।
बीजानां वपनञ्चैव चतुर्व्विंशतियामकं॥
प्रमादाद्वपनं कृत्वा गावस्तत्र प्रचारयेत्।
कृषिं कुर्य्यात् ततः क्षणाच्च खननात्तिलकाञ्चनं"॥
इति मत्स्यसूक्ते महातन्त्रे ५८ पटलः॥*॥ अपरञ्च।
"रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः।
तस्मादिनत्रयं यावत् बीजवापं परित्यजेत्॥
चतारिंशच्छिखिकषड्भागयुतो रविर्यदा भवति।
तत्राम्बुवाची ज्ञेया शिवर्क्षपादस्थितो यावत्॥
दिग्भागशून्यलिप्तो गणितेन भवति रविर्यदा सामः।
स भवति निर्गुणकालो द्वितीयपादाश्रयाद्दोषे"॥
"न स्वाध्यायं वषट्कारं न देवपितृतर्पणं।
कृषीणां वाहनञ्चैव बीजानां वपनं तथा"॥
इति राजमार्त्तण्डः॥*॥ अत्र पाकनिषेधो यथा,—
"यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा।
अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्॥

स्वपाकं परपाकं वा अम्बुवाचीदिने तथा।
भक्षणं नैव कर्त्तव्यं चाण्डालान्नसमं स्मृतं"॥
इति संवत्सरप्रदीपे विष्णुरहस्यं।

अम्बुवासिनी, स्त्री, (अम्बुप्रधाने देशे वसति, वस्+णिनि ङीप्।) पाटलावृक्षः। इति जटाधरः॥

अम्बुवासी, स्त्री, (अम्बुप्रधाने देशे वासो यस्याः सा, गौरादित्वात्, ङीष्।) पाटलावृक्षः। इति राजनिर्घण्टः॥

अम्बुवाहः, पुं, (अम्बूनि वहति, अम्बु+वह्+अण्, उपपदसमासः।) मेघः। इति रत्नमाला॥ ("विश्रान्तिवारणसमार्जितजीवितोऽयं नाकर्णितः किमु सखे भवताम्बुवाहः"॥ इति भामिनीविलासे। "बिभ्राणमानीलरुचं पिशङ्गैरंशैस्तडिल्लक्ष्मलिवाम्बुवाहं"। इति भारविः।) मुस्तकं। मेघनामा इत्यमरटीकायां भरतः॥

अम्बुवाहिनी, स्त्री, (अम्बूनि वहति स्थानान्तरं नयति, अम्बु+वह+णिनि, उपपदसमासः, ङीप्।) काष्ठाम्बुवाहिनी। काष्ठादिछेदतच्छिद्रान्नयनौकाछेदतिजलसेचनी। इत्यमरटीकायां भरतः॥

अम्बुवेतसः, पुं, (अम्बुजातो वेतसः, कर्म्मधारयः, मध्यपदलोपश्च।) जलवेतसः। तत्पर्य्यायः। परिव्याधः २ विदुलः ३ नादेयी ४। इत्यमरः॥

अम्बुशिरीषिका, स्त्री, (अम्बुनि अल्पः शिरीषः, अल्पार्थे कन् स्त्रीत्वम्।) जलशिरीषवृक्षः। तत्पर्य्यायः। शिरीषिका २ टिण्टिणिका ३ दुर्ब्भगा ४ वारिशिरीषिका ५। अस्या गुणाः। चिदोषविषकुष्ठार्शोनाशित्वं। इति भावप्रकाशः॥

अम्बुसर्पिणी, स्त्री, (अम्बुनि सर्पति अम्बु+सृप+णिनि, उपपदसमासः।) जलौकाः। इति त्रिकाण्डशेषः॥ जोंक् इति भाषा।

अम्बुसेचनी, स्त्री, (अम्बूनि सिच्यन्ते अनया, अम्बु+सिच्+करणे ल्युट्, ङीप्।) अम्बुवाहिनी। नौकाजलसेचनपात्रं। इत्यमरटीकायां भरतः॥

अम्बूकृतं, त्रि, (अनम्बु अम्बु सम्पद्यमानं कृतं, अम्बु+कृ+क्त, अभूततद्भावे चिः।) श्लेष्मकफनिर्गमसहितवार्क्यं। तत्पर्य्यायः। सनिष्ठीवं २। इत्यमरः॥ सघूत्कारं ३। इति हेमचन्द्रः॥ (सनिष्ठीवमुखरावः। "दधति कुहकभाजामत्र भक्तकयूनामनुरसितगुरूणि स्थानमम्बूकृतानि"। इति उत्तरचरिते।)

अम्बुः, पुं, (अबि शब्दे लुः।) अक्षरसः। इत्युणादिकोषः॥ अम्बल। टक इति च भाषा।

अम्भः, [स्] क्ली, (आप्यते, आप्+असुन्।) जलं। बालानामौषधं। इत्यमरः॥ अमादित्यचतुर्थराशिः। इति ज्योतिषं॥ (अङ्कशास्त्रे चतुर्थसंख्या। वैदिकच्छन्दोभेदः।)

अम्भःसारं, क्ली, (अम्भसां सारं।) मुक्ता। इति राजनिर्घण्टः॥ अम्भस्सारमपि पाठः॥

अम्भःसूः, पुं, (अम्भांसि सूते, सू+क्विप्।) धूमः। इति हेमचन्द्रः॥ अम्भस्सूरिति च पाठः॥

अम्भोजं, क्ली, (अम्भसि जायते, अम्भस्+जन्+ड।) पद्मं। इति शब्दरत्नावली॥ सारसपक्षी। पुष्कराङ्क इत्यमरेणोक्तत्वात्। चन्द्रे पुं। यथा। "पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतं"। इति श्रीभागवतं॥ जलजाते त्रि॥

अम्भोजन्मजनिः, पुं, (अम्भोजन्मनि विष्णुनाभिपद्मे जनिः जन्म यस्य सः।) ब्रह्मा। यथा,—

"अम्भोजन्मजनिस्तदन्तरगतोवत्सानितोवत्सपान्"। इति श्रीभागवतं॥

अम्भोजयोनिः, पुं, (अम्भोजं नारायणनाभिपद्मं योनिरुत्पत्तिस्थानं यस्य सः।) ब्रह्मा। यथा,—

"सदनमुपगतोऽहं पूर्व्वमम्भोजयोनेः"॥ इति प्रबोधचन्द्रोदयः॥

अम्भोजिनी, स्त्री, (अम्भोज+समूहार्थे इनि ततः ङीप्।) पद्मलता। पद्मसमूहः। पद्मयुक्तदेशः। इति शब्दरत्नावली। (पद्मिनी। नलिनी। "अम्भोजिनीवननिवासविलासहेतुं हंसस्य हन्तुमपरामपि तां विधाता"। इति नीतिशतके।)

अम्भोदः, पुं, (अम्भो जलं ददाति, अम्भस्+दा+कः।) मेघः। मुस्तकं। इति शब्दरत्नावली॥ (जलदानकर्त्तरि, त्रि।)

अम्भोधरः, पुं, (अम्भः जलं धरति, धृ+अच्।) मेघः। ("सप्तीकराम्भोधरमत्तकुञ्जरः"। इति ऋतुसंहारे।) मुस्तकं। इति शब्दरत्नावली॥

अम्भोधिः, पुं, (अम्भांसि धीयन्ते अत्र, धा+आधारे किः।) समुद्रः। इति शब्दरत्नावली॥

("अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया। धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः"॥ इति साहित्यदर्पणे।

"सम्भूयाम्भोधिमभ्येति महानद्यो नगापगाः"। इति माघः।)

अम्भोधिवल्लभः, पुं, (अम्भोधेः वल्लभः, षष्ठीतत्पुरुषः।) प्रवालः। इति राजनिर्घण्टः॥

अम्भोनिधिः, पुं, (अम्भांसि निधीयन्तेऽत्र, अम्भस्+नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥

("असूत सा नागवधूपभोग्यं
मैनाकमम्भोनिधिबद्धसख्यं"।

इति कुमारसम्भवे। विष्णोः सहस्रनाममध्ये परिगणितो नामभेदः, अम्भांसि देवमनुष्यादयो निधीयन्ते अस्मिन् इति व्युत्पत्त्या, नारायणस्य सर्व्वाश्रयत्वात्। "अम्भोनिधिरनन्तात्मा"। इति महाभारते।)

अम्भोराशिः, पुं, (अम्भसां राशिरिव एकत्रोपचितत्वात्।) समुद्रः। इति राजनिर्घण्टः॥

अम्भोरुहं, क्ली, (अम्भसि रोहति, अम्भस्+रुह+कः।) पद्मं। ("आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहां"। इति मामिनीविलासे।) सारसपक्षी। इत्यमरः॥

अम्मयं, त्रि, (अपां विकारादि, अप्+मयट्।) जलविकारं। फेनादि। इत्यमरः॥ जलमये त्रि। यथा,—

"न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन दर्शनादेव साधवः"॥ इति श्रीभागवतं॥

("सौरीभिरिव नाड़ीभिरमृताख्याभिरम्मयः"। इति रघुवंशे।)

अम्लः, पुं, (अमति सौरमेण दूरं गच्छति, अम+रन्।) आम्रवृक्षः। फले क्लीवं। इति शब्दरत्नावली॥

अम्लातः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति, अम्ल+अत+अण् वा लस्य रत्वं, पक्षे अम्लातः।) आम्रातकवृक्षः॥ इति शब्दमाला॥

अम्रातकः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अम्ल+अत+अण्+स्वार्थे कन्।) आम्रातकवृक्षः। इति त्रिकाण्डशेषः॥

("आम्रामात्रकजम्बूत्वक् कषाये विपचेद्बुधः। यवागूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत्"॥ इति शार्ङ्गधरः॥)

अम्लं, क्ली, (अम+क्त।) तक्रं। इति राजनिर्घण्टः॥

अम्लः, पुं, (अम+क्त।) षड्रसमध्ये रसविशेषः। टक इति भाषा। तोयाग्निगुणबाहुल्यादम्लः। इति सुश्रुतः। अस्य गुणाः। शाकवद्दोषकारित्वं। हृद्यत्वं। रक्तमिरक्तमांसकारित्वं। प्रीतिलत्वं। वायुनाशित्वं। स्निग्धोष्णत्वं। कटुरसतोऽधिकोष्णवीर्य्यत्वं। जिह्वोद्वेगकारित्वञ्च। इति राजवल्लभः॥ अस्य दन्तोद्वेगकारित्वगुणोऽप्यस्ति। अपि च। प्रीत्यग्निमरुतकारित्वं। प्रयाचनत्वं। इति राजनिर्घण्टः॥ * ॥ तदतिगुरुभक्षणगुणाः। पाचकत्वं। पित्तश्लेष्मवान्तिलोदकारित्वं। लघुत्वं। उष्णत्वं। वह्निःप्रीतत्वं। वायुनाशित्वञ्च। इति राजवल्लभः॥ भ्रान्तितृष्णिकफपाण्डुदोषकार्श्यकासकारित्वं। इति राजनिर्घण्टः॥ तदति त्रि। इत्यमरः॥ * ॥ अम्लवेतसः। इति राजनिर्घण्टः॥ (यदाह वाभटः॥ "अम्लः क्षालयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः।
अम्लोऽग्निदीपनिक्लृत् स्निग्धो हृद्यः पाचनरोचनः॥
उष्णवीर्य्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः।
करोति कफपित्तास्रं मूढ़वातानुलोमनम्॥
सोऽत्यभ्यस्तस्तनोः कुर्य्याच्छैथिल्यं तिमिरं भ्रमं।
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटदाह्ज्वरान्"॥ हारीतेन यदुक्तं तद्यथा,—

"जिह्वाक्लेदं जनयति तथा नेत्रनैर्मल्यकारी,
बीभत्सं वा जनयति तथा वातरोगापहारी।
कण्डूकुष्ठक्षतरुजकरैर्लोलितः श्लेष्मिणे स्या-
दम्लः प्रोक्तः पवनशमनोऽरुक्प्रकोपं तनोति"॥ सुश्रुतस्त्वाह॥ "अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठ-विदाही वह्निःप्रीतः क्लेदनः प्रायशोहृद्यश्चेति। सएवंगुणोऽपि कश्चिदर्थमुपसेव्यमानो दन्तहर्ष-नयन-सम्मीलन-रोमसंवेजनकफविलयन-शरीरग्रन्थिल्यान्यापादयति तथा क्षताभिहत-दग्ध-दष्ट-भग्न-रुग्न-स्रुत-प्रच्युतावमूर्च्छित-विसर्पित-क्षिन्न भिन्न-विद्रोत्पिडादीनि पाचयत्यामेयस्वभावात् परिदहति कण्ठमुरोहृदयञ्चेति"॥ "अम्लोरसो भक्तं रोचयति, अग्निं दीपयति, देहं दृंहयति, जर्ज्जरयति, मनो बोधयति, इन्द्रियाणि दृढ़ीकरोति, बलं बर्द्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यं संस्रावयति, शुक्रमपकर्षयति, क्लेदं जनयति, प्रीणयति। लघुरुष्णः स्निग्धश्च॥ सएवंगुणोऽप्येकएवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्पयति, संमीलयति अक्षिणी, संवीजयति लोमानि, कफं विलापयति, पित्तमभिवर्द्धयति, रक्तं दूषयति, मांसं विदहति, कायं शिथिलीकरोति, क्षीण-क्षत-क्षयदुर्ब्बलानां श्वयथुमापादयति। अपि च क्षताभिहत-दष्ट-दग्ध-भग्न-स्रुन--च्युतावमूर्च्छित-परिसर्पित-मर्दितच्छिन्न-विद्रोत्पिडादीनि पाचयत्यामेयस्वभावात् परिदहति कण्ठमुरोहृदयञ्च"॥ इति चरकः॥)

अम्लकः, पुं, (अल्पोऽम्लः अल्पार्थे कन्।) लकुचवृक्षः। इति शब्दरत्नावली॥ (लकुचशब्देऽस्य गुणादयो ज्ञातव्याः॥)

अम्लकाण्डं, क्ली, (अम्लं काण्डं यस्य।) लवणत्वणं। इति राजनिर्घण्टः॥

अम्लकेशरः, पुं, (अम्लः केशरो यस्य।) मातुलुङ्गः। बीजपूरः। इति रत्नमाला॥ (टाबालेबु इति भाषा।)

अम्लचूड़ः, पुं, (अम्ला चूड़ा शिखा यस्य।) अम्लशाकः। इति राजनिर्घण्टः॥

अम्लजम्बीरः, पुं, (अम्लो जम्बीरः।) अम्लनिम्बूकः। इति राजनिर्घण्टः॥

अम्लनायकः, पुं, (अम्लं रसं नयति, नी+ण्वुल्।) अम्लवेतसः। इति राजनिर्घण्टः॥

अम्लनिशा, स्त्री, (अम्लरसे निःशेषेण शेते, अम्ल+नि+शी+ड+स्त्रियां टाप्।) शटी। इति राजनिर्घण्टः॥

अम्लपञ्चफलं, क्ली। अम्लरसयुक्तपञ्चप्रकारफलं। तद्यथा। कोलं १ दाड़िमं २ वृक्षाम्लं ३ चुक्रिका ४ अम्लवेतसं ५॥ मतान्तरे। जम्बीरं १ नारङ्गं २ अम्लवेतसं ३ तिन्तिड़ीकं ४ बीजपूरं ५। इति राजनिर्घण्टः॥

("कोलञ्च दाड़िमञ्चैव वृक्षाम्लं चुक्रिका तथा। अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्"॥
"जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पुनः।
तिन्तिड़ीकं बीजपूरमम्लपञ्चफलं स्मृतम्"॥)

अम्लपत्रः, पुं, (अम्लं पत्रं यस्य।) अम्लान्तकवृक्षः। इति राजनिर्घण्टः॥

अम्लपर्णी, स्त्री, (अम्लं पत्रं यस्याः सा, ङीप्।) पलाशीलता। चुक्राम्लिका। इति राजनिर्घण्टः॥

अम्लपूरं, क्ली, (अम्लेन अम्लरसेन पूर्य्यते, पूर+कर्म्मणि घञ्।) वृक्षाम्लं। इति राजनिर्घण्टः॥

अम्लफलं, क्ली, (अम्लं फलं यस्य।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेंतुल इति भाषा।

अम्लफलः, पुं, (अम्लं फलं यस्य सः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

अम्लभेदनः, पुं, (अम्लार्थं भिद्यतेऽसौ, अम्ल+भिद्+कर्म्मणि ल्युट्।) अम्लवेतसः। इति राजनिर्घण्टः॥

अम्लरुहा, स्त्री, (अम्लाय रोहति, अम्ल+रुह्+

क ।) मालदेशजनागवल्लीभेदः । अस्या गुणाः । सुतीक्ष्णत्वं । मधुरत्वं । रुचिकारित्वं । हिमत्वं । दाहनाशित्वं । पित्तोद्रेकहरत्वं । अग्निबलसुखामोदश्रीसौभाग्यविवर्द्धनत्वं । मदकारित्वं । गुल्माध्मानविबन्धनाशित्वञ्च । इति राजनिर्घण्टः ॥
("नाम्ना याऽम्लरुहा सुतीक्ष्णमधुरा रुच्या हिमा दाहनुत् पित्तोद्रेककरा सुदीपनकरी बल्या सुखामोदिनी । स्त्रीसौभाग्यविवर्द्धिनी मदकरी ज्ञेया सदा वल्लभा गुल्माध्मानविबन्धजित् च कथिता सा मालवे तु स्मृता" ।)

अम्लगोजिका, स्त्री, (अम्लं रसं जाति यच्छति अम्लगः तम् ऊनयति हीनयति, अम्लग + ऊन + एवुल्, टाप्चम् ।) क्षुद्रवल्लीविशेषः । आमरुल । इति भाषा । तत्पर्य्यायः । चाङ्गेरी २ चुक्रिका ३ दन्तशठा ४ अम्लवेतसी ५ । इत्यमरः ॥ अस्या गुणाः । कफवायुनाशित्वं । अग्निदीपनत्वं । ग्रहणीरोगे हितकारित्वञ्च । इति राजवल्लभः ॥ वल्लादिलघ्वौहचिक्रकषायरागनाशकगुणोऽप्यस्ति । राजनिर्घण्टोक्तगुणपर्य्यायौ क्षुद्राम्लिकाशब्दे द्रष्टव्यौ । तत्पर्य्यायगुणाः ।
"चाङ्गेरी चुक्रिका दन्तशठाम्लवेतसाम्लगोजिका । अम्लान्तकस्तु शफरी कुशणी चाम्लपत्रकः" ॥ क्वचित् पुस्तके कुशणीस्थाने शफली इति च पाठः ।
"चाङ्गेरी दीपनी रुच्या लघ्व्या कफवातनुत् । पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी" ॥ इति भावप्रकाशः ॥
("दीपनी चोष्णवीर्य्या च ग्राहिणी कफमारुते । प्रशस्यतेऽम्लचाङ्गेरी ग्रहण्यर्शोहिता च सा" ॥ इति चरकः ॥
"चाङ्गेरी कफवातघ्नी वह्निकृद् ग्रहणी हिता" । इति वैद्यकरत्नमुक्तावल्यां भरतः ॥ तत्पर्य्यायः । अम्लः २ वेधी ३ रसाम्लः ४ अम्लवेतसः ५ वेतसाम्लः ६ अम्लसारः ७ घृतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्लाङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्मकेतुः २१ वराभिधा २२ ग्रन्थिद्रावी २३ मांसद्रावी २४ । इति राजनिर्घण्टः ॥ वराङ्गी २५ । इति रत्नमाला ॥ चुक्रः २६ । इत्यमरः ॥ तत्फलगुणाः । अम्लत्वं । कषायत्वं । उष्णत्वं । वायुकफार्शःश्रमगुल्मनाशित्वं । अरुचिहारित्वञ्च । इति राजनिर्घण्टः ॥ छागमांसलौहसूचीद्रवकारित्वं । चणकाम्लवत् गुणकारित्वञ्च । इति भावप्रकाशः ॥ आमाहरोगनाशित्वं । तत्पक्वफलगुणाः । दोषविनाशित्वं । गुरुत्वं । धारकत्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।
"स्यादम्लवेतसश्चुक्रः घृतवेधी सहस्रजित् । अम्लवेतसमम्लत्वं भेदनं लघु दीपनं ॥ छर्द्यरोगशूलगुल्मघ्नं पित्तलोहितदूषणं । रूक्षं विष्मयदोषघ्नं स्त्रीहोदावर्त्तनाशनं ॥ वीजपूरं च जम्बीरं निम्बूकाम्लवेतसं ॥ इक्षाम्लं हरिमन्थञ्च चाङ्गेरीत्यम्लवर्गकः" ॥)
"अम्लवेतसजम्बीरलकुचाम्लचणकाम्लकाः । नागरङ्गं तिन्तिडी च चिञ्चापत्रञ्च निम्बुकं ॥ चाङ्गेरी दाडिमञ्चैव करमर्दन्तथैव च । एष चाम्लगणः प्रोक्तो वेतसाम्लं सदोत्तमम्" ॥ इति वैद्यकरत्नेन्द्रसारसङ्ग्रहः ॥
"दाडिमामलकमातुलुङ्गामातक-कपित्थ-करमर्दवरकोल-प्राचीनामलक-तिन्तिडीक-कोशाम्रभव्य-पारावत-वेत्रफल-लकुचाम्ल-वेतस-दन्तशठदधि-तक्र-सुरा-शुक्त-सौवीरक-तुषोदक-धान्याम्लप्रभृतीनि समासेनाम्लोवर्गः" । इति सुश्रुतश्च ॥

अम्लवल्ली, स्त्री, (अम्लरसवती वल्ली ।) स्त्रियर्णिकानामकन्दविशेषः । इति राजनिर्घण्टः ॥

अम्लवाटिका, स्त्री, (अम्लस्य वाटिका स्थानमिव ।) नागवल्लीभेदः । अस्या गुणाः । कटुत्वं । अम्लत्वं । तिक्तत्वं । रूक्षत्वं । उष्णत्वं । मुखपाककारित्वं । विदाहपित्तरक्तप्रकोपकारित्वं । विष्टम्भदाहत्वं । वायुनाशित्वञ्च । इति राजनिर्घण्टः ॥ (उक्तञ्च,—
"स्यादम्लवाटी कटुकाम्लतिक्ता रूक्षा तथोष्णा मुखपाककर्त्री । विदाहपित्तास्रविकोपिनी च विष्टम्भदा वातनिवर्हणी च" ॥)

अम्लवास्तूकं, क्ली, (अम्लरसान्वितं वास्तूकं शाकभेदः ।) चुक्रं । इति राजनिर्घण्टः ॥

अम्लवीजं, क्ली, (अम्लस्य वीजं कारणं ।) रुक्षाम्लं । इति राजनिर्घण्टः ॥

अम्लवृक्षं, क्ली, (अम्लरसो वृक्षे यस्य ।) रुक्षाम्लं । इति राजनिर्घण्टः ॥ तेँतुल इति भाषा ।

अम्लवेतसः, पुं, स्वनामप्रसिद्धः अम्लरसवृक्षविशेषः । चुकाम्लाक इति ख्यात इति केचित् । अम्लकुचाइ इति ख्यात इति केचित् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । अम्लः २ वेधी ३ रसाम्लः ४ अम्लवेतसः ५ वेतसाम्लः ६ अम्लसारः ७ घृतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्लाङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्मकेतुः २१ वराभिधा २२ ग्रन्थिद्रावी २३ मांसद्रावी २४ । इति राजनिर्घण्टः ॥ वराङ्गी २५ । इति रत्नमाला ॥ चुक्रः २६ । इत्यमरः ॥ तत्फलगुणाः । अम्लत्वं । कषायत्वं । उष्णत्वं । वायुकफार्शःश्रमगुल्मनाशित्वं । अरुचिहारित्वञ्च । इति राजनिर्घण्टः ॥ छागमांसलौहसूचीद्रवकारित्वं । चणकाम्लवत् गुणकारित्वञ्च । इति भावप्रकाशः ॥ आमाहरोगनाशित्वं । तत्पक्वफलगुणाः । दोषविनाशित्वं । गुरुत्वं । धारकत्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।
"स्यादम्लवेतसश्चुक्रः घृतवेधी सहस्रजित् । अम्लवेतसमम्लत्वं भेदनं लघु दीपनं ॥ छर्द्यरोगशूलगुल्मघ्नं पित्तलोहितदूषणं । रूक्षं विष्मयदोषघ्नं स्त्रीहोदावर्त्तनाशनं ॥ हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् । कफवातामयध्वंसि छागमांसद्रवत्वकृत् ॥ चणकाम्लगुणं ज्ञेयं लौहसूचीद्रवत्वकृत्" । इति भावप्रकाशः ॥
("अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः । गुणैस्तैरेव संयुक्तं भेदनत्वम्लवेतसम्" ॥ इति च चरकः ॥)

अम्लशाकं, क्ली, (अम्लः शाको यस्य तत् ।) रुक्षाम्लं । चुक्रं । इति राजनिर्घण्टः ॥ (रुक्षाम्लशब्देऽस्य विशेषो द्रष्टव्यः ॥)

अम्लशाकः, पुं, (अम्लः शाको यस्य सः ।) अम्लद्रव्यविशेषः । तत्पर्य्यायः । शाकाम्लं २ शुक्ताम्लं ३ अम्लचुक्रिका ४ चिञ्चाम्लं ५ अम्लचूडः ६ चिञ्चासारः ७ । अस्य गुणाः । अतिशयाम्लत्वं । वातनाशित्वं । कफदाहहरित्वञ्च । समशर्करामिश्रितस्यास्य गुणाः । दाहपित्तकफार्त्तिनाशित्वं । इति राजनिर्घण्टः ॥ (यदुक्तं,—
"अम्लशाकस्त्वतीवाम्लो वातघ्नः कफदाहनुत् । साम्येन शर्करामिश्रो दाहपित्तकफार्त्तिनुत्" ॥)

अम्लसारं, क्ली, (अम्लरस एव सारः यस्य तत् ।) काम्लिकं । इति राजनिर्घण्टः ॥

अम्लसारः, पुं, (अम्लरस एव सारः यस्य सः ।) अम्लवेतसः । निम्बूकः । हिन्ताकः । इति राजनिर्घण्टः ॥

अम्लहरिद्रा, स्त्री, (अम्लरसयुक्ता हरिद्रा ।) शटी । इति राजनिर्घण्टः ॥

अम्लाङ्कुशः, पुं, (अम्लं अङ्कुशाकारं अग्रं यस्य ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

अम्लातकः, पुं, (न म्लायति, म्लै + तन् स्वार्थे कन्, नञ्समासः ।) अम्लानवृक्षः । इति राजनिर्घण्टः ॥ अस्य गुणपर्य्यायौ राजतरुणीशब्दे ज्ञेयौ ॥

अम्लानः, पुं, (म्लै + क्तः ततो नञ्समासः ।) महासहावृक्षः । इत्यमरभरतौ ॥ आँयला इति ख्यातः ।

अम्लानः, त्रि, (म्लै + क्तः, न म्लानः नञ्समासः ।) म्लानिरहितः । यथा,—
"अम्लानपङ्क्तिं मालां शिरस्युरसि चापरां" । इति देवीमाहात्म्यं ॥ (स्वच्छः । परिष्कृतः । निर्म्मलः । उज्ज्वलः । प्रसन्नः । विशदः । प्रत्ययः । अपर्य्युषितः । अशुष्कः ।)

अम्लानिनी, स्त्री, (अम्लानानां पद्मानां समूहः । इनि ।) पद्मसमूहः । पद्मिनी । इति त्रिकाण्डशेषः ॥

अम्लिका, स्त्री, (अम्लैव, स्वार्थे कन् ।) तिन्तिडी ॥ इत्यमरः ॥ पलाशीलता । श्वेताम्लिका । क्षुद्राम्लिका । इति राजनिर्घण्टः ॥ अम्लोद्गारः । इति मेदिनी ॥ [इति वाभटः ।
("दीपनं भेदनं शुष्कमम्लिकाकोशयोः फलं" ।
"अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः" ॥ इति चरकः ।
"अम्लिकायाः फलं पक्वं तद्भेदि तु केवलं" ॥ इति सुश्रुतः ।)

अस्त्रिकावटकः, पुं, (अस्त्रिकाया वटकः।) अस्त्रिकां खेदयित्वा जलेन सह मर्दयित्वा तत्संस्कृतजले मग्नवटकः। अम्लवड़ा इति भाषा। अस्य गुणाः। रुच्यग्निकारित्वं। वटकगुणतुल्यगुणत्वञ्च। इति भावप्रकाशः॥
("अस्त्रिकां खेदयित्वा तु जलेन सह मर्दयेत्। तन्नीरे कृतसंस्कारे वटकान् मज्ज्येच्जनः। अस्त्रिकावटकास्ते तु रुच्या वह्निप्रदीपनाः। वटकस्य गुणैः पूर्व्वैरेतेऽपि च समन्विताः"॥)

अस्त्रीका, स्त्री, अस्त्रिका। इत्यमरटीकायां रायमुकुटः॥

अस्रोटकः, पुं, (अस्रं उटं पत्रं यस्य सः।) अम्लनकवृक्षः। अम्लकुचाइ इति ख्यातः। इति रत्नमाला॥

अय ङ गतौ। (इति कविकल्पद्रुमः॥) ङ अयते। इति दुर्गादासः॥

अयः, पुं, (एति सुखमनेन, इण + करणे अच्।) शुभावहविधिः। मङ्गलानुष्ठानं। इत्यमरः॥ (कल्याणदायकं दैवं।
"स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः"।
इति रघुवंशे। नरकभेदः। अयःपानमप्यत्र। इति वैद्यकरत्नेन्द्रसारसङ्ग्रहः॥)

अयः, [स्] क्ली, (इण्गतौ, असुन्।) लौहं। इत्यमरः॥ (गुडूच्यादिलौहं॥
"आयुःप्रदाता बलवीर्य्यधाता,
रोगापहर्त्ता मदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदस्ति,
रसायनं श्रेष्ठतमं नराणां"॥ * ॥
"गुडूचीसारसंयुक्तं त्रिकत्रयसमन्वयः।
वातरक्तं निहन्त्याशु सर्व्ववातहरं परं"॥)

अयनं, क्ली, (अय + भावे ल्युट्।) ग्राह्यं। यथा,—
"ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"।
इति तिथ्यादितत्त्वं॥ पन्थाः। सूर्य्यस्य उत्तरदक्षिणदिग्गमनं। तद्यथा। माघादिषण्मासाः उत्तरायणं। श्रावणादिषण्मासाः दक्षिणायनं। इत्यमरः॥ गमनं। गत्यर्थायधातोर्भावेऽनट्॥ रविसंक्रान्तिविशेषः। यथा भविष्यमात्स्यज्योतिषेषु।
"मृगकर्कटसंक्रान्ती द्वे तूदक्दक्षिणायने।
विषुवती तुला मेषे गोलमध्ये तथापरा"॥
मृगो मकरः। गोलो राशिचक्रं। देवीपुराणे,
"यावद्दिङ्मकला मुक्ता तत्पुण्यं चोत्तरायणे।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने"॥
तत्र स्नानदानादौ कोटिगुणफलं भवति। यथा मात्स्ये।
"अयने कोटिगुणितं लक्षं विष्णुपदेषु च।"
इत्यादि।
"अयने विषुवे चैव ग्रयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु"॥
इति तिथ्यादितत्त्वं॥ * ॥ सूर्य्यगतिविशेषः। यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे।
एकवर्षं चतुःषष्ट्यपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवं।
कर्क्किसंक्रमणे तद्वदभितो दक्षिणायनं"॥
इति ज्योतिस्तत्त्वं॥

अयनांशः, पुं, (अयनस्य अंशः भागः।) सूर्य्यगतिविशेषस्य भागः। अथायनांशलक्षसाधनं।
"लग्नं लग्नान्तरं हृत्वा अयनांशैः प्रपूरयेत्।
खानलैर्हरते भागं मिश्रयित्वा दिने दिने"॥
अस्यार्थः। लग्नं रामोगवेदैरित्यादुक्तं लग्नान्तरं हृत्वा यथा मेषलग्नं ३। ४७ लग्नान्तरेण द्वयोराधिक्येन ३० चिंशतत्वं तथायनांशैः पूरयेत्॥ अयनांशस्तु ज्ञातकार्य्यवोक्तः। यथा,—
"शाकमेकाद्रिवेदोनं द्विः हृत्वा दशभिर्हरेत्।
लब्धं हीनञ्च तत्रैव षष्ठ्याप्तायनांशकाः"॥
इति। लब्धस्थाने लब्धेन इति पाठः सिद्धान्तरहस्ये॥ ते च इदानीं चैत्रस्यैकादशाहे सम्भवात् ऊनविंशतिसंख्यकाः। ते च पुनःखानलैः ३० चिंशता हरेत्। भागलब्धिस्तु ऊनविंशतिः १९। तच्च मेषलग्ने मिश्रयित्वा ४। ६ षट्पलाधिकदण्डचतुष्टयात्मकं मेषलग्नं भवति। एवं वृषादिकमूह्यं। किन्तु लग्नान्तरेण यत्राधिकं लभ्यते तत्राधिकं लग्नं भवति। एवं यत्र लग्नान्तरेण हानिस्तत्र लग्नेऽपि हानिरिति निष्कर्षः॥ * ॥ इदानीं स्पष्टज्ञानार्थं पद्येन लिख्यते। बाणेवेदो ४। पूङ्मवैदैः श्रुति ४। ४८-रिभनयनैरिन्द्रियं ५। २८-खाम्बुनेषु ५। ४०-बाणो वेदानलैः ५। ३४-खाग्निभिरिषु ५। ३०-रिषुरङ्गाग्निने ५। ३६-युःकुवेदे ५। ४१-बाणोनागेन्दुभिस्तु ५। १८ श्रुतिरपि रसरामै ४। ३६-गुणाः सप्तबाणैः ३।५७ रामोऽश्वाद्रिस्तु ३।४७-सिद्धान्तजमतमयनांशादिदं लग्नमानं॥ एतच्च तमोलिप्तादिदेशीयं प्रागुक्तायनांशसाधितं॥ * ॥ अङ्केन वेदो ४। ६ मेषः स्यात् वसुवेदैः सुखं ४।४८ वृषः। मुनियुग्मैः शरो ५।२७ वन्द्वः व्योमाब्धिबाणा ५। ४०-कर्कटः॥ वेदरामैः शरः ५। ३४ सिंहः कन्याङ्गयुग्मपक्षकः ५। २६। तुला ऋषिरामपक्ष ५। ३७-वृश्चिकः खाब्धिपक्षकः ५। ४०॥ नवचन्द्रबाणा ५।१६— धनुर्वेदरामैः सुखं ४। ३४ मृगः। वसुपक्षत्रयः ३। ५८ कुम्भः ऋषिवेदत्रयो ३। ४७ झषः॥ * ॥ शून्यर्वेदश्च ४। ६ मेषो नवसुखसुख ४-४६। गौर्म्मेषयुग्मैः शिवाक्षो ५। २८ वन्द्वोऽङ्गाप्यित्तबाणो ५।३६ हिमकरभवनो रामरामैः कलत्रः ५। ३३। सिंहः कन्याजरामैरिषु ५। ३१-रिषुजसुखाग्नीषु ५। ३४-यूकोऽलिष्टश्वी ५। ४१ वेदेशाक्षोऽष्टएष्वीक्षरहरमुख ५। १८-कोदण्डमाङ्गवरोहाः॥ बन्धू रामश्च वेदो ४। ३४ रविसुतभवनः पर्व्वतः पञ्चरामः ३। ५७ कुम्भो मीनश्च भुक्ते गिरिसुखदहनं ३। ४७ प्रत्यहं प्रक्रमेण। अस्तं यामित्रराशावनुदिनमवसाद्यच्च राजीवनाथो यदुदयातिस्म द्युतं स्यादुदयमनुदिवाराज्यमाङ्गवरोहाः॥ * ॥ लग्नं लग्नान्तरं हृत्वेति प्रकारान्तरेण यदुक्तं तदपि पद्येन लिख्यते यथा। वेदोऽङ्के ४। ६-रिभवेदैः श्रुति ४। ४८-रिषुरिभपक्षैः ५। २८ कुवेदैश्च बाणो ५। ४१ बाणो रामानलै ५। ३३-रिन्द्रियमपि नवाक्षै ५। २६ रिषुः सप्तरामैः ५। ३७ बाणः शून्याब्धिने ५।४०-युर्ऋतिभि ५। १८-रिषुगुणैरब्धि ४। ३५-रक्षेबाग्नी ३। ५८ रामोऽश्वाद्रिस्तु ३। ४७ सिद्धान्तजमतमयनांशादिदं लग्नमानं॥
"चैत्रस्यैकादशाहे तु विषुवारम्भणं यदा।
तदैतल्लग्नमानं हि ज्ञेयमन्यच्च साधनात्"॥
इति ज्योतिषसंग्रहः॥ (गतिः। गमनं। मार्गः।
"अगस्त्यचिह्नादयनात् समीपं
दिगुत्तरा भास्वति सन्निवृत्ते"।
इति रघुवंशे। स्थानं। भूमिः। समरसमारम्भकाले योधानां यथाप्रधानं युद्धभूमौ पूर्व्वापरादिदिग्विभागेनावस्थितिस्थानं। सेनासन्निवेशविशेषरूपव्यूहप्रवेशमार्गः।
"अयनेषु च सर्व्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व्व एव हि"॥
इति भगवद्गीता। आश्रयः। विश्रामस्थानं।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः"॥
इति मनुः। गृहं। वसतिः। वासस्थानं। ग्राह्यं। भावसाधनो ग्रन्थः।
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु॥
छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ कथ्यते।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"॥
इति कूर्म्मपुराणे।)

अयानयीनः, पुं, ग्रारः। यथा। अनुपदसर्व्वाम्नायानयं बद्धा भक्षयति नेयेषु। अयानयः स्थलविशेषः। तत्रेयः। अयानयीनः ग्रारः। इति सिद्धान्तकौमुदी॥

अयन्त्रितः, त्रि, (न यन्त्रितः, नञ्समासः।) अबाधः। अनर्गलः। इति हेमचन्द्रः॥ (अनियन्त्रितः। अनियमितः। स्वाधीनः।
"सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः।
नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी"॥
इति मनुः।)

अयस्कान्तः, पुं, (अयसु कान्तः रमणीयः।) लौहविशेषः। कान्तलोह इति ख्यातः। तत्पर्य्यायः। कान्तलोहं २ कान्तं ३ लौहकान्तकं ४ कान्तायसं ५ क्षयलोहं ६ महालोहं ७। अस्य गुणाः। तीक्ष्णत्वं। उष्णत्वं। रूक्षत्वं। पाण्डुरोगकफपित्तहरत्वं। रसायनत्वं। अनुत्तमत्वञ्च। स चतुर्व्विधः। भ्रामकः १ चुम्बकः २ रोमकः ३ खेदकः ४। एते रसायने उत्तरोत्तरगुणिनः।
"क्रमेण दार्ढ्याकर्षकान्तिकार्य्यकारीरोगदायिनः"।
इति राजनिर्घण्टः॥ चुम्बकप्रकरोऽप्ययं। (चुम्बक

इति ख्यातः प्रस्तरभेदः। चुम्बकपाथर इति भाषा।
"उमारूपेण ते यूयं संयमस्तिमितं मनः।
प्रम्भोर्यतध्वमाकृष्टमयस्कान्तेन लौहवत्"॥
इति कुमारसम्भवे।)
("ततः कोटिसहस्रैर्वा कान्तलौहं महागुणं"।
इति वैद्यकरत्नेन्द्रसारसङ्गृहः॥)

अयस्कार, पुं, (अयोविकारं करोति, कृ+अण् उपपदसमासः।) प्रजङ्घाग्रः। जङ्घाग्रभागः। इति त्रिकाण्डशेषः॥ लौहकारः। अयस्कारोतीति व्युत्पत्त्या॥

अयाः, [स्] पुं, (इण्+असुन्।) अग्निः। इत्युणादिकोषः॥

अयाचकः, त्रि, (याच+ण्वुल्, ततो नञ्समासः।) याच्ञारहितः। यथा। "यदि भवति स दाता याचकायाचकेषु"। इत्युद्भटः॥ (भिक्षापराङ्मुखः। प्रार्थनाविमुखः।)

अयाचितं, त्रि, (याच्+क्तः, नञ्समासः।) याच्ञां विना लब्धवस्तु। अप्रार्थितं। इत्यमरशब्दार्थमेदिनी॥ (अनर्थितं। "अयाचितोपस्थितमम्बु केवलं"। इति कुमारसम्भवे। "अमृतं स्यादयाचितं"। इति मनुः। "अयाचिताहृतं याच्ञामपि दुष्कृतकर्म्मणः"। इति स्मृतिः।)

अयाचितः, पुं, (याच्+क्तः, ततो नञ्समासः।) मुनिविशेषः। तत्पर्य्यायः। उपवर्षः २ हलभृतिः ३ कृतकोटिः ४। इति त्रिकाण्डशेषः॥

अयानं, क्ली, खभावः। इति हारावली॥ अगमनं। गत्यर्थयाधातोर्भावेऽनट् ततो नञ्समासः॥

अयि, व्य, प्रश्नः। (इण्+इन्।) अनुनयः। सम्बोधनं। इति मेदिनी॥ अनुरागे। ("अयि कठोर! यशः किल ते प्रियं"। इति उत्तरचरिते। "अयि घनोरु! पदानि शनैः शनैः"। इति वेणीसंहारे। "अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः"। इति कुमारसम्भवे।)

अयुक्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) सप्तपर्णवृक्षः। इति हेमचन्द्रः॥

अयुक्त, त्रि, (युज्+क्तः, नञ्समासः।) अमिश्रितं। अनुचितं। यथा,—
"अयुक्तं यदिह प्रोक्तं प्रमादेन भ्रमेण वा"।
इति दुर्गादासः॥ (असंसक्तः। संयोगरहितः। अनियोजितः। यथा,
"अयुक्तचारा राजानो भविष्यन्ति कथं नु ते"।
इति रामायणे। सर्व्वदा विषयासक्तचित्ततया कर्त्तव्येष्वनवहितः।
"परावमन्ता विषयेषु सक्तवान्,
न देशकालप्रविभागतत्त्ववित्।
अयुक्तबुद्धिर्गुणदोषनिश्चये,
विपन्नराज्यो न चिरात् विपत्स्यते"॥
इति रामायणे।)

अयुग्मच्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) विषमच्छदः। सप्तपर्णवृक्षः। इत्यमरटीकायां भरतः॥ (छातिम इति ख्यातः सप्तच्छदवृक्षः।
"अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थानिकेतनाजिरं।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं मदोपायनदन्तिनां मदः"॥
इति किरातार्জ্জुनीये।)

अयुतं, क्ली, (न युतं, नञ्समासः।) दशसहस्रसंख्या। इति हेमचन्द्रः॥ १०००० दशहाजार इति भाषा। ("नागानामयुतं गुरुक्रमयुतं सार्द्धं रथानां शतं"। इति रामायणे।)

अयुतः, त्रि, (न युतः, नञ्समासः।) अमिश्रितः। अयुक्तः। यथा। अपृथग्भावोऽयुतासिद्धिः। इति चरकटीका॥ (असंयुक्तः। असंश्लिष्टः। संयोगरहितः। पुंसि खनामख्यातः राधिकस्य पुत्रः स च क्रोधनस्य पिता।)

अये, व्य, (इण+एच्।) कोपः। विषादः। सम्भ्रमः। स्मरणं। इति मेदिनी॥ सम्बोधनं। इति शब्दरत्नावली॥ (कोमलामन्त्रणे। "अये कान्ते मुग्धे चटुलनयने चन्द्रवदने"। इत्युद्भटः। "अये कथं तातसारथिरस्मसेनः"। इति वेणीसंहारे।)

अयोगः, पुं, (युज्+घञ्, नञ्समासः।) विश्लेषः। विधुरः। कूटः। कठिनोद्यमः। इति मेदिनी॥ वमनविरेचनादीनां प्रतिलोमप्रवृत्तिरल्पप्रवृत्तिर्व्वा। यथा,—
"योगः सम्यक्प्रवृत्तिः स्यादतियोगोऽतिवर्त्तनं।
अयोगः प्रातिलोम्येन न वाल्पं वा प्रवर्त्तनं"॥
इति वैद्यकं॥ ("तत्रासात्म्येन्द्रियार्थसंयोगोऽयोगातियोगमिथ्यायोगादियुक्ता रूपरसादयः"॥ इति माधवकरकृतरोगविनिश्चयग्रन्थे विजयरक्षितः॥
"चीर्य्यायतनानीति अर्थानां कर्म्मणां कालस्य चातियोगायोगमिथ्यायोगाः तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः॥ सर्व्वशोऽदर्शनमयोगः अतिसूक्ष्मातिस्निग्धातिविप्रकृष्टरौद्रभैरवादभुतदृष्टबीभत्सविकृतादिरूपदर्शनं। मिथ्यायोगः"॥ इति चरकः॥) योगो ध्यानं तदभावः। योगो भेषजं तदभावश्च॥ (विच्छेदः। मिथः संरूढगाढानुरागयोर्नायकनायिकयोर्गुरुजनपराधीनतया दैवगत्या वा विप्रकर्षादन्योन्यादर्शनरूपदशाविशेषः, यदुक्तं दशरूपादर्शे।
"तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः।
पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः"॥
अयञ्च पूर्ब्बराग इत्युच्यते। यदुक्तं दर्पणकारैः।
"अवणाद्दर्शनादापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्ब्बरागः स उच्यते"॥)

अयोगवः, त्रि, (अयइव कठिना गौर्व्वाणी यस्य सः, अच्। अयोगं दुष्टयोगं वाति वा+कः।) वैश्यकन्यायां शूद्रादुत्पन्नसन्तानः। इति जटाधरः॥ ("शूद्रादयोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः"॥
इति मनुः।
शूद्रात् वैश्यायां जातः प्रतिलोमजः सङ्कीर्णवर्णः।

"प्रसाधनोपचारज्ञमदासं दासजीवनं।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे"॥
इति मनुः।)

अयोगुड़, पुं, (अयसा निर्म्मितो गुड़ः पिण्डः।) लौहगुलिका। यथा,—
"वरमाशीविषविषं क्षथितं ताम्रमेव वा।
पीतमग्न्यग्निसन्तप्तं भक्षितं वाप्ययोगुड़ाः"॥
इति चरकः॥

अयोग्रं, क्ली, (अयोऽग्रे मुखे यस्य तत्।) मुषलं। इत्यमरः॥

अयोघनः, पुं, (अयांसि हन्यन्ते ताड्यन्तेऽनेन, हन+अप्+घनादेशश्च।) एकीभूतलौहपिण्डः। हातुड़ी इति भाषा। तत्पर्य्यायः। लौहकूटं २। इति हेमचन्द्रः॥
("अयोघनेनाय इवाभितप्तं
वैदेहिबन्धोर्हृदयं विदद्रे"।
इति रघुवंशे।
"कुरु करे गुरुमेकमयोघनं
दहसितो सुकुरुश्च कुरुश्च मे"।
इति नैषधं।)

अयोध्या, स्त्री, (योद्धुमशक्या, युध+ण्यत्, नञ्समासः।) श्रीरामनगरी। पश्चिमदेशे अवोद इति प्रसिद्धा। तत्पर्य्यायः। साकेतं २ कोशला ३। इति हेमचन्द्रः॥ उत्तरकोशला ४। इति त्रिकाण्डशेषः॥ सा तु मोक्षदा पुरी। यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥
एतासु पृथिवीमध्ये न गण्यन्ते कदाचन।
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी"॥
इति भूतशुद्धितन्त्रं॥ * ॥ तद्वर्णनं यथा,—
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्म्मिता स्वयम्॥
आयता दश च द्वे च योजनानि महापुरी।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥
राजमार्गेण महता सुविभक्तेन शोभिता।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥
तान्तु राजा दशरथो महाराष्ट्रविवर्द्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा॥
कपाटतोरणवतीं सुविभक्तान्तरापणां।
सर्व्वयन्त्रायुधवतीमुषितां सर्व्वशिल्पिभिः॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभां।
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां॥
बधूनाटकसंघैश्च संयुक्तां सर्व्वतः पुरीं।
उद्यानाम्रवणोपेतां महतीं शालमेखलां॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदां।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा॥
सामन्तराजसङ्घैश्च बलिकर्म्मभिरागतां।
नानादेशनिवासैश्च वणिग्भिरुपशोभितां॥
प्रासादैः रत्नविकृतैः पर्व्वतैरिव शोभितां।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीं॥

चित्रामष्टापदाकारां वरनारीगणैर्युतां ।
सर्व्वरत्नसमाकीर्णां विमानग्रहशोभितां ॥
ग्रहगणाभविच्छिन्नां समभूमौ निवेशितां ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकां ॥
दुन्दुभीभिर्म्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं एथिव्यां तामनुत्तमां ॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृतां ॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरं ।
शब्दवेधञ्च विततं लघुहस्ता विशारदाः ॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥

तामग्निमद्भिर्गुणवद्भिरावृतां
द्विजोत्तमैर्व्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैर्ऋषिभिश्च केवलैः" ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे पञ्चमः सर्गः ॥ * ॥

"तस्यां पुर्य्यामयोध्यायां वेदवित् सर्व्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥
इक्ष्वाकूणामतिरथो यज्वा धर्म्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥
बलवान्निहतामित्रो मित्रवान् विजितेन्द्रियः ।
धनैश्च सञ्चयैश्चान्यैः शक्रवैश्रवणोपमः ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥
तस्मिन् पुरवरे हृष्टा धर्म्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥
नाल्पसन्निचयः कश्चित्तदा तस्मिन् पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥
कामी वा न कदर्य्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः ॥
सर्व्वे नराश्च नार्य्यश्च धर्म्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥
नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नाम्रस्रो ननु लिप्ताङ्गो नासुगन्धश्च विद्यते ॥
नाम्रस्रभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न चावृत्तो न सङ्करः ॥
स्वकर्म्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥
नास्तिको नानृतो वापि न कश्चिदबहुश्रुतः ।
नास्त्रयको न चाशक्तो नाविद्वान् विद्यते क्वचित् ॥
नाषडङ्गविदत्रास्ति नाव्रतो नासहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥

वर्णेष्वग्र्याचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥
दीर्घायुषो नराः सर्व्वे धर्म्मं सत्यञ्च संश्रिताः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥
क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वकर्म्मनिरतास्त्रीन् वर्णानुपचारिणः ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥
योधानामग्निकल्पानां पेशलानाममर्षिणां ।
सम्पूर्णा कृतविद्यानां गुहा केशरिणामिव ॥
काम्बोजविषये जातैर्व्वाह्लीकैश्च हयोत्तमैः ।
वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥
विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ।
सा योजने द्वे च भूयः सत्यनाम्ना प्रकाशते ॥
तां पुरीं स महातेजा राजा दशरथो महान् ।
शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥

तां सत्यनामां दृढतोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां ।
पुरीमयोध्यां नृसहस्रसंकुलां
शशास वै शक्रसमो महीपतिः" ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे षष्ठः सर्गः ॥ युद्धाधिकेऽपि च ॥

अयोमलं, क्ली, (अयसो मलमिव ।) लौहमलं । इति राजनिर्घण्टः ॥ लोहार गु इति भाषा । तत्पर्य्यायः । मण्डूरं २ लौहकिट्टं ३। तस्य गुणाः । "शूलोर्द्धमुत्तमं किट्टं मध्यञ्चाशीतिवर्षकं । अधमं षष्टिवर्षीयं ततो हीनं विषोपमं ॥ यल्लोहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणं" । इति वैद्यकं ॥
(अस्य शोधनमारणं यथा,—

"दग्ध्वाक्तकाष्ठैर्मलमायसन्तु,
गोमूत्रनिर्व्वापितमग्निवारान् ।
विचूर्ण्य लीढ़ं मधुना चिरेण,
कुम्भाङ्गयं पाण्डुगदं निहन्ति" ॥

इति वैद्यकरसेन्द्रसारसङ्ग्रहः ॥)

अरं, क्ली, (इयर्त्ति गच्छत्यनेन, ऋ + अच् ।) शीघ्रं । चक्राङ्गं । चाकार पाकि इति भाषा । शीघ्रगे चि । इति मेदिनी ॥

अरः, पुं, (ऋ + अच् ।) जिनानां कालचक्रस्य द्वादशांशः । स तु अवसर्पिण्याः षष्ठभागः ॥ जिनानामष्टादशतीर्थङ्करः । इति हेमचन्द्रः ॥

अरकः, पुं, (अ + ऋकन् ।) शैवालं । इति हारावली ॥ पर्पटः । इति राजनिर्घण्टः ॥

अरग्वधः, पुं, आरग्वधवृक्षः । सोंदालि इति ख्यातः । इत्यमरटीकायां भरतः ॥ (अस्य गुणादयः आरग्वधशब्दे ज्ञेयाः ।)

अरघट्टः, पुं, (अरं शीघ्रं घट्यते चाल्यतेऽसौ, अर + घट्ट + अच् ।) महाकूपः । इत्यमरजटाधरौ ॥ (कूपात् जलनिःसारणार्थं घटीयन्त्रभेदः । कूपोपरिनिबद्धजलोत्तोलककाष्ठभेदः । "स कदाचिद्दायादैरुद्वेजितोऽरघट्टघाटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः" । इति पञ्चतन्त्रे ।)

अरघट्टकः, पुं, (अरघट्ट + स्वार्थे कन् ।) महाकूपः । तत्पर्य्यायः । पादावर्त्तः २। इति हेमचन्द्रः ॥

अरजाः, [स्] स्त्री, (रन्ज + असुन्, नलोपः नञ्समासः ।) कन्या । कुमारी । इति हेमचन्द्रः ॥ रजोगुणरहिते त्रि ॥ (निर्म्मलः । धौतः । परिष्कृतः ।)

अरटुः, पुं, (अरं शीघ्रं अटति, अट् + उन्) अरलुरुक्षः । इत्यमरटीकायां रायमुकुटः ॥

अरणिः, पुं, (ऋ + अनि ।) गणिकारिकावृक्षः । इति मेदिनी । सूर्य्यः । इति काशीखण्डं ॥

अरणिः, पुं, स्त्री, (ऋ + अनि ।) निर्म्मन्थ्यदारु । अग्निसाधनीभूतकाष्ठं । घर्षणद्वाराग्निजनककाष्ठं । इत्यमरः ॥ (अग्निमन्थनकाष्ठ । अमुत्पादनाय यत्काष्ठं काष्ठान्तरेण घृष्यते तदरणिनामकं काष्ठं ।

"विपक्षवक्षोऽरणिमन्थनोत्थः
प्रतापवह्निरिव धूमलेखा" ।

इति धनञ्जयविजयव्यायोगे ।)

अरणी, स्त्री, अरणिः । इत्यमरटीकायां भरतः ॥ ("विधिना मन्त्रयुक्तेन रूक्षाऽपि मथिताऽपि च । प्रयच्छति फलं भूमिररणीव ऊताशनम्" ॥ इति पञ्चतन्त्रे ।)

अरणीकेतुः, पुं, (अरणी केतुरस्य सः ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

अरण्यं, क्ली, (अर्य्यते गम्यते, ऋ गतौ, अर्त्तेर्निञ्येति अन्यः ।) वनं । इत्यमरः ॥ (मोक्षप्रदं दण्डकादिकं नवारण्यं । यदुक्तं,—

"दण्डकं सैन्धवारण्यं जम्बुमार्गञ्च पुष्करं ।
उत्पलावर्त्तकारण्यं नैमिषं कुरुजाङ्गलं ॥
हिमवानर्ब्बुदञ्चैव नवारण्यं विमुक्तिदं" ।)

अरण्यः, पुं, कट्फलवृक्षः । इति शब्दचन्द्रिका ॥ (स्वनामख्यातो रैवतस्य मनोः पुत्रः । यदुक्तं हरिवंशे,—

"अरण्यस्य प्रकाशस्य निर्मोहः सत्यवान् क्षती ।
रैवतस्य मनोः पुत्राः पञ्चमश्चैतदन्तरं" ।)

अरण्यकदली, स्त्री, (अरण्यस्यैव कदली, षष्ठीतत्पुरुषः ।) गिरिकदली । इति राजनिर्घण्टः ॥ (वनकदली । इयं ग्रामादौ न जायते ।)

अरण्यकार्पासी, स्त्री, (अरण्ये कार्पासी, सप्तमीतत्पुरुषः ।) वनकार्पासी । तत्पर्य्यायः । वनजा २ भारद्वाजी ३ वनोद्भवा ४ । अस्या गुणाः । हिमत्वं । रूक्षत्वं । व्रणशस्त्रक्षतनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरण्यकुलत्थिका, स्त्री, (अरण्यस्य कुलत्थिका, षष्ठीतत्पुरुषः ।) कुलत्था । इति राजनिर्घण्टः ॥ वनकुलथी इति भाषा ।

अरण्यकुसुम्भः, पुं, (अरण्यस्य कुसुम्भः, षष्ठीतत्-

पुरुषः।) वनकुसुम्भः। तत्पर्य्यायः। कौसुम्भः २ अग्निसम्भवः ३। अस्य गुणाः पाके कटुत्वं। श्लेष्मनाशित्वं। अग्निवर्द्धकारित्वञ्च। इति राजनिर्घण्टः॥

अरण्यघोली, स्त्री, (अरण्यजा घोली, कर्म्मधारयः।) वनघोली। पञ्चशाकविशेषः। इति राजनिर्घण्टः॥

अरण्यचटकः, पुं, (अरण्यस्य चटकः, षष्ठीतत्पुरुषः।) वनचटकः। तत्पर्य्यायः। धूसरः २ भूमिशयः ३। अस्य गुणाः। शीतत्वं। लघुत्वं। शुक्रवर्द्धकारित्वं। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (अस्य मांसगुणा यथा राजनिर्घण्टे,—

"चटकाखञ्जं तु शीतं लघु वृष्यं बलप्रदं।
तद्वारण्यचटकं तत्तूष्णं लघुपथ्यदम्"॥)

अरण्यजार्द्रका, स्त्री, (अरण्ये जायते या, अरण्य+जन्+ड, अरण्यजा आर्द्रका, कर्म्मधारयः।) वनार्द्रका। इति राजनिर्घण्टः॥ वन आदा इति भाषा। अस्य गुणपर्य्यायौ ऐन्द्रशब्दे द्रष्टव्यौ॥

अरण्यजीरः, पुं, (अरण्यस्य जीरः, षष्ठीतत्पुरुषः।) वनजीरः। इति राजनिर्घण्टः॥ वनजीरा इति भाषा।

अरण्यधान्यं, क्ली, (अरण्यस्य धान्यं, षष्ठीतत्पुरुषः।) नीवारः। इति राजनिर्घण्टः॥ उड़ी धान इति भाषा।

अरण्यमक्षिका, स्त्री, (अरण्यस्य मक्षिका, षष्ठीतत्पुरुषः।) दंशः। इति शब्दरत्नावली॥ डाँश इति भाषा।

अरण्यमुद्गः, पुं, (अरण्यस्य मुद्गः, षष्ठीतत्पुरुषः।) मकुष्टकः। इति राजनिर्घण्टः॥ वनमुग इति भाषा। (अस्य गुणाः मुकुष्टकशब्दे द्रष्टव्याः।)

अरण्यवायसः, पुं, (अरण्यस्य वायसः, षष्ठीतत्पुरुषः।) द्रोणकाकः। इति राजनिर्घण्टः॥ दाँड़ काक इति भाषा।

अरण्यवासिनी, स्त्री, (अरण्ये वसति या, अरण्य+वस्+णिनि, स्त्रियां ङीप्।) अत्यल्पपर्णी लता। इति राजनिर्घण्टः॥

अरण्यवास्तूकः, पुं, (अरण्यस्य वास्तूकः, षष्ठीतत्पुरुषः।) वनवास्तूकः। इति राजनिर्घण्टः॥ वन बेतो इति भाषा। अस्य गुणपर्य्यायौ कुण्डलरशब्दे द्रष्टव्यौ॥

अरण्यशालिः, पुं, (अरण्यभवः शालिः, कर्म्मधारयः मध्यपदलोपश्च।) नीवारः। वनधान्यं। इति राजनिर्घण्टः॥

अरण्यशूरणः, पुं, (अरण्यजातः शूरणः, कर्म्मधारयः।) वनशूरणः। इति राजनिर्घण्टः॥ वनओल इति भाषा।

अरण्यश्वा, [न्] पुं, (अरण्ये श्वेव हिंस्रः।) वृकः। इति हेमचन्द्रः॥ नेकड़े बाघ इति भाषा।

अरण्यषष्ठी, स्त्री, (अरण्याय गन्तुं षष्ठी, चतुर्थीतत्पुरुषः।) ज्येष्ठशुक्लषष्ठी। बाँटाषष्ठी इति भाषा। यथा राजमार्त्तण्डे,—

"ज्यैष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता।
अनेनैककरास्तस्यामटन्ति विपिने स्त्रियः॥
तां विन्ध्यवासिनीं स्कन्धषष्ठीमाराधयन्ति च।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभां"॥

कन्दं शूरणादि। मूलं तदितरत्। इति तिथ्यादितत्त्वं॥

अरण्यानी, स्त्री, (अरण्य+आनुक्+स्त्रियां ङीष्। महत् अरण्यम् इत्यस्मिन् अर्थे इन्द्रवरुणेति सूत्रस्थेन हिमारण्ययोर्महत्त्वइति वार्त्तिकेन अरण्यशब्दस्य आनुगागमः, ततो ङीष्।) महावनं। इत्यमरः॥ ("अस्ति मगधदेशे चम्पकवती नामारण्यानी"। इति हितोपदेशे।)

अरतचपः, पुं, स्त्री, (अरता विरता चपा यस्य।) कुक्कुरः। इति चिकाण्डशेषः॥ रत्यलज्जे त्रि॥ (नास्ति रते शृङ्कारे चपा लज्जा यस्य सः।)

अरतिः, पुं, (ऋ+अति।) क्रोधः। इत्युणादिकोषः॥

अरतिः, स्त्री, (रम्+क्तिन्, नञ्समासः।) अनवस्थितचित्तत्वं। इति रन्तिदेवः॥ क्रीड़ाभावः। इति कार्त्तिकः॥ रतिविरहः। रतिशून्यं चि॥ (विरक्तिः। प्रीतिविरहः। अनुरागराहित्यं। उत्साहहीनता। उद्यमाभावः। उद्योगराहित्यं। निश्चेष्टता। सुखाभावः। दुःखं। क्लेशः। औत्सुक्यं। उद्वेगः। इष्टवियोगात् चित्तस्याकुलीभावः। यदुक्तं,—

"स्वाभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः।
अरतिः सा तु विज्ञेया"। सुश्रुताभावः। अस्यास्यां।
"अमोऽरतिर्विवर्णत्वं वैरस्यं नयनस्रवः"।
इति सुश्रुते।)

अरत्निः, पुं, (ऋ+कत्निः, रत्निः बद्धमुष्टिकरः, स नास्ति यस्य।) विस्तृतकनिष्ठाङ्गुलिमुष्टिकहस्तः। कुर्परः। इति मेदिनी॥ ("एकविंशतियूपास्ते एकविंशत्यरत्नयः"। इति रामायणे। कफोणिः। हस्तः। करतलपार्श्वः। बद्धमुष्टिहस्तः। कील, घुसी इत्यादि भाषा।

"पदा मूर्ध्नि महाबाहुः प्राहरत् विलपिष्यतः।
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना"॥
इति महाभारते।)

अरन्धनं, क्ली, (न रन्धनं, अत्र अभावे नञ्।) पाकाभावः। तत्तु कन्यासंक्रान्त्यां क्षतक्षेत्रे दद्धारन्धनं कथ्यते। सौरभाद्रस्य यस्मिन् कस्मिन् दिने क्षतक्षेत्रे इष्टारन्धनमित्युच्यते। इति लोकप्रसिद्धं। तत्र प्रमाणं।

"कर्कान्नमद्यात् सिंहाहे सिंहान्नं सिंहकन्ययोः।
मनसाप्येषनागेभ्यो दत्त्वा सर्व्वं निशोधितं"॥
इत्याचारमार्त्तण्डधृतवचनं॥

अरम्, त्रि, (न रम्यतेऽत्र, आधारे घञ्।) अवमः। अधमः। इत्यमरटीकासारसुन्दरी॥ (नीचः। निकृष्टः। हीनः।)

अररं, त्रि, (ऋ+अरच्।) कवाटं। इत्यमरः॥ करीरकोषः। आच्छादनं। इति विश्वः॥ (पुंसि चर्म्मकर्त्तनच्छुरिकाभेदः। यज्ञाङ्गं। युद्धं। रणः।)

अरलिः, पुं, क्ली, (ऋच्छति ऋ+विच्, अरमियर्त्ति ऋ इनि।) कपाटं। इति हेमचन्द्रः॥

अररुः, पुं, (ऋ+अरु।) शत्रुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अस्त्रभेदः। खनामख्यातोऽसुरभेदः।)

अररे, अ, (अरं शीघ्रं राति, रा+के।) त्वरान्वितसम्बुद्धिः। शीघ्रसम्बोधनं। इति शब्दरत्नावली॥ (शीघ्रं प्रत्युत्तरलाभेच्छया कृते अतिव्यग्रतया सम्बोधने।

"अरे विकारसम्बोधे अरे त्वरयान्विते"।
इति शब्दरत्नावली।)

अरलुः, पुं, (अरं लाति, ला+कु, ऋ+अरु+रस्य लः।) श्लोनाकवृक्षः। इत्यमरः॥ शोनागाछ इति भाषा।

अरविन्दं, क्ली, (अराकाराणि दलानि तत्सादृश्यात् अराः, तान् विन्दति लभते इत्यर्थे विद्+श।) पद्मं। सारसपत्त्री। इत्यमरः॥ ताम्रं। रक्तकमलं। नीलोत्पलं। इति राजनिर्घण्टः॥ ("उन्मीलितं तूलिकयेव चित्रं सूर्य्यांशुभिर्भिन्नमिवारविन्दम्"। इति कुमारसम्भवे।

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलं।
स्मरामि वदनं तस्याः सारुचञ्चललोचनम्"॥
इति साहित्यदर्पणे।)

अरविन्दिनी, स्त्री, (अरविन्द+इनि, ङीप्।) नलिनी। इति शब्दरत्नावली॥ पद्मसमूहः। पद्माकरः। इति रत्नमाला॥

अरसिकः, त्रि, (रसं वेत्ति, रस+ठन्, नञ्समासः।) अरसज्ञः। अविदग्धः। यथा। "अरसिकेषु रसस्य निवेदनं शिरसि मा लिख मा लिख मा लिख"॥ इत्युद्भटः॥

अराजकः, त्रि, (नास्ति राजा यत्र सः, कप्।) राजशून्यदेशादिः। यथा,—

"चौरप्रायं जनपदं हीनसत्वमराजकं"।
इति श्रीभागवतं। (नियन्तृहीनः। शासनकर्त्तृरहितः।

"अराजके जनपदे दोषा जायन्ति वै सदा।
उद्दण्डं सततं लोकं राजा दण्डेन शास्ति वै"॥
इति महाभारते।)

अराजकः, पुं, (नास्ति राजा यत्र सः कप्।) राजशून्यदेशादिः। यथा,—

"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः"॥
इति मानवे ७ अध्याये ३ श्लोकः॥

अरातिः, पुं, (न राति ददाति सुखं, रा+क्तिच्, नञ्समासः।) शत्रुः। इत्यमरः॥ ("अरातिविक्रमालोकविकसत्खरविलोचनः"। इति साहित्यदर्पणे।

"अनेकयुद्धविजयी सन्धानं यस्य गच्छति।
तत्प्रभावेन तस्यास्तु वश्यं गच्छन्त्यरातयः"॥
इति पञ्चतन्त्रे।)

अरालं, त्रि, (ऋ+विच्, अरमालाति, आ+ला+क।) कुटिलं। वक्रं। इत्यमरः॥ ("अरालैः स्वाभाव्यादलिकरभकश्रीभिरलकैः"। इति आनन्दलहरी।)

अरालः, पुं, (ऋ + विच्, अरमालाति, आ + ला + क ।) सर्ज्जरसः । मत्तहस्ती । इति मेदिनी ॥ वक्रहस्तः । इति शब्दरत्नावली ॥

अराला, स्त्री, (अराल + स्त्रियां टाप्) अधृष्टा । कुलटा । इति शब्दरत्नावली ॥

अरिः, पुं, (ऋ + इन् ।) शत्रुः । इत्यमरः ॥ ("उपकर्त्तारिणा सन्धिर्न मित्रेणापकारिणा" । इति हितोपदेशे । [इति मनुः ।) "अनन्तरमरिं विद्यादरिसेविनमेव च" । चक्रं । इति त्रिकाण्डशेषः ॥ खदिरभेदः । तत्पर्य्यायः । सन्दानिका २ दाली ३ खदिरपत्रिका ४ । अस्य गुणाः । कषायत्वं । कटुत्वं । तिक्तत्वं । रक्तार्त्तिपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरिष्टं, क्ली, (ऋच्छत्यनेन, ऋ + इच ।) कर्णः । हालि इति भाषा । तत्पर्य्यायः । केनिपातकः २ । इत्यमरः ॥ केनिपातः ३ । इति भरतः ॥ ("लोलैररिष्टैश्चरणैरिवाभितः" । इति माघः ।)

अरिन्दमः, त्रि, (अरीन् शत्रून् कामादीन् वा दाम्यति दमयति, दम् + अन्तर्भूतण्यर्थे खच् मुम्, उपपदसमासः ।) शत्रुदमनकारकः । इति मुग्धबोधव्याकरणं ।
("यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव" ॥
"ज्ञात्वा तु तदृषिं सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सरक्षां विविशुर्लूणं मात्रा सार्द्धमरिन्दमाः" ॥
इति महाभारते ।)

अरिमर्दः, पुं, (अरिं रोगरूपं शत्रुं मृद्नाति, मृद् + अण्, उपपदसमासः ।) कासमर्दवृक्षः । इति राजनिर्घण्टः ॥ (त्रि, शत्रुमर्द्दनकारी ।)

अरिमेदः, पुं, (अरेर्विट्खदिरस्येव मेदः सारः यस्य सः ।) वृक्षविशेषः । गुइया बाबला इति भाषा । तत्पर्य्यायः । इरिमेदः २ रिमेदः ३ गोधास्कन्दः ४ अरिमेदकः ५ अहिमारः ६ पूतिमेदः ७ अहिमेदकः ८ विट्खदिरः ९ । अस्य गुणाः । कषायत्वं । उष्णत्वं । तिक्तत्वं । भूतविनाशित्वं । श्लोथातिसारकासविषवैसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥
(अस्य व्यवहारो यत्र तदौषधं यथा,—
"तुलां घृतां नीलसहाचरस्य,
द्रोणेऽम्भसः संश्रपयेद्यथावत् ।
पूर्त्वा चतुर्भागरसे तु तैलं,
पचेच्छनैरर्द्धपलप्रयुक्तैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्बाम्बयष्टीमधुकोत्पलानां ।
तत्तैलमाश्वेव घृतं मुखेन,
सौख्यं द्विजानां विदधाति सद्यः" ॥ * ॥
महासहचरं तैलं ॥ इति वैद्यकचक्रपाणिसंग्रहः ॥)

अरिष्टं, क्ली, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः ।) सूतिकागृहं । ("अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा" । इति रघुवंशे ।) अशुभं । तक्रं । मरणचिह्नं । (यदुक्तम्, "रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्याद् रिष्टमप्यभिधीयते" ॥)
शुभं । इति मेदिनी ॥ उपद्रवः । तत्पर्य्यायः । उपलिङ्गः २ उपसर्गः ३ अजन्यं ४ ईतिः ५ उत्पातः ६ । इति हेमचन्द्रः ॥ (मद्यं । यथा । द्राक्षारिष्टं । दशमूलारिष्टं । वव्वूलारिष्टं ।
"अरिष्टं लघुपाकेन सर्व्वतश्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" ॥
इति वैद्यके ।)
("मरणचिह्नार्थे लक्षणं यथा । नियतमरणाख्यापकलिङ्गं ॥ इति माधवसंगृहीतरोगविनिश्चयग्रन्थटीकायां द्विजयरक्षितः ॥ * ॥ तत्र प्रकृतवर्णोऽर्द्धशरीरे विकृतवर्णोऽर्द्धशरीरे द्वावपि वर्णौ मर्य्यादाविभक्तौ दृष्टौ यद्येवं सव्यदक्षिणविभागेन यद्येवं पूर्व्वपश्चिमविभागेन यद्युत्तराधरदिभागेन यद्यन्तर्बहिर्विभागेनातुरस्यारिष्टमिति विद्यात्" ॥ इति चरकः ।
"शरीरग्रीवयोर्यस्य प्रकृतेर्विकृतिर्भवेत् ।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे" ॥
इति च सुश्रुतः ॥)

अरिष्टः, पुं, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः ।) लशुनः । निम्बः । फेनिलवृक्षः । काकः । कङ्कपक्षी । इति मेदिनी । वृषभासुरः । इत्यनेकार्थध्वनिमञ्जरी ॥ मद्यविशेषः । इक्षुविकारसहितानयाचित्रकदन्तीपिप्पल्यादिभूरिभेषजक्वाथादिसंस्कारवान् अरिष्टोऽभिधीयते । इति सुश्रुतटीका ॥ अस्य गुणाः । अर्शःश्लोथग्रहणीकफरोगनाशित्वं । इति राजवल्लभः ॥
("द्रवेषु चिरकालस्थं द्रव्यं यत्संहितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितं ॥
यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं" ॥
इति शार्ङ्गधरः ॥ गुणोऽस्य यथा चरकेणोक्तः ॥
"श्लोकार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान् ।
हन्त्यरिष्टः कफव्याप्तान्रोगान् रोचनदीपनः ॥ * ॥
दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः ।
भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत् ॥
त्रिफलाया दलानाञ्च प्रक्षिप्य त्रिपलं ततः ।
रसे चतुर्थशेषे तु पूते प्रीते समावपेत् ॥
तुलां गुडस्य तत्तिष्ठेत् मासार्द्धं घृतभाजने ।
तन्मात्रया पिबेन्नित्यं अर्शोभ्योऽपि प्रमुच्यते ॥
ग्रहणीपाण्डुरोगघ्नं वातवर्च्चोऽनुलोमनं ॥
दीपनञ्चास्यचित्तघ्नं दन्त्यरिष्टमिदं विदुः" ॥
इति दन्त्यरिष्टः । इति चरकः ॥
"अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः ।
बहुदोषहरश्चैव दोषाणां शमनश्च सः ॥
दीपनः कफवातघ्नः सरः पित्तविरोधनः ।
शूलाध्मानोदरश्लीहज्वराजीर्णार्शसां हितः" ॥
इति सुश्रुतश्च ॥)

अरिष्टकः, पुं, (अरिष्ट एव स्वार्थे क ।) फेनिलवृक्षः, इति शब्दरत्नावली ॥ रीठाकरञ्ज इति ख्यातः । अरिष्टशब्दार्थोऽप्यत्र ॥ रिठा इति भाषा । (अस्य गुणा यथा,—
"अरिष्टकस्त्रिदोषघ्नो ग्रहजिद्गर्भपातनः" ।
इति । एतत्फलचूर्णैर्हि कृतपानां नेपालदेशीयकम्बलानामित्यर्थः प्रक्षालनात् शुद्धिर्भवतीति शास्त्रविदां मतम् । यदुक्तं मनुना,
"कौषेयाविकयोरूर्णैः कृतपानामरिष्टकैः ।
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः" ॥ इति)

अरिष्टतातिः, त्रि, (अरिष्ट + तातिल् ।) क्षेमङ्करः । शुभङ्करः । इति भूरिप्रयोगः ॥ (स्त्री, शुभार्शंसनं । सौभाग्यबुद्धिः । कुशलाशिष्यं । "तदत्रभवता निष्पन्नाग्निषां काममरिष्टतातिमाशास्महे" । इति महावीरचरिते ।)

अरिष्टदुष्टधीः, त्रि, (अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य ।) आसन्नमरणसूचितलक्षणेन दूषितबुद्धिः । मरणकुबुद्धियुक्तः । तत्पर्य्यायः । विवशः २ । इत्यमरः ॥

अरिष्टनेमिः, पुं, (अरिष्टस्य नेमिः, षष्ठीतत्पुरुषः ।) जिनानां चतुर्व्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्करः । इति हेमचन्द्रः ॥ (विनतागर्भसम्भूतः खनामख्यातः काश्यपमुनिपुत्रः, यथा हरिवंशे,
"तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबलः ।
अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" ॥
कृशाश्वः प्रपौत्रश्चित्रकस्य पुत्रः खनामख्यातो राजा, यथा, हरिवंशे,
"चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च ।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा" ॥
खनामख्यातः प्रजापतिः । यथा रामायणे,
आदिकाले महाबाहो ये प्रजापतयोऽभवन् ।
दक्षो विवस्वानरुणोऽरिष्टनेमिस्तथैव च ।
काश्यपश्च महाभागस्तेषामासीदपश्चिमः" ॥)

अरिष्टसूदनः, पुं, (अरिष्टं तन्नामानमसुरं सूदयति यः, अरिष्टस्य सूदनः नाशक इति वा ।) विष्णुः । इति त्रिकाण्डशेषः ॥ शुभाशुभनाशके त्रि ॥ (कृष्णः । स खलु माथुरे कल्पे अरिष्टनामानमसुरं सूदितवान् ।)

अरिष्टा, स्त्री, (अरिष्ट + स्त्रियां टाप् ।) कटुका । इति राजनिर्घण्टः ॥ कट्की इति भाषा । (खनामख्याता काश्यपपत्नी, सा हि सर्व्वान् गन्धर्व्वान् जनयामास । यथा,—
"अरिष्टा तु महासत्त्वान् गन्धर्व्वानमितौजसः" ॥
इति हरिवंशे ।)

अरुः, [स्] पुं, (ऋ + उसि ।) सूर्य्यः । इत्युणादिकोषः ॥ रक्तखदिरः । इति राजनिर्घण्टः ॥

अरुः, [स्] पुं, क्ली, (ऋ + उस् ।) व्रणं । क्षतं । इत्यमरः ॥

अरुः, [स्] क्ली, (ऋ + उसि ।) मर्म्म । सन्धिस्थानं । इत्युणादिकोषः ॥

अरुचिः, पुं, (न रुचिर्यत्र सः ।) रोगभेदः । स च सत्यभिलाषेऽभ्यवहारासामर्थ्यरूपः । इति रक्षितः ॥ तत्पर्य्यायः । अरोचकः २ अश्रद्धा ३ अनभिलाषः ४ । इति राजनिर्घण्टः ॥
("दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,

भक्षायनेषु हृदि चावतते प्रगाढ़ं।
नाम्ने रुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह पञ्चविधं वदन्ति" ॥
इति सुश्रुतः । अलङ्कारशास्त्रोक्तदशविधस्मरदशामध्ये परिगणितो वस्तुवैराग्यरूपः स्मरदशाविशेषः, यथा साहित्यदर्पणे,—
"अङ्गेष्वसौख्यं तापः प्राणुता क्षपणताऽरुचिः ।
अरुचिर्वस्तुवैराग्यं सर्व्वत्रारागिता धृतिः" ॥
अरुजः, पुं, (रुजति, रुज् + क, नञ्समासः।) आरग्वधवृक्षः । इति राजनिर्घण्टः ॥ सोंदालि इति भाषा । (खनामख्यातदानवविशेषः ।
"प्रक्रादोऽग्निशिराः कुम्भः संह्रादो गगनप्रियः ।
अनुह्रादो हरिहरौ वराहः संह्रोऽरुजः" ॥
इति हरिवंशे ।)
अरुणं, क्ली, (ऋ + उनन् ।) कुङ्कुमं । सिन्दूरं । इति राजनिर्घण्टः ॥
अरुणः, पुं, (ऋ + उनन् ।) सूर्य्यसारथिः । स तु विनतापुत्रः गरुड़ज्येष्ठभ्राता च । तत्पर्य्यायः । सूरसूतः २ अनूरुः ३ काश्यपिः ४ गरुड़ाग्रजः ५ सूर्य्यः । अर्कवृक्षः । अत्यल्परागः । ईषद्रक्तवर्णः । इत्यमरः । सन्ध्यारागः । शुब्दरहितः । कपिलवर्णः । कुष्ठभेदः । अरुणगुणविशिष्टे तु वाच्यलिङ्गः । इति मेदिनी ॥ पुन्नागवृक्षः । गुड़ः । इति राजनिर्घण्टः ॥ (कपिलवर्णयुक्तः । शुक्लमिश्रितरक्तवर्णविशिष्टः ।
"कपोताङ्गरुणो धूमो दृश्यते विमलाम्बरे" ।
इति रामायणे ।)
अरुणकमलं, क्ली, (शुक्लसर्षपइत्यादिवत् नित्यकर्म्मधारयः।) रक्तोत्पलं । इति राजनिर्घण्टः ॥
अरुणलोचनः, पुं, (अरुणे रक्ते लोचने यस्य सः ।) पारावतः । इति राजनिर्घण्टः ॥
अरुणसारथिः, पुं, (अरुणः गरुड़ाग्रजः सारथिर्यस्य सः ।) सूर्य्यः । इति हेमचन्द्रः ॥
अरुणा, स्त्री, (अरुण + स्त्रियां टाप् ।) अतिविषा । श्यामा । मञ्जिष्ठा । त्रिवृता । इति मेदिनी ॥ इन्द्रवारुणी । गुञ्जा । इति राजनिर्घण्टः ॥ मुण्डितिका । इति रत्नमाला ॥
अरुणात्मजः, पुं, (अरुणस्य आत्मजः, षष्ठीतत्पुरुषः ।) जटायुपक्षी । इति त्रिकाण्डशेषः ॥
अरुणावरजः, पुं, (अरुणस्य अवरजः षष्ठीतत्पुरुषः।) गरुड़ः । इति हेमचन्द्रः ॥
("अरुणावरजं श्रीमानारुरोह रणे हरिः ।
सवर्णं स्वेन वपुषा सुपर्णं खेचरोत्तमम्" ॥
इति हरिवंशे ।)
अरुणोदयः, पुं, (अरुणस्य बालादित्यस्य उदयो यत्र सः ।) सूर्य्योदयात् पूर्व्वं मुहूर्त्तद्वयकालः । यथा,—
"चतस्रो घटिकाः प्रातरुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः" ॥
इति ब्रह्मवैवर्त्तपुराणं ॥ (यदुक्तं,—
"रजनीशेषयामस्य शेषार्द्धमरुणोदयः" । इति ।
"दृन् प्रशस्तत्वजलं यो घटतादारुणोदये" ।
इति मनुः ।)
अरुणोदयसप्तमी, स्त्री, (अरुणोदयकाले पुण्यविशेषजनिका या सप्तमी ।) माघशुक्लसप्तमी । माकरी सप्तमी । यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलं ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" ।
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहणफलं स्नानजं सन्निहिते बुद्धिरन्तरङ्गा इति न्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयं। अत्र बहुशतसूर्य्यग्रहाणां प्रत्येकाधिकरणतासंसर्गेणान्वयात् कालानां स्नानानां तत्फलानामपि बहुशतत्वं लभ्यते । अतो नाप्रसिद्धिः ॥ * ॥ पूर्णसप्तम्यां पूर्व्वापरयोर्यत्रारुणोदयकाले सप्तमी तत्र पूर्व्वदिने तत्काले स्नानं ।
"चतस्रो घटिकाः प्रातरुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामा रजनी प्राऊस्यक्काद्यन्तचतुष्टयं ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ॥
इति कालमाधवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्कालस्य पूर्णतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्गत्वेन इतरस्य चेतराङ्गत्वेनाभिधानात्। अतएव दक्षेण तत्कालमारभ्याह्निकक्रत्यमभिहितं ॥ * ॥ अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव स्नानं ।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" ॥
इति विष्णुधर्म्मोत्तरात्। अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधादिति वक्ष्यते । ब्रह्मवैवर्त्तवचने घटिका दण्डरूपा । परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येकवाक्यत्वात् ॥ * ॥ ये तु सूर्य्योदयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्यगुणफलविधिर्लाघवादित्याहुस्तच्चिन्त्यं । प्रकरणान्यत्वे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण प्रकरणभेदे गुणविधिसिद्धेः। अतएव कल्पतरुरत्नाकरयोः ।
"य इच्छेद्दिपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ" ॥
इति । विष्णुस्मृतौ । "यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः" । इति नित्यस्नानप्रकरणात् प्रकरणान्तरास्नानात् प्रकरणान्तराधिकरणन्यायेन काम्यस्नानान्तरमिदमप्युक्तं। न तु गुणफलविधिः। किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धिरिति ॥ * ॥ अत्र माघमासनिमित्तकमाघसप्तमीनिमित्तककाम्यस्नानयोः प्रातर्विधानात् नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानं । "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। तदङ्गस्याक्रियायान्तु नास्तिर्न च तत्क्रिया"। इति कात्यायनवचनात्।
"न स्नानमाचरेद्यस्तु कातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये" ॥
इति मनुवचनेनैकदाजस्रस्नाननिषेधात् ।
"धर्म्मविघ्नाचरेत् स्नानमाङ्गिकञ्च पुनः पुनः" ॥
इति मनुवचनाच्च । अतएव नान्दीमुखप्रकरणशेषे प्रधानानामपि काम्यानां तत्तद्देशकालविहितानां तत्रैवैव सिद्धिरिति आह्निकचिन्तामणिः ॥ निष्कामविष्णुप्रीतिकामयोः सुतरां सकृदनुष्ठानं। गुणतारतम्यात् फलतारतम्यं इति न्यायेन फलं बोध्यं । तच्च इक्षुक्षीरगुड़ादिमाधुर्य्यभेदवन्निर्द्देष्टुमशक्यं ।
"पञ्चान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत्" ॥
इति हेमाद्रिधृतादित्यपुराणोक्तवत् । एतद्वचनप्रागुक्तं कार्त्तिकमलमासाब्दविषयं ।
"देशकालाश्रमक्षेत्रद्रव्यदाढ्यमनोगुणाः ।
सकृच्छ्रस्यापि दानस्य फलातिशयहेतवः" ॥
इति ब्रह्मपुराणोक्तवच्च ॥ * ॥ तीर्थभेदे त्वेकदापि नानास्नानं ।
"विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः" ।
इति ब्रह्मपुराणादिवचनात् । "तीर्थभेदे तन्त्रप्रसङ्गयोरसम्भवाच्च" । अतएव गङ्गावाक्यावली-तीर्थचिन्तामण्योः । यत्तु प्रयागे व्यहस्नाने क्रोड़ीकृतेऽपि माघसप्तमीस्नानादावसाधारणसङ्कल्पेन पुनस्तत्रैव प्रातःस्नानाचरणं तदयुक्तं तदा सकृत्स्नानस्यैव विहितत्वात् । अन्यथा तत्तद्दृष्टफलकामनायां तदानन्त्यापत्तेरित्युक्तं ॥ * ॥ स्नाने परिपाटीमाह छन्दःकल्पलतायां विष्णुः । सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय।
"यद्दुष्कृतं सप्तसप्त मया सप्तसु जन्मसु ।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी" ॥
इत्युच्चार्य्य स्नायादितिशेषः । रोकं क्षिप्रं । तिथिक्रत्यस्य पौर्णमास्यन्तमासाङ्गत्वात् माकरीपदं मकरार्कारूढचान्द्रमासीयतिथिपरं ।
"तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दिशेत्" ॥
इति ब्रह्मपुराणान्मन्वन्तरादित्वेन तथा युक्तत्वाच्च । तथा मत्स्यपुराणे ।
"यस्मान्मन्वन्तरादौ तु रथमाप्तुर्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ॥
अरुणोदयवेलायां तस्यां स्नानं महाफलं" ।
अतएव नारसिंहे रथाख्यायामित्युक्तं । यथा,—
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ॥
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्ज्जयेत्" ।
द्वादश्यां श्रवणोत्यानद्वादश्यां । भरण्यां यमध्वजपातभरण्यामिति कल्पतरुः॥ अत्र महानवम्यादिसाहचर्य्याच्चान्द्रत्वं प्रतीयते । अतएव चतुर्दशमन्वन्तरादिगणने क्वापि न राश्युल्लेखः । यथा। भविष्यमत्स्ययोः ।
"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी ॥

श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः"।
अत्र अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः पुनः-पुनस्तथापदोपादानात्। उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च॥ अत्र कामधेनौ हृतीया चैव माघस्येति। कल्पतरौ तु हृतीया चैत्रमासस्येति लिखितं। अत्र पाठद्वैधे श्रीपतिरत्नमालायां। "अश्वयुजि शुक्लनवमी द्वादश्यूर्জ্জे मधौ हृतीया च"। इति पाठाच्चैत्रहृतीयैव ग्राह्या। श्रीदत्तोऽप्येवं। माघसप्तम्याश्चान्द्रत्वं सौरागमेऽपि।
"अर्कपत्रैः शवदरैर्दूर्व्वाक्षतसचन्दनैः।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये॥
माघेऽथ फाल्गुने वापि भवेद्दे माघसप्तमी।
माकरीति च यत्रोक्तं तत्रायोक्तिदर्शनात्"॥
अष्टाङ्गविधिना।
"योऽष्टाङ्गमर्घ्यमादाय भानोर्मूर्ध्नि निवेदयेत्।
ताम्रपात्रार्घ्यदानेन पुण्यं दशगुणं स्मृतं"॥
इति भविष्यपुराणीयेन। आदित्यपुराणे।
"ऋक्षराशिविशेषेण यत्कर्म विहितं नरैः।
दैवं वाप्यथवा पैत्र्यं तदन्यत्रापि दृश्यते"॥ *॥
अर्घ्यमन्त्रस्तु।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि! नमस्ते रविमण्डले"॥
प्रणाममन्त्रस्तु।
"सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे"॥
सप्तिरश्वः। इति तिथ्यादितत्त्वं॥

अरणीपलः, पुं, (अरण्याः उपलः, कर्म्मधारयः।) रक्तवर्णमणिविशेषः। चुनी इति भाषा। तत्पर्य्यायः। पद्मरागः २ लोहितकः ३ लक्ष्मीपुष्पः ४। इति हेमचन्द्रः॥

अरन्तुदः, त्रि, (अरूंषि मर्म्माणि तुदति, तुद्+खश्+मुम् च।) मर्म्मपीड़कः। तत्पर्य्यायः। मर्म्मस्पृक् २। इत्यमरः॥ (परुषः। कठोरः। श्रवणकटुः। "माकन्दं मकरन्दतुन्दिलममुं गाढ़स्व काकः स्वयं कर्कारुन्तुदमन्तरेण रचितं त्वां मन्महे कोकिलं"। इति भामिनीविलासे। मर्म्मपीड़ाकरः। हृदयग्रन्थिरूपमर्म्मस्थानस्पर्शकारी। यथा,
"नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः"।
इति मनुः।
"तीक्ष्णा नारुन्तुदा बुद्धिः कर्म्म ग्रान्तं प्रतापवत्"।
इति माघः।
"अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः"।
इति रघुवंशे।)

अरुन्धती, स्त्री, (न रुन्धती।) वशिष्ठपत्नी। तत्पर्य्यायः। अक्षमाला २। इति हेमचन्द्रः॥ सा कर्दममुनिकन्या महासाध्वी। इति श्रीभागवतं॥ आकाशे सप्तर्षिमध्ये वशिष्ठसन्निधौ तस्या उदयः। गतायुषस्तां न पश्यन्ति। (यदुक्तं,—
"दीपनिर्व्वाणगन्धञ्च सुहृदाक्यमरुन्धतीं।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः"॥
यथा च सुश्रुते,—
"न पश्यति स नक्षत्रं यश्च देवीमरुन्धतीं।
ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषं"॥)
सप्तपदीगमनानन्तरं जामाता मन्त्रं पाठयन् वधूं तां दर्शयति च॥

अरुन्धतीजानिः, पुं, (अरुन्धती जाया यस्य सः, निड्।) वशिष्ठमुनिः। इति हेमचन्द्रः॥

अरुन्धतीनाथः, पुं, (अरुन्धत्या नाथः, षष्ठीतत्पुरुषः।) वशिष्ठमुनिः। इति त्रिकाण्डशेषः॥

अरुष्कः, पुं, (अरुर्म्मर्म्मस्थानं कायति पीड़यति, कै+क।) भल्लातकवृक्षः इति शब्दरत्नावली॥

अरुष्करं, क्ली, (अरुः करोति अरुः+कृ+ट, उपपदसमासः यत्वं।) भल्लातकफलं। इति हेमचन्द्र॥

अरुष्करः, पुं, (अरुः करोति, अरुः+कृ+ट, यत्वं उपपदसमासः।) भल्लातकवृक्षः। इति शब्दरत्नावली॥

अरुष्करः, त्रि, (अरुः करोति, अरुः+कृ+ट, यत्वं, उपपदसमासः।) व्रणकरः। क्षतकारकः। इति मेदिनी॥

अरुष्का, स्त्री, (रोहति, रुह+क, नञ्समासः।) भूधात्री। इति राजनिर्घण्टः॥ भूमि आमला इति ख्याता।

अरूपः, त्रि, (नास्ति रूपमस्य।) रूपशून्यः। यथा। "अरूपवातातीसारादाविवारुष्यं"। इति रुचितः॥ कुत्सितरूपः।
("इमामरूपामसतीं भक्षयिष्यामि मानुषीम्"। इति रामायणे।)

अरूषः, पुं, (ऋ+ऊषन्।) सर्पविशेषः। इत्युणादिकोषः॥ सूर्य्यः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

अरे, व्य, (ऋ+ए।) नीचसम्बोधनं। इति हेमचन्द्रः॥ ओरे इति भाषा। अपाक्षतिः। असूया। इति मेदिनी॥ (रोषाङ्काने। अपक्षतौ। "अरे चेतोमीन! भ्रमयामधना यौवनजले त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम्"। इति शान्तिशतके। "अरे अनुद्भन्! निरपराधराजकुलकदन महापातकिन् अग्निष्टविद्वतचेष्ट!" इति महावीरचरिते।)

अरेरे, व्य, (अरे+वीप्सायां द्विरुक्तिः।) अधमसम्बोधनं। इति जटाधरः॥ सक्रोधाह्वानं। इति शब्दमाला॥

अरोकः, त्रि, (रुच्+घञ्, नञ्समासः।) निष्प्रभः। दीप्तिरहितः। इत्यमरः॥ रोकश्छिद्रन्तद्रहितश्च॥

अरोचकः, पुं, (न रोचयति प्रीणयति, रुच्+णिच्+ण्वुल्, नञ्समासः।) रोगविशेषः। अरुचिरोग इति भाषा। तस्य निदानरूपे।
"वातादिभिः शोकभयातिलोभ-
क्रोधैर्मनोघ्राणरसग्रगन्धैः।
अरोचकाः स्युः परिगृह्यदन्तः
कषायवक्त्रोऽस्य मतोऽनिलेन॥
कटुरसमुखं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं।
माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
विबद्धरम्नन्ध्युतं कफेन"॥ इति माधवकरः॥
अरोचकाः न भोजने रुचिमुत्पादयन्तीत्यरोचकाः व्याधयः यच्च वातजादिभेदैः॥ *॥ वातिकस्य लक्षणमाह। परिगृह्यदन्तः अक्षमचर्व्वणेन परिगृह्यो दन्तो यत्र सः। तथा कषायवक्त्रः। कषायरसं वक्त्रं यत्र सः॥ *॥ पैत्तिकमाह।
"कटुरसमुखं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं"।
कटुरसमित्यादिना विद्यादित्यन्तेन पैत्तिकस्य लक्षणं॥ *॥ श्लैष्मिकमाह। लवणञ्च वक्त्रं कफजलक्षणेन पठनीयः। यतो विदग्धः श्लेष्मा लवणभावमुपैति।
"माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
स्निग्धत्वदौर्गन्ध्ययुतं कफेन"।
पैच्छिल्यं मुखस्याभ्यन्तरे। स्निग्धत्वं बहिः॥ *॥ आगन्तुजमाह।
"अरोचके शोकभयातिलोभात्
क्रोधाद्धृद्यास्युचिरग्नजे स्यात्।
स्वाभाविकं चास्यमयारुचिश्च
त्रिदोषजे नैकरसम्भवेच्च"॥
क्रोधादित्यादिशब्देनाद्ध्यरोरशनरूपयोर्ग्रहणं। स्वाभाविकं। अविज्ञातरसं॥ *॥ त्रिदोषजमाह। नैकरसं अनेकरसमिश्रं स्यात्। वातजादिभेदेन मुखे विज्ञातिमभिधायान्यदेशे विज्ञातिमाह।
"हृच्छूलपीड़नयुतं पवनेन पित्तात्
तृड्दाहचोषबहुलं सकफप्रसेकं।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च"॥
हृच्छूलपीड़नयुतं हृदि शूलेन पीड़नं तेन युतं। चोषः पार्श्वस्थिताग्निनेव सन्तापः। बहुभिस्त्रिभिर्दोषैः। बहुरुजं उत्कटवातादिरोगयुक्तं। वैगुण्यं मनसो व्याकुलत्वं। जड़ता शून्याङ्गता। अपरं आगन्तुजं। भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्यामरोचकत्वेनैव संगृहीतौ॥ *॥ तद्भोजनत्वेषां लक्षणानि एथगाह।
"प्रक्षिप्यन्तु मुखे चान्नं यत्र नास्वादते नरः।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु"॥
आस्वादते अन्नस्य मिष्टतां न प्राप्नोति। तदन्नं मिष्टं न लगति इति यावत्।
"चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं।
द्वेषमायाति योजन्तुर्भक्तद्वेषः स उच्यते॥
कुपितस्य भयार्त्तस्य तथा भक्तनिरोधतः।
यत्र नाम्ने भवेच्छुद्धः सोऽभक्तच्छन्द उच्यते"॥ *॥
अथारोचकस्य चिकित्सा।
"भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनं॥ १॥
शृङ्गवेररसश्चापि मधुना सह योजयेत्।
अरुचिश्वासकासघ्नं प्रतिश्यायकफापहं॥ २॥
पञ्चाम्लिका सिता शीतवारिणा वस्त्रगालिता।

एलालवङ्गकर्पूरमरिचैरवधूलितं ।
पानकस्यास्य गण्डूषं धारयित्वा मुखे मुहुः ।
अरुचिं नाशयत्येव पित्तं प्रशमयेत्तथा" ।
अस्रिकापानं । ३ ।
"राजिका जीरको भृष्टो भृष्टं हिङ्गु सनागरं ।
सैन्धवं दधि गोः सर्व्वं वस्त्रपूतं प्रकल्पयेत् ।
तावन्मात्रं क्षिपेत्तत्र यथा स्यादुचितत्तमा ।
तक्रमेतद्भवेत् सद्यो रोचनं वह्निवर्द्धनं" ।
तक्रं । ४ ।
"गव्यमावर्त्तितं दुग्धं निबद्धं दधि माहिषं ।
एकीकृत्य पटे पूतं शुभ्रशर्करया समं ।
एलालवङ्गकर्पूरमरिचैश्च समन्वितं ।
नाम्ना श्रिखरिणी कुर्य्यात् रुचिं सकलवल्लभा ।
श्रिखरिणी ।५।
दे पले दाड़िमादल्यौ खण्डाद्धोर्मपलत्रयं ।
त्रिसुगन्धिपलद्वैकं चूर्णमेकत्र कारयेत् ।
तच्चूर्णं माक्षया भुक्तमरोचकहरं परं ।
दीपनं पाचनञ्च स्यात् पीनसज्वरकासजित्" ।
दाड़िमादिचूर्णं । ६ ।
"लवङ्गकक्कोलमुशीरचन्दनं
नतं सनीलोत्पलखण्डजीरकं ।
जलं सखण्डागुरुभङ्गकेसरं
कथा सविश्वा नलदं सहैलया ।
तुषारजातीफलवंशरोचना-
सिताभ्रभागाः सकलं विचूर्णितं ।
सुशोचनं तर्पणमग्निदीपनं
बलप्रदं दृष्यतमन्त्रिदोषजित् ।
उरोविबन्धं तमकं गलग्रहं
सकासहिक्कारुचियक्ष्मपीनसं ।
ग्रहण्यतीसारमुरुक्तं हृयां
तथा प्रमेहान्निखिलान्निहन्ति हि" ।
कक्कोलं फलं सुगन्धविशेषः । नतं तगरं । जलं बालकं । भृङ्गं त्वक् । नलदमुशीरं । तुषारः कर्पूरः ।
लवङ्गादिचूर्णं । ७ । इत्यरोचकाधिकारः । इति भावप्रकाशः ।
("यवागूः पञ्चकोलस्य कुलत्थाढ्यरसयुक्तं ।
मुद्गयूषेण वा सम्यक् भक्तानां भोजनं हितं ।
सहिङ्गुव्योषलवणं श्लक्ष्णं संप्रश्नस्यते ।
अग्नितप्ततवत् श्रेष्ठं भोजनारोचकेष्वपि ।
कारवेल्लं पटोलञ्च पलाण्डुः सुरसं शठी ।
लवणं धान्यकं श्रेष्ठं प्रवेहश्च कटुचिकं ।
शठीसर्षपवास्तूकं घृतपुष्पा यमानिका ।
तुम्बीरकस्य मूलानां शाकं श्रेष्ठं प्रशस्यते ।
गोधूमपुलिका श्रेष्ठा भृङ्गाङ्गारैररोचके ।
जाङ्गलानि च मांसानि भोजयेद्विधगुप्तमः" ।
इति हारीतोक्तपथ्यादिनियमः । ० ॥
"अरुचौ कवलो ग्राह्यो धूमाः समुखधावनाः ।
मनोज्ञमन्नपानञ्च हर्षणाश्वासनानि च ।
कुलत्थसौवर्चलाजाजी शर्करामरिचं विड़ं ।
धान्येलापद्मकोशीरपिप्पल्युत्पलचन्दनं ॥
लोध्रं तेजोवती पथ्या, चूर्णं सर्वमथाजयेत् ।
दाड़िमनिर्य्यासाश्वाजी शर्करायुतः ।
सतैलमाक्षिकाक्षेते चत्वारः कवलग्रहाः ।
चतुरोऽरोचकान् हन्युर्व्वाताद्येकजसर्व्वजान् ।
कारवी मरिचाजाजी माक्षाहृल्लासदाड़िमं ।
सौवर्चलं गुड़ं क्षौद्रं सर्व्वारोचकनाशनं ॥
वस्तिः समीरणे पित्ते विरेकं वमनं कफे ।
कुर्य्यादुपानुकूलानि हर्षणञ्च मनोज्ञजे" ।
इति चरकोक्तास्यचिकित्सा । सन्निपातजन्यां चिकित्सामाह ॥ * ॥ सुश्रुतः ।
"दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,
भक्ताप्रनेषु हृदि चापतते प्रगाढ़ं ।
गान्नेऽरुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह षड्विधं वदन्ति ॥
हृल्लासपीड़नयुतं विरसाननत्वं,
वातात्मके भवति शिङ्गरोचके तु ।
हृद्दाहधोषबहुता मुखतिक्तता च,
मूर्च्छा सदृड् भवति पित्तकृते तथैव ॥
कण्ठगुरुत्वकफसंस्रवसादतन्द्राः,
श्लेष्मात्मके मधुरमास्यमरोचके तु ।
सर्व्वात्मके पवनपित्तकफा वहन्ति,
रूपाण्यतास्य हृदये समुदीरयन्ति ॥
संरागशोकभयविप्लुतचेतसस्तु,
चिन्ताकृतो भवति सोऽप्युचिदर्शनाच्च" ॥*॥
चिकित्सा यथा,—
"वाते वचाम्बु वमनं कृतवान् पिबेच्च,
खेहैः सुराभिरथवोष्णजलेन चूर्णं ।
कृष्णाविड़ङ्गयवभस्महरेणुभार्गी,
राखैलहिङ्गुलवणोत्तमनागराणां ॥
पित्ते गुड़ाम्बुमधुरैर्वमनं प्रशस्तं,
स्नेहः ससैन्धवसितामधुसर्पिरिक्तः ।
निम्बाम्बुवासितवतः कफजेऽनुपानं,
राजद्रुमाम्बुमधुना तु सदीप्यकं स्यात् ॥
चूर्णं यदुक्तमथवानिलजे तदेव,
सर्व्वेषु सर्व्वकृतमेवमुपक्रमेत ॥
लाक्षापटोलविड़वेतसकारवीरनिम्ब-
मूर्व्वाभयात्रवदरामलकेन्द्रवृक्षैः ।
बीजैः करञ्जवृहतीसहितैश्च पिष्टै-
स्तैलं पचेत् सुरभिमूत्रयुतं यथावत् ॥
मुस्तां वचां चिकटुकं रजनीद्वयञ्च,
भार्गीञ्च कुष्ठमथ निर्दहनीञ्च पिष्ट्वा ।
मूत्रेऽविजे हिरदमूत्रयुते पचेद्वा,
पाठान्तगामतिविषां रजनीञ्च मुख्यां ॥
मण्डूकिमर्कमसतान्च सलाङ्गलाख्यां,
मूत्रे पचेत्तु महिषस्य विधानविद्वा ।
एतान्न सन्ति चतुरो लिहतस्तु लेहान्,
गुल्मारुचिश्वसनकण्ठहृदामयाञ्च ॥
साम्यान् खदेद्गरचितान् विविधांश्च भक्ष्यान्,
पानानि मूलफलसाड़वरागयोगान् ।
अन्नादसांश्च विविधान् विविधैः प्रकारै-
र्भुञ्जीत वापि लघुरुद्गमनःसुखानि ॥
आस्थापनं विधिवदत्र विरेचनञ्च,
कुर्य्यान्मृदूनि शिरसश्च विरेचनानि ।
क्षीणक्षतानि रजनीत्रिफलायुतानि,
चूर्णीकृतानि यवशूकविमिश्रितानि ॥
क्षुद्रायुतानि वितरेन्मुखधावनार्थ-
मन्यानि तिक्तकटुकानि च भेषजानि ।
मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः,
क्षौद्रैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥
मूत्रासवैर्गुड़कृतैश्च तथाऽरिष्टैः,
क्षारासवैश्च मधुमाधवतुल्यगन्धैः ।
स्यादेषरुग् कफवातहृते विधिश्च,
शान्तिं गते ऊतभुजि प्रशमाय तस्य ।
इच्छाभिघातभयशोकहृतेऽन्तरात्मा,
भावान् भवाय वितरेत् खलु शुक्यरूपान् ।
अर्थेषु चाप्यचितेषु पुनर्भवाय,
पौराणिकैः श्रुतिपथैरनुमानयेत्तं ॥
दैन्यं गते मनसि बोधनमत्र शस्तं,
यद्यत् प्रियं तदुपसेव्यमरोचके तु ॥*॥
रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन भावयेत् ।
जम्बीरस्य रसैर्वापि आर्द्रकस्य रसेन वा ॥
मातुलुङ्गस्य तोयेन तस्य मञ्जरसैर्बुधः ।
पञ्चादिश्लोक्य सर्व्वांस्तान् टङ्कणक्षारवारयेत् ।
देवपुष्पं वाणमितं रसपादं मृतामृतं ।
मासमात्रञ्च तत् सर्व्वं नागरेण गुड़ेन वा ॥
सर्व्वारोचकशूलार्त्तिमामवातं सुदारुणं ।
सोऽयं निवारयत्याशु केशरी करिणं यथा" ॥
सुधानिधिरसः ॥ ०॥ इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अर्क, क, तापे। (चुरादि उभयपदी सेट् ।) स्तुतौ । इति कविकल्पद्रुमः ॥ एककारः प्रकृतिः पश्चाद्रेफनिमित्तकदित्वं विभाषया वक्तव्यं। तेन क अर्कयति अर्क्कयति एवं सर्व्वत्र। इति दुर्गादासः॥

अर्कः, पुं, (अर्च + कर्म्मणि घञ्, कुत्वम् ।) सूर्य्यः । इन्द्रः । ताम्रं । स्फटिकः । इति मेदिनी ॥ पण्डितः । इति शब्दरत्नावली ॥ ज्येष्ठभ्राता । इति दण्डादिगणः ॥ लक्षणया रविवारः । इति ज्योतिषं ॥ हस्तविशेषः । आकन्द इति भाषा । तत्पर्य्यायः । क्षीरदलः २ पुष्पी ३ प्रतापः ४ क्षीरकाण्डकः ५ विक्षीरः ६ क्षीरी ७ खर्ज्जुरः ८ प्रीतपुष्पकः ९ जम्बनः १० क्षीरपर्णी ११ विकीरणः १२ सदापुष्पः १३ सूर्य्याङ्कः १४ आस्फोतकः १५ तूलफलः १६ शुक्रफलः १७। इति राजनिर्घण्टः ॥ वसुकः १८ आस्फोतः १९ गणरूपः २० मन्दारः २१ अर्कपर्णः २२। इत्यमरः ॥ * ॥ अथ श्वेतार्कपर्य्यायः । अलर्कः १ राजार्कः २ प्रतापसः ३ गणरूपी ४ ॥ * ॥ अथ रक्तार्कपर्य्यायः । विश्वोरः १ सदापुष्पी २ रूपिका ३, आदित्यपुष्पिका ४ दिव्यपुष्पिका ५ अर्कः ६ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वं । उष्णत्वं । अग्निकारित्वं । वातश्लेष्मव्रणार्शःकुष्ठक्रिमिनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफदोषनाशित्वं । तीक्ष्णत्वञ्च । अस्य क्षीरगुणाः । क्रिमिदोषव्रणनाशित्वं । कुष्ठार्शउदररोगेषु हितकारित्वञ्च । इति राजवल्लभः ॥ तस्य पर्य्यायगुणाः ।
"श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।

श्वेतपुष्पः सदापुष्पः स बालार्कः प्रतापसः ॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ।
रक्तपुष्पः शुक्लफलस्तथास्फोतः प्रकीर्त्तितः ॥
अर्कदयं सरं वातकुष्ठकण्डूविषव्रणान् ।
निहन्ति क्षीहगुल्मार्शःश्लेष्मोदरयकृत्प्लीहान् ॥
शुक्लार्ककुसुमं हृद्यं लघु दीपनपाचनं ।
अरोचकप्रसेकार्शःकासश्वासनिवारणं ॥
रक्तार्कपुष्पं मधुरं सतिक्तं
कुष्ठकृमिघ्नं कफनाशनञ्च ।
अर्शो विषं हन्ति च रक्तपित्तं
संग्राहि गुल्मे श्वयथौ हितं तत् ॥
क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनं" ॥
इति भावप्रकाशः ॥ * ॥ निर्यासविशेषः । आरक इति आरबीभाषा । तस्य विधिर्यथा,—
"द्रव्यकल्पः पञ्चधा स्यात् कल्कचूर्णं रसस्तथा ।
तैलमर्कः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये ॥
पृथक् द्वन्द्वे सन्निपाते सङ्करेऽसाध्यरोगिणि ।
क्रमादेते प्रयोक्तव्या अन्यथा तु विनाशकाः ॥
आद्ये गुणा गुणाः सर्व्वे द्वितीयञ्च ततो लघु ।
तृतीयं क्षीप्रकारि स्यात् चतुर्थं नातिदोषजित् ॥
पञ्चमं दोषरहितं गुणसंघप्रकाशकं ।
पञ्चमस्य तु सामर्थ्यं स्वयं पञ्चाननोऽब्रवीत् ।
वर्षाणान्तु सहस्राणि कथ्यतेऽहर्निशं मया ।
सम्पूर्णो नैव जायेत कल्पोऽर्कस्य दशानन ॥ * ॥
पुंवारे पुरुषर्क्षे च दिवार्को यस्तु निर्म्मितः ॥
रमणीषु प्रदातव्यो विलोमात् पुंसु योजयेत् ॥
लोहचूर्णं गैरिकञ्च खटिका भस्मम्रत्तिका ।
म्रत्तिकास्थिभवं चूर्णं काचं कीकसजं रजः ॥
एतानि समभागानि सर्व्वतुल्या च म्रत्तिका ।
भंग्नजोया पञ्चमूलैः खरास्थमहिषोद्भवैः ॥
गजाजसम्भवाभ्याञ्च घृटितं तद्विशोषयेत् ।
यथा गन्धविनाशः स्यात् तथा संमर्दयेत्ततः ॥
लघुहस्तः कुलालोऽस्य कुर्य्यादुदन्तं सुनिर्म्मलं ।
यथेष्टां स्थालिकां कुर्य्यात् चक्रुलप्रान्तसारिकां ॥
पृथुबुध्नोदराकारां ह्रस्वकुलोत्सेधवेष्टनीं ।
सारिकान्ते तु परिधिं चक्रुलोत्सेधशोभितां ॥
विनिर्माय्याथ सार्य्यन्ते यथा श्लिष्यविनिर्म्मितां ।
छिद्रं कृत्वा नलं दद्याद्गजशुण्डसमं बुधः ॥
सारिकापरिधेरन्तस्तस्य कुर्य्यात् पिधानकं ।
अर्द्धनिम्बफलसमं परिधिं तस्य चान्ततः ॥
वेदाङ्गुलं मस्तकोर्द्धं कार्य्यं तोयस्य धारणे ।
समर्थां तत्र नलिकां कुर्य्यात्तोयविमोचनीं ॥
तस्यैवान्तरतो लेप्या जीर्णास्थ्ना म्रत्तिकाम्बुना ।
अथवा श्वेतकाचं तु सर्व्वदोषापनुत्तये ॥ * ॥
अथ वक्ष्ये तु जीर्णास्थिम्रत्तिकाकरणे प्रिये ।
श्लिष्टाजतुल्ये कुर्य्यात् दीर्घगर्त्ते मनोहरं ॥
निक्षिपेत्तत्र नानास्थिसञ्चयं द्विचतुष्पदां ।
सर्जिक्षारं महाक्षारं मृत्क्षारं लवणानि च ॥
गन्धकोष्णजलं क्षेप्यं नानामूत्राणि तत्र वै ।
एवं कृत्वा मासषट्कं दद्यात् पाषाणम्रत्तिकां ॥
कङ्कास्थ्नाऽर्द्धं तदूर्द्धन्तु कुर्य्यादक्षीष्टिकां शुभां ।

त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृश्यसमं ॥
ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्म्मापेत् ।
प्रशस्तं भोजनं तत्र सूपयेदम्लदूषणं ॥
महाविषस्य संयोगात्तस्य भङ्गः प्रजायते ।
सूचीविषादिसंयोगात् यत्र स्फोटा भवन्ति च ॥
तत्र क्षिप्तं क्षुद्रविषं पात्रं क्षणं प्रजायते ।
एवं ज्ञात्वा तत्र दद्यान्न कदाचिद्विषादिकं ॥
विषादीनामर्कसिद्धौ कुर्य्यात् पात्रन्तु लोहजं ।
स्वर्णजं रौप्यजं वापि कुर्य्यात् पात्रमकल्मषं ॥
अथवा ताम्रजं कुर्य्यादन्तर्व्वङ्गविलेपितं ।
पात्रन्तु बुद्धा कुर्व्वीत कषायो न भवेद्रसः ॥
द्रव्यान्तरस्य संयोगादर्कं तैलञ्च गर्भतः ।
सर्व्वेषां निःसरत्येव पाषाणस्यापि किं पुनः ॥
अनयार्कस्तथा तैलं गन्धतालादिसम्भवं ।
वेधकं सर्व्वधातूनां देहस्यापि च सिद्धिदं ॥
यस्तैलकरणे दक्षस्तार्कनिःसरणे क्षमः ।
तत्तत्सेवाकरो नित्यं स रोगैर्नैव बाध्यते ॥ * ॥
कुत्सितार्कस्तु यामेन द्वियामाभ्यन्तु मध्यमः ।
त्रिभिर्यामैर्भवेच्छ्रेष्ठः स एवार्कस्तु सिद्धिदः ॥
द्रव्यादधिकसौगन्ध्यं यस्मिन्नर्के प्रदृश्यते ।
जीर्णास्थिपात्रसङ्क्लिष्टो द्रव्यवर्णः प्रदृश्यते ॥
शङ्खकुन्देन्दुधवलोऽन्यथा पात्रान्तरे स्थितः ।
जिह्वोपरिगतः स्वादं दद्याद्द्रव्यभवन्तु यः ॥
तमेवार्कं विजानीयादन्यज्ज्ञेयं रसादिवत् ।
कृत्वा सुगन्धं दुर्गन्धमर्कं पुण्यादिभिः सुधीः ॥
गुणार्थं पश्चात् सेवेत क्वान्यथापगुणो भवेत् ।
दुर्गन्धं भक्षयेदर्कं यदि मोहात् कथञ्चन ॥
तदास्य जायते ग्लानिर्व्वान्तिरालस्यकं तृषा ।
तद्दोषस्य विनाशाय कुर्य्याद्वान्तिमतन्द्रितः ॥
द्वीपोदुम्बरपुष्पानां पिबेदर्कफलं जनः ।
चन्द्रेल्यर्कफलं वापि पीतार्त्तो मालतीभवं ॥ * ॥
अर्कनिष्काशनार्थाय क्रमाज्ज्ञेयाः षड्भयः ।
धूमाग्निश्चैव दीपाग्निर्मन्दाग्निर्मध्यमस्तथा ॥
खराग्निश्च भड़ाग्निश्च तेषां वक्ष्यामि लक्षणं ।
विज्वालो यो धूमाग्निर्धूमाग्निः स उदाहृतः ॥
ससारमतिशुष्कं यत् सुस्थिमध्ये समेष्यति ।
तत्खाखं काष्ठमित्याऽहुः खदिरादिसमुद्भवं ॥
द्वाभ्यां तस्य चतुर्थाभ्यां योऽग्निर्दीप्ताग्निरुच्यते ।
चतुरंशेन तनैव मन्दाग्निः परिकीर्त्तितः ॥
अर्द्धीकृताभ्यां द्वाभ्यान्तु मध्यमाग्निरुदाहृतः ।
अर्द्धैस्तैः पञ्चभिः प्रोक्तः खराग्निः सर्व्वकर्म्मसु ॥
मस्तकावधिपात्रस्य चतुर्दिक्षु क्रमेण च ।
प्रसरन्ति यदा ज्वालाः स भडाग्निरुदीरितः ॥
सार्द्धयामञ्च यामञ्च याममेकं मुहूर्त्तकं ।
मुहूर्त्तमात्रमित्येवमर्कार्थं वङ्गयः स्मृताः ॥ * ॥
जीर्णास्थिपात्रे यक्षीयादर्कं वा काचसम्भवे ।
पाषाणसम्भवे पात्रे कांस्यजेऽथ हिमस्थले ॥
पिबेदर्कमनिर्व्वापं पीत्वा ताम्बूलभक्षणं ।
कुर्य्यादनुक्तताम्बूले लवङ्गं भक्षयेत्ततः ॥
मर्दनादिषु सर्व्वत्र द्रव्यतैलं प्रयोजयेत् ।
अर्कं एव प्रयोक्तव्यो भक्षणे न तु मर्दने ॥
ये ये द्रव्यगुणाः प्रोक्ताः सर्व्वे तेऽर्कसमाश्रिताः ।

सेवेतार्कं प्रिये तस्मादाजा परमधार्म्मिकः ॥
स्वस्थेऽपि वा रोगिणे वा याचतेऽर्कन्तु येन वा ।
ज्ञात्वा तल्लक्षणं दद्यादन्यथा ब्रह्महा भवेत् ॥ * ॥
वर्णस्वराणां प्रमितिं दूतोक्तस्य तु कारयेत् ।
शुकैर्युक्ता विगुणिता त्रिभिर्भागं समाहरेत् ॥
एकशेषे गुणाः शीघ्रं द्विशेषे वर्द्धते गदः ।
त्रिशेषे मरणं वाच्यं स्वार्थं वाचयते यदि ॥
अर्कं तदैतत् विज्ञाय दद्यादर्कं न चान्यथा ।
गदिना तु यदा दूतः प्रेषितश्चेदिचार्य्यते ॥
नपुंसकान्त्यैरूक्तास्तु स्वरा एकादश प्रिये ।
वर्णास्तत्सङ्ख्यका लेख्याः कठवाद्याश्च तत्तले ॥
एकादशसु कोष्ठेषु क्रमादङ्कान् प्रविन्यसेत् ।
रसाक्षयो दृगं वेदाः पर्व्वता ऋतवः क्षताः ॥
वङ्गयः पृथिवी शून्यं चन्द्रमा इति च क्रमात् ।
विहाय जीवं दूतस्य नामाङ्कांश्चयोजनं ॥
एवमेवातुरे कृत्वा द्वयोरप्यावशेषितं ।
कृत्वाङ्कयोगं गदिनोऽधिके शेषे शुभं भवेत् ॥
समशेषे दीर्घरोगः न्यूनशेषे च तन्मृतिः ।
एतद्विचार्य्य दातव्यमन्यदप्यौषधं बुधैः ॥
चक्रद्वयन्तु योज्ञात्वा दद्यादर्कं विमोहितः ।
जायते क्षयग्रस्तस्य यथा मम मते सति" ॥
इति श्रीलक्ष्मणाधक्षतार्कचिकित्सायां यन्त्रविधिघृतकं प्रथमं ॥ * ॥
"अथातः संप्रवक्ष्यामि निर्गमोऽर्कस्य भामिनि ।
पञ्चप्रकारद्रव्यस्य कुर्य्यान्निष्काशनं भिषक् ॥
अत्यन्तकठिनं चाद्यं कठिनञ्च द्वितीयकं ।
आर्द्रं तृतीयमुद्दिष्टं चतुर्थं वुल्लं भवेत् ॥
पञ्चमञ्च द्रवद्रव्यं तेषां विधिरथोच्यते ॥ * ॥
रसवच्चूर्णयेत् द्रव्यमत्यन्तकठिनन्तु यत् ॥
द्विगुणे निःक्षिपेत्तोये क्वाथयां स्थापयेच्च तत् ।
यावच्छुष्कं भवेत्तोयं द्रव्यञ्च श्लथिलं यथा ॥
ततः पुनः क्षिपेत्तोयं पूर्व्वद्रव्यसमं भिषक् ।
कृत्वाऽष्टप्रहरं तत्तु सूर्य्यचन्द्रकरैरलं ॥
संपूज्य गणपतिं सूर्य्यं भैरवं कुलदेवतां ।
निःक्षिपेदर्कयन्त्रे तत् क्षिप्त्वास्यार्कं समाहरेत् ॥
वर्षाधिकन्तु यत् द्रव्यमत्यन्तकठिनन्तु तत् ।
चन्दनादीनि सर्व्वाणि अत्यन्तकठिनानि च ॥
कोटैर्भुक्तं घुणैर्युक्तं यच्च गन्धविवर्ज्जितं ।
रहितं खरसेनापि नार्ककर्म्मणि योजयेत् ॥
यथार्कसंस्थितं द्रव्यं कुर्य्याद्भोक्तुस्तथा वपुः ।
अर्के तरुणभैषज्यं तस्मात् संयोजयेत् प्रिये ॥ * ॥
यवान्यजाजीत्रिकटुभूनिम्बादिकमौषधं ।
ज्ञेयं तत् कठिनं द्रव्यं तदर्कस्य विधिं शृणु ॥
द्विगुणं निःक्षिपेत्तोयं द्रव्ये तु कठिने मते ।
अष्टप्रहरिकं तच्च कुर्य्यात् पर्य्यायमेककं ॥
रक्षेत् द्रव्यं द्विगुणितं दृष्ट्वा देशे तु कौतुकं ।
पश्चात् दत्त्वार्कयन्त्रे तत् अर्कनिष्काशयेच्छनैः ॥ * ॥
आर्द्रद्रव्यं द्विधाप्रोक्तं सरसं नीरसं तथा ।
सदुग्धं गुग्गरसकं द्विधा नीरसमुच्यते ॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकं ।
धत्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते ॥
एषां गालान् चूर्णयित्वा विंशांशं निःक्षिपेच्छनैः ।

मुहूर्त्तमुष्णे संस्थाप्य ग्राह्योऽर्को विबुधोत्तमैः ॥
पचाग्रान्तु घृतांशेन तुल्यतोयेन सेचयेत् ।
दद्यात् घटीमर्ककरां ततोऽर्कं कलयेच्छनैः ॥
वटाश्वत्थकरीराद्यमार्द्रद्रव्यन्तु गौरसं ।
विंशांशं निःक्षिपेत्तोयं जलं धर्म्मे च धारयेत् ॥
ततो निष्काग्रयेदर्कं क्रमवृद्ध्याग्निगोक्षवत् ।
सदुग्धन्तु दिधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात् ॥
सातलावचसेऽडसौरिण्याद्यास्तु तीक्ष्णकाः ।
खण्डानि तेषां क्षालाय निःक्षिपेत् पुष्कले जले ॥
दिनत्रयञ्च निष्काग्र्य तोयादीषच्च कुट्टयेत् ।
तदा न दृश्यते दुग्धं दद्यात्तोयं रदांशकं ॥
निष्काग्रयेच्छनैरर्कं स तु तीक्ष्णार्कसंज्ञकः ।
दुग्धिकार्कक्षीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः ॥
जले चतुर्गुणे दद्यात्तान् धर्म्मे विनिवेशयेत् ।
यावज्जलस्योष्णता स्यात् ततो यन्त्रे विनिःक्षिपेत् ॥
आदावीषच्चूर्णयित्वा षष्ठांशजलसंयुतं ।
एवं द्रव्यं लक्षयित्वा स्वयुक्त्यार्कं विनिर्हरेत् ॥
खण्डीकृत्य च आमानां फलानां मृदुकायिनां ।
सरसानाञ्च यष्टीयादर्कं तोयेन वर्ज्जितं ॥ * ॥
काष्ठेऽम्बरिकादीनां आमानां दार्ढ्यभागिनां ।
क्षुत्वा खल्पानि खण्डानि अष्टीत्वंशं प्रदापयेत् ॥
पृथक् पृथक् च तुवरीं सर्जिक्षारञ्च सैन्धवं ।
दत्त्वा विमर्दयेत् सर्व्वं चतारिंशांशकं जलं ॥
क्षिप्त्वा तत्कलसं धर्म्मे यामार्द्धेनोष्णता भवेत् ।
ततो यन्त्रे तु तद्दत्त्वा यष्टीयादर्कमुत्तमं ॥
क्षतिपक्वफलानान्तु वीर्य्यतस्तार्कमाहरेत् ।
पुष्यार्कार्थं षोड्शांशं जलं पुष्येषु दापयेत् ॥
वडवारफलादीनि चिल्लिकादीनि यानि च ।
क्षेप्याण्युक्तोदके तानि वुक्कुलत्वस्य शान्तये ॥
ततश्चत्वारिंशदंशं जलं दत्त्वा समाहरेत् ।
तेषामर्कमथ द्रावद्रव्यार्कोपाय उच्यते ॥
द्रवद्रव्योत्क्षेपणान्ये प्रोच्यते वापकल्पना ॥ * ॥
पिधानानि विचित्राणि तेषामन्तो न विद्यते ॥
घृतपत्रप्रसूनैर्व्वा जात्यत्यैर्मालतीभवैः ।
गुलाबपारिजातैश्च केतकीजैः समाचरेत् ॥
दुग्धे दधि रसे तक्रे क्षौद्रे तैले च सर्पिषि ।
मूत्रादौ देहतोये च चम्पेल्यादिपिधानकं ॥ * ॥
कान्तपाषाणसत्वस्य क्षतं यन्त्रमनुत्तमं ।
निष्काग्रयेत् सर्व्वार्कं द्रवद्रव्यस्य नान्यथा ॥
अथवा स्तम्भकं द्रव्यं दध्नस्तु नवनीतकं ।
वर्षदक्षौद्रजलस्योक्ता मधूच्छिष्टन्तु सर्पिषः ॥
गोकण्ठकन्तु दुग्धस्य तथा मद्यस्य किण्वकं ।
तैलस्य तस्य पिण्याकं सर्व्वं घृतसमन्वितं ॥
यन्त्रे दत्त्वा द्रवद्रव्यं ययोक्तांशोनिवेशनं ।
तथा क्षारं क्षापयित्वा द्रवैर्यन्त्रं प्रपूरयेत् ॥
आच्छाद्यं सारकैः पूर्णं क्षारीं दद्यादधोमुखीं ।
तया चाकर्षितः सर्व्वो द्रवः फेनं परित्यजेत् ॥ * ॥
दुर्गन्धिर्यो भवेदर्कस्तं कुर्य्यात् सुरभिगन्धकं ।
सर्व्वेषामेव मांसानां दुर्गन्धानाञ्च सर्व्वशः ॥
घृताभ्यक्ता हिङ्गुजोरभेधिका राजिका क्षता ।
नवीनायां हण्डिकायां दद्यात् द्रव्यं पुनः पुनः ॥
तत्र दद्यात्तदर्कन्तु यथा दुर्गन्धतां व्रजेत् ।
तथा पुनः पुनः कार्य्यं जायते गन्धवारणं ॥
आयाति रोचको गन्धो भवेत्तद्धिदोषनं ॥ * ॥
सर्व्वेष्वर्कप्रयोगेषु गन्धपाषाणवासना ॥
अर्काणान्तु प्रदातव्या ते भवन्त्यर्कसम्भवाः ।
सर्व्वत्र वातरोगेषु महिषाद्यादिवासना ॥
महिषाद्यास्तथा रास्नं निर्य्यासः सर्ज्जकस्य च ।
कृष्णागुरुः कदम्बश्च महिषाद्यादिपञ्चकं ॥
सर्व्वेषु पित्तरोगेषु चन्दनादिकवासना ।
सर्व्वेषु कफरोगेषु जटामांस्यादिवासनं ॥
चन्दनञ्च तथोशीरं कर्पूरो गन्धवाकुची ।
एलाकर्च्चूरगोक्षुराः सप्तैते चन्दनादयः ॥
जटामांसी नखं पत्री लवङ्गं तगरं रसः ।
शिलाया गन्धपाषाणः सप्त मांस्यादिका अमी ॥
वासयेद्वा दशाङ्गेन चिदोषामेन चार्कजं ।
नश्यन्ति यस्य धूपेन अवग्रहपिशाचकाः ॥
पक्षाद्गन्धपाषाणात् तावन्महिषगुग्गुलुः ।
चतुरंशं चन्दनञ्च जटामांसी च तावती ।
त्रिभागः सर्ज्जकः सारस्तावदेव हि रास्नकं ।
उशीरं तु द्विभागं स्यात् घृतभृष्टं नखं समं ॥
कर्पूरो मृगनाभिश्च एकभागौ प्रकीर्त्तितौ ।
एष दशाङ्गधूपस्तु रुद्रस्यापि मनो हरेत् ॥ * ॥
पलाङ्गुलशुनादीनां निर्गन्धीकरणं शृणु ।
उत्पाद्यान्तर्व्विषं सम्यक् तक्रमध्ये विनिःक्षिपेत् ॥
पर्य्यायमेकमत्यल्पमध्येऽस्मिन् विरसे सति ।
दद्यान्निष्काश्यान्यतक्रं कुर्य्यात्तच्चाष्टमांशकं ॥
द्रोणपुष्पीरसेऽप्येवं मूर्व्वापत्ररसेऽपि वा ।
विपर्य्ययोत्तरं तत्तु रसोनं क्षालयेत् सुधीः ॥
हरिद्याराजिकातोये स्याप्यं पर्य्यायमेककं ।
उष्णोदकेन संक्षाल्य पर्य्यायं वासयेत्ततः ॥
सहस्रपत्रीपुष्पैर्व्वा अभावे पद्मकैरपि ।
आलोड्येद्दशांशेन पञ्चांशेन च मस्तुना ॥
युक्तं क्षत्वा याममात्रं स्थापयेत् प्रकटातपे ।
ततो निष्काश्यदेयक जात्यादिकपिधानितं ॥
अस्यार्कस्य सुगन्धेन एकदा मोहितो हरः ।
को जानाति रसोनस्य ह्यर्कोऽयमिति भूतले ॥
एकतः सर्व्वं एवार्का मासार्कस्तु तथैकतः ।
मया स्वर्गे गृहीतस्तु प्राप्तं तत्र च नाम्नतं ॥
तदा प्रोक्तं शिवस्याग्रे मम धिग् जीवितं प्रभो ।
नीता वाथ प्रभुक्ता वा सुधा देवैर्मया श्रुतं ॥
न दृष्टा तत्र देवेश शिरश्छेदं करोम्यहं ।
ततः प्रसन्नो गिरिशो वाक्यं मां प्रति सोऽब्रवीत् ॥
दत्तं मया समस्तं ते देवाबध्यत्वमेव च ।
किन्ते कार्य्यन्तु सुधया सुधातोऽधिकरोचनं ॥ * ॥
संप्रवक्ष्यामि मांसार्कं मद्यस्यार्कं तथैव च ।
द्रव्याणां विजयादीनां लभ्यते यैः सुखं महत् ॥
मांसन्तु त्रिविधं ज्ञेयं मृदुलं कठिनं घनं ।
तेषामर्कं यथा प्रोक्तं यन्त्रान्निष्काश्ययेच्छनैः ॥
मृदुलं यद्भवेन्मांसं चत्वारिंशांशकं मदुः ।
स्थूलखण्डीकृते तस्मिन् दत्त्वा तत् क्षालयेच्छनैः ॥
षष्ठांशेनाऽर्द्रगन्धेन तद्विलोड्य च निःक्षिपेत् ।
रसमिश्रोरुमांसं तदभावे पयः क्षिपेत् ॥
जातीपत्रं लवङ्गञ्च त्वगेला नागकेशरं ।
मरिचं मृगनाभिञ्च विदुर्गन्धाष्टकं त्विदं ॥
कार्य्यं पुष्यपिधानाद्यमर्कं निष्काश्ययेत्ततः ।
जायतेऽसौ महास्वादुः सुधासमरसः प्रिये ॥
दृढ़मांसस्य खण्डानि लघून्येव प्रकल्पयेत् ।
दद्याच्च तुवरीं तत्र लवङ्गं प्रोक्षया दिशा ॥
क्षालयेदारनालेन चिवारं कोष्णवारिणा ।
क्षालयेत् सप्तवाराणि हरेदर्कन्तु पूर्व्ववत् ॥
दृढ़मांसस्य खण्डानि कुर्य्यादतिलघूनि च ।
आलोड्य शुष्कद्रावेण क्षालयेत् पयसा पुनः ॥
सप्तवाराणि लवणं चयेत् पूर्व्ववदेव हि ।
तद्दत्त्वा यन्त्रमध्ये तु हरेत् पूर्व्ववदर्कजं ॥
सर्ज्जिक्षारं यवक्षारं श्वेतक्षारञ्च टङ्कणं ।
सौभाग्यक्षारकं सौरक्षारं शुष्कभवं तथा ।
अर्कसेऽडयवाक्षाराश्चत्वारश्च तुवरी तथा ।
अपामार्गभवं क्षारं तथाष्टौ लवणानि च ।
लवणाष्टकमेतच्च सैन्धवञ्च सुवर्चलं ।
विड़ं समुद्रसंजातं उद्भिदं रोमकं गड़ं ॥
क्षत्वा सर्व्वाणि चैकत्र निर्मुनीरेण भावयेत् ।
एकविंशतिवाराणि काचकूप्यां विनिःक्षिपेत् ॥
नखांशूनिम्बुरसकैः सर्व्वमार्द्रीकृतञ्च तत् ।
अधःसच्छिद्रपीठरीं मध्ये कूप्यां निवेशयेत् ॥
मृत्कर्पटसमायुक्तां सच्छिद्रमिं यथाविधि ।
तस्याग्रे कूपिका योज्या दीर्घकण्ठा मनोहरा ॥
सा कूपिका तले स्थाप्या मेलयेच्च दयोर्मुखं ।
जलमुष्णं यथा न स्यात् तथा चापरकूपिका ॥
अग्नयः क्रमतो देया यामं यामञ्च षट्च ।
अनेनैव प्रकारेण क्षारार्काणां समुद्भवः ॥
दद्यादस्थीनि मांसानि शुष्कशुक्त्यादिकान्यपि ।
सर्व्वाण्यपि विलीयन्ते शुष्कद्रावे न संशयः ॥ * ॥
शारावताजचटकशुष्कशूकरटिट्टिभाः ।
क्षुद्रमत्स्यादिकाः सर्व्वे मांसेषु मृदुलाः स्मृताः ॥
मृगरोहितकाद्याश्च मत्स्याः शुष्ककिसम्बराः ।
एते कठिनमांसाः स्युः पक्षिणो जलचारिणः ॥
गजकुम्भीरघण्टाद्याः सुगन्धा वर्करादयः ।
गोधा गोऽश्वा लुलापाद्याः घनमांसाः प्रकीर्त्तिताः ॥
अन्नादिसम्भवो योऽर्कस्तन्मद्यं परिकीर्त्तितं ।
तस्य भेदान् प्रवक्ष्यामि शुटितं तत् समुद्धरेत् ॥
तदासनानिरुत्थर्धमशुगन्धं प्रयोजयेत् ।
पूर्व्वोक्तैर्धूपयेद्धूपैर्व्याप्यते गन्धपर्व्वितं ॥
अर्द्धं तत्र जलं देयं सिद्धे देयोऽशुगन्धकः ।
तुषोदकैर्यवैरामैः सतुषैः सकलीकृतैः ।
सौवीरन्तु यवैरामैः सतुषैः सकलीकृतैः ।
गोधूमैरपि सौवीरं जायते खल्पमादकं ॥
आरनालन्तु गोधूमैरामैः स्याम्लिस्तथीकृतैः ।
धान्याम्लं शालिचूर्णादिकोद्भवादिकृतं भवेत् ॥
शुण्ठाकीरराजिकायुक्तैः स्यान्मूलकदलद्भवैः ।
सर्षपस्नरसैर्व्वापि शालिपिष्टकसंयुतैः ॥
कन्दमूलफलादींश्च सक्षेक्षुलवणानि च ।
एकीकृत्य क्षतोऽर्को यस्तत्सूक्तमभिधीयते ॥
पक्वौषधाम्बुसंसिद्धो योऽर्कस्तत् स्यादरिष्टकं ।
अरिष्टलघुपाकेन सर्व्वतश्च गुणाधिकं ॥
शालिपिष्टकपिष्टादिकृतौ योऽर्कः सुरा तु सा ।

पुनर्नवाग्निवापिष्टैर्विहिता वाहनी स्मृता ॥
इक्षोः पक्वैरसैः सिद्धः सोधुः पक्वरसस्य च ।
आमैस्तैरेव यः सिद्धः स च प्रीतरसः स्मृतः ॥
पर्य्यायावाम्बवेन्मद्यं तामसं राजसप्रियं ।
मद्यलावाग्राजसन्तु तदूर्द्धं सात्विकं भवेत् ॥
सात्विके गीतहास्यादि राजसे साहसादिकं ।
तामसे निन्द्यकर्म्माणि निद्राञ्च मदिरा चरेत् ॥
भल्लादिमत्तद्रव्याणां यवानीपादयोगतः ।
अर्कं निष्काग्रयेद्धीमान् बोधकः स्यान्मदस्य सः ॥
धुस्तूरादिकबीजानि तक्रं पयसि निःक्षिपेत् ।
कण्ठशोषविबन्धादिरहितोऽर्को भवेत् सहि" ॥
इति श्रीभङ्गनाथकृतार्कचिकित्सायां यन्त्रशृतकं द्वितीयं ॥ * ॥

"अथातः संप्रवक्ष्यामि केवलार्कगुणान् प्रिये ।
हरीतक्याः शूलहृच्छ्रकामलागाहनाशनः ॥
विभीतकस्य हृट्कृर्द्दिकफकासविनाशनः ।
आमलस्य चिदोषास्रपित्तमेहान् विनाशयेत् ॥
पिप्पल्याः श्वासकासामवातार्शोज्वरशूलहृत् ।
मरीचस्य क्षमीन् श्वासं हरेत् सर्व्वान् गदानपि ॥
ग्रन्थिकस्य क्षीहगुल्मकफवातोदरापहः ।
चव्यार्कोऽत्यन्तरुचिकृत् विप्रेषादगुदजापहः ॥
अर्कस्तु गजपिप्पल्या वातश्लेष्माग्निमान्द्यनुत् ।
चित्रकस्याग्निकृत् कासग्रहणीक्षमिशोथहा ॥
यवान्याः पाचनो रुच्यो दीपनः शुक्रशूलहृत् ।
अजमोदोद्भवो वातकफहा वस्तिशोधनः ॥
पारसीकयवान्यास्तु ग्राही पाचनमादनः ।
जीरकस्य तु संग्राही गर्भाशयविशुद्धिकृत् ॥
कृष्णाजीरस्य चक्षुष्यो गुल्मच्छर्दितिसारजित् ।
कारव्या बलकृत् हृद्यो ज्वरघ्नः पाचनः सरः ॥
धान्यार्कस्य हृषादाहवमिश्वासचिदोषहृत् ।
शोथज्वरानिलश्लेष्मव्रणशूलाच्चिरोगहृत् ॥
मिश्रेयाया वह्निमान्द्ययोनिशूलक्षमीन् हरेत् ।
ज्वालामरीचकस्यापस्मारभूतचिदोषहृत् ॥
मेथिकायाः श्लेष्मवातज्वरामकफनाशनः ।
वनमेथ्याः सर्व्वरोगान् हरेत् कुञ्जरवाजिनां ॥
चन्द्रशूरस्य हिक्काहृद्वातहृत् पुष्टिवर्द्धनः ।
हिङ्गुनः पाचनो रुच्यः क्षमिशूलोदरापहः ॥
वचाया वह्निकृमिकृत् विबन्धाध्मानशूलहृत् ।
पारसीकवचायास्तु भूतोन्मादबलं हरेत् ॥
कुलिञ्जनस्य खरकृत् हृत्कण्ठमुखशोधनः ।
शूलग्रन्थिभवार्कौ विप्रेषात् कफकासनुत् ॥
दीपान्तरवचायास्तु हरेच्छूलं शिरःक्रमं ।
एषुधाया हरेत् क्षीहं विषं मोहञ्च दारुणं ॥
इषुधायाः समीरार्शोग्रहणीगुल्मशूलहृत् ।
विड्ङस्योदरश्लेष्मकृमिवातविबन्धनुत् ॥
तुम्बुरोर्गुरुतात्रासकासक्षीहक्षमीन् हरेत् ।
वंशरोचनजस्तृष्णाच्छर्द्यतीसारकासज्वरान् हरेत्॥
समुद्रफेनजः प्रीतो लेखनः कफहृत् सरः ।
जीरकोत्थः शुक्रकफबलकृच्छीतलः समः ॥
आर्यमः पित्तदाहास्रकासवातक्षयापहः ।
महामेदोद्भवोऽर्कस्तु हृद्यस्तन्यः कफापहः ॥
महामेदोद्भवः प्रीतो रक्तपित्तज्वरप्रणुत् ।

काकोल्याः शुक्रलः प्रीतः पित्तश्लेष्मज्वरापहः ॥
क्षीरकाकोलिकाजातो दृंहणो दाहवातहा ।
ऋद्धा बल्यस्त्रिदोषघ्नो रक्तपित्तविनाशनः ।
वृद्धा गर्भप्रदः प्रीतः क्षतकासक्षयापहः ॥
मधुयष्ट्याः केशकरः स्वर्य्यः पित्तानिलास्रजित् ।
जलयष्ट्या विषच्छर्दिहृद्यग्लानिक्षयापहः ॥
कम्पिल्लस्य विरेकी स्यात् मेहानाहविकारनुत् ।
आरग्वधस्य पित्तास्रवातोदावर्त्तशूलहृत् ॥
कट्फा मेहश्वासकासक्षमिकुष्ठज्वरापहः ।
भूनिम्बस्य हृषाकुष्ठज्वरव्रणक्षमिप्रणुत् ॥
भद्राया वस्तुपित्तास्रक्षमिवीसर्पकुष्ठनुत् ।
मदनोत्थः कृमिनेत्र चातुर्थज्वरकादिहृत् ॥
राखोद्भवः समीरास्रवातशूलोदरापहः ।
नागभिन्नोद्भवो भोगिलुताद्याखुविकारहृत् ॥
माचिकाजस्तु पित्तास्रपक्वातीसारहा लघुः ।
तेजस्विन्याः श्वासकासकफहृद्रुक्रिदीपनः ॥
ज्योतिष्मत्या वान्तिकरो वह्निबुद्धिस्मृतिप्रदः ।
कुष्ठस्य हन्ति वातास्रकासकुष्ठमहत्कफान् ॥
पौष्करस्यारुचिश्वासान् विप्रेषात् पार्श्वशूलनुत् ।
हेमनाड्याः रेकवान्तिकरः कण्डुविनाशनः ॥
गृहीत्वा हरेदूर्द्धवातहिक्काहृद्व्याद्यत्ययखरान् !
कट्फलोत्थः श्वासकासप्रमेहार्शोऽरुचीन् हरेत् ॥
भार्ग्या हरेत् कफश्वासपीनसज्वरमारुतान् ।
पाषाणभेदजो योनिरोगहृच्छ्वासगुल्महा ॥
धातकीजस्तृषासारविषक्रिमिविसर्पजित् ।
मञ्जिष्ठाजो विषश्लेष्मरक्तातीसारकुष्ठहा ॥
कुसुम्भजो वर्ण्यकरो रक्तपित्तकफापहः ।
लाक्षाजः क्षमिवीसर्पव्रणोरक्षतकुष्ठहा ॥
हरिद्राया मेहश्लोथत्वग्दोषव्रणपाण्डुनुत् ।
आरण्यकहरिद्रायाः कुष्ठवातास्रनाशनः ॥
कर्पूरकहरिद्रायाः सर्व्वकण्डूविनाशनः ।
दार्व्या विप्रेषतो लेपात् नेत्रकर्णास्यरोगनुत् ॥
रसाञ्जनोद्भवो नेत्रविकारव्रणदोषहृत् ।
वाकुच्याः क्षमिविस्फोटपाण्डुश्लोथकफापहः ॥
प्रपुन्नाटस्य हृन्येव कण्डूदद्रुविषानिलान् ।
विषाजो दीपनिकृत् पाके कफपित्तातिसारहा ॥
लोध्रजः प्रीतलो ग्राही चक्षुष्यः कफपित्तनुत् ।
दहत्यचोद्भवो नेत्रोदरातीसारश्लोथहृत् ॥
भल्लातकोद्भवो हन्यात् ज्वरोदरक्षमिव्रणान् ।
गुडूच्या दीपनो ग्राही कासपाण्डुज्वरापहः ॥
ताम्बूल्या मुखदौर्गन्ध्यमलवातश्रमापहः ॥
वैल्वः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥
गम्भारीजो भ्रमहृष्णाशूलार्शोविषदाहहृत् ।
पाटल्याश्छर्द्दिश्लोथास्रहृट्श्लेष्मारुचिदाहहा ॥
अग्निमन्थोद्भवः श्लोथक्रिमिपाण्डुबलासनुत् ।
श्लेष्मातकजस्तु गुल्मार्शःक्रमिहृद्रुचिदीप्तिकृत् ॥
श्लाघिपर्ण्याः क्षतक्षमिज्वरच्छर्दितिसारहा ।
एष्मिपर्ण्या ज्वरश्वासरक्तातीसारदाहजित् ॥
वार्त्ताक्या ज्वरवैरस्यमलारोचकशूलहा ।
कण्टकार्य्या गर्भकरः पाचनः कफकासहा ॥
गोक्षुरस्याश्मरीमेहक्षतहृद्रोगवातहा ।
जीवन्त्याः सारहृन्नेत्रदोषत्रितयनाशनः ॥

मुद्गपर्ण्याः श्लोथदाहक्षयहृच्छूलार्शोऽतिसारहृत् ।
माषपर्ण्याः शुक्रकरो वातपित्तज्वरास्रजित् ॥
पद्माक्षगोद्भवः शूलशिरःपीड़ोदरापहः ।
रक्तकोत्थो ब्रध्नश्वासकासकुष्ठाममारुतान् ॥
मन्दारजो वातकुष्ठकण्डूव्रणविषापहः ।
अर्कार्कः क्षीहगुल्मार्शःश्लेष्मोदरक्रमीन् हरेत् ॥
वच्चीजो लेपतो हन्याद्व्रणश्लोथोदरव्रणान् ।
सातलोत्थः कफानाहपित्तोदावर्त्तश्लोथहा ॥
लाङ्गल्या लेपतो हन्यात् श्लोफास्रव्रणगर्ज्जितः ।
करवीरोद्भवो नेत्रकोपकुष्ठव्रणापहः ॥
चण्डालोत्थस्तु विषवत् भल्लजे लेपने सृहृत् ।
धत्तूरजो हरेत् क्लेशयूकाक्षमिविषादिकं ॥
वासोद्भवो ज्वरच्छर्दिमेहकुष्ठक्षयापहः ।
पार्पटो हन्ति पित्तास्रभ्रमहृत्श्वासकफज्वरान् ॥
निम्बजो भ्रमहृट्कासज्वरारुचिवमिप्रणुत् ।
महानिम्बोद्भवो गुल्मभूमिकाविषनाशनः ॥
पारिभद्रोऽनिलश्लेष्मश्लोथमेदःक्षमिप्रणुत् ।
काञ्चनारो गण्डमालागुदभ्रंशव्रणापहः ॥
कोविदारस्तु पित्तास्रप्रदरक्षयकासहा ।
शौभाञ्जनार्कौ रुचिकृत् शुक्रलौ ग्राहिदीपनः ॥
मधुशिग्रुद्भवो हन्यात् विद्रधिश्वयथुक्रिमीन् ।
शिग्रुजो विषहृन्नेत्रो नस्येनाम्लक्षिरोगहृत् ॥
गिरिकर्ण्याः कुष्ठशूलश्लोथव्रणविषापहः ।
सिन्धुवारोद्भवो हन्ति शूलश्लोथामामारुतान् ॥
निर्गुण्ड्यर्कौ हरेज्जन्तुव्रणकुष्ठारुचीन् लघुः ।
कौटजो दीपनः प्रीतः कफहृद्व्याधिकुष्ठजित् ॥
कारञ्जः कफगुल्मार्शोव्रणक्रिमिविषापहः ।
घृतकारञ्जको भेदी वातार्शःक्षमिकुष्ठजित् ॥
करञ्जा वमिवातार्शःक्षमिकुष्ठप्रमेहजित् ।
उच्चटार्कः केशकरो वातपित्तकफापहः ॥
गुञ्जाया हरते श्वासमुखश्लोषभ्रमज्वरान् ।
कपिकच्छूद्भवो रुच्यो दृंहणो वाजिकर्म्मकृत् ॥
मांसरोहिण्युद्भवस्तु रुच्यो दोषत्रयापहः ।
चित्रकः कुर्य्याद्धातुपुष्टिं तत्फलान्मारयेज्जनान् ॥
पुस्तकान्तरे चेल्लुरिति च पाठः ॥
कण्टकार्य्या दीपनः श्लेष्मश्लोथोदररुजं हरेत् ।
वैतसो हरते दाहं श्लोथार्शोयोनिरुग्व्रणान् ॥
जलवेतसजो ग्राही प्रीतो वातप्रकोपनः ॥
इच्छार्कस्तु हरते चराचरविषं स्फुटं ॥
अश्लोठकस्य शूलाभश्लोथग्रहविषापहः ।
बलार्को ग्राही वातास्रपित्तास्रक्षतनाशनः ॥
अतिपूर्व्वबलार्कस्तु मूर्च्छातीसारनाशनः ।
महाबलार्को हरते क्षयं वातानुलोमनः ॥
नागपूर्व्वबलार्कस्तु मूर्च्छामोहहरः परः ।
लक्ष्मणार्कन्तु सेवेत वन्ध्यापि जनते सुतं ॥
खर्जवल्लग्राः शिरःपीड़ादिदोषान् हन्ति दुग्धदः ।
कार्पासार्कः कर्णसंस्थः कर्णरोगान् विनाशयेत् ॥
वंशजः कफपित्तघ्नः कुष्ठास्रव्रणश्लोथजित् ।
नलार्को वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥
पाठ्या जयेत् ज्वरच्छर्दिकुष्ठातीसारहृद्गुदः ।
श्वेतश्चोद्भवो रेकी पित्तार्शोदरापहः ॥
शरपुङ्खोद्भवः शीघ्रान् गुल्मव्रणविषापहः ।

जवासजो मदभ्रान्तिपित्तास्रकुष्ठकासजित् ॥
मण्डूकोऽत्यन्तबलहृत् शीतमोहानिलार्त्तिजित् ।
अपामार्गभवस्फर्दिकफमेदोऽनिलापहः ॥
आरक्तायामार्गभवो धातुस्तम्भनकारकः ।
कोकिलाक्षभवः शीघ्रं शेकाच्छोफाग्निवारयेत् ॥
अस्थिसंहारिकायास्तु भग्नसन्धानहृच्छिवे ।
कुमारिकाया उत्थोऽग्निदग्धविस्फोटकान् जयेत् ॥
पुनर्नवायाः श्वेतायाः सर्व्वनेत्रामयापहः ।
पुनर्नवाया रक्ताया याही पित्तास्रनाशनः ॥
प्रसारिण्या वातहरो दृष्यः सन्धानहृत् सरः ।
सारिवाया वह्निमान्द्यकासामविषनाशनः ॥
भृङ्गराजस्य दन्तोऽर्कः केश्यस्त्वक्यः शिरोऽर्त्तिहृत् ।
शृङ्गपुष्पीलतायास्तु अर्कः पित्तकफान्तकः ॥
त्रायन्त्यर्कः शूलविषविलेपीज्वरनाशनः ।
मूर्व्वाया मोहहृद्रोगकण्डूकुष्ठज्वरापहः ॥
काकमाच्या नेत्रहितस्फर्दिहृद्रोगनाशनः ।
काकनासाभवो वामी श्रोथार्शश्चित्रकुष्ठहृत् ॥
काकजङ्घोद्भवो हन्यात् ज्वरकण्डूविषक्रिमीन् ।
नागिन्यास्तु हरेच्छूलयोनिदोषवमिक्रिमीन् ॥
मेषशृङ्ग्याः श्वासकासव्रणश्लेष्माच्छिशूलहा ।
हंसपद्या हन्ति शूलभूतरक्तविषव्रणान् ॥
सोमवल्ल्याश्चिदोषघ्नः क्षीरहृच्च रसायनः ।
व्याकाशवल्ल्याः शीतोऽर्कः पित्तश्लेष्मामनाशनः ॥
पातालगरुडीजातोऽर्को दृष्यः शवनापहः ।
वृन्दावल्लोद्भवोऽर्कस्तु विषरक्तोव्रणापहः ॥
वटपत्रीभवश्चोष्णो योनिसूत्रगदापहः ।
हिङ्गुपत्र्या विबन्धार्शःश्लेष्मगुल्मानिलापहः ॥
वंशपत्र्याः पाचनोष्णो हृदस्तिगदसंग्रहृत् ।
मत्स्याक्ष्यर्को व्याहिशीतकुष्ठपित्तकफास्रजित् ॥
सर्पाक्ष्या रोषणः सर्पदष्टश्चिकोन्दुरदंशहृत् ।
शङ्खपुष्पा विषहरः स्मृतिकान्तिबलाग्निदः ॥
अर्कपुष्प्याः कृमिश्लेष्ममेहपित्तविकारजित् ।
लज्जालुकाया भगरुग्रक्तपित्तातिसारहृत् ॥
अलम्बुषासम्भवोऽर्कः कृमिपित्तकफापहः ।
दुग्धिकायाः कफहरो दृष्यस्तन्भी क्रिमिप्रणुत् ॥
भूम्यामल्याः कासदृष्याकफपाण्डुज्वरापहः ।
ब्राह्म्या बुद्धिप्रदस्तार्कः वग्न्यासाभ्यासतः कविः ॥
ब्रह्ममण्डूकिका पाण्डुविषशोथज्वरान् हरेत् ।
द्रोणपुष्पा ज्वरश्वासकासलाशोथजन्तुजित् ।
सूर्य्यमुख्या हरेत् स्फोटयोनिरक्तकृमिपाण्डुताः ।
बन्ध्याकर्कोटिकाजातः सर्पदर्पव्रणापहः ॥
मार्कण्डिकाया दुर्गन्धविषगुल्मोदरापहः ।
देवदाल्याः शूलगुल्मश्लेष्मार्शोवातजित् परः ॥
धत्तूरजो ग्राहिहिमो वह्निकृद्व्रणदाहहा ।
गोजिह्वाया मेहकासव्रणसारज्वरापहः ॥
नागपुष्प्याः सर्पविषसर्व्वव्रहनिवारणः ।
वेल्लन्तरो मूत्रघातास्मरीयोन्यनिलार्त्तिजित् ॥
किंकिन्या वह्निरुचिकृद्दर्पघ्नःकुष्ठकृमिप्रणुत् ।
कौकुन्दरो ज्वरं रक्तं मुखशोषं कफं हरेत् ॥
सदर्पनार्कस्त्वायुष्यः कफशोथास्त्रवातजित्" ।
इति श्रीलक्ष्मणाचार्यकृतार्कचिकित्सायामौषधार्कविधानं तृतीयशतकं ॥ * ॥ अतःपरं नानौषधविधानं चतुर्थशतकं । नानारोगनिवारणार्थं पञ्चमशतकं । विस्फोटकनिवारणार्थं षष्ठशतकं । क्षुद्ररोगादेर्निवारणं सप्तमशतकं । कार्म्मणं नामाष्टमशतकं । गणसंख्या नवमशतकं । धातुशुद्धिर्दशमशतकं । एतत् सर्व्वं अर्कप्रकाशे रावणमन्दोदरीसंवादे अस्ति बाहुल्यभिया न लिखितं ॥

("अर्कक्षीरं सुधाक्षीरं तिक्ततुम्बाश्च पल्लवाः । करञ्जो वत्सनाभश्च लेपनं श्रेष्ठमर्शसां" ॥
इति चक्रपाणिसङ्ग्रहः ॥ * ॥
"अर्कार्कक्करञ्जदयनागदन्तीमयूरकभार्गीराज्ञेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेताहस्तिकाल्यश्ववया स्ता पसवृक्षश्चेति" । इति अर्कादिगणः ॥
"अर्कादिको गणो ह्येष कफमेदोविषापहः । क्रिमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ॥
इति सुश्रुतः ॥)

अर्ककान्ता, स्त्री, (अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः सा, कम् + क्तः स्त्रियां टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता । इति राजनिर्घण्टः ॥ (अस्या गुणा आदित्यभक्ताशब्दे ज्ञातव्याः ॥)

अर्कचन्दनं, क्ली, (अर्कस्य प्रियं चन्दनं, षष्ठीतत्पुरुषः ।) रक्तचन्दनं । इति राजनिर्घण्टः ॥ (रक्तचन्दनशब्दे अस्य गुणावली ज्ञेया ॥)

अर्कजौ, पुं, (अर्काज्जायेते यौ, अर्क + जन् ड, पृषोदरादित्वात् तत्पुरुषः ।) अश्विनीकुमारौ । नित्यद्विवचनान्तशब्दोऽयं । इति हेमचन्द्रः ॥

अर्कतनयः, पुं, (अर्कस्य तनयः, षष्ठीतत्पुरुषः ।) कर्णराजः । इति हेमचन्द्रः ॥ वैवस्वतमनुः । सावर्णिमनुः । शनिः । यमः । यमुनायां तपत्याञ्च स्त्री । इति महाभारतं ।

अर्कनन्दनः, पुं, (अर्कस्य नन्दनः, षष्ठीतत्पुरुषः ।) अर्कतनयः । इति चिकाण्डशेषः ॥

अर्कपत्रः, पुं, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य सः ।) आदित्यपत्रवृक्षः इति राजनिर्घण्टः ॥

अर्कपत्रा, स्त्री, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्याः सा ।) वृक्षविशेषः । इङ्गेर मूल इति भाषा । तत्पर्य्यायः । सुनन्दा २ अर्कमूला ३ विषापहा ४ । इति रत्नमाला ॥

अर्कपर्णः, पुं, (अर्क इव रक्तं पर्णमस्य सः ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति ख्यातः । (अस्य विशेषोऽर्कशब्दे ज्ञातव्यः ।)

अर्कपादपः, पुं, (अर्कः अर्कवृक्षइव तीक्ष्णः पादपः ।) निम्बवृक्षः । इति चिकाण्डशेषः ॥

अर्कपुष्पिका, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीष् कप् ।) वृक्षभेदः । अर्कझषी झलीपुष्पश्चेति ख्याता । तत्पर्य्यायः । पयस्या २ सूर्य्यवल्ली ३ सितपर्णी ४ । इति रत्नमाला ॥

अर्कपुष्पी, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीष् ।) कुटुम्बिनीवृक्षः । तत्पर्य्यायगुणाः ।

"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका । अर्कपुष्पी कृमिश्लेष्ममेहचित्तविकारजित्" ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तपर्य्यायगुणाः कुटुम्बिनीशब्दे द्रष्टव्याः ॥

अर्कप्रिया, स्त्री, (अर्कं प्रीणाति, प्री + क, अर्कस्य प्रिया इति वा ।) जवा । इति राजनिर्घण्टः ॥ (जवाशब्देऽस्य विशेषो ज्ञातव्यः ॥)

अर्कबन्धुः, पुं, (अर्कस्य बन्धुरिव ।) गौतमः । स च इक्ष्वाकुकुलोद्भवश्चाक्षवंशीयबुद्धः । इत्यमरः ॥

अर्कबान्धवः, पुं, (बन्धुरेव बान्धवः, बन्धु + स्वार्थे अण्, अर्कस्य बान्धवः, षष्ठीतत्पुरुषः ।) अर्कबन्धुः इति हेमचन्द्रः ॥

अर्कभक्ता, स्त्री, (अर्कस्य भक्ता, षष्ठीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता ।

अर्कमूला, स्त्री, (अर्क इव विषधराणां दुःसहं मूलं यस्याः सा ।) अर्कपत्रा । इति रत्नमाला ॥ इङ्गेर मूल इति भाषा ।

अर्करेतोजः, पुं, (अर्कस्य रेतसो जायते, अर्करेतस् + जन् + ड, उपपदसमासः ।) सूर्य्यपुत्रविशेषः । तत्पर्य्यायः । रेवन्तः २ भगगः ३ हयवाहनः ४ । इति हेमचन्द्रः ॥

अर्कवल्लभः, पुं, (अर्कस्य वल्लभः, षष्ठीतत्पुरुषः ।) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (बन्धूकवृक्षशब्दे अस्य गुणादयो ज्ञेयाः ॥)

अर्कवेधं, क्ली, (अर्केण विध्यते, अर्क + व्यध + पचाद्यच् ।) तालीशपत्रं । इति राजनिर्घण्टः ॥ (तालीशपत्रशब्दे अस्य गुणादिविवरणं ज्ञेयं ।)

अर्कव्रतं, क्ली, (अर्कस्य व्रतं, षष्ठीतत्पुरुषः ।) आरोग्यसप्तम्यादि सूर्य्यव्रतं । इति स्मृतिः ॥ सूर्य्यस्य जलशोषणवत्प्रकाशकरग्रहणं । यथा,—
"अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः । तथा हरेत् करान्राज्ञामित्यमर्कव्रतं हि तत्" ॥
इति मनुः ।

अर्कसूनुः, पुं, (अर्कस्य सूनुः पुत्रः ।) यमः । इति हेमचन्द्रः ॥

अर्कसोदरः, पुं, (अर्कस्य सोदर इव हितकारी ।) ऐरावतहस्ती । इति हेमचन्द्रः ॥

अर्काहिता, स्त्री, (अर्काय हिता अनुकूला, चतुर्थीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता । (अस्याः विशेष आदित्यभक्ताशब्दे द्रष्टव्यः ॥)

अर्काश्मा, [न्] पुं, (अर्कस्य अनुगतः अश्मा, मध्यपदलोपी कर्म्मधारयः ।) अरुणोपलः । (चुणि इति ख्यातः प्रस्तरभेदः ।) सूर्य्यकान्तमणिरिति यावत् । इति हलायुधः ॥

अर्काह्वः, पुं, (अर्केण आह्वयते यः, अर्क + ष्वा + क्वे + अप् ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा ।

अर्कोपलः, पुं, (अर्कस्यानुगत उपलः, कर्म्मधारयः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (चुणि इति ख्यातो रत्नभेदः । स्फटिकमणिः । "अका-

पलोल्लसितवक्रिभिरक्रि तप्तास्त्रीव्रं महाव्रतमिवात्र चरन्ति वप्राः"। इति माघः।)

अर्गलं, क्ली, स्त्री, (अर्ज + कलच्, कुत्वम्।) कपाटबन्धककाष्ठविशेषः। इत्यमरः॥ ऊड़का तसला इत्यादि भाषा।

("ससम्भ्रमेन्द्रद्रुतपातितार्गला
निमिलिताक्षीव भियामरावती"।

इति काव्यप्रकाशे।

"तां सत्यनाम्नीं दृढतोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां"।

इति रामायणे।

"अथानपोढ़ार्गलमप्यगारं"। इति रघुः। प्रतिबन्धः। प्रत्यवायः। अन्तरायः।

"ईप्सितं तदवज्ञानात् विद्धिसार्गलमात्मनः"।

इति रघुवंशे।)

कल्लोले च। इति मेदिनी॥ देवीमाहात्म्यपाठस्यादौ पाठ्यस्तोत्रविशेषः॥ यथा

मार्कण्डेय उवाच।

"ब्रह्मन् केन प्रकारेण दुर्गामाहात्म्यमुत्तमं।
ब्रूहि शिघ्रं सिद्धति तत्सर्व्वं कथयस्व महाप्रभो॥

ब्रह्मोवाच।

अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षते नित्यं चण्डिका चितयं दिशेत्॥
अर्गलं हृदये यस्य स चार्गलवाक् सदा।
कीलकं हृदये यस्य वज्रकीलितमानसः॥
कवचं हृदये यस्य स वज्रहृदयः खलु।
ब्रह्मणा निर्म्मितं पूर्व्वं विनिश्चित्यापि चेतसा"॥

इत्यादि। तदाद्यश्लोको यथा,—

"जय त्वं देवि चामुण्डे जय भूतापहारिणि!।
जय सर्व्वगते देवि! कालरात्रि नमोऽस्तु ते"॥

तस्य शेषश्लोको यथा,—

"इदं स्तोत्रं पठित्वा च महास्तोत्रं पठेन्नरः।
सप्तशतीं समाराध्य वरमाप्नोति सम्मदं"॥

इत्यर्गलास्तोत्रं॥

अर्गलिका, स्त्री, (क्षुद्रार्गला, अर्गला गौरादित्वात् ङीष् स्वार्थे कन्।) अल्पार्गला। इति हेमचन्द्रः॥ खिल इति भाषा।

अर्घ, मूल्ये, (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्घति गां गोपः। इति दुर्गादासः। ("परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि"। इति पञ्चतन्त्रे।)

अर्घ, पुं, (अर्घ + घञ्।) मूल्यं।

("कुर्य्युरर्घं यथाप्रख्यं ततो विंशं नृपो हरेत्"।

"मणिमुक्ताप्रवालानां लौहानां तान्तवस्य च।
गन्धानाञ्च रसानाञ्च विद्यादर्घबलाबलम्"॥

इति मनुः।) पूजाविधिः। इत्यमरः॥ अयं शब्दः सामगानां सर्व्वत्राभिलाषे सयकारो नपुंसकलिङ्गेनैव प्रयोज्यः अन्यवेदिनां निर्यकारः पुंलिङ्गेन प्रयोज्यः। इति श्राद्धतत्त्वं॥ (दूर्व्वाक्षतसर्षपपुष्पादिविरचितोदेवब्राह्मणादिसम्मानार्थः पूजोपचारभेदः। "अये वनदेवतेयं फलकुसुमपल्लवार्घेण मामुपतिष्ठते"। इति उत्तरचरिते।

"स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै"।

इति मेघदूते।

"दूर्व्वासर्षपपुष्पाणां दत्वार्घं पूर्णमञ्जलिम्"।

इति याज्ञवल्क्यः।)

अर्घीशः, पुं, (अर्घोऽस्यास्य इति अर्घी, तेषु ईशः।) शिवः। इति शब्दरत्नावली॥

अर्घ्यं, त्रि, (अर्घ्यते पूज्यते, अर्घ + ण्यत्, न्यङ्क्वादीनाञ्चेति कुत्वं, अर्घमर्हति इति यादार्घाभ्याञ्चेति यत् वा।) पूजनयोग्यं। पूज्यं। इति मेदिनी॥ अर्घार्थं। तत्तु पूजार्थदूर्व्वाक्षतचन्दनपुष्पमिश्रितवारि। इत्यमरः॥

("अनर्घ्यमर्घ्येण तमद्रिनाथः,
स्वर्गौकसामर्चितमर्चयित्वा"।

इति कुमारसम्भवे।

"अर्घ्यमर्घ्यमितिवादिनं नृपं,
सोऽनवेक्ष्य भरताग्रजो यतः"।

इति रघुवंशे।) अर्घार्थजलम् इति अमरटीकायां भरतः॥ तत्तु सामान्यविशेषभेदेन द्विविधं। तत्राद्यस्य क्रमः। स्वधामे त्रिकोणवृत्तभूविम्बं विलिख्याधारशक्तिं पूजयित्वा अस्त्रमन्त्रेण पात्रं प्रक्षाल्य मन्त्रेण जलेनापूर्य्याङ्गुष्ठमुद्रया मन्त्रेण सूर्य्यमण्डलात्तीर्थमावाह्य प्रणवेन गन्धपुष्पाभ्यां संपूज्य धेनुमुद्रां प्रदर्श्य प्रणवमन्त्रधा दशधा वा जपेत्॥ अन्यस्य क्रमः। स्वधामे त्रिकोणमण्डलं लिखा तत्र त्रिपदिकामारोप्य अस्त्रेण शङ्खं प्रक्षाल्य तदुपरि संस्थाप्य मन्त्रेण गन्धपुष्पाक्षतदूर्व्वादि तत्र निःक्षिप्य विमलजलेन विलोममातृकया मूलेन च पूरयेत् ततस्त्रिपदिकायां वह्निमण्डलपूजा शङ्खे सूर्य्यमण्डलपूजा जले सोममण्डलपूजा ततो मन्त्रेणाङ्गुष्ठमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य मन्त्रेण स्वहृदयाद्देवतां तत्रावाह्य कूर्चमन्त्रेणावगुण्ठ्यास्त्रमन्त्रेण गालिनीमुद्रां प्रदर्श्य मन्त्रेण तज्जलं वीक्ष्य अङ्गमन्त्रैः सकलीकृत्य गन्धपुष्पाभ्यां देवतां संपूज्य तदुपरि मत्स्यमुद्रयाच्छाद्य मूलमन्त्रमष्टधा जप्त्वा धेनुमुद्रां प्रदर्श्यास्त्रेण संरक्ष्य तस्मात् किञ्चित् जलं प्रोक्षणीपात्रे निःक्षिपेत्। इति तन्त्रसारः॥

अर्घ्यं, क्ली, (अर्घ + यत्।) जरत्कारुमुनितपोवनतरूद्भवमधु। तस्य गुणाः। चक्षुरायुर्हितकारित्वं। आमवातकफपित्तनाशित्वञ्च। इति राजवल्लभः॥

अर्च्च, क, पूजे। (चुरादि—सक—सेट्।) इति कविकल्पद्रुमः॥ क अर्चयति। गोवर्द्धनस्त्विममात्मनेपदिनं मत्वा विभाजसे मकरकेतनमर्चयन्तीत्यादि स्खलितमित्याह। इति दुर्गादासः॥

अर्च्च, ञ, पूजे। (भ्वादि—सक—सेट्।) इति कविकल्पद्रुमः॥ ञ अर्चति अर्चते। इति दुर्गादासः॥

अर्चकः, त्रि, (अर्चति, अर्च + ण्वुल्।) पूजकः। अर्चनाकारकः। यथा,—

"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात्।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति"॥

इति तिथ्यादितत्त्वं॥

("ब्रह्मचारी व्रती च स्यात् गुरुदेवद्विजार्चकः"।

इति मनुः।)

अर्चनं, क्ली, (अर्च + भावे ल्युट्।) पूजनं। यथा,—

"धनधान्यकरं नित्यं गुरुदेवद्विजार्चनं"।

इति राजवल्लभः॥ पूजाद्रव्ये च। यथा,—

"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात्"।

इति तिथ्यादितत्त्वं।

अर्चना, स्त्री, (अर्च + युच्, टाप्।) पूजा। इति जटाधरः॥ गुरुदेवद्विजानां नित्यार्चनागुणाः। स्वर्गयश-आयुर्धनधान्यकारित्वं। अलक्ष्मीपापनाशित्वञ्च। इति राजवल्लभः॥

अर्चा, स्त्री, (अर्च + आधारे अङ्।) पूजा। प्रतिमा। इति मेदिनी॥ (देवादीनां पूजनं। "अर्चा चेत् विधितश्च ते वद तदा किं मोक्षलाभक्षमैः"॥ इति शिवशतके।)

अर्चिः, स्त्री, (अर्च + इन्।) अग्निशिखा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

("आसीदासन्ननिर्व्वाणप्रदीपार्चिरिवोषसि"।

इति रघुवंशे।)

अर्चिः, [स्] स्त्री, क्ली, (अर्च + इसि।) अग्निशिखा। किरणाः। इत्यमरः। दीप्तिः। इत्युणादिकोषः॥ अयं शब्दः सान्त इदन्तश्च॥ ("हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः"। "विरम विरम वह्ने मुञ्च धूमानुबन्धं प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्"। इति रत्नावली।)

अर्चितः, त्रि, (अर्च + कर्म्मणि क्तः।) पूजितः। इत्यमरः॥ (पूजाविधिना सम्मानितः।

"वेश्मन्येवं स्थिते तत्र गत्वा तान् परमार्चितान्"।

"अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ"।

इति महाभारते।)

अर्चिष्मान्, [त्] पुं, (अर्चिर्विद्यतेऽस्य, अर्चिस् + मतुप्।) अग्निः। इति हेमचन्द्रः॥ सूर्य्यः। अर्चिःशब्दात् अतिशये मतुप्प्रत्ययः॥ (त्रि, दीप्तः। तेजोविशिष्टः। प्रभावान्।) (खनामख्यातो देवर्षिभेदः। यदुक्तं, हरिवंशे,

"अर्चिष्मांस्तम्बरुश्चैव भारिश्च वदतां वरः।
नेतारो देवदेवानामेते हि तपसान्विताः"।)

अर्च्यः, त्रि, (ऋच् + स्तुतौ ण्यत्, अर्च + यत् वा।) अर्चनीयः। पूज्यः। इति हेमचन्द्रः॥

("मरुत्प्रयुक्ताश्च मरुत्सखाभं,
तमर्च्यमारादभिवर्त्तमानम्"।

इति रघुवंशे।)

अर्ज्ज, अर्ज्जने। (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्ज्जनमलब्धस्य लाभः। यशआर्ज्जति यः स्थिरमिति हलायुधः। इति दुर्गादासः॥

अर्ज्ज, क संस्कारे (चुरादि—उभं—सकं—सेट्।) इति कविकल्पद्रुमः॥ क अर्ज्जयति किमपि लोकः संस्करोतीत्यर्थः। प्रतियत्ने प्राञ्चः। अर्ज्जयति धनं परिजनः। इति रमानाथः। इति दुर्गादासः॥

अर्ज्जकः, पुं, (अर्ज्जयति, अर्ज्ज + ण्वुल्।) श्वेतपर्ण्णासः। वावुइ इति भाषा। तत्पर्य्यायः। श्वेतच्छदः २ गन्धपत्रः ३ पाता ४ कुठेरकः ५। इति शब्दचन्द्रिका॥ वर्ब्बरीभेदः। आजवलाइ इति पश्चिमदेशे ख्यातः। तत्पर्य्यायः। क्षुद्रतुलसी २ क्षुद्रपर्णः ३ मुखार्ज्जकः ४ उग्रगन्धः ५ जम्बीरः ६ कुठेरः ७ कठिञ्जरः ८। अस्य गुणाः। कटुत्वं। उष्णत्वं। कफवातामयनेत्ररोगनाशित्वं। रुचिकारित्वं। सुखप्रसवकारकत्वञ्च। इति राजनिर्घण्टः॥ सामान्यतुलसी। इति रत्नमाला॥ ("कफघ्ना लघवो रुक्षाः स्निग्धोष्णाः पित्तवर्द्धनाः। कटुपाकरसाश्चैव सुरसार्ज्जकभूस्तृणाः"॥ इति सुश्रुतश्च॥)

अर्ज्जकः, त्रि, (अर्ज्जयति, अर्ज्ज + ण्वुल्।) उपार्ज्जनकर्त्ता। यथा। "अतएव वशिष्ठेन ज्येष्ठस्यांशद्वयमभिधायार्ज्जकस्यांशद्वयमभिहितं"। इति दायभागः॥

अर्ज्जनं, क्ली, (अर्ज + ल्युट्।) उपार्जनं। स्वत्वहेतुभूतो व्यापारः। यथा। अर्ज्जनं स्वत्वहेतुभूतो व्यापारः अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति दायभागः॥ ("अर्जयित्व्यापारोऽर्जनमिति जीमूतवाहनः"। "स्वामित्वजनकव्यापारत्वम्" इति महेश्वरः"। "स्वामित्वहेतुभूतव्यापारत्वम् इति। श्रीकृष्णः"। "पितृनिधनकालीनं वा जीवनमेव पुत्रस्यार्ज्जनं भविष्यति"। इति दायभागः। "अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे"। इति पञ्चतन्त्रे। "दत्त्याजनञ्च नाशञ्च मित्रामित्रस्य चार्जनम्"। इति मनुः।)

अर्जुनं, क्ली, (अर्ज + उनन्।) दृगं। नेत्ररोगः। इति विश्वमेदिन्यौ॥ तस्य लक्षणं। "एको यः शुक्लरुधिरोपमस्तु विन्दुः सुकृष्णो भवति तदर्जुनं वदन्ति"। इति माधवकरः॥ ("नीलक् श्यामोऽर्जुनं विन्दुः शुक्लोहितलोहितः" इति वाभटश्च।)

अर्जुनः, पुं, (अर्ज + उनन्।) पाण्डुराजस्य तृतीयपुत्रः। स तु इन्द्रात् कुन्तीगर्भे जातः। तत्पर्य्यायः। पाल्गुनः २ जिष्णुः ३ किरीटी ४ श्वेतवाहनः ५ वीभत्सुः ६ विजयः ७ कृष्णः ८ सव्यसाची ९ धनञ्जयः १०। इति विराटपर्व्व। पार्थः ११ शक्रनन्दनः १२ गाण्डीवी १३ मध्यमपाण्डवः १४ श्वेतवाजी १५ कपिध्वजः १६ राधाभेदी १७ सुभद्रेशः १८ गुडाकेशः १९ बृहन्नलः २०। इति जटाधरः॥ श्वेन्द्रिः २१। इति भूरिप्रयोगः॥ * ॥ स्वनामख्यातवृक्षविशेषः। आजन इति भाषा। तत्पर्य्यायः। नदीसर्जः २ वीरतरुः ३ इन्द्रद्रुः ४ ककुभः ५। इत्यमरः॥ गुग्गुरः ६ पार्थः ७ चित्रयोधीः ८ धनञ्जयः ९ वैरातद्रुः १० किरीटी ११ गाण्डीवी १२ शिवमल्लकः १३ सव्यसाची १४ कर्णारिः १५ करवीरकः १६ कौन्तेयः १७ इन्द्रद्रुः १८ वीरद्रुः १९ कृष्णसारथिः २० एधाजः २१ फाल्गुनः २२ धन्वी २३। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः। "ककुभोऽर्জুননামाख्यो नदीसर्জश्च कीर्त्तितः। इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥ ककुभः शीतलो भग्नव्रणतत्क्षयविषापहृत्। मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत्"॥ इति भावप्रकाशः॥ अस्य गुणाः। व्रतभग्नरक्तक्षतभग्नमूत्रकृच्छ्ररोगे पथ्यत्वं। इति राजवल्लभः॥ कषायत्वं। उष्णत्वं। व्रणरोपणत्वं। कफपित्तश्रमदृष्णार्त्तिनाशित्वं। वायुरोगप्रकोपकारित्वञ्च। इति राजनिर्घण्टः॥ * ॥ (अस्य व्यवहारो यथा,— "अर्জুনस्य त्वचा सिद्धं क्षीरं दद्याद्वृद्धामये"॥ इति वैद्यकचक्रपाणिसंग्रहः॥)

कार्त्तवीर्य्यार्জুनः। माहिष्मती नाम पुरी तस्य राजधान्यासीत्, स खलु भुजवीर्य्येण सप्तद्वीपां धरामजयत्। योगाद् बाऽुसहस्रञ्च लब्धवान्। "तस्य बाऽुसहस्रन्तु युध्यतः किल भारत!। योगात् योगेश्वरस्येव प्रादुर्भवति मायया॥ तेनेयं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता। ससमुद्रा सनगरा उग्रेण विधिना जिता॥ तेन सप्तसु द्वीपेषु सप्तयज्ञाप्तदक्षिणाः। प्राप्तानि विधिना राज्ञा शूयन्ते जनमेजय"॥ "योऽर्জুनेनार्জ্জनस्तुल्यो द्विबाऽुर्জ্জबाऽुना"। इति महाभारते।) मयूरः। मातुरेकसुतः। इति मेदिनी। श्वेतवर्णः। तद्वति त्रि। इत्यमरः॥

अर्জ্জুনध्वजः, पुं, (अर्জ্জুनस्य पार्थस्य ध्वजः, रथकेतुभूतः, सततं तत्रावस्थानात्।) हनूमान्। इति हेमचन्द्रः॥

अर्জ্জুনी, स्त्री, (अर्জ্জ + उनन्, गौरादित्वात् ङीष्।) गवी। करतोयानदी। कुट्टनी। उमा। इति विश्वमेदिन्यौ॥

अर्জ্জুनोपमः, पुं, (अर्জ্জুनः स्वनामख्यातः वृक्षः उपमा यस्य सः।) वृक्षभेदः। पेगुन इति भाषा। तत्पर्य्यायः। महापत्रः २ शाकवृक्षः ३ अनीलः ४ अर्णः ५। इति शब्दचन्द्रिका॥ शाकाख्यः ६ खरपत्रः ७। इति रत्नमाला॥

अर्णः, पुं, (अर्च्यते क्षः।) शाकवृक्षः। इति शब्दचन्द्रिका। अक्षरं। इत्यागमः॥ वर्णः। यथा,— "वर्णोऽक्षरं रश्मिरर्णः स्वरास्तु कथिता अचः। व्यञ्जनानि हलो वर्णाः कादयोऽष्टौ प्रकीर्त्तिताः"॥ इति वीजवर्णाभिधानं॥

अर्णः, [स्] क्ली, (ऋच्छति, ऋ गतौ उदके नुट् चेत्यर्त्तेरसुन् तस्य च नुट्।) जलं। इत्यमरः॥

अर्णवः, पुं, (अर्णांसि जलानि सन्त्यस्मिन्, अर्णसो लोपश्चेति वः सलोपश्च।) समुद्रः। इत्यमरः॥ ("अदृश्यशाभिगम्यश्च यादोरत्नैरिवार्णवः"। इति रघुवंशे।)

अर्णवजः, पुं क्ली, (अर्णवात् जायते, अर्णव + जन + ड, उपपदसमासः।) समुद्रफेनः। इति रत्नमाला॥ (समुद्रफेनशब्देऽस्य विवरणं ज्ञेयं॥)

अर्णवमन्दिरः, पुं, (अर्णवः मन्दिरमिव यस्य सः।) वरुणः। इति हेमचन्द्रः॥

अर्णवोद्भवः, पुं, (उद्भवत्यस्मात्, उत् + भू + अपादाने अप्, अर्णवः उद्भवो यस्य सः।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥ (अग्निजारशब्देऽस्य गुणा ज्ञातव्याः॥) (चन्द्रः। अमृतं।)

अर्णोदः, पुं, (अर्णांसि ददाति, दा + क।) मुस्तकः। मेघः। इति राजनिर्घण्टः॥

अर्णोभवः, पुं, (अर्णसि जले भवति, अर्णस् + भू + अप्, उपपदसमासः।) शृङ्खः। इति राजनिर्घण्टः॥

अर्त्तगलः, पुं, (आर्त्तंदव गलति, गल + अच्, एषोदरादित्वात् वा कृखः।) आर्त्तगलः। नीलभिण्टिका। इत्यमरटीकायां भरतः॥ (नीलभिण्टिशब्देऽस्य गुणो व्याख्येयः॥)

अर्त्तनं, क्ली, (ऋत + ल्युट्, पक्षे इयङभावः।) जुगुप्सा। निन्दा। इत्यमरः॥

अर्त्तिः, स्त्री, (अर्द् + क्तिन्।) पीड़ा। धनुरग्रभागः। इत्यमरः॥ (पीड़ार्थे उदाहरणं यथा,— "चूर्णं समं रुचकहिङ्गुमहौषधानां, सुरुाम्बुना कफसमीरणसम्भवासु। हृत्पार्श्वपृष्ठजठरार्त्तिषिसूचिकासु पेयन्तथा यवरसेन च विद्रधिन्ये॥" इति वैद्यकचक्रपाणिसंग्रहः॥)

अर्त्तिका, स्त्री, (ऋत + ण्वुल्।) अन्तिका। नाय्योन्नौ ज्येष्ठा भगिनी। इत्यमरटीकायां स्वामी॥

अर्थ तृ क ङ याचने। इति कविकल्पद्रुमः॥ ङ अर्थयते अर्थापयते। प्रार्थयत्यल्पमूल्यानीत्यादौ प्रार्थनं प्रार्थः पश्चात् प्रार्थं करोति इति णौ परस्मैपदं। इति दुर्गादासः॥

अर्थः, पुं, (अर्थ + घञ्।) विषयः। याच्ञा। धनं। कारणं। वस्तु। शब्दप्रतिपाद्यः। निवृत्तिः। प्रयोजनं। इति मेदिनी॥ प्रकारः। इति हेमचन्द्रः॥ (धनार्थे यथा,— "अर्थेन बलवान् सर्व्वः अर्थाद्भवति पण्डितः"। इति हितोपदेशे। अयञ्च त्रिवर्गस्यान्तर्गतः। "कस्यार्थधर्म्मौ वद पीड़यामि सिन्धोस्तटावोधइव प्रवृद्धः।" इति कुमारसम्भवे। "तमसोलक्षणं कामो राजसस्त्वर्थ उच्यते सत्त्वस्य लक्षणं धर्म्मः श्रेयसेषां यथोत्तरं"॥ इति मनुः। शब्दप्रतिपाद्यः। शब्दानामभिधेयः। "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये"। इति रघुवंशे। अभिधेयं। अलङ्कारशास्त्रादौ अर्थस्त्रिविधः, वाच्यो लक्ष्यो व्यङ्ग्येति।

अर्थना, स्त्री, (अर्थ + युच्।) याच्ञा। भिक्षा। इत्यमरः॥

अर्थपतिः, पुं, (अर्थानां पतिः, षष्ठीतत्पुरुषः।) कुबेरः। राजा। इति मेदिनी॥ ("अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"। "स नैषधस्यार्थपतेः सुतायाम्"। इति रघुवंशे।)

अर्थप्रयोगः, पुं, (अर्थानां धनानां प्रयोगः, षष्ठीतत्पुरुषः।) वृद्धिजीविका। इत्यमरः॥ सूदे देया बाड़ी देया इत्यादि भाषा।

अर्थवादः, पुं, (अर्थस्य लक्षणया स्तुत्यर्थस्य निन्दार्थस्य वा वादः, वद्+करणे घञ्।) स्तुतिः। प्रशंसा। इति हेमचन्द्रः॥ स तु त्रिविधः। गुणवादः १ अनुवादः २ भूतार्थवादः ३। यथा,—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानावर्थवादस्त्रिधा मतः"॥
इति भट्टः॥ तत्त्वसम्बोधिनीमते सप्तविधः। स्तुत्यर्थवादः १ फलार्थवादः २ सिद्धार्थवादः ३ निन्दार्थवादः ४ परकृतिः ५ पुराकल्पः ६ मन्त्रः ७। एषामुदाहरणानि श्रुत्युक्तत्वात् न लिखितानि॥ विध्यसमभिव्याहृतवाक्यं। यथा। "अर्थवादस्य विध्यसमभिव्याहृतवाक्यरूपः" सोऽपि त्रिविधः। गुणवादानुवादभूतार्थवादभेदात्। यथा—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानावर्थवादस्त्रिधा मतः"॥
इति॥ अयमर्थः। विरोधे विशेष्यविशेषणयोः सामानाधिकरण्येनान्वयविरोधे गुणवादः अङ्गकथनरूपत्वात्। यथा "यजमान स्तस्तरः" इति। अत्र स्तस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वयबाधात् यजमानस्य कुशमुष्टिधारणरूपार्थवादरूपत्वात् गुणवादः। अवधारिते प्रमाणान्तरसिद्धेऽर्थे यो वादः। यथा नान्तरीयकेऽग्निश्चेतव्यः अग्निर्हिमस्य भेषजं इत्यादि च। अन्तरीयकेऽग्निचयनस्यासम्भवेन तदभावस्य अग्नेर्हिमनाशकत्वस्य च लौकिकप्रमाणसिद्धत्वात् अनुवादः। तद्ज्ञानौ तयोर्विरोधावधारणयोरभावे भूतार्थवादः। यथा इन्द्रो वृत्रहन्नित्यादि। सोऽपि द्विविधः। स्तुत्यर्थवादो निन्दार्थवादश्च। यथा,—
"सन्ध्यामुपासते ये च" इत्यादि स्तुत्यर्थवादः।
"स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु पुमान्॥
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः"।
इत्यादि निन्दार्थवादः। इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः॥ * ॥
"प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं"।
इति वेदान्तसारः॥ तद्विवरणं यथा। अथार्थवादाधिकरणं। तत्रार्थवादाश्च बहुषु श्रूयन्ते ते किं प्रमाणं न वेति संशये पूर्व्वपक्षसूत्रं। आम्नायस्य प्रवर्त्तकत्वं तदर्थमेव तदवतारादिति। अस्यार्थः। आम्नायस्य वेदस्य प्रवर्त्तकत्वं विधेये इति शेषः। तदर्थं वेदाभिधानात्। तच्च प्रवर्त्तकत्वं कार्य्यताज्ञानद्वारैव तद्विना प्रवृत्त्यभावात्। अतः सिद्धार्थकानां स्तुत्यर्थवादानां कार्य्यतावाचकपदाभावात् न कार्य्यताधीजनकत्वं। अतोऽप्रामाण्यमेव। अतस्तेषामर्थवादानां प्रवर्त्तकत्वार्थमवश्यं विधिकल्पनं स्तुतिविशेषणत्वं वा युक्तं अतएव सिद्धान्तसूत्रं। विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति। अस्यार्थः। अर्थवादानां स्तुतिपरत्वेन विधिना सह एकवाक्यत्वात् ते अर्थवादाः प्रमाणानि स्युः। तथा च विधेयप्रवृत्तावेव तेषां तात्पर्य्यं तत्रैव प्रमाणं यत्परशब्दः स शब्दार्थं इति सिद्धान्तात् न स्वार्थे स्तुत्यादौ तत्र तात्पर्य्याभावात्। तर्हि यत्र दुःखेन सम्भिन्नमित्यादेः स्वतन्त्रार्थवादानां का गतिरित्यत्राह भूतार्थानां क्रियार्थेन समाम्नायः। अस्यार्थः। भूतार्थानां सिद्धार्थानां क्रियार्थेन कार्य्यबोधकेन विधिना इति यावत्। समाम्नायः पाठः कार्य्यइति शेषः। ततश्च विधिवाक्याकाङ्क्षापूरकत्वेन कार्य्यान्वितबोधकतया तेषां प्रामाण्यं। यथा। लिखिष्यमाणयूपाहवनीयवाक्यानां यूपाहवनीयपरिचयाय कार्य्यान्वितबोधकत्वेन स्वार्थबोधकत्वे प्रामाण्यं। तथा स्वर्गकामो यजेतेत्यत्र स्वर्गरूपपरिचयाय स्वर्गबोधकत्वेन।
"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरं।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदं"॥
इत्यादि वाक्यानामपि प्रामाण्यं। अन्यथा यूपादिपदार्थापरिचये च तत्तद्विधिवाक्यानां प्रवृत्तिर्न स्यादतो विधिनैकवाक्यत्वात् सिद्धार्थकानामपि प्रामाण्यं। यत्र तु विधिना सह विरोधः तत्र न स्वार्थे प्रामाण्यं। यथा "अहरहः सन्ध्यामुपासीत" इत्यादौ।
"सन्ध्यामुपासते ये तु नियतं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"॥
इत्याद्यर्थवादानां॥ अतो नित्ये कर्म्मणि फलश्रुतिरर्थवादएव सोऽपि रुच्युत्पादनपरः। अतोऽत्र कार्य्यताज्ञानादेरप्रवृत्तिरिति दिक्। इति धर्म्मदीपिका॥

अर्थवान्, [त्] पुं, (अर्थोऽस्यास्य, अर्थ+मतुप्+मस्य वः।) पुरुषः। इति राजनिर्घण्टः॥ अर्थविशिष्टे त्रि॥ (ऐश्वर्य्यशाली। "तेनार्थवान् लोभपराक्षुखेन"। इति रघुवंशे। अभिधेययुक्तः। सार्थकः।
"करोति यः सर्व्वजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः"।
इति किरातार्जुनीये। "अर्थवान् खलु मे राजशब्दः"। इति शाकुन्तले।)

अर्थविज्ञानं, क्ली, (अर्थस्य विज्ञानं, षष्ठीतत्पुरुषः।) शुश्रूषाद्यष्टधीगुणान्तर्गतगुणविशेषः। शब्दार्थज्ञानं। इति हेमचन्द्रः॥
("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः"॥)

अर्थव्ययज्ञः, त्रि, (अर्थस्य अयं तत्प्रकारं जानाति, ज्ञा+क।) धनव्ययप्रकारवित्। (किं धनं, कथं, कुत्र, कियत्, कस्मै वा व्ययितव्यमिति विशेषाभिज्ञः।) तत्पर्य्यायः। सुकुलः २। इति हेमचन्द्रः॥

अर्थशास्त्रं, क्ली, (अर्थस्य भूमिधनादेः प्रापकं शास्त्रं, षष्ठीतत्पुरुषः।) चाणक्यादिप्रणीतं नीतिशास्त्रं। तत्पर्य्यायः। दण्डनीतिः २। इत्यमरः॥ यथा,—
"बृहस्पतिप्रभृतिभिः प्रणीतस्वार्थशास्त्रकं।
तत्रैव दण्डनीतिः स्यादत्र ज्ञेयौ नयानयौ"॥
इति शब्दरत्नावली॥ अष्टादशविद्यान्तर्गतविद्याविशेषः। यथा विष्णुपुराणे।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ धर्म्मशास्त्रेणार्थशास्त्रस्य बाधत्वं यथा॥
"स्मृत्यर्थेन विरोधे हि अर्थशास्त्रस्य बाधनं।
परस्परविरोधे तु न्याययुक्तं प्रमाणवत्"॥
अर्थशास्त्रस्य मन्वादिप्रणीतराजनीत्यादिविषयस्य। यदाह,—
"अनागमन्तु यो मुक्ते बहून्यब्दशतान्यपि।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः॥
इत्यनयोर्धर्म्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तौ धर्म्मशास्त्रेण दण्डविधायकमर्थशास्त्रं बाध्यते। तत्स्वार्थशास्त्रस्य चिपुरुषीयेतरपरत्वेन सङ्गोचः"।
इति मलमासतत्त्वं॥

अर्थसिद्धकः, पुं, (अर्थात् सिद्धः, अर्थः प्रयोजनं धनं वा सिद्धोऽस्य, समासान्तः कः।) सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

अर्थागमः, पुं, (अर्थस्य आगमः, षष्ठीतत्पुरुषः।) धनागमः। तत्पर्य्यायः। आयः २। इति हलायुधः॥
("अर्थागमो नित्यमरोगिता च
प्रिया च भार्य्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकेषु सुखानि राजन्"॥
इति हितोपदेशे।)

अर्थिकः, पुं, (अर्थयते इत्यर्थी याचकः कुत्सितार्थे कन्।) वैतालिकः। निद्रायस्य राजादेर्जागरयिता। इति हेमचन्द्रः॥

अर्थी, [न्] त्रि, याचकः। सहायः। सेवकः। विवादी। इति विश्वः॥ धनी। अर्थो विद्यतेऽस्येति इन्॥

अर्थ्यं, क्ली, (अर्थ+यत्।) शिलाजतु। इत्यमरभेदिनीकरौ॥ अर्थहिते त्रि॥

अर्थ्यः, त्रि, (अर्थे साधुः, तत्साधुरिति यत्, अर्थादनपेतः, धर्म्मपथ्यर्थन्यायादनपेत इति यत्रयत्ययः।) पण्डितः। धनवान्। न्याय्यः। इत्यमरभरतौ। याच्यः। याचनार्थकार्थधात्वोः कर्म्मणि यः॥ (अर्थयुक्तः। उदारार्थयुक्तः।
"अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"।
इति रघुवंशे।
"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे"।
इति कुमारसम्भवे।)

अर्द यातनागतियाचनेषु। (गतौ, सकं पीड़ायां अकं भ्वादि परं सेट्।) इति कविकल्पद्रुमः॥ यातना ताड़नं। अर्दति पुत्रं पिता। "अरट्टनं नार्दति चातकोऽपि"। न याचतीत्यर्थः। इति दुर्गादासः॥

अर्द ञ वधे। (चुरां-उभं-सकं-सेट्।) इति कविकल्पद्रुमः॥ ञ अर्दति अर्दते। "रुत्तःसहस्राणि चतुर्दशार्दीत्"। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

अर्द क वधे। इति कविकल्पद्रुमः॥ क अर्द्यति। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

अर्दनं, क्ली, (अर्द+ल्युट्।) याचनं। पीड़नं। हननं। गमनं। अर्दधातोर्भावेऽनट्प्रत्ययः॥
("स्वजस्वेति तदेवाच बलं परबलार्दनम्"।
इति रामायणे।)

अर्दना, स्त्री, (अर्द + युच्, टाप्।) याच्ञा। भिक्षा। इत्यमरः। (यातना। वधः। हिंसा। गतिः।)

अर्दनिः, पुं, (अर्द + अनि।) अग्निः। याच्ञा। रोगः। इत्यमरटीकायां भरतः॥

अर्दितं, क्ली, (अर्द + क्तः।) वायुव्याधिविशेषः। तस्य (निदानपूर्व्वरूपसम्प्राप्तिपूर्व्वकं)लक्षणमाह(सुश्रुतः)।

"उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च।
हसतो भृशतो भाराद्विषमाच्छयनादपि॥
शिरोनासौष्ठचिबुकगलाटेक्षणसन्धिजः।
अर्दयित्वानिलो वक्त्रमर्दितं जनयत्यतः॥
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्॥
ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना॥
(यस्याग्रतो रोमहर्षो वेपथुर्नेत्रमाविलं।
वायूरर्द्धं त्वचि स्वापस्तोदो मन्याहनुग्रहः॥)
तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः"॥

तस्यासाध्यलक्षणञ्चाह॥

"क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः।
न सिध्यत्यर्दितं वाढं चिरवर्षं वेपनस्य च॥"॥

भावप्रकाशेऽप्येयं व्याख्या॥ व्याहरतः वदतः। कठिनानि पूगफलादीनि। विषमाच्छयनासनादिति पाठान्तरे। विषमाच्छयनासनात् ग्रीवादिवैपरीत्येन शयनादासनाच्च। अर्दयति पीड़यति। जनयेत्तत इति पाठान्तरे। ततस्तदनन्तरं अर्दितं जनयेत्। अर्दिते जाते किं स्यात्तदाह। वक्रीभवतीत्यादि। अपवर्त्तते वक्रीभवति। चलति कम्पते। वाक्सङ्गः वाङ्निरोधः। नेत्रादीनामित्यादिशब्देन भ्रूगण्डनासिकादीनां ग्रहणं। वैकृतं वैदनास्करणवक्त्रत्वादि। ग्रीवेत्यादि यस्मिन् पार्श्वे अर्दितं तस्मिन् पार्श्वे ग्रीवादीनां वेदना॥ अनिमिषाक्षस्य निमेषासमर्थचक्षुषः। प्रसक्तं प्रकर्षेण लग्नं अव्यक्तञ्च भाषितुं क्षीणं यस्य। तस्य अर्दितं न सिध्यति चिरवर्षं अतीतवर्षत्रयं। अथवा त्रयाणां चक्षुर्नासामुखानां वर्षः स्रावो यत्र तत्। वेपनस्य कम्पनशीलस्य च। वाढमतिशयेन न सिध्यति इत्यन्वयः। गाढमित्यर्थे च स एवार्थः॥"॥ (चरकस्त्वाह।

"अतिवृद्धः शरीरार्द्धमेकं वायुः प्रपद्यते।
यदा तदोपशोष्याक्ष्णः काणं पादञ्च जानु च॥
तस्मिन् सङ्कोचयत्यर्द्धं मुखं जिह्मं करोति च।
वक्रीकरोति नासाभ्रुललाटाक्षिहनुस्तथा॥
ततो वक्रं व्रजत्यास्ये भोजनं वक्त्रनासिकं।
स्तब्धं नेत्रं कथयतः स्रवत्यक्ष्णो निमज्जते॥
ग्रीवा जिह्मा समुत्क्षिप्ता कला सज्जति चास्यवाक्।
दन्तास्खलन्ति बाध्येते श्रवणौ भिद्यते स्वरः॥
पादहस्ताक्षिजङ्घोरुशङ्खश्रवणगण्डरुक्।
अर्द्धे तस्मिन् मुखार्द्धे वा केवले स्यात्तदर्दितं"॥"॥

वाभटस्त्वाह।

"शिरसा भारहरणादतिहास्यप्रभाषणात्।
उत्तानशयनात्क्षवथुस्वरकार्मुककर्षणात्॥
विषमादुपधानाच्च कठिनानाञ्च चर्व्वणात्।
वायुर्विवृद्धस्त्वेतैश्च वातलैरर्द्धमाश्रितः॥
वक्रीकरोति वक्त्रार्द्धमूर्द्धं हसितमीक्षितं।
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गस्तत्क्षणेक्षता॥
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षरग्रहः।
गन्धाज्ञानं स्मृतेर्मोहस्त्रासः सुप्तस्य जायते॥
निष्ठीवः पार्श्वतोयायादेकस्याक्ष्णो निमीलनं।
जघोरुर्द्धं रुजा तीव्रा शरीरार्द्धेऽधरेपि वा॥
तमाहुरर्दितं केचिदेकायामथ चापरे"॥ *॥

हारीतसंहितायामप्युक्तं।

"सन्तापदाहशोषाच्च मूर्च्छापित्तान्वितोमरुत्।
श्लैष्मं शोथोरुचिर्जाड्यं वातश्लेष्मसमन्वितं॥
यो द्वन्द्वजाश्रितो धीरास्तं साध्यं मारुतं विदुः।
केवलोऽपि समीरोऽपि सोऽपि साध्यतमः स्मृतः॥
वक्त्रं भवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
वैक्षव्यं नयनानाञ्च विसंज्ञो वेदनातुरः॥
ग्रीवायां गण्डयोर्दन्तपार्श्वे यस्यातिवेदना।
तमर्दितमिति प्राऊर्वातव्याधिविचक्षणाः॥
लालास्रावोऽथ शोषश्च हनुग्राहो विरस्यता।
दन्तशूलं भवेद्यस्य वातेनार्दितमेव च॥
पीतार्द्धं सज्वरं तृष्णा पित्तजे मोह एवच।
श्लेष्मसम्भोऽस्य भवति कफोद्भूते ऽथवार्दिते"॥"॥)

"वातात्पित्तात्कफाच्च स्यात् त्रिविधं तत्समासतः।
लालास्रावो व्यथा कम्पः स्फुरणं हनुवाग्ग्रहः॥
ओष्ठयोः श्वयथुः शूलस्यार्दिते वातजे भवेत्।
पीतमास्यं ज्वरस्तृष्णा पित्तजे मोहधूपने॥
गण्डे शिरसि मन्यायां शोथः स्तम्भः कफात्मके"॥"॥
(अथ तस्य चिकित्सामाह सुश्रुतः॥ अर्दितातुरं बलवन्तमुपकरणवन्तञ्च वातव्याधिविधानेनोपचरेदैरण्येकैश्च मस्तिष्कशिरोवस्तिस्नेहधूपोपनाहस्नेहनाड़ीस्वेदादिभिः। ततः सटङ्कं महापञ्चमूलं काकोल्यादिं विदारिगन्धादि मौदकानूपमांसं तथैवौदकन्दांश्च संहृत्य द्विगुणोदके क्षीरद्रोणे निक्षाथ्य पादावशिष्टमवतार्य परिस्राव्य तैलप्रस्थेनोन्मिश्रं पुनरग्नावधिश्रयेत् ततस्तैलं क्षीरानुगतमवतार्थ शीतीभूतमभिमन्त्रीयात्तच्च यः स्नेहः उत्तिष्ठेत्तमादाय मधुरौषधसहाक्षीरयुक्तं विपचेदेतत् क्षीरतैलमर्दितातुराणां पानाभ्यङ्गादिधूपयोज्यं॥ तैलहीनं वा क्षीरसर्पिरक्षितर्पणमिति॥ * चरकस्तु॥

"अर्दिते नावनं मूर्द्धि तैलं तर्पणमेव च॥
नाड़ीस्वेदोपनाहाश्च आनूपपिशितैर्हिताः"॥ *॥

वाभटश्च॥

"अर्दिते नावनं मूर्द्धि तैलं श्रोत्राक्षितर्पणं।
सशोफे वमनं दाहरागयुक्ते शिराव्यधः"॥ *॥

हारीतसंहितायां।

"अर्द्धं पलं रसोनस्य हिङ्गुसैन्धवजीरकैः।
सौवर्चलेन संयुक्तं तथैव कटुकत्रिकं॥
घृतेन संयुतं भक्षेन्मासमेकं दिने दिने।
निहन्ति वातरोगञ्च अर्दितञ्च प्रतानकं"॥ *॥

चक्रपाणिसंग्रहे॥

"रसोनं नवनीतेन प्राश्य हन्त्यर्दितं द्रुतं।
अर्दिते नवनीतेन खादेन्माषगुड़ौ नरः॥
क्षीरमांसरसैर्भुक्त्वा दशमूलीरसं पिबेत्।
स्नेहाभ्यङ्गशिरोवस्तिपाननस्यपरायणः।
अर्दितं स जयेत् सर्पिः पिबेदौत्तरभक्तिकं"॥ *॥

भावप्रकाशेऽप्येतदतिरिक्तं यत्संगृहीतं तच्चैतत्॥)

"स्नेहपानानि नस्यञ्च भोज्यान्यनिलघ्नानि च।
उपनाहाश्च शस्यन्ते स्वेदनं वस्तयोऽर्दिते"॥

वस्तिरत्रशिरोवस्तिरेव।

"दशमूलीकषायेण मातुलुङ्गरसेन वा।
बलया पञ्चमूल्या वा क्षीरं वातात्मके हितं॥
पिष्टं माषकृतं जग्ध्वा नवनीतेन सोऽर्दिती।
क्षीरं मांसरसैर्भुक्त्वा दशमूलीरसं पिबेत्॥
अर्दिते पित्तजे प्रीतान् स्नेहांश्चैव विनिर्दिशेत्।
घृतवस्तिप्रसेकञ्च क्षीरसेकं तथैव च॥
जिह्मीभूतानने मूको दाहवान् योऽर्दिती भवेत्।
कुर्य्यात् प्रतिक्रियां तस्य वातपित्तविनाशिनीं॥
श्लेष्मभागे क्षयं नीते लंघनैः समुपाचरेत्।
अर्दिते शोथसंयुक्ते वमनञ्च प्रशस्यते॥

रसोनकल्कं तिलतैलमिश्रं
खादेन्नरो योऽर्दितरोगयुक्तः।
तस्यार्दितं नाशमुपैति शीघ्रं
वन्दं घनानामिव वायुवेगात्"॥ इति।

अर्दितः, त्रि, (अर्द् + क्तः।) याचितः। इत्यमरः॥ हिंसितः। इति मेदिनी॥ गतः। पीड़ितः। इति शब्दरत्नावली॥

अर्द्ध, क्ली, (ऋध् + घञ्।) समानांशः। समभागः। इत्यमरः॥ आधा इति भाषा। समभागेऽर्द्धशब्दः पुमान् क्लीबञ्च। अर्द्धशब्दः पुंलिङ्गः खण्डपर्य्यायएव विभागीकृत्य वर्त्तितस्य तुल्यवर्त्तिते अर्द्ध क्लीबमेवेति केचित्। अर्द्धो रूपभेदात् भागे पुंसि। तथा वस्त्रार्द्धो नगरार्द्धः उपचारात्तु भागवति वाच्यलिङ्गः। यथा अर्द्धा शाटी अर्द्धः कम्बलः अर्द्धं वस्त्रं। इति माधवी॥ असमपरिभागवृत्तिस्त्रिलिङ्गोऽर्द्धइत्यनुन्नासः। समग्रविभागेऽर्द्धशब्दो नपुंसक एव नान्यलिङ्गः। इति भागवृत्तिः। इति भरतः॥

अर्द्धः, पुं, (ऋध् + घञ्।) एकदेशः। तत्पर्य्यायः। भित्तं २ शकलं ३ खण्डं ४। इत्यमरः॥ ("पक्षार्द्धेन प्रविष्टः शरः पतनभयाद्भूयसा पूर्व्वकायम्"॥ इति शाकुन्तले।

"सर्व्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः।
अर्द्धेन कुरुते कार्य्यं सर्व्वनाशो हि दुःसहः"॥ इति पञ्चतन्त्रे।)

अर्द्धगङ्गा, स्त्री, (अर्द्धं गङ्गायाः, एकदेशतत्पुरुषः।) कावेरी नदी। इति त्रिकाण्डशेषः॥

अर्द्धगुच्छः, पुं, (अर्द्धः चन्द्रसमः गुच्छः।) चतुर्विंशतिगच्छकहारः। इति हेमचन्द्रः॥ चव्विशनरि दाना इति भाषा।

अर्द्धचन्द्रः, पुं, (अर्द्धं चन्द्रस्य।) नखक्षतं। बाणविशेषः।

("चतुर्भिरर्द्धचन्द्रैश्च जघान चतुरो हयान्"। इति रामायणे।) गलहस्तः। ("ग्रहगोलाः सर्व्वेऽर्द्धचन्द्रं दत्वा निःसारिताः"। इति पञ्चतन्त्रे।) गलाटिपी यस्य प्रसिद्धिः। इति मेदिनी॥ चन्द्रकः।

चन्द्रखण्डं । इति हेमचन्द्रः ॥ मयूरपुच्छेर चाँद इति भाषा ।

अर्द्धचन्द्रा, स्त्री, (अर्द्धं चन्द्रस्य, अर्द्धचन्द्र + टाप् ।) क्षणचिरत्, इत्यमरः ॥ काल तेउड़ी इति भाषा ।

अर्द्धचन्द्रिका, स्त्री, (अर्द्धचन्द्र + स्वार्थे कन्, ह्रस्वे अत इत्त्वे टाप् ।) कर्णस्फोटालता । इति राजनिर्घण्टः ॥

अर्द्धचोलकः, पुं, क्षुद्रचोलकः । इति हारावली ॥ काँचली इति भाषा ।

अर्द्धजाह्नवी, स्त्री, (अर्द्धं जाह्नव्याः ।) कावेरी नदी । इति हेमचन्द्रः ॥

अर्द्धतिक्तः, पुं, (अर्द्धः असम्पूर्णस्तिक्तः ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ (नेपालनिम्बशब्देऽस्य गुणा वक्तव्याः ॥)

अर्द्धनारीशः, पुं, (अर्द्धाङ्गे या नारी पार्ब्बतीरूपा तस्या ईशः ।) शिवः । इति शब्दरत्नावली ॥ तस्य ध्यानं यथा,—

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशाङ्कुशोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

इति तन्त्रसारः ॥

अर्द्धनारीश्वरः, पुं, (अर्द्धाङ्गे या नारी तस्या ईश्वरः ।) उमामहेश्वरः । स च शिवः । यथा विष्णुधर्म्मोत्तरे ।

"अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः" ॥

इति तिथ्यादितत्त्वं ॥ अपि च ।

"अजेशः सर्व्वसोमेशस्तथा लाङ्गुलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढ़िदण्डिनौ" ॥

इति तन्त्रसारे शिवमन्त्रे श्रीकण्ठादिन्यासः ॥ * ॥ अस्य मन्त्रादिकं यथा,—

"अग्निसंवर्त्तकादित्यशनिलौ षष्ठविन्दुमत् ।
चिन्तामणिरिति ख्यातं बीजं सर्व्वसमृद्धिदं" ॥

अग्नीरेफः । संवर्त्तकः क्षकारः । आदित्यो मकारः । र रेफः । अनिलो यकारः । औ स्वरूपं । षष्ठस्वर ऊकारः ॥ प्रपञ्चसारे । "अनलकयमरेफप्राणसत्यान्तवामश्रुतिहिमरुचिखण्डैर्मण्डितो मन्त्रराजः" । इति वचनात् रेफ एव न तु वकारः । रूँ क्षूँ मूँ रूँ यूँ औँ ऊँ । इति मन्त्रः । अस्य पूजा प्रातःकृत्यादिश्चैवोक्तपीठमन्यत्तं विन्यस्य ऋष्यादिन्यासं कुर्य्यात् । यथा शिरसि काश्यपाय ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि अर्द्धनारीश्वराय देवतायै नमः । ततः कराङ्गन्यासौ कुर्य्यात् । रं अङ्गुष्ठाभ्यां नमः । कं तर्जनीभ्यां स्वाहा । षं मध्यमाभ्यां वषट् । मं अनामिकाभ्यां हूँ । रं कनिष्ठाभ्यां वौषट् । यं करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । तथा च निबन्धे । "रेफादिबिन्द्वन्तैः षड्भिः कुर्य्यादङ्गानि षट् क्रमात्" । ततो ध्यानं ।

'नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशाङ्कुशोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत । यथा । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च रं इत्यादिना षड़ङ्गानि पूजयेत् । ततः पत्रेषु पूर्ब्ववत् दमभादीन् पूजयेत् । पत्राग्रेषु पूर्ब्वादितः ब्राह्मीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीं इन्द्राणीं चामुण्डां महालक्ष्मीञ्च पूजयेत् । तद्बहिरिन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः । तथा च ।

"लक्षमेकं जपेन्मन्त्रमित्थं मन्त्री विचिन्तयन् ।
अयुतं मधुरासिक्तैर्जुह्वात्तिलतण्डुलैः" ॥

इति तन्त्रसारः ॥

अर्द्धपारावतः, पुं, (अर्द्धेन अङ्गेन पारावत इव ।) चित्रकण्ठकपोतः । तित्तिरिपक्षी । इति मेदिनी ॥

अर्द्धमाणवः, पुं, द्वादशयष्टिकहारः । इति हेमचन्द्रः ॥ बारोनरि हार इति भाषा ।

अर्द्धरात्रः, पुं, (अर्द्धं रात्रेः, अर्द्धं नपुंसकमित्येकदेशी समासः, अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेरिति समासान्तोऽच्प्रत्ययः, रात्र्यह्नाह्नां पुंसि इति नियमात् पुंस्त्वम् ।) रात्र्यर्द्धभागः । दुइप्रहर राचि इति भाषा । तत्पर्य्यायः । निशीथः २ । इत्यमरः ॥ निसम्पातः ३ अवसरालयः ४ । इति शब्दरत्नावली ॥ सुप्तजनः ५ । इति जटाधरः ॥ रात्र्यष्टमुहूर्त्तः । स तु रात्रिमध्यदण्डद्वयात्मकः । सम्पूर्णार्द्धरात्रोऽप्ययं । महानिशा । सा तु सार्द्धप्रहरानन्तरं सार्द्धतृतीयप्रहरपर्य्यन्तं । इति स्मृतिः ॥

("मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्" । "मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः । चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक एव वा" ॥ इति मनुः ।)

अर्द्धर्चः, पुं, क्ली, (अर्द्धं ऋचः समासान्तः अच्प्रत्ययः ।) अर्द्धऋक् । ऋङ्नामकवैदिकमन्त्रार्द्धभागः । इत्यमरः ॥

अर्द्धलक्ष्मीहरिः, पुं, (अर्द्धं लक्ष्म्या आकारे, अर्द्धं च हरेः, तादृशो हरिः ।) विष्णुः । यथा । गौतमीये,—

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षड़ङ्गकं" ॥

अस्य मन्त्रादि यथा,—

"तारं नमः पदं ब्रूयान्नरौ दीर्घसमन्वितौ ।
पवनोऽयमन्त्रोऽयं प्रोक्तो वसुक्षरः परः" ॥

अस्य पूजाप्रयोगः । प्रातःकृत्यादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये,—

"केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ ।
द्वाभ्यामोष्ठौ विमृज्य द्वाभ्यां मृज्यान्मुखं ततः ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः ॥

आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् ।
स्पृशेदेवं भवेदाचमनञ्च वैष्णवाव्वये ॥
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्" ॥

केशवादयस्तु केशव-नारायण-माधव-गोविन्द-विष्णु-मधुसूदन-त्रिविक्रम-वामन-श्रीधर-हृषीकेश-पद्मनाभ-दामोदर-सङ्कर्षण-वासुदेव-प्रद्युम्नानिरुद्ध-पुरुषोत्तमाधोक्षज-नृसिंहाच्युत-जनार्द्दनोपेन्द्र-हरिविष्णवः ॥ वाक्यन्तु ओम् केशवाय नमः । इत्यादि । तथा च ।

"सचतुर्थिनमोऽन्तैश्च नामभिर्व्विन्यसेत् सुधीः"

ततः सामान्यार्घ्यादिमाढकान्यासान्तं कर्म्म विधाय केशवकीर्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादिन्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि अर्द्धलक्ष्मीहरये देवतायै नमः । ततः कराङ्गन्यासौ । श्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि । श्रीं हृदयाय नमः । इत्यादि । तथा च गौतमीये ।

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षड़ङ्गकं" ॥

ततो ध्यानं ।

"उद्यत्प्रद्योतनप्रतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टं ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं,
विष्णुं वन्दे दरकमलकौमोदकीचक्रपार्णिं" ॥

इत्यादि । इति तन्त्रसारः ॥

अर्द्धवीक्षणं, क्ली, (अर्द्धमसम्पूर्णं वीक्षणम् ।) अपाङ्गदर्शनं । कटाक्षः । इति हेमचन्द्रः ॥

अर्द्धाशनं, क्ली, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश् + ल्युट् ।) अर्द्धाशनं । अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धसफरः, पुं, (अर्द्धः सफरः ।) क्षुद्रमत्स्यविशेषः । दाँड़िका माछ इति भाषा । तत्पर्य्यायः । दण्डपालः २ । इति हारावली ॥

अर्द्धहारः, पुं, (ऋध-दृढौ + अच्, अर्द्धः सम्पन्नः हारः ।) चतुःषष्टियष्टिकहारः । इत्यमरः ॥ चौषट्टिनरि हार इति भाषा ।

अर्द्धाशनं, क्ली, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश् + ल्युट् ।) अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धासनं, क्ली, (अर्द्धमासनस्य ।) खेदादानं । अकुत्सनं । इति धरणिः ॥ (उपवेशनार्थमासनार्द्धदानरूपः खेदव्यञ्जकः सम्मानभेदः । यथा,—

"अर्द्धासनं गोत्रभिदोऽधितस्थौ" । इति रघुवंशे । "मम हि दिवौकसां समक्षम् अर्द्धासनोपवेशितस्य" । इति शाकुन्तले ।)

अर्द्धेन्दुः, पुं, (अर्द्धमिन्दोः ।) चन्द्रार्द्धभागः । नखचिह्नं । नखक्षतः । अतिप्रौढ़स्त्रीयोन्यङ्गुलियोजनं । इति मेदिनी ॥ अर्द्धचन्द्रवाणः । इति हेमचन्द्रः ॥

अर्द्धोदयः, पुं, (अर्द्धस्य समृद्धस्य पुण्यस्य उदयो यत्र ।) योगविशेषः । स च रविवारव्यतीपातअवष्वान्तैर्युक्ता चेत् पौषमाघयोरमावास्या स्यात्तदा भवति । यथा । पाद्मात्तनिर्णयात्ते ।

अर्ब्बु

"अमार्कपातश्रवणैर्युक्ता चेन्माघपौषयोः।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः॥
अत्र सूर्य्यपर्व्वशतादधिक इति कृत्यचिन्तामणौ पाठः। तथा।
"दिवैव योगः श्रवणोऽयं न च रात्रौ कदाचन।"
स्कन्दपुराणे।
"अर्द्धोदये तु संप्राप्ते सर्व्वं गङ्गासमं जलं।
शुद्धात्मानो द्विजाः सर्व्वे भवेयुर्ब्रह्मसन्निभाः॥
यत्किञ्चित् क्रियते दानं तद्दानं सेतुसन्निभं"॥
शिवविष्णुस्थानप्रशस्तकालोऽपि। बृहन्नारदीयं।
"अर्द्धोदये च पूष्यार्के हस्तार्के रोहिणीबुधे"।
इति तिथ्यादितत्त्वं॥

अर्द्धोरुकं, क्ली, (अर्द्धमूरोः अर्द्धोरु, तत्र काश्यते, काश + ड।) उत्तमस्त्रीणां अर्द्धोरुपर्य्यन्तं चेलनाकारपरिधेयवस्त्रं। तत्पर्य्यायः। चण्डातकं २। इत्यमरः॥

अर्पणं, क्ली, (ऋ + णिच् + ल्युट्।) प्रापणं। समर्पणं। यथा,—
"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं"॥
इति श्रीभगवद्गीतायां ९ अध्यायः। (स्थापनं। न्यासः।
"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम्"।
इति रघुवंशे। स्वत्वत्यागः। परित्यागः।
"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये"।
इति साहित्यदर्पणे।)

अर्षिसः, पुं, (ऋ + णिच् + इसन्।) हृदयं। इत्युणादिकोषः॥ (अग्रमांसः।)

अर्ब्ब, हिंसे। (भादि-परं-सकं-सेट्।) गतौ। इति कविकल्पद्रुमः॥ अर्ब्बति। इति दुर्गादासः॥

अर्ब्बुदः, पुं, क्ली, (अर्ब्ब + विच्, तस्मै उदेति, उद् + इण + ड।) दशकोटिसंख्या। रोगविशेषः। मांसकीलः। मांसपुरुषः। आव् इति भाषा। इति लिङ्गादिसंग्रहे अमरो मेदिनी च॥ तस्य निदानलक्षणे।
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरवृद्धपाकं॥
कुर्व्वन्ति मांसोच्छ्रयमत्यगाधं
तमर्ब्बुदं शास्त्रविदो वदन्ति"।
महान्तं यश्चिरेण चिरेण वृद्धिरपाकश्च यस्य तत् चिरवृद्धपाकं। अपाकमिति यत्नेन सकाशादस्य भेदशापकं। अत्यगाधं दूरानुप्रविष्टं॥*॥
निदानपूर्व्वकाणि विशिष्टानि लक्षणान्याह।
"वातेन पित्तेन कफेन वापि
रक्तेन मांसेन च मेदसा च।
तज्जायते तस्य च लक्षणानि
यत्नेन समानानि सदा भवन्ति"॥
यत्नेन समानानि वातिकपैत्तिकश्लैष्मिकमेदोजानां यद्यपीनां लक्षणैर्व्वातिकपैत्तिकश्लैष्मिकमेदोजानामर्ब्बुदानां लक्षणानि तुल्यानि भवन्ति॥*॥ रक्तार्ब्बुदमाह।
"दोषप्रदुष्टे रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकं।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराहतमाशु वृद्धिं॥
सवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यपेतद्रुधिरात्मकन्तु।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्ब्बुदपीड़ितस्तु"॥
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संहतीकृत्य मांसास्रजोः सर्व्वेष्वर्ब्बुदेषु दूष्यत्वं रक्तजे तु विशेषतो रक्तदुष्टिः। एवं मांसार्ब्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डमुन्नह्यति उन्नतं करोति। अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणं ईषत्पाकञ्च एकदेशपाकेन। रक्तक्षयोपद्रवपीड़ितत्वात्। रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः। तैः पीड़ितत्वात्। अर्ब्बुदपीड़ितः रक्तार्ब्बुदपीड़ितः॥* मांसार्ब्बुदस्य संप्राप्तिमाह
"मुष्टिप्रहारादिभिरर्दितेऽङ्गे
मांसं प्रदुष्टं समुपैति शोथं।
अवेदनं स्निग्धमनन्यवर्ण-
मपाकमश्मोपममप्रचाल्यं"॥
मांसं प्रदुष्टं वातेन। अवेदनं वेदनारहितं ईषद्वेदनं वा। अपाकं पाकरहितं ईषत्पाकं वा। अश्मोपमं पाषाणवत् कठिनं। अप्रचाल्यं स्थिरं। यद्यपि रक्तमांसार्ब्बुदयो रक्तमांसयोर्हेतुत्वेनोक्तिः तथापि रक्तजे पित्तं मांसजे वायुरारम्भकः॥*॥ निदानमाह।
"प्रदुष्टमांसस्य नरस्य गाढ़-
मेतद्भवेन्मांसपरायणस्य"।
मांसाशनाभ्यासेन यः प्रदुष्टमांसस्तस्यैव भवति इत्यर्थः॥*॥ असाध्यमाह।
"मांसार्बुदं खेतदसाध्यमाहुः
साध्येष्वपीमानि विवर्जयेच्च।
संप्रस्तुतं मर्म्मसु यच्च जातं
स्रोतःसु वा यच्च भवेदचाल्यं"॥
साध्येष्वपि वातजादिष्वपि। इमानि वक्ष्यमाणानि संप्रस्तुतादीनि॥*॥ अपरासाध्यमाह।
"यज्जायतेऽन्यत् खलु पूर्व्वजाते
ज्ञेयं तदध्यर्ब्बुदमर्ब्बुदज्ञैः।
यद्वृद्धजातं युगपत् क्रमाद्वा
दिरर्ब्बुदं तच्च भवेदसाध्यं"॥*॥
अर्ब्बुदानां पाकाभावे हेतुमाह।
"न पाकमायाति कफाधिकत्वा-
न्मेदोबहुत्वाच्च विशेषतस्तु।
दोषस्थिरत्वात् ग्रथनाच्च तेषां
सर्व्वार्ब्बुदान्येव निसर्गतस्तु"।
ग्रथनात् ग्रन्थिरूपत्वात्। नन्वत्र कथं मेदसोराधिक्येऽपि पाको दृश्यते तत्राह कथं न पाक इत्याह निसर्गात् स्वभावात्॥*॥
अथार्ब्बुदस्य चिकित्सा।

अर्ब्बु

"यस्यार्ब्बुदानां न यतो विशेषः
प्रदोषहेत्वाकृतिदोषदुष्टेः।
अतश्चिकित्सेद्भिषगार्ब्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन॥
हरिद्रा-लोध्र-पत्तङ्ग-रक्तधूम-मनःशिला।
मधुप्रगाढ़ो लेपोऽयं मेदोऽर्ब्बुदहरः परः॥१॥
मूलकस्य क्षतः क्षारो हरिद्रायास्तथैव च।
शङ्खचूर्णेन संयुक्तो लेपः सिद्धोऽर्ब्बुदापहः॥२॥
वटदुग्धकुशरोमकलिप्तं बद्धं वटस्य पत्रेण। अध्यक्षिसप्तरात्रात् महादण्डपथ्यान्तिमर्ब्बुदं गच्छेत्॥३॥
शिग्रुमूलकयोर्ब्बीजं रक्तोन्नं सुरसा यवं।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्ब्बुदशान्तये॥४॥
रक्तोन्नं सर्षपं। सुरसा तुलसी। यवं रन्ध्रयवं। अश्वरिपुं करवीरं। इत्यर्ब्बुदाधिकारः। इति भावप्रकाशः॥

अर्ब्बुद, पुं, (अर्ब्ब + उदच्।) पर्व्वतविशेषः। इति मेदिनी॥

अर्भः, पुं, (ऋ + भ।) बालकः। इति हेमचन्द्रः॥ (प्रभाहीनः। मलिनः। शिश्यः। क्षाचः। शिशिरः। शाकशस्यादिकं।)

अर्भकः, पुं, (अर्भ एव, स्वार्थे कन्।) शिशुः। इत्यमरः॥
("अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः"।
इति रघुवंशे।) मूर्खः। क्षुद्रः। इति मेदिनी॥ स्वल्पः। सदृशः। इत्युणादिकोषः॥

अर्म्म, क्ली, पुं, (ऋ + मन्।) चक्षुरोगविशेषः। इति लिङ्गादिसंग्रहे अमरः॥ तच्च षड्विधं। प्रस्तार्य्यर्म्म १ शुक्लार्म्म २ रक्तार्म्म ३ मांसार्म्म ४ स्नायवर्म्म ५। एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि। वैद्यके नान्तक्लीवलिङ्गोऽयं शब्दः॥

अर्म्मणः, पुं, (ऋ + बाहुलकात् मनन्।) द्रोणपरिमाणं। इति वैद्यकपरिभाषा॥

अर्य्यः, पुं, (ऋ + यत्।) स्वामी। वैश्यः। इत्यमरः॥ श्रेष्ठे च। इति तट्टीकायां भरतः॥ (चि, उत्कृष्टः। न्यायः। प्रभुः।

अर्य्यमा, [न्] पुं, (अर्य्यं श्रेष्ठं मिमीते, मा + कनिन्।) सूर्य्यः।
("प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव"।
इति माघः।
"सूर्य्योऽर्य्यमा भगस्त्वष्टा पूषार्कः सविता रविः।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः"॥
इति महाभारते। काश्यपात् दक्षकन्यया दित्या जातो द्वादशादित्यमध्ये परिगणितः ख्यात आदित्यः, यदुक्तं हरिवंशे,—
"मारीचात् कश्यपाज्जातस्ते दित्या दक्षकन्यया।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह॥
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत!॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशोभगस्तथातितेजा आदित्या द्वादश स्मृताः"॥)
अर्कवृक्षः। इत्यमरः॥ भिन्नदेवविशेषः। इति मेदिनी॥

अर्य्या, स्त्री, (ऋ + यत् + टाप्।) वैश्यस्त्रीजातिः। इत्यमरः॥
अर्य्याणी, स्त्री, (अर्य्य + आनुक् + ङीप्।) वैश्यस्त्रीजातिः। इत्यमरः॥
अर्य्यी, स्त्री, (अर्य्य + ङीप्।) वैश्यपत्नी। इत्यमरः॥ वैश्यस्त्रीजातिः। इति दुर्गादासः॥
अर्व्व वधे। (इति कविकल्पद्रुमः)॥ (भादिं-परं-सकं-सेट्।) अर्व्वति। इति दुर्गादासः॥ अन्तःस्थवकारान्तोऽयं॥
अर्व्वती, स्त्री, (अर्व्व + बाहुलकात् वनिप् + ङीप्।) घोटकी। इति हलायुधः॥ कुट्टनी। इति त्रिकाण्डशेषः॥
अर्व्वा, [न्] पुं, (ऋ + वनिप्।) घोटकः। इत्यमरः॥ इन्द्रः। गोकर्णपरिमाणं। इति विश्वः॥ कुत्सिते च। इत्यमरः॥
अर्व्वाक्, व्य, (अवरे काले देशे वा अञ्चति, अन्च + क्विन्, एषोदरादित्वात् अर्व्वादेशः।) पूर्व्वकालतः पश्चात्। तत्पर्य्यायः। अवरः २। इत्यमरः॥ निकटं। इति भरतः। अर्व्वाच् इति केचित्॥
अर्व्वाचीनः, त्रि, (अर्व्वाग्भवः, खः।) पश्चाज्जातः। विपर्य्यस्तं। इति धरणिः॥ (इदानीन्तनः। अधोभागस्थितः। अवरदेशगतः।
("यदूर्द्धं एथिव्या अर्व्वाचीनमन्तरीक्षात्"। इति श्रुतपथब्राह्मणे।)
अर्श, क्ली, (ऋच्छ् + अच्।) अर्शोरोगः। इति शब्दरत्नावली॥ (वलिकाकारः गुह्यस्थरोगभेदः।)
अर्शः, [स्] क्ली, (ऋ + असुन्, शुट्।) खनामख्यातपायुरोगः। तत्पर्य्यायः। दुर्नामकं २। इत्यमरः॥ दुर्नाम ३ गुदकीलः ४ गुदाङ्कुरः ५। इति राजनिर्घण्टः॥ अनामकं ६। इति शब्दरत्नावली॥ यथा। अथार्शोऽधिकारः। तत्रार्शसः सन्निकृष्टनिदानान्याह।
"एथग्दोषैः समस्तैश्च शोणितात् सहजानि च। अर्शांसि षट्प्रकाराणि विद्याद्गुदवलिचये"॥
केचिद्बुधिरस्यापि दोषत्वं मन्यन्ते। तन्मतमाश्रित्याह। शोणितादिति। सहजानि शरीरेण सह जातानि। सङ्ख्यामाह। षट्प्रकाराणीति। गुदवलिचये सार्द्धचतुरङ्गुलं गुदस्य मानं तस्यावयवभूतास्तिस्रो वलयः शुक्लावर्त्तनिभा उपर्य्युपरि सन्ति। तासां नाम प्रवाहिणी विसर्जनी संवरणी चेति। तत्र गुदौष्ठोऽर्द्धाङ्गुलमानस्तदूर्द्धमङ्गुलमाना प्रथमा वलिः। सार्द्धैकाङ्गुलमाना द्वितीया। त्रुटीया च तावती। उक्तञ्च।
"अर्द्धाङ्गुलप्रमाणेन गुदौष्ठं परिचक्षते।
गुदौष्ठादङ्गुलं चैकं प्रथमान्तु वलिं विदुः॥
सार्द्धैकाङ्गुलमानेन एथगन्ये प्रकीर्त्तिताः"॥ *॥
अथ वातार्शसो विप्रकृष्टं निदानमाह।
"कषायकटुतिक्तानि रूक्षशीतलघूनि च।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनं॥
लङ्घनं देशकालौ च शीतौ व्यायामकर्म्म च।
शोको वातातपस्पर्शौ हेतुर्वातार्शसां मतः"॥
प्रमितमपरिमितं। तीक्ष्णमिति मद्यविशेषणं। पैष्ट्यादिमद्दुमद्यस्य वातसमकत्वात्। आतपस्पृष्यावीर्य्योऽप्युद्भूतरौक्ष्यादातपकोपे हेतुः वातार्शसां। नन्वर्शांसि सर्व्वाणि त्रिदोषजानि। यतः आह।
"पञ्चात्मा मारुतः पित्तं कफो गुदवलिक्षये।
सर्व एव प्रकुप्यन्ति गुदजानां समुद्भवः"॥ इति। तथा सति कथं वातार्शसामिति उच्यते। तत्तदाधिक्याद्यपदेशभेद इति न दोषः। अतएव अग्रे वक्ष्यते। पित्तोल्वणानामिति तथाच चरकः।
"अर्शांसि नाम जायन्ते नासन्निपतितैस्त्रिभिः।
दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसां"॥
इति॥ *॥ अथ पित्तार्शसो विप्रकृष्टनिदानमाह।
"कट्वम्ललवणोष्णानि व्यायामाप्रातपप्रभाः।
देशकालावग्निशिरौ क्रोधोमद्यमसूयनं
विदाहि तोक्ष्णमुष्णं यत् तत् सर्व्वं पानभोजनं।
पित्तेच्वाणानां विज्ञेयः प्रकोपे हेतुरर्शसां"॥
उष्णद्रव्यस्य स्पर्शनादि बोद्धव्यं उष्णपानभोजनस्याग्रे वक्ष्यमाणत्वात्। अप्रातपप्रभा अग्न्यातपयोः प्रभा तेजः। अथवा अग्न्यातपेतरतेजस्विद्रव्यस्य दीप्तिः प्रभा। अग्निशिरो देशो मरुः। असूयनं परसम्पत्तिद्वेषः। पानभोजनं पीयत इति पानं। भुज्यते इति भोजनं प्रकोपे उत्पत्तौ॥ *॥
अथ कफार्शसो विप्रकृष्टं निदानमाह।
"मधुरस्निग्धशीतानि लवणाम्लगुरूणि च।
व्यायामदिवास्वप्नप्रण्यासनसुखे रतिः॥
प्राग्वातसेवाप्रीतौ च देशकालावचिन्तनं।
श्लैष्मिकाणां समुद्दिष्टमेतत् कारणमर्शसां"॥
अचिन्तनं निश्चिन्तता॥ *॥ अथ त्रिदोषार्शसो विप्रकृष्टं निदानमाह।
"सर्व्वो हेतुस्त्रिदोषाणां सहजैर्षड्भिरं समं"।
जनकत्वेन त्रयो दोषा येषां तानि त्रिदोषाणि अर्शांसि तेषां सर्व्वो हेतुः। एथग्वातपित्तकफार्शोहेतुः। त्रिदोषार्शसां लक्षणञ्च सहजैः सहजार्शोभिः समं सदृशं। ननु त्रिदोषाणां इति विशेषणं व्यर्थं। यतः सर्व्व एव व्याधयस्त्रिदोषजाः। उक्तञ्च।
"द्वयमेकरसं नास्ति न रोगोऽप्येकदोषजः।
एकस्तु कुपितो दोष इतरावपि कोपयेत्"॥
इति। युक्तिमप्याह। खकारणाद्धेतो वायुः शैत्याच्छीतस्नेहाभ्यां लाघवात्तेजोरूपं पित्तं वर्द्धयते। तथा पित्तं कटुकत्वात् वातं द्रवत्वात् कफं वर्द्धयते। श्लेष्मा च शैत्यादायुं द्रवत्वात पित्तं वर्द्धयते इति। उच्यते। यत्र खकारणात्त्रयो दोषाः कुप्यन्ति तत्र त्रिदोषजव्यपदेश इति न दोषः॥ *॥ अथार्शसां पूर्व्वरूपमाह।
"विरुम्भोऽन्नस्य दौर्ब्बल्यं कुक्षेराटोप एव च।
कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽग्निविट्कता॥
ग्रहणीदोषपायश्च पक्वान्नस्य च दर्शनं।
पूर्व्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये"॥
दौर्ब्बल्यमाबल्यं। आटोपः गुड़्गुड़ाशब्दः। अभिवृद्धये उत्पत्तये॥ *॥ अथार्शसां संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह।
"दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन्।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः"॥
त्वङ्मांसपदेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते। चिकित्सायां रक्तस्रावणोपदेशात्। अपानं गुदं। आदिशब्दान्नासानेत्रनाभिमेढ्रादिष्वपि कुर्वन्ति॥ *॥
अथ वातार्शोलक्षणमाह।
"गुदाङ्कुरा बक्रनिभाः शुष्काश्चिमिचिमान्विताः।
श्यावारुणाः स्तब्धा विशदाः परुषाः खराः॥
मिथोविसदृशा वक्राश्चीक्ष्णा विस्फुटिताननाः।
विम्बीकर्क्कन्धुखर्ज्जूरकार्पासीफलसन्निभाः॥
केचित्कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः।
शिरःपार्श्वांसकशूलरुग्णाभ्यधिकव्यथाः॥
स्रवधूद्गारविष्मार्हृद्ग्रहारोचकप्रदाः।
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः॥
तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकं।
रूक्फेनपिच्छानुगतं विड्बद्धमुपवेश्यते॥
क्षणात्खड्गनखविण्मूत्रनेत्रवक्त्राणि जायते।
गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च"॥
बक्रनिभाः वातोल्वणाः। गुदाङ्कुराः अर्शांसि। चिमिचिमान्विताः चिमिचिमा व्यथाविशेषः चरचराव इति लोके तदन्विताः। श्यावारुणाः श्यावा धूम्रवर्णाः। अरुणा ईषद्रक्ताः। स्तब्धाः कठिनाः। विशदाः अपिच्छिलाः। परुषाः गोजिह्वावत् स्पर्शे कर्कशाः। खराः कर्क्कोटकफलवत् सूक्ष्मानेककण्टकाचिताः। विम्बादिफलसन्निभाः आकृत्याः। अत्र विकल्पबोधकं वक्ष्यमाणं केचित् केचिदिति पदं सम्बन्धनीयं।
"कदम्बपुष्पाभाः शूला अनेकसूक्ष्माग्रिखराः।
सिद्धार्थकोपमाः पीतसूक्ष्मपिड़काश्रिताः"॥
तैरार्त्त इति अर्शोभिः पीड़ितः। तैरार्त्तो विड्उपवेश्यत इत्यार्त्तस्य प्रयोज्यकर्त्तुः कर्म्मतार्थत्वात्। ग्रथितं मलगुटिकाग्रथितविड्वर्त्तिरूपं। पिच्छा पिच्छिलो द्रवभागः। बद्धं संहतं। विण्शब्दो नपुंसकोऽप्यस्ति। उपवेश्यते त्यज्यते। अतएव वातार्शस एव गुल्मादीनां सम्भवः। अष्ठीला नाभेरधोभागे पाषाणपिण्डिकावदातव्याधिविशेषः॥ *॥ अथ पित्तार्शोलक्षणमाह॥
"पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः।
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः॥
शुष्कजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः।
दाहपाकज्वरस्वेदतृष्णामूर्च्छारतिप्रदाः॥
सोष्माणो द्रवनीलीप्तापीतरक्तामवर्च्चसः।
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः"॥
पित्तोत्तराः पित्तोल्वणाः। तनु अघनं। श्लथाः लम्बिनः। सन्निभाः आकृत्या। पाको गुदस्य। सोष्माणः उष्णस्पर्शाः। हरिच्छाकवर्णं। पीतं हरितालवर्णं। हारिद्रं हरिद्रावर्णं। आदिशब्दान्मलमूत्रमुखानां ग्रहणं॥ *॥ अथ केचिद्बुधिरस्यापि दोषत्वं मन्यन्ते तन्मतमाश्रित्य रक्तार्शोलक्षणमाह।

"रक्तोल्वणा गुदे कीलाः पित्तात्कृतिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढविट्कप्रपीड़िताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥
विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते।
तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसां॥
कण्डूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकं।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणं॥
श्लिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलं।
यद्यर्शसां घनञ्चास्क् तन्तुमत् पाण्डु पिच्छिलं॥
गुदं सर्पिश्च स्त्रिमितं गुरु स्निग्धञ्च कारणं।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः"॥
गुदे कीला अर्शांसि। पित्तात्कृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः। आकारेण च वटप्ररोहादिसदृशाः। दुःखै रोगैः। त्वक्पारुष्याम्बुशीतप्रार्थनादिभिः। कलुषेन्द्रियः आकुलसर्वेन्द्रियः॥ ०॥ रक्तजस्यापि वातोल्वणस्य लक्षणमाह॥ तत्र रक्तार्शसि। अनुबन्धः उल्बणत्वं। रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यं। पित्तोल्वणस्य तु लक्षणं।
"रक्तोल्वणा गुदे कीलाः पित्तात्कृतिसमन्विताः"। इत्यादिनैवोक्तं। रक्तपित्तयोः समानलिङ्गत्वात्॥ ॥*॥ कफोल्वणस्य लक्षणमाह। सर्पिश्च पिच्छिलार्द्रं। स्त्रिमितमार्द्रचर्म्मावगुण्ठितमिव॥*॥ अथ श्लेष्मार्शोलक्षणमाह।
"श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः।
उत्पन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः॥
पिच्छिलास्त्रिमिताः श्लक्ष्णाः कण्डूढाढ्याः स्पर्शनप्रियाः
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः।
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः॥
मेहहृल्लक्ष्मशिरोजाड्यग्लशिरज्वरकारिणः।
क्लैब्याग्निमार्द्दवच्छर्द्दिरामप्रायविकारदाः॥
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः"॥
उत्पन्नाः उन्नताः। उपचिताः स्थूलाः। स्निग्धाः सस्नेहाः। स्थिरा निश्चलाः। पिच्छिलाः कफाराध्यत्वात्। स्त्रिमिताः आर्द्रवस्त्रगुण्ठिता इव। श्लक्ष्णा मणिवन्मसृणाः। करीरो वंशाङ्कुरः। पनसास्थिगोस्तनाः तदाकृतयः। वङ्क्षणानाहिनः वङ्क्षणयोरानाहकारिणः। पायुवस्तिनाभिविकर्षिणः। पार्श्वादिव्याकर्षणवत् पीड़ाकारिणः। हृल्लासः मूत्रहृल्लासः। शिरोजाड्यं शिरसो भाराक्रान्तत्वमिव। क्लैब्यं स्त्रीष्वनिच्छा। अत्र छर्द्दिशब्दः सान्त आर्षत्वात्। आमप्रायविकारदाः आमबहुला व्याधयोऽतीसारग्रहण्यादयः तान् ददति॥ ०॥ अथ द्वन्द्वजार्शोलक्षणमाह।
"हेतुलक्षणसंसर्गाद्विद्यात् द्वन्द्वोल्वणानि च"॥*॥ अत्र त्रिदोषार्शसः सहजार्शसश्च लक्षणमाह।
"सर्व्वैः सर्व्वात्मकान्याहुर्लक्षणैः सहजानि च"।

सर्व्वैर्लक्षणैर्वातपित्तश्लेष्मार्शोलक्षणैः प्रागुक्तैः। सर्व्वात्मकानि सान्निपातिकान्यर्शांस्याहुः। तथा तरेव लक्षणैः सहजानि चार्शांस्याहुः॥*॥ तन्त्रान्तरे सहजार्शोलक्षणं पृथगाह।
"अर्शांसि सहजातानि दारुणानि भवन्ति हि।
दुर्दर्शनानि पापूनि परुषाण्यरुणानि च॥
अन्तर्म्मुखानि तैरार्त्तः क्षीणः क्षीणस्वरो भवेत्।
क्षीणानलः क्षीणरेताः शिरासन्ततविग्रहः॥
अल्पप्रजः क्रोधशीलः सन्ततान्त्रस्वनान्वितः।
शिरोरुक्कर्णनासासु रोगी हृल्लासवेगवान्"॥*॥
अथ सुखसाध्यार्शोलक्षणमाह।
"बाह्यायान्तु बलौ जातान्येकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च"॥
बाह्यायां बलौ संवरण्यां। न चिरोत्पतितानि अनतिक्रान्तसंवत्सराणि। एतानि लक्षणानि मिलितानि सुखसाध्यत्वबोधकानि॥*॥ अथ कृच्छ्रसाध्यार्शोलक्षणमाह।
"द्वन्द्वजानि द्वितीयायां बलौ यान्याश्रितानि च।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च"॥
द्वितीयायां बलौ विसर्ज्जन्यां। परिसंवत्सराणि परिगतः सवत्सरो येषां तानि। अतिक्रान्तसंवत्सराणि इति यावत्। एतानि प्रत्येकं कृच्छ्रसाध्यलक्षणानि॥*॥ अथासाध्यार्शोलक्षणमाह।
"सहजानि चिरोत्थानि यानि चाभ्यन्तरां वलिं।
जायन्तेऽर्शांसि संगृह्य तान्यसाध्यानि निर्दिशेत्"॥
अभ्यन्तरां वलिं प्रवाहिणीं। एतान्यपि प्रत्येकमसाध्यलक्षणानि।
"श्लेष्मलादायुषस्तानि चतुष्पादसमन्वये।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा"॥
यद्यायुषः श्लेषो वर्त्तते चिकित्सायाश्चत्वारः पादास्ते यथा। वद्यवचनकारी धनवानुदारो जितेन्द्रियो रोगी। १। ग्राम्ये कर्म्मणि च कुशलो वैद्यः। २। अनलस आप्तः प्रियः परिचारकः। ३। नवं रसवीर्य्यादियुक्तमौषधं। ४। एषां समन्वये संयोगे सति दीप्तकायाग्नेः पुरुषस्य। तानि अर्शांसि। याप्यन्ते चिकित्सया। अतोऽन्यथा प्रत्याख्येयानि न चिकित्स्यानीत्यर्थः॥*॥ अथार्शोऽरिष्टमाह।
"हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः॥
असाध्यः सन्निपतितमरणो वेदितव्यः। अर्शसः अर्शोरोगयुक्तः। एतन्मिलितमरिष्टलक्षणं।
"हृत्पार्श्वशूलं संमोहश्छर्द्दिरक्तस्य रुग्ज्वरः।
छर्द्या गुदास्यपाकश्च निहन्युर्गुदजातुरं॥
गुदस्य यदास्यमोष्ठदेशस्तस्य पाकः। हृत्पार्श्वशूलादिसमस्तं यस्तं चारिष्टलक्षणं॥
"छर्द्यारोचकशूलार्त्तमतिप्रसुप्तशोणितं।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि"॥*॥
अथ मेढ्रादिजार्शोलक्षणमाह।
"मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च"॥
यथास्वं यथात्मीयलक्षणं। न चात्रोक्तनिदान-

पूर्व्वरूपसंप्राप्तिलक्षणयुक्तं। तत्र तत्रार्शःपदं तु मांसाङ्कुरसाम्यात्। गण्डूपदः किण्वुलकः॥*॥ अत्र मांसाङ्कुरसाम्यादत्राधिकारे चर्म्मकीलस्य संप्राप्तिपूर्व्वकं लक्षणमाह।
"व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।
कीलोपमं स्थिरखरश्चर्म्मकीलन्तु तद्विदुः"॥
चर्म्मा इति लोके। खरं कर्कशं॥*॥ तस्यैव वातादिभेदेन लक्षणमाह।
"वातेन तोदपारुष्यं पित्तादसितरक्तता।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता"॥
सवर्णता शरीरसमानवर्णता॥*॥ अथ सामान्यतः अर्शसश्चिकित्सा।
"यद्दोषानुलोम्याय यदग्निबलवृद्धये।
अन्नपानौषधं सर्वं तत्सेव्यं नित्यमर्शसैः"॥
अर्शसैः अर्शोरोगयुक्तैः।
"शालियष्टिकगोधूमयवान्नानि घृतैः सह।
अजाक्षीरेण वा निम्बपटोलानां रसेन वा॥
कन्दैर्व्वार्त्ताकुमूलैर्व्वा रसैर्मांसरसेन वा।
जीवन्त्युपोदिकाशाकैस्तण्डुलीयकदान्तुकैः"॥१॥
कन्दोऽत्र सूरणः। अत्र मूलं मूलकं।
"अन्यैश्च रूक्षविष्मूत्रमरुद्भिर्वर्द्धिदीपनैः।
अर्शांसि भिन्नवर्चांसि हन्याद्वातातिसारवत्॥
सतक्रं लवणं दद्याद्वातवर्चोऽनुलोमनं।
न प्ररोहन्ति गुदजाः पुनस्तक्रसमाहताः॥
तक्राभ्यासेऽर्शसैः कार्य्यो बलवर्णाग्निवृद्धये।
क्षोतःसु तक्रशुद्धेषु सम्यक् चलति यद्रसः॥
तेन पुष्टिस्तथा तुष्टिर्बलं वर्णश्च जायते।
वातश्लेष्मविकाराणां घृतञ्च विनिवर्त्तयेत्॥
स्निग्धं शौरिं कन्दं पक्वामौ पुटपाकवत्।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये॥२॥
चिरिबिल्वाग्निसिन्धूत्थनागरेन्द्रयवारलून्।
तक्रेण पिबतोऽर्शांसि निपतन्त्यरुजा सह"॥
चिरिबिल्वः करञ्जः तस्य फलस्यात्र मज्जा ग्राह्यः। अरलुः श्योनाकः। करञ्जादिचूर्णं॥३॥
"लेपं रजनिचूर्णेन सुधादुग्धयुतेन च।
अर्शोरोगनिवृत्त्यर्थं कारयेत्तच्चिकित्सकः॥४॥
पिप्पलीसैन्धवं कुष्ठं शिरीषस्य फलं तथा।
स्नुग्दुग्धमर्कदुग्धं वा लेपोऽयं गुदजान् हरेत्॥५॥
हरिद्राजालिनीचूर्णं कटुतैलसमन्वितं।
एष लेपो वरः प्रोक्तो ह्यर्शसामन्तकारकः"॥
जालिनी कटुतुरइ इति लोके॥६॥
"असितानां तिलानान्तु पलं शीतजलेन तु।
खादतोऽर्शांसि शाम्यन्ति दृढ़ा दन्ता भवन्ति हि॥७॥
शुष्कैर्व्वाथ जलौकोभिः प्रोच्छूनकठिनार्शसः।
शोणितं सञ्चितं दृष्ट्वा हरेत् प्राज्ञः पुनः पुनः॥८॥
कासीसं सैन्धवं क्षारा शुण्ठी कुष्ठञ्च लाङ्गली।
शिलाभिदश्वमारश्च दन्तीजन्तुघ्नचित्रकं॥
तालकं कुनटी स्वर्जक्षीरी चैतैः पचेद्भिषक्।
तैलं स्नुह्यर्कपयसा गवां मूत्रे चतुर्गुणे॥
एतदभ्यङ्गतोऽर्शांसि क्षारेणैव पतन्ति हि।
क्षारकर्म्मैकरं ह्येतन्न च संदूषयेद्बलिं"॥
कासीसं कौसीस इति लोके। लाङ्गली करहारी

इति लोके । शिलाभित् पाषाणभेदः । अश्वमारः कनैल इति लोके । स्वर्णक्षीरी चोक इति लोके । दृहत्क्वासीसाद्यं तैलं ॥ ९ ॥

"गुडूचीकणामरिचनागदलत्वगेलं
चूर्णीकृतं क्रमविवर्द्धितमूर्द्धमन्त्यात् ।
खादेदिदं समसितं गुदजाग्निमान्द्यं
गुल्मारुचिश्वसनकण्ठहृदामयेषु" ॥

तद्यथा । एलाच सूक्ष्मा ग्राह्या । यत आह मदनपालः ।

"एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत्" । इत्यादि । तस्या बीजभागः १ तज्जभागः २ दलं पत्रं । यत आह निघण्टौ धन्वन्तरिः ।

"तमालपत्रकं पत्रं स्यात् पलार्द्धं दलाह्वयम्" । इति तस्य भागः ३ । नागो नागकेशरं । यत आह निघण्टौ धन्वन्तरिः ।

"नागपुष्पं मतं नागं केशरं नागकेशरम्" ॥ इत्यादि । तस्य भागः ४ मरीचभागः ५ पिप्पलिभागः ६ गुडूचीभागः ७ चिनिभागः २८ । समशर्करचूर्णं ॥ १० ॥

"त्रिपलं षट्कवेरस्य चतुष्कं मरिचस्य च ।
पिप्पल्याः कुड़वार्द्धञ्च चव्यायाः पलमेव च ॥
तालीशपत्रस्य पलं पलार्द्धं केशरस्य च ।
द्विपलं पिप्पलीमूलमर्द्धकर्षञ्च पत्रकात् ॥
सूक्ष्मैलाकर्षमेकन्तु कर्षञ्च त्वङ्नागयोः ।
गुड़ात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् ॥
अङ्गप्रमाणगुटिका प्राणदा चेति सा स्मृता ।
पूर्व्वं भक्ष्यञ्च पश्चाच्च भोजनस्य यथाबलं ॥
मद्यं मांसरसं यूषं क्षारतोयं पिबेदनु ।
हन्यादर्शांसि सर्व्वाणि सहजान्यखजानि च ॥
वातपित्तकफोत्थानि सन्निपातोद्भवानि च ।
पानात्यये मूत्रकृच्छ्रे उरोरोगे गलग्रहे ॥
विषमज्वरपित्ते च पाण्डुरोगे तथैव च ।
कृमिहृद्रोगिणाञ्चैव गुल्मशूलार्त्तिनां तथा ॥
कृच्छ्रातीसाररोगाणां कामलाहिक्किनां तथा ।
गुडूचीस्थानेऽभया देया हृद्ग्रहे पित्तजे गदे ॥
प्राणदेयं सितां दत्त्वा गुड़मानाच्चतुर्गुणां ।
अस्रपित्ताग्निमान्द्यादौ प्रयोज्या गुदजातुरे ॥
अनुपाने प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलं ।
पलद्वयं त्वनिलजे पित्तजे तु पलत्रयं ॥

फलाम्लधान्याम्लरसाम्यशस्ता
मद्यं मरुद्रोगिणि चानुपानं ।
इक्षो रसक्षारहिमाम्बु पित्ते
उष्णाम्बुयूषौ कफजे विदध्यात् ॥

गवूषमाजमादेयं मृदौ क्रूरे च पक्व वा ।
अनुपानं प्रयोक्तव्यं देशकालमवेक्ष्य वा" ॥
इति प्राणदा गुटिका ॥ ११ ॥

"त्रिकत्रयं वचा हिङ्गु पाठाक्षारौ निशाद्वयं ।
चव्यतिक्ता कलिङ्गानि शताह्वा लवणानि च ॥
ग्रन्थिविल्वाजमोदा च गवेधुकविंशतिर्मतः ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥
चूर्णं विड़ालपदकं पिबेदुष्णेन वारिणा ।
एरण्डतैलयुक्तं वा लिह्याच्चूर्णमिदं नरः ॥

हन्यादर्शांसि सर्व्वाणि श्वासगुल्मभगन्दरान् ।
हृच्छूलं पार्श्वशूलञ्च वातगुल्मं तथोदरं ॥
हिक्कां कासं प्रमेहांश्च पाण्डुरोगं सकामलं ।
आमवातमुदावर्त्तमन्त्रवृद्धिं गुदक्रिमीन् ॥
अन्ये च ग्रहणीदोषा भिषग्भिर्ये प्रकीर्त्तिताः ।
विजयो नाम चूर्णोऽयं तान् सर्व्वानाशु नाशयेत् ॥
महाज्वरोपसृष्टानां भूतोपहतचेतसां ।
अप्रजानाञ्च नारीणां हितमेतद्धि भेषजं ॥
त्रिकत्रयं त्रिफलात्रिकटुत्रिसुगन्धीनि ।
क्षारौ खर्ज्जिका यवक्षारश्च । लवणानि पञ्च ।
ग्रन्थिः पिप्पलीमूलं । विड़ालपदकं कर्षं । विजयचूर्णं ॥ १२ ॥

"मरिचमौषधचित्रकशूरण-
भागा यथोत्तरं द्विगुणाः ।
सर्व्वसमो गुड़भागः
सेव्योऽयं मोदकः प्रसिद्धफलः ॥
ज्वलनं ज्वलयति जाठर-
मुन्मूलयति शूलगुल्मगदान् ।
निःशेषयति श्लीपद-
मर्शांसि विनाशयत्याशु" ॥

तद्यथा । मरिचभागः १ शुण्ठीभागः २ चिताभागः ४ शूरणभागः ८ गुड़भागः १५ । लघुशूरणमोदकः ॥१३॥

"षोड़शशूरणतोऽंशा वह्नेरष्टौ महौषधस्याथ ।
अर्द्धेन भागयुक्तिर्मरिचस्य ततोऽपि चार्द्धेन ॥
त्रिफला कणा समूला तालीशारुस्करक्रमिघ्नानां ।
भागा महौषधसमा दहनांशतालमूली च ॥
भागः शूरणतुल्यो दातव्यो वृद्धदारुकस्यापि ।
भक्ष्यैले मरिचांशे सर्व्वाण्येकत्र कारयेत् चूर्णं ॥
द्विगुणेन गुड़ेन युतः सेव्योऽयं मोदकः प्रकामधनैः ।
गुरुवृष्यभोज्यनिरतैरितरैर्यूषपद्धवं कुर्य्यात् ॥
भस्मकमनेन जनितं पूर्व्वमगस्त्यस्य योगराजेन ।
भीमस्य मारुतेरपि महाग्नयौ येन तौ जातौ ॥
अग्निबलमाचहेतुर्न केवलं शूरणो महावीर्य्यः ।
हन्ता शूरुक्षारानलैर्विनाप्यर्शसामेषः ॥
श्वयथुश्लीपदगदहृद्ग्रहणीषु कफानिलोद्भूतां ।
नाशयति बलीपलितं मेधां कुरुते जरां हरते ॥
हिक्कां कासं श्वासं सराजरोगान् प्रमेहांश्च ।
स्नेहानश्च तथोग्रं हन्यादाशु रसायनं पुंसां" ॥

एषां भागो यथा । शूरणभागः १६ चिताभागः८ सोठिभागः ४ मरिचभागः २ । हरीतके बहेरा आमला । पीपर पिपरामूल । तालीशं तालीशपत्रं । अरुस्करं भल्लातकं । तदसत्वे रक्तचन्दनं । विड़ङ्गं प्रत्येकं भागः ४ तालमूली मूषली तस्याः भागः ८ विधाराभागः १६ तज्जभागः २ एलाइचक्षोटीबीजभागः २ गुड़भागः ४ । ७२ । वृहच्छूरणो मोदकः ॥ १४ ॥

"त्रिवृत्तेजोवती दन्ती स्वदंष्ट्रा चित्रकं शटी ।
गवाक्षीमुस्तविश्वाश्वविड़ङ्गानि हरीतकी ॥
पलोन्मितानि चैतानि पलान्यष्टावरुस्करात् ।
वृद्धदारात् पलान्यष्टौ शूरणस्य तु षोड़श ॥
जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितं ।

पूतं तु तं रसं भूयः क्वाथ्येभ्यः त्रिगुणं गुड़ं ॥
लेहं पचेत् पुनस्तावद्यावद्वर्व्वीप्रलेपनं ।
अवतार्य्य ततः पश्चात् चूर्णानीमानि दापयेत् ॥
त्रिवृत्तेजोवतीकन्दचित्रकान् द्विपलांशिकान् ।
एलात्वक्पत्रिकं चापि नागाह्वं चापि षट्पलं ॥
द्वात्रिंशच्च पलान्यत्र चूर्णयित्वा निधापयेत् ।
ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशिनः" ॥

तेजोवती तेजवती तेजवल्कल इति च ।
कन्दः शूरणः ।

"हन्यादर्शांसि सर्व्वाणि तथा सर्व्वोदराण्यपि ।
गुल्मानपि प्रमेहांश्च पाण्डूरोगं हलीमकं ॥
दीपयेदनलं मन्दं यत्नाद्यं चापकर्षति ।
आध्मवाते प्रतिश्याये पीनसेऽयं हितो मतः ॥
भवन्त्यनेन पुरुषाः घृतं वर्षाण्यनामयाः ।
दीर्घायुषः प्रजनना वलीपलितवर्জ্জिताः ॥
गुड़ः श्रीबाऊशालोऽयं रसायनवरो मतः ।
दुर्नामान्तकरो ह्येष दृष्टो वारसहस्रशः ॥
यावद्वर्व्वीप्रलेपः स्यादयावद्दा तण्डुली भवेत् ।
तोयपूर्णे यदा पात्रे क्षिप्तो न ज्ञवते गुड़ः ॥
क्षिप्तस्तु निश्चलस्तिष्ठेत् पतितस्तु न शीर्य्यति ।
एष पाकः समस्तानां गुड़ानां परिकीर्त्तितः ॥
सार्द्धं पलं पलार्द्धं भक्षयेद्गुड़खण्डयोः ।
श्रेष्ठा तु मध्यमा हीना मात्रोक्ता मुनिभिस्त्रिधा" ।
बाऊशालो गुड़ः ॥ १५ ॥

"तिला भल्लातकं पथ्या गुड़श्चेति समांशकं ।
दुर्नामश्वासकासघ्नं श्लीपहपाण्डूज्वरापहं ॥
पित्तश्लेष्मप्रशमनी कच्छूदद्रुरुजापहा ।
गुदजान्नाशयत्याशु भक्षिता सगुड़ाभया" ॥१६॥*॥

"प्रणम्य शङ्करं रुद्रं दण्डपाणिं महेश्वरं ।
जीवितारोगमन्विच्छन्नारदोऽपृच्छदीश्वरं ॥
सुखोपायेन हे नाथ शस्त्रक्षाराग्निभिर्विना ।
चिकित्सामर्शसां नृणां कारुण्यादवक्तुमर्हसि ॥
नारदस्य वचः श्रुत्वा नराणां हितकाम्यया ।
अर्शसां नाशनं श्रेष्ठं भैषज्यं शङ्करोऽवदत् ॥
पाशुपतवचादिलोहानामादायान्यतमं शुभं ।
क्षात्वा निर्भेजमादौ तु कुनट्या माक्षिकेण च ॥
पत्तूरमूलकल्केन स्निग्धेनसयुतेन च" ।

कुनटी मनःशिला । माक्षिकं सुवर्णमाक्षिकं । पत्तूरं वकम इति लोके । शालिञ्चा इति रसेन्द्रचिन्तामणौ । रसः पारदः ।

"वह्नौ निःक्षिप्य विधिवत् सारकारेण निर्धमेत् ।
ज्वाला च तस्य रोद्धव्या त्रिफलाया रसेन वा" ॥

सारः काष्ठसारः । शालाकारेण इति रसेन्द्रचिन्तामणौ पाठः ।

"ततो विज्ञाय गलितं शङ्खनाभ्रं समुत्क्षिपेत् ।
त्रिफलाया रसे पूते तदाक्षिप्य तु निर्व्वपेत् ॥
न सम्यग्गालितं यत्तु तेनैव विधिना पुनः ।
ध्मातं निर्व्वापयेत्तस्मिन् लोहं तत् त्रिफलारसे ॥
यल्लोहं न मृतं तत्र पात्रे भूयोऽपि पूर्व्ववत् ।
मारणान्न मृतं यच्च तच्चक्ष्यमलोहवत् ॥
ततः संशोध्य विधिवत् चूर्णयेल्लोहभाजने ।
लोहेनैव तथा वत्स दृषदा सूक्ष्मचूर्णितं ॥

क्षत्वा लोहमये पात्रे मार्द्वे वा लिप्तरन्ध्रके ।
रसैः पञ्चोपमं क्षत्वा तं पचेद्भोमयाग्निना ॥
पुटानि क्रमशो दद्यात् पृथगेषां विधानतः ।
त्रिफलार्द्रवभृङ्गाणां केशराजस्य बुद्धिमान् ॥
माक्षकन्दकभल्लातवज्रीनां शूरणस्य च ।
हस्तिकर्णपलाशस्य कुलिशस्य तथैव च" ॥
भृङ्ग भङ्गरिया । केशराजः भृङ्गराज इति हिं ।
कुलिशं खुरीक्षीरं ।
"पुटे पुटे चूर्णयित्वा लोहात् षोड़शिकं पलं ।
तन्मात्रं त्रिफलायाश्च पलैकाधिकमाहरेत् ॥
अष्टभागावशिष्टे तु रसे तस्याः पचेद्बुधः ।
अष्टौ पलानि दत्त्वा च सर्पिषो लोहभाजने ॥
तांम्रे वा लोहदर्व्या तु चालयेदिधिपूर्व्वकं ।
ततः पाकविधानज्ञः खच्छे चोर्द्धे च सर्पिषि ॥
मृदुमध्यादिभेदेन मक्षीयात् पाकमाव्यतः ।
आरभेत विधानज्ञः क्षतकौतुकमङ्गलः ॥
भामरं घृतसंयुक्तं विलिह्यादक्षिकक्षमात् ।
वर्द्धमानानुपानञ्च गव्यक्षीरेण संयुतं ॥
रात्र्याभाते त्वजायाश्च स्निग्धदध्यादिभोजनं ।
सद्योवह्निकरश्चैव भल्लकश्च नियच्छति ॥
हन्ति वातं तथा पित्तं कुष्ठानि विविधं ज्वरं ।
गुल्माक्षिपाण्डुरोगांश्च निहालस्यमरोचकं ॥
शूलञ्च परिणामञ्च प्रमेहमवबाहुकं ।
अयथुं रुधिरस्रावं दुर्नामानं विशेषतः ॥
बलवद्दृढदेहत्वञ्चैव कान्तिदं खरवर्द्धनं ।
शूरीरलाघवकरमारोग्यं पुष्टिवर्द्धनं ॥
आयुष्यं श्रीकरञ्चैव वयस्तेजस्करं शुभं ।
सश्रीकपुत्रजननं वलीपलितनाशनं ॥
दुर्नामारिरयं नाम्ना दृष्टो वारसहस्रशः ।
अनेनार्शांसि दह्यन्ते यथा तूलञ्च वह्निना ॥
सौकुमार्य्यात्स्वकायत्वात् मद्यसेवी यथा नरः ।
जीर्णमद्यादियुक्तादिभोजनैः सह दापयेत्" ॥
रसेन्द्रचिन्तामणौ यथास्थाने यदा क्षतीयचरण-
स्थाने जीर्णे मद्ये प्रयोक्तव्यमिति पाठः ।
"चातपत्तिरवर्त्तीरमयूरग्रन्थिकादयः ।
चटकः कलविङ्कश्च वर्त्तका हरितालकः ॥
श्लेष्मकश्च वृहल्लावो वनविष्किरकादयः ।
पारावतमृगादीनां मांसं शाकुनकं शुभं ॥
वर्त्तीरः वगेरा इति लोके । चटको वंन्यचटकः ।
कलविङ्को मरुचटकः । वर्त्तका वटई इति लोके ।
हरितालकः हरिताल इति लोके । विष्किरा-
वर्त्तकादयः ।
"मद्गुरो रोहितः श्रेष्ठः शकुलश्च विशेषतः ।
मत्स्यराजा इमे प्रोक्ता हितमत्स्याय देहिने ॥
हन्ताकस्य फलं शुष्कं पटोलं वृहतीफलं ।
प्रलम्बाभीरवेत्राग्रं तालकन्दशुलीयकं" ॥
प्रलम्बा लम्बालावुः । अभीरुः शतावर्य्याः पत्रशाकं ।
तालकः देवदाली । तथा च निघण्टौ धन्वन्तरिः ।
"जीमूतको देवताड़ो वृत्तकोशो गरो गरी ।
प्रोक्ताखुविषवृक्षेशो देवदाली च ताड़कः ॥
देवदाली रसे तिक्ता कषायाऽग्नेयपाण्डुताः"
नञ्येदित्यादि ॥

"वालूकं धान्यशाकञ्च केमुकं चक्रवर्त्तनं" ।
चक्रवर्त्तनं चकवतशाकं ।
"नारिकेलञ्च खर्ज्जूरं दाड़िमं लवलीफलं ।
पट्टकाटकञ्च पक्वाम्रं द्राक्षा तालफलानि च ।
जातीकोशं लवङ्गञ्च पूगं ताम्बूलपत्रकं ॥
हितान्येतानि वस्तूनि लोहमेतत् समश्नतां ।
नाराचयाङ्कुचं कोलं कर्क्कन्धुवदराणि च ।
जम्बीरं बीजपूरञ्च तिन्तिड़ीं करमर्द्दकं" ॥
कोलं चुद्रवदरं । कर्क्कन्धुवदराणि महान्ति ।
"आनूपानि च मांसानि कारवं पुष्करानपि ।
हंससारसदात्यूहशुकवल्लाकिकाः ॥
माक्षकन्दकरीराणि कतकञ्च कलिङ्कं ।
कुष्माण्डकञ्च कर्क्कोटं केमुकञ्च विशेषतः ॥
कटुकं कालशाकञ्च काशेरुं कर्क्कोटीं तथा ।
ककारादीनि सर्व्वाणि छिदलानि च वर्जयेत् ॥
शूरणेरेण समाख्यातशूर्णराजोऽनुकम्पया ।
जगतामुपकाराय दुर्नामारिरयं ध्रुवं ॥
स्थानादपेति मेरुश्च पृथ्वी पर्य्येति वायुना ।
पतन्ति चन्द्रतारार्काश्च मिथ्या चेदहमब्रुवं ॥
ब्रह्मघ्नाश्च क्षतघ्नाश्च क्रूरा येऽसत्यवादिनः ।
वर्ज्जनीयाः स्वधर्म्मेण भिषजा गुरुनिन्दकाः ॥
मुनिरसपिष्टविड्रूपं मुनिरसलोड़ं चिरस्थितं धर्मे ।
द्रावयति लोहदोषान् वह्निर्नवनीतपिण्डमिव" ॥
मुनिरत्रागस्तिः ।
"काले मलप्रवृत्तिर्लाघवमुदरे विशुद्धिरुद्गारे ।
अङ्गेषु नावसादो मनःप्रसादोऽस्य परिपाके ॥
कृमिरिपुचूर्णं लोढ़ं सहितं खरसेन वङ्गसेनस्य ।
क्षपयत्यचिरात्तितयं लोहाजीर्णोद्भवं शूलं" ॥
वङ्गसेनस्य अगस्तेः ।
"जीर्णे लोहे पतति चूर्णं भुञ्जीत सिद्धसाराख्यं ।
लोहस्यापन्नश्यति विवर्द्धते जाठरो वह्निः" ॥
तद्यथा,—
"पथ्यासैन्धवशुण्ठीमागधिकानां पृथक् समो भागः ।
त्रिगुणो भागौ निम्बू भाव्यं तत् सिद्धसाराख्यं" ॥
"भवेद्यतिसारघ्नं दुग्धं पीत्वा गुडं जयेत् ।
गुल्मादरग्रकादूर्द्धं रुधिरस्य भयप्रदा" ॥
शूरणप्रयोगं लोहं । इति सामान्यक्रिया ॥१७॥*॥
अथ रक्तार्शसां चिकित्सा ।
"रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्विधक् ।
दुष्टास्रे निर्गते स्युः शूलानाहारुगामयाः ॥
चन्दनकिरातति क्तकधन्वयवासाः सनागराः क्व-
थिताः । रक्तार्शसां प्रशमना दार्व्वीत्वगुशीरनिम्बा
वा" ॥ चन्दनमत्र रक्तचन्दनं । चन्दनादिक्वाथः ॥१॥
नवनीततिलाभ्यासात् २ । केसरनवनीतशर्करा-
भ्यासात् ३ । दधिसरमथिताभ्यासात् ४ । गुदजाः
शाम्यन्ति रक्तावहाः ॥
"दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः" ।
मथितं सररहितं निर्ज्जलं वस्त्रपूतं दधि ।
सपत्रकेसरं क्षौद्रं नवनीतं त्वचं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शसः सुखीभवेत् ॥ ५ ॥
पयसा घृतेन यूषैः सतीनमुद्गाढ़कीमसूराणां ।
ओदनमद्यादस्नैर्मधुरैरीषत्सुगन्धैश्च ॥ ६ ॥

समङ्गोत्पलमोचाङ्गतिरीटतिलचन्दनैः ।
सिद्धं क्षागीपयो दद्याद् गुदजे शोणितात्मके" ॥
समङ्गा लज्जालुः । मोचाङ्गो मोचरसः । तिरीटो
लोध्रः । चन्दनमत्र रक्तं । समङ्गादिदुग्धं ॥ ७ ॥
"भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनः पुनः ।
बन्धनात् सुदृढ़ं सूत्रं छिनत्त्यर्शोभगन्दरं" ॥
क्षारसूत्रं ॥ ८ ॥
"नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदितां ॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण चाग्निना ।
वेगावरोधक्षीणेष्वयानान्युत्कटकाशनं ॥
यथास्वं दोषलक्षान्नमर्शसः परिवर्ज्जयेत्" ।
इत्यर्शोऽधिकारः ॥ ० ॥ इति भावप्रकाशः ॥

अर्शसः, त्रि, (अर्शस् + अस्त्यर्थे अच् ।) अर्शोरोग-
युक्तः । इत्यमरः ॥
("हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्" ।
इति मनुः ।
"अन्नपानौषधं सर्व्वं तत्सेव्यं नित्यमर्शसाम् ।
हस्ते पादे मुखे नाभ्यां गुदे दशसु योलधा ।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः" ॥
इति भावप्रकाशः ।)

अर्शसानः, पुं, (ऋ + असानच्, सुट् ।) अग्निः ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ("अर्श-
सानाय शत्रूणां हिंसित्रे" । इति वेदभाष्यम् ।)

अर्शी, [न्] त्रि, (अर्शसस्त्यस्य, अर्श + इनि ।)
अर्शोरोगयुतः । इति शब्दरत्नावली ॥

अर्शोघ्नः, पुं, (अर्शो हन्ति, अर्श + हन् + ट ।)
ओल्लः । तत्पर्य्यायः । शूरणः २ कन्दः ३ । इत्य-
मरः ॥ सूरणः ४ । इति तट्टीका ॥ ओल इति
भाषा । (अर्शोरोगविनाशकः ।
"अर्शोघ्नं कारवं मूत्रं मानुषन्तु विषापहम्" ।
इति सुश्रुते ।)

अर्शोघ्नी, स्त्री, (अर्शस् + हन् + ट + ङीप् ।) ताल-
मूली । इति मेदिनी ॥

अर्शोहितः, पुं, (अर्शसि हितः, सेवनेन तन्नाशक-
त्वात् ।) भल्लातकः । इति त्रिकाण्डशेषः । भेला
इति भाषा ।

अर्ह योग्यत्वे । (भ्वादिः-परं-सकं-सेट् ।) पूजने ।
इति कविकल्पद्रमः ॥ अर्हति विप्रो वेदं पठितुं ।
सकर्म्मकोऽपि ।
"यज्ञदानतपांस्यस्य कलां नार्हन्ति षोड़शीं" ।
इति दुर्गादासः ॥
("अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति" ।
इति मनुः ।
"द्विजाग्र्यहान्यर्हसि षोढुमर्हन्" ।
इति रघुवंशे ।
"गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति" ।
इति मनुः ।)

अर्ह क पूजने । (चुरां-उभं-सकं-सेट् ।) इति
कविकल्पद्रमः ॥ क अर्हयति । इति दुर्गादासः ॥
("राजार्ज्जितैस्तं मधुपर्कपाणिः" । इति भट्टि-
काव्ये ।)

अर्ह., पुं, (अर्ह + अच्।) इन्द्रः। इति शब्दरत्नावली॥

अर्हः, त्रि, (अर्ह + अच्।) योग्यः। उपयुक्तः। यथा,—
"तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान्"।
इति श्रीभगवद्गीता॥

अर्हणा, स्त्री, (अर्ह + युच् + टाप्।) पूजा। इत्यमरः॥ ("अर्हणामर्हते चक्रमुनयो नयचक्षुषे"। इति रघुवंशे।)

अर्हन्, [त्] पुं, (अर्हः प्रशंसायां शतृ।) क्षपणकः। बुद्धः। इति मेदिनी॥ श्रेष्ठस्य पर्य्यायः। जिनः २ पारगतः ३ त्रिकालवित् ४ क्षीणाष्टकर्म्मा ५ परमेष्ठी ६ अधीश्वरः ७ शम्भुः ८ स्वयम्भूः ९ भगवान् १० जगत्प्रभुः ११ तीर्थङ्करः १२ तीर्थकरः १३ जिनेश्वरः १४ वादी १५ अभयदः १६ सार्व्वः १७ सर्व्वज्ञः १८ सर्व्वदर्शी १९ केवली २० देवाधिदेवः २१ बोधदः २२ पुरुषोत्तमः २३ वीतरागाप्तः २४। इति हेमचन्द्रः॥

अर्हन्, (त्) त्रि, (अर्ह + शतृ।) पूज्यः। मान्यः। इति मेदिनी॥ स्तुतः। इति शब्दरत्नावली॥ ("यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते"। इति कुमारसम्भवे।
"त्वमर्हतामग्रसरः स्मृतोऽसि नः"।
इति शाकुन्तले।)

अर्हन्तः, पुं, (अर्ह + बाहुलकात् झच्।) बुद्धः। क्षपणकः। मान्ये त्रि। इति जटाधरः॥ शिवः। इति शब्दरत्नावली॥

अर्हितः, त्रि, (अर्ह + क्त।) पूजितः। इत्यमरः॥

अल ञ वारणपर्य्याप्तिभूषासु (भ्वादिः-उभं-सकं।) इति कविकल्पद्रुमः॥ ञ अलति अलते वा पापं गङ्गा निवारयतीत्यर्थः। पर्य्याप्तिः सामर्थ्यं। "पर्य्याप्तन्तु यथेष्टं स्यात् क्लृप्ते शक्ते निवारणे"। इति विश्वप्रकाशात्। अलति घोटको धावितुं समर्थः स्यादित्यर्थः। अलति हारो जनं भूषयति इत्यर्थः। इति दुर्गादासः॥

अलं, क्ली, (अल + अच्।) दधिकर्पुष्कटकः। इति हेमचन्द्रः। विकार ऊख इति भाषा। हरितालं। इति रत्नमाला अमरटीका च॥

अलं, व्य, भूषणं। पर्य्याप्तिः। वारणं। निरर्थकं। शक्तिः। इति मेदिनी॥ अत्यर्थं। यथा,—
"सर्वं मे विमलं वदामलमलं गोलं विजानासि चेत्"। इति लीलावती॥

अलकः, पुं, क्ली, (अलति भूषयति मुखं, अल + कुन्।) भङ्गियुतः केशः। कर्पूरादेः क्षोदचूर्णं तस्य कुन्तलाचूर्णकुन्तलाः तद्धि तच्च न्यस्यते इत्यन्ये। अलति भूषयति मुखं इत्यलकं। इति भरतः॥ कुटिलकुन्तलः। इति सुभूतिः। इति सारसुन्दरी॥ तत्पर्य्यायः। चूर्णकुन्तलः २। इत्यमरः।
("कर्णेषु योग्यं नवकर्णिकारं
स्तनेषु हारा अलकेष्वशोकाः"।
इति ऋतुसंहारे।
"हस्ते लीलाकमलमलके बालकुन्दानुविद्धं"।
इति मेघदूते।)

अलकः, पुं, (अल + कुन्।) अलर्कः। क्षिप्रकुक्कुरः। इत्यमरटीकायां रायमुकुटः॥

अलकनन्दा, स्त्री, (अलति पर्य्याप्नोति, अल + कुन्, अलका, नन्दयति इति अच् नन्दा, अलका चासौ नन्दा चेति इति इति कर्म्मधारयः।) कुमारी। इति चिकाण्डशेषः॥ भारतवर्षीयगङ्गा। इति शब्दमाला॥ "तथैवालकनन्दा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषध-हेमकूट-हिमकूटान्यतिरभसतररंहसा लुठन्ती भारतमपि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति"। इति श्रीभागवतं॥ (हिमालयादुत्पन्ना श्रीनगरस्यादूरे गङ्गया सह मिलिता खनामख्याता नदी। गङ्गैव देवलोके अलकनन्देत्युच्यते। इति महाभारते। यदुक्तं,—
"देवेषु गङ्गा गन्धर्व्वे! प्राप्नोत्यलकनन्दताम्।
तथैवालकनन्दापि दक्षिणेनैति भारतं।
प्रयाति सागरं भूत्वा सप्तभेदा महासुने"॥
इति भागवतपुराणे।)

अलकप्रभा, स्त्री, (अलका पर्य्याप्ता प्रभा यस्याः सा।) कुबेरपुरी। इति शब्दरत्नावली॥

अलकप्रियः, पुं, (अलकान् प्रीणाति अलक + प्री + क।) वृक्षविशेषः। इति जटाधरः॥

अलका, स्त्री, (अल + कुन् + टाप्।) कुबेरनगरी। इत्यमरः॥ अष्टवर्षावधिदशवर्षपर्य्यन्तवयस्का कन्या। इति शब्दरत्नावली॥

अलकाधिपः, पुं, (अलकाया अधिपः, षष्ठीतत्पुरुषः।) कुबेरः। इति जटाधरः॥

अलकाधिपतिः, पुं, (अलकाया अधिपतिः, षष्ठीतत्पुरुषः।) कुबेरः। इति शब्दरत्नावली॥

अलक्तः, पुं, (न रक्तोऽस्मात्, रस्य लत्वं।) वृक्षनिर्य्यासविशेषः। लाहा। जौ इति च भाषा। तत्पर्य्यायः। रक्ता २ लाक्षा ३ जतु ४ यावः ५ द्रुमामयः ६। इत्यमरः॥ रक्ता ७। इति भरतः। अरक्तः ८। इत्यमरटीकायां भरतः॥ जतुकं ९ यावकः १० अलक्तकः ११ रक्तः १२। इति शब्दरत्नावली॥ पलङ्कषा १३ क्षमिः १४ वरवर्णिनी १५। इति जटाधरः॥ तस्य गुणादिः। "लाक्षा पलङ्कषालक्ती यावो वृक्षामयो जतु।
लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः॥
अनुष्णा कफपित्तास्रहिक्काकासव्रणप्रणुत्।
व्रणोरुक्षतवीसर्पक्षमिकुष्ठगदापहा॥
अलक्तको गुणैस्तद्वद्विशेषाद्व्रणनाशनः"।
इति भावप्रकाशः॥* लाक्षारसः। आलता इति भाषा। तत्पर्य्यायः। अलक्तकः २ जतुरसः ३ रागः ४ निर्भर्त्सनः ५ जननी ६ जनकरी ७ सम्पद्या ८ चक्रवर्त्तिनी ९। अस्य गुणाः। तिक्तत्वं। उष्णत्वं। कफवातरोगव्रणदोषनाशित्वं। कण्ठरोगश्रमनत्वं। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

अलक्तकः, पुं, (अलक्त एव, अलक्तः स्वार्थे कन्।) निर्भर्त्सनं। अलक्तः। इति हलायुधो हारावली च॥ लाक्षा। इति राजनिर्घण्टः॥ ("अलक्तकाङ्कानि पदानि पादयोः"। इति कुमारसम्भवे। "पादालक्तकरक्तमौक्तिकशिलःसिद्धाङ्गनानाङ्कतैः" इति नागानन्दे।)

अलगर्दः, पुं, (लगति स्पृशति, क्विप्, लग, अर्द्दयति, अर्द्द + अच्, अर्दः, लग् चासौ अर्दश्चेति इति लगर्दः, लग्नः सन् पीडक इत्यर्थः, निर्व्विषत्वात् तद्विग्नः।) जलसर्पः। जलवेड़ा इति केचित्। अलाध इति केचित्। इत्यमरटीकायां भरतः॥ (सविषो जलव्यालभेदः। विलकेउटिया इति भाषा, "तत्र सविषाः कृष्णाः कर्व्वुरा अलगर्द्दा इन्द्रायुधाः सामुद्रिका गोधनन्दाश्चेति"। सुश्रुते।)

अलगर्द्दः, पुं, (अलं ग्रथ्नाति इति ग्रथ + अच्, ग्रथोदरादित्वात् साधुः।) जलव्यालः। इत्यमरः॥ केउटिया इति ख्यातः। जलवेड़ा इति केचित्। अलाध इति केचित्। इति भरतः॥

अलङ्करणं, क्ली, (अलम् + कृ + भावे ल्युट्।) भूषणं। इति शब्दरत्नावली॥

अलङ्करिष्णुः, त्रि, (अलम् + कृ + इष्णुच्।) अलङ्कारकर्त्ता। भूषणशीलः। इति रघुनाथचक्रवर्त्त्यादयः॥ तत्पर्य्यायः। मण्डनः २। इत्यमरः॥ अलङ्कर्त्ता ३। इति शब्दरत्नावली॥* अलङ्कारयुक्तिः। इति सारसुन्दर्य्यादयः॥ तत्पर्य्यायः। अलंकर्त्ता २ मण्डितः ३ प्रसाधितः ४ अलङ्कृतः ५ भूषितः ६ परिष्कृतः ७। इत्यमरः॥

अलङ्कर्त्तृ, [ऋ] त्रि, (अलम् + कृ + तृच्।) अलङ्करिष्णुः। इत्यमरः॥

अलङ्कर्म्मीणः, त्रि, (अलं समर्थः कर्म्मणे, खः।) कार्य्यकुशलः। कर्म्मक्षमः। इत्यमरः॥

अलङ्कारः, पुं, (अलम् + कृ + भावे घञ्।) भूषणं। तत्पर्य्यायः। आभरणं २ परिष्कारः ३ विभूषणं ४ मण्डनं ५। इत्यमरः॥ अलङ्क्रिया ६ भूषा ७ अलङ्करणं ८। इति शब्दरत्नावली। कलायः ९ इति जटाधरः॥* अथालङ्कारयुक्तिः। तद्धारणादिमुच्यते।
"रेवत्यश्विधनिष्ठासु हस्तादित्रयेषु च।
गुरुशुक्रबुधस्यापि वस्त्रालङ्कारधारणं॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम्।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते॥
शिरस्त्रं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा।
कङ्कणं बालकञ्चैव मेखलाश्चेति क्रमात्॥
प्रधानभूषणान्येषु यथासंख्यानि निश्चयः।
पद्मरागञ्च वज्रञ्च विज्ञेयो गोविदस्तथा॥
मुक्ता वैदूर्य्यनीलञ्च तथा मरकतं क्रमात्।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायकाः॥
सुवर्णेनापि घटना सर्व्वेषामुपयुज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निश्चयः॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते।
तस्य प्रधानभूषत्वादित्याह भृगुनन्दनः॥
सुखदा मणयः मुद्रा दुःखदा दोषशालिनः।
अतो मणीनां वक्ष्यामि लक्षणानि यथाक्रमं"॥

अलं	अलं	अलं
इति युक्तिकल्पतरुः ॥* ॥ मल्लिविप्रेषायां लक्ष्यलक्षणानि तत्तच्छन्दे द्रष्टव्यानि ॥*॥ काव्यालङ्कारः । स द्विविधः । शब्दालङ्कारः १। अर्थालङ्कारश्च २। तस्य लक्षणं। काव्यशोभाकरधर्म्मः। इति काव्यादर्शः॥ वैचित्र्यमलङ्कार इत्यलङ्कारसामान्यलक्षणं।	वैचित्र्यञ्च भङ्गीविशेषः प्रतीतिसाक्षिकः । इति काव्यप्रकाशटीकायां महेश्वरः ॥ अङ्गदादिवत् शब्दार्थशोभातिशयजनको रसाद्युपकारकोऽस्थिरधर्म्मः । इति साहित्यदर्पणं ॥ अस्य विवरणं दण्डि-काव्यप्रकाश-साहित्यदर्पणालङ्कारकौस्तुभ-	चन्द्रालोकोज्ज्वल-नीलमणि-काव्यचन्द्रिका-कुवलयानन्द-सरस्वतीकण्ठाभरणादिग्रन्थेषु द्रष्टव्यं। अलङ्काराणां मध्ये ये ये प्रसिद्धास्तेषां नामलक्षणोदाहरणानि चन्द्रालोकधृतानि तदतिरिक्तानि साहित्यदर्पणोक्तानि च लिख्यन्ते ॥
यथालङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि
अक्रमातिशयोक्तिः——१	"अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्य्ययोः॥१	"आलिङ्गन्ति समं देव त्वां शूराश्च पराङ्मुखे" ॥ १
अतद्गुणः——२	"सङ्गतानुगुणासङ्गीकारमाऽऽहुरतद्गुणं" । २	"चिरं रागिणि मच्चित्तेनिहितापि न रज्यसि" ॥२
अत्यन्तातिशयोक्तिः——३	"अत्यन्तातिशयोक्तिस्तु कार्य्ये हेतुप्रसक्तिजे" ।३	"यास्यामीत्युदिते तन्व्या बलयेऽभवदूर्म्मिका" ॥ ३
अत्युक्तिः——४	"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं" । ४	"त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः" ॥४
अधिकं——५	"अधिकं एथुलाधारादाधेयाधिक्यवर्णनं" । ५	"ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः" ॥५
अनन्वयः——६	"उपमानोपमेयत्वं यदेकस्यैव वस्तुनः" । ६	"इन्दुरिवेन्दुः श्रीमानित्यादौ तदनन्वयः" ॥ ६
अनुकूलं——७	"अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् । ७	"कुपितासि यदा तन्वि निधाय करजक्षतं। बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा" ॥ ७
अनुगुणः——८	"प्राक्सिद्धः खगुणोत्कर्षोऽनुगुणः परसन्निधेः" । ८	"नीलोत्पलानि दधते कटाक्षैरतिनीलतां" ॥ ८
अनुज्ञा——९	"दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्" । ९	"मय्येव जीर्णतां यातु यत्त्वयैव कृतं हरे। नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति" ॥९
अनुप्रासः——१०	"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" । १०	"आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान्। अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः" ॥१०
अनुप्रासस्तु पञ्चविधः । एकस्य लक्षणोदाहरणे उक्ते ।	"अनेकस्यैकधा साम्यसकृदप्यनेकधा । एकस्य सकृदप्येष श्रुत्यनुप्रास इष्यते" ॥	"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्-कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-प्राप्तप्राय्समासमागमरसोल्लासैरमी वासराः" ॥
अपरे यथा, श्रुत्यनुप्रासः		"दृष्ट्वा दग्धं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः" ॥
अन्त्यानुप्रासः—	"उच्चार्य्यत्वाद्यदेकत्र स्थाने तालुरदादिके"। सादृश्यं व्यञ्जनस्यैतत् श्रुत्यनुप्रास उच्यते ॥ व्यञ्जनस्यैदयथावस्थं सहाद्येन स्वरेण तु। आवर्त्ततेऽन्त्ययोर्य्यत्वादनुप्रासः स एव तत्" ॥	"केशः काशस्तवकविकाशः कायः प्रकटितकरभविलासः । चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पं" ॥
लाटानुप्रासः—	"शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः। लाटानुप्रास इष्टुक्तः" ॥	"क्षीरराजीवनयने नयने किं निमीलिते। पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियं" ॥
अनुमानं——११	"अनुमानन्तु विच्छित्या ज्ञानं साध्यस्य साधनात्" । ११	"जानीमहेऽस्याः किल सारसाक्ष्या विराजतेऽन्तः-प्रियवक्त्रचन्द्रः । तत्कान्तिजालैः प्रसृतैस्त्वदङ्ग्या-पाण्डुता कुड्यलतास्विपद्मे" ॥ ११
अन्योन्यं——१२	"अन्योन्यं नाम यत्र स्यादुपकारः परस्परं" । १२	"त्रियामा शशिना भाति शशी भाति त्रियामया" ॥ १२
अपह्नवातिशयोक्तिः——१३	"रूपकातिशयोक्तिः स्यान्निगीर्य्याध्यवसानतः। यदापह्नुतिगर्भत्वं सैव सापह्नवा मता" । १३	"त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ" ॥ १३
अप्रस्तुतप्रशंसा——१४	"अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया" । १४	"एकः ज्ञाती स ज्ञात्येषु योऽन्यं शक्राद्न याचते" ॥ १४
अभिधाहेतुः——१५	"अभेदेनाभिधाहेतुर्हेतोर्हेतुमता सह" । १५	"तारुण्यविलासः । इत्यत्र वशीकरणहेतुर्गायिका-वशीकरणत्वेनोक्ता । विलासश्चासयोस्त्वध्यवसाय-मूलोऽयमलङ्कारः" ॥ १५
अर्थान्तरन्यासः——१६	"उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः" । १६	"हनूमानब्धिमतरत् दुस्तरं किं महात्मनां ॥ गुणवद्वस्तुसंसर्गात् याति स्वल्पोऽपि गौरवं। पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्य्यते" ॥ १६
अर्थापत्तिः——१७	"दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते । क्वचित् प्राकरणिकात्प्राकरणिकार्थस्यापतनं । क्वचित् अप्राकरणिकात् प्राकरणिकार्थस्येति द्वौ भेदौ" । १७	"हारोऽयं हरिणाक्षीणां लुठति स्तनमंण्डले । मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः" ॥ "विललाप सवाष्पगद्गदं सहजामप्यपहाय धीरतां । अतितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिणां" ॥ १७

अथालङ्कारनामानि

अल्पं ——— १८
अवज्ञालङ्कृतिः ——— १९

असङ्कृतिः ——— २०
तस्य त्रीणि लक्षणानि ।

असदर्थनिदर्शना ——— २१

असम्भवः ——— २२
आवृत्तिदीपकं ——— २३
तत् त्रिविधं । पदावृत्तिः । अर्थावृत्तिः । उभयावृत्तिः ।

आक्षेपः ——— २४
अस्य त्रीणि लक्षणानि लक्ष्याणि च ।

उत्प्रेक्षा ——— २५
सा वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा वस्तूत्प्रेक्षा । हेतूत्प्रेक्षा । फलोत्प्रेक्षा । तत्राद्या उक्तविषया अनुक्तविषया चेति द्विविधा । परे हेतुफलोत्प्रेक्षे सिद्धासिद्धविषयतया प्रत्येकं द्विविधे । एवमुत्प्रेक्षा षड्विधा ।

उत्तरं ——— २६
उदात्तं ——— २७
उपमा ——— २८
उपमेयोपमा ——— २९
उल्लासः ——— ३०

उल्लेखः ——— ३१
लक्षणभेदेन स द्विविधः ।
एकावली ——— ३२

कारकदीपकं ——— ३३

कारणमाला ——— ३४
सा पूर्वपूर्वपदार्थानां कारणत्ववर्णनेन एवमुत्तरोत्तरपदार्थानां कारणत्ववर्णनेन च द्विधा ।
काव्यलिङ्गं ——— ३५

काव्यार्थापत्तिः ——— ३६
कैतवापह्नुतिः ——— ३७

गूढोक्तिः ——— ३८
चपलातिशयोक्तिः ——— ३९
चित्रं ——— ४०

तल्लक्षणानि

"अल्पन्तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता" । १८
"ताभ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा" । १९

"विरुद्धभिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः ।
अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा ॥
अन्यत् कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिश्च सा" । २०
"अपरां बोधनं प्राहुः क्रियायासत्पदार्थयोः" । अस्यार्थः । कस्यचित् किञ्चित् क्रियाविशिष्टस्य स्वक्रियया-परान् प्रति असतः सतो वार्थस्य बोधनं वर्णनं । २१

"असम्भवोत्पत्तिरसम्भाव्यत्ववर्णनं" । २२
"त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं" । २३

"आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
निषेधाभास आक्षेपं बुधाः केचन मन्वते ॥
आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते" । २४
"सम्भावनाः स्युरुत्प्रेक्षा वस्तुहेतुफलात्मता ।
उक्तानुक्तास्पदाद्याश्च सिद्धासिद्धास्पदे परे" । २५

"किञ्चिदाकूतसहितं स्यादूढ़ोत्तरमुत्तरं" । २६
"उदात्तमद्भिरचितं श्लाघ्यमाख्योपलक्षणं" । २७
"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" । २८
"पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता" । २९
"एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि" । ३०

"बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
एकोनबहुधोल्लेखोऽप्यसौ विषयभेदतः" । ३१
"गृहीतमुक्तरीत्यार्थश्रेणीरेकावली मता" । ३२

"क्रमिकैकगतानान्तु गुम्फः कारकदीपकं" । ३३

"गुम्फः कारणमाला स्यादद्यया प्रक्रान्तकारणैः" । ३४

"समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनं" । ३५

"कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" । ३६
"कैतवापह्नुतिर्यत्र व्याजाद्यैर्निह्नवे पदैः" । ३७

"गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति कथ्यते" । ३८
"चपलातिशयोक्तिस्तत्पौर्वापर्यव्यतिक्रमः" । ३९
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते" । ४०

तदुदाहरणानि

"भस्मिमालोर्म्मिका तेऽद्य करे जपवटायते" । १८
"स्वल्पमेवाम्बु लभते पात्रः प्राप्यापि सागरं ।
मीलन्ति यदि पद्मानि का हानिरम्बुवर्तुलैः" । १९
"विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गना ।
अपारिजातां वसुधां चिकीर्षन् द्यां तथाक्रमाः ।
गोत्रोद्धारप्रवृत्तो हि गोत्रोद्धारं पुराकरोः" ॥ २०
"नक्षत्रेशविरोधीति क्षीणं चन्द्रोदये पुनः" ॥ २१

"को वेद गोपस्त्रियुकः शृङ्गेणमुत्पाटयिष्यति" ॥ २२
"वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्व्वरी ॥
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः" ॥ २३
"चन्द्र सन्दर्शयात्मानमथवास्ति प्रियामुखं ।
नायं दूति तनेरुत्तापस्तस्याः कालानलोपमः ।
गच्छ गच्छसि चेत्कान्तं तत्रैव स्याज्जनिर्म्मम" ॥ २४
"धूमस्तोमं तमः शृङ्गे कोकीविरहलक्षणं ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥
रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवं ।
तन्मुखभेच्छया नूनं पद्मैर्व्वैरायते ग्रही ॥
मध्यः किं कुचयोर्हृत्वे बद्धः कनकदामभिः ।
प्रायोऽलं त्वत्पदेनैकं प्राप्तुं तोये तपस्यति" ॥ २५
"यत्रासौ वेतसी पात्र तत्रेयं सुतरां सरित्" ॥ २६
"सासौ यत्राभवद्युद्धं तव धूर्ज्जटिनाऽर्ज्जुनैः" ॥ २७
"हंसीव भूपतेः कीर्त्तिः स्वर्गादीमवगाहते" ॥ २८
"धर्म्मोऽर्थ इव पूर्णश्रीर्यो धर्म्म इव त्वयि" ॥ २९
"अपि मां पावयेत् साध्वी स्वात्वेतीक्षति जाह्नवी ॥
काठिन्यं कुचयोर्दृष्टं वाङ्मात्र्यः पादपद्मयोः ।
निन्दन्ति विश्वधातारं त्वद्घाटीष्वरियोषितः ॥
तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं ॥
लाभोऽयमेव भूपाल सेवकानां न चेदबधः" ॥ ३०
"स्त्रीभिः कामोऽर्थिभिः खद्गः कालः शत्रुभिरेव सः ।
गुरुर्वंशस्य नुर्नोऽयं कीर्त्तौ भीष्मः शरासने" ॥ ३१
"नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तम्भशालिनौ ।
दोःस्तम्भौ जानुपर्य्यन्तप्रलम्बनमनोहरौ ।
जानुनी रत्नमुकुराकारे तस्य महीभुजः" ॥ ३२
"गच्छत्या गच्छति पुनः पात्रः पश्यति पृच्छति" ॥ ३३
"नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥
भवन्ति नरकाः पापाः पापं दारिद्र्यसम्भवं ।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भव" ॥ ३४
"जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः" ॥ ३५
"स जितन्वन्मुखेनेन्दुः का वार्त्ता सरसीरुहां" ॥ ३६
"निर्यान्ति स्मरनाराचा बालादृक्प्रातकैतवात्" ॥ ३७
"कृपायेहि परश्चेत्रादायाति क्षेत्ररक्षकः" ॥ ३८
"अग्रे मानो गतः पश्चादनुनीता प्रियेण सा" ॥ ३९
"मारमासुषमा चारुरुचा मारबधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मारमा" ॥ ४०

अथ

अथालङ्कारनामानि

चित्रकाव्यमनेकविधं यथा। पद्म-छत्र-धनुः-खड्ग-नागपाश-कवाट-नौका-बन्धाः। अश्वगति-चिपदी-गोमूत्रिकादयः।

छेकापह्नुतिः ——— ४१

तद्गुणः ——— ४२

तुल्ययोगिता ——— ४३

सा त्रिधा।

प्रथमा यथा ———

द्वितीया यथा ———

तृतीया यथा ———

दीपकं ——— ४४

दृष्टान्तः ——— ४५

निदर्शना ——— ४६

सा त्रिधा।

निरुक्तिः ——— ४७

परिकरः ——— ४८

परिकराङ्कुरः ——— ४९

परिणामः ——— ५०

परिवृत्तिः ——— ५१

परिसंख्या ——— ५२

पर्य्यस्तापह्नुतिः ——— ५३

पर्य्यायः ——— ५४

स द्विविधः।

पर्य्यायोक्तं ——— ५५

तत् द्विविधं।

पिहितं ——— ५६

पुनरुक्तवदाभासः ——— ५७

पूर्व्वरूपः ——— ५८

स द्विविधः।

प्रतिवस्तूपमा ——— ५९

प्रतिषेधः ——— ६०

प्रतीपं ——— ६१

तत्तल्लक्षणभेदेन पञ्चविधं। न तु नामभेदेन।

प्रत्यनीकं ——— ६२

प्रस्तुताङ्कुरः ——— ६३

प्रहर्षणं ——— ६४

तत् त्रिविधं।

प्रौढ़ोक्तिः ——— ६५

भाविकं ——— ६६

भाषासमावेशः ——— ६७

अथ

तल्लक्षणानि

"छेकापह्नुतिरन्यस्य शङ्कातस्तस्य निह्नवे"। ४१

"तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। ४२

"वर्ण्यानामितरेषां वा धर्म्मैक्यं तुल्ययोगिता"।

"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।
गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" ।४३
"वदन्ति वर्ण्यावर्ण्यानां धर्म्मैक्यं दीपकं बुधाः" ।४४
"चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः"। ४५
"वाक्यार्थयोः सदृश्योरेक्यारोपो निदर्शना।
पदार्थगर्भमप्यन्ये वदन्त्यन्यां निदर्शनां ॥
अपरां बोधनं प्राज्ञैः क्रियायासत्पदार्थयोः"। ४६
"निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं"। ४७
"अलङ्कारः परिकरः साभिप्रायविशेषणे"। ४८
"साभिप्रायविशेष्यस्वेद्भवेत् परिकराङ्कुरः"। ४९
"परिणामः क्रियार्थं चेद्विषयी विषयात्मना"। ५०
"परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः"। ५१
"परिसंख्या निषिध्यैकमेकस्मिन् वस्त्वन्यगं"। ५२
"अन्यच तस्यारोपार्थः पर्य्यस्तापह्नुतिस्तु सा"। ५३
"पर्य्यायो यदि पर्य्यायैरेकस्यानेकसंश्रयः।
"एकस्मिन् यस्यानेकं वा पर्य्यायः सोऽपि सम्मतः"॥५४
"पर्य्यायोक्तं तु गम्यस्वेदन्यभङ्ग्यान्तराश्रयः।
पर्य्यायोक्तं तदप्याहुर्यदाजेयत्वसाधनं" ॥ ५५
"पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितं"। ५६
"आपाततो यदर्थस्य पौनरुक्त्यावभासनं।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः" ॥ ५७
"पुनः स्वगुणसंप्राप्तिः पूर्व्वरूपमुदाहृतं।
पूर्व्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि" ॥ ५८
"वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता"। ५९
"प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनं"। ६०
"प्रतीपमुपमानस्याप्युपमेयत्वकल्पनं।
अन्योपमेयलाभेन वर्ण्यस्यानादरस्य तत् ॥
वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः।
वर्ण्येनान्यस्योपमाया अनिष्पत्तिर्वचश्च तत् ॥
प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते"। ६१
"प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः"। ६२
"प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः"। ६३
"उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणं।
वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणं ॥
यत्नादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्"॥६४
"प्रौढ़ोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनं"। ६५
"भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं"। ६६
"शब्दैरेकविधैरेव भाषासु विविधासपि।
वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" ॥६७

अथ

तदुदाहरणानि

"प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः"॥ ४१

"पद्मरागायते नासामौक्तिकं तेऽधरत्विषा"॥ ४२

"सङ्कुचन्ति सरोजानि खेरिणीवदनानि च।
त्वदङ्घ्रिमार्द्दवे दृष्टे कस्य चित्ते न भासते।
मालतीशुभ्रशुभ्रलेखा कदलीनां कठोरता ॥
प्रदीयते पराभूतिर्मिथश्चाचवयोरया ॥
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि" ॥ ४३

"मदेन भाति कलभः प्रतापेन महीपतिः" ॥ ४४

"त्वमेव कीर्त्तिमान्राजन् विधुरेव हि कान्तिमान्"॥४५

"या दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥
नश्यद्राजविरोधीति क्षीणं चन्द्रोदये तमः" ॥ ४६

"ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्" ॥ ४७

"सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः" ॥ ४८

"चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः" ॥ ४९

"प्रसन्नेन दृगन्तेन वीक्षते मदिरेक्षणा" ॥ ५०

"ययावेकं शरं मुक्त्वा कटाक्षान् स रिपुस्त्रियाः" ॥५१

"स्वहृच्छयः प्रदीपेषु न स्वान्तेषु नतभ्रुवां" ॥ ५२

"नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं" ॥ ५३

"पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा ॥
अधुना पुलिनं तच्च यत्र स्रोतः पुराजनि" ॥ ५४

नमस्तस्मै कृतो येन सुधा राजवधूकुचौ ॥
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह" ॥ ५५

"प्रिये यद्यागते प्रातः कान्ता तत्पमकल्पयत्" ॥५६

"भुजङ्गकुण्डलीयक्षश्रियिशुभ्रांशुशीतगुः।
जगत्यपि सदा पायादव्याच्चेतोहरः शिवः" ॥ ५७

हरकण्ठांशुलिप्तोऽपि श्रेयस्त्वक्षश्रयाश्रितः ॥
दीपे निर्व्वापितेऽप्यासीत् काक्षीरत्नैर्मुहुर्मुजः" ॥५८

"तापेन भ्राजते सूर्य्यः शूरस्त्यागेन राजते" ॥ ५९

"न द्यूतमेतत् कितवाक्रीड़नं निश्चितैः शरैः" ॥ ६०

"तल्लोचनसमं पद्मं तद्वक्त्रसदृशो विधुः।
अलं गर्व्वेण ते वक्तुकान्त्या चन्द्रो भवादृशः।
कः क्रौर्य्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः ॥
मिथ्यावादो हि मुग्धाहि त्वन्मुखाभं किलाम्बुजं।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दना" ॥ ६१

"जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ" ॥ ६२

"किं भङ्ग सत्यां मालत्यां केतक्यां कण्टकस्यया" ॥ ६३

"तामेव ध्यायते तस्मै विश्लेषा सैव दूतिका ॥
दीपमुद्दीपयेद्यावत्तावदभ्युदितो रविः ॥
निध्यञ्जनौषधीमूलं खनतासादितो निधिः" ॥ ६४

"कचाः कलिन्दजातीरतमालस्तोममेचकाः" ॥ ६५

"अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः" ॥ ६६

"गुञ्जन्मणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।
विरसासि केलिकीरे किमालि धीरे च गन्धसार-समीरे" ॥ ६७

अथालङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि
भेदकातिशयोक्तिः—— ६८	"भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनं" । ६८	"अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यञ्च भूपतेः" ॥ ६८
भ्रान्तापह्नुतिः —— ६९	"भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे" । ६९	"तापं करोति सोत्कम्पं ज्वरः किन्नु सखे स्मरः" ॥६९
भ्रान्तिमान् —— ७०	"स्यात् स्मृतिर्भ्रान्तिसन्देहैस्तदङ्गालङ्कृतित्रयं" । ७०	"अयं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पङ्कजं" ॥ ७०
मालादीपकं —— ७१	"दीपकैकावलीयोगान्मालादीपकमुच्यते" । ७१	"स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः" ॥७१
मिथ्याध्यवसितिः—— ७२	"किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं" ।७२	"मिथ्याध्यवसितिर्व्वेश्यां वञ्चयेत् खञ्जनं वहन्" ॥७२
मीलितं —— ७३	"मीलितं यदि सादृश्याद्भेद एव न दृश्यते" । ७३	"रसो नालक्ति लाक्षायाश्चरणे सहजारुणे" ॥ ७३
मुद्रा —— ७४	"सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" । ७४	"नितम्बगुर्व्वी तरुणी दृगुग्मविपुला च सा" ॥ ७४
यथासंख्यं —— ७५	"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः" । ७५	"भृङ्गं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय" ॥ ७५
यमकं —— ७६	"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः । क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते" । ७६	"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजं । मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः" ॥ ७६
युक्तिः —— ७७	"युक्तिः पराभिसन्धानं क्रियया मर्म्मगुप्तये" । ७७	"त्वामालिखन्तिं दृष्ट्वान्यां धनुः पौष्पं करेऽलिखत्" ॥७७
रत्नावली —— ७८	"क्रमिकाप्रकृतार्थानां न्यासं रत्नावलीं विदुः" । ७८	"चतुरास्यः पतिर्ब्रह्मा सर्व्वज्ञत्वं मही पते" ॥ ७८
रूपकं —— ७९	"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्" । "रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः" ॥७९	"अयं हि धूर्ज्जटिः साक्षाद्येन दग्धः पुरः क्षणात् । अयमास्ते विना शम्भुस्तार्त्तीयैकं विलोचनं ॥ शम्भुर्व्विश्वमवत्यद्य क्षोभात्य समदृष्टितां । अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ साध्वीयमपरा लक्ष्मीरसुधासागरोत्थिता । अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते" ॥७९
रूपकातिशयोक्तिः—— ८०	"रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः" । अस्यार्थः। विषयसम्बन्धेन उल्लेखनं विना विषयिवाचकशब्देन ग्रहणं विषयनिगरणं तत्पूर्व्वकं विषयस्य विषयिरूपतया अध्यवसानं तस्मिन् सति रूपकातिशयोक्तिः" । ८०	"पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः" ॥८०
ललितं —— ८१	"प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनं" । ८१	"ललितं निर्गते नीरे सेतुमेषा चिकीर्षति" ॥ ८१
लुप्तोपमा —— ८२ सा चाष्टधा। वाचकलुप्ता। धर्म्मलुप्ता। उपमानलुप्ता। धर्म्मवाचकलुप्ता। वाचकोपमेयलुप्ता। वाचकोपमानलुप्ता। धर्म्मोपमानलुप्ता। धर्म्मोपमानवाचकलुप्ता।	"वर्ण्योपमानधर्म्माणामुपमावाचकस्य च । एकद्वित्र्यनुपादानात् भिन्ना लुप्तोपमाऽष्टधा" ॥ ८२	"तड़िद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्म्मम । कान्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥ यत् त्वया मेखलं तत्र लाभो मे यच्च तद्गतेः । तदेतत् काकतालीयमवितर्क्कितसम्भवं" ॥ ८२
लेशः —— ८३	"लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं" । ८३	"अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु । शुक पञ्जरबन्धस्ते मधुराणां गिरां फलं" ॥ ८३
लोकोक्तिः—— ८४	"लोकप्रवादानुकृतिं लोकोक्तिरिति कथ्यते" । ८४	"सहस्व कतिचिन्मासान्मीलयित्वा विलोचने" ॥ ८४
वक्रोक्तिः—— ८५	"वक्रोक्तिः श्लेषकाकुभ्यामपूर्व्वार्थप्रकल्पनं" । ८५	"मुञ्च मानं दिनं प्राप्तं नेह नान्दी हरान्तिके" ॥८५
विकल्पः—— ८६	"विरोधे तुल्यबलयोर्व्विकल्पालङ्कृतिर्म्मता" । ८६	"सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः" ॥८६
विकस्वरः—— ८७	"यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः" ।८७	"स न जिग्ये महान्तो हि दुर्दृशाः सागरा इव" ॥ ८७
विचित्रं —— ८८	"विचित्रं तत्प्रयत्नश्चेत् विपरीतफलेच्छया" । ८८	"नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं" ॥८८
विधिः—— ८९	"सिद्धस्यैव विधानं यत्तामाऊर्व्विध्यलङ्कृतिं" । ८९	"पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्" ॥८९
विनोक्तिः—— ९०	"विनोक्तिः स्यादिना किञ्चित् प्रस्तुतं हीनमुच्यते । तच्चेत् किञ्चिदिना रम्यं विनोक्तिः सापि कथ्यते" ॥९०	"विद्या हृद्यापि सा विद्या विना विनयसम्पदं । विना खलैर्व्विभात्येषा राजेन्द्र भवतः सभा" ॥ ९०
लक्षणभेदेन सा द्विविधा।		
विभावना —— ९१ अस्या लक्षणान्युदाहरणानि च षट्।	"विभावना विनापि स्यात्कारणं कार्य्यजन्म चेत् । हेतूनामसमग्रत्वे कार्य्योत्पत्तिश्च सा मता ॥ कार्य्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके । अकारणात् कार्य्यजन्म चतुर्था स्याद्विभावना ॥ विरुद्धात् कार्य्यसम्पत्तिर्दृष्टा काचिद्विभावना । कार्य्यात् कारणजन्मापि दृष्टा काचिद्विभावना" ॥९१	"अपलाक्षारसासिक्तं रक्तं ते चरणद्वयं । अस्मैरतीक्ष्णकठिनैर्ज्जगज्जयति मन्मथः ॥ नरेन्द्रानेव ते राजन् दृशत्यसिभुजद्रुमः । शृङ्खादीनानिनादोऽयमुदेति महदद्भुतः ॥ शीताङ्करिरणास्तन्वी हन्त सन्तापयन्ति तां । यशःपयोराशिरभूत् करकल्पतरोस्तव" ॥ ९१
विरोधः—— ९२ स दशधा।	"जातिश्चतुर्भिर्ज्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः । क्रियाक्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः । विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः" ॥ ९२	"तव विरहे मलयमरुद्वानलः शुचिरुचोऽपि शीतमणिः । हृदयमनिशतमपि भिन्ने नलिनीदलमपि निदाघरविरस्याः ॥ सन्ततमुषलासङ्घाद्वृहतरगृहकर्म्मघटनाया नृपते । द्विजपत्नीनां

अलं	अलं	अलं
अथालङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि ।
		कठिनाः सति भवति कराः सरोजकुमाराः ॥ अजस्य ग्रहतो जन्म निरीहस्य हतद्विषः । स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः । राकाविभावरीजानिर्बिम्बज्वालाकुलो भवेत् ॥ नयनयुगासेचनकं मानसतत्त्वापि दुर्व्यापं । रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे" ॥ ९२
विरोधाभासः ——— ९३	"आभासत्वं विरोधस्य विरोधाभास इष्यते" । ९३	"विनापि तन्वि हारेण वक्षोजौ तव हारिणौ" ॥ ९३
विहितोक्तिः ——— ९४	"विहितोक्तिः श्लेषगुणं कविनाविष्कृतं यदि" । ९४	"दयापेहि परच्छेत्तरिति वक्ति स सूचनं" ॥ ९४
विशेषः ——— ९५	"विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं । विशेषः सोऽपि यत्रैकं वस्त्वनेकत्र वर्ण्यते ॥ किञ्चिदारभतोऽन्यवस्त्वन्तरकृतिश्च सः" । ९५	"गते सूर्येऽपि दीपस्यात्तमश्छिन्दन्ति तत्कराः । अन्तर्बहिः पुरः पश्चात् सर्व्वदिक्ष्वपि सैव मे ॥ त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं" ॥ ९५
विशेषोक्तिः ——— ९६	"कार्य्याजनिर्विशेषोक्तिः सति पुष्कलकारणे" । ९६	"हृदि स्नेहच्युतो नाभूत् स्मरदीपे ज्वलत्यपि" ॥ ९६
विषमं ——— ९७	"विषमं वर्ण्यते यत्र घटनाननुरूपयोः । विरूपकार्य्यस्योत्पत्तिरपरं विषमं मतं ॥ अनिष्टस्याप्यवाप्तिश्चेत्तदिष्टार्थसमुद्यमात्" । ९७	"क्वेयं शिरीषमृदुकी क्व तादृङ्मदनज्वरः । कीर्त्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ भक्त्याश्रया हि मञ्जूषां दृष्ट्याखुस्तेन भक्षितः" ॥ ९७
तत् त्रिविधं ।		
विषादनं ——— ९८	"इष्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनं" । ९८	"दीपमुद्दीपयेद्दयावत्तावन्निर्व्वाण एव सः" ॥ ९८
व्याघातः ——— ९९	"स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् । सौकार्य्येण निबद्धापि क्रियाकार्य्यविरोधिनः" । ९९	"यैर्जगत् प्रीयते हन्ति तैरेव कुसुमैः स्मरः । दया चेद्बाल इति मय्यपरित्यज्य एव ते" ॥ ९९
स द्विविधः ।		
व्याजनिन्दा ——— १००	"निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते" । १००	"विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः" ॥ १००
व्याजस्तुतिः ——— १०१	"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यांस्तुतिनिन्दयोः" । १०१	"कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवं ॥ साधु दूति पुनः साधु कर्त्तव्यं किमतः परं । यन्मदर्थे विलूनासि दन्तैरपि नखैरपि" ॥ १०१
स द्विविधः ।		
व्याजोक्तिः ——— १०२	"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं" । १०२	"सखि पश्य सहारामपरागैरस्मि धूसरा" ॥ १०२
व्यतिरेकः ——— १०३	"व्यतिरेको विशेषश्चेदुपमानोपमेययोः" । १०३	"फेना इवोन्नताः सन्तु किन्तु प्रकृतिकोमलाः" ॥ १०३
शुद्धापह्नुतिः ——— १०४	"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः" । १०४	"नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहं" ॥ १०४
श्लेषः ——— १०५	"नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्याभयाश्रयः" । १०५	"सर्व्वतो माधवः पायात् स यो गङ्गामदीधरत् ॥ अलेन त्वन्मुखं तुल्यं हरिणा हतशक्तिना । उच्चरद्भूरिकोलालः शुशुभे वाहिनीपतिः" ॥ १०५
स च त्रिविधः । प्रकृतानेकविषयः १ अप्रकृतानेकविषयः २ प्रकृताप्रकृतानेकविषयः ३ ।		
सदृर्थनिदर्शना ——— १०६	"विभावनं सम्भवानां फलं सहृदनुग्रहः" । १०६	"उदयन्नेव सविता पद्मेष्वर्पयति त्विषं" ॥ १०६
सन्देहः ——— १०७	"स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्गलङ्गतित्रयं" । १०७	"पङ्कजं वा सुधांशुर्व्वेत्यसाकान्तु न निर्णयः" ॥ १०७
समं ——— १०८	"समं स्यादर्थनं यत्र द्वयोरप्यनुरूपयोः । सारूप्यमपि कार्य्यस्य कारणेन समं विदुः । विना यत्नेन तत्सिद्ध्यैर्यदर्थः कर्त्तुमुद्यमः" । १०८	"स्वानुरूपं कृतं पद्महारेण कुचमण्डलं ॥ नीचप्रेमता लक्ष्मि जलजायास्तवोचिता ॥ युक्तो वारणलाभोऽयं भूपतेर्वारणार्थिनः" ॥ १०८
तत् त्रिविधं ।		
समाधिः ——— १०९	"समाधिः कार्य्यसौकर्य्यं कारणान्तरसन्निधेः" । १०९	"उत्कण्ठिता च कुलटा जगामास्तञ्च भानुमान्" ॥ १०९
समासोक्तिः ——— ११०	"समासोक्तिः परिस्फूर्त्तिः प्रस्तुते प्रस्तुतस्य चेत्" । ११०	"अयमैन्द्रीमुखं पश्य रक्तचुम्बति चन्द्रमाः" ॥ ११०
समुच्चयः ——— १११	"बहूनां युगपद्वाजा भावगुम्फः समुच्चयः । अहं प्रथमिकाभाजामेककार्य्यान्वयोऽपि सः" । १११	"नश्यन्ति पश्चात् पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥ खं शीलं वयो विद्या धनञ्च मदयत्यमुं" ॥ १११
स द्विविधः ।		
सम्बन्धातिशयोक्तिः ——— ११२	"सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनं । योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्य्यते" । ११२	"सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलं । त्वयि दातरि राजेन्द्र खर्द्दुमाग्रादियामहे" ॥ ११२
तल्लक्षणभेदेन सा द्विधा ।		
सम्भावनं ——— ११३	"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये" । ११३	"यदि श्लेषोऽभवद्वक्ता कथिताः स्युर्गुणास्तव" ॥ ११३
सहोक्तिः ——— ११४	"सहोक्तिः सहभावश्चेद्वासते जनरञ्जनः" । ११४	"दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह" ॥ ११४
सामान्यं ——— ११५	"सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः" । ११५	"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः । अविभाव्याः सुखं यान्ति चन्द्रिका अभिसारिकाः" ॥ ११५
सारः ——— ११६	"उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते" । ११६	"मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः" ॥ ११६
सूक्ष्मं ——— ११७	"सूक्ष्मं पराशयाभिज्ञे तरसाकूतचेष्टितं" । ११७	"मयि पश्यति सा केशैः सीमन्तमणिमाहरेत्" ॥ ११७
लोकोक्तिः ——— ११८	"लोकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता" । ११८	"भुजङ्ग एव जानीते भुजङ्गाचरणं सखे" । ११८
स्वभावोक्तिः ——— ११९	"स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं" । ११९	"कुरङ्गैरन्तराङ्गात्तैः लब्धकर्णैः समीक्ष्यते" । ११९

अथालङ्कारनामानि

स्मृतिमान् ——— १२०
हेतुः ——— १२१
स द्विविधः।
हेत्वपह्नुतिः ——— १२२

तल्लक्षणानि

"स्यात् स्मृतिर्भ्रान्तिसन्देहैस्तदङ्गालङ्कृतित्रयं" ।१२०
"हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते।
हेतुर्हेतुमतोरैक्यवर्णनं हेतुरुच्यते" । १२१
"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः।
स एव युक्तिपूर्व्वश्चेदुच्यते हेत्वपह्नुतिः" । १२२

तदुदाहरणानि

"पङ्कजं पश्यतः कान्ता मुखं मे गाहते मनः" ॥१२०
"असावुदेति प्रीतांशुर्मानच्छेदाय सुभ्रुवां ॥
लक्ष्मीविलासो विदुषां कटाक्षावेङ्कटप्रभोः" ॥१२१
"नेन्दुस्त्रीत्रो न निश्शर्कः सिन्धोरौर्व्वोऽयमुत्थितः" ॥
१२२

अलङ्क्रिया, स्त्री, (अलम् + कृ + भावे श।) भूषितकरणं। तत्पर्य्यायः। भूषा २। इत्यमरः॥

अलङ्कृतः, त्रि, (अलम् + कृ + कर्म्मणि क्तः।) अलङ्कारयुक्तः। तत्पर्य्यायः। भूषितः २ प्रसाधितः ३ परिष्कृतः ४ मण्डितः ५। इत्यमरः॥
("अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम्"। इति महाभारते।)

अलञ्जरः, पुं, (अलम् + ञ्जृ + अच्।) मृण्मयबड्डजलधरपात्रं। जाला इति ख्यातः। तत्पर्य्यायः। अलिञ्जरः २ मणिकं ३। इत्यमरटीकायां भरतः॥

अलतिः, पुं, (अल + बाऽलकात् अतिच्।) गीतविशेषः। इत्युणादिकोषः॥

अलन्धूमः, पुं, (अलमत्यर्थो धूमः।) धूमसमूहः। इति जटाधरः॥

अलम्, व्य, भूषणं। पूर्णता। सामर्थ्यं। निषेधः। इत्यमरः॥ निरर्थकं। इति भरतः॥

अलम्बुषः, पुं, (अलं पुष्णाति, पुष + क, षस्य बः।) प्रहस्तः। वमनं। राक्षसविशेषः॥ इति मेदिनी॥ (कुरुक्षेत्रयुद्धे कौरवाणां सहायः खनामख्यातो राक्षसः।
"साल्वकिस्वापि संक्रुद्धो राक्षसं क्रूरमाहवे।
अलम्बुषं पूरैर्घोरैर्विव्याध बलिनां बली"॥
इति महाभारते।)

अलम्बुषा, स्त्री, (अलं पुष्णाति, पुष + क, षस्य बः, ततः स्त्रियां टाप्।) मुण्डीरी। स्वर्गवेश्याभेदः। इति मेदिनी॥
("अलम्बुषा मिश्रकेशी पुण्डरीका तिलोत्तमा।
सुरूपा लक्षणा क्षेमा तथा रम्भा मनोरमा"॥
इति महाभारते।) अन्यप्रवेशप्रवारणार्थदन्तरेखादिः॥ लज्जालुभेदः। तत्पर्य्यायः। खरत्वक् २ भेदः ३ गला ४। अस्या गुणाः। लघुत्वं। स्वादुत्वं। क्षमिपित्तकफनाशित्वञ्च। इति राजनिर्घण्टः॥ (भावप्रकाशश्च॥
"अलम्बुषा गोक्षुरकं त्रिफला नागरा मताः।
यथोत्तरं भागवृद्धा श्यामाचूर्णन्तु तत्समं॥
पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा।
पीतं जयत्यामवातं सशोथं वातशोणितं॥
त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनं।
पथ्याच्छधान्यस्त्रिफला भागवृद्धावयं क्रमः"॥*॥
अलम्बुषाद्यं चूर्णम्॥*॥ इति वैद्यकचक्रपाणिसंग्रहः॥
"अलम्बुषा गोक्षुरकं मूलं वरणकस्य च।
गुडूची नागरञ्चेति समभागानि कारयेत्॥
काञ्जिकेन तु तत्पेयं विड्डालपदमात्रकं।
आमवाते प्रवृद्धे च योगोऽयममृतोपमः॥*॥
अपराजम्बुषाद्यं चूर्णं॥*॥ इति च भावप्रकाशे॥)

अलर्कः, पुं, (अलमर्कतेऽर्च्यते वा, अर्क + अच्, अर्च + घञ् वा।) क्षिप्रकुक्कुरः। ("आलर्कं विषमिव सर्व्वतः प्रसृप्तम्"। इति उत्तरचरिते।) श्वेतार्कवृक्षः। भाषा आकन्द इति भाषा। (अस्य पर्य्यायान्तरं गुणान्तरञ्च यथा—
"अलर्को गुणरूपः स्यान्मन्दारो वसुकोपि च।
श्वेतपुष्पः सदापुष्पः सवालार्कः प्रतापसः॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान्।
निहन्ति श्वेतगुल्मार्शःश्लेष्मोदरशूलकृत्क्रिमीन्॥
अलर्ककुसुमं रुच्यं लघुदीपनपाचनं।
अरोचकप्रसेकार्शःकासश्वासनिवारणम्"॥
इति भावप्रकाशः॥
"दुष्टकर्दमसंस्पर्शाः कण्डूक्लेदान्वितान्तराः"।
अकुल्योऽलस मित्याङ्कः॥ इति वाभटः॥)
तत्पर्य्यायः। प्रतापसः २ राजार्कः ३ गणरूपी ४। इति रत्नमालामरौ॥ शूकराकारास्यपादतीक्ष्णदन्तस्त्यक्षतिलोमजन्तुविशेषः। दंशनामासुरो भृगुशापात् अयं जन्तुर्भूत्वा कार्त्तस्वरं भित्त्वा परशुरामदृष्टिपातात् शापमुक्तः पूर्व्वरूपो बभूव। इति महाभारते राजधर्म्मे॥
("ददर्श रामस्तं चापि क्षमिं शूकरसन्निभं।
अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतं॥
रोमभिः संनिरुद्धाङ्गमलर्कं नाम नामतः।
सोऽब्रवीदृषिमासं प्राग्दंशो नाम महासुरः।
पुरा देवयुगे तात! भृगोस्तुल्यवया इव।
सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात्॥
महर्षेरभिशापेन क्षमिभूतोऽपतं भुवि"।
खनामख्यातो नृपतिः।
"गृध्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ।
अलर्कश्चक्षुषी दत्वा जगाम गतिमुत्तमाम्"॥
इति रामायणे। खनामख्यातः काशिराजः, स हि वत्सराजस्य पुत्रः सन्नतेश्च पिता, यथा हरिवंशे,—
"वत्सपुत्रस्त्वलर्कस्तु सन्नतिस्तस्य चात्मजः।
अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः॥
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च।
तस्यासीत् समहद्राज्यं रूपयौवनशालिनः"।)

अलले, व्य, पिशाचभाषायां सम्बोधनं। तत्पर्य्यायः। अले २ अलेले ३। इति शब्दरत्नावली॥

अलवालं, क्ली, (लवमालाति, ला + क, ततो नञ्समासः।) आलवालं। वृक्षमूले जलधारणार्थकृतालिः। चारमादा इति ख्यातः। इत्यमरटीकायां भरतादयः॥

अलवालकं, क्ली, (अलवाल एव, अलवाल + स्वार्थे कन्।) आलवालं। इति शब्दरत्नावली॥

अलसः, त्रि, (न लसति व्याप्रियते, लस + अच्।) आलस्ययुक्तः। आल्स्या इति भाषा। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ आलस्यः ४ प्रीतकः ५ अनुद्यमः ६। इत्यमरः॥ प्रीतलः ७ कुण्ठः ८ मुखनिरीक्षकः ९। इति शब्दरत्नावली॥ (क्रियामन्दः। क्रियाजड़ः। अवश्यकर्त्तव्येषु अप्रवृत्तिशीलः। "अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीनं। प्रभवेद् वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः"। इति हितोपदेशे।)

अलसः, पुं, (लस + अच्, ततो नञ्समासः।) वृक्षविशेषः। पादरोगभेदः। इति मेदिनी॥ पाँकुइ इति भाषा। तस्य निदानरूपे।
"लिप्ताङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्"॥
अलसं कादई इति लोके। अथ तस्य चिकित्सा।
"पादौ सिल्लारनालेन लेपनं त्वलसे हितं।
पटोलकुनटीनिम्बरोचनामरिचैस्तिलैः॥
क्षुद्राखरससिद्धेन कटुतैलेन लेपयेत्।
ततः कासीसकुनटीतिलचूर्णैर्विचूर्णयेत्"॥
अवधूलयेत्।
"करञ्जबीजं रजनी कासीसं पद्मकं मधु।
रोचना हरितालञ्च लेपोऽयमलसे हितः"॥
इति भावप्रकाशः॥ ("दुष्टकर्दमसंस्पर्शाः कण्डूक्लेदान्वितान्तराः। अकुल्योऽलसमित्याङ्कः"॥ इति वाभटः॥)

अलसकः, पुं, (न लस्यति अनेन, लस + करणे वुन्।) उदररोगविशेषः। इति माधवकरः॥ तस्य रूपं।
"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति॥
वातवर्च्चोनिरोधश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे तृष्णोद्गारौ तु यस्य च"॥
तन्नान्तरे।
"प्रयाति नोर्द्धं नाधस्तादाहारो न च पच्यते।
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः"॥
अस्य लक्षणं चिकित्सा च अजीर्णशब्दे द्रष्टव्या॥
(अलसकमुपदेक्ष्यामः। दुर्ब्बलस्याल्पाग्नेर्बद्धश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबद्धरूक्ष-

घृतसुष्कान्नसेवितस्तदन्नपानमनिलप्रपीड़ितं श्लेष्मणा च विरुद्धमार्गमतिमात्रप्रवृत्तमलसत्वान्न बहिर्मुखी भवति। ततश्चर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयति अतिमात्राणि। अतिमात्रप्रदुष्टाश्च दोषाः प्रदुष्टामबद्धमार्गास्तिर्य्यगागच्छन्तः कदाचित् केवलमेवास्य शरीरं दण्डवत् स्तम्भयन्ति। ततस्तमलसकमसाध्यं ब्रुवते। विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरेव दोषमामविषमित्याचक्षते भिषजो विषसदृशलिङ्गत्वात्। तत्परमसाध्यमाशुकारित्वात् विरुद्धोपक्रमत्वाच्चेति। तत्र साध्यमामं प्रदुष्टमलसीभूतमुल्लेखयेत्। पाययित्वा सलवणमुष्णवारि। ततः स्वेदनवर्त्तिप्रणिधानाभ्यामुपाचरेदुपवासयेच्चैनम्। इति चरकः॥)

अलसा, स्त्री, (अलस+अच्, ततो नञ्समासः, स्त्रियां टाप्।) हंसपदीलता। इति मेदिनी॥ हंसपदीशब्देऽस्य गुणादयो ज्ञेयाः॥

अलसेक्षणा, स्त्री, (अलसे ईक्षणे यस्याः सा।) स्त्रीविशेषः। सा अलसवृत्तियुक्ता। इति हेमचन्द्रः॥

अलक्षणं, क्ली, (लक्षणमनुमापकं सूचिह्नं, विरोधे नञ्, नञ्समासः।) दुर्लक्षणं। मन्दचिह्नं। ("आचारात् धनमक्षय्यमाचारो हन्त्यलक्षणम्"। इति मनुः।) तद्विशिष्टे त्रि॥

अलक्ष्मीः, स्त्री, (न लक्ष्मीः, नञ्त्र विरोधे।) नरकदेवता। तत्पर्य्यायः। निर्ऋतिः २। इत्यमरः॥ कालकर्णी ३। इति शब्दरत्नावली॥ कालकर्णिका ४। इति जटाधरः॥ ज्येष्ठादेवी ५ इति पाद्मोत्तरखण्डे। तस्या विवरणं ज्येष्ठाशब्दे द्रष्टव्यं॥*॥ दीपान्वितामावास्यायां तस्याः पूजाविधिर्यथा। तत्र प्रदोषे आदौ आचारादलक्ष्मीपूजनं। इत्याचार्य्यचूड़ामणिप्रभृतयः॥ गोमयपुत्तलिकां निर्माय वामहस्तेन क्षत्रपुष्पं गृहीत्वा ध्यायेत्।

"अलक्ष्मीं कृष्णवर्णां द्विभुजां कृष्णवस्त्रपरीधानां लौहाभरणभूषितां शूर्पराचन्दनचर्चितां गृहसम्मार्জ্জनीहस्तां गर्दभारूढां कलहप्रियां"। इति ध्यात्वा विमुखेन "ॐ अलक्ष्म्यै नमः" इत्यनेन निर्म्माल्येन कृष्णपुष्पेण संपूज्य प्रणमेत्।

"(ॐ)अलक्ष्मीर्त्वं कुरूपासि कुत्सितस्थानवासिनी। सुखराज्ञौ मया दत्तां गृह पूजाञ्च शाश्वतीं॥ दारिद्र्यकलहप्रिये देवि! त्वं धननाशिनी। याहि शूर्पोर्म्मले नित्यं स्थिरा तत्र भविष्यसि॥ यदि त्वं मे महाभागे प्रीता भवसि सर्व्वदा। पुत्रबन्धुकलत्रेषु कदाचिन्नागमिष्यसि॥ गच्छ त्वं मन्दिरं शूर्पोर्म्मेर्हीत्वा चाशुभं मम। सदाश्रयं परित्यज्य स्थिरा तत्र भविष्यसि"॥ ततः शूर्पवादेन सीमान्ते तां विसृजेत्।

इति कृत्यचन्द्रिका॥*॥ किञ्च.—

"एवं गते निशीथे तु नारी च सम्मार्জ্জनात्। अलक्ष्मीश्च बहिष्कार्य्या अमन्त्रञ्च यथाविधि"॥

इति कृत्यतत्त्वार्णवधृतब्रह्मपुराणं॥*॥

"एवं गते निशीथे तु जने निद्रार्द्रलोचने।
तावन्नगरनारीभिः सूर्पडिण्डिमवादनैः॥
निष्काश्यते प्रहृष्टाभिरलक्ष्मीः सम्मार्জ্জनात्"॥
इति निर्णयसिन्धौ मदनरत्नधृतभविष्यपुराणं॥

अलातं, क्ली, (ला+क्त, नञ्समासः।) अङ्गारः। इत्यमरः॥ (अर्द्धदग्धकाष्ठः।
"कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम्"।
इति कुमारसम्भवे।)

अलाबुः, पुं, स्त्री, (न लम्बते, न+लबि ऊर्द्धीत् नलोपश्च दृडिः।) लताविशेषः तत्फलञ्च। लाउ इति ख्याता। तत्पर्य्यायः। तुम्बः २ तुम्बकः ३ तुम्बा ४ तुम्बी ५ पिण्डफला ६ महाफला ७ अलावुः ८ एलावुः ९ लावुः १० लाबुका ११। इत्यमरः तट्टीका च॥ तुम्बिका १२ तुम्बिः १३ अलाबुः १४। इति शब्दरत्नावली॥ अस्या गुणाः।

"अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला मिष्टं तुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु॥ दृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनं"।
इति भावप्रकाशः॥ भेदकत्वं कफकारित्वं। गुरुपाकित्वं। हिमत्वं। पित्तनाशित्वञ्च। तन्नाड़ीगुणाः। गुरुत्वं। मधुरत्वं॥ मलभेदकत्वं। वातश्लेष्मकारित्वं। रूक्षत्वं। शीतलत्वं। पित्तनाशित्वञ्च। इति राजवल्लभः॥
("वर्षाभेदीन्यलाबूनि रूक्षाशीतगुरूणि च"।
इति चरकश्च।
"अलाबुर्भिन्नविट्का तु रूक्षागुर्व्वतिशीतला"।
इति च सुश्रुतः॥)

अलारं, क्ली, (अरार्द्यते, ऋ+यङ्लुक्+अच् रस्य लः।) कवाटं। इति शब्दरत्नावली॥

अलिः, पुं, स्त्री, (अलति दंशे समर्थो भवति यः, सः, अल+इन्।) भ्रमरः।
("अलिपङ्क्तिरनेकगुणत्वया,
गुणवत्त्वे धनुषो नियोजिता"।
इति कुमारसम्भवे।
"अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय"।
इति रघुवंशे।) दृश्चिकः। इत्यमरः॥ काकः। कोकिलः। इति शब्दरत्नावली॥ मदिरा। इति मेदिनी॥ (दृश्चिकराशिः।)

अलिकं, क्ली, (अल्यते भूष्यते, अल+कर्म्मणि इकन्।) ललाटं। इत्यमरः॥

अलिकुलसङ्कुलः, पुं, (अलिकुलेन सङ्कुलः व्याप्तः, तृतीयातत्पुरुषः।) कुञ्जकवृक्षः। इति राजनिर्घण्टः॥

अलिगर्द्दः, पुं, (अलिरिव दृश्चिक इव गर्द्धोति, गर्द्ध+अच्।) जलसर्पः। आलाध इति ख्यातः। इति शब्दरत्नावली॥

अलिजिह्वा, स्त्री, (अलिरिव क्षुद्रा जिह्वा।) जिह्वोपरि क्षुद्रजिह्वा। आलजिव इति ख्याता। इति शब्दरत्नावली॥

अलिजिह्विका, स्त्री, (अलिजिह्वा एव स्वार्थे कन्; टाप्।) अलिजिह्वा। इति शब्दरत्नावली॥

अलिञ्जरः, पुं, (अल+इन, अलिं सामर्थ्यं जरयति जृणाति वा, अलि+जृ+अच्, पृषोदरादित्वात् साधुः।) मृदादिनिर्म्मितजलाधारविशेषः। जाला इति ख्यातः। इत्यमरः॥
("उदक्रान्तमुपनीय मत्स्यं वैवस्वतो मनुः।
अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभं"॥
इति महाभारते।)

अलिदूर्व्वा, स्त्री, (अलिरिवाकारेण दूर्व्वा।) माला-दूर्व्वा। इति राजनिर्घण्टः॥

अलिन्दः, पुं, (अलते भूष्यते, अल+कर्म्मणि बाहुलकात् किन्दच्।) बहिर्द्वारसंलग्नचतुरस्रक्षत्रिमभूमिः। तत्पर्य्यायः। प्रघाणः २ प्रघणः ३ बहिर्द्वारप्रकोष्ठः ४ आलिन्दः ५। इत्यमरः॥ गृहद्वारपिण्डकः। अलिन्दः नाम्नीति अलञ् इन्द क्रस्वादिः। यस्यामलिन्देषु न चक्रुरेवेति माघः। स्वार्थे ण्यो आलिन्दो दीर्घादिरपि।
"गृहैकदेशे आलिन्दः प्रघाणःप्रघणस्तथा"।
इत्यमरदत्तः। अथ पिण्डक आलिन्द इति हड्डुः। इह तूभयमेव स्नेहादिति साञ्जः।
इत्यमरटीकायां भरतः॥*॥ अन्यच्च।
"प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके।
गृहाभ्यन्तरशब्दार्थपिण्डिकायामपि त्रयं॥
आलिन्दः स्यादलिन्दोऽपि स्यादलिन्दक इत्यपि"।
इति शब्दरत्नावली॥
("शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनां।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि॥"
इति माघः।)

अलिपक्वः, पुं, स्त्री, (कुत्सितवर्णेन लिप्यते, लिप+बाहुलकात् कर्म्मणि वुन्।) भ्रमरः। कोकिलः। कुक्कुरः। इति मेदिनी॥ (दृश्चिकः।)

अलिपत्रिका, स्त्री, (अलिर्दृश्चिक इव पत्रमस्याः, कपि अत इत्त्वम्।) दृश्चिकाख्यक्षुपः। इति राजनिर्घण्टः॥

अलिपर्णी, स्त्री, (अलिरिव पर्णमस्याः, ङीप्।) दृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

अलिप्रियं, क्ली, (अलीनां प्रियं षष्ठीतत्पुरुषः।) रक्तोत्पलं। रक्तपद्मं। इति त्रिकाण्डशेषः॥

अलिप्रिया, स्त्री, (अलीनां प्रिया, षष्ठीतत्पुरुषः।) पाटलावृक्षः। इति रत्नमाला॥

अलिमकः, पुं, (अलिरिव मक्कते, मक्क+अच्, पृषोदरादित्वात्लोपः।) भेकः। कोकिलः। भ्रमरः। पद्मकेशरः। मधूकवृक्षः। इति मेदिनी॥

अलिमोदा, स्त्री, (अलीन् मोदयति मुद्+णिच्+अच्।) गणिकारीवृक्षः। इति राजनिर्घण्टः॥

अलिम्बकः, पुं, (न+लिपि+वुन्) पद्मकेशरः। भेकः। भ्रमरः। कोकिलः। इति शब्दरत्नावली॥ (कुक्कुरः। मधूकवृक्षः।)

अलिवाहिनी, स्त्री, (अलिं वाहयति गन्धेन, वह+णिच्+णिनि+ङीप्।) केविकापुष्पं। इति राजनिर्घण्टः॥

अली, [न्] पुं, (अलं दृश्चिकपुच्छस्यकण्टकं विद्यतेऽस्य इनि।) भ्रमरः।

("मलिनिमालिनि माधवयोषिताम्"। इति माघः।) दृश्चिकः। इति मेदिनी॥

अलीकं, क्ली, (अल+ईकन्।) अप्रियं। ("तद्यथा स महाराजो नालीकमधिगच्छति"। इति रामायणे।) मिथ्या। इत्यमरः॥ ("ज्ञातेऽलीकनिमीलिते नयनयोः"। इति अमरशतके।) स्वर्गः। इति मेदिनी॥ ललाटं। इति हेमचन्द्रः॥

अलीकं, त्रि, (अल+ईकन्।) मिथ्या। अप्रियं। अत्यं। इति शब्दरत्नावली॥

अलीकमत्स्यः, पुं, अङ्गारखिन्नतिलतैलभृष्टमाषपिष्टं। तच्च प्रमाणं राजनिर्घण्टे यथा।

"माषपिष्टिकया लिप्त्वानागवल्लीदलैर्महत्।
तप्तु संस्वेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि॥
ततो निष्काशितं खण्डं तिलतैलेन भर्जयेत्।
अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः॥
तं दन्ताकभटिचेण वास्तूकेन च भक्षयेत्॥"

अलुः, स्त्री, (अल+उन्।) आलुः। क्षुद्रकलसी। इत्यमरटीकायां रमानाथः॥

अलुब्धः, त्रि, (लुभ+क्तः, नञ्समासः।) लोभरहितः। यथा मनुः।

"एकोऽप्यलुब्धः साक्षी स्यात् बह्वः शुचोऽपि न स्त्रियः। स्त्रीबुद्धेरस्थिरत्वात्तु दोषैरन्येऽपि ये वृताः"॥

"एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः।" इति व्यवहारतत्त्वं॥

("अलुब्धैः स्निग्धैः प्रबुद्धैस्सामात्यैः परिवृतः'। इति कादम्बरी।)

अले, व्य, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलेले, व्य, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलोभः, पुं, (न लोभः, अभावे नञ्।) लोभाभावः। यथा,—

"इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः"॥

इति महाभारतं॥

अलोभी, [न्] त्रि, (लोभोऽस्यास्य इति लोभी, न लोभी इति नञ्समासः।) लोभशून्यव्यक्तिः। नास्ति लोभो यस्य इति बह्वृीहिसमासादिन्प्रत्ययनिष्पन्नः॥

अलोहितं, क्ली, (न लोहितं, नास्ति लोहितं यस्मात् इति वा।) रक्तपद्मं। इति रत्नमाला॥

अलौकिकः, त्रि, (लोके विदितः, लोक+ठक् ततोनञ्समासः।) लौकिकप्रत्यक्षाविषयः। अमा, नुषिकः। लोकातीतः। यथा,—

"अलौकिकत्वादमरः स्वकोषे
न यानि नामानि समुल्लिलेख।
विलोक्य तैरप्यधुना प्रचार-
मयं प्रयत्नः पुरुषोत्तमस्य"॥

इति चिकाण्डशेषहितीयश्लोकः॥

("उपसंहर विश्वात्मन्नदोरूपमलौकिकम्"। इति भागवतपुराणम्।)

अल्पं, त्रि, (अल्+प।) किञ्चित्। तत्पर्य्यायः। ईषत् २ मनाक् ३ स्तोकं ४।

("अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः"। इति मनुः।) खल्लकं ५ श्लक्ष्णं ६ दर्भं ७ क्षुद्रं ८ तनुः ९ तनूः १० त्रुटिः ११ त्रुटी १२ माषा १३ लवः १४ लेशः १५ कणः १६ कणी १७ कणिका १८ अणुः १९ सूक्ष्मं २०। इत्यमरः॥ क्षुल्लं २१ क्षुल्लकं २२ खल्लं २३ कणा २४। इति शब्दरत्नावली। (अतिसामान्यः।

"अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम्"।

इति रघुवंशे। संक्षिप्तं। अदीर्घं।

"अनन्तपारं किल शब्दशास्त्रं,
स्वल्पं तथायुर्बहवश्च विघ्नाः"।

इति पञ्चतन्त्रम्।)

अल्पकः, पुं, (अल्प एव, अल्प+स्वार्थे कन्।) यवासवृक्षः। इति राजनिर्घण्टः॥ अस्य गुणाः॥

"यासः स्वादुः सरस्निग्धस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तास्रक्षयकासजित्॥
व्रणाविसर्पवातास्रवमिज्वरहरः स्मृतः।
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा"॥

इति भावप्रकाशः।) (खल्पपरिमितः। किञ्चित्।

"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत्"॥

इति मनुः।)

अल्पकेशी, स्त्री, (अल्पः केशइव पत्रमस्याः सा।) भूतकेशीवृक्षः। इति रत्नमाला॥

अल्पगन्धं, क्ली (अल्पो गन्धो यस्य तत्।) रक्तकेरवं। इति रत्नमाला॥

अल्पतनुः, त्रि, (अल्पा क्षुद्रापरिमाणा तनुर्यस्य।) खर्व्वः। दुर्ब्बलः। अल्पास्थियुक्तः। क्षुद्रदेहवान् तत्पर्य्यायः। एभिः २। इत्यमरः॥

अल्पपत्रः, पुं, (अल्पं पत्रं यस्य सः।) क्षुद्रपत्रतुलसी। इति रत्नमाला॥

अल्पपद्मं, क्ली, (अल्पमसम्पूर्णं पद्मं।) रक्तपद्मं। इति रत्नमाला॥

अल्पप्रमाणकः, पुं, (अल्पं प्रमाणमस्य, वा कन्।) चेलानं। इति रत्नमाला॥ चेलो चेला तरमूज इति ख्यातः। खरमूज इति केचित्।

अल्पमारिषः, पुं, (अल्पः क्षुद्रः मारिषः नटिया इति ख्यातः शाकः, कर्म्मधारयः।) शाकविशेषः। क्षुद्रनटिया इति ख्यातः। तत्पर्य्यायः तण्डुलीयः २। इत्यमरः॥ (तण्डुलीयशब्देऽस्य गुणा ज्ञेयाः।)

अल्पसरः, [स्] क्ली, (अल्पं क्षुद्रं सरः, कर्म्मधारयः।) क्षुद्रसरोवरः। डोवा गेड़ इति भाषा। तत्पर्य्यायः। वेशन्तः २ पल्वलं ३। इत्यमरः॥

अल्पायुः, [स्] पुं, (अल्पं संक्षिप्तं आयुर्जीवनकालो यस्य सः।) छागः। इति त्रिकाण्डशेषः॥ व्यक्तिरजीविते त्रि॥ (अदीर्घजीवी।

"दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च"।

इति मनुः।)

अल्पिष्ठः, त्रि, (अतिशयेन अल्पः, अल्प+इष्ठन्। अत्यल्पं। इत्यमरः॥ [अत्यल्पं। इत्यमरः॥

अल्पीयः, [स्] (अतिशयेन अल्पः, अल्प ईयसुन्।)

अल्लः, पुं, (अल्+क।)
अल्ला, स्त्री, (अल+क, स्त्रियां टाप्।) } परमेश्वरः।

एतन्नाम्ना यवना उपासन्ते। यथा।"ॐ अल्लां इल्ले मित्रावरुणो दिव्यानि धत्ते। इल्ले वरुणो राजा पुनर्ददुः। हयामि मित्रो इल्लां इल्लेति इल्लाल्लां वरुणो मित्रो तेजकामाः। होवारमिन्द्रो होतारमिन्द्रो माहासुरिन्द्राः। अल्लो ज्येष्ठं श्रेष्ठं परमं पूर्णं ब्रह्माणमल्लां अल्लोरसुर महमदरकं वरस्य अल्लो अल्लां आदल्लावुकमेककं। अल्लां वुकं। निखातकं। अल्लो यज्ञेन ऊतऊतयः अल्ला सूर्य्यचन्द्रसर्व्वनक्षत्राः अल्लो ऋषीणां सदित्था इन्द्राय पूर्व्वे मायापरमन्त अन्तरिक्षाः। अल्लो पृथिव्या अन्तरिक्षं विश्वरूपं दिव्यानि धत्ते इल्लले वरुणो राजा पुनर्ददुः। इल्लाकवर इल्लाकवर इल्लल्लेति इल्लाल्लाः इल्ला इल्लला अनादिस्वरूपा अथर्व्वणी शाखां ऊँ क्रीं जगान् पशून् सिद्धान् जलचरान् अदृष्टं कुरु कुरु फट्। असुरसंहारिणीं ऊँ अल्लो रसुरमहमदरकं वरस्य अल्लो अल्लां इल्लल्लेति इल्लल्लः"। इत्यथर्व्ववेदसूक्तं।

अल्ला, स्त्री, (अल्यते इत्यल्, क्विप्, अल्ले भूषायै लाति गृह्णाति, ला+क।) गायत्रीमाता। इति वोपदेवः॥ (अथर्व्ववेदे अल्लाल्लेत्यादिख्यातो यवनोपास्यः परमेश्वरः।)

अव रक्षणे। (यथायथं सकं-अकं-च, भ्वादिपरं-सेट्।) गतौ। कान्तौ। स्पृहायामिति यावत्। प्रीतौ। तृप्तौ। द्युतौ। शोभायामिति यावत्। श्रुतौ। आकर्णने इति यावत्। प्राप्तौ। श्लेषे। आलिङ्गने इति यावत्। अर्थने। याच्ञायामिति यावत्। वेशे। प्रवेशे इति यावत्। भावे। सत्तायामिति यावत्। वृद्धौ। ग्रहे। आदाने इति यावत्। बधे। सामर्थ्ये। अवगमे। तृप्तौ। करणे इति यावत्। कामे। इच्छोत्पादने इति यावत्। (इति वोपदेवीयकविकल्पद्रुमः तट्टीका च।) "अव रक्षे गतौ कान्तौ प्रीतौ तृप्तौ द्युतौ स्तुतौ। प्राप्तौ श्लेषेऽर्थने वेशे भागे वृद्धौ ग्रहे बधे। सामर्थ्येऽवगमे कामे तृप्तौ"। ऊनविंशतिरर्थाः। कान्तिरिच्छा। द्युतिः शोभा। काम इति अन्नाद्युत्पत्तेरिच्छोत्पादना इति भेदः। श्लेष आलिङ्गनं। सामर्थ्यं शक्तिः। रक्षणे प्रसिद्धोऽयं। प्रीतौ तु। "न मामवति सद्दोषा रत्नसूरपि मेदिनी"। इति रघुः॥ अन्यत्र विरलप्रयोगः। केचित्तु स्तुति-भाग-स्नेह-काम-तृतीर्न पठित्वा क्रिया-श्रवण-रक्षण-भावनाङ्गः। अवति। इति दुर्गादासः॥

अव, व्य, (अव+अच्।) उपसर्गविशेषः। अस्यार्थः। निश्चयः। असाकल्यं। अनादरः। इति दुर्गादासः॥ आलम्बनं। विज्ञापनं। व्यापनं। शुद्धिः। अल्पं। परिभवः। नियोगः। पालनं। इति शब्दरत्नावली॥

अवकटं, क्ली, (अव + स्वार्थे कटच्।) वैरूप्यं। अवात् कुटारस्य वैरूप्ये चकारात् कटच्च। इति गोयीचन्द्रतत्तत्त्वं॥

अवकरः, पुं, (अव + कृ + अप्।) सम्मार्ज्जन्यादिनिःक्षिप्तधूल्यादिः। जञ्जाल इति ख्यातः। तत्पर्य्यायः। सङ्करः २। इत्यमरः॥ अवस्करः ३। इत्यमरटीकायां मथुरानाथः॥ सङ्कारः ४। इति शब्दरत्नावली॥ ("अवकरनिकरं विकिरति तत् किं क्षकवाकुरिव हंसः"। इति नीतिशतके।)

अवकलितः, त्रि, (अव + कल + क्त।) दृष्टः। इति धरणी॥

अवकाशः, पुं, (अव + काश + घञ्।) अवस्थानदेशः। फाँक इति यावत्। अवसरः। व्याप्तिरहितस्थानं। इत्यन्तरशब्दटीकायां भरतः॥

("न सूक्ष्मतन्तोरपि तावकस्य
तत्रावकाशो भवतः कथं स्यात्"।
इति रत्नावलीनाटिकायाम्।)

अपि च।

"एवञ्च षड्ग्रीत्यादिष्वप्यवकाशमलभमानं"। इति तिथ्यादितत्त्वं॥ अन्यच्च।

"अवकाशेषु चोक्तेषु नदीतीरेषु चैव हि।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा"॥
इति मानवे ३ अध्याये २०७ श्लोकः॥ (प्रशस्तप्रदेशः।

"अवकाशो विविक्तोऽयं महानद्योः समागमे"। इति रामायणे। द्रव्यादिसञ्चयस्थानं। अवस्थानं। स्थितिः।

"अवकाशं किलोदन्वान् रामायार्थयितो ददौ"। इति रघुवंशे।)

अवकीर्णः, त्रि, (अव + कॄ + क्त।) अवचूर्णितः। तत्पर्य्यायः। अवध्वस्तः २। इति हेमचन्द्रः॥ (विस्तृतः। प्रसृतः। विक्षिप्तः।

"भुक्तानि यौवनसुखानि यशोऽवकीर्णे
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि"।
इति नागानन्दे। उज्झितः। अतिक्रान्तः।)

अवकीर्णी, [न्] त्रि, (अवकीर्णमनेन अव + कॄ + क्त + इनि, अवकीर्णं भ्रष्टं व्रतमिति ग्रेषः, अस्यास्तीति।) भ्रष्टव्रतः। स्त्रीसंसर्गादिना त्यक्तनियमयक्तिः। इत्यमरभटाधरौ।

("कुशीलवोऽवकीर्णी च दम्भोपपतिरेव च।
पौनर्भवश्च काण्डस्य यस्य चोपपतिर्गृहे"॥
इति मनुः।)

अवकुटारं, क्ली, (अव + स्वार्थे अतिशये वा कुटारच्।) वैरूप्यं। इति संक्षिप्तसारव्याकरणस्य परिशिष्टं॥ (अवाचीनत्वं। वैपरीत्यं।)

अवक्षप्तः, त्रि, (अव + क्षप् + क्त।) बहिष्कृतः। दूरीकृतः। तत्पर्य्यायः। निष्काशितः २। इत्यमरः॥ निःसारितः ३। इति भटाधरः॥ निर्गमितः ४। इति शब्दरत्नावली॥ (बहिष्कारितः। निर्गलितः। आक्षप्तः।

"एकाकिनापि हि मया रभसावक्षप्त-
निस्त्रिंशदीधितिसटाभरभासुरेण"।
इति नागानन्दे। नीचः। निकृष्टः।

"प्रतिकर्त्तुं प्रकृष्टस्य नावक्षिप्तेन युज्यते"।
इति रामायणे। हीनजातीयः॥ नीचजातीयः। अपकृष्टवर्णः।

"चान्द्रायणं चरेत् सर्व्वानवक्षिप्तान् निहत्य तु"।
इति याज्ञवल्क्यः। गृहादिसम्मार्ज्जकोदकवाहादिः कर्म्मकरः।

"पाणौ देयोऽवक्षिप्तस्य षड्भक्तस्य वेतनम्।
यागमासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः"॥
इति मनुः।)

अवकेशी, [न्] त्रि, (अवक्षुतं कं सुखं यस्मात्, अवकं फलशून्यतामीशितुं शीलमस्य, अवक + ईश + णिनि।) फलकालेऽप्यनुत्पन्नफलकवृक्षादिः। इत्यमरः॥ तत्पर्य्यायः। वन्ध्यः २ अफलः ३॥

अवक्तव्यं, त्रि, (न वक्तव्यं, नञ्समासः।) वचनायोग्यं। अकथनीयं। न वक्तव्यं अवक्तव्यमिति नञ्समासनिष्पन्नं। यथा,—

"असम्भाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते"।
इति चाणक्यः॥

अवक्रयः, पुं, (अवक्रीयते प्रतिरूपदानेन स्वाधीनं क्रियतेऽनेन, अव + क्री + अच्।) क्रयसाधनद्रव्यं। मूल्यं। इत्यमरः॥ (राजग्राह्यं द्रव्यं। वणिग्भिः सुल्काख्याने प्रतिभाण्डमधिपतये देयं।

"विक्रयावक्रयाधानयाचितेषु प्रमाद्य दृश्यं"।
इति याज्ञवल्क्यः। एतावत्कालमुषयोगार्थं भाण्डवस्त्राश्वादिभ्यो दीयते मह्यं च युष्माभिरेतावद्धनं देयमित्येवंविधं भाटकं। भाड़ा इति भाषा।)

अवगणितं, त्रि, (अव + गण + कर्म्मणि क्त।) अवज्ञातं। अवमानितं। इत्यमरः॥ (तिरस्कृतं।

"आयासेनालसाङ्गोऽयवगणितरुजः कानने चन्दनानां,अस्मिन् गायन्तु रागादुरगयुवतयः कीर्त्तिमेतां तवैव"। इति नागानन्दे।)

अवगण्डः, पुं, (अव + गम + ड, डकारस्य नेत्वम्।) गण्डस्यावयवः। वयस्फोड़ा इति यावत्। तत्पर्य्यायः। वरण्डः २। इति त्रिकाण्डशेषः॥

अवगतं, त्रि, (अव + गम + क्त।) ज्ञातं। तत्पर्य्यायः। बुद्धं २ बुधितं ३ मनितं ४ विदितं ५ प्रतिपन्नं ६ अवसितं ७। इत्यमरः॥ प्रमितं ८ मतं ९ प्रतीतं १०। इति भटाधरः॥

अवगतिः, स्त्री, (अव + गम + भावे क्तिन्।) ज्ञानसामान्यं। इति भटाधरः॥ (बोधमात्रं। अपगमः। अपसरणम्।)

अवगथः, त्रि, (अव + गा + कर्त्तरि थ, निपातनात् ह्रस्वः।) प्रातःस्नातः। प्रातःस्नायी। इति सिद्धान्तकौमुदी॥

अवगादः, पुं, (अव + गद + घञ्।) जलद्रोणी। नौकाजलसेचनकाष्ठपात्रं। इति हलायुधः॥

अवगाहः, पुं, (अव + गाह + घञ्।) स्नानं। स्नानमहं। इति वोपदेवः॥

("प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षमवारिसञ्चयः"।
इति ऋतुसंहारः।)

अवगाहनं, क्ली, (अव + गाह + भावे ल्युट्।) स्नानकरणं। तत्पर्य्यायः। अवगाहः २ वगाहः ३ मज्जनं ४ ("कन्दर्पबाणानलैरुग्रधामावगाहनाय विधिना रम्यं सरो निर्म्मितम्"। इति शृङ्गारतिलके।) निमज्जनं ५। डुब दिया नाओया इति भाषा। शिरःस्नानं। अम्भसि मज्जनं। यथा।

अवगाहनन्तु चक्षुःकर्णनासिकामङ्गुलीभिराच्छाद्य कुर्य्यात्।

"अङ्गुलीभिः पिधायैवं श्रोत्रदृङ्नासिकामुखं।
निमज्जेत प्रतिस्रोतस्त्रिः पठेदघमर्षणं"॥
इति समुद्रकरधृतात्। अत्रानुद्धृते वारत्रयमेवावगाहनं।

"नाभिमात्रजले गत्वा कृत्वा केशान् द्विधा द्विजः।
निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः"॥
इति वामनपुराणात्। इत्याह्निकाचारतत्त्वं॥ अन्यत् स्नानशब्दे द्रष्टव्यं॥*॥ आद्धीयब्राह्मणस्य आद्धकर्त्तुरपि अवगाहनस्नानकर्त्तव्यत्वं। यथा गोभिलः। "स्नातान् शुचीन् आचान्तान्" इत्यादि। स्नातान् अवगाहितान् न तु मन्त्रादिस्नातान्। स्वयमपि सूतकादिरहितः स्नातः। इति आद्धतत्त्वं॥

अवगीतं, क्ली, (अव + गै + क्त।) निर्व्वादः। लोकापवादः। इति विश्वमेदिन्यौ॥ (गीतादिना निन्दाख्यापनम्। असाधुगीतं। अशोभनगानं।)

अवगीतः, त्रि, (अव + गै + क्त।) ख्यातगर्हणः। निन्दितः। इत्यमरः॥ ("विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम्"। इति भारविः।) दृष्टः। इति मेदिनी॥ मुञ्जटेष्टः। इति विश्वः॥

अवगुण्ठनं, क्ली, (अव + गुण्ठ + ल्युट्।) योषानानावरकसरन्ध्रवस्त्रं। स्त्रीमुखाच्छादनवस्त्रं। घोमटा इति ख्याता। इति शब्दरत्नावली॥ मुद्राविशेषः। ("अवगुण्ठनसंवीता कुलजाभिसरेद्यदि"।
इति साहित्यदर्पणे। "जादे! मुञ्जत्तयं मा लज्ज, अवगुण्ठणं दाव दे अवगुण्ठणम्"। इति शाकुन्तले।) मुद्राविशेषः।
तथा च तन्त्रसारे।

"सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता"॥
धूल्यादिभक्षणं॥

अवगुण्ठिका, स्त्री, (अवगुण्ठयति आवृणोति, अव + गुण्ठ + ण्वुल्, स्त्रीत्वात् टापि अत इत्वम्।) अवगुण्ठनं। स्त्रीमुखावरकवस्त्रं। इति शब्दरत्नावली॥

अवगुण्ठितं, त्रि, (अव + गुण्ठ + क्त।) चूर्णितं। इति त्रिकाण्डशेषः॥ गुँड़ा करा इति भाषा।

अवगोरणं, क्ली, (अव + गुर उद्यमे + ल्युट्।) ताड़नार्थदण्डादीनामुद्यम इति ब्राह्मणं॥ मारिवार निमित्ते ठेङ्गा उठान इति भाषा। यथा प्रायश्चित्तविवेके। "दण्डनिपातप्रायश्चित्तेनैव गुरुणा तन्मात्तरीयकावगोरणप्रायश्चित्तमपि सम्पद्यतइत्युक्तं। ननु दण्डनिपातप्रायश्चित्तात् तदन्तः-

पातिनोऽवगोरणप्रायश्चित्तस्य कथं सिद्धिः। तथाहि मनुः।

अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। अवगूर्य्य ब्राह्मणताड़नार्थं दण्डमुद्यम्य घृतयातनाजनकं यत् पापमुत्पादितं तत्क्षयकामः कृच्छ्रप्राजापत्यव्रतं चरेत्। तदुक्तं संयुधिकरणे। ग्रंथोः प्रजापतेः प्रार्थनया देवैर्ब्राह्मणावगोरणाफलत्वेन घृतयातनाभिहिता। तथा च श्रुतिः। ग्रंथुः प्रजापतिः प्रजाविनेता प्रजाहिते रतस्य देवानां हविर्वहन् व्याग्निर्मोऽयाचत। देवास्त्ववगोरणे घृतयातनास्त्वत्याग्निर्मोऽददतेति। ग्राख्यदीपिकादौ दर्शपौर्णमासप्रकरणे। देवा वै ग्रंथुं वार्हस्पत्यमब्रुवन् हव्यं नो वक्षेति किं मे प्रजाया इति तेऽब्रुवन् यो ब्राह्मणायावगुरेत्तं घृतेन यातयेत् यो निहन्यात् तं सहस्रेण यो लोहितमकरोत् यावतः पांसून् व्यनक्ति तावतः परिवत्सरान् स स्वर्गात्प्रच्यवेत। तस्माद् ब्राह्मणान् नावगुरेत् न हन्यात् न लोहितं कुर्य्यात् इति"। इतिहासात्मकं ब्राह्मणञ्च। इति प्रायश्चित्ततत्त्वं॥

अवग्रहः, पुं, (अव + ग्रह + घञ्।) हस्तिरोधः। (अनावृष्टिः।

"हस्तिभवति ग्रस्यानामवग्रहविशोषिताम्"।

"नभोनभस्ययोर्हस्तिमवग्रह इवान्तरे"॥

इति रघुवंशे।) प्रतिबन्धकः। हस्तिललाटं। इति मेदिनी॥ गजसमूहः। इति हारावली॥ स्वभावः।

इति चिकाण्डशेषः॥ (यदुक्तं,—

"तौ स्थास्यतस्ते रूपतेर्निदेशे
परस्परावग्रहनिर्विकारौ"।

इति माघविकाग्निमित्रनाटकम्।) ज्ञागविशेषः। इति हेमचन्द्रः॥ ग्रापः। इत्यमरटीकायां भरतादयः॥ (ग्रहणं। स्वीकारः। हरणं। अपसारणं। निरोधः। अवरोधः।

"स रोचयामास परेण बन्धं
प्रसह्य रक्षोभिरवग्रहञ्च"।

इति रामायणे। अवान्तरपदसंज्ञां सूचयितुं पदपाठकाले किञ्चित्कालमवसानम्। अनादरः। निन्दासूचकवाक्यप्रयोगः।)

अवग्रहणं, क्ली, (अव + ग्रह + भावे ल्युट्।) प्रतिरोधः। अनादरः। इति मेदिनी॥

अवग्राहः, पुं, (अव + ग्रह + घञ्।) ग्रहदोषादिजन्यहस्त्यिाघातः। शुको इति भाषा। तत्पर्य्यायः। हस्तिविघातः २ अवग्रहः ३। इत्यमरः॥ हस्तिललाटं। ग्रापः। इति तट्टीका॥ (यथा,—

"अवग्राहस्ते भूयात्"।)

अवघट्टः, पुं, (अव + घट्ट + आधारे घञ्।) भूरन्ध्रं। गर्त्तः। इति चिकाण्डशेषः॥

अवघातः, पुं, (अव + हन् + घञ्।) आघातविशेषः। तण्डुलादिकण्डनं। इति हेमचन्द्रः॥ काँड़ान यस्य प्रसिद्धिः। यथा। चरुविधौ विद्याकरवाजपेयी। ग्राश्वावधारणावेलायां हि यच्च प्रयोजनाभावादिनिश्चयस्तच्चैव तदुपादानादिलोपः ग्राश्वार्थः। यथा क्षणालेऽवघातादिलोपः। यच्च तदनुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयाच्छास्त्रप्रापितः पदार्थो नियमापूर्व्वमाचार्थमनुष्ठेयमेव। अतएव प्रक्षतावपि आलस्यादिना व्रीह्यादिस्थाने तण्डुलादिषु ग्रहीतेष्यावघातादि समाचरन्ति याज्ञिकाः।

"घाते न्यूने तथा क्लिन्ने सान्नाय्ये मान्त्रिके तथा।
यज्ञे मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः"॥

सान्नाय्ये हविषि मान्त्रिके मन्त्रसाध्येऽवघातादौ तत्काले मन्त्रपाठाभावेऽपि मन्त्राः प्रयोक्तव्याः। इति शुद्धितत्त्वं॥ (अपमृत्युः)॥

अवचस्करः, त्रि, अवचनस्यः। कथार अवाध्य इति भाषा। न वचः करोतीत्यर्थे वचःशब्दपूर्व्वकक्षधातोः टप्रत्ययेन निष्पन्नः॥

अवचूर्णितं, त्रि, (अव + चूर्ण + कर्म्मणि क्त।) चूर्णीकृतद्रव्यं। गुँड़ा करा इति भाषा। तत्पर्य्यायः। अवध्वस्तः २ अपध्वस्तः ३। इत्यमरः तट्टीका च॥

अवचूलः, पुं, (अवनता चूड़ा यस्य, वा डस्य लः।) ध्वजाग्रवद्राधोमुखवस्त्रं। इति हेमचन्द्रः॥

अवचूलकं, क्ली, (अवचूलमिव इवार्थे कन्, संज्ञायां वा कन्।) चामरं। इति चिकाण्डशेषः॥

अवच्छिन्नं, त्रि, (अव + छिद् + क्त।) अवच्छेदकतानिरूपकं। विशिष्टं। इति न्यायभाषा। अवच्छेदाश्रयः। यथा। प्रतियोग्यसमानाधिकरणयत्सामानाधिकरण्यात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यव्याप्तिः। इति सिद्धान्तलक्षणचिन्तामणिः॥

("जलाश्रये महाकाशस्तदवच्छिन्नमेव हि।
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम्॥
साभासबुद्धेः कर्त्तृत्वमवच्छिन्ने विकारिणि"।

इति अध्यात्मरामायणे।)

अवच्छुरितं, क्ली, (अव + च्छुर + भावे क्त।) महाहास्यं। इत्यमरटीकायां भरतः॥

अवच्छुरितकं क्ली, (अवच्छुरितमेव, स्वार्थे कन्।) महाहास्यं। इति शब्दरत्नावली॥

अवच्छेदः, पुं, (अव + छिद् + भावे घञ्।) परिच्छेदः। एकदेशः। विशेषणत्वं॥

("शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"।

इति साहित्यदर्पणम्।)

अवच्छेदकं, त्रि, (अवच्छिनत्ति, अव + छिद् + ण्वुल्।) न्यायमते अव्याप्यवृत्त्यधिकरणसम्बन्धैकदेशः। इतरव्यावर्त्तकः। विशेषणं। अवच्छिद्यतेऽनेनेति यथा। अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। इति न्यायशास्त्रं॥

अवच्छेदकत्वं, क्ली, (अवच्छेदकस्य भावः, भावार्थे त्व।) स्वरूपसम्बन्धविशेषः। यथा। घटकत्वावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। इत्यवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अनतिरिक्तवृत्तित्वं। यथा। अवच्छेदकत्वञ्च इहानतिरिक्तवृत्तित्वं। तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः। इति सामान्यनिरुक्तौ शिरोमणिः॥ अन्यूनानतिरिक्तवृत्तित्वं। यथा। ननु तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वं वाच्यं। वह्नित्वं न घटवृत्ति तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्ति अतआह तार्णातार्णेति। इत्यवच्छेदकत्वनिरुक्तौ जगदीशः॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वं पारिभाषिकं। यथा। तदवच्छिन्नाभाववदसम्बद्धविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्त्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यं। इति अवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। तत्रावच्छेदकत्वं इह शिखरिणि नितम्बे ऊर्द्धभागो न शिखरे इत्यादिप्रतीतिबलात् कुत्रचिदव्याप्यवृत्त्यधिकरणदेशविशेषादिदानीं गोत्वे गौर्नतु शृङ्गे इत्यादिप्रतीतिबलात् कुत्रचित् देशवृत्तितायाः काले कुत्रचित् कालवृत्तितायाः देशे अप्यस्ति। इति न्यायशास्त्रं॥

अवच्छेदावच्छेदः, पुं, व्यापकत्वं। इति न्यायभाषा॥

अवज्ञा, स्त्री, (अव + ज्ञा + अङ्।) अनादरः। अवहेला। इत्यमरः॥ ("आत्मन्यवज्ञां शिथिलीचकार"। इति रघुवंशे।)

अवज्ञात, त्रि, (अव + ज्ञा + क्त।) अवमानितं। अनादृतं। तिरस्कृतं। इत्यमरः॥

"अवज्ञाता भविष्यामो लोकस्य जगतीपते"।

इति महाभारते।)

अवज्ञानं, क्ली, (अव + ज्ञा + भावे ल्युट्।) अवज्ञा। यथा अवज्ञानं अवज्ञा ज्ञातो अनाःमद्वेरिति डः। सम्मादित्वात् ज्ञिविति मधुः। तन्मते गोपावद्रूपं। इत्यमरटीकायां भरतः॥ (अवमानः। तिरस्कारः। अनादरः।

"ईप्सितं तदवज्ञानात् विद्धि सौर्गवमात्मनः"।

इति रघुवंशे।)

अवटः, पुं, (अव + अटन्।) खिलं। गर्त्तः। कूपः। ("रक्षसां गतसत्त्वानामेष धर्म्मः सनातनः।
अवटे ये निधीयन्ते तेषां लोकाः सनातनाः"॥

इति रामायणे।) कुहकजीवी। इति विश्वमेदिन्यौ॥

अवटिः, पुं, (अव + अट्टि।) गर्त्तः। इति हलायुधः॥

अवटीटः, त्रि, (अवगता गाडिका, प्रादिसमासः, नतार्थे गाडायाः टीटादेशः अर्शआदित्वादच्।) नतगाडिकः। खाँदा छेपड़ानेको यस्य प्रसिद्धिः। तत्पर्य्यायः। अवनाटः २ अवभटः ३। इत्यमरः॥

अवटुः, पुं, क्ली, (अव + टीक + मितद्वादित्वात् डुः।) ग्रीवापश्चाद्भागः। इत्यमरः॥ घाड़ इतिख्यातः। कूपः। गर्त्तः। इति हेमचन्द्रः॥ दक्षभेदः। इत्युणादिकोषः॥

अवडङ्गः, पुं, (अवगतो डङ्गः शब्दो यस्मात्।) वृक्षः इति जटाधरः। कस्यचिन्मते अवभृङ्ग इति पाठः॥

अवडीनं, क्ली, (अव + डी + भावे क्त।) पश्चिमाभोगमनं। पश्चिमावरोहणं। इति जटाधरः॥

अवतंसः, पुं, क्ली, (अव + तंस + घञ्।) कर्णपूरः। कर्णभूषणं।

("तं मातरो देवमनुव्रजन्त्यः
स्वाहेनत्तोभवघलातंसाः"।

इति कुमारसम्भवे।) शेखरः। शिरोभूषणं। तत्पर्य्यायः। वतंसः २ उत्तंसः ३। इत्यमरः॥ मुकुटं ४ मकुटं ५ मौलिः ६ मौलिकः ७ शेखरं ८ उष्णीषकः ९ कोटीरकं १० कोटीरं ११ किरीटं १२ चूड़ामणिः १३ शिरोरत्नं १४ शिरोमणिः १५। कर्णभूषणं। तत्पर्य्यायः। वतंसः २ कर्णपुरः ३ कुण्डलं ४ कर्णवेष्टनं ५ उत्तंसः ६ दन्तपत्रं ७ कर्णकं ८। इति शब्दरत्नावली॥

अवतमसं, क्ली, (अवततं व्याप्तं तमः, प्रादिसमासः, अच्।) अल्पान्धकारः। इत्यमरः॥ ("अवतमसभिदार्थे भास्वताभ्युद्गमेन प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः"। इति माघः।)

अवतारः, पुं, (अव + तॄ + करणे घञ्।) अवतरणं। पुष्करिण्यादिः। तीर्थः। इति मेदिनी॥ (सोपानपद्धतिः। प्रस्तावना। आभासः। उपक्रमणिका। यथा। "दूरे गुरुप्रथितवस्तुकथावतारः"। इति शान्तिशतके।) देवानां विशेषतोविष्णोर्मूर्त्तन्तरेण पूर्णांशावेशरूपेण पृथिव्यामवतरणं। अवतारास्तसंख्येयाः तेष्वेते प्रसिद्धाः। ब्रह्मा १ वराहः २ नारदः ३ नरनारायणौ ४ कपिलः ५ दत्तात्रेयः ६ यज्ञः ७ ऋषभदेवः ८ पृथुः ९ मत्स्यः १० कूर्म्मः ११ धन्वन्तरिः १२ मोहिनी १३ नृसिंहः १४ वामनः १५ परशुरामः १६ वेदव्यासः १७ रामः १८ बलरामः १९ कृष्णः २० बुद्धः २१ कल्की २२॥ इति श्रीभागवते॥ यथा,—

"सत्त्व प्रथमं देवः कौमारं सर्गमाश्रितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितं॥
द्वितीयन्तु भवायास्य रसातलगतां महीं।
उज्जहिरण्यनूपादत्त यज्ञेशः शौकरं वपुः॥
तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्मं कर्म्मणां यतः॥
तुर्य्ये धर्म्मकला सर्गे नरनारायणावृषी।
भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः॥
पञ्चमः कपिलोनाम सिद्धेशः कालविप्लुतं।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं॥
षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्॥
ततः सप्तम आकूत्यां रुचेर्य्यज्ञोऽभ्यजायत।
स यामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरं॥
अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः।
दर्शयन् वर्त्म धीराणां सर्व्वाश्रमनमस्कृतं॥
ऋषिभिर्य्याचितो भेजे नवमं पार्थिवं वपुः।
दुग्धेमामोषधीर्विप्रालेनायं स उशत्तमः॥
रूपं स जग्रहे मात्स्यं चाक्षुषोदधिसंप्लवे।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं॥
सुरासुराणामुदधिं मथ्नतां मन्दराचलं।
दध्रे कमठरूपेण एष एकादशे विभुः॥
धान्वन्तरं द्वादशमं त्रयोदशममेव च।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितं।
ददार करजैरूरावेरकां कटकृद्यथा॥
पञ्चदशं वामनकं कृत्वागादध्वरं बलेः।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपं॥
अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान्।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं॥
ततः सप्तदशे जातः सत्यवत्यां पराशरात्।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः॥
नरदेवत्वमापन्नः सुरकार्य्यचिकीर्षया।
समुद्रनिग्रहादीनि चक्रे वीर्य्याण्यतः परं॥
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी।
रामकृष्णाविति भुवो भगवानहरद्भरं॥
ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां।
बुद्धोनाम्नाञ्जनसुतः कीकटेषु भविष्यति॥
अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः॥
अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः।
यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः॥
ऋषयो मनवो देवा मनुपुत्रा महौजसः।
कलाः सर्व्वे हरेरेव सप्रजापतयः स्मृताः॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे"॥
इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥ (दशमवतारा एव प्रधानतया प्रसिद्धाः। ते च यथा,—
"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश"॥)
(आविर्भावः। जन्म। उत्पत्तिः। यथा,—

"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्"।

इति रघुः। अपसारणं। हरणं। यथा,—
"भूमेर्भारावताराय ब्रह्मणाप्रार्थितः पुरा।
स एव जातो भवने कौशल्यायां तवानघ"॥
इति अध्यात्मरामायणे।

अवतारणं, क्ली, (अव + तॄ + णिच् + ल्युट्।) भूतादिग्रहः। वस्त्राञ्चलं। अर्घ्यं। इति विश्वमेदिन्यौ॥ (ग्रन्थप्रस्तावना। ऊर्द्धादध आनयनं। यथा,—
"क्रियतां यदि शक्तोषि गङ्गाया अवतारणं"।
इति रामायणे।)

अवतीर्णः, त्रि, (अव + तॄ + कर्त्तरि क्तः।) अवतरणविशिष्टः। प्रादुर्भूतः। जलादौ कृतावरोहः। यथा। ज्योतिषे।
"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद।
पृथिव्यामवतीर्णोऽसि खड्गधरोट नमोऽस्तु ते"।
इति तिथ्यादितत्त्वं॥

अवतोका, स्त्री, (अवपतितं तोकमस्याः सा।) पतद्ग्रहा गौः। तत्पर्य्यायः। स्वदुग्धा २। इत्यमरः॥ गाबड़ागाइ। गाबफेला गाइ। इति भाषा॥

अवदंश, पुं, (अव + दन्श् + घञ्।) सुरापानरुचिजनकचर्व्वणद्रव्यं। गजर इति भाषा। तत्पर्य्यायः। भक्षणं २। इत्यमरः। विदंशः ३ सन्धानं ४ रोचकः ५। इति राजनिर्घण्टः॥

अवदातः, पुं, (अव + दै + क्तः।) श्वेतवर्णः। पीतवर्णः। इत्यमरः॥

अवदातं, त्रि, (अव + दै + क्तः।) शुक्लगुणविशिष्टं। ("कुन्दैः सविभ्रमवधूहसितावदातैः"॥ इति ऋतुसंहारे। पीतवर्णयुक्तं। निर्म्मलं।

"तत्त्वं क्रमेण विदुषां करुणावदाते
श्रद्धावतां हृदि पदं स्वयमादधाति"।

इति शान्तिशतके।) मनोज्ञं। इत्यमरटीकायां भरतः॥

अवदानं, क्ली, (अव + दो + ल्युट्।) कृतं कर्म्म। प्रशस्तमद्यच निर्व्यूढं कर्म्म। ये कर्म्मे प्रवृत्तिते सकले प्रशंसा करे सेइ समाप्तकर्म्म इति भाषा। तत्पर्य्यायः। अपदानं २। इत्यमरः तट्टीका च। खण्डनं। इति मेदिनी॥

("विश्वासप्रार्थहरैः प्रतीतैः
सङ्गीयमानचिपुरावदानैः"।

इति कुमारसम्भवे।) वीरणमूलमिति स्वामी॥ (पराक्रमः। वीर्य्यं। यथा,—

"नैर्ऋतघ्नमथ मन्त्रवन्मुनेः
प्रापदस्त्रमवदानतोषितात्"।

इति रघुवंशे।)

अवदारणं, क्ली, (अवदीर्य्यतेऽनेन, अव + दॄ + णिच् करणे ल्युट्।) खनित्रं। खन्ता इति ख्यातं। इत्यमरः॥ (विदारणं। भेदनं। खननं। यथा,—
"अवदारणकाले तु पृथिवी नावदीर्य्यते"।
इति रामायणे। अव + दॄ + भावे ल्युट्।)

अवदाहः, क्ली, (अवशब्दितोदाहो येन तत्।) वीरणमूलं। इत्यमरः॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः।)

अवदाहेष्टं, क्ली, (अवदाहे इष्टम् अनुकूलम्।) वीरणमूलं। इत्यमरटीकायां भरतादयः॥

अवदाहेष्टकापथ्यं, क्ली, उशीरं। खस् इति भाषा।) इति भरतः॥

अवदीर्णं, त्रि, (अव + दॄ + क्त।) द्रवीभूतदृतादि। तत्पर्य्यायः। द्रुतं २। इत्यमरः॥

अवदोहः, पुं, (अव + दुह + घञ्।) दुग्धं। इति चिकाण्डशेषः॥

अवद्यं, त्रि, (न वदति परं गुणं, अवद्यावमाधमार्व्वरेषाः कुत्सिते इति वदेर्नञि कर्त्तरि यत्।) अधमः। कुत्सितं। गर्हितं। निकृष्टं। इत्यमरः॥

अवद्यं, क्ली, अनिष्टं। इति वोपदेवः॥ पापं। इति पाणिनिः॥ ("उदवहदनवद्यां तामवद्यादपेतः"। इति रघुवंशे।)

अवधानं, क्ली, (अव + धा + ल्युट्।) मनोयोगः। तत्पर्य्यायः। समाधानं २ प्रणिधानं ३ समाधिः ४। इति हेमचन्द्रः॥

अवधारणं, क्ली, (अव + धृ + णिच् + ल्युट्।) निश्चयः। यथा। "हि हेताववधारणे"। इत्यमरः॥

अवधारितः, त्रि, (अव + धृ + णिच् + क्त।) ज्ञातावधारणः। यथा।
"त्वया सुमुखि किं प्रोक्तं न मया ह्यवधारितं।
विवेचय महाभागे सङ्कटो वर्त्तते खलु"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अध्यायः॥

अवधार्य्यः, त्रि, (अव + धृ + ण्यत्।) अवधारणीयः। अवपूर्व्वकधृधातोर्ण्यत् प्रत्ययेन निष्पन्नः। निर्धार्य्यः॥

अवधिः, पुं, (अव + धा + कि ।) अवधानं। सीमा। कालः। ("अथ चेदवधिः प्रतीक्ष्यते" इति भारविः ।) विज्ञं। इति विश्वमेदिन्यौ ॥

अवधीर, त्, क, अवज्ञायां। (अदन्त + चुरा०-उभय०-सक०-सेट्।) अवधीरयति। अवधीरयत् साधुमसाधुः। इति दुर्गादासः ॥

अवधूतः, पुं, (अव + धू + क्तः ।) सन्न्यासाश्रमी। तद्विधानं सन्न्यासिशब्दे द्रष्टव्यं। तद्भेदा यथा। देव्युवाच।

"द्विविधावाश्रमौ प्रोक्तौ गार्हस्थ्यो भैक्षुकस्तथा। किमिदं श्रूयते चित्रमवधूतास्चतुर्विधाः ॥ एतद्भेदितुमिच्छामि तत्त्वतः कथय प्रभो। चतुर्व्विधावधूतानां लक्षणानि विशेषतः ॥

सदाशिव उवाच।

ब्रह्ममन्त्रोपासका ये ब्राह्मणक्षत्रियादयः। गृहाश्रमे वसन्तोऽपि ज्ञेयास्ते यतयः प्रिये ॥ पूर्णाभिषेकविधिना संस्कृता ये च मानवाः। शैवावधूतास्ते ज्ञेयाः पूजनीयाः कुलार्चिते ॥ ब्रह्मावधूतः शैवश्च साग्निमाचारवर्त्तिनः। विदध्युः सर्व्वकर्म्माणि शृण्वदीरितवर्त्मना ॥ विना ब्रह्मार्पितञ्चैते तथा चक्रार्पितं विना। निषिद्धमन्नं तोयञ्च न ग्रहीयः कदाचन ॥ ब्रह्मावधूतकौलानां कौलानामभिषेकिणां। पूर्व्वमेव कथितो धर्म्म आचारश्च वरानने ॥ स्नानं सन्ध्यासनं पानं दानञ्च दाररक्षणं। सर्व्वमागममार्गेण शैवब्रह्मावधूतयोः" ॥

इति महानिर्व्वाणतन्त्रे १४ उल्लासः ॥* अन्यच। शङ्कर उवाच।

"शृणु देवि प्रवक्ष्यामि अवधूतो यथा भवेत्। वीरस्य मूर्त्तिं जानीयात् सदा तत्त्वपरायणः ॥ यद्रूपं कथितं सर्व्वं सन्न्यासधारणं परं। तद्रूपं सर्व्वकर्म्माणि प्रकुर्य्यादीरवल्लभं ॥ दण्डिनो मुण्डनं चामावास्यायामाचरेद्यथा। तथा नैव प्रकुर्य्यात्तु वीरस्य मुण्डनं प्रिये ॥ असंस्कृतं केशजालमुत्कालम्बिकचोच्चयं। अस्थिमालां विभूषां वा रुद्राक्षानपि धारयेत् ॥ दिगम्बरो वा वीरेन्द्रश्चाथ वा कौपिनो भवेत्। रक्तचन्दनसिक्ताङ्गं कुर्य्याद्भस्माङ्गभूषणं" ॥

इति निर्व्वाणतन्त्रे १४ पटलः ॥* अपिच।

"नटकरोटिं विधार्य्यैव कालदण्डं तथा प्रिये। परशुञ्चाजिनञ्चैव योगीव धारयेत् सदा ॥ खट्वाङ्गं धारयेद्योगी वासरूपकवाससी। कपाले धारयेच्चक्रं चन्दनाद्यैर्व्विशेषितः ॥ ईषत् पिङ्गलकं वस्त्रं धारयेत् सर्व्वदा सुत"।

सुत इति शिवस्य सम्बोधनं।

सुदर्शनाख्यं यच्चक्रं तत्तु संधारयेद्बुधः ॥ विपर्क्षौ कपिलञ्चैव मडुडिण्डिमभर्भरान्। वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः" ॥

इति योगसारे २ परिच्छेदः ॥* अपरञ्च।

"क्षमा दानं तपो ध्यानं बालभावेन शैलजे। शिवोऽहं भैरवानन्दो मुक्तोऽहं कुलनायकः ॥ एवं भावपरो मन्त्री हेतुयुक्तः सदाशिवः। संविदासेवनं कुर्य्यात् सदा कारणसेवनं ॥ भवेत् साक्षात् स पुरुषः शम्भुरूपो न संशयः"।

इति निर्व्वाणतन्त्रं ॥* किञ्च।

'ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च। कुलावधूतसंस्कारे पशूनामधिकारिता" ॥

इति महानिर्व्वाणतन्त्रं ॥ * ॥ अन्यच।

"निर्व्वाणमुक्तिमाप्नोति ब्राह्मणो वीरभावतः। अवधूतः क्षत्रियश्च भक्त्यावेशी न संशयः ॥ स्वरूपोऽपि भवेद्वैश्यः शूद्रोऽपि सहलोकवान्। सम्पूर्णफलमाप्नोति विप्रो निर्व्वाणतां व्रजेत् ॥ त्रिभागं फलमाप्नोति क्षत्रियो वीरभावतः। पादद्वयन्तु वैश्यस्य शूद्रस्य चैकपादकं" ॥*॥

दशनामावधूतानां प्रत्येकं नाम प्रागुक्तमिदानीमपि तेषां प्रधानत्वेनाङ्गीकरणार्थं संज्ञाकथनगर्भं लक्षणविशेषमाह।

"अवधूतस्य चाख्यानं शृणुष्व पर्व्वतात्मजे। वनारण्ये भारती च गिरिश्च पुरिरेव च ॥ एकस्थाने तु संस्थित्य इत्थ्यानादिकश्चरेत्। यो मन्त्रदानं तपसा सवनः परिकीर्त्तितः ॥ खस्तकेशो जटाजूटः सदा वातुलवद्भवेत्। अन्तर्योगी महावीरोऽरण्यसंज्ञश्च शैलजे ॥ नानाशास्त्रेषु यो विज्ञो नानाकर्म्मविशारदः। सदेष्टदेवीभावेन भावयेद् यो हि चाचलां ॥ स एव भारतीवीरो महाज्ञानी जितेन्द्रियः। सदोर्द्ध्वबाहुर्यो वीरो मुक्तकेशो दिगम्बरः ॥ सर्व्वत्र समभावेन भावयेत् यो नरोत्तमः। इष्टदेवीं विना नास्ति स गिरिः परिकीर्त्तितः ॥ नानादेशेषु पीठेषु क्षेत्रेषु तीर्थभूमिषु। भ्रमणं कुरुते नित्यं कुर्य्याद्यत्नेन पूजनं ॥ देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा। अन्तर्यागेषु यो निष्ठः स वीरः पुरिरेव च ॥ अवधूताश्रमे देवि! यस्य भक्तिः सुनिश्चला। तस्य तुष्टा भवेत् काली किं न सिद्ध्यति भूतले ॥ अवधूतं समालोक्य शम्भुवत् पूजनं चरेत्। गुह्यतत्त्वानि यत्नेनैव निवेदयेत्। अगम्यः परमेशानि भक्तितः परितोषयेत्" ॥

इति निर्व्वाणतन्त्रं ॥ * ॥ अपि च।

"भक्त्यावधूतो द्विविधः पूर्णापूर्णविभेदतः। पूर्णः परमहंसाख्यः परिव्राड्वर उच्यते ॥ क्षतावधूतसंस्कारो यदि स्याज्ज्ञानदुर्ब्बलः। तदा लोकालये तिष्ठन्नात्मानं स तु शोधयेत् ॥ रक्षन् स्वजातिचिह्नञ्च कुर्व्वन् कर्म्माणि केवलं। सदा ब्रह्मपरो भूत्वा साधयेज्ज्ञानमुत्तमं" ॥

इति महानिर्व्वाणतन्त्रं ॥ * ॥ अपि च।

"अवधूतः शिवः साक्षादवधूतः सदाशिवः। अवधूती शिवादेवी अवधूताश्रमं शृणु ॥ चतुराश्रमिणां मध्ये अवधूताश्रमो महान्। अवधूतश्च द्विविधो गृहस्थश्च चितानुगः ॥ सचेलश्चापि दिग्वासा विधियोगिविहारवान्। सदारः सर्व्वदारस्थश्चाट्टहासो दिगम्बरः ॥ गृहावधूतो देवेशि हितायस्तु सदाशिवः"।

इति गुप्तमालातन्त्रे २ पटलः ॥ * ॥ अवधूतस्य

ओम् तत् सदिति मन्त्रेण कर्म्मकर्त्तव्यतामाह।

"ॐ तत्सन्मन्त्रमुच्चार्य्य सोऽहमस्मीति चिन्तयन्। कुर्य्यादात्मोचितं कर्म्म सदा वैराग्यमाश्रितः ॥ कुर्व्वन् कर्म्माण्यनासक्तो नलिनीदलनीरवत्। यतेतात्मानमुद्धर्त्तुं तत्त्वज्ञानविवेकतः" ॥ * ॥

सर्व्वेषामोम् तत्सदिति निर्देशेन कर्म्मफलमाह।

"ॐ तत्सदिति मन्त्रेण यो यत्कर्म्म समाचरेत्। गृहस्थो वाप्युदासीनस्तस्याभीष्टाय तद्भवेत्" ॥*॥

तन्मन्त्रक्रियमाणकर्म्मणः सम्पूर्णत्वमपि।

"जपहोमप्रतिष्ठा च संस्काराद्यखिलाः क्रियाः। ॐ तत्सदिति निष्पन्नाः संपूर्णाः स्युर्न संशयः ॥ किमन्यैर्ब्बहुभिर्म्मन्त्रैः किमन्यैर्भूरिसाधनैः। ब्राह्म्येणानेन मन्त्रेण सर्व्वकर्म्माणि साधयेत् ॥ सुखसाध्यमबाऽऽल्पं संपूर्णफलदायकं। नास्त्येतस्मान्महामन्त्रादुपायान्तरमम्बिके ॥ पुरप्रदेशे देहे वा लिखित्वा धारयेदिमं। गेहे तस्य महातीर्थं देहः पुण्यमयो भवेत् ॥ निगमागमतन्त्राणां सारात् सारतरो मनुः। ॐ तत्सदिति देवेशि तवाग्रे सत्यमीरितं ॥ चतुर्व्विधानां तत्त्वानामन्येषामपि वस्तूनां ॥ मन्त्राद्यैः शोधनेनानं स्याद्देहेन शोधितं ॥ पश्यन् सर्व्वत्र सद्रूपं जपंस्तत् सन्महामनुं। स्वेच्छाचारः शुद्धचित्तः स एव भुवि कौलराट् ॥ जपादस्य भवेत् सिद्धो मुक्तः स्यादर्शचिन्तनात्। साक्षाद्ब्रह्ममयो देही सार्थमेनं जपेन्मनुं ॥ त्रिपदोऽयं महामन्त्रः सर्व्वकारणकारणं। साधनादस्य मन्त्रस्य भवेन्मृत्युञ्जयः स्वयं ॥ युग्मयुग्मपदं वापि प्रत्येकं पदमेव वा। जप्त्वैतस्य महेशानि साधकः सिद्धिभाग्भवेत्"।

इति मन्त्रप्रशंसा ॥ * ॥ शैवावधूतस्य सर्व्वकर्म्मानधिकारमाह।

"शैवावधूतसंस्कारविधूताखिलकर्म्मणः। नापि देवे नवा पित्र्ये नार्घे ह्यत्रेऽधिकारिता"॥*॥

अथ परमहंसः।

"चतुर्णामवधूतानां तुरीयो हंस उच्यते। त्रयोऽन्ये योगभोगाढ्या मुक्ताः सर्व्वे शिवोपमाः ॥ हंसो न कुर्य्यात् स्त्रीसङ्गं न विधत्ते परिग्रहं। प्रारब्धमश्नन् विहरेत् निषेधविधिवर्जितः ॥ त्यजेत् स्वजातिचिह्नानि कर्म्माणि गृहमेधिनां। तुरीयो विचरेत् क्षौणीं निःसङ्कल्पो निरुद्यमः ॥ सदात्मभावसन्तुष्टः शोकमोहविवर्जितः। निर्निकेतस्तितिक्षुः स्यादहिसङ्गो निरुपद्रवः ॥ नार्घ्यं भक्ष्यपेयानां न तस्य ध्यानधारणा। मुक्तो विमुक्तो निर्द्वन्द्वो हंसाचारपरो यतिः ॥ इति ते कथितं देवि! चतुर्णां कुलयोगिनां। लक्षणं सविशेषेण साधनां मत्स्वरूपिणां ॥ एतेषां दर्शनात् स्पर्शादालापात् परितोषणात्। सर्व्वतीर्थफलावाप्तिर्जायते मनुजन्मनां"।

इति महानिर्व्वाणतन्त्रं ॥

अवध्यं, त्रि, (वधमर्हति, यत्, ततो नञ्समासः।) मारणानर्हं। वधायोग्यं। अनर्थकवाक्यं। इति विश्वमेदिन्यौ। यथा,—

"अवध्याश्च स्त्रियं प्राऽऽहुरिति यद्योनिगतास्वपि।" शूद्रस्त्रीणामवध्यत्वमाह मत्स्यपुराणं।
"किं त्वया न श्रुतं लोके अवध्याः शूद्रयोषितः"।
इति प्रायश्चित्ततत्त्वं ॥*॥ आत्मन अवध्यत्वं यथा,—
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत।
तस्मात् सर्व्वाणि भूतानि नत्वं शोचितुमर्हसि"॥
इति श्रीभगवद्गीतायां २ अध्यायः ॥*॥ तद्वधे पापं यथा,—
"यावानवध्यस्य वधे तावान् वध्यस्य मोक्षणे।
अधर्म्मोर्द्धगतेर्दृष्टोधर्म्मस्तु विनियच्छतः"॥
इति मानवे ९ अध्याये २४९ श्लोकः॥

अवध्वंसः, पुं, (अव+ध्वंस+घञ्।) परित्यागः। निन्दनं। अवचूर्णनं। इति मेदिनी॥

अवध्वस्तः, त्रि, (अव+ध्वंस+क्त।) परित्यक्तः। निन्दितः। अवचूर्णितः। इति मेदिनी॥

अवनं, क्ली, (अव+ल्युट्।) प्रीणनं। इत्यमरः॥ रक्षणं। इति हेमचन्द्रः॥ गमनं। स्पर्द्धा। तर्पणं। शोभनं। अवर्णं। प्राप्तिः। आलिङ्गनं। याचनं। प्रवेशनं। सत्ता। इच्छा। यज्ञः। वधः। प्राप्तिः। अवगमनं। कामः। करणं। एते अवधातवर्थाः॥

अवनतं, त्रि, (अव+नम्+क्त) नम्रं। नतभागः। नोया इति भाषा। तत्पर्य्यायः। अवार्यं २ आनतं ३ नतं ४। इत्यमरः तट्टीका च॥ (अधोभूतः। "लिखन्नास्ते भूमिं वहिरवनतः प्राग्दयितः"। इति अमरशतके।)

अवनद्धं, क्ली, (अव+नह्+क्त।) आनद्धं। मृदङ्गादिवाद्यं। इत्यमरटीकायां स्वामी॥ (आवद्धः। आच्छादितः। यथाह मनुः,—
"चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः।"
लिप्तः यथा, "स्नानावनद्धघनशोणितशोणपाणि-रुत्तंसयिष्यति कचांस्तव देवि भीमः।" इति वेणीसंहारनाटकम्।)

अवनयः, पुं, (अव+नी+भावे अच्।) अवनायः। निपातनं। अधःपातनं। इति भरतः॥

अवनाटः, त्रि, (अवनता नासिका, प्रादिसमासः, नतार्थे नासिकाया नाटादेशः अर्शं आद्यच्।) नतनासिकः। खाँदा छेपड़ानाकयुक्ति इति भाषा। तत्पर्य्यायः। अवटीटः २ अवभटः ३। इत्यमरः॥

अवनायः, पुं, (अव+नी+घञ्।) अवनयः। अधोनयनं। इत्यमरः॥ नीचे फेलान इति भाषा।

अवनिः, स्त्री, (अव+अनि।) पृथिवी। इत्यमरः॥
("तामुन्निद्रामवनिशयनां सौधवातायनस्थः"।
इति मेघदूते।)

अवनी, स्त्री, (अव+अनि+ङीप्।) पृथ्वी। इति भरतः॥ आयमाजा लता। इति राजनिर्घण्टः॥

अवनीपतिः, पुं, (अवन्याः पतिः, षष्ठीतत्पुरुषः।) राजा। इति जटाधरः॥
("स श्रेयो सुमहाभागः प्रीतिमानवनीपतौ"।
इति मत्स्यपुराणे।)

अवनेजनं, क्ली, (अव+निज्+ल्युट्।) पितृदानार्थं मार्जितकुशोपरि जलसेचनं यथा ब्रह्मपुराणम्,—
"सपुष्पं जलमादाय तेषां पृष्ठे पृथक् पृथक्।
अप्रदक्षिणं नेनिज्यात् गोचनामानुमन्त्रितं॥
पितुरवनेजनं मूलदेशे पितामहप्रपितामहयोस्तु अवनेजनं मध्यदेशाग्रदेशयोः। मातामहादीनामप्येवं। इति। पिण्डोपरि जलसेचनं। यथा ब्रह्मपुराणं,—
"ततो दर्भेषु विधिवत् सम्मार्ज्य च करन्ततः।
प्रक्षाल्य च जलेनाथ चिराचम्य हरिं स्मरेत्।
"तेभ्यः संस्रवपात्रेभ्यो जलेनैवावनेजनं।
दत्त्वाग्र पितरश्चेति पठेद्वोदङ्मुखस्थितः"॥
इति च आह्निकतत्त्वं। (प्रक्षालनं।
"न कुर्य्यात् गुरुपुत्रस्य पादयोश्चावनेजनम्"।
इति मनुः।)

अवन्तिः, पुं, (अव+झिच्।) अवन्तीदेशः। इति हेमचन्द्रः॥ नदीविशेषः। इत्युणादिकोषः॥ यथा,
"प्राग्ज्योतिषाः कामरूपा मालवाः स्फुरवन्तयः"।
इति हेमचन्द्रः॥ अपि च।
"अनूपाश्मकिङ्केरात्र वीतिहोत्रा अवन्तयः।
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः"॥
इति मत्स्यपुराणे ९५ अध्यायः॥

अवन्तिका, स्त्री, (अवति अव रक्षणादौ, बाहुलकात् झिच्च ततः स्वार्थे कन्, टाप्।) उज्जयिनीनगरी।
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः"॥
इति स्कान्दपुराणे॥

अवन्तिसोमं, क्ली, (अवन्तिषु अभिषुतं सोमं, ग्राकपार्थिवादित्वात् समासः।) काञ्जिकं। इत्यमरसिंहः॥ काँजि इति भाषा। (काञ्जिकशब्देऽस्य गुणा व्याख्येयाः।)

अवन्ती, स्त्री, मालवदेशस्य नगरी। उज्जैन इति ख्याता। तत्पर्य्यायः। उज्जयिनी २ विशाला ३ पुष्पकरण्डिनी ४। इति हेमचन्द्रः॥ यथा,—
"ताम्रपर्णीं समासाद्य शैलार्द्धशिखरोर्द्धतः।
अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति"॥
इति ब्रह्मखण्डमतत्त्वे ७ पटलः॥ अन्यच्च।
"उत्पन्नोर्वः कलिङ्गे तु यमुनायाश्च चन्द्रमाः।
अवन्त्याञ्च कुजो जातो मागधे च हिमांशुजः"॥
इति संस्कारतत्त्वधृतमत्स्यपुराणं। अन्यत् पूर्व्वलिखितं। ("प्राप्यावन्तीमुदयनकथाकोविदग्राम-वृद्धान्।" इति मेघदूते।)

अवन्ध्यः, त्रि, (बन्धे साधुरिति बन्ध्यः, बन्ध+यत्, ततो नञ्समासः।) फलवान्। फलकाले फलयुक्तवृक्षः। तत्पर्य्यायः। फलेग्रहिः २ फलग्रहिः ३। इत्यमरः॥
("कर्षुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्"।
इति मेघदूते।)

अवपातः, पुं, (अव+पत्+घञ्।) रन्ध्रं। गर्त्तः। इति हेमचन्द्रः॥ अधःपतनं॥ (गजादीनां ग्रहणार्थं कृतस्तृणादिना प्रच्छन्नो गर्त्तः। यथा,—
"अवपातस्तु हस्त्यर्थे गर्त्तश्छन्नस्तृणादिना"।
इति यादवः।
"रोधांसि निम्नन्नवपातमग्नः
करीव वन्यः परुषं रराम"।
इति रघुवंशे। नाटकादौ भयादिजनितपलायन-सम्भ्रमादिवर्णनेन प्रस्तुतस्य परिवर्त्तः। यथा,—
"अवपातान्तु निष्क्राम-प्रवेश-त्रास-विद्रवैः"।
इति दशरूपे।)

अवभृथः, पुं, (अवभ्रियते अनेन, अव+भृ+क्थन्।) दीक्षान्तयज्ञः। प्रधानयागसमापकापरयज्ञः। यज्ञादेर्न्यूनाधिक-दोष-शान्ति-निमित्तक-शेष-कर्त्तव्य-होम इति यावत्॥ इत्यमरः तट्टीका च॥ यज्ञावशेषस्नानं। इति भरतः त्रिकाण्डशेषश्च॥
("ततश्चकारावभृथं विधिदृष्टेन कर्म्मणा"
इति भारते।
"भुवं कोष्णेन कुण्डोघ्नी मेध्येनावभृथादपि"।
इति रघुवंशे।)

अवभटः, त्रि, (अवनतं नासिकायाः, नते नासिकाग्राः संज्ञायामिति भटच्। अवभ्रष्टा नासिका अस्ति अस्य इति अर्शं आद्यच्।) नतनासिकयुक्तिः। इत्यमरः॥ खाँदा इति भाषा।

अवमः, त्रि, (अवति अस्मात् आत्मानम्, अव रक्षणादौ, अवधेति सूत्रेण अवतेः अमः प्रत्ययो निपातितः। अवो भवो वा, अवोधसोर्द्वोपश्चेति मः।) अधमः। निन्दितः। इत्यमरः॥
("अनलकानलकानवमां पुरीम्"। इति रघुवंशे।)

अवमं, क्ली, तिथ्यन्तदयस्पृष्टैकदिनवारः। एकदिने एकतिथिर शेष अपरतिथिर आद्यन्तस्पर्शं इति यावत्। इति ज्योतिषशास्त्रे प्रसिद्धं। यथा "तिथ्यन्तदयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनं। त्रिदिनस्पृक्तिथित्रयस्य स्पर्शनादक्षः"। इति ज्योतिषतत्त्वं।

अवमतं, त्रि, (अव+मन्+क्त।) अवज्ञातं। अवमानितं। अनादृतं। इत्यमरः॥
("सुखं ह्यवमतः शेते सुखञ्च प्रतिबुध्यते"।
इति मनुः।)

अवमतिः, पुं, (अवान्तरगता अमात्यादीनां कार्य्येषु मतिर्यस्य।) स्वामी। ईश्वरः। पतिः। प्रभुः। नेता। इति जटाधरः॥

अवमर्दः, पुं, (अव+मृद्+घञ्।) पीड़नं। अघनं। इत्यमरः॥ ग्रस्तादिसम्पन्नदेशस्य परचक्रेण पीड़नं। इति भरतः॥
("बलावमर्दक्षमयि सन्निविष्टो
यथा न गर्हेयुरुदारसत्त्वाः"।
इति रामायणे।) शत्रुकृतगाढ़प्रहार इति केचित्॥ पदाक्रमणमिति केचित्॥

अवमानः, पुं, (अव+मन्+भावे घञ्।) अपमानः। अमर्य्यादा। यथा,—
"सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा"॥
इति मानवे २ अध्याये १६२ श्लोकः॥

"मानावमानदम्भसहिष्णुत्वमनेन विधीयते"। इति कल्लूकभट्टः ॥

अवमाननं, क्ली, (अव + मन् + णिच् + ल्युट्।) अपमानः। यथा। अवमाननं अवमानना। मान किं चार्थे अवपूर्ब्बः णौयि अस्यीति अनः। इत्यमरटीकायां भरतः ॥

अवमानना, स्त्री, (अव + मन + णिच् + युच्।) अवज्ञा। अनादरः। इत्यमरसिंहः ॥

("अतोऽवमाननाऽस्माकं मानिना भवता कृता"। इति विष्णुपुराणे।)

अवमानितः, त्रि, (अव + मान + क्त।) कृतावमानः। अवज्ञातः। अनादृतः। इत्यमरः ॥

("विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता"। इति साहित्यदर्पणे।)

अवमान्यः, त्रि, (अव + मन + ण्यत्।) अवमाननीयः। यथा,—

"या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः ॥ सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्"॥ इति मानवे ९ अध्याये ८२ श्लोकः ॥

अवमूर्द्धशयः, त्रि, (अवमूर्द्ध + शी + अच्।) अधोमुखशायी। अवनतो मूर्द्धा अस्येत्यवमूर्द्धः। तथाविधः शेते इत्यवमूर्द्धशयः ॥ ("उत्तानशया देवा अवमूर्द्धशया मनुष्याः" इत्युक्तं।)

अवमूर्द्धशायी, [न्] त्रि, (अवमूर्द्ध + शी + णिनि।) अधोमुखशायी। अवमूर्द्धं यथा स्यात् तथा शयितुं शीलमस्य इत्यर्थे णिन् प्रत्ययेन निष्पन्नः ॥

अवयवः, पुं, (अवयौति इति यु मिश्रणे + घञ्वा घच्।) अङ्गं। इत्यमरः ॥

("खैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलं"। इति अमरशतके। उपकरणं। अंशः। एकदेशः। "तेषामवयवान् सूक्ष्मान् षण्णामप्यमितौजसां"। इति मनुसंहितायां। न्यायमते आरम्भकद्रव्यञ्च, तत् उपादानकारणतया च व्यवक्रियते यदुक्तं,— "अनित्या तु तदन्या स्यात् सैवावयवयोगिनी"। इति भाषापरिच्छेदे। प्रतिज्ञाहेतूदाहरणोपनयनिगमान्यनुमानावयवाश्च।)

अवरः, त्रि, (न म्रियते इति मृङ्वरणे + ग्रहवृदृनिभ्यः अप्।) चरमः। इति मेदिनी। कनिष्ठः। अश्रेष्ठः। यथा,—

"श्रीर्नैपुण्येन विना शम्भुः एषविश्वेन तत्पुनः। न नाना शम्भुना रामादृर्षेणाधोक्षजोऽवरः"॥ इति मुग्धबोधव्याकरणे वोपदेवः ॥ निकृष्टः। यथा,—

"दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय। बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः"॥ इति श्रीभगवद्गीतायां २ अध्याये ४९ श्लोकः ॥

अवरं, क्ली, (वृ + अप् ततो नञ्समासः।) गजान्त्यजङ्घादिदेशः। इत्यमरमेदिन्यौ ॥

अवरजः, पुं, (अवर + जन् + ड।) कनिष्ठभ्राता। इत्यमरसिंहः ॥

("अस्य चावरजं विद्धि भ्रातरं मां तु लक्ष्मणम्"। इति रामायणे। हीनवंशजातः।

"द्वौ शूरावरजौ धीरविश्वपाख्यौ निजाख्यया"। इति राजतरङ्गिण्यां ॥ शूद्रः।

"यदि स्त्री यद्यवरजः श्रेयः किञ्चित् समाचरेत्। तत्सर्व्वमाचरेत् युक्तो यत्र वास्य रमेन्मनः"॥ इति मानवे।)

अवरतः, [स्] व्य, (अवर + तसिल्।) अवरस्मात्। चरमे। इति सिद्धान्तकौमुदी ॥

अवरतिः, स्त्री, (अव + रम् + क्तिन्।) विरामः। निवृत्तिः। इत्यमरः ॥

अवरवर्णः, पुं, स्त्री, (अवरश्चासौ वर्णश्चेति, कर्म्मधारयः।) शूद्रः। इत्यमरः ॥

अवरवर्णकः, पुं, स्त्री, (अवरवर्ण + कन् स्वार्थे।) चतुर्थवर्णः। शूद्रः। इति रत्नावली ॥

अवरव्रतः, पुं, (नास्ति वरं यस्मात् तत् अवरं अत्यन्तश्रेष्ठं व्रतं यस्य।) सूर्य्यः। इति त्रिकाण्डशेषः ॥

अवरस्मात्, व्य, (अवर + प्रथमार्थे दिक्कृन्दोभ्य इति अस्तातिः।) अवरतः। पश्चात्। इति सिद्धान्तकौमुदी ॥

अवरा, स्त्री, (नास्ति वरा श्रेष्ठा यस्याः। अवर + टाप्।) दुर्गा। इति विश्वः ॥

अवरार्द्ध्यः, त्रि, (अवरार्द्धे भवः इति अवरार्द्ध यत्।) अवरार्द्धभवः। शेषार्द्धजातः। इति केचित् ॥

अवरीणं, त्रि, (अवरीयते स्म इति अव + रीङ् स्रवणे क्त।) धिक्कृतं। तिरस्कृतं। निन्दितं। इत्यमरः ॥

अवरोधः, पुं, (अव + रुध् + भावे घञ्।) तिरोधानं। (आधारे घञ्।) राजस्त्रीगृहं। राजगृहं। इति विश्वहेमचन्द्रौ ॥

("आपानभूमिगमनमवरोधस्य दर्शनम्"। इति रामायणे।) राजदारः। इति मेदिनी ॥

("यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले। कलिन्दकन्या मथुराङ्गताऽपि गङ्गोर्म्मिसंसक्तजलेव भाति"॥ इति रघुवंशे। निरोधः। बाधा। अन्तरायः। आच्छादनं। केदारादिवेष्टनं।)

अवरोधकः, त्रि, (अव + रुध + ण्वुल्।) अवरोधकारकः। अवरोधकर्त्ता। अवपूर्ब्बकरुधधातोः ण्वुलप्रत्ययेन निष्पन्नः ॥

("सुधन्वा वीर्य्यवान् राजा मिथिलामवरोधकः"। इति रामायणे।)

अवरोधनं, क्ली, (अवरुध्यते अत्र रुध आधारे कर्म्मणि ल्युट्।) राज्ञामन्तःपुरं। इत्यमरसिंहः ॥ (अव + रुध् + ल्युट् भावे।) रोधकरणं। यथा,—

"क्षण त्वदीय-पद-पङ्कज-पञ्जरान्ते अद्यैव मे विशतु मानस-राजहंसः। प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते"॥ इति पाद्मवचनात्॥

अवरोधिकः, पुं, (अवरोध + तत्र नियुक्त इति ठक्। संज्ञापूर्ब्बकत्वात् वृद्धभावः। अवरोधः निवासस्त्रेन अस्ति अस्य वा ठन्।) राजान्तःपुराध्यक्षः। इति हेमचन्द्रः ॥

अवरोहः, पुं, (अव + रुह + भावे घञ्।) अवतरणं। आरोहणं। (कर्त्तरि संज्ञायां घञ्।) जतोरुहः। इति मेदिनी ॥ वृक्षमूलादग्रपर्य्यन्तं गता लता। शाखाशिफा। इत्यमरः। वोया नामना इति भाषा ॥

("सुदूरमध गत्वा तौ भ्रातरौ रामलक्ष्मणौ। अवरोहशतावीर्णं वटमासाद्य तस्थतुः"॥ इति रामायणे।) स्वर्गः। इति त्रिकाण्डशेषः ॥

अवरोहशाखी, [न्] पुं, (अवरोहति अधोगच्छति मूलमस्याः तादृशी या शाखा सा विद्यते अस्य मत्वर्थीय इनिः।) वृक्षवृक्षः। इति राजनिर्घण्टः ॥ (वृक्षशब्दोऽस्य गुणाज्ञेयाः ॥)

अवरोहिका, स्त्री, (अवरोहति अधोगच्छति अव + रुह + ण्वुल् + टाप् अत इत्वं।) अश्वगन्धालता। इति राजनिर्घण्टः ॥

अवरोही, [न्] पुं, (अव + रुह + णिनि।) वटवृक्षः। इति राजनिर्घण्टः ॥ (वटवृक्षोऽस्य गुणादयो ज्ञातव्याः।)

अवर्णः, पुं, (वर्ण्यते प्रशस्यते अनेन इति वर्णः ततो विरोधे नञ्समासः।) निन्दा। परीवादः। इत्यमरसिंहः ॥

("सोढुं न तत्पूर्ब्बमवर्णमीशे आजानिकं स्थाणुमिव द्विपेन्द्रः"। इति रघुवंशे।)

अवलग्नः, पुं, क्ली, (अवलग्यते इति अव + लग + क्त। दृढ़भावः। लस्ज + क्त, वा।) मध्यदेशः। इत्यमरः ॥ माजा इति भाषा। ("विपुलतरोन्नतश्रोणिलोचनावलग्नम्"। इति माघः।)

अवलग्नः, त्रि, (अव + लग + क्त।) संलग्नः। संयुक्तः। इति मेदिनी ॥

अवलम्बः, पुं, (अव + लबि + अच्।) अवलम्बनं अवपूर्ब्बलम्बधातोरल्प्रत्ययेन निष्पन्नः ॥ (आश्रयः।)

अवलम्बनं, क्ली, (अव + लबि + आधारे ल्युट्।) आश्रयः। यथा,—

"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्त्तुरभू-न्नपतिष्यतः करसहस्रमपि"॥ इति माघे ९ सर्गः ॥

अवलम्बितं, त्रि, (अव + लबि + क्त।) अविलम्बितं। शीघ्रं। इति जटाधरः ॥ अधोलम्बायमानं। कृतावलम्बनं। आश्रितं ॥

अवलक्षः, पुं, (अवलक्ष्यते इति अव + लक्ष + घञ्।) वलक्षः। श्वेतवर्णः। (अर्श आदित्वात् अच्।) तद्वति त्रि। इत्यमरटीकायां स्वामी ॥

अवलिप्तः, त्रि, (अव + लिप् + क्त।) धनादिगर्ब्बितः। यथा,—

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः"॥ इति मानवे ४ अध्याये ७८ श्लोकः। अवलिप्ता धनादिगर्ब्बिता इति कुल्लूकभट्टः ॥

"अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः"।

इति देवीमाहात्म्यम् ॥

अवलिप्तता, स्त्री, (अवलिप्त + तल् भावे ।) अहङ्कारः । इति हेमचन्द्रः ॥ ("तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे" । इति नीतिशतके ।)

अवलीढ, त्रि, (अव + लिह + क्त कर्म्मणि ।) भक्षितं । यथा मनुः,—

"पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च" ।

इत्यादि । "पतत्रिणावलीढं काकादिना भक्षितं" । इत्याह्निकतत्त्वम् ॥

अवलीला, स्त्री, (अवरा लीला ।) हेला । अनायासः । यथा,—

"रतिश्चं नूतनं प्राप्य विषतुल्यं पुरातनं ।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया" ॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः । अपिच ।

"शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि ।
चकार भस्मसात्तञ्च सरथञ्चावलीलया" ॥

इति च तत्रैव प्रकृतिखण्डे १८ अध्यायः ॥

अवलुण्ठनं, क्ली, (अव + लुठि + भावे ल्युट् ।) लुण्ठनं । लोटा गड़ागड़ी इतिभाषा । अवपूर्ब्बकलुठधातोरनट्प्रत्ययेन निष्पन्नं ॥

अवलेपः, पुं, (अव + लिप् + भावे घञ् ।) अहङ्कारः । "दिएणागानां पथि परिहरन् स्थूलहस्तावलेपान्" इति मेघदूते ।) लेपनं । दूषणं । इति मेदिनी ॥ सक्तूः । इति चिकाण्डशेषः ॥

अवलेपनं, क्ली, (अव + लिप् + ल्युट् भावे ।) विलेपनं । अङ्गरागं । माखा इति भाषा । अवपूर्ब्बकलिपधातोरनट् प्रत्ययेन निष्पन्नं ॥

अवलेहः, पुं, (अवलिह्यते क्वाथादेः पुनः पाकात् घनीभूततया खाद्यते इति अव + लिह + कर्म्मणि घञ् ।) लेह्यौषधं । तस्य लक्षणं पर्य्यायश्च यथा,—

"क्वाथादेर्यत् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्चलेहश्च प्राश इत्युच्यते बुधैः" ॥

("जिह्वालेह्यावलेहिका") इति च वैद्यकपरिभाषा । यथा,—

"कटफलं पौष्करं यष्टी व्योषं व्यासस्य कारवी ।
श्लक्ष्णचूर्णीकृतं चैतन्मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणं ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ॥
एतद्योज्यं कफोद्रेके चूर्णमार्द्रकजै रसैः" ।

तत्रान्तरे च उक्तं ।

"अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संशोषं दारुणं हन्यात्तृष्णाकाससमन्वितम्" इति ॥

"सर्व्वेषु सन्निपातेषु न क्षौद्रमवतारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतत्वात् विरुध्यते" ।

अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा क्षेदो हित उक्तः । तत्राग्निसम्बन्धादेव क्षौद्रस्योष्णता सिद्धैव । उष्णेन मधुना विरोधः । उक्तञ्च गुरुणा ।

"उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमक्षिकाणाञ्च तन्निहन्ति यथा विषं" इति ॥

शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतत्वात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।

"ऊर्द्ध्वजत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात्प्राक् प्रयुज्यते" ।

पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयं ॥ यष्टी कर्कटयष्टी । व्योषं शुण्ठीपिप्पलीमरिचानि च । व्यासो यवासः । केचित् व्यासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरेला इति लोके । अष्टाङ्गावलेहिका ॥*॥

"स्निग्धमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥
तेनास्य शाम्यति श्वासः कासो मूर्च्छारुचिस्तथा" ॥

इत्यवलेहः ॥*॥ अन्यत् यथा,—

"पिप्पलीं त्रिफलाञ्चापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥
कटफलं पौष्करं यष्टीं द्राक्षां च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः" ॥

चातुर्भद्रिका ॥ ० ॥

"कटफलं पौष्करं यष्टीं यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासरुचिच्छर्दिश्लेष्मानिलनिवृत्तये" ॥

अष्टाङ्गावलेहः । इति भावप्रकाशः ॥

("क्वाथस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्च लेहः स्यात् तन्मात्रा स्यात्पलोन्मिता ।
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥
मृपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्यमज्जनं ।
स्थिरत्वं पीड्यते मद्या गन्धवर्णरसोद्भवः ॥
दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकं ।
वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ॥*॥
तदुदाहरणं । यथा,—

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकं ।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटयष्टी च व्यूषणं धन्वयासकं ॥
भार्गी राखा शठी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यादृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधु पलाष्टकं ।
चतुष्पलं तु गोक्षीर्य्या पिप्पलीनां चतुष्पलं ॥
क्षिप्त्वा निदध्यात् सुदृढे मृन्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानशेषतः ॥*॥
कण्टकार्य्यवलेहः ॥ ० ॥ इति च शार्ङ्गधरः ॥)

अवलेहनं, क्ली, (अव + लिह् + भावे ल्युट् ।) लेहनं । जिह्वादारा खादनं । चाटन । इति भाषा । अवलेहः । अवपूर्ब्बलिहधातोर्भावे ल्युटप्रत्ययेन निष्पन्नं ॥

अवलोकनं, क्ली, (अव + लुक् + ल्युट् भावे ।) दर्शनं । आलोकनं । इति हेमचन्द्रः ॥

("जलवेलावलोकनकुतूहली" ।
इति नागानन्दे ।)

अवलोकितः, पुं, (अव + लोक + भावे क्त ततोऽस्त्यर्थे अच् ।) लोकनायः । बुद्धः । इति विश्वमेदिन्यौ ॥

अवलोकितं, त्रि, (अव + लोक + कर्म्मणि क्त ।) निरीक्षितं । दृष्टं । इति विश्वमेदिन्यौ । (भावे क्त ।) प्रेक्षणक्रियायां, क्ली ॥

अवल्गुजः, पुं, (अवल्गोरुन्नतनाड्यायते इति अवलगु + जन् + ड ।) सोमराजी । इत्यमरः ॥ कृष्णवर्णसोमराजी । हाकुच् यस्य प्रसिद्धिः । तस्य गुणाः । वायुकफकुष्ठव्रणदोषनाशित्वं । इति राजवल्लभः । अस्य विवरणं वाकुची शब्दे द्रष्टव्यं ॥

("अवल्गुजाहीजकर्षं पीत्वा कोष्णेन वारिणा
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठप्रणाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः ॥)

अववादः, पुं, (अव + वद् + घञ् ।) आज्ञा । निन्दा । विश्वासः । इति मेदिनी ॥

अवशः, त्रि, (न विद्यते वशमायत्तत्वं यस्य ।) अवशीभूतः । विवशः ।

यथा,—

"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यञ्च क्रिया कार्य्या विधानतः" ॥

इति शुद्धितत्त्वं ॥ (क्लीं, अवश्यं । निश्चितम् ।)

अवशक्थिकः, त्रि, (अवबद्धे शक्थिनी येन ।) वस्त्रादिद्वारा पृष्ठजानुलङ्घादयदृढ़बन्धनपूर्ब्बकोपविष्टः । फाँड़बान्धिया वसा इति भाषा । यथा । कात्यायनः ।

"आसनारूढ़पादस्तु जानुनोर्ज्जङ्घयोस्तथा ।
कृतावशक्थिको यस्तु पौढ़पादः स उच्यते" ॥

आसनारूढ़पादः आसनारूढ़पादतलः । जानुनोर्ज्जङ्घयोः कृतावशक्थिको वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । इत्याह्निकतत्त्वं ॥

अवशिष्टः, त्रि, (अवशिष्यते इति अव + शिष + क्त ।) शेषः । उद्वृत्तः । अवशेषाश्रयः । यथा,—

"वल्मीकमूषिकोत्खातां मदमन्तर्ज्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्यात् लेपसम्भवां" ॥

इत्याह्निकतत्त्वं ॥

अवश्यं, व्य, (न वश्यं ।) निश्चयः । तत्पर्य्यायः । नूनं २ । निश्चितं ३ । इत्यमरः ॥

("अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाऽऽत्तं हविः" । इति मनुः ॥) (न + वश + यत् ।) अनायत्ते त्रि ॥

अवश्यायः, स्त्री, (अव + श्यै + ण । पृषोदरादित्वात् ह्रस्वः ।) कुज्झटिका । इति शब्दरत्नावली ॥ (कुज्झटिकाशब्देऽस्य विशेषो ज्ञेयः ।)

अवश्यायः, पुं, (अवश्यायते शैत्यमापद्यते इति श्यैङ् गतौ + श्याद्यधेति णः । ततो घातो युगिति युक् ।) हिमं । इत्यमरः ॥

("अवश्यायनिपातेन किञ्चित्प्रक्षालिताद्गदा" । इति रामायणे ।) गर्व्वः । इति विश्वप्रकाशः ।

अवश्यकयणी, स्त्री, (वश्यकयनी । चिरप्रसूता गौः । इत्यमरटीकायां सारसुन्दरी ॥

अवश्यं, त्रि, (न वश्यमते स्म, यमि स्तम्भे स्तम्भु-

रोधने वा क्तः । स्तम्भः अवाङ्मेति यः । अवालम्बन इति सूत्रेण आविदूर्य्य स्तम्भः पत्वविधानादवष्टब्धशब्द आमन्नपर इति अद्यश्वीनावष्टब्धे इत्यत्र मनोरमायां स्थितं ।) अविदूरः । समीपं । अवलम्बितं । आश्रितं । इत्यमरः ॥ बद्धः । रुद्धः । इति भरतः ॥ आक्रान्तः । इति मेदिनी ॥

अवष्टम्भः, पुं, (अव + ष्टम्भु रोधे इति + घञ् । षत्वञ्च ।) स्वर्गं ।

("रघोरवष्टम्भमयेन पत्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः" ।

इति रघुवंशे ।) स्तम्भः । प्रारम्भः । इति मेदिनी ॥ सौष्ठवं । इति हलायुधः ॥ (अवलम्बनं । बोधनम् । निष्पन्दता ।)

अवष्वाणं, क्ली, (अव + स्वन् शब्दे + घञ् । षत्वञ्च ।) भक्षणं । इति हेमचन्द्रः ॥

अवस्, व्य, (अवर + पूर्व्वाधरावराणामसिप्रत्ययः, तत्सन्नियोगेन अवरस्य अवादेशश्च ।) व्यतिरेकः । इति केचित् ॥

अवसः, पुं, (अव रक्षणादौ अवति इति अन्यविधमीत्यादिना असच् प्रत्ययः ।) राजा । सूर्य्यः । इति सिद्धान्तकौमुदी ॥

अवसं, क्ली, (अव + असिच् भावे ।) रक्षणं । वैदिकशब्दोऽयं ॥

अवसक्थिका, स्त्री, (अवबद्धे सक्थिनी यया बन्धप्रणाल्या सा, अव + सक्थि + समासे कप् ।) खट्टा । तत्पर्य्यायः । पर्य्यस्तिका २ परिकरः ३ पर्य्यङ्कः ४ । इति हेमचन्द्रः ॥ (पर्य्यङ्कबन्धः । वस्त्रादिद्वारा एष्ठजानु-जङ्घा-हृदयदृढ़बन्धनपूर्ब्बकोपवेशनं । यथा,—

"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥

इति कात्यायनः ।

"प्रयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च" ॥

इति मनुः ।)

अवसथः, पुं, (अव + सो + क्थन् ।) क्षात्रनिलयः । इति हेमचन्द्रः ॥ पाठशाला चौपाड़ी यस्य प्रसिद्धिः । ग्रामः । इति शब्दरत्नावली ॥ गृहं । इति हलायुधः ॥

अवसथ्यः, पुं, (अवसथ + यत् ।) क्षात्रवेश्म । इति हेमचन्द्रः ॥ चौपाड़ी इति भाषा ॥

अवसन्नः, त्रि, (अव + सद + क्त ।) अवसादप्राप्तः । विषण्णः । यथा,—

"महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्व्वस्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः" ॥

इति पुष्पदन्तकृतशिवस्तोत्रं । अपि च ।

"आचारेणावसन्नोऽपि पुनः प्रार्थयते यदि" ।

इति व्यवहारतत्त्वं ॥

अवसरः, पुं, (अव + सृ + अच् ।) प्रस्तावः । मन्त्रविशेषः । वर्षणं । इति मेदिनी ॥ वत्सरः । क्षणं । इति हेमचन्द्रः ॥ अवकाशः । यथा । "गोवधे एका चेद्वृद्धिरित्यपदेशेन दण्डवत् प्रायश्चित्तानि भवन्तीत्यतिदेशानवसरात् । तदवसरस्ते प्रत्येकं पूर्णप्रायश्चित्तदैगुण्यं स्यात्" । इति प्रायश्चित्ततत्त्वं ॥ (योग्यकालः । क्रियास्थितियोग्यतासम्पादकरूपः कालिकोऽवकाशः । यथा,—

"कामन्तु बाणावसरं समीक्ष्य" । इति कुमारे ।

शिष्यजिज्ञासानिवृत्तावश्यवक्तव्यरूपः सङ्गतिविशेषः । अनन्तरवक्तव्यत्वम् अवसरः । "उपमानेऽवसरसङ्गतिः" । इति जगदीशः ।)

अवसर्गः, पुं, (अव + सृज् + घञ् ।) स्वेच्छाचारः । तत्पर्य्यायः । प्रकाम्यं २ स्वाच्छन्द्यं ३ अनुमननं ४ । इति त्रिकाण्डशेषः ॥

अवसर्पः, पुं, (अव + सृप् + अच् ।) अपसर्पः । चरः । इत्यमरटीकायां भरतः ॥

अवसर्पिणी, स्त्री, (अव + सृप + णिनि ङीप् ।) जिनानां कालविशेषः । स तु दशकोटिकोटिसागरवर्षैः समाप्यते । इति हेमचन्द्रः ॥

अवसव्यं, त्रि, अपसव्यं । दक्षिणं । इति रायमुकुटः ॥

अवसादः, पुं, (अव + सद + घञ् ।) अवसन्नता । तत्पर्य्यायः । विषादः २ सादः ३ विषण्णता ४ । इति हेमचन्द्रः ॥ (ग्लेषः । क्षयः । यथा,—

"धैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः" ।

इति किरातार्জ্জुनीये ।)

अवसानं, क्ली, (अव + सो + ल्युट् ।) क्रियासमाप्तिः । ग्लेषः । तत्पर्य्यायः । सातिः २ । इत्यमरः ॥ विरामः ३ । इति जटाधरः ॥ मृत्युः ।

("पुंसोऽवसानं व्रजतोऽपि निष्ठुरै-
रिन्धैधनैः पञ्चपदीनमुच्यते" ।

इति पञ्चतन्त्रे ।) सीमा । इति हेमचन्द्रः ॥

अवसायः, पुं, (अव + सो + घञ् ।) ग्लेषः । समाप्तिः । निश्चयः । इति मेदिनी ॥

अवसितं, त्रि, (अव + सो + क्त ।) परिपक्वमर्दितधान्यं । तत्पर्य्यायः । ऋद्धं २ । इति भरतमेदिन्यौ ॥ ज्ञातं । अवसानगतं । समाप्तं । तत्पर्य्यायः । सितः २ । इत्यमरमेदिन्यौ ॥ ("यदि नेपथ्यविधानम् अवसितम्" । इति शाकुन्तले ।)

अवसेकिमः, पुं, (अवसेकेन + निर्वृत्तः । अवसेक + इमनच् ।) वटकः । इति हेमचन्द्रः ॥ बड़ा इति भाषा ॥

अवस्कन्दः, पुं, (अव + स्कन्द + अच् ।) विजिगीषूणां निवेशस्थानं । शिविरं । इति हलायुधः ॥ अवगाहनं । यथा,—

"ततानुपातं कुसुमान्यगच्छात्
स नद्यवस्कन्दमुपास्पृशच्च ।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त" ॥

इति भट्टौ २ सर्गे ११ श्लोकः ॥ नद्यामवस्कन्दोऽवगाहो यत्र स्नानक्रियायां । इति तट्टीकायां भरतः ॥ (आक्रमणं । यथा,—

"अवस्कन्दभयात् राजा प्रजागरहृतश्रमम् ।
दिवासुप्तं समाहन्यान्निद्राव्याकुलसैनिकम्" ॥

इति हितोपदेशः ।)

अवस्कन्दनं, क्ली, (अव + स्कन्द + ल्युट् ।) अवगाहनं । इति भट्टिः ॥ अवतरणं । इति महाभारतं ॥ अवपूर्ब्बस्कन्दधातोरनट्प्रत्ययेन निष्पन्नं ॥

अवस्कारः, पुं, (अव कीर्य्यते क्षिप्यते इति । अव + कॄ + घञ् + सुट् ।) विष्ठा । गूथं । इत्यमरमेदिन्यौ ॥ संमार्জ্জन्यादिनिक्षिप्तधूल्यादि । इत्यमरटीकायां मथुरानाथः सारसुन्दरी च ॥

अवस्तात्, व्य, (अवरस्मिन्, अवरस्मात्, अवरमित्यर्थे अस्तातिः ।) अवरे । पश्चात् । ग्लेषे । अन्ते । इति पाणिनिः ॥ ("अवस्तात्स्वर्गलोकं प्रापयन्तः" । इति शतपथब्राह्मणे ।)

अवस्तारः, पुं, (अव + स्तृ + घञ् ।) यवनिकादिः । कानात् इत्यादि भाषा ॥ अवस्तीर्य्यतेऽनेनेति स्तृञ आच्छादने घञ् ॥

अवस्तु, क्ली, (न वस्तु । नञ्तत्पुरुषः ।) असद्वस्तु । (यथा,—

"अवस्तुनिर्ब्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः" ।

इति कुमारे ।) वेदान्तमते अज्ञानादिसकलजड़समूहः ॥

अवस्था, स्त्री, (अव + स्था + अङ् ।) दशा । कालिकविशेषः । इत्यमरः ॥

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनन्तु ततः परं ॥
आषोड़शाद्भवेद्बाल्यमतस्तरुणमुच्यते ।
वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परं" ॥

इति स्मृतिः ॥

अवस्थाचतुष्टयं, क्ली, (अवस्थायाश्चतुष्टयं । तत्पुरुषः ।) कालकृतचतुर्विधदशा । यथा । "आपञ्चदशवर्षं बाल्यं । आत्रिंशद्वर्षं कौमारं । आपञ्चाशद्वर्षं यौवनं । पञ्चाशत ऊर्द्ध्वं वृद्धत्वं" । इति वैद्यकशास्त्रे ॥

अवस्थानं, क्ली, (अव + स्था + ल्युट् ।) स्थितिः । वासः । यथा । "परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेनैकराश्यवच्छेदेन सहावस्थानरूपः" । इति तिथ्यादितत्त्वं ॥ (अवस्था । प्रतिष्ठा । यथा, "कीदृक् ते व्यसनावस्थानम्" । इति पञ्चतन्त्रे ।

"पद्भ्यां दृढ़मवस्थानं स कृत्वा कपिकुञ्जरः" ।

इति रामायणे ।)

अवस्थितः, त्रि, (अव + स्था + क्त ।) कृतावस्थानः । अवस्थितिविशिष्टः । स्थितं । यथा ।

"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः" ।

इति श्रीभगवद्गीतायां २ अध्याये ६ श्लोकः ॥

अवस्थितिः, स्त्री, (अव + स्था + क्तिन् ।) अवस्थानं । थाका । इति भाषा । अवपूर्ब्बकस्थाधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (अनुसरणम् । अभ्यासः ।)

अवहस्तः, पुं, (अवरं हस्तस्य । एकदेशी तत्पुरुषः ।) हस्तपृष्ठं । इति हेमचन्द्रः ॥

अवहारः, पुं, (अव + हृ + घञ् ।) चौरः । द्यूतयुद्धादिविश्रामः । निमन्त्रणं । उपनेतव्यत्वं ।

याहनामजलजन्तुः । इति त्रिकाण्डशेषः । धर्म्मान्तरं । इति शब्दरत्नावली । (आक्रानम् । स्वधर्म्मपरित्यागपूर्व्वकधर्म्मान्तरग्रहणम् । प्रत्यवायम् ।)

अवहारकः, पुं, (अवहार + स्वार्थे कः ।) जलजन्तुविशेषः । हाङ्गर इति ख्यातः । जलहस्तीति केचित् । तत्पर्य्यायः । अवग्राहः २ नक्रनाजः ३ अवहारः ४ । इति शब्दरत्नावली । युद्धादिनिवर्त्तके त्रि ।

अवहार्य्यः, त्रि, (अव + हृ + ण्यत् ।) समर्पणीयः । यथा,—

"आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः ।
अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" ॥

इति मानवे ८ अध्याये १४५ श्लोकः ॥ (अर्थदण्डयोग्यः । यथा,—

"अवहार्य्यो भवेच्चैव सान्वयः षट्शतं दमम् ।
निरन्वयोऽनपसरः प्राप्तः स्यात्तौरकिल्बिषं" ॥

इति मनुः ।

अवहालिका, स्त्री, (अव + हल् + ण्वुल् + टाप् ।) प्राचीरं । इति हारावली ॥

अवहित्तं, त्रि, (अव + धा + क्त ।) विज्ञातं । अवधानं गतं । इति धरणी ॥ (सावधानः । प्रमादरहितः । यथा,—

"शृणुष्वावहितो भूत्वा यदुक्तं नन्दने पुरा" ।

इति मार्कण्डेयपुराणम् ॥)

अवहित्था, स्त्री, (न वहित्थमिष्ठतीति अवहित्थः + स्था + क + टाप् । एषोदरादित्वात् साधुः ।) आकारगुप्तिः । रत्यादिसूचकोमुखरागादिराकारः । अङ्गवैक्लवमिति वोपालितः ॥ भयलज्जादिना तस्य गोपनं । इत्यमरटीकायां भरतः ॥ (तल्लक्षणं, यथा साहित्यदर्पणे,—

"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यान्यथाभाषण-विलोकनादिकरी" ॥ उदाहरणम् । यथा कुमारसम्भवे,—

"एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्व्वती" ॥

लज्जावशात् कमलदलगणनाव्याजेन हर्षं जुगोप इत्यर्थः । अनेन अवहित्थाख्यः सञ्चारी भाव उक्तः, तदुक्तं,—

"अवहित्था तु लज्जादेर्हर्षाद्याकारगोपनं" ।

इति मल्लिनाथः ।)

अवहेलं, क्ली, स्त्री, (अव + हेड् + घञ् डस्य लः, डलयोरेकत्वस्मरणात् ।) अनादरः अवज्ञा । इत्यमरः ॥

अवहेलनं, क्ली, (अव + हेड् + ल्युट् ।) अवहेला अवमानना । इति शब्दरत्नावली ॥

अवहेलितं, क्ली, (अव + हेड् + क्त ।) अनादरः । अवहेला । तद्विशिष्टे त्रि ॥ कृतावहेलनवस्तु । अवहेलं जातमस्य इत्यर्थे इतच्प्रत्ययेन निष्पन्नं ॥

अवक्षुतं, क्ली, (अव + क्षु + क्त ।) उपरिक्षुतक्षुतं । यथा मनुः,—

"क्षिप्तदन्तं नखैश्छिन्नं पतितान्नमवक्षुतं" ।

इत्याह्निकतत्त्वं ॥

अवाक्, [च्] त्रि, (नास्ति वाक् यस्य सः ।) वाक्यरहितः । इत्यमरः ॥ वोवा इति भाषा । क्विबन्तवच्धातोर्नञ्समासेऽयं प्रयोगः ॥ दक्षिणं । अधोमुखं । एतदर्थे योः अवपूर्ब्बान्नञ्धबधातोः प्रयोगः ॥

अवाक्पुष्पी, स्त्री, (अवाक् अधोमुखं पुष्पमस्याः ।) घृतपुष्पा । शूलफा इति ख्याता । मिश्रेया । इत्यमररत्नमाले ॥ मौरी इति भाषा । वृक्षविशेषः । हेठाऊली चोरऊली चोरखड्की इति भाषा । तत्पर्य्यायः । अधःपुष्पी २ मङ्गल्या ३ अमरपुष्पिका ४ । इति रत्नमाला ॥

अवाक्शिराः, [स्] पुं, (अवाक् अवनतं शिरो यस्य ।) अधोमुखः । यथा,—

"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत् ।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये" ॥

इति मानवे ८ अध्याये ९४ श्लोकः ॥

("इति ब्रुवति रामेतु लक्ष्मणोऽवाक्शिरास्तदा" इति रामायणम् ॥)

अवाग्र्यं, त्रि, (अवनतमग्रमस्य ।) नम्रं । अवनतं । इत्यमरः ॥

अवाङ्, [ञ्च] त्रि, (अव + अञ्च + क्विप् ।) नीचवदनः । तत्पर्य्यायः । अधोमुखः २ अवाङ्मुखः ३ अवाचीनः ४ इत्यमर-जटाधरौ ॥

("साक्षी दृष्टश्रुतादन्यत् विब्रुवन्नार्य्यसंसदि ।
अवाङ् नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते" ॥

इति मनुः ।)

अवाङ्मुखं, त्रि, (अवाङ्मुखमस्य ।) अधोवदनं । यथा,

"तत् श्रुत्वा स बलः खेद-हर्ष-दुःख-त्वपाकुलः ।
अवाङ्मुखः प्राप्तकालां तामुवाचाश्रुगद्गदं" ॥

इति कथासरित्सागरे अलङ्कारवतीलम्बके ६३ तरङ्गः ॥

अवाची, स्त्री, (अव + अञ्च + क्विप् + ङीप् । दक्षिणदिक् । इति वोपदेवादयः ॥ अधोदिक् । इति व्याडिः ॥ अधोमुखी ॥

अवाचीनं, त्रि, (अवाचां भवं । अवाची + ख ।) दक्षिणदिग्भववस्तु । अधोमुखः । इति स्वामिजटाधरौ ॥

अवाच्यं, क्ली, (न + वच + ण्यत् ।) दुर्व्वाक्यं । तत्पर्य्यायः । अनक्षरं २ । इत्यमरः ॥ वचनानर्हं । अनक्षरं गालि प्रभृति इति मधुः । निन्दितान्यक्षराणि अत्र अनक्षरं अव्ययानामनेकार्थत्वात् नञ् निन्दायां । एवमवाच्यं वक्तुमयोग्यं वचनौ वाचि हृदयवासोरिति घ्यण् भुजवचेति कनिषेधः ॥ इति भरतः ॥

("वाच्यावाच्ये हि कुपितो न विजानाति कर्हिचित्" । इति भारते ।

"अवाच्यं वदतो जिह्वा कथं न पतिता तव" । इति रामायणे ।)

अवाच्यः, त्रि, (अवाच् + भवार्थे यत् ।) अनिन्दितः । इति स्मृतिः ॥ अवक्तव्यः । वचनानर्हः । यथा,—

"अनक्षरमवाच्यन्तु वचनार्हं न यद्भवेत् ।
एष बन्ध्यासुतो याति खपुष्पकृतशेखरः ॥
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्द्धरः" ।

इति शब्दरत्नावली । (अवरदेशकालादौ भवः ।)

अवाच्यदेशः, पुं, (अवाच्यो देशः ।) योनिः । इति त्रिकाण्डशेषः ॥

अवादी, [न्] त्रि, (वद + णिन् । न वादी । नञ्तत्पुरुषः ।) अविरोधी । अविवादी । अवक्ता । अवदनशीलः । वदधातोर्णिन् प्रत्ययानन्तरं नञ्समासनिष्पन्नः ॥

अवाधं, त्रि, (नास्ति बाधा यस्मिन् ।) बाधाशून्यं । अनर्गलं । तत्पर्य्यायः । निरर्गलं २ । इत्यमरः ॥

अवाध्यः, त्रि, बाधानर्हः । बाधायोग्यः । अबाधनीयः । अवाधितव्यः । न बाध्यः अवाध्य इति नञ्समासनिष्पन्नः ॥

अवानं, त्रि, (अव + अन् + अच् ।) शुष्कफलादि । इति शब्दरत्नावली ॥

("अवानमशुकादृष्टमेकमाम्रफलं किल" । इति भारते ।)

अवान्तरं, त्रि, (अवगतमन्तरं मध्यम् । प्रादिसमासः ।) प्रधानान्तःपाति । इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थसाधनपरा न भवति । किन्तु बहिर्मुखानां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं । यथा भैषज्ये औषधे रुच्युत्पादनं । यथा,—

"पिब निम्बं प्रदास्यामि खलु ते खण्डशर्कराम् ।
पित्तैवमुक्तः पिबति तिक्तमप्यतिबालकः" ॥

"अत्र तिक्तनिम्बादिपानस्य न खलु खण्डादिलाभरूप प्रयोजनं किन्वारोग्यं तथा वेदेऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते" इति मलमासतत्त्वं ॥

अवापितधान्यं, त्रि, (अवापितं अक्षतवपनं धान्यम् ।) अक्षतवपनधान्यं । रोपितधान्यं । रोयाधान इति भाषा । तत् वापितधान्यापेक्षया किञ्चिद्धीनगुणं । इति राजवल्लभः ॥

अवारं, क्ली, (अव + ऋ + घञ् ।) अर्व्वाक्तटं । नद्यादेः । पूर्व्वतीरं । इत्यमरः ॥ एपार इति भाषा ।

अवारपारः, पुं, (अवारं अर्व्वाक्तीरं पारं उत्तरतीरञ्च यस्य ।) समुद्रः । इति हेमचन्द्रः ॥

अवारपारीणः, त्रि, (अवारपारे गच्छतीति । अवारपार + ख ।) पारगः । नद्यादिपारगतत्त्वज्ञः । इति पाणिनिः ॥

अवारिका, स्त्री, (नास्ति वारि यत्र ततः स्वार्थे कन् + टाप् ।) धन्याकं । धनिया इति भाषा । अवरिका च पाठः । इति राजनिर्घण्टः ॥

अवारितं, त्रि, (न वारितं । नञ्समासः । अक्षतवारणं । अनिवारितं । यथा,—

"अवारितद्वारतया तिरश्चा-
मन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रन्ध्रेष्वधिकं विशेष-
मध्यापयामः परमाणुमध्याः" ॥

इति नैषधे ३ सर्गे ४२ श्लोकः ॥

अवारीणः, त्रि, (अवारं गच्छतीत्यार्थे खः ।) पारगः । नदीपारगतः । इति पाणिनिः ॥

अवार्य्यं, त्रि, (न वार्य्यं । नञ्समासः) अनिवार्य्यं ।

अवारणीयं । अवारितव्यं । वारणायोग्यं । यथा,—
"नमस्ते नित्यविलसद्दैत्यवस्त्रनिकेतन ।
अवार्य्यवीर्य्यवद्यं विष्णोर्यत् प्रणमाम्यहं" ॥
इत्युत्कलखण्डे २७ अध्यायः ॥

अवासाः, [स्] त्रि, (नास्ति वासो यस्य ।) वस्त्ररहितः । नग्नः । इत्यमरः ॥

अवास्तवं, त्रि, अयथार्थं । मिथ्या । न वास्तवं अवास्तवमिति नञ्समासनिष्पन्नं ॥

अवाक्षः, त्रि, परिरक्षकः । अवपूर्ब्बकाक्षधातोरल् प्रत्ययेन निष्पन्नः ॥

अविः, पुं, (अव + इन् ।) सूर्य्यः । पर्ब्बतः । मेषः । इत्यमरः ॥ [इति मनुः ।)
("अश्वूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणां" ।
"मूत्राणि हस्तिकरभमहिषीखरवाजिनां ।
गोऽजावीनां स्त्रियां पुंसां मूत्रवर्ग उदाहृतः" ॥
इति वैद्यकरत्नेन्द्रसारसंग्रहे ॥)
नाथः । मूषिककम्बलः । इति मेदिनी ॥ प्राचीरं वायुः । इति दण्डी ॥

अविः, स्त्री, ऋतुमती । इत्यमरः ॥

अविकटः, पुं, (अवीनां मेषाणाम् संघातः । अवि + कटच् ।) मेषसमूहः । इति संक्षिप्तसारपरिशिष्टं ॥ भेड़ारपाल इति भाषा ।

अविकटः, त्रि, अविशालः । अकरालः । अविस्तारः । न विकटः अविकटः इति नञ्समासनिष्पन्नः ॥

अविकं, क्ली, (अवि + क ।) हीरकं । इति राजनिर्घण्टः ॥ (हीरकशब्दस्य गुणादयो ज्ञातव्याः ॥

अविकारी, [न्] त्रि, (न विकारी + नञ्तत्पुरुषः ।) विकाराजनकः । यथा बृहस्पतिः ।
"कन्दमूलफलैः पुण्यैः शस्तैः शुक्लरसन्तु यत् ।
अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" ॥
इत्याह्निकाचारतत्त्वं ॥

अविगन्धिका, स्त्री, (अवेरजायाः गन्द इव गन्धोऽस्याः । ततः स्वार्थे कन् ।) अजगन्धाक्षुपः । इति राजनिर्घण्टः ॥

अविगीतं, त्रि, (न विगीतम् । नञ्तत्पुरुषः ।) अनिन्दितं । यथा । "नापि मङ्गलं सफलमविगीतशिष्टाचारविषयत्वाद्दूर्व्वत्" । इति मङ्गलवादचिन्तामणिः ॥

अविघ्नः, पुं, (न विघ्नः । नञ्तत्पुरुषः ।) करमर्दकवृक्षः । इत्यमरः ॥ पानिआमला इति ख्यातः । इति सारसुन्दरी ॥

अविचारः, पुं, (नास्ति विचारो यस्येति ।) अन्यायः । अत्याचारः । विचाररहिते त्रि । (विचाराभावः।) यथा,—
"अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
संसारोत्तारणायालमेतद्वेदविदो विदुः" ॥
इति मत्स्यपुराणं ॥

अविचारितः, त्रि, (न विचारितः । नञ्तत्पुरुषः ।) अकृतविचारः । अविवेचितः । अविचारशब्दादितप्रत्ययेन निष्पन्नः ॥ ("अतः सर्व्वत्राऽविचारितं कर्म्म न कर्त्तव्यम्" । इति पञ्चतन्त्रम् । अविवेचितं सम्यग्विवेचनं विना । यथा,—
"स किं भृत्यः स किं मन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभृत्यागं निर्दिशत्यविचारितम्" ॥
इति हितोपदेशः ।)

अविच्छिन्नं, क्ली, (न विच्छिन्नं, नञ्तत् ।) विच्छेदाभावयुक्तं । अनिष्पत्तिमत् । यथा,—
"अविच्छिन्ने कथम्भावे यत् प्रधानस्य पच्यते ।
अविज्ञातफलं कर्म्म तस्य प्राकरणाङ्कता" ॥
इति मलमासतत्त्वम् ॥

अविज्ञः, त्रि, (न विज्ञः । नञ्तत्पुरुषः ।) अप्रवीणः । अनिपुणः । अनभिज्ञः । अशिक्षितः । अज्ञती । यथा,—
एते सर्व्वे गुणाः कान्त सन्ति कान्ते त्वयि ध्रुवं ।
त्वां न वाञ्छन्ति याः कान्तास्ता अविज्ञाश्च वञ्चिताः"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ॥

अविज्ञेयं, त्रि, (न विज्ञेयं । नञ्तत्पुरुषः ।) दुर्ज्ञेयं । यथा,—
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणं ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" ॥
इति मानवे १ अध्यायः ॥

अविडीनं, क्ली, (न विडीनम् । नञ्तत्पुरुषः ।) पक्षिणां आभिमुख्याभिगमनं । इति महाभारते ॥

अवितं, त्रि, (अव + क्त ।) त्रातं । रक्षितं । इत्यमरः ॥

अवितथं, क्ली, (न वितथम् । नञ्तत्पुरुषः ।) सत्यं । ("अवितथमाह प्रियंवदा" । इति शाकुन्तले ।) तद्विशिष्टे त्रि । इति रत्नावली ॥ (सार्थकं । यथा,—"वत्स ! अवितथैषा तव भारती भवतु" । इति नागानन्दे ।)

अवित्यजः, पुं, क्ली, (न विशेषेण त्यज्यते रसायनादिषु इति । न + वि + त्यज + क ।) पारदः । इति राजनिर्घण्टः ॥

अविदूसं, क्ली, (अवेर्मेषस्य दुग्धम् । अवेः दुग्धे सेाढूसमरीसचः, इति ढूसप्रत्ययः ।) मेषदुग्धं । इति हेमचन्द्रः ॥ (मेषदुग्धविवरणेऽस्य विशेषो ज्ञेयः ॥)

अविद्धकर्णा, स्त्री, अम्बष्ठा । आकनादि इति ख्याता । इति भरतराजः । इत्यमरटीकायां भरतः ॥

अविद्धकर्णी, स्त्री, (न विद्धः पर्णरूपः कर्णो यस्याः ।) विद्धकर्णीलता । इति भरतः ॥ (माचिकाशब्देऽम्बष्ठकीशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

अविद्यः, त्रि, (नास्ति विद्या यस्य सः ।) विद्यारहितः । अविद्वान् । विद्याहीनः । यथा,—
"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" ।
अपि च । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" ॥
इति दायतत्त्वं ॥ अन्यच ।
"अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत् ।
समस्तत्र विभागः स्यादपित्र्य इति धारणा" ॥
इति मानवे ९ अध्याये २०५ श्लोकः ॥

अविद्यमानः, त्रि, (न विद्यमानः । नञ्तत्पुरुषः ।) अवर्त्तमानः । सत्तारहितः । अभावः । यथा नारदः,—
"अविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः" ॥
इति दायतत्त्वं ॥

अविद्या, स्त्री, (न विद्या । नञ्तत्पुरुषः ।) अज्ञानं । इत्यमरः ॥ माया । इति वेदान्ते ॥ (अहङ्कारहेतुकमज्ञानं, मिथ्याज्ञानं, विद्याविरोधिनी, अयथार्थबुद्धिः । यदुक्तम्,—
"अविद्याया अविद्यात्वमिदमेव तु लक्षणम् ।
यत्समाधासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥
अन्यच,
"सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्दिवाकरम्" ।
अयक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मख्यातिबुद्धिः । यथा,—"शरीरे मनुष्योऽहमित्यादि" । इयञ्च सर्व्वक्लेशमूलभूता तम इत्युच्यते ।
"अविरोधितया कर्म्म नाऽविद्यां विनिवर्त्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्" ॥
इति आत्मबोधः ।)

अविधिः, पुं, (न विधिः । नञ्तत्पुरुषः ।) अविधानं । शास्त्राविहितं । यथा,—
"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्ब्बकं" ॥
इति श्रीभगवद्गीतायां ९ अध्याये २३ श्लोकः ॥
अपि च याज्ञवल्क्यः ।
"वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
अमितानि दुराचारो यो हन्त्यविधिना पशून्" ॥
इत्याह्निकतत्त्वं ॥

अविनः, पुं, (अव + इनच् ।) यष्टा । यागकर्त्ता । इत्युणादिकोषः ॥

अविनयः, पुं, (न विनयः । नञ्तत्पुरुषः ।) विनयाभावः । यथा,—
"बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नऊषश्चैव पार्थिवः ।
सुदासो यवनश्चैव सुमुखो निमिरेव च" ॥
इति मानवे ७ अध्याये ४०।४१ श्लोकौ ॥ (अशिष्टाचारः । यथा,—
"अयमाचारत्यविनयं सुग्धासु तपस्विकन्यकासु" ।
इति शाकुन्तले ।) अविनीते त्रि ॥

अविनाभावः, पुं, (विना व्यापकं विना न भावः स्थितिः ।) व्याप्तिः । व्यापनिष्ठव्यापकनिरूपितधर्म्मः । यथा,—"वह्निमान् धूमात्" इत्यादौ धूमनिष्ठा वह्निनिरूपिता व्याप्तिः ॥ इति न्यायमीमांसयोर्मतं ॥ तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावः । यथा । केयमाकाङ्क्षा न तावदविनाभावः । नीलं सरोजमित्यादौ तदभावात् । विमलं जलं नद्याः कच्छे महिष इत्यत्र जलान्वितनद्या अविनाभावात् कच्छे साकाङ्क्षतापत्तेश्च । इत्याकाङ्क्षाचिन्तामणिः । अविनाभाव इति । तत्पदार्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षा इति भावः । इति तट्टीका माधुरी ॥

अविनीतः, त्रि. (न विनीतः। नञ्तत्पुरुषः।) विनयरहितव्यक्तिः। तत्पर्य्यायः। समुद्धतः २। इत्यमरः॥ (यथा,—
"न चापि प्रतिकूलेन नाविनीतेन रावण!।
राज्यं पालयितुं शक्यं राज्ञा तीक्ष्णेन वा पुनः"॥
इति रामायणे। अनियमितः। यथा,—
"नाविनीतैर्व्रजेद्ग्रामं न च क्षुद्राधिपीडितैः"॥
इति मनुः।)

अविनीता, स्त्री, (न विनीता। नञ्तत्पुरुषः।) पुंश्चली। असती। इति हेमचन्द्रः॥

अविपटः, पुं, (अवि+पटच्।) अवीनां विस्तारः इति संक्षिप्तसारव्याकरणपरिभाष्यं। कम्बलादिः॥

अविप्रियः, पुं, (अवि+प्री+क।) श्यामाकवृक्षः। इति राजनिर्घण्टः॥ (यदा न विप्रिय इत्येवं स्यात् तदा इष्टः।)

अविप्रिया, स्त्री, (अवीनां मेषादीनां प्रिया।) श्वेतालता। इति राजनिर्घण्टः॥

अविभक्तः, त्रि, (न विभक्तः। नञ्तत्पुरुषः।) अपृथक्। यथा स्मृत्यचिन्तामणौ।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकं।
सधासु च तथान्यत्र नाधिकारः पृथग्विना"॥
इति मलमासतत्त्वं॥

अविभाज्यं, त्रि, (न विभाज्यम्। नञ्तत्पुरुषः।) विभागायोग्यं। अथ विभाज्याविभाज्ये। तत्र व्यासः।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनं।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत्"॥*॥
विद्याधनमाह कात्यायनः।
"उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्ब्बकं।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत्॥
श्रित्र्यादात्विज्यतः प्राप्तात् सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानसंश्रुतादाद्यं प्राध्ययनात्तु यत्॥
विद्याधनन्तु तत्प्राज्ञैर्विभागे न प्रयोजयेत्।
श्रित्र्येष्वपि हि धर्म्मोऽयं मूल्यादप्यधिकं भवेत्॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्ब्बकं।
विद्याधनन्तु तद्विद्यात् न विभाज्यं कदाचन"॥*॥
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयैतद्देयमिति पण्डितं यज्ञोपन्यासं निर्ल्लोभ्यं लभते तन्न विभाज्यं। श्रित्र्यादध्यापितात्। आर्त्विज्यतः यजमानाद्दक्षिणया लब्धधनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य। तथा यत्किञ्चिद्विद्याप्रश्ने निर्ल्लोभ्यं पण्डितं यदि कश्चित् परितोषाद्ददाति। तथा योऽस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददानीत्युपस्थितस्य संशयमपनीय यल्लब्धं। दादिनोर्व्वा सन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धं षष्ठांशादिकं तथा शास्त्रादिप्रश्नश्रवणज्ञानं सम्भाव्य यत् प्रतिग्रहादिना लब्धं। तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योन्यज्ञानविवादे निर्ल्लोभ्य यल्लब्धं। तथैकस्मिन् देये बहूनामुपस्थिते येन प्रहृतात् यल्लब्धं। तथा श्रित्र्यादिविद्यया चित्रकरसुवर्णकारादिभिर्यल्लब्धं। तथा द्यूतेनापि परं निर्ल्लोभ्य यल्लब्धं। तत्सर्व्वमविभाज्यमितरैः। तस्माद्यया कयाचिद्विद्यया लब्धमर्ज्जकस्यैव तन्नेतरेषामिति। प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः॥*॥ नारदः।
"कुटुम्बं बिभ्रयाद्भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्"॥
बिभ्रयादित्येकवचननिर्देशान्न बहवः। यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः। अश्रुतो मूर्खः। कल्पतरुमिताक्षरादीपकलिकासु। कात्यायनः।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते"॥
अन्यतः पितृमातृकुलव्यतिरिक्तात्॥*॥ अत्र विशेषयति स एव।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्।
समविद्याधिकानान्तु देयं वैद्येन तद्धनं"॥
तच्चोदितविद्यापदमुभाभ्यां सम्बध्यते तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्ययोः। वैद्येन विदुषा॥*॥ पुनर्व्विशेषयति।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
श्रौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः"॥
कुले सकुले पितामहपितृव्यादिभ्यः। पितृत एव वा। श्रिक्षितविद्यानां भ्रातॄणां। यद्विद्याश्रौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ। पुनः कात्यायनः॥
"ह्रांग्रहरोर्द्धहरो वा पुत्रवित्तार्ज्जनात् पिता"। पुत्रवित्तार्ज्जनात्। उदभिहितभावो द्रव्यवत् प्रकाशत इति न्यायात् पुत्रार्ज्जितवित्तात् पितुर्ह्रांग्रित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च। अर्ज्जकस्य तु ह्रांग्रित्वं भ्रातृधनोपघाते तु तेषामप्येकांग्रित्वं वक्ष्यमाणव्यासवचनात्। पितुरर्द्धहरत्वन्तु पितृद्रव्योपघातादृणवत्त्वादेति दायभागः। अनुपघाते पिता ह्रांग्रहरः अर्ज्जकत्वात् स्वयमपि ह्रांग्रहरः इतरेषामनंग्रित्वं। भ्रातृद्रव्योपघाते तु तस्माप्येकांग्र इति ह्रांग्रार्द्धांग्रयोर्भेदकथनं॥*॥ पुनः कात्यायनः।
"गोप्रचारश्च रथ्या च वस्त्रं यच्चाप्ययोजितं।
प्रायोज्यं न विभज्येत श्रिक्ष्यार्थन्तु बृहस्पतिः"॥
प्रायोज्यं यच्चस्य प्रयोजनार्हं पुस्तकादि न तन्मूर्खादिभिः सह पण्डितादिभिर्व्विभजनीयं एवमेव दायभागमदनपारिजातादयः। याज्ञवल्क्यः।
"पिटभ्यां चैव यद्दत्तं तत्तस्यैव धनं भवेत्"।
पुत्रदुहित्रोर्यदलङ्कारादि दत्तं तत्तस्यैवेति शूलपाणुपाध्यायाः॥ नारदः।
"श्रौर्य्यभार्य्याधने चोभे यच्च विद्याधनम्भवेत्।
चौरेष्वेतान्यविभाज्यानि प्रसादो यच्च पैटकः"॥
प्राप्तञ्च सह भार्य्ययेति भरद्वाजवचनात् भार्य्याप्राप्तिकाले लब्धं धनं भार्य्याधनमौद्वाहिकमित्यर्थः। चोभे इत्यत्र त्रिष्वेति पाठे एतत्त्रिकं हित्वान्यदिभजेदित्यनुवर्त्तते अत एतान्यविभाज्यानीति। न वास्त्रविभागो नोदकपात्रालङ्कारोपयुक्तस्त्रीवाससामग्र्यां प्रचाररथ्यानां विभागश्च इति प्रजापतिरिति। यस्मिन् वास्तुनि येन गृहोद्यानादिकं कृतं अपरेणापि स्थानान्तरे तथा कृतञ्चेत् तदा येन यत् कृतं तत्तस्यैव। अन्यत्राप्येवं॥*॥ साधारणधनार्ज्जितेऽपि विशेषमाह व्यासः।
"साधारणं समाश्रित्य यत्किञ्चिदुपनायुधं।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥
तस्य भागदयं देयं शेषास्तु समभागिनः"।
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः। तस्यार्ज्जकस्य। साधारणोपघाते यस्य यावतोऽंशस्यास्यस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्येति दायभागः॥ याज्ञवल्क्यः।
"क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेव च"॥
पितृपितामहागतं बलादन्यैर्हृतं योऽन्यस्मादनुज्ञया उद्धरति तदंशान्तरेभ्यो न दद्यात्॥*॥ भूमौ तु विशेषयति शङ्खः।
"पूर्ब्बनष्टाच्च यो भूमिमेक एवोद्धरेत् श्रमात्।
यथाभागं भजन्त्यन्ये दत्त्वांशन्तु तृतीयकं"॥
एतद्वचनं स्मृतिमहार्णवकामधेनुपारिजातप्रभृतिव्यलिखनादयुक्तमेवेति रत्नाकरः। तन्न, दायभागमिताक्षराप्रभृतिभिर्दृष्टत्वात्। इति दायतत्त्वं॥

अविमरीसं, क्ली, (अवि+मरीसच्। अवेर्दुग्धे मरीसच्प्रत्ययः।) मेषदुग्धं। इति हेमचन्द्रः॥ ("तर्षणाश्चोतनैर्नस्यैरुद्धन्तूष्णमाविकं"॥ इति भाङ्गुरिः॥)

अविमुक्तं, क्ली, (वि+मुच्+क्त। ततो, न विमुक्तम्। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। यथा,—
"मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः॥
अविमुक्तं तदारभ्य क्षेत्रमेतदुदीर्य्यते।
यस्मानन्दवनं नाम पुराऽकारि पिनाकिना।
क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरं॥
आनन्दकन्दबीजानामङ्कुराणि यतस्ततः।
क्षेयानि सर्व्वलिङ्गानि तस्मिन्नानन्दकानने॥
अविमुक्तमिति ख्यातमासीदित्यं घटोद्भव"।
इति काशिखण्डे २६ अध्यायः। (मूर्द्धचिवुकान्तराले स्थाने च। यथा,—
'एष योऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः' इति। "आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचिवुकान्तराले"। इति च भाष्ये।)

अविमुक्तः, पुं, (न विमुक्तः। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। इति काशीखण्डे। अत्यक्ते त्रि॥

अविरतं, क्ली, (न विरतम्। नञ्तत्पुरुषः।) सततं। अनवरतं।
("अविरतोच्छ्रितवारिदिपाण्डुभिर्विरहितैरचिरद्युतितेजसा"॥
इति किरातार्ज्जुनीये।) तदति त्रि। इत्यमरः॥

अविरलं, त्रि, (न विरलं। नञ्तत्पुरुषः।) विरलान्तररहितं। तत्पर्य्यायः। निविरीशं २ घनं ३

निविड़ं ४ निरन्तरं ५ सान्द्रं ६ नीरन्ध्रं ७ बहुलं ८ दृढ़ं ९ गाढ़ं १०। इति हेमचन्द्रः॥

अविरोधः, पुं, (न विरोधः। नञ्तत्पुरुषः।) विरोधाभावः। यथा,—

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता"॥

इति आह्निकतत्त्वधृतशातातपवचनं॥ अपि च।

"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः। भूतानामविरोधेन पूजाकर्म्म करोम्यहं"॥

इत्याह्निकतत्त्वं॥

अविलम्बनं, क्ली, (न विलम्बनम्। नञ्तत्पुरुषः।) शीघ्रं। अविलम्बितं। इति रायमुकुटः॥

अविलम्बितं, क्ली, (वि + लबि + क्त। ततो नञ्तत्पुरुषः।) विलम्बाभावः। तत्पर्य्यायः। शीघ्रं २ त्वरितं ३ लघु ४ क्षिप्रं ५ ऋरं ६ द्रुतं ७ सत्वरं ८ चपलं ९ तूर्णं १० आशु ११। इत्यमरः॥

अविलम्बितः, त्रि, (न विलम्बितः। नञ्समासः।) त्वरायुक्तः। तत्पर्य्यायः। उचण्डः २। इत्यमरः॥ अवलम्बितं ३। यथा,—

"अविलम्बितमुच्चण्डं केऽप्याडम्बरवल्लम्बितं"।

इति जटाधरः॥

अविला, स्त्री, (अव + इलच्।) मेषी। भेड़ी। इति हेमचन्द्रः॥ (नास्ति विलं यत्रेत्यर्थे, त्रि॥)

अविवादः, पुं, (न विवादः। नञ्तत्पुरुषः।) विवादाभावः। यथा,—

"यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः। तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः"॥

इति मानवे ८ अध्याये ९२ श्लोकः॥

अविवादी, [न्] त्रि, (न विवादी। नञ्तत्पुरुषः।) विवादरहितः। निर्व्विवादी। नञ्पूर्व्वविवादशब्दादिन्प्रत्ययेन निष्पन्नः॥

अविवाहितः, पुं, स्त्री, (न विवाहितः। नञ्तत्पुरुषः।) अनूढ़ः। अक्षतोदाहः। अक्षतोपयमः। अपरिणीतः। अक्षतपाणिग्रहः। आइबड़ इति भाषा। नञ्पूर्व्वविवाहशब्दादितप्रत्ययेन निष्पन्नः॥

अविवाह्या, स्त्री, (न विवाह्या। नञ्तत्पुरुषः।) विवाहानर्हा। यथा। सुमन्तुः। "माढ़पिढ़सम्बद्धा आसप्तमादविवाह्याः कन्या भवन्ति"। आपस्तमादन्येषां मतं। नारदोऽपि।

"आसप्तमात् पञ्चमाच्च बन्धुभ्यः पिढ़माढ़तः। अविवाह्या सगोत्रा च समानप्रवरा तथा॥ सप्तमे पञ्चमे वापि येषां वैवाहिकी क्रिया। ते च सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः"॥

सर्व्वाः पिढ़पक्षो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तत्पत्न्यानि भागिनेयानि ताश्चाविवाह्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितुरेतदेवेति। ताश्च यथा। पिढ़पितामहादीनां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या। एवं पिढ़बन्धुप्रभृतिसम्बन्धघटकानां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या। एवं मातामहप्रमातामहादीनां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या। एवं माढ़बन्धुप्रभृतिसम्बन्धघटकानां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या। बन्धुतन्मात्रोरसत्वेऽपि पिढ़मातामहमाढ़मातामहप्रभृत्युपरितनानां पञ्चानां त्रयाणां सप्तमीपञ्चमीपर्य्यन्ता नोद्वाह्येति। एवञ्च पितुर्म्मातुश्च मातामहकन्यान्तरसत्वे तामादाय सप्तमीपञ्चमीपर्य्यन्तायाः परीहारः। एवं बन्ध्वन्तरेऽप्यूह्यं। बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्वत्र। पूर्व्वतस्तु पितुर्म्मातुश्च मातुलपुत्ररूपबन्धोरपि स्वापेक्षया अन्येषां बन्धूनां मातामहगोत्रापेक्षया त्रिगोत्रगणनं सर्वसामञ्जस्यं स्यात्। अन्यथा पितुः पितामहदौहित्रीकन्यायाः पितामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। पिढ़गोत्रापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं पितुः प्रमातामहदौहित्रीकन्यायाः पितामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। पितामहीमाढ़पुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं मातुः प्रपितामहदौहित्रीकन्यायाः मातामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। वरस्य मातामहापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं मातुः प्रमातामहदौहित्रीकन्याया मातामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। मातामहीभ्राढ़पुत्रबन्ध्वपेक्षया तस्या स्त्रिगोत्रमध्यवर्त्तित्वात्। इति। एवं माढ़सपत्नीभ्राढ़सन्ततिः पिढ़माढ़सगोत्रादयोऽप्यविवाह्याः॥ ॰॥

असवर्णाया अविवाह्यत्वं यथा। कर्त्तौ त्वसवर्णाया अविवाह्यत्वमाह दक्षनारदीयं।

"समुद्वयाचाक्षीकारः कमण्डलुविधारणं। द्विजानामसवर्णासु कन्यासूपयमस्तथा"॥

इत्यादि। इत्युद्वाहतत्त्वं॥

अविवेकः, पुं, (न विवेकः। नञ्तत्पुरुषः। नास्ति विवेको यस्य इति समासे वाच्यलिङ्गः।) सदसद्विवेचनाराहित्यं। यथा। 'देहात्मनोरविवेकादस्येवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच अशोच्यानित्यादि"। इति श्रीभगवद्गीता २ अध्यायस्य ११ श्लोकटीका॥ तद्वति त्रि। अविमृश्यकारी। यथा,—("सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम्"॥ इति किरातार्জ্জुनीये॥ सदसद्विवेकरहितः। यथा,—

"उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि"। इति विष्णुपुराणं।)

अविवेकी, [न्] त्रि, (न विवेकी। नञ्तत्पुरुषः। विवेकशून्यः। अविवेचकः। यथा। "तस्मादविवेकिनः सुखमात्रलिप्सवो नाधाधिकारिणः") इति मुक्तिवादस्य गादाधरी टीका। अपि च।

"अस्मिन् प्रसन्ने देवेन्द्रे परमं धाम लभ्यते। मयाविवेकिना तस्य हृदये जनिता व्यथा॥ सर्व्वपापहरो विष्णुः स मया व्यथितः कृतः"।

इति पाद्मे क्रियायोगसारे ११ अध्यायः॥

अविवेचकः, त्रि, (न विवेचकः। नञ्तत्पुरुषः।) विवेचनारहितः। अविवेकी। न विवेचकः अविवेचकः इति नञ्समासनिष्पन्नः॥

अविशेषः, त्रि, (न विशेषः। नञ्तत्पुरुषः।) विशेषरहितः। अभेदः। तुल्यः। विशेषाभावे, पुं॥ विशेषाभावः। यथा,—

"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं। अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्"॥

इति आह्निकतत्त्वं॥ ("सांख्यादिमतसिद्धानि तन्मात्राख्यानि सूक्ष्मभूतानि, तानि च इदमेतदेवंगुणकमिति व्यादृत्ततया नानुभूयन्ते इत्यविशेषाः सूक्ष्माश्चोच्यन्ते"। तथा च विष्णुपुराणे,—

"तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढ़ाश्चाविशेषिणः"॥

इति।)

अविश्रान्तः, त्रि, विश्रामरहितः। विश्रान्तिशून्यः। अनवरते, क्ली। विपूर्ब्बश्रमधातोः क्तप्रत्ययानन्तं नञ्समासनिष्पन्नः॥ ("अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजड़ा"॥ इति आनन्दलहर्य्याम्॥)

अविश्रामं, क्ली, (नास्ति विश्रामो यस्मिन् इति।) विश्रामराहित्यं। यथा,—

"अविश्रामं वहेत् भारं शीतोष्णञ्च न विन्दति। संसन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्"॥

इति चाणक्यं॥

अविश्वस्तः, त्रि, (न विश्वस्तः। नञ्तत्पुरुषः।) विश्वासानर्हः। अकृतविश्वासः। प्रत्ययायोग्यः। यथा,—

"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासात् भयमुत्पन्नं मूलान्यपि निकृन्तति"॥

इति चाणक्यं॥

("विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्"। इति भारते॥)

अविश्वासा, स्त्री, (नास्ति विश्वासो यस्याम् सा।) चिरप्रसूता गौः। केलेनगाइ इति भाषा। इति शब्दचन्द्रिका॥

अविषः, पुं, (अव + टिषच्।) समुद्रः। इति कातन्त्रीयोणादिवृत्तिः। (राजा। पृथिवी। स्वर्गः। रक्तकमले त्रि।) विषशून्ये त्रि॥ (यथा,—

"इत्येता अविषा व्याख्याताः"॥ इति सुश्रुते॥)

अविषा, स्त्री, (नास्ति विषं यस्याम्।) निर्विषाहरिद्रं। इति राजनिर्घण्टः॥

अविषी, स्त्री, (अविष + ङीप्।) नदी। इत्युणादिवृत्तावुज्ज्वलदत्तः॥

अविसोढ़, क्ली, (अवेर्दुग्धम्। अवि + सोढ़च्।) गोदुग्धं। इति हेमचन्द्रः॥

अविस्पष्टं, क्ली, (वि + स्पश + क्त। ततो नञ्समासः।) अस्पष्टवाक्यं। तत्पर्य्यायः। स्खिदं २। इत्यमरः॥

("नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ"॥ इति मनुः॥ अस्फुटः। यथा,—

"विदड्डिं कम्पस्य प्रथयतितरां साध्वसवशादविस्पष्टां दृष्टिं तिरयति पुनर्वाष्पसलिलैः"॥

इति रत्नावल्याम्॥)

अवी, स्त्री, (अवत्यात्मानं लज्जया। अव + ई।) ऋतुमती। इति हेमचन्द्रः॥

अवीचिः, पुं, (नास्ति वीचिः प्रकाशः सुखं वा अत्र।) नरकविशेषः। इति शब्दरत्नावली॥
("अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च।
असिपत्रवनञ्चैव तापनञ्चैव विंशकम्"॥
इति याज्ञवल्क्यः॥) वाप्यलिङ्गस्तरङ्गशून्ये॥

अवीचिः, पुं, (नास्ति वीचिः सुखं यस्मिन्)
अवीचिमत्, क्ली, (अवीचि + मतुप्।) } नरकविशेषः। यथा। "वैतरणी पूयोदः प्राणरोधो विण्मूत्रं लालाभक्षः सारमेयादनमवीचिरयःपानमिति। य इह वा अन्यतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्धः संपात्यते। यत्र जलमिव स्थलमभ्रष्टमभासते तदवीचिमत् तिलशो विशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति"। इति श्रीभागवते ५ स्कन्धे २६ अध्यायः॥

अवीचिमयः, पुं, (अवीचि + मयट्।) नरकभेदः। "यः साक्ष्यादौ अन्यतं वदति स निरवलम्बेऽवीचिमये अधःशिरा निपात्यते यत्र"। इति श्रीभागवते॥

अवीरः, त्रि, (नास्ति वीरो यस्य।) सत्वरहितः। निर्व्वीर्य्यः। इति मेदिनी॥

अवीरा, स्त्री, (नास्ति वीरः पुत्रादिर्यस्याः।) अजातापत्यविधवा। इति स्मृतिः। निष्पतिसुता। इत्यमरभरतौ॥ तदन्नभोजने दोषप्रायश्चित्ते यथा,—
"यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः।
भगजीवी वार्द्धुषिको विषहीनो यथोरगः"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः॥*॥
अपि च।
"अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेत् ध्रुवं"॥
इति च तत्रैव २७ अध्यायः॥*॥ विष्णुः। गन्धगणिकाक्लेनगायनकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत। अवीरास्त्रीसम्भोगसंसर्गपतितान्नाच्च। इति प्रायश्चित्तविवेकः॥* ॥ सामान्येनाभोज्यान्नभोजनप्रकरणे मनुः,— [इत्यादि।
"नाश्नीयादुच्छते यज्ञे ग्रामयाजिकृते तथा"।
"अनर्चितं हविर्यामसमवीरायाञ्च योषितः"
इत्यादिकमुपक्रम्य।
"भुक्त्वा चान्यतमस्यान्नमनर्च्यात्पयसं त्र्यहं"।
"मत्वा भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च"॥
इति। अवीरा पतिपुत्रविहीना निःसम्बन्धिनी। स्वसम्बन्धिन्यास्तु श्राद्धादिनाभ्यनुज्ञानात् व्यवहारात् धनाधिकारात्च। इति च प्रायश्चित्तविवेकः॥*॥ अस्या धनाधिकारो यथा याज्ञवल्क्यः,—
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥
एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः।
स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः"॥
तथा विष्णुः। अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि। इत्यादि। तेन प्रपौत्रपर्य्यन्तानामभावे पत्नी धनाधिकारिणी। यथा कात्यायनः।
"भर्त्तृदायं मृते पत्यौ विन्देत् स्त्री यदि तद्धनं।
विद्यमाने तु संरक्षेत् क्षपयेत् तत्फलेऽन्यथा॥
अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्धमाप्नुयुः"॥
यदीयुरिति धर्म्मार्थं। तथा च व्यासः।
"लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने।
तारयत्युभयं नारी नित्यं धर्म्मपरायणा"॥
मदनपारिजातधृता स्मृतिः।
"यद्यदिष्टतमं लोके यद्यत् पत्युः समीहितं।
तत्तद्गुणवते देयं पतिप्रीणनकाम्यया"॥
भर्त्तुः शयनं पालयन्ती नान्यगामिनी। अतएव हरिवंशीयपुण्यकव्रतोपाख्याने॥
"दानोपवासपुण्यानि सुकृतान्यप्यरुन्धति।
निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे"॥
तथा बृहन्मनुः,—
"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता।
पत्नीव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च"॥
तत्पिण्डमित्यत्र तदित्यनुषज्य। तच्छब्देन भर्त्तुः परामर्शात् भर्त्तुः कृत्स्नमंशं यावदंशं हरेत् न तु वर्त्तनोचितमात्रं। इति दायतत्त्वं॥* अस्याः पतिश्राद्धाधिकारो यथा। पुत्रपौत्रप्रपौत्राभावे पत्नी। तथा च शङ्खः।
"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे तु पत्नी स्यात् तदभावे सहोदरः॥
भार्य्यापिण्डं पतिर्द्दद्यात् भर्त्रे भार्य्या तथैव च।
स्वस्रादेश्च सुता चैव तदभावे द्विजोत्तमः"॥
इत्यादि॥
"अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि।
पिण्डं दद्यात् जलञ्चैव जलमात्रन्तु दुहितरि"॥
इति निर्म्मूलं समूलत्वेऽपि बालदेशान्तरितपुत्रसद्भावविषयमिति श्राद्धविवेकप्रभृतयः। इति॥* अस्या भर्त्रादितर्पणाधिकारो यथा स्मृतिः।
"तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकं"॥
एतत्तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः। इति॥* मृतायास्तस्या आद्यश्राद्धादि पञ्चदशश्राद्धं कर्त्तव्यं न तु सपिण्डनं। यथा। अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्फलेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तं तन्न।
"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुत्रस्य पुनरुक्त्यै भ्रातृपुत्रादयोऽपि ये"॥
इति लघुहारीतवचने एवकारेण अतिदिष्टपुत्रनिषेधात्। पुत्रेणेति तत्सत्त्वमात्रविवक्षितं।
"सपिण्डीकरणं तासां पुत्राभावे न विद्यते"।
इति मार्कण्डेयपुराणैकवाक्यत्वात्।
"यानि पञ्चदशाद्यानि अपुत्रस्येतराणि च।
एकस्यैव तु दातव्यमपुत्रायाश्च योषितः"॥
इति कृन्दोगपरिशिष्टेन आद्यपञ्चदशश्राद्धैः प्रेतत्वपरिहारोक्तत्वाच्च। एतत्पत्युरभावे द्रष्टव्यं। ततश्च त्रिष्वपि पुत्रे अन्येनापि सपिण्ड्यते। एवं पतिसत्वेऽपि। अतएव मैथिलैरवीरायाः सपिण्डनं नास्तीत्युक्तं। इति च शुद्धितत्त्वं॥

अवेद्यः, पुं, (विद + ण्यत्। ततो, न वेद्यः नञ्समासः।) गोवत्सकः। इति शब्दचन्द्रिका। बाकुर इतिभाषा। अज्ञेये त्रि॥ (अविवाह्यः। यथा,—
"अभिचारेण वर्णानामवेद्यावेदनेन च।
स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः"॥
इति मनुः।)

अवेलः, पुं, (नास्ति वेला यस्य सः।) अपलापः। अपह्नवः। इति मेदिनी॥

अवेला, स्त्री, पूगचर्व्वितं। इति मेदिनी॥ छिवान गुया इति भाषा। अपराह्णः। इति लोकप्रसिद्धं। वेलाशून्ये त्रि॥

अवेक्षणं, क्ली, (अव + ईक्ष + ल्युट्।) अवेक्षा॥ दर्शनं। यथा। "कृताकृतावेक्षणवत् स्वयं तत्प्रेक्षापवेशनस्य कर्त्तव्यत्वात्"। इति संस्कारतत्त्वं। (तथाच।
"दूरादवेक्षणं हासः संप्रश्ने सादरो भ्रमम्।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु"॥
इति हितोपदेशे॥ अवधानम्। प्रतिजागरः। अनुसन्धानम्। यथा,—
"निगद्य श्लोकं स्वयमेव धीमान्
वर्णाश्रमावेक्षणजागरूकः।"
इति रघुवंशे॥)

अवेक्षा, स्त्री, (अव + ईक्ष + अ + तत॰ टाप्।) प्रत्यवेक्षणं। प्रत्यक्षदृष्टिः। तत्पर्य्यायः। प्रतिजागरः २। इत्यमरः। (अवधानम्। अनुसन्धानम्। यथा,—
"अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्द्धयेत् वृद्ध्या वृद्धं दानेन निक्षिपेत्"॥
इति मनुः।
("यदि रामस्य भावेक्षा त्वयि स्यान्माद्यवत्सदा"।
इति रामायणे।)

अवेक्षितं, त्रि, (अव + ईक्ष + क्त।) दृष्टं। यथा मनुः।
"केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः।
भूमिप्रावेक्षितञ्चैव संस्पृष्टाप्युदकया"॥
इत्याह्निकाचारतत्त्वम्॥ (कृतावधानः। यथा, रघुवंशे। "स कदाचिदवेक्षितप्रजः"।)

अवैधं, त्रि, (न वैधं विधित आगतं। नञ्तत्पुरुषः।) विधिविषयः। विधिविवर्ज्जितं। विधिप्राप्तभिन्नं॥
("अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन मुच्यते"।
इति स्मृतिः॥)

अवोदं, त्रि, (अव + उन्द + घञ्।) आर्द्रं। इति जटाधरः॥

अवोधः, त्रि, (नास्ति बोधो ज्ञानं यस्य।) निर्ब्बोधः। अज्ञानः।

अवोक्षणं, क्ली, (अव + उक्ष + ल्युट्।) प्रोक्षणविशेषः। मुञ्जदर्भेण जलक्षेपणं। यथा हारीतः।

"तस्मादङ्गिरवोच्यतेऽद्यादाभ्य एव च" । अवोच्य प्रोच्य इति रत्नाकरः॥ नव्यवर्द्धमानधृतम्।

"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्। न्युब्जताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" ॥ इति शुद्धितत्त्वम् ॥

अब्दः, पुं, (अव + दन् ॥ औणादिकोऽयं।) वत्सरः। मेघः। मुस्ता। इति रायमुकुटः सारसुन्दरी च ॥ (मुस्तार्थे प्रयोगो यथा,—

"किराताब्दामृताविश्वचन्दनोदीच्यवत्सरैः। शृतोयातिसारघ्नमनं विशेषाज्ज्वरनाशनम्" ॥ इति वैद्यकचक्रपाणिसङ्ग्रहः॥)

अव्यक्तः, पुं, (वि + अञ्ज + क्त। ततो नञ्समासः।) विष्णुः। शिवः। कन्दर्पः। इति मेदिनी। मूर्ख इति हेमचन्द्रः। अस्फुटे त्रि ॥)

अव्यक्तं, क्ली, प्रकृतिः। आत्मा। इति हेमचन्द्रः। महदादि। परमात्मा। इति मेदिनी ॥

("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः। सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥ इति मानवे ॥

गणितादौ अज्ञातराश्यादिः। अदृश्यः। साङ्ख्यमते सर्व्वकारणं रूपादिहीनतया चक्षुराद्यगोचरं प्रधानं महदादि।

"महतः परमव्यक्तमव्यक्तात् पुरुषः परः"। इति कठोपनिषद् ॥

वेदान्तमते सूक्ष्मशरीरं स्वापावस्थायां शब्दप्रवृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धैर्वर्জ্জितं निर्व्विकारं निराकारं ब्रह्म। परमात्मा, मायोपाधिकं ब्रह्म, सूक्ष्ममतीन्द्रियं लिङ्गग्राह्यं परब्रह्म। यदुक्तम्,—

"अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्"। रूपादिविहीनत्वेन चक्षुराद्यगोचरो योगाभ्यासावसेयो भावः।

"ब्राह्मं सरः कारणमप्रवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति"। इति रघुवंशे ॥

प्रकृतिः। तथा हि,—"यत् सर्व्वस्य जगतो बीजभूतमव्याकृतमनामरूपमतत्सर्व्वकार्य्यकारणशक्तिसमाहाररूपं अव्यक्ताव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः। सत्त्वादिरूपेण निरूप्यभागे व्यक्तिरस्य नास्तीत्यव्यक्तम्"।

यदुक्तम्। "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" ॥ ०॥ सर्व्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमप्रतिरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवोदकानां भावानां" ॥ इति सुश्रुतः ॥

"अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः। सदकारणवन्नित्यं दृष्टं हेतुमदन्यथा ॥ तदेव भावादग्राह्यं नित्यत्वान्न कुतश्चन। भावाज्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा"॥ इति ॥

"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः"। इति च ॥

"अतोऽन्यत् पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियं" ॥ इति च ॥

"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमव्ययो विदुः" ॥ इति च चरकः ॥)

अव्यक्तरागः, पुं, (न व्यक्तोऽव्यक्तो रागोऽरुणिमा।) ईषल्लोहितवर्णः। तत्पर्य्यायः। अरुणः २। इत्यमरः ॥ ताम्रः ३ गौरः ४। इति जटाधरः ॥

अव्यङ्गः, त्रि, (न सन्ति व्यङ्गानि यस्य।) व्यङ्गरहितः। अविकलाङ्गः। यथा,—

"तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगं। अव्यङ्गावयवं पूज्य गन्धधूपार्चनादिभिः" ॥ इति मत्स्यपुराणे ६६ अध्यायः ॥

अव्यङ्गा, स्त्री, (अवेर्भेषस्य अङ्गं पुच्छमिव अङ्गं यस्याः।) शूकशिम्बी। इति केचित् ॥ अमरकोषे अध्यङ्गा इति तट्टीकायां अव्यङ्गा इति च पाठः ॥ व्यङ्गरहिते अविकलाङ्गे च त्रि ॥

अव्यङ्गं, क्ली, (नास्ति व्यङ्गालङ्कारो यस्मिन्।) व्यङ्गालङ्काररहितकाव्यं ॥ यथा,—

"सव्यङ्गमुत्तमं काव्यमव्यङ्गमधमं स्मृतं। किञ्चिद्व्यङ्गसमायुक्तं मध्यमं परिकीर्त्तितं" ॥ इति काव्यचन्द्रिका ॥

अव्यञ्जनः, पुं, (नास्ति व्यञ्जनं शुभलक्षणं पुंचिह्नं यस्य।) पुंचिह्नहीनपशुः। इति हलायुधः ॥ अस्फुटे त्रि ॥ (अनुद्भिन्नरजस्वलाचिह्ना कन्या। यथा,—

"असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी। अव्यञ्जगा भवेत् कन्या कुचहीना च नग्निका" ॥ इति पद्मतन्त्रे ॥)

अव्यण्डा, स्त्री, (न विगतमण्डं बीजमस्याः।) अध्यण्डा इति कुत्रचिदमरकोषे पाठः ॥ आलकुशीति भाषा ।

अव्यथः, त्रि, (नास्ति व्यथा यस्य सः।) पीड़ारहितः। व्यथाशून्यः। सर्पे पुं। इति मेदिनी ॥

अव्यथा, स्त्री, (न व्यथा। नञ्तत्पुरुषः।) हरीतकी ॥ पद्मचारिणी। इत्यमरः ॥

अव्यधिः, पुं, अश्वः। सङ्ग्रामे न बिभ्यतीति अव्यधिः। व्यध भयसञ्चलनयोः सर्व्वधातुभ्य इति इन्प्रत्ययः ततो नञ्समासः। वेदप्रयोगोऽयं ॥

अव्यधिषः, पुं, (न + व्यध + टिषच्।) समुद्रः। सूर्य्यः। इति सिद्धान्तकौमुद्या उणादिवृत्तिः ॥

अव्यधिषी, स्त्री, (अव्यधिष + ङीप्।) पृथ्वी। अर्द्धरात्रं। इति सिद्धान्तकौमुदी ॥

अव्ययः, त्रि, (न + व्यय + क्यप्।) व्ययाशून्यः। इति पाणिनिः ॥

अव्ययं, क्ली, पुं, (न + वि + इण् + अच्।) शब्दविशेषः। तत्परे विभक्तिर्न तिष्ठति अतएव लिङ्गत्रयाविकृतं। तथाच कातन्त्रे,—

"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु। वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्" ॥ (क्ली, अनाद्यन्तं विकारशून्यं परब्रह्म। यथा,—

"अनवद्यस्थलमङ्कसमदीर्घमजमव्ययम्।

अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्" ॥ इति आत्मबोधे ॥)

अव्ययः, पुं, (नास्ति व्ययो यस्य।) विष्णुः।

("नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे। पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च" ॥ इति मार्कण्डेयपुराणे ॥) अक्षयरहिते, त्रि। इति मेदिनी ॥ (अविनाशी। नित्यपुरुषः। यथा,—

"तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः"॥ इति रघुवंशे।

"सूक्ष्माभ्यो मूर्त्तिमाताभ्यः संभवत्यव्ययाद्ययम्"। इति मानवे ॥)

अव्यर्थः, त्रि, (न व्यर्थः। नञ्तत्पुरुषः।) अमोघः। सफलः। यथा,—

"दुर्निवार्य्यश्च दुर्द्धर्षमव्यर्थं वैरिघातकम्। तेजसा चक्रतुल्यश्च सर्व्वशस्त्रास्त्रघातकम्" ॥ इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥

अव्यवसायवान्, [त्] त्रि, (अव्यवसाय + मतुप्। मस्य वः।) व्यवसायरहितः। अव्यवसायी। तत्पर्य्यायः। शिक्षुः २। इति त्रिकाण्डशेषः। (अनुशीलनरहितः।)

अव्यवस्था, स्त्री, (वि + अव + स्था + अङ्। ततो नञ्समासः।) अवसिद्धान्तः। अविधिः। शास्त्रविरुद्धव्यवस्था। इति नञ्समासनिष्पन्ना ॥ (चञ्चले। यथा, कुमारे,

"स्खलारविन्दश्रियमव्यवस्थां" ॥)

अव्यवस्थितः, त्रि, (न व्यवस्थितः। नञ्समासः।) नीतिशास्त्रादिष्वव्यवस्थानभिज्ञः। सिद्धान्तरहितः। यथा,—

"क्वचिद्गुरुः क्वचित्तुल्यो रघुस्तुल्यः क्वचे क्वचे। अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" ॥ इति हितोपदेशः ॥

अव्यवहार्य्य, त्रि, (वि + अव + हृ + ण्यत्। ततो नञ्समासः।) व्यवहारायोग्यं। अव्यवहरणीयं यथा। स्नानतत्स्राद्धालान्त्यस्त्रीगमने तत्तुल्यतयादिगुणव्रताचरणे कृतेऽपि न व्यवहार्य्यः। यथा याज्ञवल्क्यः।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" ॥ पापान्तरेऽप्यव्यवहार्य्यत्वं याज्ञवल्क्योक्तम्।

"शरणागतबालस्त्रीहिंसकान् संश्रयेन्न तु। चौर्य्यव्रतानपि सदा कृतघ्नसहितानिमान्" ॥ "अत्र च कामतो महापातकादिदुष्टत्यापकर्तुरव्यवहार्य्यत्वदर्शनात् कामतो बहुतरगुणयुक्तशरणागतादिहन्तुरमव्यवहार्य्यत्वं न तु हीनतरहन्तुरन्यथा विषमप्रायश्चितापत्तिः स्यात्"। इति प्रायश्चित्ततत्त्वम् ॥

अव्यवहितं, त्रि, (वि + अव + धा + क्त। ततो नञ्तत्पुरुषः।) व्यवधानशून्यं। तत्पर्य्यायः। संसक्तं २ अपटान्तरं ३ अपदान्तरं ४। इत्यमरः॥ तट्टीका च ॥ लग्नं ५। इति शब्दरत्नावली ॥ ("सिसाधयिषाविरहविशिष्टचरमाव्यवहितोत्तरत्वमोत्पत्तिकानुमितिकमभिन्नेति" ॥ इति दीधितिः ॥)

अव्यवहृतः, त्रि, (न व्यवहृतः। नञ्तत्पुरुषः।) अव्यवहारः। इति नञ्समासनिष्पन्नः॥

अव्याजः, पुं, (न व्याजः। नञ्तत्पुरुषः।) कपटाभावः। यथा।

"इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति"॥

इत्यभिज्ञानशकुन्तलानाटके प्रथमोऽङ्कः।

शीघ्रं। यथा। "सेक्तव्यो यदि मारवस्तरुरयं पाथोदपाथोजवैरव्याजं परिविश्व किं चिरयसे कालः परिक्रामति। मूले सिक्तरसे दले विगलिते शीर्णे तथा वल्कले न स्यादस्य परिस्थितेः प्रभुरहो धारापि वारां तव॥" इत्युद्भटः॥

अव्याप्यं, त्रि, (न व्याप्यं। नञ्तत्पुरुषः।) अव्यापनीयं। व्याप्तिरहितं। अनधीनं। यथा। "नापि साध्यव्यापकत्वाव्याप्यत्वेन व्याप्तिविरहोऽप्रयोजकतया साध्यव्याप्यव्यापकत्वेनोपाधेरेव साध्यव्यापकत्वसाधनात्। तस्मादुपाधिर्हेत्वाभासान्तरमिति"। इत्यपाधिवादचिन्तामणिः। अपि च,

"अव्याप्यवृत्तिः कश्चिको विशेषगुण इष्यते"।
इति भाषापरिच्छेदः॥

अव्याप्यवृत्तिः, त्रि, (अव्याप्य सर्व्वावच्छेदमप्राप्य वृत्तिर्यस्य।) किञ्चिदवच्छिन्नवृत्तिः।
("अव्याप्यवृत्तिः कश्चिको विशेषगुण इष्यते"। इति भाषापरिच्छेदः।)
समानाधिकरणाभावप्रतियोगीति यावत्। दैशिकाकालिकभेदेन स द्विविधः। तत्पर्य्यायः। प्रादेशिकः २। आत्मनो विशेषगुणाः। बुद्धिः १ सुखं २ दुःखं३ इच्छा४ द्वेषः५ यत्नः६ धर्म्मः७ अधर्म्मः८ भावनाख्यसंस्कारः९ आकाशस्य विशेषगुणः शब्दः १०। सामान्यगुणौ संयोग ११ विभागश्च १२। इते सर्व्वे अव्याप्यवृत्तयः स्युः। इति न्यायभाषा॥

अव्याहतं, त्रि, (न व्याहतम्। नञ्तत्पुरुषः।) व्याघातशून्यं। यथा।

"यस्य चिकालममलं ज्ञानमव्याहतं सदा।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति"॥
इति शब्दमाला॥ किञ्च। विष्णुपुराणम्।
"अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च।
भवत्येतत् परित्यक्तौ ममात्यव्याहतं सुखम्॥
प्राजापानसमानानामुदानव्यानयोस्तथा।
अन्नं तुष्टिकरञ्चान्तु ममात्यव्याहतं सुखम्"॥
इत्याह्निकाचारतत्त्वम्। (अकुण्ठितं। यथा,—
"वेदशास्त्रार्थविज्ञाने येषामव्याहता मतिः"।
इति मार्कण्डेयपुराणे।)

अव्याहृतः, त्रि, अकथितः। न व्याहृतः अव्याहृतः। नञ्समासनिष्पन्नः॥

अश ऊ ड न (खादिं-आत्मं-सकं-वेट्।) व्याप्तिसंहत्योः। ऊ ड अश्नुते अश्यते। न अश्नोति। संहतिः समूहः। इति दुर्गादासः॥
("यद्दाति यज्ञयश्च सर्व्वमानन्त्यमश्नुते"। इति याज्ञवल्क्यसंहिता।)

अश ग (क्रादिं-परं-सकं-सेट्।) भोजने। अश्नात्यन्नं बुभुक्षितः। इति दुर्गादासः।

अश्वकुम्भी, स्त्री, (अश्वा सलिलं स्कुम्भाति स्कभ्नोति इति। अश्वा + स्कुम्भ + ट + एषोदरादित्वम्।) पानीयघटजः। इति रत्नमाला॥ पाना इति भाषा।

अशक्यं, त्रि, (न शक्यम्। नञ्तत्पुरुषः।) अशक्यनीयं। असाध्यं। यथा। "अशक्ये अध्यवसायः समर्थना"। इति मुग्धबोधव्याकरणम्॥

अशक्तं, त्रि, (न शक्तः। नञ्तत्पुरुषः।) शक्तिरहितं। असमर्थं यथा। मनुः।

"विभज्येच्छेत्तः सर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राताशक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः"॥
इति दायतत्त्वम्॥
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते"।
इति तिथ्यादितत्त्वम्॥

अशनुः, पुं, (न + शद् + क्नु। नञ्तत्पुरुषः।) चन्द्रः। इति शब्दचन्द्रिका॥ शत्रुरहिते मित्रे च त्रि॥

अशनं, क्ली, (अश + ल्युट्।) भक्षणं। अन्नं। इति हेमचन्द्रः॥("शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः॥" इति नागानन्दे॥
"विश्रिस्रमिश्रसंस्कारैः पथ्यैरिष्टैरसादिभिः।
मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितं"॥
इति सुश्रुतः॥)

अशनः, पुं, असनवृक्षः। पीतशालवृक्षः। इति रायमुकुटः॥ (असनशब्दस्य विशेषो ज्ञातव्यः॥)

अशनपर्णी, स्त्री, (अशनस्य शालवृक्षविशेषस्य पर्णमिव पर्णमस्याः।) वृक्षविशेषः। तत्पर्य्यायः। वातकः २ शीतलः ३ शीतलवातकः ४ असनपर्णी ५ शनपर्णी ६ सनपर्णी ७ शीतः ८ शीतकः ९ अपराजिता १०। माराटी इति ख्याता। इति शब्दरत्नावली॥

अशनाया, स्त्री, (अशन + क्यच्।) भोजनेच्छा। क्षुधा। इत्यमरः॥
("अन्नाद्यां अशनाया निवर्त्तते पानात्पिपासा"। इति शतपथब्राह्मणे। "श्रुताशनायः फलवद्भिभूया"। इति भट्टौ।)

अशनायितं, त्रि, (अशनाय + क्त। अशनाया भोजनेच्छा जाता अस्य इति इतच् वा।) क्षुधितं। इत्यमरः॥

अशनिः, पुं, स्त्री, (अश्नाति सङ्घातं करोति। अश + अनिः।) वज्रं। इत्यमरः। विद्युत्॥ ("अथवा मम भाग्यविप्लवादशनिः कल्पित एव वेधसा" इति रघुवंशे।)

अशर्म्म [न्], क्ली, (न शर्म्म। नञ्समासः। नास्ति शर्म्म यस्मिन् इति समासे वाच्यलिङ्गः।) कष्टं। दुःखं।
("एकौघभूतं तदशर्म्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे॥"
इति भारविः॥) तद्विशिष्टे त्रि। इति जटाधरः॥

अशाखा, स्त्री, (नास्ति शाखा यस्याः।) शूलीटङ्गं। इति राजनिर्घण्टः॥

अशितं, त्रि, (अश + क्त।) भुक्तं। खादितं। हतं। इति हेमचन्द्रः॥
("आप एव तदशितं नयन्ते"।
"तेजोऽशितं त्रेधा विधीयते"।
इति च छान्दोग्ये उपनिषदि॥
"अशितं माचया काले पथ्यं याति जरां सुखं"॥ इति वाभटः॥ "यावद् यस्याशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति, तावदस्य मात्रा प्रमाणं वेदितव्यं भवति"॥ इति चरकश्च॥)

अशितङ्गवीनं, त्रि, (अशिता भोजिता गावो यत्र। अशितगो + ख + निपातनात् मुमागमः।) आशितङ्गवीनं। पूर्व्वगवादिचरित्रत्रेत्रादि। इत्यमरटीकासारसुन्दरी॥

अशित्रः, त्रि, (अश + इत्र।) चौरः। इत्युणादिकोषः॥ (चरः।)

अशिरं, क्ली, (अश + इर।) हीरकं। इति राजनिर्घण्टः॥ (हीरकशब्दस्य विशेषो ज्ञेयः॥)

अशिरः, पुं, (अश भोजने + इर।) अग्निः। राक्षसः। सूर्य्यः। इति मेदिनी॥

अशिरा, स्त्री, अशिरराक्षसस्त्री। इत्युणादिकोषः॥

अशिश्विका, स्त्री, (अशिश्वी + स्वार्थे कन्।) अनपत्या। कन्यापुत्रविहीना स्त्री। इति शब्दरत्नावली॥ आँटकुड़ी इति भाषा॥

अशिश्वी, स्त्री, (नास्ति शिशुर्यस्याः इति। निपातनात् ङीप्।) अशिश्विका। इत्यमरः॥

अशिक्षितं, त्रि, (न शिक्षितं। नञ्समासः।) शिक्षारहितः। अनिपुणः। अनभिज्ञः। यथा। "यत्र सारथेरकौशल्यात् यानमन्यथा गच्छति तत्र हिंसायां अशिक्षितसारथिनियोगात् स्वामी दिग्गतं दण्डं दाप्यः स्यात्"। इति कुल्लूकभट्टव्याख्यानात्। इति प्रायश्चित्ततत्त्वं॥

अशीतः, त्रि, (न शीतः। नञ्तत्पुरुषः।) शीताभावयुक्तः। यथा,—

"अशीतास्तरवो माघे फाल्गुने पशुपक्षिणौ।
चैत्रे जलचराः सर्व्वे वैशाखे नरवानरौ"॥
इति पुराणं॥

अशीतिः, त्रि, (अशदशतः परिमाणमस्य। षड्त्रिंशत्तीत्यादिना निपातनात् प्रकृतेरशीभावस्त्रिप्रत्ययश्च।) संख्याविशेषः। ८० आशी इति भाषा। यथा मनुः,—

"अशीतिभागं गृह्णीयात्
मासात् वार्द्धुषिकं शतात्।
द्विकं शतं वा गृह्णीयात्
सतां धर्म्ममनुस्मरन्"॥
इत्याह्निकाचारतत्त्वं॥ अपि च।
"अशीतिर्दस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"॥
इति प्रायश्चित्ततत्त्वं॥

अशुद्धं, त्रि, (न शुद्धम्। नञ्तत्पुरुषः।) अपवित्रं। अशौचोधनं। अशौचयुक्तं। यथा। शङ्खः,—

"ततः आद्यमशुद्धौ तु कुर्य्यादेकादशे तथा।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः"॥
इति।
"शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा देवपैत्रयोः।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुद्धति"॥
इति च शुद्धितत्त्वं॥ (वर्णाद्यशुद्धियुक्तः।)

अशुभं, क्ली, (न शुभम्। नञ्तत्पुरुषः। नास्ति-शुभं यस्येति समासे वाच्यलिङ्ग एव।) पापं। इति हेमचन्द्रः॥ अमङ्गलं।
("न च किञ्चिदुवाचैनं शुभं वा यदि वाशुभम्"। मा च वोऽस्त्वशुभं किञ्चित्सर्व्वथा पण्डुनन्दनाः"॥ इति च भारते॥) तद्युक्ते त्रि। यथा,—
"सर्व्वाशुभानां परिमोक्षकारि
सम्पूजनं देववरस्य विष्णोः"।
इति ज्योतिस्तत्त्वं॥ अपि च। मदनपारिजात-धृतं।
"अशुभं स्वप्ननं दृष्ट्वा देवब्राह्मणपूजनं।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः"॥
इति तिथ्यादितत्त्वं॥

अशून्यशयनव्रतं, क्ली, (न शून्यं शयनं यस्मात्, तत् व्रतम्।) श्रावणशुक्लद्वितीयाकर्त्तव्यव्रतविशेषः। यथा,—
"ब्रह्मोवाच।
भगवन्! पुरुषस्येह स्त्रियाश्च विरहादिकं।
शोक-व्याधि-भयं दुःखं न भवेद्येन तद्वद॥
भगवानुवाच।
श्रावणस्य द्वितीयायां शुक्लायां मधुसूदनः।
क्षीरार्णवे सलक्ष्मीकः सदा वसति केशवः॥
तस्यां संपूज्य गोविन्दं सर्व्वान् कामान् समश्नुते।
गो-भू-हिरण्य-दानादि सप्तकल्पशतानुगं॥
अशून्यशयना नाम द्वितीया या प्रकीर्त्तिता
तस्यां सम्पूजयेद्विष्णुमेभिर्मन्त्रैर्व्विधानतः॥
श्रीवत्सधारिन् श्रीकान्त श्रीधाम श्रीपतेऽव्यय।
गार्हस्थं मा प्रणाशं मे यातु धर्म्मार्थकामद॥
अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम।
पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः॥
लक्ष्मीर्न वियुज्यते देवो न कदाचित् यथा भवान्।
तथा कलत्रसम्बन्धो देव मा मे वियुज्यतु॥
लक्ष्मीर्न शून्यं वरद यथा ते शयनं सदा।
शय्या ममाप्यशून्यास्तु तथैव मधुसूदन॥
गीतवादित्रनिर्घोषं देवस्याग्रे तु कारयेत्।
घण्टा भवेदग्रतस्य सर्व्ववाद्यमयी यतः॥
एवं सम्पूज्य गोविन्दमश्रीयात्तैलवर्ज्जितं।
नक्तमाहारलवणं यावत्तस्याव्रतोद्यं॥
ततः प्रभाते संजाते लक्ष्मीपतिसमन्वितां।
दीपान्नभाजनैर्युक्तां शय्यां दद्याद्विचक्षणां॥
पादुकोपानहच्छत्रचामरासनसंयुतां।
अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृतां॥
सोपधानकविश्रामां फलैर्नानाविधैर्युतां।
तथाभरणधान्यैश्च यथाशक्त्या समन्वितां॥
अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने।
दातव्या वेदविदुषे न वकव्रतिने क्वचित्॥
तत्रोपवेश्य दाम्पत्यमलंकृत्य विधानतः।
पात्रमस्तु भाजनं दद्यात् भक्ष्यभोज्यसमन्वितं।
ब्राह्मणस्यापि सौवर्णीमुपस्करसमन्वितां।
प्रतिमां देवदेवस्य सोदकुम्भां निवेदयेत्॥
एवं यस्तु पुमान् कुर्य्यादशून्यशयनं हरेः।
वित्तशाठ्येन रहितो नारायणपरायणः॥
न तस्य पत्न्या विरहः कदाचिदपि जायते।
नारी चाविधवा ब्रह्मन् यावच्चन्द्रार्कतारकं॥
न विरूपं न शोकार्त्तं दाम्पत्यं जायते क्वचित्।
न पुत्रपशुरत्नानि क्षयं यान्ति पितामह॥
सप्तकल्पसहस्राणि सप्तकल्पशतानि च।
कुर्व्वन्नशून्यशयनं विष्णुलोके महीयते"॥
इति मत्स्यपुराणे अशून्यशयनव्रतं ६७ अध्यायः॥

अशृतं, त्रि, (न शृतम्। नञ्तत्पुरुषः।) अपक्वं। इति रत्नमाला॥
"तण्डुलात् षोड़शगुणे शृते वाप्यशृते तथा।
तोये पेयां पचेत्तावद्यावत् सिक्थकनिर्गमः"॥
इति वैद्यकपरिभाषा॥

अशेषं, त्रि, (नास्ति शेषो यस्येति।) शेषरहितं। निःशेषं॥ सर्व्वं। इत्यमरः॥
("स्थानं प्राप्यान्यशेषाणां जगतामपि पूजितम्"॥
"अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः"॥
इति च विष्णुपुराणम्॥ अशेषेण। यथा,—
"अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः"।
इति कुमारे।
"वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः"॥
इति गीतायाम्॥)

अशोकं, क्ली, पारदं। इति मेदिनी॥ शोकरहिते त्रि॥

अशोकः, पुं, (नास्ति शोको यस्मात्।) स्वनाम-ख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। शोकनाशः २ विशोकः ३ वञ्जुलद्रुमः ४ वञ्जुलः ५ मधुपुष्पः ६ अपशोकः ७ कङ्केल्लिः ८ केलिकः ९ रक्तपल्लवः १० चित्रः ११ विचित्रः १२ कर्णपूरः १३ सुभगः १४ दोहदी १५ ताम्रपल्लवः १६ रोगितरुः १७ हेमपुष्पः १८ रामा १९ वामाङ्घ्रिघातनः २० पिण्डीपुष्पः २१ नटः २२ पल्लवद्रुः २३। अस्य गुणाः शीतलत्वं। हृद्यत्वं। पित्तदाहश्रमापहत्वं। गुल्मशूलोदराध्मानाग्निमान्द्यं। कृमिकारकत्वञ्च। इति राजनिर्घण्टः॥ अस्य पर्य्यायगुणाः।
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः।
कङ्केल्लिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥
अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः।
दोषापचीढ्यादाहघ्नमिशोषविषास्रजित्"॥
इति भावप्रकाशः॥
अस्य कलिकाभक्षणविधिरशोकाष्टमीशब्दे द्रष्टव्यः॥ (योषितां नूपुरचरणप्रहारेण अशोकानां पुष्पोद्गमो भवतीति कविसमयप्रसिद्धिः। यदुक्तम्।
"पादाघातादशोकं विकसति वकुलं योषितामास्यमद्यैः"। इति साहित्यदर्पणे। अपरञ्च।
"पादाहतः प्रमदया विकसत्यशोकः
शोकं जहाति वकुलो मुखशीधुसिक्तः"।
अपरञ्च।
"नूपुरारवेण स्त्रीचरणेनाभिताड़नम्।
दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्"॥
कुमारसम्भवे ऽपि।
"असूत सद्यः कुसुमान्यशोकः"। इति॥
"कुसुमं क्षतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति"।
इति रघुवंशे।
"अशोकवल्कलक्षारं घृतं दुग्धं सुशीतलं।
यथाबलं पिबेत्प्रातस्त्रीक्षारदरनाशनं॥"
इति वैद्यकचक्रपाणिसंग्रहः।
"अशोकवल्कलप्रस्थं तोयाढ़के विपाचितं।
तेन पादावशेषेण क्षीरकेण तथैव च॥
घृतप्रस्थं पचेदेतत्क्षिप्त्वा च तथापरं।
तण्डुलाम्बुन्यशाच्चीरं प्रस्थं प्रस्थं पृथक् पृथक्॥
केशराजरसस्यापि प्रस्थमेकं भिषग्वरः।
जीवनीयैः पियालैश्च परूषकरसाक्षनैः॥
यष्ट्याह्वाशोकमूलैश्च मृद्वीका च घृतावरी।
तण्डुलीयकमूलैश्च कल्कैरेतैः पलार्द्धकैः॥
शर्करायाः पलान्यष्टौ गर्भदन्त्याश्चूर्णितं।
पुष्यायोगेन तत्पीतं निहन्यात् सर्व्वदोषजं॥
श्वेतं क्षयं तथा नीलं प्रदरं हन्ति दुस्तरं।
कुक्षिशूलं योनिशूलं पृष्ठशूलञ्च दारुणं॥
मन्दाग्निमरुचिं पाण्डुं क्षतजं श्वासकासिनां।
अशोकघृतमेतत्तु विख्यातं स्त्रीगदेषु च"॥ *॥
अशोकघृतं॥ *॥
इति वैद्यकस्नेहमालिकायां॥)

अशोकः, त्रि, (नास्ति शोको यस्येति वाच्यलिङ्गः।) शोकरहितः। यथा,
"त्वामशोक हराभीष्ट मधुमाससमुद्भव।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु"॥
इति तिथ्यादितत्त्वं॥ (स्वनामख्यातो दशरथस्य मन्त्री। उक्तं रामायणे।
"धृष्टिर्जयन्तो विजयः सिद्धार्थोऽप्यर्थसाधकः।
अशोको धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽभवत्"॥
स्वनामख्यातो नृपतिश्च, यथा भारते।
"अशोको नाम राजाभून्महावीर्य्योऽपराजितः।
तस्मादवरजो यस्तु राजन्नश्वपतिः स्मृतः"॥

अशोकरोहिणी, स्त्री, (अशोकइव रोहतीति। अशोक + रुह + णिच् + ङीप्।) कटुरोहिणी। इत्यमरः॥ कटकीति भाषा। ("अशोकरोहिणी-वैजयन्ती-सुवर्चला-पुनर्नवा-वृश्चिकाली-ज्योतिष्म-ती-प्रभृतीनि समासेन तिक्तो वर्गः"। इति सुश्रुते॥)

अशोकषष्ठी, स्त्री, (अशोका शोकादिरहिता या षष्ठी।) चैत्रस्य शुक्लषष्ठी। तस्यां षष्ठीपूजा यथा,
"चैत्रे मास्यसिते पक्षे षष्ठीं षष्ठीं समर्चयेत्।
सुखाय पुत्रलाभाय शुक्लपक्षे तथैव च"॥
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥०॥
"प्रसूत्या द्वादशे मासि सम्पूज्याम्बयहृद्ये।

मृते जाते तथा यस्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्द्री षष्ठी ज्येष्ठे चारण्यसंज्ञिता ।
आषाढे कार्दमी ज्ञेया श्रावणे लगुडनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाद्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मांसवरूपा च शीतला तपसि स्मृता ॥
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता"॥
इति स्कान्दपुराणम् ॥

अशोका, स्त्री, (न विद्यते शोको दुःखं यस्याम् ।) कटुकी । इत्यमरः । अर्हतां शासनदेवताभेदः । इति हेमचन्द्रः ॥

अशोकारिः, पुं, (अशोकस्य अरिः । कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

अशोकाष्टमी, स्त्री, (न विद्यते शोको यस्यां सा । एवम्भूता अष्टमी ।) चैत्रमासीयशुक्लाष्टमी । तत्राष्टसङ्ख्यकाशोककलिकायुक्तजलपानं कर्त्तव्यम् । यथा, अथाशोकाष्टमी स्कान्दे ।
"मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीं ।
पिबेदशोककलिकाः सायाल्लौहित्यवारिणि" ॥
अशोकाख्येत्युपादानात्तिथिमात्रेऽपि तत्पानं । फलन्तु मन्त्रलिङ्गात् शोकराहित्यमवगन्तव्यं । लौहित्यवारिणि ब्रह्मपुत्राख्यनदजले । पुनर्वसुयोगे तु फलाधिक्यं । आह लिङ्गगरुडपुराणयोः ।
"अशोककलिकाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः" ॥
पानमन्त्रस्तु ।
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
स्त्रीशूद्रकर्त्तृकपानेऽपि प्रागुक्तयुक्तेः स्वयं मन्त्रः पठनीयः । स्त्रीपक्षे ऊहोऽपि नास्ति विहितमेकादशीतत्त्वे । अशोकपानन्तु पञ्चमार्द्धप्रहरव्यापिन्यामष्म्यां भ्रातृद्वितीयोक्तवत् । इति तिथ्यादितत्त्वं ॥ * ॥ अपि च । अत्र स्रोतोजले बुधवारे पुनर्वसुनक्षत्रयुक्तशुक्लाष्टम्यां वाजपेययज्ञजन्यफलसमफलप्राप्तिकामः स्नायात् । ब्रह्मपुत्रे तु सर्व्वपापक्षयपूर्व्वकतीर्थस्नानजन्यफलप्राप्तिकामः स्नायात् । स्नानेतिकर्त्तव्यतां विधाय ।
"ॐ, ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ।
अशोकागर्भसंभूत पापं लौहित्य मे हर" ॥
इति पठित्वा स्नायात् ।
केवलशुक्लाष्टम्यां ब्रह्मपदगमनफलं । पञ्चमार्द्धप्रहरव्यापिन्यां पुनर्वसुयुक्तायां केवलायां वा शुक्लाष्टम्यां शोकरहितत्वकामः अष्टावशोककलिका अहं पिबामि इति सङ्कल्प्य,—
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
इति पठित्वा विष्णुपदजलमिश्रिता अशोककलिका अष्टौ पिबेत् । स्त्रीशूद्रानुपनीतैरपि मन्त्रः पठनीयः पौराणिकत्वात् । स्त्रीपक्षे लिङ्गोक्तो नास्ति प्रकृतेः समवेतार्थत्वात् । इति कृत्यतत्त्वं ॥

अशोचः, पुं, (न शोचः । नञ्समासः ।) शोकाभावः । तत्पर्य्यायः । अनुशूनकः । इति त्रिकाण्डशेषः ।

अशौचं, क्ली, (शुच् + कर्म्मणि ण्यत् । ततो नञ्तत्पुरुषः ।) शोकायोग्यं । अशोचनीयं । यथा,—
"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" ॥
इति श्रीभगवद्गीतायां २ अध्याये ११ श्लोकः ॥
(तथा च चाणक्ये,—
"अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता")

अशौचं, क्ली, (शुचेः पवित्रताया भावः शौचं ततो नञ्तत्पुरुषः) शुचित्वाभावः । स्मृतौ तु । वैदिककर्म्मानर्हत्वप्रयोजकीभूतसंस्कारविशेषः । यथा । वैदिककर्म्मानर्हत्वप्रयोजकसंस्कारविशेषरूपमशौचं । वैदिककर्म्मार्हत्वप्रयोजकसंस्काररूपं शौचं । न चाशौचाभाव एव शुद्धिर्नसंस्कारविशेष इति वाच्यं । अघानां यौगपद्येति न वर्द्धयेदघानि इत्येताभ्यामशौचे पापपर्य्यायाघपदप्रदर्शनात् अशौचपदस्य यथाभावरूपत्वं । तथा,—
"देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां ।
आयान्ति तस्मात्तदहः पुण्यं यच्च सर्व्वदा" ॥
इत्यादित्यपुराणीयेन शौचं पुण्यपददर्शनात् शौचस्यापि भावरूपता प्रतीयते । इति शुद्धितत्त्वं ॥ * ॥ मन्त्रदगुरुमरणे अशौचं यथा,—
"गृहीतो देवतामन्त्रः सावित्रीग्रहणं कृतं ।
यस्मात्तस्य चिरात्तन्तु ब्रह्मविद्याग्रहो यतः ॥
उपनीयाध्यापको यस्तस्मिन्नपि चिरात्तकं ।
वेदवेदाङ्गशास्त्राणां व्याख्यानं शिक्षितं यतः ॥
ज्ञानं प्रतिष्ठितं येन वेदाभ्यासो यतः कृतः ।
तस्मिन्मृते चैकरात्रं गुरौ शिष्ये तथैव च ॥"
इति मत्स्यसूक्ते महातन्त्रे ३५ पटलः ॥ अपि च ।
"गुरावुपरते चैव व्यहाणि शिष्यसन्ततौ" ।
इति विज्ञानतन्त्रं ॥ * ॥ अन्यत् पूर्व्वलिखितं । विहितकर्म्मविरोधदृष्टविशेषः । तदनेकविधं तत्र शुद्धितत्त्वोक्ताशौचानि सङ्गच्छन्ते ॥

अथ सपिण्डाद्यशौचं १ ॥

जनने मरणे च सप्तमपुरुषपर्य्यन्तं सम्पूर्णाशौचं । तच्च विप्रस्य दशाहः क्षत्रियस्य द्वादशाहः । वैश्यस्य पञ्चदशाहः । शूद्रस्य मासः॥ (यथाह मनुः ।
"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति" ॥)
जनने मरणे च दशमपुरुषपर्य्यन्तं सर्व्वेषां वर्णानां व्यहः । चतुर्दशपुरुषपर्य्यन्तं पक्षिणी ॥
जनने मरणे च जन्मनामस्मृतिपर्य्यन्तं सर्व्ववर्णानामेकाहः ॥ जन्मनामस्मृतेरभावे स्नानमात्रं ॥
अशौचं प्रति कन्यायास्त्रिपुरुषं सापिण्डं । मातामहमरणे सर्व्वेषां वर्णानां त्रिरात्रं ॥
मातृष्वस्रीय-पितृष्वस्रीय-मातुलपुत्र-भागिनेयमरणे सर्व्ववर्णानां पक्षिणी ॥
पितामहभगिनीपुत्र--पितामहीभगिनीपुत्र--पितामहीभ्रातृपुत्ररूप-पितृबान्धवत्रयमरणे सर्व्ववर्णानां पक्षिणी ॥
मातामहभगिनीपुत्र-मातामहीभगिनीपुत्र-मातामहीभ्रातृपुत्ररूप-मातृबान्धवत्रयमरणे सर्व्ववर्णानामहोरात्रं ॥
एकग्रामवासिसगोत्रजमरणे सर्व्ववर्णानामहोरात्रं ॥
औरसव्यतिरिक्तपुत्रजननमरणयोःपरपूर्व्वभार्य्याप्रसवमरणयोश्च सर्व्ववर्णानां त्रिरात्रं ॥
आचार्य्यमरणे ब्राह्मणादिवर्णत्रयाणां त्रिरात्रं ॥
समानजातीयोत्कृष्टजातीयपुरुषान्तर-संगृहीतस्वभार्य्यामरणे सर्व्वेषां त्रिरात्रं ॥ हीनवर्णोपभुक्तामरणे तु नाशौचं ॥
भगिनीपुत्रश्वश्रूर्भ्रातृपुत्रश्वश्रूः पितृष्वसुः पैतृष्वसीयगृहे मातुलपुत्रस्य जामातृश्वश्रूश्वशुरयोर्मरणे भगिनीपुत्रादिचतुर्णां त्रिरात्रं ॥
श्वश्रूश्वशुरयोः सन्निधिमरणे सर्व्ववर्णानां त्रिरात्रं ॥ श्वश्रूश्वशुरयोरेकग्रामस्थितयोर्मरणे सर्व्वेषां पक्षिणी ॥
श्वश्रूश्वशुरयोर्भिन्नग्रामस्थितयोर्मरणे सर्व्वेषामहोरात्रं ॥
भगिनी-मातुलानी-मातुल-पितृष्वस्र-मातृष्वस्र-गुर्व्वङ्गना-मातामही-मरणे सर्व्वेषां पक्षिणी ॥
आचार्य्यपत्नीपुत्रयोरुपाध्यायस्य मातृवैमात्रेयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणे सर्व्ववर्णानामहोरात्रं ॥ मातृष्वस्रपुत्र-पितृष्वस्रपुत्र-मातुलपुत्ररूपात्मबान्धवत्रयमरणे सर्व्ववर्णानां पक्षिणी ॥
(तथा च मनुः—
"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च" ।
प्रथममन्येनोढ़ा तेनैव जनितपुत्रा पुत्रसहितैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्रा तयोः पुत्रयोर्यथासम्भवं प्रसवमरणयोर्द्वितीयपुत्रपितुस्त्रिरात्रं । तत्पितृव्यानामेकरात्रं । तद्द्वितीयपितुर्म्मरणे तथाविधपुत्रयोरपि त्रिरात्रं । तथाविधपुत्रयोः परस्परप्रसवमरणयोर्म्मातृजात्युक्ताशौचं ॥
दौहित्रमरणे सर्व्वेषां वर्णानां पक्षिणी ॥
पितृमातृमरणे ऊढ़ानां कन्यानां त्रिरात्रं ॥ यदि मातुलमातृष्वस्रपितृष्वस्रप्रभृतीनां दहनवहनं करोति तदा सर्व्वेषां वर्णानां त्रिरात्रं ॥
मातामहादीनां त्रिरात्राभ्यन्तरं मरणश्रवणे तच्छ्रवणेन शुद्धिः । तत्रातीतरश्रवणे तु नाशौचं । किन्त्वाचारात् स्नानमात्रं ॥

अथ बालाद्यशौचं ॥२

नवमादिमासजातबालस्याशौचकालाभ्यन्तरे मरणे मातापित्रोरस्पृश्यत्वं युक्तं तदेव स्वजातीयजननाशौचं ॥ ज्ञातीनान्त्वशौचं नास्ति ॥
नवमादिमासमृतजातयोः कन्यापुत्रयोः पित्रादिसपिण्डानां मातुश्च जननाशौचं ॥ तच्च ब्राह्मणानां दशाहं शूद्राणां मासः ॥ पुत्रजन्मनि पितुः सचेलं स्नानं । पुत्रमुखदर्शनात्परं पुनः सचेलस्नानं ॥
(तथाच संवर्त्तः,—
"जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ।

माता सुधेद्ग्राह्मेण स्नानात्तु स्पर्शनं पितुः" ॥)
पुत्रकन्याजनने ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः।
पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात् वैदिककर्म्माधिकारः।
कन्याजनने ब्राह्मण्या मासोत्तरस्नानात् वैदिककर्म्माधिकारः॥
शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं लौकिककर्म्माधिकारः। वैदिककर्म्मणि तु मासोत्तरस्नानात् शुद्धिः॥
एतत् सर्व्वं कन्यापुत्रयोर्विद्यमानत्वे बोध्यं॥
जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे मातापित्रोरेकाहः। सपिण्डानान्तु सद्यः शौचं॥
षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे मातापित्रोस्त्र्यहः। सपिण्डानामेकाहः॥ षण्मासोपरि द्विवर्षपर्य्यन्तं बालकमरणे मातापित्रोस्त्र्यहः। सपिण्डानामक्षतचूड़े एकाहः। क्षतचूड़े त्र्यहः॥
(अत्र मनुः,—
"नृणामक्षतचूड़ानां विशुद्धिर्नैगमी स्मृता।
निर्वृत्तचूड़कानां तु चिराच्छुद्धिरियते॥
ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते॥
नास्य कार्य्योऽग्निसंस्कारो न च कार्य्योदकक्रिया।
अरण्ये काष्ठवत् त्यक्ता क्षपेयुस्त्र्यहमेव वा॥")
द्विवर्षोपरि मासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालकस्य मरणे मातापित्रादिसपिण्डानां त्र्यहः॥ तन्मध्येऽप्युपनीतस्य मरणे दशाहः। मासत्रयाधिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां दशाहः॥
शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे चिरात्रं। उत्पन्नदन्तस्य पञ्चाहः॥ षण्मासोपरि द्विवर्षाभ्यन्तरे अक्षतचूड़मरणे पञ्चाहः। तत्रापि क्षतचूड़मरणे द्वादशाहः॥ द्विवर्षोपरि षड्वर्षाभ्यन्तरे मरणे द्वादशाहः। अत्रापि दैवात् क्षतोद्वाहे मासो व्यवक्रियते॥ षड्वर्षोपरि मासः॥

अथ स्त्र्यशौचं॥२

कन्याया जन्मावधिद्विवर्षाभ्यन्तरे मरणे सर्व्ववर्णानां पित्रादिसपिण्डानां सद्यः शौचं। द्विवर्षोपरि वाग्दानपर्य्यन्तमेकाहः॥
वाग्दानोत्तरं विवाहपर्य्यन्तं कन्यामरणे भर्त्तृकुले पितृकुले च चिरात्रं
("स्त्रीणामसंस्कृतानां तु व्यूढानामुध्यन्ति बान्धवाः"। इति मनुः।)
विवाहोत्तरं मरणे भर्त्तृकुलस्यैव सम्पूर्णाशौचं॥
दन्तजन्मपर्य्यन्तं भगिनीमरणे सोदरभ्रातुः सद्यः शौचं॥
चूड़ापर्य्यन्तं भगिनीमरणे एकरात्रं। विवाहपर्य्यन्तं चिरात्रं॥
दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः भ्रयनासनादिसंसर्गशून्ययोस्त्रिरात्रं। तथाविधबन्धुवर्गाणां एकरात्रं। तथाविधसंसर्गिणान्तु सर्व्वेषां पूर्णाशौचं॥ एतत्सर्व्वं सर्व्ववर्णसाधारणं॥

अथ गर्भस्रावाशौचं॥४

षण्मासाभ्यन्तरे गर्भस्रावे सर्व्ववर्णस्त्रीणामेवाशौचं। तत्र लौकिकवैदिककर्म्मणोर्गर्भमाससमसङ्ख्यदिनव्यापकं॥ [इति मनुः।)
("रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति"॥
द्वितीयमासावधिगर्भस्रावे माससमसङ्ख्यदिनाधिकादेकदिनात्परं ब्राह्मण्या वैदिककर्म्माधिकारः॥ क्षत्रियाया गर्भमाससमसङ्ख्यदिनाधिकात् दिनद्वयात्। वैश्याया दिनत्रयात्। शूद्रायाः षड्दिनात्॥
सप्तमाष्टममासयोर्गर्भपतने मातुः सम्पूर्णाशौचं। सगुणसपिण्डानां सद्यः शौचं। निर्गुणपित्रादिसपिण्डानामहोरात्रं। यथेष्टाचरणशीलानां सपिण्डानां चिरात्रं तत्र जातस्य तद्दिनएव मरणे एवं ज्ञेयं॥ सप्तमाष्टममासजातबालस्य जन्मदितीयदिनादौ मरणे नवमादिमासजातबालकमरणवदशौचं। तत्र बालाद्यशौचे विहितं॥

अथ मृत्युविशेषाशौचं॥५

शास्त्रानुमतबुद्धिपूर्व्वकात्मघातिनो नाशौचदाहश्राद्धादि॥
शास्त्रानुमत्या अनशनादिमृतस्य प्रमादादनशनाग्नि-वह्नि-जलोच्चदेशप्रपतन-संग्राम-भृङ्गि-दंष्ट्रिनखि-व्याल-विष-चण्डाल-चौर-हतस्य च चिरात्रं॥ भृङ्ग्यादिभिः स्त्रिया च क्रोड़ां कुर्व्वतः प्रमदाप्रमादमृतस्य नाशौचादि॥ नागविप्रियकारिलेन तद्धतस्य मरणोद्देशप्रवृत्तविशुद्धतस्य चौर्य्यदोषेण राज्ञा हतस्य कलङ्कं श्रुत्वा चण्डालादीरसमानवर्णैर्हतस्य विप्रादेर्व्याधिजनकौषधस्य विषस्य वह्नेश्च वा दातुर्म्मरणे पाषण्डाश्रितस्य नित्यपरापकारिणः क्रोधात् स्वयं प्रायविषवह्न्यादिभ्रस्योद्बन्धन-जल-गिरि-वृक्षप्रपात-मृतस्य धर्म्मशास्त्रादिमयपाचनिर्म्माढविप्रादेर्म्मनुष्यवधस्यानाधिकारिणः कण्डदेशोत्पन्नभगरोगस्य ऊर्ध्वमाग्रक्तनपुंसकस्य ब्राह्मणविषयापराधकरणाग्निहतस्य बुद्धिपूर्व्वकब्राह्मणहतस्य च महापातकिनो गलत्कुष्ठिनश्च एवंविधपतितानां मरणे च न दाहाशौचादिकं कार्य्यं। तत्कृत्वा तन्नक्षत्रेष्टयं कुर्य्यात्॥
(अत्र मनुः,—
"दृषयश्वरजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया॥
पाषण्डाश्रितानाञ्च चरन्तीनाञ्च कामतः।
गर्भभर्त्तृहनाञ्चैव सुरापीनाञ्च योषितां"॥
इति।) स्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थहतविप्रादेर्दाहाशौचादिकमस्त्येव॥
क्षतप्रायश्चित्तगलत्कुष्ठिनो दाहाशौचादिकं कार्य्यं॥ भ्रस्लेणाभिमुखहतस्य तु सद्यःशौचं दाहादि च॥ गवार्थे ब्राह्मणार्थे वा दस्युना युद्धे हतस्याहोरात्रमशौचं॥
नृपतिरहितयुद्धे लगुड़ादिहतस्य पराङ्मुखहतस्य च चिरात्राशौचं॥
गोविप्रप्रालनेऽभिमुखयुद्धहतस्य सद्यः शौचं पराङ्मुखहतस्य तु चिरात्रं॥

लौकिकपारिभाषिकोभयशस्त्रघातेतरक्षतमरणे सर्व्ववर्णानां सप्ताहमध्येत्र्यहं सप्ताद्दूर्द्धं सम्पूर्णाशौचं॥
लौकिकपारिभाषिकशस्त्रघातमरणे त्र्यहमध्ये त्र्यहं त्र्यहाद्दूर्द्धं प्रक्षतशौचं॥
लौकिकशस्त्रघातः खड्गशरादिघातः॥ पारिभाषिकशस्त्रघातस्तु।
"पश्चिमत्यमरुद्गैर्ये तु दंष्ट्रिभ्रदङ्गिनखैर्हताः।
पतनानशनप्रायैर्व्वह्न्यम्बिविषबन्धनैः॥
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः"॥
इति देवीपुराणोक्तः॥

अथ विदेशस्थाशौचं॥६

अशौचकालाभ्यन्तरे विदेशस्थजननमरणाशौचश्रवणे श्रोत्राहोभिः शुद्धिः॥
("विगतं तु विदेशस्थं शृणुयात् यो ह्यनिर्दशं।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्"॥
इति मनुः।)
अशौचकालोत्तरं विदेशस्थज्ञातिजननश्रवणेऽशौचं नास्त्येव। पुत्रजननश्रवणे तु सचैलस्नानात् शुद्धिः॥ (अत्र मनुराह।
"निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः"॥)
सम्पूर्णाशौचिमरणे वर्षाभ्यन्तरश्रवणे सपिण्डानां चिरात्रेण शुद्धिः। सचैलस्नानादकास्पृश्यत्वनिवृत्तिः। वर्षोत्तरश्रवणे तु सपिण्डानां स्नानेन शुद्धिः॥ (अत्र मनुः।
"अतिक्रान्ते दशाहे च चिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु स्पृष्ट्वापो विशुध्यति"॥)
मातृ-पितृ-भर्तृ-मरणे वर्षोत्तरश्रवणे पुत्रपत्न्योरेकाहेन शुद्धिः॥ द्विवर्षोत्तरश्रवणे स्नानमात्रं॥
पूर्णाशौचातिक्रमएव विदेशस्थमरणाशौचश्रवणे त्र्यहाशौचं। न खण्डाशौचातिक्रमे॥ यत्र मरणमात्रं श्रुतं विस्मृत्य मासादिकमज्ञातं तत्र श्रवणदिनावधिस्वजात्युक्तमशौचं। खण्डाशौचेऽपि महागुरुनिपाते एकरात्रं॥

अथाशौचसङ्करः॥७

जननाशौचमध्ये जननाशौचान्तरपाते मरणाशौचमध्ये मरणाशौचान्तरपाते च पूर्व्वाशौचकालेन सर्व्ववर्णानां शुद्धिः॥ (यथाह मनुः—
"अन्तर्दशाहे स्यातान्येत् पुनर्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशं"॥)
पूर्णजननाशौचान्तर्दिने पूर्णजननाशौचान्तरपाते पूर्णमरणाशौचान्तर्दिने पूर्णमरणाशौचान्तरपाते च पूर्व्वाशौचान्तिमदिनोत्तरदिनत्रयेण शुद्धिः॥
पूर्णजननाशौचान्तिमदिवसीयोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्पाते सूर्य्योदयावधिदिनत्रयेण शुद्धिः॥
एवं मरणाशौचेऽपि॥
पूर्व्वाक्तवर्द्धितदिनद्वयत्रयाभ्यन्तरेऽशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः॥
अशौचचित्तयान्तर्दिनकृत्यं क्षौरादिकमेकदेव तद्द्वितीयदिनकृत्यं श्राद्धादिकं तत्परदिने॥

अत्र च अशौचान्तिमदिनतत्प्रभातयोः स्वपुत्रजनने पिण्डमाढभर्तृमरणे च न दिनद्वयत्रयवृद्धिः। किन्तु स्वपुत्रजननावधि पिण्डमाढभर्तृमरणावधि च पूर्णाशौचं ॥ ज्ञातिजननाशौचपूर्व्वार्द्धे स्वपुत्रजनने ज्ञातिजननाशौचकालेन शुद्धिः॥ परार्द्धे चेत् स्वपुत्रजननाशौचकालेन शुद्धिः ॥

ज्ञातिमरणाशौचकालमध्ये पिण्डमाढभर्तृमरणे पूर्व्वार्द्धे पूर्व्वाशौचकालेन परार्द्धे पराशौचकालेन शुद्धिः ॥

स्वपुत्रजननाशौचान्तिमदिनतत्प्रभातयोर्ज्ञातिजनने पिण्डमाढभर्तृमरणाशौचान्तिमदिनतत्प्रभातयोर्ज्ञातिमरणेऽपि न दिनद्वयत्रयवृद्धिः। किन्तु पूर्व्वाशौचकालेन शुद्धिः॥

स्वपुत्रजननाशौचान्तिमदिनतत्प्रभातयोः स्वपुत्रान्तरजनने एवं माढमरणाशौचान्तिमदिनतत्प्रभातयोः पिण्डमरणे पिण्डमरणाशौचान्तिमदिनतत्प्रभातयोर्म्माढमरणे च क्रमेण दिनद्वयत्रयवृद्धिः॥ जननाशौचद्वयसन्निपाते पूर्व्वजातो यदाशौचकालाभ्यन्तरे मृतस्तदा सपिण्डानां सद्यःशौचेन पूर्व्वाशौचनाशः ॥ तन्नाशादेव पर्य्यार्द्धजातबालस्य माढपिढव्यतिरिक्तसपिण्डानां पूर्व्वार्द्धजातबालस्य मातापित्रादिसकलसपिण्डानां परजननाशौचस्य निवृत्तिः ॥ पूर्व्वजातबालस्य मातापित्रोरस्पृश्यत्वयुक्तस्वस्वज्ञात्युक्तजननाशौचं ॥ जननाशौचद्वयसन्निपाते प्रथमजननाशौचपूर्व्वार्द्धजातबालमरणे तन्मातापित्रोः पूर्व्वाशौचकालपर्य्यन्तं अस्पृश्यत्वयुक्तमशौचं ॥ परार्द्धजातबालमरणे तु तज्जननावधि तन्मातापित्रोरस्पृश्यत्वयुक्तस्वज्ञात्युक्तजननाशौचं। विंशेषातिरिक्तसमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन शुद्धिः। असमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते तु दीर्घाशौचकालेन शुद्धिः॥ सूतेतरायाः पुत्रजननप्रयुक्तविंशतिरात्राशौचाभ्यन्तरे पत्युर्म्मरणेऽपि पुत्रजननाशौचकालेन शुद्धिः॥

पूर्व्वोक्तसपिण्डहयजननवर्द्धिताशौचमध्ये पिण्डमाढभर्तृमरणेऽपि वर्द्धितसपिण्डहयजननाशौचकालेन शुद्धिः। एकाहे पूर्णाशौचिसपिण्डहयमरणे यावदशौचं तावत् सर्व्वसपिण्डानामस्पृश्यत्वं ॥ सकुल्यपर्य्यायसमानोदकमरणे विद्युदादिमरणेऽपि अशौचं त्रिरात्रं। अस्पृश्यत्वमेकरात्रं। तेनैतत् त्रिरात्रहयं गुरु॥ विदेशस्थमरणे अर्थात् अशौचमध्ये अश्रुतसपिण्डमरणे त्रिरात्राशौचं अस्पृश्यत्वस्नानापनेयं। अतस्तल्लघु। एषां सन्निपाते गुरुणैव शुद्धिः ॥

विदेशश्रुतज्ञातित्रिरात्राशौचस्य लघुनः विदेशश्रुतपिण्डमाढभर्तृत्रिरात्राशौचेन शुद्धिः ॥ तुल्यत्रिरात्राशौचसन्निपाते पूर्व्वेणैव शुद्धिः ॥ कन्यापुत्रयमजोत्पत्तौ सर्व्ववर्णाया मातुर्म्मासेन शुद्धिः पित्रादिसपिण्डानां स्वज्ञात्युक्ताशौचं ॥ तयोरशौचमध्ये एकतरमरणे सूद्राभिन्नमातुः कन्यामरणात् सद्यः शुद्धिः। न तु पुत्रमरणात् ॥ पित्रादिसपिण्डानान्तु प्रथमजातमरणात् शुद्धिः। न तु परजातमरणात् ॥ सूद्रायां यमजोत्पत्तौ प्रथमजातमरणाशौचेन शुद्धिः। न तु परजातमरणात् ॥ पित्रादिसपिण्डानान्तु प्रथमजातमरणात् शुद्धिः न तु परजातमरणात् ॥ एवमन्यद्भाव्यं सुधीभिः ॥

अथ श्वानुगमनाद्यशौचं ॥ ८

ब्राह्मणश्वानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शृतप्राश्नैः शुद्धिः ॥

क्षत्रियश्वानुगमने ब्राह्मणस्य एकाहेन शुद्धिः ॥ वैश्यश्वानुगमने ब्राह्मणस्य द्व्हेन शुद्धिः ॥ सूद्रश्वानुगमने ब्राह्मणस्य प्राणायामशतेन दिनत्रयेण च शुद्धिः ॥

प्रमादात् सूद्रश्वानुगमने ब्राह्मणस्य जलावगाहनाग्निस्पर्शृतप्राश्नैः शुद्धिः ॥

अनाथब्राह्मणस्य धर्म्मबुद्धा दहनवहनयोः स्नानघृतप्राश्नाभ्यां सद्यः शौचं ॥

लोभेन सजातीयदाहे स्वसजात्युक्ताशौचं ॥ असजातीयश्वदहनवहनस्पर्शैः श्वजात्युक्ताशौचं॥ स्नेहादसम्बन्धिदाहकविप्रादेस्त्र्हवासे त्रिरात्रं। अशौचिकुलान्नभोजने तत्तुल्याशौचं ॥ अशौचान्नभोजनं विना तद्भूहवासेऽहोरात्रं ॥ विंशेषवचनाभावे सम्बन्धिनो मातुलादेरस्नेहेनापि दाहे त्रिरात्रं ॥

चिताधूमसेवने स्नानात् शुद्धिः ॥ (यथाह मनुः। "असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥ यदन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अनदन्नन्नमक्नैव स चेत् तस्मिन् गृहे वसेत् ॥ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति" ॥)

सूद्रे मृतेऽस्थिसञ्चयनकालाभ्यन्तरे तदुत्थहं गत्वाऽनिपातेन विप्रस्य त्रिरात्रं ॥ स्नानान्तरेऽश्रुपातनेऽहोरात्रं ॥

सूद्रे मृतेऽस्थिसञ्चयनकालादूर्द्धं मासाभ्यन्तरे तदुत्थहेऽश्रुपातने विप्रस्याहोरात्रं सचेलस्नानञ्च ॥ अस्थिसञ्चयनात् पूर्व्वं विप्रोत्थहे रोदने विप्रस्य एकाहेन शुद्धिः ॥

क्षत्रवैश्ययोर्म्मृहे रोदने विप्रस्य द्व्हेन शुद्धिः॥ सूद्रस्तु सर्व्वत्र रोदने नक्तेन शुद्धः ॥

मृतसूद्रस्य बान्धवैः सह रोदनरहितविलापमात्रे ब्राह्मणस्याहोरात्रं ॥

अस्थिसञ्चयनकालस्तु पूर्णाशौचे ब्राह्मणस्य चतुर्थाहः। क्षत्रियस्य षष्ठाहः। वैश्यस्य अष्टमाहः। सूद्रस्य दशमाहः ॥ व्यहाशौचे सर्व्वेषां द्वितीयाहः ॥

पूर्णाशौचिमरणे ब्राह्मणस्य चतुर्थाहेऽस्पृश्यतानिवृत्तिः ॥ क्षत्रियस्य षष्ठदिने। वैश्यस्य अष्टमदिने। सूद्रस्य दशमदिनेऽस्पृश्यतानिवृत्तिः ॥ सर्व्वस्य खण्डाशौचे त्रिभागकालेनास्पृश्यतानिवृत्तिः।

अतीतेऽशौचे सचेलस्नानेनास्पृश्यतानिवृत्तिः ॥ जननाशौचे सपिण्डानां अस्पृश्यता नास्ति ॥ पुत्रोत्पत्तौ स्नानात् पूर्व्वं पितुर्विमाढृणाश्चास्पृश्यत्वं ॥

सूतिकास्पर्शे पितुर्विमाढृणाश्च सूतिकातुल्यकालास्पृश्यत्वं। अन्येषां स्नानमात्रं ॥

कन्यापुत्रयोर्ज्जनने मातुर्दशरात्रमस्पृश्यत्वं ॥

कन्यापुत्रयोर्जनने सूद्रायास्त्रयोदशरात्रमस्पृश्यत्वं॥

अथ क्षतशौचं ॥ ९

नाभेरूर्द्धमधोवा रुधिरस्रवे सन्ध्यावन्दनाद्यतिरिक्तकर्म्मण्येकाहः ॥

दन्तरक्तस्रवे सर्व्वत्र कर्म्मण्येकाहः ॥

अथ रजस्वलाशौचं ॥ १०

तत्र प्रथमदिनावधि चिरात्रमशौचं॥ त्रिरात्रात् परं सप्तदशाहपर्य्यन्तं रजोदर्शनेऽशौचाभावः ॥ अष्टादशाहे रजोदर्शने एकाहमशौचं ॥ ऊनविंशदिने रजोदर्शने द्व्हाशौचं ॥ ऊनविंशतिदिनात् परं रजोदर्शने त्रिरात्राशौचं॥ रजस्वला चतुर्थेऽह्नि भर्तृसेवनादिलौकिककर्म्मणि शुद्धा। पञ्चमेऽहनि दैवपैत्रकर्म्मणोः शुद्धा ॥ ("शुद्धामर्त्तुश्चतुर्थेऽह्नि असृद्धा दैवपैत्रयोः। दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति" ॥ इति शुद्धितत्त्वे।)

रजस्वलाया अशौचमध्ये सूतिकास्पर्शे अन्यजजातिस्पर्शे च त्रिरात्रोपवासेन शुद्धिः॥ उपवासस्तु अशौचात् परं करणीयः ॥

भर्तृपूरकपिण्डदानकाले यदि रजस्वला भवति तदा वस्त्रं त्यक्त्वा पुनः स्नात्वा पूरकं दद्यात् किन्तु शुद्धुत्तराशौचदिनासत्त्वेऽयं विधिः। तत्सत्त्वे तु शुद्धया भूत्वा देयं॥

आब्दिकश्राद्धकालेऽपुत्रभार्य्या यदि रजस्वला भवति तदा पञ्चमेऽहनि तच्छ्राद्धं कुर्य्यात् ॥*॥ (अभिषिक्तक्षत्रियाणां चान्द्रायणादिव्रतकारिणां गवामयनादियागप्रवृत्तानाञ्च सपिण्डमरणादावशौचाभावश्च। उक्तञ्च मनुना।

"न राज्ञामधदोषोऽस्ति व्रतिनां न च सत्रिणाम्। ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा" ॥

विष्णुणाप्युक्तम्। "अशौचं न राज्ञां राजकर्म्मणि, न व्रतिनां व्रते, न सत्रिणां सत्रे"। इति ॥)

इत्यशौचव्यवस्था समाप्ता ॥

अश्मः, पुं, पर्व्वतः। मेघः। वैदिकशब्दोऽयं ॥

अश्मकदली, स्त्री, (अश्मा इव कदलीफलं यस्याः।) कदलीविशेषः। इति राजनिर्घण्टः ॥ अस्याः गुणपर्य्यायौ काष्ठकदलीशब्दे द्रष्टव्यौ ॥

अश्मकेतुः, स्त्री, (अश्मेव केतुरस्याः।) क्षुद्रपाषाणभेदावृक्षः ॥ इति राजनिर्घण्टः ॥

अश्मगर्भः, पुं, (अश्मेव गर्भो यस्य।) हरिन्मणिः। मरकतं। इत्यमरः ॥

अश्मगर्भज, क्ली, (अश्मनो गर्भाज्जायते इति। अश्मगर्भ + जन् + ड।) मरकतं। इति राजनिर्घण्टः ॥ पान्ना इति भाषा ॥ (पुं, पाषाणजो वह्निः।)

अश्मघ्न, पुं, (अश्मानं पाषाणं हन्ति भिनत्तीति। अश्म

+ हन् + टक्।) पाषाणभेदनवृक्षः। इति राजनिर्घण्टः॥ हाथाजुड़ी इति भाषा॥ अश्मभेदशब्देऽस्य पर्य्यायगुणौ ज्ञातव्यौ॥

अश्मजं, क्ली, (अश्मनः प्रस्तराज्जायते इति। अश्मन् + जन + ड।) शिलाजतु। इत्यमरः॥ लौहं इति राजनिर्घण्टः॥

("अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्। तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥" इति मनुः॥ शिलाजत्वर्थे वैद्यकचक्रपाणिसंग्रहस्याश्मरीरोगचिकित्सायां वक्ष्यते यथा॥ 'अश्मजं चाश्मजं देयं'॥)

अश्मजतुकं, क्ली, (अश्मजतु + स्वार्थे कन्।) शिलाजतु। इति राजनिर्घण्टः॥ (शिलाजतुशब्देऽस्य विशेषविवरणं ज्ञेयं॥)

अश्मदारणः, पुं, (अश्मानं दारयतीति। अश्म + दृ + णिच् + ल्युट्।) टङ्कः। पाषाणविदारणास्त्रं। इति जटाधरः॥ टाँकी इति पश्चिमदेशे ख्यातः॥

अश्मन्तं, क्ली, (अश्मनः प्रस्तरस्यापि अन्तो भवत्यत्र। प्रकन्ध्वादित्वं।) चुल्ली। अश्मभं। मरणं। अनवधिः। क्षेत्रं। इति मेदिनी॥ (पुं, धर्म्मात् मरुत्वत्यां जातः खनामख्यातो मरुद्भेदः। तथा च हरिवंशे।

"मरुत्वती मरुत्वन्तो देवानजनयत्सुतान्।"

"अश्मन्तं चित्ररश्मिञ्च तथा निष्कुषितं नृपं॥")

अश्मन्तकं, क्ली, (अश्मन्त + स्वार्थे कन्।) चुल्ली। मक्षिकाच्छादनं। दीपाधाराच्छादनं। इति मेदिनी॥ सेज आँधारिया इत्यादि भाषा।

अश्मन्तकः, पुं, (अश्मन्त + कन्।) वृक्षविशेषः। अस्नकुचाइ इतिभाषा। तत्पर्य्यायः। अस्नोटकः २। इति रत्नमाला॥ वृक्षविशेषः। आवुटा इति पश्चिमदेशे ख्यातः। तत्पर्य्यायः। इन्दुकः २ कुराली ३ अश्मपचः ४ श्मशात्वक् ५ नीलपत्रः ६ यमलपत्रकः ७। अस्य गुणाः। मधुरत्वं। कषायत्वं। सुशीतलत्वं। पित्तप्रमेहविदाहव्रण्यादिघमज्वरविषार्त्तिच्छर्द्दिभूतनाशित्वञ्च॥ इति राजनिर्घण्टः॥

अश्मपुष्पं, क्ली, (अश्मनः पुष्पमिव।) शैलेयं। शैलजनामगन्धद्रव्यं। इत्यमरः॥

अश्मभालं, क्ली, (अश्मेव भालयति चूर्णितं करोति। भल चूर्णने। भल + णिच् + अच्।) एषोदरादित्वात् जस्य लत्वम्।) द्रव्यचूर्णार्थलौहादिपात्रं। तत्पर्य्यायः। लौहभाण्डं २। इति शब्दचन्द्रिका॥ हामानदिस्ता इति भाषा॥

अश्मभित्, [द्,] पुं, (अश्मानं भिनत्तीति। अश्म + भिद् + क्विप्।) पाषाणभेदी वृक्षः। इति रत्नमाला॥ प्रस्तरभेदके त्रि॥

अश्मभेदः, पुं, (अश्मनो भेदो भवत्यस्मात्।) पाषाणभेदी वृक्षः। इति रत्नमाला॥ (अस्य गुणाः।

"अश्मभेदो हिमस्निग्धः कषायो वस्तिशोधनः। भेदनो हन्ति दोषार्शोगुल्मक्षाश्महृद्व्रजः॥ योनिरोगान् प्रमेहांश्च श्लीहशूलव्रणानि च"।

इति भावप्रकाशः॥

"एरण्डो विजपूरश्च गोक्षुरं वृहतीद्वयं। अश्मभेदस्तथाविल्व एतन्मूलः कृतः पृथक्॥ एरण्डतैलहिङ्वाढ्यो यवक्षारः ससैन्धवः। स्तनकण्ठकटीमेढ्रहृदयोत्थव्यथां जयेत्"॥

इति शार्ङ्गधरः॥)

अश्मयोनिः, पुं, (अश्मा योनिरुत्पत्तिस्थानं यस्य।) मरकतमणिः। इत्यमरटीकायां भरतः॥

अश्मरः, त्रि, (अश्मनोऽयमिति। अश्म + रः।) प्रस्तरसम्बन्धीयः। इति पाणिनिः॥ पातुरिया इति भाषा।

अश्मरी, स्त्री, (अश्मानं राति ददाति या। अश्मन् + रा + क + गौरादित्वात् ङीप्। मूत्रकृच्छ्ररोगे हि मूत्रदारे प्रस्तरमिव कठिनमांसं रचयति।) मूत्रकृच्छ्ररोगः। पातरी इति भाषा। यथा। अथाश्मर्य्यधिकारः। अत्राश्मर्य्याः सन्निदानरूपनिदानं सङ्ख्याह।

"वातपित्तकफैस्तिसृणां चतुर्थी शुक्रजा मता। प्रायः श्लेष्माश्रयाः सर्व्वा अश्मर्य्यः सुर्यमोपमाः"॥

श्लेष्माश्रयाः श्लेष्मसमवायिकारणाः। शुक्रजां विना। शुक्रजायास्तु शुक्रस्यैव समवायिकारणत्वात्। अन्ये तु शुक्राश्मर्य्यामपि कफकारणत्वमिच्छन्ति। प्रायःशब्दश्चात्र विशेषार्थः। यमोपमास्त्रिकित्सां विना॥ * ॥ सम्प्राप्तिमाह।

"विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा। यदा तदाश्मर्य्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः॥

पवनो वस्तिगतं सशुक्रं मूत्रं सपित्तं कफं वा शोषमुपनयेत् यदा तदा अश्मरी क्रमेण क्रमशो वर्द्धमाना। यथा गोः पित्तेषु रोचनेवेत्यनयः॥ *॥ पूर्व्वरूपमाह।

"नैकदोषाश्रयाः सर्व्वा अथासां पूर्व्वरूपाणि। वस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्॥ मूत्रे वस्तिसगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः"।

वस्तिः क्षुगलकः॥ * ॥ सामान्यलक्षणमाह।

"सामान्यलिङ्गं रुङ्नाभिसेवनीवस्तिमूर्द्धसु। विशीर्णधारं मूत्रं स्यात् तया मार्गनिरोधने॥ तद्यपायात् सुखं मेहेदच्छं गोमेदकोपमं। तत्संक्षोभात् क्षते साश्मयासाघातिरुग्भवेत्"॥

वस्तिमूर्द्धा नाभेरधोदेशः। विशीर्णधारं सविच्छेदधारं। तया अश्मर्य्या। मार्गः मूत्रवाहि स्रोतः। तद्यपायात् कदाचिदायुना अश्मर्य्या मूत्रमार्गादन्यत्र गमनात्। सुखं मेहेत् मूत्रयेत्। गोमेदकोपमं गोमेदको मणिः किञ्चिल्लोहितस्तदर्णं। तत्संक्षोभात् तस्या अश्मर्य्याः सञ्चारात्। घर्षणेन मूत्रवहे स्रोतसि क्षते जाते साश्मं सरक्तं मेहेत्। आयासात् प्रवाहणादिजनितात्॥ * ॥ वातोल्बणमाह।

"तत्र वाताद्भृशं त्वर्त्तो दन्तान् खादति वेपते। मुहुराति मेहनं नाभिं पीड़यत्यपि सङ्क्षयन्॥ सानिलं मुञ्चति शकृन्मुञ्चर्म्मेहति विन्दुशः। श्यावारुणाश्मरी चास्य स्याच्चिता कण्टकैरिव"॥

सङ्क्षयन् आर्त्तनादं कुर्व्वन् नाभिदेशं पीड़यति। शकृत् पुरीषं सानिलं मुञ्चति। मुहुर्व्वारंवारं। विन्दुशः विन्दुं विन्दुं मेहति मूत्रयेत्। श्यावेत्यादि श्यावा किञ्चित् श्यामा। अरुणा किञ्चिद्रक्ता। एवं चाश्मर्य्या वर्णाकारकथनं आह्वथाणां प्रत्यक्षसंवादिशास्त्रप्रामाण्यख्यापनार्थमाह्वः। चिताकण्टकैरिव वदरीबीजवत् क्षुद्राङ्कुरैर्वेष्टिता॥ * ॥ पित्तोल्बणमाह।

"पित्तेन दह्यते वस्तिः पच्यमान इवाग्निवान्। भल्लातकास्थिसंस्थाना रक्ता पीता सिताश्मरी"॥

दह्यते सान्तादग्निनेव। वस्तिरिति मूत्रकोषः। पच्यमानइव क्षारेणेव। उग्रवान् उग्रास्रवः॥ * ॥ कफोल्बणामाह।

"वस्तिर्निस्तुद्यतइव श्लेष्मणा श्लीतलो गुरुः। अश्मरी महती श्लक्ष्णा मधुवर्णाथवा सिता"॥

महती कुक्कुटाण्डतुल्या। मधुवर्णा ईषत्पिङ्गलशुक्ला॥

"एता भवन्ति बालानां तेषामेव हि भूयसा। आश्रयोपचयाश्लत्वात् ग्रहणाहरणे सुखाः"॥

एताः दोषजयजनिताः बालानां स्युः॥ यतः सर्व्वा एवाश्मर्य्यो विशेषतः श्लेष्मसमवायिकारणाः। बालास्तु विशेषतस्तन्निदानसेविनो भवन्ति। उक्तञ्च सुश्रुतेन। प्रायेणैता अश्मर्य्यो दिवास्वप्नसमशनाध्यशनविरुद्धशीतगुरुमधुराहारप्रियत्वात् विशेषेण बालानां भवन्तीति। भूयः पदोपादानात् महतामपि त्रिदोषजनिता भवन्ति। तेषामेव बालानामेव। ग्रहणाहरणे सुखाः ग्रहणं निष्कासनार्थमङ्गुलिभ्यां। आहरणं याचनादिपूर्व्वकं निष्कासनं तत्र सुखाः सुखदाः। तत्र हेतुमाह। आश्रयोपचयाश्लत्वादिति आश्रयो वस्तिः तस्योपचयः स्थौल्यं तस्याश्लत्वात्॥ * ॥ शुक्राश्मरीमाह।

"शुक्राश्मरी तु महतां जायते शुक्रधारणात्"।

अथयानामनेकार्थत्वात् तु शब्दोऽत्रावधारणार्थः। तेन महतामेव न तु बालानां। तेषां वक्ष्यमाणसम्प्राप्तेरसम्भवात्। न तु शुक्राभावो वाच्यः। शुक्रधारणात् वेगात् अवमानस्य शुक्रस्य धारणात्॥ * ॥ शुक्राश्मर्य्याः सम्प्राप्तिमाह।

"स्थानाच्युतमसृक्तं हि मूढ्नयोरन्तरेऽनिलः। शोषयत्युपसंहत्य शुक्रं तच्छुक्रमश्मरी"॥

अनिलः मैथुनवेगेन स्थानाच्युतं। असृक्तं मैथुनवेगधारणेन धृतं शुक्रं। मूढ्नयोः मेढ्रसहितयोः। मेढ्रवृषणयोरन्तर इति सुश्रुतवचनात्। तेन मेढ्रवृषणमध्यगतवस्तिमुखे उपसंहत्य एकीकृत्य शोषयति। तच्छुक्राश्मरी तथाभूतं शुक्रमेवाश्मरी॥ * ॥ अस्या लक्षणमाह।

"वस्तिरुच्छूनवृक्कत्वमुष्कश्वयथुकारिणी। तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते॥ पीड़िते त्वबकाशेऽस्मिन्नश्मर्य्येव च शर्करा"।

तस्यां शुक्राश्मर्य्यां। उत्पन्नमात्रायां यदा सा कथमपि विलीयते विलयं याति तदा शुक्रं याति मूत्रमार्गात् प्रवर्त्तते। पीड़िते त्वबकाशेऽस्मिन् तुशब्दोऽवधारणे। तेन अस्मिन्नेव अवकाशे स्थाने मेढ्रवृषणयोरन्तरे पीड़िते सति सा

विलीयते अन्तर्लीना भवति। अवस्थाभेदादश्मरी शर्करा सिकता भवतीत्याह। अश्मर्य्येव च शर्करा चकरात् सिकता च भवति। शर्करासिकतयोश्च भेदो महत्वाल्पत्वाभ्यां बोद्धव्यः। कथं अश्मरी शर्करा भवतीत्याह। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते। सा अश्मरी ॥*॥ शर्करायाः पातमवरोधञ्च सहेतुकमाह।

"अश्मरी वायुना भिन्ना सा तस्मिन्ननुलोमगे।
निरेति सहमूत्रेण प्रतिलोमे विबध्यते।
मूत्रस्रोतःप्रदत्ता सा सङ्गा कुर्य्यादुपद्रवान्"॥

सा अश्मरी। तस्मिन् वायौ। अनुलोमगे मूत्रस्रोतःसु सम्यक्प्रदत्ते मूत्रेण सह सा शर्करा निरेति पतति। प्रतिलोमगे ऊर्द्धप्रदत्ते वायौ विबध्यते। तदा मूत्रस्रोतः श्रिता सङ्गा लग्ना स्यात्तदा उपद्रवान् कुर्य्यात्। तानेवोपद्रवानाह।

"दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिं।
पाण्डुत्वमुग्रवातञ्च दृष्ट्वा हृत्पीड़नं वमिं"॥

दौर्ब्बल्यमिन्द्रियाणां। सदनं अवसन्नत्वं। कार्श्यमङ्गानां। उदरैकदेशे शूलं। उग्रवातं मूत्राघातविशेषं ॥*॥ अश्मरी शर्करा सिकतानामरिष्टमाह।

"प्रसूनगन्धिरुधिरं वङ्क्षमूत्रं रजान्वितं।
अश्मरी क्षपयत्याशु शर्करा सिकतान्विता"॥

शर्करा सिकतेति च नामद्वयमन्वर्थं ॥*॥
अथाश्मर्य्याश्चिकित्सा।

"शुण्ठ्यग्निमन्थपाषाणभिन्दुवरुणगोक्षुरैः।
अभयारग्वधपलैः क्वाथं कृत्वा विचक्षणः॥
क्षारमुत्क्षारजवणचूर्णं क्षिप्त्वा पिबेन्नरः।
अश्मरी मूत्रकृच्छ्रञ्च नाशमायाति निश्चितं॥
क्वाथः शुण्ठ्यादिनामायं दीपनः पाचनः परः।
हन्ति कोष्ठाश्रितं वातं कण्ठरुग्गदमेढ्रजं"॥

रुक्कुष्ठं।
शुण्ठ्यादिक्वाथः ॥*॥

"एलोपकुल्यामधकाश्मभेद-
कौन्तीश्वदंष्ट्रायवकोरुवूकैः।
श्रितं पिबेदश्मजतुप्रगाढ़ं
सशर्करं मूत्रगदेऽश्मरीषु"॥

उरुवूक एरण्डस्याच्च मूलं। मूत्रगदे मूत्रकृच्छ्रे।
एलादिक्वाथः ॥*॥

"कुम्भाण्डकरसं हिङ्गुयवक्षारयुतं पिबेत्।
वस्तौ मेढ्रे मूलयुक्ते अश्मरीशर्कराञ्जयेत्"॥*॥
"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः।
कषायक्षारसंयुक्तः शर्करां पातयत्यधः"॥
क्षारो यवक्षारः ॥*॥
"त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतं।
अवीक्षीरेण सप्ताहादश्मरीनाशनं पिबेत्"॥
अवीर्मेषी ॥*॥
"वरुणत्वक्कषायस्तु पीतो गुड़समन्वितः।
अश्मरीं पातयत्याशु वस्तिशूलञ्च नाशयेत्"॥*॥
'क्वाथो वरुणमूलस्य तस्य कल्केन संयुतः।
शिग्रुमूलस्य च क्वाथः कटूष्णाश्मरीं हरेत्"॥*॥
"शृङ्गवेरयवक्षारपथ्याकालीयकान्वितः।
दधिमण्डो भिनत्त्यश्मशरीमाशु पानतः"॥
शृङ्गवेरं नागरं ॥*॥
"नो जग्धं क्षुमिभिर्घृतं सुतरुणं स्निग्धं शुचिस्थानजं
घस्रे पुण्यनिरीक्षिते वरुणकं क्वित्वा तुलां याहयेत्।
संग्रह्याशु चतुर्गुणाम्भवपि पचेत् पादावशेषं जलं
तत्तुल्येन गुड़ेन वै दृढ़तरे भाण्डे पचेत्तत् पुनः॥
ज्ञात्वैवं घनतां गुड़े परिगते प्रत्येकमेषां पलं
शुण्ठ्यैर्व्वारुककवीजगोक्षुरकयोः पाषाणभिच्छीतलात्।
कुष्माण्डत्रपुषात्तबीजकुनटीवाल्लूकशोभाञ्जनं
दार्व्वीलाङ्गिरिजाभयाक्षमिक्षुतां चूर्णीकृतान्याक्षिपेत्॥
पथ्याक्षी प्रतिवासरं गुड़ममुं योऽश्नप्रमाणं नरः
खादेत्तस्य समस्तदोषजनिताश्मर्य्यः पतन्ति द्रुतं"।
एर्व्वारुककवीजं कर्कटीबीजं। पाषाणभित् हाथाक्षोड़ीति लोके। शीतला नीलदूर्व्वा। तथाच।
"नीलदूर्व्वा स्मृता शस्यं शाद्वलं हरितं तथा।
शतपर्व्वा शीतकूर्च्चा शीतला वामनी तथा"॥
इति निघण्टौ धन्वन्तरिः॥ कुनटी धान्यकं। गिरिजं शिलाजतु। क्षमिक्षुत् विड़ङ्गं। वरुणादिगुड़ः ॥*॥
"मञ्जिष्ठा चाषुबं बीजं जीरकः शृतपुष्पिका।
धात्रीफलं वदरकं गन्धकश्च मनःशिला॥
एतेषां समभागानां चूर्णं टङ्कमितं नरः।
भक्षयेन्मधुना सार्द्धं पतेत्तस्याश्मरी ध्रुवं"॥*॥
"पलद्वयमितं कोष्णे कुलत्थस्य भृते तु यः।
लवणं शरपुङ्खस्य सार्द्धमाषद्वयोन्मितं॥
क्षिप्त्वा पिबेत् पतेत्तस्य मूत्रेण सममश्मरी।
शर्करा सिकता चापि दृष्टमेतदनेकधा"॥
इत्यश्मर्य्यधिकारः ॥*॥ इति भावप्रकाशः॥
(अस्या निरुक्तिमाह भोजः।
"तुल्यतामश्मना याति तस्मात्तामश्मरीं विदुः"।
इति माधवकृतरुग्विनिश्चयस्यान्यतमटीकाकृतोक्तं॥
"पिट्टमाढ़कदोषेण अथवा मूत्ररोधनात्।
अतिपथ्याक्षाभिचारैर्जायते चाश्मरीगदः॥
मूत्राविष्टौ च पितरौ सुरतं कुरुतो यदि।
मूत्रेण सहितं युक्तं श्वयते गर्भसम्भवं॥
पक्वजस्य स्वदेहस्य स च तत्र प्रजायते।
मूत्रं मूत्रस्य संस्थाने करोति बन्धनं क्षिपु॥
सोऽप्यसाध्यो मूत्रगदस्वाल्पाद्भवति मानुषे।
तारुण्ये चापि साध्यश्च जायते मूत्रशर्करा॥
विपरीतेन चोत्ताने स्त्रिया च पुरुषेण वा।
शुक्रञ्च प्रवहेत्तस्य स्त्रीशुक्रं विधिमोति च॥
पुनश्च मेहने वासः वातेन शोणितञ्च तत्।
हृयं दत्तं प्रपद्येत मूत्रद्वारं रुजन्ति च॥
तेन मूत्रप्ररोधश्च जायते तीव्रवेदना।
अण्डसन्धिस्थिता याति शर्करा शस्त्रसाध्यका॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र! महामते"।
अस्याश्चिकित्सा यथा॥
"शुण्ठीगोक्षुरकस्यैव वरुणस्य त्वचस्तथा।
क्वाथो गुड़युवक्षारयुतश्चाश्मरिनाशनः॥ १॥
गोक्षुरकस्य बीजानां धातुमाक्षिकसंयुतं।
चूर्णं माक्षिकदुग्धेन पानाच्चाश्मरिपातनं"॥ २॥
अस्यां पथ्यानि यथा॥
"पुराणयष्टिकाशालिरक्तशुल्लकास्तथा।
श्यामाकः कोद्रवोद्दालो मर्कटीशुष्कधान्यकं॥
कुलत्थयवगोधूमास्तथाचेवाड़की भिषक्।
वातघ्नाश्च प्रयोक्तव्या भोजने वातरोगिणां॥
कौद्दालाद्यानि च मांसानि पथ्यान्यश्मरिनाशने"॥
इति हारीतः॥

"विशोषयेद्दक्षिगतन्तु शुक्रं
मूत्रं सपित्तं पवनः कफं वा।
यदा तदाश्मर्य्युपजायते तु
क्रमेण पित्तेश्विव रोचना गोः॥
कदम्बपुष्पाकृतिरश्मतुल्या
श्लक्ष्णा चिपुष्पाप्यथवापि मृदी।
मूत्रस्य चेन्मार्गमुपैति रुद्धा
मूत्रं रुजां तस्य करोति वस्तौ॥
ससीवनीमेहनवस्तिशूलं
विण्मूर्त्तिधारुञ्च करोति मूत्रं।
शक्नोति मेढ्रं स तु वेदनार्त्तो
मुहुः शुक्लमुपैति मेहते च॥
क्षोभात् क्षते मूत्रयतीह साश्रक्
तस्याः सुखं मेहति च व्यपायात्।
एषाश्मरी मारुतभिन्नमूर्त्तिः
स्याच्छर्कराम्लोपयात् क्षरन्ती"॥*॥
चिकित्सा यथा॥*॥

"क्रिया हिता त्वश्मरिशर्कराभ्यां
शस्त्रे तथैवेह कफानिलाभ्यां।
कार्य्याश्मरीभेदनपातनाय
विशेषयुक्तं शृणु कर्म्मसिद्धं॥
पाषाणभेदं दृषकं स्वदंष्ट्रा-
पाठाभयाद्योषशठीनिकुम्भाः।
हिंसीखराश्वासितिमारकाभ्या-
मेर्व्वारुकाणां त्रपुषस्य बीजं॥
उपकुञ्चिका हिङ्गु सवेतसास्लं
स्याद् द्वे दृहत्यौ हपुषा वचा च।
चूर्णं पिबेदश्मरिभेदि पक्वं
सर्पिश्च गोमूत्रचतुर्गुणन्तैः॥ १॥
शिग्रोस्तु यूषो मृदुमूलकल्का-
द्विल्वप्रमाणाद्घृततैलभृष्टात्।
प्रीतोऽश्मभित्स्याद्धिमकाश्यमुक्तं
पेयः प्रकामं लवणेन युक्तः॥ २॥
जलेन शौभाञ्जनमूलकल्कः
पृष्टो हितश्चाश्मरिशर्कराभ्यां। ३॥
पीत्वा च मद्यं निगदं श्रमेण
क्षयेण वा शीघ्रजवेग यायात्।
तैः शर्करा प्रथवतेऽश्मरी तु
शाम्येन्नचेच्छल्यविदुद्धरेत्तां"॥ ४॥
अस्यां वर्ज्जनीयान्याह।
व्यायामसन्धारणशुक्रभस्म-
पिष्टान्नवातार्ककरश्रवायान्।
खर्জ্জूर-शालूक-कपित्थ-जम्बु
विल्वं कषायञ्च रसं भजेन्न"॥
इति च चरकः॥)
चतस्रोऽश्मर्य्यो भवन्ति। श्लेष्मणा वातेन पित्तेन

सुक्रेण चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मामूत्रसम्मूर्छितोऽनुप्रविश्य वस्तिमश्मरीं जनयति । तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिगुरोमुष्कशोफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥

"यथाक्षं वेदनावर्णं दुष्टं सान्द्रमथाविलं ।
पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः" ॥

अथ जातासु नाभि-वस्ति-सेवनी-मेहनेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं सस्निकं विसृजति धावन-लङ्घन-प्लवन-पृष्ठ-यानाध्वगमनैरस्य वेदना भवति ॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो विवृणोति तस्य मूत्रप्रतिघाताद्व्यथते भिद्यते निस्रुद्यत इव च वस्तिर्गुरुः शीतश्च भवति । अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥

पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यते इव वस्तिरुष्णवातश्च भवति । अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥

वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति वायुं स्पृशति विघृर्ज्जते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण वास्य मेहतो निःसरन्ति । अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता भवति तां वातिकीमिति विद्यात् ॥

प्रायेणैतास्विशोऽश्मर्य्यो दिवास्वप्न-समशनाध्यशन-शीत-स्निग्ध-गुरु-मधुराहारप्रियत्वादिभिश्च बालानां भवन्ति तेषामेवाल्पबस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति । महत्यस्तु शुक्राश्मरी शुक्रनिमित्ता भवति । मैथुनाभिघातादतिमैथुनाद्वा शुक्रञ्च तिलमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संश्रुत्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च शोथमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥

अस्याश्चिकित्सा यथा ॥

"अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ।
औषधैस्तरुणः साध्यः प्रवृद्धश्छेदमर्हति ।
तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते ।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥
घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरबस्तिभिः ।
यदि नोपशमं गच्छेत् छेदस्तत्रोत्तरो विधिः ॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरिहाध्रुवा ।
उपक्रमो ह्यतस्तस्योऽयमतः स परिकीर्त्तितः ॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
तस्मादाहूय कर्त्तव्यमीश्वरं साधुकारिणा" ॥

अथ रोगान्वितमुपस्निग्धमपक्वदोषमीषत् कठिनमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतबलिमङ्गलस्वस्तिवाचनमयोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य ततो बलवन्तमविक्षवमात्मानुसमे फलके प्रागुपवेश्य पुरुषञ्च तस्योत्सङ्गे निषण्णपूर्व्वकायमुत्तानमुन्नतकटीकं वस्त्रधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण घ्राटकैर्व्वा ततः स्वभक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीड़येदधोनाभेर्यावदश्मर्य्यधः प्रपन्नेति । ततः स्नेहाभ्यक्ते स्नानसुखे वातहरप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्यलीकमनायतमविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पीड़येदङ्गुलिभ्यां यथाग्रन्थिरिवोन्नतं ग्रन्थ्यं भवति ॥

"सचेदगृहीतग्रन्थ्यै तु विद्यात्तज्ञो विचेतनः ।
हतबस्तिग्रहीर्षञ्च निर्व्विकारो मृतोपमः ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः ।
विना त्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत् ॥"
इति सुश्रुतः ॥

"अयोरजः श्लक्ष्णपिष्टं मधुना सह योजयेत् ।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणं ॥"
॥ * ॥ लौहप्रयोगः ॥ * ॥
इति वैद्यकरत्नसारसंग्रहः ॥)

अश्मरीघ्नः, पुं, (अश्मरीं मूत्रकृच्छ्रं हन्ति । अश्मरी + हन् + टक् ।) वरुणवृक्षः । इति त्रिकाण्डशेषः ॥

अश्मरीहरः, पुं, (अश्मरीं हरति । अश्मरी + हृ + अच् ।) धान्यविशेषः । इति रत्नमाला ॥ दे धान इति ख्यातः ।

"वरुणः कफवातघ्नो भेदी चोष्णोऽश्मरीहरः" ।
इति वैद्यकद्रव्यगुणाः ॥)

अश्मसारः, पुं, क्ली, (अश्मनः सारः ।) लौहः । इत्यमरः ॥ ("प्रायाः सत्वरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी" । इति साहित्यदर्पणे ।)

अश्मीरः, पुं, क्ली, (अश्मन् + ईर ।) अश्मरीरोगः ॥ इत्युणादिकोषः ॥

अश्मोत्थं, क्ली, (अश्मनः उत्तिष्ठति यत् । उत् + स्था + क ।) शिलाजतु । इति राजनिर्घण्टः ॥

अश्रं, क्ली, (अश्नुते व्याप्नोति नेत्रं कण्ठं वा अश् + रक् ।) नेत्रजलं । इत्युणादिकोषः ॥ ("तामप्यश्रं नवजलमयं मोचयिष्यत्यवश्यं" । इति मेघदूते ॥ "सखीभिरश्रोत्तरमीक्षितामिमाम्" । इति कुमारे ॥) रक्तं । इत्यमरटीका ॥

अश्रद्धानः, त्रि, (न श्रद्धानः । नञ्तत्पुरुषः ।) श्रद्धाहीनः । यथा देवलः ।

"प्रत्ययो धर्म्मकार्य्येषु तथा श्रद्धेत्युदाहृता ।
नास्ति ह्यश्रद्धानस्य धर्म्मकृत्ये प्रयोजनं" ॥
इति श्राद्धतत्त्वं ॥

अश्रद्धा, स्त्री, (न श्रद्धा । नञ्तत्पुरुषः ।) शास्त्रार्थे अदृढ़प्रत्ययः । यथा,—

"विधिहीनं भावदुष्टं हुतमश्रद्धया च यत् ।
तद्धरन्त्यसुरास्तस्य मूढ़स्य दुष्कृतात्मनः" ॥
इति श्राद्धतत्त्वं । (मानसिकवृत्तिभेदः । यथा श्रुतौ,—

"कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" ॥

"अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" ॥
इति गीतायाम् ॥)

अश्रद्धेयं, त्रि, अश्रद्धानर्हं । आदरायोग्यं । शास्त्रार्थादृढ़प्रत्ययायोग्यं । अत्र श्रद्धशब्दपूर्व्वक धाधातोर्यप्रत्यये पश्चान्नञ्समासेन निष्पन्नं ॥ ("किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिग्रहीतेनाकृतेन" । इति पञ्चतन्त्रे ।)

अश्रपः, पुं, क्ली, (अश्रं रक्तं पिबति यः । अश्र + पा + ड ।) राक्षसः । इत्यमरः ॥

अश्राद्धभोजी, [न्] त्रि, (न श्राद्धभोजी । नञ्तत्पुरुषः ।) श्राद्धान्नाभक्षकः । यथा । दुर्गसिंहोऽपि अश्राद्धभोजीत्यस्य सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धमिति न नियमः । तथात्वे व्रतलोपः स्यात् । इति प्रायश्चित्ततत्त्वं ॥

अश्राद्धी, [न्] पुं, (अश्राद्धमस्त्यस्य । अश्राद्ध + इन् ।) श्राद्धपक्षयज्ञशून्यः । यथा मनुः ।

"नाद्यात् सूदस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीतामवेवास्मादहत्तावेकरात्रिकं" ॥
अश्राद्धिनः श्राद्धपक्षयज्ञशून्यस्य । इत्याह्निकाचारतत्त्वं ॥

अश्राद्धेयः, पुं, (न श्राद्धेयः । नञ्समासः ।) श्राद्धानर्हः । श्राद्धायोग्यब्राह्मणः । यथा । अत्रिकाश्यपौ,—

"पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिं" ॥
इत्युद्वाहतत्त्वं ॥

अश्रान्तं, क्ली, (अविद्यमानं श्रान्तमत्र । नञ्समासः) अनवरतं । नित्यं । इत्यमरः ॥ अमरहिते त्रि ॥

अश्रान्तः, त्रि, अमरहितः । यथा । "अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना । पूर्व्वं गाधिसुतेन साभिघटिता मुक्तानु मन्दाकिनी यत् प्रासादकूलवल्लिरनिलान्दोलैरखेलद्दिवि" ॥ इति नैषधे १ सर्गः ॥

अश्रिः, स्त्री, (अश्नाति अश्नुते वा । अशू भोजने अशू व्याप्तौ वा । आश्रीयते प्राहारार्थम् । आङि-श्रिहृनिभ्यां क्सक्सेति इण् स च ङित् ङित्वात् टिलोप आङो क्सक्स च ।) मेघादेः कोणः । इति हेमचन्द्रः ॥ अस्रादेरग्रभागः । इत्यमरः ॥

("दृत्तस्य हन्तुः कुलिशं कुण्ठिताग्रीव लक्ष्यते"। इति कुमारे।
"वज्रो वा एष यदश्वयूपः सोऽस्याग्निः कर्त्तव्योऽस्याग्निः वै वज्रः"। इति शतरेयब्राह्मणे।)

अश्री, स्त्री, अश्रिः। अस्यादेरग्रभागः॥ इत्यमरटीका॥

अश्रु, क्ली, (अश्नुते नेत्रमिति। अशू+रुक्। अथवा न श्रयति इति। न+श्रि+डुन्।) चक्षुर्ज्जलं। तत्पर्य्यायः। नेत्राम्बु २ रोदनं ३ अश्रं ४ अस्रं ५ असृ ६ वाष्पं ७। इत्यमरकोषशब्दरत्नावल्यौ। ("श्रुतदेहविसर्ज्जनः पितुश्चिरमश्रूणि विमुच्य राघवः"। इति रघुवंशे।) लोचं ८। इति जटाधरः॥

अश्रुत, त्रि, (न श्रुतं। नञ्तत्पुरुषः।) अकृतश्रवणं॥ अंगाकर्णितं। अश्रुना इति भाषा। यथा,—
"अतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदोषिका"।
इति प्रायश्चित्ततत्त्वं॥

अश्लेषा, स्त्री, (नास्ति श्लेषो यस्याम्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतनवमनक्षत्रं। अस्य रूपं। पञ्चाक्षतिषड्नक्षत्रात्मकं। इति दीपिका॥ तस्याधिदेवता सर्पः॥ यथा। अश्वि-यम दहन-कमलज-अग्नि-मूलभददिति-जीव-फणि-पितरः। इत्यादि ज्योतिस्तत्त्वं॥सा केतुग्रहस्य जन्मनक्षत्रं। यथा,—
"विघ्नाखानलतोयानि वैष्णवं भगदैवतं।
पुष्या पौष्णं यमः सर्पो जन्मभान्यर्कतः क्रमात्"॥
इति दीपिका॥ सा च अधोमुखगणः। यथा,—
"अश्लेषवक्रियमपित्र्यविशाखयुक्तं
पूर्व्वात्रयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्घ्यभूमिखननेषु च शोभितानि"॥
इति ज्योतिस्तत्त्वं॥*॥ तस्या मस्तकोपरि उदये राशिलग्ननिरूपणं यथा,—
"मौलिगे भुजगभे स्वपुच्छके
मङ्गुराह्वतिनि सप्ततारके।
मारकेलिरसिके तुलोदयात्
निर्यगुर्व्वलधिराशिलिप्तिकाः"॥ १। २४।
इति कालिदासकृतराशिलग्ननिरूपणं। तत्र जातफलं॥
"धूर्त्तः स्यादतिदुष्टचेताः
कष्टप्रदश्चापि दया जनानां।
सर्पे सदर्पो हि गठार्पितार्थः
कन्दर्पसन्तप्तमना मनुष्यः"॥
इति कोष्ठीप्रदीपः॥

अश्लेषाभवः, पुं, (अश्लेषायां भवः।) केतुग्रहः। इति हारावली॥

अश्वः, पुं, (अश्नुते मार्गं व्याप्नोति। अशू व्याप्तौ अशूप्रुषिलटीति क्वन्।) घोटकः। तत्पर्य्यायः। पीतिः २ पीती ३ वीतिः ४ घोटः ५ घोटकः ६ तुरगः ७ तुरङ्गः ८ तुरङ्गमः ९ वाजी १० वाहः ११ अर्व्वा १२ गन्धर्व्वः १३ हयः १४ सैन्धवः १५ सप्तिः १६। इत्यमरः तट्टीकाच॥
("जितसिंहभया नागा यत्राश्वा विजयोनयः"। इति कुमारे॥
"गच्छन्तमुच्चलितचामरचारुमश्वम्"॥ इति शिशुपालवधे॥) अश्वेन भ्रमणगुणाः। वातकोपनाशस्थैर्य्यबलाग्निकारित्वं। इति राजवल्लभः॥ पुंजातिविशेषः। तस्य लक्षणं।
"काष्ठतुल्यवपुर्दृष्टो मिथ्याचारश्च निर्भयः।
द्वादशाङ्गुलमेढ्रश्च दरिद्रस्तु हयो मतः"॥
इति रतिमञ्जरी॥ (खनामख्यातो दक्षिणवंशीयो नृपतिश्चित्रकस्य पुत्रः। यथा,—
"चित्रकस्याभवन् पुत्राः पृथुर्विप्रथुरेव च।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ॥
अरिष्टनेमिरश्वश्च।" इति हरिवंशे। खनाम ख्यातो दानवश्च यथा महाभारते।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत॥
स्वर्भानुरश्वोऽश्वपतिर्हयपर्व्वा जकस्तथा"॥)

अश्वकन्दिका, स्त्री, अश्वगन्धावृक्षः। इति रत्नमाला॥

अश्वकर्णः, पुं, (अश्वस्य कर्णमिवपत्रमस्य।) शालवृक्षविशेषः। लताशाल इति केचित्॥ तत्पर्य्यायः। अरणद्रुमः २ तार्क्ष्यप्रसवः ३ ध्रुवसम्भवः ४ धन्यः ५ दीर्घपर्णः ६ कुम्भिकः ७ कौम्भिकः ८। अस्य गुणाः। कटुत्वं। तिक्तत्वं। स्निग्धत्वं। "उरोविस्फोटपित्तास्रकण्डुग्निरादोषार्त्तिनाशित्वञ्च"॥ इति राजनिर्घण्टः॥
("सालतालाश्वकर्णानां पर्य्यैर्वञ्जभिराहृताम्"॥ इति रामायणे॥
"अश्वकर्णः कषायः स्याद्व्रणस्वेदककफापहः।
ब्रध्नविद्रधिवाधिर्य्यशोनिकर्णगदान् हरेत्"॥
इति भावप्रकाशः॥
"विम्बीफलं साश्वकर्णं स्तन्यलृत् कफपित्तजित्।
लृद्दाहज्वरपित्तास्रकासश्वासक्षयापहं"॥
इति सुश्रुतः॥)

अश्वकर्णकः, पुं, (अश्वकर्ण+स्वार्थे कन्।) शालवृक्षः। इत्यमरः॥

अश्वकिनी, स्त्री, (अश्वक+इन्+ङीप्।) अश्विनीनक्षत्रं। इति हेमचन्द्रः॥

अश्वखुरः, पुं, (अश्वस्य खुरमिवाकृतिर्यस्य।) गवीनामगन्धद्रव्यं। इति रत्नमाला॥

अश्वखुरा, स्त्री, अपराजितालता। इति राजनिर्घण्टः॥

अश्वखुरी, (स्त्री) अपराजितालता। इति शब्दमाला॥

अश्वगन्धा, स्त्री, (अश्वस्य गन्ध एकदेशोमेढ्रनिव मूलमस्याः।) खनामख्यातवृक्षविशेषः। अश्वगन्ध इतिख्याता। तत्पर्य्यायः। हयगन्धा २ वाजिगन्धा ३ अश्वगन्धिका ४ वल्या ५ तुरगगन्धा ६ कम्बुका ७ अश्ववरोहिका ८ कम्बुकाष्ठा ९ अवरोहिका १० वाराहकर्णी ११ तुरगा १२ वनजा १३ वाजिनी १४ हया १५ पुष्टिदा १६ बलदा १७ पुष्टिः १८ पीवरा १९ पलाशपर्णी २० वातघ्नी २१ श्यामला २२ कामरूपिणी २३ काला २४ प्रियकरी २५ गन्धपत्री २६ हयप्रिया २७ वाराहपत्री २८ अस्या गुणाः। कटुत्वं। उष्णत्वं। तिक्तत्वं। मदगन्धित्वं। बलशुक्रकारित्वं। वायुकाश्वासक्षयव्रणजराव्याधिनाशित्वञ्च। इति रत्नमालाराजनिर्घण्टराजवल्लभाः॥
"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया।
वाराहकर्णी वरदा वरदा कुष्ठगन्धिनी"॥
क्वचित्पुस्तके अन्यवरदास्थाने वदरीति पाठः।
"अश्वगन्धानिलश्लेष्मश्वित्रशोथक्षयापहा।
बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला"॥
इति भावप्रकाशः॥
("यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्।
घृतावर्य्यश्वगन्धाभ्यां पयस्यैरण्यजीवनैः"॥
इति सुश्रुते॥
"अश्वगन्धास्तु वातघ्नी बल्या हृद्या रसायनी"॥
इति वैद्यकरत्नमालायां॥
"पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत्।
घृतं पेयं कुमाराणां पुष्टिबलबर्द्धनं"॥
॥*॥ अश्वगन्धाघृतं॥*॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

अश्वगोयुगं, क्ली, (द्वावश्वौ। द्वित्वे, अश्व+गोयुगच्।) अश्वद्वयं। इति पाणिनिः॥ एक योड़ाघोड़ा इति भाषा।

अश्वगोष्ठं, क्ली, (अश्वानां स्थानं। गोष्ठजादयः स्थानादिषु पशुनामभ्य इति, अश्व+गोष्ठच्।) अश्वस्थानं। आस्तबल इति आरबीभाषा। यथा,—
"पशुभ्यः स्थानदिघट्के गोष्ठगोयुगषड्गवं।"
इत्यनेन अश्वशब्दात् गोष्ठप्रत्ययेन निष्पन्नं॥
इति मुग्धबोधव्याकरणं॥

अश्वग्रीवः, पुं, (अश्वस्य ग्रीवाइव ग्रीवा यस्य।) विष्णुद्वेष्यासुरविशेषः। इति हेमचन्द्रः॥ (यथाह भारते।
"अश्वग्रीवश्च सूक्तश्च तुङ्गश्च महाबलः"॥
तत्रैव च।
"अश्वग्रीव इति ख्यातः पृथिव्यां सोऽभवन्नृपः"॥
खनामख्यातो दक्षिणवंशीयो नृपतिः सहि चित्रकस्य पुत्रो दक्षिणनृपतेः पौत्रः। यथा हरिवंशे,—
"चित्रकस्याभवन् पुत्राः पृथुर्विप्रथुरेव च।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ"॥)

अश्वघ्नः, पुं, (अश्वं हन्तीति। अश्व+हन्+टक्।) करवीरपुष्पवृक्षः। इति रत्नमाला॥

अश्वतरः, पुं, स्त्री, (तनुरश्वः। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्व इति तरच्। अश्वेनाश्वायामुत्पन्नोऽश्वः। अश्वत्वं च जातिः। तत्सहचरितस्योक्षधर्म्मस्य तनुत्वं अन्यपिण्डकत्वात्।) अश्वायां गर्द्दभेन जातः पशुविशेषः। इति स्मृतिः। खच्चर इति भाषा॥
("हयानश्वतरानुष्ट्रांस्तथैव सुरभेः सुतान्"। इति रामायणे॥
"सकृद्दुष्टं हि यो मित्रं पुनः सन्धातुमिच्छति।
स मूढमुपगृह्णाति गर्भाश्वतरी यथा"॥
इति पञ्चतन्त्रे॥)

अश्वतरः, पुं, वेगसरः। नागराजविशेषः। इति मेदिनी॥
("कम्बलाश्वतरौ चापि नागकालीयकस्तथा"।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ"॥
इति च महाभारते॥) गन्धर्वविशेषः। पुंवत्सः। इति धरणिः॥

अश्वत्थः, पुं, (अश्वत्थं जलमस्यास्ति। मूले सिक्तत्वात्। अर्श-आद्यच्। अश्वत्थवत् कामकर्म्मवातेरितनित्यप्रचलितस्वभावत्वात् आसुविनाशित्वेन स्थोऽपि स्थास्यतीति विश्वासानर्हत्वाच्च मायामयः संसारवृक्षः। प्लाक्षमलिवटाद्यपेक्षया न स्थिरं तिष्ठति अश्ववत् तिष्ठति वा। स्था गतिनिवृत्तौ। एषोदरादित्वात् पूर्ब्बोत्तरपदान्तयोः सकारयोस्तकारौ सुपिस्थ इति कः।) खनामख्यातवृक्षविशेषः। पिपर इति पश्चिमदेशीयभाषा। तत्पर्य्यायः। बोधिद्रुमः २ चलदलः ३ पिप्पलः ४ कुञ्जराशनः ५। इत्यमरः॥ अच्युतावासः ६ चलपत्रः ७ पवित्रकः ८ शुभदः ९ बोधिवृक्षः १० याज्ञिकः ११ गजभक्षकः १२ श्रीमान् १३ क्षीरद्रुमः १४ विप्रः १५ मङ्गल्यः १६ श्यामलः १७ गुह्यपुष्पः १८ सेव्यः १९ सत्यः २० शुचिद्रुमः २१ धनुवृक्षः २२। अस्य गुणाः। सुमधुरत्वं। कषायत्वं। शीतलत्वं। कफपित्तविनाशित्वं रक्तदाहशमनकारित्वञ्च॥ तत्फलस्य गुणाः। सद्यो योनिदोषहारित्वं। शीतलत्वं। अतिवृष्यत्वं। पित्तरक्तविसर्पितृष्णादाहच्छर्दिश्रोथारुचिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥
("अश्वत्थोडुम्बरप्लक्षन्यग्रोधानां फलानि च।
कषायमधुराण्याहुः वातलानि गुरूणि च"॥
इति चरकः॥
अश्वत्थदेवायतनश्मशान-
वल्मीकसन्धासु चतुष्पथेषु।
याम्ये सपित्ते परिवर्ज्जनीया
वृक्षे नरा मर्म्मसु ये च दष्टाः"॥
इति सुश्रुतः॥)
अथाश्वत्थवन्दनकालमन्त्राः।
"अश्वत्थं वन्देन्नित्यं पूर्ब्बाह्णे प्रहरद्वये।
अत ऊर्द्धं न वन्देत अश्वत्थन्तु कदाचन॥
(ॐ) चक्षुस्पन्दं भुजस्पन्दं तथा दुःखप्रदर्शनं।
शत्रूणाञ्च समुत्थानमश्वत्थ शमयाशु मे॥
अश्वत्थरूपी भगवान् प्रीयतां मे जनार्दनः।
त्वां दृष्ट्वा नश्यते पापं दृष्ट्वा लक्ष्मीः प्रवर्त्तते॥
प्रदक्षिणे भवेदायुः सदाश्वत्थ नमोऽस्तु ते"॥
इति स्मृत्यर्थसारे हलायुधधृतवचनं॥ गर्द्दभाण्डवृक्षः। इति विश्वः॥
"बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गलाशनः।
पिप्पलो दुर्ज्जरः शीतः पित्तश्लेष्मव्रणास्रजित्॥
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः"॥*॥
अथ पिप्पलभेदः। गजहण्डु इति हिन्दिभाषा।
"पारिप्लवोन्यः फलीशश्च कपिचूतः कामरुलुः।
गर्द्दभाण्डः कन्दरालकपीतनसुपार्श्वकाः॥
फलीशो दुर्ज्जरः स्निग्धः क्रिमिश्लेष्मकफप्रदः।
फलेऽम्लमधुरो मूले कषायः स्वादुमज्जकः"॥*॥
अथ वेलियापिप्पलः।
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्यादनन्तभूः॥
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः।
कटुपाकरसो ग्राही विषपित्तकफास्रनुत्"॥
इति भावप्रकाशः॥*॥ तस्य विष्णुरूपत्वं यथा,—
ऋषय ऊचुः।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ"॥
सूत उवाच॥
"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्याधिदुरितानि विनाशकारिणौ ध्रुवं"॥
ऋषय ऊचुः।
"कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ संशयोऽत्र महान् हि नः"॥
सूत उवाच।
"पार्ब्बतीशिवयोर्देवैः सुरतं कुर्ब्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा॥
ततस्तु पार्ब्बती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभंशकाम्यमाना तदा रुषा"॥
पार्ब्बत्युवाच।
"कृमिकीटादयोऽप्येते जानन्ति सुरतेः सुखं।
तस्मान्मम सुखभंशात् यूयं वृक्षत्वमाप्नुथ"॥
सूत उवाच।
"एवं सा पार्ब्बती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्बोधिवटौ मुनीश्वराः।
बोधिस्त्वयं चार्किदिनं विनैव
न संस्पृशेदर्कजवारयोगात्"॥
इति पाद्मे उत्तरखण्डे १६० अध्यायः॥*॥
ऋषय ऊचुः।
"अस्पृश्यत्वं कथं जातं सूत बोधितरुः स्वयं।
स्पृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे"॥
सूत उवाच।
"समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः॥
यावदश्रीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं"॥
लक्ष्मीरुवाच।
"असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन॥
विवाह्योद्वाहमां पश्चात् एष धर्म्मः सनातनः।
तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन॥
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा॥
आज्ञावाक्यानुरोधेन तामलक्ष्मीं ददौ किल।
स्थूलोष्ठीं शुक्लदशनां विरूपां विकृतीं तनुं॥
खदिराक्षनयनां रूक्षपिङ्गशिरोरुहां।
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमं॥
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्।
होमधूपसुगन्धाढ्यं वेदघोषेण नादितं॥
आश्रमं तं विलोक्याथ व्यथिता साब्रवीदिदं।"
ज्येष्ठोवाच।
"नहि वासानुरूपोऽयं वेदध्वनियुतो मम॥
नाचारागमिश्रो भो ब्रह्मन् नयस्वान्यत्र मां ध्रुवं"।
उद्दालक उवाच।
"कथं नायासि किञ्चात्र वर्त्तते क्षमतं तव।
तव योग्या च वसतिः का भवेत्तद्वद त्वं मां"॥
ज्येष्ठोवाच।
"वेदध्वनिर्भवेद्यस्मिन् अतिथीनाञ्च पूजनं।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहं॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहं॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्म्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादवमाननं।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहं"॥
सूत उवाच।
"इति तद्वचनं श्रुत्वा विसन्नवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह"॥
उद्दालक उवाच।
"अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मीः अम्यतां त्वमं
आश्रमस्थानमालोक्य यावदायाम्यहं एनः"॥
सूत उवाच।
"इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा न तं ददर्श सा॥
तदा रुरोद करुणं भर्त्तुस्यागेन दुःखिता।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत्॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा"।
लक्ष्मीरुवाच।
"स्वामिन् मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया"॥
सूत उवाच।
"लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्"॥
विष्णुरुवाच।
"अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल"॥
इति पाद्मे उत्तरखण्डे १६१ अध्यायः॥ २॥
वैशाखमासे तस्य सेचनफलं यथा,—
"वैशाखे सिञ्चयेन्नित्यं विष्णुमश्वत्थरूपिणं।
चतुर्वर्गफलावाप्तिहेतवे वैष्णवो जनः॥
गण्डूषमात्रतोयेन कूर्य्याद्योऽश्वत्थसेचनं।
सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः॥
अश्वत्थमूलं विप्रर्षे यो बध्नाति शिलादिभिः।
अश्वत्थरूपी भगवान् किं तस्मै न हि यच्छति॥
अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः।
आयुर्दृढमवेत्तस्य वर्द्धन्ते सर्वसम्पदः॥

यथाश्वत्थतले विप्र धर्म्मैकर्म्मे विधीयते ।
न्यूनातिरिक्तता न स्यात्तस्मिन् कर्म्मणि जैमिने ॥
तत्र तीर्थानि सर्व्वाणि त्रिस्रोतादीनि जैमिने ।
यत्राश्वत्थतरुस्तिष्ठेत् एकोऽपि शाखिनां वरः ॥
अश्वत्थपूजको यस्तु स एव हरिपूजकः ।
अश्वत्थमूर्त्तिर्भगवान् स्वयमेव यतो द्विज ॥
तरुज्ञानाद्विजश्रेष्ठ योऽश्वत्थं हन्ति मूढधीः ।
संसारे नास्ति तत्कर्म्म यत् कृत्वा स च मुच्यति ॥
अश्वत्थो वृक्षराजोऽयं हरिमूर्त्तिः प्रकीर्त्तितः ।
तस्मादश्वत्थहन्तॄणां त्राता कोऽपि न विद्यते ॥
अश्वत्थं पश्यतो विप्र स्पृशतः स्मरतस्तथा ।
देहस्थं पातकं तस्य हरेत् प्रणमतो हरिः ॥
विलोक्याश्वत्थहन्तारं यः शक्तो न निवारयेत् ।
तन्नेत्रयुग्मं वड़िशैर्यमेनोत्पाट्यते स्वयं ॥
अश्वत्थच्छेदनं मूढ़ मा कुर्विति वदेन्न यः ।
तस्य जिह्वां कुरिकया स्वयं छिन्नत्ति भास्करिः ॥
अश्वत्थशाखामेकां यः खल्वापि निहन्ति यः ।
स कोटिब्रह्महत्यानां फलं प्राप्नोति मानवः ॥
यत्पापं ब्रह्महत्यायां गुरुस्त्रीगमने च यत् ।
सुरापाने तथास्तेये न्यासापहरणे तथा ॥
यत्पापं भ्रूणहत्यायां गोहत्यायां द्विजोत्तम ।
स्त्रीहत्यायाश्च यत्पापं परस्त्रीगमने तथा ॥
शरणागतहत्यायां हत्यायां सुहृदां तथा ।
विश्वासवाक्यकथने परहिंसाविधौ च यत् ॥
यत् पापं परनिन्दायां हरिवासरभोजने ।
अश्वत्थच्छेदनाद्घोरं तत् पापं प्राप्यते जनैः ॥
विष्णुमूर्त्तेर्ज्जनो मोहादश्वत्थस्य निहन्ता यः ।
तत्तुल्यः पातकी कोऽपि न श्रुतः क्षितिमण्डले ॥
वदाम्यश्वत्थमाहात्म्यं सर्व्वपापप्रणाशनं ।
साक्षादेव स्वयं विष्णुरश्वत्थोऽखिलविश्वराट् ॥
तद्वृक्षिं कुर्वतः पुंसो विद्यते नाशुभं क्वचित् ।
अश्वत्थं सेवते यस्तु विष्णुबुद्धा नरोत्तमः ॥
तस्य प्रसन्नो भगवान् ददाति परमं पदं" ।
इति पाद्मे क्रियायोगसारे अश्वत्थसेधनं नाम
११ अध्यायः ॥
(अस्थिररूपः संसारवृक्षः । यथा, गीतायाम् ।
"ऊर्द्धमूलमधःशाखमश्वत्थं प्राऽव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" ॥
विस्तरस्तु गीतायाः पञ्चदशेऽध्याये द्रष्टव्यः ॥)

अश्वत्थभेदः, पुं, (अश्वत्थस्य भेदो विभिन्नता यस्मिन् ।) स्थालीवृक्षः । इति राजनिर्घण्टः ॥

अश्वत्था, स्त्री, पूर्णिमातिथिः । इति मेदिनी ॥

अश्वत्थामा, [न्,] पुं, (अश्वस्येव स्थाम बलं यस्य । एषोदरादित्वात् सस्य तः । अथवा अश्व इव तिष्ठति युद्धे । अश्व + स्था + मनिन् ।) द्रोणाचार्य्यपुत्रः । स तु चिरञ्जीवी महाबली च । तत्पर्य्यायः । कृपीसुतः २ द्रौणायनः ३ । इति त्रिकाण्डशेषः ॥ द्रौणिः ४ । इति स्मार्त्तः ॥ द्रह्यभावे द्रौणिः ५ ॥ (अयं खलु जात एव अश्ववदनाद अतोऽस्य अश्वत्थामेति नाम । तथा च भारते ।
"अश्वमन् गौतमीपुत्रमश्वत्थामानमेव च ।
स जातमात्रो व्यनदत् यथैवोच्चैःश्रवा हयः ॥
तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षस्थमब्रवीत् ।
अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् ॥
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति" ।)

अश्वत्थी, स्त्री, (क्षुद्रोऽश्वत्थः । अश्वत्थ + अल्पार्थे ङीप् ।) वृक्षविशेषः । पिप्पली इति लोके । तत्पर्य्यायः । लघुपत्री २ पवित्रा ३ क्षुद्रपत्रिका ४ पिप्पलिका ५ वनस्था ६ अश्वत्थिका ७ । अस्या गुणाः । मधुरत्वं । कषायत्वं । अम्लपित्तनाशित्वं । विषदाहप्रशमनकारित्वं । गुर्व्विण्या हितकारित्वञ्च । इति राजनिर्घण्टः ॥

अश्वदंष्ट्रा, स्त्री, (अश्वस्य दंष्ट्रा इव आकृत्या ।) गोक्षुरवृक्षः । इत्यमरः ॥

अश्वन्नं, क्ली, (अश्व-(सृ)-नामन्तो यस्मिन् ।) अश्वभं । क्षेत्रं । चुल्ली । अनवधि । मृतं । इति हेमचन्द्रः ॥

अश्वपालः, पुं, (अश्वान् पालयतीति, अश्व + पाल + कर्म्मणि उपपदे अण् प्रत्ययः ।) घोटकरक्षकः । इति अश्वपालिकशब्दटीकायां दुर्गादासः ॥ सहस् इति आरबीभाषा । ("दत्तातङ्गोऽङ्गनानामनुहृतसरणिः संभ्रमादश्वपालैः प्रभ्रष्टोऽयं श्रवस्कः प्रविशति त्वपतेर्मन्दिरं मन्दुरायाः" इति रत्नावल्याम् ।)

अश्वपुच्छी, स्त्री, (अश्वस्य पुच्छमिव केशरोऽस्याः ।) माषपर्णीवृक्षः । इति राजनिर्घण्टः ॥

अश्वबालः, पुं, (अश्वस्य बाल इव । काशस्य पुष्पं अश्वबालवत् विभाति ।) काशः । केश्या इति भाषा । इति त्रिकाण्डशेषः ॥

अश्वमहिषिका, स्त्री, (अश्वमहिषयो वैरम् । द्वन्द्वात् वुन् वैरमैथुनिकयोरिति अश्वमहिष + वुन् ।) अश्वमहिषयोर्नित्यवैरं । इति शब्दरत्नावली ॥

अश्वमारः, अश्वमारकः } पुं, (अश्वं मारयति । अश्व + मृ + णिच् + अण् ।) करवीरवृक्षः । इति शब्दरत्नावली ॥ ("लाङ्गारेवतकुटजाऽश्वमारकटपलहरिद्राहयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति" । इति सुश्रुते ॥
"करवीरः श्वेतपुष्पः श्वेतकुम्भोऽश्वमारकः" ।
इति भावप्रकाशः ॥
"तत्र श्वेतकाश्वमारगुल्मेत्यादि ।
सुश्रुतस्य कल्पस्थानेऽभिहितं ॥")

अश्वमुखः, पुं, (अश्वस्य मुखमिव मुखं यस्य । किन्नरः । इति हलायुधः ॥ (स्त्री, किन्नरी । किम्पुरुषस्त्री । यथा कुमारे ।
"न दुर्व्वहश्रोणिपयोधरार्त्ता
क्षिन्दन्ति मन्दां गतिमश्वमुख्यः" ॥)

अश्वमेधः, पुं, (अश्वः मेध्यते हिंस्यते यत्र । मेधहिंसने + घञ् ।) यज्ञविशेषः । इति जटाधरः ॥ यत्र लक्षणविशेषाक्रान्तमश्वं संप्रोक्ष्य कपाले जयपत्रं बद्धा त्यजेत् तद्रक्षार्थं पुरुषविशेषं नियोजयेत् संवत्सरान्ते अश्वे आगते सति अथवा केनापि संबद्धे युद्धं कृत्वा तमानीय यथाविधि वधं कृत्वा तद्दृषया होमः कर्त्तव्यः । कामनानुसारेण तत्फलं । मोक्षः ब्रह्महत्यापापक्षयः स्वर्गश्च । यथा । आपस्तम्बः ।
"राजा सार्व्वभौमः अश्वमेधेन यजेत नाप्यसार्व्वभौमः" । इति ॥ प्रायश्चित्तात्मकाश्वमेधो यथा । विष्णुः ।
"अनुपातकिनश्चैते महापातकिनो यथा ।
अश्वमेधेन शुध्यन्ति तीर्थानुसरणेन वा" ॥
अपि च ।
"अश्वमेधेन शुध्यन्ति महापातकिनश्चिमे" ।
इति विष्णूक्ताश्वमेधस्य प्रायश्चित्तत्वम् । पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम् । इति प्रायश्चित्ततत्त्वम् ॥ ० ॥ कलौ तस्य निषेधो यथा वृहन्नारदीये ।
"दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ।
महाप्रस्थानगमनं गोमेधञ्च तथा मखं ॥
इमान् धर्म्मान् कलियुगे वर्ज्यानाऽऊर्म्मनीषिणः" ।
इत्युद्धृतत्त्वम् ॥ अन्यच्च । ब्रह्मपुराणम् ।
"नराश्वमेधौ मद्यञ्च कलौ वर्ज्या द्विजातिभिः" ।
इति तिथ्यादितत्त्वम् ॥ ० ॥ तत्फलजनककर्म्माणि यथा,—
"वैशाखे मासि यः कुर्य्यात् प्रपां माधवतुष्टये ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः" ॥
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥
अपि च ब्रह्मखण्डे ॥
"स्नानन्तु भक्त्या गङ्गायां कर्तुकामस्य गच्छतः ।
पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते" ॥
इति प्रायश्चित्ततत्त्वम् ॥

अश्वमेधिकः, पुं, (अश्वमेधाय हितः । अश्वमेध + ठक्, ठन् वा ।) अश्वमेधयागोपयुक्तघोटकः । इति जटाधरः ॥ (खीवलिङ्गे खनामख्यातं महाभारतान्तर्गतं चतुर्दशपर्व्व । यथा,—
"ततोऽश्वमेधिकं पर्व्व सर्वपापप्रणाशनम्" ।
"ततोऽश्वमेधिकं पर्व्व प्रोक्तं तच्च चतुर्दशम्" ।)

अश्वमेधीयः, पुं, (अश्वमेधाय हितः । अश्वमेध + छ ।) अश्वमेधयज्ञीयाश्वः । तत्पर्य्यायः यवुः २ । इत्यमरः ॥ तस्य लक्षणम् ।
"कालाम्भोधरसङ्काशः सर्व्ववर्णमुखो बली ।
यस्य पार्श्वावुभावूर्द्धचन्द्राकारौ सशोभनौ ॥
पुच्छं विद्युल्लतोकाशमुदरं कुन्दसन्निभं ।
पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूरसन्निभौ ॥
ज्वलदग्निनिभा जिह्वा चक्षुषी भास्करोपमे ।
विराजितो रोमराज्या सानुलोमविलोमया ॥
विचित्रैर्विविधैर्वर्णैश्चित्रो रजतबिन्दुभिः ।
यो वेगे वायुतुल्यः स्यादुचैरुचैःश्रवा यथा ॥
यस्य गात्रोद्भवो गन्धो गन्धर्व्वमपि मोहयेत् ।
एवं लक्षणसंयुक्तो यज्ञीयः पशुरुच्यते ॥
अश्वस्य पालकश्चातिबलवान् पुत्र उच्यते ।
पुत्रतुल्यः सुहृद्वापि बहुविज्ञः क्रतूत्तमः" ॥
इति वाशिष्ठरामायणम् ॥

अश्वयुक्, [ज्] स्त्री, (अश्वं युनक्ति रूपेणानुकरोतीति अश्व + युज् + क्विप् ।) अश्विनीनक्षत्रं । इत्यमरः ॥

अश्वयुक्[ज्] } पुं, (अश्वेन नक्षत्रेण युक् युक्ता यौगे
अश्वयुजः } मासी अस्यस्मिन् ।) आश्विनमासः ।

इति शब्दरत्नावली ॥ ("अश्वयुक् क्षणपक्षे तु श्राद्धं कुर्य्यादिति स्मृतिः" । भाद्रपदाश्वयुजौ वर्षाः । इति सुश्रुतः ।)

अश्वरक्षः, पुं, (अश्वान् रक्षतीति । अश्व + रक्ष + अण् ।) घोटकरक्षकः । अश्वपालः । इति जटाधरः ॥

अश्वरोधकः, पुं, (अश्वान् रुणद्धि । अश्व + रुध् + ण्वुल् ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥

अश्वलाला, स्त्री, (अश्वस्य लालेवाकारेण ।) सर्पविशेषः । तत्पर्य्यायः । हलाहलः २ ब्रह्मसर्पः ३ । इति चिकाण्डशेषः ॥

अश्ववक्त्रः, पुं, (अश्वस्य वक्त्रमिव वक्त्रं यस्य ।) किन्नरः । इति शब्दरत्नमाला ॥

अश्ववड़वं, क्ली, अश्ववड़वानां समाहारः । अश्ववड़वयोर्द्वन्द्वे अश्ववड़वौ । अश्ववड़वानां द्वन्द्वे अश्ववड़वाः । इत्यमरटीकायां भरतः सारसुन्दरी च । घोड़ा घुड़ीर समाहारद्वन्द्वसमासे क्लीवलिङ्गेर एकवचन हय इतरेतरद्वन्द्वे पुंलिङ्गेर द्विवचन बऊवचन हय इति भाषा ॥

अश्ववहः, पुं, (अश्वेन उह्यते यः सः । अश्व + वह + अच् ।) अश्ववाहकः । इति जटाधरः । घोड़सओयार इति भाषा ॥

अश्ववारः, पुं, (अश्वं वारयतीति । अश्व + वृ + अण् ।) सादी । इति हेमचन्द्रः । घोड़सओयार इति भाषा ॥

("परस्परोत्पीड़ितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः" ।
इति माघे ।)

अश्ववारणः, पुं, (अश्वं वारयति + अश्व + वृ + णिच् + ल्यु ।) गलकम्बलरहितगोसदृशपशुविशेषः । तत्पर्य्यायः । गवयः २ वनगवः ३ गोसदृक्षः ४ । इति हेमचन्द्रः ॥

अश्ववित्, [द्] पुं, (अश्वं अश्वविद्यां वेत्तीति । अश्व + विद् + क्विप् ।) नलराजः । इति चिकाण्डशेषः ॥ (नलस्य राज्ञोऽश्वविद्याज्ञता वर्णिता भारते । यथा ।

"बाऊकस्तमुवाचाथ देहि विद्यामिमां मम ।
मत्तोऽपि चाश्वहृदयं गृह्णातु पुरुषर्षभ ! ॥
ऋतुपर्णं ततो राजा बाऊकं कार्य्यगौरवात् ।
हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः ॥
ग्रथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परं ।
निक्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु बाऊक" ॥
बाऊको बाऊकवेशधारी नलः ।)

अश्ववैद्यः, पुं, घोटकचिकित्सकः । सालोतरी इति हिन्दिभाषा । अश्वस्य वैद्यः इति षष्ठीतत्पुरुषसमासनिष्पन्नः ॥

अश्वशाला, स्त्री, घोटकगृहं । घोड़ार पाइशाल । आस्तबल् इति भाषा । यथा वाजिशाला तु मन्दुरा । इत्यमरः ॥ द्वे अश्वावस्थानगृहे । वाजिनोऽश्वस्य शाला गृहं वाजिशाला । अश्वशालादि च । इति तट्टीकायां भरतः ॥ ("कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च" । इति भारते ।)

अश्वशृङ्गालिका स्त्री, (अश्वशृङ्गालयोर्विरम् । द्वन्द्वात् वुन् । वैरमैथुनिकयोरिति वुन् ।) अश्वशृङ्गालयोर्वैरम् । इति शब्दरत्नावली ॥

अश्वषड़्गवं, क्ली, (अश्व + षड़्गवच् ।) अश्वषट्कं । षड़श्वाः । इति पाणिनिः ॥

अश्वसेनसूपनन्दनः, पुं, (अश्वसेनो नृपस्तस्य नन्दनः ।) सनत्कुमारः । इति हेमचन्द्रः ॥

अश्वा, स्त्री, (अश्व + टाप् ।) घोटकी । घुड़ी इति भाषा । तत्पर्य्यायः । वामी २ वड़वा ३ । इत्यमरः ॥

अश्वारिः, पुं, (अश्वानामरिः ।) महिषः । इति जटाधरः ॥

अश्वारूढ़ः, पुं, (अश्व आरूढ़ो येन ।) अश्वारोहः । घोटकोपरि क्षतारोहणः । यथा । "अश्वारोहास्तु सादिनः" । इत्यमरः ॥ द्वे अश्वारूढ़े । अश्वमारोहन्ति अश्वारोहाः घञ् षण् । सादयन्ति अश्वान् सादिनः ग्रहादित्वात् णिन् । इति तट्टीकायां भरतः ॥

अश्वारोहः, त्रि, (अश्वमारोहतीति । अश्व + आ + रुह + अण् ।) अश्वएष्ठस्थितयोद्धा । घोड़सोयार इति भाषा । तत्पर्य्यायः । सादीर इत्यमरः ॥ अश्ववहः २ । इति जटाधरः ॥ अश्ववारः ४ तुरगी ५ । इति हेमचन्द्रः ॥

अश्वारोहा, स्त्री, अश्वगन्धावृक्षः । अश्ववाहके त्रि । इति मेदिनी ॥ (अश्वगन्धाशब्देऽस्याः गुणा आख्याताः ।)

अश्वारोही, [न्] त्रि, अश्वारोहणविशिष्टः । अश्वारूढ़ः । अश्वारोहणकर्त्ता । अश्वारोहणशीलः ॥ घोड़सोयार इति भाषा । अश्वमारोढ़ुं शीलमस्येत्यर्थे णिन्प्रत्ययेन निष्पन्नः ॥

अश्वावरोहकः, पुं, अश्वगन्धावृक्षः । इति रत्नमाला ।

अश्वास्तः, (अश्वस्यास्तीव ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

अश्विनी, स्त्री, (अश्वः अश्वरूपं विद्यते यस्याः । अश्व + इन् + ङीप् ।) सप्तविंशतिनक्षत्रान्तर्गतप्रथमनक्षत्रं । अश्विन्यादयो रेवत्यन्ताः सप्तविंशतितारा दक्षस्यापत्यत्वात् दाक्षायण्य उच्यन्ते । तत्पर्य्यायः । अश्वयुक् २ दाक्षायणी ३ । इत्यमरः ॥ सा चन्द्रस्य भार्य्या । नवपादात्मकमेषराशेरादिचतुष्पादरूपा च ॥ अस्या रूपं । घोटकमुखाकृतितारात्रयात्मकं । अस्या अधिष्ठात्री देवता अश्वारूढ़पुरुषः । इति ज्योतिःशास्त्रं । तस्यां जातफलं । "सदैव देवाभ्युदितो विनीतः सत्त्वान्वितः प्राप्तसमस्तसम्पत् । योधाविभूषात्मजभूरितोषः स्यादश्विनीजन्मनि मानवस्य" । इति कोष्ठीप्रदीपः ॥ तस्य मस्तकोपरि उदये कर्कटलग्नस्य १।३० त्रिंशत्पलाधिकदण्डैको गतो भवति । यथा । "तन्वि घोटकमुखाकृतौ त्रिभे मस्तकोर्द्ध्वपथभाजि वाजिनि । चारुचन्द्रमुखि कर्कटोदयात् निर्गता गगनरन्ध्रलिप्रिका" ॥ इति श्रीकालिदासकृतराजसभनिर्णयः ॥

अश्विनीकुमारौ, पुं, (अश्विन्या अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजौ कुमारौ ।) अश्विनीसुतौ । अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजपुत्रौ । तौ देववैद्यौ । (यथा हरिवंशे,

"विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यामरिन्दम ! ।
तस्य भार्य्याभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः" ॥
"देवौ तस्यामजायेतामश्विनौ भिषजां वरौ" ।)
नित्यद्विवचनान्तशब्दोऽयं ।

अश्विनीपुत्रौ, पुं, (अश्विन्याः पुत्रौ ।) सर्व्वैद्यौ । इति हेमचन्द्रः ॥

अश्विनीसुतौ, पुं, (अश्विन्याः सुतौ ।) अश्विनीपुत्रौ । तयोः पर्य्यायः । सर्व्वैद्यौ २ अश्विनौ ३ दस्रौ ४ नासत्यौ ५ आश्विनेयौ ६ । इत्यमरः । नासिक्यौ ७ गदागदौ ८ । इति जटाधरः ॥ पुष्करसजौ ९ । इति शब्दरत्नावली ॥

अश्विनौ, पुं, (प्रशस्ता अश्वाः सन्ति ययोः । इनिः । यद्वा, अश्विन्याम् जातौ । सन्धिवेलेत्यणो नक्षत्रेभ्यो बञ्जलमिति लुकि लुक्तद्धितलुकीति ङीपो लुक् ॥) अश्विनीकुमारौ । इत्यमरः ॥

("त्वाष्ट्री तु सवितुर्भार्य्या वड़वारूपधारिणी ।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ" ॥
इति महाभारते ।
"किमश्विनौ सोमरसं पिपासू" ।
इति भट्टौ ।)

("अश्विनौ देवभिषजौ यज्ञवाहाविति स्मृतौ ।
दक्षस्य हि शिरश्छिन्नं पुनस्ताभ्यां समाहितं ॥
प्रपूर्णा दशनाःपूष्णो नेत्रे नष्टे भगस्य च ।
वचिगच्च भुजस्तस्ताभ्यामेव चिकित्सितः ॥
चिकित्सितस्तु प्रीतांशुर्गृहीतो राजयक्ष्मणा ।
सोमाग्निपतितस्चन्द्रः क्षतस्ताभ्यां पुनः सुखी ॥
भार्गवस्यावनः कामी वृद्धः सन् विक्षतिं गतः ।
वीतवर्णस्वरोपेतः क्षतस्ताभ्यां पुनर्युवा ॥
एतैश्चान्यैश्च बऊभिः कर्म्मभिर्भिषगुत्तमौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां महात्मनां ॥
ग्रहास्तोत्राणि मन्त्राणि तथान्यानि हवींषि च ।
धूम्राश्च पंशवस्ताभ्यां प्रकल्प्यन्ते द्विजातिभिः ॥
प्रातश्च सवने सोमं ग्रक्षोऽश्विभ्यां सहाश्नते ।
सौत्रामण्याश्च भगवानश्विभ्यां सह मोदते ॥
इन्द्राग्नी चाश्विनौ चैव स्तूयन्ते प्रायशो द्विजैः ।
स्तूयन्ते वेदवाक्येषु न तथान्या हि देवताः ॥
अमरैरजरैस्तावद्विबुधैः साधिपैर्ध्रुवैः ।
पूज्येते प्रयतैरेवमश्विनौ भिषजाविति ॥'
इति चरकः ॥

"श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः । भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः । भवद्भ्यां यज्ञस्य शिरः सन्धातव्यं । तावूचतुरेवमस्त्विति । अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन् । ताभ्यां यज्ञस्य शिरः संहितमिति" ॥ इति सुश्रुतः ॥)

अश्वीनः, त्रि, एकाश्वकरणकादिनैकगम्यस्यानादिः । आश्विन इत्यमरः ॥ वृद्धभावपक्षे अश्विनः ॥

अश्वीयं, क्ली, (अश्वानां समूहः । अश्व + छ ।) अश्ववृन्दं । अश्वसमूहः । तत्पर्य्यायः । चाश्वं २ । इत्यमरः ॥

अश्वोप्यः, त्रि, (अश्वाय हितः । अश्व + ङ्य ।) अश्वहितकारी । इति मेदिनी ॥ अश्वसम्बन्धीयः ॥

अष ऋ (भादिः उभं-सकं-सेट् ।) दीप्तौ । ग्रहणे । गतौ । इति कविकल्पद्रुमः ॥ ऋ अर्यति अर्षते । इति दुर्गादासः ॥

अषड्ग्रीणः, त्रि, (अविद्यमानानि षड्ग्रीणि यत्र । अषड्ग्रन्थिरिवड्वलङ्मेति स्वार्थे खः । अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ।) यो मन्त्रादिर्ह्याभ्यां क्रियते न ह्रतीयादीनां गोचरः । इत्यमरः । दुइजने करा मन्त्रणा इति भाषा ॥

अषाढः, पुं, (अषाढ़या युक्ता पौर्णमासी आषाढ़ी, सा यत्र मासे अण् वा लुक् । आषाढ़ी पूर्णिमा प्रयोजनमस्य । प्रयोजनार्थे अण् ।) आषाढ़मासः । ऋते पालाशदण्डः । इत्यमरटीकाधृतहिरूपकोषः ॥

अषाढ़कः, पुं, (अषाढ + स्वार्थे कन् ।) आषाढ़मासः । इति शब्दमाला ॥

अष्ट, [न्] त्रि, (अश्नुते अश्नु व्याप्तौ कन् ।) सप्तभ्यूर्ध्वां तुट् चेति कनिन् ।) संख्याविशेषः । ८ आठ इति भाषा । नित्यबहुवचनान्तः शब्दोऽयं । इति व्याकरणं ॥ अष्टवाचकशब्दाः । योगाङ्ग १ वसुः २ शिवमूर्त्तिः ३ दिगन्तः ४ सिद्धिः ५ ब्रह्मश्रुतिः ६ व्याकरणं ७ दिक्पालः ८ अहिः ९ कुलाद्रिः १० ऐश्वर्य्यं ११ । इति कविकल्पलता ॥

अष्टकः, त्रि, (अष्टावध्यायाः परिमाणमस्य । अष्टन् + कन् ।) अष्टसंख्या । अष्ट एवाष्टकः स्वार्थे कप्रत्ययः । अष्टसंख्याविशिष्टं यथा,—"गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं सुखदं मनुष्यः" । इति वाल्मीकीयगङ्गाष्टकं ॥ अपि च ।

"अच्युतं केशवं विष्णुं हरिं सत्यं जनार्द्दनं ।
हंसं नारायणञ्चैव एतन्नामाष्टकं शुभं" ॥
इति ब्रह्मपुराणे श्रीविष्णुनामाष्टकं स्तोत्रं ॥

अष्टकर्णः, पुं, (अष्टौ कर्णा यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

अष्टका, स्त्री, (अश्नन्ति पितरोऽस्याम् । अश् + तकन् ।) आद्धविशेषः । तिथिभेदः । तद्यथा । गौणचान्द्रपौषमाघफाल्गुनमासीयकृष्णाष्टमी । आश्विनकृष्णाष्टमी च । एतासु आद्धमावश्यकं । यथा । आग्रहायण्या ऊर्द्धं तिसृषु कृष्णाष्टमीषु आद्धानि नित्यानि । यथा गोभिलः ।
"अष्टका योर्द्धमाग्रहायण्यास्तिस्राष्टमी" ।
इति । ब्रह्मपुराणे ।
"पित्र्यदानाय मूले स्युरष्टकास्तिस्र एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्दो विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूर्वैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष क्रमगतो विधिः" ।
मूले प्रधानस्थाने अमावास्यायां अमावास्या हि आद्धस्य प्रधानकालस्तदुदिति यावत् । ऐन्द्री साग्नेरिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः ।
"यद्युवाप्यतरसम्भारः स्यात्तदापि पशुनैव कुर्य्यात्" इति । यद्युवेति निपातसमुदायो यद्यर्थे पशुरपि छाग एव । छागोऽनादेशे पशुः । इति गौतमात् । न च तैषा ऊर्द्धमष्टम्यां गौः । इति गोभिलसूत्रेण गवोयदेशात् कथमनुपदिष्टत्वमिति वाच्यं । तदसम्भवे पशुरित्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । तैषी पौषी । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः । यथा,—
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय आद्धाय मृगं हत्वा महाबलः" ॥
इति । स्त्रिया बधाभावमाह सएव ।
"अवध्यास्तु स्त्रियं प्राऽऽहुस्तिर्य्यग्योनिगतामपि" ।
एतदर्द्धं ब्रह्मपुराणेऽपि । आरण्यानामगस्त्यप्रोक्तिरत्नं वक्ष्यते । पश्वभावे स्थालीपाकेन । यथा गोभिलः । "अपि वा स्थालीपाकं कुर्व्वीत" । इति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्यादथानुकल्पिकं ।
अपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु" ॥
इति छन्दोगपरिशिष्टोक्तं ग्राह्यं । अन्विति ओदनचरोः पश्चात् । अतएव सातातपः ।
"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्युरुपश्यन्त्यमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च" ।
तस्मादन्नं प्रधानं । पूपादिकन्तूपकरणत्वेन शक्तानामावश्यक उभयत्र सदेति अवशात् । तथा च ।
"नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।
उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् ॥
फलश्रुतेर्व्वीप्सया च तस्मित्यमिति कीर्त्तितं" ।
इति तिथ्यादितत्त्वम् ॥
गौणचान्द्रपौषस्य कृष्णाष्टमी पूपाष्टका । गौणचान्द्रमाघस्य कृष्णाष्टमी मांसाष्टका । गौणचान्द्रफाल्गुनस्य कृष्णाष्टमी शाकाष्टका । केषाञ्चिन्मते गौणचान्द्राश्विनस्य कृष्णाष्टमी अष्टकापदवाच्या । तासु क्रमात् पूपमांसशाकैः षाट्पौरुषिकं आद्धं कर्त्तव्यं । इति ब्रह्मवायुविष्णुधर्म्मोत्तरपुराणानि ॥

अष्टकाष्ठं, क्ली, (अष्टकमष्टकस्य ।) नयपीठी । इति चिकाण्डशेषः ॥ पाष्टार छक् इति भाषा ।

अष्टपात्, [द्], पुं, (अष्टौ पादा यस्य ।) लूता । भाकड़सा । इति भाषा । शरभः । इति हेमचन्द्रः ॥

अष्टपादः, पुं, (अष्टौ पादा यस्य ।) ऊर्णनाभविशेषः । तत्पर्य्यायः । किन्नुनः २ । इति चिकाण्डशेषः ॥

अष्टपादिका, स्त्री, (अष्टसु दिक्षु पादा यस्याः । अत्यल्लोपः । ङीपि पद्भावे संज्ञायां कन् ह्रस्वः ।) लताविशेषः । इति रत्नमाला ॥ हापरमाली इति भाषा ॥

अष्टमः, त्रि, अष्टानां पूरणः । इति व्याकरणं ॥ (तस्य पूरणे डट् । नान्तादसङ्ख्यादेर्मट् ।) यथा । काव्यायनः ।
"अष्टमेऽहे चतुर्द्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमांशे च ततः किल भवद्गुणः" ॥
इति आद्धतत्त्वं ॥ अपि च ।
"सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम" ॥
इति देवीमाहात्म्यं ॥

अष्टमङ्गलं, क्ली, (अष्टप्रकारं मङ्गलम् ।) अष्टप्रकारमङ्गलद्रव्यं । तद्यथा,—
"भृङ्गराजो वृषो नागः कलसो व्यजनन्तथा ।
वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलं" ॥
इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतौ ॥
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथा क्षमः" ॥
इति शुद्धितत्त्वं ॥

अष्टमङ्गलः, पुं, (अष्टौ मङ्गलानि शुभचिह्नानि यस्मिन् ।) श्वेतवर्णमुखवत्सखुरकेशपुच्छयुक्तघोटकः । इति हेमचन्द्रः ॥

अष्टमङ्गलघृतं, क्ली, (अष्टाभिः मङ्गलजनकद्रव्यैः कृतं यद्घृतं ।) अष्टौषधयुक्तपक्वघृतं । यथा,—
"वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ।
सारिवा सैन्धवञ्चैव पिप्पली घृतमष्टमं ॥
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्द्दिने दिने ।
वृद्धस्मृतिः कुमारीणां पिबतामष्टमङ्गलं" ॥
इति भावप्रकाशः ॥

अष्टमानं, क्ली, (अष्टौ मुष्टयः परिमाणमस्य ।) कुड़वपरिमाणं । शरावार्द्धं । इति वैद्यकपरिभाषायां ॥
("प्रसृतिभ्यामञ्जलिःस्यात् कुड़वोऽर्द्धशरावकः ॥
अष्टमानश्च स ज्ञेयः", इति शार्ङ्गधरः ॥)

अष्टमिका, स्त्री, (अष्टम + कन् + स्त्रियामाप् ।) शुक्तिपरिमाणं । चतुस्तोलकं । इति वैद्यकपरिभाषायां ॥
("स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा" ॥
इति शार्ङ्गधरः ॥)

अष्टमी, स्त्री, (अष्टानां पूरणी । अष्टम + ङीप् ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥ तिथिविशेषः । सा चन्द्रस्याष्टमकलात्रियारूपा । तदुपलक्षितकालरूपा च । सा च शुक्ला नवमीयुता ग्राह्या युग्मात् । कृष्णा च सप्तमीयुता । यथा निगमः ।
"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्द्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्य्येषु एष धर्म्मः सनातनः" ॥ ० ॥
भविष्यपुराणे ।
"चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ।
योऽश्नीयेकं न भुञ्जीत शिवार्चनपरो नरः ॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां ।
तत्पुण्यं सकलं तस्य शिवलोकञ्च गच्छति" ॥
ततश्च सततसत्रयाज्यक्षयपुण्यसमपुण्यप्राप्तिः शिवलोकगतिश्च फलं । फाल्गुनशुक्लाष्टमीचतुर्द्दश्योरारभ्य वर्षं यावत् प्रत्यष्टमीप्रतिचतुर्द्दश्युपवासव्रतं ॥ ० ॥ कालिकापुराणे ।
"यैषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥

रक्तपद्मासनस्था च मुकुटकुण्डलमण्डिता ।
रक्तकौषेयवस्त्रा तु स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वं त्रैकमक्षरं ॥
मन्त्रमस्यास्तु तज्ज्ञेयं तेन देवीं प्रपूजयेत्" ।
एकमक्षरं श्रीक्लिंवीजरूपं ।
"तथाष्टम्यां नवम्याञ्च पूजा कार्य्या विचक्षणैः ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकां ॥
यः पूजयेद्भौमवारे शुभैर्दूर्व्वाक्षतैः शिवां ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात्" ॥* ॥
ज्योतिषे। ग्रनैश्चरस्य वारेण वारेणाङ्गारकस्य च।
"कृष्णाष्टमी चतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते" ॥
तथा—
"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी ।
चतुर्थ्यङ्गारवारे च अष्टमी च ग्रहस्पतौ ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिजन्मसहस्राणि प्रतिजन्म तदश्नुते" ॥
इति तिथ्यादितत्त्वं ॥* ॥ श्रीकृष्णजन्माष्टमीव्रतं अष्टकाश्राद्धं भीष्माष्टमीकृत्यञ्च तत्तच्छब्दे द्रष्टव्यं ॥ महाष्टमीकृत्यं महाष्टमीशब्दे द्रष्टव्यं ॥ तत्र जातफलं ।
"भूपालतः प्राप्तधनः कृशाङ्गः
सुखी कृपालुर्युवतिप्रियश्च ।
चतुष्पदाढ्यो धनधान्ययुक्तः
स्यादष्टमीजो मनुजः सुधीरः ॥"
इति कोष्ठीप्रदीपः ॥

अष्टमूर्त्ति, पुं, (अष्टौ मूर्त्तयो यस्य ।) शिवः । इति हेमचन्द्रः ॥ तस्यैकमूर्त्तिनामानि । क्षितिमूर्त्तिः सर्व्वः १ जलमूर्त्तिर्भवः २ अग्निमूर्त्तिः रुद्रः ३ वायुमूर्त्तिरुग्रः ४ आकाशमूर्त्तिर्भीमः ५ यजमानमूर्त्तिः पशुपतिः ६ चन्द्रमूर्त्तिर्म्महादेवः ७ सूर्य्यमूर्त्तिरीशानः ८। इति तन्त्रशास्त्रं ॥ एताः ग्ररभरूपिशिवस्याष्टपादाः इति कालिकापुराणं ॥ यथा ।
"अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तमोमयः" ।
इति वटुकभैरवस्तोत्रं ॥ तस्याष्टमूर्त्तयो यथा ।
"अग्निरिन्दुश्च सूर्य्यश्च भूमिरापः प्रभञ्जनः ।
यजमानः खमष्टौ च महादेवस्य मूर्त्तयः" ॥
इति शब्दमाला ॥
("अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्" ॥
इति रघुवंशे ॥ तथा कुमारे च ।
"तत्राग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः" ॥)

अष्टलोहकं, क्ली, अष्टधातुविशेषः । तद्यथा । सुवर्णं १ रजतं २ ताम्रं ३ रङ्गं ४ सीसं ५ कान्तलोहं ६ मुण्डलोहं ७ तीक्ष्णलोहं ८। इति राजनिर्घण्टः ॥

अष्टवर्गः, पुं, (अष्टानां औषधविशेषाणां रविप्रभृतीनां वा वर्गः ।) औषधविशेषाष्टकं । तद्यथा । ऋषभः १ जीवकः २ मेदः ३ महामेदः ४ ऋद्धिः ५ वृद्धिः ६ काकोली ७ क्षीरकाकोली ८। इति वैद्यकपरिभाषा । एकीकृतैतदौषधगुणाः । रक्तपित्तव्रणवायुपित्तनाशित्वं । इति राजवल्लभः ॥
("जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके ।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितस्वरकादिभिः ॥
अष्टवर्गो हिमः स्वादुर्वृंहणः शुक्रलो गुरुः ।
भग्नसन्धानकृत् कामबलासबलवर्द्धनः ॥
वातपित्तास्रवट्दाहज्वरमेहक्षयप्रणुत्" ।
इति भावप्रकाशः ॥)
ज्योतिषशास्त्रोक्तगोचरविशेषः। तद्यथा। आदौ रव्यादिसप्तग्रहाणां राहोश्च अष्टमासकोष्ठं कृत्वा प्रत्येकमासकोष्ठे जन्मकालीनग्रहाधिष्ठितराश्यवधिस्थादिनकृच्छुभद इत्यादि दीपिकोक्तवचनाङ्कसंख्यकग्रहे रेखां विन्यसेत् तत्र रवेर्दादशकोष्ठे ४८ चन्द्रस्य ४६ कुजस्य ३६ बुधस्य ५५ गुरोः ५६ भृगोः ५२ शनेः ३६ राहोः ३६ एतत्संख्यका रेखा देयाः। ततः प्रत्येकग्रहस्थरेखाः द्विगुणीकृत्य अष्टाधिकास्येत् अष्टभिः शोधयेत्। शेषा रेखाः शुभाः ख्याताः। अष्टौनास्येत्तदा विन्दुभिरङ्कानां पूरणं कार्य्यं। तत्र विन्दवोऽशुभाः ख्याताः। अष्टौ चेत् तदा विन्दुरेखयोरभावस्तत्र समं परिकीर्त्तितं ॥ तस्य नामगुणाः ।
"जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके ।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितस्वरकादिभिः ॥
अष्टवर्गो हिमः स्वादुर्वृंहणः शुक्रलो गुरुः ।
भग्नसन्धानकृत् बल्यः शरीरबलवर्द्धनः ॥
वातपित्तास्रवट्दाहज्वरमेहक्षयप्रणुत्" ।
इति भावप्रकाशः ॥* । ज्योतिःशास्त्रोक्तगणनया रेखाविन्दुभ्यां शुभाशुभफलसूचकजन्मकालीनाष्टग्रहसमुदायः। यथा। अथाष्टवर्गः।
"जन्मकालग्रहस्थित्या फलं वक्ष्ये शुभाशुभं" ।
खादिनकृत् शुभदः क्षितिपक्षसमुद्रनगादिकपक्षगतो १ । २ । ४ । ७ । ८ । ६ । १० । ११ । ऽथ विभावरिभर्त्तुस्याङ्कदशेषगतो ३ । ६ । १० । ११ । ऽथ कुनाद्रविवत् १ । २ । ४ । ७ । ८ । ६ । १० । ११ । अथ सोमसुताच्चिशरर्त्तुनवादिषु यातः । ३ । ५ । ६ । ६ । १० । ११ । १२ । देवगुरोर्विधयर्त्तुनवेशगतो ५ । ६ । ६ । ११ । ऽथ सुरारिगुरोः समयाचलभास्करयातः । ६ । ७ । १२ । तीक्ष्णमरीचिसुतादपि भास्करवत् । १ । २ । ४ । ७ । ८ । ६ । १० । ११ । अथ लग्नग्रहात् चिन्नताङ्कदशादिषु यातः ३ । ४ । ६ । १० । ११ । १२ । रविरेखाः । ४८ । भूसङ्गविलासाभिधानमालादण्डकेनादित्याष्टवर्गः ॥* ॥ चन्द्रः शुभोऽर्काच्चिकालाद्रिदन्ताब्धलाशशिवस्य । ३ । ६ । ७ । ८ । १० । ११ । स्वतः खात् कुरामर्त्तगाशशिवस्यः । १ । ३ । ६ । ७ । १० । ११ । ख्याजोद्विवक्त्रीयुषड्गोदिगीशेष्व । २ । ३ । ५ । ६ । ६ । १० । ११ । थ ख्यात् कुरामाब्धिवाणागदन्तावलाशशिवस्यः १ । ३ । ४ । ५ । ७ । ८ । १० । ११ । जीवात् कुदृग्वेदशैलेभकाष्ठाशिवस्थो १ । २ । ४ । ७ । ८ । १० । ११ । ऽथ शुक्राद्विवेदेषु-

शैलेषुहाशाग्निवस्थः ३ । ४ । ५ । ७ । ६ । १० । ११ । तीक्ष्णांशुदेहोद्भवाद्रामबाणर्त्तुगम्भुस्थितो ३ । ५ । ६ । ११ । ऽथोदयाद्दयवाहर्त्तुकाष्ठाग्निवस्थः । ३ । ६ । १० । ११ । चन्द्ररेखाः । ४६ । कामबाणाभिधानमालादण्डकेन चन्द्राष्टवर्गः ॥* ॥ कुजोऽर्काच्छुभो वह्निबाणर्त्तुदिक्शुम्भुगो ३ । ५ । ६ । १० । ११ । ऽथेन्दुतो रामकालेशुग ३ । ६ । ११ । स्वतः खात् कुदृग्वेदसप्ताष्टदिक्शुम्भुगः स्यात् १ । २ । ४ । ७ । ८ । १० । ११ । निशानाथपुत्राद्रुणेष्वङ्करन्ध्रोपयातः । ३ । ५ । ६ । ११ । ततो जीवतः कालकाष्ठाग्निवार्काभयातो ६ । १० । ११ । १२ । ऽथ देवारिपूज्यादनेष्वो गजेशार्कसंख्यः । ६ । ८ । ११ । १२ । ततः सूर्य्यपुत्रात् कुवेदागनागग्रहाग्न्याग्निवस्थो १ । ४ । ७ । ८ । ६ । १० । ११ । ऽथ लग्नात् कुरामाङ्कदिक्शम्भुयातः । १ । ३ । ६ । १० । ११ । कुजरेखाः ३६ । सिंहविलासाभिधानमालादण्डकेन भौमाष्टवर्गः ॥* ॥ ख्यः शुभोऽर्कतः शरर्त्तुगोग्निवार्काग्नगो ५ । ६ । ६ । ११ । १२ । ऽथ चन्द्रतो द्विवेदकालनागदिक्शैलेश्वरेषु । २ । ४ । ६ । ८ । १० । ११ । भूमिजात् कुदृक्कृतागनागगोदग्नेशगः । १ । २ । ४ । ७ । ८ । ६ । १० । ११ । ततः खतः कुवह्निपक्षषखवादिकेषु । १ । ३ । ५ । ६ । ६ । १० । ११ । १२ । वाक्पतेरसाग्न्यम्भुसूर्य्यगो ६ । ८ । ११ । १२ । ऽथ शुक्रतः कुवाङ्गवह्निवेदपक्षनागगोग्निवेषु । १ । २ । ३ । ४ । ५ । ८ । ६ । ११ । षड्गुतः कुदृक्कृतागनागपक्षखस्थितो ऽथ । १ । २ । ४ । ७ । ८ । ६ । १० । ११ । १२ । लग्नतः क्षितिद्विवेदकालनागदिक्शिवेषु । १ । २ । ४ । ६ । ८ । १० । ११ । बुधरेखाः । ५५ । अशोकमञ्जरीसंज्ञकमालादण्डकेन बुधाष्टवर्गः ॥* ॥ सुरराजगुरुः शुभदो रवितः कुयमानलवेदनगादिकपक्षगतो १ । २ । ३ । ४ । ७ । ८ । ६ । १० । ११ । ऽथ विधोर्द्विग्ररागलगोग्निवगो २ । ५ । ७ । ६ । ११ । वसुधातनयात् कुयमाब्धिनगाष्टदग्नेशगतो १ । २ । ४ । ७ । ८ । १० । ११ । ऽथ बुधात् क्षितियुग्मकृतेषुरसग्रहदिक्कुगिरिशोगत १ । २ । ४ । ५ । ६ । ६ । १० । ११ । खदनु खत एकयमानलवारिधिपर्व्वतनागदशेशगतो १ । २ । ३ । ४ । ७ । ८ । १० । ११ । ऽथ सितादयमपक्षरसग्रहदिग्निवगो २ । ५ । ६ । ६ । १० । ११ । रविनन्दनतो दहनेषुरसार्कगत ३ । ५ । ६ । १२ । ऽथ लग्नग्रहात् कुयमाब्धिशरर्त्तुनगग्रहदिग्गिरिशोपगतः १ । २ । ४ । ५ । ६ । ७ । ८ । १० । ११ । गुरुरेखाः ५६ । कुसुमस्तवकाभिधानमालादण्डकेन बृहस्पतेरष्टवर्गः ॥* ॥ भृगुः शुभो रवेर्गजेशसूर्य्यगो । ८ । ११ । १२ । ऽथ चन्द्रतः खादिपक्षकाष्टगोग्निवार्काग्नगः । १ । २ । ३ । ४ । ५ । ८ । ६ । ११ । १२ । कुजात् त्रिवेदकालगोग्निवार्काग्नगो ३ । ४ । ६ । ८ । ११ । १२ । ऽथ बोधनात् त्रिबाणकालरन्ध्रदिक्शैलेशग । ५ । ८ । ६ । १० ।

११। स्ततः स्ततः कुपच्चकाष्टरन्ध्रदिक्ग्निवोपगः १। ५। ८। ६। १०। ११। ग्रनैर्गुणाग्निपच्चनागगोदशैग्रगो। ३। ४। ५। ८। ६। १०। ११। ऽथ लग्नतः कुपच्चकाष्टगोग्निवस्थितः। १। २। ३। ४। ५। ८। ६। ११। शुक्ररेखाः। ५२। अनङ्ग-शेखराभिधानमालादण्डकेन भार्गवाष्टवर्गः॥ * ॥ शुभः पङ्कुरर्कात् स्थायमाम्भोधिशैलाष्टदिक्शुभ्रगः। १। २। ४। ७। ८। १०। ११। इन्दुतो रामकालेशुगतः। ३। ६। ११। स्थासुताङ्गि-बाणर्तुकाष्टाग्निवार्कोपगो। ३। ५। ६। १०। ११। १२। ऽथ ग्नतः कालदन्तावनादिस्थितो। ६। ८। ६। १०। ११। १२। जीवतो बाणकालेशु-मार्त्तण्डयात। ५। ६। ११। १२। स्ततो दैत्य-पूज्यादनेहःग्निवार्कोपयातः। ६। ११। १२। स्ततो वीतिहोत्रेषु कालेशुयात। ३। ५। ६। ११। स्ततो ग्नतः स्थागुणाम्भोधिषड्दिक्गहेशस्थितः। १। ३। ४। ६। १०। ११। ग्रनैरेखाः ३६। मत्तमातङ्गलीलाभिधानदण्डकेन ग्रनैश्चराष्टवर्गः। इति दीपिका। * ॥ राज्ञः शुभोऽर्काद्भुजवह्नि-वेदर्त्तुरन्ध्रगो। २। ३। ४। ६। ६। ऽथ चन्द्रात् कुराम्बेदाङ्कग। १। ३। ४। ६। स्ततः कुजा-दङ्गिबाणाङ्करन्ध्रगतो। ३। ५। ६। ६। ऽथ बुधाच्छशिपच्चवह्निबाणरन्ध्रग। १। २। ३। ५। ६। स्ततो जीवाद्व्यवाहवेदाङ्करन्ध्रग। ३। ४। ६। ६। स्ततः शुक्रात् पच्चवह्निबाणरन्ध्रगत। २। ३। ५। ६। स्ततः सौरात् पच्चबाणर्तुग। २। ५। ६। स्ततः स्ततः ग्नग्निवेदबाणरिपुरन्ध्रगो। १। ४। ५। ६। ६। ऽथ लग्नाद्वेदरन्ध्र-दिग्युद्यसूर्य्यगतः। ४। ६। १०। ११। १२। राज्ञरेखाः। ३६। मृगेन्द्रविलासाभिधानदण्डकेन राज्ञोरष्टवर्गः॥ * ॥ सूर्य्यादेकद्वितुःसप्ताष्ट-दशैकादशेषु। १। २। ४। ७। ८। १०। ११। सोमात्तिथष्ड्दशैकादशेष। ३। ६। १०। ११। भौमात्तिपच्चषड़ेकादशेषु। ३। ५। ६। ११। बुधात् षड़ष्टनवदशैकादशेषु। ६। ८। ६। १०। ११। गुरोः पच्चषड़ेकादशद्वादशेषु। ५। ६। ११। १२। शुक्रात् षड़ेकादशद्वादशेषु ६। ११। १२। ग्नेस्तिथपच्चाष्टदशैकादशेषु। ३। ५। ८। १०। ११। लग्नादेकत्रितुःषड्दशकादशेषु। १। ३। ४। ६। ११। एवं लग्नरेखाः ३७॥ * ॥

"इति निगदितमिष्टं नेष्टमन्यद्दिशेषा-
दधिकफलविपाकं जन्मभात्तत्र दद्युः।
उपचयमष्टमित्रस्थोचगाः पुष्टमिष्टं
त्वपचयमष्टनीचारातिभे नेष्टसम्यत्॥
यावती यावती रेखा ग्रहाणामष्टवर्गके।
तावतीं दिग्गुणीकृत्य अष्टाभिः परिशोधयेत्॥
अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरविन्दवः।
अष्टाभिस्तु समो यत्र तत् समं परिकीर्त्तितम्॥
रेखा ग्रहाच्छुभे देया विन्दवस्त्वेतरत्र तु।
रेखाविन्दू समानौ चेत् समस्तत्र निगद्यते॥
रेखाधिक्ये शुभं ज्ञेयं तद्दिन्दोरधशुभम्।
श्रीरानन्दस्तथा श्रेयो भोगो राज्यं भवेत्तथा॥

मलिनोऽथ विपत्तैव हानिर्मृत्युर्भवेत्तथा।
ह्यादिरेखा ह्यादिविन्दोः फलान्येतान्यनुक्रमात्॥
रेखायां वत्सरो ज्ञेयः सार्द्धसप्तदिनं समे।
अष्टवर्गदशायुः स्यात् दिनं चतुर्धु विन्दुषु"॥
इत्यायुर्दायः। इत्यष्टवर्गः॥ * ॥ नन्दी।
"अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभस्वरैः।
गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ च वेधगैः॥
व्रतारम्भे विवाहे च यात्रायां च्चरकर्म्मणि।
अविशुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः॥
"ततं दिग्रति गराणां
राशौ भथेऽष्टवर्गफलं निखिलं।
भावफलं प्रथमार्द्धे
दृष्टिफलान्यर्द्धभुक्तेषु"॥
इत्यष्टवर्गार्थकथनम्। इति ज्योतिस्तत्त्वम्॥

अष्टश्रवाः, [स्] पुं, (अष्टौ श्रवांसि यस्य। चतु-र्मुखस्य ब्रह्मणः प्रतिमुखं दिकर्णतया तथात्वम्।) ब्रह्मा। इति त्रिकाण्डशेषः॥

अष्टाकपालः, पुं, (अष्टसु कपालेषु संस्कृतः। संस्कृतं भक्ष्य इत्यणोदिगोर्लुगनपत्ये इति लुक्। अष्टनः कपाले हविर्मीत्यात्वम्।) यज्ञविशेषः। यत्र अष्टसु कपालेषु पुरोडाशः पक्ता क्रयते। इति श्रुतिः॥

अष्टाङ्गार्घ्यः, पुं, (अष्टौ अङ्गानि उपकरणानि यस्य तादृशोऽर्घ्यः।) अष्टद्रव्यघटितपूजोपकरणवि-शेषः। यथा,—
"आपः क्षीरं कुशाग्राणि दधि सर्पिः सतण्डुलाः।
यवाः सिद्धार्थकाश्चैव अष्टाङ्गार्घ्यः प्रकीर्त्तितः"।
इति तन्त्रम्॥
"आपः क्षीरं कुशाग्राणि दृतं मधु तथा दधि।
रक्तानि करवीराणि तथा रक्तश्च नन्दनम्॥
अष्टाङ्ग एष अर्घ्यो व भागवे परिकीर्त्तितः"।
इति कालीखण्डम्॥

अष्टादश [न्] त्रि, (अष्टाधिका दश।) अष्टाधिक-दशसंख्या। १८ आठार इति भाषा। नित्यबहु-वचनान्तशब्दोऽयं। इति सिद्धान्तकौमुदी॥ (यथा मनुः।
"अष्टादशसु मार्गेषु निवद्धानि पृथक् पृथक्"।)
अथाष्टादशवाचकशब्दाः यथा। दीपः १ विद्या २ पुराणं ३ स्मृतिः ४ धान्यं ५। इति कविकल्पलता॥
("अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथक्कजन्मजिश्रियाम्।"
इति नैषधे।
"अष्टादश पुराणानि कृत्वा सत्यवतीसुतः"।
इति भारते॥)

अष्टादशाङ्गः, पुं, (अष्टादश अङ्गानि यस्मिन्।) अष्टादशप्रख्यात्मकपाचनं। स चतुर्व्विधः। दश-मूल्यादिः १। भूनिम्बादिः २। द्राक्षादिः ३। मुस्तादिः ४। तद्यथा।
"दशमूली ग्रठी पृश्निपौष्करं सदुरालभा।
भार्गी कुटजवीजञ्च पटोलं कटुरोहिणी॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः।
कासहृद्रुहपार्श्वार्त्तिहिक्काश्वासवमीहरः"॥ १॥

"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रवीजधनिकेभकणाकषायः।
तन्द्राप्रलापकसनारुचिदाहमोह
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति"॥ २॥
"द्राक्षास्ता ग्रठी पृश्निपर्णी मुस्तकं रक्तचन्दनं।
नागरं कटुका पाठा भूनिम्बं सदुरालभं॥
उशीरं पद्मकं धान्यं बालकं कट्फलारिका।
पुष्करं पिचुमर्दञ्च क्वाथं जीर्णज्वरापहः॥
कासं श्वासञ्च विषमं श्वयथूदरनाशनं।
अष्टादशाङ्गमुदितमेतत् स्यात् सन्निपातनुत्"॥ ३॥
मुस्तपर्पटकोशीरदेवदारुमहौषधं।
त्रिफला धन्वयासञ्च नीली काम्पिल्लकं त्रिवृत्॥
किरातितिक्तकं पाठा बलाकटुकरोहिणी।
मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते॥
अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत्।
पित्तोत्तरे सन्निपाते हितश्चोक्तं मनीषिभिः॥
मन्यास्तम्भउरोघाते उरःपार्श्वशिरोग्रहे"॥ ४॥
इति सुखबोधः॥

अष्टापदं, पुं,क्ली, (अष्टसु धातुषु पदं प्रतिष्ठा यस्य। पञ्चौ पञ्चौ अष्टौ पदानि यस्येति वा। अष्टनः संज्ञायामिति दीर्घः।) स्वर्णं। धुस्तूरः। शारीणां फलकः। इत्यमरभेदिनीकरौ॥ पाशार क्क्क् इति भाषा। यथा "धुस्तूरः कनकाह्वयः"। इत्य-मरदर्शनात्। अष्टापदशब्दस्य कनकवाचकत्वाच्च॥ ("आवर्त्तिताष्टापदकुम्भतोयैः।"
इति कुमारसम्भवे॥
"स रामकरमुक्तेन निहतो द्यूतमण्डले।
अष्टापदेन बलवान् राजा वज्रधरोपमः॥"
इति हरिवंशे॥)

अष्टापदः, पुं, (अष्टौ पदानि यस्य।) शरभः मर्कटः। इति मेदिनी॥ लूता। चन्द्रमल्ली। क्रिमिः। कैलासपर्व्वतः। इति हेमचन्द्रः॥ कीलकः। इति धरणिः॥

अष्टापदी, स्त्री, (अष्टौ पादा यस्याः। संख्यासु पूर्व्व-स्येति पादस्यान्तलोपे पादोन्यतरस्यामिति ङीपि पादः पत्॥) चन्द्रमल्ली। इति मेदिनी॥

अष्टारचक्रवान् [त्] पुं, (अष्टारमष्टकोणं चक्रं विद्यते यस्य। अष्टारचक्र+मतुप्। मस्य वः।) जिनविशेषः। तत्पर्य्यायः। मञ्जुश्रीः २ ज्ञान-दर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चवीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४। इति त्रिकाण्डशेषः॥

अष्टिः, स्त्री, (अस्यते एधित्यां क्षिप्यते इति+अस+क्तिन्। एषोदरादित्वात् वत्वम्।) बीजं। इत्युणादिकोषः॥ आँठि इति भाषा।

अष्ठीवान् [त्] पुं, क्ली, (अतिशयितमस्थि यस्मिन्। अस्थि+मतुप्। मस्य वः। आसन्दीवदष्ठीवदिति निपातनादस्थिशब्दस्याष्ठीभावः।) जानु। इत्य-

मरः ॥ आँठु इति भाषा ।

अस ञ भावे । (अदां-परं-अकं-सेट् ।) भावः सत्ता । सा चेह विद्यमानतैव । न अस्ति विष्णुः । इति दुर्गादासः ॥ (वि + अति) । अतिक्रमे । पराभवे । "अन्यो व्यतिस्ते तु ममापि धर्म्मः" इति भट्टौ । (अभि) भागसत्तायाम् । "यदत्र ममाभिस्यात् दीयताम्" । इति पाणिनिः । (आविस्) आविर्भावे ।

"तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्" । इति कुमारे । (प्रादुस्) प्रादुर्भावे । उद्भवे ।

"महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः" । इति मनुः ।)

अस इ र् य उ क्षेपे । (दिवां-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ य अस्यति । उ असित्वा अस्वा । इर् आस्यत् आसीत् । अस्यमानं महागदा इति भट्टौ ताच्छील्ये ग्रतुः ग्रानः । इति दुर्गादासः ॥

("तस्मिन्नास्यदियीकाक्षं रामो रामावबोधितः" । इति रघुवंशे । (अति) अतिक्रमे । पराभवे ।

"वज्रभिश्चैकमत्यस्यन्नेकेन च बहून् जनान्" । इति रामायणे । (वि + अति) उत्क्षेपे ।

"अत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" । इति मनुः । (अप) दूरनिक्षेपे ।

वीरानपास्यज्जनकस्य कन्या
नेयं प्रतिज्ञा मम दत्तपूर्व्वा" ।

इति रामायणे । (अभि) अभ्यासे ।

"अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" । इति कुमारे । (नि) निक्षेपे । "न मद्विधो न्यस्यति भारमुद्यम्" । इति भट्टौ । (उप + नि) प्रस्तावे ।

"स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" । इति किराते । (सं + उप + नि) प्रमाणादिना दृढ़ीकरणे ।

"त्वया च मया समुपन्यस्तेष्वपि मन्त्रेष्ववज्ञानं वाक्पारूष्यञ्च कृतम्" । इति हितोपदेशे । (प्रति + नि) स्थापने ।

"तथैवायुधजालानि भ्रातृभ्यां कवचानि च । रथोपस्थे प्रतिन्यस्य सचर्म्म कठिनं च यत्" ॥ इति रामायणे । (निर्) दूरीकरणे । पराभवे ।

"यशांसि सर्व्वेषुभृतां निरास्यत्" ।

"तानर्हिदद्खादीच निरास्यच्च तलाहतान्" ॥ इति च भट्टौ । (परि) विस्तृतौ । "पर्य्यस्यन्निह निचयः सहस्रसंख्यां" । किराते ॥ "ताम्रोष्ठपर्य्यस्तरुचः स्मितस्य" । इति कुमारे ॥ पातने च ।

"दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा" । इति मानवे ॥ (सम्) संयोगे । एकत्र संश्लेषे । यथा,—

"सर्व्वोऽप्ययवयोऽङ्गा समस्यते ।"
"अयवं समर्थेन सह समस्यते ॥"

इति च पाणिनिः ॥ इत्यादिः ॥

अस ञ् अयार्थे । (भादिं-उभं-सकं-सेट् ।) अयार्थो दीप्तिग्रहणगतयः ॥ "वासुदेवं परित्यज्य योऽन्यदेवमुपासते" । उपगच्छतीत्यर्थः । लावण्य उत्पाद्यत इवास यत्न इत्यादिसिद्धे अनेकार्थत्वात् सत्तार्थोऽयमपीति रमानाथः । अनुप्रयोगादन्यत्रापि परोक्षायामस्तेर्भूभावं केचिन्नेच्छन्तीति धातुप्रदीपः । इति दुर्गादासः ॥

असंख्य, त्रि, असंख्यनीयः । संख्यारहितः । अपरिमितः । न विद्यते संख्या यस्येति बहुव्रीहिः । अगणनीयः । यथा,—

"असंख्यं द्विपरार्द्धादि पुद्गलात्मात्यनन्तकं" । इति हेमचन्द्रः ॥ अपि च ।

"शतयोजनविस्तीर्णैः शतस्कन्धसमन्वितैः ।
असंख्यशाखानिकरैरसंख्यपलसंयुतैः" ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥

असंख्यात, त्रि, संख्यारहितं । यथा । मदनपारिजाते ।

"अङ्गुल्यग्रेण यज्ज्ञानं यज्ज्ञानं मेरुलङ्घितं ।
असंख्यातञ्च यज्ज्ञानं तत्सर्व्वं निष्फलं भवेत्" ॥
इत्याह्निकाचारतत्त्वं ॥

असंस्कृत, त्रि, (न संस्कृतः । नञ्समासः ।) संस्काररहितः । यथा । आपस्तम्बः ।

"असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः" ।
इति शुद्धितत्त्वं ॥ अन्यच्च ।

"असंस्कृतप्रमीतस्य पिता न श्राद्धमाचरेत् ।
यदि स्नेहाचरेच्छ्राद्धं सपिण्डीकरणं विना" ॥
इति ।

"असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्य्यादिति धर्म्मो व्यवस्थितः" ॥
इति च श्राद्धतत्त्वं ॥

असंस्कृतवाक्य, क्ली, (असंस्कृतं संस्कृतेतरं वाक्यम् ।) संस्कृतेतरभाषा । तत्पर्य्यायः । अपभ्रंशः २ अपशब्दः ३ । इत्यमरटीका ॥

असंस्थान, क्ली, असंस्थितिः संस्थानाभावः । न संस्थानमसंस्थानमिति नञ्समाससिद्धम् ॥

असंहतः, पुं, (न संहन्यते येन । न + सम् + हन् + करणे क्त ।) व्यूहविश्लेषः । स तु सेनानां पृथग्वृत्तिः । इति रायमुकुटादयः ॥ (दस्युः । भोगः । मण्डलः ।) असमूहिते अहते च त्रि ॥

असंहत, त्रि, असंलग्नः । संहतो लग्नः न संहतः असंहतः इति नञ्समाससिद्धम् ॥

असकृत्, व्य, (न सकृत् । नञ्समासः ।) पुनः पुनः । वारं वारं । इत्यमरः ॥

("अनेकस्यैकधा साम्यमसकृद्व्याप्यनेकधा" । इति साहित्यदर्पणे ।

"अन्नाद्येनासकृच्चैतान् गुणैश्च परिचोदयेत्" । इति मानवे ।)

असङ्कल्पित, त्रि, (न सङ्कल्पितः । नञ्समासः ।) सङ्कल्पाविषयः । यथा । विष्णुपुराणे ।

"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ते त्वमलाः प्रयान्ति" ॥

इति मलमासतत्त्वं ॥

असङ्कुच, पुं, (न सङ्कुचः ।) विस्तृतः पन्थाः । इति हेमचन्द्रः ॥

असङ्ख्य, त्रि, सङ्ख्यारहितः । अगणनीयः । स तु द्विपरार्द्धादिः । इति हेमचन्द्रः ॥

असङ्कृत, त्रि, (न सङ्कृतः । नञ्तत्पुरुषः ।) सङ्कृतिरहितः । नासङ्कृतं प्रयुञ्जीतेति प्रसिद्धिः ॥ यथा । वस्तुतस्तु जिज्ञासुमेकपुरुषं प्रति सङ्कृतमपि अतादृग्रूपमन्यं प्रति असङ्कृतमिति यं प्रतिपादयितुमानन्तर्य्याभिधानं तादृग्रूपाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थः तं प्रति सङ्कृतिरिति पुरुषविशेषनियन्त्रितं सङ्कृतित्वं वाच्यं । इत्यनुमितिग्रन्थीयगदाधरी ॥ अयुक्तः । यथा देवीपुराणे ।

"षष्ठ्यहये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुता च ।
असङ्कृता मेन दिनद्वयेऽपि
पूज्या परा या भवतीह यत्नात्" ॥

इति तिथ्यादितत्त्वं ॥ (असभ्यः । अशिक्षितः । यथा हितोपदेशे ।

"आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसङ्कृतं वा" ॥)

असती, स्त्री, (न सती साध्वी । नञ्समासः ।) भ्रष्टा । व्यभिचारिणी तत्पर्य्यायः । पुंश्चली २ धर्षिणी ३ बन्धकी ४ कुलटा ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८ । इत्यमरः ॥ दृष्टा ९ दुष्टा १० धर्षिता ११ । इति शब्दरत्नावली ॥ सङ्ग १२ निशाचरी १३ चपारङ्गा १४ । इति जटाधरः ॥ ("आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्" । इति धर्म्मविवेके ।)

असतीसुतः, पुं, स्त्री, (असत्याः सुतः ।) व्यभिचारिणीपुत्रः । तत्पर्य्यायः । बान्धकिनेयः २ बन्धुलः ३ कौलटेरः ४ कौलटेयः ५ । इत्यमरः ॥

"बन्धुलः कौलटेरश्च कौलटेयोऽसतीसुतः ।
तथा बान्धकिनेयस्तु स्यात् कौलकेय इत्यपि ॥
अथ सत्यान्तु भिक्षुक्यां पुत्रो भवति यः पुनः ।
तत्र कौलटिनेयः स्यात्कौलटेयोऽपि स स्मृतः" ॥
इति शब्दरत्नावली ॥ अपि च । असतीसूनुः कौलटेरश्च बन्धुलः ।

"अपि बान्धकिनेयः स्यात्कौलटेयोऽतिभिक्षुकी ।
कुलटापि सती सा चेत् कौलटेयस्तदात्मजः ॥
अपि कौलटिनेयः स्यात्" । इति जटाधरः ॥

असतीसूनुः, पुं, (असत्याः सूनुः ।) कुलटापुत्रः । इति जटाधरः ॥

असत्, त्रि, (अस् + शतृ ततो नञ्समासः ।) अविद्यमानं । असाधुः । मूर्खः । ब्रह्मभिन्नवस्तु । इति वेदान्तः ॥ जड़वर्गः । यथा,—

"यच्च किञ्चित् क्वचिदस्तु सदसदाखिलात्मिके ।
तस्य सर्व्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा" ॥
इति देवीमाहात्म्ये १ अध्यायः ॥ सत् चेतनवर्गः । असत् जड़वर्गः ।

"तस्य सर्व्वस्य या शक्तिः सा यदा त्वं तदा कथं" । स्तूयेत्यर्थः । इति सट्टीकायां नागोजीभट्टः ॥ * ॥ निष्फलं । यथा,—

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।

असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" ॥
इति श्रीभवद्गीतायां १७ अध्याये २८ श्लोकः ॥*॥
निन्दितः। यथा,—
"असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा"।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे॥* अनित्यं। यथा।
"अज्ञानन्तु सदसद्भ्यामनिर्व्वचनीयं"। इत्यादि
वेदान्तसारः॥

असत्पथः, पुं, (न सन् पन्थाः।) मन्दपथः। तत्पर्य्यायः। कुपथः २ कापथः ३ अध्वः ४ दुरध्वः ५ अपथः ६ कदध्वा ७ विपथः ८ कुत्सितवर्त्म ९। इति शब्दरत्नावली॥

असदध्येता, (ऋ) त्रि, (असत् निषिद्धशास्त्रमधीते इति। असत्+अधि+इङ्+तृच्।) असदध्ययनशीलः। तत्पर्य्यायः। व्रतपः २। इति हेमचन्द्रः॥

असदृग्, त्रि, (न सदृग्। नञ्तत्पुरुषः।) अतुल्यः। अनुपमेयः। दृश्यसदृशौ स्तुतिरिति पुष्पदन्तः॥ यथा। ब्रह्मवैवर्त्ते।
"वित्तग्राह्यमकुर्व्वाणः सम्यक्फलमवाप्नुयात्।
कुर्व्वाणो वित्तग्राह्यन्तु लभते ऽसदृशं फलम्"॥
इति तिथ्यादितत्त्वं॥

असद्ग्रहः, पुं, (असति अप्राप्ये वस्तुनि ग्रहः आग्रहः।) अवहट्टिः। इति चिकाण्डशेषः॥ बालकादीनां खोइट आवदार इत्यादिभाषा।

असनं, क्ली, (अस्यते इति। अस+ल्युट्।) क्षेपणं। इति मेदिनी॥ ("दलनिरसने विनियोगः"। इति भवदेवः।)

असनः, पुं, वृक्षविशेषः। पियाशाल इति ख्यातः। तत्पर्य्यायः। महासर्ज्जः २ सौरिः ३ बन्धूकपुष्पः ४ प्रियकः ५ बीजवृक्षः ६ नीलकः प्रियसालकः८।
("प्रियविमानितमानवतीरुषां
निरसनैरसनैरहयार्थता"।
इति शिशुपाले।) अस्य गुणाः। कटुत्वं। उष्णत्वं। तिक्तत्वं। वातार्त्तिदोषगलदोषरक्तमयूहलनाशित्वं। सारकत्वञ्च। इति राजनिर्घण्टः॥ वृक्षभेदः। आसन इति ख्यातः। तत्पर्य्यायः। अजकर्णः २ वनेसर्ज्जः ३ महासर्ज्जः ४। इति रत्नमाला॥ अस्य गुणाः। कफपित्तनाशित्वं। इति राजवल्लभः।
("बीजकः पीतसारश्च पीतपालक इत्यपि।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः॥
बीजकः कुष्ठवीसर्पश्वित्रमेहगुदकृमीन्।
हन्त्यग्निमाक्षिपित्तञ्च त्वग्दोषो रसायनः"॥
इति भावप्रकाशेऽस्य पर्य्यायगुणौ कथितौ॥)

असनपर्णी, स्त्री, (असनस्य पर्णमिव पर्णमस्याः।) वृक्षविशेषः। तत्पर्य्यायः। वातकः २ पीतकः ३ पीतलवातः ४ अपराजिता ५ शुभ्रपर्णी ६। इत्यमरः॥ पीतः ७ पीतकः ८ सनपर्णी ९। इति शब्दरत्नावली॥ माराटी इति भरतः॥ ओसान इति सारसुन्दरी॥

असन, [त्] पुं, इन्द्रः। इति चिकाण्डशेषः॥

असन्तुष्टः, त्रि, (न सन्तुष्टः। नञ्समासः।) सम्यक् तुष्टिरहितः। सन्तोषशून्यः। यथा,—
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः"।
इति चाणक्यं॥

असन्नद्धः, त्रि, (न सम्यक् नद्धः स्वकार्य्यक्षमः।) समुद्भूतः। पण्डिताभिमानी। दर्पितः। इति जटाधरः॥ अकृतसन्नाहः॥

असन्मानं, क्ली, मानहानिः। अमर्य्यादा। अनादरः। असाधुमानं। असच्च तत् मानञ्चेति कर्म्मधारयसमासनिष्पन्नं॥

असभ्यः, त्रि, असभासत्। समानुपयुक्तः। असामाजिकः॥ न सभ्यः असभ्य इति नञ्समासनिष्पन्नः। खलः। यथा,—
"अयन्वसभ्यस्तव जन्म नो गृहे
श्रुत्वाग्रजांस्ते न्यवधीत् सुरेश्वर।
स तेऽवतारं पुरुषैः समर्पितं
श्रुत्वाधुनैवाभिसरत्युदायुधः"॥
इति श्रीभागवते १० स्कन्धे ३ अध्याये २० श्लोकः॥ असभ्यः खलः। समर्पितं कथितं। इति श्रीधरस्वामी॥

असमः, पुं, (नास्ति समो यस्य।) बुद्धः। इति शब्दरत्नावली॥

असमः, त्रि, विषमः। अतुल्यः। यथा। "इत्येषा महदहंकारतन्मात्रसमा माया दुरन्नीतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता"। इति कुसुमाञ्जलौ १ स्तवकः॥

असमञ्जसं, क्ली, (न समञ्जसं युक्तियुक्तम्।) असङ्गतं। अनुपयुक्तं। तत्पर्य्यायः। दुर्जातं २ दुःसञ्जं ३। इति चिकाण्डशेषः॥ ("अतिप्रणयादेतन्मयोक्तमसमञ्जसम्"। इति कथासरित्सागरे। (पुं) सगरराजज्येष्ठपुत्रः। यथा हरिवंशे।
"केशिन्यसूत सगरादसमञ्जसमात्मजम्"।)

असमयः, पुं, (अपक्वः समयः। नञ्समासः।) अकालः। दुःसमयः। यथा,—
"एतान् जनान्न सेवेत आधिसङ्घस्य दुर्ज्जयः।
सर्व्वं बोध्यसमये काले सर्व्वं ग्रसिष्यति"॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥

असमर्थः, त्रि, (न समर्थः। नञ्समासः।) अशक्तः। दुर्ब्बलः। यथा। ब्रह्मवैवर्त्ते।
"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्।
तावद्धनानि वा दद्याद् यदभुक्तादिगुणं भवेत्"।
इति तिथ्यादितत्त्वं॥

असमवायिकारणं, क्ली, (न समवायि कार्य्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं कारणम्।) समवायिकारणासन्नकारणं। समवायिकारणे प्रत्यासन्नजनकं। यथा। घटं प्रति कपालद्वयसंयोगः। एतत्कारणं गुणः कर्म्म च। समवायिकारणे प्रत्यासन्न इहया ये कारण इय। इति न्यायभाषा॥ (एतत् कारणन्तु सर्व्वत्र द्रव्ये गुणः गुणे गुणः कर्म्म च। तदुक्तं भाषापरिच्छदे। "गुणकर्म्मभावृत्ति ज्ञेयमप्यसमवायिहेतुत्वम्"।)

असमानं, त्रि, (नास्ति समानो यस्य।) अतुल्यं। विजातीयं। सजातीयभिन्नं। यथा शङ्खः।
"समानाशौचं प्रथमे प्रथमेन समाचरेत्।
असमानं द्वितीयेन धर्म्मराजवचो यथा"॥
इति शुद्धितत्त्वं॥

असमाप्तं, त्रि, (न समाप्तं। नञ्तत्पुरुषः।) समाप्तिरहितं। असम्पूर्णं। अनिष्पन्नं। यथा। स्मृतिः।
"असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरं"।
इति तिथ्यादितत्त्वं॥

असमीक्ष्यकारी, [न्] त्रि, (समीक्ष्य विचिन्य न करोतीति। असमीक्ष्य+कृ+णिनि।) अविवेचनापूर्व्वककर्म्मकर्त्ता। तत्पर्य्यायः। जाल्मः २। इत्यमरः॥ ("उचितमेवैतत् ममासमीक्ष्यकारिणः"। इति हितोपदेशे।)

असम्बद्धं, त्रि, (न सम्बद्धं परस्परान्वययुक्तं। नञ्समासः।) अनर्थकवाक्यं। तत्पर्य्यायः। अवद्धं २। इति जटाधरः॥
("असम्बद्धकृतश्चैव व्यवहारो न सिध्यति"।
इति मनुः। विप्रकृष्टलः। अनियमः। यथा भारते।
"असम्बद्धा महाराज! तान् निगृह्णन्ति ते गजाः"
इति॥)

असम्मतः, त्रि, (न सम्मतः। नञ्समासः। अनभिमतः। तत्पर्य्यायः। प्रणाय्यः२। इति हेमचन्द्रः॥
("असम्मतः कस्तव मुक्तिमार्गं
पुनर्भवक्लेशभयात् प्रपन्नः"।
इति कुमारे।)

असम्मानं, क्ली, अमर्य्यादा। अपमानं। सम्यग्ज्ञानाभावः। न सम्मानं असम्मानमिति नञ्समासनिष्पन्नं॥

असरुः, पुं, (असृ+अरुः।) वृक्षविशेषः। इति शब्दचन्द्रिका॥ कुकुरसोँका इतिख्यातः।

असहनः, पुं, स्त्री, (न सहनः। नञ्समासः।) शत्रुः। इति हेमचन्द्रः॥ (अधीरः। असहिष्णुः। यथा,—
"कस्मात् प्राप्य तिरस्क्रियामसहनोऽप्यस्यादिति प्रस्तुते"। इति महावीरचरिते।
"प्रिया मुच्चत्यय स्फुटमसहना जीवितमसौ"।
इति रत्नावल्यां। क्षमारहितम्। यथा, साहित्यदर्पणे।
"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्"॥
इति॥)

असह्यः, त्रि, (न सह्यः। नञ्तत्पुरुषः।) असहनीयः। असोढव्यः। सहनायोग्यः। यथा,—
"वरं रामशरात् सह्या न च वैभीषणं वचः।
असह्यं ज्ञातिदुर्व्वाक्यं मेघान्तरितरावत्"॥
इति महानाटके। ज्ञातिदुर्व्वाक्यमित्यत्र दुर्व्वचो ज्ञातेरिति च पाठः॥

असाधारणं, त्रि, (न साधारणं सामान्यधर्म्मयुक्तम्। नञ्समासः।) साधारणभिन्नं। असामान्यं। विशेषः। न्यायमते साध्यव्यापकीभूताभावप्रतियोगिहेतुः। यथा वह्निमान् जलत्वादित्यादिः। यथा। "यत्तु प्रयागे व्यहस्नाने क्रीड़ीकृते माधवसन्निधौस्नानादावसाधारणसङ्कल्पेन पुनस्तथैव

प्रातःस्नानाचरणं" इति तिथ्यादितत्त्वं ॥ किञ्च "असाधारणशरीरव्यापारार्ज्जितं स्वविद्वद्भो दातुमनिच्छन्न दद्यात्"। इति दायभागः ॥ अतुल्यं। इति शूद्रवर्गे साधारणशब्दार्थदर्शनात् ॥

असाध्यं, त्रि, (न साध्यं साधयितुमशक्यम्।) असाधनीयं। साधनायोग्यं। अशक्यं। असाधितव्यं। यथा,—

"सहजानि चिदोषाणि यानि चाभ्यन्तरा वलिं।
जायन्तेऽर्णांसि संयम्य तान्यसाध्यानि निर्दिशेत्"॥
इति भावप्रकाशः ॥ अपि च।

"य इदं प्रपठेन्नित्यं दुर्गानामशतात्मकं।
नासाध्यं विद्यते तस्य त्रिषु लोकेषु पार्व्वति"॥
इति विश्वसारतन्त्रे दुर्गाशतनामात्मकं स्तोत्रं ॥
("साध्या याप्यत्वमायान्ति याप्यास्त्वासाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्"।
"अमर्म्मोपहिते देशे शिरासस्नायुवर्ज्जिते।
विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणं" ॥
इति सुश्रुतः ॥)

असाध्वी, स्त्री, (न साध्वी। नञ्समासः।) अपतिव्रता। यथा ज्योतिस्तत्त्वम्,—

"कन्यातुलाभ्रमिथुने च साध्वी
मेषेष्वसाध्वी धनवर्ज्जिता च।
निन्द्योऽपि लग्ने द्विपदांश इष्टः
कन्यादिलग्नेष्वपि नान्यभागः" ॥ इति।

असान्द्रं, त्रि, (न सान्द्रं निविड़ं। नञ्तत्पुरुषः।) अनिविड़ं। विरलं। इति जटाधरः ॥

असाम्प्रतं, क्ष, (न साम्प्रतम् युक्तम्। नञ्तत्पुरुषः।) अयुक्तं। अनुचितं। तथा च कालिदासः।

"विषवृक्षोऽपि संवर्द्ध स्वयं छेत्तुमसाम्प्रतम्"।
इति। कुमारे २। ५५ ॥
("सम्प्रत्यसाम्प्रतं वक्तुमुक्तो मुषलपाणिना"।
इति माघे। "अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्"। इति रघौ ८। ६०।)

असारः, पुं, (नास्ति सारो यस्य।) रसगन्धद्रव्यः। इति शब्दचन्द्रिका ॥

असारं, त्रि, (नास्ति सारो यस्य।) सारराहितवस्तु। स्थिरांशशून्यं। तत्पर्य्यायः। फल्गु २। इत्यमरः ॥ निःसारं ३ निष्फलं ४। इति शब्दरत्नावली ॥ वाच्यं ५। इति जटाधरः ॥
(यथा—मनुसंहितायां ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्"।
"असारे खलु संसारे चीणि सारणि भावयेत्"।
इति हितोपदेशे ॥
"निर्दग्धनमसाराणां लघुर्बज्रादपि नरः।"
इति माघे ॥
"बज्रनामप्यसाराणां समवायो बलावहः।"
इति पञ्चतन्त्रे ॥
"धिगिमं देहभृतामसारताम्।" इति रघुवंशे ॥
"अतो विपरीतास्त्वसाराः" ॥ इति चरकः ॥)

असारं, क्ली, नास्ति सारो यस्य।) अगुरु। इति राजनिर्घण्टः ॥ (अगुरुशब्देऽस्य विशेषो ज्ञेयः ॥)

असाक्षात्, अ, (न साक्षात्। नञ्तत्पुरुषः।) अप्रत्यक्षं। अदर्शनं। अगोचरं ॥ अतुल्यं। इति साक्षात् शूद्रार्थदर्शनात् ॥

असिः, स्त्री, (अस्यते अवगाहनेन पापानि दूरीकरोति या। अस + इन्।) नदीविशेषः। सा च काशीदक्षिणदिक्स्थिता। यथा।

"तस्मात् विश्वेश्वराच्चैव काशीवासेऽत्र कारणं।
असिश्च वरणा यत्र क्षेत्रस्यास्यान्तरे स्थिते ॥
वाराणसीति विख्याता तदारभ्य महामुने।
अक्षेत्रं वरणायास्तु सक्रमं प्राप्य काशिकां ॥
वाराणसीह करुणामयदिव्यमूर्त्ते-
रुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन।
विश्वेशशृङ्गमहसि यत् सहसा प्रविश्य
रूपेण तां वितनुता पदवीं दधाति ॥
जातो मृतो बज्रुष तीर्यवरेषु ये त्वं
जन्तोर्न जातु भवशान्तिरभून्मिमज्य।
वाराणसीति गदतीह मृतोऽमृतत्वं
प्राप्याधुना मम बलात् स्मरशासनः स्यात्" ॥
इति काशीखण्डे ३० अध्यायः ॥

असिः, पुं, (असतीति। अस दीप्तौ इनि।) अस्त्रभेदः। खाँड़ा तरवाल इत्यादि भाषा। तत्पर्य्यायः। खड्गः २ निस्त्रिंशः ३ चन्द्रहासः ४ ऋष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करपालः ८ क्षुपाणः ९ इत्यमरः ॥ प्रवालकः १० भद्रात्मजः ११ रिष्टः १२ ऋष्टिः १३ धाराविषः १४ कौक्षेयः १५ तरवारिः १६ तरवाजः १७ क्षुपाणकः १८ करवालः १९ क्षुपाणी २० शुक्लः २१। इति शब्दरत्नावली ॥ विघसनः २२। इति त्रिकाण्डशेषः ॥

("पर्णशालामथ क्षिप्रं विक्षत्तासिः प्रविश्य सः।
वैरूप्यपौनरुक्तेन भीषणां तामयोजयत्" ॥
इति रघुवंशे १२। ४० ॥
"स्यन्दनाश्वैः समे यूथेदनूपे नौद्विपैस्तथा।
दक्षगुल्माहते चार्यैरसिचर्म्मायुधैः स्थले ॥"
इति मनौ ७। १९२ ॥) तस्य स्तुतिर्यथा।

"असिर्विघसनः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्मपालो नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं क्षत्रिका ते तु गुरुर्देवो महेश्वरः ॥
हिरण्यश्च शरीरस्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः क्षुधोदरः।
भावशुद्धोऽमर्षशश्च अतितेजास्तथैव च ॥
इयं येन धृता स्त्रीणी हतश्च महिषासुरः।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः" ॥
इति रुद्रनन्दिकेश्वरपुराणीयदुर्गोत्सवपद्धतिधृतवाराहीतन्त्रं ॥

असिकं, क्ली, (असति दीप्यते यत्। अस्+इकन्।) अधरचिबुकयोर्म्मध्यभागः। इति हेमचन्द्रः ॥

असिक्निका, स्त्री, असिक्नी। दासी। इति जटाधरः ॥ ("गतोगतस्तूर्णमसिक्निकानां"। इति पाणिनिः।

असिक्नी, स्त्री, (न सिता शुक्लकृष्णा। छन्दसि क्नमेक इति तस्य क्नः नान्तत्वात् ङीप् च।) अष्टाङ्गान्तःपुरचारिणी प्रेष्या ॥ इत्यमरः ॥ नदी विशेषः। इति मेदिनी ॥ (दक्षपत्नी वीरणसुता। यथा हरिवंशे। "असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः। सुतां सुतपसा युक्ताम्" इति ॥)

असिगण्डः, पुं, (अस्यते क्षिप्यते इति असिः क्षिप इत्यर्थः। असिः गण्डो यस्मिन्।) क्षुद्रोपधानं। इति जटाधरः ॥ छोटबालिश इति भाषा ॥

असितः, पुं, (न सितः शुक्लः। नञ्समासः।) कृष्णवर्णः। तद्विशिष्टे त्रि। (यथा पुष्पदन्ते ॥

"असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्"।
"चकाशे विनिविष्टेन स सन्ध्येव निशाऽसिता"।
इति रामायणे ॥) इत्यमरः ॥ शनिग्रहः। कृष्णपक्षः। इति हेमचन्द्रः ॥ (स्वनामख्यातः सूर्य्यवंशोद्भवो भरतपुत्रो राजा। यथा, रामायणे—

"भरतात् तु महातेजा असितो समजायत"।
स्वनामख्यातः कश्चित् व्यासशिष्यो मुनिः। यथा हरिवंशे।

"असितस्यैकपर्णा तु देवलस्य महात्मनः"।
पर्व्वतभेदः। यथा भारते,—

"तत्र पुण्यह्रदः ख्यातो मैनाकश्चैव पर्व्वतः।
बज्रमूलफलोपेतस्त्वसितो नाम पर्व्वतः" ॥)

असिता, स्त्री, (न सिता। असित पलितयोः प्रतिषेधात् वर्णादनुदात्तादिति ङीप् तकारस्य ककारादेशश्च न।) नीलीवृक्षः। इति राजनिर्घण्टः ॥ या अष्टङ्गा महादेवीभिः प्रेष्यते अन्तःपुरे च पुनः पुन चरति सा। इत्यमरटीकायां भरतः ॥ या अष्टङ्गा युवती कृष्णकेशा प्रेष्या दासी अन्तःपुरे चरति सा इति सारसुन्दरी ॥ (स्वनामख्याता सर्व्वेश्या। यथा हरिवंशे।

"असिता च सुवाक्चैव सुदत्ता सुमुखी तथा"।)

असिताभ्रशेखरः, पुं, (असितः कृष्णवर्णः अभ्रो मेघइव शेखरो यस्य।) वृद्धविशेषः। इति त्रिकाण्डशेषः ॥

असितार्चिः [स्] पुं, (असिता कृष्णा अर्चिः शिखा यस्य।) अग्निः। इति त्रिकाण्डशेषः ॥

असितालुः, पुं, (असितः आलुः।) नीलालुः। इति राजनिर्घण्टः ॥

असितोत्पलं, क्ली, (असितमुत्पलम्।) नीलोत्पलं। इति राजनिर्घण्टः ॥ (यथा चरकः।

"उत्पलानि कषायाणि पित्तरक्तहराणि च" ॥)

असिदंष्ट्रः, पुं, (असिरिव तीक्ष्णा दंष्ट्रा यस्य।) जलजन्तुविशेषः। मकर इति ख्यातः। इति शब्दरत्नावली ॥

असिदंष्ट्रकः, पुं, (असिदंष्ट्र + स्वार्थे कन्।) असिदंष्ट्रः। मकरः। इति त्रिकाण्डशेषः ॥

असिद्धं, त्रि, (न सिद्धम्। नञ्समासः।) अपक्वं। अखिन्नं। इति रत्नमाला ॥ सिद्धिरहितं ॥ ("स्वयमसिद्धः कथं परान् साधयेत्" इति न्यायः। न्यायते, आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टो हेतुः। यथा, भाषापरिच्छेदे।

"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासस्तु पञ्चधा" ॥)

असिद्धिः, स्त्री, (न सिद्धिः। नञ्समासः।) अनिष्पत्तिः। न्यायमते सा त्रिविधा। पक्षासिद्धिः १ यथा काञ्चनमयपर्व्वतो वह्निमान् इत्यादिः १। स्वरूपासिद्धिः २ यथा, पर्व्वतः काञ्चनमयवह्निमान् इत्यादिः २। व्याप्त्यासिद्धिः ३ यथा, पर्व्वतो वह्निमान् ज्वलत्वादित्यादिः ३। (यथा भाषापरिच्छेदे।

"आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतः त्रिधा॥
पक्षासिद्धिर्यत्र पक्षो भवेन्नास्तिमयो गिरिः।
ह्रदो ह्रदं धूमवत्वादासिद्धिरथापरा॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्" ।)

असिधावः, पुं, (असिं धावति निर्म्मलं करोतीति। असि+धाव+अण्।) शस्त्रमार्ज्जकः। इति जटाधरः॥ शिकलकर इति भाषा।

असिधावकः, पुं, (असिधाव+स्वार्थे कन्।) असिधारकर्त्ता। शस्त्रमार्ज्जकः। इत्यमरः॥

असिधेनुः, स्त्री, (असिर्धेनुरिव यस्याः। असेर्धेनुसादृश्येन कुरिकाया लक्षत्यसादृश्यम्।) कुरिका। इति हलायुधः॥ कुरी इति भाषा।

असिधेनुका, स्त्री, (असिर्धेनुका इव यस्याः।) कुरिका। इत्यमरः॥

असिपत्रः, पुं, (इक्षुपक्षे, असिरिव तीक्ष्णं पत्रं यस्य।) इक्षुः। खड्गकोषः। नरकविशेषः। इति मेदिनी॥ गुरुनाम दत्तं। इति राजनिर्घण्टः॥

असिपत्रकः, पुं, (असिपत्र+कन्।) इक्षुः। इति त्रिकाण्डशेषः॥

असिपत्रवनं, क्ली, (असिरिव तीक्ष्णं पत्रं यस्य तादृशं वनं।) नरकविशेषः। "पत्रैर्यत्र विदार्य्यते"। इति मनुः॥ ("यस्त्विह वै निजपथादनापद्यपगतः पापरुचोपगतस्तत्समसिपत्रवनं प्रवेश्य कषया प्रहरन्ति तत्रासावितस्ततो धावमानः उभयतोधारैः स्तालवनासिपत्रैश्छिद्यमानसर्व्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्म्महा पापरुचानुगमनफलं भुङ्क्ते"। इति श्रीभागवते॥

"असिपत्रवनं नाम नरकं प्रथमं परम्।
योजनानां सहस्रं वै व्यायतप्रमाणतावनिः॥
तत्रा सूर्य्यकरैस्तप्तैः कल्पकालाग्निदारुणैः।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः॥
तन्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते।
पत्राणि यत्र खड्गानि फलानि द्विजसत्तम"॥
इति मार्कण्डेयपुराणे।)

असिपुच्छकः, पुं, (असिरिव पुच्छो यस्य।) शिशुमारः। इति हारावली॥

असिपुत्रिका, स्त्री, (असेः पुत्रीव।) कुरिका। इति हलायुधः॥

असिपुत्री, स्त्री,(असेः पुत्रीव।) इत्यमरः॥ कुरिका॥ कुरी इति भाषा।

असिमेदः, पुं, (असिरिव मेदो निर्य्यासो यस्य।) विट्खदिरः। इति शब्दरत्नावली॥ (इरिमेदशब्देऽस्य गुणा ज्ञेयाः॥)

असिहेतिः, पुं, (असिर्हेतिः प्रधानास्त्रं यस्य।) खड्गधारी योद्धा। तत्पर्य्यायः। नैस्त्रिंशिकः २। इत्यमरः॥

असु, क्ली, (अस्यतेऽनेन। अस्+उ।) चित्तं। उपतापः। इत्युणादिकोषः॥

असुः, पुं, (अस्यन्ते इति। अस्+उ।) प्राणः पञ्चप्राणेषु बहुवचनान्तः। असवः। इत्यमरः॥ ("तेजस्विनः सुखमसूनपि संत्यजन्ति"। इति नीतिशतके। ६६ श्लोकः।)

असुखं, क्ली, (न सुखम्। नञ्समासः।) दुःखं। इति हेमचन्द्रः॥

(यथा मनुसंहितायां १२। १६।

"क्षौ धर्म्मं पश्यतस्तस्य पापं घातन्निती सह।
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम्"॥
तत्रैव ४। ७०।
"न कर्म्म निष्फलं कुर्य्यान्नायत्यामसुखोदयम्")

असुधारणं, क्ली, (असूनां धारणं।) जीवनं। इत्यमरः॥

असुभृत्, त्रि, (असून् बिभर्त्तीति। असु+भृ+क्विप्।) प्राणी। जीवः। यथा। "वृतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयो ऽण्डमसृजन् यदनुग्रहतः"। इति श्रीभागवते दशमस्कन्धे ८७ अध्याये १४ श्लोकः॥

असुरः, पुं, स्त्री, (अस्यति देवान् क्षिपति इति। अस+उरन्। यद्वा न सुरः विरोधे नञ्तत्पुरुषः। यद्वा नास्ति सुरा यस्य सः। सूर्य्यपक्षे असति दीप्यते इति उरन्।) सुर विरोधी। स तु कश्यपात् दितिगर्भजातः। तत्पर्य्यायः। दैत्यः २ दैतेयः ३ दनुजः ४ इन्द्रारिः ५ दानवः ६ शुक्रशिष्यः ७ दितिसुतः ८ पूर्व्वदेवः ९ सुरद्विट् १० देवरिपुः ११ देवारिः १२ इत्यमरः॥ ("सुराः प्रतिग्रहाद्देवाः सुरा इत्यभिविश्रुताः।
अप्रतिग्रहणात्तस्य दैतेयाश्चासुराः स्मृताः"॥
इति रामायणे।) सूर्य्यः। इति मेदिनी। राक्षः इति ज्योतिःशास्त्रम्॥

असुररिपुः, पुं, (असुराणां रिपुः।) विष्णुः। इति शब्दरत्नावली॥

असुरसा, स्त्री, (न विद्यते सु शोभनो रसो यस्याः।) वर्व्वरी। इति रत्नमाला। वावुइ तुलसी इति भाषा। (वर्व्वरीशब्देऽस्या विशेषो ज्ञातव्यः॥)

असुरा, स्त्री, रात्रिः। रासिः। इति मेदिनी॥

असुराङ्गं, क्ली, (असुरस्याङ्गमाङ्गं यस्य।) कांस्यं। इति हेमचन्द्रः॥

असुरी, स्त्री, (असु+उरन्+ङीष्।) रात्रिका। इत्यमरटीकायां भरतादयः। राई सर्षा इति भाषा॥ असुरपत्नी॥ [दरः। इत्यमरः।

असूर्त्तगं, क्ली, (न+सूर्त्त+ल्युट्।) अवज्ञा। अनादरः। इत्यमरः॥

असूयः, त्रि, (न सूयः। नञ्समासः।) सुखस्थितिरहितः। रोगी॥

असूयनं, क्ली, (न+सूर्त्त+ल्युट्) अवज्ञा। अनादरः। इत्यमरः॥

असूया, स्त्री, (असू+न असूयायाम्। असू+यक्+अ।) गुणेषु दोषाविष्करणं। परगुणे दोषारोपणं इत्यमरः॥ (यथा साहित्यदर्पणे।

"असूयान्यगुणार्द्दीनामौद्धत्यादसहिष्णुता।
दोषोद्घोषस्त्वभूविभेदावज्ञाक्रोधेङ्गितादिजः"॥
इयञ्च "हर्षासूया विषादाः"। इत्यादिना व्यभिचारिभावमध्येऽपि परिगणिता॥)

असूर्य्यम्पश्या, स्त्री, (सूर्य्यमपि न पश्यति या। न+सूर्य्य+दृश्+खश्।) सत्यपि सूर्य्यदर्शने प्रयोगो भवति। यदा तु सूर्य्यदर्शनाभावमात्रम् सूर्य्येतरस्य चन्द्रादेर्दर्शनं वा विवक्षितं तदा खश् न भवति।) राजपत्न्यादिः। इति कलापपाणिनी॥ ("असूर्य्यम्पश्यरूपा त्वं किमभीरारार्य्यसे"। इति भट्टिः॥)

असूर्त्तगम्, असूर्त्तगं, } क्ली, (सूर्त्त आदरे तस्मात् ल्युट् ततो नञ्समासः।) अनादरः। इत्यमरः।

असृक्, [ज्] क्ली (न+सृज्+क्विप्।) रक्तम्। इत्यमरः॥ ("पानमप्यसृजः क्षिप्रं खपीड़ायै जलौकसाम्"। इति दृष्टान्तशतकम्।) कुङ्कुमं। इति राजनिर्घण्टः॥ विष्कुम्भादि सप्तविंशति योगान्तर्गतषोड़शयोगः॥ तत्र जातफलं।

"धनी कुरूपः कुमतिर्दुरात्मा
विदेशगामी रुधिरप्रकोपः।
महाप्रलोभी पुरुषो बलीया-
नसृक् प्रसूतौ किल यस्य जन्तोः"।

इति कोष्ठीप्रदीपः। रक्तार्थे यथा, वैद्यके॥

"रसासृङ्मांसमेदोऽस्थि मज्जशुक्राणि धातवः"।
"तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते"।
"वातासृक् पूर्व्वलक्षणं।" इति माधवकरः॥
"विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक् प्रदूषणं।
भजतां विधिहीनञ्च स्वप्नाजागरमैथुनं॥
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनां।
अभिघातादयुद्धेश्च नृणामसृजि दूषिते॥
वातैः शीतैर्वायुरुद्धः कुद्धो विमार्गगः।
तादृग्नाम्नश्च रुद्धः प्राक् तदेव प्रदूषयेत्"॥
इति वाभटः॥
"असृजः श्लेष्मजस्यापि यः प्रसादः परो मतः"।
"तदर्षादग्नात्काले वर्त्तमानमसृक् पुनः।
जरापक्वशरीराणां यातिपक्वायतः क्षयं॥
मदमूर्च्छा श्रमार्त्तानां वातविक्षुभितत्वचां।
निद्राभिभूतभीतानां नृणां नासृक् प्रवर्त्तते"॥
इति सुश्रुतः॥)

असृक्करः, पुं, (असृक् शोणितं करोतीति। असृज्+कृ+ट।) शरीरस्थधातुः। इति हेमचन्द्रः॥ (भुक्तस्यान्नादिकस्य प्रथमं रसरूपता, रसस्य परिपाकतो रक्तरूपता इति वैद्यके प्रसिद्धिः। "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते"॥ इति सुश्रुतः॥)

असृक्पः, पुं, स्त्री, (असृक् पिबतीति। असृज्+पा+ड) राक्षसः इति हेमचन्द्रः॥

अस्रधरा, स्त्री, (अस्रक् शोणितं धरतीति। अस्रक् + धृ + अच्।) चर्म्म। इत्यमरटीकायां भरतादयः॥

अस्रपाटी, स्त्री, पुं, (न + स्रप् + काट्।) रक्तधारा इत्यमरटीकासारसुन्दरी।

असेचनकं, त्रि, (न सिच्यते मनो यस्मिन्। न + सिच् + ल्युट्। संज्ञायां कन्।) यस्य दर्शनात् चक्षे रन्तो नास्ति तत्। अत्यन्तप्रियदर्शनं। इत्यमरः। याहाके देखिया चक्षिर शेष ना हय एमन वस्तु। ("नयनयुगासेचनकं मानसकृत्यापि दुष्प्रापं"। इति साहित्यदर्पणे॥)

असौम्यस्वरः, त्रि, (असौम्यः कठोरः स्वरो यस्य।) काकवत् मन्दस्वरयुक्तः। तत्पर्य्यायः। असरः २। इत्यमरसिंहः॥

असौष्ठवं, क्ली, (न सौष्ठवं। नञ्समासः) अप्रशंसनीयत्वं। अशोभनत्वं। अनातिशय्यं। नञ् पूर्ब्बात् सुष्ठुशब्दात् भावे ष्णप्रत्ययः॥ ("गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं"। इति मालतीमाधवे। अलङ्कारशास्त्रे स्मरदशाभेदः। यथा साहित्यदर्पणे। "असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः"॥)

अस्तः, पुं, (अस्यन्ति रविकिरणा यस्मिन्। अस् + त।) अस्ताचलः। पश्चिमाचलः। तत्पर्य्यायः। चरमाद्रिः २। इत्यमरमेदिन्यौ॥
("विडम्बयत्यस्तनिमग्नसूर्य्यम्"। इति रघुः।
"सहस्रशिखरश्चैव नानातीर्थसमाकुलम्।
चकार रत्नसंकीर्णं भूयोऽस्तं नाम पर्व्वतं"॥
इति हरिवंशे।)
तस्मात् सप्तमस्थानं। इति दीपिका॥

अस्तं, त्रि, (अस् + क्त।) क्षिप्तं। अवसानप्राप्तं। इति मेदिनी॥ ("धृतिरप्यस्तसंज्ञा मतिः"। इति मालतीमाधवे॥ "निरस्तगाम्भीर्य्यमपास्तधैर्य्यं"। इति माघे॥ सूर्य्यास्तगमनं। "करजालमस्तसमयेऽपि सताम्"। इति माघे॥
तथा कुमारसम्भवे २। २३।
"यमोपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेस्मिन्नमोघेपि निर्व्वाणालातलाघवम्"॥)

अस्तं, क्ली, भयुः। इति हेमचन्द्रः॥

अस्तकः, पुं, (अस्त + कन्।) मोक्षः। निर्व्वाणं। इति त्रिकाण्डशेषः॥

अस्तम्, व्य, (अस् + तम्।) अदर्शनं। इत्यमरः॥ (राज्यमस्तमितेश्वरम्" इति रघुः॥)

अस्तमती, स्त्री, (अस्तं यततीति। अस्तम् + यत् + अच् + गौरादित्वात् ङीष्।) शालपर्णी वृक्षः। इति शब्दरत्नावली॥

अस्ताघः, त्रि, (अस्तं गतं अघं मालिन्यं यस्मात्।) अगाधः। अतिगभीरः। इति हेमचन्द्रः।

अस्ताचलः, पुं, (अस्ताय अचलः। यद्वा अस्तः पश्चिमोऽचलः) अस्तगिरिः। पश्चिमाचलः। इति शब्दरत्नावली। ("अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि"। इति हितोपदेशः॥)

अस्ताद्रिः, पुं, (अस्तः पश्चिमोऽद्रिः पर्व्वतः।) अस्ताचलः। इति त्रिकाण्डशेषः॥

अस्ति, व्य, (अस् + स्तिक्) विद्यमानता। तत्पर्य्यायः सत्त्वं २। इत्यमरः॥ अस्धातोस्तिपि क्तेऽप्येतद्रूपं॥ (यथा चानन्दे।
"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः"॥)

अस्तिमान्, त्रि, (अस्ति विद्यमानमिति विद्यते यस्य अस्ति + मतुप्।) धनी इति हेमचन्द्रः॥

अस्त्र, व्य, (अस् + तुन्।) अङ्गीकारः। असूया। पीड़ा। इति विश्वमेदिन्यौ। असधातोः तुपि क्तेऽप्येतद्रूपं स्यात्॥

अस्थानं, क्ली, (न स्थानं। नञ्समासः।) अयोग्यं। निन्दा। इति त्रिकाण्डशेषः॥

अस्त्रं, क्ली, (अस्यते क्षिप्यते यत्। अस् + ष्ट्रन्।) प्रहारयोग्यद्रव्यमात्रं। हातियार इति भाषा। तत्पर्य्यायः। आयुधं २ प्रहरणं ३ शस्त्रं ४। इत्यमरः॥ खड्गः ५। धनुः ६। इति मेदिनी। क्षेपनयोग्यबाणादि। इति रायमुकुटः॥ ("प्रयुक्तमप्यस्त्रमितो वृथा स्यात्"। "प्रत्याहृतास्त्रो गिरीशप्रभावात्"। इति च रघुः॥) तन्निरूपणं यथा,—
"दण्डसाध्यं यतो राज्यं स दण्डः शस्त्रसंश्रितः।
अस्त्राणि भूमिपालानां निरूप्यन्ते ततः क्रमात्"॥
अथ गणना।
"खड्गचर्म्म धनुर्व्वाणौ शूलभल्लौ तथापरौ।
अर्द्धचन्द्रश्च नाराचः शक्तियष्टी तथा परे॥
परश्वधक्रशूले च परिघश्चैवमादयः।
अस्त्रभेदाः समुद्दिष्टाः श्रीमद्भोजमहीभुजा"॥
वात्स्यस्तु।
"अस्त्रन्तु द्विविधं प्रोक्तं निर्म्मायं मायिकन्तथा।
खड्गादिकन्तु निर्म्मायं मायिकं दहनादिकं।
दहनोऽथ जलं काष्ठं लोष्ट्रं शस्त्रादयस्तथा।
तप्ततैलादिकश्चैव मायिकस्त्रमुच्यते॥
खड्गादीनान्तुगणना पूर्ब्बमेव निदर्शिता।
अस्त्रात्मनैव निर्द्दिष्टः कवचादिरपीष्यते"॥
इति युक्तिकल्पतरुः॥ *॥
खड्गचर्म्मादि परीक्षा तत्तच्छब्दे द्रष्टव्या॥

अस्त्रकण्टकः, पुं, (अस्त्रं कण्टक इव। बाणास्त्रस्य कण्टकाकृतित्वात्।) बाणः। इति त्रिकाण्डशेषः॥

अस्त्रकारकः, पुं, (अस्त्राणां कारकः।) अस्त्रनिर्म्माता। शस्त्रनिर्म्मायकः। आयुधकारः। अस्त्रकारी॥

अस्त्रचिकित्सकः, पुं, (अस्त्रेण चिकित्सतीति। अस्त्र + कित् + स्वार्थे सन् + ण्वुल्।) शस्त्रवैद्यः॥ ("छेद्याद्यभिज्ञो यः स्नेहादिषु च कर्म्मसु"। इत्यादि सुश्रुतः॥)

अस्त्रजित्, क्ली, (अस्त्रं अस्त्राघातजं व्रणादिकं जयति निवारयति। अस्त्र + जि + क्विप्।) वृक्षविशेषः। कवाट् वेटु इति ख्यातं। कवाड़वटुया इति केचित्। अस्य पर्य्यायः। कवाटवल्कशब्दे द्रष्टव्यः। अस्त्रजित् इति च पाठः। इति रत्नमाला॥

अस्त्रमार्ज्जः, पुं, (अस्त्रं मार्ष्टि। अस्त्र + मृज् + अण्।) अस्त्रमार्ज्जकः। शानकरः। तत्पर्य्यायः। शस्त्रमार्ज्जः २। असिधावः ३। असिधावकः ४। इति शब्दरत्नावली॥

अस्त्रसायकः, पुं, नाराचास्त्रं। समुदयलौहमयबाणः। इति शब्दमाला॥

अस्त्रागारं, क्ली, (अस्त्राणामागारं।) अस्त्रशस्त्रगृहं। सेलाखाना इति पारस्यभाषा। तत्पर्य्यायः। आयुधागारं २। यथा,—
"स्थापना जातितत्त्वज्ञः सततं प्रतिजाग्रता।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः"॥
इति मात्स्ये १८९ अध्यायः॥

अस्त्रागारः, पुं, अस्त्रशस्त्रगृहं। सेलाखाना इति भाषा॥

अस्थागं, त्रि, (अस्थामस्थितिं गच्छति प्राप्नोतीति। अस्था + गम + ड।) अगाधं। अतिगभीरं। इति हेमचन्द्रः॥

अस्थाघं, त्रि, (अस्थामस्थितिं हन्तीति। अस्था + हन + अप्।) अतलस्पर्शं। इति हेमचन्द्रः॥

अस्थानं, त्रि, (नास्ति स्थानं प्राप्तिर्यस्य) अतलस्पर्शं। इति जटाधरः॥ मन्दस्थले क्ली॥ ("अस्थाने पतितामतीवमहतामेतादृशी स्याद्गतिः"। इति नीतिप्रबन्धे।)

अस्थायं, त्रि, अगाधं। स्थीयते यत्रेत्यधिकरणवाचे घञि कृते पश्चादादन्ताद्यत्प्रत्यये स्थायं ततो न स्थायमस्थायमिति नञ्समासनिष्पन्नं। न सम्भवति स्थायः स्थितिर्यत्र इति केचित्॥

अस्थायी, [न्] त्रि, स्थितिरहितः। नश्वरः। स्थातुं शीलमस्येति शीलार्थे णिनि स्थायी, न स्थायी अस्थायीति नञ्समासनिष्पन्नः॥

अस्थारं, त्रि, (अस्थामस्थितिं राति। अस्था + रा + ड।) अतलस्पर्शं। अगाधं। इति शब्दरत्नावली॥

अस्थावरं, क्ली, स्थावरेतरद्रव्यं। जङ्गमवस्तु। न स्थावरं अस्थावरं इति नञ्समासनिष्पन्नं॥

अस्थावरं, त्रि, (न स्थावरम्। नञ्समासः।) स्थावरेतरद्रव्यं। जङ्गमवस्तु। इति स्मृतिः॥

अस्थि, क्ली, (अस्यते क्षिप्यते यत्। अस् + क्थिन्।) शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः। हाड़ इति भाषा। तत्पर्य्यायादि शरीरशब्दे द्रष्टव्यं॥ तत्पर्य्यायः। कीकसं २ कुल्यं ३ मेदोजं ४। इत्यमरादयः॥ (अस्थिस्वरूपाद्युक्तं भावप्रकाशे।
"मेदो यत् स्वाम्निगा पक्वं वायुना चातिशोषितं।
तदस्थिसंज्ञां लभते स सारः सर्व्वविग्रहे॥
अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।
अस्थिसारैस्तथा देहा धियन्ते देहिनां ध्रुवं॥
तस्मादस्थिविनाशेषु त्वक्सारेषु शरीरिणाम्।
अस्थीनि न विनश्यन्ति सारा एतानि सर्व्वथा"॥
"मेदसोऽस्थि ततो मज्जा मज्जतः शुक्रसम्भवः"॥
इति सुश्रुतः॥
त्रीणि सप्तशतान्यस्थ्नां वेदवादिनो भाषन्ते। शल्यतन्त्रेषु त्रीण्येवशतानि। तेषां सविंशमस्थिशतं शाखासु। सप्तदशोत्तरं शतं श्रोणि पार्श्वपृष्ठोदरोरस्सु। ग्रीवायां प्रत्यूहे त्रिषष्टिः। एवं

मस्त्रां त्रीणि शतानि पूर्य्यन्ते ।
एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश । तलकूर्च्चगुल्फसंश्रितानि दश । पार्ष्ण्यामेकं । जङ्घायां द्वे । जानुन्येकं । एकमूराविति । त्रिंशदेवमेकस्मिन् सक्थीनि भवन्ति । एतेनेतर सक्थिबाहू च व्याख्यातौ ॥ श्रोण्यां पञ्च तेषां गुदभगमितम्बेषु चत्वारि । त्रिकसंश्रितमेकं । पार्श्वे षट्त्रिंशदेवमेकस्मिन् द्वितीयेऽप्येवं । एष्ठे त्रिंशत् । अष्टावुरसि । द्वे अक्षकसंज्ञे । ग्रीवायां नवकं । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । दन्ता द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्डकर्णशङ्खेष्वेकैकं । षट् शिरसि ॥ एतानि पञ्चविधानि भवन्ति । तद्यथा ।
कपाल-रुचक-तरुण-वलय-नलकसंज्ञानि । तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि। दशनास्तु रुचकानि। घ्राणकर्णग्रीवाद्विकोषेषु तरुणानि। पाणिपादपार्श्वपृष्ठोदरोरस्सु वलयानि। शेषाणि नलकसंज्ञानि ॥
"मांसान्यत्रनिबन्धानि सिराभिः स्नायुभिस्तथा ।
अस्थीन्याशम्बनं ज्ञात्वा गणयीर्य्यन्ते यतन्ति वा"॥
इति च सुश्रुतः ॥) वीजं । इति रायमुकुटः वैद्यकञ्च । आँटी इति भाषा ।

अस्थिकुण्डं, क्ली, (अस्थ्नां कुण्डम् ।) आस्यपूर्णनरककुण्डविशेषः । यथा,—
"पितॄणां यो विष्णुपदे पिण्डं नैव ददाति च ।
स च तिष्ठत्यस्थिकुण्डे खलोमाब्दं महेश्वरि" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अस्थिकृत्, पुं, (अस्थि करोति यः । अस्थि + कृ + क्विप् ।) शरीरस्थमेदो धातुः । इति हेमचन्द्रः ॥ (मेदसोऽस्थि । इति सुश्रुतः ।)

अस्थिजः, पुं, (अस्थ्नो जायते इति । अस्थि + जन + ड ।) मज्जा । इति राजनिर्घण्टः ॥ (मज्जशब्देऽस्य गुणादयो द्रष्टव्याः ।)

अस्थितुण्डः, पुं, स्त्री, (अस्थीव दारुवं तुण्डं यस्य ।) पक्षी । शब्दमाला ॥ [इति हेमचन्द्रः ॥

अस्थिधन्वा, [न्] पुं, (अस्थिमयं धनुर्यस्य ।) शिवः ।

अस्थिपञ्जरः, पुं, (अस्थि पञ्जर इव ।) शरीरास्थिसमूहः । तत्पर्य्यायः । करङ्कः २ कङ्कालं ३ । इति हेमचन्द्रः ॥

अस्थिभक्षः, पुं, स्त्री, (अस्थि भक्षयति । अस्थि + भक्ष + अच् ।) कुक्कुरः । इति हारावली । (पक्षिविशेषः । हाड़गिला इति भाषा ।)

अस्थिभुक् [ज्] पुं, स्त्री, (अस्थि भुङ्क्ते इति । अस्थि + भुज् + क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥

अस्थिमाली, [न्], पुं, (अस्थिमाला विद्यते यस्य अस्थिमाला + इन्) शिवः । इति हेमचन्द्रः । ("मूलहस्थोऽस्थिमाली" इति शिवशतके ।)

अस्थिरः, त्रि, (न स्थिरः । नञ्तत्पुरुषः ।) चञ्चलप्रकृतिः । तत्पर्य्यायः । सङ्गसुक्रः २ । इत्यमरः । अनिश्चितः । इति स्वामी ॥
("लुब्धः क्रूराऽवशोऽसत्यः प्रमादी भीरुरस्थिरः" ॥ इति हितोपदेशे ।)

अस्थिरमतिः, त्रि, (अस्थिरा मतिर्यस्य ।) चञ्चलबुद्धिः । यथा । "विक्रान्तं कुलमुख्यमस्थिरमतिं वित्तेश्वरं साक्षिराः" । इति ज्योतिस्तत्त्वे दिग्रहयोगफलं ॥

अस्थिरविभूतिः, स्त्री, (अस्थिरा विभूतिः ।) चञ्चलैश्वर्य्यं । यथा । "अस्थिरविभूतिमेवं चलमटनं स्खलितनियममपि चरमे" । इति ज्योतिस्तत्त्वे राशिफलं ॥

अस्थिविग्रहः, पुं, (अस्थिसारो विग्रहो यस्य ।) भल्लातकनामकशिवसहचरः । इति हेमचन्द्रः ॥

अस्थिशृङ्खला, स्त्री, (अस्थ्नां शृङ्खला योजनकारणम् ।) ग्रन्थिमान् वृक्षः । इति राजनिर्घण्टः ॥ (हाड़जोड़ा इति भाषा । यथा भावप्रकाशः ॥
"काण्डं त्वग्विरहितं मस्थिशृङ्खलायाः
मागार्द्धं दिदलमकर्षुकं तदर्द्धम् ।
संपिष्टं सुतनु ! ततस्तिलस्य तैले
संपक्वं वटकमतीव वातहारि" ॥)

अस्थिसंहारः, पुं, (अस्थीनि संहरति योजयति । अस्थि + सं + हृ + अण् ।) वृक्षविशेषः । हाड़जोड़ा इति भाषा । तत्पर्य्यायः । वज्रवल्ली २ ग्रन्थिमान् ३ कुलिशं ४ अमरः ५ । इति रत्नमाला ॥ हस्तिशुण्डी ६ वनालिका ७ । इति हारावली । अस्य गुणाः । वलास्थिभग्नहितकारित्वं । वायुनाशित्वञ्च । इति राजवल्लभः ॥ यथा,—
"ग्रन्थिमानस्थिसंहारी वज्रवल्ली चास्थिशृङ्खला ।
अस्थिसंहारकः प्रोक्तो वातश्लेष्महरो ऽस्थियुक् ॥
उष्णः सरः कृमिघ्नश्च दुनामघ्नो ऽस्थिरोगजित् ।
रूक्षः स्वादुर्गुरुर्ग्राह्यः पाचनः पित्तलः स्मृतः ॥
काण्डं त्वग्विरहितं मस्थिशृङ्खलायाः
मागार्द्धं दिदलमकर्षुकं तदर्द्धं ।
संपिष्टं सुतनु ततस्तिलस्य तैले
संपक्वं वटकमतीव वातहारि" ॥
इति भावप्रकाशः ॥
("अस्थिभग्नेऽस्थिसंहारो हितोवल्योऽनिलापहः"
इति वैद्यकद्रव्यगुणः ।)

अस्थिसंहारी, स्त्री, (अस्थीनि संहरति या । अस्थि + सम् + हृ + अण् + स्त्रियां ङीप्) ग्रन्थिमान् वृक्षः । इति राजनिर्घण्टः ॥ (अस्थिसंहारशब्दे ऽस्य गुणा ज्ञातव्याः ।)

अस्थिसारः, पुं, (अस्थ्नः सारः पाकपरिणामः) मज्जा । इति राजनिर्घण्टः ॥

अस्थिस्नेहसङ्कः, पुं, (अस्थ्नः स्नेहस्तस्य सङ्कः ।) मज्जा । इति राजनिर्घण्टः ॥

अस्थैर्य्यं, क्ली, अस्थिरता । स्थिरस्य भावः इत्यर्थे ष्यञ्प्रत्यये स्थैर्य्यं न स्थैर्य्यमस्थैर्य्यमिति नञ्समासेन निष्पन्नं ॥ ("अस्थैर्य्येण विभूतयोऽप्युपहता यस्यं न किं केन वा" । इति वैराग्यशतकम् ॥ २९ श्लोकः ।)

अस्थिदारु, क्ली, (अस्थिवं कठोरं दारु ।) देवकाष्ठं । देवदारुभेदः । इति राजनिर्घण्टः ॥

अस्पष्टं, त्रि, (न स्पष्टम् । नञ्तत्पुरुषः ।) अव्यक्तं अस्फुटं । यथा । स्निग्धं । अस्पष्टं । इति मुग्धबोधव्याकरणं ॥

अस्पृहा, स्त्री, (न स्पृहा । नञ्समासः ।) इच्छाभावः । यथा,—
"यथोत्पन्नेन सन्तोषः कर्त्तव्यो ऽत्यल्पवस्तुना ।
परस्याचिन्तयित्वार्थं सास्पृहा परिकीर्त्तिता" ॥
इत्येकादशीतत्त्वं ॥ (नास्ति स्पृहा यस्येति वाक्ये त्रि, स्पृहा रहितः । उदासीनः ।)

अस्फुटं, त्रि, (न स्फुटम् । नञ्समासः ।) अस्पष्टं । अव्यक्तं । स्निग्धवाक्यं । इति हेमचन्द्रः ॥

अस्फुटवाक्, [च्] त्रि, (अस्फुटा वाक् यस्य ।) अस्पष्टवक्ता । तत्पर्य्यायः । लोहलः २ । इत्यमरसिंहः ॥

अस्मद्, त्रि, आत्मवाची सर्व्वनामशब्दः । अस्य रूपं यथा । अहं, आमि । आवां, आमरा दुइ । वयं, आमरा अनेक । इत्यादि व्याकरणं ॥ एकविंशतिविभक्तिषु तस्य रूपाणि यथा । अहं १ आवां २ वयं ३ । १ । मां ४ आवां ५ अस्मान् ६ । २ । मया ७ आवाभ्यां ८ अस्माभिः ९ । ३ । मह्यं १० आवाभ्यां ११ अस्मभ्यं १२ । ४ । मत् १३ आवाभ्यां १४ अस्मत् १५ । ५ । मम १६ आवयोः १७ अस्माकं १८ । ६ । मयि १९ आवयोः २० अस्मासु २१ । ७ । एतानि त्रिषु लिङ्गेषु समानानि द्वितीया-चतुर्थी-षष्ठीनां एकवचन-द्विवचन-बहुवचनविभक्तिषु तस्य रूपान्तराणि यथा । द्वितीयैकवचने मा । चतुर्थी-षष्ठ्योरेकवचने मे । आसां द्विवचने नौ । आसां बहुवचने नः । श्लोकपादवाक्यादौ एतानि रूपाणि न स्युः । च वा ह्य एव शब्दयोगे अदर्शनार्थदृश्यर्थधातुयोगे च न स्युः । इति व्याकरणं ॥

अस्मन्तं, क्ली, अश्मन्तं । चुल्ली । इति रायमुकुटः ॥ उनान आखा इति भाषा ॥

अस्रः, पुं, (अस्र् + रक् ।) केशः । इत्यमरः ॥

अस्रं, क्ली, (अस्यते क्षिप्यते यत् । अस् + रः ।) रक्तं । असृ । इत्यमरः ॥ (रक्तार्त्ते यथा,—
"पिपासादाहपित्तास्रयुक्तं पित्तज्वरं जयेत्" ।
इति शार्ङ्गधरः ॥
"क्षीणेऽस्रे मधुराकाङ्क्षा मूर्च्छा च त्वचि रूक्षता ।
स्नेहित्वञ्च सिराणां स्यादातादुन्मार्गगामिता" ।
इति भावप्रकाशः ॥ "असृक्स्राविणी क्षिप्ता" इति । 'असृग्दरी बलिनोऽप्यसृं न प्रस्रात् स्रावयेत्परं" । इति वाभटः ॥ * ॥ नेत्रजलार्थे यथा,—
"कुर्य्यात्सायं शिराव्यधं तेनास्यदीक्षणात्तमं" ।
इति वाभटः ॥ * ॥ आलस्यनयने साक्षे, इति चरकः ॥)

असक्करहः, पुं, (असृक् करहे यस्य ।) वाहः । इति हारावली ॥

असखदिरः, पुं, (असवर्णः खदिरः ।) रक्तखदिरवृक्षः । इति राजनिर्घण्टः ॥ (खदिरशब्दे ऽस्यगुणादयो ज्ञेयाः ॥)

असृजं, क्ली (असात् रक्तात् परिपाकेन जायते यत् । असृज + जन् + ड ।) मांसं । इति राजनिर्घण्टः ॥ (मांसशब्देऽस्यविशेषो ज्ञातव्यः ॥)

असृपः, पुं, स्त्री, (असृं पिबतीति। असृ + पा + ड।) राक्षसः। इत्यमरः॥ ("दिरागमं लघुभूवे चरेऽखपे मृदुडुनि"। इति मुहूर्त्तचिन्तामणिः। जलौकाः।)

असृपत्रकः, पुं, (असृमिव रक्तं पत्रं यस्य। संज्ञायां कन्।) भिण्डाटकः। इति राजनिर्घण्टः॥

असृपा, स्त्री, (असृं रक्तं पिबति या। असृ + पा + ड + टाप्।) जलौकाः। इति हेमचन्द्रः॥

असृप्रभा, स्त्री, (असृमिव रक्तं प्रभं यस्याः।) सप्तकीटकः। इति राजनिर्घण्टः॥

असृमाटका, स्त्री, (असृक् रक्तस्य मातेव पोषिका। संज्ञायां कन्। एषा हि शरीररसधातूनां श्रेष्ठा।) शरीररसः। इति राजनिर्घण्टः॥

असृरोधिनी, स्त्री, (असृं क्षतजरक्तं रुणद्धि या। असृ + रुध + णिच् + स्त्रियां ङीप्।) लज्जालुलता। इति रत्नमालाराजनिर्घण्टौ॥

असृविन्दुच्छदा, स्त्री, (असृविन्दुरिव बिन्दुः छदे पत्रे यस्याः।) लक्ष्मणा नाम कन्दः॥ इति राजनिर्घण्टः॥

असार्ज्जकः, पुं, (असानामर्ज्जकः।) श्वेततुलसी। इति रत्नमाला॥

अस्रु, क्ली, (अस्यते क्षिप्यते। अस् + रु।) चक्षुर्ज्जलं। तत्पर्य्यायः। नेत्राम्बु २ रोदनं ३ असृक् ४ अश्रु ५। इत्यमरः॥ वास्पं ६। इति शब्दरत्नावली॥ लोचं ७। इति जटाधरः॥ ("अस्रा अस्रावुधारां त्यजति"। इति कौचकवधः। "रागासुवेदनाग्लानौ परं लेखनमञ्जनं"। इति वाभटः॥)

अस्वच्छन्दः, त्रि, (न स्वच्छन्दः। नञ्समासः।) अधीनः। आयत्तः। इत्यमरः॥

अस्वतन्त्रः, त्रि, (न स्वतन्त्रः। नञ्समासः।) परतन्त्रः। पराधीनः। इति जटाधरः॥

अस्वप्नः, पुं, (नास्ति स्वप्नो निद्रा यस्य।) देवता। इत्यमरः॥ (निद्राया अभावार्थे यथा,—
"अस्वप्नः सन्ततारुक् च मज्जास्थिकुपितेऽनिले"॥
इति माधवकरः॥
"मज्जस्थोऽस्थिषु सौषिर्य्यमस्वप्नं स्तब्धतां रजं"॥
इति वाभटः॥)

अस्वरः, त्रि, (अप्रशस्तः स्वरो यस्य।) मन्दस्वरयुक्तः। तत्पर्य्यायः। असौम्यस्वरः २। इत्यमरः॥ ("अथ गद्गदशब्दस्तु विलपन् वसुधाधिपः। उवाच मृदुमन्दार्थं वचनं दीनमस्वरम्"॥ इति रामायणे॥)

अस्वाध्यायः, पुं, (न विद्यते स्वाध्यायो वेदाध्ययनं यस्य।) विधिपूर्व्वकवेदाध्ययनहीनः। तत्पर्य्यायः। निराह्वतिः २। इत्यमरः॥ अनध्यायः। अध्ययने निषिद्धदिनं। तद्यथा। चन्द्रसूर्य्यग्रहणदिनानि। तानि तु। ग्रस्तास्ते ३ दिनानि। अन्यत्र १ दिनं। सन्ध्यागर्জ্জने १ दिनं। माघादिमासचतुष्टये गर्জ্জनमात्रे तद्दिनं। निर्घातशब्दे १ दिनं। भूकम्पे १ दिनं। उल्कापाते १ दिनं। महोल्कापाते आकालिकः। एकवेदसमापनानन्तरं १ दिनं। आरण्यकनामकवेदभागसमापनानन्तरं १ दिनं। पञ्चपर्व्वाणि ५ दिनानि। चैत्रशुक्लप्रतिपत् १ दिनं। श्रावणशुक्लप्रतिपत् १ दिनं। मार्गशुक्लप्रतिपत् १ दिनं। एताः प्रतिपदो नित्याः। अन्याः काम्याः। वज्रपाते आकालिकः। विद्युत्समकालीनमेघशब्दे आकालिकः। चतुर्दशमन्वन्तराः १४ तिथयः। युगाद्याः ४ तिथयः। माघमासस्योभयपक्षीयद्वितीया २ दिने। आश्विनस्योभयपक्षीयद्वितीया २ दिने। चैत्रशुक्लपक्षद्वितीया १ दिनं। कार्त्तिकस्योभयपक्षीयद्वितीया २ दिने। आषाढ़स्योभयपक्षीयद्वितीया २ दिने। मार्गमासस्योभयपक्षीयद्वितीया २ दिने। फाल्गुनमासस्योभयपक्षीयद्वितीया २ दिने। उत्सवदिनानि अनेकानि। अक्षयषष्ठी १ दिनं। इति स्मृतिः॥
("कृष्णेऽष्टमी तन्निशेऽहनी दे
कृष्णेतरेऽप्येवमहर्दिसन्ध्यं।
अकालविद्युत् स्तनयित्नुघोषे
खतन्त्रराष्ट्रक्षितिपव्यथासु॥
श्मशानयागाद्यतनाह्वयेषु
महोत्सवौत्पातिकदर्शनेषु।
नाध्येयमन्येषु च येषु विप्रा
नाधीयते नाशुचिना च नित्यं"॥ इति सुश्रुतः॥)

असामिकं, त्रि, (नास्ति स्वामी उत्तराधिकारी यस्मिन्।) स्वामिरहितवस्तु। अकर्ट्टकं। वेयोरिस् इति पारस्य भाषा। यथा। एतच्च अग्रदानं स्वभूमौ असामिकायाञ्च न दद्यात्। असामिकान्याह यमः।
"अटव्यः पर्व्वताः पुण्या नद्यस्तीर्थानि यानि च। सर्व्वाण्यसामिकान्याहुर्न हि तेषु परिग्रहः"॥
पुण्या इति विशेषणात् अटव्यो नैमिषाद्याः पर्व्वता हिमालयाद्याः। नद्यो गङ्गाद्याः। तीर्थानि पुरुषोत्तमादिक्षेत्राणि। वाराणस्याद्यायतनानि च। स्वाम्यभावे हेतुमाह न हि तेष्विति। इति श्राद्धतत्त्वं॥

असामिविक्रयः, पुं, (असामिना अनधिकारिणा कृतो विक्रयः।) असामिकर्ट्टकविक्रयः। यथा सम्प्रत्यसामिविक्रयाख्यं व्यवहारपदमुपक्रमते। तस्य च लक्षणं नारदेनोक्तं।
"निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा। विक्रीयतेऽसमक्षं यत्सज्ञेयोऽसामिविक्रयः"॥
इति तत्र किमित्याह।
"स्वयं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्ग्रहो हीनमूल्ये वेलाहीने च तस्करः"॥
स्वं आत्मसम्बन्धिद्रव्यं अन्यविक्रीतमसामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। असामिविक्रयस्य स्वत्वहेतुत्वाभावात्। विक्रीतग्रहणं दत्ताहितयोरपलक्षणार्थं। असामित्वतत्त्वेन तुल्यत्वात्। अतएवोक्तं। असामिविक्रयं दत्तमाधिञ्च विनिवर्त्तयेदिति। क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति। तथा हीनात्तद्द्रव्यागमोपायहीनात्। रहसि चैकान्ते सम्भाव्यद्रव्यादपि हीनमूल्ये अल्पतरेण मूल्येन क्रये। वेलाहीने वेलया हीनो वेलाहीनः क्रयो राज्ञादौ ज्ञातः तत्र च क्रेता तस्करो भवति। तस्करवत् दण्डभाक् भवतीत्यर्थः। यथोक्तं।
"द्रव्यं सस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात्। प्रकाशक्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयात्"इति॥ स्वाम्यभियुक्तेन क्रेता किं कर्त्तव्यमित्यत आह।
"नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरं। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्"॥
नष्टमपहृतं वान्यदीयं क्रयादिना प्राप्य हर्त्तारं ग्राहयेत् चौरोद्धरणकादिभिः। आत्मविशुद्धय राजदण्डाप्राप्त्यर्थञ्च। अथाविदितदेशान्तरं गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाविकस्य समर्पयेत्। तावतैवासौ शुद्धो भवतीति श्रीकराचार्य्येण व्याख्यातं। तदिदमनुपपन्नं। विक्रेतुर्दैर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात्। अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति नाविकं प्रत्ययमुपदेशः। नष्टमपहृतं वा आत्मीयं द्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्त्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत्। देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसन्निधाने तदिव्यापनकालात् प्राक्पलायनाद्यशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्॥०॥
ग्राहिते हर्त्तरि किं कर्त्तव्यमित्यत आह।
"विक्रेतुर्दैर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं। क्रेता मूल्यमवाप्नोति तस्माद्यत्नस्य विक्रयी"।
यद्यसौ गृहीतः क्रेता न मयेद मपहृतं अन्यसकाशात् प्राप्तमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति। न पुनरसावभियोज्यः। किन्तु तत्प्रदर्शितेन विक्रेता सह नाविकस्य विवादः। यथाह बृहस्पतिः।
"मूले समाहृते क्रेता नाभियोज्यः कथञ्चन। मूलेन सह वादस्तु नाविकस्य विधीयते"॥ इति तस्मिंश्च विवादे यद्यसामिविक्रयनिश्चयो भवति तदास्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात् स्वामी नाविकः स्वीयं। द्रव्यमवाप्नोति चौरस्यापराधानुरूपं दण्डं क्रेता च मूल्यमवाप्नोति। अथासौ देशान्तरं गतः तदा योजनसङ्ख्यानयनाय कालो देयः।
"प्रकाशं वा क्रयं कुर्य्यात् मूलं वापि समर्पयेत्। मूलानयनकालस्तु देय स्तस्याध्वसङ्ख्ययेति स्मरणात्॥०॥ अथाविज्ञातदेशतया मूलमाहर्त्तुं न शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति। असमाहार्य्यमूलस्तु क्रयमेव विशोधयेदिति मनुवचनात्। यदा पुनः साक्ष्यादिभिः दैर्घ्येण वा क्रयं न शोधयति मूलञ्च न प्रदर्शयति तदा स एव दण्डभाग्भवतीति।
"अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन्। यथाभियोगं धनिने धनं दाप्यो दमञ्च सः"॥
इति स्मरणात्। स्वं लभेतान्यविक्रीतमित्युक्तं॥*॥ तस्मिन्नुना किं कर्त्तव्यमित्यत आह।

"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभावितेः"॥
आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तत्त्वेवं नष्टमपहृतं वेत्यपि भाव्यं साधनीयं तत्स्वामिना अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः॥*॥ अत्रैवायं क्रमः। पूर्वस्वामी नष्टमात्मीयं साधयेत् ततः क्रेता चौर्य्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत्। अथानेतुं न शक्नोति तदात्मदोषपरिहाराय क्रयं प्रोधयित्वा नाष्टिकस्य समर्पयेदिति॥*॥
तस्करस्य प्रच्छादकं प्रत्याह।
"हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नुयात्।
अनिवेद्य नृपे दण्ड्यः स तु यत्प्रवतिं पशून्"॥
हृतं प्रणष्टं वा चौरादिहस्तस्थं द्रव्यमनेन मदीयं द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णात्यसौ षडुत्तरान् नवतिपशून् दण्डनीयः। तस्करप्रच्छादकत्वेन दुष्टत्वात्॥*॥
राजपुरुषानीतं प्रत्याह।
"शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं।
अर्व्वाक् सम्वत्सरात् स्वामी हरेत परतो नृपः"॥
यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्व्वाक्प्राप्तश्चेत् नाष्टिकस्तद्द्रव्यमवाप्नुयात्। ऊर्द्धं पुनः संवत्सराद्राजा गृह्णीयात्। स्वपुरवानीतञ्च द्रव्यं जनसमूहेषूद्घोष्य यावत् संवत्सरं राज्ञा रक्षणीयं। यथाह गौतमः। प्रणष्टस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य सम्वत्सरं राज्ञा रक्ष्यमिति। यत् पुनर्मनुना विथन्तरमुक्तं—
"प्रणष्टस्वामिकं द्रव्यं राजा यद्वं निधापयेत्।
अर्व्वाक् त्र्यब्दात् हरेत् स्वामी परतो नृपतिर्हरेत्"॥
इति। तच्चतुष्पदसम्बन्धब्राह्मणविषयं। रक्षणनिमित्तं षड्भागादिग्रहणञ्च तेनैवोक्तं।
"आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः।
दशमं दादशं वापि सतां धर्म्ममनुस्मरन्"॥ इति। द्वितीयद्वितीयप्रथमसंवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः। प्रपञ्चितञ्चैतत् पुरस्तात्॥*॥
मनूक्तषड्भागादिग्रहणस्य द्रव्यविशेषे अपवादमाह।
"पशवोऽनेकशफे दद्यात् चतुरः पञ्च मानुषे।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके"॥
एकशफे अश्वादौ प्रणष्टाधिगते तत्स्वामी राज्ञे रक्षानिमित्तं चतुरः पशून् दद्यात्। मानुषे मनुष्यजातीये द्रव्ये पञ्च पशून्। महिषोष्ट्रगवां रक्षानिमित्तं प्रत्येकं द्वौ द्वौ पशौ। अजाविके पुनः प्रत्येकं पादं पादं दद्यादिति सर्व्वत्रानुषज्यते। अजाविकमिति समासनिर्द्देशेऽपि पादं पादमिति वीप्सावलात् प्रत्येकं सम्बन्धो गम्यते॥ इत्यस्वामिकविक्रयप्रकरणं। इति मिताक्षरायां अवहाराध्यायः॥

अस्वामी, [न्] त्रि, (न स्वामि अधिकारी नञ्समासः।) स्वामिभिन्नः। यथा। बृहस्पतिः।
"अस्वामिना तु यद्भुक्तं गृहक्षेत्रोपजादिकं।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते"॥
इति दायतत्त्वं॥
अस्वाम्यं, क्ली, (न स्वाम्यम्। नञ्समासः। स्वामित्वाभावः। यथा देवलः।
"अस्वाम्यं हि भवेदेषां निर्द्देशे पितरि स्थिते"।
इति दायतत्त्वं॥
अस्वास्थ्यं, क्ली, सुस्थतयाभावः। सुस्थतयाराहित्यं। स्वास्थ्यस्याभावः अस्वास्थ्यमित्यव्ययीभावसमासनिष्पन्नं॥ (यथा शिशुपालवधे।
"विगृह्य चक्रे नमुचिद्विषा बली
य इत्यमस्वास्थ्यमहर्द्विवन्दिवः"॥
भुक्ते स्वास्थ्यमुपैति च, इति गृहणीरोगेऽभिहितं माधवकरेण संगृहीतञ्च। अत्र हि अभुक्तेऽस्वास्थ्यमिति तात्पर्य्यं॥)
अह इ क भाषे। (उभं-चुरां-अकं-सेट्।) दीप्तिरिति यावत्। इति कविकल्पद्रुमः॥ इ कं अंहयति। भासो दीप्तिः। इति दुर्गादासः॥
अह इ ङ गतौ। (भ्वादिं-आत्मं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इ अंह्यते। ङ अंहते। इति दुर्गादासः॥
अह, च, प्रशंसा। क्षेपणं। नियोगः। विनिग्रहः। इति मेदिनी॥
अहं, त्रि, अस्मद्शब्दस्य प्रथमान्तस्य रूपं। आमि इति भाषा। यथा आह्निकतत्त्वं,—
'अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्"।
(तथा च रघुवंशे १। ६८।
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः")
अहंयुः, त्रि, (अहंमस्यास्तीति अहंशब्दात् "अहंशुभयोर्युस्" इति युस्।) अहङ्कारयुक्तः। गर्व्वान्वितः। तत्पर्य्यायः। अहङ्कारवान् २। इत्यमरः॥ ("अहंयुनाथ क्षितिपः शुभंयुः"। इति भट्टिः।)
अहः [न्], क्ली, दिवा। इत्यमरः॥ [टीका॥
अहःपतिः, पुं, (अहः पतिः।) सूर्य्यः। इत्यमरः
अहङ्कारः, पुं, (अहमिति ज्ञानं क्रियतेऽनेन। अहं+कृ+घञ्।) अहङ्कृतिः। तत्पर्य्यायः। गर्व्वः २ अभिमानः ३ इत्यमरः॥ पुराणमते स त्रिविधः। सात्विकः १ राजसः २ तामसश्च ३। सात्विकाहङ्कारात् इन्द्रियाधिष्ठातारो देवा मनश्च जातं। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् सूक्ष्मपञ्चभूतानि जातानि। वेदान्तमते अभिमानात्मिकान्तःकरणवृत्तिः॥ अहमित्यभिमानः। स च शरीरादिविषयको मिथ्याज्ञानमुच्यते। इति गोतमसूत्रवृत्तिः। "अहमित्यव्ययं तस्य करणं। अहमिति किरति अनेति वा अहङ्कारः। करोतेः किरतेर्वा घञ्। कारप्रत्यय इत्यन्ये" इत्यमरटीकायां भरतः। मदः ४ स्मयः ५ अपलेपः ६ दर्पः ७। इति जटाधरः।
अहङ्कृतिः ८ उद्धतमनस्कत्वं ९। मानः १० चित्तसमुन्नतिः ११। यथा।
"गर्व्वोमदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः।
स्यादुद्धतमनस्कत्वे मानश्चित्तसमुन्नतिः॥
अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥
इति शब्दरत्नावली॥ (अहङ्कारस्याश्रय आत्मा। यथा, भाषापरिच्छेदे।
"अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः"।
अहङ्कारतत्त्वं। यथाह मनौ, १। १४।
"मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्"।
गर्व्वोन्नत्यम्। यदुक्तं।
"अहङ्कारश्च सर्व्वेषां पापवीजममङ्गलम्।
ब्रह्मादिषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नतिः"॥
स च द्विविधः, विशेषरूपः सामान्यरूपश्चेति। तत्रायमहं एतस्य पुत्र इत्येवं यत्किमभिमन्यमानो विशेषरूपो यच्चाहङ्कारः। असावित्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्ट्यहङ्कारः। स च हिरण्यगर्भो महान् आत्मेति च सर्व्वानुसूयतत्वादुच्यते। अहमभिमानरूपो योऽहङ्कारः स सर्व्वसाधारणः। आरोपितगुणैरात्मनो महत्वाभिमानः। अहमेव श्रेष्ठ इति दुरभिमानः। महाकुलप्रसूतोऽहं महतां शिष्यो नास्ति द्वितीयो मत्सम इत्यभिमानः। आत्मश्लाघनाभावेऽपि मनसि प्रादुर्भूतोऽहं सर्व्वोत्कृष्ट इति गर्व्वः।)
अहङ्कारवान्, त्रि, (अहङ्कारो विद्यतेऽस्य। अहङ्कार+मतुप्। मस्य वः।) गर्व्वान्वितः। इत्यमरः॥ तत्पर्य्यायः। अहंयुः २। इत्यमरः॥ अहङ्कारान्वितः ३। इति शब्दरत्नावली। गर्व्वितः ४। इति जटाधरः॥
अहङ्कारी, [न्] त्रि, गर्व्वयुक्तः। अहङ्कारो विद्यतेऽस्येति अस्यर्थे णिन्प्रत्ययेन निष्पन्नः। अभिमानी। गर्व्वान्वितः॥ (दशदण्डरूपके॥
"धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः"।)
अहङ्कृतिः, स्त्री, (अहम्+कृ+क्तिन्।) अहङ्कारः। गर्व्वः। इति शब्दरत्नावली॥ (यथा पञ्चतन्त्रे॥
"युध्यतेऽहङ्कृतिं कृत्वा दुर्ब्बलो यो बलीयसा"।)
अहतं, क्ली, (हन्+क्त। ततो नञ्समासः।) नवाम्बरं। नूतनवस्त्रं। इति हलायुधशब्दरत्नावल्यौ॥ (अहतलक्षणं यथा महाभारते,—
"ईषद्धौतं नवं श्वेतं सदशं यन्नधारितम्।
अहतं तद्विजानीयात् पावनं सर्व्वकर्म्मसु"॥
"अहतैश्चैव वासोभिर्माल्यैश्चावचैरपि"। इति॥
"अहतानि च वासांसि रथञ्च शुभलक्षणम्"।
इति रामायणे। अनाहते, त्रि,॥
अहमहमिका, स्त्री, (अहमहं शब्दोऽस्यत्र, वीप्सायां द्वित्वम्। वीप्सादित्वात् ठन्। ततष्टाप्।) परस्पराहङ्कारः। इत्यमरः। परस्परं परमपेक्ष्यापरस्यापरमपेक्ष्य परस्य योऽहङ्कारोऽहमेव श्रेष्ठोऽहमेव श्रेष्ठ इति मानः। इति भरतः आमि वड़ आमि वड़ बलिया परस्पर अहङ्कार इति भाषा। (यथा पञ्चतन्त्रे,—

"इत्यस्याहमहमिकया तयोर्विवदतोः"।)

अहम्पूर्व्विका, स्त्री, (अहं पूर्व्वं अहं पूर्व्वमिति कथनं यत्र। अहम्पूर्व्व + ठन् + स्वार्थे कन् + ततष्टाप्।) अहम्पूर्व्वं अग्रे भवामि अहं पूर्व्वं अग्रे भवामि इत्यन्योऽन्यं योधानां धावनक्रिया। इत्यमरः। आमि अग्रे याव वलिया योद्धा दिगेर परस्पर आगे धाओया इति भाषा। (यथा किराते,—

"सुगेषु दुर्गेषु च तुल्यविक्रमै-
र्जवादहम्पूर्व्विकया वियासुभिः"।)

अहम्मतिः, स्त्री, (अहंप्रधाना मतिर्ज्ञानं।) अविद्या। अज्ञानं। इत्यमरः॥

अहर्गणः, पुं, (अह्नां गणः) मासः इति हारावली। यहाणां मध्यादिज्ञानार्थं श्वेतवाराहकल्पावधिरद्यावधिर्ब्रह्मसिद्धान्तोक्तकल्पावधिकल्पाद्यब्दावधि वा इष्टकालपर्य्यन्तं परिगणितदिनसमूहः। तत्पर्य्यायः। युष्मन्दं २। दिनौघः ३। युगणः ४। दिनपिण्डः ५। इति ज्योतिःशास्त्रम्॥

अहर्ज्जरः, पुं, (अहोभिर्लोकान् जरयति। अहन् + जॄ + णिच + अच्। यद्वा अहानि जीर्य्यन्त्यन्तर्भवन्त्यस्मिन्। अहन् + जॄ + अच्।) संवत्सरः। यथा। "यथापः प्रवता यन्ति यथा मासा अहर्ज्जरं। एवं मां ब्रह्मचारिणः धातरायन्तु सर्व्वतः स्वाहा"। इति तैत्तिरीयोपनिषदि ग्रिच्चावल्ली॥ यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति। यथा वा मासा अहर्ज्जरं संवत्सरोऽहर्ज्जरोऽहोभिः परिवर्त्तमानो लोकान् जरयतीति अहानि वा अस्मिन् जीर्य्यन्ति अन्तर्भवन्ति इत्यहर्ज्जरः। तच्च यथा मासा यन्ति एवं मां ब्रह्मचारिणः हे धातः सर्व्वस्य विधातः मामायन्तु सर्व्वतः सर्व्वदिगभ्यः। इति शङ्कराचार्य्यकृतभाष्यम्॥

अहर्पतिः, पुं, (अह्नः पतिः। पक्षे अहःपतिः।) सूर्य्यः। इत्यमरः। (यथा रघुवंशे १०। ५४।

"द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम्"।)

अहर्ब्बान्धवः, **अहर्म्मणिः** } पुं, (अह्नो बान्धवः। अह्नो मणिरिव च।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः।

अहर्मुखं, क्ली, (अह्नो मुखं।) प्रत्यूषः। इत्यमरः॥

अहल्यः, त्रि, (हलेन कृष्यं। ततो नञ्समासः।) हलानार्हक्षेत्रादिः। अकृष्टभूमिः॥

अहल्या, स्त्री, अप्सरोविशेषः। (यथा हरिवंशे।

"दिवोदासस्य राजर्षेरहल्या च यशस्विनी।
शरद्वतश्च दायादमहल्या समसूयत"॥

गौतममुनिपत्नी। इति मेदिनी॥ सा च महासाध्वी। प्रातः काले तस्यानामस्मरणे महापातकनाशो भवति। यथा पुराणं,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनं"॥

सत्ययुगे इन्द्रः गौतममुपधारयं कृत्वा तस्याः सतीत्वं नाशितवान्। ततो गौतमशापेन सा पाषाणदेहा बभूव। ततस्त्रेतायुगे श्रीरामचन्द्रस्य पादस्पर्शात् शापात् विमुक्ता सती पुनः पूर्व्वरूपा मानवी भूता। इति रामायणम्॥

अहस्करः, पुं, (अहः करोति। अहन् + कृ + ट। कस्कादित्वात् सः।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः॥

अहस्पतिः, पुं, (अह्नः पतिरिव।) सूर्य्यः। इत्यमरः। अर्कवृक्षः। अमरे तत्पर्य्याये अर्काङ्क इति दर्शनात्॥

अहह, व्य, (अहं जहातीति। अहम् + हा + ड। एषोदरादित्वात्सलोपः।) अद्भुतं। खेदः। परिक्लेशः। प्रकर्षः। सम्बोधनं। इति मेदिनी॥ (आश्चर्य्यं। विस्मयः। यथा हितोपदेशे।

"अहह! महापङ्के पतितोऽसि"।
"अहह! तात! पश्यत्व दारुणं"।

इति महानाटके॥)

अहहा, व्य, (अहं जहातीति। अहम् + हा + क्विप्। एषोदरादित्वात् साधुः।) अद्भुतं। खेदः। इत्यमरटीकायां रायमुकुटादयः। अत्र अहहशब्दार्थोऽपि द्रष्टव्यः॥

अहार्य्यः, पुं, (हृ + ण्यत्। ततो नञ्समासः।) पर्व्वतः। इत्यमरमेदिन्यौ॥

अहार्य्यं, त्रि, (न हार्य्यं। नञ्समासः।) हर्त्तुमशक्यं। अहर्त्तव्यं। अहरणीयं। इति मेदिनी॥ ("अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः" "तच्चात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः"॥ इति च मनुः ९। १८९।)

अहिः, पुं, (आहन्तीति। आ + हन् + इण्। हन हिंसागत्योः। आडि श्रिहनिभ्यां कसवेति इण्। स च डित्। डित्वात् टिलोपः। आडो कसच।) वृत्रासुरः। सर्पः। इत्यमरः। सूर्य्यः। पथिकः। राजः। इत्यनेकार्थध्वनिमञ्जरी॥ (सीसकं। राजः। वप्रः। श्लेष्मातकवृक्षः। खलः। "विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः। यदहिर्नकुलदेषी स्वकुलदेषी पुनः पिशुनः"। इति वासवदत्तायाः प्रस्तावनाश्लोकः॥)

अहिंसा, स्त्री, (न हिंसा। नञ्समासः।) कुलिकवृक्षः। कुलेखाड़ा इति ख्याता। अस्या गुणाः। विषरोगग्रीष्मनाशित्वं। इति राजवल्लभः॥ (कोकिलाक्षशब्देऽस्या गुणादयो ज्ञेयाः। हिंसा रहिते, त्रि।)

अहिका, स्त्री, (न + हा + ङिक् + टाप्।) शाल्मलीवृक्षः। इति शब्दचन्द्रिका॥

अहिकान्तः, पुं, (अहेः सर्पस्य कान्तः प्रियः। भक्ष्यत्वात्।) वायुः। इति हेमचन्द्रः॥

अहिच्छत्रः, पुं, (अहेः छत्रः फणा इव छादकः।) देशविशेषः। तत्पर्य्यायः। प्रत्यग्ररथः २। मेघपुष्पीवृक्षः। इति हेमचन्द्रः॥

अहिच्छत्रा, स्त्री, शर्करा। इति राजनिर्घण्टः। चिनि इति भाषा। पुरीविशेषः। इति ज्योतिस्तत्त्वं॥ तथा वृद्धगार्ग्यः। "केशवमानर्त्तपुरं पाटलीपुत्रं पुरीमहिच्छत्रां। दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणं"। इति ज्योतिस्तत्त्वं॥

अहिजित्, पुं, (अहिं सर्पं वृत्रासुरं वा जितवान् अहि + जि + क्विप्।) विष्णुः। कालीयनागदमनात्॥ इन्द्रः। वृत्रासुरनाशात्॥

अहित, त्रि, (न हितः। नञ्समासः।) शत्रुः। इत्यमरः। (यथा रघुवंशे ४। २८॥

"स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितानिलोद्धूतैस्तज्जयप्रतिभैरिव केतुभिः"।)

अपथ्यं इति शब्दचन्द्रिका॥ ("एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निसंस्कारविषादीनि।" इति सुश्रुते। प्रतिकूलः। अशुभकरः। यथा वैराग्यशतके।

"लोकस्याप्यहितमाचरतीति चित्रम्"। ३५॥

"परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः।
अहितो देहजो व्याधिर्हितमारण्यमौषधं"॥ इति हितोपदेशः। अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्यपचारः, नहि सर्व्वाण्यपथ्यानि तुल्यदोषाणि न च सर्व्वे दोषास्तुल्यबलाः। नच सर्व्वाणि शरीराणि व्याधिक्षमणे समर्थानि। तदेव ह्यपथ्यं देशकालसंयोगवीर्य्यप्रमाणातियोगात् भूयस्तरमपथ्यं सम्पद्यते॥ स एव दोषः संसृष्टयोर्निर्विशङ्कोपक्रमो गम्भीरानुगतः प्राणायतनसमुत्थो मर्म्मोपघाती वा भूयान् कष्टतमः क्षिप्रकारितमश्च सम्पद्यते इति चरकः।

"इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्ताहितान्येकान्ताहितानि हिताहितानि भवन्ति"। "एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निसंस्कारविषादीनि।"

"दुग्धस्यैकान्तहितता विषस्यैकान्ततोऽहिता।
तं एव युक्तरूपाद्येषु द्रव्येषु सलिलादिषु॥
एकान्तहितता विद्धि वत्स! सुश्रुत! नान्यथा"॥

"विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः।
तान्येकान्ताहितान्येव प्रेक्ष्य विद्याद्धिताहितं"॥ इति सुश्रुतः॥)

अहितुण्डिकः, पुं, (अहेः तुण्डं मुखं, तेन दीव्यति यः सः। अहितुण्ड + ठक्। संज्ञापूर्व्वकत्वात् वृद्धभावः।) भिक्षार्थं सर्पखेलकः। तत्पर्य्यायः। व्यालग्राही २। इत्यमरः। साप्‌ड़े इति भाषा॥

अहिदिद्, [ध्] पुं, (अहिं वृत्रासुरं सर्पं वा देष्टि यः। अहि + दिष् + क्विप्।) इन्द्रः। गरुड़ः। मयूरः। नकुलः। इति मेदिनी॥ ("अहिदिधक्षुद्भवता निगृह्यतां"। इति माघे।

"एकाहिरक्षार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यथा ब्रवीति"।

इति नागानन्दे॥

अहिनकुलता } स्त्री, अहिनकुलयोर्वैरं। नित्य-
अहिनकुलिका } विरोधितेति यावत्। अहिश्च नकुलश्च अहिनकुलौ तयोर्भाव इति भावार्थे त-ष्वुलिकप्रत्यययोः स्त्रियामापा निष्पन्ना॥

अहिपुत्रकः, पुं, (अहेः सर्पस्य पुत्रक इव। सर्पाकारत्वात्।) नौकाविशेषः। तत्पर्य्यायः। पोतः २ तरालुः ३। इति हारावली॥

अहि

अहिपूतनः, पुं, क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"ग्रहस्नस्तूसमायुक्तेऽधौते ऽघाने शिरोभवेत्।
स्विन्ने वा स्नाप्यमानस्य कण्डूरक्तकपोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनं"॥*॥
तच्चिकित्सा यथा भावप्रकाशे,—
"तत्र संशोधनैः पूर्वं धात्रीलक्ष्यं विशोधयेत्।
त्रिफलाखदिरक्वाथैर्व्रणानां क्षालनं हितं॥
शङ्खसौवीरयष्ट्याह्वैर्लेपः कार्य्योऽहिपूतने"। इति
(रविनिश्चयटीकाधृता विजयेन व्याख्याप्रसङ्गतो भोजवचनं यदाहृतं तद्यथा,—यदुक्तं।
"दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च।
कण्डूदाहरुजावद्भिः पिडकैश्च समाचितः॥
अहिपूतनः सम्भवति यथादोषञ्च दारुणः"॥
इति सविदानलक्षणसम्प्राप्तिकं चिकित्सितं वाभटेन वा यदुक्तं तद्यथा,—
"मलोपलेपात् खेदाद्वा गुदे रक्तकपोद्भवः।
ताम्रोव्रणोऽन्तःकण्डूमान् जायते भूर्य्युपद्रवः॥
केचित्तं माढकादोषं वदन्त्यन्येऽहिपूतनं।
प्रस्तारगुदकुन्दञ्च केचित्र तमनामिकं"॥*॥

चिकित्सा।

"तत्र धात्र्याः पयःशोथं पित्तश्लेष्महरौषधैः। १
घृतप्लीतञ्च शीताम्बु-युक्तमन्तरुपानकं॥ २
सक्षौद्रताक्ष्यशैलेन व्रणं तेन च लेपयेत्। ३
त्रिफलावदरीशल्लकत्वक्-क्षाय-परिषेचितं॥ ४
कासीश-रोचना- तुत्थ-मनोऽह्वालरसाञ्जनैः। ५
लेपयेदक्षपिष्टैर्वा चूर्णितैर्वाचूर्णयेत्। ६
सुवर्च्चलीरघवा यष्टीशङ्खसौवीरकाञ्जनैः। ७
सारिवाशङ्खनाभिभ्यामञ्जनस्य त्वथोऽथवा"॥८॥
चक्रपाणिसंग्रहे तु।
"पटोलपत्रत्रिफलारसाञ्जनविपाचितं।
पीतं घृतं नाशयति क्षाराम्यग्रहिपूतनां"॥
पटोलाद्यघृतं॥*॥)

अहिफेनं, क्ली, (अहेः सर्पस्य फेनं गरलमिव। अत्युग्रत्वात्।) अफेनं। इति राजनिर्घण्टः। आफिं इति भाषा। (अस्य पर्य्यायमाह भावप्रकाशकारः।
"उक्तं खसपलशीरमाफूकमहिफेनकं"।
अस्य कार्य्यमाह शार्ङ्गधरः।
"पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति।
व्यवायि तदयथा भङ्गा फेनाह्वाहिसमुद्भवं"॥
अपरञ्चाफेनशब्दे आफूकशब्दे च ज्ञातव्यं।)

अहिर्बुध्नः, पुं, (अहिः बुध्ने यस्य।) शिवः।
("अजैकपादहिर्बुध्नः पिनाकी चापराजितः"।
इति हरिवंशे।) रुद्रविशेषः॥ इति जटाधरः॥
(यथा हरिवंशे।
"सुरभी कस्यपादुद्वानेकादश विनिर्ममे।
महादेवप्रसादेन तपसा भाविता सती॥
अजैकपादहिर्बुध्नस्त्वष्टा रुद्राश्च भारत"। इति।)

अहिर्बुध्नदेवता, स्त्री, (अहिर्बुध्नो रुद्रोऽधिष्ठात्री देवता यस्याः।) उत्तरभाद्रपदनक्षत्रं। इति ज्योतिःशास्त्रं॥

अहो

अहिभयं, क्ली, (अहेः सर्पतुल्यखलपक्षात् सर्पादा भयं।) राज्ञां खलपक्षोद्भवभयं। इत्यमरः॥ सर्पभयं॥

अहिभयदा, स्त्री, (अहेर्भयं यति खण्डयतीति। अहिभय + दो + क) भूम्यामलकी। इति राजनिर्घण्टः॥ (भूम्यामलकीशब्देऽस्या गुणावली ज्ञातव्या॥)

अहिभुक्, [ज्] पुं, (अहिं भुङ्क्ते। अहि + भुज् + क्विप्।) गरुड़ः। मयूरः॥ इत्यमरः॥ नाकुली। गन्धनाकुली। इति राजनिर्घण्टः॥

अहिमर्दनी, स्त्री, (अहेर्मर्दनं भवत्यस्याः।) गन्धनाकुलीनाम कन्दविशेषः॥ इति राजनिर्घण्टः॥

अहिमारः, पुं, (अहिं मारयति यः सः। अहि + मृ + णिच् + अण्।) अरिमेदकवृक्षः। इति राजनिर्घण्टः॥

अहिमेदकः, पुं, (अहिं मेदयति स्वगुणमात्रेण गलयति यः सः।) अरिमेदकवृक्षः। इति राजनिर्घण्टः। (अरिमेदशब्देऽस्य गुणादयो ज्ञेयाः॥)

अहिलता, स्त्री, (अहिरिव लता। दीर्घाकारत्वात्।) गन्धनाकुली। ताम्बूली। इति राजनिर्घण्टः॥

अहीरणिः, पुं, (अहीन् ईरयति दूरीकरोति। अहि + ईर + अनि।) दिमुखसर्पः। इति त्रिकाण्डशेषः॥

अहे, य, क्षेपः। वियोगः। इति शब्दमाला॥

अहेरुः, स्त्री, (न हिनोति। हि गतौ वाऽऊङ्कादुः। ततो नञ्समासः।) श्रुतमूली। इत्यमरः॥

अहो, य, (न + हा + डो।) धिगर्थः। शोकः। करुणार्थः। विषादः। सम्बोधनं। प्रशंसा। विस्मयः। पदपूरणं। असूया। वितर्कः। इति मेदिनी॥ (यथा रामायणे अयोध्याकाण्डे॥
"अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः"।
"अहो मधुरमासां दर्शनं"। इति शाकुन्तले प्रथमाङ्के।)

अहोरात्रः, पुं, (अहश्च रात्रिश्च द्वयोः समाहारः। राजाहाहाः ष्टसि। अहः सर्व्वैकदेशे टच् इति टच्।) दिवानिशं। स तु सूर्य्योदयदयपरिच्छिन्नत्रिंशन्मुहूर्त्तात्मककालः। इत्यमरः॥ मनुष्याणां मासेन पैत्रोऽहोरात्रो भवति। मनुष्याणामेकवर्षेण देवानामहोरात्रो भवति। द्विसहस्रयुगितमानुष्यचतुर्युगमानेन ब्रह्मणोऽहोरात्रो भवति। तत्र मनुष्यमानेन ८६४०००००० वर्षा भवन्ति॥

अहोवत, य (अहो च वत च।) अनुकम्पा। खेदः। सम्बोधनं। इति विश्वमेदिनौ॥
("अहोवतासिस्पृहणीयवीर्य्यः"। इति कुमारे।
"अहोवत! कीदृशीं वयोऽवस्थामापन्नोऽसि"। इति शाकुन्तले। [इति गीता॥)
"अहोवत! महत्पापं कर्त्तुं व्यवसिता वयम्"।

अक्षाय, य, (क्ष क्षयनयने। वाऽऊङ्कादुवे घञ्। ह्रस्वः। एषोदरादित्वात् वस्य यः। ततो नञ्समासः।) झटिति। द्रुतं। इत्यमरः॥
(अक्षाय सा नियमजं क्षममुत्ससर्ज"। इति कुमारे।
"अक्षाय तावदरुणेन तमो निरस्तम्"। इति रघौ।
"स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा

आक

मूर्च्छन् मोसमकर्षिहर्षविहितस्वानाङ्किकाङ्काश्रवः"। इति काव्यप्रकाशे।)

अक्षीकः, पुं, (नास्ति क्षीलज्जा यस्य।) वौद्धः। क्षपणकः। इति त्रिकाण्डशेषः॥

अक्षला, स्त्री, (न + क्षे + डल।) भल्लातकवृक्षः। इति शब्दचन्द्रिका॥ भेला इति भाषा।

आ

आ, आकारः। द्वितीयस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स च दीर्घः प्लुतश्च भवति।
"आकारं परमाक्षरं ब्रह्मज्योतिर्मयं प्रिये।
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
पञ्चप्राणमयं वर्णं स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रे॥ अस्य लेखनप्रकारो यथा—
"अकारस्योपमासस्य दक्षक्रोडायता लघुः।
ब्रह्मादयस्तथा शक्तिस्तास्तिष्ठन्ति नित्यशः"॥
इति वर्णोद्धारतन्त्रं। तस्य नामानि यथा—
"आकारो विजयानन्तो दीर्घच्छायो विनायकः।
क्षीरोदधिः पयोदश्च पाण्डो दीर्घास्यदन्तकौ॥
प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः।
प्रतिष्ठा मानदा कान्तो विश्वान्तक गजान्तकः॥
पितामहो दिठान्तो भूः क्रिया कान्तिश्च सम्भवः।
द्वितीया मानदा काली विघ्नराजः कुजो वियत्॥
स्वरान्तकश्च हृदयमङ्कुशो भगमालिनी"॥
इति वर्णाभिधानं॥

आ, य, स्मृतिः। यथा। "आज्ञातं सजटायुरेवः"। वाक्यं। यथा। "आ एवं मन्यसे"। इत्यमरः॥ (पूर्वं मैवं मंस्था इदानीं त्वेवं मन्यसे इत्यर्थः।) अनुकम्पा। (यथा, आ देवदत्तो दरिद्रः इति।) समुच्चयः। इति मेदिनी॥ (यथा, देवेभ्यश्च पितृभ्यश्च आ।) क्वचित् निषिद्धसन्धिवर्णः। आङ्शब्दो योऽर्थो न सन्धीयते स इत्यर्थः। इति भरतः॥ ("आ एवं तत्त्वमर्य्यादा आ एवं तत्कृतं मया"। इति मुग्धबोधम्।)

आं, य, एवं। स्वीकारः। इत्यमरः॥

आः, पुं, महेश्वरः। इति पुरुषोत्तमः॥ पितामहः। वाक्यं। यथा अग्निपुराणे एकाक्षराभिधाने॥
"अ विष्णुः प्रतिषेधः स्यादाः पितामहवाक्ययोः।
सीमायामथाव्ययं आ भवेत् संबोधपीड़योः"॥

आः, [स्] य, कोपः। यथा। आः पापदुर्म्मुखः। ("आः किमेतदितिक्रोधादाभाष्य महिषासुरः"। इति मार्कण्डेयपुराणम्।
"आः पापे दुर्विनीते महाम्लेते"। इति कादम्बरी।) पीड़ा। यथा आः प्रीतं। इत्यमरभरतौ। स्मृतिः। स्पर्द्धा। तर्ज्जनं। इति शब्दरत्नावली॥

आकम्पितं, त्रि, (आकम्पते स्म। आङ् + कपि + क्त।) कम्पविशिष्टं। तत्पर्य्यायः। वेल्लितं २ प्रेङ्खितं ३ आधूतं ४ आधुतं ५ चलितं ६ इत्यमरः॥ कम्पितं ७ धुतं ८ आधूतं ९ विधूतं १० धूतं ११ प्रकम्पितं १२। इति शब्दरत्नावली॥
("अनोकहाकम्पितपुष्पगन्धी"। इति रघौ।

"आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारलताधिवासैः"।
इति ऋतुसंहारे॥)

आकरः, पुं, (आकीर्य्यन्ते धातवोऽत्र। आङ्+कॄ+अप्। यद्वा आकुर्व्वन्ति संघीभूय कुर्व्वन्ति व्यवहारमत्रेति वा। आ+कॄ+घ।) धातुरत्नादेरुत्पत्तिस्थानं। तत्पर्य्यायः। खनिः २ इत्यमरः॥ ("आकरे पद्मरागाणां जन्म काचमणेः कुतः"। इति हितोपदेशः।
"शैलेन्द्रो हिमवान् नाम धातूनामाकरो महान्" इति रामायणम्।) समूहः।
("शब्दाकरकरग्रामवर्णमण्डलमण्डलम्"।
इति कविकल्पद्रुमः।) श्रेष्ठः। इति मेदिनी॥

आकर्णनं, क्ली, (आ+कर्ण+ल्युट्।) श्रवणं॥ ("मुदा तदाकर्णनतत्परोऽभूत्"। इति नैषधे।)

आकर्षः, पुं, (आकृष्यते इति। आ+कृष+घञ्।) पाशकः। पाशा इति भाषा। अक्षक्रीड़ा। पाशा खेला इति भाषा। सारिफलकः। इत्यमरः॥ छक इति भाषा। (यथा महाभारते।
"आकर्षस्ते वाक्फलः सुप्रणीतो
हृदि प्रोढ़ो मन्त्रपदः समाधिः"।
इन्द्रियं। धनुरभ्यासवस्तु। आकर्षणं। इति मेदिनी॥ आकृष्यते अनेन। आँकुषी इति भाषा। यष्टा। "आकर्ष इव स्वा आकर्षश्वः"। इति मुग्धबोधव्याकरणं। आकर्षतुल्य इति ज्ञापनार्थ-इव शब्दः। इति दुर्गादासः॥ (अयस्कान्तः। निकषोपलः।)

आकर्षणं, क्ली, (आ+कृष्+ल्युट्।) आकर्षः। बलादानयनं। टानन् इति भाषा। यथा,—
"सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः।
केशाकर्षणनिर्धूतगौरवा मागमिष्यसि"॥
इति मार्कण्डेये देवीमाहात्म्यम्॥ *॥
तन्त्रोक्तकर्म्मविशेषद्वारा योषाद्यानयनं। यथा।
अथाकर्षणं।
"आकर्षणविधानानि कथयामि समासतः।
यद्दृष्टं चैपुरे तन्त्रे यदृष्टं भूतडामरे॥
श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्।
प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदं ततः॥
अमुकीति पदं दत्त्वा आकर्षय द्विधा पदं।
स्वाहान्तं मन्त्रमुद्धृत्य जपेदयुतसङ्ख्यकं॥
षट्कोणचक्रमालिख्य रक्तचन्दनकुङ्कुमैः।
षड्वर्णं कारयेन्मन्त्री लज्जाबीजसमन्वितं॥
षड्दीर्घभाक्षरेणैव नादबिन्दुविभूषितं॥
रक्तपुष्पाक्षतधूपादिनैवेद्यैः प्रपूज्य तां।
भावयन् चेतसा देवीं त्रिनेत्रां चन्द्रशेखरां।
बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहां॥
पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके।
मन्त्रस्यास्य प्रभावेण रम्भामपि तथोर्व्वशीं॥
आकर्षयेन्न सन्देहः किं पुनर्मानवीमिह॥ *॥
भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा॥
काश्मीरागुरुकस्तूरीरोचनामिलितेन च।
अनामारक्तमिश्रेण कमलाक्षीमनुं लिखेत्॥
ॐ क्रीं कमलाक्षि अमुकीमाकर्षयाकर्षय ॐ फट्॥
इमं मन्त्रं जपेदादौ सहस्रैकं ततः पुनः।
तद्भूर्जपत्रमादाय गुलिकां कारयेत् सुधीः॥
तेनैवं साध्यपादोत्थमृत्तिकापङ्कवेष्टितां।
शोषितां तेजसा भानोर्वेष्टयेत् चिरुटुकैः पुनः॥
प्रतिमां स्त्रीनिमां कृत्वा क्षिपेत्तस्यास्तदोदरे।
गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीं॥
तादृशाभिमुखो भूत्वा निर्जने निशि साधकः।
ततस्तद्गतचित्तश्च तावत् कालं जपेन्मनुं।
यावदायाति सन्त्रस्ता मदनालसविग्रहा॥*॥
अथान्यत् कथयाम्यत्र नृपाकर्षणहेतवे।
देवस्यापि नरस्यापि मोहिनीमन्त्रजापतः॥
अथ मन्त्रं महेशान्यास्तारमादौ ततस्त्रयं।
पञ्चशायकवीजञ्च दत्त्वाथ भुवनेश्वरीं॥
मोहिनीति च नामान्ते षट्कारं पुनरालिखेत्।
स्वाहान्तमन्त्रमुद्धृत्य मध्यवीजेन कारयेत्॥
षड्कृत्वो दीर्घयुक्ताद्यैश्चक्रेऽस्मदणके यजेत्।
प्रथमं साध्यनामानि लेखयेत्तानि च कञ्जोदरे॥
महारञ्जनरक्तेन पूर्व्वमन्त्रपदं युतं।
मोहिनीं पद्मकिञ्जल्के स्तम्भिनीं स्तम्भिनीं तथा॥
वश्यङ्करीं कुलेशीञ्च ततो वै विश्ववासिनीं।
आकर्षिणीं ततः क्लिन्नामर्चयेदष्टपत्रके॥
गन्धपुष्पादिधूपाद्यैर्भक्तियुक्तेन चेतसा।
लक्षजप्तेन सर्व्वत्र शीघ्रमाकर्षणं भवेत्॥ *॥

क्रीं कालिकायै धीमहि
तन्नः कालि प्रचोदयात्।
ॐ आकर्षिणी वज्रधारिणी
ॐ फट् स्वाहा अमुकीमाकर्षय॥

प्रथमं पूर्व्वमुद्धृत्य उशनेशी ततः परं।
नितम्बिनी वह्निजाया विद्या परमदुर्लभा॥
सिन्दूरपुत्तलिं कृत्वा तस्या नाम हृदि लिखेत्।
पलमूल्येन ताम्बूलं समानीय आमश्राद्धदये
नैवेद्यं कृत्वा कृष्णाष्टोत्तरशततुलस्या मूलमन्त्र-पठिते पुत्तल्या हृदि नामस्थाने ताड़िते सति सा समायाति"। इति श्रीकृष्णानन्दविद्यावागीश-कृतषट्कर्म्मदीपिका तन्त्रसारश्च॥

आकर्षणी, स्त्री, (आकृष्यते अनया। आ+कृष्+ल्युट्+स्त्रियां ङीप्।) फलपुष्पाद्याकर्षकयष्टि-काविशेषः। आँकुषी इति भाषा॥

आकलनं, क्ली, (आ+कल्+ल्युट्।) आकाङ्क्षा। परिसंख्या। बन्धनं। इति मेदिनी॥ ("सेव्यापि सानुनयमाकलनाय यन्त्रा"। इति माघः।)

आकल्पः, पुं, (आ+कृप्+घञ्।) वेषः। इत्यमरः॥ कल्पनं। इति मेदिनी॥ मण्डनं। रोगः। इति हेमचन्द्रः॥ वेषार्थे यथा रघौ,—
("अक्षतकविधिसर्व्वाङ्गीनमाकल्पजातं
विलसितपदमाद्यं यौवनं सा प्रपेदे"।
"स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्"। इति साहित्यदर्पणे तृतीयपरिच्छेदे।
कल्पपर्य्यन्ते च, यथा—"आकल्पं नरकं भुङ्क्ते"। इति स्मृतिः।)

आकल्पकः, पुं, (आकल्प+कन्।) तमः। मोहः। यष्टिः। उत्कण्ठा। हर्षः। इति मेदिनी॥

आकषः, पुं, (आकष्यते यच, आ+कष्+अच्।) प्रस्तरविशेषः। इति शब्दरत्नावली॥ कष्टिपाथर इति भाषा।

आकस्मिकं, त्रि, (अकस्मात् भवं। अकस्मात्+ठञ्।) अकस्मादुद्भवं। हठाज्जातं॥ ("आकस्मिक-प्रत्ययभासां च देवीं वाचमनुष्टुभेन छन्दसा परि-गतामभ्युदैरयत्"। इति उत्तररामचरितम्॥)

आकाङ्क्षा, स्त्री, (आङ्+काङ्क्षि+अच्+टाप्।) इच्छा। अभिलाषः। इत्यमरः॥ (रमणीयवस्तु-स्पृहा। यदुक्तं साहित्यदर्पणे।
"आकाङ्क्षा रमणीयत्वात् वस्तुनो या स्पृहा तु सा"।
अपेक्षा। जिज्ञासा। अनुसन्धानं। यथा पदा-ङ्दूते,—
"नाकाङ्क्षन् किं भवति विपुलश्रीमतोऽर्थान्तरेषु"।)
न्यायमते। यत्पदमस्ते यत्पदान्वयबोधो न भवति तत्पदे तत्पदवत्ता। प्रतीतिपर्य्यवसानविरहः। इत्या-लङ्कारिकाः॥

आकायः, पुं, (आङ्+चि+घञ्।) निवासः। इति वोपदेवः॥

आकारः, पुं, (आ+कृ+घञ्।) इङ्गितं। अभि-प्रायानुरूपचेष्टाविष्करणं। संकेत ठार इत्यादि भाषा। आक्रियतिः। मूर्त्तिः। इत्यमरः॥
("तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च"।
इति रघौ १। २०।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च"।
इति हितोपदेशे सुहृद्भेदः। मूर्त्तिः। "आकार-सदृशप्रज्ञः"। इति रघौ १। १५।)

आकारगुप्तिः, स्त्री, (आकारस्य गुप्तिः।) रत्या-दिसूचको मुखरागादिराकारः। आकारोऽङ्ग-वैकृतमिति वोपालितः॥ गुप्तिर्गोपनं। आकारस्य भयलज्जादिना गुप्तिराकारगुप्तिः। इत्यमर-टीकायां भरतः॥ तत्पर्य्यायः। अवहित्था २। इत्यमरः॥ अङ्गविकृतस्य रोमाञ्चादेराच्छादनात् अवहित्थिस्तिरवहित्था। इति सारसुन्दरी॥ ("भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था"। इति साहित्यदर्पणम्।)

आकारगोपनं, क्ली, (आकारस्य गोपनं।) आकार-गुप्तिः। रत्यादिसूचकमुखरागादिगोपनं। इति हेमचन्द्रः॥

आकारणं, क्ली, स्त्री, (आङ्+कृ+णिच्+ल्युट्।) आह्वानं। इत्यमरः॥ डाकन इति भाषा। ("तेन च मणिभद्राकारणाय कश्चित् प्रेषितः"। इति पञ्चतन्त्रम्।)

आकालिकं, त्रि, (समानकालौ आद्यन्तौ यस्य। "आकालिकडाद्यन्तवचने" इति समानकालस्या-कालादेशः। इकट् प्रत्ययश्च निपातनात्। यद्वा अकाले भवम्। अकाल+ठञ्।) क्षणध्वंसि। इति धरणिः॥ समानकालीनजन्मविनाशशाली। इति संक्षिप्तसारः॥ अकालसम्भवं। आरम्भ-कालात् तत्सजातीयकालस्थायि। निमित्तं काल-मारभ्य परेद्युर्यावत्कालः स एव कालस्तावदकाल-

स्तत्र भवः। इति तिथितत्त्वं ।(यथा मनौ ४।९५
("एतानाकालिकान् विद्यादनध्यायान्तावपि"।
"तपस्विनः स्थानुवनौकसस्ता-
माकालिकीं वीक्ष्य मधुप्रवृत्तिम्" ॥
इति कुमारसम्भवे ३। ३३ ॥)
आकालिकप्रलयः, पुं, (आकालिकः प्रलयः।) प्रलय-विशेषः। स्वायम्भुवमन्वन्तरे कपिलशापेन अकाले जगत्प्लावनं। तद्विवरणं यथा—
श्रीमार्कण्डेय उवाच ।
"आकालिकोऽयं प्रलयो यतो भगवता कृतः।
तत् शृण्वन्तु महाभागा वाराहं लोकसंक्षयं।
यथा वा मत्स्यरूपेण वेदास्त्राताश्च शार्ङ्गिणा।
तदहं संप्रवक्ष्यामि सर्व्वपापप्रणाशनं" ॥
श्रीकपिल उवाच ।
"स्वायम्भुव मनुश्रेष्ठ ब्रह्मरूप महामते।
ममैकमीप्सितार्थं त्वं देहि प्रार्थयतोऽधुना ॥
जगत् सर्व्वं तवैवेदं त्वया च परिपालितं।
त्वया सर्व्वं जगत् सृष्टं त्वमेव जगतां पतिः ॥
तन्मे देहि रहःस्थानं त्रिषु लोकेषु दुर्लभं
पुण्यं पापहरं रम्यं ज्ञानप्रभवमुत्तमं ॥
अहं हि सर्व्वभूतानां भूत्वा प्रत्यक्षदर्शिवान्।
उद्धरिष्ये जगज्जातान् निर्माय ज्ञानदीपिकाम् ॥
अज्ञानसागरे मग्नमधुना सकलं जगत्।
ज्ञानदीपं प्रदायाहं तारयिष्ये जगत्त्रयं" ॥
श्रीमनुरुवाच ।
"यदि त्वयाखिलजगद्धितार्थं ज्ञानदीपिका।
चिकीर्षुणा तपः कार्य्यं किं स्थानार्थंगया तव ॥
देवागाराणि तीर्थानि क्षेत्राणि सरितस्तथा।
भूतानि पुण्यभाञ्जन्त्र तिष्ठन्ति कपिल! क्षितौ ॥
तेषामेकतमं त्वद्येदासाद्य कुरुषे तपः।
स्थानं ब्रह्मन् तपःसिद्धौ न भविष्यति तत्र किं" ॥
कपिल उवाच ।
"त्वयि विश्रम्भमाधाय तपसः सिद्धयेऽचिरात्।
स्थानं मया प्रार्थितं ते त्वं मां क्षिपसि हेतुभिः ॥
अलाभ्यन्ते वचो मेऽद्य प्रार्थनायां विकत्थनं।
यत्त्वं वदसि तस्मात्त्वं फलमेतदवाप्नुहि ॥
इदं त्रिभुवनं सर्व्वं सदेवासुरमानुषं।
हतप्रहतविध्वस्तमचिरेण भविष्यति ॥
न चिरात् द्रक्ष्यसि मनो! जलपूर्णं जगत्त्रयं।
हतप्रहतविध्वस्तं तव गर्व्वविघातनं ॥
एवमुक्त्वा मुनीन्द्रोऽसौ कपिलस्तपसां निधिः।
अन्तर्दधे जगामापि तदा ब्रह्मसदो मुनिः ॥
कपिलस्य वचः श्रुत्वा विषण्णवदनो मनुः।
भावीति प्रतिपद्याशु मनुर्नोवाच किञ्चन ॥
विज्ञाता वदरीं यातो गङ्गाद्वारान्तिकं मनुः।
प्रविश्य तपसे यत्नमकरोल्लोकभावनः।
आराधयामास हरिं जगत्कारणकारणं ॥
ॐ नमो भगवते वासुदेवाय शुद्धज्ञानस्वभाविने।
इति जप्यं प्रजपतो मनोः स्वायम्भुवस्य तु ॥
प्रससाद जगन्नाथः केशवो न चिरादथ।
ततः क्षुद्रझषो भूत्वा दूर्व्वादलसमप्रभः ॥
कर्परकलिकायुग्मतुल्यनेत्रयुगोज्ज्वलः।

तपस्यन्तं महात्मानं मनुं स्वायम्भुवं मुनिं ॥
आससाद तदा क्षुद्रमत्स्यरूपी जनार्दनः।
उवाच च महात्मानं मनुं स्वायम्भुवं तदा ॥
तपोनिधे महाभाग भीतं मां त्रातुमर्हसि।
नित्यं युद्धे जितं मत्स्यैर्विशालैर्भक्षितुं प्रति ॥
अथ प्रभूतैर्विपुलैर्द्रावितः पृथुरोमभिः।
प्राणाकाङ्क्षी महात्मानं भवन्तं शरणं मुनिं ॥
प्राप्तोऽहं यत्नमुक्तोऽपो मयि मां परिपालय।
इति तस्य वचः श्रुत्वा मनुः स्वायम्भुवस्ततः ॥
अलिञ्जरे तोयपूर्णे न्यधाद्विपुलभोगिनि।
स तस्मिन् मलिके मत्स्यो वर्द्धमानो दिने दिने ॥
सामान्यरोहितप्रायदेहोऽभून्नचिरादथ।
दशघटजलपूर्णं प्रत्यहं स महात्मा
मलिकमसति कुर्व्वन् वर्द्धयामास मत्स्यं।
स च सुविषदनेत्रो मत्स्यराजोऽचिरेण
मलिकसलिलमध्ये लोमशः पीनदेहः" ॥
इति कालिकापुराणे ३१ अध्यायः ॥*॥
श्रीमार्कण्डेय उवाच ।
"ततस्तया पीनतनुं दृष्ट्वा मत्स्यं मनुः स्वयं।
गृहीत्वा पाणिना फुल्लनलिनीं सरसीं ययौ ॥
तत्सरस्तच्च विपुलं पुण्ये नारायणाश्रमे।
एकयोजनविस्तीर्णं सार्द्धयोजनमायतं ॥
नानामीनगणोपेतं शीतामलजलोत्करं।
तदासाद्य सरो मत्स्यं विनिधाय मनुस्तदा ॥
पालयामास सुतवत् कृपया परया युतः।
सोऽचिरेणैव कालेन पीनो वैसारिणोऽभवत् ॥
न समस्तच्च सरसि दृहत्काये द्विजोत्तमाः।
स एकदा महामत्स्यः पूर्व्वापरतटद्वये ॥
शिरःपुच्छे निधायाशु तुङ्गदेहः समुच्छ्रितः।
स्वायम्भुवं महात्मानं क्रोशन्तं चाह मामिति ॥
तं तथा स मनुर्ज्ञात्वा क्रोशन्तं मीनपुङ्गवं।
आससाद तदा मत्स्यं जघान च करेण तं ॥
न शक्नोम्यहमुद्धर्त्तुं पृथुरोमाणमद्भुतं।
इति सञ्चिन्तयन्नेवं प्रोद्धार करेण तं ॥
भगवानपि विश्वात्मा मत्स्यरूपी जनार्द्दनः।
स्वायम्भुवकरं प्राप्य लघिमानमुपाश्रयत् ॥
ततः कराभ्यामुद्धृत्य स्कन्धे कृत्वाऽऽजं मनुः।
निनाय सागरं तत्र तोये च निदधे ततः ॥
यथेच्छमत्र वर्द्धस्व न कोऽपि त्वां हनिष्यति।
अचिरेणैव सम्पूर्णदेहत्वं समवाप्नुहि ॥
इत्युक्त्वा स महाभागः सर्व्वप्राणभृतांवरः।
लघुत्वं चिन्तयंस्तस्य विस्मयं परमं गतः ॥
मत्स्योऽपि न चिरादेव पूर्णकायस्तदा महान्।
सर्व्वतः पूरयामास देहभोगेन सागरं ॥
तं पूर्णकायमालोक्य व्यतीत्याम्भः समुच्छ्रितं।
शृङ्गैः शिराभीरचितं मानसाचलसन्निभं ॥
रुन्धन्तं सागरं सर्व्वं देहाभोगाचलीकृतं।
स्वायम्भुवो मनुर्धीमान् मेने मत्स्यं न तं तदा ॥
ततः प्रपच्छ तं साम्ना मत्स्यं स्वायम्भुवो मनुः।
विचिन्त्य लघिमानञ्च प्रणम्यमूर्त्तिं तदाद्भुतां" ॥
श्रीमनुरुवाच ।
"न त्वां मत्स्यमहं मन्ये कस्त्वं मे वद सत्तम!।

महत्त्वं लघिमानन्ते चिन्तयन् सुमहत्तम ॥
त्वं ब्रह्मा शूथवा विष्णुः शम्भुर्व्वा मीनरूपधृक्।
न चेद्भूयं महाभाग तन्मे वद महामते" ॥
श्रीमत्स्य उवाच ।
"आराध्योऽहं त्वया नित्यं यो हरिः स सनातनः।
तवेप्सितमसिद्ध्यर्थं प्रादुर्भूतः समाहितः ॥
यत्त्वमिच्छसि देवेश मत्तः शान्तेन मूर्त्तिना।
तत्करिष्येऽद्य तां मूर्त्तिमिमां विद्धि मनो मम" ॥
श्रीमार्कण्डेय उवाच ।
"इति तस्य वचः श्रुत्वा विष्णोरमिततेजसः।
ज्ञात्वा प्रत्यक्षतो विष्णुं मनुस्तुष्टाव केशवं" ॥
श्रीमनुरुवाच ।
"नमस्ते जगदव्यक्तपरावरपते हरे।
पावकादित्यशीतांशुनेत्रत्रयधराय ॥
जगत्कारण सर्व्वज्ञ जगद्धाम हरे पर।
सुरौघ परमेशान नारायण सुरेश्वर" ॥
इत्यादिस्तोत्रं ।
श्रीमार्कण्डेय उवाच ।
"स्वायम्भुवेन मनुना संस्तुतो मत्स्यरूपधृक्।
वासुदेवस्तदा प्राह मेघगम्भीरनिस्वनः" ॥
श्रीभगवानुवाच ।
"तुष्टोऽस्मि तपसा तेऽद्य भक्त्या चापि स्तुतो मुहुः॥
सपर्य्यया तथानेन वरं वरय सुव्रत।
इष्टार्थं संप्रदास्यामि तुभ्यं नात्र विचारणा ॥
वरयाभीप्सितान्कामान् लोकानां वा हितञ्च यत्"
मनुरुवाच ।
"यदि देयो वरो मेऽद्य लोकानां यो हितो भवेत्।
तन्मे देहि वरं विष्णो तं वक्ष्यामि शृणुष्व मे ॥
प्रणाय कपिलः पूर्व्वं मदर्थे भुवनत्रयं।
हतप्रहतविध्वस्तं सकलं ते भविष्यति ॥
येनेयमुद्धृता पृथ्वी येनेयं परिपालिता।
संहरिष्यति यत्नेनां तेऽधुना शापवन्हिभां ॥
ततोऽहं दीनहृदयस्त्वामेव शरणं गतः।
न यथेदं त्रिभुवनं जलप्लुतं भविष्यति ॥
हतप्रहतविध्वस्तं तथा त्वं देहि मे वरं"।
श्रीभगवानुवाच ।
"न मत्तः कपिलो भिन्नस्तथा न कपिलादहं।
यदुक्तं मुनिना तेन मयोक्तं विहितं मनो ॥
तस्माद्यदुदितं तेन तत् सत्यं नान्यथा भवेत्।
करिष्ये तत्र साहाय्यं स्वायम्भुव निबोध तत् ॥
हतप्रहतविध्वस्ते तोयमग्ने जगत्त्रये।
न चिरादेव तत्तोयं शोषयिष्यामि वै मनो ॥
यावज्जलञ्चवस्तावत् यथा कार्य्यं त्वया मनो।
तन्मे निगदितं तथ्यं शृणुष्वावहितोऽधुना ॥
सर्व्वयज्ञियकाष्ठैरेका नौका विधीयतां।
तामहं दृढ़यिष्यामि यथा नो भिद्यते जलैः ॥
दशयोजनविस्तीर्णां त्रिंशद्योजनमायतां।
धारिणीं सर्व्वबीजानां भुवनत्रयवर्द्धनीं ॥
सर्व्वौषधिकदम्बानां भूरिवल्कलतन्तुभिः।
नवयोजनदीर्घान्तु शामत्रयसुवेल्लितां ॥
कुरु स्वयं मनो तूर्णं दृढतीमीरिकां वटीं।
जगद्धात्री जगन्माया लोकमाता जगन्मयी ॥

दृढ़यिष्यति तां रज्जुं न चुच्यति यथा तथा ।
सर्व्वाणि बीजान्यादाय सर्व्वेदान् सप्त वै ऋषीन् ॥
तस्यां नावि निसन्नस्त्वं वर्त्तमाने जलप्लवे ।
दक्षेण सह संगम्य स्मरिष्यसि मनो मम ॥
स्मृतोऽहं तूर्णमायास्ये भवतो निकटं प्रति ।
श्यामलेनाथ शृङ्गेण तं मां ज्ञास्यसि वै तदा ॥
यावत् प्रहृतविध्वस्तं हतं स्याद्भुवनत्रयं ।
तावत् शृङ्गेण तां नावं वोढ़ाहं नात्र संशयः ॥
जलप्लवे तु संपूर्णे शृङ्गे मम च तां हरिं ।
त्वं तया वटिकया तूर्णं सदा नेष्यसि वै दृढ़ं ॥
बद्धायां नावि मे शृङ्गे दैवमानेन वत्सरान् ।
सप्तकं प्रेरयिष्यामि तां नावं शोषयन् जलं ॥
ततः शुष्केषु तोयेषु प्रोन्नम्रे शिखरे गिरेः ।
हिमाचलस्य बद्धा तां तस्मिन्नावमहं मनो ॥
त्वां वै शोषयिता नित्यं तावत्तु शोषये जलं ।
चिन्तितोऽहं त्वया यास्ये यदाहं निकटं तव ॥
शृङ्गेण श्यामलेनैव त्वं मां ज्ञास्यसि पुष्करे ।
पुनः सृष्टिं ततः कृत्वा मत्प्रसादान्महामते ॥
त्रैलोक्यदुर्ज्ञभाग्भद्रिमवाप्नुसि सनातनीं ।
अहमाराधितो येन जप्येन भवता मनो ॥
सर्व्वसिद्धिर्भवेत्तस्य यस्तोषयति तेन मां" ।

श्रीमार्कण्डेय उवाच ।

"इति दत्त्वा वरं तस्मै मत्स्यरूपेण नमस्कृतः ।
अन्तर्दधे जगन्नाथो लोकानुग्रहकारकः ॥
स्वायम्भुवोऽपि भगवानन्तर्द्धानं गते हरौ ।
यथोक्तं हरिणा पूर्व्वं नावं रज्जुं तथाकरोत् ॥
सर्व्वयात्रियदृच्छौघान् क्षिप्त्वा स्वायम्भुवस्तदा ।
उद्वेगं कारयामास नावं दृढ़तरां ततः ॥
तेषां वल्कलसमूहतन्तुसंघैर्वटोरिकां ।
पूर्व्वोक्तेन प्रमाणेन कारयामास वै मनुः ॥
ततः कालेन महता दृप्तं युद्धं महाद्भुतं ।
विष्णोर्यज्ञवराहस्य सरभस्य हरस्य च ॥
ततो जलप्लवे भूते विध्वस्ते भुवनत्रये ।
तया रज्ज्वा तरिं बद्धा बीजान्यादाय सर्व्वशः ॥
वेदान्ऋषीन् तथा सप्त दत्तं चादाय वै मनुः ।
तस्यां नावि समाधाय तोयमग्ने चराचरे ॥
स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै ततः ।
ततो जलानामुपरि सशृङ्ग इव पर्व्वतः ॥
उद्दीप्तैकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिराद्यत्रास्ते स मनुर्हरिः ॥
तरिमारुह्य विपुलं तोयराशौ भयङ्करे ।
यावच्चलाचलं तोयं तावत् शृङ्गे तरिं न्यधात् ॥
जले प्रकृतिमापन्ने शृङ्गे बद्धा तरिं तदा ।
तां नावं चोदयामास सप्तकं दैववत्सरान् ॥
स्वयं नावमवष्टभ्य दधार परमेश्वरः ।
योगनिद्रा जगद्धात्री समासीदट्टोरिकां ॥
ततः शनैः शनैस्तोये शोषं गच्छति वै चिरात् ।
पश्चिमं हिमवत् शृङ्गमुन्मग्नं तोयमध्यतः ॥
द्विसाहस्रैर्योजनानामुच्छ्रितस्य हिमप्रभोः ।
पञ्चाशत्तु सहस्राणि शृङ्गं तत्तस्य चोच्छ्रितं ॥
तस्मिन् शृङ्गे ततो नावं बद्धा मत्स्यात्मधृक् हरिः ।
जगाम शोषणायाशु जलानां जगतां पतिः ॥
एवं हि मत्स्यरूपेण वेदास्त्राताश्च शार्ङ्गिणा ।
कपिलस्य तु शापेन क्षतोऽयाकालिको लयः ॥
आकालिकोऽयं प्रलयो यतो भगवता क्षतः ।
इति वः कथितं सर्व्वं यथावत् द्विजसत्तमाः" ॥
इति कालिकापुराणे ३२ अध्यायः ॥

आकालिकी, स्त्री, (अकाल + ठञ् + ङीप् ।) विद्युत् ।
इति हेमचन्द्रः ॥

आकाशः, पुं, क्ली, (आ समन्तात् काश्यन्ते दीप्यन्ते सूर्य्यादयो यत्र । आ + काश् + घञ् ।) पञ्चभूतान्तर्गतभूतविशेषः । स तु शून्यः । तत्पर्य्यायः । द्यौः २ द्यौः ३ अभं ४ अभ्रं ५ व्योम ६ पुष्करं ७ अम्बरं ८ नभः ९ अन्तरीक्षं १० अन्तरिक्षं ११ गगनं १२ अनन्तं १३ सुरवर्त्म १४ खं १५ वियत् १६ विष्णुपदं १७ विहायः १८ । इत्यमरः ॥ नाकः १९ अनङ्गः २० नभसं २१ मेघवेश्म २२ महाविलं २३ । इति जटाधरः ॥ मरुद्वर्त्म २४ मेघवर्त्म २५ त्रिपिष्टपं २६ । इति शब्दरत्नावली ॥ न्यायमते अस्य सामान्यगुणाः सङ्ख्यादयश्च । विशेषगुणः शब्दः । स तु नित्यः अशरीरी च । अस्येन्द्रियं कर्णः । सत्वेकः किन्तु उपाधिभेदेन नाना भवति ।
("शब्दः श्रोत्रेन्द्रियस्यापि छिद्रादि च विविक्तता ।
वियतः कथिता एते गुणागुणविचारिभिः" ॥
तथा च भाषापरिच्छेदे ।
"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।
इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः" ॥)
वेदान्तमते स जन्यः ॥

आकाशगङ्गा, स्त्री, (आकाशपथवाहिनी गङ्गा ।) स्वर्गगङ्गा । यथा, शिवरात्रिव्रतकथायां,—
"आकाशगङ्गासलिलतरङ्गगणनादिते ।
चैगुण्यलक्षितैश्वारमरुद्विधवीजिते" ॥
("नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" ।
इति रघौ १ । ७८ ।
"उभौ यदि व्योम्नि पृथग् प्रवाहा-
वाकाशगङ्गायमुनः पतेताम्" । इति माघः ।)

आकाशजननी [न्] पुं, (आकाशमार्गस्य जननी ।) प्रगण्डीमध्यस्थितजनानां वाह्यार्थदर्शनार्थानिच्छुद्वच्छिद्राणि । यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते । इति राजधर्म्मः ॥ (आकाशजननी स्त्री आकाशपथस्य जननीव योषिका । इति केचित् ।)

आकाशदीपः, पुं, (आकाशे दीयमानो दीपः ।) कार्त्तिकमासे भगवदुद्देशेन नभसि दत्तप्रदीपः । यथा । कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे ।
"तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति ॥
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम्" । इति तद्विधिश्च हेमाद्रौ आदिपुराणे ।
"दिवाकरेऽस्ताचलमौलिभूते
शृङ्गादद्रे पुरुषप्रमाणं ।
यूपाकृतिं यज्ञियवृक्षदारु-
मारोप्य भूमावथ तस्य मूर्द्धि ॥
यवाकृतिच्छिद्रयुतास्तु मध्ये
द्विहस्तदीर्घा अथ पट्टिकास्तु ।
कृत्वा चतस्रोऽष्टदलाकृतीस्तु
याभिर्भवेदष्टदिशानुसारी ॥
तत्कर्णिकायान्तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ ।
निवेद्य धर्म्माय हराय भूम्यै
दामोदरायाप्यथ धर्म्मराजे ॥
प्रजापतिभ्यस्त्वथ सत्पृष्टभ्यः
प्रेतेभ्य एवाथ तमःस्थितेभ्यः" । इति ।
अपरार्के त्वन्यो मन्त्रो यथा,—
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥
इति निर्णयसिन्धौ २ परिच्छेदे कार्त्तिकमाहात्म्यं ॥

आकाशप्रदीपः, पुं, (आकाशे दीयमानः प्रदीपः ।) तुलायां दीयमानलक्ष्मीदामोदरसम्प्रदानाकाशदीपः । तथाच ब्रह्माण्डपुराणे ।
"तुलायां तिलतैलेन सायं सन्ध्यासमागमे ।
आकाशदीपं यो दद्यात् मासमेकं निरन्तरं ।
सश्रीकाय श्रीयुतये स श्रीमान् भुवि जायते ॥
ॐदामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥
इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चात्तयज्ञं लभेत् ।
विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं ॥
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः" ॥

आकाशमांसी, स्त्री, (आकाशजाता मांसी ।) सूक्ष्मजटामांसी । केदारे उत्पत्तिरस्याः । तत्पर्य्यायः । निरालम्बा २ खसम्भवा ३ श्वेतवाली ४ सूक्ष्मपत्री ५ गौरी ६ पर्व्वतवासिनी ७ अभ्रमांसी ८ । अस्या गुणाः । हिमत्वं । शोथव्रणनाड़ीरोगनाशित्वं । लूतागर्द्दभकज्वालाहारित्वं । वर्ण्यकारित्वञ्च । इति राजनिर्घण्टः ॥

आकाशमूली, स्त्री, (आकाशे भूमिरहितस्थाने मूलमस्याः । ङीप् ।) कुम्भिका । इति हारावली ॥ पाषा इति ख्याता । (कुम्भिकाशब्देऽस्याः गुणा द्रष्टव्याः ।)

आकाशरज्जी [न्] पुं, (आकाशे उच्चस्थाने स्थितः सन् रज्जतियः । आकाश + रज्ज + णिन् ।) प्रगण्डीस्थितप्रक्षिपिः । दुर्गबहिःप्राचीरोपरिस्थितचरः । इति राजधर्म्मः ॥

आकाशवल्ली, स्त्री, (आकाशस्य वल्लीव । अत्यूर्ध्वशिखत्वात् ।) लताविशेषः । आकाशवेल अमरवेल इति ख्याता । तत्पर्य्यायः । खवल्ली २ दुस्पर्शा ३ व्योमवल्लिका ४ । अस्या गुणाः । मधुरत्वं । कटुत्वं । पित्तनाशित्वं । शुक्रवर्द्धकत्वं । रसायनत्वं । बलकारित्वं । दिव्यौषधिपरत्वं । इति राजनिर्घण्टः ॥
"आकाशवल्ली तु बुधैः कथिताऽमरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पित्तश्लेष्मामनाशिनी" ।
इति भावप्रकाशः ॥

आकाशवाणी, स्त्री, (आकाशादुद्भवा वाणी।) अशरीरिणी वाक्। दैववाणी। इति पुराणं॥

आकाशसलिलं, क्ली, (आकाशात्पतितं सलिलं जलं।) टिट्योदकं। इति राजनिर्घण्टः॥

आकिञ्चनं, क्ली, (अकिञ्चनस्य दरिद्रस्य भावः। अकिञ्चन + अण्।) अकिञ्चनता॥

आकीर्णं, त्रि, (आङ्+कॄ विक्षेपे + क्तः।) व्याप्तं। तत्पर्य्यायः। संकीर्णं २ सङ्कुलं ३। इत्यमरः। समाकीर्णं ४। इति शब्दरत्नावली॥ (यथा, रघुवंशे। प्रथमसर्गे ५० श्लोकः।

"आकीर्णमृषिपत्नीनामुटजद्वारोधिभिः"॥)

जलादिभिर्निरवकाशं। इति भरतः॥

आकुञ्चनं, त्रि, (आङ्+कुचि + ल्युट्।) न्यायमते पञ्चप्रकारकर्म्मान्तर्गतकर्म्मविशेषः। सङ्कोचः॥ (प्रसारितस्य संक्षिप्तत्वसम्पादनं। नमनं। वक्रतासम्पादनं। यथा। भाषापरिच्छेदे।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"॥)

आकुलं, त्रि, (आङ्+कुल + कः।) व्याकुलं। तत्पर्य्यायः। अस्तं २ अप्रगुणं ३। इत्यमरः॥ (यथा शाकुन्तले। "विभवगुरुभिः क्षत्रैस्तस्य प्रतिक्षणमाकुला"॥)

आकूतं, क्ली, (आङ्+कूङ्+क्तः) अभिप्रायः) आशयः। इति हेमचन्द्रः॥ (तात्पर्य्यं। इच्छा। यथा साहित्यदर्पणे। २य परिच्छेदे।

"हसन्नेवार्पिताकूतं लीलापद्मं निमीलितं"। इति
"हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः"॥
इति शाकुन्तले।)

आकृतिः, स्त्री, (आक्रियते इयं गौरयं अश्वः इति व्यज्यतेऽनया। आङ्+कृ + क्तिन्।) रूपं। शरीरं। जातिः। इति मेदिनी॥ (यथा शाकुन्तले प्रथमाङ्के।

"किमिव हि मधुराणां मण्डनं नाकृतीनां"॥

न्यायमते सामान्यं, जातिः। "आकृतिर्जातिर्लिङ्गाख्या"। इति न्यायसूत्रम्। जातिलिङ्गमित्याख्या यस्याः जातेर्गोत्वादेर्हि साक्षादसंख्यानविशेषो लिङ्गम्। तस्य च परम्परया द्रव्यवृत्तित्वम्। जातिद्रव्यसमवायिकारणतावच्छेदिकालिङ्गं धर्म्मो यस्याः सा इत्यर्थः इति कश्चित्॥)

आकृतिच्छद्मा, स्त्री, (आकृत्या कृत्रिमेव या।) घोषातकीवृक्षः। श्वेतघोषा इति भाषा। इति रत्नमाला॥ (घोषकशब्देऽस्या विशेषो ज्ञेयः।)

आकृष्टं, त्रि, (आङ्+कृष्+कर्म्मणि + क्तः।) कृताकर्षणं। आकर्षितं॥ (प्रलोभितः, मुग्धः। यथा हितोपदेशे। "ततो लोभाकृष्टेन केनचित् पाश्येनालोचितं"॥ इति)

आकोकेरः, पुं, मकरराशिः। इति ज्योतिस्तत्त्वं॥

आक्रन्दः, पुं, (आङ्+क्रन्द + घञ्+अच् वा।) रोदनं। यथा रामायणे।

("तासामाक्रन्दशब्देन सहसोद्भ्रान्तलोचनः"।)

आक्षानं। मित्रं। दारुणयुद्धं। भ्राता। इति मेदिनी॥ध्वनिः (यथारामायणे।

"तत्रैव निहि नागानामाक्रन्दः श्रूयते महान्"॥)

नाथः। पार्ष्ण्यिग्राहात् परो राजा। इति धरणिः। (यथा मानवे ७। २०७।

"पार्ष्ण्यिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले"।)

आक्रमः, पुं, (आङ्+क्रम्+अच्।) आक्रमणं। तत्पर्य्यायः। अधिक्रामः २ क्रान्तिः ३। इति हेमचन्द्रः॥ (अधिरोहः। व्याप्तिः। विक्षेपः। अधिगमः। प्राप्तिः। अधिकारः॥)

आक्रमणं, क्ली, (आङ्+क्रम्+ल्युट्।) आक्रमकरणं। ("यः एकवर्त्ती नृपतिः देशाक्रमणाद्याचरति"। इति कुल्लूकभट्टः।) व्यापनं॥ (अतिवर्त्तनं। यथा, रामायणे।

"कण्टकाक्रमणक्लान्ता वनमद्य गमिष्यति"।

आरोहणम्। यथा रामायणे।

"न देवलोकाक्रमणं गमस्तमहं कृणे"।)

आक्रान्तः, त्रि, (आङ्+क्रम+क्त) कृताक्रमणः। अधिक्रान्तः। आक्रमविशिष्टः। इति हलायुधः॥ (अभिभूतः। पराभूतः। वशीभूतः। यथा मनुः—

"न पाषण्डिगणाक्रान्ते नोपरुद्धेऽन्त्यजैर्नृभिः"।)

आक्रीड़ः, पुं, (आङ्+क्रीड़+घञ्।) राजोपवनं। राज्ञः साधारणं वनं। इत्यमरः॥ (केलीकाननं, लीलास्थानं। यथा, रामायणे।

"आक्रीड़ालङ्कृतं स्फीतं सुविभक्तं सुसंस्कृतं"।

तथा च कुमारे। २। ६७।

"अक्रीड़पर्व्वताक्लेन कल्पिताः खेषु वेश्मसु"।

कुरुत्यामन्दपुत्रः खनामख्यातः पौरवः"॥

यथा हरिवंशे।

"दुष्मन्तस्य तु दायादः कुरुत्यामः प्रजेश्वरः।
कुरुत्यामादथाक्रीड़स्तत्वारस्तस्य चात्मजाः"॥)

आक्रोशः, पुं, (आङ्+क्रुश+घञ्।) क्रोधाकर्त्तव्यनिश्चयः। तत्पर्य्यायः। आक्षेपः २ अभिषङ्गः ३ शापः ४। इति हेमचन्द्रः॥ (यथा रामायणे।

"आक्रोशं मम मातुश्च प्रमार्ष्ट्रु पुरुषर्षभ" इति।)

आक्रोशनं, क्ली, (आङ्+क्रुश्+ल्युट्।) अभिशापः। तत्पर्य्यायः। अभिषङ्गः २ अभीषङ्गः ३। इत्यमरः॥

आक्षपाटिकः, पुं, (अक्षपटे नियुक्तः। अक्षपट + ठक्।) अक्षदर्शकः। धर्म्माध्यक्षः। इति जटाधरः॥

आक्षपादः, पुं, (अक्षपाद + अण्।) नैयायिकः। इति भूरिप्रयोगः॥

आक्षारणा, स्त्री, क्ली, (आङ्+क्षर+णिच्+युच्।) मैथुनं प्रति आक्रोशः। इत्यमरः॥ परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं स्त्रिया वा दूषणं। यथा "कृतागस्यागमनत्वं स्थानान्तरं गच्छ"। इति भरतः॥ क्वेनालि अपवाद इति भाषा॥

आक्षारितं, त्रि, (आङ्+क्षर+णिच्+क्त।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितं। अपवादग्रस्तं। इत्यमरः॥

आक्षिकः, पुं, आक्षकुलजः। इति रत्नमाला॥ आचेर गाछ इति भाषा। (द्यूतनिमित्तः। पाशक्रीड़ाविषयकः। अत्र अक्षैर्दीव्यति जितो वा इति अक्ष + ठञ्। यथा मानवे ८।१५६॥

"प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।

दण्डशुल्कावशेषञ्च न पुत्रो दातुमर्हति"॥
("पित्तश्लेष्मघ्नमम्लञ्च वातिकञ्चाक्षिकीफलं।
मधुरास्रविषाकञ्च वातपित्तहरञ्च तत्"॥
इति चरकः॥
"आक्षिकः पाण्डुरोगघ्नो ग्राह्यः संग्राहको लघुः"।
इति सुश्रुतः॥)

आक्षीव, पुं, (आङ्+क्षीव + अच्।) अक्षीवः। शोभाञ्जनवृक्षः। इति रायमुकुटः॥

आक्षेपः, पुं, (आङ्+क्षिप्+घञ्।) अपवादः। इत्यमरः॥ भर्त्सनं। (यथा—नीतिशतके।४२॥

'क्षान्त्येवाक्षेपरुक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साक्षर्य्यचर्य्या जगति बकमता कस्यनाभ्यर्थनीयाः'

आकर्षणं।

("नवपरिणयलज्जाभूषणां तत्र गौरीं।
वदनमपहरन्तीं तत्कृताक्षेपमीक्षः"॥
इति कुमारे। ७। ६५। विन्यासः। स्थापनं।

"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे।
तस्याः कपोले परभागलाभात्"।

इति कुमारे। ७। १७ अपहरणं। यथा,—
"यच्चांशुकाक्षेपविलज्जितानां"। १। १४ कुमारे।
उपस्थितिः। यथा साहित्यदर्पणम्।
"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये"।
इति।) काव्यालङ्कारः। इति मेदिनी॥ (अलङ्कारप्रकरणे विशेषो द्रष्टव्यः।)

आक्षेपकः, पुं, (आङ्+क्षिप्+ण्वुल्।) निन्दाकरः। व्याधः। इति मेदिनी॥ वातरोगविशेषः। तस्य कारणलक्षणे। निदाने यथा—

"यदा तु धमनी सर्व्वाः कुपितोऽभ्येति मारुतः।
तदा क्षिपत्यधो मुञ्जमुञ्जर्दैहं मुञ्जवरः॥
मुञ्जमुञ्जस्तदाक्षेपादाक्षेपक इति स्मृतः"।

आक्षोटः, पुं, (अक्षोट एव स्वार्थे अण्।) अक्षोटवृक्षः। पर्व्वतजपीलुवृक्षः। इति शब्दरत्नावली॥ ("वतामाभिषुकाक्षोटमूलकनिकोचकाः।
गुरव्याखिलमधुरा सोरुमाला बलप्रदाः।
वातघ्ना दीपना रुच्याः कफपित्ताभिवर्द्धनाः"॥
इति चरकः॥)

आक्षोड़ः, पुं, आक्षोटवृक्षः। इत्यमरटीकायां भरतः॥

आक्षोदनं, क्ली, (आङ्+क्षुद्+ल्युट्।) मृगया। इत्यमरः॥

आखण्डलः, पुं, (आङ्+खण्ड+कलच्।) इन्द्रः। इत्यमरः॥ (यथा कुमारसम्भवे। तृतीयसर्गे३।११।

"आखण्डलः काममिदं बभाषे"।)

आखनिकः, पुं, (आङ्+खन+इकन्।) चौरः। उन्दुरुः। शूकरः इति मेदिनी॥ (खनित्रादिकं खननसाधनद्रव्यं। खननकर्त्ता।)

आखातं, पुं, क्ली, (आङ्+खन्+क्तः।) अखातं। देवखातं। इत्यमरटीकायां रायमुकुटः॥

आखुः, पुं, (आङ्+खन+कुः।) मूषिकः। इत्यमरः॥ (यथा नीतिशतके। "क्षुत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः"।) शूकरः। चौरः।

इति हेमचन्द्रः॥ देवताड़वृक्षः। इति रत्नमाला॥ (आखुमांसगुणा यथा,—
("आखोर्मांसं सपदि बऊधा खण्डखण्डीकृतं यत्तैले पाच्यं द्रवति निरतं यावदेतन्न सम्यक्।
तत्तैलाक्तं वसनमनिशं योनिभागे दधाना,
हन्ति व्रीड़ाकरभगफलं नाऊ सन्देहबुद्धिः"॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

आखुकर्णी, स्त्री (आखोः कर्णमिव पत्रमस्याः। आखुकर्ण+ङीप्) लताविशेषः। मूषाकाणी इति भाषा। तत्पर्य्यायः। क्षुद्रिका २ द्रवन्ती ३ चित्रा ४ सुवर्णी ५ उन्दुरकर्णी ६ न्यग्रोधी ७ मूषककर्णी ८ दन्तिकर्णी ९ वऊकर्णिका १० माता ११ भूमिचरी १२ चण्डा १३ ग्रन्थरी १४ वऊपादिका १५ प्रत्यक्श्रेणी १६ दृषा १७ पुत्रश्रेणी १८ अद्रिभूः १९। अस्या गुणाः। कटुत्वं उष्णत्वं। कफपित्तहरत्वं। सारकत्वं। व्यानाहज्वरशूलनाशित्वं। परमपाचकत्वं। इति राजनिर्घण्टः॥
"आकुपर्णी आकुकर्णी कर्णिका भूदरीभवा।
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः॥
विपाके कटुका मूत्रकफामयक्लमिप्रणुत्"।
इति भावप्रकाशः॥

आखुगः, पुं, (आखुना गच्छति यः। गमेर्डप्रत्यये आखुत्वात् तथात्वं।) गणेशः। इति हेमचन्द्रः॥

आखुपर्णिका, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) लताविशेषः। इति रत्नमाला॥ इन्दुरकाणी इति भाषा। (आखुपर्णीशब्दे आखुकर्णीशब्दे चास्या गुणादयो ज्ञातव्याः।)

आखुपर्णी, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) आखुपर्णिका। इति रत्नमाला॥
"मुक्ताखुपर्णीफलदारुशिग्रु-
क्षाराः सलवणा क्रिमिशत्रुकल्काः।
मार्गद्वयेनापि चिरप्रवृत्तान्
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्"॥
इति वैद्यकचक्रपाणिसंग्रहः।
"आखुपर्णीक्रिमिशत्रुभ्यैः सर्पिष्टैः पिष्टमिश्रितैः।
पक्वा पूपलिकां खादेद्बान्धाल्लघु पिबेदनु"॥
इति वाभटः॥ गुणादयोऽप्येतस्या आखुकर्णीशब्दे ज्ञातव्याः॥)

आखुपाषाणः, पुं, पाषाणभेदः। आखुपाषाणगामोऽयं लोहसंकरकारकः। इति राजनिर्घण्टः॥

आखुभुक् [ज्] पुं, (आखून् भुङ्क्ते यः। आखु+भुज्+क्विप्) विड़ालः। इत्यमरः॥

आखुरथः, पुं, (आखुः रथो वाहनं यस्य।) गणेशः। इति हलायुधः॥

आखुविषहा, स्त्री, (आखोर्विषं हन्ति या।) देवताड़वृक्षः। इति शब्दरत्नावली॥ देवदालीलता। इति राजनिर्घण्टः॥

आखेटः, पुं, (आङ्+खिट्+घञ्) मृगया। इत्यमरः॥ शिकार इति भाषा। ("शुभगाखेटभूमित्वं"। कथासरित्सागरे १५।१२०।

आखेटकः, पुं, (आङ्+खिट्+ण्वुल्।) मृगया। इति शब्दरत्नावली॥ यथा पञ्चतन्त्रे।
"आखेटकस्य धर्म्मेण विभवाः सुवर्णशृङ्गाणाम्।
दृष्टप्रणाः प्रेरयतैको हन्त्यन्योऽत्र मृगानिव"॥)

आखेटशीर्षकं, क्ली, कुट्टिमभेदः। इति शब्दरत्नावली सुड़ङ्ग इति भाषा। (यदुक्तं।
"कपिशीर्षं द्रुमशीर्षं तथाचाखेटशीर्षकं।
इति कुट्टिमभेदाः स्युः शब्दिकैः समुदाहृताः"।)

आखेटिकः, पुं, (आखेटे मृगयायां कुशलः। आखेट+ठक्।) मृगयाकुशलकुक्कुरः। तत्पर्य्यायः। आखेटिकः २ विश्वकद्रुः ३। इति हारावली॥ (मृगयाकर्त्ता। त्रासजनकः। भयङ्करः। मृगयुः। व्याधः।)

आखोटः, पुं, (आख+उट्।) फलवृक्षविशेषः। आखरोट् इति भाषा। तत्पर्य्यायः। पार्व्वतीयः २ फलश्रेष्ठः ३ गुड़ाशयः ४ कीरेष्टः ५ कन्दराजः ६ मधुमज्जा ७ वृहच्छदः। अस्य गुणाः। मधुरत्वं। बलकारित्वं। स्निग्धत्वं। उष्णत्वं। वातपित्तनाशित्वं। रक्तदोषप्रशमनत्वं। शीतलत्वं। कफकोपनत्वं। इति राजनिर्घण्टः॥ (आक्षोड़शब्दे आक्षोटशब्दे चास्य गुणादिकं ज्ञेयं॥)

आख्या, स्त्री, (आङ्+ख्या+अङ्+टाप्) नाम। संज्ञा। इत्यमरः॥ यथा कुमारसम्भवे १। २६।
"उमेति माता तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम"।

आख्यातं, त्रि, (आङ्+ख्या+क्तः) कथितं। उक्तं। इत्यमरः॥ (प्रथितः, प्रसिद्धः, प्रकाशितः।) व्याकरणोक्तधातूत्तरविहिततिङ्प्रत्ययादि॥

आख्यानं, क्ली, (आङ्+ख्या+ल्युट्) कथनं। यथा
"कथितं वसुपाख्यानं ब्रह्मपुत्र यथागमं।
देवी मङ्गलचण्डी या तदाख्यानं निशामय"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः॥

आख्यायिका, स्त्री, (आङ्+ख्या+ण्वुल्।टाप्।) उपलब्धार्थकथा। इत्यमरः॥ इतिहास उपन्यास इति ख्याता॥ (आख्यायिकालक्षणं। यथा,—
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।
परस्पराश्रया या स्यात्सा मताख्यायिका क्वचित्"
इति च साहित्यदर्पणे।
"आख्यायिका कथावत्स्यात् कवेर्वंशादिकीर्त्तनं"

आगः, [स्] क्ली, पापं। अपराधः। इत्यमरः॥ (यथा शिशुपालवधे ३य सर्गे १०८ श्लोकः।
"सहिष्ये शतमागांसि सूनोस्ते इति यत्त्वया"।)

आगतं, त्रि, (आङ्+गम्+क्तः।) आयातं। उपस्थितं॥ (लब्धः। प्राप्तः यथा, हितोपदेशे।
"आगतन्तु भयं वीक्ष्य प्रतिकुर्य्यात् यथोचितम्"।)

आगन्तुः, त्रि, (आङ्+गम्+तुन्।) अतिथिः। इत्यमरः॥ आगमनशीलः। अनियतः॥
("अकस्मादागन्तुना सह विश्वासो न युक्तः"। इति हितोपदेशः। आकस्मिकरोगादि। यथा,
"आगन्वपि शरीरशल्यव्यतिरेकेण यावन्तोभावा दुःखमुत्पादयन्ति"। इति सुश्रुतः।
निजागन्तुभेदेन रोगस्य कारणद्वैविध्यादागन्तुशब्दोऽयमामयस्यान्यतरकारणवाची।
तदयथा,—
"द्विविधा पुनः प्रकृतिरेषामागन्तुर्निजविभागात्"। "सुखानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गबधबन्ध-पीड़न-रज्जु-दहन-मन्त्राग्नि-भूतोपसर्गादीनि"।
"आगन्तुर्हि यथापूर्व्वमुत्पन्नो जघन्यं
वातपित्तश्लेष्मणां वैषम्यमापादयति"।
उदाहरणं। "तत्रागन्तवश्छेदनभेदनदहनभञ्जनपिच्छनोत्पेषणवेष्टनप्रहार-बध-बन्धन-व्यधन-पीड़नादिभिर्व्वा। भल्लातक-गुञ्जाफलरसाक्तगुन्द्राशूककिमिशूकाहितपत्रलतागुल्मसंस्पर्शनैर्वा खेदनपरिसर्पणावमूत्रणैर्व्वा विषिणाम्॥ सविषाविषप्राणिदन्तविषाशनखनिपातनैर्व्वा।
सागरविषवात-हिम-दहन-संस्पर्शनैर्व्वा शोथाः समुपजायन्ते"॥ इति चरकेणोक्तं॥

आगन्तुकं, त्रि, (आगन्तु+स्वार्थे कन्) आहार्य्यं। अनित्यस्थायि। इति चिकित्साशब्देभेदः॥ (अज्ञातकुलशीलादिर्नवागतः पुरुषः। यथाः
"त्वया च मूलभृत्यानपास्यायमागन्तुकः पुरस्कृतः"। इति हितोपदेशे॥ अतिथिः। अज्ञातस्वामिकः पश्वादिः। यथा याज्ञवल्क्ये॥
"मक्षेत्तोत् क्षुद्रपशवः सूतिकागन्तुकादयः।
पालो येषां तु ते मेषा दैवराजपरिप्लुताः"॥
आकस्मिकरोगतादिरोगः। यथा, सुश्रुते।
"शूलशल्य आशुकारिमने धातुस्थस्य शल्यमितिरूपं तत् द्विविधं, शारीरमागन्तुकं च"। इति॥)

आगमं, क्ली, (आङ्+गम+अच्।) तन्त्रशास्त्रं। अस्यार्थः। यथा तन्त्रशास्त्रं॥
"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने।
मतञ्च वासुदेवस्य तस्मादागममुच्यते"॥ इति (एतल्लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां तथार्च्चनं।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥
षट्कर्म्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः"॥ इति यथा रघुवंशे। १०। २६॥
"बऊधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः")

आगमः, पुं, (आ+गम्+अच्।) शास्त्रमात्रं।
("आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः"।
इति किराते। ५। २२।) आगमनं। इति मेदिनीकरहेमचन्द्रौ॥ (अर्थादीनामागमः। यथा, नीतिशतके ७३ श्लोके। "नित्यव्यया प्रचुरनित्यधनागमा च"। इति। प्राप्तिः। उपार्जनम्। "नाधर्म्मेणागमः कश्चिन्मनुष्यान् प्रति वर्त्तते"। इति मनुः॥)
साक्षिपत्रादिः। इति व्यवहारमातृकाः॥ प्रकृतिप्रत्ययानुपघाति कार्य्यं। इति व्याकरणं॥ (शास्त्रज्ञानं। श्रुतवत्ता। यथा,
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः"।
इति रघुवंशे १म सर्गे १५। यथा च रघौ १४। ८०।
"तामर्पयामास च गोत्रदीनां
तदागमप्रीतिषु तापसीषु"॥)

आग्र

आगमनं, क्ली, आङ्पूर्ब्बगमधातोरनट्प्रत्ययान्तस्य रूपमिदं। आसा इति भाषा॥ (यथा रघुवंशे। "रामस्त्वासन्नदेशत्वात् भरतागमनं पुनः"। स्त्रीसङ्गमः। यथा,—

"अन्त्यागमनपापस्य पापः पृच्छन् स निष्कृतिं"। इति राजतरङ्गिणी।)

आगमावर्त्ता, स्त्री, दन्तिकाशीदन्तः। इति राजनिर्घण्टः॥

आगमितं, त्रि, (आ+गम+णिच्+क्त) अधीतं। पठितं। इति जटाधरः॥ (यापितं प्रापितं।)

आगाधं, क्ली, (अगाध एव। स्वार्थे अण्।) अगाधं। अतिगभीरं इत्यमरटीकायां मथुरानाथः॥

आगान्तुः, त्रि, आगन्तुकः। अतिथिः। इत्यमरटीकायां नीलकण्ठः॥ (अभ्यागतः। आगन्तुः।)

आगामी, [न्] त्रि, (आङ्+गम्+णिन्। भविष्यत्कालः। इति राजनिर्घण्टः॥ (यथा, हितोपदेशे। "भो यजमान! आगामिन्याममावास्यायां यक्ष्यामि यज्ञम्"।)

आगारं, क्ली, (आग+ऋ+अण) गृहं। इत्यमरटीकां॥ (यथा मनुः।

"आक्रीडं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत्।)

आगुः, [र्] स्त्री, आगूः। प्रतिज्ञा। इत्यमरटीकायां रमानाथः॥

आगूः, स्त्री, (आ-गमेः क्विपि गमः कादित्वन्तलोपे ऊङ्गमादीनामित्यूकारादेशः।) प्रतिज्ञा। इत्यमरः॥

आग्नीध्रं, क्ली, (अग्निमिन्धे, इन्धीदिप्तौ, क्विप्, नलोपः। अग्नीधः स्थानं; अग्नीधः शब्दे रन्। तत्रस्थितत्वात् ऋत्विग्याग्नीय उक्तः) अग्नीध्रं। होत्रगृहं। इत्यमरटीकायां रमानाथः॥ आग्नेय्या अग्नीध्रमुपतिष्ठते इत्यत्र आग्नीध्रं मण्डपमित्याख्यानदर्शनात्। धनदारा वरणीयऋत्विजि पुं॥ (स्वायम्भुवस्य प्रथमस्य मनोर्दशपुत्रमध्ये परिगणितः स्वनामख्यातः पुत्रः। यथा हरिवंशे।

"आग्निध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः। ज्योतिष्मान् द्युतिमान् हव्यसवनः पुत्र एव च॥ मनोः स्वायम्भुवस्यैते दश पुत्राः महौजसः"। प्रियव्रतदशपुत्रः स्वनामख्यातो मनुवंशीयो नृपतिः। यदुक्तं,—

"अग्नीध्रो नाम नृपतिर्जम्बुद्वीपो मनोः कुले। तज्जातो नृपसंज्ञाभिः कथ्यन्ते भरतादयः"॥ प्रियव्रतस्य राज्ञः दशपुत्रमध्येपरिगणितः स्वनामख्यातः पुत्रः। यदुक्तम् विष्णुपुराणे २। १॥

"प्रियव्रतसुताः ख्याताञ्जेषां नामानि मे शृणु॥ आग्नीध्राग्निबाहुञ्च वपुष्मान् द्युतिमांस्तथा। मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च॥ ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत्"॥

आग्नेयं, क्ली, (अग्निर्देवता यस्य।) स्वर्णं। इति राजनिर्घण्टः। देशविशेषः। इति शब्दरत्नावली॥ रक्तं। इति हेमचन्द्रः। घृतं। इति पाणिनिः॥

आग्नेयः, पुं, (अग्निर्देवतास्य अण्। अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मितमित्युक्तलक्षणे महापुराणभेदे वह्निपुराणे च। अग्निदेवताके द्रव्यमात्रे च त्रिं। अग्नियोगेति खाद्यायाम् अग्निदेवताकायामृचि च। आग्नेयव्रतं। यथा मनौ ६।३१०।

"दुष्टसामन्तहिंसस्य तदाग्नेयव्रतं स्मृतम्"।) अगस्त्यमुनिः। इति पाणिनिः॥ अग्निसम्बन्धीये त्रि

आग्नेयी, स्त्री, (आग्नेय+ङीप्।) अग्निकोणं॥ खाद्या। इति जटाधरः॥

आग्रयणं, क्ली, नवशस्येष्टिः। यथा,—

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये श्यामाकैर्वनिनः स्मृतः"॥ इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः।

"श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः। प्रशस्यशुं युज्यतेऽवश्यं न त्वाग्रयणकालयोः"॥ इति कालान्तरदर्शनात् आशेऽपि तथा इति। आग्रयणं नवशस्येष्टिः। इति मलमासतत्त्वं॥

आग्रहः, पुं, (आङ्+ग्रह+अप्) अनुग्रहः। आसक्तिः। आक्रमः। ग्रहणं। इति मेदिनी॥ (प्रसादः, अभिनिवेशः, आसक्तः, यथा,

"इत्याग्रहात् वदन्तं तं स पिता तत्र नीतवान्"॥ इति कथासरित्सागरे २५।६६।)

आग्रहायणः, पुं, मार्गशीर्षमासः। इति रायमुकुटः॥

आग्रहायणिकः, पुं, (आग्रहायण्या मृगशिरसा युक्ता पौर्णमासी अस्मिन्। आग्रहायण+ठक्) आग्रहायणमासः। मतभेदे वत्सराद्यमासोऽयं। अस्मिन् मासे वृश्चिकराशिस्थो रविः। तत्पर्य्यायः। मार्गशीर्षः २ सहाः ४ मार्गः ४। इत्यमरः॥ आग्रहायी ५ अलकः ६ सहः ७ मार्गशिरः ८। इति शब्दरत्नावली॥ आग्रहायणसम्बन्धिनि त्रि।

आग्रहायणी, स्त्री, (अग्रे हायनमस्याः। मतभेदे मार्गशीर्षमारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यण्। पूर्ब्बपदादिति णत्वं। गौरादित्वात् ङीष्) मृगशिरोनक्षत्रं। इत्यमरः॥ आग्रहायणमासस्य पौर्णमासी॥

आघट्टकः, पुं, (आङ्+घट्ट+वुन्। ततः स्वार्थे कः) रक्तापामार्गः। इति राजनिर्घण्टः॥

आघाटः, पुं, (आङ्+घट्+घञ्) सीमा। इति हेमचन्द्रः॥ अपामार्गः। इति राजनिर्घण्टः॥

आघातः, पुं, (आङ्+हन्+घञ्) वधस्थानं। इति त्रिकाण्डशेषः॥ हननं। क्षेदनं। चोट कोप इत्यादि भाषा॥ (यथा साहित्यदर्पणे। "पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः"॥)

आघातनं, क्ली, (आङ्+हन्+स्वार्थे णिच्+ल्युट्) वधस्थानं। इति हारावली॥ हननं॥

आघारः, पुं, (आङ्+घृ+घञ्) घृतं। इति हेमचन्द्रः। ऋग्वेदिनां स्रुवेण चतुराज्यं स्रुचि दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नेर्वायव्यकोणादारभ्याग्नेयीं यावदविच्छिन्नघृतधारादानं। एवं स्रुवेण चतुराज्यं स्रुचि दत्त्वा इन्द्रं ध्यात्वाग्नेर्नैर्ऋतकोणादारभ्य ऐशानीं यावदविच्छिन्नघृतधारादानं। इति कालेसिः॥ यजुर्वेदिनान्तु स्रुवेण मनोद्वारकपूर्ब्बोक्तक्रमेण घृतधारादानं। इति पशुपतिः॥

आघ

आघूर्णितं, त्रि, (आङ्+घूर्ण+क्त) घूर्णितनेत्रादिः। घूराण इति भाषा। यथा, देवीमाहात्म्ये॥

"आघूर्णितो वा वातेन स्थितः पोते महार्णवे"।।

आघ्राणं, क्ली, (आङ्+घ्रा+ल्युट्) दृग्निः। इति हेमचन्द्रः॥ गन्धग्रहणं। सूँघा इति भाषा॥

"भेदघ्रां गन्धाघ्राणतः।" इति कथासरित्सारे १३। १६।)

आघ्रातः, त्रि, (आङ्+घ्रा+क्त) शिक्षितः। आक्रान्तः। इति मेदिनी॥ दृग्नः। इति हेमचन्द्रः॥ (आघ्राणविषयीकृतः। यथा, नागानन्दे। "नीताः किं न निशा शशाङ्कधवला गात्रातमिन्दीवरं॥)

आर्घ्यं, क्ली, पीतवर्णदीर्घतुण्डषट्पदसन्निभमाक्षिकोत्पन्नमधु। अस्य गुणाः। अतिशयचक्षुर्हितकारित्वं। कफपित्तरक्तदोषनाशित्वञ्च॥ इति राजनिर्घण्टः॥ यथा, भावप्रकाशः॥

"मधूकवृक्षा निर्यासं जरत्काष्ठ्याश्रमोद्भवाः। स्रवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः॥ तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः। आर्घ्यास्तासत्कृतं यत्तदार्घ्यमित्यपरे जगुः"॥ ("आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं। कषायं कटुपाके च बल्यं तिक्तमवातलत्"॥ इति सुश्रुतः॥)

आङ्, अ, उपसर्गविशेषः। अस्यार्थः। ईषत्। यथा आपिङ्गलः। अभिव्याप्तिः। यथा आजन्मब्रह्मचारी। सीमा। यथा आसमुद्रक्षितीशानां। इति रघौ १ म सर्गे। धातुयोगजः। यथा आरोहति। इत्यमरभरतौ॥ समन्तात्। ग्रहणं। प्रत्याहृत्तिः। इति दुर्गादासः॥

आङ्गं, क्ली, (अङ्गस्य इदं। अङ्ग+अण्) कोमलाङ्गं। इति त्रिकाण्डशेषः॥

आङ्गारं, क्ली, (अङ्गार+अण्) अङ्गारसमूहः। इति रायमुकुटः॥

आङ्गिकः, त्रि, (अङ्ग+ठक्) अङ्गनिष्पन्नभावव्यञ्जकभ्रूक्षेपादिः। इत्यमरः॥ मार्ङ्गिकः। इति शब्दरत्नावली॥ (यथा साहित्यदर्पणे।

"भवेदभिनयो ऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा"।)

आङ्गिरसः, पुं, (अङ्गिरस्+अण्) बृहस्पतिः। इत्यमरः। (यथा मनुः। २। १५१।

"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः। पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्"॥)

आचमनं, क्ली, (आङ+चम्+ल्युट्) वैधकर्म्मारम्भात् पूर्ब्बं वारत्रयजलपानानन्तरं यथाक्रमाङ्गस्पर्शरूपऋषिङ्गिनकक्रिया। तत्पर्य्यायः। उपस्पर्शः २। इत्यमरः॥ आचमः ३ सुचिप्रणीः ४। इति शब्दरत्नावली॥ तद्विधानं यथा॥

"चिरा चामेदयः पूर्ब्बं द्विः प्रमृज्यात्ततो मुखं। संमृज्याङ्गुष्ठमूलेन चिभिरास्यमुपस्पृशेत्॥ अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरं। अङ्गुष्ठानामिकाभ्याञ्च चक्षुरोचे पुनः पुनः॥ कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयन्तु तलेन वै। व्यभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥

ऋचो यजूंषि सामानि त्रिः पिबन् प्रीणयेत् क्रमात्।
अथर्वाङ्गिरसौ पूर्वं द्विः प्रमार्ष्टा नयेन्मुखं॥
सेतिहासपुराणानि वेदाङ्गानि यथाक्रमं।
खं मुखं नासिके वायुं नेत्रे सूर्य्यं श्रुती दिशः॥
प्राजापत्यग्रन्थयो नाभिं ब्रह्माणं हृदयं स्पृशेत्।
रुद्रं मूर्द्धानमालभ्य प्रीणात्यथ शिखामथो॥
बाहू यमेन्द्रवरुणकुबेरवसुधानकान्।
अभ्युक्ष्य चरणौ विष्णुमिन्द्रविष्णुकरद्वयं॥
वासुकिप्रमुखान् नागान् जलं क्षिपति यत् क्षितौ।
येऽन्तरा विन्दवो यान्ति भूतग्रामश्च तेदिज॥
अग्निवायुसूर्य्येन्द्रा गिरयोऽकुलिपर्व्वसु।
गङ्गाद्याः सरितस्तासु या रेखाः करमध्यगाः॥
तले सोमः सतीर्थश्च स्मृतोऽतः पावनः करः।
इति गारुडे २१५ अध्यायः॥*॥

अन्यच्च। अथाचमनं। पराशरः। यथा,—
"कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः।
निबद्धशिख आसीनो द्विज आचमनं चरेत्"॥

आपस्तम्बः। यथा,—
"इत्येवमद्भिराचामेत् प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामन्त्रिवन्नाभ्यां पश्चादासीत संयतः"॥

आजान्विति अध्वश्रमादिना तत्पर्य्यन्तमशौचे आजङ्घात इति हारीतोक्तं सामान्यतः।
"कृतोपवीतं सव्याग्रे वाङ्मनःकायसंयतः"॥७॥

शिखाबन्धे विशेषमाह ब्रह्मपुराणम्।
"गायत्र्या तु शिखां बद्धा नैर्ऋतां ब्रह्मरन्ध्रतः।
जुटिकाञ्च ततो बद्धा ततः कर्म्म समारभेत्"॥

याज्ञवल्क्यः। यथा,—
"अन्तर्जानु शुचौ देशे उपविश्य उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्"।
अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः॥

भविष्यपुराणे। यथा,—
"समौ तु चरणौ कृत्वा तथा बद्धशिखोऽपि"।

आचामेदित्यनुवर्त्तौ देवलः। यथा,—
"शिखां बद्धा वसित्वा तु निर्निक्ते वाससी शुभे।
तूष्णीं भूत्वा समादाय नोदङ्मुख्य विलोकयन्"॥*॥

ब्राह्मणावरोधे तु मनुः। यथा,—
"कायवैदग्निकाभ्यान्तु न पित्र्येण कदाचन"।

मार्कण्डेयः। यथा,—
"सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियां।
नोच्छिष्टं तत् पवित्रन्तु मुक्तोच्छिष्टन्तु वर्जयेत्"॥

उदकग्रहणे परिमाणमाह भरद्वाजः। यथा,—
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिमत् करं।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां ग्रासेनाचमनं चरेत्।
मासमज्जनमाचान्तु संगृह्य त्रिः पिबेदपः"॥

याज्ञवल्क्यः॥ यथा,—
"अद्भिस्तु प्रकृतिस्थाभिर्हृन्नाभिः पेनबुद्बुदः।
कण्ठतालुगाभिश्च यथासङ्ख्यं द्विजातयः॥
शुध्येरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः"।
अन्ततः ओष्ठप्रान्ते। प्रचेताः॥
"अनुष्णाभिरफेनाभिः पूताभिर्वित्र्य चक्षुषा।
हृद्गताभिरगृह्याभिस्त्रिचतुर्व्वाद्विराचमेत्"॥
चतुर्व्वेति भावशुद्ध्यपेक्षया॥*॥

आचमनप्रकारमाह दक्षः।
"प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितं।
संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरं॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरोदेशं बाहू चाग्रेण संस्पृशेत्"।
पुनःपुनरिति घ्राणादीनां गोलकद्वयाभिप्रायेण।
इति श्रीदक्षः॥*॥

वीक्षणानुज्ञयोरपवादमाह यमः।
"रात्रावनीक्षितेनापि शुद्धिरुक्ता मनीषिभिः।
उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनां"॥*॥

मुखमार्জनानन्तरं व्यासः। "वामहस्तं पादौ शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत्" इति सामवेदिक्रमः। यजुर्व्वेदिनान्तु गौतमः। "पादौ चाभ्युक्षयेत् खानि चोपस्पृशेत् शीर्षाणि मूर्द्धि दद्यात् उदकबिन्दून्"॥*॥

इन्द्रियस्पर्शे विशेषमाह मनुः। "खानि चैव स्पृशेदद्भिः" इति। नाभिस्पर्शे व्यासः। यथा,—
"ततः स्पृशेन्नाभिदेशं पुनरापश्च संस्पृशेत्"।

इन्द्रियस्पर्शानन्तरं भविष्ये। यथा,—
"यद्भूमावुदकं वीर समुत्सृजति दानव।
वासुकिप्रमुखान्नागान् तेन प्रीणाति मानवः"॥*॥

जलस्थलोभयकर्म्मानुष्ठानार्थञ्च जलस्थलैकचरणे-नाचमनं कर्त्तव्यमाह पैठीनसिः। "अन्तरुदके आचान्तो अन्तरेव शुद्धो भवति बहिरुदके आचान्तो बहिरेव शुद्धः स्यात् तस्मादन्तरेकं बहिरेकञ्च कृत्वा पादमाचामेत् सर्व्वत्र पूतो भवति" इति॥*॥ जलमात्रे जानोरूर्द्धमुत्तिष्ठन्नाचमन-माह विष्णुः। यथा,—
"जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात्।
अधस्ताच्छतकृत्वोपि समाचान्तो न शुध्यति"॥

हारीतः। यथा,—
"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपं।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपं"॥*॥

आचमननिषेधे देवलः। यथा,—
"सोपानत्को जलस्थो वा मुक्तकेशोऽपि वा पुनः।
उष्णीषी वापि नाचामेदक्षस्रोतोदिशं वा शिरः॥
न गच्छन्न शयानश्च न चलन्न परान् स्पृशन्।
न हसन् नैव संजल्पन्नात्मानञ्चैव वीक्षयन्॥
केशग्रन्थीवीमधःकायमस्पृशन् धरणीमपि।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करं"॥

आत्मानं हृदयं। तथा व्यासः।
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"॥

मरीचिः। यथा,
"न वह्निर्जानु त्वरया नासनस्थो न चात्मितः।
न पादुकास्थो नान्यचित्तः शुचिः प्रयतमानसः॥
भुक्तासनस्थोऽप्याचामेन्नान्यकाले कदाचन।
जानुभ्यामूर्द्धमाचम्य जले तिष्ठन्न दुष्यति"॥

शाट्यायनः। यथा,
"स्नानमाचमनं होमं भोजनं देवतार्चनं।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्"॥*॥

द्विराचमननिमित्तानि॥
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा स्त्र्युपसर्पणे।
आचान्तः पुनराचामेदासो विपरिधाय च"॥

ब्रह्मपुराणं॥ यथा,
"होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत्"॥*॥

अथाचमननिमित्तानि॥
"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुचिप्रहतस्य च॥
सन्देहेषु च सर्व्वेषु शिखां बद्धा तथैव च।
विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत्॥
उष्ट्रवायससंस्पर्शे दर्शने चान्त्यवासिनां"॥

हारीतः। यथा,
"स्त्रीशूद्रोच्छिष्टसम्भाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेत्॥*॥

अथ आचमनप्रतिप्रसवमाह स्मृतिः। यथा,
"क्षुते निष्ठीवने सुप्ते परिधानेऽश्रुपातने।
कर्म्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्"॥

वृद्धशातातपः।
"वातकर्म्मणि निष्ठीवे दन्तश्लिष्टे तथाऽनृते।
क्षुते पतितसंलापे दक्षिणश्रवणं स्पृशेत्"॥

मार्कण्डेयपुराणम्॥ यथा,
"कुर्य्यादालम्भनं स्पर्शं गोष्ठस्यार्कदर्शनम्।
कुर्व्वीतालम्भनं वापि दक्षिणश्रवणस्य च॥
यथाविभवतो ह्येतत् पूर्व्वाभावे ततः परम्"॥*॥

आचमने जलाधारनिषेधमाह। उशनाः॥ यथा,
"कांस्यायसेन पात्रेण चपुसीसकृपित्तलैः।
आचान्तः शुक्तकृत्वोऽपि न कदाचित् शुचिर्भवेत्"॥

इति गोपालपद्धाननकृताचारनिर्णयः॥
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करं।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां ग्रासेनाचमनं चरेत्।
मासमज्जनमाचान्तु संगृह्य त्रिः पिबेदपः"॥

इति भारद्वाजः॥
"अद्भिस्तु प्रकृतिस्थाभिर्हृन्नाभिः पेनबुद्बुदैः।
कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः॥
शुध्येरन् स्त्री च शूद्रश्च सकृत्सृष्टाभिरन्ततः"॥

इति याज्ञवल्क्यः॥
"हृद्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः।
वैश्योऽद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः"॥

इति मनुः॥
"स्त्रियास्त्वेदग्निकं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः"॥

इति मिताक्षरा॥

आचमनकः, पुं, (आचमन + वुन्।) निष्ठीवनपात्रं। पिकदान डावर इति भाषा। तत्पर्य्यायः। प्रोष्ठः २ कटकोलः ३ पतद्ग्रहः ४। इति हारावली॥ ("कोशस्थिताङ्गनचकिताचमनक-वाहिनि"। इति हर्षचरिते॥)

आचमनीयं, क्ली, (आचम्यतेऽनेन । आङ् + चम् + अनीयर् ।) मुखप्रक्षालनार्थजलं । तद्दानविधिर्यथा, कालिकापुराणे ६७ अध्यायः ॥
"दद्यादाचमनीयन्तु सुगन्धिसलिलैः शुभैः ।
कर्पूरवासितैर्व्वापि कृष्णागुरुसुधूपितैः ॥
यथा तथा सुगन्धैर्व्वा प्रसन्नैः फेनवर्ज्जितैः ।
तत्तज्जलेन पात्रेण ग्रहणाय प्रदापयेत् ॥
उदकं दीयते यत्तु प्रसन्नं फेनवर्ज्जितं ।
आचमनाय देवेभ्यस्तदाचमनमुच्यते ॥
केवलं तोयपात्रेण तदा दद्यान्नमिश्रितं ।
वासितन्तु सुगन्धाद्यैः कर्त्तव्यं यदि लभ्यते ॥
आयुर्ब्बलं यशोवृद्धिं प्रदायाचमनीयकं ।
लभते साधको नित्यं कामांश्चैव यथेप्सितान्" ॥

आचरणं, क्ली, (आङ् + चर् + ल्युट्) आचारः । व्यवहारः । ("अधीतिबोधाचरणप्रचारणैः" । इति नैषधे ।)

आचरितं, त्रि, (आङ् + चर् + क्तः) कृताचरणं । ("अलं वामकरे कृत्वा या सन्ध्याचरिता द्विजैः" । इति काशीखण्डे ।) व्यवहृतं ॥ (यदुक्तं ।
"दारपुत्रपशून् हत्वा कृत्वा द्वारोपवेशनं ।
यत्रार्थो दाप्यतेऽर्थं स्वं तदाचरितमुच्यते" ॥
एतत्तु पारिभाषिकं ॥)

आचान्तः, त्रि, (आङ् + चम् + क्तः) कृताचमनः । यथा । बौधायनः ।
"स्नात्वा पीत्वा क्षुते सुप्त भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् वासो विपरिधाय च" ॥
इत्याह्निकतत्त्वं ।

आचामः, पुं, (आङ् + चम् + घञ्) आचमनं । इति शब्दरत्नावली ॥ भक्तमण्डः । इत्यमरः ॥ (भक्तञ्च । पानं । यथा, काव्यप्रकाशे ।
"चकोर्य्य एव निपुणाश्चन्द्रिकाचामकर्म्मणि" ॥)

आचारः, पुं, (आङ् + चर् + घञ्) व्यवहारः । तत्पर्य्यायः । चरित्रं २ चरितं ३ चारित्रं ४ चरणं ५ वृत्तं ६ शीलं ७ । इति हेमचन्द्रः ॥ स्नानाचमनादिः । इति मानवे २ अध्याये ६६ श्लोकटीकायां कुल्लूकभट्टः । व्यवहारः ॥ स तु विचारः । यथा बृहस्पतिः ।
"आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्व्वं प्राड्न्यायस्तु स उच्यते" ॥
इति व्यवहारतत्त्वं ॥ चरित्रं । एतद्विवरणं सदाचारशब्दे द्रष्टव्यं ॥ (रघुः । २ । १० । "आचारलाजैरिव पौरकन्याः" ।)

आचारवर्ज्जितः, त्रि, (आचारेण वर्ज्जितः ।) आचारबहिर्भूतः । इति जटाधरः ॥ (अव्यवस्थितः । नियमरहितः ।)

आचारी, स्त्री, (आङ् + चार + ङीष्) द्विजमोचिका लता । इति राजनिर्घण्टः ॥ हेलञ्चा इति ख्याता । आचारविशिष्टे त्रि । (द्विजमोचिकाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

आचार्य्यः, पुं, (आङ् + चर् + ण्यत् ।) वेदाध्यापकः । वैदिकमन्त्रव्याख्याकर्त्ता । तत्पर्य्यायः । मन्त्रव्याख्याकृत् २ । इत्यमरः ॥ द्रोणाचार्य्यः । इति चिकाण्डशेषः ॥ तल्लक्षणं यथा,—
"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते" ॥
इति मानवे २ । १४० ॥
(ततोऽनन्तरमाचार्य्यं परीक्षेत । तद्यथा,—
"पर्य्यवदातश्रुतं परिदृष्टकर्म्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्व्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनलूयकमकोपनं क्लेशग्रहमं शिष्यवत्सलमध्यापकं शासनसमर्थमित्येवंगुणो ह्याचार्य्यः सच्चेत्रमार्त्तवो मेघ इव शस्यगुणैः सशिष्यमाशु वैद्यगुणैः सम्पादयति । तमुपलक्षयेदाराधयिष्यन्नुपचरेदग्निवच्च देववच्च राजवच्च पितृवच्च भर्त्तृवच्चाप्रमत्तस्तत्तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधानसौष्ठवस्यार्थस्य विज्ञाने वचनग्रहणे च भूयः प्रयतेत सम्यक्" । इति चरकः ॥)

आचार्य्या, स्त्री, (आचार्य्य + टाप् ।) मन्त्रव्याख्याकर्त्री । इत्यमरसिंहः ॥ (वेदादिशास्त्राध्यापनकर्त्री ।)

आचार्य्याणी, स्त्री, (आङ् + चर् + ण्यत् + ङीप् + आनुक् ॥) आचार्य्यपत्नी । इत्यमरः ॥ (यथा महावीरचरिते ॥
"अम्बकं देवमाचार्य्यमाचार्य्याणीञ्च पार्ब्बतीं" ॥)

आचितं, क्ली, (आङ् + चि + क्त ।) दशभारपरिमाणं । इत्यमरः । २५ मोन इति भाषा ॥

आचितः, पुं, (आङ् + चि + क्त ।) शकटो भारः । इत्यमरः । एक गाड़ির বোঝা इति भाषा ॥ द्युतपणं । इति मेदिनी ॥

आचितः, त्रि, (आङ् + चि + क्तः) संगृहीतः । छन्नः । इति मेदिनी ॥ (एकत्र सन्निवेशितः, व्याकीर्णः, व्याप्तः, ग्रथितः, गुम्फितः । यथा भारविः ।
"कचाचितौ विस्रगिवागजौ गजौ" ॥ यथा रघुवंशे ।
"यद्धांचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती" ॥)

आच्छकः, पुं, वस्त्रविशेषः । आछ इति भाषा । तत्पर्य्यायः । रञ्जनदुः २ पच्छीकः ३ पल्लिकः ४ आल्लिकः ५ । इति रत्नमाला ॥

आच्छन्नं, त्रि, (आङ् + छद् + क्तः ।) आच्छादितं । आवृतं । यथा । "मेघाच्छन्नेऽह्नि दुर्दिनं" । इत्यमरः ॥
("पङ्कपांशुजलाच्छन्नं सुव्यक्तं दस्युविद्रुतं" । इति हितोपदेशः ॥)

आच्छादः, पुं, (आङ् + छद् + घञ् ।) वस्त्रं । इति हेमचन्द्रः ॥

आच्छादनं, क्ली, (आङ् + छद् + ल्युट् ।) वस्त्रं । इत्यमरः ॥ संपिधानं । अपवरणमात्रं । इति मेदिनी ॥ (यथा मनुः । ३ । ५६ ॥
"तस्मादेतान् सदा गुप्त्या भूषणाच्छादनाशनैः" ॥)

आच्छादितं, त्रि, (आङ् + छद् + णिच् + क्तः) कृताच्छादनं । आवृतं । ढाका इति भाषा ।

आच्छुरितं, क्ली, (आङ् + क्षुर + क्तः) सञ्जातहास्यं । नखक्षतं । इति धरणिः ॥ आवृतं । (यथा कथासरित्सागरे ।
"न सेहे कञ्चुकेनापि क्षिप्रमाच्छुरितं वपुः" ।)

आच्छुरितकं, क्ली, (आङ् + क्षुर + भावे क्तः । ततः स्वार्थे कन्) सोत्प्रासहासः । इत्यमरः ॥ हास्यं । नखाघातविशेषः । इति मेदिनीकरहेमचन्द्रौ ॥

आच्छोदनं, क्ली, (आङ् + छिद् + ल्युट् । ततः एषोदरादित्वात् इत ओत् ।) मृगया । इत्यमरः ॥

आञ्ज्, इ, आयामे । (भादिः-परः-सकः-सेट् ।) इति कविकल्पद्रुमः ॥ इत्यादौ द्वित्वाभावः प्रक्रियाभ्रमनिरासार्थः । इ आञ्क्ते । आयामो दीर्घीकरणं । आञ्क्ति कटं शिल्पी । इति । दुर्गादासः ॥

आज्यं, क्ली, (अज + क्यप् । अजसम्बन्धी छागस्य घृतमांसादिः) घृतं । इति जटाधरः ॥ (यथा वैद्यके ।
"गव्यमाज्यं तथा चौष्ट्रमाविकं माहिषञ्च यत् ।
अतो धातुविवृद्ध्यर्थमाज्यं मांसं प्रशस्यते" ॥)
(तथाच रामायणे । २ । ९१ । ६७ ।
"आज्यैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः" ।
घृतार्थ—गव्यादिघृतभेदेन यदुक्तं तत्सर्व्वं घृतशब्दे ज्ञातव्यं किन्त्वाज्यशब्दव्युत्पत्त्या दुग्धादिकं यदुपलभ्यते तदन्यत्र प्रदर्श्यते ॥
"आज्यं दधि भवेच्चोष्णं क्षयवातविनाशनं ।
दुर्नामश्वासकासेषु हितमग्निप्रदीपनं ॥
विपाके मधुरं हृद्यं रक्तपित्तप्रसादनं ।
प्रोक्तं कार्श्यापहं प्रोक्तं वातपित्तनिवर्हणं" ॥
इति हारीतसंहितायां ॥
"नातिशीतं गुरुस्निग्धं मांसमाज्यमदोषलं ।
शरीरधातुसामान्यादनभिष्यन्दि दीपनं" ॥
इति चरको वाग्भटश्च ॥
"गव्यतुल्यगुणत्वाज्जं विशेषाच्छोषिणां हितं ।
दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् ।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ॥
नात्यम्बुपानाद्व्यायामात् सर्व्वव्याधिहरं पयः" ।
"दध्याज्यं कफपित्तघ्नं लघुवातक्षयापहं ।
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनं ॥
विपाके मधुरं हृद्यं रक्तपित्तप्रसादनं" ॥
"आज्यं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनं ।
कासे श्वासे क्षये चापि पथ्यं पाके च तद्गुरु" ॥
इति च सुश्रुतः ॥)

आजकं, क्ली, (अज + वुञ्) अजसमूहः । छागलेर पाल इति भाषा । इत्यमरः ॥

आजकारः, पुं, (आज + ङ + अण्) शिवद्वेषः । इति शब्दरत्नावली ॥

आजगवं, क्ली, (अजगव + प्रज्ञाद्यण्) शिवधनुः । इति हेमचन्द्रः ॥

आजन्मसुरभिपत्रः, पुं, (आ जन्मनः सुरभीणि पत्राणि यस्य सः) भल्लातकवृक्षः । इति राजनिर्घण्टः ॥

आजानेयः, पुं, स्त्री, (अज् + घञ् + आज + आनेयः) कुलीनाश्वः । श्रेष्ठघोटकः । इत्यमरः ॥ "शल्लिभिर्भिन्नहृदयाः स्खलन्तोऽपि पदे पदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः" ॥ इत्यश्वतत्त्वं ॥

आजिः, स्त्री, (अज् + इन्) । यज्ञं । समानभूमिः ।

इत्यमरकोषमेदिन्यौ। छायं। इति हेमचन्द्रः। (युद्धार्थे यथा,—"आदृणवती लोचनमार्गमाजौ रजोन्धकारस्य विष्टम्भितस्य"। इति रघुः।७।४३।) आक्षेपः। इति शब्दरत्नावली॥

आजीवः, पुं, (आङ्+जीव+घञ्।) जीविका। इत्यमरः॥ ("बऽमूलफलो रम्यः खाजीवः प्रतिभाति मे"॥ इति रामायणे।)

आजुः, [ऊ] स्त्री, (आङ्+जुर्+क्विप्।) आजूः। विष्टिः। इति स्वामी॥

आजूः, स्त्री, (आ+जुगतौ+क्विप् दीर्घश्च।) वेतनं विना कर्म्मकारः। वेँगार इति भाषा। इत्यमरः॥ (यदुक्तम्,

"हठादष्टतिकः क्षेणोविष्टिराजूश्च कीर्त्यते"।)

आज्ञप्तः, त्रि, (आ+ज्ञा+णिच्+क्त।) आज्ञाप्राप्तः। यथा, देवीमाहात्म्यम्।

"आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः। चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः"॥

आज्ञा, स्त्री, (आङ्+ज्ञा+अङ्+टाप्।) आदेशः। तत्पर्य्यायः। अववादः २ निर्देशः ३ निदेशः ४ शासनं ५ अधिष्टिः ६। इत्यमरः॥ ("तथेति शैधामिव भर्तुराज्ञां"। इति कुमारे। ३।२२।

"यस्मात् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्" इति रघौ। १२।७।)

आज्ञाकारी, [न्] त्रि, (आज्ञा+कृ+णिन्।) आज्ञया कर्म्मकारी। आज्ञावहः। आज्ञानुवर्त्ती॥

आज्ञाचक्रं, क्ली, षट्चक्रान्तर्गतषष्ठचक्रम्। तथा च तन्त्रे,—"आज्ञानामाम्बुजं तद्द्विदलकरसदृग्धं ध्यानधामप्रकाशं हक्षाभ्यां वैकलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रं। तन्मध्ये हाकिनी सा ह्यधिसमधवला वक्त्रषट्कं दधाना विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥ एतत् पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्"॥ इति तत्त्वचिन्तामणौ षट्प्रकाशः॥

आज्ञापकः, त्रि, (आङ्+ज्ञा+णिच्+ण्वुल्।) आज्ञाकर्त्ता।

आज्ञापत्रं, (आज्ञायै पत्रं।) क्ली आदेशलिपिः। निदेशलिखनं। ऊकुमनामा इति पारस्यभाषा॥

आज्ञापनं, क्ली, (आङ्+ज्ञापि+ल्युट्।) विज्ञापनं। जानान इति भाषा॥

आज्ञप्तः, त्रि, (आङ्+ज्ञापि+क्त।) आज्ञप्तिविशिष्टः। लब्धाज्ञः। आज्ञाप्राप्तः॥

आज्यं, क्ली, (आङ् पूर्ब्वात् अञ्चेः संज्ञायामिति क्यप्।) घृतं। इत्यमरः॥ श्रीवासः। इत्यजयपालः॥ (यागक्रियासाधनं तैलदुग्धादिकमपि आज्यशब्देनोच्यते। यदुक्तं स्मृतिसङ्ग्रहे।

"घृतं वा यदि वा तैलं पयो वा दधि यावकं। आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते"॥ यथा रघुवंशे। ७।२०। "तत्रार्चितो भोजयतेः पुरोधाः ऊत्विग्भिराज्यादिभिरग्निकल्पैः"॥)

आज्यभागः, पुं, (आज्यस्य भागः) ऋग्वेदिनां अग्नेरुत्तरभागे खुवेणाग्निसम्प्रदानकघृताऊतिः तद्दक्षिणभागे सोमसम्प्रदानकाऊतिश्च। इति कालेसिः।

यजुर्वेदिनान्तु अग्नेरुत्तरदक्षिणयोः पश्चिमादिप्राच्यन्तघृतधारा। इति पशुपतिः॥

आञ्जनेयः, पुं, (अञ्जनाया अपत्यं, अञ्जना+ढक्।) अञ्जनानामवानरीपुत्रः। स तु हनूमान्। इति चिकाण्डशेषः॥ (यथा महानाटके।

"उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः। आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयं"॥)

आञ्जिनेयः, पुं, (आञ्जन+ढक्+इट्।) जन्तुविशेषः। आजनाइ इति ख्यातः। इति शब्दमाला॥

आटिः, पुं, (आङ्+अट+इन्।) पक्षिविशेषः। घुराखि इति ख्यातः। इत्यमरः॥

आटीकरं, क्ली, (आङ्+टीक्+ल्युट्।) वस्त्रानां गमनं। इति चिकाण्डशेषः॥

आटीकरः, पुं, (आटीक+र।) रथः। इति भूरिप्रयोगः॥

आटोपः, पुं, (आङ्+टुप्+घञ्।) दर्पः। इति हेमचन्द्रः॥ वायुजन्य-उदरगुड़्गुड़ाशब्दः। इति वैद्यकं॥ (गर्व्वः, सम्भ्रमः, संरम्भः। यथा-पञ्चतन्त्रे "विषं भवतु मावाभूत् फटाटोपो भयङ्करः"। यथा शिशुपालबधे। 'साटोपमुर्व्वीमनिशं नदन्तः'।

"आटोपहङ्कासवमीगुरुत्व-स्तैमित्यमावाहकपप्रसेकैः"।

इति माधवकरः॥)

आडम्बरः, पुं, (आङ्+दम्+वरच्। ततः दस्थाने ड। आड़म्बाते ड्वि क्षेपे घञ् भावे वा। आड़म्बं राति रमयति वा आतोनुपेति कः। मूलविभुजेति वा कः। आड़म्बयति वा बाहुलकादरन्।) पटहः। तूर्य्यरवः। गजेन्द्रगर्जनं। इत्यमरः॥ आरम्भः। इति चिकाण्डशेषः॥ पद्मं। दर्पः। इति मेदिनी॥ क्रोधः। इति स्वामी॥ हर्षः। इति शब्दरत्नावली॥ (आयोजनं। एकत्र सन्निवेशः, यथा, भामिनीविलासे। "धातः किं नु विधौ विधातुमुचितो धाराधराड़म्बरः"॥ युद्धं। स्वार्थे यथा,

"असारस्य पदार्थस्य प्रायेणाड़म्बरो महान्। नहि तादृक्ध्वनिः स्वर्णे यथा कांस्ये प्रजायते"॥)

आड़िः, स्त्री, (आङ्+अड़+इन्।) घुराखिपक्षी। इत्यमरः॥ खनामख्यातमत्स्यविशेषः। अस्याः गुणाः। गुरुत्वं। स्निग्धत्वं। वातश्लेष्मप्रकोपनत्वं। अतिबलशुक्रमेधाग्निवृद्धिकारित्वञ्च॥ इति राजवल्लभः॥ (विश्वामित्रशापेन वशिष्ठो महर्षिराड़िपक्षिरूपतां गतः इति पौराणिकी कथा॥ यथा मार्कण्डेयपुराणे आड़िवकयुद्धे,—

"श्रुत्वा शापं महातेजा विश्वामित्रोऽपि कौशिकः। त्वमप्याड़िर्भवखेति प्रतिशापमयच्छत॥ आड़िं सोऽप्युन्नतग्रीवो वकः पक्ष्मामताड़यत्"॥)

आड़ूः, पुं, (अड़ शब्दे। अनोडश्चेत्युः।) उड़ुपः। भेला माड इत्यादि भाषा। इत्युणादिकोषः।

आढ़कं, क्ली, (आ समन्तात् ढ़ौकते ढ़ौक्यते वा ढ़ौक गतौ अच् घञ् वा पृषोदरादिः। परिमाणविशेषः। आढ़ा इति भाषा। यथा,—

"शतयोजनविस्तीर्णं चिंशद्योजनमायतं। आढ़कस्य भवेन्मानं मुनिभिः परिकीर्त्तितं"॥ अपि च॥

"चिंशद्योजनविस्तीर्णं शतयोजनमायतं। विंशद्योजनगम्भीरमाढ़कं परिकीर्त्तितं"॥ इति गणपतिभट्टः। इति ज्योतिस्तत्त्वं॥

आढ़कः, पुं, क्ली, चतुःप्रस्थपरिमाणं। आढ़ी इति भाषा। इत्यमरः॥ द्रोणचतुर्थभागः। इति लीलावती॥ अयमुष्टिर्भवेत् कुक्षिरित्यादिवचनात् षट्पञ्चाशदधिकद्विशतमुष्टिर्भवति। व्यवहारे षोड़शसेरो विंशतिसेरो वा। वैद्यकमते अष्टशरावपरिमाणं। तत्पर्य्यायः। पात्रं २ कंसं ३ भाजनं ४। इति परिभाषा॥ ("चतुःप्रस्थैस्त्वाढ़कं। भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च तत्"॥ इति शार्ङ्गधरः। "चतुःप्रस्थमथाढ़कं। "पात्रं तदेव विज्ञेयं कंसप्रस्थाष्टकन्तथा"॥ इति चरकः।)

अपचयविवक्षायां आढ़किकेत्यपि स्यात्। इत्यमरटीकासारसुन्दरी॥ आढ़िका। इति भरतः॥

आढ़किकः, त्रि, (आढ़क+ठञ्।) आढ़कपरिमितबीजवपनादियोग्यक्षेत्रादिः। इत्यमरः॥

आढ़की, स्त्री, शमीधान्यविशेषः। अरहर इति भाषा। तत्पर्य्यायः। तुवरी २ वर्य्या ३ कर वीरभुजा ४ शतबीजा ५ पीतपुष्पा ६। अस्याः गुणाः। कषायत्वं। मधुरत्वं। कफपित्तनाशित्वञ्च। तद्दलगुणाः। ईषद्वातरुचिकारित्वं। गुरुत्वं। ग्राहित्वञ्च। पीता रक्ता सिता त्रिविधेयं। श्वेता दोषदा। लोहिता रुच्या बल्या पित्तताप्रादिहन्त्री च। पीता दीपनी पित्तदाहध्वंसिनी च॥ तदयुषं बल्यं। इति राजनिर्घण्टः॥ अमरमते तत्पर्य्यायः। काञ्ची २ मतल्ला ३ तुवरिका ४ मतालकं ५ सुराष्ट्रजं ६। भरतमल्लिकमते एतत् षट्कं अरहरस्य। सारसुन्दरीमते तुवरिकाख्यगन्धद्रव्यस्य। केषाञ्चिन्मते सुगन्धिमृत्तिकायाः॥ (अस्याः पर्य्यायगुणावाह।

"आढ़की तुवरी चापि सा प्रोक्ता शुभपुष्पिका॥ आढ़की तुवरा रूक्षा मधुरा शीतला लघुः। ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्"॥ इति भावप्रकाशः॥

"मृदुः कषाया च सरक्तपित्तं निहन्ति कासामतिवातला स्यात्। गुल्मज्वरारोचककासकृद्दि-हृद्रोगदुर्नामहराढ़की स्यात्"॥ इति हारीतः॥ "आढ़की कफपित्तघ्नी वातला,"। इति चरकः॥ "आढ़की कफपित्तघ्नी नातिवातप्रकोपनी"। इति सुश्रुतः॥)

आढकीनः, त्रि, (आढक + ख ।) आढकिकः । इत्यमरटीका ॥

आढ्यः, त्रि, (आढौकते ढौल गतौ बाहुलकात् ण्यः ।) धनवान् । इत्यमरः ॥ युक्तः । विशिष्टः । अन्वितः । यथा, धनाढ्यः गुणाढ्य इत्यादिः ॥ (यथा मनुः ८।१६८ ।
"चत्वारस्तूपधीयन्ते विप्र आढ्यो वणिङ् नृपः" ।
यथा भगवद्गीतायां,—
"आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया" ॥)

आणकः, त्रि, (अणक एव स्वार्थे अण् ।) अणकः । अधमः । इति रायमुकुटः ॥

आणवीनं, त्रि, (अणु + खञ् ।) अणवीयं । अणुधान्योद्भवोचितक्षेत्रं । इत्यमरटीकायां रायमुकुटः ।

आत्तिः, पुं, स्त्री, (अय + इन् ।) अन्तायकीलकः ॥ अक्षिः । सीमा । इति मेदिनी ॥

आतङ्कः, पुं, (आङ् + तकि + घञ् ।) रोगः ।
(यथा, याज्ञवल्क्यः,—
"दृष्ट्वा पथि निरातङ्कं क्षत्वा वा ब्रह्महा शुचिः" ॥)
सन्तापः । भङ्गः । (यथा, महावीरचरिते,—
"आतङ्कश्रमसाहसव्यतिकरोत्त्रस्यत्त्रसंसङ्गतां" ॥)
मुरजध्वनिः । इति मेदिनीकरहेमचन्द्रौ ॥ ज्वरः । इति राजनिर्घण्टः ॥
("नानातन्त्रविहीनानां भिषजामल्पमेधसां ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति" ।
इति माधवकरः ॥
रोगार्थे उदाहरणं यथा सुश्रुते ।
"प्रत्नेन च विजानीयात् देशं कालं जातिं साम्यमातङ्कसमुत्पत्तिं वेदनासमुत्थायं बलमित्यादि" ॥
ज्वरार्थे पर्य्यायान्याह ।
"ज्वरो विकारो रोगश्च व्याधिरातङ्क एव च ।
एकार्थनामपर्य्यायैर्विविधैरभिधीयते" ॥
इति चरकः ॥)

आतक्षणं, क्ली, (आङ् + तक्ष + ल्युट् ।) प्रतिघातः । गणितस्य खर्वादेर्द्व्यात्तरेखावचूर्णनं । इति स्वामी ॥ निक्षेपणं । इति सुभूतिः ॥ उपक्षयः । इति रायमुकुटः ॥ द्रव्यस्य प्रक्षेपणोचितचूर्णं । इति सारसुन्दरी ॥ क्षपणं । वेगः । व्याप्यायनं । तर्पणं । इत्यमरभेदिन्यौ ॥

आततायी, [न्] त्रि, (आतत + अय + णिन् ।) वधोद्यतः । इत्यमरः ॥
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षडेते आततायिनः ॥
आततायिनमायान्तं हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन" ॥
इति भगवद्गीताटीकायां श्रीधरस्वामी ॥

आतपः, पुं, (आङ् + तप + अच् ।)
रौद्रं । तत्पर्य्यायः । प्रकाशः २ द्योतः ३ । इत्यमरः ॥ दिनज्योतिः ४ सूर्य्यालोकः ५ दिनप्रभा ६ रविप्रकाशः ७ प्रद्योतः ८ तमारिः ९ तापनः १० द्युतिः ११ । अस्य गुणाः । कटुत्वं । रूक्षत्वं स्वेदमूर्च्छादाहादिवैवर्ण्यजनकत्वं । नेत्ररोगप्रकोपनत्वञ्च ॥ इति राजनिर्घण्टः ॥

("आतपः कटुको रूक्षः स्वेदमूर्च्छादाहवर्णकृत् ।
दाहविवर्णजननो नेत्ररोगप्रकोपनः" ॥
"आतपः पित्तदृष्ट्याग्निस्वेदमूर्च्छाभ्रमासृक्कृत् ।
दाहविवर्णकारी च" इति सुश्रुतः ॥
यथा शाकुन्तले,—
"कथमातपे गमिष्यसि परिवाधाकोमलैरङ्गैः" ॥
यथा ऋतुसंहारे, ११ ।—
"मृगाः प्रचण्डातपतापिता भृशम्" ॥)

आतपत्रं, क्ली, (आतप + त्रै + कः) छत्रं । इत्यमरः ॥
(यथा शाकुन्तले,—
"राज्यं स्वद्दस्तलृतदण्डमिवातपत्रं" ।
यथा रामायणे,—
"पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि" ॥
"छत्रशब्देऽस्य गुणादयो ज्ञातव्याः" ।)

आतपत्रकं, क्ली, छत्रं । इति शब्दरत्नावली ॥

आतपवारणं, क्ली, (आतप + वारि + ल्युट् ।) छत्रं । इति हेमचन्द्रः ॥ (यथा रघुवंशे, १ । ७० ।
"तृपतिकुकुदं दत्वा यूने सितातपवारणं" ।
"अनुदितान्यसितातपवारणः" ॥)

आतपाभावः, पुं, (आतपस्य अभावः । षष्ठीतत्पुरुषः ।) छाया । इति राजनिर्घण्टः ॥

आतरः, पुं, (आङ् + तॄ + अप् । आतरत्यनेन, पुंसि संज्ञायामिति घः) गद्यादितरणाय देयकपर्दकादिः । तत्पर्य्यायः । तरपण्यं २ । इत्यमरः ॥ पाराजिकड़ि नौकाभाड़ा इति भाषा ॥

आतर्पणं, क्ली, (आङ् + तृप् + ल्युट् ।) प्रीणनं । तृप्तिः । मद्यजालेपनं । आलिपना इति भाषा । इति मेदिनी ॥ (यथा मेदिनी ।
"आतर्पणं प्रीणने स्यात् मद्यजालेपनेऽपि च" ॥)

आतायी, [न्] पुं, (आङ् + तायि + णिन् ।) आतायी । चिह्नः । इत्यमरटीकायां स्वामी ॥ (असुरभेदः । चिह्न इति ख्यातः पक्षिभेदः ॥)

आतायी, [न्] पुं, (आङ् + ताय + णिन् ।) चिह्नः । चिह्न इति भाषा । इत्यमरः ॥

आतारः, पुं, (आङ् + तॄ + घञ् ।) आतरः । तरपण्यं । इति शब्दरत्नावली ॥

आतिः, पुं, (अत + इण् ।) पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आतिथेयः, त्रि, (अतिथि + ढञ् । अतिथौ साधुः ।) अतिथिसेवाकारकः । इत्यमरः ॥ (यथा रघुवंशे, ५ । २
"प्रत्युज्जगामातिथिमातिथेयः ॥
यथा कुमारसम्भवे, ५ । २१ ।
"तमातिथेयी बहुमानपूर्व्वया सपर्य्यया" ।
यथा मनुः, ३ । १८ ।
"दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु" ।

आतिथ्यं, त्रि, (अतिथि + ष्यञ् ।)
अतिथ्यर्थवस्तु । अतिथिमत्कृत्यादित्यं इत्यमरः ॥ अतिथिसेवा च ॥ ("यथा हितोपदेशे ।
"अरावप्युचितं कार्य्यमातिथ्यं गृहमागते" ॥)

आतिथ्यः, पुं, अतिथिः । इति मेदिनी ॥

आतुः, पुं, (आङ् + तु + डुः ।) मेषकः । मेषा माड़ इत्यादि भाषा । इति शब्दमाला ॥

आतुरः, त्रि, (आङ् + तुर + क) रोगी । तत्पर्य्यायः । आमयावी २ विकृतः ३ व्याधितः ४ अपटुः ५ अभ्यमितः ६ अभ्यक्तः ७ । इत्यमरः ॥ (यथा हितोपदेशे । वैद्यानामातुरः श्रेयान् । यथा मनुः, ४ । १२६ ।
"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि" ॥
आतुरावस्थास्वपि कार्य्याकार्य्ये प्रति कालाकालसंज्ञा । तद्यथा—अस्यामवस्थायामस्य भेषजस्य कालोऽकालः पुनरस्येति । एतदपि भवत्यवस्थाविशेषेण तस्मादातुरावस्थासपि हि कालाकालसंज्ञा ! तस्य परीक्षा मुञ्जर्म्मुञ्जरातुरस्य सर्व्वावस्थाविशेषावेक्षणं यथावद्भेषजप्रयोगार्थं । न ह्यतिपतितकालमप्राप्तकालं वा भेषजमुपयुज्यमानं यौगिकं भवति । कालोहि भैषज्ययोगपर्य्यायमभिनिर्व्वर्त्तयति ॥ इति चरकः ॥
आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्षेत ।
इति सुश्रुतः ॥)

आढ्यं, क्ली, (आङ् + ढ्यप् + अप् ।) धनविशेषः । आता इति भाषा । अस्य गुणाः । दृष्टिजनकत्वं । रक्तवर्द्धकत्वं । स्वादुत्वं । श्लेष्मलत्वं । बलमांसकारित्वं । हृद्यत्वं । दाहरक्तपित्तवायुनाशित्वञ्च । इति द्रव्यगुणः ॥

आतोद्यं, क्ली, (आङ् + तुद् + ण्यत् ।) वाद्यं । तच्चतुर्विधं । वीणादिवाद्यं ततं १ मुरजादिवाद्यं आनद्धं २ वंश्यादिवाद्यं सुषिरं ३ कांस्यतालादिवाद्यं घनं ४ इत्यमरः ॥ (यथा रघुवंशे । "वज्रमातोद्यशिरोनिवेशितां ।
"आतोद्यं ग्राहयामास समत्वाज्जयदायुधं" ॥)

आत्तगन्धः, त्रि, (आत्तः अरिष्टा गृहीतः गन्धो गर्व्वो यस्य सः बहुव्रीहिः ।) दूरीभूताहङ्कारः । तत्पर्य्यायः । अभिभूतः २ । इति हेमचन्द्रः ॥ गृहीतगन्धः ॥ (यथा रघुवंशे १३ । १७ ।
"पक्षच्छिदा गोत्रभिदाक्तगन्धाः
शूरास्त्रमेनं शतशो गृहीताः" ।)

आत्तगर्व्वः, त्रि, (आत्तः अरिष्टा गृहीतः गर्व्वो यस्य सः बहुव्रीहिः ।) अरिष्टा गृहीतगर्व्वः । दूरीभूताहङ्कारः । भग्नदर्पः । इत्यमरः ॥

आत्मगुप्ता, स्त्री, (आत्मना गुप्ता । तृतीया तत्पुरुषः ।) लताविशेषः । आलकुशी इति भाषा । तत्पर्य्यायः । मर्कटी २ कण्डुरा ३ अध्यण्डा ४ कच्छुरा ५ जटा ६ जड़ा ७ सुकपिच्छा ८ आत्मगुप्ता ९ ऋषभी १० कपिकच्छुरा ११ । इति रत्नमाला ।
("माषैः समानं फलमात्मगुप्ता" । इति सुश्रुतः । विशेषोऽस्याः कपिकच्छुराशब्दे द्रष्टव्यः ।)

आत्मम्भरी, [न्] त्रि, (आत्मन् + भृ + णिन् ।) आत्मम्भरिः । स्वार्थी ॥

आत्मघाती, [न्] त्रि, (आत्मन् + हन् + णिन् ।) आत्महन्ता । यथा कूर्म्मपुराणे ॥
"यापादयेदृच्छयात्मानं स्वयं योऽन्युदकादिभिः ।
विहितं तस्य नाग्नौचं नाग्निर्नाप्युदकादिकं" ॥
आत्महननकर्त्ता । अवैधबुद्धिपूर्व्वकात्महननस्य प्रायश्चित्तं यथा,—
'इन्द्रियैरपरित्यक्ता ये च मूढा विषादिनः ।

घातयन्ति स्वमात्मानं चण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यच्च श्राद्धं प्रयच्छन्ति विष्णुनामप्रतिष्ठितं ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे" ।
इति हेमाद्रौ दक्षशातातपौ ॥
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत् कृच्छ्राणि वा पुनः ॥
अर्ब्दात् संवत्सरात् कुर्य्यादहनादि यथोदितं ।
ज्ञात्वा नारायणबलिमनित्यत्वात्तदायुषः" ॥
इदमात्मवधनिमित्तं तज्ज्ञातिवधप्रायश्चित्तेन समुचितं कार्य्यम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥
अन्यत् पतितशब्दे द्रष्टव्यम् ॥ * ॥ आत्मत्यागिषु विशेषमाह गौतमः । "प्रायोऽनाशकप्रस्थानाग्निविषोदकोदबन्धनप्रपतनैरेच्छताम्" इति । प्रायो महाप्रस्थानं । अनाशकमनशनं । प्रपतनं शैलशिखरादवपातनं । इत्यादिनिमित्तैः शास्त्रविहितमार्गेण इच्छापूर्व्वकमृतानामग्नौचादिकं न कर्त्तव्यमित्यर्थः । अङ्गिराः ।
"चाण्डालादुदकात् सर्पात् ब्राह्मणादैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म्मिणां ॥
उदकं पिण्डदानञ्च प्रेतेभ्यो यत् प्रदीयते ।
नोपतिष्ठति तत्सर्व्वं अन्तरीक्षे विनश्यति" ॥
यथा मनुः ।
"दुष्कासङ्गरजातानां प्रव्रज्यासु च तिष्ठतां ।
आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया" ॥
दुष्कासङ्गरजातानामिति दुष्कुलजाताः पञ्चमहायज्ञादिरहिताः । सङ्गरजाताः प्रतिलोमजाः ॥ * ॥ प्रमादात् पूर्व्वोक्तनिमित्तैर्म्मरणे विद्यते एवाग्नौचादिकं । अतएवाङ्गिराः ।
"अथ कश्चित् प्रमादेन म्रियेतास्मदुदकादिभिः ।
तस्याग्नौचं विधातव्यं कर्त्तव्या चोदकक्रिया" ॥
चाण्डालादिमृताहिताग्नेरग्न्यादीनां प्रतिपत्तिकर्म्म च स्मृत्यन्तरेऽभिहितं ।
"चैतानं प्रक्षिपेदग्नौ आवसथ्यं चतुष्पथे ।
पात्राणि तु दहेदग्नौ यजमाने दृष्यमृते" ॥
दृष्यमृतः अविहितमार्गेण मृतः । तथा,—
"आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि च गङ्गायास्तीरे संस्थापनं मतं" ॥
गङ्गेति पुण्यनद्युपलक्षणं ॥ * ॥ एवं पूर्व्वोक्तनिषिद्धतरमरणे मृतानां खेदादिनाग्न्यौर्द्ध्वदेहिकरणे स्मृत्यन्तरे प्रायश्चित्तमाम्नातं ।
"ज्ञात्वाग्निमुदकं स्नानं स्पर्शनं हवनं तथा ।
"रज्ज्वुच्छेदाश्रुपातञ्च तप्तकृच्छ्रेण शुद्ध्यति" ॥ इति ।
एतच्च बुद्धिपूर्व्वे प्रत्येकमरण्यादिकरणे ।
अबुद्धिपूर्व्वके तु संवर्त्तः ।
"एवमन्यैतमं प्रेतं यो वहेत दहेत वा ।
कटोदककियां कृत्वा कृच्छ्रं सान्तपनं चरेत्" ।
यच्च समनन्तर्दासं भैक्षाहारस्त्रिसवनञ्च ।
तथा एकरात्रोपोषणादिकं चाभिहितं तदशक्तविषये देशकालाद्यपेक्षानुसारेण योजनीयं ॥ * ॥
यत्तु दक्षादिर्नुनमभिषक्क्रियस्यात्मदहनमप्यनुज्ञातमादिपुराणे ।
"दक्षः शौचस्मृतेर्नुनः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भ्रूणवन्नग्नगान्नुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये तस्त्रिसन्ध्यः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमारभेत्" ॥
तथा,—
"गच्छेत् महाप्रथं वापि तुषारगिरिमादरात् ।
प्रयागे वटशाखायां देहत्यागं करोति यः ॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः ।
उत्तमान् प्राप्नुयाल्लोकान्नात्मघाती भवेत् क्वचित् ॥
एतेषामधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु ।
नराणामथ नारीणां सर्व्ववर्णेषु सर्व्वदा ॥
अशौचं स्यात् त्र्यहं तेषां वयानलहतेषु च ।
वाराणस्यां त्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ॥
प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचित्" ।
विवस्वान् ।
"सर्व्वेन्द्रियविमुक्तस्य स्वव्यापाराद्यमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महाप्रथः" ॥
धर्म्मार्জ্জनासमर्थस्य दानव्रतार्थिकादिरूपप्रायश्चित्तासमर्थस्य । एवं शास्त्रविहितमार्गेण मृतानां चाण्डालादिमृतानां संवत्सरादूर्द्ध्वमौर्द्ध्वदेहिकं कार्य्यं । षट्त्रिंशन्मते ।
"गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्धं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकं" ॥ *
अत्रापरं विशेषमाह पराशरः ।
"चाण्डालेन श्वपाकेन गोभिर्व्विप्रैर्हतो यदि ।
आहिताग्निर्मृतो विप्रो लोकाग्नौ मन्त्रवर्জ্জितं ।
दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण स्नापयेत्ततः ।
खेनाग्निना स्वमन्त्रेण एषगेतत् पुनर्हुतं" ॥ * ॥
संवत्सरादर्व्वागपि तत्तत्पापानुसारेण दिगुणादिप्रायश्चित्तं विधाय नारायणबलिञ्च कृत्वा और्द्ध्वदेहिकं कार्य्यं । आयुषोऽनित्यत्वेन संवत्सरानन्तरमौर्द्ध्वदेहिकादिलोपप्रसङ्गात् । तच्च नारायणबलिं कृत्वा । तथा च दक्षयाज्ञवल्क्याः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेत् शौचं नान्यथेत्यब्रवीदृषभः" ॥
नारायणबलौ कृते और्द्ध्वदेहिककरणे भवतीत्यर्थः ॥ * ॥ सर्पहते तु विशेषः । संवत्सरं यावत् पक्वान्नागपूजां विधाय तदनन्तरं नारायणबलिं कृत्वा सौवर्णनागं प्रत्यक्षां गाञ्च व्यासोद्देशेन ब्राह्मणाय दत्त्वा और्द्ध्वदेहिकं कुर्य्यात् ॥ * ॥
नारायणबलिस्वरूपञ्च विष्णुनाभिहितं ।
"एकादश्यां समासाद्य शुक्लपक्षस्य वै तिथिं ।
विष्णुं समर्च्चयेद्देवं यमं वैश्वस्तं तथा ।
दग्धपिण्डान् हृताभ्यक्तान् दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ।
विष्णुं बुद्धौ समासाद्य गच्छमसि ततः क्षिपेत् ।
नामगोत्रयुजं कृत्वा पुष्पैरभ्यर्चनं ततः ॥
धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरं ।
विधातपःसमुद्भान् वै कुलोत्पन्नान् समाहितान् ।
निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ।
अपरेऽह्नि सभाग्ने मध्याह्ने समुपोषितः ॥
विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान् यथान्यायेषं पिण्डरूपमनुस्मरन् ॥
मनो निवेश्य विष्णौ वै सर्व्वं कुर्य्यादतन्द्रितः ।
आवाहनादि यत् प्रोक्तं दैवपूर्व्वं तदाचरेत् ॥
स्नानं दत्त्वा ततो विप्रस्तृप्तिं दृष्ट्वा यथाविधि ।
हविष्यभक्षणेनैव तिलादिसहितेन च ॥
पञ्च पिण्डान् प्रदद्याच्च दैवरूपमनुस्मरन् ।
प्रथमं विष्णवे दद्यात् ब्रह्मणे च द्वितीयं च ॥
यमाय सानुसाराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतं संकीर्त्य मनसा गोत्रपूर्व्वमतःपरं ॥
विष्णोर्नाम समुच्चार्य्य पञ्चमं पूर्व्ववत् क्षिपेत् ।
विप्रानाचम्य विधिवत् दक्षिणाभिः समर्चयेत् ॥
एकं दक्षतमं विप्रं हिरण्येन समर्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरेत् ॥
ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः ।
क्षिपेयुर्गोत्रपूर्व्वन्तु नाम बुद्धौ निवेश्य च ॥
हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहिताः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः" ॥
भविष्यपुराणे ।
"सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गां ।
व्यासाय दत्त्वा विधिवत् पितुरान्दण्यमाप्नुयात्" ॥
इति मदनपारिजाते ५ स्तवकः ॥

आत्मघोषः, पुं, (आत्मानं घोषयतीति । आत्मन् + घुष् + अण् ।) काकः । इत्यमरः । कुक्कुटः । इति शब्दचन्द्रिका ॥

आत्मजः, पुं, (आत्मन् + जन् + डः । आत्मा वै जायते पुत्र इति श्रुतेः ।) पुत्रः । इत्यमरः ॥ मनुः, १७।१४ ।
"तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजं" ।
यथा रामायणे,—
"दिग्भ्यः प्रस्थापयामास दिदृक्षुर्जनकात्मजां" ॥)

आत्मजन्मा [न्] पुं, (आत्मनः जन्म यस्य सः बहुव्रीहिः ।) पुत्रः । इति शब्दरत्नावली ॥
यथा कुमारसम्भवे, ६ । २८ ।
"अत आहर्तुमिच्छामि पार्व्वतीमात्मजन्मने" ।
यथा रघुवंशे, १ । ३३ ।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" ॥)

आत्मजा, स्त्री, (आत्मन् + जन् + ड + आप् ।) कन्या । इत्यमरः ॥ बुद्धिः । इति शब्दरत्नावली ॥

आत्मतत्त्वं, क्ली, (आत्मनः तत्त्वं स्वरूपम् ।) तत्पदार्थसकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वं । शुद्धादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्विति यावत् । एतद्विवरणं यथा ।
"इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेष उच्यते । तथाच । अतिप्राज्ञतस्तु आत्मा वै जायते पुत्र इत्यादि श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुत्रे नष्टेऽहमेव पुत्रो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १ ॥ चार्व्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः प्रदीप्तस्फात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं ह्रस्वोऽहं इत्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ २ ॥ अपरश्चार्व्वाकः तेऽप्राप्ताः प्रजापतिं समेत्य ब्रूयु

रित्यादिश्रुतेः इन्द्रियाद्यभावे शरीरचलनाभावात् काणोऽहं बधिरोऽहं इत्याद्यनुभवाच्च इन्द्रियाण्यात्मेति वदति ॥ ३ ॥ अन्यस्तु चार्व्वाकः अन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इन्द्रियचलनायोगात् अहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च प्राण आत्मेति वदति ॥ ४ ॥ इतरस्तु चार्व्वाकः अन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ ५ ॥ बौद्धस्तु अन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्त्तुरभावे करणस्य ग्रहणाभावात् अहं कर्त्ताहं भोक्ता इत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ ६ ॥ प्राभाकरतार्किकौ तु अन्योऽन्तर आत्मा आनन्दमय इत्यादिश्रुतेः सुषुप्तौ बुद्ध्यादीनामज्ञाने सत्यदर्शनात् अहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः ॥ ७ ॥ भट्टस्तु प्रज्ञानघन एवानन्दमय आत्मेत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावात् मामहं न जानामि इत्याद्यनुभवाच्च अज्ञानेनाग्रहितं चैतन्यमात्मेति वदति ॥ ८ ॥ अपरबौद्धः असदेवेदमय आसीदित्यादिश्रुतेः सुषुप्तौ सर्व्वाभावादहं सुप्तः सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ ९ ॥ इतेषां पुत्रादीनां शून्यपर्य्यन्तानामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुत्यनुभवाभासेषु पूर्व्वपूर्व्वोक्तश्रुत्यनुभवाभासानामुत्तरोत्तरश्रुत्यनुभवाभासैरात्मबाधदर्शनात् पुत्रादीनामनात्मत्वं स्वरूपमेवेति ॥ * ॥ किञ्च प्रत्यगभिन्नोऽच्चुरप्राप्योऽमना अकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधात् अस्य पुत्रादिशून्यपर्य्यन्तस्य जड़स्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात् अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्य्यन्तमखिलमनात्मैव। अतस्तत्साक्षात्कारं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यनैवात्मतत्त्वमिति वेदान्तविदनुभवः" । इति वेदान्तसारः (५०—५८)।

आत्मदर्शः, पुं, (आत्मन् + दृश् + घः ।) दर्पणः। इति हेमचन्द्रः। (यथा रघुवंशे । "निश्वासवाष्पागमात्मदर्शनः । प्रसादमात्मीयमिवात्मदर्शनः" ।)

आत्मनीन, त्रि, (आत्मन् + खः ।) आत्मने हितं । इति व्याकरणं ॥ पथ्यं । इति राजनिर्घण्टः ॥ ("मनसिर्द्दतिमात्मनीनाम्" । इति प्रबोधचन्द्रोदयः ।)

आत्मनीनः, पुं, (आत्मन् + ख ।) सुतः । ज्ञाताः ॥ प्राज्ञाधारः । विदूषकः । इत्यजयः ॥

आत्मबन्धु, पुं, (आत्मनः बन्धुः । षष्ठीतत्पुरुषः । यद्वा "आत्ममाद्भ्यसुः पुत्रा आत्मापिद्भ्यसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः" ।) पितृव्यपुत्रः । मातुलपुत्रः । मातृव्यपुत्रः । इति स्मृतिः ॥

आत्मवीरः, पुं, (आत्मा वीर इव यस्य ।) प्राज्ञवान् । ज्ञाताः । विदूषकः । इति मेदिनी ॥

आत्मभूः, पुं, (आत्मन् + भू + क्विप् ।) ब्रह्मा । कामदेवः । इत्यमरः ॥ विष्णुः । शिवः । इति शब्दरत्नावली ॥
(यथा रघुवंशे १० । २० ।
"सर्व्वज्ञस्त्वमविज्ञातः सर्व्वयोनिस्त्वमात्मभूः" ।)

आत्ममूली, स्त्री, (आत्मन् + मूल + ङीप् ।) दुरालभाशब्दः । इति शब्दमाला ॥ (दुरालभाशब्दे ऽस्याविशेषोज्ञेयः ।)

आत्मम्भरि, त्रि, (आत्मानं बिभर्त्तीति, आत्मन् + भृ + इन् + मुम् ।) आत्मोदरमात्रभरणकर्त्ता । तत्पर्य्यायः । कुक्षिम्भरि २ स्वोदरपूरकः ३ । इत्यमरः ॥ (आधूनः, परार्थवैमुख्येन स्वार्थसाधनपरः । यथा भट्टिकाव्ये । "आत्मम्भरित्वं पिशुनैर्नराणां" ॥ यथा हितोपदेशे ।
"शिष्टैरप्यविशेषज्ञ उदरं क्षतनाशकः ।
त्यज्यते किं पुनर्नान्यैः पलाण्डुरात्मम्भरिर्नरः" ॥)

आत्मयोनिः, पुं, (आत्मैव योनिरुपादानकारणमस्य बहुव्रीहिः ।) ब्रह्मा । विष्णुः । शिवः । कामदेवः । इति मेदिनीशब्दरत्नावल्यौ (यथा कुमारे १ । ७० ।
"ददर्श चक्रीक्षतचारुपार्श्वं
प्रहर्त्तुमभ्युद्यतमात्मयोनिं" ॥)

आत्मरक्षा, स्त्री, महेन्द्रवारुणीवृक्षः । इति राजनिर्घण्टः ॥ (आत्मशरीररक्षणं ।)

आत्मलभ्या, स्त्री, शतावरी । इति राजनिर्घण्टः ॥

आत्मश्लाघा, स्त्री, (आत्मनः श्लाघा ।) आत्मगर्व्वः । स्वीयप्रशंसा ॥

आत्महत्या, स्त्री, (आत्मनः हत्या ।) आत्मघातः । स्वबधः ॥

आत्महा, [न्] पुं, (आत्मन् + हन् + क्विप् ।) देवलः । इति शब्दरत्नावली ॥ आत्मघाती । "इदेहमाद्यं सुलभं सुदुर्लभं ध्रुवं सुकल्पं गुरुकर्णधारं । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा" ॥ इति श्रीभागवते । (अपरञ्च यथा,
"लब्धा कथञ्चित् नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनं । यस्त्वात्ममृत्यौ न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात्" ॥)

आत्मा, [न्] पुं, (अतति सन्ततभावेन ज्ञानादिसर्व्वावस्थासु अनुवर्त्तते, अत सातत्यगमने + मनिन् ।) यत्नः । धृतिः । बुद्धिः । स्वभावः । ब्रह्म । देहः । इत्यमरः ॥ मनः । इति मेदिनी ॥ परावर्त्तनं । इति धरणी ॥ पुत्रः । इति शब्दरत्नावली ॥ जीवः । सूर्य्यः । ऊताशनः । वायुः । इति हेमचन्द्रः ॥
("आत्मज्ञः करणैर्योगात् ज्ञानं तस्य प्रवर्त्तते" । "अथात्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः" । "चेतवान् यतश्चात्मा ततः कर्त्ता निरुच्यते" । "देही सर्व्वगतोऽज्ञात्मा क्षेत्रे संस्पर्शनेन्द्रिये । सर्व्वाः सर्व्वाश्रयस्त्वात्तु नात्मातो वेत्ति वेदनाः" ॥ "विभुत्वमतश्चवास्य यस्मात् सर्व्वगतो महान् । मनसश्च समाधानात् पश्यत्यात्मा तिरस्कृतं" ॥ "आदिर्नास्त्यात्मनः क्षेत्रपारम्पर्य्यमनादिकं" ।
"स सर्व्वगः सर्व्वशरीरभृच्च,
स विश्वकर्म्मा स च विश्वरूपः ।
स चेतनाधातुरतीन्द्रियश्च,
स नित्ययुक् सानुशयः सएव ॥
रसात्ममातापितृसम्भवानि,
भूतानि विद्याद्दश षट् च देहे ।
चत्वारि तत्रात्मनि संश्रितानि,
स्थितस्तथात्मा च चतुर्षु तेषु ॥
भूतानि मातापितृसम्भवानि,
रजश्च शुक्रञ्च वदन्ति गर्भे ।
आप्यायते शुक्रमसृक्समुद्भवै-
र्यैस्तानि भूतानि रसोद्भवानि ॥
भूतानि चत्वारि तु कर्म्मजानि,
यान्यात्मजीवानि विशन्ति गर्भं ।
सवीजधर्म्माह्यपरापराणि,
देहान्तराण्यात्मनि यान्ति यान्ति ॥
रूपादिरूपप्रभवः प्रसिद्धः,
कर्म्मात्मकानां मनसो मनस्तः ।
भवन्ति येत्वाहतिबुद्धिभेदाः
रजस्तमस्तत्र च कर्म्महेतुः ॥
अतीन्द्रियैस्तैरतिसूक्ष्मरूपै
रात्मा कदाचिन्न वियुक्तरूपः ।
न कर्म्मणा नैव मनोमतिभ्यां
न चाप्यहङ्कारविकारदोषैः" ॥
इति चरकः ॥
"यदा यदात्माक्षतिमान्यं भवे-
त्तदा मनस्तत्त्वधितिष्ठतीन्द्रियं ।
ततो मनोऽधिष्ठितमिन्द्रियं घटे-
प्रवर्त्तते संग्रयबुद्धिसम्भवे" ॥
इति वैद्यकवादार्थदर्पणं ॥)

आत्माधीनः, पुं, (आत्मनोऽधीनः ।) पुत्रः । प्राज्ञाधारः । ज्ञाताः । विदूषकः । इति हेमचन्द्रः ॥

आत्माग्नी, [न्] पुं, (आत्मन् + अग्नि + णिन् ।) मत्स्यः । इति त्रिकाण्डशेषः ॥

आत्माश्रयः, पुं, (आत्मा आश्रयो यस्य सः ।) तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापादकप्रसङ्गत्वं । अपेक्षा च आत्मौ उत्पत्तौ स्थितौ च ज्ञाता । तत्राद्या यथा । एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यात् एतद्घटज्ञानभिन्नं स्यात् । द्वितीया तु घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यात् । तृतीया च अयं घटो यद्येतद्घटवृत्तिः स्यात् तथात्वेनोपलभ्येत इति ॥

आत्मीयः, त्रि, (आत्मन् + छ ।) स्वकीयः । अन्तरङ्गः । इति हेमचन्द्रः ॥ (यथा रघुवंशे ।
"प्रसादमात्मीयमिवात्मदर्शनः" ।
कुमारसम्भवे । २ । १९ ॥
"किमिदं द्युतिमात्मीयां न बिभर्त्ति यथा पुरा" ।)

आत्मोद्भवा, स्त्री, (आत्मनः उद्भवो यस्याः सा ।) मायपर्णी । इति राजनिर्घण्टः ॥ कन्या । पुत्रे, पुं ॥ (मायपर्णीशब्देऽस्या विशेषो ज्ञातव्यः ।)

आत्रेयः, पुं, (अत्रेरपत्यं पुमान् । अत्रि + ढक् ।) अत्रिमुनिपुत्रः । स च दत्तः । दुर्व्वासाः । चन्द्रश्च ।

इति मेदिनी ॥ शरीरस्थरसधातुः । इति हेमचन्द्रः ॥

आत्रेयिका, स्त्री, (अत्रि + ढक् + कन् + टाप् ।) ऋतुमती । इति हलायुधः ॥

आत्रेयी, स्त्री, (अत्रि + ढक् + ङीप् ।) पुष्यवती स्त्री । (यथाह अङ्गिराः,—

"आहितामेत्रेयस्य हत्वा पत्नीमनिन्दिताम् ।
ब्रह्महत्याव्रतं कुर्य्यात् आत्रेयीघ्नस्तथैव च" ॥)

नदीविशेषः । इति मेदिनी ॥ (अत्रिमुनिपत्नी ।) यथा भारते,—

"सरयूर्वारवत्या च लाङ्गली च सरिद्वरा ।
करतोया तथात्रेयी लौहित्यश्च महानदः" ॥)

आथर्व्वणं, क्ली, (अथर्व्वन् + अण् ।) अथर्व्वणां समूहः । अथर्व्वनाम्ना मुनिना प्रोक्तो वेदः अथर्व्वा तेषां सङ्घः । इत्यमरः ॥ शान्तिस्तुतिः । इति हेमचन्द्रः ॥ (यथा महावीरचरिते ।

"आथर्व्वणस्तोत्र इवाभिचारः" ।)

आथर्व्वणः, पुं, (अथर्व्व वेत्तीति । अथर्व्वन् + अण् ।) पुरोहितः । अथर्व्ववेदज्ञब्राह्मणः । इति हेमचन्द्रः ॥

आदरः, पुं, (आङ् + दृ + अप् ।) आरम्भः । इति त्रिकाण्डशेषः ॥ समादरः । सम्मानः ॥ (यथा किरातार्জ্জুनीये ५ । १६ ।

"स जगदे वचनं प्रियमादरात्
मुखरतावसरे हि विराजते" ।

कुमारसम्भवे ६ । १३ ।

"तद्दर्शनादभूत् ग्लानेर्भूयान् दारार्थमादरः" ।
हितोदेशे ।

"सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः" ।)

आदर्य्यः, त्रि, (आङ् + दृ + ण्यत् ।) आदरणीयः । आदर्त्तव्यः ॥ आदरोपयुक्तः ॥

आदर्शः, पुं, (आङ् + दृश् + घञ् ।) दर्पणं । टीका । प्रतिपुरुषकं । इति मेदिनी ॥ (यथा भगवद्गीतायां ।

"धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं" ॥)

आदानं, क्ली, (आङ्दा + ल्युट् ।) ग्रहणं । अस्वाभरणं । इति मेदिनीहेमचन्द्रौ ॥ रोगजन्यं । इति राजनिर्घण्टः । (स्वीकारः प्रतिग्रहः । यथा कुमारसम्भवे ५ । ११ ॥

"कुशाङ्कुरादानपरिक्षतास्यः" ॥ मनुः, ७ । २०४ ।

"आदानमप्रियकरं दानञ्च प्रियकारकं ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते" ॥)

आदानी, स्त्री, (आ + दा + ल्युट् + ङीप् ।) हस्तिघोषाख्यः । इति रत्नमाला ॥

आदिः, पुं, (आङ् + दा + कि ।) पूर्व्वः । प्रथमः । इत्यमरः ॥ पदान्ते गणसूचकः । यथा इत्यादिः ॥ (प्रश्निभः । प्राक्सत्ता । नियतपूर्व्ववर्त्तिकारणं । उत्पत्तिहेतुः । सामीप्ये । व्यवस्थायां । प्रकारे, अवयवार्थे च आदिशब्दस्य प्रयोगो भवति । यदुक्तं,—

"सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा ।
आदिशब्दं तु मेधावी चतुर्ष्वर्थेषु लक्षयेत्" ॥

यथा मानवे १ । ८ ।

"अप्यग्र्य सप्तर्व्वादौ तासु वीजमवास्रजत्" ।

कुमारे १ । ६ । "जगदादिरनादिस्त्वं" ॥)

आदिकविः, पुं, (आदिः प्रथमः कविः ।) ब्रह्मा इति श्रीभागवतं ॥ वाल्मीकिमुनिः । इति हेमचन्द्रः ॥ ("तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत् सूरयः" । इति भागवते १ । ४ ।)

आदिकारणं, क्ली, (आदि आद्यं कारणम् ।) पूर्व्वनिमित्तं । मूलहेतुः । तत्पर्य्यायः । निदानं २ । इत्यमरः ॥

आदिगदाधरः, पुं, (आदिराद्यः आदौ पूजितो वा गदाधरः ।) गयास्थदेवताविशेषः । यथा,—

"गयाशिरस्त्वादयित्वा गुरुत्वादास्थिता शिला ।
कालान्तरेण यक्षत्वं स्थित आदिगदाधरः ॥
तथा यक्षोऽथ रूपी आसीदादौ गदाधरः ।
आदिरादौ पूजितोऽत्र देवैर्ब्रह्मादिभिर्यतः ॥
पाद्याद्यगन्धपुष्पाद्यैरत आदिगदाधरः" ॥

इति गारुड़े गयामाहात्म्ये ८५ अध्यायः ॥ अपिच

"गदयादाववष्टभ्य गयासुरशिरःशिलां ।
निश्चलार्थं स्थितो यस्मात्तस्मादादिगदाधरः" ॥

इति वायुपुराणीयगयामाहात्म्ये ८ अध्यायः ॥

आदितालः, पुं, (आदिराद्यस्तालः ।) तालविशेषः । यथा,—सङ्गीतदामोदरः ।

"एकस्य लघुर्यत्र आदितालः स कथ्यते ।
गुरुस्तत् पुरतो वाद्यः प्रायेणैतन्निदर्शनं" ॥ इति ।

आदितेयः, पुं, (अदितेरपत्यं पुमान् । अदिति + ढक् ।) अदितिपुत्रः । देवः । इत्यमरः ॥

आदित्यः, पुं, (अदितेरादित्यस्य वा अपत्यं + ण्यः ।) देवः । सूर्य्यः । इत्यमरमेदिन्यौ ॥ द्वादशादित्यगणे बहुवचनान्तः । इत्यमरः ॥ तत्पर्य्येकनामानि । विवस्वान् १ अर्य्यमा २ पूषा ३ त्वष्टा ४ सविता ५ भगः ६ धाता ७ विधाता ८ वरुणः ९ मित्रः १० शक्रः ११ उरुक्रमः १२ । एते कश्यपात् अदितिभार्य्यायां जाताः । कल्पान्तरे त्वष्टृकन्या संज्ञा आदित्यपत्नी आदित्यस्य तेजः सोढुमसमर्था अतस्तस्याः पितृकृतादित्यहृदयग्रहणाद् द्वादशादित्याः । तेषां द्वादशमासेष्वेकैकस्योदयः । इति पुराणं ॥ अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा । ("आदित्यमण्डलस्थितो हिरण्मयोविष्णुः" । यथा शान्तिशतके । ४ । २४ ।

"आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं" ।

भारते ।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च" ।

हरिवंशे द्वादशादित्यकथा यथा ।

"मरीचात् कश्यपाज्जातास्तेऽदित्या दक्षकन्यया ।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेवह ॥
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत ।
विवस्वान् सविता चैव मित्रो वरुण एव च ।
अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः" ॥

तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाच्छिनिमेषकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगप्रविभागं करोति ॥ इति सुश्रुतः)

आदित्यपत्रः, पुं, (आदित्यवृक्षस्य पत्रमिव पत्रमस्य ।) क्षुपविशेषः । तत्पर्य्यायः । अर्कपत्रः २ अर्कदलः ३ सूर्य्यपत्रः ४ तपनच्छदः ५ कुष्ठारिः ६ विटपः ७ सुपत्रः ८ रविप्रियः ९ रश्मिपतिः १० वह्निः ११ । अस्य गुणाः । कटुत्वं । उष्णवीर्य्यत्वं । कफवातरोगजाठरगुल्मारोचकनाशित्वं । अग्निसन्दीपनत्वञ्च । इति राजनिर्घण्टः ॥

आदित्यपुष्पिका, स्त्री, (आदित्यवत् लोहितं पुष्पमस्याः ।) लोहितार्कवृक्षः । इति रत्नमाला ॥ राङ्गा आकन्द इति भाषा ।

आदित्यभक्ता, स्त्री, (आदित्यस्य भक्ता ।) ओषधीविशेषः । ऊड़ऊड़िया इति भाषा । तत्पर्य्यायः । वरदा २ अर्कभक्ता ३ सुवर्चला ४ सूर्य्यलता ५ सूर्य्यावर्त्ता ६ अर्ककान्ता ७ मयूरकपर्णी ८ सुरसम्भवा ९ सौरी १० सुतेजाः ११ अर्कप्रिया १२ वरिष्ठा १३ मयूरकी १४ सप्तनामा १५ देवी १६ मार्त्तण्डवल्लभा १७ विक्रान्ता १८ भास्करेष्टा १९ । अस्या गुणाः । हिमत्वं । तिक्तत्वं । कटुत्वं । उष्णत्वं । कफत्वदोषकण्डूव्रणकुष्ठभूतग्रहोग्रगीतज्वरनाशित्वञ्च । अन्यच्च । स्वादुपाकरसत्वं । गुरुत्वं । अपित्तवर्द्धकत्वं । क्षाररसत्वं । विशेषवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

आदित्यसूनुः, पुं, (अदितेरपत्यं पुमान् आदित्यः सूर्य्यः तस्य सूनुः षष्ठीतत्पुरुषः ।) सुग्रीववानरः । इति हेमचन्द्रः ॥ यमः । शनैश्चरः । सावर्णिमनुः । वैवस्वतमनुः । इति पुराणं ॥ (कर्णः ।)

आदिदेवः, पुं, (आदिः कारणं स च देवश्चेति कर्म्मधारयः ।) नारायणः । त्रिकाण्डशेषः ॥ (जगदुपादानादिगुणवान् वासुदेवः विष्णुः, महादेवः, ब्रह्मा च यथा, भगवद्गीतायां, १० । १२ ।

"परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥
त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानं" ॥

यथा, महाभारते,—सूर्य्यस्य नामाष्टशतमध्ये परिगणितो नामभेदः ।

"ध्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः" ॥)

आदिमं, त्रि, (आदौ भवं अव्ययादिपक्षात् डिमच् । यद्वा मध्यान्म इत्यत्रादेरिति वचनात् मः ।) आद्यं । प्रथमभववस्तु । इत्यमरटीका व्याकरणञ्च ॥ (यथाह भाषापरिच्छेदे,—

"एते पञ्चान्यधासिद्धा दण्डत्वादिकमादिमम्" ।
"आदिमः श्लेष्मश्लेषादिसंयोगः परिकीर्त्तितः" ॥)

आदिराजः, पुं, (आदिः प्रथमः राजा इति राजाहःसखिभ्यष्टच् ।) पृथुराजः । इति हेमचन्द्रः ॥ (मरीचितामाद्यो वैवस्वतो मनुः । अविक्षित्पुत्रः खनामख्यातः पौरवो राजा । यथा, रामायणे ।

"आदिराजो मनुरिव प्रजानां परिरक्षिता" ॥

महाभारते ।

"अविक्षितः परिक्षित्तु श्रवलाश्वश्च वीर्य्यवान् ।
आदिराजो विराजश्च शाल्मलिश्च महाबलः" ॥

आदिवराहः, पुं, (आदिः कारणं स च वराहश्चेति कर्म्मधारयः।) विष्णुः। इति त्रिकाण्डशेषः॥ आदिशूकरः। आद्यकोलः।

आदिशं, क्ली, (आद्+दिश्+क्तः।) उच्छिष्टं। इति मेदिनी॥

आदिष्टः, त्रि, (आद्+दिश्+क्त।) आदेशितः। आज्ञप्तः इति मेदिनी। (नियोजितः, उपदिष्टः, अनुशासितः, अभिहितः।)

आदीनवः, पुं, (दीङ्क्षये भावे क्तः। खादय ओदितः, ओदितश्चेति नत्वं। आदीनस्य वा नम्। घञर्थे क इति वाऽजनकात् वातेः कः।) क्लेशः। इत्यमरः॥ दोषः। दुरन्तः। इति मेदिनी॥ (यथा, शिशुपालवधे २। २२।

"यद्वासुदेवेनादीनमनादीनवमीरितं"।)

आदीपनं, क्ली, (आदीप्यते आङ्+दीप्+भावे ल्युट्।) आलिम्पना। इति त्रिकाण्डशेषः॥ आलिपना इति भाषा।

आदृतः, त्रि, (आङ्+दृञ्+आदियते यः कर्म्मणि क्तः।) कृतादरः। सादरः। अर्चितः। पूजितः। इत्यमरः॥ (सावधानः, अवहितः, अप्रमत्तः। यथा, मद्यतन्त्रे,

"आत्मानमावृतो रक्षेत्प्रमादाद्धि विनश्यति"।)

आदृत्यः, त्रि, (आङ्+दृ+क्यप्।) आदरणीयः। आदरयोग्यः॥

आदेशः, पुं, (आङ्+दिश्+भावे घञ्।) आज्ञा। इति हेमचन्द्रः॥ ज्योतिःशास्त्रफलं। इति सिद्धान्तशिरोमणिः॥ वर्णस्य वर्णान्तरोत्पत्तिः। प्रकृतिप्रत्ययोपघातिकार्य्यं। इति व्याकरणं। (अनुमतिः, शासनं, उपदेशः, शास्त्राचार्य्योपदेशगम्यो वार्त्तासञ्चारः, कार्य्यभेदः, यथा मुग्धबोधे

"स्थानिवदादेशः"। यथा, मनुः, ८। २५८।

"मङ्गलादेशयुक्तानि मद्यान्यौषधिकैः सह"।)

आदेशी, [न्] पुं, (आङ्+दिश्+णिनि।) दैवज्ञः। गणकः। इति हेमचन्द्रः॥ (त्रि, आदेशकर्त्ता, उपदेष्टा, यथा, रघुवंशे, ४। ६८।

"कपोलपाटलादेशि बभूव रघुचेष्टितं"॥)

आदेष्टा, [ऋ] पुं, (आदिशति ऋत्विजादीन् यागादिक्रियेष्वसम्पादनाय प्रेरयति। आङ्+दिश अतिसर्ज्जने+तृच्।) यागविषये मन्त्रेष्वसम्पादनाय यथार्थं कर्म्म कुर्व्वति ऋत्विजामादेशकः। तत्पर्य्यायः व्रती २ यष्टा ३ यजमानः ४। इत्यमरः॥ अन्वादेष्टा ५ याजकः ६। इति हेमचन्द्रः॥ आदेशकर्त्ता।

आद्यं, क्ली, (अद्यते यत् अद् कर्म्मणि ण्यत्।) धान्यं। इति राजनिर्घण्टः॥ अदनीयद्रव्ये त्रि॥ (यथा— मनुः, ५। २४।

"तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यद्भवेत्।

चिरस्थितमपित्वाद्यं"—इत्यादि।)

आद्यः, त्रि, (आदौ भवः दिगादिभ्यो यत् यद्वा अद्यते यः अद् कर्म्मणि ण्यत्।) प्रथमः। इत्यमरः॥ (यथा महाभारते,—

"तोषितोऽहं त्वयश्रेष्ठ त्वयेहाद्येन कर्म्मणा"।

रघुवंशे, १। ११।

"आसीत् महीक्षितामाद्यः प्रणवश्छन्दसामिव"।)

मुख्यः। यथा मनुः ५। २६।

"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः"।

आद्यकविः, पुं, (आद्यश्च कविश्चेति कर्म्मधारयः।) वाल्मीकिमुनिः। इति भूरिप्रयोगः॥ (पुराणकविः ब्रह्मा)।

आद्यमाषकः, पुं, (आद्य+मष्+इवार्थे कन्+कः।) माषकपरिमाणं। पञ्चरत्तिकाः। इत्यमरः॥ यथाह भास्कराचार्य्यः,—

"दशार्द्धगुञ्जं प्रवदन्ति माषं"।)

आद्यबीजं, क्ली, (आद्यं मुख्यं बीजं कारणं।) आदिकारणं। इति जटाधरः॥

आद्या, स्त्री, (आदौ भवा दिगादित्वात् यत् टाप्।) दुर्गा। इति शब्दरत्नावली। काली। तारा। त्रिपुरसुन्दरी। भुवनेश्वरी। इति तन्त्रसारगीतातन्त्रयोगिनीतन्त्राणि। प्रधाना शक्तिः। महाविद्या। यथा, मुण्डमालातन्त्रे १० पटलः॥

"सत्ये तु सुन्दरी आद्या त्रेतायां भुवनेश्वरी।

द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता॥

नामभेदं प्रवक्ष्यामि रूपभेदं वरानने।

न भेदः कालिकायाश्च तारायाः जगदम्बिके॥

षोड़श्या भुवनायाश्च भैरव्याश्चिपुरेश्वरि।

छिन्नायाश्चैव धूमायाः भीमायाः परमेश्वरि॥

ततश्च वगलामुख्या मातङ्ग्याश्च सुरेश्वरि।

न च भेदो महेशानि विद्याया वरवर्णिनि"॥

आदिभूते त्रि॥

आद्यूनः, त्रि, (आङ् पूर्ब्बात् दीयतेरकर्म्मकत्वात् क्तः। दिवोविजिगीषायामिति निष्ठातस्य नत्वं यस्य विभाषेति नेट्, च्छ्वोरित्यूट्।) औदरिकः। इत्यमरः॥ पेटुक इति भाषा। (यदुक्तं, अमरे।

"आद्यूनः स्यादौदरिके विजिगीषाविवर्ज्जिते"।

"आद्यूनः सदृशद्विष्येव प्रायोयच्छावलम्बितः"॥

इति किराते ११। ५।) आदिहीनः॥

आद्योपान्तं, क्ली, (आद्यश्च उपान्तश्च द्वन्द्वः।) पूर्ब्बापरं। इक्कनागादि इति भाषा॥

आधमनं, क्ली, (आधीयते आङ्+धा+कर्मणि ल्युट्।) बन्धकं। इति स्मृतिः। (आधिः। यथा मनुः,—

"योगाधमनविक्रीतं योगदानप्रतिग्रहं।

यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्"॥

आधानं, क्ली, (आधीयते आङ्+धा+भावे ल्युट् यद्वा आधीयते स्थाप्यते यत् कर्म्मणि ल्युट्।) गर्भाधानं। अग्न्याधानं। स्थापितद्रव्यं। इति स्मृतिः॥ (ग्रहणं, धारणं। अधिगमः, करणं। सम्पादनं। श्रौताग्नेः स्मार्त्ताग्नेर्वा ग्रहणं, ब्राह्मणानां प्रतिदिनकर्त्तव्या विहितवह्निस्थापनपूर्ब्बकहोमादिक्रिया, यजनं, होमः। यथा रघुवंशे, १। २४।

"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः"॥

यथा मनुः, ५। १६८।

"भार्य्यायै पूर्ब्बमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि।

पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च"॥

यथा महाभारते,—

"सर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा"।

यथा मेघदूते, पूर्ब्बमेघे। ३।

"तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः"॥)

आधानिकं, क्ली, (आधानं गर्भाधानं प्रयोजनमस्य। प्रयोजनमिति ठक्।) गर्भाधानसंस्कारः। इति त्रिकाण्डशेषः॥

आधारः, पुं, (आधियन्ते अस्मिन् इति आधारः अध्यायन्यायेति सूत्रे अवहाराधारेत्युपसंख्यानादधिकरणे घञ्। आकरणशास्त्रे अधिकरणकारकं, तल्लक्षणं यथा सिद्धान्तकौमुद्यां, आधारोऽधिकरणं कर्त्रभिप्रायक्रियायां आधारः कारकमधिकरणसंज्ञः स्यात्। तच्च सामीप्यात्श्लेषविषयव्याप्तिभेदात्त्रिविधं। तथा सिद्धान्तकौमुद्यां, औपश्लेषिकोवैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा यथा—कटे आस्ते। स्थाल्यां पचति। मोक्षे सर्व्वस्मिन्नात्मास्ति।) अधिकरणं। आलवालं। अम्बुधारणं। इति मेदिनी॥ क्षेत्रादिसेकार्थं सेतुना बद्धानां जलं निरुध्य यत्र स्थाप्यते स आधारः बद्धकन्दरादिः। बाँध इति ख्यातः। इत्यमरटीकायां भरतः॥ भूस्याद्यर्थं जलबन्धनमाधारः। इति वैकुण्ठः॥ क्षेत्रादिसेकार्थं जलाधारस्थानमाधार इति मधुः॥ (यथा रघुवंशे ५।६।

"आधारबन्धप्रमुखैः प्रयत्नैः

संवर्द्धितानां सुतनिर्व्विशेषं।

क्वचिन्न व्याप्तादिरुपप्लवो वः

श्रमच्छिदामाश्रमपादपानाम्"॥

याज्ञवल्क्यः।

"तथात्मकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्"॥)

आधार्म्मिकः, त्रि, (अधर्म्म+ठञ्।) अधार्म्मिकः। इति त्रिकाण्डशेषः॥ (यथा मनुः।

"आधार्म्मिके वसेद्ग्रामे"॥)

आधिः, पुं, (आङ्+धा+किः।) मनःपीड़ा। प्रत्याशा। बन्धकं। व्यसनं। अधिष्ठानं। इति मेदिनी॥

(यथा, हितोपदेशे।

"आधिव्याधिपरीताय अद्य श्वो वा विनाशिने।

कोऽहि नाम शरीराय धर्म्मापेतं समाचरेत्"॥

तथा च वैराग्यशतके।

"आधिव्याधिशतैर्जनस्य

विविधैरारोग्यमुन्मूल्यते"॥)

आधिक्यं, क्ली, (अधिक+ष्यञ्।) अधिकस्य भावः। अधिकत्वं। अतिशयता। यथा।

"युग्मायामपि रात्रौ चेत् श्रोणितं प्रचुरं तथा।

कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्"॥

इति ज्योतिस्तत्त्वम्॥ (श्रेष्ठता। उत्कर्षः। प्राबल्यम्। यथा साहित्यदर्पणे। १० पः।

"आधिक्यमुपमेयस्योपमानात् न्यूनताथवा"।

यथा, मनुः ७। १६६।

"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः"॥

आधिक्यं नाम यदायुर्व्वेदे भाष्यमाणे वार्द्धुष्यत्यमौद्गलम् अन्यदा प्रतिसम्बन्धार्थमुच्यते यदा

पुनः प्रतिसम्बद्धमपि द्विरभिधीयते तत् पुनरुक्तदोषाधिकं तच्च पुनरुक्तं द्विविधं, अर्थपुनरुक्तं शब्दपुनरुक्तञ्च। तत्रार्थपुनरुक्तं नाम यथा,—"भेषजमौषधं साधनम्" इति, शब्दपुनरुक्तं "पुनर्भेषजं भेषजम्" इति चरकः॥)

आधिग्नः, त्रि, (आधि+घ्ना+क।) वधकः। व्यथितः। इत्यजयपालः॥

आधिदैविकं, त्रि, (अधि+देव+ठञ्। अनुश्रुतिकादीनां च इत्युभयपदवृद्धिः।) दुःखविशेषः। तद्यथा,। "आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनं"। इति साङ्ख्यतत्त्वकौमुदी॥ (देवतामधिकृत्य,प्रवृत्तं,दाहशीतादिजनितं दुःखं। अतिवातादिदृष्ट्यादिहेतुकं दुःखं। देवतामधिकृत्य प्रवृत्तं ग्राह्यम्। यथा मनुः ६। ८२।

"अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत्"॥

"तत्तु सन्निविधे व्याधावुपनिपतति" इति सुश्रुतः।)

आधिपत्यं, क्ली, (अधिपति+ष्यञ्।) अधिपतेर्भावः। स्वामित्वं। प्रभुत्वं। ऐश्वर्यं। यथा,

"नहि प्रपश्यामि ममापनुद्यात्
यच्छोकमुच्छोषणमिन्द्रियाणां।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यं"॥

इति श्रीभगवद्गीतायां २ अध्यायः ८॥

(यथा मनुः १२।१००।

"सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति"।)

आधिभोगः, पुं, (आधेर्बन्धकस्य भोगः।) बन्धकद्रव्यस्य भोगः॥

आधिभौतिकं, त्रि, (अधिभूत+ठञ्। अनुश्रुतिकादीनां चेत्युभयपदवृद्धिः।) दुःखविशेषः। यथा। "बाह्योपायसाध्यं दुःखं द्वेधा। आधिभौतिकं आधिदैविकञ्च। तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तं"। इति साङ्ख्यतत्त्वकौमुदी॥ ("तत्तु सन्निविधे व्याधावुपनिपतति"। इति सुश्रुतः॥)

आधिमन्थवः, पुं, (आधि+मन्थ+अण्।) ज्वराग्निः। इति हारावली॥

आधिवेदनिकं, त्रि, (अधि+विद्+ल्युट्। ततः अधिवेदन+ठञ्।) द्वितीयविवाहार्थं प्रथमस्त्रियै दत्तधनादि। यथा,—

"अधिविन्नस्त्रियै देयमाधिवेदनिकं समं।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं"॥

इति याज्ञवल्क्यः॥

आधुतः, त्रि, (आङ्+धु+क्तः।) आधूतः। कम्पितः। इत्यमरटीकायां रायमुकुटः॥

आधुनिकः, त्रि, (अधुना+ठञ्।) अधुनाजातः। नव्यः॥

आधूतः, त्रि, (आङ+धू+क्त।) कम्पितः। इत्यमरः॥ (विक्षिप्तः, अभिभूतः, व्याकुलितः। आन्दोलितः, चालितः। यथा, रघुवंशे, १। ३८।

"पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः"।)

आधेयं, त्रि, (आङ्+धा+यत्।) आधारस्थितवस्तु। यथा। शब्दबोधे चैकपदार्थे अपरपदार्थसंसर्गः संसर्गमर्य्यादया भासते। स च क्वचिद्धेदः क्वचिदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः। इति गदाधरभट्टाचार्य्यकृतप्रथमशब्दव्युत्पत्तिवादः॥ उत्पाद्यः। यथा,—

"सत्त्वे निविशतेऽपैति पृथगुक्तातिषु दृश्यते।
आधेयत्वाभियाजञ्च सोऽसत्त्वप्रकृतिर्गुणः"॥

इति वोपदेवकृतमुग्धबोधीयकारिका॥ आधेय उत्पाद्यः। यथा पक्वान्नमयपात्रेषु रक्तताद्यः स वह्निसंयोगादिना निष्पाद्यते। इति तट्टीकायां दुर्गादासः॥

आधोरणः, पुं, (आधोरयति धोरृ गतिचातुर्य्ये कर्त्तरि ल्यु।) हस्तिपकः। माउत इति भाषा। ("आधोरणा हस्तिपका हस्त्यारोहा निषादिनः"। अमरः। यथा,—रघुवंशे ७। ४६।

"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः"॥)

आध्मातः, पुं, (आङ्+ध्मा+क्तः।) ग्रन्थितः। दग्धः। वातरोगविशेषः। संयतः। इति मेदिनी॥ (स्फीतः दर्पादिना उद्धतः, विवर्द्धितः। यदुक्तं। "ततो मानाध्मातः स पतति यदा श्रोत्रगहने"। हितोपदेशे। "ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं निक्षिप्य पक्षत्वं गतः"। उत्तरचरिते। "व्याधिर्बोधमन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्"।)

आध्मानं, क्ली, (आङ्+ध्मा+ल्युट्।) वातव्याधिविशेषः। तस्य रूपं।

"साटोपमत्युग्रजमाध्मातमुदरं भृशं।
आध्मानमिति जानीयाद्घोरं वातनिरोधनं"॥

इति निदानं॥ पेटफाँपा इति भाषा।

तस्य चिकित्सा यथा,—

"आध्माने लङ्घनं पूर्व्वं दीपनं पाचनं ततः।
फलवर्त्तिक्रियां कुर्य्यात् वस्तिकर्म्म च शोधनं॥
कर्षमात्रा भवेत् क्षारा चिरता स्यात् पलोन्मिता।
खण्डादपि पलं ग्राह्यं चूर्णमेकत्र कारयेत्॥
मधुनाक्तमितं लिह्यात् चूर्णमाध्मानशान्तये"॥

नाराचचूर्णं। १॥

"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः।
लिम्पेत् कोष्णैरलर्षिष्टैः शूलाध्मानयुतोदरं॥
हैमवती वचा। दारुषट्कलेपः॥ २॥

"अभयारम्बधो धात्री दन्ती तिक्ता खुही चित्रत्।
मुक्ता प्रत्येकमेतानि ग्राह्याणि पलमात्रया॥
तानि संचुद्य सर्व्वाणि जलाढ़कयुगे पचेत्।
तत्र तोयेऽष्टमं भागं कषायमवशेषयेत्॥
निस्वगजैपालबीजानि नवानि पलमात्रया।
तनुवस्त्रपूतान्येव तस्मिन् क्वाथे प्रक्षिप्य पचेत्॥
ज्वालयेदग्निमन्दं यावत् क्वाथो घनो भवेत्।
ततः खल्वे क्षिपेत् भागानष्टौ जैपालबीजतः॥
भागांस्त्रीन् नागराद्धौ च मरिचात् द्वौ च पारदात्।
गन्धकात् द्वौ च तानीह यावद्यामं विमर्दयेत्॥
रसो नाराचनामायं भक्षितो रक्तिकामितः।
जलेन शीतलेनैव रोगानेतान् विनाशयेत्॥
आध्मानं शूलमानाहं प्रत्याध्मानं तथैव च।
उदावर्त्तं तथागुल्ममुदराणि हरत्यसौ॥
वेगे शान्ते च भुञ्जीत शर्करासहितं दधि।
ततस्तत्स्निग्धवेगापि ततो दध्योदनं मनाक्"॥
महानाराचो रसः॥ ३॥ इति भावप्रकाशः॥
(वायुना सवेदनमुदरपरिपूर्णत्वमाध्मानत्वं। इति रुग्विनिश्चयग्रन्थव्याख्यानहृद्विजयरक्षितः॥)

आध्मानी, स्त्री, (आङ्+ध्मा+ल्युट्+ङीप्।) गन्धिकागामगन्धद्रव्यं। इति राजनिर्घण्टः॥

आध्या, स्त्री, (आङ्+धी+अङ्+टाप्।) चिन्ता। स्मृतिः। इति शब्दरत्नावली॥

आध्यात्मिकं, त्रि, (आत्मानमधिकृत्य भवं अधि+आत्मन्+ठञ्।) दुःखविशेषः। यथा। दुःखानां त्रयं दुःखत्रयं तत् खल्वाध्यात्मिकं आधिभौतिकं चाधिदैविकञ्च। तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां निमित्तं। मानसं कामक्रोधलोभमोहेर्षाविषादविशेषादर्शननिबन्धनं। सर्व्वं चैतदान्तरोपायसाध्यत्वात् आध्यात्मिकं दुःखं। इति साङ्ख्यतत्त्वकौमुदी॥ (आत्मतत्त्वविषयकं। यथा, मनुः २।११७।

"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्"॥

आध्यानं, क्ली, (आङ्+धै+ल्युट्।) ध्यानं। चिन्ता। इत्यमरः॥

आध्यापकः, पुं, (आ सम्यक् अध्यापयति यः इति अध्यापकः। स एव स्वार्थे अण्।) अध्यापकः। इति शब्दरत्नावली॥

आनः, पुं, (अन्+घञ्) उच्छ्वासः। बहिर्मुखश्वासः। इति हेमचन्द्रः॥ (अन्तःस्थितस्य प्राणवायोर्नासिकयोच्छ्वासः।)

आनकः, पुं, (आङ्+अन्+ण्वुल्) पटहः। भेरी। मृदङ्गः। शब्दयुक्तमेघः। इति मेदिनी॥ (यथा, भगवद्गीतायां १।१३।

"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः"।)

आनकदुन्दुभिः, पुं, (आनकाः दुन्दभयो देवदुन्दुभिविशेषाः यस्य जन्मनि। वसुदेवजन्मनि देवा दुन्दुभिध्वनिमकुर्वन्।) वसुदेवः। इत्यमरः॥ (कृष्णपिता। यथा—हरिवंशे॥

"वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः।
जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन् दिवि॥
आनकानां च संह्रादः सुमहानभवद्दिवि"॥)

आनकदुन्दुभिः, पुं स्त्री, (आनकः प्रोत्साहको दुन्दुभिः।) दर्दुरकः। इत्यमरटीकायां भरतः॥

आनतः, त्रि, (आङ्+नम्+क्तः।) नतः। तत्पर्य्यायः। अवायः २ अवगतः ३। इत्यमरः॥ (अधोमुखः, विनतः, प्रणतः, विनयवान्। यथा, हरिवंशे॥

"शिष्टभाषोहि पादान् वै नमश्चक्रतुरागतौ"।

महाभारते।

"स कदाचित् भृशं विद्धो बाणेनागतपर्व्वणा"।

मनुः।

"रम्यमागतसामन्तं स्वाजीव्यं देशमावसेत्"।)

आनतिकरः, त्रि, (आनति+ङ+अच्।) प्रणतो-

विकः। यथा। प्रायश्चित्तोपदेशाय वस्त्रादिना ब्राह्मयस्तोषणीयः। यथा मिताक्षरायां पराशरः।
"पापं प्रख्यापयेत् पापो धेनुं दत्त्वा तथा वृषं"।
एतच्चोपलक्षणं।
"प्रख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतं चरेत्।"
इति स्मृतेः।
देवलवचने "तोषयित्वा द्विजोत्तमान् इति"।
अत्र तोषयित्वा इति श्रवणात् आगतिकरणेन तदृग्यज्ञदानादेरपि। इति प्रायश्चित्ततत्त्वं॥

आनद्धं, क्ली, (आनह्यते चर्म्मणा बध्यते इति। आङ्+नह्+क्तः।) चर्म्मबद्धमुखवाद्यमात्रं। तच्च मुरजादि। इत्यमरः॥ कल्पमात्रं। तच्च वेणुभूषादि। इत्यजयपालः॥

आनद्धः, त्रि, (आङ्+नह्+कर्म्मणि+क्तः।) सन्नितः। बद्धः। इति मेदिनी॥ (यथा सुश्रुते।
"ऊष्मस्वारैः सविता हिमानद्धा जलाशयाः"।)

आननं, क्ली, (आनिति अनेन। आङ्+अन्+ल्युट्) मुखं। इत्यमरः॥ ("तदाननं मत्सुरभि स्थितीश्वरः" इति रघुः। ३। ३।)

आनन्दः, पुं, (आङ्+नन्द+घञ्) आह्लादः। तत्पर्य्यायः। आनन्दथुः २ हर्षः ३ प्रीतिः ४ सुखं ५ मुत् ६ प्रीतिः ७ प्रमोदः ८ हर्षः ९ प्रमदः १० आमोदः ११ संमदः १२। इत्यमरः॥
(यथा, उत्तरचरिते।
"यत्रानन्दास्त्र मोदाश्च यत्र स्निग्धाश्च सम्मदाः"।
मनुः।
"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"।)
वासुदेवस्य बलविशेषः। इति हेमचन्द्रः॥

आनन्दः, त्रि, (आनन्द+अर्श आदित्वात् अच्।) आनन्दविशिष्टः। हर्षयुक्तः। सुखी। इत्यमरटीका॥ ("गुणे शुक्लादयः एते गुणिलिङ्गास्तु तद्वति"। इत्यमरोक्तेः अत्र गुणिलिङ्गः।)

आनन्दथुः, पुं, (आङ्+नन्द+अथुच्।) आनन्दः। हर्षः। इत्यमरः॥ तद्युक्ते त्रि॥

आनन्दनं, क्ली, (आङ्+नदि+ल्युट्) गमनागमनसमये सुहृदादेरालिङ्गनारोग्यस्वागतादिप्रश्नादिद्वारा आनन्दोत्पादनं। तत्पर्य्यायः। सभाजनः २ सभाजनः ३ सुभाजनः ४ आप्रश्नः ५ आमन्त्रणं ६॥ इत्यमरः तट्टीका च॥ (आनन्दजननं, हर्षोत्पादनं। प्रमोदकरः, सुखजनकः। यदुक्तं।
"मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः"।
इति हितोपदेशे।)

आनन्दपटं, क्ली, (आनन्दाय पटम्।) नवोढ़ावस्त्रं। इति हारावली॥

आनन्दप्रभवं, क्ली, (आनन्दः प्रभवोयस्य तत्।) रेतः। वीर्य्यं। इति हेमचन्द्रः॥
("वाय्वाकाशादिभिर्भावैः सौम्येभ्यं जायतेऽस्त्रियम्। तेन स्रवन्ति तच्छुक्रं नवात् कुम्भादिवोदकं॥ स्रोतोभिः स्यन्दते देहात् समन्तात् शुक्रवाहिभिः। हर्षणोदीरितं रागात् सङ्कल्पाच्च मनोभवात्॥ वस्तौ संभृत्य निर्याति स्यन्दाग्निस्रादिवोदकं।"
इति चरकः॥

"क्षयदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा।
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् संप्रवर्त्तते॥"
इति सुश्रुतः॥)

आनन्दमयकोषः, पुं, (आनन्दमयस्य परमात्मनः कोष इवावरकः।) सत्त्वप्रधानाज्ञानं। तत्पर्य्यायः। कारणशरीरं २ सुषुप्तिः ३। इति वेदान्तः॥

आनन्दा, स्त्री, (आनन्दयति या। आङ्+नन्द+णिच्+अच्+टाप्) विजया। आरामशीजता। इति राजनिर्घण्टः॥ [इति शब्दमाला॥

आनन्दिः, पुं, (आङ्+नन्द+किः।) आनन्दः। हर्षः।

आनन्दितः, त्रि, (आङ्+नन्द+क्त। यदा आनन्दः संज्ञातोऽस्य। आनन्द+इतच्।) आनन्दयुक्तः। हृष्टः। आह्लादितः॥ (यथा महाभारते।
"पुनरानन्दिताः सर्व्वे मधुरायां वसामहे॥")

आनन्दी, [न्] त्रि, (आनन्द+इनि।) आनन्दविशिष्टः॥

आनन्दी, स्त्री, हर्षविशेषः। आकन्दपाता इति ख्याता। इति शब्दचन्द्रिका॥

आनयः, पुं, (आनीयते वेदाध्ययनायात्र। आङ्+नीङ+अच्) उपनयनं। इति हेमचन्द्रः॥

आनयनं, क्ली, (आङ्+नी+ल्युट्।) स्थानान्तरनयनं। आना इति भाषा॥ (यथा रामायणे।
"आदिश्यत्युषभांस्तत्र राजामानयने बहून्"॥)

आनर्त्तः, पुं, (आङ्+नृत्+घञ्।) देशविशेषः। द्वारका इति ख्याता। तत्पर्य्यायं। युङ्कं। इत्यमरः॥ जलं। इति मेदिनी॥ आनर्त्तदेशवासी लोकः। इत्यमरटीका॥ (यथा हरिवंशे। "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः"॥
स्वनामख्यातो राजा।
"शर्य्यातेर्मिथुनं त्वासीदानर्त्तो नाम विश्रुतः।
"आनर्त्तस्य तु दायादो रेवो नाम महाद्युतिः"॥
"आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली"।
"आनर्त्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभवत्"॥)

आनायः, पुं, (आङ्+नीञ्+घञ्।) जालं। इत्यमरः॥

आनाय्यः, पुं, (आनाय्यते गार्हपत्यादानीय संस्क्रियते ऽसौ आङ्+नी+ण्यत्।) दक्षिणाग्निः। इत्यमरः॥ गार्हपत्यादग्नेरानीय यो दक्षिणाग्निरारोप्यते। तत्र। इति भरतः॥ होम करिवार निमित्ते घर हइते आनिया दक्षिणदिके राखा आगुन् इति भाषा॥

आनाहः, पुं, (आङ्+नह्+घञ्।) मूत्रपुरीषरोधकरोगः। तत्पर्य्यायः। विबन्धः २। इत्यमरः॥ विष्टम्भः ३ मलरोधनः ४। इति राजनिर्घण्टः॥
("आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम्"। इति महाभारते।) तस्य सम्प्राप्तिरूपे। यथा,
"आमं शङ्खवदा निचितं क्रमेण
भूयो विवर्द्धं विगुणानिलेन।
प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति"॥ इति निदानं॥
("यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति।
नाधो व्रजति नाप्यूर्द्धमानाहस्तस्य जायते"॥
इति चरकः॥

अस्य चिकित्सामाह। भावप्रकाशे यथा,—
"तुल्यकारणकार्य्यत्वादुदावर्त्तहरीं क्रियां।
आनाहेषु च कुर्व्वीत विशेषश्चाभिधीयते॥*॥
चित्रकत्रिफलाहरीतक्यो द्विचतुःपञ्चभागिकाः।
गुडेन तुल्या गुटिका हरत्यानाहमुल्बणं॥*॥
वर्त्तिस्त्रिकटुसैन्धव
सर्षपसंदहधूमकुलकमदनफलैः।
मधुनि गुडे वा पक्वै-
र्विहिता साकुलसम्मिता विज्ञैः॥
वर्त्तिरियं दृष्टफला
गुदे घृताभ्यक्ता।
आनाहमुदरजार्त्तिं
शमयति जठरं तथा गुल्मम्"॥*॥
इति त्रिकटुकाद्यावर्त्तिः॥*॥
चक्रपाणिसङ्ग्रहे तु चिकित्सा यथा,—
"उदावर्त्तक्रियायोगे साम्ये लङ्घनपाचनम्"॥
"द्विरत्तरा हिङ्गुवचा सकुष्ठा
सुवर्चिका चेति विडङ्गचूर्णं।
सुखाम्बुनानाहविरूचिकार्त्ति-
हृद्रोगगुल्मोर्द्धसमीरजघ्नम्॥*॥
वचाभयाचित्रकयावशूकान्
सपिप्पलीकातिविषान् सकुष्ठान्।
उष्णाम्बुनानाहविमूढ़वातान्
पीत्वा जयेदाशु हितौदनाशी॥*॥
त्रिवृद्धरीतकीश्यामाः क्षुद्दोहीरेण भावयेत्।
वटिका मूत्रपीतास्ता ज्येष्ठा आनाहभेदिकाः॥*॥
राठ-धूम-विड़द्योष-गुड़-मूत्रैर्विपाचिता।
गुदेऽङ्गुलसमावर्त्तिर्निधेयानाहशूलनुत्॥*॥
मूलकं शुष्कमाहृत्य वर्षाभूमूलपञ्चकम्।
आरेवतफलञ्चापि पक्वं तेन पचेद्घृतम्।
तत् पीतमात्रं शमयेदुदावर्त्तमसंशयम्"॥*॥
शुष्कमूलकाद्यं घृतम्॥*॥) दैर्घ्यं। इति रमानाथः॥

आनिलिः, पुं, (अनिलस्य वायोरपत्यं अनिल+इञ्।) हनूमान्। इति त्रिकाण्डशेषः॥ (भीमः॥)

आनिली, स्त्री, (अनिल+अण्+ङीप्।) स्वातिनक्षत्रं। इति हेमचन्द्रः॥

आनीलः, पुं, नीलघोटकः। इति हेमचन्द्रः॥ (असितः। ईषन्नीलः। यथा किरातार्জ্জुनीये,
"आनीलाभैर्विरचितपरभागा रत्नैः"।)

आनुकूल्यं, क्ली, (अनुकूल+ष्यञ्।) अनुकूलता॥ (साम्मुख्यं। प्रसादः। सहायता। यथा याज्ञवल्क्यः।
"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते"।
यथा,—रामायणे।
"रमतस्वानुकूल्येन ययुः संवत्सरा दश"।)

आनुगत्यं, क्ली, (अनुगतस्य भावः कर्म्म वा। अनुगत+ष्यञ्।) अनुगतत्वं। अनुगतस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥

आनुपूर्व्वी, स्त्री, क्ली, (अनुपूर्व्व+अण्।) परिपाटी। अनुक्रमः। इत्यमरः॥ (यथा मनुः। ३। २२।
"षड़ानुपूर्व्व्या विप्रस्य क्षत्रस्य चतुरो वरान्"॥
यथा रामायणे।
"आनुपूर्व्व्या स धर्म्मज्ञः पप्रच्छ कुशलं कुले"।)

आनुमानिकः, त्रि, (अनुमानाय हितः। अनुमान + ठक्। युक्तिसिद्धः। सांख्यमते प्रधानं प्रकृतिः।) अनुमानसम्बन्धीयः। अनुमानविषयीभूतः॥

आनुरक्तिः, स्त्री, (आ + अनु + रञ्ज + क्ति।) अनुरागः। (आसक्तिः। अनुरक्तिः॥)

आनुविधित्सा, स्त्री, (आ + अनु + वि + धा + सन् + अङ् + टाप्।) उपकृतेरप्रत्युपकारेच्छा। इति पुराणम्॥

आनूपः, पुं, (अनूप + अण्।) अनूपदेशस्थजन्तुमात्रं। तच्च खड्गिमहिषवराहादि। एषां मांसगुणाः। गुरुत्वं। उष्णत्वं। मधुरत्वं। स्निग्धत्वं। शुक्रकारित्वं। वायुनाशित्वञ्च। इति राजवल्लभः॥ अनूपदेशजलगुणाः। घनत्वं। गुरुत्वं। पिच्छिलत्वं। मधुरत्वं। श्लेष्मजनकत्वं। स्निग्धत्वं। अग्निनाशित्वं। प्रमेहश्लीपदच्छर्दिगलगण्डादिरोगकारित्वञ्च। इति राजनिर्घण्टः॥ अनूपदेशस्थजन्तोर्लक्षणं तन्मांसस्य गुणाश्च।

"कुलेचराः श्ववाराहाः कोशस्थाः पादिनस्तथा।
मत्स्या एते समाख्याताः षड्विधानूपजातयः॥
आनूपा मधुराः स्निग्धा गुरवो वह्निमर्दनाः।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशं॥
तथाभिष्यन्दिनस्ते हि प्रायेऽपथ्यतमाः स्मृताः"॥
इति भावप्रकाशः॥

("क्रमरक्रमरः खड्गो महिषो गवयो गजः।
न्यङ्कुर्वराहश्चानूपा मृगाः सर्व्वे वरास्तथा"।
"गुरुत्वो मधुरो गतिधान्वानूपनिषेवणात्"।
इति चरकः। तथाच हारीतः॥
"आनूपास्तेषु विज्ञेयाः श्लेष्मला वातकोपनाः"।
आनूपवर्गस्तु षड्विधः। यथा। "कूलचराः श्ववाराः कोशस्थाः पादिनो मत्स्याश्चेति" इति सुश्रुतः॥ वज्रजलयुक्ते, त्रि।)

आनृशंस्यं, क्ली, (अनृशंसस्य भावः। अनृशंस + ष्यञ्।) अनिष्ठुरता॥ (अक्रौर्य्यं। अहिंसत्वं। कारुण्यं। यथा मनुः २। १०१, ३। ५७, ३। ११२।
"आनृशंस्यात् ब्राह्मणस्य भुञ्जते ह्येतरे जनाः"।
"अर्हयं तत्कुमारीणामानृशंस्यं च केवलम्"॥
"भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजनम्"॥)

आन्तरीक्षं, क्ली, (अन्तरीक्ष + अण्।) अन्तरीक्षं। गगनं। इति हिरूपकोषः॥ (यथा महाभारते।
"उत्पातांश्चिविधान् प्रादुर्नारदो भगवानृषिः।
दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पितामहे"॥)
अन्तरीक्षभवस्तुनि त्रि॥ (यथा रामायणे।
"रक्षन्ति तेऽन्तरीक्षेभ्यः पार्थिवेभ्यः पुनः पुनः"॥)

आन्तिका, स्त्री, (अन्तिक + अण् + टाप्।) अन्तिका। ज्येष्ठा भगिनी॥ इति हिरूपकोषः॥

आन्तिकः, त्रि, (अन्त + ठक्।) अन्ते भवः। अन्तसम्बन्धीयः॥

आन्दोल तृ क् दोलने। (अदन्तपुरा०-उभ०-अक० सेट्।) इति कविकल्पद्रुमः॥ आन्दुदोलत्। इति दुर्गादासः॥

आन्दोलनं, क्ली, (आन्दोल + ल्युट्।) चलनं। कम्पनं॥ ("किन्त्वासामरविन्दसुन्दरदृशां ब्राक्चामरान्दोलनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षयं वार्य्यताम्"। इति कालिदासः। पुनः पुनरभ्यासः। मुञ्जरालोचनम्।)

आन्दोलितं, त्रि, (आन्दोल + क्त।) कृतान्दोलनं। तत्पर्य्यायः। चलितं २ कम्पितं ३ धूतं ४ वेल्लितं ५। इति हेमचन्द्रः॥

आन्धसिकः, त्रि, (अन्धस् + ठक्।) पाचकः। सूपकारः। इत्यमरः॥

आन्वयिकः, त्रि, (अन्वय + ठक्।) प्रशस्तकुलजः। सत्कुलोद्भवः। तत्पर्य्यायः। कौलः २। इति त्रिकाण्डशेषः। अन्वयसम्बन्धी॥ (कुलीनः। दिव्यभावरतः। कुलाचारी। साधकः। "और्द्धस्रोतसिकः श्रैवः कौल आन्वयिकः स्मृतः"। इति त्रिकाण्डशेषः।)

आन्वीक्षिकी, स्त्री, (अवशादनु ईक्षा पर्य्यालोचना प्रयोजनमस्याः। अनु + ईक्षा + ठञ् + ङीप्।) तर्कविद्या। न्यायविद्या। इत्यमरः॥ दुर्गा। यथा,
"आत्मवेदनशीलत्वादन्वीक्षणपरा यतः।
अन्वीक्षां कुरुते यस्मात्तस्मादान्वीक्षिकी स्मृता"॥
इति देवीपुराणे ४५ अध्यायः॥ (अध्यात्मविद्या, प्रत्यक्षपरोक्षाभ्यामीक्षितस्य अर्थस्यानु पश्चात् ईक्षणं अन्वीक्षा सा प्रयोजनं यस्याः सा आन्वीक्षिकी अनुमानविद्या न्यायदर्शनवैशिषिकादिका। इयं हि त्रयीवार्त्तादिविद्याचतुष्टयान्तर्गता आत्मविज्ञानहेतुका धर्म्मार्थसंसाधिका राजभिरवश्यं रक्षणीया सती विद्येति कथ्यते॥
यथा, कामन्दकीयनीतिसारे।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः"॥
"आन्वीक्षिक्यात्मविज्ञानं धर्म्माधर्म्मौ त्रयीस्थितौ।
अर्थानर्थौ च वार्त्तायां दण्डनीतौ नयानयौ"॥
इति।)

आप्लृ न ऐौ कि आपने। (चुरा० पक्षे भादि०-स्वादि० वा-उभ०-पर०-सक०-सेट्।) इति कविकल्पद्रुमः॥ लृ आपत्। न आप्नोति कीर्त्तिं ब्रह्मार्घ्यं। ऐौ आप्ना। कि आपयति आपति। स्वराज्यं प्राप्नुते भवान्। इति गत्यर्थकत्वात्तानित्यत्वात्। इति दुर्गादासः॥ (याजने।
"खे खेऽन्तरे सर्व्वमिदमुत्पाद्यापुश्चराचरम्"।
इति मनुः। (अभि) अभिलाषे।
"नान्यदत्तमभीप्सामि स्थानमग्र्य! स्वकर्म्मणा।
इच्छामि तदहं स्थानं यत्र प्राप पिता मम"॥
इति विष्णुपुराणम्। (प्रति + अव) प्रतिग्रहणे।
"तां प्रत्यवापुरविलम्बितमुत्तरन्तो
धौताङ्गलग्ननवनीलपयोजपङ्क्तेः"। इति।
शिशुपालवधे। (प्र) उपगमने।
"ते च प्रापुरदन्तान्तं बुबुधे चादिपूरुषः"।
इति रघुवंशे १०। ६। इत्यादि।)

आपः, पुं, (आप् + क्विप्।) अष्टवसुमध्ये वसुविशेषः। इति जटाधरः॥

आपः [स्] स्त्री, (आप् + असुन्।) जलं। पापं। इत्यादिकोषः॥

आपक्कं, त्रि, (आङ् + पच् + क्त।) ईषत्पक्वकषायादि। तत्पर्य्यायः। पौलिः २ अभ्यूषः ३। इत्यमरः॥ रुटी इति केचित्॥ (यथा ऋतुसंहारे।
"आपक्वशालिललितानतगात्रयष्टिः
प्राप्ता शरत्ववधूरिव रम्यरूपा"॥ १॥)

आपगा, स्त्री, (आपां समूहः आपं। तस्य समूहे इत्यण्। तत आपेन जलसमूहेन गच्छति प्रचलतीति। आप् + गम् + ड + टाप्।) नदी। इत्यमरः। (यथा रामायणे।
"आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च"॥
"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः"॥
तथाच माघे २। १००।
"सम्भूयाम्भोधिमभ्येति महानद्या नगापगा"॥)

आपणः, पुं, (आङ् + पण + अच्।) पण्यविक्रयशाला। दोकान इति भाषा। तत्पर्य्यायः। निषद्या २ विपणिः ३ पण्यवीथिका ४। इत्यमरः॥ चतुष्पथे इट्टे इत्यन्ये। आपणादिदयं इट्टे विपणादिदयं इट्टगट्टे इति केचित्। इत्यमरटीकायां भरतः। (यथा रामायणे।
"माल्यापणेषु राजन्ते नाद्य पण्यानि वै तथा"।
तथा महाभारते।
"भक्ष्यमाल्यापणाढ्यानां ददृशुः श्रियमुत्तमां"॥)

आपणिकः, पुं, (आङ् + पण + ठक्। अथवा आपण + ठक्।) वणिक्। इत्युणादिकोषः॥ दोकानि मुदि व्यवसायी इत्यादि भाषा। (पण्यानां क्रयविक्रयादिविषयके, त्रि॥)

आपतिकः, पुं, (आङ् + पत् + इकन्।) श्येनपक्षी। बाज इति भाषा। दैवायत्ते त्रि। इत्युणादिकोषः॥

आपत्, [द्] स्त्री, (आङ् + पद् + क्विप्।) विपत्। विपत्तिः। इत्यमरः॥ यथा।
"आपत्सु मूढो धृतिमान्यः सम्यक् प्रतिपद्यते।
कर्म्माण्यवश्यकार्य्याणि तमाहुः पुरुषं बुधाः"॥
इति वह्निपुराणम्॥ ०॥ किञ्च।
"आपदि किं शरणीयं शरणीयं चरणयुगलमम्बायाः। तच्छरणं किं कुरुते ब्रह्मादीनपि किङ्करान् कुरुते"॥ इत्युद्भटः॥०॥ मनुः ११। २६-३०।
"विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः।
आपत्सु मरणाद्धीतैर्ज्ञिधैः प्रतिनिधिः कृतः"॥
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्भृतेर्व्विद्यते फलम्"॥
इत्येकादशीतत्त्वम्॥
"आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि।
मनस्तापेन शुद्ध्येत्तु हुदयं वा घृतं जपेत्"॥
इति प्रायश्चित्ततत्त्वम्॥०॥
"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि"। इति।
"जागीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये"॥
इति च चाणक्यम्॥ २६॥ २१॥

आपत्तिः, स्त्री, (आङ् + पद् + क्तिन्।) दोषः। इति हेमचन्द्रः॥ प्रापणं। आपत्। इति मेदिनी॥

आपत्प्राप्तः, त्रि, (आपदं प्राप्तः। ६या तत्पुरुषः।)

विपद्ग्रस्तः। तत्पर्य्यायः। आपन्नः २। इत्यमरः॥
आपद्, स्त्री, (आङ्+पद्+क्विप्।) विपत्तिः। इत्यमरः॥ (यथा हितोपदेशे।
"आपदामापतन्तीनां हितोऽप्यायाति हेतुतां"।)
आपदा, स्त्री, (आ+पद्+अङ्+टाप्।) विपत्तिः। इति रायमुकुटः॥
आपनं, स्त्री, (आप्+ल्युट्।) प्रापणम्॥ मरीचं। इति शब्दचन्द्रिका।
आपनिकः, पुं, (आङ्+पन्+इकन्।) इङ्गनीवन्मक्षिः। किरातः। इत्युणादिकोषः॥
आपन्नः, त्रि, (आङ्+पद्+क्तः।) आपद्ग्रस्तः। तत्पर्य्यायः। आपत्प्राप्तः २। इत्यमरः॥ प्राप्तः। इति मेदिनी॥ (यथा भागवते,—
"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं"॥
यथा हितोपदेशे,—
"बलीयसाभियुक्तस्तु दृष्टोऽन्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत्कुर्व्वाणः कालयापनं"॥)
आपन्नसत्त्वा, स्त्री, (आपन्नं प्राप्तं सत्त्वं गर्भरूपेण जन्तुरनया।) गर्भवती। इत्यमरः॥
("सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः"।
इति रघुः १०।५०।
"गार्ग्याद्यापन्नसत्त्वायास्तथातिद्रुतमभ्रतः"॥
इति सुश्रुतः॥)
आपमित्यकं, क्ली, (मेङ् प्रणिदाने उदीचां माङो व्यतीहारे इति क्त्वा। कुगतीति समासः। समासेऽनञ्पूर्वे क्त्वो ल्यबादेशः। मयतेरिदन्यतरस्यामिति ईत्वं अपमित्य निर्वृत्तं। अपमित्ययाचिताभ्यां कक्कनाविति कक्।) विनिमयात् प्राप्तं। इत्यमरः॥ बदल करिया लयोया द्रव्य इति भाषा।
आपवः, पुं (आपोर्वरुणस्यापत्यं पुमान्। आपु+अपत्यार्थे अण्।) वशिष्ठमुनिः। इति महाभारतं॥
("तत्ते शापात् विनिर्मुक्ता आपवस्य महात्मनः"।
इति महाभारते। तथा च हरिवंशे,—
"यं लेभे वरुणः पुत्रं पुरा भास्वन्तमुत्तमं।
वशिष्ठं नाम स मुनिः ख्यात आपव इत्युत"॥)
आपस्तम्बः, पुं, धर्म्मशास्त्रप्रयोजकमुनिविशेषः।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
इति याज्ञवल्क्यवचनं॥
आपस्तम्बिनी, स्त्री, (आपः स्तम्भातीति। आपस्+स्तम्भ+णिनि।) चिञ्चिनीवृक्षः। इति राजनिर्घण्टः॥
आपाकः, पुं, (आङ्+पच्+घञ्।) कुम्भकारभृत्यादग्धस्थानं। इति शब्दाधरः॥ पोयान् इति भाषा।
आपातः, पुं, (आङ्+पत्+घञ्।) पतनं। तत्कालः। इति मेदिनी॥ पातनं। इति शब्दचन्द्रिका॥ (यथा हितोपदेशे।
"आपातरम्याविषयाः पर्य्यन्तपरितापिनः"।
तथा च मनुः ११।६।
"मध्वापातो विषास्वादः स्वधर्म्मप्रतिरूपकः"।)
आपानं, क्ली, (आपीयते अस्मिन्। आङ्+पा+अधि+ल्युट्।) मद्यपानार्थसभा। तत्पर्य्यायः। पानगोष्ठिका २। इत्यमरः॥ मद खावार घर इति भाषा॥ (यथा महाभारते, वनपर्व्वणि २८० अध्याये।
"गन्धर्व्वाप्सरसो भद्रे! मामापानगतं सदा"।
१३। तत्रैव २ अध्याये।
"आपाने पानकलिता दैवेनाभिप्रमोदिताः"।
"ददर्श यदुवीराणामापाने वैश्वसं महत्"।)
आपालिः, पुं, (आङ्+पल्+इन्।) केशकीटः। इति शब्दाधरः॥ उकुन इति भाषा।
आपिञ्जरं, क्ली, (ईषत् पिञ्जरम्।) सर्ज्जं। इति राजनिर्घण्टः॥
("आपिञ्जरा बद्धरजःकणत्वा-
न्मङ्क्षूद्गता सुप्तमिवोर्ज्जुनस्य"॥
इति रघुः १६। ५१। सर्ज्जशब्दोऽस्य गुणादयो वक्तव्याः॥)
आपीड़ः, पुं, (आङ्+पीड्+घञ्वच्।) शिखास्थितमाल्यं। तत्पर्य्यायः। शेखरः २। इत्यमरः॥ (यथा रघुवंशे १८। २८।
"तस्मिन् कुलापीड़निभे निपीड़ं
सम्यक् महीं शासति शासनाङ्कां"॥)
आपीतं, क्ली, (आङ्+पा+क्त।) माक्षिकधातुः। इति राजनिर्घण्टः॥ (यथा रामायणे।
"आपीतवर्णवदनं प्रसन्नमिव भूमिपं"।)
आपीनं, क्ली, (ओ प्यायी वृद्धौ। आङ्+प्याय+क्त। प्यायः पी निशायां सोपसर्गस्य नः।) ऊधः। गरर पालान्। इति भाषा। इत्यमरः॥ (यथा रघुवंशे २। १८।
"आपीनभारोद्वहनप्रयत्नात्
यष्टिर्गुरुत्वाद्ददृशे नरेन्द्रः"॥)
आपीनः, त्रि, (आङ्+प्याय+क्त।) ईषत्स्थूलः। सम्यक्स्थूलः॥
आपीनः, पुं, कूपः। इति वोपदेवः॥
आपूपिकं, क्ली, (अपूपानां समूहः। अपूप+ठक्।) अपूपसमूहः। बड़पिठकं। इत्यमरः॥
आपूपिकः, त्रि, (अपूपाः पण्यमस्य। अपूप+ठक्।) पिष्टकजीवी। पिष्टकविक्रयकर्त्ता। तत्पर्य्यायः। कान्दविकः २ भक्ष्यकारः ३। इत्यमरः॥ मयरा हालुइकर रटिओयाला। इत्यादि भाषा॥
आपूप्यः, पुं, (अपूप+यञ्।) भक्तुः। चूर्णकः। इति चिकित्सशेषः॥ क्षातु मयदा पेसन इत्यादि भाषा।
आपूर्त्तिः, स्त्री, (आङ्+पृ+क्तिः।) ईषत्पूरणं। सम्यक्पूरणं॥
आपूषं, क्ली, (आ+पूष् वृद्धौ+करणे घञ्।) रङ्गं। इति राजनिर्घण्टः॥ रां इति भाषा॥ (रङ्गशब्देऽस्य गुणादयो ज्ञातव्याः॥)
आपृच्छा, स्त्री, (आङ्+प्रच्छ+अङ्+ततः टाप्।) आभाषणं। आलापः। इति हेमचन्द्रः॥
आपोक्षिमं, क्ली, (अम्भात् इतीयकञ्नवमदादग्रहणं। इति ज्योतिःशास्त्रं॥
आप्तः, त्रि, (आप+क्तः।) प्रत्ययितः। विश्वस्तः। इत्यमरः॥ (यथा मानवे ७। ८०।
"संवत्सरिकमाप्तैश्च राष्ट्रादाहारयेत् बलिं"।)
प्राप्तः। लब्धः। (तेभ्यः किमाप्तं मया। इति कालिदासः।) सत्यं। इति हेमचन्द्रः॥ (हितः। कुशलः।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरिव गर्भभर्म्मणि"।
इति रघुवंशे ३। १२। सन्निकृष्टः। आत्मीयः।
"असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति चिराच्चैव मातुराप्तांश्च बान्धवान्"॥
इति मनुः ३।१२। "आप्तान् सन्निकृष्टान् सहोदरभाटभगिन्यादीन्" इति तट्टीका। बहुः। अधिकः। यथा मनुः।
"यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः"।
"राजा नानाप्रकारान् बहुदक्षिणान् अश्वमेधादियज्ञान् कुर्य्यात्"। इति तट्टीका।
आप्तः, पुं, (आप्+क्त।) भ्रमप्रमादविप्रलिप्साकरणापाटवरूपदोषचतुष्टयरहितः। स च ऋष्यादिः। इति स्मृतिः। आप्तास्तावत्॥
"रजस्तमोभ्यां निर्म्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रैकालममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयं।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः"॥
इति चरकः॥)
आप्तगर्व्वः, त्रि, (आप्तः प्राप्तः गर्व्वो येन सः। प्राप्ताहङ्कारः॥
आप्ता, स्त्री, जटा। इति हारावली॥
आप्तिः, स्त्री, (आप्+क्तिः।) सम्बन्धः। योगः। लाभः। प्राप्तिः। इति हेमचन्द्रः॥
आप्तोक्तिः, स्त्री, (आप्तस्य भ्रमप्रमादादिशून्यजनस्य उक्तिः।) सिद्धान्तवाक्यं। तत्पर्य्यायः। राद्धं २ सिद्धकृतं ३ अभ्युपेतः ४ समयः ५ आगमः ६। इति हेमचन्द्रः॥
आप्यं, त्रि, (अपां विकारः तस्य विकारइत्यत्वात् स्वार्थे यञ्।) जलविकारजं। फेनादि। तत्पर्य्यायः। अम्मयं २। इत्यमरः॥ (यथा हरिवंशे।
"आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः।
लेखा नाम महाराज पञ्च देवगणाः स्मृताः"॥
"तस्मादाप्यो रसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्व्वेषु सर्व्वेषां सान्निध्यमत्युत्कर्षापकर्षाच्च ग्रहणं"। इति सुश्रुतः॥)
आप्यं, क्ली, वाप्यरक्तः। इत्यमरटीकायां रायमुकुटः। कुड़ इति भाषा॥
आप्यायनं, क्ली, (आङ्+प्याय्+ल्युट्।) तर्पणं। प्रीणनं। वृद्धिः। इति राजनिर्घण्टः॥ (यथा महाभारते,—
"पिण्डप्रसादनिष्क्रेयं तव चाप्यायनं पुनः"।
यथा मनुः, ३।२१३, ३।२०३।
"लोकस्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान्।"

"देवकार्य्यादिजातीनां पितृकार्य्ये विशिष्यते । देवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतं" ॥)

आप्यायितः, त्रि, (आङ् + प्याय् + णिच् + क्तः ।) तृप्तः । प्रीतः । वर्द्धितः । यथा,—

"एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः । पौर्णमास्यां स दृश्येत सम्पूर्णो दिवसक्रमात्" ॥

इति कौर्म्मे ४० अध्यायः ॥ आनन्दितः । इति लोकप्रसिद्धं ॥ (यथा हितोपदेशे ।

"आप्यायितोऽहं भवतामनेन वचनामृतेन" ॥)

आप्रच्छनं, क्ली, (आङ् + प्रच्छ + ल्युट् ।) गमनागमनादिसमये सुहृदादेरालिङ्गनाद्योग्यप्रश्नस्वागतादिनानन्दनं । इत्यमरः ॥

आप्रच्छन्नं, क्ली, (आङ् + प्र + छद् + क्त ।) आप्रच्छनं । तत्पर्य्यायः । आनन्दनं २ सभाजनं ३ ॥ इति हेमचन्द्रः ॥ [प्रपर्य्यन्तं ॥

आप्रपदं, क्ली, (प्रपदं पादाग्रं । तत्पर्य्यन्तं ।) पादा-

आप्रपदीनं, त्रि, (आप्रपदं पदाग्रान्तं व्याप्नोतीति । आङ् + प्र + पद + ख ।) पादाग्रपर्य्यन्तपतितवस्त्रादि । इत्यमरः ॥ ('आप्रपदीनां करटे यमदोलामिव गुणकुसुममालामारूढाम्" । इति हर्षचरिते ५म उच्छ्वासः ।)

आप्लवः, पुं, (आङ् + प्लु + अप् ।) स्नानं । इत्यमरः ॥

आप्लवव्रती, [न्] पुं, (आप्लवते प्लुङ् + अच्, आप्लवश्चासौ व्रती च । आप्लवः स्नानं तत्र व्रती नित्यस्नायीति मुकुटः ।) आप्लुतव्रती । स्नातकब्राह्मणः । इत्यमरटीकायां भरतः ॥

आप्लावः, पुं, (आङ् + प्लुङ् + घञ् । जलप्रक्षेपः, जलसेचनं, जलमध्ये सम्यगवगाहनं, जलप्लावनं, जलानां सर्व्वतः समुच्छलनं ।) स्नानं । इत्यमरः ॥

आप्लुतः, पुं, (आङ् + प्लुङ् + क्तः ।) आप्लुतव्रती । स्नातकः । इति मेदिनी ॥

आप्लुतः, त्रि, (आङ् + प्लु + क्त ।) स्नातः । कृतस्नानः । इति मेदिनी ॥ (आप्लुतः सर्व्वपापेभ्यः स गङ्गायां व्यमुच्यत । इति भारते ।) स्नाने क्ली इति हेमचन्द्रः ॥ (आर्द्रीकृतः । सिक्तः । पक्षत्तन्त्रे,—

"अन्ये जर्ज्जरितकलेवरा रुधिराप्लुताः" । इति)

आप्लुतव्रती, [न्] पुं, (आप्लुतस्य स्नातकस्य व्रतमस्यास्तीति । आप्लुतव्रत + इनि ।) समाप्तवेदाध्ययनस्नानशीलः । ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः सः । समाप्तवेदाध्ययनो यः स्नानशील आश्रमान्तरं न गतः सोऽपि । आप्लुतं स्नानं तत्र व्रती नित्यस्नायी इति व्युत्पत्तिः । इत्यमरटीकायां भरतः ॥

आप्यः, [न्] पुं, (आप् + वुन् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आफूकं, क्ली, अफेनं । इति वैद्यकं ॥ आफिं इति भाषा । (अस्य गुणानाह । भावप्रकाशे ॥

"आफूकं ग्रीष्मणं ग्राहि श्लेष्मघ्नं वातपित्तलं" ।)

आबद्धः, पुं, (आङ् + बन्ध + क्तः ।) दृढ़बन्धनं । प्रेम । अलङ्कारः । इति विश्वमेदिन्यौ ॥ (यथा मेघदूते ६ । "गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला" ॥)

योक्त्रं । इति मेदिनी ॥

आबन्धः, पुं, (आबध्यतेऽनेन आङ् + बन्ध + घञ् ।) योक्त्रं । इत्यमरहेमचन्द्रौ ॥ योत्दड़ी इति भाषा । भूषणं । प्रेम । बन्धनं । इति हेमचन्द्रः ॥ (यथा अमरुशतके । ३८ ॥

"गते प्रेमाबन्धे प्रणयबद्धमाने विगलिते" ।)

आबलिः, स्त्री, आलिः । श्रेणी । इत्यमरः ॥ (समूहः, आबली ।)

आबिद्धः, त्रि, (आङ् + व्यध् + क्तः ।) वक्रः । क्षिप्तः । इत्यमरः । पराहृतः । इति मेदिनी ॥ मूर्खः । इति शब्दरत्नावली ॥

आबिधः, पुं, बेधनास्त्रं । इत्यमरः ॥ भोमर तुरपन इत्यादि भाषा ।

आबिलः, त्रि, (आ + बिल + क ।) अनच्छः । अनिर्म्मलः । इत्यमरः ॥

आबिलकन्दः, पुं, मालाकन्दः । इति राजनिर्घण्टः ॥

आबुत्तः, पुं, (आप् + क्विप् + आपमुत्तनोति । अन्येभ्योपीति ड ।) नाद्योक्तौ भगिनीपतिः । इत्यमरः ॥

आभरणं, क्ली. (आभ्रियतेऽनेन । भृञ भरणे । ल्युट् ।) भूषणं । अलङ्कारः । इत्यमरः ॥ (तच्चतुर्व्विधं, आवेध्यं बन्धनीयं, क्षेप्यं, आरोप्यं चेति । तत्र आवेध्यं कुण्डलादि, बन्धनीयं कुसुमादिकं, क्षेप्यं नूपुरादिकं, आरोप्यं हारादि । यदुक्तं,—

"स्याद्भूषणं त्वाभरणं चतुर्धा परिकीर्त्तितं । आवेध्यं बन्धनीयञ्च क्षेप्यमारोप्यमेव तत्" ॥

(यथा मनुः, ७ । २२२ ।

"वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च" ।

यथा कुमारसम्भवे । ५ । ४४ ॥

"किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलं" ॥)

आभा, स्त्री, (आङ् + भा + अङ् + टाप् ।) शोभा कान्तिः । इति हेमचन्द्रः ॥ दीप्तिः । ज्योतिः ॥ (वातरोगभेदः । वबुले । यथा भावप्रकाशे वातव्याधौ त्रिकशूलचिकित्सा,—

"आभा वबुलपर्य्यायः कथितः कोविदैरिह" ।)

आभातिः, स्त्री, (आङ् + भा + क्तिन् दीप्तिः, ज्योतिः ।) छाया । इति राजनिर्घण्टः ॥

आभाषणं, क्ली, (आङ् + भाष् + ल्युट् ।) आलापः । कथनं । इत्यमरः ॥ (यथा रघुवंशे । २ । ५८ ॥

"सम्बन्धमाभाषणपूर्व्वमाहुः" ।)

आभासः, पुं, (आङ् + भास् + घञ्वाद्यच् ।) सदृशः । प्रतिबिम्बं । इति वेदान्तः ॥ दीप्तिः । अभिप्रायः ॥ (प्रतिबिम्बादिवदवास्तवस्वरूपमविद्याकार्य्यं, मृषाबुद्धिः । यथा अध्यात्मरामायणे,—

"आभासस्तु मृषाबुद्धिरविद्याकार्य्यमुच्यते । अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥ आभासत्वपरं बिम्बभूतमेवं त्रिधा चितिः । साभासबुद्धेः कर्त्तृत्वमवच्छिन्ने विकारिणि" ॥

तथा च पञ्चदशी ६—७ ।

"चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः । पृथक् पृथक् चिदाभासश्चैतन्याध्यस्तदेहिनां ॥ कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी । वस्त्राभासे स्थितान् वर्णान् यद्वदाधारवस्त्रगान्" ॥)

आभासरः, पुं, (आङ् + भास् + वरच् ।) चतुःषष्टिसङ्ख्यकगणदेवताविशेषः । इत्यमरः ॥ (यदुक्तं, आभासराश्चतुःषष्टि । यदा,—

"आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधो मदो मोहो द्वादशाभासरा इमे" ॥)

आभिजनः, पुं, (अभिजनादागतः । अभिजन + अण् ।) अभिजनस्य भावः । कुलसम्बन्धीयः । गाँइ पदवी इत्यादि भाषा ॥ (यथा कुमारसम्भवे, १ । २६ ।

"तां पार्व्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव" ॥)

आभिजात्यं, क्ली, (अभिजात + ष्यञ् ।) अभिजातस्य भावः । कौलिन्यं । पाण्डित्यं ॥ (महावंशजननजनितमर्य्यादा । यथा रामायणे,—

"आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च" ॥)

आभिधा, स्त्री, (अभि + धा + अङ् + टाप् ।) शब्दः । इति शब्दरत्नावली ॥

आभिधातकं, क्ली, (अभिधा + तक् + अच् ।) शब्दः । इति शब्दरत्नावली ॥

आभिरूप्यं, क्ली, (अभिरूप + ष्यञ् ।) अभिरूपस्य भावः । यथा,—

"अर्च्चकस्य तपोयोगादर्च्चनस्यातिशायनात् । आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति" ॥

इति तिथ्यादितत्त्वधृतहयशीर्षपञ्चरात्रीयवचनं ॥

आभीरः, पुं, (आ समन्तात् भियं राति । रा दाने आत इति कः ।) गोपः । इत्यमरः ॥ आहिर इति भाषा । स च ब्राह्मणादम्बष्ठायां जातः । इति मनुः ॥

आभीरपल्लिः, स्त्री, (आभीराणां पल्लिः ।) गोपपल्ली । इत्यमरटीकायां रायमुकुटः ॥ गोयालापाड़ा इति भाषा ॥

आभीरपल्ली, स्त्री, (आभीराणां पल्ली ।) गोपग्रहसमूहः । गोपग्रामः । गोपग्रहं । गोपस्थानं । तत्पर्य्यायः । घोषः २ । इत्यमरः ॥

आभीरी, स्त्री, (आभीरएंयोगादितिजातेरिति च ङीष् ।) गोपस्त्रीजातिः । गोपपत्नी । तत्पर्य्यायः । महाश्रूद्री २ । इत्यमरः ॥ आहिरिणी इति भाषा ॥

आभीलं, क्ली, (आ समन्तात् भियं लाति जनयति । आङ् + भी + ला + क ।) कष्टं । कृच्छ्रं । इत्यमरः ॥ (भयावहः, भीतिजनकः । यथा मेदिनी,—

"आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके" ॥

यथा महाभारते,—

"रात्रौ निशीथे स्वाभीले गतेऽर्द्धसमये नृप । प्रचारे पुरुषादानां रक्षसां घोरकर्म्मणाम्" ॥)

आभीलः, त्रि, (आङ् + भी + ला + क ।) कष्टयुक्तः । इत्यमरः ॥ भयानकः । इति मेदिनी ॥

आभीक्ष्णं, क्ली, (अभीक्ष्ण + ष्यञ् ।) अत्यर्थं । नित्यं । तद्युक्तक्रियायां त्रि । इति शब्दरत्नावली ॥

आभेरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

आभोगः, पुं, (आङ् + भुज + घञ् ।) परिपूर्णता । इत्यमरः ॥ (यथा मेघदूते, उत्तरमेघे २१ ।

"गण्डाभोगात्कठिनविषमामेकवेणीं करेण" ।

यथा ग्राकुन्तले । "अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्य" ॥)
वरणस्य वृक्षः । यत्नः । इति मेदिनी ॥ कविनामयुक्तगानसमापककविता । भणिता इति भाषा । यथा,—
"यत्रैव कविनाम स्यात् स आभोग इतीरितः" ।
इति सङ्गीतदामोदरः ॥

आभ्युदयिकं, त्रि, (अभ्युदयः प्रयोजनम् अस्य । अभ्युदय + ठक् ।) अभ्युदयनिमित्तश्राद्धादि । यथा । अथाभ्युदयिकश्राद्धं । तत्र गोभिलः । आभ्युदयिके श्राद्धे युग्मानाशयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः । सम्पन्नमिति दृष्टिप्रश्नः । दधिवदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां न स्वधाच्च प्रयुञ्जीत इति । अभ्युदयो विवाहादिस्तदर्थं श्राद्धं आभ्युदयिकं । आभ्युदयिके अभ्युदयनिमित्तके । अभ्युदयः इष्टलाभः । स च भूतभविष्यद्भेदेन द्विविधः । तत्र भूतं पुत्रजन्मादि भविष्यत् विवाहादि । एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने वृद्धिश्राद्धत्वेन कर्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलाषे आभ्युदयिकश्राद्धमिति प्रयोज्यं । अत्र यवैस्तिलार्थ इत्यनेन पार्व्वणश्राद्धप्राप्ततिलस्थाने यवविधानात् आभ्युदयिकस्यापि पार्व्वणप्रकृतित्वं प्रतीयते । अन्यथा तिलार्थ इत्युपादानं व्यर्थं स्यात् । ततश्च पार्व्वणप्रकृतिकत्वेन पित्र्य युग्मब्राह्मणप्राप्तौ तन्निराशाय पिण्डपक्षे ब्राह्मणयुग्मत्वोपदेशः दैवे युग्मत्वस्य पार्व्वणप्राप्तत्वान्नतदर्थोपदेशः ।
"अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणं" ।
इति याज्ञवल्क्यवचनेन देवकर्म्मानन्तरं पिण्डकर्म्मकरणे प्राप्तावामोपचारनिराशाय प्रदक्षिणमुपचारः तेन देवपिण्डकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यं । द्विगुणमुष्मत्वनिराशाय ऋजवो दर्भा इति ऋजुलोपदेशः । दृष्टाः स्थ इत्यनेन दृष्टिप्रश्ने सम्पन्नमिति प्रश्नः । योग्यत्वात् सुसम्पन्नमिति प्रोक्षे इति वक्ष्यमाणछन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्युत्तरं । एतद्धर्म्मयब्राह्मणपक्षेप्यबाधितत्वाद्ग्राह्यं । दधिवदराक्षतमिश्रा इत्यनेन दध्यादिमिश्रत्वमावश्यकं । अक्षतो यवः ।
"अक्षताश्च यवाः प्रोक्ता भग्ना धाना भवन्ति ते" ।
इति भट्टनारायणधृतात् । अतएव वक्ष्यमाणछन्दोगपरिशिष्टवचने अक्षतमनुक्ता संयोज्य यवकर्म्मानुदधिभिरिति निःसन्दिग्धमुक्तं । स्वधावाचनप्रश्ननिष्पत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्ये इति पिण्डपक्षएव प्रश्नः अतएव तन्निष्पत्तये दैव इति आदौ देवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरत्र प्रीयन्तामिति । ततः पिण्डपक्षे स्वधावाचनस्यानीयत्वेन वृद्धप्रमातामहेभ्यश्च इति चकारनिर्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् प्रत्युत्तरञ्च अस्तु स्वधा इतिवत् तत्तेषाञ्चैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितर इत्यादि नान्दीमुखेभ्यः पिण्डभ्य इति निर्देशेन च नान्दीमुखं पिण्डगमिति विष्णुपुराणेन च मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव च इति ब्रह्मपुराणेन च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवतात्वं ततश्चापि प्रीयन्तामितिवन्नान्दीमुखेभ्यः पितामहेभ्य इति वाच्यं । न तु नान्दीमुखविशेषणशून्यं पितामहेभ्यः प्रीयन्तामिति पिण्डदयितेक्षं युक्तम् । नान्दीमुखेभ्यः पिण्डभ्य प्रीयन्तामित्यन्वितस्य नान्दीमुखेभ्य इत्यस्य पितामहेभ्य इत्यादावनन्वयित्वेन प्रागुक्तयुक्त्या प्राप्तस्य नान्दीमुखविशेषणस्य पितामहेभ्य इत्यादावपि प्राप्तेः । एतेनात्र मैथिलोक्तं तन्त्रतावधानमपि निरस्तं । पार्व्वणवत् स्वधाः प्राप्तेः तन्निराशाय न स्वधां प्रयुञ्जीतेति अत्र विशेषादभिलाषे मन्त्रे च स्वधापदनिवृत्तिः । अभिलाषे नम इति ब्रूयात् । "अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः" । इति ब्रह्मपुराणे श्राद्धे स्वधा नमः पदयोरत्यागबोधकत्वेन विकल्पादाभ्युदयिके स्वधानिषेधान्नम एवात्रेति । पितृनप्यत्र देववदित्यनेनापि पार्व्वणोक्तविश्वदेवपक्षीयनम एव प्रतीयते न तु मैथिलोक्तं स्वाहेति । श्राद्धे तथा प्रयोगे प्रमाणाभावात् । एवमाश्वलायनगृह्ये यवोसीति मन्त्रे तु पुष्ट्या इति श्रुतेर्मन्त्रमात्रे स्वधापदस्थाने पुष्टिपदप्रयोगः । इति श्राद्धतत्त्वं । अन्यत् नान्दीमुखशब्दे द्रष्टव्यं ॥

आमं, त्रि, (आम्यते ईषत्पच्यते । आ + अम + कर्म्मणि घञ् ।) पाकरहितं । काँचा इति भाषा । तत्पर्य्यायः । अपक्वं २ असिद्धं ३ अक्वथितं ४ । इति रत्नमाला ॥
("आमपक्वकमं हित्वा नातिसारे क्रिया यतः" । इति वैद्यकचक्रपाणिसंग्रहः ॥
"मज्जत्यामाशयस्थत्वादिट् पक्वातूत्प्लवते जले ।
विनातिद्रवसङ्घातश्लेष्मश्लेष्मप्रदूषणात् ॥
परीक्ष्यैवं पुरा सामं निरामं वा सदोषिणां ।
विधिनोपाचरेत्स्नेह्य स्वेदयेत्पाचनेन तु रेचयेत्" ॥
चिकित्सा यथा,—
"चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।
योगं हिङ्गुत्रयोपेतं चूर्णयेत्तैकत्र चूर्णयेत् ॥
गुडिका मातुलुङ्गस्य दाडिमस्य रसेन वा ।
हृता विपाचयत्यामान्दीपयत्यग्नि चानन" ॥
इति चित्रकाद्यगुडिका ॥ इति चरकः ॥)

आमं, क्ली, षट्प्रकाराजीर्णरोगमध्ये रोगविशेषः । तस्य कारणरूपे ।
"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥
अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं ॥
तत्रामे गुरुतोत्क्लेदः प्रोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथामुक्तमविदग्धः प्रवर्त्तते" ॥
इति निदानं ॥ अन्यच्च ।
भुक्तमन्नावशेषं यत् रसं भूयस्त्वपाचितं ।
गतमामाशये यस्मात्तस्मादामं तदुच्यते ॥
अन्नमन्नरसं केचित् केचिच्च मलसञ्चयं ।
प्रथमां दोषदुष्टिञ्च आममित्यभिधीयते' ॥
अपक्वं । यथा,—
"शूल्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।
आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतं" ॥
इति श्राद्धतत्त्वधृतवशिष्ठवचनं । रोगविशेष तल्लक्षणादि अजीर्णशब्दे द्रष्टव्यं ॥
("उच्यतेऽल्पबलत्वेन धातुमाद्यमपाचितं ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ॥
आमेन तेन संसृष्टा दोषादूष्माद्या दूषिताः ।
सामाइत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥
स्रोतोरोधबलभ्रंशगौरवानिलमूढ़ताः ।
आलस्यायक्तिनिष्ठीवमनोभेदाश्चिलामाः ॥
लिङ्गं मलानां सामानां निरामाणां विपर्य्ययः" ।
इति चरकः ॥
"आमेऽजीर्णे तु बन्धस्येत् क्षारास्लं बहु शुष्यते ।
पुष्पकासीशमिश्रं वा क्षीरेण लवणेन च ।
सदाड़िमरसं सर्पिः पिबेद्यातेऽधिके सति" ॥
इति च चरकः ॥)

आमः, पुं, (अम + घञ् ।) रोगमात्रं । रोगभेदः । इति मेदिनी ॥ मलवैषम्यरोगः । इति राजनिर्घण्टः ॥
("पिबेत् स परिकर्त्तामे मले वा दाड़िमाम्बुना ।
विड़ेन लवणं पिण्डं बिल्वं चित्रकनागरं" ॥
इति चरकः ॥)

आमगन्धि, क्ली, (आमस्यापक्वस्य गन्धइव गन्धो यत्र ।) चिताधूमादिगन्धयुक्तं । अपक्वमांसादिगन्धविशिष्टं । तत्पर्य्यायः । विस्रं २ विस्रं ३ । इत्यमरः ॥

आमगन्धः, पुं, (आमगन्धयतीति । आ + गन्ध + णिच् + घञ् ।) रसगन्धरक्तः । इति राजनिर्घण्टशब्दरत्नावल्यौ ॥ (रसगन्धशब्देऽस्य गुणादयो व्याख्येयाः ।)

आमनस्यं, क्ली, (अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ।) पीड़ा । दुःखं । इत्यमरः ॥

आमन्त्रणं, क्ली, (आ + मन्त्र + भावे ल्युट् ।) सम्बोधनं । इति हेमचन्द्रः ॥ आप्रच्छनं । इति जटाधरः ॥ निमन्त्रणं । इति स्मृतिः ॥ निमन्त्रणविशेषः । यदकरणे प्रत्यवायो नास्ति । यथा "इह श्रोत्रीयं भवान्" । इति मुग्धबोधव्याकरणं ॥

आमयं, क्ली, (आमं रोगं याचनेन । आम + या + ड ।) कुष्ठनामौषधिः । इतिराजनिर्घण्टः ॥ कुड़ इति भाषा ।

आमयः, पुं, (अम रोगे + भावे + घञ् । मीञ् हिंसायां करणे अच् वा ।) रोगः । इत्यमरः ॥
("तदुक्तं विविधैर्योगैर्निहन्यादामयान् बहून्" । इति सुश्रुतः ॥
"तत्र व्याधिरामयो गद आतङ्को यक्ष्मात्ययो विकारो रोग इत्यनर्थान्तरं" । इति चरकः ॥)

आमयावी, [न्] त्रि, (आमयोऽस्यास्य आमयस्योपसंख्यानं इति दीर्घश्चेति विनिः । रोगी । इत्यमरः ॥

आमर्षः, पुं, (मृष + घञ् + नञ्समासः। अन्येषामपीति दीर्घः।) क्रोधः। इत्यमरटीकायां भरतः॥ ("निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनं"। इति रामायणे।)

आमलकं, क्ली, (आ + मल + कुन् शिल्पिसंज्ञयोः। आमलक्याः फलं। फलेलुगिति विकारावयवप्रत्ययस्य लुक्॥) आमलकीविशेषः। काठ आमला इति भाषा। तत्पर्य्यायः। काश्यधात्रीफलं २ क्षुद्रामलकं ३ क्षुद्रजातीफलं ४। अस्य गुणाः। कषायत्वं। कटुत्वं। शीतत्वं। पित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ ("तद्दामलकं शीतमम्लं पित्तकफापहं"। इति वाभटः॥ "विद्यादामलके सर्व्वान् रसान् लवणवर्ज्जितान्। खेदभेदःकफोत्क्लेदपित्तरोगविनाशनं"॥ इति चरकः॥)

आमलकः, पुं, (आड् + मल + कुन्।) वासकवृक्षः। इति शब्दचन्द्रिका॥ (यथा मार्कण्डेयपुराणे। "मल्लातकानामलकांस्तिन्दुकांश्च महाफलान्"।)

आमलकी, स्त्री, (आड् + मल + कुन् + जातेरिति ङीष्।) स्वनामख्यातफलवृक्षविशेषः। आमला इति भाषा। तत्पर्य्यायः। तिष्यफला २ अमृता ३ वयस्था ४ वयःस्था ५ कायस्था ६। इत्यमरस्तट्टीका च। श्रीफला ७ धात्रिका ८ शिवा ९ प्रान्ता १० धात्री ११ अमृतफला १२ रुद्या १३ वृत्तफला १४ रोचनी १५। इति राजनिर्घण्टः। कर्म्मफला १६ तिष्या १७ इति रत्नमाला॥ अस्या गुणाः। हरीतकीगुणवद्गुणत्वं। विशेषेण शुक्रकारित्वं। शीतवीर्य्यत्वं। अम्लत्वात् वायुनाशित्वं। शैत्यमाधुर्य्यात् पित्तनाशित्वं। कषायरूक्षत्वात् कफनाशित्वं। सर्व्वफलाधिकगुणत्वं। भोजनाद्यमध्यान्ते प्राशस्त्यं। निरत्ययत्वं। दोषहरत्वञ्च। अस्य मज्जगुणाः। दृष्ट्याच्छर्दिकफवायुनाशित्वं। लघुत्वं। कषायत्वं। बलकारित्वञ्च। इति राजवल्लभः॥ अपि च। लघुत्वं। दाहवमिमेहश्लेष्मनाशित्वं। रसायनत्वं। कटुत्वं। रुचिकरत्वं। रक्तदोषनाशित्वं। भ्रमविबन्धाध्मानविष्टम्भदोषप्रशमनकारित्वञ्च। अस्य मज्जनो विभीतकमज्जवद्गुणत्वञ्च। इति राजनिर्घण्टः। (अस्या नामानि गुणाश्च। "त्रिफलामलकमाख्यातं धात्री तिष्यफलामृता। हरीतकीसमह्यात्रीफलं किन्तु विशेषतः। रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम्। हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यशैत्यतः। कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित्। यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं॥ तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत्"। इति भावप्रकाशः॥ "तान् गुणांस्तानि कर्म्माणि विद्यादामलकेष्वपि। यान्युक्तानि हरीतक्यां वीर्य्यस्य तु विपर्य्ययः"॥ इति चरकः॥) तच्छुष्कफलगुणाः। कफपित्तनाशित्वं। अम्लत्वं। स्वादुद्रव्यद्वारा पाके पित्तनाशित्वञ्च। इति राजवल्लभः॥ तस्या उत्पत्तिर्यथा। सख्यावूचतुः। "उत्क्रम्यया महेशानि तुलसीबिल्वसम्भवः। अनयोस्तुल्य एकः कः शिवविष्णुप्रियस्तरुः॥ तदावां श्रोतुमिच्छावः शिवसुन्दरि कथ्यतां"। देव्युवाच। "अस्ति बिल्वतुलसीतरुतुल्यः पुण्य एक उत विष्णुशिवार्हः। नामतोऽमलक इत्यपि सख्यौ रोपितः कमलयाथ मयापि॥ कदाचित् देवयात्रायां प्रभासे पुण्यतीर्थके। सर्व्वे देवाः समायाता दिने पुण्ये च कुत्रचित्॥ तत्राहञ्च स्वयं लक्ष्मीरेकस्थाने समागते। तत्रावयोर्मतिर्जाता शिवविष्णुप्रपूजने॥ अहं श्रियमवोचञ्च सामुद्रि गृहणु मे मतिं। सकल्पितेन द्रव्येण पूजयेऽहं हरिं प्रभुं॥ मामुवाच ततो लक्ष्मीर्गृहदाच्चरभाषिणी। ममाप्येवं मतिर्जाता त्वमवोचः स्वयं यथा। सकल्पितेन द्रव्येण पूजयेऽहं त्रिलोचनं"॥ देव्युवाच। "सजये विजये देवि! नावेवम्भूतयोस्तदा। नयनेषु सुजातानि अमलाश्रुजलानि च॥ तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि!। ततो जाता द्रुमाः पृथ्व्यां चत्वारो विमलप्रभाः॥ ख्याता आमलकी नाम्ना जाता कादमलाद्यतः। श्यामलच्छदसन्दाम्ने कर्व्वूरस्कन्धमूलकाः॥ शिराग्रथितपत्राली पत्रमालाकपत्रका। बिल्वस्य च तुलस्याश्च ये गुणाः कथिताः सखि॥ ते ते गुणाः सर्व्वएव आमलक्यां समाहिताः। पत्रमालादलैरस्याः शिवविष्णू सुरेश्वरौ॥ सर्व्वथा पूजितौ स्यातां सख्यौ नास्त्यत्र संशयः। माघे मासि सितायां तामेकादश्यां समुद्भवां॥ शुभामामलकीं दृष्ट्वा समेताः सर्व्वदेवताः। ऋषयस्ते सशिष्याश्च हर्षमाणः परं तदा॥ शिवाच्युतस्तवैश्चापि ददृशुस्तुष्टुवुस्तदा"॥ ०॥ अस्या नमस्कारमन्त्रादिः। "नमाम्यामलकीं देवीं पत्रमालाद्यलङ्कृता। शिवविष्णुप्रियां दिव्यां श्रीमतीं सुन्दरप्रभां॥ एतेन खलु मन्त्रेण सर्व्वा अस्याः क्रिया मताः। एतामुद्दिश्य तीर्थानि त्रीण्युक्तानि मनीषिभिः॥ विल्ववत्तववदेवेह पृथिव्यां कर्म्मणां खले। सिषिचुस्तामामलकीं सर्व्वतीर्थजलैर्द्विजाः॥ अथ सर्व्वसुराश्चाथ मुनीनाञ्च तदाग्रतः। मया संपूजितः क्षत्राः श्रीश्च शम्भुमपूजयत्॥ तदा जयजयध्वानो बभूव क्षितिमण्डले। आकाशे पुष्पवृष्टिश्च शङ्खशब्दाश्च पुष्कलाः॥ दृष्ट्वा श्यामलकीं देवीं दधारानन्दमुत्तमं। तेन धात्रीति नाम्नापि राजत्यामलकी शुभा। नमस्कृत्य श्यामलकीं गता देवा द्विजास्तथा। ब्रह्मविष्णुशिवाश्चापि तत्राधिष्ठानमाश्रिताः॥ जाता श्यामलकी देवी परमानन्ददायिनी। मान्या मान्या च पूज्या च प्रयत्नत्वा सखीत्रियं"। इति बृहद्धर्म्मपुराणे आमलकीप्रादुर्भावः १२ अध्यायः॥ * ॥ एकादश्यां तच्च विष्णुप्रीतिर्यथा। "तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः। श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः"॥ इति गारुडे २१५ अध्यायः॥

आमवातः, पुं, (आमोऽपाकहेतुः वातः।) स्वनामख्यातरोगविशेषः। तस्य निदानपूर्ब्बिकां संप्राप्तिमाह। "विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतस्तथा॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति। तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते॥ वातपित्तकफैर्भूयो दूषितः सोऽम्लजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः॥ जनयत्यग्निदौर्ब्बल्यं हृदयस्य च गौरवं। व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः॥ विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्यादि। विरुद्धा चेष्टा मुक्ता व्यायामादि। तदयुक्तस्य। निश्चलस्य निर्व्यापारस्य। "स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतः" इति मिलितो हेतुः। श्लेष्मस्थानं आमाशयसन्ध्यादि। तेन श्लेष्मस्थानगतेन अत्यर्थं अपक्वः। पित्तस्थानगमने तु पक्वोऽभविष्यदित्यभिप्रायः। असौ आमः धमनीभिः प्रपद्यते धमनीमार्गेश्चलति। भूयो दूषितः अतिशयेन दूषितः। सोऽम्लजो रसः। आमः स्रोतांसि अभिष्यन्दयति संस्तभ्य रसवहशिरोवरोधं कृत्वा स्रोतांसि गुरूणि करोति। नानावर्णः वातादिजनितवर्णभेदान्नानावर्णः॥ * ॥ आमस्य लक्षणमाह। "अजीर्णात् यो रसो जातः सञ्चितो हि क्रमेण वै। आमसंज्ञां स लभते शिरोगात्ररुजाकरः"॥ अजीर्णात् भुक्तादजीर्णात्॥ * ॥ आमवातस्य सामान्यलक्षणमाह। "युगपत् कुपितावेतौ चिकसन्धिप्रवेशकौ। स्तब्धञ्च कुरुते गात्रमामवातः स उच्यते"॥ एतौ वातकफौ। चिकसन्धिप्रवेशकौ वेदनयेति बोद्धव्यौ॥ * ॥ तत्रान्तरे तस्य लक्षणान्तरमाह। "अक्षमर्दोऽरुचिस्तृष्णाश्यालस्यं गौरवं ज्वरः। अपाकः सूक्ततादानं आमवातस्य लक्षणम्"॥ ०॥ अथैवातिवृद्धस्य लक्षणमाह। "स कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत्। हस्तपादशिरोगुल्फचिकजानूरुसन्धिषु॥ करोति सरुजं शोथं यत्र दोषः प्रपद्यते॥ स देशो रुज्यतेऽत्यर्थं व्याबिद्ध इव दृश्यते॥ जनयेत् सोऽग्निदौर्ब्बल्यं प्रसेकारुचिगौरवम्। उत्साहहानिं वैरस्यं दाहश्च बहुमूत्रता॥ कुक्षौ कठिनतां शूलं तथा निद्राविपर्य्ययं। हृत्पिण्डं श्वासमूर्च्छाश्च हृदयार्त्तं विड्विबद्धतां॥ जाड्यान्वितं कुजमानाङ्गं कष्टांश्चान्यानुपद्रवान्"। यदा प्रकुपितो भवेत् प्रकर्षेण कुपितः स्यात्तदा वक्ष्यमाणानुपद्रवान् करोति। तानाह हस्तेत्यादि। यत्र दोषः दुष्ट आमः प्रपद्यते गच्छति। वाह्यं अकर्म्मण्यत्वं। अन्यानुपद्रवान् कफाग्निमान्द्यादीन्

॥*॥ तथैव विशिष्टानि लक्षणान्याह।
"पित्ताद्दहं सरागञ्च सशूलं पवनात्मकं।
स्तिमितं गुरुकण्डूकं कफजुष्टं तमादिशेत्"॥
गुरुकण्डूकं बद्धकण्डूकम् ॥*॥ तस्यासाध्यत्वादि-
कमाह।
"एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते।
सर्व्वदेहचरः श्लोथः सक्रुच्छः सान्निपातिकः" ॥*॥
अथ आमवातस्य चिकित्सा।
"लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च।
रेचनं स्नेहनमपि वस्त्यश्चाममारुते॥
रूक्षस्नेहौ विधातव्यौ वालुकापुटकैरिह।
उपनाहाश्च कर्त्तव्यास्तेऽपि स्नेहविवर्जिता ॥*॥
वास्तूकमत्र दृन्ताकं पटोलं कारवेल्लकं।
कोरदूषा यवाः पथ्याः वस्तिकाः शालयोऽनवाः" ॥
अनवाः पुराणाः।
"लावकानां तथा मांसं हितं तक्रेण संस्कृतं।
हितश्च यूषः कौलत्थः कलायस्यकस्य च" ॥*॥
"चित्रकं कटुका पथ्या नागरातिविषामृताः।
चूर्णिताः कोष्णतोयेन पिबेदामानिलार्त्तहाः ।१।
शुण्ठी शुण्ठी शिवासेव्या देवाह्वातिविषामृताः।
क्वथिताः प्रपिबेदामवाती रूक्षश्च भोजयेत्॥
देवाह्वा देवदारु। २।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एकएव निहन्तायमेरण्डस्नेहकेशरी। ३।
एरण्डस्नेहयुक्तां हरीतकीं भक्षयेद्दिधिवत्।
आमानिलार्त्तियुक्तो युक्तो दक्षा च मध्यमा। ४।
श्वेतं पुनर्नवामूलं तेन तैलं प्रसाधयेत्।
आमवातरुजं हन्ति पादाभ्यङ्गनमर्द्दनात्। ५।
आरग्वधस्य पत्राणि भल्लातानि कटुतैलतः।
आमवातप्रशान्त्यर्थं खादेद्भक्षाहृतानि च। ६।
शुण्ठीगोक्षुरकक्काथः प्रातः प्रातर्निषेवितः।
आमवाते कटीशूले पाचनं रुक्प्रणाशनं। ७।
कटीशूले पिबेत्तैलं एरण्डफलसम्भवं।
महौषधगुडश्चोष्ण क्वाथं मागधिकायुतं॥
विश्वौषधैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीशूले शस्यते परमौषधं। ८।
रास्ना वातारिमूलञ्च वासकः सदुरालभः।
शुण्ठीदारुबलामुस्तनागरातिविषामयाः॥
शरदंष्ट्राद्याधिघातश्च मिश्रिधान्यं पुनर्नवा।
अश्वगन्धामृता कृष्णा दृढदारुः शतावरी॥
वचा सहचरश्चैव चविका दहतीदयं।
समभागानि सर्व्वाणि रास्नात्र त्रिगुणा मता॥
पिबेत् कषायमेतेषामष्टभागावशेषितं।
क्षिप्त्वा नागरचूर्णञ्च प्रस्तेपोऽत्र यथानलं॥
सर्व्वेषु वातरोगेषु सामेषु तु विशेषतः।
पक्वाशयेऽर्दिते कम्पे कुब्जे सन्धिगतेऽनिले॥
जानुजङ्घास्थिपीड़ासु शस्यश्चाय दनुग्रहे।
उरस्तम्भे वातरक्ते विसूच्यां क्रोष्टुशीर्षके॥
हृदामये च दुर्नाम्नि योनिशुक्रामयेषु च।
पुंसां मेढ्रगते वाते स्त्रीणां बन्ध्यामये तथा॥
योषितां गर्भदं मुख्यं नास्त्यस्मात् परमौषधं।
महारास्नादिकः क्वाथो वेधसार्थं विनिर्म्मितः" ॥
महारास्नादिकथः ।९। "अजमोदामरिच-
पिप्पलीविड्डसुरदारुचित्रकशृताङ्गाः। सैन्धव-
मागधिमूलं भागा नवकस्य पलिकाः स्युः॥ शुण्ठी
दशपलिका स्यात् पलानि तावन्ति वृद्धदारस्य।
अभया पलानि पञ्च श्लक्ष्णं चूर्णं विधापयेदेषां।
समगुडवटकानदतश्चूर्णं वा कोष्णवारिणा पिबतः।
नश्यन्त्यामानिलजाः सर्व्वे रोगाः सुदारुणाः शीघ्रं।
आनाहशूलतूनी प्रतितूनी मध्यसी गुल्मः। कटि-
एष्ठपरिष्फुटनं स्फुटनं चैवास्थिसन्धुयोस्तीव्रं॥
श्वयथुस्तथाङ्गसन्धिषु ये चान्येऽप्यामवातजा रोगाः
सर्व्वे प्रयान्ति शान्तिं तमहव सूर्य्यांशुविध्वस्तं॥
अजमोदादिचूर्णमोदकः। १०।
"आमवाते हितोऽतीव पथ्यादिर्गुग्गुलुर्मतः"।
तथैव योगराजाख्यसरकादिचिकित्सकः।११।
नागरस्य पलान्यष्टौ घृतस्य कुड़वं तथा।
क्षीराढ़कसमायुक्तं खण्डस्यार्द्धशतं पलं॥
द्योषत्रिजातकद्रव्यात् प्रत्येकञ्च पलं पलं।
निःक्षिपेच्चूर्णितं तत्र खादेदग्निबलं यथा॥
आमवातप्रशमनं धातुपुष्टिकरं परं।
बल्यमायुष्यमोजस्यं बलीयलितनाशनं"॥
शुण्ठीखण्डः। १२।
"मेथिकायाः पलान्यष्टौ शुण्ठ्या अष्ट पलानि च।
तयोश्चूर्णं घटे घृतं दुग्धे मद्दग्निना पचेत्॥
दुग्धाढ़कयुगे गव्यं घृतमष्टपलं क्षिपेत्।
तत्तावत्सुपचेत् यावत् भवेदतिघनं पयः॥
पुनः पचेत् मृदग्नौच दत्त्वाढ़कमितां सितां।
ततः पाके सुविज्ञाते वह्नेनादवतारयेत्॥
मरिचं पिप्पली शुण्ठी कणामूलं सचित्रकं।
यवानी जीरको धान्यं कारवी घृतपुष्पिका॥
जातीफलं घटीलक्च पत्रकं भद्रमुस्तकं।
क्षीयात् पलमेतेषां सर्व्वेषाञ्च पृथक् पृथक्॥
षड़्क्षं नागरं तत्र मरिचं च षड़्क्षकं।
एषां चूर्णं परिक्षिप्य सर्व्वं संमिश्र्य रक्षयेत्॥
एतत्तु भेषजं प्रोक्तं मेथिकापाकसंज्ञकं।
भक्षयेत् पलमात्रं तत् यथा चाग्निबलं तथा॥
आमवातं निहन्त्येतत् सर्व्वांश्च पवनामयान्।
ज्वरांश्च विषमान् हन्ति पाण्डुरोगं सकामलं॥
हन्त्युन्मादमपस्मारं प्रमेहान् वातशोणितं।
अम्लपित्तं श्लीतपित्तं शिरःपीड़ां दृगामयं॥
प्रदरं सूतिकारोगं हन्यादेतन्न संशयः।
वपुषः पुष्टिदञ्चैतत् वीर्य्यवृद्धिकरं परं"॥
मेथिकापाकः। १३।
"रसो रसोनस्य पिचुप्रमाणः
क्षिपेच्च तत्राल्पमितं घृतं गोः।
पिबेदुभे तेन दहत्यवश्यं
शिखीव तूलं हि महामवातं"॥
सामान्यवातव्याधिचिकित्साया हि लिखितं रसो-
नाष्टकमामवाते अतिगुणदं। १४।
"सैन्धवं श्रेयसी रास्ना घृतपुष्पा यवानिका।
खर्जिका मरिचं कुष्ठं शुण्ठी सौवर्चलं विड़ं॥
वचाऽजमोदा जरणः पौष्करं मधुरं कणा।
एतान्यर्द्धपलांशानि सूक्ष्मकल्कानि कारयेत्॥
प्रस्थमेरण्डतैलस्य प्रस्थोऽम्लु घृतप्रस्थकं।
काञ्जिकं द्विगुणं दत्त्वा मस्तु च द्विगुणं तथा॥
एतत् संभृत्य संभारं मृनैर्म्मद्दग्निना पचेत्।
सिद्धमेतत् प्रयोक्तव्यमामवातहरं परं॥
पाने चाभ्यञ्जने वस्तौ कुर्य्यादग्निबलं भृशं।
वातार्त्ते वंक्षणे शूले कटीजानूरुसन्धिजे॥
तथा हृत्पार्श्वजे शूले शूलं श्लेष्मणि पीड़िते।
अन्यांश्चानिलजान् रोगान् नाशयत्याशु देहिनां"
इत्यमृतसैन्धवाद्यं तैलं। १५।
"दधिमत्स्यगुड़क्षीरपोतकीमाषपिष्टकं।
वर्जयेदामवातार्त्तो गुड़मांसमनूपजं"॥
इत्यामवाताधिकारः। इति भावप्रकाशः॥
(आत्रेयउवाच।
"लक्षणं शृणु पुत्र! त्वं समासेन वदाम्यहं।
गुर्व्वन्नाहारपुष्टेन मन्दाग्नेश्च व्यायिनः॥
तर्पितैः कन्दशाकैस्तु आमोवायुसमीरितः।
श्लेष्मस्थाने प्रपद्यैव जायते बड्ढवेदनः॥
आमातिसारो वर्त्तते सन्धौ शोफः प्रजायते।
जड़त्वञ्चैव गात्राणां बलासपतनं मुखे॥
शूलमन्यात्रिकेजातवेदनार्त्तोऽपि सीदति।
अङ्गं वैकल्यमायाति आमवाते भिषग्वर"!॥
चिकित्सा यथा॥*॥
"तस्य नो स्नेहनं कार्य्यं पाचनञ्च विधीयते।
आमं संक्षयते प्राज्ञैः चतुर्धा भेदजक्षयैः"॥
विशुम्भ्यामलक्षणं यथा॥*॥
"विशुम्भो शुल्मलक्ष्मेही आमः पक्वाम एव च।
सर्व्वाङ्गगो भवेच्चान्यो वक्ष्ये तस्यापि लक्षणं॥
विशुम्भो गुरु चाध्मानं वस्तिशूलञ्च जायते।
तस्यापि पाचनं कार्य्यं स्नेहनञ्चैव कारयेत्"॥
शुल्मशूक्ष्मामलक्षणं यथा॥*॥
"जठरं गर्ज्जते यस्य शुल्मवत् परिपीड्यते।
कटीदेशे जड़त्वञ्च आमशुल्माभिशङ्कितः॥
तस्यादौ लङ्घनानि स्युर्ज्ञात्वा देहबलाबलं।
पाचनं नैव कर्त्तव्यं शुल्मपाके विमूर्च्छति॥
पाचिते चापि शुल्मामे तदासु मरणं ध्रुवम्"।
स्नेहामलक्षणं यथा॥*॥
"यस्य च खिद्यता गात्रे जाड्यं मन्दाग्निको बली।
स्नेहामो विजनो यस्य स्नेहीवामः प्रकीर्त्तितः॥
तस्य नो स्नेहनं कार्य्यस्योपवासञ्च कारयेत्।
पाचनञ्चैव कर्त्तव्यमामञ्चैवातिसारयेत्"।
आमस्य लक्षणं यथा॥*॥
"यस्य शोफानन जाड्यं तथा चैव घनोदरं।
अरुच्यामातिसारस्य सचासाध्यो विजानता॥
प्रत्याख्येया क्रिया कार्य्या जीवितस्यापि संशये।
पाचनं पाचितं ज्ञात्वा तस्माच्चूर्णानि दापयेत्"॥
चिकित्सा यथा॥*॥
"आमवाते कषायञ्च दशमूलीजलं पिबेत्।
गुड़ूची नागरं पथ्या चूर्णमेतद्गुड़ान्वितं॥
धान्यनागररास्नादेवदारुवचाभयाः।
पाचनञ्चामवाते च श्रेष्ठमेतत्सुखावहं"॥)
आमातीसारः, पुं, (आमरोगेण कृतः अतीसारः।)
षट्प्रकारातीसारमध्ये रोगविशेषः। तस्य

संप्राप्तिरूपे ।
अन्नाशीर्णात् प्रदूताः क्लोमयन्तः
कोष्ठं दोषा धातुसंघान् मलांश्च ।
नानावर्णं नैकशः सारयन्ति
श्लेष्मोपेतं षड्विधं वदन्ति ॥
संसृष्टभेदैर्बहुधा न्यस्तमप्स्ववसीदति ।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितं" ॥
इति निदानं ॥
(चिकित्सा यथा,—
"न तु संग्रहणं दद्यात् पूर्व्वमामातीसारिणे ।
दोषाक्षादौ रुध्यमाना जनयन्त्यामयान् बहून् ॥
ग्रीषपाशयग्रामयक्षीहकुष्ठगुल्मोदरज्वरान् ।
दद्रुकालसकाध्मानयक्ष्मशर्शोगदांस्तथा ॥
क्षीणधातुबलार्त्तस्य बद्धदोषोऽति निर्भृतः ।
आमोऽपि क्षम्यतीयः स्यात् पाचनान्मरणं भवेत्"
इति वैद्यकचक्रपाणिसंग्रहः ॥*॥
"अभया मस्तुना पिष्टा मधुशर्करयान्विता ।
आमातीसारं शमयेद् गुडामलकमेव च ॥
वत्सकं जीरके द्वे च दध्ना पिष्ट्वन्तु दापयेत् ।
आमातिसारशमनं वस्तिशूलं नियच्छति" ॥
इति हारीतः ॥* ॥ "तस्य रूपाणि विज्ञेयमामविष्टुतमवसादितं । रूक्षं द्रवं सशब्दमशब्दं वा विबद्धमूत्रवातमतिसार्य्यते पुरीषं वायुश्चान्तःकोष्ठस्य सशब्दशूलः तिर्य्यक् चरति विबद्ध इत्यामातिसारः" ।
"आमे परिणते यस्तु विबद्धमतिसार्य्यते ।
सशूलपिच्छमल्पाल्पं बद्धशः सप्रवाहिकं ॥
तं मूलकानां यूषेण बदराम्लामथापि वा ।
उपोदकायाः क्षीरिण्या यवाग्या वास्तुकस्य वा ॥
सुवर्चलायाश्चोर्व्या शाकेनावल्गुजस्य वा ।
शुष्काणां कर्कारुकाणां वा जीवन्त्याश्चिर्भटस्य वा ॥
शोणीकायाः सपाठाया शुष्कशाकेन वा पुनः ।
दधिदाड़िमसिद्धेन बद्धस्नेहेन भोजयेत्" ॥
इति चरकः ॥)

आमात्यः, त्रि, (अमात्य एव स्वार्थे अण्।) अमात्यः। मन्त्री। इति द्विरूपकोषः ॥ बलाध्यक्षः।

आमानस्यं, क्ली, (न प्रशस्तं मानसं यस्य सः अमानसस्तस्य भावः। अमानस + ष्यञ्।) आमनस्यं। पीड़ा। दुःखं। इति शब्दरत्नावली ॥

आमान्नं, क्ली, (आमञ्च तत् अन्नमेति कर्म्मधारयः।) अपक्वान्नं। काँचाचाउल इति भाषा। तद्दानमन्त्रो यथा,—
"आमान्नं ते प्रयच्छामि फलताम्बूलसंयुतं ।
सदृतं परमं दिव्यं मया भक्त्या निवेदितं" ॥
इति कृष्णजन्मखण्डे ब्रह्मवैवर्त्तपुराणोक्तदुर्गोत्सवपद्धतिः ॥*॥
बलात् चाण्डालादिस्वामिकापक्वान्नभोजनप्रायश्चित्तं यथा। चाण्डालान्नं भुक्त्वा चिरात्रमुपवसेत् सिद्धं भुक्त्वा पराकः। इति बलाद्भोजनविषयं। इति प्रायश्चित्तविवेकः ॥ चिरात्रमामान्नविषयं। परत्र सिद्धमित्युक्तेः। पराकमाह मनुः।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः" ॥
"तेनात्रामान्ने सिद्धान्नप्रायश्चित्ततुरीयभागविधानादज्ञानादावपि तत्तुरीयकल्पना इति"। इति प्रायश्चित्ततत्त्वं ॥*॥ आमान्नदाने कर्त्तव्यश्राद्धानि। यथा,—
"आपद्यनौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि" ॥
इति श्राद्धतत्त्वधृतप्रचेतोवचनं ॥ अपि च। योगिनीतन्त्रे।
"गिरमेरामश्राद्धे तु अन्नं न क्वाप्यवेत् क्वचित्।
दद्यौ च क्वाप्यवेदन्नं संक्रमे ग्रहणेषु च" ॥
इति तिथ्यादितत्त्वम् ॥*॥

आमाशयः, पुं, (आमस्य आशयः षष्ठीतत्पुरुषः।) अपक्वस्थानं। तत्तु नाभिस्तनयोर्म्मध्यभागः। इति शब्दचन्द्रिका ॥ (यथा महाभारते,—
"पक्वाशयस्त्वधोनाभ्यामूर्द्धमामाशयः स्थितः"।
यथा च सुश्रुते,—
"पक्वामाशययोर्म्मध्ये शिराप्रभवा नाभिर्नाम" ॥*॥
"नाभिस्तनान्तरं जन्तोराऊरामाशयं बुधाः"।
"आमाशयस्तु तदधः" इति भावप्रकाशः ॥
"तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्धगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः"। "आमाशयः श्लेष्मणः"। इति सुश्रुतः ॥)

आमिक्षा, स्त्री, (आमिश्यते मिश्र सेचने बाहुलकात् सक्।) घृतोष्णादुग्धे दधियोगसम्भवा या। छीरसा इति ख्याता। छाना इति केचित्। इत्यमरः ॥ तत्पर्य्यायः। दधिकूर्चिका २ पयस्या ३ क्षीरसन्तानिका ४। इति राजवल्लभादयः ॥
("ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका"। इति सुश्रुतः अत्र हि तक्रकुर्चिका शब्देनामिक्षोच्यते इति पर्य्यायान्तरदृष्टत्वात् ॥)

आमिषं, क्ली, पुं, (आमिश्यते भुज्यते मिश्र श्लेषणे घञ् संज्ञापूर्व्वकत्वान्न गुणः।) मांसं। इत्यमरः ॥ भोग्यवस्तु। संभोगः। उत्कोचः। इति मेदिनी ॥ सुन्दराकाररूपादि। लोभसत्त्वयः। इति हेमचन्द्रः ॥ लाभः। कामगुणः। रूपं। भोजनं। इति हारावली ॥

आमिषप्रियः, पुं, (आमिषं प्रियं यस्य सः।) कङ्कपक्षी। इति राजनिर्घण्टः ॥ मांसाभिलाषिणि त्रि ॥

आमिषाशी, न्, त्रि, (आमिषं अश्नाति आमिष + अश् + णिनि।) मत्स्यमांसभोजनशीलः। तत्पर्य्यायः। ग्रौष्कलः २। इत्यमरः ॥

आमिषी, स्त्री, (आमिषवदाकारोऽस्त्यस्या जटायामिति अर्शआदित्वादच् गौरादीत्वात् ङीष् च।) मिषी। जटामांसी। इति केचित्। इत्यमरटीकायां भरतः ॥

आमीक्षा, स्त्री, (आमिश्यते, मिश्र सेचने बाहुलकात् सक्।) आमिक्षा। आवर्त्तिते तप्ते क्षीरे दधियोगात् या वटिकाकारा विकृतिर्जायते सा। इति पुरुषोत्तमः ॥

आमुक्तः, त्रि, (आङ् + मुच् + क्तः।) पिनद्धः। परिहितवस्त्रादिः। इत्यमरः ॥ परिहितकवचश्चासौ क्तः ॥

आमुषः, पुं, (आम + वस् + क।) कण्टकयुक्तवंशविशेषः। इति शब्दचन्द्रिका ॥ वेउड़बाँश। इति ख्यातः।

आमुष्यायणः, त्रि, (अमुष्य अपत्यम् + फक्। अलुक्।) ख्यातवंशोद्भवः। सत्कुलजातः। इति त्रिकाण्डशेषः ॥

आमूलं, क्ली, (मूलपर्य्यन्तं आमूलं। अव्ययीभावः।) मूलपर्य्यन्तं ॥ (प्रारम्भावधि। यथा, शाकुन्तले।)
"आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजानन्त्ये"।)

आमोदः, पुं, (आङ् + मुद् + घञ्।) अतिदूरगामिगन्धः। इत्यमरः ॥ गन्धः। हर्षः। इति मेदिनी ॥ सुमनद्रव्यगन्धः। इति शब्दरत्नावली।
(यथा रघुवंशे। १।४३।
"आमोदमुपजिघ्रन्तो खनिःश्वासानुकारिणम्"।)

आमोदनं, क्ली, (आङ् + मुद् + ल्युट्।) आमोदकरणं। हर्षणं ॥ प्रीणनं। आनन्दनं।

आमोदितः, त्रि, (आ + मुद् + णिच् + क्त। यद्वा आमोदः सञ्जातोऽस्य तारकादित्वादितच्।) आनन्दितः। सुगन्धितः। सद्गन्धयुक्तः। यथा,—
"पारिजातप्रसूनोत्थगन्धामोदितदिङ्मुखे"।
इति शिवरात्रिव्रतकथा ॥ आनन्दितः। आमोदशब्दादितप्रत्ययेन निष्पन्नः ॥

आमोदी, [न्] त्रि, (आमोद + णिनि।) सुखवासनः। इत्यमरः ॥ कर्पूरादिवटिकाद्यतसुखगन्धः। इति सारसुन्दरी ॥ सुखवासनवटिकादिः। आमोदयुक्तः कर्पूरादिरामोदी। इति भरतः ॥ नानाद्रव्यरचित एकैकश एव वा कर्पूरादिभिर्मुखोपयोग्यसुखवासनवटिकादिः। इति सर्व्वस्वं। गन्धयुक्तः। हर्षविशिष्टः ॥ (यथा भर्त्तृहरिः।
"नवकुटजकदम्बामोदिनो गन्धवाहाः"।)

आम्नायः, पुं, (आङ् + म्ना + घञ् + युक्।) श्रुतिः। वेदः। (यथा महावीरचरिते।
"इतीयो ह्येष मेध्योऽग्निराम्नायः पञ्चमोऽथवा"।
उत्तरचरिते।
"समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः"।)
संप्रदायः। गुरुपरम्पराप्राप्तोपदेश इति यावत् ॥ इत्यमरः ॥ निगमः। उपदेशः। इति मेदिनी ॥ कुलं। आगमः। इति हेमचन्द्रः ॥ कुलक्रमः। इति शब्दरत्नावली ॥ (उपदेशः, शिक्षादानं, तन्त्रशास्त्रं, अभ्यासः, आम्रेडनं, आलोचनं।)

आम्बिकेयः, पुं, (अम्बिकाया अपत्यं स्त्रीभ्यो ढक्।) धृतराष्ट्रो राजा। इति त्रिकाण्डशेषः ॥ (यथा महाभारते।
"परं श्रेयः पाण्डवेया मयोक्तं
न मे तच्च श्रुतवानाम्बिकेयः"।)
कार्त्तिकेयः।

आम्रः, पुं, (अम्यते अम गत्यादौ अमितभ्योदीर्घश्चेति रक् दीर्घश्च।) फलवृक्षविशेषः। आम आँव इति भाषा। तत्पर्य्यायः। चूतः २ रसालः ३। अतिसौरभश्चेत् सहकारः ४। इत्यमरः ॥ कामशरः। कामवल्लभः ६ कामाङ्गः ७ कीरेष्टः ८ माधवद्रुमः ९ मदनाभीष्टः १० सीधुरसः ११ मधूली १२

कोकिलोत्सवः १३ वसन्तदूतः १४ अस्रफलः १५ मोदास्यः १६ मन्मथालयः १७ मधुवासः १८ सुमदनः १९ पिकरागः २० नृपप्रियः २१ प्रियाम्बुः २२ कोकिलावासः २३। इति राजनिर्घण्टः। माकन्दः २४ षट्पदातिथिः २५ मधुव्रतः २६ वसन्तद्रुः २७ पिकप्रियः २८ स्त्रीप्रियः २९ गन्धबन्धुः ३० अलिप्रियः ३१। इति शब्दरत्नावली। मदिरास्वः ३२। इति जटाधरः। बालाम्रफलगुणाः। वायुरक्तपित्तकारित्वं। इति राजवल्लभः। अपिच। कषायत्वं। अम्लरसत्वं। सुगन्धित्वं। कफामयनाशित्वं। अम्लकरत्वं। पित्तप्रकोपवायुरक्तदोषपटुत्वादिरुचिप्रदत्वञ्च। तच्च बद्धास्थिताकृक्। इति राजनिर्घण्टः। * । मध्याम्रगुणाः। पित्तकारित्वं। * । पक्वाम्रगुणाः। वर्णरुचिमांसशुक्रबलकारित्वं। पित्ताविरोधित्वं। वायुनाशित्वं। हृद्यत्वं। गुरुत्वं। अनुलोमनत्वं। इति राजवल्लभः। अपिच। चिरदोषशमताकारित्वं। स्वादुत्वं। पुष्टिजनकत्वं। अधिकधात्वभिवृद्धिकारित्वं। दृष्टिकान्तिकारित्वं। दृष्ट्याश्रमशमनत्वञ्च। इति राजनिर्घण्टः। * । मधुयुक्ताम्रगुणाः। क्षयरोगशीघ्रवातश्लेष्मरोगनाशित्वं। * । घृतयुक्ताम्रगुणाः। वातपित्तनाशित्वं। अग्निबलवर्णकारित्वञ्च। * । दुग्धयुक्ताम्रगुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। स्निग्धत्वं। भेदकत्वं। वातपित्तहारित्वं। शुक्ररक्तबलवर्द्धकत्वञ्च। * । तत्फलास्थिगुणाः। दृष्ट्याश्रर्हिमेहातीसारनाशित्वं। इति राजवल्लभः। * । तत्पत्रगुणाः। कषायत्वं। * । तन्मूलगुणाः। सुगन्धित्वं। कषायत्वं। रुचिकारित्वं। संग्राहित्वं। शीतलत्वञ्च। * । तत्पुष्पगुणौ। रुचिकारित्वं। अग्निदीपनत्वञ्च। * । आम्रपेश्यगुणाः। कषायत्वं। अम्लत्वं। भेदकत्वं। कफवातनाशित्वञ्च। * । दृष्टिमपक्वाम्रगुणः। अम्लरसहानेर्मधुरत्वाच्च पित्तनाशित्वं। * । घुषिताम्रगुणाः। परमरुचिबलवीर्यकारित्वं। लघुत्वं। शीतलत्वं। शीघ्रपाकित्वं। वातपित्तहारित्वं। सारकत्वञ्च। * । तद्बालितरुगुणाः। बलकारित्वं। गुरुत्वं। वातहरत्वं। सारकत्वं। हृद्यत्वं। दृष्टिजनकत्वं। अतिशुक्रवर्द्धकत्वं। कफवर्द्धकत्वञ्च। * । तत्खण्डगुणाः। गुरुत्वं। रोचकत्वं। गुरुपाकित्वं। मधुरत्वं। दृंहणत्वं। बलकारित्वं। शीतलत्वं। वातनाशित्वञ्च। * । अतिशुष्काम्रभल्लगुणाः। मन्दाग्निविषमज्वररक्तामयबद्धगुदोदरव्रणामयकारित्वं। "इतदम्लाम्लविषयं न तु मधुराम्लपरं। मधुरस्य परं नेत्रहितत्वादिगुणत्वात्। यद्यतिशुष्कभल्लकं करोति तदा गुरुशीजलानुपानं। अथवा सौवर्चलेन सह क्षीरं प्रयोक्तव्यं"। * । तत्पल्लवगुणाः। रुचिकारित्वं। कफपित्तनाशित्वञ्च। * । तथा च राजनिर्घण्टः।

"आम्रमामं जलं स्निग्धं मर्दितं दृढपाणिना।
सिताघृताम्बुसंयुक्तं कर्पूरमरिचान्वितं।
प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्म्मितं।
सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम्"।

(तत्रादावाम्रस्य नामानि गुणाश्च।

"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः॥ * ॥
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत्।
अल्पगुदुष्टिहरं शीतं रुचिकृद्ग्राहि वातलम्॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तजित्।
तरुणन्तु तदत्यम्लं रूक्षं दोषत्रयावहम्॥
आम्रमामं त्वचाहीनमातपेऽतिविशोषितम्।
अम्लं स्वादुकषायं स्याद्वेदनं कफवातजित्॥ * ॥
पक्वन्तु मधुरं हृद्यं स्निग्धं बलसुखप्रदम्॥
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम्।
कषायानुरसं वह्नि-श्लेष्म-शुक्र-विवर्द्धनम्॥ * ॥
तदेव रूक्षसम्यक्तं गुरुवातहरं परम्।
मधुराम्लरसं किञ्चित् भवेत् पित्तप्रकोपनम्॥ * ॥
अम्लं क्षुत्रिमपक्वञ्च तद्भवेत् पित्तनाशनम्॥ * ॥
रसस्याम्लस्य हीनत्तु माधुर्य्याच्च विशेषतः॥
उषितं तत्परं रुच्यं बल्यं वीर्य्यकरं लघु॥
शीतलं शीतपाकि स्यादातपित्तहरं सरम्॥ * ॥
तद्रसो गालितो बल्यो गर्ववातहरः सरः।
अहृद्यस्तर्पणोऽतीव दृंहणः कफवर्द्धनः॥ * ॥
तस्य खण्डं गुरुपरं रोचनं चिरपाकि च।
मधुरं दृंहणं बल्यं शीतलं वातनाशनम्॥
वातपित्तहरं रुच्यं दृंहणं बलवर्द्धनम्॥ * ॥
हृद्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम्॥ * ॥
मन्दानलत्वं विषमज्वरञ्च
रक्तामयं बद्धगुदोदरञ्च।
आम्रातियोगो नयनामयं वा
करोति तस्मादति तानि नाद्यात्॥
एतदम्लाम्लविषयं मधुराम्लपरं न तु।
मधुरस्य परं नेत्रहितत्वाद्या गुणा यतः॥
गुरुदोषाम्रसेऽनुपानं स्यादाम्राणामतिभक्षणे।
क्षीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च"॥ * ॥

आम्रबीजस्य गुणाः।

"आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम्।
ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्"॥ * ॥

आम्रनवपल्लवस्य गुणाः॥

"आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्"॥ * ॥
इति भावप्रकाशः॥

"अपक्वमाम्रं फलमेव शस्तं
संग्राहि पित्तास्रजि कोपनञ्च।
तथा विपक्वं मधुरन्तु चाम्लं,
भेद्यं सपित्तामयनाशनञ्च"॥

इति हारीतः॥

"वातपित्तास्रदृक्शूलं बद्धास्थिकफपित्तजित्॥
गुर्व्वाम्रं वातजित् स्वादम्लं कफशुक्रकृत्"।

इति वाभटः॥

"रक्तपित्तकरं बालमाम्रपूर्णं पित्तवर्द्धनम्।
पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम्"॥ * ॥
"आम्रामलकलेहाश्च दृंहणा बलवर्द्धनाः।
रोचनास्तर्पणाश्चोक्ताः स्नेहमाधुर्य्यगौरवात्"॥

इति चरकः॥

"पित्तानिलकरं बालं पित्तलं बद्धकेशरम्॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्।
कषायानुरसं स्वादु वातघ्नं दृंहणं गुरु॥
पित्ताविरोधि सम्यक्तमाम्रं शुक्रविवर्द्धनम्।
दृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्य्यति"॥
इति सुश्रुतः॥)

आम्रगन्धकः, पुं, (आम्रगन्ध + कन्।) समङ्गिलवृक्षः। इति राजनिर्घण्टः॥

आम्रपेशी, स्त्री, (आम्रस्य पेशी।) शुष्कामखण्डं। आम्सी इति भाषा। अस्या गुणाः। अम्लत्वं। कषायत्वं। उष्णत्वं। भेदकत्वं कफवातनाशित्वञ्च। इति राजवल्लभः॥

आम्रातः, पुं, (आम्र + अत् + अच्।) आम्रातकः। इति शब्दमाला। (अस्य गुणाः। यदुक्तं।

"आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्परम्।
पक्वन्तु तुवरं स्वादुरसपाकं हिमं स्मृतम्।
तर्पणं श्लेष्मनं स्निग्धं हृद्यं विष्टम्भि दृंहणम्।
गुरु बल्यं मरुत्पित्तक्षतदाहक्षयापहम्"।

"राजाम्रवृक्ष आम्रातः कामाङ्गो राजपुत्रकः।
राजाम्रन्तुवरं स्वादु विशदं शीतलं गुरु॥
व्याहि रूक्षं विबन्धाध्मवातकृत् कफपित्तनुत्"।

इति भावप्रकाशः। तथा च चरके।

"मधुरं दृंहणं बल्यमाम्रातं तर्पणं गुरु।
सक्षेद्रं श्लेष्मलं शीतं हृद्यं विष्टभ्य जीर्य्यति"॥)

आम्रातकः, पुं, (आम्रं तद्रसम् आ ईषत् अतति माति। अत सातत्यगमने क्वुनादित्वात् वुन्।) वृक्षविशेषः। आम्ड़ा इति भाषा। तत्पर्य्यायः। पीतनः २ कपीतनः ३। इत्यमरः। वर्षपाकी ४। इति रत्नमाला॥ पीतनकः ५ कपिचूड़ा ६ अम्बाटिकः ७ भ्रष्टफलः ८ रसाढ्यः ९ तनुक्षीरः १० कपिप्रियः ११ अम्बरातकः १२ अम्बरीयः १३ कपिचूड़ः १४। इति जटाधरः। तदम्लफलगुणाः। कषायत्वं। अम्लत्वं। हृत्कण्ठहर्षणत्वञ्च। तत्पक्वफलगुणाः। मधुराम्लत्वं। स्निग्धत्वं। पित्तकफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपिच। वह्निबलविशुम्भाजीर्णकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ आम्रावर्त्तः। इति राजनिर्घण्टः॥ (यथा मार्कण्डेयपुराणे।

"आम्रानाम्रातकान् भव्यान्
नारिकेलान् सतिन्दुकान्"। इति।

अस्य पर्य्यायो गुणाश्च।

"आम्रातकः पीतनश्च मर्कटाम्रः कपीतनः॥
आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्परम्।
पक्वन्तु तुवरं स्वादु रसे पाके हिमं स्मृतं।
तर्पणं श्लेष्मलं स्निग्धं हृद्यं विष्टम्भि दृंहणं।
गुरु बल्यमरुत्पित्तक्षतदाहक्षयापहम्"।
इति भावप्रकाशः॥
"आम्रातकः कफलं हृद्यं सक्षेद्रं श्लेष्मवर्द्धनं"।
इति सुश्रुतः॥)

आम्रावर्त्तः, पुं, (आम्रस्य आवर्त्तः।) आम्रशुष्करसः। तत्पर्य्यायः। आम्रातकः २। आमसत्व इति भाषा। अस्य गुणाः। दृष्ट्याश्रर्हिवातपित्तहरत्वम्। सारकत्वम्। रुचिकारित्वम्। सूर्य्यो-

-शुभिः पाकात् लघुत्वञ्च। "पक्वस्य सहकारस्य कटे विस्तारितो रसः। घर्म्मशुष्को मुञ्जदंत्त आम्रातक इति स्मृतः"॥ इति राजनिर्घण्टः॥ (यदुक्तम्।

"आम्रावर्त्तस्तृषाच्छर्द्दिवातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकाल्लघुश्च स हि कीर्त्तितः"।)

आम्रेडितं, क्ली, (आड्+म्रेडि+क्तः।) द्विरुक्तम्। इत्यमरः॥ दुइ तिन् वार वला इति भाषा। (उन्मत्तेन यथा कथितस्य पुनः पुनः कथनं क्रियते एवं कथितस्य द्विरुक्तिवारकथनम्।)

आम्लवेतसः, पुं, (आम्लोऽम्लरसयुक्तो वेतसः।) अम्लवेतसवृक्षः। इति राजनिर्घण्टः॥ (अम्लवेतसशब्दस्य विशेषो ज्ञेयः॥)

आम्ला, त्रि, (आ सम्यक् अम्ला अम्लरसयुक्ता।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥ श्रीवल्ली। इति राजनिर्घण्टः॥

आम्लिका, स्त्री, (आम्ला+कन्।) तिन्तिड़ीवृक्षः। इत्यमरटीकायां रायमुकुटः॥ अम्लोद्गारः। इति शब्दमाला॥ (यथा चरके।

"आम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः"॥)

आम्लीका, स्त्री, (अम्ल+ठक्।) तिन्तिड़ीवृक्षः। इत्यमरटीका॥

आयः, पुं, (आड्+या+ड।) धनागमः। प्राप्तिः। लाभः। (यथा मनुः। ८। ४१९।

"अहन्यहन्यवेक्षेत कर्म्मान्तान् वाहनानि च। आयव्ययौ च नियतावाकरान् कोषमेव च"॥)

स्त्रागारस्तक्षकः। इति हलायुधः॥ (ज्योतिषप्रसिद्धमेकादशभवनम्।)

आयःशूलिकः, त्रि, (अयःशूलेन अर्थानन्विच्छति। अयःशूलदण्डाजिनाभ्यां ठकठञाविति ठक्।) तीक्ष्णकर्म्मा। क्षिप्रकारी। इति भूरिप्रयोगः॥ (यदुक्तम्।

"तीक्ष्णोपायेन योऽन्विच्छेत् आयःशूलिको जनः"।)

आयतः, त्रि,(आड्+यम्+क्तः।) दीर्घः। इत्यमरः॥ लम्बा इति भाषा। (विस्तृतः। विशालः। आकृष्टः। यथा पद्मतन्त्रे।

"तन्तवोऽप्यायता नित्यं तन्तवो बहुलाः समाः"।)

आयतच्छदा, स्त्री, (आयताः च्छदा यस्याः सा।) कदलीवृक्षः। इति त्रिकाण्डशेषः॥

आयतनं,क्ली, (आड्+यत+ल्युट्।) यज्ञस्थानं। देवस्थानं। तत्पर्य्यायः। चैत्यं २। इत्यमरः॥ यथा रामायणे,—

"येभ्यः प्रणमसे पुत्र! चैत्येष्वायतनेषु च"।

"समित्कुशप्रवित्राणि वेद्यश्चायतनानि च। स्थण्डिलानि च विप्राणां शैला रक्षा रुदाः क्षुपाः"॥

आश्रयः, विश्रामस्थानं। यथा चाणक्यः।

"नासमीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत्"॥

कुमारसम्भवे, ७। ५।

"स हरस्तदेकायतनं जगाम"।

भद्रासन भिटा इत्यादिस्थातो वास्तुदेशः। याज्ञवल्क्यः,— [आधिनिदानम्।)

"आरामायतनग्रामनिधानोद्यानवेश्मसु"।)

आयतिः, स्त्री,(आड्+यम्+क्तिन्।) उत्तरकालः। भविष्यत्कालः।

(यथा मनुः, ७। १६६, ७। १७८।

"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः। तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत्"।

"आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्"॥)

प्रभावः। कोषदण्डजं तेजः। इत्यमरः॥ दैर्घ्यं। सङ्गः। इति विश्वहेमचन्द्रौ॥ प्रापणं। इति धरणी॥ (राजतरङ्गिणी।

"प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः। स्मृतिश्लेषां करोत्येव लोभश्च पृथिवीभुजां"॥)

आयत्तः, त्रि, (आड्+यम्+क्तः।) अधीनः। वशीभूतः। इत्यमरः॥ (यथा पद्मतन्त्रे,—

"तत् भद्र! स्वयमायत्तो ह्यात्मा सर्व्वस्य"।)

आयत्तिः स्त्री,(आड्+यत्+क्तिन्।) दिनं। स्नेहः। वशित्वं। सामर्थ्यं। सीमा। इति विश्वः हेमचन्द्रश्च॥ शयनं। दैर्घ्यं। प्रभावः। भविष्यत्कालः। इति धरणी॥ (न्यायपथावलम्बिता। अधीनता।)

आयल्लकं, क्ली, उत्कण्ठा। इति हेमचन्द्रः॥

आयसं, क्ली, (अयस्+अण्।) लौहं। इति भरतः राजनिर्घण्टश्च॥ अयोनिर्म्मितादौ, त्रि॥ (यथा महाभारते,—

"आयसं हृदयं मन्ये तस्य दुष्कृतकर्म्मणः"।

यथा मनुः, ८। ३१५।

"शस्त्रं लोहमयस्त्रीणामायसं दण्डमेव वा"।

रघुवंशे,१७। ६३।

"स चकर्ष परस्मात् तदयस्कान्त इवायसम्"।

(अयोजनितार्थे यथा,—

"विपाके कटु शीतञ्च सर्व्वश्रेष्ठं तदायसम्"॥

इति वैद्यकचक्रपाणिसंग्रहे॥)

आयसी, स्त्री, (अयसा निर्म्मिता। अयस्+अण्+ङीप्।) लौहमयकवचः। तत्पर्य्यायः। अङ्गरक्षिणी २ जालिका ३ जालप्राया ४। इति हेमचन्द्रः॥

आयस्तः, त्रि, (आड्+यस्+कर्त्तरि क्तः।) तेजितः। क्षिप्तः। क्षेपितः। कुपितः। हतः। इति मेदिनी॥ (प्रयत्नशीलः, कार्य्योत्सुकः, यत्नसिद्धः, कष्टसिद्धः।)

आयातं, त्रि, (आड्+या+क्तः।) आगतं। यथा,

"हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः। आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते"॥

इति मार्कण्डेये देवीमाहात्म्यम्॥

आयानं, क्ली, (आड्+या+ल्युट्।) स्वभावः। इति जटाधरः॥ आगमनं॥ (यथा महाभारते,—

"आयाने वासि विदितो रामस्य विदितात्मनः"।

आयामः,पुं, (आड्+यम्+घञ्।) दैर्घ्यं। इत्यमरः॥ (यथा रामायणे,—

"शैलजायामविस्तारमेकैको धरणीतलम्"।

मेघदूते, पूर्व्वमेघे। ५८।

"तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी"।)

आयासः,पुं, (आड्+यस्+घञ्।) श्रान्तिः। तत्पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ प्रयासः ६ व्यायामः ७। इति हेमचन्द्रः॥ (अतियत्नः। प्रयत्नः। यथा साहित्यदर्पणे,—

"रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा"।

महाभारते,—

"श्लोकहर्षौ तथायासः सर्व्वं स्नेहात् प्रवर्त्तते"।

रामायणे,—

"नैवायासं क्वचित् भद्रे प्राप्नुसे न च विप्रियं"।)

आयुः, पुं, क्ली, (एति इण् गतौ छन्दसीण इत्युण्।) जीवितव्याप्यकालः। इति जटाधरः॥ (जीवनं, प्राणाः। यथा महाभारते,—

"अहं केशरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्षो हनूमान्नाम वानरः"।

खनामख्यातस्वन्ध्रवंशीयो राजा, स च नहुषस्य पिता। यथा महाभारते,—

"नहुषो नाम राजर्षिर्यस्तं ते श्रोत्रमागतः। तत्रैव पूर्व्वपूर्व्वेषामायोर्वंशधरः सुतः"।

पुरूरवसः पुत्रः खनामख्यातो राजा। यथा हरिवंशे,—

"बुधस्य तु महाराज विद्वान् पुत्रः पुरूरवाः"।

"तस्य पुत्रा बभूवुस्ते सप्त देवसुतोपमाः। दिवि ज्ञाता महात्मान आयुर्धीमानमावसुः"।

हृदस्य पुत्रः खनामख्यातोऽसुरः। यथा हरिवंशे,—

"हृदस्य पुत्रो ह्यायुर्वै शिविः कालस्तथैव च"।)

आयुः, [स्] क्ली, (एति गच्छतीति इण्+उसि+णिच्।) जीवितकालः। परमायुः। इत्यमरः॥ तत्पर्य्यायः। विजीवितं २ नित्यगः ३ अनुबन्धः ४।

"पुरुषाः सर्व्वसिद्धाश्च चतुर्वर्षशतायुषः। कृते त्रेतादिकेऽप्येवं पादशो ह्रसति क्रमात्"॥

इति वैद्यकं॥

"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः"॥

इति मनुः १। १८३॥ हृतं। इति राजनिर्घण्टः॥

("नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरं। कण्ठाद्दहिर्विनिर्याति पातुं विष्णुपदामृतं॥

पीत्वा चामरपीयूषं पुनरायाति वेगतः। प्रीणयन् देहमखिलं जीवयन् जठरानलम्॥

शरीरप्राणयोरेवं संयोगादायुरुच्यते"।

इति शार्ङ्गधरः॥

"शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितं। नित्यगञ्चानुबन्धश्च पर्य्यायैरायुरुच्यते"॥ इति।

"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले। सन्ति पुनरधिकोनवर्षशतजीविनो मनुष्याः। तेषां विकृतिवर्জ্জैः प्रकृत्यादिबलविशेषैरायुषो लक्षणतश्च प्रमाणमुपलभ्य वयसस्त्रित्वं विभजेत"।

"तत्रैव तत्रायुरुक्तं खलक्षणतो यथावदिहैव तत्र शरीरमानसाभ्यां रोगाभ्यामनभिहतस्य विशेषेण यौवनवतः समन्वागतबलवीर्य्यपौरुषपराक्रमस्य ज्ञानविज्ञानेन्द्रियेन्द्रियार्थबलसमुदाये वर्त्तमानस्य परमर्द्धिरुचिरविविधोपभोगस्य समृद्धसर्व्वारम्भस्य यथेष्टविचारणात् सुखमायुरुच्यते"। इति च।

"असुखमतो विपर्य्ययेण हितैषिणः पुनर्भूतानामस्वास्थ्यादुपरतस्य सत्यवादिनः शमपरस्य परो-

च्यकारिणोऽप्रमत्तस्य चिवर्गं परस्परेणानुपहतमुपसेवमानस्य पूजार्हसम्भूजकस्य ज्ञानविज्ञानोपशमशीलस्य दक्षोपसेविनः सुनियतरागरोगेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमिमञ्चामुञ्चापेक्षमाणस्य स्मृतिमतो हितमायुरुच्यते"। इति च॥

"अहितमतो विपर्य्ययेण प्रमाणमायुषस्त्वर्थेन्द्रियमनोबुद्धिचेष्टादीनां विज्ञातिलक्षणैरुपलभ्यते अनिमित्तैरिदमस्मात् क्षणान्मुहूर्त्ताद्दिवसात्पक्षषण्मासाब्दाब्दशताब्दादुपद्रवाद्वा पक्षान्मासात् षण्मासात् संवत्सरादा स्वभावमापत्स्यते इति। तत्र स्वभावः प्रकृतेरपरमो मरणमनित्यतानिरोधइत्येकोऽर्थः। इत्यायुषः प्रमाणमतो विपरीतमप्रमाणम्"। इति च॥

"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले तस्य निमित्तं प्रकृतिगुणात्मसम्पत् सात्म्योपसेवनञ्चेति"। इति च चरकः॥)

आयुष्कः, त्रि, (आङ्+युज्+क्तः।) कर्म्माध्यक्षः। तत्पर्य्यायः। नियोगी २ कर्म्मसचिवः ३ व्यापृतः४। इति हेमचन्द्रः॥

आयुधः, पुं, (आयुध्यतेऽनेनेति। आङ्+युध्+क।) अस्त्रं। इत्यमरः॥ (आयुधानां त्रयो भेदाः। प्रहरणानि, पाणिमुक्तानि, यन्त्रमुक्तानि चेति। तत्र प्रहरणानि खड्गादीनि, पाणिमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि। "हतायुधो यावदहं तावदन्यैः किमायुधैः"। "किं वक्ष्यत्ययमेवमद्य विमुखं मामुद्यतेऽप्यायुधे"। इति चोत्तरचरिते।)

आयुधधर्म्मिणी, स्त्री, (आयुधस्येव धर्म्मो विद्यते यस्याः। आयुधधर्म्म+इन्+ङीप्।) जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

आयुधागारं, क्ली, (आयुधानां आगारं। षष्ठीतत्।) अस्त्रगृहं। सेलाखाना इति ख्यातं। इति महाभारते राजधर्म्मः॥ तत्र नियुक्तस्य लक्षणं यथा,-

"शास्त्रज्ञातिततत्त्वज्ञः सततं प्रतिजाग्रता।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः"॥
इति मात्स्ये १९८ अध्यायः॥ (यथा मनुः८।२८०।
"कोष्ठागारायुधागारदेवतागारभेदकान्।
हस्त्यश्वरथहर्त्तृंश्च हन्यादेवाविचारयन्"॥)

आयुधिकः, पुं, (आयुधेन जीवति, आयुध+ठक्।) अस्त्रजीवी। तत्पर्य्यायः। शस्त्राजीवः २ कायदण्डिकः ३ आयुधीयः ४। इत्यमरः॥ (यथा महाभारते १९।७।३६।
"न पादरक्षैः संयुक्ताः नान्तरायुधिका ययुः"।

आयुधीयः, पुं, (आयुध+छ।) आयुधिकः। इत्यमरः॥ (योद्धा। यथा मनुः ७। २२२।
"अलङ्कृतश्च सम्पश्येदायुधीयं पुनर्जनं"।
उत्तरचरिते ६। "तर्ज्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेण्यः"।) [रत्नमाला॥

आयुर्द्रव्यं, क्ली, (आयसो द्रव्यम्,) औषधं। इति

आयुर्व्वेदः, पुं, (आयुरनेन विन्दति वेत्ति वेद्यायुर्व्वेदः। आयस्+विद्+करणे घञ्।) अष्टादशविद्यान्तर्गतधन्वन्तरिप्रणीतविद्याविशेषः। वैद्यकशास्त्रं। चिकित्साशास्त्रं। तत्तु अथर्व्ववेदान्तर्गतं। यथा,

"विधातार्थर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन्।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं"॥
इति भावप्रकाशः॥

चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्व्वेदः। अथर्व्ववेदस्य शस्त्रशास्त्राण्युपवेदः॥*॥ अथायुर्व्वेदस्य विवरणम्।

"ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः।
विचिन्त्य तेषामर्थं चैवायुर्व्वेदं चकार सः॥
कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः।
स्वतन्त्रसंहितां तस्मात् भास्करश्च चकार सः॥
भास्करश्च स्वशिष्येभ्य आयुर्व्वेदं स्वसंहितां।
प्रददौ पाठयामास ते चक्रुः संहितास्ततः॥
तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च।
व्याधिप्रणाशबीजानि साध्वि मत्तो निशामय॥
धन्वन्तरिर्दिवोदासः काशीराजोऽश्विनीसुतौ।
नकुलः सहदेवोऽर्किश्यवनो जनको बुधः॥
जाबालो जाजलिः पैलः करथोऽगस्त्य एव च।
एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः॥
चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्।
धन्वन्तरिश्च भगवान् चकार प्रथमे सति॥
चिकित्सादर्पणं नाम दिवोदासश्चकार सः।
चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः॥
चिकित्सासारतन्त्रञ्च भग्नं चाश्विनीसुतौ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः॥
चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनं।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः॥
अवनो जीवदानञ्च चकार भगवान्मुनिः।
चकार जनको योगी वैद्यसन्देहभञ्जनं॥
सर्व्वसारं चन्द्रसुतो जाबालस्तन्त्रसारकं।
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः॥
पैलो निदानं करथस्तन्त्रं सर्व्वधरं परं।
वैद्यनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः॥
चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श।
व्याधिप्रणाशबीजानि बलाधानकराणि च॥
मथित्वा ज्ञानमथनैरायुर्व्वेदपयोनिधिं।
ततस्तन्त्राण्युज्जहरुर्नवनीतानि कोविदाः॥
एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहितां।
आयुर्व्वेदं सर्व्ववीजं सर्व्वं जानामि सुन्दरि॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥
आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्।
धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥*॥
तस्य लक्षणम् यथा,—
"आयुर्हिताहितं व्याधिनिदानं शमनं तथा।
विद्यन्ते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते"॥
तस्य निरुक्तिर्यथा,—
"अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः"॥
इति भावप्रकाशः॥*॥ अन्यत् रोगशब्दे वेदशब्दे वैद्यशब्दे च द्रष्टव्यम्॥

("हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते"॥
"तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः"॥
"किमायु कस्मादायुर्व्वेदः किञ्चायुर्व्वेदः शाश्वतोऽशाश्वत इति। कानि चास्याङ्गानि कैश्चायमध्येतव्यः किमर्थञ्चेति"।
"तत्र भिषजा एष्टेनैवञ्चतुर्णामृक्सामयजुरथर्व्ववेदानामात्मनोऽथर्व्ववेदे भक्तिरादेया वेदोक्ताथर्व्वणः स्वस्त्ययनबलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्रादिपरिग्रहाच्चिकित्सां प्राह चिकित्सा चायुषो हितायोपदिश्यते वेदस्योपदिश्यायुर्वाच्यं तच्चायुश्चेतनाप्रवृत्तिर्जीवितमनुबन्धोधारि चेत्येकोऽर्थः, तदा आयुर्व्वेदयत्यायुर्व्वेदः कथमुच्यते खलक्षणतः सुखासुखतो हिताहिततः प्रमाणाप्रमाणतश्च यतश्चायुष्यानायुष्याणि द्रव्यगुणकर्म्माणि वेदयत्यतोऽप्यायुर्व्वेदः तच्चायुष्याणि अनायुष्याणि च द्रव्यगुणकर्म्माणि केवलेनोपदेक्ष्यन्ते"।
"तानिन्द्रः सहस्रदृगमरगुरुवरोऽब्रवीत् स्वागतं ब्रह्मविदां शान्ततपोधनानां ब्रह्मर्षीणामस्मि भवोग्लानिरप्रभावत्वं वैस्वर्य्यं वैवर्ण्यञ्च ग्राम्यवासक्षततमसुखमसुखानुबन्धं च। ग्राम्यो हि वासो मूलमधर्म्मस्तानां तत्कृतं पुण्यलुब्धैरनुग्रहः प्रजानां स्वशरीरमरुद्भिः कालश्चायमायुर्व्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानाञ्चानुग्रहार्थमायुर्व्वेदमस्मिन्नो मह्यं प्रयच्छतां प्रजापतिरश्विभ्यां। प्रजापतये ब्रह्मा प्रजानामल्पमायुर्व्वीर्य्याधिबहुलमसुखमसुखानुबन्धं अल्पतादल्पतपोदमनियमदानाध्ययनसञ्चयं मत्वा पुण्यतममायुःप्रकर्षकरं जराव्याधिप्रशमनं ऊर्ज्जस्करममृतं शिवं शरण्यमुदाजहार भवन्तो मत्तः श्रोतुमर्हन्त्युपधारयितुं प्रकाशयितुञ्च प्रजानुग्रहार्थमार्षं ब्रह्म च मैत्रीं कारुण्यमात्मनश्चानुत्तमं पुण्यमुदारं ब्राह्ममक्षयं कर्म्मेति"। इति चरकः॥
"तानुवाच भगवान् स्वागतं वः। सर्व्वत्र वा मीमांसा अध्याप्याश्च भवन्तो वत्साः! इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः। ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽल्पधा प्रणीतवान्॥ तद्यथा॥ शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति"॥
"वत्स! सुश्रुत! इह खल्वायुर्व्वेदप्रयोजनं व्याधुपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीत्यायुर्व्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुपधारय। एतद्ध्रुवं प्रथमं प्रागभिघातप्रशमसंरोहादयश्चशिरःसन्धानाच्च"।
"तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति"॥

"ब्रह्मा प्रोवाच ततः प्रजापतिरश्विनौ तस्मादस्विनावश्विभ्यामिन्द्र इन्द्रादहं मघा त्विह प्रदेयमर्घिभ्यः प्रजाहितहेतोः" ॥ इति सुश्रुतः ॥)

आयुर्व्वेदी, [न्] त्रि, (आयुर्व्वेदो ज्ञातव्यत्वेन विद्यते यस्य। आयुर्व्वेद + इनि।) आयुर्व्वेदज्ञः। चिकित्सकः। वैद्यः। इति हेमचन्द्रः राजनिर्घण्टश्च ॥

आयुर्योगः, पुं, (आयुषो जीवितकालस्य योगो भवत्यस्मात्।) औषधं। इति राजनिर्घण्टः।

आयुष्मान्, [त्] त्रि, (आयुस् + मतुप्।) चिरजीवी। दीर्घायुः। तत्पर्य्यायः। जैवातृकः २। इत्यमरः ॥ (यथा मनुः, २। १२५, ३। २६३।

"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने"।

"आयुष्मन्तं सुतं सूते यशोमेधासमन्वितं" इति च॥)

आयुष्मान्, पुं, विष्कुम्भादिसप्तविंशतियोगान्तर्गतद्वितीययोगः। तत्र जातफलं। "यस्यायुष्मान् जन्मकाले धनुष्मान् याने यानं तस्य देशेषु कार्य्यं। कुर्य्यान्नूनं क्रीडनं पुष्पवाद्यां दासैर्व्वासैरन्वितो गर्व्वितश्च" ॥ इति दीपिका ॥

("आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि" इति सुश्रुतः ॥)

आयुष्यं, त्रि, (आयुष् + यत्।) पथ्यं। इति राजनिर्घण्टः ॥ आयुर्हितकारकं ॥ (मनुः। ४।१०६।

"धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं"।

तत्रैव २। ५१।

"आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखम्"।

"आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणं।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्ज्जनं" ॥
इति सुश्रुतः ॥

"आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी"।

इति हारीतः।)

आयुष्यसूक्तं, क्ली, (आयुष्यञ्च तत्सूक्तञ्चेति। कर्म्मधारयः।) नान्दीश्राद्धादौ वसुधारासम्पातनानन्तरपाठ्यो वैदिकमन्त्रविशेषः।

सामगानां तन्मन्त्रो यथा,—

ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसिमहि। प्रजान्त्वरधिनिधेत्तस्मे घृतं जीवेम शरदो वयन्ते। आयुषे मे पवस्व वर्चसे मे पवस्व विदुः एथिव्या दिवो जनित्रा ग्रहणन्त्वापोधःक्षरन्ती सोमो ह्रोदाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्यार्द्धा अमुष्य राय्याय। अमुष्य स्थाने यदर्थं श्रद्धिस्तस्य षष्ठ्यन्तनाम प्रयोज्यं। इति रघुनन्दनभट्टाचार्य्यधृतश्राद्धप्रयोगतत्त्वं ॥ * ॥

यजुर्व्वेदी तन्मन्त्रो यथा,—

ॐ आयुष्यं वर्चस्यं रायष्योषमौद्भिदं इदं हिरण्यं वर्चस्व जेत्रायाविक्षतादुमां। न तदक्षाँसि न पिशाचास्तरन्ति देवानामोजः प्रथमजाँ ह्येतत्। यो बिभर्त्ति दाक्षायणꣳ हिरण्यꣳ सहदेवेषु क्रुणुते दीर्घमायुः समनुष्येषु क्रुणुते दीर्घमायुः। यदा बध्नान्दाक्षायणाꣳ हिरण्यꣳ शतानीकाय सुमनस्यमानाः। तन्न आवधामि शतसारदाय युष्माञ्जरदष्टिर्यथासं"। इति तत्कृतयजुर्व्वेदीयश्राद्धप्रयोगतत्त्वं ॥

आयुस्करः, त्रि, (आयुस् + कृ + क।) परमायुर्जनकः ॥ (आयुर्वृद्धिजनकः;

"सहामलकमुक्तिभिर्दधिसरेण तैलेन वा
गुडेन पयसा घृतेन यवशक्तुभिर्वा सह।
तिलेन सहमाक्षिकेण पललेन सूपेन वा
वपुस्करमरस्करं परममेध्यमायुस्करं" ॥
इति वाभटः ॥)

आयोगः, पुं, (आङ् + युज् + घञ्।) गन्धमाल्योपहारः। व्यापारः। रोधः। इति हेमचन्द्रः ॥ (यथा रामायणे,—

"सरलैः कर्णिकारैश्च किंशुकैश्च सुपुष्पितैः।
स देशो भ्रमरायोगः प्रदीप्त इव लक्ष्यते" ॥)

आयोगवः, पुं, (अयोगव एव स्वार्थे अण्।) शूद्रादैश्यायां जातो जातिविशेषः। इति हेमचन्द्रः ॥ तस्य कर्म्म काष्ठतक्षणं। (यथा मनुः १०।१२, १०। १६।

"शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणां।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥

"आयोगवोऽयं क्षत्ता च चाण्डालश्चाधमो नृणां।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः" ॥)

आयोजनं, क्ली, (आङ् + युज् + ल्युट्।) उद्योगः। आहरणं। द्रव्यासादनं। यथा,—

"कुत्रचित् तण्डुलाः सन्ति क्व च स्थाली क्व चेन्धनं।
तेषामायोजनं कुर्व्वन् मुख्यः कर्त्ताभिधीयते" ॥
इति गोयीचन्द्रधृतकारिका ॥

आयोधनं, क्ली, (आङ् + युध + ल्युट्।) युद्धं। वधः। इति मेदिनी ॥ (रघुवंशे, ६।४२।

"आयोधने क्षणगतिं सहाय-
मवाप्य यः क्षत्रियकालरात्रिं"।

भट्टिः, "आयोधने स्यायुकमस्त्रजातम्"। रघुः, ५। ७१। "आयोधनाग्रसरतां त्वयि वीर! याते।)

आरं, क्ली, (आङ् + ऋ + भावे घञ्।) मुण्डायसं। मुण्डलोहं। इति राजनिर्घण्टः ॥ पित्तलं। इत्यमरटीका ॥ कोणः। प्रान्तभागः। इत्यानन्दलहरीटीका ॥ (चक्राङ्गकाष्ठभेदः। यथा महाभारते,

"आरान्तरेणावपतत् संक्षिप्याङ्गं क्षणेन ह"।

"यस्त्रिघस्रिशतारण्यं वेदार्थं स परः कविः" ॥)

आरः, पुं, (आङ् + ऋ + कर्त्तरि संज्ञायां घञ्।) मङ्गलग्रहः। अग्निः। पित्तलं। इति हेमचन्द्रः ॥ वृक्षभेदः। तत्पर्य्यायः। मधुरास्रफलः २। इति रत्नमाला ॥ रेफज इति ख्यातः ॥

आरकूटः, पुं क्ली, (आरं कूटयति स्तूपीकरोति पचाद्यच्।) पित्तलं। इत्यमरः ॥ (यथा नैषधे।

"अकाक्षने काक्षननाधिकाङ्के किमारकूटाभरणेन न श्रियः"।)

आरक्तं, त्रि, (आरक्तवतीति। आङ् + रक्त + अच्।) रक्तायुक्तं। इति शब्दरत्नावली ॥ रक्तगौरं। इति विश्वः ॥

आरक्तः, पुं, (आङ + रक्त + अच्।) गजकुम्भसन्धिः। इति चिकाण्डशेषः ॥

आरग्वधः, पुं, (आ + रगे शङ्कायां क्विप्। आरगं रोगशङ्कामपि हन्ति अच् बधादेशश्च।) वृक्षविशेषः, सोनालु सोंदालि इति ख्यातः। तत्पर्य्यायः। राजवृक्षः २ सम्याकः ३ चतुरङ्गुलः ४ आरेवतः ५ व्याधिघातः ६ कृतमालः ७ सुवर्णकः ८। इत्यमरः ॥ मध्यानः ९ रोचनः १० दीर्घफलः ११ नृपद्रुमः १२ हिमपुष्पः १३ राजतरुः १४ कण्डुघ्नः १५ ज्वरान्तकः १६ अरुजः १७ स्वर्णपुष्पः १८ स्वर्णद्रुः १९ कुष्ठसूदनः २० कर्णभरणकः २१ महाराजद्रुमः २२ कर्णिकारः २३ स्वर्णाङ्गः २४। इति राजनिर्घण्टः ॥ प्रग्रहः २५। इति रत्नमाला ॥ अस्य गुणाः। अतिमधुरत्वं। शीतलत्वं। शूलज्वरकण्डुकुष्ठमेहकफविषमनाशित्वञ्च। इति राजनिर्घण्टः ॥ अपि च। ज्वरहृद्रोगवातरक्तोदावर्त्तरोगे अतिप्रशस्यत्वं। मृदुत्वञ्च। अस्य फलगुणाः। मधुरत्वं। शुक्रकारित्वं। वातपित्तहारित्वञ्च। इति राजवल्लभः ॥ आमलतास इति हिन्दीभाषा।

"आरग्वधो राजवृक्षः सम्याकश्चतुरङ्गुलः।
आरेवतव्याधिघातकृतमालसुवर्णकाः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः।
आरग्वधो गुरुः स्वादुः शीतलः श्लेष्मनोत्तमः ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत्।
तत्फलं श्लेष्मनं रुच्यं कुष्ठपित्तकफापहं ॥
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं नरं"।

इति भावप्रकाशः ॥

(व्यवहारो यथा,—

"बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे।
योज्योमृदुश्लक्ष्णपाचित्रादिग्रेषाश्चतुरङ्गुलः"। * ॥

ग्रहणप्रणाली यथा ॥ * ॥

"फलकाले फलन्तस्य ग्राह्यं परिणतञ्च यत्।
तेषां गुणवतां भारं सिकतासु निधापयेत् ॥
सप्तरात्रात् समुद्धृत्य श्लेष्मयेदातपे भिषक्।
ततो मज्जानमुद्धृत्य सुखे भाण्डे निधापयेत्"। * ॥

संयोगविशेषे गुणा यथा ॥ * ॥

"दाक्षारसयुतो देयो दाक्षोदावर्त्तपीड़िते।
चतुर्व्वर्षसुखं बाले यावद्दादग्रवार्षिके। * ॥
चतुरङ्गुलमज्झस्तु प्रस्थं वायवाङ्गुलिं।
सुरामण्डेन संयुक्तमथवा कोलसीधुना ॥
दधिमण्डेन वा युक्तं रसेनामलकस्य वा।
क्षौद्रेण सहितं पीत्वा सौवीरकेण वा" ॥
इति चरकः ॥)

आरट्टः, पुं, (आङ् + रट् + टच्।) देशविशेषः। चिकाण्डशेषे क्षत्रियवर्गे आरट्टशब्ददर्शनात् ॥ तत्र आरट्टजोऽपि पाठः ॥ (यथा भारते,—

"पञ्चनद्यो वहन्त्येता यत्र प्रोज्झ्य नगोत्तमान्।
शतद्रुञ्च विपाशाञ्च तृतीयैरावती तथा ॥
चन्द्रभागा वितस्ता च सिन्धुषष्ठा वहिर्गिरेः।
आरट्टा नाम ते देशा म्लेच्छधर्म्मा न तान् व्रजेत्" ॥

"पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्व्वतात्।
आरट्टा नाम वाह्लीका न तेष्वार्य्यो ह्यहं वसेत्"।)

आरट्टजः, पुं, (आरट्टदेशे जायते आरट्ट + जन + डः।) आरट्टदेशोद्भवघोटकः। इति जटाधरः।

त्रिकाण्डशेषभूरिप्रयोगौ च॥ (आरट्टदेशोत्पन्ने, त्रि। यथा महाभारते,—
"सीधोः पानं गुरुतल्पावमर्दो
भ्रूणहत्या परवित्तापहारः।
येषां धर्म्मस्तान् प्रति नास्त्यधर्म्म-
आरट्टजान् पश्चनदान् धिगस्तु"॥)

आरटिः, पुं, (आङ्+ऋ+अटिच्।) आवर्त्तः। तत्पर्य्यायः। कुजहड्डकः २। इति हारावली॥ पाकमारा जल इत्यादि भाषा॥

आरण्यपशुः, पुं, (अरण्ये भवः। अरण्य+यञ्+स चासौ पशुश्चेति कर्म्मधारयः।) अरण्यजातपशुः। स च सप्तधा यथा। महिषः १ वानरः २ ऋक्षः ३ सरीसृपः ४ रुरुः ५ एणतः ६ मृगः ७। इति तिथ्यादितत्त्वे पैठीनसिः॥

आरण्यमुद्गा, स्त्री,(अरण्यमुद्गस्येवाकारः पर्व्व यस्याः। ततः स्वार्थे अण्।) मुद्गपर्णी। मुगानी इति भाषा। इति राजनिर्घण्टः॥

आरण्यराजिः, पुं, (अरण्ये भवः आरण्यः अत्र सिंह एव स एव राजिः।) सिंहराजिः। मकरप्रभार्क्षः। मीनमेषवृषराशयः। इति दीपिका॥

आरतिः,स्त्री, (आङ्+रम्+क्तिन्।) विरतिः। निवृत्तिः। इत्यमरः॥ (उपरमः, नीराजनम्।)

आरनालं, क्ली, (आर्च्छति आङ्+ऋ+अच् आरः। नञ गन्धे ज्वलतीति णः नालः। आरः नालो गन्धो यस्य।) काञ्जिकं। इति हेमचन्द्रः॥
"आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः।
पक्वैर्व्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः"॥
इति राजनिर्घण्टः॥
("लाक्षा हरिद्रा मञ्जिष्ठा कल्कैस्तैलं विपाचयेत्।
वङ्गसीसेनारनालेन दाहशीतज्वरापहं"॥*॥
लाक्षादितैले॥*॥ इति वैद्यकचक्रपाणिसंग्रहः॥)

आरनालकं, क्ली, (आरनालम् एव स्वार्थे कः।) काञ्जिकं। इत्यमरः॥ कांजि इति भाषा।

आरब्धं,त्रि, (आङ्+रभ्+क्तः।) कृतारम्भं। आरम्भे क्ली। यथा,—
"आरब्धं मलमासात् प्राक् यत् कर्म्म न समापितं।
आगते मलमासेऽपि तत् समाप्यं न संशयः"॥
इति मलमासतत्त्वं॥*॥ आरब्धकर्म्मणश्चौचाभावो यथा,—
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकं"॥
इति तिथ्यादितत्त्वं॥

आरम्भः, पुं, (आङ्+रभि+घञ्।) प्रथमकृतिः। तत्पर्य्यायः। प्रक्रमः १ उपक्रमः २ अभ्यादानं ३ उद्घातः ४ आरम्भः ५। इत्यमरः॥ अभ्यादानादित्रयमारम्भमात्रे। प्रक्रमादिपञ्च आरम्भमात्रे इत्येके। केचित्तु प्रक्रमादित्रयं प्रथमारम्भे। अभ्यादानादित्रयं आरम्भमात्रे। इति बहुभिरुक्तमपि न साधु यतः प्रथमकृतिरेव आरम्भः तत्पूर्व्वत्रयं आरम्भे श्रेयस्त्रयं आरब्धे इत्याहुः। इति भरतः॥ त्वरा। उद्यमः। वधः। दर्पः। इति मेदिनी॥ प्रस्तावना। इति त्रिकाण्डशेषः॥ आद्यकृतिः। यथा,—
"मीनादिस्थो रविर्यैर्यामारम्भप्रथमत्वके।
भवेत्तेऽब्दे चान्द्रमासास्तैस्त्रया द्वादश स्मृताः"॥
आरम्भप्रथमत्वके आद्यकृत्यादयसमये। इति मलमासतत्त्वम्॥ पारिभाषिकारम्भो यथा,—
"आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया"॥
इति तिथ्यादितत्त्वम्॥ (यथा मेघदूते। ३७।—
"इत्यारम्भे हर पशुपतेरर्द्धनागाजिनेच्छाम्"।
साहित्यदर्पणे। प्रमथपरिच्छेदे।
"ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामः"। रघुवंशे। १।१५।
"आगमैः सदृशारम्भ आरम्भसदृशोदयः"।)

आरवः, पुं, (आङ्+रु+अच्।) शब्दः। इत्यमरः॥ (यथा रामायणे। "वानराणामुदारवं"।)

आरवी, स्त्री, आरवनामकम्लेच्छदेशीयभाषा। यथा,
"श्लेषाश्लेषा मघा पूर्व्वा रेवती भरणीहृदये"।
विशाखार्द्रोत्तराषाढशतभे पापवासरे॥
लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्";
इति गणपतिमुहूर्त्तः॥

आरा, स्त्री, (आङ्+ऋ+अच्+टाप्।) चर्म्मभेदकास्त्रं। तत्पर्य्यायः। चर्म्मप्रभेदिका २। इत्यमरः॥
"उद्यम्याराभयकायोत्थितस्य"। इति माघः।)

आराग्रं, क्ली, (आरायाः अग्रं षष्ठीतत्।) अर्द्धचन्द्राद्यस्त्रमुखं।
"अर्द्धचन्द्रखुरप्रादिधाराग्रं मुखमुच्यते"।
"आराग्रन्तु मुखन्तेषां पुष्पपत्रादिभेदतः"॥ इति हलायुधः॥

आरात्, व्य, (आ राति। रा दाने बाहुलकादातिप्रत्ययः।) दूरं। निकटः। इत्यमरः॥
(यथा, उत्तरचरिते।
"मेघमालेव यस्यायमारादपि विभाव्यते"। इति
"तमर्थमारादभिवर्त्तमानम्"। इति रघौ २।१०।

आरातिः, पुं, (आङ्+रा+क्तिन्।) अरातिः। शत्रुः। इति भरतः दिरूपकोषश्च॥

आरात्रिकं, क्ली, (आङ्+रात्रि+कन्।) नीराजननिमित्तदीपः। नीराजना। नीराजनयात्रश्च। आरति इति भाषा। तथाच हरिभक्तिविलासे।
"ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयं।
महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः॥
प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा।
आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकं"॥
अन्यच्च।
"आदौ चतुष्पादतले च विष्णो-
र्द्वौ नाभिदेशे मुखमण्डलेकं।
सर्व्वेषु चाङ्गेष्वपि सप्तवारा-
नारात्रिकं भक्तजनस्तु कुर्य्यात्"॥

आराधनं, क्ली, (आङ्+राध्+ल्युट्।) साधनं। प्राप्तिः। तोषणं। इत्यमरः॥ पचनं। इति मेदिनी॥ (यथा वैराग्यशतके भर्त्तृहरेः ५।
'मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः'।
उत्तरचरिते। प्रथमाङ्के।
"स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा"।
कुमारसम्भवे १। ५९।
"आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्"।)

आराधना, स्त्री, (आङ्+राध्+णिच्+युच्+स्त्रीत्वात् टाप्।) साधना। तत्पर्य्यायः। सेवा २ भक्तिः ३ परिचर्य्या ४ प्रसादना ५ शुश्रूषा ६ उपासना ७ वरिवस्या ८ परिष्टिः ९ उपचारः १०। इति हेमचन्द्रः॥

आरामः, पुं, (आरम्यतेऽत्र, आङ्+रम्+आधारे घञ्।) उपवनं। इत्यमरः॥ बागान् इति भाषा। (यथा, मनुः,—८। २९२। ८। २९४।
"क्षेत्रकूपतडागानामारामस्य सरस्य च"।
"सरं तडागमारामं क्षेत्रं वा भीषया हरन्"॥)

आरामशीतला,स्त्री,(आरामत्वात् शीतला खिग्धा।) सुगन्धिपत्रिविशेषः। वन्यर्य्यादिवर्गे लिखिता। तत्पर्य्यायः। आनन्दी २ शीतला ३ सुगन्धिनी ४ रामा ५ महानन्दा ६ गन्धाढ्या ७ रामशीतला ८। अस्या गुणाः। तिक्तत्वं। शीतलत्वं। पित्तहारित्वं। दाहश्लोथप्रशमनत्वं। विस्फोटव्रणरोपणत्वञ्च। इति राजनिर्घण्टः॥ (यथा वैद्यके।
"आरामशीतला तिक्ता शीतला पित्तहारिणी"।)

आरालिकः, त्रि, (आरालं कुटिलं चरति इति ठक्।) सूपकारः। पाचकः। इत्यमरः॥

आरावः, पुं, (आङ्+रु+घञ्।) शब्दः। इत्यमरः॥ (यथा महाभारते।
"आरावं माटवर्गस्य भृगूणां क्षत्रियैर्वधे"।
"आरावः सुमहांश्चासीत्"।)

आरुः, पुं, (ऋ+उण्।) वृक्षभेदः। कर्कटः। शूकरः। इति मेदिनी॥

आरुः,पुं, (ऋच्छति अर्यते वा। ऋ+ऊ+णिच्।) पिङ्गलवर्णः। तद्युक्ते त्रि। इत्युणादिकोषः॥

आरूकं, क्ली, (आरू+कन्।) हिमाचले प्रसिद्धौषधीविशेषः। आड़ इति भाषा। तत्पर्य्यायः। वीरसेनं २ वीरं ३ वीरारुकं ४। तत्पत्रगुणादिभेदतः चतुर्जातिः। तेषां गुणाः। मधुरत्वं। हिमत्वं। वर्ण्यःप्रमेहगुल्मास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यथा चरके।
"अक्षं पत्रकं द्राक्षा वदर्य्याश्चारुकाणि च"॥)

आरूढः, त्रि, (आङ्+रुह्+कर्त्तरि क्तः।) कृतारोहणः। वृक्षादिर उपर चढ़ा व्यक्ति इति भाषा। यथा,—
"राम रामेति रामेति क्रूजन्तं मधुराक्षरं।
आरूढकविताशाखं वन्दे वाल्मीकिकोकिलं"॥
इति रामायणपाठस्य पूर्व्वभाग्श्लोकः॥
(यथा स्मृतिः।
"आरूढो नैष्ठिकं धर्म्मं यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा"॥
गीता।
"योगारूढस्य तस्यैव शमः कारणमुच्यते"।)

आरेवतं, क्ली, (आरेवयति निस्तारयति मलं सारकत्वात्। रेङ् प्लवगतौ। णिच्+विच्॥ अतति। अत+अच्। तत आरेव् चासौ अतश्चेति।) पारावतवृक्षफलं। इति राजनिर्घण्टः॥
("मूलकं शुष्कमाद्यञ्च वर्षाभूः पञ्चमूलकं। आरेवतपलाशांशु पक्षा तेन घृतं पचेत्"॥ इति सुश्रुतः वैद्यकचक्रपाणिसंग्रहश्च॥)

आरेवतः, पुं, (आरेवयति रेचयति मलं सारकत्वात् आङ्+रेव्+णिच्+विच्+अतच्।) आरग्वधवृक्षः। इत्यमरः॥

आरोग्यं, क्ली, (अरोगस्य भावः। ष्यञ्।) व्याध्यभावः। तत्पर्य्यायः। अनामयं २। इत्यमरः॥ पाटवं ३ लाघवं ४ वार्त्तं ५। इति राजनिर्घण्टः॥ ("आरोग्यं तत् सुखावहं"। इति शार्ङ्गधरः॥
"धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्"।
"सुखसंज्ञकमारोग्यम्,"
"वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः।
पथि वेश्मप्रवेशे तु विद्यादारोग्यलक्षणम्॥"
इति चरकः॥
"सुखमात्रं समासेन सदृत्तस्यैतदीरितं।
आरोग्यमायुरर्थो वा गासद्भिः प्राप्यते नृभिः"॥
इति सुश्रुतः॥)

आरोग्यशाला, स्त्री, (आरोग्यार्था शाला। मध्यपदलोपिकर्म्मधारयः।) आरोग्यदानयष्टं। चिकित्सालयः। यथा,—
"धर्म्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
अतस्त्वारोग्यदाता च नरो भवति सर्व्वदः॥
आरोग्यशालां कुर्व्वीत महौषधपरिच्छदां।
विदग्धवैद्यसंयुक्तां वह्न्नरससंयुतां॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः।
ओषधीमूलतत्त्वज्ञः समुद्भवगुणावित्॥
बलवीर्य्यविपाकज्ञः शालिमांसौषधीगणे।
त्यागिवद्देहिनां तद्वदनुकूलः प्रियंवदः"॥
इति वैद्यकं॥

आरोपः, पुं, (आङ्+रुह्+णिच्+घञ्।) मिथ्याज्ञानं। यथा। "असर्पभूते रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपः अध्यारोपः"। इति वेदान्तसारः॥ मिथ्याविष्करणं। यथा। "असूया तु दोषारोपो गुणेष्वपि"। इत्यमरः॥
(यथा साहित्यदर्पणे। १०म परिच्छेदे।
"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा"।
"रूपितं रोपितारोपो विषये निरपह्नवे"॥
"यत्र कस्यचिदारोपः परारोपणकारणम्"।)

आरोपणं, क्ली, (आङ्+रुह्+णिच्+ल्युट्।) न्यासः। संस्थापनं। (शस्त्रादीनां रोपणं। शस्त्रासनादौ ज्यादीनां संयोजनं, उन्नमनं, समुत्थापनं, यथा साहित्यदर्पणे। १०म परिच्छेदे।
"यत्र कस्यचिदारोपः परारोपणकारणम्"।
रामायणे। आदिकाण्डे।
"यद्यस्य धनुषो रामः कुर्य्यादारोपणं मुने"।)

आरोपितं, त्रि, (आङ्+रुह्+णिच्+क्तः।) कृतारोपणं। निहितं। न्यस्तं। इति हलायुधः॥

कल्पितं॥ (यथा कुमारसम्भवे ३। ३५।
"तं देशमारोपितपुष्पचापे"। काव्यप्रकाशे।
"समस्तवस्तुविषयं औता आरोपिता यदा"।)

आरोहः, पुं, (आङ्+रुह्+घञ्।) दैर्घ्यं। वरस्त्रियाः श्रोणिः। इत्यमरः॥ (यथा माघे "आरोहैर्निविडैरहन्निवम्बिम्बैः"।) अवरोहः। आरोहणं। गजारोहः। समुच्छ्रयः। इति मेदिनी॥ ("आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः"। इति रामायणे।) परिमाणविशेषः। नितम्बः। इति हेमचन्द्रः॥ (आरोहति यः। आङ्+रुह्+अच्। निषादी। यथा, हरिवंशे,—
"अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश"।)

आरोहकः, त्रि, (आङ्+रुह्+ण्वुल्।) आरोहणकर्त्ता।

आरोहणं, क्ली, (आरुह्यतेऽनेन। आङ्+रुह्+ल्युट्।) सोपानं। सिढ़ि इति भाषा। (भावे ल्युट्।) समारोहः। नीचादूर्द्ध्वगमनमिति यावत्। (यथा कुमारसम्भवे १। ३९।
"आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्"।)
प्ररोहणं। अङ्कुरादिजननमिति यावत्। इति मेदिनी॥

आर्किः, पुं, (अर्कस्यापत्यं। अर्क+इञ्।) अर्कपुत्रः। शनैश्चरः। इति ज्योतिःशास्त्रं॥ (वैवस्वतमनुः, सुग्रीवः, कर्णश्च।)

आर्गलः, पुं क्ली, (अर्गल एव स्वार्थे अण्।) अर्गलः। इति द्विरूपकोषः॥ खिल इति भाषा।

आर्ग्वधः, पुं, आरग्वधवृक्षः। इति शब्दचन्द्रिका॥ ("आरग्वधशब्देऽस्य गुणादयो ज्ञातव्याः"।)

आर्घा, स्त्री, (आङ्+अर्घ्+अच्।) पीता दीर्घतुण्डा षट्पदसन्निभा मक्षिका। इति राजनिर्घण्टः॥

आर्घ्यं, क्ली, (आर्घ्यया मक्षिकया विहितम्। आर्घा+यत्।) आर्घानाममक्षिकोत्पन्नमधु। तस्य गुणाः। अतिशुक्रचक्षुर्हितकारित्वं। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यदुक्तं,—
"मधूकवृक्षनिर्य्यासं जरत्कार्व्वाश्रमोद्भवाः।
सवन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः।
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः।
आर्घास्तासूद्भवं यत् तदार्घ्यमित्यपरे जगुः"॥
यथा सुश्रुते,—
"आर्घ्यं मधुरतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटु पाके च बल्यं तिक्तमवातलम्"॥
इदं हि अष्टविधमधुजातिमध्ये परिगणितम्।
"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः"॥)

आर्त्तः, त्रि, (आङ्+ऋ+क्तः।) पीड़ितः। अशुद्धः। यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः"॥
इति प्रायश्चित्ततत्त्वं॥ (दुःखितः, कातरः, शोकाभिभूतः, उद्वेजितः, विरक्तः, अपकृतः, उत्पीड़ितः। यथा शाकुन्तले, प्रथमाङ्के।
"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि"।
"देव्योऽपि सम्मतः शिष्टस्तस्मार्त्तस्य यथौषधम्"।
इति रघौ। १। २८। (तथा च चरके॥
"नाश्विनावार्त्तं भेषजेनोपपादयेताम्"। इति॥

आर्त्तगलः, पुं, (आर्त्त इव गलति पचाद्यच्।) नीलझिण्टी। तत्पर्य्यायः। वाणः २ वाणा ३ दासी ४ आर्त्तगलः ५। इत्यमरटीका च॥
("दासे आर्त्तगलश्च सः"। इति भावप्रकाशः॥)

आर्त्तवं, क्ली, (ऋतुरस्य प्राप्तः, अण् यद्वा ऋतुरेव। प्रज्ञादिभ्यश्चेत्यण्।) स्त्रीरजः। इत्यमरः॥ पुष्पं। इति मेदिनी॥ (यथा मनुः, ३। ४८।
"तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियं"।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने"॥
अथार्त्तवस्य स्वरूपमाह।
स्त्रीणां रस एव मासेनार्त्तवं भवतीत्युक्ता पुनराह सुश्रुत एव।
"मासेनोपचितं काले धमनीभ्यस्तदार्त्तवं।
ईषदिवर्णकृष्णञ्च वायुर्योनिमुखं नयेत्"॥
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह।
"शुक्रशोणितप्रतिमं यच्च यदा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यदासो न विरज्यते"॥
आर्त्तवस्य वर्णत्रयाभिधानं। वातादिप्रकृतिभेदेन वर्णभेदात्। यदासो न विरज्यते। यदासो लग्नं प्रक्षालितं तदासस्यजति न तु विकृततरकं कुर्य्यात्"।
इति भावप्रकाशः॥
"मासान्निष्पिच्छदाहार्त्ति पक्षराच्चानुबन्धि च।
नैवातिबहुलाल्पत्वमार्त्तवं शुद्धमादिशेत्॥
शुक्लाभलसवर्णञ्च पद्मालक्तकसन्निभं।
इन्द्रगोपकसङ्काशमार्त्तवं शुद्धमेव तत्"॥
इति चरकः,—
"शुक्रशोणितप्रतिमं यत्तु यदा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यदासो न विरज्यते॥
विधिमुत्तरवक्ष्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतस्रश्चार्त्तवादिषु।
कुर्य्यात् कल्कान् पिचुंश्चापि पथ्यान्याचमनानि च॥
यष्टिभूते पिबेत् पाठां भूषणं वृक्षकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जातुल्ये तथार्त्तवे॥
पिबेद्वृक्षस्त्रियः क्षारयवक्षन्दनक्षायमेव च"।
"आर्त्तवं श्रोणितन्त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकत्वापरजीवरक्तमाडराचार्य्याः"॥
"एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवमिति"॥ इति सुश्रुतः॥)

आर्त्तवः त्रि, (ऋतुः प्राप्तोऽस्य। अण्।) ऋतूद्भवः। इति मेदिनीकरहेमचन्द्रौ॥ यथा रामायणे,—
"आर्त्तवान्युपभुञ्जाना पुष्पाणि च फलानि च"।
रघौ ८। ३६।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्"।)

आर्त्तवी, स्त्री, वाजिनी। घोटकी। इति राजनिर्घण्टः॥

आर्त्तिः, स्त्री, (आङ्+ऋ+क्तिन्।) पीड़ा। धनुष्कोटिः। इत्यमरटीकायां भरतः॥ रोगः। इति

राजनिर्घण्टः ॥ (यथा मेघदूते,पूर्व्वमेघे । ५४ ।
"आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्" ।
सुश्रुते,—
"दाहातिसारपित्तास्रमूर्च्छामद्यविषार्त्तिषु" ।)
आर्द्र, त्रि, (अर्द्द + रक् दीर्घश्च ।) सजलवस्तु । भिजा इति भाषा । तत्पर्य्यायः । सार्द्रं २ क्लिन्नं ३ क्लिन्नितं ४ तिमितं ५ समुन्नं ६ उत्तं ७ । इत्यमरः ॥ (तच्च द्विविधं यदुक्तं,—
'आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा ।
सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते ॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकम् ।
धुस्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते ॥
वटाश्वत्थकरीराद्यमार्द्रद्रव्यं तु नीरसं ।
सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात् ।
ग्रातला वच्चसीऽण्डसौरिण्याद्यास्तु तीक्ष्णकाः ।
दुग्धिकार्कक्षीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः" ॥
यथा रघुवंशे, "आर्द्रान्ततारोपयमन्त्रभूतां" ।
मेघदूते उत्तरमेघे २५ ।
"तन्वीमाद्रां नयनसलिलैः सारयित्वा कथञ्चित्") ॥
आर्द्रकं, क्ली, (अर्द्द्यति कफं आर्द्रं । ततः कन् । यद्वा आर्द्रयति जिह्वायां । क्वन् ।) कटुमूलविशेषः । आदा इति भाषा । तत्पर्य्यायः । शृङ्गवेरं २ इत्यमरः ॥ कटुभद्रं ३ कटूत्कटं ४ । इति केचित् ॥ गुल्ममूलं ५ मूलजं ६ कन्दरं ७ वरं ८ महौषं ९ सैकतेष्टं १० अनूपजं ११ अपाकशाकं १२ चान्द्राख्यं १३ राजकन्दं १४ सुशाककं १५ शाकं १६ आर्द्रशाकं १७ सच्छाकं १८ । इति राजनिर्घण्टः ॥ अस्य गुणाः । कफवातविबन्धानाहशूलपित्तनाशित्वं । हृद्यत्वं । रुचिशुक्रकारित्वञ्च । इति राजवल्लभः ॥ अपिच । उष्णत्वं । कटुत्वं । विपाके शीतलत्वं । लघुत्वं । अग्निदीपनत्वं । श्लेष्मकण्ठामयनाशित्वञ्च । इति राजनिर्घण्टः ॥ नवार्द्रकगुणाः । भोजनाग्रे पथ्यत्वं । जिह्वाकण्ठविशोधनत्वं । अग्निसन्दीपनत्वं । हृद्यत्वं,—
"वातपित्तकफेभानां शरीरवनचारिणां ।
एक एव निहन्तास्ति नवार्द्रककेशरी" ॥
इति द्रव्यगुणः,—
"आर्द्रकं शृङ्गवेरं स्यात् कटुभद्रं तथार्द्रिका ।
आर्द्रिका मेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी तथा ।
कटुका मधुरा पाके रूक्षवातकफापहा ।
ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ।
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनं ।
कुष्ठे पाण्डामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकं" ॥
इति भावप्रकाशः ॥
(तदार्द्रकमेतच्च, इति वाभटः ॥
"रोचनं दीपनं हृद्यमार्द्रकं विश्वभेषजं ।
वातश्लेष्मविबन्धेषु रसलस्योपदिश्यते" ॥
इति चरकः ॥
"कफानिलहरं स्वर्य्यं विबन्धानाहशूलनुत् ।
कटूष्णं रोचनं हृद्यं शृङ्गवेरार्द्रकं स्मृतम्" ॥
इति सुश्रुतः ॥)
आर्द्रपटी, [न्] पुं, (आर्द्रपट + इनि ।) आर्द्ररक्तवस्त्रावृतकर्त्तृकशत्रुनाशफलकाभिचारकर्म्मविशेषः । यथा । "अथार्द्रपटी । प्रणवो हृदयं भगवति चामुण्डे रक्तवाससे अप्रतिहतरूपपराक्रमे अमुकवधाय विचेतसे वह्निवल्लभा । आर्द्ररक्तपटेनाहृतः समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणामुख ऊर्द्ध्वबाङ्ध्यायेत् यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति शत्रोः" । इति तन्त्रसारः ॥ आर्द्रपटविशिष्टे, त्रि ॥
आर्द्रमाषा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥ माषाणी इति भाषा ।
आर्द्रशाकं, क्ली, (आर्द्रं शाकमस्य ।) आर्द्रकं । इति राजनिर्घण्टः ॥
आर्द्रा, स्त्री, (आर्द्र + टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषष्ठनक्षत्रं । अस्य रूपं । पद्माक्षत्रुज्ज्वलैकतारकामयं । अस्या अधिष्ठात्री देवता शिवः । इति कालिदासः ॥ मणित्युल्यैकतारात्मकं । इति केचित् ॥ तत्र जातफलं ।
"क्षुधाधिको रुक्षशरीरकान्तिः
कलिप्रियः कोपयुतोऽविनीतः ।
प्रसूतिकाले च भवेत् किलार्द्रा
नचार्द्रचेताः शरजागतेऽपि" ।
इति कोष्ठीप्रदीपः ॥
आर्द्रालुब्धकः, पुं, (आर्द्रायां तन्नाम्नि प्रसिद्धनक्षत्रे लुब्धक इव ।) केतुग्रहः । इति हलायुधः ॥
आर्द्रिका, स्त्री, (आर्द्रक + टाप् ।) आर्द्रकं । इति भावप्रकाशः ॥
("आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तकृत्" ॥ इति वाभटः ॥)
आर्य्यः, त्रि, (अर्त्तुं प्रकृतमाचरितुं योग्यः । अर्य्यते वा ॥ ऋ + ण्यत् ।) सत्कुलोद्भवः । इत्यमरः । पूज्यः । श्रेष्ठः । वृद्धः । इति शब्दरत्नावली ॥ सत्कृतः । इत्यजयः ॥ (मान्यः, उदारचरितः, शान्तचित्तः । यथा, रामायणे, ३ काण्डे ।
"योऽहमार्य्येण परवान् भ्राता ज्येष्ठेन भाविनि" ।
न्यायपथावलम्बी, प्रकृताचारशीलः, सततकर्त्तव्यकर्म्मानुष्ठाता । यदुक्तं,
"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।
तिष्ठति प्राकृताचारे स तु आर्य्य इति स्मृतः" ॥
धार्म्मिकः । धर्म्मशीलः । यथा, मनुः, १० । ७५७ ।
"आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्" ।
उचितः । यथा, रामायणे,—
"मार्गमार्य्यं प्रपन्नस्य नानुमन्येत कः पुमान्" ॥
नाट्योक्तौ सम्मानसूचकमिदं नाम प्रायेण मान्यजनाङ्काने व्यवह्रियते । यथा, साहित्यदर्पणे, षष्ठपरिच्छेदे ।
"खेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः" ।
"वाचौ नटीसूत्रधारावार्य्यनाम्ना परस्परं" ॥)
आर्य्यः, पुं, (अर्त्तुं सदाचरितुं योग्यः । ऋ + ण्यत् ।) स्वामी । वृद्धः । इति हेमचन्द्रः ॥ सुहृत् । इत्यजयः । (श्रेष्ठवर्णः । म्लेच्छेतरजातिः । यदुक्तं महाभारते ।
"म्लेच्छाश्चान्ये बहुविधाः पूर्व्वं ये निकृता रणे ।
आर्य्याश्च पृथिवीपालाः" । इति । स्वनामख्यातः सावर्णमनोः पुत्रः । यथा, हरिवंशे ।
"वरीयांश्चावरीयांश्च संमतो धृतिमान् वसुः ।
चरिष्णुरार्य्यो धृष्णुश्च राजः सुमतिरेव च ।
सावर्णस्य मनोः पुत्राः भविष्या दश भारत!" ॥)
आर्य्यकं, क्ली, पिण्डपाचादिपिष्टकार्य्यं । इति चिकाण्डशेषः ॥
आर्य्यकः, पुं, (आर्य्य + स्वार्थे कन् ।) पितामहः । मातामहः । इति शब्दमाला । (यथा रामायणे,—
"अद्य ते कतिचिद्राज्यक्षुतस्यार्य्यकवेश्मनः" ।
"आर्य्यकस्ते तु कुशली युधाजिन्मातुलस्तव" ।
महाभारते,—
"आर्य्यकेण च दृष्टः स दृष्ट्या आर्य्यकेण च ।
तदा दौहित्रदौहित्रैः परिष्वक्तः सुपीड़ितम्" ।
पूज्यव्यक्तिमात्रम् । स्वनामख्यातो नागश्रेष्ठः, यथा महाभारते,—
"आर्य्यकस्योग्रकस्यैव नागः कनकपोतकः" ।)
आर्य्यका, स्त्री, (आर्य्यक + टाप् । उदीचामात इति पक्षे इत्त्वाभावः ।) श्रेष्ठा स्त्री । इति शब्दरत्नावली ॥
आर्य्यपुत्रः, पुं, (आर्य्यस्य पुत्रः । षष्ठीतत्पुरुषः ।) भर्त्ता । स्वामी । इति हेमचन्द्रः ॥ (यथा रामायणे,—
"आर्य्यपुत्र! पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते" ॥)
गुरुपुत्रः । मान्यस्य पुत्रः ।
आर्य्यमिश्रः, त्रि, (आर्य्यः श्रेष्ठो मिश्रश्च ।) गौरवितः । इति चिकाण्डशेषः ॥ (माननीयः, पूज्यः । यथा रामायणे, २ काण्डे ।
"समस्तमार्य्यमिश्राणां साधूनां गुणवर्त्तिनाम्" ।
उत्तरचरिते, प्रस्तावनायां ।
"अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्य्यमिश्रान् विज्ञापयामि" ।)
आर्य्या, स्त्री, (ऋ + ण्यत् + स्त्रियां टाप् ।) पार्व्वती । इति चिकाण्डशेषः । छन्दोविशेषः । तस्या लक्षणम् ।
"यस्याः पादे प्रथमे द्वादशमात्राः स्थितास्तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या" ॥
इति श्रुतबोधः ॥ अपिच ।
"लक्ष्मैतत्प्रभवगणा गोपेता भवति नेह विषमे जः ।
षष्ठो जश्च न लघुर्वा प्रथमेऽर्द्धे नियतमार्य्यायाः ॥
षष्ठे द्वितीयवात्परकेऽस्मिन् मुखलाच्च सयतिपदनियमः ।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो जः" ॥
सा नवधा ।
"पथ्या विपुला चपला मुखचपला जघनचपलाच ।
गीत्युपगीत्युद्गीतय आर्य्यागीतिश्च नवधार्य्या" ॥
इति छन्दोमञ्जरी ॥ श्रेष्ठा स्त्री ॥
आर्य्यावर्त्तः, पुं, (आर्य्या आवर्त्तन्तेऽत्र । आर्य्य + आ + वृत् + आधारे घञ् ।) विन्ध्यहिमाचलयोर्मध्यदेशः । तत्पर्य्यायः । पुण्यभूमिः २ । इत्यमरः ॥ यथा,—
"आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः" ॥
इति मानवे २ । २२ ॥ अपि च, अमरे ।—

"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः"।
आर्य्यिका, स्त्री, (आर्य्य + स्वार्थे कन् + अत इत्वं।) श्रेष्ठा स्त्री। इति वोपदेवः॥
आर्षः, पुं, (ऋषे रिदं। ऋषि + अण्।) विवाहविशेषः। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं। यथा, याज्ञवल्क्यः,—
"यज्ञस्थायर्त्विजे दैव आर्षं आदाय गोयुगं।
चतुर्दश्यं प्रथमजः पुनात्युत्तरजश्च षट्"॥
(यथा मनुः, ३। २९।
"एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः।
कन्याप्रदानं विधिवदार्षो धर्म्मः स उच्यते"॥)
ऋषिप्रणीते त्रि॥ (यथा मनुः १२।१०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः"॥
आर्षभिः, पुं, (ऋषभस्यापत्यम्। ऋषभ + इञ्।) ऋषभपुत्रः। स तु भरतराजचक्रवर्त्ती। इति हेमचन्द्रः॥
आर्षभी, स्त्री, (ऋषभस्य वृषस्य प्रिया। ऋषभ + अण् + ङीप्।) कपिकच्छवृक्षः। इति राजनिर्घण्टः।
(मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषः। यथा, "तथा दे चापि फल्गुन्यौ मघा चैवार्षभी मता"। कपिकच्छशब्देऽस्या गुणादयो ज्ञातव्याः॥)
आर्षभ्यः, पुं, (ऋषभस्य प्रकृतिः। ऋषभ + अण्।) षण्ढोपयुक्तवृषभः। तत्पर्य्यायः। षण्ढतायोग्यः २। इत्यमरः॥ षाँड़ेर उपयुक्त ऊँड़े इति भाषा॥
आर्हतः, पुं, (अर्हन् जिन एव। अर्हत् + अण्।) जिनविशेषः। तत्पर्य्यायः। बादवादी २। इति हेमचन्द्रः॥
आलं, क्ली, (आलयति भूषयतीति। आ + अल् + अच्।) हरितालं। इत्यमरः॥ अनल्पे त्रि। इति हेमचन्द्रः॥ (यथा वैद्यकरत्नेन्द्रसारसंग्रहे॥)
("हरितालं तालमालमालं शैलुषभूषणम्।
पिञ्जकं रोमहरणं तालकं पीतमित्यपि"॥)
आलगर्दः, पुं,(अलगर्द एव। स्वार्थे अण्।) अलगर्दः। जलसर्पः।
आलम्बः, पुं, (आङ् + लबि + घञ्।) अवलम्बः। आश्रयः॥ (यथा रघौ। "इह हि पतितां नास्त्यालम्बो न चापि निवर्त्तनम्"। इति भ्रान्तिमतके ३। २।) अधोलम्बनम्। यथा, रामायणे,—
"शोभते किञ्चिदालम्बैः शालयः कनकप्रभाः"॥)
आलम्बनं, क्ली, (आङ् + लम्ब + ल्युट्।) अवलम्बनं। विभावविशेषः। यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।
आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्"॥
इति साहित्यदर्पणे ३य परिच्छेदः।
आलम्भः, पुं, (आङ् + लभि + घञ्।) मारणं। वधः। इत्यमरः॥ (यथा स्मृतिः, "अश्वालम्भं गजालम्भं"। मेघदूते पूर्व्वमेघे। ३६।
"व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्"।
छेदनम्। कर्त्तनम्। मनुः ११। १४४।
"छेदजानामोषधीनां जातानां च स्वयं वने।
दधालम्भेऽनुगच्छेत् गां दिनमेकं पयोव्रतः"॥
स्पर्शः। आलिङ्गनम्। यथा मनुः २। १७९।
"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतं।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च"॥)
आलम्भ्या, स्त्री, (आङ् + लभि + ण्यत्।) वध्यार्हा। हननीया। इति वोपदेवः॥
आलयः, पुं, (आलीयतेऽस्मिन्। आ + ली + आधारे अच्।) गृहं। इत्यमरः॥ (यथा कुमारे १। १।)
"हिमालयो नाम नगाधिराजः" नैषधे, "तत्रामरालयमरालमरालकेयी"। रामायणे ३ काण्डे।
"न हि दुष्टात्मनामार्य्या निवसन्त्यालये चिरं"।
समयपर्य्यन्ते, क्ली। भागवते १ अध्याये ५। "पिबत भागवतं रसमालयम्")॥
आलवालं, क्ली, (आ समन्तात् जलस्य लवमालाति आ + लव + ला + क।) तरमूलसेचनार्थखल्वजलाधारः। चारमादा इति भाषा। तत्पर्य्यायः। आवालं २ आवापः ३। इत्यमरः॥ (रघुवंशे १। ५१।
"विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्"। माघे। "विपुलजलवालभृतवारिदर्पणाः"।)
आलसः, त्रि, (अलस + स्वार्थे अण्।) अलसः। आलस्ययुक्तः। इति द्विरूपकोषः॥
आलस्यं, क्ली, (अलस + ष्यञ्।) अलसस्य भावः। अलसता। तत्पर्य्यायः। तन्द्रा २ कौसीद्यं ३। इति हेमचन्द्रः॥ मन्दता ४ मान्द्यं ५ कार्य्यप्रद्वेषः ६। इति राजनिर्घण्टः॥ (यदुक्तं। "आलस्यं श्रमगर्भाद्यैर्जाड्यं श्लेष्मासितादिकृत्" इत्युक्तलक्षणो व्यभिचारिभावभेदः। सुश्रुते।
"सुखस्पर्शप्रसक्तिं दुःखद्वेषणालोलता।
प्रवृत्तस्य चाप्युत्साहः कर्म्मण्यालस्यमुच्यते"॥)
आलस्यः, त्रि, (अलस एव। अलस + स्वार्थे ष्यञ्।) अलसयुक्तः। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ प्रीतकः ४ अलसः ५ अनुद्यमः ६। इत्यमरः॥
आलातं, क्ली, (अलातमेव। अलात + स्वार्थे अण्।) अलातं। अङ्गारः॥
आलानं, क्ली, (आलीयतेऽत्र। आङ् + ली + ल्युट्। विभाषा लीयतेरित्यात्त्वम्।) गजबन्धनस्तम्भः। इत्यमरः॥ गजबन्धनरज्जुः। इति नीलकण्ठः॥ (रघुवंशे १। ७१।
"अरन्तुदमिवालानमनिर्वाणस्य दन्तिनः"।
कादम्बरी। "इभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन"।
रघुवंशे ४। ६६, ४। ८१।
"गजालानपरिक्लिष्टैरुष्ट्रोटैः सार्द्धमागताः"।
"तद्गजालानतां प्राप्तैः सह काषायशुङ्गमैः"॥)
बन्धनं। इति रायमुकुटः॥ रज्जुः। इति मेदिनी॥
आलापः, पुं, (आङ् + लप् + घञ्।) कथोपकथनं। सम्भाषणं। तत्पर्य्यायः। आभाषणं २। इत्यमरः॥ (साहित्यदर्पणे, प्रथमपरिच्छेदः।
"काव्यालापाश्च ये केचित् गीतकान्यखिलानि च"।)
आलाप्यः, त्रि, (आङ् + लप् + कर्म्मणि ण्यत्।) आलापयोग्यः। आलापनीयः॥
आलावर्त्तः, क्ली, (आलमत्यर्थमावर्त्तते इति आल + आ + वृत् + अच्।) वस्त्रनिर्म्मितव्यजनं। इति हेमचन्द्रः॥ कापड़ेर पाखा इति भाषा।
आलावुः, स्त्री, अलावुः। इति शब्दरत्नावली॥ लाउ इति भाषा। (अलाबुशब्देऽस्या विशेषो ज्ञेयः॥
आलाबूः, स्त्री, अलाबुः। इति शब्दरत्नावली॥
आलास्यः, पुं, (आलं पर्य्याप्तं आस्यं मुखं यस्य सः।) कुम्भीरः। इति हेमचन्द्रः॥
आलिः, स्त्री, (आलयति भूषयति। आ + अल भूषणे। अच इः।) वयस्या। (यथा कुमारसम्भवे। ५।८३।
("निवार्य्यतामालि किमप्ययं वटुः,
पुनर्विवक्षुः स्फुरितोत्तराधरः"।)
(आलति निर्वापयति जलं। अल वारणे। सर्व्वधातुभ्य इन्।) सेतुः। (अल्यतेऽनया। अल् + इञ्।) पंक्तिः। इति मेदिनी अमरश्च॥ सन्ततिः। इति शब्दरत्नावली॥
आलिः, पुं, (आलति दंशने समर्थो भवति। आ + अल् + बाहुलकात् इञ्।) वृश्चिकः। भ्रमरः। इति हारावली अमरटीका च॥
आलिः, त्रि, (आङ् + अल् + इञ्।) विशदाशयः। निर्म्मलान्तःकरणः। इति मेदिनी॥ अनर्थः। इति हेमचन्द्रः॥
आलिङ्गनं, क्ली,(आङ् + लिङ्ग + ल्युट्।) प्रीतिपूर्व्वकपरस्परश्लेषः। कोलाकोली इति भाषा। तत्पर्य्यायः। अङ्कपालिः २ श्लिषा ३। इति चिकाण्डशेषः॥ परिरम्भः ४ परीरम्भः ५ परिष्वङ्गः ६ संश्लेषः ७ उपगूहनं ८। इत्यमरः॥ तत्प्रभेदा यथा। आमोदालिङ्गनं १ मुदितालिङ्गनं २ प्रेमालिङ्गनं ३ आनन्दालिङ्गनं ४ रत्यालिङ्गनं ५ मदनालिङ्गनं ६ विनोदालिङ्गनं ७। इति कामशास्त्रम्॥
("आलिङ्गनान्यधिकृताः स्तुटमाप्नुरेव"।
इति माघः॥ यथा मेघदूते उत्तरमेघे ९।
"यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां"।)
आलिङ्गी, [न्] पुं,(आ + लिङ्ग + इनि।) आलिङ्गयः। मृदङ्गविशेषः। इत्यमरटीकायां स्वामी शब्दरत्नावली च॥
आलिङ्ग्यः, पुं, (आ + लिङ्ग + ण्यत्।) यवाङ्कतिमृदङ्गः। इत्यमरः॥ मादोल इति भाषा। यथा शब्दार्णवे॥
"चतुरङ्गुलहीनोऽङ्गान्मुखे चैकाङ्गुलेन यः।
यवाङ्कतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते"॥
आलिञ्जरः, पुं, (आलिञ्जर + अण्।) आलिञ्जरः। इति चिकाण्डशेषः॥ जाला इति भाषा।
आलिन्दः, पुं, (आलिन्द + अण्।) आलिन्दः। बहिर्द्वारप्रकोष्ठः। गृहान्तरप्रत्यार्थवेदिका। इति रायमुकुटः शब्दरत्नावली च॥ गृहैकदेशः। इत्यमरमाला॥
आलिन्दकः,पुं,(आलिन्द एव स्वार्थे कः।) आलिन्दः। इति शब्दरत्नावली॥
आलिम्पनं, क्ली, (आङ् + लिम्प + ल्युट्।) मङ्गलालेपनं। आलिपना इति भाषा। तत्पर्य्यायः। आतर्पणं २ आदीपनं ३ मण्डोदकं ४। इति चिकाण्डशेषः॥

आली, स्त्री, (आलि + ङीष्।) सखी। पङ्क्तिः। दन्तिकः। इत्यमरटीकायां भरतादयः॥ सेतुः। इति शब्दरत्नावली॥ (अपत्यार्थे यथा कुमारे ६।७९। "तोयान्तर्भास्करालीव रेजे मुनिपरम्परा"।)

आलीढ़, क्ली, (आङ् + लिह् + क्तः।) धन्विनां दक्षिणजङ्घाप्रसारवामपादसंकोचरूपावस्थानं। इत्यमरः। (यथा, रघौ ३।५२।

"अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विडम्बितेश्वरः"।

तल्लक्षणं यथा, चिन्तामणिधृतम्।

"नमिता पूर्वजङ्घा च पश्चिमा प्रसृता भवेत्।
असमो मध्यकायश्च स्यादालीढस्य लक्षणम्"॥)

आलीढ़, त्रि, (आङ् + लिह् + क्त।) अग्नितं। भुक्तं। इति मेदिनी॥ (क्षतः, रघुवंशे, २।३७। "सेनान्यमालीढमिवासुराक्षैः"।)

आलीढ़कं, क्ली, (आलीढ एव स्वार्थे कः।) तर्जकानां स्खलीषु क्रीड़नं। इति हारावली॥ वाकुरेर खेला इति भाषा। आटीलकमिति क्वचित् पाठः॥

आलीनकं, क्ली, (आलीन + कन्।) रङ्गं। इति हेमचन्द्रः॥ रां इति भाषा।

आलु, क्ली, (आङ् + लु + डु।) मेलकः। स्वनामख्यातमूलविशेषः। इति मेदिनी॥ अस्य गुणाः। रक्तपित्तनाशित्वं। गुरुत्वं। स्वादुत्वं। शीतलत्वं। स्तनदुग्धशुक्रकारित्वञ्च। इति द्रव्यगुणः॥

आलुः, स्त्री, (आलाति। आङ् + ला + डु।) स्वल्पवारिधानिका। घटीभारी इत्यादि भाषा। तत्पर्य्यायः। कर्करी २ गलन्तिका ३। इत्यमरः॥

आलुः, पुं, शेखकः। इति शब्दरत्नावली॥ कासालुः। इति राजनिर्घण्टः॥

आलुकं, क्ली, (आलु + स्वार्थे कन्।) मूलविशेषः आलु इति भाषा। इति राजवल्लभः॥ एलवालुकं। इति राजनिर्घण्टः॥ तद्विवरणं यथा,—

"आलुकमप्यालूकं तत् कथितं वीरसेनश्च।
काष्ठालुकश्चक्षालुकहस्त्यालुकानि कथ्यन्ते॥
पिण्डालुकमध्यालुकरक्तालुकानि व्यक्तानि"।
काष्ठालुकं काठिन्ययुक्तकटाम्। शुक्लालुकं श्वेतताम्रशुक्लालु। हस्त्यालुकं दीर्घतायुक्तमहाशरीरं। पिण्डालुकं वर्त्तुलसूचनी। मध्यालुकं मधुरतायुक्तरोमान्वितदीर्घसूचनी। रक्तालुकं रताक्तं तरुणा इति च। एषां गुणाः।

"आलुकं शीतलं सर्व्वं विष्टम्भि मधुरं गुरु।
रूक्षमूत्रमलं रूक्षं दुर्ज्जरं रक्तपित्तनुत्॥
कषायानिलकरं बल्यं हृद्यं स्तन्यविवर्द्धनम्"।
इति भावप्रकाशः॥
("आलुकानि च सर्व्वाणि तथा सूप्यानि जानुगं।
स्निग्धं निष्पीड़ितरसं स्नेहाढ्यं नातिदोषलम्"॥
इति वाभटः॥
"विदारीकन्दशतावरीविसमृणालभृङ्गाटककशेरुककपिण्डालुकमध्यालुकहस्त्यालुककाष्ठालुकशुक्लालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि"॥
"रक्तपित्तहराण्याहुः शीतानि मधुराणि च।
गुरूणि बृंहणानि स्तन्यवृद्धिकराणि च"॥
इति सुश्रुतः॥)

आलुकः, पुं, (आलाति पृथ्वीं कामरोगं वा आङ् + ला + डु + संज्ञायां कन्।) कासालुः। इति राजनिर्घण्टः॥ श्लेष्मनागः। इति हेमचन्द्रः॥

आलुकी, स्त्री, दीर्घाकारस्वल्परक्तालुः। अरई इति भाषा। यथा, भावप्रकाशे॥

"रक्तालुभेदो या दीर्घा तन्वी च ग्रथितालुकी।
आलुकी बलकृत् स्निग्धा गुर्व्वी हृत्कफनाशिनी।
विष्टम्भकारिणी तैले तलितातिरुचिप्रदा"॥

आलेख्यं, क्ली, (आङ् + लिख् + ण्यत्।) चित्रं। इति हेमचन्द्रः॥ (यथा माघे, २।६७।

"इति संरम्भिणो वाग्भीर्बलस्यालेख्यदेवताः"।

"निश्चीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव"। रघुवंशे ३।१५।)

आलेख्यप्रेषः, त्रि, (आलेख्यं चित्रमेव प्रेषो यस्य सः।) मृतः। इति हेमचन्द्रः॥ (यथा रघुवंशे, १४।१५।

"वाष्पायमाणो बलिमन्निकेत-
मालेख्यशेषस्य पितुर्व्विवेश"।)

आलोकः, पुं, (आङ् + लुक् + घञ्।) दर्शनं। देखा इति भाषा। द्योतः। आलो इति भाषा। शान्तिघृतके, ४।६।

"आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह"। मेघदूते पूर्व्वमेघे ३८।

"रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः"। यथा शाकुन्तले, प्रथमाङ्के।

"यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्"। (यथा, रामायणे ४ काण्डे। ५०। २४।

"आलोकं ददृशुर्धीरा नीराशा जीविते यदा"।

वन्दिभावगं। स्तुतिरिति यावत्। इति मेदिनी॥ (रघुवंशे। २। ६।

"उदीरयामासुरिवोन्मदानां
मालोकशब्दं वयसां विरावैः"॥)

आलोकनं, क्ली, (आङ् + लोक् + ल्युट्।) दर्शनं। इत्यमरः॥ (रघुवंशे, ७। ५। "ततस्तदालोकनतत्पराणां," कुमारसम्भवे। २। ४५। "भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते"। माघे, ११। ३३। "व्रजति हि सफलत्वं बल्लभालोकनेन"।)

आलोचनं, क्ली, (आङ् + लुच् + ल्युट्।) दर्शनं। विवेचनं॥ (यथा हेमचन्द्रः, "रहस्यालोचनं मन्त्रः"। सांख्यमते निर्विकल्पकं ज्ञानं निर्द्धर्मकं शुद्धवस्तुविषयकं प्राथमिकं ज्ञानं। यदुक्तं।

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥
ततःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यथा"।
"बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता"।
"शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः"॥ सांख्यकारिका।)

आवनेयः, पुं, (अवन्या अपत्यं अवनी + ढक्।) मङ्गलग्रहः। इति ज्योतिःशास्त्रं॥ (यथा काशीखण्डे। १७ अध्याये।

"उत्पत्तिं चास्य वक्ष्यामो भूसुतोऽयं यथाभवत्।
पुरा तपस्यतः शम्भोर्दक्षायज्ञे वियोगतः॥
भालस्थलात्पपातैकः स्वेदबिन्दुर्महीतले।
ततः कुमारः संजज्ञे लोहिताङ्गो महीतलात्॥
स्वेदसम्भूतितः सोऽयं धात्या धात्रीस्वरूपया।
मात्रेय इत्यतः ख्यातिं परामयं गतस्ततः"॥)

आवपनं, क्ली, (ओप्यते स्थाप्यतेऽत्र। आङ् + वप् + आधारे ल्युट्।) द्रव्यस्थापनपात्रं। भाण्डं। इत्यमरः॥ सम्यक्क्षुरिकर्म्म। सम्यग्बीजतन्तुवपनं॥ (यथा महाभारते, आदिपर्व्वणि।

"प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः।
प्रभुः सूर्य्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः"॥
"अग्निर्हिमस्य भेषज्यं भूमिरावपनं महत्"।)

आवरणं, क्ली, (आङ् + वृ + ल्युट्।) फलकं। इति हेमचन्द्रः॥ ढाल इति भाषा। आच्छादनं। ढाका इति भाषा॥ (यथा महाभारते, आदिपर्व्वणि।

"विचित्राणि च वासांसि प्रावाराबरणानि च"।

"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा"। इति रघुः। ५। १३। मनुः। ३। १६३।

"स्त्रीतसां भेदको यश्च तेषाञ्चावरणे रतः"॥)

आवरणग्रन्थिः, स्त्री, (आवरणे ग्रन्थिः।) मायाग्रन्थिः। यथा। "स्वल्पोऽपि मेघो रञ्जयोजनविस्तीर्णमादित्यमण्डलं अवलोकयिष्टजननयनपथपिधायकतयाच्छादयतीव तथैवाज्ञानं परिच्छिन्नमपि आत्मानमपरिच्छिन्नमसंसारिणं अवलोकयिष्टबुद्धिपिधायकतयाच्छादयतीव तादृग्गं सामर्थ्यं"॥ इति वेदान्तः॥

आवर्त्त, क्ली, (आङ् + वृत् + घञ्।) माक्षिकधातुः। इति राजनिर्घण्टः॥ (आवर्त्तनं। चक्राकारेणभ्रमणं।)

आवर्त्तः, पुं, (आङ् + वृत् + घञ्।) जलभ्रमः। इत्यमरः॥ घूर्ण्णा इति भाषा। (रघुवंशे ६। ५२। "रूपं तमावर्त्तमनोज्ञनाभिः"।)

चिन्ता। आवर्त्तनं। इति मेदिनी॥ मेघनायकचतुरुत्थानगर्त्तमेघाधिपविशेषः। इति पुराणं ज्योतिषञ्च। (यथा मेघदूते पूर्व्वमेघे ६।

"जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्"।)

राजावर्त्तनामोषरलं। इति राजनिर्घण्टः॥

आवर्त्तकी, स्त्री, (आवर्त्त इव कायति प्रकाशते। आवर्त्त + कै + क + ङीष्।) लताविशेषः। भगतवल्ली इति लोकेषु प्रसिद्धा। तत्पर्य्यायः। तिन्दुकिनी २ विभाण्डी ३ विषाणिका ४ रङ्गलता ५ मनोज्ञा ६ रक्तपुष्पी ७ मरुत्पाली ८ पीतकीला ९ चर्म्मरङ्गा १०। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। शीतवीर्य्यकारित्वम्। पित्तनाशित्वञ्च। भद्रदन्तिकावद्गुणाः। इति राजनिर्घण्टः॥

आवर्त्तनं, क्ली, (आङ् + वृत् + ल्युट्।) दुग्धादेरालोड़नं। आघोटान इति भाषा। धातुद्रव्यस्य द्रवीकरणं। इत्यमरटीका॥ गलान इति भाषा। सूर्य्यस्य पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः। "आवर्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततःपरं" इति स्मृतिः॥

आवर्त्तनी, स्त्री, (आङ्+वृत्+ल्युट्+ङीप्।) धातुद्रव्यद्रावणार्थमृत्पात्रं। मुकी इति भाषा। तत्पर्य्यायः। तैजसावर्त्तनी २ मूषा ३ मूषः ४। इति शब्दरत्नावली॥

आवर्त्तनमणिः, पुं, (आवर्त्तनाकारो मणिः।) राजावर्त्तनामोपरत्नं। इति राजनिर्घण्टः॥

आवर्त्तिनी, स्त्री, (आवर्त्त+इनि+ङीप्।) अक्षग्रहणीवृक्षः। इति रत्नमाला॥

आवर्हितः, त्रि, (आङ्+वृह्+क्तः।) उन्मूलितः। उत्पाटितः। इति हेमचन्द्रः।

आवलिः, स्त्री, (आङ्+वल+इन्।) श्रेणी। पंक्तिः। इत्यमरः॥

आवली, स्त्री, (आङ्+वल्+इन्+ङीप्।) आवलिः। इत्यमरः॥ (यथा अमरशतके ३। "आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं"। "द्विजावलीव्याजनिशाकरांशुभिः"। इति माघे १। २५।)

आवल्यं, क्ली, (अवल+ष्यञ्।) अबलस्य भावः दौर्बल्यं॥

आवश्यकं, त्रि, (अवश्य+मनोज्ञादित्वादुञ्। अव्ययानां भमात्र इति टिलोपः।) अवश्यकर्त्तव्यं। नैत्यिकं। उचितं। यथा। "घ्यणोरावश्यके। उपर्गादावश्यकेऽर्थे घ्यण् स्यात्"। इति मुग्धबोधव्याकरणं॥ किञ्च। आवश्यकपर्व्वादिक्रियमाणस्य नित्यनैमित्तिकत्वं। इति तिथ्यादितत्त्वं॥ (यथा साहित्यदर्पणे। "आवश्यकानां कार्य्याणां अविरोधादिनिर्म्मितः"।)

आवसथं, क्ली, (आवसन्ति आगत्य वसन्ति अस्मिन्। आङ्+वस+अथच्।) गृहं। इति हेमचन्द्रः॥ (वसतिस्थानं। विश्रामस्थानं। अग्निगृहं। अग्निहोत्रस्थानं।
रघुवंशे, ८। १४ "निवसन्नावसथे पुराद्दिः"। मनुः। ३। १०७।
"आसनावसथौ शय्यामनुव्रज्यामुपासनाम्"।)

आवसथः, पुं, (आवसन्त्यत्र। आ+वस+अधिकरणे अथच्।) गृहं। (यथा, हितोपदेशे मित्रलाभे "अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः"।) आर्य्याकोषः। आर्य्याच्छन्दसो ग्रन्थभेदः। व्रतविशेषः। इत्यादिकोषः॥

आवसितं, त्रि, (आवस्यते आच्छाद्यते आङ्+वस् आच्छादने+क्तः।) परिपक्वमर्द्दितधान्यं। इति भरतः॥ बद्धलितधान्यं। इति सुभूतिः॥ सम्पन्नधान्यं। इत्यन्ये॥ तत्पर्य्यायः ऋद्धं २। इत्यमरः॥

आवहः, पुं, (आभिमुख्येन वहतीति। आङ्+वह्+अच्।) सप्तवाय्वन्तर्गतवायुविशेषः। स च भूवायुः। इति पुराणज्योतिषे॥
(यथा, मनुः, ८। ३४७।
"द्यौ शुक्रज्योतिरादित्यो नन्दो हरिस्तपास्तथा। चित्रज्योतिः सत्यज्योतिर्ज्योतिष्मान् स्कन्द आवहः"॥ इति प्रापकः। जनकः। यथा मनुः,—
"समुद्वहेज्जनित्राहसिकान् सर्व्वभूतभयावहान्"। रघुवंशे। १४।५, "क्लेशावहा मर्त्तुरलक्षणाहं"।)

आवहमानं, त्रि, (आङ्+वह्+शानच्।) क्रमागतं॥ (परम्परागतं, धारावाहि।)

आवाधा, स्त्री, (आ सम्यक् बाधा।) दुःखं। पीड़ा। इति शब्दरत्नावली। भूखण्डं। त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत् खण्डद्वयं जायते तत्। इति लीलावती॥

आवापः, पुं, (आ वपन्ति सलिलमत्र। आङ्+वप्+घञ्।) आलवालं। इत्यमरः॥ वलयः। (यथा महाभारते १४ पर्व्वणि।
"मोहात् पपात गाण्डीवमावापं च करादपि"।)
शुभ्रचिन्तनं। (परराष्ट्रचिन्तनम्। यथा, माघे। २८८।
"तन्त्रावापविदा योगैर्मंण्डलान्यधितिष्ठता"।)
पानभेदः। इति हेमचन्द्रः॥ भाण्डवपनं। परिक्षेपः। इति मेदिनी॥ निम्नोन्नतभूमिः। इत्यजयः॥ पात्रं। इति शब्दरत्नावली॥ प्रधानहोमः। इति स्मृतिः॥

आवापकः, पुं, (आ उप्यते इति। आङ्+वप्+कर्म्मणि घञ्+संज्ञायां कन् वा।) वलयः। इत्यमरः॥

आवापनं, क्ली, (आवाप्यतेऽनेनेति आङ्+वप्+णिच्+करणे ल्युट्।) सूत्रयन्त्रं। इति शब्दमाला॥ ताँत् इति भाषा।

आवारि, स्त्री, (आङ्+वृ+इ।) इष्टवेश्म। इत्यादिकोषः॥ दोकान हाट्चालि इत्यादि भाषा।

आवालं, क्ली, (आङ्+वल्+घञ्।) आलवालं। इत्यमरः॥ (बालकमभिव्याप्य इत्यर्थे।) बालकपर्य्यन्तम्॥

आवाल्यं, क्ली, (बाल्यात् आ आवाल्यं पर्य्यन्तार्थेऽव्ययीभावः।) बाल्यावस्थापर्य्यन्तं। (यथा धर्म्मविवेके,—"आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्"।)

आवासः, पुं, (आ वसन्ति अत्र इति। आङ्+वस्+अधिकरणे घञ्।) गृहं इति हेमचन्द्रः॥ (यथा गीतगोविन्दे। ४।१०।
"आवासो विपिनायते प्रियसखीमालापि जालायते"।)

आवाहनं, क्ली, (आङ+वह्+णिच्+ल्युट्।) आह्वानं। निमन्त्रणं। यथा,—
"प्रतिमास्थानेष्वग्नौ नावाहनविसर्জ্জने"।
इति। विनायकादीनां व्याहृतिभिरावाहनमाह मत्स्यपुराणं।
"विनायकं तथा दुर्गां वायुमाकाशमेव च।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ"॥
इति च तिथ्यादितत्त्वं॥ आवाहनीमुद्रा मुद्राशब्दे द्रष्टव्या॥

आवाहनी, स्त्री, (आवाह्यतेऽनया। आङ्+वह्+णिच्+करणे ल्युट् ङीप्।) मुद्राविशेषः। यथा,
"हस्ताभ्यामञ्जलिं बद्धानामिकामूलपर्व्वणोः।
अङ्गुष्ठौ निःक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता"॥
इति तन्त्रशास्त्रं॥

आविः, [स्] य, (अवते। उङ्शब्दे+इर्।) प्राकाश्यम्। प्रस्फुटत्वं। तत्पर्य्यायः। प्रादुः २। इत्यमरः॥

आविकः, पुं, (अविना मेषलोम्ना कृतम् इति अवि+ठक्।) कम्बलं। इति हलायुधः॥ (त्रि, मेषलोम्ना निर्म्मितं,। २।४१
"वसोरन्नानुपूर्व्वेण शाणक्षौमाविकानि च"।
भेड़ीदुग्धं। यथा वैद्यके,—
"आविकं लवणं स्वादु स्निग्धोष्णं वाग्भरीप्रणुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम्"।
इति।)

आविघ्नः, पुं, (आङ्+विज्+क्तः।) अविघ्नः। करमर्द्दकः। इति शब्दरत्नावली॥ याणि आमला इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ (उद्विग्नः उत्कण्ठितः।)

आविर्भावः, पुं, (आविस्+भू+घञ्।) प्रकाशनः। देवावतरणं। प्रादुर्भावः। यथा,—
"तदा मे मनसा ध्यातो दयासिन्धुर्जनार्দनः।
भक्तानामनुकम्पार्थं यस्याविर्भावमिच्छति"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २ अध्यायः॥

आविर्भूतः, त्रि, (आविस्+भू+क्त।) प्रकाशितः। अधिष्ठितः। जन्मयुक्तः। अवतीर्णः। प्रादुर्भूतः। आविर्भावविशिष्टः। यथा,—
"उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ।
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोधारणेराविर्भूतमभूदपूर्ব্বविभवं यत्किञ्चिदेकं महः"॥
"तत्राष्टम्यां भद्रकाली दत्तयज्ञविनाशिनी।
आविर्भूता महाघोरा योगिनीकोटिभिः सह"॥
इति च तिथ्यादितत्त्वम्॥

आविष्कारः, पुं, (आविस्+कृ+घञ्।) प्रकाशनः॥ (यथा साहित्यदर्पणे, २ परिच्छेदे।
"आविष्कारातिशयसाभिधेयवत् स्फुटप्रतीयर्तं"।)

आविष्कृतः, त्रि, (आविस्+कृ+क्तः।) प्रकाशितः। तत्पर्य्यायः। प्रकटितः २। इति हेमचन्द्रः। (यथा उत्तरचरिते, षष्ठाङ्के। "आविष्कृतं कथाप्रावीण्यं वत्सेन"।)

आविष्टः, त्रि, (आ+विश्+क्तः।) प्रेतवाहितः। भूतादिग्रस्तः। इति चिकित्साशास्त्रेषु॥ आवेशयुक्तः। निविष्टः॥ (उपहतः। यथा कामन्दकः,
"आविष्टइव दुःखेन हृद्गतेन गरीयसा"।)

आवीरचूर्णं, क्ली, (आवीरमेव चूर्णम्।) पलाशु। भागु इति वङ्गभाषा। आवीर इति हिन्दीभाषा। यथा,—
"चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतं।
आवीरचूर्णं रुचिरं गृह्यतां परमेश्वर"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

आवुकः, पुं, (अवति रक्षतीति। अव+वाऽलकादुण्+कन्।) नाप्योक्षौ पिता। इत्यमरः॥

आवृत्, स्त्री, (आङ्+वृत्+क्विप्।) अनुक्रमः। परिपाटी। इत्यमरः॥ (प्रकारः। जातकर्म्मादिक्रियाकलापः। यथा मनुः, ३।२४८। २।६६।
"अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः"।

"अमन्विका तु कार्य्येयं स्त्रीणामाहृदयेषतः" ॥)

आहृतः, त्रि, (आङ्+हृ+क्तः।) कृतावरणः। तत्पर्य्यायः। वेष्टितम् २ वलयितम् ३ संवीतम् ४ रुद्धम् ५। इत्यमरः॥ (आच्छादितं, प्राहृतं, आकीर्णं। वर्णभेदः, स च ब्राह्मणादुग्रजातीयायां जातः।)

आहृत्तः, त्रि, (आङ्+हृत्+क्तः।) कृतावरणः। आहृतः। इत्यमरटीका॥ (अभ्यस्तः, क्रमवैपरीत्येन स्थापितः, प्रतिनिवृत्तः, पलायितः, उद्वर्त्तितः, परिवर्त्तितः। यथा उत्तरचरिते,

"स कृतघ्न एव सन्दर्शोऽस्माकमाहृत्तः"।)

आवेगः, पुं, (आङ्+विज्+घञ्।) त्वरा। इति हेमचन्द्रः॥ (यथा दशरूपके,—

"आवेगः सम्भ्रमोऽस्मिन्नभिसरणजनिते स्रस्तनाग्राद्यियोगो वातात् पांशूपदिग्धस्वरितपदगतिर्वर्हजे पिञ्छिताङ्गः"। यथा अमरशतके ८, ३।

"आवेगादवधीरितः प्रियतमस्तूष्णीस्थितस्तत्क्षणात्"।)

आवेगी, स्त्री, (आङ्+विज्+घञ्+ङीप्।) वृद्धदारकवृक्षः। इत्यमरः राजनिर्घण्टश्च। (अस्या गुणादयो वृद्धदारकशब्दे द्रष्टव्याः॥)

आवेदनं, क्ली, (आङ्+विद्+ल्युट्।) निवेदनं। (विज्ञापनम्।)

आवेशः, पुं, (आङ्+विश्+घञ्।) अहङ्कारविशेषः। तत्पर्य्यायः। संरम्भः २ आटोपः ३। अपस्माररोगः। इति हेमचन्द्रः॥ भूतादिना रोगः। तत्पर्य्यायः। भूतसञ्चारः २ भूतक्रान्तिः ३ यक्षामयः ४। इति राजनिर्घण्टः॥ आसक्तिः। अभिनिवेशः॥ (यथा रघुवंशे, ५।१९।

"तस्मै क्षयावेशविवर्द्धिताय"।)

आवेशनं, क्ली, (आविश्यतेऽस्मिन्। आङ्+विश्+ल्युट्।) शिल्पशाला। इत्यमरः॥ (मनुः, ९।२६५।

"जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च"। (भावे ल्युट्।) भूतावेशः। (यथा, साहित्यदर्पणे ३ परिच्छेदे।

"मनःक्षेपस्त्वपस्मारो यक्षाद्यावेशनादिजः"।) प्रवेशः। इति मेदिनी॥ कोपः। इति धरणी॥ परिवेशः। इति हेमचन्द्रः॥

आवेशिकः, त्रि, (आवेशं संरम्भं प्राप्तः। आवेश+ठञ्।) आगन्तुः। अतिथिः। इत्यमरः॥ क्लीवं। असाधारणं। तत्पर्य्यायः। अन्यासाधारणं २ प्रातिस्विकं ३। इति त्रिकाण्डशेषः॥

आवेष्टकः, पुं, (आङ्+वेष्ट+ण्वुल्।) प्राचीरादिः। इति हलायुधः॥ पाँचिल वेड़ा इत्यादि भाषा॥

आवोधनं, क्ली, (आङ्+बुध्+ल्युट्।) ज्ञानम्। बुद्धिः॥

आशंसा, स्त्री, (आङ्+शंस+अङ्+टाप्।) इच्छा। आकाङ्क्षा। इति हेमचन्द्रः॥ (रघुवंशे, १२।४४।

"निदधे विजयाशंसां चापे सीताच लक्ष्मणे"।)

आशंसिता, [तृ] त्रि, (आङ्+शंस+तृच्।) आशंसाकर्त्ता॥ आकाङ्क्षाशीलः। इत्यमरः॥

आशंसुः, त्रि, (आङ्+शंस+उ।) आशंसिता। इच्छुः॥ इत्यमरः॥

आशक्तः, त्रि, (आङ्+शक्+क्तः।) सम्यक्शक्तिविशिष्टः॥

आशङ्का, स्त्री, (आङ्+शकि+अ+टाप्।) भयं। त्रासः। इति हेमचन्द्रः॥ (संशयः, वितर्कः।) शाकुन्तले, प्रथमाङ्के।

"नक्षाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति"। कथासरित्सागरे, १४ तरङ्गे।

"तत् श्रुत्वा विगताशङ्कस्तामकारयदूषिताम्"।)

आशनः, पुं, (अशन+स्वार्थे अण्) अशनवृक्षः। इति भरतः द्विरूपकोषश्च॥

आशयः, पुं, (आङ्+शीङ्+अच्।) अभिप्रायः। मनसवृक्षः। आधारः। इति विश्वमेदिन्यौ॥ विभवः। किण्वचानः। चेतः। अजीर्णं। कोष्ठागारं। इत्यजयपालः। धर्म्माधर्म्मौ। अदृष्टं। इति कुसुमाञ्जलिः॥ (अभिप्रायार्थे यथा, कथासरित्सागरे, १२ तरङ्गे।

"तच्चालोक्याशयं बुद्धा तस्य सोऽपि वसन्तकः"। चित्तार्थे यथा, भगवद्गीतायां, १०।२०।

"अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः"। "आशयाः सप्त"। "आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम"इति। सुश्रुतः॥)

आशयाशः, पुं, (आशेरतेऽत्रेत्याशयः। एरच्। आधारः। तमश्नाति। कर्म्मण्यण्।) आशयाशः। अग्निः। इत्यमरटीकायां स्वामी॥

आशरः, पुं, (आ शृणाति शॄ हिंसायां+पचाद्यच्।) अग्निः। राक्षसः। इति मेदिनी॥

आशा, स्त्री, (आ समन्तात् अश्नुते व्याप्नोतीति। आङ्+अशू+पचाद्यच्+टाप्।) दीर्घाकाङ्क्षा। आयता तृष्णा। (यथा, भ्रान्तिशतके, ४।२६।

"आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला"। दिक्। इत्यमरः।

वासवाशामुखे भाति इन्द्रचन्दनविन्दुवत्"॥ इति साहित्यदर्पणे १० परिच्छेदे। खनामख्याता दक्षप्रजापतिकन्या। यथा, हरिवंशे,—

"श्रीर्कीर्त्तिस्तुष्टा कीर्त्तिराशा मेधा च सुव्रता"।)

आशाढः, पुं, आषाढ़मासः। ऋतिनां पलाशदण्डः। इत्यमरटीका द्विरूपकोषश्च॥

आशाढा, स्त्री, पूर्व्वाषाढानक्षत्रं। उत्तराषाढा च॥

आशाधरसम्भवः, पुं, (आशाधरात् सम्भवो यस्य।) भूमिजगुग्गुलुः। इति राजनिर्घण्टः॥

आशाबन्धः, पुं, (आशाया बन्धः। षष्ठीतत्।) समाश्वासः। (मेघदूते,—

"आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानां। सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि"॥) प्रत्याशा। मर्कटजालकं। माकड़सार जाल इति भाषा। इति मेदिनी॥

आशितं, त्रि, (आङ्+अशू+क्तः।) अशितं। भुक्तं इति जटाधरः॥

आशितङ्वोनं, त्रि, (आशिता भोजिता गावो यत्र अयङ्क्षाशितङ्वलमिति खः। निपातनात् पूर्व्वस्य मुम्।) अशिताङ्वीनं। गावो यत्राशिताः पुरा। इत्यमरः॥ (यथा भट्टिकाव्ये ४र्थे सर्गे।

"हित्वाशीतङ्वीनानि फलैर्यत्राशितम्भवम्"। पूर्व्वे ये स्थाने गरु चरियाछेइति भाषा।

आशितम्भवं, क्ली, (आशित+भू+खच्+मुमागमः।) अन्नादि। इत्यौ पुं। इति मेदिनी॥ (यावता अन्नेन अतिशयादिः भोजितः तृप्तोभवति तावत् अन्नादिकम्। यथा, भट्टिकाव्ये ४र्थे सर्गे,—

"हित्वाशितङ्वीनानि फलैर्यत्राशितम्भवम्"।)

आशिता [तृ] त्रि, (आ अश्नातीति। आ+अशू+तृच्।) बहुभोजनशीलः। अतिशयभोक्ता। इति हेमचन्द्रः॥

आशिरः, पुं, (आ+अश+किरच्।) राक्षसः। अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (सूर्य्यः।)

आशीः, [स्] स्त्री, (आङ्+शास्+क्विप्+उपधाया इत्वम्) आशीर्व्वादः। सर्पदन्तः। इत्यमरः॥ वृद्धिनामौषधिः। इति राजनिर्घण्टः॥ (हितप्रार्थनं, अभीष्टवृद्धिप्रार्थनं। यदुक्तं,—

"वात्सल्यात् यत्र मान्येन कनिष्ठस्याभिधीयते। इष्टावधारकं वाक्यमाशीः सा परिकीर्त्तिता"॥ यथा, कुमारे ७।४७।

"तस्मै जयाशीः सस्वजे पुरस्तात्"।)

आशी, स्त्री, (आङ्+अश्+अच्+ङीप्।) हितार्शंसनं। अहिदन्तः। सर्पविषं। इति शब्दरत्नावली॥ [इति विषविद्या॥

"आशी तालुगता दंष्ट्रा तया दष्टो न जीवति"।

आशीर्व्वादः, पुं, (आशिषो वादः षष्ठीतत्।) आशीर्वचनं। मङ्गलप्रार्थना॥ (यथा, मनुः। २।३३।

"मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत्"।)

आशीविषः, पुं, (आशिषि दंष्ट्रायां विषमस्य सः पृषोदरादित्वात् साधुः।) सर्पः। इत्यमरः॥ रघुवंशे,—३।५७।

"गरुत्मदाशीविषभीमदर्शनैः"।

आशुः, पुं, क्ली, (अश्नुते इति। अशूङ् व्याप्तौ उण्।) ग्रीष्मः। धृतम्। (यथा शाकुन्तले १ अङ्के। ("तदाशु कृतसन्धानं प्रतिसंहर सायकम्"।). सत्त्वगामि चेत् त्रि। इत्यमरः॥

आशुगः, पुं, (आशु शीघ्रं गच्छतीति। आशु+गम्+ड।) वायुः। बाणः। (रघुवंशे, १२।९१।

"रावणस्यापि रामास्त्रो भित्वा हृदयमाशुगः"।) शीघ्रगामिनि, त्रि। इत्यमरः॥ मनुः ४।९८। ("विनीतैस्तु व्रजेन्नित्यमाशुगैर्जन्तुवाजितैः"।)

आशुपची, स्त्री, शुक्लकोलता। इति रत्नमाला॥

आशुब्रीहिः, पुं, (आशुः शीघ्रो ब्रीहिः।) आशुधान्यं। इत्यमरटीकायां भरतमुकुटौ॥

आस्रुग्लक्षिः, पुं, (आ समन्तात् स्रोतुमिच्छति । आङ्+स्रुष्+सन्+अनि ।) अग्निः । इत्यमरः ॥ (यथा कादम्बर्थां,—"मन्त्रपूतानि हवींषि प्रतिगृह्णाति एतत्प्रीत्या आस्रुग्लक्षिः" ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आस्रेकुटी, [न्] पुं, पर्व्वतः । इति शब्दमाला ॥

आस्थर्य्यं, क्ली, (आङ्+चर्+ण्यत्+सट् निपातनात् ।) अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ अद्भुतं ३ चित्रं ४ । इत्यमरः ॥ (यथा, रघौ १६।८७ ।

"गन्धोदग्रं तदनु वहतः पुष्पमास्थर्य्यमेघाः" ।)

आस्मनः, पुं, (आस्मन्+अण् ।) अरुणः । सूर्य्यसारथिः । इति त्रिकाण्डशेषः ॥ (अस्मनि प्रस्तरे भवमित्यर्थे अस्मन्+अण् । शिलाभववस्तुनि त्रि । यथा भट्टौ ४ । २६ ।

"यस्यापमास्मनप्रख्यं सेषुं धत्तेऽन्यदुर्व्वहम्" ।)

आस्रमः, पुं,क्ली, (आङ्+श्रम+घञ् ।) शास्त्रोक्तधर्म्मविशेषः । आश्राम्यन्ति खं खं तपश्चरन्त्यत्र । स चतुर्विधः । ब्रह्मचर्य्यं १ गार्हस्थ्यं २ वानप्रस्थ्यं ३ सन्न्यासः ४ । इति स्मृतिः ॥ ब्रह्मचारी । गृहः । वानप्रस्थः । भिक्षुः । इत्यमरः ॥ मुनीनां वासस्थानं । वनं । मठः । इति मेदिनी ॥ (कलियुगे तु ब्रह्मचर्य्यवानप्रस्थौ न स्तः केवलं गृहस्थभिक्षुकाश्रमावेव, यदुक्तं । महानिर्व्वाणतन्त्रे ।

"गार्हस्थो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" ।

रघुवंशे, १।४८ ।

"स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः" ।)

आश्रमिकः, त्रि, (आश्रम+ठक् ।) आश्रमयुक्तः । इति शब्दरत्नावली ॥

आश्रयः, पुं, (आङ्+श्रि+अच् ।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः । इत्यमरः ॥ व्यपदेशः । (यथा, मनु २।११ ।

"येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्व्विधं प्राहुः साक्षाद्धर्म्मस्य लक्षणम् ॥
सर्व्वं तु समवेक्ष्येदमिदं धर्म्मागमं स्वधीः ।
तुल्यदोषं बहुगुणं सम्यक् कार्य्यं विजानता ॥
श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्म्मावुभौ स्मृतौ ।
उभावपि हि तौ धर्म्मौ सम्यगुक्तौ मनीषिभिः ॥
यावस्मिन् देशजाचारा यावद्वर्णविकल्पनम् ।
तावत् स्वधर्म्मः पौर्व्वापर्य्यं वीक्ष्य कुलस्य च ॥
उपायतोऽपि ह्यर्थानां त्यागे यत्नः परो मतः ।
अनुपायो हि मरणं तत्र यत्नो न शस्यते ॥
अनुपायेन यो मोहात् कुरुते कर्म्म किञ्चन ।
अवश्यं लभते तत्र विपत्तिं नात्र संशयः ॥
अनुपायेन कर्म्माणि संपादयति यो नरः ।
न तस्य फलसंसिद्धिरुद्वेगं तु फलं महत् ॥
उपायं चिन्तयेत् प्राज्ञस्तथापायं च पण्डितः ।
पश्येद्धि विपदं कश्चित् कश्चित् संपदमश्नुते ॥
अनुबन्धं फलोदर्कं हिंसां पौरुषमात्मनः ।
क्षयं व्ययं च लाभं च सम्यक् कार्य्यं विजानता ॥
अनुबन्धं क्षयं हिंसां पौरुषं चात्मनो रिपोः ।
ज्ञात्वा पश्चात् प्रकुर्व्वीत मतिमान् कार्य्यमात्मवान् ॥
अनुबन्धक्षयोदर्कान् अपुण्यांश्च पराजयान् ।
लोकविद्विष्टमन्यायं मानार्थं च विवर्जयेत्

आषाढ़ाभूः, पुं, (आषाढ़ा + भू + क्विप्।) मङ्गलग्रहः। इति हेमचन्द्रः॥

आषाढ़ी, स्त्री. (आषाढ़स्य इयं। आषाढ़ + अण् + ङीप्।) आषाढ़मासस्य पूर्णिमा। इति मेदिनी॥

आष्ट्र, क्ली, (अश्नुते आप्नोतीति अश् + ष्ट्रन् इडिच्च।) आकाशं। इत्युणादिकोषः॥

आस, ञि ङ ल उपवेशने। (अदा०-आत्म०-अक०-सेट्।) इति कविकल्पद्रुमः॥ विद्यमानतायां। इति तट्टीका॥

("आसने भगवानास्तां सहैभिर्मुनिपुङ्गवैः"। इति रामायणे १ काण्डे) ञि आसितेऽस्ति। ल ड आस्ते सिंहासने नृपः। विद्यमानतायामप्ययं। आकाशमास्ते। इति दुर्गादासः॥ (सम् + अधि) सम्यगुपवेशने। आप्तौ। यथा रघुवंशे, १३।५२।

"वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः"।

(अनु) पश्चादुपवेशने। यथा रघौ, २।२४।

"तामन्तिकन्यस्तबलिप्रदीपा-
मन्वास्य गोप्ता गृहिणीसहायः"। इति।

उपासनायां। यथा रामायणे,—

"ततश्चीरोचरासक्तः सन्ध्यामन्वास्य पश्चिमाम्"। इति।

(अभि) अभ्यासे। (उत्) उपेक्षायां। यथा माघे। २।४२।

"विधाय वैरं सामर्षे नरोऽरौ य उदासते"। इति।

(उप) समीपोपवेशने। यथा मनुः, ४।१५४।

"कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्"। इति।

बद्धाञ्जलिश्च गुरुसमीपमासीत इति तट्टीका॥ उपासनायां। यथा,—

"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते"। इति गीतायां १२।२। सेवने। यथा,—

"उपासते ये गृहस्था! परपाकमबुद्धयः"। इति मनुः ३।१०४। परपाकमुपासते सेवन्ते इति तट्टीका। (निर्) निरासे। अपसारणे। (प्रति + सम्) प्रतिदन्दितयावस्थाने। "कोऽन्यः प्रतिसमासेत कालान्तकयमादृते"। इति भारतम्। इत्यादि।)

आसः, पुं, (अस्यन्ते क्षिप्यन्ते अनेनेति। अस् + करणे घञ्।) धनुः। इति हेमचन्द्रः॥

आसक्तः, त्रि, (आङ् + सञ्ज + क्तः।) आसक्तिविशिष्टः। तत्पर्य्यायः। तत्परः २ प्रसितः ३। इत्यमरः॥ (विषयान्तरपरिहारेण सर्व्वदा निविष्टः। यथा, किराते।११।३४।

"असक्तास्त्वासभी मूढ़ा वामशीला हि जन्तवः"।)

आसक्तं, क्ली, (आङ् + सञ्ज + क्तः।) नित्यं। सततं। अविरतं। इति जटाधरः॥

आसक्तिः, स्त्री, (आङ् + सञ्ज + क्तिन्।) आनुरक्तिः। आसङ्गः॥

आसङ्गं, क्ली, (आङ् + सञ्ज + अच्।) अनवरतं। नित्यं। सततं। तद्युक्ते त्रि। इति जटाधरः॥

(यथा, कुमारे।५।६।

"न षट्पदश्रेणिभिरेव पङ्कजं
सप्रेवलासङ्गमपि प्रकाशते"।)

तुवरी। सौराष्ट्रमृत्तिका इति यावत्। इति राजनिर्घण्टः॥ आसक्तिः॥ (यथा, गीतायां ४।२०।

"त्यक्त्वा कर्म्मफलासङ्गमित्यतृप्तो निराश्रयः"।)

आसङ्गिनी, स्त्री, (आसङ्ग + इनि + ङीप्।) चक्रवातः। वातभ्रमः। इति त्रिकाण्डशेषः॥ घूरणिया वातास इति भाषा।

आसत्तिः, स्त्री, (आङ् + सद् + क्तिन्।) सङ्गमः। लाभः। इति मेदिनी॥ (अविच्छेदः। निरन्तरं। यथा, साहित्यदर्पणे २ य परिच्छेदे।

"वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"।

आसत्तिर्बुद्ध्यविच्छेदः" इति तट्टीका।)

न्यायते पदसन्निधानकारणं। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिकारणं। इति सिद्धान्तमुक्तावली॥

आसनं, क्ली, (आस्यते उपविश्यतेऽस्मिन्। आस् + अधिकरणे + ल्युट्।) पीठ। पिँड़ि चौकि इत्यादि भाषा। हस्तिस्कन्धदेशः। यत्र महामात्रो निवसति। विजिगीषोर्दुर्गादीनवर्ज्जयतः स्थितिः। इत्यमरः॥ याचानिवर्त्तनं। इति मेदिनी॥ अष्टाङ्गयोगस्य द्वितीययोगाङ्गं। तच्च पञ्चप्रकारकरचरणादिसंस्थानविशेषः। यथा,—

"पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा।
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्"॥

तेषां क्रमः।

"ऊर्ब्वोरुपरि विन्यस्य सम्यक् पादतले उभे।
अङ्गुष्ठौ च निबध्नीयात् हस्ताभ्यां व्युत्क्रमात्तथा॥
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम्॥१॥
जानूर्ब्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायो विशेन्मन्त्री स्वस्तिकं तत् प्रचक्षते॥२॥
सीमन्याः पार्श्वयोर्न्यस्येदगुल्फयुग्मं सुनिश्चलम्।
वृषणाधःपादपार्ष्णिं पाणिभ्यां परिबन्धयेत्॥
भद्रासनं समुद्दिष्टं योगिभिः सारकल्पितम्॥३॥
ऊर्ब्वोः पादौ क्रमान्न्यस्येत् कृत्वा प्रत्यङ्मुखाङ्गुली।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्॥४॥
एकपादमधः कृत्वा विन्यस्योरौ तथेतरम्।
ऋजुकायो विशेन्मन्त्री वीरासनमितीरितम्"॥५॥

इति तन्त्रसारः॥ अन्यच्च।

"आसनानि कुलेशानि यावन्तो जीवजन्तवः।
चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्॥
आसनेभ्यः समस्तेभ्यः साम्प्रतं द्वयमुच्यते।
एकं सिद्धासनं नाम द्वितीयं कमलासनम्"॥

इति निरुक्ततन्त्रम्॥

षट्कारासनानि बन्धशब्दे द्रष्टव्यानि॥

उपवेशनाधारः। पीठादि। यथा।

श्रीभगवानुवाच।

"उपचारान् प्रवक्ष्यामि शृणु षोड़श भैरव।
यैः सम्यक् तुष्यते देवी देवोऽप्यन्यो हि भक्तितः॥
आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे त्यजेत्॥

पौष्पासनं यद्विहितं यस्य तद्यदि गर्भकम्॥
निवेदयेत्तदा पद्मे विपुलं द्वारि चोत्सृजेत्।
पौष्पं पुष्पैरचितं कुशसूत्रादिसंयुतं॥
अतिप्रीतिकरं देव्या ममाप्यन्यस्य भैरव।
यद्दारुसमुद्भूतमासनं मरुजं शुभम्॥
नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत्॥
अन्यदारूद्भवाप्यपि दद्यादासनमुत्तमम्॥
सकण्टकं क्षीरयुक्तं दारुसारविवर्जितम्।
चैत्यश्मशानसंभूतं वर्जयित्वा विभीतकम्॥
वाल्कलं कोषजं फालं वस्त्रमेतत्त्रयं मतम्।
रोमजं कम्बलश्चैव तदनेन चतुष्टयम्॥
अनेन रचितं दद्यादासनं चेष्टभूतये।
सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च॥
गजानां तुरगाणाञ्च कृष्णसारस्य चर्म्मणः।
शूकरस्याथ रासस्य मृगाणां नवभेदिनाम्॥
चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं स्मृतम्।
वास्तेषु कम्बलं शुक्लमासनं देवतुष्टये॥
राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्दनोद्भवम्।
यच्चासनं कुशमयं तदासनमनुत्तमम्॥
सर्व्वेषामपि देवानामृषीणाञ्च यतात्मनाम्।
योगपीठस्य सदृशमासनं स्थानमुच्यते॥
आसनस्य प्रदानेन सौभाग्यं मुक्तिमाप्नुयात्।
रुरुरो रोहितो व्यङ्गः सम्बरो वभ्रुणो रुरुः॥
पृषतैणहरिणास्तेति मृगा नवविधा मताः।
हरिणस्यापि विज्ञेयः पञ्चभेदोऽत्र भैरव॥
ऋष्यः खड्गो रुरुश्चैव एषतश्च मृगस्तथा।
एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः॥
सर्व्वेषां तैजसानाञ्च आसनं ज्येष्ठमुच्यते।
आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव वा॥
शिलामयं मणिमयं तथा रत्नमयं मतम्।
आसनं देवताभ्यस्तु मुक्त्यै मुक्त्यै समुत्सृजेत्॥*॥
अथैव साधकानाञ्च आसनं शृणु भैरव।
यत्रासीनः पूजकस्तु सर्व्वसिद्धिमवाप्नुयात्॥
शैलाञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम्।
आसनं साधकानाञ्च सततं परिकीर्त्तितम्॥
पूर्ब्बोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम्।
तत्सर्व्वमासनं शुक्लं पूजाकर्म्मणि साधके॥
न यथेष्टासनो भूयात् पूजाकर्म्मणि साधकः।
काष्ठादिकासनं कुर्य्यात् मितमेव सदा बुधः॥*॥
चतुर्व्विंशत्यङ्गुलेन दीर्घं काष्ठासनं मतम्।
षोड़शाङ्गुलविस्तीर्णमुत्सेधचतुरङ्गुलम्॥
षड़ङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चात्र कारयेत्।
पूर्ब्बोक्तं वर्ज्जयेद्दर्ब्भमासनं पूजनेष्वपि॥
वास्त्रं द्विहस्तान्नो दीर्घं सार्द्धहस्तान्न विस्तृतम्।
न व्यङ्गुलात्तथोच्छ्रायं पूजाकर्म्मणि संश्रयेत्॥
यथेष्टं चार्म्मणं कुर्य्यात् पूर्ब्बोक्तं सिद्धिदायकम्॥
षड़ङ्गुलाधिकं कुर्य्यान्नोच्छ्रितन्तु कदाचन।
काम्बलं चार्म्मणं चैलं महामायाप्रपूजने॥
प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च।
त्रिपुरायाश्च सततं विष्णोश्चापि कुशासनम्॥
वङ्कदीर्घं वङ्कहस्तायं तथैव वङ्कविस्तृतम्।
दारुभूमिसमं प्रोक्तमप्यासनं सर्व्वकर्म्मणि॥

पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम्।
न पञ्चमासनं कुर्य्यात् कदाचिदपि पूजने॥
न प्राण्यङ्गसमुद्भूतमस्थिजं हिरदादृते।
मातङ्गदन्तसञ्जातमासनं कामिके चरेत्॥
चर्म्मपूर्व्वोदितं ग्राह्यं तथा गन्धमृगस्य च॥१॥
सलिले यदि कुर्व्वीत देवतानां प्रपूजनम्॥
तत्राप्यासनमासीनो नोत्थितस्तु समाचरेत्।
तोये शिलामयं कुर्य्यादासनं कौशमेव वा॥
दारवं तैजसं वापि नान्यदासनमाचरेत्।
आसनारोपसंस्थानं स्नानाभावे तु पूजकः॥
आसनं कल्पयित्वा तु मनसा पूजयेज्जले॥
यद्यासनस्य संस्थानं तोयमध्ये न विद्यते॥
अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत्।
इत्येतत् कथितं पुत्र पूज्यपूजकसङ्गतम्॥
आसनं पाद्यमधुना शृणु वेतालभैरव"॥
इति कालिकापुराणे ६७ अध्यायः॥

आसनः, पुं, (आस् क्षेपने + ल्युः + प्रज्ञाद्यण्।) जीवकवृक्षः। इति मेदिनी॥ (जीवकवृक्षशब्देऽस्य विशेषो ज्ञेयः।)

आसना, स्त्री, (आस्यतेऽस्याम्। आस + ण्यासश्रन्थो युच्।) स्थितिः। इत्यमरः॥

आसनी, स्त्री, (आस्यतेऽस्मिन्। आस + अधिकरणे ल्युट् + स्त्रियां ङीप्।) विपणिः। (आस + भावे + ल्युट् + ङीप्) स्थितिः। इति मेदिनी॥

आसन्दः, पुं, (आसं ददातीति। आस + ड।) वासुदेवः। इति मेदिनी॥

आसन्दी, स्त्री, (आस्यतेऽस्यां। आस्। अन्दादयश्चेति साधुः।) क्षुद्रखट्वा। इति मेदिनी॥ (यथा, शतपथब्राह्मणे ५।४।४।१। "तस्मादस्मा आसन्दीमाहरन्ति सैषा खादिरी विदग्धा भवति येयं वभ्रुयुता भरतानाम्"।)

आसन्नः, त्रि, (आङ् + सद् + क्तः।) निकटः। इत्यमरः॥ (समीपवर्त्ती, कुमारसम्भवे, ३।४४॥ "आसीनमासन्नशरीरपातः"। अस्ताभिमुखः सूर्य्यः।)

आसवः, पुं, (आस् + सुञ् + अप्।) मद्यविशेषः। तत्पर्य्यायः। मैरेयं २ शीधुः ३। इत्यमरः॥
"शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत्।
मैरेयं धातकीपुष्पगुडधानारसंस्थितम्"॥
इति माधवेन भेदः कृतस्यापि सूक्ष्ममनादृत्येदमुक्तम्। इति भरतः॥ मद्यमात्रम्। इति राजनिर्घण्टः॥ (यथा मनुः ११।९५।
"यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः"।)
("यदपक्वौषधाम्भ्यां सिद्धं मद्यं स आसवः"। इति भरतधृतेः। यथा भावप्रकाशे।
"आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः"।)

आसवभेदेन गुणभेदो यथा॥
"क्लेदी मध्वासवक्षीणो मेहपीनसकासजित्"।
"शार्करः सुरभिः स्वादुर्हृद्यो गतिमदो मधुः"।
इति च वाभटः॥
"सुखप्रियः सुखमदः सुगन्धिर्वक्त्ररोगनुत्।
जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः"॥
"रोचनो दीपनो हृद्यः शोषशोफार्शसंहितः।
स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्वरसो मतः"॥
"मृदो भिन्नग्रहद्रावो गौड़स्तर्पणदीपनः।
क्लेदी मध्वासवस्तीक्ष्णो मेरेयो मधुरो गुरुः"॥
इति चरकः॥ तथा च सुश्रुते॥
"तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्॥
मुखप्रियः शिरमदो विज्ञेयोऽनिलनाशनः।
लघुर्मध्वासवक्लेदी मेहकुष्ठविषापहः॥
तिक्तः कषायः शोफघ्नस्तीक्ष्णः खादुरवातलुत्।
तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्महृत्॥
कृमिमेदोऽनिलहरो मेरेयो मधुरो गुरुः।
बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः"॥)

आसवद्रुः, पुं, (आसवस्य द्रुः।) तालवृक्षः। इति राजनिर्घण्टः॥

आसादितः, त्रि, (आङ् + सद् + णिच् + क्तः।) प्राप्तः। लब्धः। इत्यमरः॥ (सन्निधापितः, आयोजितः, सम्पादितः।)

आसारः, पुं, (आङ् + सृ + घञ्।) धारासंपातः। वेगवृष्टिः। (मेघदूते, "त्वामासारप्रशमितवनोपप्लवं साधु मूर्द्धा"। प्रसरणम्। सैन्यानां सर्व्वतो व्याप्तिः। इत्यमरः॥ (यथा पञ्चतन्त्रे।३।४९। "तस्मात् दुर्गं दृढं कृत्वा सुभटासारसंयुतं"।) सङ्घट्टनम्। इति मेदिनी॥ (यथा पञ्चतन्त्रे ३।२९। "अज्ञातवीर्यधासारतोयप्रस्थो व्रजेत्तु यः"।)

आसीनः, त्रि, (आस् + शानच्।) उपविष्टः। इति जटाधरः॥ वसा लोक इत्यादि भाषा।

आसीनप्रचलायितं, क्ली, (आसीनेन उपविष्टेन प्रचलवदाचरितम्।) उपविश्य निद्रावशेन दोलनम्। इति राजवल्लभः॥ ढोला इति भाषा।

आसुतिः, पुं, (आसूयते + आङ् + सुञ् + क्तिन्।) मद्यसन्धानम्। इति हेमचन्द्रः॥ मद चोयान इति भाषा।

आसुतीबलः, पुं, (आसुतिरस्यास्ति रजःशब्दाद्यासुतिपरिषदौ बलच्। बलेति दीर्घः।) यज्वा। शौण्डिकः। इति हेमचन्द्रः॥ (कन्यापालः, शूद्रजातिविशेषः।)

आसुरः, पुं, (असुर + प्रज्ञाद्यण्।) असुरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
"ब्राह्माद्याश्चाष्टविवाहान्तर्गतविवाहविशेषः।
"आसुरो द्रविणादानात्"। इति याज्ञवल्क्यः।
"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते"॥
इति मनुः ३।३१।

आसुरं, क्ली, विड्लवणम्। इति राजनिर्घण्टः॥ असुरस्य भावः। (यथा गीतायां ७।१५।
"न मां दुष्कृतिनो मूढा प्रपद्यन्ते नराधमाः।
माययापहृतज्ञाना आसुरं भावमाश्रिताः"।)
असुरसम्बन्धीये त्रि। इति शब्दरत्नम्॥

आसुरं, त्रि, (असुरस्येदम्। असुर + अण्।) असुरसम्बन्धि। यथा—
"यस्मिन् नवे पुराणे च विष्णे देवा न लेभिरे।
आसुरं तद्भवेत् श्राद्धं हवनं मन्त्रवर्जितम्"॥
इति श्राद्धतत्त्वे ऋग्वेदीयगृह्यपरिशिष्टम्॥
अपि च।
"स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने।
आसुरी राक्षिरन्यत्र तस्मात्तां परिवर्ज्जयेत्"॥
इति श्राद्धतत्त्वधृतयमवचनम्॥*॥ आसुरसर्गो यथा।
"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥
प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम्॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहात् गृहीत्वा सद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः॥
चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥
आत्मसम्भावितास्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम्॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्"॥
इति श्रीभगवद्गीतायां १६ अध्यायः॥

आसुरी, स्त्री, (असुरस्य इयं। असुर + तस्येदमित्यण् ततः ङीप्।) रात्रिका। राइ सर्षा इति भाषा। इति राजनिर्घण्टः॥ त्रिविधचिकित्सान्तर्गतचिकित्साविशेषः। सा च क्लेदभेदाद्यात्मिका। इति वैद्यकं शब्दचन्द्रिका च॥

आसेचनः, त्रि, (न सिच्यते मनोऽत्र। नञ् + सिच् + अधिकरणे ल्युट्। ततः स्वार्थे अण्।) यस्य दर्शने तृप्तेरन्तो न जायते सः। तत्पर्य्यायः। अतृप्तिकृत् २। इति हारावली॥ (आ + सिच् + करणे + ल्युट्। आसेचनपात्रम्। यथा, ऋग्वेदे १।१६९।२३। "या पात्रं पूर्णा आसेचनानि"।)

आसेचनकः, त्रि, (आसेचन एव संज्ञायां कन्।) आसेचनकः। आसेचनः। इत्यमरटीकायां रायमुकुटः॥ (यथा, साहित्यदर्पणे १०म परिच्छेदे।
"नयनयुगासेचनकं मानसतृप्त्यापि दुष्पापम्"।)

आस्कन्दनं, क्ली, (आङ् + स्कन्द + भावे ल्युट्।) तिरस्कारः। रवः। घोषणं। इति मेदिनी॥ (यथा किराते ६।२५। "चरणास्कन्दननामिताचलेन्द्रः"।)

आस्कन्दितं क्ली, (आङ् + स्कन्द + भावे + क्त।) अश्वगतिविशेषः। स च सम्यग्गतिः। इत्यमरः॥

आस्कन्दितकं, क्ली, (आस्कन्दितमेव स्वार्थे कन्।) आस्कन्दितं। अश्वानां पञ्चमगतिः। तत्पर्य्यायः। उत्तेरितं २ उपकण्ठं ३। इति हेमचन्द्रः॥ ("उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि। उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः"। हेमचन्द्रः॥)

आस्तरः, पुं, (आस्तीर्य्यतेऽसौ। आङ् + स्तृ + अप्।) कटिकम्बलं। इति हेमचन्द्रः॥ वस्त्राद्यास्तरणं॥ (यथा भागवते, २।१९। "वासो वल्कलमास्तरः किमजिनव्यान्योक्तरूक्षां तलम्"॥)

आस्तरणं, क्ली, (आस्तीर्य्यते यत् येन वा आङ् + स्तृ + कर्म्मणि करणे वा ल्युट्।) हस्तिपृष्ठस्थितचित्रकम्बलं। झूल इति भाषा। तत्पर्य्यायः। प्रवेणी २ वर्गः ३ परिस्तोमः ४ कुथा ५ कुथः ६। इत्यमरः॥ प्रवेणिः ७ परिस्तोमः ८ कुथं ९। इत्यमरटीका॥ (अन्यथा, कुशासनं। यथा रामायणे, ३ काण्डे।

"राङ्कवास्तरणे पूर्ब्बमयोध्याधामिवासने"।

महाभारते, आदिपर्ब्बणि।

"दर्भास्तरणमास्तीर्य्य निश्चयात् धृतराष्ट्रजः"॥)

आस्तिकः, पुं, (अस्तीत्यस्य। अस्ति + ठक्।) मुनिविशेषः। स तु जरत्कारुमुनिपुत्रः। तत्पिता गर्भस्थं तं ज्ञात्वास्तीत्युक्ता गत इत्यस्मादास्तिकः। (यथा,—

"अस्तीत्युक्ता गतो यस्मात् पिता गर्भस्थमेव तम्।
वनं तस्मादिदं तस्य नामास्तिकेति विश्रुतम्"॥)

इति महाभारतम्॥

("आस्तिकस्य मुनेर्माता भगिनी वासुकेस्तथा"। इति मनसाप्रणाममन्त्रः।)

आस्तिकः, त्रि, (अस्ति ईश्वर इति मतिर्यस्य। अस्ति + ठक्।) नास्तिकभिन्नः। ईश्वरोऽस्तीतिवादी। वेदप्रामाण्यवादी। तत्पर्य्यायः। श्रद्धालुः २ आद्धः ३। इति हेमचन्द्रः॥

("सत्यधर्म्मच्युतात् पुंसः क्षुद्रादाद्धीविषादिव। अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः"॥ इति महाभारते आदिपर्ब्बणि॥)

आस्तिकार्थदः, पुं, (आस्तिकस्य मुनेरर्थं सर्पसत्रात् निवृत्तिरूपप्रयोजनं ददाति यः। जनमेजयो राजा आस्तिकमुनिवचनात् सर्पयज्ञात् विरराम इति पौराणिकी कथा।) जनमेजयो राजा। इति शब्दरत्नावली॥

आस्तीकः, पुं, आस्तिकमुनिः। इति त्रिकाण्डशेषः॥

आस्तीकजननी, स्त्री, (आस्तीकस्य जननी माता, षष्ठीतत्पुरुषः।) आस्तिकमाता। मनसा देवी। इति शब्दरत्नावली॥

आस्था, स्त्री, (आङ् + स्था + अङ् + टाप्।) यत्नः। आलम्बनं। आस्थानं। अपेक्षा। इति मेदिनीकारहेमचन्द्रौ॥ (श्रद्धा। आदरः। प्रतिष्ठा। यथा, रघौ १०।७३।

"दैवात् सर्गादवध्यत्वं मर्त्त्यास्यापराङ्मुखः"।
"विनश्वरे विहायास्यां यशः पालय मित्र मे"।

इति हितोपदेशः॥)

आस्थानं, क्ली, (आस्थीयतेऽस्मिन् इति। आङ् + स्था + ल्युट्।) सभा। इत्यमरः। (यथा, किराते १।१६। "अनेकराजन्यरथाश्वसंकुलं

तदीयमास्थानिकेतनाजिरम्"।)

यत्नः। इत्यजयः॥ (आश्रयः। स्थानम्।)

आस्थानी, स्त्री, (आस्थान + ङीप्।) सभा। इत्यमरः॥ ("आस्थानीं समये समं नृपजनः सायन्तने सम्यतन्"। इति रत्नावली।)

आस्पदं, क्ली, (आस्पद्यतेऽस्मिन् इति। आस्पदं प्रतिष्ठायामिति निपातनात् सट्।) प्रतिष्ठा। कर्म्म। इत्यमरः॥ प्रभुत्वं। इति धरणी। स्थानं। इति हेमचन्द्रः॥ ("रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः"। इति नागानन्दे। तथा च रघौ ३।३६।

"नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम्"।)

आस्यन्दनं, क्ली, (आङ् + स्यन्द + ल्युट्।) स्यन्दनं। क्षरणम्॥

आस्फालः, पुं, (आङ् + स्फुल् + घञ्।) हस्तिकर्णास्फालनं। हातिर काण नाड़ा इति भाषा। तत्पर्य्यायः। झलज्झला। इति हारावली-त्रिकाण्डशेषौ॥ (आस्फालनं। सञ्चालनं।)

आस्फालनं, क्ली, (आङ् + स्फुल् + णिच् + ल्युट्।) आटोपः। प्रागल्भ्यम्॥ (यथा रघौ ६।७३।

"ऐरावतास्फालनविभ्रमं यः
सङ्घट्टयन्नङ्गदमङ्गदेन"।)

आस्फुजित्, पुं, (आस्फु + जि + क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

आस्फोटः, पुं, (आङ् + स्फुट् + अच्।) आस्फोतवृक्षः। इति शब्दरत्नावली॥ आकन्द इति भाषा। शूरादेर्बाङ्कादिशब्दः। इति श्रीभागवतम्॥ ("कक्षैः कक्ष्यां विधुन्वानावास्फोटं तच्च चक्रतुः"। इति महाभारते सभापर्ब्बणि।)

आस्फोटकः, पुं, (आङ् + स्फुट् + ण्वुल्।) पर्व्वतजपोलुवृक्षः। इति शब्दमाला॥ आकरोट इति भाषा।

आस्फोटनं, क्ली, (आङ् + स्फुट् + ल्युट्।) विकाशः। मुद्रणं। इति धरणी॥ बाङ्कादिशब्दः। ताल ठोका इत्यादि भाषा॥ (यथा रामायणे ५ काण्डे। "आस्फोटननिनादांस्च बालानां तत्र खेलताम्"॥ धान्यादेस्तुषविश्लेषकरणम्।)

आस्फोटनी, स्त्री, (आस्फुट्यतेऽनया। स्फुट् + करणे। ल्युट् + ङीप्।) वेधनिका। इत्यमरः॥ तुरपन भमर इत्यादि भाषा।

आस्फोटा, स्त्री, (आस्फोटयतीति। आङ् + स्फुट् + अच् + टाप्।) नवमल्ली। वनमल्ली। इति शब्दरत्नावली॥ (नवमल्लीशब्देऽस्या विशेषो ज्ञेयः।)

आस्फोतः, पुं, (आस्फोटयतीति। आङ् + स्फुट् + अच् + पृषोदरादित्वात् साधुः।) अर्कवृक्षः। कोविदारकवृक्षः। इति मेदिनी॥ भूपलाशवृक्षः। इति शब्दचन्द्रिका॥ (यथा, वाभटे।

("मूलं सप्ताङ्गात्त्वक्क्षीरीधात्र्यमारादर्कान्मालत्याश्चित्रकास्फोतनिम्बात्।
बीजं कारञ्जं सार्षपं प्राणनाटं
श्रैष्ठा जन्तुघ्नं क्रूषणं हे हरिद्रे"॥)

आस्फोतकः, पुं, (आस्फोत एव स्वार्थे कन्।) अर्कवृक्षः। इति राजनिर्घण्टः॥

आस्फोता, स्त्री, (आस्फोत + टाप्।) अपराजिता। वनमल्लिका। इति मेदिनी॥ सारिवावृक्षः। इति राजनिर्घण्टः। वृक्षविशेषः। हापरमालीति ख्याता। अस्या गुणौ। कुष्ठविषरोगनाशित्वं। इति राजवल्लभः॥

आस्यं, क्ली, (अस्यते क्षिप्यतेऽस्मिन् इति अस क्षेपणे कर्त्तरि ल्युट इति ण्यत्। यदा आस्यन्दते अस्रादिना प्रस्रवति इति स्यन्दू प्रस्रवणे + ड।) मुखं। सुखमध्यम्। (यथा, मनुः १।८५।)

("यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः"।) (आस्ये भवमास्यं।) मुखभवे त्रि। इति मेदिनी॥

आस्यपद्मं, क्ली, (आस्यमिव पद्मानि यस्य तत्।) पद्मं। इति शब्दचन्द्रिका।

आस्यलाङ्गलः, पुं, (आस्यं लाङ्गलं भूविदारकयन्त्रमिव यस्य।) शूकरः। इति हेमचन्द्रः॥

आस्यलोम, [न्] क्ली, (आस्यस्य लोम।) श्मश्रु। इति हेमचन्द्रः॥

आस्या, स्त्री, (आस् + ण्यत्।) स्थितिः। इत्यमरो मेदिनी च॥ (आसनं, इति वैद्यमाधवकररोगविनिश्चयसंग्रहे। यथा,—

"आस्यामुखं खप्रसखं दधीनि"

सुश्रुतेऽस्या गुणा यथा,

"आस्या वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा"।)

आस्यासवः, पुं, (आस्यस्य मुखस्य आसव इव।) लाला। इति हेमचन्द्रः॥ थुतु लाल इत्यादि भाषा।

आस्यपः, पुं, (आस्यं पिबतीति। आस्य + पा + क।) मूलानक्षत्रं। इति हेमचन्द्रः॥ (राक्षसः।)

आस्रवः, पुं, (आङ् + स्रु + अच्।) क्लेशः। कर्म्म। इत्यमरः॥

आह, व्य, (उवाच इत्यर्थे कालमात्रे निपातोऽयं।) क्षेपः। नियोगः। इति मेदिनी॥ दृढ़सम्भावनं। इति शब्दरत्नावली॥

आह्निकज्वरः, पुं, (आह्निको नासारोग एव ज्वरः।) नासारोगविशेषः। नासाज्वर इति ख्यातः। तस्य लक्षणम्।

"तनुना रक्तशोथेन युक्तो नासापुटान्तरे।
गात्रशूलज्वरकरः श्लेष्मणा ह्याह्निकः स्मृतः"॥

इति वैद्यकम्॥ (आह्नेव इति क्वचिदेवके पाठः। तद्यथा, आह्नेवज्वरस्य लक्षणम्।

"शोथः सरक्तो नासायां व्यथासावौ ज्वरस्तथा।
वातश्लेष्माद्यगृत्यर्थं आह्नेवाख्यं विनिर्द्दिशेत्"।

अस्य चिकित्सा यथा, वैद्यकचिकित्सारत्ने ॥
"दूर्व्वाचव्यं फलं माषकुलत्थौ वंशपत्रिका ।
जलस्थलभवौ कर्णमोरटाखरमञ्जरी ॥
दण्डोत्पलस्य मूलानि क्षाय्यादशगुणेऽम्भसि ।
तत्पादशेषिते तैलं तुलां क्षत्वा विपाचयेत् ।
तत्तैलं प्रतिमर्षेण आहवाख्यं ज्वरं जयेत्" ॥
॥*॥ दूर्व्वाद्यं तैलं ॥*॥)

आहतं, क्ली, (आ + हन् + क्त ।) पुरातनवस्त्रं । नूतनवस्त्रं । इति मेदिनी । मषार्थकवाक्यं । इत्यमरः ॥

आहतः, त्रि, (आ + हन् + क्तः ।) गुणितः । ताडितः । इति मेदिनो ॥ ("प्रति दिवसं याति लयं वसन्तवातादृतेव शिशिरश्रीः"। इति पञ्चतन्त्रम् ।) क्षातः । मिथ्योक्तः । इत्यजयः ॥ निहतः । "द्यूना विंशतिराहताद्यौहिणीनाम्"। इति महाभारतम् ।)

आहतः, पुं, (आहन्यते यः + आङ् + हन् + कर्म्मणि + क्त ।) आनकः । ढक्का । इति मेदिनी ॥

आहतलक्षणः, त्रि, (आहतं अभ्यस्तं लक्षणं यस्य ।) गुणैः प्रतीतः । गुणेन ख्यातः । तत्पर्य्यायः । क्षतलक्षणः २ । इत्यमरः ॥

आहरः, पुं, (आङ् + हृ + अच् !) उच्छ्वासः । अन्तर्मुखश्वासः ॥ इति हेमचन्द्रः ॥ (आहरणशीले वाच्यलिङ्ग एव । यथा, रघौ १।४६ ।
"वनान्तराद्पाहृत्तैः समित्कुशफलाहरैः" ।)

आहरणं, क्ली, (आङ् + हृ + भावे ल्युट् ।) द्रव्याद्यानयनं । आसादनम् । यथा । देवीपुराणं ।
"मृदाहरणसंघट्टप्रतिष्ठाक्षानमेव च ।
स्नपनं पूजनञ्चैव विसर्जनमतःपरं" ॥
इति तिथ्यादितत्त्वम् ॥

आहवः, पुं, (आह्वयते अरिर्यस्मिन् । आङ + ह्वे + अप् ।) युद्धं ।
("यदाश्रौषं भीष्ममत्यन्तशूरम्
हतं पार्थेनाहवेष्वप्रधृष्यम्" ॥
इति महाभारते आदिपर्व्वणि १।१८२ ।
आह्वयते आह्वादिकं यत्र । आङ् + ह्वे + अप् ।) यज्ञः । इति शब्दरत्नावली ॥

आहवनीयः, पुं, (आह्वयते आज्यादिरस्मिन् । आङ् + ह्वे + अनीयर् ।) यज्ञाग्निविशेषः । इत्यमरः । गार्हपत्यादुद्धृत्य होमार्थं यः संस्क्रियते सः । इति भरतः ॥ (यथा, मनौ २।२३१ ।
"गुरुराहवनीयस्तु साग्निरेता गरीयसी" ।)

आहारः, पुं, (आङ् + हृ + घञ् ।) द्रव्यगलाधःकरणं । तत्पर्य्यायः । जग्धिः २ भोजनं ३ जेमनं४ लेपः ५ निघसः ६ न्यादः ७ । इत्यमरः ॥ जमनं ८ विघसः ९ इति तट्टीका ॥ प्रत्यवसानं १० भक्षणं ११ अशनं १२ ॥ इति रत्नमाला ॥ अभ्यवहारः १३ खदनं १४ निगरः १५ । इति राजनिर्घण्टः ॥ अस्य गुणाः । सद्यस्तृप्तिजनकत्वं । बलकारित्वं । देहधारकत्वञ्च । इति राजवल्लभः ॥
("तमुवाच भगवानात्रेयः। हिताहारोपयोग एकएव पुरुषस्याभिवृद्धिकरो भवति। अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति"।
"तमुवाच भगवानात्रेयः। यदाहारजातमभिवेश्य ! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति, विषमांश्च समीकरोतीत्येतद्धितं विद्धि तद्विपरीतं इत्येतद्धिताहितलक्षणमनघवादभवति एवं वादिनञ्च भगवन्तमात्रेयमग्निवेश्य उवाच। भगवन्नेतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति। तमुवाच भगवानात्रेयः। येषां विदितमाहारतत्त्वमग्निवेश्य ! गुणतो द्रव्यतः कर्म्मतः सर्व्वावयवतो मात्रादयो भावास्तत्र तदेवमुपदिष्टं विज्ञातुमुत्सहेरन् यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति तथैतदुपदेक्ष्यामः। मात्रादीन् भावानुदाहरन्तस्तेषां हि बहुविधविकल्पा भवन्ति। आहारविधिविशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्यामः। तद्यथा,आहारत्वमाहारस्यैकविधमर्थाभेदात्। स पुनर्द्वियोनिः स्थावरजङ्गमात्मकत्वात्। द्विविधः प्रभावो हिताहितोदर्कविशेषात्। चतुर्विधोपयोगः पानाशनभक्ष्यलेह्योपयोगात्। षड्रसादो रसभेदतः षड्विधत्वात्" । इति चरकः ॥
"यदाहारगुणैः पानं विपरीतं तदिष्यते।
अन्नानुपानं धातूनां दृष्टं यन्न विरोधि च" ॥
इति च चरकः ॥
"प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च षट्सु रसेष्वायत्तो रसाः पुनर्व्यायामयः" ॥
"स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखकरश्च भवति" ।
"आहारः प्रीणनः सद्यो बलवर्द्धनदेहधारकः ।
आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः" ॥
इति सुश्रुतः ॥) स त्रिविधः। सात्विकः १ राजसिकः २ तामसिकः ३ । सात्विकाहारो यथा,— ८ श्लोकः ।
"आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्द्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः" । राजसिकाहारो यथा, ९ श्लोकः ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः" ॥
तामसिकाहारो यथा, १० श्लोकः ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" ॥
इति श्रीभगवद्गीता १७ अध्यायः ॥ आहरणं । इति मेदिनी ॥
("स पुनर्दैवयान्योक्तः पुण्याहारो यदृच्छया"। इति महाभारतम् । आदिपर्व्वणि ७६ । सम्भवपर्व्वणि ७६।३५ ।)

आहारसम्भवः, पुं, (आहारात् सम्भवो यस्य ।) शरीरस्थरसधातुः । इति हेमचन्द्रः ॥

आहार्य्यं, त्रि, (आङ् + हृ + ण्यत् ।) आगन्तुकं । इति त्रिकाण्डशेषः ॥
("आहार्य्यैर्नार्यमाणं हि त्यागं दुःखेन हृद्यताम्" इति कामन्दकः ।) आहरणीयं ॥ (यथा, मनुः ८।२०२ । "अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः" ।) (ग्रन्थकर्म्मभेदः । यथा सुश्रुते "तच्च ग्रन्थकर्म्माष्टविधं, तद्यथा ;—छेद्यं भेद्यं, लेख्यं वेध्यं ऐष्यं, आहार्य्यं, विश्राय्यं, जीव्यमिति"। "आहार्य्याश्चर्कराक्षिखो दण्डकर्णमलाम्बरी" ।)

आहार्य्यः पुं, नाट्योक्तौ व्यञ्जकविशेषः । स तु भूषादिना रचितः । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे । षष्ठाङ्के ।
"भवेदभिनयोऽवस्थानुकारः स चतुर्व्विधः ।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा" ॥)

आहार्य्यशोभा, स्त्री, (आहार्य्यात् या शोभा ।) कृत्रिमशोभा । चित्रभूषादिना कृतद्युतिः । इति जटाधरः ॥ (यथा, भट्टिकाव्ये २य सर्गे,—
"आहार्य्यशोभारहितैरमार्यैः
ऐच्छिष्ट पुंभिः प्रचितान् स गोष्ठान्" ।)

आहावः, पुं, (आङ् + ह्वे + अप् ॥ निपातनात् वृद्धिः ।) कूपसमीपे पश्वादिजलपानार्थकृतखल्वजलाश्रयः । इत्यमरः ॥ चौबाच्चा इति भाषा । (आह्वयतेऽरिरत्र इति व्युत्पत्त्या ।) युद्धं । आह्वानं । इति धरणिः ॥ (आह्वयतेऽत्र इति आ + ह्वे + अधिकरणे घञ् ।) अग्निः ।)

आहिकः, पुं, (अहिरिव आकृतिर्यस्य । अहि + ठक् ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥ केतुग्रहः । इति हेमचन्द्रः ॥

आहितः, त्रि, (आङ् + धा + क्त ।) न्यस्तः । अर्पितः । स्थापितः । इति हलायुधः ॥
(यथा, किराते ।
"आवर्त्तनैरर्पितपेरयमाहिताङ्गैः" ।)

आहितलक्षणः, त्रि, (आहितं लक्षणं यस्य ।) आहतलक्षणः । इत्यमरटीकायां रमानाथः ॥ गुणादिद्वारा ख्यातः ।

आहिताग्निः, पुं, (आहितः स्थापितोऽग्निर्येन ।) साग्निकः । अग्निहोत्री इति स्मृतिः ॥
("न दर्शेन विना आद्धमाहिताग्नेर्द्विजन्मनः"। इति मनुः ३।२८२ । तथा च रघौ २ ४४ ॥
"गुरोरपीदं धनमाहिताग्नेः" ।)

आहितुण्डिकः, पुं, (अहितुण्डेन दीव्यति । अहितुण्ड + ठक् ।) आलग्याही । सापुड़िया इति भाषा । इत्यमरः शब्दरत्नावली च ॥ (यथा पञ्चतन्त्रम् ।
"वैद्यसांवत्सराचार्य्याः स्वपक्षेऽधिकृताश्चराः ।
यथाहितुण्डिकोन्मत्ताः सर्व्वं जानन्ति शत्रुषु" ।)

आह्निकं, क्ली, (आङ् + ह्नि + क ।) अहस्यानां पञ्चमहायज्ञान्तर्गतयज्ञविशेषः ॥ स तु नित्ययज्ञः । इति जटाधरः ॥

आह्वतिः, स्त्री, (आ + ह्वे + क्तिन् ।) देवोद्देशे मन्त्रोच्चारणपूर्व्वकोऽग्नौ हविर्निक्षेपः । तत्पर्य्यायः । देवयज्ञः २ होमः ३ होत्रं ४ वषट्कारः ५ । इति हेमचन्द्रः ॥ (यथा, रघौ १।५३ ।
"पुनानं पवनोद्भूतैर्धूमैरालक्षितागन्धिभिः" ।
धर्म्मात् मरुद्वत्यां जातः खनामख्यातो मरुद्वेदः ।
यथा हरिवंशे,—
"मरुद्वती मरुत्वन्तो देवानजनयत् सुतान् ।
नक्षत्रं चाह्वतिं चैव चारित्रं ब्रह्मपन्नगम्" ।)

आह्वल्यं, क्ली, (आङ् + ह्वल् + ष्यञ् ।) त्वपविशेषः तरवट इति काश्मीरादौ ख्यातं । तत्पर्य्यायः ।

आह्लि

इलराख्यं २ तगरं ३ तरवटं ४ शिम्बीफलं ५ सपुष्पं ६ पीतपुष्पं ७ काञ्चनपुष्पकं ८ नृपमाक्षल्यकं ९ शरत्पुष्पं १०। तस्य गुणाः। तिक्तत्वं। शीतलत्वं। चक्षुर्हितत्वम्। पित्तदाहमुखरोगकुष्ठकण्डूतिजन्तुशूलव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

आङ्क्तं, क्ली, (आ + ङ्के + क्त।) प्रलयपर्य्यन्तं। यथा,—
"कदम्बानि पटोलानि दन्ताकसहितानि च।
न त्यजेत् कार्त्तिके मासि यावदाङ्क्तनरकी"॥
"आङ्क्तानि आभूतानि प्रलयपर्य्यन्तानीति यावत्"। इति तिथ्यादितत्त्वम्॥

आङ्क्तः, त्रि. (आङ् + ङ्के + क्त।) कृताङ्कनः। यथा,—
"प्रगायतः खवीर्य्याणि तीर्थपादः प्रियश्रवाः।
आङ्क्त इव मे शीघ्रं दर्शनं याति चेतसि"॥
इति श्रीभागवते १ स्कन्धे ६। १४॥

आङ्क्तिः, स्त्री, (आङ् + ङ्के + क्तिन्।) आङ्कनं। इति शब्दरत्नावली॥

आङ्गेयं, त्रि, (अङ्गौ भवं। अङ्ग + ढञ्।) अङ्गिसम्बन्धि। तद्विषयधर्म्मादि। इत्यमरः॥

आङ्गो, व्य, (आ हन्तीति। आङ + हन् + डो।) विकल्पः। इत्यमरः। प्रश्नः। (यथा शाकुन्तले षष्ठाङ्के।
"दारत्यागी भवान्याङ्गो परस्त्रीस्पर्शपांसुलः"।)
विचारः। इति मेदिनीकरहेमचन्द्रौ॥
("आङ्गो निवर्त्तयति समं हरिणाङ्गनाभिः"।
इति शाकुन्तले प्रथमाङ्के।)

आङ्गोपुरुषिका, स्त्री, (अङ्गो अहमेव पुरुषः। मयूरव्यंसकादित्वात् समासः। अङ्गोपुरुषस्य भावः। अङ्गोपुरुष + वुञ् + स्त्रीत्वात् टाप्।) दर्पात् आत्मनि सम्भावना सा। इत्यमरः॥ अधिकार्थवचनेन शक्तेरप्रतिघातात्विष्करणं। आत्मविषयकार्य्यसिद्धिजननशक्त्याविष्करणं। इति भरतः॥
(यथा, भट्टौ ५।२७।
"आङ्गोपुरुषिकां पश्य मम सद्मलक्ष्मीभिः"।)

आङ्गोस्वित्, व्य, (आङ्गो च स्वित्च।) आङ्गो। विकल्पः। इत्यमटीका॥

आङ्गः, पुं, (अङ्गां समूहः।) दिनसमूहः। इति व्याकरणम्॥

आङ्गिकं, त्रि, (अङ्गा निर्व्वृत्तं। अङ्गन् + ठञ्।) दिननिर्व्वर्त्त्ये। दिनसाध्ये। इति मेदिनी॥ दिनसम्बन्धी॥

आङ्गिकं, क्ली, (अङ्गा निर्व्वृत्तं। अङ्गन् + ठञ्।) भोजनं। प्रकरणसमूहः। ग्रन्थभागः। नित्यक्रिया। इति मेदिनीकरहेमचन्द्रौ॥

अथ श्रीरघुनन्दनभट्टाचार्य्यकृताङ्गिकाचारतत्त्वोक्तकर्म्माणि संक्षेपेण लिख्यन्ते॥

तत्र प्रथमयामार्द्धकृत्यम्।

"ब्राह्मे मुहूर्त्ते जागरित्वा ब्रह्मविष्णुशिवनवग्रहान् स्मृत्वा गुरूंश्च नत्वा आत्मानं ब्रह्मत्वेन संभाव्य तद्विष्णुसंकल्पधर्म्मकर्म्मार्थं चिन्तयेत्॥

ततः शयनादुत्थाय सचिवासन्यस्ता पृथिवीं

आह्लि

नमस्कृत्य दक्षिणचरणं भूमौ विन्यस्य कर्कोटकनागदमयन्तीनलऋतुपर्णराजकार्त्तवीर्य्यार्জ্জুनान् स्मृत्वा नेत्रमुखे प्रक्षाल्य द्विराचामेत्॥

ततः नैर्ऋत्यां दक्षिणस्यां वा दिशि मूत्रपुरीषोत्सर्गं जलमृत्तिकाशौचञ्च कृत्वा द्विराचम्य हरिं स्मृत्वा दिवा सूर्य्यं रात्रौ चन्द्रं तारां वा तदसम्भवे अग्निं पश्येत्॥

ततो दन्तधावनं। दन्तकाष्ठाभावे निषिद्धदिने च द्वादशगण्डूषजलैः पञ्चैर्व्वा मुखं शोधयित्वा द्विराचामेत्।

ततः प्रातःस्नानं तिलकं सन्ध्यातर्पणञ्च कृत्वा सूर्य्योदयपर्य्यन्तं गायत्रीं जपेत्॥ स्नानाशक्तौ आर्द्रवस्त्रेण गात्रमार्জ্জनं मन्त्रस्नानञ्च कृत्वा सन्ध्योपासनं कुर्य्यात्॥

तत आदर्शादिदर्शनं दधिदूर्व्वादिमङ्गलद्रव्यस्पर्शनञ्च कुर्य्यात् इति॥ *॥

अथ द्वितीययामार्द्धकृत्यम्॥

वेदविद्याद्यभ्यासः। समित्पुष्पाद्याहरणञ्च॥ *॥

अथ तृतीययामार्द्धकृत्यम्।

गुरुदेवधार्म्मिकोपासनं। कुटुम्बभरणार्थमीश्वरोपासनादि च॥*

अथ चतुर्थयामार्द्धकृत्यम्।

मध्याह्नस्नानं। तच्च परस्नातोदके चेत् तदा सप्त पञ्च त्रीन् वा मृत्पिण्डान् तीरे क्षिप्त्वा नाभिमात्रोदके कुशहस्तः सशिरस्कमज्जनं कृत्वा द्विराचम्य सङ्कल्प्य यथाविधि चिर्निमज्जेत्॥

ततः स्नानवस्त्रपात्रव्यतिरेकेण गात्रमार्জ্জनं तिलकं तर्पणञ्च कुर्य्यात्॥

ततः अष्टममुहूर्त्ते मध्याह्नसन्ध्यां समाप्य ब्रह्मयज्ञं विधाय देवपूजनं कृत्वा पादोदकं नैवेद्यञ्च यथाकाले उपयुञ्जीत॥ *॥

अथ पञ्चमयामार्द्धकृत्यम्॥

बलिवैश्वदेवकर्म्मणी काम्यबलिकर्म्म वामदेव्यगानं गानाशक्तौ तस्य चिः पाठः पार्ব্বणश्राद्धानन्तरं बलिवैश्वदेवकर्म्मणी कर्त्तव्ये॥

बलिकर्म्मानन्तरमतिथिलाभार्थं मुहूर्त्तं गोदोहनकालं वा अभोजनेन प्रतीक्षेत। तल्लाभे भिक्षादिकं दत्त्वा तदनुव्रजेत्। तदानीमतिथ्यलाभे नित्यश्राद्धान्तरमतिथीन् भोजयेत्। भोजनासामर्थ्ये भिक्षां दद्यात्। अतिथ्यलाभे ब्राह्मणाय दानं तदसम्भवे अग्नौ जले वा किञ्चिदन्नं क्षिपेत्॥

ततो नित्यश्राद्धं। वामदेव्यगानं तदशक्तौ ऋक्त्रयं पठेत्। नित्यश्राद्धकरणासामर्थ्ये बलितर्पणाभ्यां पितृयज्ञसिद्धिः॥ ततो गोग्रासदानं गोनमस्कारञ्च कुर्य्यात्। ततो यथाविधि भोजनं। विष्णुपादोदकादिकं पूर्ব্বमगृहीतचेत् इदानीं गृह्णीयात्॥ ततः स्नानानन्तरं न गत्वा मृद्भिर्घर्षणैर्मुखहस्तौ शोधयित्वा तृणादिना दन्तलग्नरसद्रव्यमपनीय जलगण्डूषैर्मुखाभ्यन्तरं संशोध्य पादिपादौ प्रक्षालयेत्॥

तत आसनस्थ एव भूमौ पादौ संस्थाप्य द्विराचम्य मुखं तुलसीपत्रादिना संशोध्य दक्षिणपादा-

आह्व

क्रुष्ठे दक्षिणहस्तेन मन्त्रेण जलं दद्यात्॥

ततो मृत्तिकामार्জ্জनाभावेऽप्युचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य उच्छिष्टमपनीय तत् स्थानं गोमयोदकाभ्यां सिञ्चेत्॥

ततः सुस्थ आसने उपविश्य इष्टदेवतानाम स्मृत्वा अन्नजीर्णतार्थं मन्त्रपाठपूर्ব্বकवामहस्तेनोदरं परिमृश्य पादशतत्रजनानन्तरं वामपार्শ্বेन किञ्चित् कालं शयित्वा ताम्बूलादिमुखवासनद्रव्यं भोक्तव्यम् इति॥ *॥

अथ षष्ठसप्तमयामार्द্धकृत्यम्।

इतिहासपुराणादिश्रवणम्॥

अथाष्टमयामार्द्धकृत्यम्॥

लौकिकचिन्ताकरणम्। सायंसन्ध्योपासनम्। इष्टदेवतास्मरणादिकञ्च कुर्य्यात्॥ *॥

अथ रात्रिकृत्यम्।

सन्ध्यानन्तरमिष्टदेवतामन्त्रजपत्रिकालपाठ्यस्तव-नारायणस्मरणानि कुर्य्यात्॥

ततोऽन्नादिपाके जाते पूर्ব্ববद्बलिवैश्वदेवकर्म्मणी कृत्वा अतिथिलाभेऽन्नादिकं तस्मै दत्त्वा अवश्यभरणीयैः सह सार्द्धप्रहराभ्यन्तरेऽनतिद्रुतं भुञ्जीत। अन्नभोजनाभावे ताम्बूलादिकं भोक्तव्यम्॥ प्रथमयामाभ्यन्तरे विद्याभ्यासं कुर्य्यात्॥ ततः शयनं। शुचिदेशे खट्वोपरि शय्यां कृत्वा शिरोदेशे पूर्णकुम्भं निधाय रात्रिवासः परिधाय प्रक्षालितपाणिपादो द्विराचान्तः पूर्ব্বशिरा दक्षिणशिरा वा पद्मनाभं स्मृत्वा यामद्वयाभ्यन्तरे शयीत॥ *॥

अथ दारोपगमनम्।

ऋतौ निषिद्धेतरदिने स्त्रीसम्भोगं कृत्वा तां दक्षिणपार्শ্वेन स्वापयेत्॥

ततः अविलम्बेन मूत्रपुरीषोत्सर्গवत् मज्जनाभ्यां लिङ्गं हस्तौ पादौ च प्रक्षाल्य द्विराचम्य स्वापयेत्॥ ऋतुभिन्नगमने तु लिङ्गप्रक्षालनाचमनद्वयमाचम्य कुर्य्यात्। स्त्रियास्तु ऋतावन्यतावपि लेपादिक्षालनानन्तरमाचमनमात्रं न स्नानं॥ स्नानादेः पूर्ব्वं मूत्रपुरीषोत्सर्গौ न कुर्य्यात्। सम्भोगानन्तरं तस्यां रात्रौ एकशय्यायां न शयीयातां। अन्यतावपि गर्भवत्त्वेऽपि कामुकीमुपेयात्॥

ऋतावभिगम्य प्रातर्नैमित्तिकमङ्गल्यस्नानं कुर्य्यात्॥

ऋतुगमनं पुत्रोत्पत्तिपर्য্यन्तमावश्यकम्॥ इत्याङ्गिकाचारतत्त्वोक्तकर्म्म समाप्तं॥ *॥

आह्लादः, पुं, (आङ् + ह्लद् + घञ्।) आनन्दः। हर्षः। यथा। श्रीभागवते १०। ५। १॥
"नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः।
आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतान्॥"

आह्लादितः, त्रि, (आनन्दितः। हृष्टः। जाताह्लादः। इतोऽस्य जाते इत्यनेन आह्लादशब्दात् इतप्रत्ययेन निष्पन्नः॥

आह्वयः, पुं, (आङ् + ह्वे + अच्। यद्वा आह्वेर्यायते प्राप्यते इति। आङ् + या + घञर्थे कः।) नाम। इत्यमरः॥ (यथा, रामायणे, बालकाण्डे ४। ७॥

"कृत्वा तु तन्महाप्राज्ञः कार्यं रामायणाक्षयम्"।) अष्टादशव्यवहारपदान्तर्गतो व्यवहारविशेषः। यथाह मनुः अष्टमे। ४५।६।७। "तेषामाद्यमृणादानं" इत्युपक्रम्य। "स्त्रीद्यूतधर्म्मो विभागश्च द्यूतमाह्वय एव च"।)

आह्वा, स्त्री, (आह्वानमिति। आङ्+ह्वे+अङ्।) नाम। संज्ञा। इत्यमरः॥

आह्वानं, क्ली, (आङ्+ह्वे+भावे ल्युट्।) आवाहनं। डाका इति भाषा। तत्पर्य्यायः। ह्वृतिः २ आकारणं ३। इत्यमरः॥ (यथा मनुः ९।१२६। "जन्मज्येष्ठेन चाह्वानं स्वब्राह्मण्याक्षणि स्मृतम्"।) (आह्वयतेऽनेन। करणे ल्युट्।) नाम। इति शब्दरत्नावली॥

इ, इकारः। तृतीयस्वरवर्णः। अस्योच्चारणस्थानं तालु। स च ह्रस्वो दीर्घः प्लुतश्च भवति। (अयञ्च उदात्तानुदात्तस्वरित-भेदात् त्रिविधः। अनुनासिकाननुनासिकभेदाच्च प्रत्येकं द्विविधः एतेन षड्विध एव।)

"इकारं परमानन्दसुगन्धकुसुमच्छविम्।
हरिब्रह्ममयं वर्णं सदा रुद्रयुतं प्रिये॥
सदा शक्तिमयं देवि गुरुब्रह्ममयं तथा।
सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम्॥
हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम्।
इकारं परमेशानि स्वयं कुण्डली मूर्त्तिमान्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां।)

तस्य लेखनप्रकारो यथा,

"ऊर्द्धाधः कुञ्चिता मध्ये रेखा तत्सङ्गता भवेत्।
वामोर्ध्वाग्नी तथेन्द्राग्नी क्रमात्तास्वेव संवसेत्॥
पूर्वाधःकुञ्चिता रेखा दक्षोर्द्धा कामरूपिणी।
मात्राशक्तिः कोणयुता ध्यानमस्य प्रचक्षते"॥
इति वर्णोद्धारतन्त्रम्॥*॥ (यद्यपि सिद्धान्तकौमुद्यां "इचुयशानां तालु" इति सामान्यतः उक्तं तथापि शब्देन्दुशेखरादिष्वस्य विस्तरतो विवृतिरुक्ता। यथा,—"तुल्यास्य प्रयत्नमिति सूत्रेण प्रशब्देन विवृत्तयत्नबोधेऽपि लोके यत्नप्रयत्नयोः पर्य्यायतेति ध्वनयन्नाह प्रयत्नो हि द्विधा इति क्वचित् यत्नो द्विधेत्येव पाठः। एतेषां आभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात्। तथाहि नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुः ऊर्द्धमाक्रमन् उरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णस्य तदभिव्यङ्गकध्वनेर्वा-त्पत्तिस्ततोत्पत्तेः। प्राक्जिह्वाग्रोपाग्रमध्यमूलानि वर्णोत्पत्तिस्थानं तालव्यादि यदा सम्यक् स्पृशन्ति तदा स्पृष्टता ईषत्स्पर्शे ईषत्स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता अतएव इचुयशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चारयितव्ये जिह्वाग्रादीनां तालुस्थानेन सम्यक् स्पर्शः यकारे ईषत् स्पर्शः शकारेकारयोः समीपदूरावस्थानं। स्पृष्टं प्रयतनमिति यतेर्नपुंसके भावि ल्युट्। प्रयत्नमित्यपपाठः नञन्तस्य पुंस्त्वात्।

"शेषाः स्पृष्टा ईषत्स्पृष्टाः" इत्यादि। यथा, शिक्षायां शब्देन्दुसारः। तथाहि "अचोऽस्पृष्टाः यणस्त्वीषत् नेमस्पृष्टाः प्लुतः स्मृताः। "शेषाः स्पृष्टाः ईषत्स्पृष्टाः" इत्यादि। अत्र अचः अस्पृष्टाः सःस्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषत् अस्पृष्टा इत्यनुषज्यते तेन ईषदस्पृष्टा ईषद्विवृता इत्यर्थः। नेम इत्यर्द्धं तेन प्लुतः ईषत् विवृताः यणमपेक्ष्याधिकविवृतत्ववन्त इत्यर्थः। अपि च—"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्"। ईळे इत्येतत् समस्तमपि पदमनुदात्तम् "तिङ्ङतिङ" इति सूत्रेण अतिङन्तादग्निशब्दात् परस्य ईळ इति तिङन्तस्य निघातविधानात् अग्निमीळ इति पदयोः संहिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम् "उदात्तानुदात्तस्वरितः" इति सूत्रेण उदात्तात् परस्यानुदात्तस्य स्थाने स्वरितः स्यात् इत्यर्थकेनानुदात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततःपरस्य ळे इत्यत्र एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात् संहितायाम् पूर्व्वसेकारस्य नितरां उदात्तत्वम्। अपरञ्च तालव्यादिस्थानमाभ्यन्तरप्रयत्नइति सूच्यते। अत्र मूलम् पाणिनीयशिक्षाग्रन्थे। यथा,—"कण्ठ्यावहा विचय्यास्तालव्या ओष्ठजावुपू"। "स्वराणामुष्माणश्चैव विवृतं करणं मतम्"।)

तस्य नामानि यथा,—

"इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः।
सुमित्रः सुन्दरो वीरः कोटरः काटरः पयः॥
भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रश्च नासिका।
प्रान्तः कान्तः कामिनी च कामो विघ्नविनायकः॥
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावकाः"।
इति वर्णाभिधानतन्त्रम्॥ (माढकान्यासेऽस्य दक्षिणचक्षुषि स्थानम्। यथा, माढकान्यासधृतमन्त्रः "इं नमो दक्षिणचक्षुषि इं नमो वामचक्षुषि"। इति।)

इ,) गतौ। (भ्वादिं-इणपक्षे अदां-परं-सकं-अनिट्।)
इल,) अयति। ल इति। एषक्पाठसामर्थ्यात् पूर्व्वो न लित्। शेषस्त इण गताविति प्रसिद्धः। विनोऽध्यायादिषु ग्रहणमस्यैव। इति दुर्गादासः॥ (उत्।) उदये। समुन्नतौ। यथा,—

"उदयति यदि भानुः पश्चिमे दिग्विभागे" इति। (अभि+उत्।) अभ्युदये। समुन्नतौ। सर्व्वोगत्यर्थाज्ञानार्थाः प्रायार्थाश्च इत्यनेन प्रायार्थोऽप्यस्य बहुलः प्रयोगः। यथा,—मनुः।

"ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्"।
"अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः"।
इति साहित्यदर्पणम्। (अति) अतिक्रमे। पराभवे। यथा, हितोपदेशे। १।

"अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्धि वर्त्तते"।
"ततः परं जनस्थानं क्रोशत्रयमतीत्य वै"।
इति रामायणे। (अनु) अनुकरणम्।
"धातुरादेशमन्वेति तद्यथा हि तदर्पणः।
नामाधीनो मनुष्योऽयं कार्यं भजति कञ्चन"॥
इति महाभारते। (अप) अपगमने। पलायने।

"प्रत्यादेशव्यलीकमपैतु ते"। इति शाकुन्तले। (सम्+आ) सम्मिलने। "देवास्त्वैतान् समभ्योचूर्य्यार्थं वः शिश्रुरुक्तवान्"। इति मनुः। २। १५२। इत्यादयो ज्ञेयाः।)

इ, ल, स्मृत्यां। (अदां- परं-सकं-अनिट्।) अधिपूर्व्वोऽयं। अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च प्रयोगनिरासार्थं। एवं सर्व्वत्र। ल अध्येति तव लक्षणं। इक स्मरणे इति प्रसिद्धोऽयं। इन्दिक इत्यत्रास्यैव ग्रहणम्। इति दुर्गादासः॥

इ ङ ल अध्ययने। (अदा०-आ०-सक०-अनिट्।) अधिपूर्व्वोऽयं। अध्ययनमर्थतः शब्दतश्च गुरुतो ग्रहणं। ङ ल वेदमधीते विप्रः। इति दुर्गादासः॥ ("यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः" इति मनुः।२।१३७।)

इ, य, भेदः। क्रोधोक्तिः। अपाकरणं। असूकम्या। इति मेदिनी॥ खेदः। इति हेमचन्द्रः॥

इंरेजः, पुं, (इंरेज देशजातम्लेच्छजातिविशेषः। यथा,—"अधिपा मराठलाताश्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च जङ्गजाश्चापि भाविनः"॥
इति मेरुतन्त्रे २३ प्रकाशः॥

इः, [स्] ष, कोपः। सन्तापः। दुःखभावना। इति शब्दरत्नावली॥

इः, पुं, (अस्य विष्णोः श्रीलक्ष्म्यास्यापत्यम् पुमान्। अ+इञ्।) कामदेवः। इति पुरुषोत्तमश्चलायुधौ॥ यथा, आग्नेये एकाक्षराभिधानम्।
"इः कामे रतिलक्ष्म्योरी उः शिवे ब्रह्मकाद्य ऊः"॥

इक्कटः, पुं, (इण विशेषेण। तत्पर्य्यायः। वञ्जुलः २। इति चिकाण्डशेषः। कोशाङ्कः३ इत्कटः ४। इति हारावली॥ (इत्कटशब्दोऽस्य विशेषो द्रष्टव्यः॥)

इक्षुः, पुं, (इष्यतेऽभिलष्यतेऽसौ इति। इष्+क्सु।) खनामख्यातवृक्षं। आक् इति भाषा। तत्पर्य्यायः। रसालः २। इत्यमरः॥ कर्कोटकः ३ वंशः ४ कान्तारः५ सुकुमारकः६ अधिपत्रः७ मधुत्वगः८ दृष्यः९ गुडत्वगः १०। इति राजनिर्घण्टः॥ मत्स्यपुष्पः ११ महारसः १२ असिपत्रः १३ कोशकारः १४ इक्षवः १५। इति शब्दरत्नावली॥ पयोधरः १६। इति जटाधरः॥*॥ तस्य भेदाः। वंशकः १ कान्तारः २ भीरुः ३ पौण्ड्रः ४। इति रत्नमाला॥ सामान्येक्षुगुणाः। रक्तपित्तनाशित्वं। बलशुक्रकफकारित्वं। पाके मधुरत्वं। स्निग्धत्वं। गुरुत्वं। शीतलत्वं। मूत्रशुद्धिकारित्वञ्च। तस्य मूले अतिमधुरत्वं। मध्ये मधुरत्वं। ग्रन्थित्वगग्रभागेषु लवणरसत्वञ्च। इति राजवल्लभः॥ मूलादूर्द्धं मधुरत्वं। मध्ये अतिमधुरत्वं। अग्रे क्रमाल्लवणत्वं तीक्ष्णत्वञ्च। अमुक्ते इक्षुभक्षणगुणाः। पित्तदाहत्वं। मुक्ते वातप्रकोपणत्वं। मुक्तिमध्ये गुरुतरत्वञ्च॥ इति राजनिर्घण्टः॥ दन्तनिष्पीड़ितेक्षुरसगुणाः। हिमत्वं। मूत्रकारित्वं। वृष्यजनकत्वम्। जीवनहितकारित्वम्। वायुरक्तपित्तनाशित्वं। स्वादुत्वं। स्निग्धत्वं। प्रीतिदात्वं। रक्तवर्द्धकत्वं। मुखप्रसादकारित्वं। धातुवर्द्धकत्वञ्च। इति राजवल्लभः॥ अपि च। रक्तदोषभ्रमभ्रमन-

कारित्वं। अल्पश्लेष्मदाहत्वं। हृद्यत्वं। रुचिजनकत्वं। मूत्रशुद्धिकारित्वं। देहस्य कान्तिदाहत्वं। बलकारित्वं। पीयूषोपमत्वं। चिरोदग्रशमनत्वञ्च। इति राजनिर्घण्टः॥ यन्त्रनिष्पीड़ितरसगुणाः। रक्तशुक्रकारित्वं। शीतलत्वं। सारकत्वं। रुचिकरत्वं। दाहजनकत्वञ्च॥ इति राजवल्लभः॥ अपि च। दन्तनिष्पीड़ितरसगुणवद्गुणत्वं। किञ्चित् पित्तवायुनाशित्वं। अकोमलत्वं। अस्वादुत्वं। क्षीरविष्टम्भदाहकारित्वञ्च। पर्य्युषितरसगुणाः। वान्तिहरत्वं। वातजनकत्वं। जाड्यप्रतिश्यायरोगदाहत्वं। कफवायुकारित्वञ्च। इति राजनिर्घण्टः॥ तत्पक्वरसगुणाः। गुरुत्वं। सुतीक्ष्णत्वं। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वं। अतिश्लेष्मगुरुत्वं। अतिपाके विदाहित्वं। पित्तास्रदोषकारित्वञ्च। इति राजनिर्घण्टः॥

अस्य विकाराः॥

"लसीकाफाणितगुड़खण्डमत्स्यण्डिकासिताः।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम्"॥
इति राजवल्लभः। अथेक्षुवर्गः। तत्रेक्षोर्नामानि गुणाश्च।

"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च।
गुड़मूलोऽसिपत्रश्च तथा मधुदलः स्मृतः॥
इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः"॥*॥

अथेक्षुभेदाः।

"पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयस्तेषां कथयामि गुणानपि"॥*॥

अथ पौण्ड्रकभीरुकयोर्गुणाः।

"वातपित्तप्रशमनौ मधुरौ रसपाकयोः।
सुशीतौ लघ्वौ बल्यौ पौण्ड्रको भीरुकस्तथा"॥*॥

अथ कोशकारगुणाः।

"कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः"॥*॥

अथ कान्तारेक्षुगुणाः।

"कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो लघ्वगः सरः"॥*॥

अथ दीर्घपोरवंशकयोर्गुणाः।

"दीर्घपोरः सकठिनः सक्षारो वंशकः स्मृतः"॥*॥

अथ शतपोरकगुणाः।

"शतपर्व्वा भवेत् किञ्चित् कोशकारगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः"॥*॥

अथ मनोगुप्तागुणाः।

"मनोगुप्ता वातहरी दृष्यासमयविनाशिनी।
सुशीता मधुरातीव रक्तपित्तविनाशिनी"॥*॥

अथ तापसेक्षुगुणाः।

"तापसेक्षुर्भवेत् मेही मधुरा श्लेष्मकोपना।
तर्पणा रुचिकृच्चापि वृष्या च बलकारिणी"॥*॥

अथ बालयवदलेक्षुगुणाः।

"बाल इक्षुः कफं कुर्य्यान्मेदोमेहकरश्च सः।
युवा तु वातहृत् स्वादुर्गुरुशीतोष्णश्च पित्तनुत्॥
रक्तपित्तहरो वृद्धः क्षतहृत् बलवीर्य्यकृत्"॥*॥

अथाङ्कभेदेन भेदः।

"मूले तु मधुरोऽग्रार्धं मध्येऽपि मधुरः स्मृतः।
अग्रे ग्रन्थिषु च ज्ञेयं इक्षुः षट्‌रसो जनैः"॥*॥

अथ दन्तपीड़ितेक्षुरसगुणाः॥

"दन्तनिष्पीड़ितस्येक्षोः रसः पित्तास्रनाशनः।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः"॥*॥

अथ यन्त्रपीड़ितस्येक्षुरसस्य गुणाः।

"मूलाग्रयन्त्रन्तु ग्रन्थ्यादिपीड़नान्मलसंकरात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः॥
तस्मादविदाही विष्टम्भी गुरुः स्याद्‌यान्त्रिको रसः"॥

अथ पर्य्युषितस्येक्षुरसस्य गुणाः।

"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः"॥*॥

अथ पक्वस्येक्षुरसस्य गुणाः।

"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत्॥
गुल्मानाहप्रशमनः किञ्चित्पित्तहरः स्मृतः"॥*॥

अथेक्षुरसस्य विकाराणां गुणाः।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः॥
वृष्या मोहहराः शीता वृंहणा विषहारिणः"॥
इति भावप्रकाशः॥

(अथ श्वेतेक्षुगुणाः।

"रसायनोत्तमो बल्यो रोगवारणमुत्तमः।
स्निग्धश्च तर्पणो वृष्यो वृंहणश्च सजीवनः॥
स्वादुगुणाभिवृद्धत्वाद्दाहपित्तप्रणाशनत्वात्।
वृष्योऽप्यन्तर्विदाही स्यात् सितेक्षुः कफकृन्मतः"॥

अथ क्षयेक्षुगुणाः।

"तद्वत् सुकृष्णो भवनं गुणानां
वृष्यो भवेत्तर्पणवृंहणश्च।
सञ्जीवनं स्यान्मधुरो रसेन
शोषापहर्त्ता वमथोकारी"॥*॥

अथ यन्त्रोद्भवरसगुणाः।

"यन्त्रेण पीड़ितरसः कथितो गुरुश्च
वृष्यः कफञ्च कुरुतेऽथ मृगीतलश्च।
पाके विदाहिबलकृच्च सुशोभनश्च
संसेवितो रुधिरपित्तरुजं निहन्ति"॥*॥

अथ दन्तपीड़ितरसगुणाः।

"दन्तेन पीड़ितरसो रुचिकृद्गुरुश्च
सन्तर्पणो बलकरः कफकृच्छ्रमघ्नः।
विष्टम्भकोऽपि रुधिरञ्च तथैव पित्तं
शोषं निहन्ति मधुरः स हिमो सरश्च"॥*॥

अथ पक्वरसगुणाः॥*॥

"पक्वो गुरुतरः स्निग्धः सुतीक्ष्णः कफवातहा।
पित्तघ्नोऽपि विशेषेण गुल्मातिसारकासनुत्"॥*॥
इति हारीतः। तथा च वाभटः शार्ङ्गधरश्च।
"इक्षोः रसो गुरुः स्निग्धो वृंहणः कफमूत्रकृत्।
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।
सोऽग्ने सलवणो दन्तपीड़ितः शर्करासमः॥
मूलाग्रयन्त्रनुन्नग्रन्थ्यादिपीड़नान्मलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः॥
विदाही गुरुविष्टम्भी तेनासौ तत्र पौण्ड्रकः।
श्लैष्मप्रसादमाधुर्य्यैर्वरस्तमनुवांशिकः॥
शतपर्व्वककान्तारनैपालाद्यास्ततः क्रमात्।

सक्षाराः सकषायाश्च सोष्णाः किञ्चिद्विदाहिनः"॥
"वृष्यः शीतः स्थिरः स्निग्धो वृंहणो मधुरो रसः।
श्लेष्मणो भक्षितस्येक्षोर्यान्त्रिकस्तु विदह्यते॥
श्लैष्म्यात् प्रसादान्माधुर्य्यात् पौण्ड्रकादंशको वरः"।
इति चरकः॥ तथा च सुश्रुते॥
"इक्षवो मधुरा विपाका गुरवः शीताः स्निग्धबल्या वृष्या मूत्रला रक्तपित्तप्रशमनाः कृमिकफकराश्चेति ते चानेकविधाः। तद्यथा,—
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्यादिगुणान् वक्ष्यामतः परम्॥
सुशीतो मधुरः स्निग्धो वृंहणः श्लेष्मणः सरः।
अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा॥
आभ्यां तुल्यगुणः किञ्चित्सक्षारोवंशको मतः।
वंशवच्छतपोरस्तु किञ्चिदुष्णः स वातहा॥
कान्तारतापसावित्थू वंशकानुगुणौ मतौ।
एवंगुणास्तु काण्डेक्षुः स तु वातप्रकोपणः॥
सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः।
अतीवमधुरो मूले मध्ये मधुर एव तु॥
अग्रेष्वन्थिषु विज्ञेय इक्षूणां लवणो रसः।
अविदाही कफकरो वातपित्तनिवारणः॥
वक्त्रप्रक्लादनो वृष्यो दन्तनिष्पीड़ितो रसः।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः॥
पक्वो गुरुः सरः स्निग्धः सुतीक्ष्णः कफवातनुत्"॥)
कोकिलाक्षदण्डः। इति राजनिर्घण्टः॥

इक्षुकाण्डः, पुं, (इक्षुदण्डस्य काण्ड इव काण्डो यस्य।) मुञ्जकः। शरमुञ्ज इति ख्यातः। इति शब्दचन्द्रिका॥ (यथा, रामायणे २।९१।२५।
"अपराह्णोदकं शीतमिक्षुकाण्डरसोपमम्"।)
काण्डदण्डम्। इति राजनिर्घण्टः॥

इक्षुगन्धः, पुं, (इक्षुदण्डस्य गन्ध इव गन्धो यस्य।) काण्डदण्डम्। इति भावप्रकाशः॥ क्षुद्रगोक्षुरकदण्डः। इति राजनिर्घण्टः॥

इक्षुगन्धा, स्त्री, (इक्षुगन्ध + टाप्।) गोक्षुरकदण्डः। गोखुरी इति भाषा। शुक्लभूमिकुष्माण्डः। कोकिलाक्षदण्डः। कुलिया खारा इति भाषा। काण्डदण्डम्। इत्यमरो मेदिनी च॥ काशिया इति भाषा।

इक्षुगन्धिका, स्त्री, (इक्षुगन्ध + कन् + टाप्।) भूमिकुष्माण्डः। इति शब्दरत्नावली॥ (भूमिकुष्माण्डशब्देऽस्या गुणादयो ज्ञेयाः॥)

इक्षुतुल्या, स्त्री, (इक्षोस्तुल्या।) दृष्यविशेषः। आनाखु इति ख्याता। तत्पर्य्यायः। इक्ष्वाखिका २ अनिक्षुः ३ इक्ष्वालिका ४। इति रत्नमाला॥

इक्षुदर्भा, स्त्री, (इक्षुदण्डस्य दर्भो बन्ध इव दर्भो यस्याः।) दृष्यविशेषः। तत्पर्य्यायः। सुदर्भा २ पत्रालुः ३ दृष्यपत्रिका ४। अस्या गुणाः। सुमधुरत्वं। स्निग्धत्वं। ईषत्कषायत्वं। कफपित्तहरत्वं। रुचिजनकत्वं। लघुत्वं। परमदृष्टिकारित्वञ्च।

इति राजनिर्घण्टः ॥

इक्षुनेत्रं, क्ली, (इक्षोर्नेत्रं ।) इक्षुमूलं । इति राजनिर्घण्टः ॥

इक्षुपत्रः, पुं, (इक्षोः पत्रमिव तीक्ष्णं पत्रं यस्य ।) यावनालनामधान्यविशेषः । इति राजनिर्घण्टः ॥ जोयार इति भाषा ।

इक्षुप्रः, पुं, (इक्षुरिव पूर्य्यते । इक्ष + पॄ + क ।) शरटत्वं । इति राजनिर्घण्टः ॥ (शरटशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्षुबालिका, स्त्री, (इक्षोर्बालिकेव तदाकृतित्वात् ।) इक्षुतुल्या । इति रत्नमाला ॥ अनाखु इति ख्याता । काशः । इति राजनिर्घण्टः ॥ काशिया इति भाषा ।

इक्षुमूलं, क्ली, (इक्षोः मूलमिव मूलं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । इक्षुनेत्रं २ मोरटकं ३ वंशनेत्रं ४ वंशमूलं ५ मोरटं ६ वंशपूरकं ७ । इति राजनिर्घण्टः ॥ ("अतीव मधुरो मूलः" इति सुश्रुतः ।)

इक्षुयोनिः, पुं, (इक्षोर्योनिरुत्पत्तिकारणं ।) पुण्ड्रकइक्षुः । इति राजनिर्घण्टः ॥ (तत्र पौण्ड्रकः । प्रीत्यप्रसादमाधुर्य्यैर्वरः, इति वाभटः । पौण्ड्रकशब्दे ह्यस्य विशेषो ज्ञेयः ॥)

इक्षुरः, पुं, (इक्षुमिक्षुवत् गन्धं राति ददातीति । इक्षु + रा + क ।) कोकिलाक्षवृक्षः । इति रत्नमाला ॥ कुलिया खारा इति भाषा । इक्षुः । गोक्षुरकवृक्षः । इति शब्दरत्नावली ॥ काशः । इति राजनिर्घण्टः ॥

इक्षुरकः, पुं, (इक्षुर + स्वार्थे + क ।) कोकिलाक्षवृक्षः । स्थूलशरः । काशशरणं । इति राजनिर्घण्टः । ("क्षयश्वासेक्षुरकयोः फलचूर्णं सशर्करम् ।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्" ॥
इति सुश्रुतः ॥)

इक्षुरसः, पुं, (इक्षोरिव रसो यस्य ।) काशशरणं । इति भावप्रकाशः ॥ (इक्षुवृक्षस्य रसः। अस्य गुणाः क्रमेण यथा ; दन्तपीड़ितेक्षुरसगुणाः । जीवनहितकारित्वं, हिमत्वं, शुक्रकारित्वं, बल्यजनकत्वं, वायुरक्तपित्तनाशित्वं, स्वादुत्वं, रक्तवर्द्धकत्वं धातुवर्द्धकत्वञ्च यथा भावप्रकाशः ।

"दन्तनिष्पीड़ितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः" ॥
यन्त्रनिष्पीड़ितरसगुणाः, रक्तशुक्रकारित्वम्, शीतलत्वं, सारकत्वं, दाहजनकत्वं, किञ्चित् पित्तवायुनाशित्वं, क्षीरविरुद्धदाहकारित्वञ्च यथा, भावप्रकाशे,—

"भूनाग्यजन्तुयज्ञाद्यपीड़नात् मलसंकरात् ।
किञ्चित्क्षारं विदह्याथ विक्लितिं याति यान्त्रिकः ॥
तस्मात् विदाही विष्टम्भी गुरुः स्यात् यान्त्रिको रसः । पर्य्युषितेक्षुरसगुणाः । वान्तिहरत्वं, वातजनकत्वं, जाड्यप्रतिश्यायरोगदाहत्वं, कफवायुकारित्वञ्च । यथा भावप्रकाशे ।

"रसः पर्य्युषितो नेयो ह्यम्लो वातांपहो गुरुः ।
कफपित्तकरः श्लेष्मी भेदनश्चातिमूत्रलः" ॥ * ॥
पक्वेक्षुरसगुणाः । गुरुत्वं। सृतीक्ष्णत्वं । कफवातनाशित्वं । स्निग्धत्वं । अतिपाके विदाहित्वं । पित्तास्रदोषश्लेष्मकारित्वञ्च । यथा भावप्रकाशे ।

"पक्वो रसो गुरुः स्निग्धः सृतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तहरः स्मृतः" ॥*॥
इक्षुरसविकारगुणाः । यथा भावप्रकाशे ।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा वल्याः स्निग्धाः वातहराः सराः ।
दृष्या मोहहराः शीता बृंहणा विषहारिणाः" ॥)

इक्षुरसक्षाथः, पुं, (इक्षुरसस्य क्षाथः ।) गुड़ः । इति हेमचन्द्रः ॥ (गुड़शब्दे ऽस्य गुणादयो व्याख्येयाः ।)

इक्षुरसोदः, पुं, (इक्षुरसवत् उदकं यस्य उदकस्य उदभावः ।) इक्षुसमुद्रः । इति जटाधरः ॥

इक्षुवल्लरी, स्त्री, (इक्षुरिव सुस्वादा वल्लरी ।) क्षीरविदारी । क्षीरकन्दः । इति राजनिर्घण्टः ॥

इक्षुवल्ली, स्त्री, (इक्षुरिव सुस्वादा वल्ली लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

इक्षुवाटिका, स्त्री, पुण्ड्रकः । इति राजनिर्घण्टः । उड़ि आक् इति भाषा ।

इक्षुवाटी, स्त्री, (इक्षोर्वाटीव ।) पुण्ड्रकः । इति राजनिर्घण्टः ।

इक्षुवेष्टनः, पुं (इक्षोरिव वेष्टनं यस्य ।) भद्रमुञ्जः । इति राजनिर्घण्टः ॥

इक्षुशाकटं, क्ली, (इक्षोः क्षेत्रं । इक्षुशब्दात् क्षेत्रे शाकटशाकिनौ इति शाकटप्रत्ययः ।) इक्षुक्षेत्रम् । इति व्याकरणम् ॥ इक्षुर भूमि इति भाषा ।

इक्षुशाकिनं, क्ली, (इक्षोर्भवनं क्षेत्रं वा । इक्षु + शाकिन ।) इक्षुक्षेत्रं । इति व्याकरणम् ॥

इक्षुसारः, पुं, (इक्षोः सारः ।) गुड़ः । इति राजनिर्घण्टः ॥

इक्ष्वाकुः पुं, (इक्षुमाकरोतीति । इक्षु + आङ् + कृ + मितद्वादित्वात् डुः । यद्वा इक्ष इति शब्दं व्यक्तीति व्यक गतौ बाहुलकादुण् ।) वैवस्वतमनुपुत्रः । स तु सत्ययुगे अयोध्यायां सूर्य्यवंशीयादिराजः । इति पुराणम् ॥ (गीतायाम् । ४ । १ ।
"विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्" ।
इक्ष्वाकोर्गोत्रे जाताः इति व्युत्पत्त्या वाच्यलिङ्गाः ।
इक्ष्वाकुवंशोद्भवाः । यथा रघुः । १ ।७२ ।
"इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" ।)

इक्ष्वाकुः, स्त्री, (इक्षु + आङ् + कृ + डु ।) कटुकुम्बी । इत्यमरो मेदिनी च ॥ तितलाउ इति भाषा । ("इक्ष्वाकुकुसुमचूर्णं वा पूर्ब्ववदेव क्षीरेण काश्मर्य्यास्वच्छर्द्दिकफरोगेषूपयोगः" । इति सुश्रुते ।
"सिद्धं वच्याम्यथेक्ष्वाकुकल्पं येषां प्रशस्यते" ।
अस्याः पर्य्यायो यथा ।
"लम्बाऽथ कटुकालाबुतुम्बी पिण्डफला तथा ।
इक्ष्वाकौ फलिनी चैव प्रोच्यते तस्य कल्पना" ॥
अस्या रोगविशेषे प्रशस्तता यथा ।
"कासश्वासविषच्छर्द्दिज्वरार्त्ते कफकर्षिते ।
प्रताम्यति नरे चैव वमनार्थं तदिष्यते" ॥
अवस्थाभेदेनास्या व्यवहारो यथा ।
"अपुष्पस्य प्रवालानां मुष्टिं प्रादेशसम्मिताम् ।
क्षीरप्रस्थे पृतं दद्यात् पित्तोद्रिक्ते कफज्वरे ॥
पुष्पादिषु च चत्वारः क्षीरे जीमूतके यथा ।
योगाहरितपाण्डूनां सुरामण्डेन पञ्चमः ॥
फलस्य रसभागश्च त्रिगुणक्षीरसाधितम् ।
उरःस्थिते कफे दद्यात् स्वरभेदे सपीनसे ॥
हृतमध्येफलेजीर्णे स्थितं क्षीरं यदा दधि ।
जातं स्यात् कफजे कासे श्वासे वम्याश्च तत्पिबेत् ॥
मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्द्दितः ।
तेन तक्रं विषक्रं वा सक्षौद्रलवणं पिबेत् ॥
अजाक्षीरेण बीजानि भावयेत् पाययेत च ।
विषगुल्मोदरग्रन्थिगण्डेषु क्षीपदेषु च ॥
तुम्बाः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
कृर्त्तयेन्माल्यमाघ्राय गन्धसम्पत्सुखोचितः ॥
भक्षयेत्फलमध्यं वा गुड़ेन फलेन च ।
इक्ष्वाकुफलतैलं वा सिद्धं वा पूर्ब्ववदृतम् ॥
पञ्चाशद्वृश्चदानि फणादीनां यथोत्तरम् ।
पिबेद्विमद्य बीजानि कषायेष्वासृतं पृथक् ।
यष्ट्याह्वकोविदाराद्यैर्मुस्तिमन्तर्नखं पिबेत् ॥
कषायैः कोविदाराद्यैर्माक्षाच्च फलवत् स्मृताः ।
गुल्ममेहे प्रसेके च कल्कं मांसरसैः पिबेत् ॥
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते" ॥
"इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचां ।
कुष्ठं किण्वाग्निकौ चापि पिबेत्तुल्यानि पूर्ब्ववत्" ॥)
इति चरकः ॥)

इक्ष्वारिः, पुं, (इक्षुवृक्षस्य अरिः ।) काशशरणं । इति राजनिर्घण्टः ॥ (काशशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्ष्वालिकः, पुं, (इक्षुरिव अलति व्याप्नोतीति ।) काशशरणं । इति भावप्रकाशः ॥

इक्ष्वालिका, स्त्री, (इक्ष्वालिक + टाप् ।) इक्षुतुल्या । इति रत्नमाला ॥ आनाखु इति भाषा । खागड़ा इति केचित् ॥

इख, गतौ । (भ्वादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ ह्रतीयखरादिः । एखति । इति दुर्गादासः ॥

इख, इ, गतौ । (भ्वादिं-परं-सकं-सेट्-इदित् ।) इति कविकल्पद्रुमः ॥ ह्रतीयखरादिः । इ, इङ्खते । इति दुर्गादासः ॥

इग, इ, गतौ । (भ्वादिं-परं-सकं-सेट्, इदित् ।) इति कविकल्पद्रुमः ॥ ह्रतीयखरादिः । इ, इङ्गति इङ्गितं । इति दुर्गादासः ॥ (यदुक्तं भारते ।
"त्वया हृषीकेश इदं प्रजल्पितं यच्चेङ्गसे यच्च नेङ्गसि" ।

इङ्गं, क्ली, (इगि + क ।) अद्भुतं । जङ्गमं । इति मेदिनीकरहेमचन्द्रौ ॥ (यथा, भारते ।
("त्वया हृषीकेश इदं प्रजल्पितं यच्चेङ्गसे यच्च नेङ्गसि" ।)

इङ्गः, पुं, (इङ्ग + घञ् ।) इङ्गितं । ज्ञानं । इति मेदिनीकरहेमचन्द्रौ ॥

इङ्गितं, क्ली, (इगि + क्त ।) अभिप्रायानुरूपचेष्टाविष्करणं । ठार सङ्केत । इत्यादि भाषा । तत्पर्य्यायः । आकारः २ इङ्गः ३ । इत्यमरः ॥ गमनं । चेष्टा । इति हेमचन्द्रः ॥
("आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" ॥
हितोपदेशे सुहृद्भेदः । (तथाच रघुः २।२० ।)

"तस्य संहतमन्त्रस्य गूढ़ाकारेङ्गितस्य च"।)

इक्षुदः, पुं (इक्षुं यति अवखण्डयतीति। इक्षु + दो + क। अस्य उक्।) इक्षुदीवृक्षः। इत्यमरभरतौ॥

("इक्षुदन्तिक्तमधुरं स्निग्धोष्णं कफवातजित्"। इति चरकः॥०॥ विशेषोऽन्यस्येक्षुदीशब्दे ज्ञेयः॥)

इक्षुदी, स्त्री, (इक्षुद + ङीष्।) वृक्षविशेषः। इक्षौट इति भाषा। जीयापुता इति तु वङ्गदेशीया प्रमादेन वदन्ति तस्य तु पुत्रजीव इत्यादीनि नामानि प्रसिद्धानि। तत्पर्य्यायः। तापसतरुः २। इत्यमरः॥ छिद्रुपत्रः ३ विषकण्टः ४ अनिलान्तकः ५ गौरवक् ६ तनुपत्रः ७ शूलारिः ८ तापसद्रुमः ९ तीक्ष्णकण्टः १० तैलफलः ११ पूतिगन्धः १२ विगन्धकः १३ क्रोष्टुफलः १४।

(यथा रघुः १४।८२।

"ता इक्षुदीखेङ्गुदतैलदीप-
मास्तीर्णमेधाजिनतल्पमन्तः"॥)

अस्या गुणाः। मदगन्धित्वं। कटुत्वम्। उष्णत्वम्। पेनिलत्वम्। लघुत्वम्। रसायनत्वम्। जन्तुवातामयकफव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

(अस्य पर्य्यायपूर्व्वकं गुणानाह।

"इक्षुदोऽङ्गारवल्लश्च तिक्तकस्तापसद्रुमः।
इक्षुदः कुष्ठभूतादिव्रणविषक्रिमीन्॥
हन्त्युष्णश्चित्रशूलघ्नस्तिक्तकः कटुपाकवान्"।
इति भावप्रकाशः॥) ज्योतिष्मतीवृक्षः। इति रत्नमाला॥ नयापाटी इति भाषा।

इक्षुलः, पुं, स्त्री, इक्षुदीवृक्षः। इति भरतो द्विरूपकोषश्च॥

इच्छा, स्त्री, (एषणं इच्छा। इष् + श + टाप्।) मनोधर्म्मविशेषः। तत्पर्य्यायः। आकाङ्क्षा २ वाञ्छा ३ दोहदः ४ स्पृहा ५ ईहा ६ लट् ७ लिप्सा ८ मनोरथः ९ कामः १० अभिलाषः ११ तर्षः १२। इत्यमरः॥ रुक् १३ इषा १४ श्रद्धा १५ इच्छा १६ वच्छि १७ मतिः १८ दोहलं १९ छन्दः २० इट् २१। इति जटाधरः॥ (यथा मनौ ५।४५

"योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया"॥)। न्यायमते अस्याः कारणम्। (यथा, भाषापरिच्छेदे। १४८, १४९।)

"निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि॥
चिकीर्षाज्ञातिसाध्यत्वप्रकारेच्छा तु या भवेत्।
तद्धेतुः कृतिसाध्येऽसाधनत्वमतिर्भवेत्"॥

अस्याः प्रतिबन्धः। "बलवद्विषहेतुत्वमतिः स्यात् प्रतिबन्धिका"। इति भाषापरिच्छेदे १४८॥

इच्छावती, स्त्री, (इच्छा विद्यते यस्याः। इच्छा + मतुप्। मस्य वः।) धनादीच्छायुक्ता स्त्री। तत्पर्य्यायः। कामुका २। इत्यमरः॥

इच्छावसुः, पुं, (इच्छयाभिलाषमात्रेणैव वसु धनं यस्य।) कुबेरः। इति जटाधरः॥

इच्छुः, त्रि, (इच्छतीति। इषधातोर्निपातनात् सिद्धम्।) इच्छाविशिष्टः। आकाङ्क्षायुक्तः। इति व्याकरणम्॥ (यथा, रामायणे ।१।३।८।

("शरण्यः शरण्योच्चूनां पितुरादेशपालकः"।)

इच्छकः, पुं, (इच्छु + कन्।) वृक्षविशेषः। इति शब्दचन्द्रिका॥ टावालेबु इति ख्यातः।

इञ्जलः, पुं, (एतीति। इ + क्विप् + तुक्; इत् जलमस्य।) हिञ्जलवृक्षः। हिजल गाछ इति भाषा। तत्पर्य्यायः। निचुलः २ अम्बुजः ३। इत्यमरः॥ (सपर्य्यायगुणाः यथा, भावप्रकाशे।

"इञ्जलो हिञ्जलश्चापि निचुलश्चाम्बुजस्तथा।
ञ्जलवेतसवद्वेद्यो हिञ्जलोऽयं विषापहः"॥)

इज्यः, पुं, (इज्या विद्यते यस्य। इज्या अर्च् आद्यच्।) बृहस्पतिः। इति ज्योतिषं शब्दरत्नावली च॥

("जीवार्किभानुजेज्यानां क्षेत्राणि सुरजादयः"।)

इज्यः, त्रि, (इज्या पूजास्यस्य। अर्च्आद्यच्।) गुरुः। पूज्यनीयः। इति मेदिनी॥

इज्या, स्त्री, (यजनं इति। यज + भावे क्यप् + टाप्।) दानं। यज्ञः। (यथा, रघुः। १। ६८।)

("सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः")

पूजा। सङ्गमः। इति मेदिनी॥ (कर्म्मणि क्यप्।) गौः। इति राजनिर्घण्टः॥ कुट्टनी। इति चिकाण्डशेषः॥

इज्याशीलः, पुं, (इज्यां यज्ञं शीलयति पुनःपुनराचरतीति। इज्या + शील + ण।) पुनःपुनर्यज्ञकर्त्ता। तत्पर्य्यायः। यायजूकः २। इत्यमरः॥

इक्षाकः, पुं, मत्स्यविशेषः। इति चिकाण्डशेषः॥ इँचला मोचाचिङ्ड़ि इति भाषा। (चिङ्कटशब्देऽस्य गुणादयो ज्ञातव्याः॥)

इट गत्यां। (भ्वादिः-परं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इटति। इति दुर्गादासः॥

इट्[ष्]स्त्री, (इष् + क्विप्।) इच्छा। इति जटाधरः॥

इट्चरः, पुं, (एषणमिति इट्। इष् + क्विप्। तेन चरति इति। इष् + चर् + अच्।) षण्डः। इत्यमरः॥ षाँड़ इति भाषा।

इड़ा, स्त्री, (इल् + क + टाप्।) बुधग्रहभार्य्या। सा इक्ष्वाकुराजकन्या। (यथा हरिवंशे,—

"तत्र दिव्याम्बरधरा दिव्याभरणभूषिता।
दिव्यसंहननोपेता इड़ा जज्ञे इति श्रुतिः"॥)

गौः। (यथा, भारते, —

"इड़ाज्यहोमाऽऽहुतिभिर्मन्त्राग्निश्चाविशादृषेः"।)

वचनं। (देवीभेदः। यथा, हरिवंशे,—

'श्रुतिःप्रीतिरिड़ाकान्तिःक्षान्तिःपुष्टिःक्रिया तथा'।)

पृथ्वी। इति मेदिनी॥ (यथा, महाभारते, घोषयात्रापर्व्वणि २३५।१०।

"पतत्रिसङ्घैः स जघन्यरात्रे
प्रबोध्यते नूनमिड़ातलस्थः"।) स्वर्गः।

शरीरस्य वामभागस्था नाड़ी। इति हेमचन्द्रः॥ (तथा च षट्चक्रभेदेऽ श्लोके।

"मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे, मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा"।

"मेरोर्मेरुदण्डस्य वाह्यप्रदेशे वहिर्भागे सव्यदक्षे वामदक्षिणे पार्श्वे शशिमिहिरशिरे चन्द्रसूर्य्यात्मिके नाड्यौ इड़ापिङ्गलानाड़ीह्वयमितिफलितार्थः। निषण्णे वर्त्तेते"। ज्ञानसङ्कलनीतन्त्रे। ८।

"इड़ा नाम स्मृता गङ्गा यमुना पिङ्गला स्मृता।
गङ्गायमुनयोर्मध्ये सुषुम्ना च सरस्वती॥
एतासां सङ्गमो यत्र त्रिवेणी सा प्रकीर्त्तिता।
तत्र स्नातः सदा योगी सर्व्वपापैः प्रमुच्यते"॥

इयन्तु सकामकर्म्मानुष्ठायिजीवानां पुनरावर्त्तिकारिणी धूममार्गा पितृयानरूपिणी।

अनयोरिड़ापिङ्गलयोर्मध्ये गता सुषुम्नैव ब्रह्मनाड़ी यस्यां नाड्यां इदं सर्व्वं विश्वं प्रतिष्ठितम्। यथा उत्तरगीतायाम्। २ अध्याये।

"इड़ा च वामनिःश्वासः सोममण्डलगोचरा।
पितृयानमितिज्ञेया वाममाश्रित्य तिष्ठति॥१२॥
गुदस्य एष्ठभागेऽस्मिन् वीणादण्डस्य देहभृत्।
दीर्घास्थि मूर्द्धिपर्य्यन्तं ब्रह्मदण्डेति कथ्यते॥१३॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाड़ीति सूरिभिः॥१४॥
इड़ा पिङ्गलयोर्मध्ये सुषुम्ना सूक्ष्मरूपिणी॥
सर्व्वं प्रतिष्ठितं यस्यां सर्व्वगं सर्व्वतोमुखम्"॥१५॥

परं आसामिड़ादीनां नाड़ीनां शोधनमकुर्व्वन् योगी कदाप्यात्मप्रसादं लब्धुं नार्हति तथा च भगवच्छङ्करोक्तयोगशास्त्रे।

"ईप्सितानि समभ्यस्य वाञ्छितानि यथाविधि।
प्राणायामं ततो गार्गि जितासनगतोऽभ्यसेत्॥
मदासने कुशान् सम्यक् आस्तीर्य्यामृतमेव च।
लम्बोदरञ्च सम्पूज्य फलमोदकभक्षणैः॥
तदासने सुखासीनः सव्ये न्यस्येतरं करम्।
समग्रीवशिराः सम्यक् संहतास्यः सुनिश्चलः।
प्राङ्मुखोदङ्मुखोवापि नासाग्रन्यस्तलोचनः॥
अतिभुक्तमभुक्तञ्च वर्ज्जयित्वा प्रयत्नतः।
नाड़ीसंशोधनं कुर्य्यात् उक्तमार्गेण यत्नतः॥
दृधा क्लेशो भवेत्तस्य तच्छोधनमकुर्व्वतः।
नासाग्रे शशभृद्बीजं चन्द्रातपवितानितम्॥
सप्तमस्य तु वर्गस्य चतुर्थं वर्गसंयुतम्।
विश्वमध्यस्थमालोक्य नासाग्रे चक्षुषी उभे॥
इड़या पूरयेद्वायुं वाह्यं दादशमात्रकैः।
ततोऽग्निं पूर्ब्ववद्ध्यायेत् स्फुरज्ज्वालावलीयुतम्।
रुधश्च विन्दुसंयुक्तं शिखिमण्डलसंस्थितम्॥
ध्यायेद्विरेचयेद्वायुं मन्दं पिङ्गलया पुनः।
पुनः पिङ्गलयापूर्य्य ध्यायं दक्षिणतः सुधीः॥
तद्वद्विरेचयेद् वायुमिड़या तु शनैः शनैः।
त्रिचतुर्वत्सरस्यापि त्रिचतुर्मासमेव च।
गुरुणोक्तप्रकारेण रहस्येवं समभ्यसेत्"॥)

इड़ाधिका, स्त्री, (इड़ावत् अधति। इड़ा + अच्। ङीष्। टाप् + अत इत्वम्।) वरटा। बोल्ता इति भाषा। इति शब्दचन्द्रिका॥

इड़िका, स्त्री, (इड़ा + स्वार्थे क, इत्वम्।) पृथ्वी। इति शब्दरत्नावली॥

इड़िङ्गः, पुं, (इड़िङ् + कै + ड।) वनच्छगलः। इति हेमचन्द्रः॥

इडूरः, पुं, (इट् + ड + अच्।) इट्चरः। वृषः। इत्यमरटीकायां स्वामी॥

इत, इ बन्धे। (इदित्-दिवां-आत्मं-सकं-सेट्।) इ इन्यते। इति दुर्गादासः॥

इतः, त्रि, (इ + क्त।) गतः। स्मृतः। इति मेदिनी॥ (प्राप्तः। ज्ञाने, क्ली।)

इतः, [स्] व्य, (अस्मादिति निपातनात् सिद्धम्।) नियमः। पञ्चम्यर्थः। (यथा कुमारे २। २८।
"तदद्भुत वत्साः किमितः प्रार्थयध्वं समागताः"।) विभागः। इति विश्वः॥

इतरः, त्रि, (इना कामेन तरतीति। इ + तॄ + अच् यद्वा इतेन ज्ञानेन क्षीयते इति बाहुलकात् अरः।) अन्यः ("वामेतरस्तस्य करः प्रहर्त्तुः"। इति रघुः। २।३१।) नीचः। इत्यमरः॥

इतरविशेषः, पुं, (इतरस्मात् विशेषः।) अन्यप्रभेदः॥

इतरेतरं, त्रि, अन्योऽन्यं। परस्परं। इति हेमचन्द्रः॥ यथा, रघुः। ७। ५४।)
("व्यूहाबुभौ तावितरेतरस्मात्
भङ्गं जयश्चापतुरव्यवस्थम्"।)

इतरेद्युः, [स्] व्य, (इतर + एद्युस्।) इतरस्मिन्नहनि। अन्यदिने। इत्यमरः॥

इतस्ततः, व्य, अत्र तत्र। एखाने सेखाने इति भाषा। यथा,—
"हे सहस्रे रथानां स गजानामयुतं रणे।
इतस्ततो धावमानः सुरथो रथिनां वरः"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २० अध्यायः॥ अपि च।
"ताड़ितास्तेन वीरेण पन्नगेन्द्रास्तसमागताः।
इतस्ततस्ते तन्मुक्ता गताः पातालमुज्ज्वलाः"॥
इति पाद्मे पातालखण्डे ४४ अध्यायः॥

इति, व्य, (इण् + क्तिच्।) हेतुः। (यथा, रघुः। २। २२।
"वत्सोत्सुकापि स्तिमिता सपर्य्या,
प्रत्यग्रहीत्सेति ननन्दतुस्तौ"।)
प्रकरणम्। (यथा, मनुः। २। १५॥
"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः"॥)
प्रकाशः। (यथा, रघुः। १। १२।
"दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव"॥)
आदिः। समाप्तिः। इत्यमरः॥ निदर्शनम्। ("आपो गारा इति प्रोक्ता आपो वै नरसूनवः"। इति मनुः। १। १०।) प्रकारः। अनुकर्षः। परस्तुतिः। इति मेदिनी॥ (विवक्षानियमः। प्रत्यक्षं। अवधारणं। परामर्शः। मानम्। इत्यमर्षः। एवार्थः। "गुणानित्येव तान् विद्धि"। इति रामायणे। १म काण्डे।)

इतिकर्थं, त्रि, (इति इत्थं प्रकारेण कथा यस्य।) अश्रद्धेयं। गल्पं। इति मेदिनी॥

इतिकथा, स्त्री, अर्थशून्यवाक्यं। इति मेदिनी॥

इतिह, व्य, (इति एवं च ह किल च।) पारम्पर्य्योपदेशः। तत्पर्य्यायः। ऐतिह्यं २। इत्यमरः॥

इतिहासः, पुं, (इतिह आस्तेऽस्मिन्। इतिह + आस + घञ्।) पूर्ब्बवृत्तान्तः। प्राचीनकथा। तत्पर्य्यायः। पुरावृत्तं २। इत्यमरः॥
(यथा, मनुः। ३। २३२।
"आख्यानानीतिहासांश्च पुराणानि खिलानि च"।)
व्यासादिप्रणीतभारतादिग्रन्थः। इति भरतः॥

इत्कटः, पुं, (इतं समीपस्थं जनं कटति आच्छादयति फलेन इति। इत् + कट् + अच्।) वृक्षविशेषः। ओकड़ा इति भाषा। तत्पर्य्यायः। वञ्जुलः २ वाटीदीर्घः ३ खरच्छदः ४। इति रत्नमाला॥ ("वीरणशालिषष्टिकेक्षुबालिकादर्भकुशकाशगुन्द्रेत्कटकटगमूलानीति दशेमानि स्तन्यजननानि भवन्ति"। इति चरकः॥)

इत्तिलता, स्त्री, रोचनाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

इत्थं, व्य, (इदम् + थमु। एतेतौरथोरिति इदादेशः।) इदंप्रकारं। इति वोपदेवः॥ एइ प्रकार इतिभाषा। (यथा रघौ। २। २५।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः।)

इत्यः, त्रि, (इ + क्यप्।) गम्यः। इति व्याकरणम्॥

इत्वरः, त्रि, (एतीति + इ + क्वरप्।) क्रूरकर्म्मा। पथिकः। दुर्व्विधः। नीचः। इति हेमचन्द्रः॥

इत्वरी, स्त्री, (एति परपुरुषं प्राप्नोतीति। इ + क्वरप् + ङीष्।) असती। इत्यमरो मेदिनी च॥ अभिसारिका। इति हेमचन्द्रः॥

इद, इ, परमैश्वर्य्ये। (इदित् आदि-परं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इ इन्दते इन्दति इन्द्रः। इति दुर्गादासः॥

इदं, [म्] त्रि, (एति, इण् गतौ, इणो दमुगिदि दशपादीष्टत्तिः। यद्वा इन्दति, इदि परमैश्वर्य्ये, इन्देः कमिर्नलोपश्चेति दीक्षितः।) पुरोवर्त्तिवाचकसर्व्वनाम। इति व्याकरणम्॥ एइ इति भाषा।

इदंकार्य्या, स्त्री, (इदम् कार्य्यं यस्याः।) दुरालभावृक्षः। इति शब्दचन्द्रिका॥

इदा, स्त्री, संवत्सरादिवर्षपञ्चकान्तर्गतद्वतीयवत्सरः। इति मलमासतत्त्वं॥ अस्या विवरणम् वत्सरशब्दे द्रष्टव्यम्॥

इदानीं, [न्] व्य, (इदम् + दानीं, इदम इश्।) अस्मिन् काले। सम्प्रति। इत्यमरः॥
("इदानीं दीर्घसत्रस्य सा चेदानीं प्रचेतसः"। इति रघुः। १। ८०।) वाक्यभूषणम्। इति शब्दरत्नावली॥

इदानीन्तन, त्रि, (इदानीं + भवार्थे ष्युः।) इदानीम्भवं। सम्प्रतिजातं। आधुनिकं। इति व्याकरणम्॥
"वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः"। इति साहित्यदर्पणे ३ परिच्छेदे। २६।)

इदावत्सरः, पुं, (इदा इति वत्सरः।) संवत्सरादिपञ्चान्तर्गतवत्सरविशेषः। अस्मिन् वत्सरे अन्नवस्त्रदानं महाफलम्। इति विष्णुधर्म्मोत्तरम्॥
("संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोसीदृत्सरोऽसि"। इति वाजसनेयीसंहिता। २७॥४५॥)

इद्धं, क्ली, (इन्द + क्तः।) आतपः। दीप्तिः। इति मेदिनी॥ आश्चर्य्यं। इति जटाधरः॥

इद्धः, त्रि, निर्म्मलः। इति शब्दरत्नावली॥

इद्वत्सरः, पुं, इदावत्सरः। यथा,—
"संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस्तृतीयस्तु चतुर्थस्त्वनुवत्सरः॥
पञ्चमो वत्सरस्तेषां तदेभिः पञ्चभिर्युगं।
तेषु संवत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः॥
सोम इद्वत्सरस्तेषां वायुश्चैवानुवत्सरः।
यज्ञस्तु वत्सरो ज्ञेयः पञ्चाब्दा ये युगात्मकाः"॥
इति देवीपुराणे कालव्यवस्थानामाध्यायः॥

इध्मं, क्ली, (इन्ध + मक्।) अग्निसन्दीपनकाष्ठम्। इत्यमरः॥ जालानि काठ इति भाषा।
("तच्चेध्मानयने शुक्रो नियुक्तः काश्यपेन ह"। इति भारते।)

इनः, पुं, (एतीति। इ + नक्।) सूर्य्यः। प्रभुः। ("वसु न इनस्पतिः"। ऋग्वेदे। ४३। २।) नृपभेदः। इत्युणादिकोषः॥

इनानी, स्त्री, वटपत्रीवृक्षः। इति राजनिर्घण्टः॥

इन्दम्बरं, क्ली, (इन्दं महार्हम् अम्बरं नीलवस्त्रमिव।) इन्दीवरं। नीलोत्पलं। इति शब्दमाला॥

इन्दिन्दिरः, पुं, भ्रमरः। इति हेमचन्द्रः॥

इन्दिरा, स्त्री, (इन्द + किरच् + टाप्।) लक्ष्मीः। इति जटाधरः त्रिकाण्डशेषश्च॥ ("मन्दं मन्दं मन्दिरादिन्दिरेव" इति भामिनीविलासे।) शोभा। कान्तिः। यथा, "निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम्"। इति भामिनीविलासे।)

इन्दिरामन्दिरं, क्ली, (इन्दिरायाः मन्दिरं वासस्थानमिव।) विष्णुः। इति राजवल्लभः॥

इन्दिराजयं, क्ली, (इन्दिरायाः लक्ष्म्याः आजयः।) पद्मं। इति शब्दरत्नावली। क्लीवत्वमभिधानात्॥

इन्दिरावरं, क्ली, (इन्दिरायाः लक्ष्म्याः वरं प्रियं।) नीलोत्पलं। इति शब्दरत्नावली॥

इन्दिवरं, क्ली, (इन्दतीति। इदि परमैश्वर्य्ये, इगुपधात् किदिति इन्। इन्दिर्लक्ष्मीस्तस्याः वरं प्रियं।) नीलोत्पलं। इति शब्दमाला॥

इन्दीवरं, क्ली, (इन्दी लक्ष्मीस्तस्याः वरं प्रियं।) नीलपद्मं। तत्पर्य्यायः। नीलाम्बुजन्म २। इत्यमरः। कुवलयं ३ नीलाब्जं ४ नीलोत्पलं ५। इति रत्नमाला॥ ("इन्दीवरेण नयनं मुखमम्बुजेन"। इति कालिदासः। "इन्दीवरश्यामतनुर्नृपोऽसौ"। इति रघुः। ६। ६५।) (नीलोत्पलशब्दोऽस्य गुणादयो ज्ञेयाः।)

इन्दीवरिणी, स्त्री, (इन्दीवर + इनि ङीष्।) उत्पलिनी। इति राजनिर्घण्टः॥ (नीलोत्पलसमूहः।)

इन्दीवरी, स्त्री, (इन्दीवरमस्त्यस्याः। अर्श आद्यच गौरादित्वात् ङीष्।) घृतमूली। इति मेदिनीराजनिर्घण्टौ॥
("वासानिम्बपटोलकेतकिदलाकुम्भाण्डकेन्दीवरी" इति परिभाषायां॥)

इन्दीवारं, क्ली, (इन्द्या लक्ष्म्या वारो वरणं यस्मिन्।) इन्दीवरं। इत्यमरटीकायां रायमुकुटः॥

इन्दुः, पुं, (उनत्ति अमृतधारया भुवं क्लिन्नां करोति इति। उन्द + उ + आदेरिच्च।) चन्द्रः।
("दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव"। इति रघुः। १। १२।) कर्पूरः। इत्यमरः॥
(चन्द्रसमसंख्यः एकसंख्यायुक्तः। मृगशिरानक्षत्रम्॥
"दिवार्ककिरणैर्जुष्टं स्पृष्टमिन्दुकरैर्निशि"।

इति वैद्यकद्रव्यगुणः ॥)

इन्दुकः, पुं, (इन्दुरिव शुक्लत्वात्। इन्दु+कन्।) अश्वन्तकवृक्षः। इति राजनिर्घण्टः ॥

इन्दुकमलं, क्ली, (इन्दुवन्द्र इव शुभ्रं कमलं।) सितोत्पलं। इति राजनिर्घण्टः ॥

इन्दुकलिका, स्त्री, (इन्दुरिव शुक्ला कलिका यस्याः।) केतकी। इति राजनिर्घण्टः ॥ (केतकीशब्देऽस्या विशेषो ज्ञेयः ॥)

इन्दुकान्तः, पुं, (इन्दुः कान्तः प्रियो यस्य। चन्द्रोदयेऽयं निष्यन्दतीतिभावः।) चन्द्रकान्तमणिः। इति राजनिर्घण्टः ॥

इन्दुकान्ता, स्त्री, (इन्दुः कान्तो यस्याः।) रात्रिः। इति हेमचन्द्रः ॥

इन्दुजनकः, पुं, (इन्दोर्जनकः।) समुद्रः। इति त्रिकाण्डशेषः ॥ (समुद्रात् चन्द्रोत्पत्तिकथा भारते आदिपर्व्वणि अष्टादशाध्याये द्रष्टव्या। यथा, —

"ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात्।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" ॥ ३४॥)

इन्दुजा, स्त्री, (इन्दोर्जायते या। इन्दु+जन्+ड।) नर्म्मदा नदी। इति हेमचन्द्रः। नर्व्वदा इति ख्याता। (इयं च प्रतीच्यामवन्तिषु स्थिता प्रत्यक् स्रोतोवहा च। यथा,—

"अवन्तिषु प्रतीच्यां वै कीर्त्तयिष्यामि ते दिशि।
यानि तत्र पवित्राणि पुण्यान्यायतनानि च ॥
प्रियङ्गुवामवनोपेता वानीरफलशालिनी।
प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत" ! ॥
इति भारते आदिपर्व्वणि ८६ अध्यायः ॥)

इन्दुपुत्रः, पुं, (इन्दोः पुत्रः।) बुधग्रहः। इति शब्दरत्नावली ॥

इन्दुपुष्पिका, स्त्री, (इन्दुरिव शुभ्रं पुष्पं यस्याः।) कलिकारीवृक्षः। इति राजनिर्घण्टः ॥ विमलाकृष्णा इति भाषा।

इन्दुभृत्, पुं, (इन्दुं बिभर्त्तीति। इन्दु+भृ+क्विप्।) शिवः। इति हेमचन्द्रः ॥

इन्दुमती, स्त्री, (इन्दुः पूर्णेन्दुर्विद्यते यस्याः। इन्दु+मतुप्।) पूर्णिमेव इति राजनिर्घण्टः ॥ (इन्दुमती पूर्णिमेव आनन्ददायिका स्वनामख्याता विदर्भराजभगिनी, अजराजपत्नी। यथा,—रघुः।

"अथेश्वरेण क्रथकैशिकानां
स्वयंवराय स्वसुरिन्दुमत्याः"। ५।३९।
"वसुधामपि हस्तगामिनी-
मकरोदिन्दुमतीमिवापरां" ।८।१।)

इन्दुरत्नं, क्ली, (इन्दुरिव शुभ्रं रत्नम्।) मुक्ता। इति राजनिर्घण्टः ॥

इन्दुलेखा, स्त्री, (इन्दोश्चन्द्रस्य लेखेव।) अमृता। सोमलता। शृङ्गिकला। इति मेदिनी। यमानिका इति शब्दमाला ॥

इन्दुलोहकं, क्ली, (इन्दुलोह+कन्।) रौप्यं। इति राजनिर्घण्टः।

इन्दुवल्ली, स्त्री, (इन्दोर्वल्ली लता।) सोमलता। इति जटाधरः ॥ (सोमलताशब्देऽस्या गुणादयो व्याख्येयाः ॥)

इन्दुव्रतं, क्ली, (इन्दवे इन्दुलोकार्थं वा व्रतं।) चान्द्रायणव्रतं। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ॥

("इन्दुव्रतसहस्रं तु यश्चरेत् कायशोधनम्।
पिबेत् यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ")

इन्दूरः, पुं, मूषिकः। इति जटाधरः। इँदुर इति भाषा ॥ (गणेशवाहनं। इति पुराणम् ।)

इन्द्रः, पुं, (इन्दतीति। इदि परमैश्वर्ये तस्मात् रन् प्रत्ययः।) देवराजः। स तु अदितिपुत्रः। पूर्व्वदिक्पतिश्च। तस्य भार्य्या शची। पुत्राः जयन्तः १ ऋषभः २ मीढुष्वः ३। अस्त्रं वज्रं। वाहनं ऐरावतः। पुरी अमरावती। वनं नन्दनं। तत्पर्य्यायः। मरुत्वान् २ मघवा ३ विडौजाः ४ पाकशासनः ५ वृत्रहा ६ हरिहयः ७ सुनासीरः ८ पुरुहूतः ९ पुरन्दरः १० जिष्णुः ११ लेखर्षभः १२ शक्रः १३ शतमन्युः १४ दिवस्पतिः १५ सुत्रामा १६ गोत्रभित् १७ वज्री १८ वासवः १९ वृत्रहा २० वास्तोष्पतिः २१ सुरपतिः २२ बलारातिः २३ शचीपतिः २४ जम्भभेदी २५ हरिहयः २६ स्वाराट् २७ नमुचिसूदनः २८ संक्रन्दनः २९ दुश्च्यवनः ३० तुराषाट् ३१ मेघवाहनः ३२ आखण्डलः ३३ सहस्राक्षः ३४ ऋभुक्षा ३५। इत्यमरः। महेन्द्रः ३६ कौशिकः ३७ पूतक्रतुः ३८ विश्वभरः ३९ हरिः ४० पुरदंशा ४१ शतधृतिः ४२ शतनाधाड् ४३ अहिद्विषः ४४। इति जटाधरः ॥ वज्रपाणिः ४५ देवराजः ४६ पर्व्वतारिः ४७ पर्य्यण्यः ४८ देवताधिपः ४९ नाकनाथः ५० पूर्व्वदिक्पतिः ५१ पुलोमारिः ५२ अर्हः ५३ प्राचीनवर्हिः ५४ तपस्वन्तः ५५। इति शब्दरत्नावली। तस्य चतुर्दश नाम भेदा यथा।

"इन्द्रश्च विश्वभुग् ज्ञेयो विपश्चित्तदनन्तरम्।
विभुः प्रभुः शिखिश्चैव तथैव च मनोजवः।
तेजस्वी साम्प्रतश्चेन्द्रो बलिर्भाव्यस्त्वनन्तरम् ॥
अद्भुतश्चेदिवश्चैव दशमश्चेन्द्र उच्यते।
सुप्राणश्च सुकीर्त्तिश्च ऋतधामा दिवस्पतिः।
इति भूता भविष्याश्च इन्द्रा ज्ञेयाश्चतुर्दश" ॥
इति देवीपुराणे कालव्यवस्थाध्यायः।
विष्कुम्भादिसप्तविंशतियोगान्तर्गतषड्विंशयोगः। तत्र जातफलम्।

"प्रतापशीलो बलवान् गुणाढ्यः
श्लेष्माधिकः श्रीकमलाभ्युपेतः।
किलेन्द्रयोगो यदि जन्मकाले
महेन्द्रतुल्यः पुरुषः प्रसन्नः"।

इति कोष्ठीप्रदीपः ॥ * ॥ अन्तरात्मा आदित्यविशेषः। इति मेदिनी (यथा, हरिवंशे।

"तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह" ।)

कुटजवृक्षः। रात्रिः। इति धरणी ॥ उपद्वीपविशेषः। इति शब्दमाला ॥ परमेश्वरः। इति वेदान्तः ॥ ("इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतिः ॥ इन्द्रियं। श्रेष्ठः। प्रथमः। यथा, नरेन्द्रो राजा। पक्षीन्द्रो गरुडः। इत्यादिः।)

इन्द्रकं, क्ली, (इन्द्रस्य ऐश्वर्य्यशालिनः कं सुखं यस्मिन्।) सभागृहम्। तत्पर्य्यायः। अस्थानगृहं २। इति हेमचन्द्रः ॥

इन्द्रकीलः, पुं, (इन्द्रस्य कील इव।) मन्दरपर्व्वतः। इति हेमचन्द्रः ॥ (यथा रामायणे २।८०।१८।

"तत्रेन्द्रकीलप्रतिमाः प्रतोलिवरशोभिताः।)

इन्द्रकुञ्जरः, पुं, (इन्द्रस्य कुञ्जरः।) ऐरावतहस्ती। इति जटाधरः ॥

इन्द्रकोषः, पुं, (इन्द्रस्य ऐश्वर्य्यशालिनः कोषः।) मद्यः। खड्गः। इति त्रिकाण्डशेषः ॥ तमङ्गकः। इति हेमचन्द्रः। घोमला गोँजला इत्यादिख्यातः। निर्य्यूहोऽपि। यथा, महेश्वरः।

"निर्य्यूहः शेखरे द्वारे निर्य्यासे नागदन्तके"।

इन्द्रगोपः, पुं, (इन्द्रो गोपो रक्षको यस्य।) रक्तवर्णकीटविशेषः। मखमली इति भाषा। तत्पर्य्यायः। अग्निरजः २ वैराटः ३ तितिभः ४ अग्निकः ५ इति हेमचन्द्रः। शक्रगोपः ६ वर्षाभूः ७ रक्तवर्णः ८। इति राजनिर्घण्टः ॥ ("अविरलवितरेवहीन्द्रगोपैः"। इति किराते। १९।३।)

इन्द्रचन्दनं, क्ली, (इन्द्रस्य चन्दनं रक्तविशेषः।) हरिचन्दनम्। इति राजनिर्घण्टः ॥

इन्द्रचिर्भिटी, स्त्री, लताविशेषः। तत्पर्य्यायः। इन्दीवरा २ युग्मफला ३ दीर्घवृन्ता ४ उत्तमारुणी ५ पुष्पमञ्जरिका ६ द्रोणी ७ करम्भा ८ नलिका ९। अस्या गुणाः। कटुत्वं। शीतत्वं। पित्तश्लेष्मकासदोषव्रणकृमिनाशित्वं। चक्षुर्हितकारित्वञ्च। इति राजनिर्घण्टः ॥

इन्द्रच्छन्दः, [स्] क्ली, (इन्द्र इव सहस्रपुष्पेण छाद्यते इति। इन्द्र+छद्+असुन्। निपातनात् सिद्धं।) सहस्रगुच्छहारः। इति हेमचन्द्रः ॥

इन्द्रजालं, क्ली, (इन्द्राणामिन्द्रियाणां जालं आवरकम्। यद्वा इन्द्रस्य परमेश्वरस्य जालं माया इव।) मायाकर्म्म। भोजबाजि; भेलकि इत्यादि भाषा। तत्पर्य्यायः। कुहकं २ जालं ३ कुस्तिः ४। तद्विवरणग्रन्थो यथा,—

"अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम्।
व्याधिदारिद्र्यहरणं जरामृत्युविनाशनम् ॥
इन्द्रस्य यो न जानाति जालेशं रुद्रभाषितम्।
नियहानुग्रहे तस्य का शक्तिः परमेश्वरि ! ॥
न तेषां जायते सिद्धिर्गोचे क्षेत्रे गृहेऽपि वा।
इन्द्रजालं न जानाति स क्रुद्धः किं करिष्यति ॥
न जीवति वरारोहे संसारे दुःखसागरे।
इन्द्रजालं न जानाति कुतः सौख्यं भवेत्ततः ॥
कौतूहलं कुतस्तेषां कुतः कामा वरानने ! ।
संसारसागरे घोरे कामलुब्धाश्च मानवाः।
रुद्रकर्म्म न हि तेषां कुतः सौख्यं विधीयते ॥
यथा नदीनदाः सर्व्वे सागरे समुपागताः।
तथा सर्व्वाणि शास्त्राणि इन्द्रजालस्थितानि च ॥
तप्तानाञ्च यथा भानुः शीतलानां यथा शशी।
गम्भीराणां यथा सिन्धुर्जालेन्द्रश्च तथा प्रिये ! ॥
तथा किं बहुनोक्तेन वर्णनेन पुनः पुनः।
जालेन्द्रस्य समं शास्त्रं न भूतं न भविष्यति" ॥ *
"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे।
येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति ॥
महाकालस्य बीजानि प्रस्थमेकं समाहरेत्।

धात्रीरसेन देवेशि ! सप्त वारान् विभावयेत्" ॥ गुटिका कर्त्तव्या तां गुटिकां मुखे निक्षिप्य पारावतो भवति ॥ १ ॥ "अथातः संप्रवक्ष्यामि शृणु त्वं मम वल्लभे। काकस्य शीर्षं संगृह्य कृष्णमृत्तिकां पूरयित्वा पुनर्धुस्तूरबीजानि वापयेत् काले तानि पुष्पितानि भवन्ति तदा यस्योपरि निक्षिपेत् स काको भवति ॥ २ ॥ मयूरशीर्षमादाय कृष्णचतुर्दश्यां मृत्तिकां पूरयेत् शणबीजानि वापयेत् यदा फलितो पुष्पितो भवति तदा शणबीजानि ग्रीवायां बन्धयेत् तेन मयूरो भवेत् ॥ ३ ॥ कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकां पूरयेत् कार्पासबीजानि वापयेत् यदा फलिताः पुष्पिता भवन्ति पुष्पफले संगृह्य समस्तं पेषयित्वा अङ्गं विलिप्य पानीयमध्ये प्रविश्य तथा जले तिष्ठेत् यथा मत्स्ये ॥ ४ ॥ कृष्ण-काक-शीर्षमादाय काकमाचीबीजानि वापयेत् यदा फलिताः पुष्पिता भवन्ति तत्फलं संगृह्य मुखे प्रक्षिप्य काको भवति काक इव गच्छति मक्षा उड्डीर्णो मोक्षः ॥ ५ ॥ पारावतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलबीजानि वापयेत् क्षीरोदकेन सिञ्चनीयं यदा पुष्पिता भवन्ति तदा मुखे संस्थाप्य अन्तर्हितो भवेत् ॥ ६ ॥ तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवेत् सर्वस्वं ददाति ॥ ७ ॥ तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत्। सप्तरात्रं पाचयेत्। तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा। उड्डीर्णेन पुरुषो भवति। जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति ॥ ८ ॥ गृध्रशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकां निक्षेपेत् लशुनबीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्यनक्षत्रे पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं तावत् योजनशतं पश्यति मेदिनीं दिवा नक्षत्राण्यपि पश्यति लाभस्तस्य। किञ्चित् कर्त्तुमिच्छति तत् करोति न संशयः ॥ ९ ॥ अन्ये च सर्वे जीवाः एवं उष्ट्रगर्दभमहिष्यादिसघृतहञ्जीवाः। यत् यत् बीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः ॥ १० ॥ * ॥ अथ सर्वेषां धारणमन्त्रः। ॐ क्रीं क्रीं क्रैं ऐं लं लं ॐ भौ स्वाहा। एकादशाक्षरो मनुरस्य पुरश्चरणं लक्षजपः। दशांशहोमः घृतेन तर्पणं मार्जनं ब्राह्मणभोजनादिकं कारयित्वा सिद्धिर्भवति ॥ * ॥ अथ वश्याधिकारः।

"मातुलुङ्गस्य मूलन्तु धुस्तूरबीजकेन च।
पलाशपुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत् ॥
योऽस्य गन्धं समाघ्राति स च खेचरेण पश्यति।
दुन्दुभिं षट्दांश्चैव शङ्खांश्चैव तु लेपयेत् ॥
एष भूलोपरिष्ठानां कुमारीणां गृहेषु च।
भूपतेः सेव्यमानानां तथापत्यापजीविनां ॥
न चाभिर्दृश्यते वेश्म यत्रैष सोऽगदो भवेत्"।

अत्र मन्त्रः।

ॐ "रक्तचामुण्डे अमुकं मे वशमानय क्रीं क्रीं हूं फट्। अयुतं जपत्यम्। ॐ नमोऽस्तु आदित्याय किलि किलि चिलि चिलि धूमं लिहि यक्षिणि मोदते हि शाकिनि अनिदुदुशूलपाणि स्वाहा॥ वर्णाः ४० शिलाक्षतिके मन्त्रे। ॐ नमो गुह्यवासिन्यै गुह्यपति गुह्यिले मनोजवो ॐ ह्रं ॐ विज्ये नमः। शिलायाः कृतिः करलिखिता खदिरानलसन्तप्तलिङ्गा यतो नवयोषितोऽपि आकर्षणं। वर्णाः २६। ॐ नमः कपालशस्त्राय सर्वलोकवशङ्कराय अनाधायाप्रतिहतबलवीर्यपराक्रमप्रभवाय हा हा हे हे पच पच मारय मारय कपट कपट काट सर्प कर्म्मकरि अमुकं मे वशमानय स्वाहा। ७७। वर्णाः अयुतजपाद्वशीकरोति॥* अन्यप्रकारः।

"पारावतस्य हृदयं चक्षुर्जिह्वा च शोणितम्।
अञ्जनं रोचनयुतं वनितावशकृत् परम्" ॥
तत्र मन्त्रः। ॐ नय नय महारिणि नमो देव्यै स्वाहा॥१५॥ एकविंशतिवारान् परिजप्य सिद्धिर्भवति ॥ * ॥ अन्यप्रकारः।

"कपालं मानुषं ग्राह्यं कनकस्य फलानि च।
कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन च ॥
नारी वा पुरुषोऽनेन वश्यो भवति नित्यशः।
एष कापालिको योगो वशिष्ठस्य शुभं मतम्" ॥*॥
अन्यप्रकारः। पुरुषार्थी।

"कर्पूरं वालुकं लाक्षा रजसा सप्तभावितं।
रतिकाले भगं लिप्य रतिर्दासो भविष्यति" ॥*॥
अन्यप्रकारः।

"नरजिह्वां ममुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत्।
जलेन च सुशीतेन दापयेत् तद्दिवसाग्रः॥
पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत्।
प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती ॥
साभिसक्षा प्रियं याति नान्यं पुरुषमिच्छति" ॥*॥
अन्यप्रकारः।

"कनकक्षाप्यपामार्गं सुरसा गौरसर्षपाः।
तिलतैलेन पिष्ट्वापि योनिलेपः प्रशस्यते" ॥
अत्र मन्त्रः। ॐ नम शूल्यायै दरि विदरि यामिनि अमुकं मे वशमानय स्वाहा ॥ * ॥ अन्यप्रकारः। हरितालं श्मशाने कृष्णचतुर्दश्यां क्षिप्त्वा कुलविभिन्नं ग्राह्यं अवश्यं वशी भवेत् स नरः ॥*॥
अन्यप्रकारः। ऋतुनवलोचनतालालाटास्थिबाणसाधितं तैलं सकलमनुजेन्द्रललनावशङ्करं मकरालये पुष्ये। नरतैलं प्रेताम्बरवह्निकं कृत्वा मात्रे रात्रौ प्रज्वाल्यार्कवृक्षस्कन्धे कज्जलं कृत्वा चक्षुषी अभ्यञ्जयेत् यं पश्यति स वश्यो भवति ॥*॥
अन्यप्रकारः।

"कर्णदन्तमलं लाला स्वदेहात्तिमलत्रयम्।
नासिकोद्भवरक्तञ्च चूर्णमेतद्विलायुतम् ॥
एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः।
पानभोजनके देया वशीकरणमुत्तमम्" ॥ * ॥
अन्यप्रकारः।

काकजिह्वा वचा कुष्ठं आत्मनो रुधिरं स्त्रियः।
तद्भावितञ्च मक्षिष्ठा तगरं गौरसर्षपाः ॥
शिवनिर्माल्यसंयुक्तं समभागानि कारयेत्।
भोज्ये पानेऽथवा देयाः स्त्रीणान्तु वशकारकाः ॥
नित्यं पुरुषमिच्छन्ती मृतमप्यनुगच्छति ॥ * ॥
अन्यप्रकारः। कृष्णसर्पमण्डलप्रमाणं शिरश्छित्वास्यास्यं सर्षपादिभिः पूरयित्वा छायाशुष्कं शोषयेत्। परतः सर्षपान् ग्राहयित्वा तानि यस्मै दीयते स वश्यो भवति ॥ * ॥ अन्यप्रकारः॥ पूगीफलं निर्गिलितापामार्गं निर्गतं गृह्य धुस्तूररसान्तरितं कृत्वा सप्तदिनानि पूजयेत् ॥ पुनः कुङ्कुमचन्दनैरधिवास्य यस्मै दीयते स वश्यो भवति ॥ * ॥ अन्यप्रकारः।

"दर्दुरयुग्मं गृहीत्वा तद्धूमेन दाहयेत्।
तद्भस्म सह पानेन वशकृत् परमो मतः" ॥*॥
अन्यप्रकारः।

"अजगन्धस्य पत्राणि वचा कुष्ठेन भावयेत्।
श्मशानभस्मसंयुक्तं चूर्णञ्चेत्रिषु दुर्लभम् ॥
अनेनैव तु चूर्णेन जोटयेत् त्रिच्च यादृशम्।
पुष्पितं फलितं दृष्ट्वा चूर्णं दत्त्वादिलग्नयेत्।
तत्क्षणात् फलते दत्तो नरनारीषु का कथा ॥*॥
अन्यप्रकारः।

"जिह्वामूले सप्तरात्रं सैन्धवेनापि मिश्रितम्।
ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात्"॥*
अन्यप्रकारः।

"गोपित्तं सैन्धवञ्चैव दृहतीफलमेव च।
लेपमेतत् प्रयोक्तव्यं नरनारीवशङ्करम्" ॥ * ॥
अन्यप्रकारः।

"बालामूलं चूर्णयित्वा रक्तरेतःसमन्वितः।
दद्यात् पानेन प्रमदां क्षिप्रमेव वशं नयेत् ॥
पुत्रादिच्च धनं त्यक्त्वा दासीवत् भवति तु सा।
यत्र वा नीयते तत्र पश्चात् भ्रमति विह्वला" ॥*॥
अन्यप्रकारः। वल्मीकमृत्तिकायाः प्रतिकृतिं कृत्वा क्षीरेण स्नाप्य आज्येन वा अभ्यज्य तस्य लवणाकृतिमेकविंशतिवारं जुहुयात् चिराचेण वश्यो भवति सप्तरात्रेणाथवा। देवीञ्च गान्धारीं यक्षिणीं शक्रस्यापि पत्नीं वशमानयति ॥ * ॥ अन्यप्रकारः।

"उड्डानुः पक्षिणो मलमात्मनो रुधिरान्वितम्।
स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम्" ॥
अत्र मन्त्रः। त्रिशूलिने त्रिनेत्राय हिलि हिलि स्वाहा। वर्णाः १४। सप्तजपेन सिद्धिः ॥ * ॥
अन्यप्रकारः।

"कृष्णपक्षचतुर्दश्यां मृतभस्म तु ग्राहयेत्।
स्त्रीणाञ्च मूर्द्धि दातव्यं विद्यया परिजप्तया ॥
दह्यते मुह्यते नारी पच्यते शुष्यतेऽपि च।
अङ्गानि चैव भज्यन्ते यदि तं न समाविशेत्" ॥
अत्र मन्त्रः। ॐ नमश्चामुण्डे श्मशानवासिनि स्वाहा। वर्णाः। १४। सप्तरात्रेण प्रेरकः ॥ * ॥
अन्यप्रकारः।

"श्वेतार्कं रोचनायुक्तं आत्ममूत्रेण पेषयेत्।
ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात्।
दृष्टमात्रेण तेनैव सर्वो भवति किङ्करः"॥ * ॥
अन्यप्रकारः।

"श्वेतार्कं चन्दनेनैव रमयेत् सह लेपयेत् ।
दीयते कस्यचिद्यापि पश्चाद्दासी भविष्यति ॥ *॥

अथ पतिवशीकरणम् ।

"मधुकं सह तैलेन सार्धपेण तु पेषयेत् ।
एतेन प्राग्विमभ्यङ्ग्य भर्त्रा सा सहिता स्वपेत् ।
संदत्ते मैथुनीभावे पतिर्दासो भविष्यति" ॥ * ॥

अन्यच ।

"मनःशिलाकुङ्कुमसर्षपाश्च
तथा च कुष्ठं सहदेवदारु ।
रक्तश्च रक्तं पलितेन सार्द्धम्
प्रपेषयेत् सूक्ष्मतरं महान्तम् ॥
प्रक्षातपूर्व्वाभिमुखोऽपि भूत्वा
संस्मृत्य लक्ष्मीश्वरकेश पूज्य ।
ततः प्रकुर्य्यात् तिलकं ललाटे
वामाच हस्ताच्चतुरङ्गुलीभिः ॥
पुंदृष्टमात्रेण भवेत् स कान्ता-
दासातिदासश्च किमत्र चित्रम्" ॥ * ॥

अथ लिङ्गलेपाधिकारः ।

"दृष्टतीयलमूलानि पिप्पली मरिचानि च ।
भया रोचनया सार्द्धं लिङ्गलेपोत्तमो मतः ॥
निःशेषस्त्रीजगत्कर्षं गात्रा स्त्रीहृदयाङ्गमम् ।
मोहनं शस्त्रमेतद्धि मदनस्य स्मृतं बुधैः" ॥ * ॥

अन्यच ।

"कुष्ठञ्च धातकीपुष्पं मरिचानि वचा तथा ।
अनेन लिङ्गमालिप्य क्षत्वा श्यामां वशं नयेत् ॥
तासाश्चित्तहरोऽप्येष स्मृतमप्यनुगच्छति ।
विवशा भक्तिभावेन पश्चात् सर्व्वं प्रयच्छति" ॥ *॥

अन्यच ।

"पञ्चरक्तानि संगृह्य शुभानि च यथेच्छया ।
सर्व्वाणि समभागानि प्रियङ्गुश्चापि तत्समम् ॥
नागरं दशभागेन लेपः कान्तावशङ्करः" ॥ * ॥

अन्यच ।

"देवदारु वचा कुष्ठं चतुर्थं वैश्वभेषजं ।
आस्फवीजरजैर्युक्तं गौरीश्यामावशङ्करम्" ॥ * ॥

अन्यच ।

"हरिद्रा दृष्टतीमूलं भद्रमुस्तं तथोत्पलम् ।
विड्गं क्षत्वा वैरञ्च समभागानि कारयेत् ॥
लिङ्गलेपोत्तमो ह्येष रक्तवक्त्रीवशङ्करः" ॥*॥

अन्यच ।

"हरिद्रा पिप्पलीमूलं पद्मं मधुकमेव च ।
एतानि समभागानि नवनीतेन पेषयेत् ।
लिङ्गलेपोत्तमो ह्येष गौरीप्रीताय शाङ्करः" ॥*॥

"कौशिकशोणितलेपात् सेचनाद्वा एतं भवेल्लिङ्गं ।
तदग्रन्तेजस्तम्भमयं कीलकसदृशं भवेच्च ।
कौशिकं रुधिरं ग्राह्य गोमूत्रेण च पेषयेत् ।
वीर्य्यं हि स्तम्भयेन्नित्यं प्रहरार्द्धं न संशयः" ॥*॥

सर्व्वसाधारणो मन्त्रः । 'ॐ यं क्रीं क्रीं श्रीं फट् स्वाहा । अनेन मन्त्रेण सर्व्वयोगानभिमन्त्र्य सिद्धिः" । इति श्रीपार्व्वतीपुत्रश्रीनित्यनाथविरचिते सिद्धखण्डे तन्त्रसारे कौतूहलविद्यानाम इन्द्रजालतन्त्रम् ॥*॥ पुस्तकत्रयमालोच्य यथासाध्यं शोधितमेतत् ॥ * ॥ * ॥ अपिच । ईश्वर उवाच ।

"इन्द्रजालं विना रक्षां न करोतीति निश्चितम् ।
रक्षामन्त्रं महामन्त्रं सर्व्वसिद्धिप्रदायकम्" ॥
"ओं नमो नारायणाय विश्वम्भराय इन्द्रजाल-
कौतुकानि दर्शय दर्शय सिद्धिं कुरु कुरु स्वाहा"
अष्टोत्तरशतजपेन सिद्धिः ॥ * ॥ अथ रक्षामन्त्रः ।
"ओं नमः परब्रह्मपरात्मने मम शरीरे पाहि
पाहि कुरु कुरु" ॥
"उलूकस्य कपालेन घृतेनाहतकज्जलं ।
तेन नेत्राञ्जनं कृत्वा रात्रौ पठति पुस्तकम् ॥ १ ॥
अङ्गोलवीजनिक्षिप्ते गुरुवारे मुखे गजे ।
मन्त्रेण सिच्यतेन्नित्यं यावद्बीजफलं हि वै ॥
त्रिलौहवेष्टितं कृत्वा एकवीरं मुखे स्थितम् ।
मत्तमातङ्गवीर्य्यस्तु वायुतुल्यपराक्रमः ।
दशहस्तमदृष्टव्यं षोड्शं रूप्यभागकम् ।
एवं संख्या त्रिलोही च ज्ञातव्या सर्व्वकर्म्मणि ॥२॥
यानि कानि च बीजानि जङ्गमं स्थलमेव च ।
अङ्गोलवीजनिक्षिप्ते मुखे भूमितले ध्रुवम् ।
तद्बीजं मुखमध्यस्थं त्रिलोहैर्वेष्टितं कुरु ।
तद्रूपो हि भवेन्मर्त्यो नान्यथा शङ्करोदितम् ॥३॥
यानि कानि च बीजानि अङ्गोलतैलमेलनात् ।
सफलो जायते वृक्षः सिद्धियोगमुदाहृतम् ॥ ४ ॥
शवमुखे विन्दुमात्रं तत्तैलं निःक्षिपेद्यदि ।
एकयामं भवेत् जीवो नान्यथा शङ्करोदितम् ॥५॥
शिग्रुबीजस्थितं तैलं पारावतपुरीषकम् ।
नराहस्य वसायुक्तं गृहीत्वा च समं समम् ॥
गर्दभस्य वसायुक्तं हरितालं मनःशिला ।
एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरो नृपः ॥ ६ ॥
उलुविष्ठां गृहीत्वा तु एरण्डतैलपेषणात् ।
यस्याङ्गे निक्षिपेत् विन्दुं स क्षिप्रो जायते ध्रुवम् ॥७॥
सर्पदन्तं गृहीत्वा तु क्षणाद्रस्त्रिककण्टकम् ।
कृकलासरक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत् ॥
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम् ॥ ८ ॥
सिन्दुरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम् ।
तल्लिप्तवस्त्रं शिरसि अग्निवत् दृश्यते ध्रुवम् ॥ ९॥
अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम् ।
गृहीत्वा पात्रके लिप्ते जलपूर्णं करोति च ।
दुग्धं संजायते तत्र महाकौतुककौतुकम् ॥१०॥
अङ्गोलतैललिप्ताङ्गो दृश्यते रात्रसाकृतिः ।
पलायन्ते नराः सर्व्वे पशुपक्षिगजाहयाः ॥११॥
अङ्गोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः ।
रात्रौ पश्यति भूतानि खेचराणि महीतले ॥१२॥
बुधे वा शनिवारे वा कृकलां गरिगृह्य च ।
शुचुर्मूत्रयते यत्र कृकलां तत्र निःक्षिपेत् ॥
निखनेद्भूमिमध्येषु उद्धृते च पुनः सुखी ।
नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम् ॥१३॥
गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा ।
सूक्ष्मचूर्णमयं कृत्वा किञ्चिदङ्गे विनिःक्षिपेत् ॥
विघ्नाः सर्व्वे पलायन्ते यथा युद्धेषु कातराः ॥१४॥
इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे इन्द्र-
जालकौतुकदर्शनं नाम एकादशः पटलः ॥* ॥ * ॥

अन्यच ।

"वश्याकर्षणकर्म्माणि वसन्ते योजयेत् प्रिये ।
ग्रीष्मे विद्वेषणं कुर्य्यात् प्राहृषि स्तम्भनं तथा ॥
शिशिरे मारणञ्चैव शान्तिकं शरदि स्मृतम् ॥
हेमन्ते पौष्टिकमाख्यं ऋतुकर्म्मविचारदः ।
वसन्तश्चैव पूर्व्वाह्णे ग्रीष्मो मध्याह्न उच्यते ॥
वर्षा ज्ञेयापराह्णे तु प्रदोषे शिशिरः स्मृतः ।
अर्द्धरात्रे च हेमन्तः शरदं तत्परं स्मृतम्" ॥ * ॥

अथ पक्षादिनिर्णयः ।

"कृष्णपक्षे मारणादि शुक्लपक्षे च वर्द्धनम् ॥
द्वादश्यां मारणं कर्म्म एकादश्यां तथैव च ।
तृतीयां नवमीञ्चैव वश्याकर्षञ्च कारयेत् ।
स्तम्भनञ्च चतुर्दश्यां चतुर्थ्यां प्रतिपद्यपि ॥
द्वितीयां षष्ठीसप्तम्यां कारयेत् शान्तिकर्म्म च ।
अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा ॥
वश्याकर्षञ्च कर्त्तव्यं कारयेच्च सदा बुधः ।
ज्येष्ठा च उत्तराषाढ़ा अनुराधा च रोहिणी ॥
कारयेन्मारणं शान्तिं स्तम्भनं विजयं तथा ।
विधिमन्त्रसमायुक्तमौषधं सफलं भवेत् "॥ * ॥

अथ वशीकरणम् ।

"सिन्दूरमाक्षिककपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य रमते तरुणीं नवोढ़ां ।
शान्तिं न याति पुरुषो मनसापि नूनं
दासी भवेदिति मनोहरदिव्यमूर्त्तिः ॥
पुष्ये रुद्रजटामूलं मुखस्थं कारयेद्बुधः ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ॥
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत् ।
नागपुष्पं प्रियङ्गुश्च तगरं पद्मकेशरम् ॥
जटामांसी समं नीत्वा चूर्णयेत् मन्त्रवित्तमः ।
साङ्गं धूपयते तेन भजते कामवत् स्त्रियः" ॥
ॐ मूली मूली महामूली सर्व्वं संक्षोभयेभ्यः
उपद्रवेभ्यः स्वाहा । धूपमन्त्रः ॥
"पानीयस्याञ्जलीन् सप्त दत्त्वा विद्यामिमां जपेत् ।
सालङ्कारां नवां कन्यां लभते मासमात्रतः ॥
ॐ विश्वावसुर्नाम गन्धर्व्वः कन्यानामधिपतिः सुरूपां
सालङ्कारां देहि मे नमस्तस्मै विश्वावसवे स्वाहा ।
"कन्याग्रहे शालकाष्ठं क्षिपेदेकादशाङ्गुलम् ।
ऋक्षे च पूर्व्वफल्गुन्यां यस्तां कन्यां प्रयच्छति ॥ * ॥

अथ सर्व्वजनवशीकरणम् ।

"शिला च रोचनामूलं वारिणा तिलके कृते ।
दृष्टमात्रे वशं याति नारी वा पुरुषोऽपि वा ॥
स्वर्णेन वेष्टनं कृत्वा तेनैव तिलके कृते ।
सम्भाषणेन सर्व्वेषां त्रैलोक्यं वशमानयेत्" ॥
ॐ क्रीं क्लीं ऐं स्त्रौं भोगप्रदा भैरवी मातङ्गी
त्रैलोक्यं वशमानय स्वाहा । औषधोपरि सहस्रजपं
कुर्य्यात् । पुनः सप्तवारजपेन तिलकं कारयेत्
शक्रसमोऽपि वश्यो भवति । इति कालनाथविर-
चिते इन्द्रजाले १ अध्यायः ॥ * ॥

अथाकर्षणं । ॐ क्रीं चामुण्डे ज्वल ज्वल प्रज्वल
प्रज्वल स्वाहा । अनेन मन्त्रेण स्त्रियं दृष्ट्वा जपं
कुर्य्यात् तत्क्षणात् एष्यतः समागच्छति । पूर्व्व-
मेवायुतजपेन सिद्धिः ।
"अश्लेषायां समादाय अर्ज्जुनस्य च ब्रह्मकम् ।
अजमूत्रेण संपिष्य स्त्रीणां शिरसि दापयेत् ॥

पुरुषस्य पशूनां वा क्षिपेदाकर्षणं भवेत्" ॥ * ॥
अथ जयः।
"गोजिह्वां शिखिमूलं वा मुखे शिरसि संस्थिता।
कुरुते सर्व्ववादेषु जयं पुंसे समुद्धृते ॥
मार्गशीर्षपौषमास्यां शिखिमूलं समुद्धरेत्।
बाहौ शिरसि वा धार्य्यं विवादे विजयो भवेत् ॥
गिरिकर्णीं शमीं गुञ्जां श्वेतवर्णां समाहरेत्।
चन्दनेनान्वितस्त्वेव तिलकेन जयी नरः ॥
कपिकार्कवटावङ्किर्विद्रुमः पञ्चमस्तथा।
तिलकं कुरुते यस्तु पश्येत्तं पञ्चधा रिपुः ॥
आर्द्रायां वटवन्दाकं गृहीत्वा धारयेत् करे।
संग्रामे जयमाप्नोति जयां स्मृत्वा जयी भवेत्" ॥
अस्य मन्त्रः। ॐ नमो महाबलपराक्रम समस्त-विद्याविशारद अमुकस्य भूजबलं बन्धय बन्धय दृष्टिं स्तम्भय स्तम्भय अङ्गानि धूनय धूनय पातय पातय महीतले फ्रीं ॥ * ॥ अथ सौभाग्यम्।
"पुष्योद्धृतं सितार्कस्य मूलं वामेतरे भुजे।
बद्धा सौभाग्यमाप्नोति दुर्भगापि न संशयः ॥
रक्तचित्रार्कमूलन्तु सोमवासरे समुद्धृतं।
क्षीरैः पिष्ट्वा वटीं कुर्य्यात् तिलकं शुभभङ्गना" ॥ * ॥
अथ ईश्वरादिक्रोधोपशमनं। ॐ शान्ते प्रशान्ते सर्व्वक्रोधोपशमनि स्वाहा।
अनेन मन्त्रेण त्रिःसप्तधा जपेन मुखं मार्जयेत्।
ततः क्रोधोपशमनं भवति" ॥* गजनिवारणम्।
"श्वेतापराजितामूलं हस्तस्थं वारयेत् गजम्।
मूलं त्रिशूल्या वल्कस्थं गजवशकरं भवेत्" ॥ * ॥
व्याघ्रनिवारणं।
"मुखस्थं दृष्टतीमूलं हस्तस्थं व्याघ्रभीतिजित्"।
फ्रीं फ्रीं फ्रीं श्रीं श्रो श्रो स्वाहा।
इत्यष्टाक्षरमन्त्रेण लोष्टं पठित्वा क्षिपेत्।
तदा मुखं न चालयति गन्तुमशक्तः ॥
"मूलं कृष्णचतुर्दश्यां गृह्येल्लाङ्गलीभवम्।
हस्तस्थं व्याघ्रभीतादिभयघ्नं परिकीर्त्तितम्" ॥
इति इन्द्रजालतन्त्रे ३ उपदेशः ॥* अथ स्तम्भनम्।
"श्वेतगुञ्जोत्थितं मूलं मुखस्थं दृष्टतुरङ्गजित्"।
ॐ फ्रीं रक्त रक्त चामुण्डे तुरु तुरु अमुकं मे वशमानय वशमानय स्वाहा। अयं चण्डामन्त्रः।
उक्तयोगसिद्धिः ॥
"पुष्यार्के मधुवन्दाकं गृहीत्वा प्रक्षिपेद्बुधः।
सभामध्ये च सर्व्वेषां मूकस्तम्भः प्रजायते" ॥ * ॥
मेघस्तम्भनम्। इष्टकद्वयसंपुटमध्ये मेघसंख्यक-चतुरस्रं विलिख्य उद्याने स्थापयेत्तदा मेघान् स्तम्भयति। मन्त्रः। "मेघान् स्तम्भय स्तम्भय" ॥* ॥
नौकास्तम्भनम्।
"भरण्यां क्षीरकाष्ठस्य कीलं पञ्चाङ्गुलं क्षिपेत्।
नौकामध्ये तदा नौकास्तम्भनं जायते ध्रुवम्" ॥*॥
निद्रास्तम्भनम्।
"मूलं कृष्णा मधुकं पिष्ट्वा नस्यं समाचरेत्।
निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम्" ॥ * ॥
शस्त्रस्तम्भनम्।
"कपित्थस्य च वन्दाकं क्षत्तिकायां समाहरेत्।
वल्कसंस्थन्तु देवस्य शस्त्रस्तम्भनकं परम् ॥

करे सुदर्शनामूलबन्धनात् स्तम्भनं तथा"।
ॐ अहो कुम्भकर्ण महाराक्षस निकुम्भागर्भ-सम्भव परसैन्यस्तम्भन महाभय रणरङ्ग आज्ञापय स्वाहा। अष्टोत्तरसहस्रजपात् सिद्धिः ॥
"गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम्।
लेपमात्रे शरीराणां सर्व्वशस्त्रनिवारणम् ॥
पुष्यार्के श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।
हस्ते काष्ठभयं नास्ति संग्रामे च कदाचन" ॥*॥
गोमहिष्यादिस्तम्भनम्।
"उद्गस्थास्थि चतुर्दिक्षु निखनेत् भूतले ध्रुवम्।
गां मेषीं महिषीं वाजीं स्तम्भयेत् करिणीमपि"॥*॥
बुद्धिस्तम्भनम्।
"भृङ्गराजमयामार्गं सिद्धार्थं सहदेविकाम्।
ओलं वचाञ्च श्वेतार्कं ध्रुवमेषां समाहरेत्॥
लौहपात्रे विनिक्षिप्य दिदिनान्ते समुद्धरेत्।
तिलकैः सर्व्वभूतानां बुद्धिस्तम्भकरं परम्" ॥
ॐ नमो भगवते विश्वामित्राय नमः सर्व्व-मुखीभ्यां विश्वामित्र आगच्छ आगच्छ स्वाहा।
उक्तयोगस्यायं मन्त्रः ॥ * ॥ चौरगतिस्तम्भनम्।
ॐ ब्रह्मवेष्णिनि शिवे रक्त रक्त स्वाहा। अनेन मन्त्रेण सप्तपाषाणान् गृहीत्वा चीणि कक्षां बद्धा अपरान् मुष्टिभ्यां धारयेत्। इति चौराणां गति-स्तम्भनम्। * ॥ गर्भस्तम्भनम्।
"ग्राह्यं कृष्णचतुर्दश्यां धूस्तूरस्य तु मूलकम्।
कक्षां बद्धा रमेत् कान्तां न गर्भं धारयेत् क्वचित्॥
मुक्तेन लभते गर्भं पुरा नागार्ज्जुनोदितम्।
तन्मूलचूर्णं योनिस्थं न गर्भं सम्भवेत् क्वचित् ॥
सिद्धार्थमूलं शिरसि बद्धा कान्तां रमेत्तु यां।
न गर्भं धारयेत् सा स्त्री मुक्तेन लभते पुनः" ॥*॥
शुक्रस्तम्भनम्।
"नीलीमूलं श्मशानस्थं कक्षां बद्धा तु वीर्य्यवत्।
रक्तापामार्गमूलन्तु सोमवारे निमन्त्रयेत् ॥
भौमे प्रातः समुद्धृत्य कक्षां बद्धा तु वीर्य्यवत्" ॥
इति कामरत्ने ३ उपदेशः ॥ * ॥ मोहनम्।
"भृङ्गीवचानलदसर्जरसं समानं
कृत्वा त्रुटिं मलयजञ्च षड़ेकमिश्रम्।
यो धूपयेन्निजगृहं वसनं शरीरं
तस्यापि दास इव मोहमुपैति लोकः" ॥
भृङ्गराजः केशराजो लज्जा च सहदेविका।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः" ॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः क्रूं क्रूं ह्रूं फट्।
"अनेनैव तु मन्त्रेण कृत्वा ताम्बूलभावनम्।
साध्यस्य मुखनिक्षिप्ते मोहमायाति तत्क्षणात्"॥
ॐ भीं क्षीं भों मोहय। इमं मन्त्रं वारत्रयं जपेत्। मोहमाप्नोति मानवः॥ * ॥ देहरञ्जनम्।
"कदम्बपत्रं लोध्रञ्च अर्ज्जुनस्य च पुष्पकम्।
पिष्ट्वा गात्रोद्वर्त्तनाच्च कायदुर्गन्धनाशनम्॥
एला-शृटी-पत्रक-चन्दनानि
तोयाभयाशिग्रुघनामयानि।
ससौरभोऽयं सुरराजयोगः
ख्यातः सुगन्धो नरमोहयोग्यः" ॥ * ॥
मुखरञ्जनम्।

"रसालजम्बूफलगर्भसारः
सकर्कटो माक्षिकसंयुतश्च।
स्थितो मुखान्ते पुरुषस्य रात्रौ
करोति पुंसां मुखवासमिष्टम्॥
चूर्णं सुराकेशरकुष्ठकानां
प्रातर्दिनान्ते परिलेढि या स्त्री।
अष्टार्द्धमासेन मुखस्य वासः
कर्पूरतुल्यो भवति प्रकाशः" ॥ * ॥
केशश्मश्रुणीकरणादि।
"लोहकिट्टं जवापुष्पं पिष्ट्वा धात्रीफलं समम्।
त्रिदिनं लेपयेत् शीर्षे त्रिमासं केशरञ्जनम्" ॥
इति श्मश्रुणीकरणम् ॥ * ॥ केशश्मश्रुकीकरणम्।
"वच्चाक्षीरेण सप्ताहं अन्वहं भावयेत्तिलम्।
तत्तैलसिक्ताः केशाः स्युः श्मश्रुणश्च नात्र संशयः ॥
इति कामरत्ने ४ उपदेशः ॥* अथ वाजीकरणं
"अश्विन्यां वटवन्दाकं क्षीरैः पिष्ट्वा महाबलः।
पुष्योद्धृतं पिबेन्मूलं श्वेतार्कस्य प्रयत्नतः ॥
स्नग्राचन्तु गोक्षीरैर्द्वोऽपि तरुणायते"।
"चूर्णं विदार्य्याः स्वरसेन तस्याः
विभावितं भास्कररश्मिजाले।
मध्याह्नसंमिश्रितमेव लीढ़े-
दृश्यस्त्रियो गच्छति निर्विशङ्कः" ॥ * ॥
जन्मबन्ध्याचिकित्सा।
"समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत्।
एकवर्णगवां क्षीरैः कन्याहस्तेन पेषयेत् ॥
ऋतुकाले पिबेत् बन्ध्या पलार्द्धं तद्दिने दिने।
क्षीरशाल्यन्नमुद्गञ्च लघ्वाहारं प्रदापयेत् ॥
एवं सप्तदिनं कुर्य्यात् बन्ध्या भवति गर्भिणी।
उद्वेगं भयशोकञ्च दिवानिद्रां विवर्जयेत् ॥
न कर्म्म कारयेत् किञ्चित् वर्जयेत् सावगाहनम्।
पतिसङ्गं चरेत् सा च नात्र कार्य्या विचारणा ॥
कृष्णापराजितामूलं छागीक्षीरेण संपिबेत्।
ऋतुकाले समायाते भुक्ता गर्भधरा भवेत् ॥
गोक्षुरस्य तु बीजन्तु पिबेन्निर्गुण्डिकारसैः।
चिराद्यं सप्तरात्रं वा बन्ध्या भवति गर्भिणी" ॥
इतीन्द्रजाले जन्मबन्ध्याचिकित्सा ॥ * ॥
अथ काकबन्ध्याचिकित्सा।
"अश्वगन्धीयमूलन्तु ग्राह्येत् पुष्यभास्करे।
पेषयेन्महिषीक्षीरैः पलार्द्धं भक्षयेत् सदा ॥
सप्ताहाल्लभते गर्भं काकबन्ध्या चिरायुषम्"।
इतीन्द्रजाले काकबन्ध्याचिकित्सा ॥ * ॥
अथ मृतवत्साचिकित्सा।
"[illegible]मूलः कृत्तिकाऋक्षे बन्ध्या कर्कोटकीं हरेत्।
तत्कन्दं पेषयेत्तोयैः कर्षमात्रं सदा पिबेत् ॥
या बीजपूरद्रुममूलमेकं
क्षीरेण पक्वं प्रपिबेत् विमिश्रम्।
ऋतौ निजं या तु पतिं प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा वचा।
मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी।
उत्पलं कुमुदं शाखा काकल्यौ तन्मूलद्वयम् ॥

एतेषां कर्षकैर्भागैर्घृतप्रस्थं विपाचयेत् ।
घृतावशेषं क्षीरं घृतस्थेदं चतुर्गुणम् ॥
संपिबेन्नियतं नारी नित्यं स्त्रीषु च ग्रस्यते ।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेत् मृतम् ।
अल्पायुषञ्च जनयेत् या च कन्याः प्रसूयते ॥
योनिदोषे रजोदोषे गर्भस्रावे च ग्रस्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ॥
नाम्ना फलघृतं ह्येतदायुष्यं परिकीर्त्तितम् ।
नोक्तञ्च लक्ष्मणामूलं वदन्त्यत्र चिकित्सकाः ॥
जीववत्सा शुक्लवर्णा घृतमत्र तु दीयते ।
अरण्यगोमयेनात्र वह्निर्ज्वाला प्रदीयते" ।
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं ।
नीलं । इतीन्द्रजाले मृतवत्साचिकित्सा ॥ * ॥

अथ गर्भस्रावचिकित्सा । प्रथमे मासि ।
"गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ।
पतने तं पिबेन्नारी महागर्भः स्थिरो भवेत् ॥
अथवा मधुकं दारु शरस्तस्य बीजकम् ।
संपिष्य क्षीरकाकोलीं पिबेत् क्षीरैश्च गोभवैः ॥१॥
नीलोत्पलं मृणालञ्च षष्ठी कर्कटशृङ्गिका ।
गोक्षीरञ्च द्वितीये च पीत्वा ग्राम्यति वेदना ॥२॥
श्रीखण्डं तगरं कुष्ठं मृणालं पद्मकेशरम् ।
पिबेत् प्रीतोदकैः पिष्ट्वा तृतीये वेदनावती ॥
अथवा क्षीरकाकोलीबलागन्तापयः पिबेत् ॥३॥
प्रीतोत्पलं मृणालानि गोक्षीरक-कशेरुकम् ।
तुर्य्यमासे गवां क्षीरं पिबेत् सा वेदनापरा ॥
अथवा मधुकं राना श्यामा त्राह्मणयष्टिका ।
अनन्ता पेषयित्वा तु गवां क्षीरैः समं पिबेत् ॥४॥
पुनर्णवा च काकोली तगरं नीलमुत्पलम् ।
गोक्षीरं पञ्चमे मासि गर्भस्रोग्रहरं भवेत् ॥
अथवा रुहतीयुग्मं यष्ट्याह्वं कट्फलं त्वचः ।
गोहृतं क्षीरसंयुक्तं पिबेत् पिष्ट्वा च पञ्चमे ॥ ५ ॥
सिता काश्मर्य्यमज्जा च प्रीततोयेन पेषयेत् ।
षष्ठे मासि गवां क्षीरैः पिबेत् क्षोद्रं निवर्त्तयेत् ॥
अथवा गोक्षुरं शिग्रुं मधुकं पृश्निपर्णिकाम् ।
बलायुक्तां पिबेत् पिष्ट्वा गोदुग्धैः षष्ठमासके ॥६॥
काश्मरं पौष्करं मूलं शृङ्गाटं नीलमुत्पलम् ।
पिष्ट्वा च सप्तमे मासि क्षीरैः पीत्वा प्रशाम्यति ॥
अथवा मकरदाढ्या शृङ्गाटञ्च सकेशरम् ।
मृणालं शर्करायुक्तं क्षीरैः पेयन्तु सप्तमे ॥ ७ ॥
यष्टी पद्माह्वार्कमूलं केशरं गजपिप्पली ।
नीलोत्पलं गवां क्षीरैः पिबेदष्टममासके ॥
अथवा विल्वमूलञ्च कपित्थं रुहती शमी ।
इक्षुपाटलयोर्मूलं एभिः क्षीरं प्रसाधयेत् ।
तत्क्षीरमष्टमे पीत्वा गर्भे ग्राम्यति वेदना ॥८॥
विष्णाक्रावीजकल्कोणं मधुना सह लेपयेत् ।
वेदना नवमे मासि शान्तिमाप्नोति नान्यथा ॥
अथवा मधुकं श्यामा ह्यनन्ता क्षीरकाकली ।
एभिः सिद्धं पिबेत् क्षीरं नवमे वेदनावती ॥९॥
शर्करा गोस्तनी द्राक्षा सक्षुद्रं नीलमुत्पलम् ।
पाययेत् दशमे मासि गवां क्षीरैः प्रशान्तये ॥
अथवा शुद्धसंसिद्धं गोक्षीरं दशमे पिबेत् ।

अथवा मधुकं दारु शुद्धक्षीरेण संपिबेत् ॥१०॥
क्षौद्रं हंसं चन्दनसिन्धुजातं
महेन्द्रराजं पयसा सुपिष्टम् ।
गर्भं क्षरन्तं प्रतिहन्ति शीघ्रं
योगो विमुञ्चन् किल मूलदेवैः" ॥
इति इन्द्रजाले गर्भस्रावचिकित्सा ॥ * ॥

अथ गर्भशुष्कम् ।
"गोक्षीरं शर्करायुक्तं गर्भशुष्कप्रशान्तये ।
पिबेद्वा मधुकं चूर्णं गाम्भारीफलचूर्णकम् ॥
समांसं गव्यदुग्धेन गर्भिणी च प्रशान्तये" ॥*॥

अथ सुखप्रसवयोगः ।
"श्वेतं पुनर्णवामूलं चूर्णं योनौ प्रवेशयेत् ।
तत्क्षणात् प्रसूते नारी गर्भे सति प्रपीड़िते ॥
वासकस्य तु मूलन्तु क्षीरस्थं समुद्धरेत् ।
कन्यां बद्ध्वा सप्तसूत्रैः सुखं नारी प्रसूयते ॥
सहदेव्याश्च मूलं वा कटिस्थं प्रसवेत् सुखम् ।
अपामार्गस्य मूलन्तु ग्राहयेच्चतुरङ्गुलम् ॥
दारि प्रवेशयेत् योनौ तत्क्षणात् सा प्रसूयते" ॥*॥

अथ स्तनवर्द्धनं स्तनोत्थापनञ्च ।
"तैलं वचादार्द्धमकल्कसिद्धं
सिद्धार्थजं लेपनतो नितान्तम् ।
नारीकुचौ चारुतरौ सुपीनौ
कुर्य्यात्सदा योगवरः प्रदिष्टः ॥
श्रीपर्णिकाया रसवल्कसिद्धं
तिलोद्भवं तैलवरं प्रदिष्टम् ।
तुलेन दत्त्वोज्जयुगे प्रदेयं
प्रयाति वृद्धिं पतितोऽपि नार्य्याः ॥
प्रथमकुसुमकाले नस्ययोगेन पीतं
सनियममसरागं तद्बलाम्भो युवत्याः ।
कुचयुगलमुपीनं क्षिप्रमेव नो याति पातं
कथित इति पुरैव चक्रदत्तेन योगः" ॥*॥

अथ योनिसंस्कारः ।
"प्रक्षालयेन्निम्बकषायनीरैः
सिग्धाव्यक्षय्यागुरुगुग्गुलानां ।
धूपेन योनिं निधिं धूपयित्वा
नारी प्रमोदं विदधातु भर्त्तुः" ॥ * ॥

अथ लोमशातनम् ।
"पलाशभस्मान्वितताम्रचूर्णै-
रम्भोमिश्रैः परिलिप्य भूयः ।
कन्दर्पगेहे मृगलोचनानां
रोमाणि रोहन्ति कदापि नैव" ॥

इति इन्द्रजालतन्त्रसंग्रहः ॥ युद्धे क्षुद्रोपायविशेषः ।
इति हेमचन्द्रः ॥

इन्द्रजालिकः, त्रि, (इन्द्रजालं करोति इन्द्रजालेन दीव्यतीति वा । इन्द्रजाल + ठक् ।) कुहककारी ।
इति जटाधरः ॥ बाजीकर इति भाषा ।

इन्द्रजित्, पुं, (इन्द्रं जितवान् इति । इन्द्र + जि + क्विप् ।) रावणपुत्रः । (तत्पर्य्यायः । मेघनादः २ मन्दोदरीसुतः ३ । इति जटाधरः ॥
(अस्य जन्मविवरणं यथा, रामायणे ७।१२। सर्गे,
"एवमाकर्णदा राम ! राक्षसेन्द्रेण दानवः ।
महर्षेस्तनयं ज्ञात्वा मया दानवपुङ्गवः ॥
दातुं दुहितरं तस्मै रोचयामास तत्र वै ॥ १६ ॥
करेण तु करं तस्या ग्राहयित्वा मयस्तदा ।
प्रहसन् प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः ॥ १७ ॥
इयं ममात्मजा राजन् हेमयाप्सरसा धृता ।
कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् ॥१८॥
बाढ़मित्येव तं राम ! दशग्रीवोऽभ्यभाषत ।
प्रज्वाल्य तत्र चैवाग्निमकरोत् पाणिसङ्ग्रहम्" ॥१९॥
"ततो मन्दोदरी पुत्रं मेघनादमजीजनत् ।
स एष इन्द्रजिन्नाम युष्माभिरभिधीयते ॥ २८ ॥
जातमात्रेण हि पुरा तेन रावणसूनुना ।
रुदता सुमहान् मुक्तो नादो जलधरोपमः ॥२९॥
जड़ीकृता च सा लङ्का तस्य नादेन राघव ! ।
पिता तस्याकरोत् नाममेघनाद इति स्वयम्" ॥३०॥
अस्य यथा इन्द्रजिदित्यभिधानं जातं तदपि उक्तं तत्रैव ३५ सर्गे ।
"जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै ।
प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा ॥ १ ॥
तत्र रावणमासाद्य पुत्रभ्रातृभिरावृतम् ।
अब्रवीद् गगने तिष्ठन् सामपूर्व्वं प्रजापतिः ॥ २ ॥
वत्स रावण ! तुष्टोऽस्मि पुत्रस्य तव संयुगे ।
अहोऽस्य विक्रमौदार्य्यं तव तुल्योऽधिकोऽपि वा ॥३॥
जितं हि भवता सर्व्वं त्रैलोक्यं स्वेन तेजसा ।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि ससुतस्य ते ॥४॥
अयञ्च पुत्रोऽतिबलस्तव रावण वीर्य्यवान् ।
जगतीन्द्रजिदित्येव परिख्यातो भविष्यति ॥ ५ ॥
बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः ।
यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे" ॥६॥
महावीरो लक्ष्मणस्तु विभीषणेन वानरादिभिश्च सह निकुम्भिलां गत्वा तत्रस्थमेनमिन्द्रजितं व्यापादयामास इति तत्रैव लङ्काकाण्डे ५ सर्गमारभ्य ७ सर्गेषु उक्तम् ॥
स्वनामख्यातो दानवः । यथा हरिवंशे । ३ । ८३ ।
"इन्द्रजित् सत्यजिच्चैव वज्रनामस्तथैव च ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च" ॥)

इन्द्रजिद्विजयी, [न्] पुं, (इन्द्रजितः रावणपुत्रस्य । विजयी इति । इन्द्रजित् + वि + जि + णिनि ।) लक्ष्मणः । इति शब्दरत्नावली ॥ (अस्य विवरणन्तु रामायणे । ६ । ९१ सर्गे उक्तम् । यथा,—
"इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥ ७२ ॥
ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ।
तच्छिरः सशिरस्त्राणं श्रीमत् ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले" ॥ ९३ ॥)

इन्द्रतूलं, क्ली, (इन्द्रस्य तूलं । आकाशे उड्डीयमानत्वात् ।) आकाशप्रतिसूत्रम् । आकाशबुड़ির सुता इति भाषा । तत्पर्य्यायः । दृढसूत्रकम् २ ग्रीष्महासम् ३ वंशकफम् ४ वाततूलम् ५ मरुद्भवम् ६ । इति हारावली ॥

इन्द्रतूलकं, क्ली, (इन्द्रतूलमेव । इन्द्रतूल + स्वार्थे कन् ।) इन्द्रतूलं । इति चिकित्साशब्देभः ॥

इन्द्रदारुः, पुं, (इन्द्रस्य दारुः ।) देवदारुवृक्षः । इति भावप्रकाशः ॥ (अस्य पर्य्यायः ।

"देवदारु स्मृतं दारुभद्रं दार्व्विन्द्रदारु च ।
मस्तदारुकिलिमं क्षचिमं सुरभूरुहः" ॥)

इन्द्रद्रुः, पुं, (इन्द्रस्य द्रुर्वृक्षः ।) अर्জ্জুनवृक्षः । इत्यमरः । कुटजवृक्षः । इति राजनिर्घण्टः ॥

इन्द्रद्रुमः, पुं, (इन्द्रस्य द्रुमो वृक्षः ।) अर्জ্জुनवृक्षः । इति शब्दरत्नावली ॥

इन्द्रनीलः, पुं, (इन्द्रवत् नीलः ।) मरकतमणिः । इति हेमचन्द्रः ॥ पान्ना इति भाषा । (अस्य परीक्षा यथा, चिन्तामणिधृतवचनम् ।

"क्षीरमध्ये क्षिपेत् नीरं क्षीरक्षेत् नीलतां व्रजेत् ।
इन्द्रनीलमितिख्यातं तदाहि रत्नकोविदैः" ॥

"क्वचित् प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा" ॥

इति रघुवंशे । १३।५४ । यथा, भावप्रकाशः ॥ अथ इन्द्रनीलगोमेदयोर्नामानि ।

"नीलान्तश्चेन्द्रनीलश्च गोमेदः पीतरत्नकम्" ।)

इन्द्रनीलकः, पुं, (इन्द्रनील + स्वार्थे कन् ।) मरकतमणिः । इति शब्दरत्नावली ॥

इन्द्रपुष्पा, स्त्री, (इन्द्रनीलवत् पुष्पं यस्याः ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ विषलाङ्गला इति ख्याता । (लाङ्गलिकीशब्देऽस्या विवरणं द्रष्टव्यं ।)

इन्द्रपुष्पिका, स्त्री, (इन्द्रपुष्पैव । कन् ।) कलिकारी । इति राजनिर्घण्टः ॥ विषलाङ्गला इति भाषा ।

इन्द्रप्रस्थं, क्ली, (इन्द्रस्य इन्द्रनीलस्य प्रस्थम् इव ।) राजयुधिष्ठिरनिर्म्मितनगरम् । अधुना दिल्ली इति ख्यातम् । (यथा, महाभारते १ । २०८ । २८ ।

"ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ।
नगरं याययामासुर्दैपायनपुरोगमाः ॥
सागरप्रतिरूपाभिः परिखाभिरलङ्कृतं" ॥
"तत्त्रिपिष्टपसङ्काशं इन्द्रप्रस्थं व्यरोचत ।
मेघवृन्दमिवाकाशे विद्युत्समावृतम्" ॥)

इन्द्रप्रहरणं, क्ली, (इन्द्रस्य प्रहरणम् ।) इन्द्रास्त्रम् । वज्रम् । इति हलायुधः ॥

इन्द्रभेषजं, क्ली, (इन्द्रं महत् भेषजम् ।) शुण्ठी । इति शब्दरत्नावली ॥

इन्द्रमहकामुकः, पुं, (इन्द्रमहं कामयते इति । इन्द्रमह + काम + उकञ् ।) कुक्कुरः । इति चिकाण्डशेषः ॥

इन्द्रयवः, पुं, क्ली, (इन्द्रस्य इन्द्रवृक्षस्य यवः यवाकारबीजत्वात् तथात्वम्) खनामख्यातिक्षबीजविशेषः । तत्पर्य्यायः । कलिङ्गम् २ भद्रयवम् ३ । इत्यमरः ॥ शक्राङ्गः ४ शक्रबीजम् ५ वत्सकः ६ वत्सकबीजम् ७ भद्रजः ८ कुटजः ९ कुटजबीजम् १० कलिङ्गबीजम् ११ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । कफवातरक्तपित्तहरत्वम् । दाहातिसारश्रमनत्वम् । ज्वरदोषशूलमूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ कुड़चिर बिचि इति भाषा । यथा,—

"उक्तं कुटजबीजन्तु यवमिन्द्रयवं तथा ।
कलिङ्गश्चापि कालिङ्गं तथा भद्रयवं स्मृतम्" ॥

इति क्लीबे अमरः प्राह ।

"क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ।
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि" ॥

इति धन्वन्तरिः प्राह ।

"ऐन्द्रं यवं चिदोषघ्नं संग्राहि कटु शीतलम् ।
ज्वरातीसाररक्तार्शःकृमिविसर्पकुष्ठनुत् ॥
दीपनं गुदकीलाखवातास्रश्लेष्मशूलजित्" ।
इति भावप्रकाशः ॥ (यथा, वैद्यकद्रव्यगुणः ।
"तद्बीजं ज्वरजित्तिक्तं रक्तपित्तातिसारजित्" ।)

इन्द्रलुप्तं, क्ली, (इन्द्राणां इन्द्रनीलवर्णकेशानां लुप्तं लोपो यस्मात् ।) केशरोगविशेषः । टाक इति भाषा । तस्य लक्षणम् ।

"रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रधावयति रोमाणि ततः श्लेष्मा सशोणितः ॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः ।
तदिन्द्रलुप्तं खालत्यं रूढ्येति च विभाव्यते" ॥
इति निदानम् ॥ खालत्यं रूढ्येति च तस्य पर्य्यायकथनम् । तथाच भोजः ।

"तदिन्द्रलुप्तमित्याहुः खल्वीं रूढ्याञ्च केचन" ।
कार्त्तिकस्त्वाह । "इन्द्रलुप्तं श्मश्रुशिरोभवति खालत्यं शिरोरुहेष्वेव रूढ्या सवेदनेति आगमस्तत्र नास्ति" ॥
इति तट्टीका ॥ अथेन्द्रलुप्तस्य चिकित्सा ।

"तिक्तपटोलीपत्रखरसैर्हृष्टा भ्रमं याति ।
चिरकालजापि रूढ्या नियतं दिवसत्रयेणैव ॥
गोवृषरक्तिलपुष्पाणि तुल्यञ्च मधुसर्पिषः ।
शिरः प्रलेपितं तेन केशैः समुपचीयते ॥
हस्तिदन्तमसीं कृत्वा काकोदुम्बरसाङ्गनः ।
लोमान्यनेन जायन्ते लेपात् पाण्डितलेष्वपि ॥
यष्टीन्दीवरमद्दीकातैलाज्यक्षीरलेपनैः ।
इन्द्रलुप्तं भ्रमं याति केशा स्युश्च घना दृढाः ॥
जातीकरञ्जवरुणकरवीराम्रिपाचितम् ।
तैलमभ्यञ्जनाद्धन्ति इन्द्रलुप्तं न संशयः ॥
स्नुहीपयः पयोऽर्कस्य काकोलीमार्कवो विषम् ।
अजामूत्रं सगोमूत्रं रक्तिका श्वेन्द्रवारुणी ॥
सिद्धार्थकस्तीक्ष्णगन्धा सम्यगेभिर्विपाचितम् ।
तैलं भवति नियमात् खालित्यव्याधिनाशनम् ॥
स्नुहीदुग्धादितैलम्" । इति भावप्रकाशः ॥
("केशघ्नस्य चिकित्सान्तु ब्रूहि हारीत ! साम्प्रतम् ।
रूक्षं सपाण्डुरं वातात् पित्तात्रक्तं सदाहकम् ॥
कण्डान्वितं भवेत् स्निग्धं रक्तात्पाकं व्रजन्ति तत् ।
सन्निपातेन सदृशं जायते सर्व्वलक्षणम्" ॥

अस्य चिकित्सा यथा ॥*॥

"गुडेन सुरसा शुण्ठी मातुलुङ्गरसेन तु ।
केशघ्ने वातसम्भूते धावनञ्च प्रशस्यते ॥ १ ॥
त्रिफलाञ्च वचां शुण्ठीं गुडेनापि प्रपेषितम् ।
धावनं कफसम्भूते चेन्द्रलुप्ते प्रशस्यते ॥ २ ॥
पैत्तिके च स्थितं दुग्धं नवनीतान्वितन्तथा ।
सिताग्निशिफलं यष्टी पैत्तिके धावनं मतम् ॥ ३ ॥
भृङ्गराजरसं ग्राह्यं भृङ्गवेररसन्तथा ।
सौवीरकरसेनापि तिलान् पिष्ट्वा प्रलेपनम् ॥
पश्चात् कार्य्यं पूरयेत्र स्नानमुष्णेन वारिणा ।
धवार्জ্জुनकदम्बस्य शिरीषमपि रोहितम् ॥
क्वाथमेषां शिरोदद्रून् भ्रमयेदिन्द्रलुप्तकम् ।
कुरुवकस्य पुष्पेण जपायाः कुसुमेन च ॥
घृतस्य चेन्द्रलुप्तस्य घृतमेव निवारणम् ।
पैत्तिकानि च लिङ्गानि दृष्ट्वा दुग्धेन धावनम् ॥
शीतलानि प्रदेयानि पैत्तिकेन विधीयते" ॥

"धुस्तूरपत्राणि च मागधीनां
निशा विशालागृहधूमकुठम् ।
घृतेन युक्तञ्च जलेन पिष्टं
शिरःप्रलेपे क्षतवारणं स्यात् ॥
पित्ते क्षते दोषयुते च रोगे
पटोलपत्रं पिचुमर्द्दकं वा ।
तथामलक्या फलमेव पिष्ट्वा
घृतेन खण्डेन प्रलेपनञ्च ॥
निवार्य्यते मस्तकजं क्षतञ्च
शिरोर्त्तिसङ्घान् विनिहन्ति चैतत् ।
गजेन्द्रदन्तस्य मसीं गृहीत्वा
प्रलेपनं वा नवनीतकेन ॥
तिलार्कभल्लातकदग्धमाष-
क्षारस्य लेपो नवनीतकेन ।
सर्षस्य क्षारस्य तथा प्रयोगः
खल्लाटके केशचयं करोति" ॥

इति हारीतः ॥

"तेजोऽनिलाद्यैः सह केशभूमिम्
दग्ध्वाशु कुर्य्यात् खलतिन्नरस्य" ॥ * ॥

चिकित्सा यथा चरके ।

"खालत्ये पलिते वल्यां हरिल्लोम्नि च शोधितम् ।
नस्यैस्तैलैः शिरोवक्त्रप्रलेपैश्चाप्युपाचरेत् ॥
सिद्धं विदारीगन्धाद्यैर्जीवनीयैरथापि च ।
नस्यं स्यादथ्युतैलं वा खालत्यपलितापहम्" ॥)

इन्द्रलुप्तः, पुं, (इन्द्राणां इन्द्रनीलवत् केशानां लुप्तं नाशो यस्मात् ।) केशनाशकरोगः । तत्पर्य्यायः । इन्द्रलुप्तकः २ केशघ्नः ३ । इति राजनिर्घण्टः ॥

इन्द्रलुप्तकं, क्ली, (इन्द्रलुप्त + स्वार्थे कन् ।) इन्द्रलुप्तरोगः । इति भूरिप्रयोगो जटाधरहेमचन्द्रौ च ॥

इन्द्रवारुणिका, स्त्री, (इन्द्रवारुणी + कन् + टाप् ।) इन्द्रवारुणीलता । इति शब्दचन्द्रिका ॥

इन्द्रवारुणी, स्त्री, (इन्द्रं वारयति । इन्द्र + वृ + णिच् + उन् । ङीप्) लताविशेषः । राखाल ससा इति भाषा ॥ तत्पर्य्यायः । विशाला २ । इत्यमरः ॥ ऐन्द्री ३ चित्रा ४ गवाक्षी ५ गजचिर्भटा ६ मृगेर्व्वारु ७ पिटङ्गीका ८ मृगादनी ९ । इति रत्नमाला ॥ इन्द्रा १० अरुणा ११ गवादनी १२ क्षुद्रसहा १३ इन्द्रचिर्भटी १४ सूर्य्या १५ विषघ्नी १६ गवाक्षिणिका १७ अमरा १८ माता १९ सुकर्णी २० सुफला २१ तारका २२ वृषभाक्षी २३ पीतपुष्पा २४ इन्द्रवल्लरी २५ हेमपुष्पी २६ क्षुद्रफला २७ वारुणी २८ बालकप्रिया २९ रक्तैर्व्वारुः ३० विषघ्नता ३१ शक्रवल्ली ३२ विषापहा ३३ अमृता ३४ विषवल्ली ३५ । चित्रफला ३६ । इति जटाधरः ॥ अपि च ।

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ॥
श्वेतपुष्पा मृगाक्षी च मृगैर्व्वारुर्मृगादनी ।
गवादनीद्वयं तिक्तं पाके कटुरसं लघु ॥
वीर्य्योष्णं कामलापित्तकफश्लीपदरापहम् ।

श्वासकासग्रहं कुष्ठगुल्मयक्ष्मिव्रणप्रणुत् ॥
प्रमेहमूढ़गर्भाग्निमान्द्यामयविषापहम्"।
इति भावप्रकाशः॥ अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतत्वम्। रेचनत्वम्। गुल्मपित्तोदरश्लेष्मकृमिकुष्ठज्वरापहत्वञ्च॥ इति राजनिर्घण्टः॥

इन्द्रवृद्धा, स्त्री, (इन्द्रेण इन्द्रियजनितदोषेण वृद्धा। यद्वा इन्द्रः श्रेष्ठोऽपि वृद्धः क्षयो भवति यस्याः।) व्रणरोगविशेषः। तस्य लक्षणम्।
"पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम्।
इन्द्रवृद्धान्तु तां विद्यादातपित्तोत्थितां भिषक्"॥
इति निदानम्॥ तस्याश्चिकित्सा।
विरुक्तास्नस्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम्।
पैत्तिकस्य विसर्पस्य क्रियया साधयेत् भिषक्।
पाके तु शोधयेदाव्यपक्वैर्मधुरभेषजैः"॥
इति भावप्रकाशः॥
("या पद्मकर्णिकाकारा पिटिका पिटिकान्विता।
सा विद्धा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी"॥)

इन्द्रवृक्षः, पुं, (इन्द्रस्य वृक्षः।) देवदारु। इति जटाधरः॥ (देवदारुशब्देऽस्य गुणादयो ज्ञातव्याः॥)

इन्द्रसावर्णिः, पुं, चतुर्दशमनुः। अस्मिन् मन्वन्तरे बृहद्भानुरवतारः। शुचिरिन्द्रः। पवित्रचाक्षुषादयो देवाः। अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। उरुगम्भीरबुद्ध्याद्या मनुपुत्रा भविष्यन्ति॥ इति श्रीभागवतम्॥ (अयं हि भौत्यनाम्ना चाख्यातः। यथा, विष्णुपुराणे ३। २।
"भौत्यश्चतुर्दशश्चात्र मैत्रेय भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च गृहाण्व तान्। ४०।
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिरस्तथा।
वरीयाद्याश्च वै देवाः सप्तर्षीनपि मे शृणु। ४१।
अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च।
युक्तस्तथाजितस्त्वन्यो मनुपुत्रानतः शृणु। ४२।
उरुगम्भीरबुद्ध्याद्या मनोरस्य सुता नृपाः"।४३।
मार्कण्डेयपुराणेऽपि १०० अध्याये उक्तरूपेण वर्णितम्। अधुना तु सप्तममन्वन्तरस्याष्टाविंशतितमं युगं।)

इन्द्रसुतः, पुं, (इन्द्रस्य सुतः।) वालिनामवानरराजः। इति हेमचन्द्रः। अर्জ্জুनवृक्षः। इति राजनिर्घण्टः। जयन्तः। अर्জ্জুनः॥

इन्द्रसुरसः, पुं, (इन्द्रः इन्द्रवृक्ष इव सुरसः सुपत्ररसः।) सिन्दुवारवृक्षः। इत्यमरः॥ निसिन्दा इति ख्यातः। (सिन्दुवारशब्दे निर्गुण्डीशब्दे च अस्य गुणादयो ज्ञेयाः॥)

इन्द्रसुरिसः, पुं, वृक्षविशेषः। निसिन्दा इति भाषा। तत्पर्य्यायः। इन्द्राणी २ निर्गुण्डी ३ सुरसा ४। इति रत्नमाला॥ इन्द्रसुरसः ५ सिन्दुवारः ६ इन्द्राणिका ७। इत्यमरः॥ विसुन्धकः ८ सिन्धकं ९ सुरसः १० सिन्धुवारितः ११ इन्द्रालिका १२ सिन्धुवारकः १३। इति शब्दरत्नावली॥ (इन्द्राणीशब्दे ऽस्य विशेषो ज्ञेयः।)

इन्द्रा, स्त्री, (इदि + रन्।) पक्षिजम्भकवृक्षः। इति मेदिनी॥ काँटा जामीर इति भाषा। इन्द्रपत्नी। शची। इति शब्दरत्नावली॥

इन्द्राग्निधूमः, पुं, (इन्द्राग्नेर्मेघवह्नेर्धूम इव।) हिमं। इति हारावली॥

इन्द्राणिका, स्त्री, (इन्द्राणी + कन्।) इन्द्रसुरिसवृक्षः। इत्यमरः॥

इन्द्राणी, स्त्री, (इन्द्रस्य ऐश्वर्य्यशालिनः सुरराजस्य वा पत्नी। इन्द्र + इन्द्रवरुणेति ङीष् आनुक् च।) दुर्गा। यथा,—
"ऐश्वर्यं परमं यस्या वपुषे चैव सुरासुराः।
इदि परमैश्वर्ये च इन्द्राणी तेन सा शिवा"॥
इति देवीपुराणे ४५ अध्यायः॥* इन्द्रभार्य्या। तत्पर्य्यायः। पुलोमजा २ शची ३। इत्यमरः॥ पौलोमी ४। इति मेदिनी॥ यूतव्रतायी ५। इति जटाधरः॥ माहेन्द्री ६ जयवाहिनी ७ ऐन्द्री ८ श्रुतावरी ९। इति शब्दरत्नावली॥
("यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा"।
इति भविष्यपुराणे षट्पञ्चभीव्रतकथायाम्। इन्द्रशक्तिः। यथा ऋग्वेदे १।२२।१२। "इहेन्द्राणीमुपह्वये वरुणानीं"। "इन्द्राणीं इन्द्रस्य सूर्य्यस्य वायोर्वा शक्तिम्"। इति दयानन्दसरस्वतीकृतभाष्यम्।) इन्द्रसुरिसवृक्षः। स्त्रीणां करणं। इति मेदिनी॥ नीलसिन्दुवारवृक्षः। स्थूलैला। सूक्ष्मैला। इति राजनिर्घण्टः॥ अष्टमाष्टकान्तर्गतमाष्टकाविशेषः॥ इति स्मृतिः॥

इन्द्रानुजः, पुं, (अनु पश्चात् जायते इति अनुजः कनिष्ठः। इन्द्रस्यानुजः। विष्णुः खलु कश्यपात् अदितौ वामनरूपेण इन्द्रस्य पश्चात् जातः।) विष्णुः। इति हेमचन्द्रः। (विस्तरो वामनशब्दे द्रष्टव्यः।)

इन्द्रायुधं, क्ली, (इन्द्रस्यायुधमिव चापाकृतित्वात्।) इन्द्रधनुः। इत्यमरः॥ रामधनुक गाछी इत्यादि भाषा।
("स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम्"।
इति रघुवंशे।१२।७९। तथा, मनुः। ४।५९।
"न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्धर्षणेदबुधः"।)

इन्द्रारिः, पुं, (इन्द्रस्य अरिः शत्रुः।) असुरः। इत्यमरः॥

इन्द्रावरजः, पुं, (इन्द्रस्य अवरजः वामनरूपेण अनुजः।) विष्णुः। इत्यमरः॥

इन्द्राशनः, पुं, (इन्द्रस्य अशनः खाद्यद्रव्यम्।) संविदावृक्षः। इति शब्दमाला॥ सिज्जि इति भाषा। गुम्मा। इति हारावली॥ कुच इति भाषा।
("इन्द्राग्निकेन्द्राशनकञ्च"।
"तथाचेन्द्राशनोत्कटैः"।
"ग्रीष्मसुन्दरमण्डूकी जयन्तीन्द्राशनस्य च"॥
इति वैद्यकरत्नसारसंग्रहः॥)

इन्द्रियं, क्ली, (इन्द्रस्यात्मनोलिङ्गमनुमापकम्। इन्द्रेण ईश्वरेण सृष्टं। इन्द्रेणात्मना मम चक्षुर्मम श्रोत्रमित्यादि क्रमेण ज्ञातं। इन्द्रेण जुष्टं वा इत्याद्यर्थेषु इन्द्रशब्दात् निपातनात् घच्।) ज्ञानकर्म्मसाधनम्। तत्पर्य्यायः। हृषीकम् २ विषयि ३। इत्यमरः॥ अक्षम् ४ करणम् ५ ग्रहणम् ६। इति राजनिर्घण्टः॥ तत्र तु ज्ञानेन्द्रियाणि पञ्च। यथा। कर्णः १ त्वक् २ चक्षुः ३ जिह्वा ४ नासिका ५ कर्म्मेन्द्रियाणि पञ्च यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। अन्तरिन्द्रियाणि चत्वारि। मनः १ बुद्धिः २ अहङ्कारः ३ चित्तं ४॥ मनस्तावदिन्द्रियाणां नियामकम्। चतुर्दश देवाः चतुर्दशेन्द्रियनियन्तारः। तत्र श्रोत्रस्य देवता दिक्। त्वचो वातः। चक्षुषः सूर्य्यः। रसनायाः प्रचेताः घ्राणस्याश्विनौ। वाचो वह्निः। हस्तस्य इन्द्रः। पादस्य विष्णुः। पायोर्मित्रः। उपस्थस्य प्रजापतिः। मनसश्चन्द्रः। बुद्धेश्चतुर्मुखः। अहङ्कारस्य शङ्करः। चित्तस्याच्युतः। इति वेदान्तः॥ न्यायमते। एथिव्या इन्द्रियं घ्राणं। जलस्य जिह्वा। तेजसश्चक्षुः। वायोस्त्वक्। आकाशस्य कर्णः। (अथ बुद्धेर्ब्रह्मा। अहङ्कारस्येश्वरः। मनसश्चन्द्रमाः। दिशः श्रोत्रम्। त्वचो वायुः। सूर्य्यश्चक्षुषोः। रसनस्यापः। एथिवी घ्राणस्य। वचसोऽग्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः। पायोर्मित्रं। प्रजापतिरुपस्थस्येति। इति सुश्रुतः॥) (यथा, मनुः। २। ८८। "इन्द्रियाणां विचरतां विषयेष्वपहारिषु"।
विज्ञानम्। यथा, ऋग्वेदे १।१११।२।
"यथा त्वयाम सर्व्ववीरया विशातन्तः शर्द्धाय धासथास्त्रिंशयम्"। "इन्द्रियं विज्ञानम्" इति दयानन्दभाष्यम्।) शुक्रम्। वीर्य्यम्। इत्यमरः॥

इन्द्रियक्षयः, पुं, (इन्द्रियस्य क्षयः सम्यक् निरोधः।) प्रलयः। इति राजनिर्घण्टः॥

इन्द्रियायतनं, क्ली, (इन्द्रियाणां आयतनमाश्रयस्थानम्।) शरीरम्। इति हेमचन्द्रः॥

इन्द्रियार्थः, पुं, (इन्द्रियाणामर्थः।) इन्द्रियजन्यज्ञानविषयः। यथा। रूपं। शब्दः। गन्धः। रसः। स्पर्शः। तत्पर्य्यायः। विषयः २ गोचरः ३। इत्यमरः॥ (यथा, मनुः। ४। १६।
"इन्द्रियार्थेषु सर्व्वेषु न प्रसज्येत कामतः"।
"अपि स्वदेहात् किमुतेन्द्रियार्थात्
यशोधनानां हि यशो गरीयः"।
इति रघुः।१४।३५।)

इन्द्रेज्यः, पुं, (इन्द्रस्य इज्यः।) बृहस्पतिः। इति शब्दरत्नावली॥

इन्ध ई ध ङ ञि द्युतौ। इति कविकल्पद्रुमः॥ (सधां-आत्मं-अकं-सेट्।) क्र्यादिः। ई ञि इन्धोऽस्ति। ङ ध इन्धे। इति दुर्गादासः॥

इन्धनं, क्ली, (इन्धे दीप्यतेऽग्निरनेन। इन्ध + करणे + ल्युट्।) अग्निसन्दीपनदारुकाष्ठादि। जालानी काठ इति भाषा। तत्पर्य्यायः। इध्मम् २ एधः ३ समित् ४ एधम् ५। इत्यमरः॥ समिन्धनम् ६। इति शब्दरत्नावली॥ (यथा, मनुः। ७। ११८। "अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्"।)

इन्धकाः, स्त्री, (इन्धवाः। मृगशिरोनक्षत्रोपरिस्थितपञ्चतारा। इत्यमरटीकायां स्वामी॥

इभः, पुं, स्त्री, (इति गच्छतीति। इण भन्।) औणादिकोऽयं प्रत्ययः।) हस्ती।
("खराश्वोष्ट्रगवैभानामजाविकवधस्तथा"।
इति मनुः। ११।६८। यथा, उत्तरचरिते।

"इभदलितविकीर्णगजिनिष्यन्दगन्धः" ।)
उत्तरपदे श्रेष्ठवाचकः । इत्यमरः ॥

इभकणा, स्त्री, (इभो हस्तीव कणा ।) गजपिप्पली । इति रत्नमाला ॥ ("कर्पूरं जातिकोषं सजलमिभकणा तेजपत्रं लवङ्गम्" । इति वैद्यकरसेन्द्रसारसंग्रहः ।)

इभदन्ता, स्त्री (इभस्य दन्त इव । इभदन्त + टाप् ।) नागदन्तीवृक्षः । इति रत्नमाला ॥ (नागदन्ती-शब्दे ऽस्या गुणादयो ज्ञेयाः ।)

इभनिमीलिका, स्त्री, (इभस्य हस्तिन इव निमीलिका ।) वैदग्धी । भङ्गिः । इति चिकाण्डशेषः ॥

इभपालकः, पुं, (इभानां पालकः ।) हस्तिपकः । इति हेमचन्द्रः ॥ माऊत इति भाषा ।

इभमाचलः, पुं, (इभमाचालयति । इभ + आङ् + चल + णिच् + बाहुलकात् ख ।) सिंहः । इति भूरिप्रयोगः ॥

इभया, स्त्री, (इभ + घा + क + टाप् ।) स्वर्णक्षीरीवृक्षः । इति रत्नमाला ॥

इभाख्यः, पुं, (इभस्य आख्या यस्मिन् ।) नागकेशरवृक्षः । इति चिकाण्डशेषः ॥

इभोषणा, स्त्री, इभकणा । गजपिप्पली । इति शब्दचन्द्रिका ॥ (गजपिप्पलीशब्देऽस्या विवरणम् ज्ञेयम् ।)

इभ्यः, त्रि, (इभमर्हतीति दण्डादित्वात् यत् ।) धनवान् । इत्यमरः ॥ (पुं, राजा । हस्तिपकः ।) (यथा छान्दोग्योपनिषदि १।१०। "उषस्तिर्ह चाक्रायण इभ्ययामे प्रद्राणक उवास। सहेभ्यम् कुल्माषाग्वखादन्तं बिभित्ते" ।)

इभ्या, स्त्री, हस्तिनी । शल्लकी । इति मेदिनी ॥

इयं, स्त्री, इदम् शब्दस्य स्त्रीलिङ्गे प्रथमायां रूपं । यह स्त्री इति भाषा । इति व्याकरणम् ॥

इयत्, त्रि, (इदम् परिमाणमस्य । इदम् + वतुप् वस्य यः ।) कियत्संख्यावोधकम् । इतिव्याकरणम् ॥ एतो इति भाषा । (यथा, रघुवंशे । १३।६७।

"इयन्ति वर्षाणि तया सहोग्र-
मभ्यस्यतीव व्रतमासिधारम्" ।)

इयत्ता, स्त्री, (इयत् + तल् ।) इयतो भावः । सीमा । परिमाणम् । सङ्ख्या । इत्यादि ॥ ("अमेय तदप्रमेया वा न गुणानामियत्तया" । इति रघुवंशे । १० । ३२ ।)

इरं, त्रि, ईरणं । शून्यं । ऊषरभूमिः । इत्यमरटीकायां रमानाथः ॥

इरम्मदः, पुं, (इरया उदकेन माद्यति दीप्यते अविन्यत्वात् इति उपसर्गस्येरम्मदेत्यादिना खशुप्रत्ययो मुमागमश्च निपातितः ।) वह्निः । तत्पर्य्यायः । मेघद्योतिः २ । इत्यमरः ॥ मेघाग्निः ३ । इति जटाधरः ॥ अन्योन्यसङ्घट्टनेन मेघाग्निःस्वत्य यज्ज्योतिर्दृष्टादौ पतति सः । मेघेष्वपलक्षणं वातजाग्निरपि । इति भरतः ॥

इरा, स्त्री, (इं कामं राति ददाति इति । इ + रा + क । यद्वा इतीति इ + रन् + टाप् निपातनात् गुणाभावः ।) भूमिः । वाक्यम् । मद्यम् । जलम् । इत्यमरः ॥ (यथा, आश्वलायनगृह्यसूत्रे । २।६।

"इरां वहन्तो घृतमुत्तमाणा
मित्रेण साकं सह संविशन्तु" ।)

सरस्वती । इति शब्दरत्नावली ॥ (अन्नम् ।)
कश्यपपत्नीविशेषः ।
यथा, गारुडे ६ अध्यायः ॥
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् ।
अदितिर्दितिर्दनुः काला अमायुः सिंहिका मुनिः ।
कद्रुः प्राधा इरा क्रोधा विनता सुरभिः खशा" ।
तस्याः वंशविवरणं यथा ।
"इरा वृक्षलता वल्ली दूर्वाजातिश्च सर्व्वगुः ।
खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा" ।
(दैत्यविशेषः । यथा, हरिवंशे । ३ । ८२ ।
"मरीचिर्गन्धर्वांश्चैव इरा शङ्खशिरा वृकः" ।)

इराचरं, क्ली, (इरायां चरतीति । इरा + चर् + ट ।) करका । इति चिकाण्डशेषः ॥ वृष्टिर ओल इति भाषा । जलचरे भूचरे च त्रि ॥

इराजः, पुं, (इरया मद्येन जायते इति । इरा + जन् + ड ।) कन्दर्पः । इति हलायुधः ॥

इरावती, स्त्री, (इरा विद्यतेऽस्या इति । इरा + मतुप् ।) वटपत्रीवृक्षः । पाषाणभेदीविशेषः । इति राजनिर्घण्टः ॥ (नदीभेदः । यथा, महाभारते ।
"विपाशा च शतद्रुश्च चन्द्रभागा सरस्वती ।
इरावती वितस्ता च सिन्धुर्देवनदी तथा" ॥

इरिणं, क्ली, (ऋच्छतीति । ऋ गतिप्रापणयोः, किदिच्चेति इनन् ।) शून्यम् । ऊषरभूमिः । इत्यजयः ॥ (यथा, मनुः । ३ । १४२ ।)
"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्" ।)

इरिमेदः, पुं, (इरिणो हस्तिनो मेद इव मेदो यस्य ।) अरिमेदः । विट्खदिरः । इति शब्दरत्नावली राजनिर्घण्टश्च ॥
("इरिमेदो विट्खदिरः कालस्कन्धो ऽरिमेदकः" । इति पर्य्यायः । अस्य गुणा यथा भावप्रकाशे ।
"अरिमेदः कषायोष्णो मुखदन्तगदापहः ।
हन्ति कण्डूविषस्फोटकुष्ठविषव्रणान्" ॥)

इरिवेल्लिका, स्त्री, मस्तकोद्भववमजन्यपीड़ाविशेषः । तस्य लक्षणम् ।
"पिड़कामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् ।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम्" ॥
इति निदानम् ॥ चिकित्सा यथा ।
"पैत्तिकस्य विसर्पस्य या चिकित्सा प्रकीर्त्तिता ।
तयैव भिषगेतांश्च चिकित्सेदिरिवेल्लिकाम्" ॥
इति भावप्रकाशः ॥ (तथा च वाभटः ।
"चिल्लिका पिटिका वृत्ता जत्रूर्द्ध्वमिरिवेल्लिका" ।
"इरिवेल्लिकां गन्धगामां जयेत्पित्तविसर्पवत्" ।
इति वैद्यकचक्रपाणिसंग्रहे ।)

इरेशः, पुं, (इरायाः ईशः ।) विष्णुः । इति शब्दरत्नावली ॥ राजा । वागीशः । वरुणः ॥

इर्व्वारुः, पुं, स्त्री, (उर्व्व + आरच् । एषोदरादित्वात् साधुः ।) कर्कटी । इत्यमरः ॥ काँकुड़ इति भाषा । अस्य गुणाः । स्वादुत्वम् । गुरुत्वं । अजीर्णकारित्वम् । शीतलत्वञ्च । तत्फलगुणाः । दाहच्छर्दिष्णाक्लान्तिनाशित्वम् । इति राजवल्लभः ॥ (कर्कटीशब्देऽस्य विशेषो ज्ञातव्यः ।)

इर्व्वारुशुक्तिका, स्त्री, (इर्व्वारुः शुक्तिकेव स्वयं स्फोटनात् ।) इर्व्वारुविशेषः । इति हारावली ॥ फुटी इति भाषा ।

इर्व्वालुः, पुं, (इर्व्व + आरच् । रलयोरैक्यात् ।) इर्व्वारुः । इत्यमरटीकायां रायमुकुटः ॥

इल, शू शये, गतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-शयने, अकं-सेट् ।) शू इलति । शयः शयनं । इति दुर्गादासः ॥

इल, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) कृखादिः । क एलयति । इति दुर्गादासः ॥

इलविला, स्त्री, कुबेरमाता । सा च विश्रवःपत्नी । इति पुराणम् ॥

इला, स्त्री, (इलति विष्णुवरात् पुंस्त्वं प्राप्नोति इति । इल + क + टाप् ।) वैवस्वतमनुकन्या । सा च विष्णुवरात् पुंस्त्वं प्राप्य सुद्युम्ननाम्ना ख्याता। पश्चात् शङ्करशप्तकुमारवनं प्रविश्य पुनः स्त्रीत्वं गता । बुधस्तां भार्य्यात्वेन स्वीकृत्य पुरूरवसं जनयामास । ततस्तस्याः पुरोहितो वशिष्ठः शङ्करमाराध्य तस्यै मासं स्त्रीत्वं मासं पुंस्त्वं दत्तवान् इति श्रीभागवतं ॥ कर्द्दमप्रजापतिपुत्र इलः कार्त्तिकेयजन्मदेशं प्रविश्य स्त्री भूत्वा इलानाम्ना ख्यातः ततः पार्व्वतीमाराध्य मासं स्त्रीत्वं मासं पुंस्त्वञ्च प्राप्तवान् । इति रामायणं । पृथिवी । गौः । वाक्यं । इति मेदिनी ॥

इलावृतं, क्ली, (इलया आवृतं ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति चिकाण्डशेषः । तच्च सुमेरुपर्व्वतं संवेष्ट्यास्ते । तस्य सीमा उत्तरे नीलपर्व्वतः । दक्षिणे निषधः । पश्चिमे माल्यवान् । पूर्व्वे गन्धमादनपर्व्वतः । इति श्रीभागवतम् ॥ अग्नीध्रस्य स्वनामख्यातः पुत्रः स तु पितुः सकाशात् इलावृतं नाम वर्षमलभत । यदुक्तं विष्णुपुराणे । २ । १ । १६, १७, १८ ।
"जम्बुद्वीपेश्वरो यस्तु अग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्षं इलावृतः ।
रम्यो हिरण्वान् भद्राश्च कुरुर्भद्राश्व एव च ॥
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत्" ॥)

इलिका, स्त्री, (इला एव । इला + स्वार्थे कन् + टाप् ।) पृथिवी । इति शब्दरत्नावली ॥

इली, स्त्री, (इल गतौ क्षेपणे च इति, ह्रस्वादिकारादिति वा ङीष् ।) ईली । करपालिका । इत्यमरटीकायां रायमुकुटः ॥ हातकुरि इति भाषा ।

इलीशः, पुं, (इलन्ति अधुद्रुतं गच्छन्ति इति इला द्रुतगामिनो मत्स्याः । इल + क । तेषां ईशः ।) स्वनामख्यातमत्स्यविशेषः । इति शब्दरत्नावली ॥ ("इलीशो जितपीयूषो वाचा वाचामगोचरा ।
रोहितो नो हितः प्रोक्तो मधुरो मधुरोः प्रियः" ॥ इत्युद्भटः ।
"इलीशो मधुरः स्निग्धः पित्तश्लेष्माग्निमान्द्यनुत्" ।
इति वैद्यकरत्नगुणः ॥)

इल्वलः, पुं, पक्षिविशेषः। इति शब्दचन्द्रिका॥
इल्लिशः, पुं, इलीशमत्स्यः। तत्पर्य्यायः। वारिकर्पूरः २ गाङ्गेयः ३ शफराधिपः ४ जलतालः ५। इति चिकाखड्गेषः॥ इलीशः ६ राजशफरः ७ इल्लीश. ८ जलतापी ९। इति शब्दरत्नावली॥ अस्य गुणाः। पित्तश्लेष्मानिलद्विकारित्वम्। मधुरत्वम्। हृद्यत्वञ्च। इति राजवल्लभराजनिर्घण्टौ॥ "इल्लिशो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः। पित्तकृत् कफकृत् किञ्चित् लघुर्वृष्योऽनिलापहः"॥ इति भावप्रकाशः॥
इल्वकाः, स्त्री, इल्वलाः। नित्यबहुवचनान्तशब्दोऽयं। इति भरतो द्विरूपकोषश्च॥
इल्वलः, पुं, (इल्+वलच्। निपातनात् गुणाभावः।) दैत्यविशेषः। स च वातापेर्भ्राता। (स च सिंहिकासुतः। यथा, हरिवंशे। ३य अध्याये।
"सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः।६८।
रेणुः बल्यश्च बलिनौ नभश्चैव तथाबलः।
वातापिर्नमुचिश्चैव इल्वलः खस्रमस्तथा" ॥६९॥
तस्य विवृतिर्यथा महाभारते तीर्थयात्रापर्व्वणि अगस्त्योपाख्याने ९६ अध्यायः।
लोमश उवाच।
"इल्वलो नाम दैतेय आसीत्कौरवनन्दन!।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः।४।
स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः।
पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु॥ ५॥
तस्मिन् स ब्राह्मणो नादात् पुत्रं वासवसम्मितम्।
चुकोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम्॥६॥
तदा प्रभृति राजेन्द्र इल्वलो ब्रह्महासुरः।
मन्युमान् भ्रातरं क्षान्तं मायावी च्छलकरोत्ततः॥७॥
मेषरूपी च वातापी कामरूप्यभवत् च्छलात्।
संस्कृत्य च भोजयति ततो विप्रं जिघांसति॥८॥
स चाक्रयति यं वाचा गतं वैवस्वतक्षयम्।
स पुनर्दंष्ट्रिमास्याय जीवन् संप्रत्यदृश्यत॥९॥
ततो वातापिमसुरं क्षान्तं क्षत्वा सुसंस्कृतम्।
तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत्॥१०॥
तामिल्वलेन महता स्वरेण वाचमीरिताम्।
श्रुत्वातिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः॥११॥
तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः।
वातापिः प्रहसन् राजन् निश्चक्राम विशाम्पते॥१२॥
एवं स ब्राह्मणान् राजन् भोजयित्वा पुनः पुनः।
हिंसयामास दैतेय इल्वलो दुष्टचेतनः॥१३॥
अगस्त्यस्यापि भगवानेतस्मिन् काल एव तु।
पितॄन् ददर्श गर्त्ते वै लम्बमानानधोमुखान्॥१४॥
ततः ९९ अध्याये इल्वलेन अगस्त्यातिथ्यं कृतम्॥
यथा,— लोमश उवाच।
"इल्वलस्तान् विदित्वा तु महर्षिसहितान् नृपान्।
उपस्थितान् सहामात्यो विधयान्ते ह्यपूजयत्।१।
तेषां ततोऽसुरश्रेष्ठस्वातिथ्यमकरोत् तदा।
सुसंस्कृतेन क्रौर्य्य भ्रात्रा वातापिना तदा।२।
ततो राजर्षयः सर्व्वे विषण्णा गतचेतसः।
वातापिं संस्कृतं दृष्ट्वा मेषभूतं महासुरम्।३।
अथाब्रवीदगस्त्यस्तान् राजर्षीन्विधिसत्तमः।
विषादो वो न कर्त्तव्यो ह्यहं भोक्ष्ये महासुरं।४।
धुर्य्यासनमथासाद्य निषण्णो महातपाः।
तं पर्य्यवेषयद्दैत्येन्द्रः इल्वलः प्रहसन्निव।५।
अगस्त्य एव क्षन्तु वातापिं बुभुजे ततः।
भुक्तवत्यसुराङ्गानमकरोत्तस्य चेल्वलः।६।
ततो वायुः प्रादुरभूत् अधस्तस्य महात्मनः।
शब्देन महता तात गर्ज्जन्निव यथा घनः।७।
वातापे निष्क्रमस्वेति पुनः पुनरुवाच ह।८।
तं प्रहस्याब्रवीत् राजन् अगस्त्यो मुनिसत्तमः।
कुतो निष्क्रमितुं शक्तो मया जीर्णस्तु सोऽसुरः।९।
इल्वलस्तु विषण्णोऽभूद्दृष्ट्वा जीर्णं महासुरम्।
प्राञ्जलिश्च सहामात्यैरिदं वचनमब्रवीत्।१०।)
मत्स्यविशेषः। इति मेदिनी॥
इल्वलाः, स्त्री, (इल+वलच्।) मृगशिरोनक्षत्रपञ्चतारा देवताश्रिताः पञ्चतारकाः। इत्यमरः॥ (नित्यबहुवचनान्तोऽयम्।)
इव, इ, व्याप्तौ। (इदित्-भ्वादिं--परं-सकं-सेट्।) प्रीणने। इति कविकल्पद्रुमः॥ क्र्यादिः। इ इन्वते। दन्त्यवकारपरत्वान्नानुस्वारः। प्रीणनं कैश्चिन्न मन्यते। इति दुर्गादासः॥
इव, व्य, सादृश्यम्। साम्यम्। इत्यमरः॥ (यथा, रघौ। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ"॥)
(उत्प्रेक्षा। यथा, साहित्यदर्पणे १० परिच्छेदे।
"मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः"।)
ईषत्। वाक्यालङ्कारः। (यथा, शाकुन्तले २ अङ्के।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम्"।
एवार्थः। यथा, ऋग्वेदे १। १८४। ३। "श्रिये पृथन्नियक्षतेव देवाः" "इवशब्द एवार्थे" इति भाष्यम्। अवधारणार्थः। यथा, शतपथब्राह्मणे
"इक्ष्वेव तु ईश्वरा" "इवशब्दोऽवधारणार्थः इति भाष्यम्।)
इक्षीका, स्त्री, इषीका। गजचक्षुर्गोलकः। इत्यमरटीकायां भरतः॥
इष य सर्पणे। गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) क्र्यादिः। य इष्यति। सर्पणं गतिः। इति दुर्गादासः॥
इष उ ग्र वाञ्छे। इति कविकल्पद्रुमः॥ (तुदां-परं-चकं-सेट्। उ एषित्वा इट्टा। वेमसङ्लुभेत्यादिसूत्रेणैवेऽसिद्धेऽप्यस्योदनुबन्धकृत्सूत्रे इषगाभीक्ष्ण्ये इत्य सर्पणे इत्येतयोरप्राप्ते विशेषणार्थः। न च पिबादिग्रहणवत्तत्र इच्छ इति ग्रहणेनैवेऽसिद्धिरिति वाच्यं लाघवाभावे प्राचीनमतस्यैव न्याय्यत्वात्। ग इच्छती इच्छन्ती। अस्यैव इच्छादेशः। इच्छति धनं लोकः। इति दुर्गादासः॥
इष ग आभीक्ष्ण्ये। पौनःपुन्येन करणे। इति कविकल्पद्रुमः॥ (क्र्यादिं-परं-चकं-सेट्।) ग इच्छति पण्डितः। पुनः पुनः करोतीत्यर्थः। इति दुर्गादासः॥
इषः, पुं, (इष्यते गम्यतेऽस्मिन् जिगीषुभिरिति। इष+क।) आश्विनमासः। इत्यमरः॥ (यथा, शतपथब्राह्मणे। ४।२। "यच्छरद्भिर्ऋतुभिरोषधयः पच्यन्ते ते नेतावित्यस्योर्गश्च"। इषर्जो ग्रहत्"। इति सुश्रुतः॥)
इषिका, स्त्री, (इष्+क्षजादिभ्यो वुन्।) इषीका। गजचक्षुर्गोलकः। तूलिका। इत्यमरटीकायां रायमुकुटः॥
इषिरः, पुं, (इष्यति गच्छतीति। इष+किरच्।) अग्निः। इत्युणादिकोषः॥ (गमनशीले, त्रि, यथा, ऋग्वेदे। ७। ३५। ४। "ग्रं न इषिरो अभियातः"। "इषिरः गतिशीलः" इति भाष्यम्।)
इषीका, स्त्री, (ईष्यते इति। ईषेः कित् क्रस्वश्चेतीकन् क्रस्वश्च।) गजाक्षितूलकः। इक्षिचक्षुर्गोलकः। इत्यमरः॥ तूलिका। इति रायमुकुटः॥ काशदण्डं। इति हेमचन्द्रः॥
("पलाशानां पुष्पेषु त्वयेषीका प्रवेशिता"।
"इषीकाश्च यथा मुञ्जात् कश्चित् निष्कृष्य दर्शयेत्।
योगी निष्कृष्य चात्मानं तथा पश्यति देहतः"।
इति च महाभारते।
"तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः"।
इति रघुः १२।२३"। इषीकास्त्रं काशास्त्रं "इषीका काशमुच्यते" इति हलायुधः। इति तट्टीका।)
इषुः, पुं, स्त्री, (इष्यति गच्छतीति। इष+उ।) बाणः। इत्यमरः॥ ("उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले"। इति शाकुन्तले २ अङ्के।)
इषुधिः, स्त्री, (इषवो धीयन्ते ऽस्मिन्। इषु+धा कि।) तूणः। इत्यमरः॥ ("धनुर्गाण्डीवमादाय तथाक्षय्ये महेषुधी"। इति महाभारते ३।३९।)
इषुपुङ्खा, स्त्री, शरपुङ्खावल्लः। इति राजनिर्घण्टः॥
इष्टं, क्ली, (इष्यते इष्यते वा यज इष वा+भावे क्त।) यज्ञादिकर्म्म। (यथा, हेमचन्द्रः।
"अग्निहोत्रं तपः सत्यं वेदानां चार्थपालनम्।
आतिथ्यं वैश्यदेवञ्च इष्टमित्यभिधीयते"॥)
यथेप्सितं। कामं। इत्यमरः॥ संस्कारः। इति मेदिनी॥
इष्टं, त्रि, (इष्यते इष्यते वा यत् तत्। इष यज वा+कर्म्मणि क्त।) आप्तसितम्। वाञ्छितम्। पूजितम्। प्रियं। इति मेदिनी॥ (यथा, महाभारते।
"उपपन्नो गुणैरिष्टै रूपवानन्वकोविदः"।
मनुः।४।२२९।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्"।)
इष्टः, पुं, (इष्यते यः। यज्+क्त।) यज्ञः। इति मेदिनी॥ एरण्डवृक्षः। इति शब्दचन्द्रिका॥ (अभीष्टशब्दे अस्य गुणादिकं बोद्धव्यम्॥)
इष्टका, स्त्री, (इष+तकन्+टाप्।) मृदादि-
इष्टिका, निर्म्माणार्थदग्धमृत्तिकाखण्डः। इति चिकित्सव्यवहारे लीलावती। इट इति भाषा। तद्गृहगुणाः।
"कूपोदकं वटच्छाया श्यामा स्त्री इष्टकालयम्।
शीतकाले भवेदुष्णमुष्णकाले च शीतलम्"॥
इति चाख्यम्॥* ॥ तद्रचितस्थाने पिण्डकर्म्मणि-

मेधो यथा। शङ्खलिखितौ। नेष्टकारचिते पितॄन् सन्तर्पयेत्। इति श्राद्धतत्त्वम्॥*॥ देवोद्देश्यकेष्टकामयज्ञदानफलं यथा। मठादिप्रतिष्ठातत्त्वे॥ "मृण्मयात् कोटिगुणितं फलं स्यात् दारुभिः कृते। कोटिकोटिगुणं पुण्यफलं स्यादिष्टकामये॥ द्विपरार्द्धगुणं पुण्यं शैलजे तु विदुर्बुधाः। मच्छिलयोः समं ज्ञेयं फलमाह्यदरिद्रयोः"॥

इष्टकापथं, क्ली, (इष्टं कापथं यस्य अधोवायुकरत्वात्।) वीरणमूलम्। इत्यमरः॥ (इष्टकाभिर्निर्म्मितः पन्थाः।) इष्टकानिर्म्मितपथे, पुं॥

इष्टगन्धं, क्ली, (इष्टो गन्धो यस्येति।) बालुका। इति मेदिनी॥

इष्टगन्धः, त्रि, (इष्टो गन्धो यस्य।) सुगन्धिद्रव्यम्। इत्यमरः॥ (इष्टश्चासौ गन्धश्चेति वाक्ये। सौरभम्।)

इष्टा, स्त्री, (इज्यतेऽनया। यज + क्त टाप्।) शमीवृक्षः। इति राजनिर्घण्टः॥

इष्टापूर्त्तं, क्ली, (इष्टञ्च पूर्त्तञ्च द्वयोः समाहारः।) यज्ञखातादिकर्म्म। इति हेमचन्द्रः॥ यथा। "अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते॥ वापीकूपतड़ागादिदेवतायतनानि च। अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते"॥ इति मलमासतत्त्वधृतज्ञातूकर्णः॥ (यथा, मार्कण्डेयपुराणे १८।६।

"इष्टापूर्त्तविनाशाय तद्राज्यञ्चौरधर्म्मिणः"॥ तथा च महाभारते। ३। ३२। ३०।

"इष्टापूर्त्तफलं न स्यात् न शिष्यो न गुरुर्भवेत्"।)

इष्टार्थोद्युक्तः, त्रि, (इष्टोऽर्थस्तस्मिन् उद्युक्तः।) उत्सुकः। उत्साहयुक्तः। इत्यमरः॥

इष्टिः, स्त्री, (इष्, यज् वा + क्तिन्।) अभिलाषः। (इति भाष्यकारेच्छा गतार्थत्वात्। इति पाणिनिः।) यागः। इत्यमरः॥(यथा, रघुः।१०।४। "आरेभिरे जितात्मानः पुत्रियामिष्टिमार्त्विजः"। "प्राजापत्यं निरूप्येष्टिं सर्व्वदेवसदक्षिणां"। इति मनुः।६।२८। श्लोकसंग्रहः। इति मेदिनी॥

इष्टिकापथिकं, क्ली, वामभ्रूकटाक्षम्। इति राजनिर्घण्टः॥

इष्टिपचः, पुं, (इष्टिं यज्ञं पचतीति। यद्वा, इष्टये खेच्छार्थं पचति यः। इष्टि + पच + अच्।) दनुजः। असुरः। इति शब्दरत्नावली॥

इष्टिभुट्, [ष्] पुं, (इष्टिं यागं भुङ्क्ते। इष्टि + भुज् + क्विप्।) दैत्यः। इति त्रिकाण्डशेषः॥

इष्टुः, स्त्री, (इष + तु।) इच्छा। इत्युणादिकोषः॥

इष्मः, पुं, (इच्छतीति इषियुधीति मक्।) कामदेवः। वसन्तकालः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ [कालः। इति हेमचन्द्रः॥

इष्यः, पुं, (इष्यतेऽनेन इति। इष् + क्यप्।) वसन्तः।

इष्वः, पुं, (इष्यतेऽसौ। इष् + वन्। निपातनात् गुणाभावः।) उपदेशः। इत्युणादिकोषः॥

इष्वासः, त्रि, (इषून् बाणान् अस्यतीति। इषु + अस् + घञ्।) इषुक्षेपकम्। इति मेदिनी॥ तिरन्दाज इति ख्यातम्।

इष्वासः, पुं, (इषवो बाणा अस्यन्ते क्षिप्यन्तेऽनेन। इषु + अस् + करणे घञ्।) धनुः। इत्यमरः॥ ("महोरस्को महेष्वासो गूढजत्रुरिन्दमः"। इति रामायणे। १। १। १०। गीतायां १।४। "अत्र शूरा महेष्वासा भीमार्জ্জুनसमा युधि"।)

इह, व्य, (अस्मिन् काले, लोके, विषये, देशे, दिशि वा इत्याद्यर्थे निपातनात् सिद्धम्।) अस्मिन्। एइ देशे एइ काले इत्यादि भाषा। इति व्याकरणम्॥ (यथा, मनुः।३।१८१।

"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्"। "षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता"। इति हितोपदेशे।)

इहामुत्रफलभोगविरागः, पुं, (इह अस्मिन् लोके स्वर्गचन्दनादिजनितोऽमुत्रामुस्मिन् लोके अमृतादिविषयोत्पन्नो योऽनित्यः फलभोगस्तस्मात् विरागो नितरां विरतिः।) ऐहिकपारत्रिकविषयभोगेभ्यो नितरां विरतिः इति वेदान्तसारे॥

ई दीर्घ ईकारः। चतुर्थस्वरवर्णः। अस्योच्चारणस्थानं तालु। (स च दीर्घः द्विमात्रत्वात् त्रिमात्राश्रयत्वात् प्लुतश्च भवति।) (विस्तृतिस्तु ह्रस्वइकारे द्रष्टव्या।)

"ईकारं परमेशानि स्वयं परमकुण्डली। ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं सदा॥ पञ्चदेवमयं वर्णं पीतविद्युल्लताकृतिम्। चतुर्ज्ञानमयं वर्णं पञ्चप्राणमयं सदा"॥ इति कामधेनुतन्त्रम्। (वङ्गीयभाषायां।) तस्य लेखनप्रकारो यथा।

"ऊर्द्धाधःकुञ्चिता मध्ये त्रिकोणाधोगता पुनः। अधोगता कोणशीर्षा कुञ्चिता दक्षतः शुभा॥ शीर्षाद्दक्षे कोणयुता कुञ्चितोर्द्धगता पुनः। चन्द्रसूर्य्याग्निरूपा सा मात्राशक्तिः प्रकीर्त्तिता"॥ इति वर्णोद्धारतन्त्रम्॥*॥ अस्य नामानि यथा,—

"ईः स्त्रीमूर्त्तिर्महामाया लोलाक्षी वामलोचनम्। गोविन्दः शेखरः पुष्टिः सुभद्रा रत्नसंज्ञकः॥ विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः। कालोत्तरीयो भैरुण्डा रतिश्च पौण्ड्रवर्द्धनः॥ शिवोत्तमः शिवा तुष्टिश्चतुर्थी विन्दुमालिनी। वैष्णवी वैन्दवी जिह्वा कामकला सनादका॥ पावकः कोटरः कीर्त्तिर्मोहनी कालकारिका। कुचद्वन्द्वं तर्জ্জनी च शान्तिस्त्रिपुरसुन्दरी"॥ इति तन्त्रोक्तवर्णाभिधानम्॥ (माढकान्यासे ऽस्य वामचक्षुषि स्थानम्। यथा, माढकान्यासधृतमन्त्रे। "ईं नमो दक्षिणचक्षुषि ईं नमो वामचक्षुषि।)

ई, ल, कान्तौ। गतौ। व्याप्तौ। क्षेपे। प्रजने। खादने। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-सकं च-अनिट्।) कान्तिरिच्छा। प्रजनो गर्भग्रहणं इत्यर्थः। ल एति गौः गर्भं गृह्णाति इत्यर्थः। "न हि तरणिरुदीते दिक् पराधीनवृत्तिः"।

इति गणकृता नित्यत्वादात्मनेपदं। धातुरयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

ई, ङ य, गतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ङ य ईयते। इति दुर्गादासः॥

ई, य विषादः। अनुकम्पा। इति मेदिनी॥ क्रोधः। दुःखभावनं। प्रत्यक्षं। सन्निधिः। इति हेमचन्द्रः॥ (सम्बोधनम्।)

ईः, पुं, कन्दर्पः। इति त्रिकाण्डशेषः॥

ईः, स्त्री, (अस्य विष्णोः पत्नी। ङीप्।) लक्ष्मीः। इति विश्वमेदिन्यौ॥

ईख, इ गतौ। इति कविकल्पद्रुमः॥ (इदित्-भ्वादिं-परं-सकं-सेट्।) दीर्घादिः। इ ईक्षते। इति दुर्गादासः॥ (ईख गतौ। ईखति इति केचित्।)

ईक्ष ङ दर्शने। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दर्शनमिह चाक्षुषज्ञानं प्रणिधानञ्च। ङ ईक्षते चन्द्रं लोकः। "न कामवृत्तिर्व्वचनीयमीक्षते"। इति कालिदासः॥ "निरीक्षिष्यामि यान्मुनीन् इति गणकृतानित्यत्वात्" इति रमानाथः॥ "वस्तुतस्तु निरीक्ष्यते निरीक्षः पचादित्वादन् ततो निरीक्ष इवाचरतीति क्विप् साध्यं" इति दुर्गादासः॥

ईक्षणं, क्ली, (ईक्ष + भावे, ल्युट्।) दर्शनम्। ("क्षतान्धा धनलोभान्धाः नोपकारेक्षणक्षमाः"। इति कथासरित्सागरे॥) (ईक्षतेऽनेनेति करणे ल्युट्।) चक्षुः। इत्यमरः॥ ("अभिमुखे मयि संहृतमीक्षणम्"। इति शाकुन्तले। २ अङ्के। "श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत्"। इति विष्णुपुराणे।१।११।१५। निरूपणम्। पर्य्यवेक्षणम्। यथा, मनुः ७।१४१।

'स्थापयेदासने तस्मिन् खिन्नः कार्य्येक्षणे नृणाम्"।)

ईक्षणिका, स्त्री, (ईक्षणेन हस्तरेखाद्यवलोकनेन शुभाशुभं जानाति या। ईक्षण + ठन् + टाप्।) दैवज्ञा। लक्षणादिना शुभाशुभनिरूपिणी। इत्यमरः॥ (पुं, दैवज्ञः। यथा, मनुः।६।२५५। "सङ्कल्पादेश्चरत्यन्न भक्षयेक्षणिकैः सह"।)

ईक्ष, इ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्-इदित्।) इ ईक्षते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईक्ष, ङ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दीर्घादिः। ङ ईक्षते ईक्षते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईड़, क, स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क ईड़यति। इति दुर्गादासः॥

ईड़, ङ ल, स्तुतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) ल ङ ईट्टे। इति दुर्गादासः॥ (यथा, रामायणे। ३य काण्डे।

"गन्धर्व्वाः सुरसंघाश्च बहवश्च महर्षयः। अन्तरीक्षगतं देवं गीर्भिरग्र्याभिरीड़िरे"॥)

ईड़ा, स्त्री, (ईड़ + क + टाप्।) स्तुतिः। इति हलायुधः॥ (प्रशंसा।)

ईड़ितः, त्रि, (ईड्यते स्म। ईड़् + क्त।) स्तुतः। कृतस्तवः। इत्यमरः॥ (प्रशंसितः।)

ईत, इ वन्धे। इ ईन्यते। इति दुर्गादासः॥ (भ्वादिं-परं-सकं-सेट्। तेन इन्तीति केचित्।)

ईतिः, स्त्री, (ईयतेऽनया। ई+क्तिन्।) डिम्बः। प्रवासः। इत्यमरो मेदिनी च॥ क्षुपेः षट्प्रकारोपद्रवविशेषः। यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः"॥

इति स्मृतिः॥ (कलहभेदः। नृपतिरहितयुद्धम्।

"ईतयो व्याधयस्तद्वा दोषा क्रोधादयस्तथा।
उपद्रवाश्च वर्त्तन्ते व्याधयः क्षुद्भयं तथा"॥

इति महाभारते हनूमद्भीमसंवादे।३।१४६।३४।)

ईदृक्, [श्] त्रि, (इदम्+दृश्+क्विप्।) अयमिव दृश्यते। इति व्याकरणम्॥ इहार न्याय एवप्रकार इत्यादि भाषा।

("रत्नानीदृंशि भूयांसि न भवन्त्येव भूतले"।
इति कथासरित्सागरे। २५। १७६॥ तथा च किराते। २। २८॥

"इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः"।

ईदृक्षः, त्रि, (अयमिव दृश्यतेऽसावित्यार्थे। इदम्+दृश्+क्स दृक्षे चेति ईश्।) ईदृशः। इति व्याकरणम्॥

("ईदृक्षराजकर्म्माणि भवेयुस्तदिदं वयम्"।
इति कथासरित्सागरे।)

ईदृशः, त्रि, (अयमिव दृश्यतेऽसौ इदम्+दृश्+कञ्।) ईदृक्। एतत्सदृशः। इति व्याकरणम्॥

("ईदृशानां विपाकोऽपि जायते परमाद्भुतः"।
इति उत्तररामचरिते।)

ईर, कि गतौ। प्रेरणे। इति कविकल्पद्रुमः। (वा, चुरां-परं-सकं-सेट्।) नुदि। कि ईरयति ईरति। नुदि प्रेरणे। इति दुर्गादासः॥

ईर, ड ल, कम्पे। गतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं कम्पार्थे, अकं-सेट्।) दीर्घादिः। ड ल ईर्ते लता वायुना। इति दुर्गादासः॥

ईरिका, स्त्री, दर्भविशेषः। यथा। ईरिकावत्यम्। इति शतपथब्राह्मणे दुर्गादासः॥

ईरिणं, त्रि, (ऋ+ईरन्।) शून्यं। ऊषरभूमिः। इति मेदिनी॥ (यथा, मनुः। ३। १४२॥

"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्॥
तथानृते हविर्दत्त्वा न दाता लभते फलम्"॥

"ततस्तदीरिणं जातं समुद्रस्यावसर्पितः"।
इति महाभारते अनुशासनपर्व्वणि। चलनं।)

ईरितं, त्रि, (ईर+क्त।) क्षिप्तम्। इत्यमरः॥ प्रेरितम्। कम्पितम्। गतम्। कथितम्॥ ("इतीरिते वचसि वचस्विनामुना"। इति माघे १७।१।

"तस्य वर्म्म विभिद्याशु स बाणो मत्सुतेरितः"।
इति, महाभारते।)

ईर्ष्यं, ईर्षे। (भ्वादिं-परं-अकं-सेट्।) पराभ्युदयासहिष्णुतायामिति यावत्। इति कविकल्पद्रुमः॥ दीर्घादिः। रेफयुक्तः। ईर्षा परादोषासहिष्णुत्वमिति केचित्। ईर्ष्यति खलः साधवे। यदयान्त इत्येके। इति दुर्गादासः॥

ईर्म्म, क्ली, (ईर+बाहुलकात् मक्।) व्रणः। इत्यमरः॥ (यथा, भट्टिकाव्ये। ४। ४४।

"मृगयुमिव मृगोऽथ दक्षिणेर्म्मा"।)

ईर्य्या, स्त्री, (ईर+ण्यत्।) भिक्षुव्रतम्। इति जटाधरः॥

ईर्व्वारुः, पुं, स्त्री, (ईरं वृणोतीति। ईर्+व+बाहुलकात् उण्।) स्फुटिः। इति शब्दरत्नावली॥ फुटी इति भाषा।

ईर्षा, स्त्री, (ईर्ष्यणं। ईर्ष्य+घञ्। हसाल्लोप इति यकारलोपः।) अक्षमा। इति शब्दमाला॥

("कथमीर्षा न कुरुषे सुग्रीवस्य समीपतः"।)

इति रामायणे॥ ४। २४। ३७।)

ईर्षालुः, त्रि, (ईर्षा+आलुच्।) ईर्षाविशिष्टः। इति हलायुधः॥

ईर्ष्य, ईर्षे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-अकं-सेट्।) दीर्घादिः। रेफयुक्तः। ईर्ष इति ईर्ष्यस्य घञि हसाल्लोप इति यलोपे सिद्धम्। ईर्षा परा-भ्युदयासहिष्णुत्वम्। परदोषासहिष्णुत्वमिति केचित्। ईर्ष्यति खलः साधवे। यदयान्तः इत्येके। इति दुर्गादासः॥

ईर्ष्या, स्त्री, (ईर्ष्यणं। ईर्ष्य+अच्+टाप्।) परोत्कर्षासहिष्णुता। रोष इति भाषा। तत्पर्य्यायः॥ अक्षान्तिः २। इत्यमरः॥ (यथा,मनुः। ७। ४८॥

("पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गुणाष्टकः"।
स्त्रियः पत्युरन्यप्रियासङ्गदर्शनादिजनितो मानभेदः। यथा, षट्कारशतके॥

"वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः"।)

ईर्ष्यालुः, त्रि, (ईर्ष्या लाति। ईर्ष्या+ला+डु।) ईर्षाविशिष्टः। अक्षान्तियुक्तः। तत्पर्य्यायः। कुहनः२ इति हेमचन्द्रः॥ (यथा, राजतरङ्गिणी।

"दिवसे सन्निधानेन पैशुनप्रेरणा यदि।
ईर्ष्यालुना खैरिणीव रक्षितुं यदि पार्य्यते"॥)

ईलिः, स्त्री, (ईर्य्यते इति। ईर+इन् रस्य लः।) स्फुलगदाकारहस्तदण्डः। इति भरतः॥ सोंटा इति ख्याता। करच्छरीति ख्याते एकधारा इति ख्याते यवनास्त्रे वा। इति शब्दसुन्दरी॥

ईलिका, स्त्री, (ईलिरेव। ईलि+स्वार्थे कन् टाप्।) स्फुलगदाकारहस्तदण्डः। इति भरतः॥ सोंटा इति ख्याता। एकधारेलीति स्वामी। तत्पर्य्यायः। ईलिः २ ईली ३ करपाली ४ गुप्तिका ५ करपालिका ६। इति शब्दरत्नावली॥

ईलितः, त्रि, (ईड्+क्त। ड्स्य लः।) स्तुतः। इत्यमरः॥

ईली, स्त्री, (ईर+क। ऋदिकारादिति पाक्षिको ङीष्।) स्फुलगदाकारहस्तदण्डः। तत्पर्य्यायः। करपालिका २। इत्यमरः॥

ईश, ड, ल, ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (अदां-आत्मं अकं-सेट्।) दीर्घादिः। ऐश्वर्य्यमीश्वरीभावोऽधीनीकरणञ्च। ड ल ईशे धनी। मायानामीशिषेण च। अत्र कर्म्मणि षष्ठी। इति दुर्गादासः॥

ईश, त्रि, (ईशे इति। ईश्+क।) ईश्वरः। (यथा कुमारे २।६ "जगदीशो गिरीश्वरः"।) प्रभुः। इति मेदिनीकरहेमचन्द्रौ॥ (यथा, कुमारे। ३।३४ "कथञ्चिदीशा मनसां बभूवुः"।)

ईशः, पुं, (ईशे इति। ईश+क।) महादेवः।

("अग्नेः क्षतप्राणविमुक्तिरीशः
पर्य्यङ्कबन्धं निविड़ं बिभेद"।

इति कुमारे ३। ५६।) ईशानकोणाधिपतिः। इत्यमरः॥

ईशसखः, पुं, (ईशस्य सखा बन्धुः राजाहःसखिभ्यः टच्।) कुबेरः। इति हेमचन्द्रः॥

ईशा, स्त्री, (ईश+अ+टाप्।) लाङ्गलदण्डः। इत्यमरटीका शब्दरत्नावली च॥ (यथा महाभारते वनपर्व्वणि घोषयात्रापर्व्वणि २४०। ३०।

"ईशामन्ये हयानन्ये सूतमन्ये न्यपातयन्"।)

(ईशस्य महादेवस्य पत्नी। दुर्गा॥ ईशस्य प्रभोः पत्नी इति व्युत्पत्त्या स्वामिपत्नी। प्रभुस्त्री यथा, अथर्व्ववेदे ११।८।१७ "ईशा वशस्य या जाया"।)

ईशादण्डः, पुं, (ईशायाः लाङ्गलस्य दण्डः।) अक्षयुगयोः सन्धारणार्थो दण्डः। यथा,—

"योजनानां सहस्राणि भास्करस्य रथो नव।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम"॥

इति विष्णुपुराणे २ अंशे ८। २॥

ईशादन्तः, पुं, (ईशेव दन्तो यस्य।) दृढदन्तहस्ती। तत्पर्य्यायः। महादन्तः २। इति त्रिकाण्डशेषः॥ हस्तिदन्तः। इति शब्दरत्नावली॥

ईशानं, क्ली, (ईश+आनश्।) ज्योतिः। इति मेदिनी॥ (तद्विशिष्टे, त्रि। यथा, ऋग्वेदे।१।१७५।४।

"सुषाय सूर्य्य कवे चक्रमीशान ओजसा"।)

ईशानः, पुं, (ईष्टे। ईश्+ताच्छील्यवयोवचनशक्तिषु चानश्।) महादेवः। इत्यमरः॥

("तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-
मीशानसंदर्शनलालसानाम्"॥

इति कुमारे ७।५६।

"तत्रेशानं समभ्यर्च्च्य चिरात्रोपोषितो नरः"।
इति भारते।) एकादशरुद्रान्तर्गतरुद्रविशेषः। इति पुराणं॥ (यथा, आश्वलायनगृह्यसूत्रे।४।९।

"हराय मृड़ाय सर्व्वाय शिवाय भवाय महादेवाय उग्राय भीमाय पशुपतये रुद्राय शङ्करायेशानाय स्वाहा" इति। दूतमूर्त्तिधरः शिवः। स च धूम्रजटिलः। यथा, मार्कण्डेये। ८८। २३॥

"सा चाह धूम्रजटिलमीशानमपराजिता।
दूतत्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः"।)

शिवाष्टमूर्त्यन्तर्गतसूर्य्यमूर्त्तिः। इति स्मृतिरागमश्च। (परमेश्वरः। यथा, शुक्लयजुर्व्वेदे।

"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्जितम्।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं बृहत्"।

तथा च महाभारते १। १। २२।

"आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्"॥

साध्यापुत्रो देवतभेदः। यथा,—

"धर्म्मात्साध्यागुद्भवः कामः साध्या साध्यान् व्यजायत।
प्रसन्नं भुवनञ्चैव ईशानं सुरभिं तथा"॥

इति भारते ।) ग्रमीदृक्षः । इति राजनिर्घण्टः ॥
ईशानी, स्त्री, (ईशस्य पत्नी ।) दुर्गा । इति तन्त्रं ॥ ग्रमीदृक्षः । इति राजनिर्घण्टः ॥
ईशिता, स्त्री, (ईशिनो भावः । ईशिन् + तल् ।) ईशित्वं । अणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इति शब्दरत्नावली ॥
ईशिता, [ऋ] त्रि, (ईष्टे इति । ईश् + टृच् ।) ईश्वरः । प्रभुः । अधिपतिः । इत्यमरः ॥ (यथा माघे । २ । ९५ ।
"तदीशितारं चेदीनां भवांस्तमवमंस्त मा" ।)
ईशित्वं, क्ली, (ईशिनो भावः । ईशिन् + त्व ।) ईशिता । देवानामष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इति हेमचन्द्रः ॥ (यदुक्तं ।
"अणिमा लघिमा व्याप्तिः प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)
प्रभुत्वम् । येन स्थावरादिसर्व्वभूतानि आज्ञाकारीणि भवन्ति । इत्यमरटीकासारसुन्दरी ॥
ईश्वरं, त्रि, (ईश् + वरच् ।) स्वाम्यं ।
("दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्" ।
इति हितोपदेशे । १ । ७६ ।) स्वामि । इति विश्वमेदिन्यौ ॥ (यथा महाभारते ।
"अहं चैव हि यच्चान्यन्ममास्ति वसु किञ्चन ।
तत्सर्व्वं तव विक्षव्यं कुरु प्रणयमीश्वर" ॥
नियन्ता । प्रभुः ।
"ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये" ।
इति मनुः । १ । ९९ ॥)
ईश्वरः, पुं, (ईष्टे इति । ईश् + वरच् । यद्वा, अश्नुते व्याप्नोतीति अशधातोर्वरट् उपधाया ईत्वं च ।) शिवः । (यथा, कुमारे । ७ । ३१ ।
"तद्गौरवान्मङ्गलमण्डनश्रीः
सा पस्पृशे केवलमीश्वरेण" ।
"अथेश्वरं देवगणाः सह सप्तर्षिभिर्विभुम्" ॥
"वाग्मिः स्तुतः स्तुवन् यावच्छिवे भावे शिवः स्थितः ।
शिवं शिवाय भूतानां स्थितं ज्ञात्वा कृताञ्जलिः ॥
क्रोधाग्निरुद्गतवान् देवमहं किं करवाणि ते" ।
"तमुवाचेश्वरः क्रोधं ज्वरो लोके भविष्यसि" ॥
इति चरके चिकित्सास्थाने ढतीयाध्यायः ॥
"ततः दृष्ट्वा प्रजाः श्लेष्मं तदा तं क्रोधमीश्वरः ।
विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च" ॥
इति सुश्रुते कल्पस्थाने ढतीयाध्यायः ॥)
कन्दर्पः । इति मेदिनी ॥
"विशुद्धसत्त्वप्रधानाज्ञानोपहितचैतन्यम्" ।
इति वेदान्तः ॥ न्यायमते ईश्वरगुणाः । संख्यादिपञ्च बुद्धिः इच्छा यत्नश्च । ईश्वरस्वरूपं ब्रह्मशब्दे दृश्यम् ॥ ऐश्वर्य्यशाली । तत्पर्य्यायः । राष्ट्री २ अध्यक्षः २ नियुक्तान् ३ इनइनः ४ । इति वेदनिर्घण्टौ २ अध्यायः ॥ श्रीहरिः । यथा ।

रुद्रउवाच ।

"हरे कथय देवेश देवदेवक ईश्वर ।
को ध्येयः कश्च वै पूज्यः कैर्नृभिस्तुष्यते परः" ॥
इत्यादि । श्रीहरिरुवाच ।
"शृणु रुद्र प्रवक्ष्यामि ब्रह्मणा च सुरैः सह ।
अहं हि देवो देवानां सर्व्वलोकेश्वरेश्वरः ॥
अहं ध्येयश्च पूज्यश्च स्तुतोऽहं स्तुतिभिः सुरैः ।
अहं प्रपूजितो रुद्र ददामि परमां गतिम्" ॥
इत्यादि च गारुडे २ अध्यायः ॥
(खनामख्यातो नृपतिभेदः । यथा, महाभारते ।
"मतिमांश्च मनुश्रेष्ठः ईश्वरश्चेति विश्रुतः" ।)
ईश्वरा, स्त्री, (ईश्वर + टाप् । एंयोगविवक्षाभावात् न ङीष् ।) दुर्गा ।
("विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्तोत्रोरगप्रतिसरेण करेण पाणिः" ।
इति किराते । "ईश्वराया गौर्य्याः, स्त्रेषभासेत्यादिना वरच् । एंयोगविवक्षाभावात् न ङीष्"
इति तट्टीका ॥) लक्ष्मीः । सरस्वत्यादिशक्तिः ।
इति शब्दरत्नावली ॥
ईश्वरी, स्त्री, (ईष्टे इति + ईश् + वनिप् । वनोरचेति ङीषौ ।) ईश्वरा । इति शब्दरत्नावली ॥
("त्वमीश्वरी देवि ! चराचराणाम्" । इति मार्कण्डेयपुराणं ॥ ९१ । २ ।) सिङ्गिनीवृक्षः । वन्ध्याकर्कोटकीवृक्षः । रुद्रजटालता । नाकुलीकन्दः ।
इति राजनिर्घण्टः ॥
ईष उ उञ्छे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) उञ्छ उद्धृतशस्यशेषाहरणं । ईषति धान्यं दीनः । इति दुर्गादासः ॥
ईष ङ दाने । (भ्वादिं-आत्मं-सकं-सेट् ।) ईच्छ । हिंसने । सर्षणे । इति कविकल्पद्रुमः ॥ दीर्घादिः । ङ ईषते । ईच्छो दर्शनं । इति दुर्गादासः ॥
ईषः, पुं, (इष् + क ।) इषः । आश्विनमासः । इत्यमरटीकायां मथुरानाथः ॥ (खनामख्यातः उत्तममनोर्दशपुत्रमध्ये एकः पुत्रः । यथा,—
'औत्तमेयान् महाराज ! दश पुत्रान् मनोरमान्'१८
"ईष ऊर्ज्जस्तनूर्ज्जश्च मधुमाधव एवच ।
शुचिः शुक्रः सहश्चैव नभस्यो नभ एव च" ॥ १९
इति हरिवंशे ७ अध्यायः ॥)
ईषत् व्य, (ईषणमिति । ईष् + अत् ।) अल्पम् । किञ्चित् । मनाक् । इत्यमरः ॥
("तं दृष्ट्वा कुपितं पुत्रमीषत्स्फुरिताधरं" ।
इति विष्णुपुराणे । १ । ११ । १२ ।
"ईषत् सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तं" ।
इति मार्कण्डेयपुराणे, ग्रन्थादिमाहात्म्यम् ॥
"हृदि तिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम्" ।
इति चरके सूत्रस्थाने सप्तदशाध्यायः ॥)
ईषत्करः, पुं, (ईषत् + कृ + खल् ।) अत्यल्पः । तत्पर्य्यायः । लेशः २ उपपदं ३ गन्धः ४ अनुबन्धः ५ ।
इति चिकाण्डशेषः । ईषत्क्रियमाणं वस्तु । इति व्याकरणं ॥
ईषत्पाण्डुः, पुं, (ईषत् पाण्डुः ।) धूसरवर्णः । इत्यमरः ॥
ईषदुष्णं, त्रि, (ईषच्च तदुष्णञ्चेति ।) अल्पतप्तं । तत्पर्य्यायः । कोष्णं २ कवोष्णं ३ कदुष्णं ४ मन्दोष्णं ५ ।
इति हेमचन्द्रः ॥
ईषद्रक्तः, पुं, (ईषत् रक्तः ।) अल्पलोहितवर्णः । तत्पर्य्यायः । अथक्तरागः २ अरुणः ३ । इत्यमरः ॥
ईषा, स्त्री, (ईष + क + टाप् ।) लाङ्गलदण्डः । इत्यमरः ॥ लाङ्गलेर ईष् इति भाषा ॥ (ऋग्वेदे ।
"हिरण्मयो वां रथिरीषा अक्षो" ।
रथस्यावयवभेदः । यथा, ऋग्वेदे । १० । १३५ । ३ । "रथः एकैषः" ।
"ईषामन्ये हयानन्ये सूतमन्ये न्यपातयन्" ।
इति महाभारते । वनपर्व्वणि २४० । ३० । ईषेति क्वचित् पाठः ॥)
ईषादन्तः, पुं, (ईषेव दन्तो यस्य ।) दीर्घदन्तहस्ती । तत्पर्य्यायः । उदग्रदन्तः २ । इति हेमचन्द्रः ॥
("ईषादन्तान् हेमकक्षान् पद्मवर्णान् कुथास्तृतान्'
ईषादन्ता महाकायाः सर्व्वे चाप्सरकेरवाः" ॥
इति च भारते ॥)
ईषिका, स्त्री, (ईष + किकन् ।) हस्तिचक्षुर्गोलकः । इत्यमरटीकायां रायमुकुटः ॥ तूलिका । इत्यमरः ॥ अस्त्रविशेषः । यथा,—
"सोऽभिमन्त्र्य शरेषीकामाग्नेयास्त्रेण वीर्य्यवान् ।
काकं तमभिसन्धाय ससर्ज्ज पुरुषर्षभ" ! ॥
इति रामायणं ॥
ईषिरः, पुं, (ईष + किरच् ।) अग्निः । इति त्रिकाण्डशेषः ॥
ईषीका, स्त्री, (ईष + ईकन् । औणादिकप्रत्ययोऽयम् । पर्फरीकादित्वात् साधुः ।) तूलिका । वीरणादिशलाका इत्यन्ये । आवर्त्तितमनावर्त्तितं वा सवर्णं ज्ञातुं यन्निःक्षिप्यते तच्चेत्यन्ये । आवर्त्तितसवर्णं द्रवाकारं यत्र निःक्षिप्यते तत्रेति केचित् ।
इत्यमरटीकायां भरतः ॥
ईष्मः, पुं, (ईष + मक् ।) कामदेवः । वसन्तकालः ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
ईह ङ चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वादिं-आत्मं-अकं-सेट् ।) दीर्घादिरकर्म्मकः । ङ ।
"ऐहिष्ट तं कारयितुं कृतात्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्" ।
इति भट्टिः । १ । ११ ॥
सकर्म्मकोऽपि । "भ्रामं भ्रमादपि नेहते" । इति जयदेवः ॥ "सर्व्वः स्वार्थं समीहते" इति माघः । २ । ९५ ॥ इति दुर्गादासः ॥
ईहा, स्त्री, (ईह + अ + टाप् ।) चेष्टा । उद्यमः । ("इच्छया जायते काम ईहयार्थो विवर्द्धते ।
श्रद्धया वर्द्धते धर्म्मस्तेषां फलमिदं विधा" ॥
इति रामायणे । ३ काण्डे । तथा च मनुः २ । ३० ।
"राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" ।
"वैश्यस्य बलक्षत्रादिचेष्टार्थिनः" इति तट्टीकायां कुल्लूकभट्टः ।) वाञ्छा । इच्छा । इति त्रिकाण्डशेषः ॥
("धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य श्रेयो न स्पर्शनं नृणाम्" ॥
इति महाभारते । १ । २ । ४८ ॥)
ईहामृगः, पुं, (ईहाप्रधानो मृगो वृकः ।) कुक्कुरप्रमाणहरिणभिन्नकपिलवर्णजन्तुविशेषः । इति भरतः ॥ घोंघ इति ख्यातः । तत्पर्य्यायः । कोकः २ वृकः ३ । इत्यमरः ॥

("पुलहस्य सुता राजन् मृगभास्य प्रकीर्त्तिताः। सिंहाः किम्पुरुषा व्याघ्रा यक्षा ईहामृगास्तथा"॥ इति महाभारते। आदिपर्व्वणि॥) (नायको मृगवदलभ्यामपि नायिकामीहते वाञ्छत्यत्र इति।) नाटकरूपकभेदः। इति मेदिनीकरहेमचन्द्रौ॥ (तल्लक्षणं यथा, साहित्यदर्पणे षष्ठपरिच्छेदे। "ईहामृगो मिश्रवृत्तस्त्वतुरङ्कः प्रकीर्त्तितः। मुखप्रतिमुखे सन्धी तत्र निर्व्वहणं तथा॥ नरदिव्यादनियमौ नायकप्रतिनायकौ। ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत्॥ दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः। प्रहारामर्षसम्भ्रान्तस्यकिञ्चित् किञ्चित् प्रदर्शयेत्॥ पताका नायका दिव्या मर्त्या अपि दशोद्धताः। युद्धमानीय संरब्धं परं व्याजान्निवर्त्तयेत्॥ महात्मानो वधप्राप्ता अपि वध्याः सुरत्र नो। एकाङ्गो देव एवात्र नेतेत्याद्यङ्क परे पुनः॥ दिव्यस्त्रीहेतुकं युद्धं नायकाः षड्विधीतरे"॥ "मिश्रं ख्याताख्यातम्। अन्यः प्रतिनायकः। पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश। नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीति ईहामृगः। यथा—कुसुमशेखरविजयादि"॥)

ईहामृगकः, पुं, (ईहाप्रधानो वृकः।) ईहामृगः। इति शब्दरत्नावली॥

उ

उ, उकारः। पञ्चमस्वरवर्णः। अस्योच्चारणं ओष्ठः। (यथा, शिक्षायाम्।
"कण्ठ्या वह्निविसर्ज्जनीयसहिता ओष्ठ्यावुपूपध्मानीयौ"।
तथा च मुग्धबोधे।
"उच्चयं पवर्गमवा ओ औद्याः"।)
स च ह्रस्वो दीर्घः प्लुतश्च भवति। (एवं त्रिधापि प्रत्येकं उदात्तानुदात्तस्वरितभेदेन नवमसङ्ख्यकः पुनः प्रत्येकं अनुनासिकाननुनासिकभेदात् अष्टादशविध एव भवति। अस्य ध्यानमाह।)
"उकारं परमेशानि अधःकुण्डलिनी स्वयम्। पीतचम्पकसङ्काशं पञ्चदेवमयं सदा॥ पञ्चप्राणमयं देवि चतुर्व्वर्गप्रदायकम्"। इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारोयथा,—
"ऊर्द्धाधो मध्यतः कृत्वा रेखा वामगता शुभा। तिस्रश्चन्द्रा वायुवह्नीन्द्राः शक्तिर्मात्रा परा स्मृता"॥ इति वर्णोद्धारतन्त्रम्॥ अस्य नामान्तराणि यथा,—
"उः शङ्करो वर्षुलाक्षो भूतः कल्याणवाचकः। अमरेशो दत्तकर्णः षड्वक्त्रो मोहनः शिवः॥ उग्रः प्रभूतिर्विष्णुर्विश्वकर्म्मा महेश्वरः। शत्रुघ्नश्चटिका पुष्टिः पञ्चमी वह्निवासिनी॥ कामघ्नः कामगा चेशो मोहिनी विघ्नहन्मही। उड्डसः कुटिला श्रोत्रं पारदोपो हमो हरः"॥ इति तन्त्रोक्तवर्णाभिधानम्॥ (मातृकान्यासेऽस्य दक्षिणकर्णे स्थानम्। यदुक्तं मातृकान्यासमन्त्रे "उं नमो दक्षिणकर्णे ऊं नमो वामकर्णे"।)

उ, ङ, शब्दे। इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं अकं-अनिट्।) ङ अवते गौः। इति दुर्गादासः॥

उ, य, (उ शब्दे+क्विप्+तुक् न।) सम्बोधनम्। रीषोक्तिः। अनुकम्पा। नियोगः। पदपूरणं। पादपूरणं। इति मेदिनी॥ प्रश्नः। अङ्गीकारः। इति हेमचन्द्रः॥ इदमेव उड् इति ख्यातं।
("उमेति मात्रा तपसो निषिद्धा, पश्चादुमाख्यां सुमुखी जगाम"॥
इति कुमारे। १। २६॥)

उः, पुं, (अतति विश्वमयत्वात् सर्व्वं व्याप्नोतीति। अत्+डु।) शिवः। इति त्रिकाण्डशेषः॥ ("अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः"॥ इति पुराणे।) ब्रह्मा। इति कश्चिदेकाक्षरकोषः॥

उकनाहः, पुं, (पीतरक्तवर्णाश्वः। स एव क्वचित् कृष्णरक्ताश्वविः। इति हेमचन्द्रः॥

उक्तं, क्ली, (वच्+क्त।) एकाक्षरच्छन्दः। इति मेदिनी॥ वाक्यम्॥

उक्तः, त्रि, (उच्यते यः। वच्+कर्म्मणि क्त।) कथितः। तत्पर्य्यायः। भाषितः २ उदितः ३ जल्पितः ४ आख्यातः ५ अभिहितः ६ लपितः ७ इत्यमरः॥ गदितः ८ निगदितः ९ ईरितः १० उदीरितः ११ भणितः १२ लड़ितः १३ रपितः १४ रठितः १५ भटितः १६ रटितः १७ व्याहृतः १८॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ६६। ९।
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः"॥
तथा, तत्रैव ८५। ६६।
"इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ"॥)

उक्तिः, स्त्री, (वच्+भावे क्तिन्।) कथनं। तत्पर्य्यायः। व्याहारः २ लपितं ३ भाषितं ४ वचनं ५ वचः ६। इत्यमरः॥ ("अतिसंक्षिप्तविस्तृतोक्तिभिः"। इति मुक्तावलीसूचना। तथा, चामरे।
"एकयोक्त्या पुण्यवन्तौ दिवाकरनिशाकरौ"॥)

उक्थं, क्ली, (वच्+थक्।) सामवेदः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ३। ६४। ७।
"विप्रा उक्थेभिः कवयो गृणन्ति"॥
स्तोत्रम्। यथा,
"अथ योसावन्तरक्षिणि पुरुषो दृश्यते सैवर्क तत्साम तदुयजुः तत् उक्थं तद्ब्रह्म"। इति छान्दोग्ये उपनिषदि॥)

उक्थशः [स्] पुं, (उक्थैरुक्थानि वा शंसति। मन्त्रे श्वेतवहोक्थशस्पुरोडाशोखिन्नित्यत्र श्वेतवहादीनां डस् पदस्येति वक्तव्यम्। यत्र परत्वं भावि तत्र डस्। अन्यत्र खिः॥) यजमानः। इति व्याकरणं॥ (यथा, ऋग्वेदे। ७। १६। ६।
"नरः शंसन्त्युक्थशास उक्था"।)

उक्था, स्त्री, (वच्+थक्+टाप्।) छन्दोविशेषः। एकाक्षरवृत्तमुक्था। सा द्विविधा। श्रीः १ सर्व्वगुरुः। यथा श्रीस्ते सास्यां। इति छन्दोमञ्जरी। उः २ सर्व्वलघुः। यथा। उरवतु। इति छन्दोऽर्णवः॥

उक्ष ऋषि। (भ्वादिः-परं- सकं-सेट्।) इति कविकल्पद्रुमः॥ उक्षति वृक्षं मेघः। वृट् सेकः। इति दुर्गादासः॥ ("उक्षाम्यक्षकर्णगरस्य मार्गान्"। इति भट्टिकाव्ये। ३। ५॥)

उक्षः त्रि, (उक्ष+अच्।) सिक्तः। धौतः॥

उक्षतरः, पुं, (उक्षन्+तरप्।) महादेवः। इति हेमचन्द्रः॥

उक्षा, [न्] पुं, (उक्ष+कनिन्।) वृषः। इत्यमरः। (यथा, ऋग्वेदे ८।७१।६। "उक्षा मिमाति प्रति यन्ति धेनवः"। तथा च कुमारे ७।७०।
"तत्रावतीर्य्याचुतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्षणः"॥)
ऋषभौषधिः॥ इति राजनिर्घण्टः॥

उख, गतौ। इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) पञ्चमस्वरी। ओखति। इति दुर्गादासः॥

उख, इ, गतौ। इति कविकल्पद्रुमः॥ (इदित्-भ्वादिः-परं-सकं-सेट्।) पञ्चमस्वरी। इ उक्षति। इति दुर्गादासः॥

उखर्व्वलः, पुं, (उखविशेषः। तत्पर्य्यायः। उखलः २ भूरिपत्रः ३ सुदृढः ४ दृढोत्तमः ५। अस्य गुणाः। बलदार्ढ्यं। रुचिकारित्वं। पशूनां सर्व्वदा हितकारित्वञ्च। इति राजनिर्घण्टः॥

उखा, स्त्री, (उख+क+टाप्।) स्थाली। इत्यमरः॥ हाँड़ि इति भाषा। (यथा, सुश्रुते।
"इद्धः स्वतेजसा वह्निरुखागतमिवोदकम्"॥)

उख्यं, त्रि, (उखायां संस्कृतं। उखा+यत्।) स्थालीपक्वमांसादि। तत्पर्य्यायः। पैठरं ३। इत्यमरः॥ ("शूल्यमुख्यञ्च होमवान्"। इति भट्टिः ४।६। उखायां भवः। अग्निः। यथा, अथर्ब्ववेदे।४।१४।२।
"उख्यान् (अग्नीन्) हस्तेषु बिभ्रतः"॥)

उग्र, त्रि, (उद्यति क्रुधा सम्बध्यते। उच समवाये+ऋज्रेन्द्रेत्यादिना रक्, गच्छन्तादेशः।) रौद्रं। उत्कटं। इत्यमरो मेदिनी च॥
("लोकेषु प्रथितं चोग्रं तपस्तस्य भविष्यति"।) इति रामायणे॥
"तामिस्रादिषु चोग्रेषु नरकेषु विवर्त्तनम्"॥ इति मनुः।१२।७५। यष्ट्यादिधारी। दारुणकर्म्मा। यथा मनुः ४।२१२।
"उग्राग्नं स्तुतिकाग्नञ्च पर्य्यायान्तमनिर्द्दशम्"॥)

उग्रं, क्ली, वत्सनाभनामविषं। इति राजनिर्घण्टः॥

उग्रः, पुं, (उच+रक्। गच्छन्तादेशः।) महादेवः। वायुमूर्त्तिरयं। इति भविष्यपुराणम्। (यथा, महाभारते।१३।[शिवसहस्रनामकथने।१७।६।
"उग्रो वंशकरोवंश्यो वंशनादो ह्यनिन्दितः"॥
ऋषिविशेषः। इति मार्कण्डेये। ७६। ४७।
क्षत्रियात् शूद्रायां जातः जातिविशेषः। इत्यमरः॥ आगुरि इति भाषा। (तथा च मनुः। १०।६।
"क्षत्रियात् शूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते"॥)
अस्य कर्म्म विलवासिगोधादिबधबन्धनम्"। तथाच मनुः। १०।४६।
"क्षत्रोग्रपुक्कसानान्तु विलौकोबधबन्धनम्"॥

नक्षत्रगणविशेषः । स च पूर्व्वफल्गुनीपूर्व्वाषाढ़ा-पूर्व्वभाद्रपदमघाभरण्यात्मकः । इति ज्योतिर्य्यौभाञ्जनदत्तः । इति शब्दचन्द्रिका ॥ केरल-देशः । इति हेमचन्द्रः ॥ (रुद्रः । उग्रोदेवः । खनामख्यातो दानवविशेषः । यथा हरिवंशे । "वेगवान् केतुमानुग्रः सोग्रश्चग्रो महासुरः" ॥ धृतराष्ट्रस्य शतपुत्रेषु एकः । यथा, धृतराष्ट्रपुत्र-नामकथने १ । ११७ । ११ । महाभारते । "उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः" ॥ नरेन्द्रादित्याख्यस्य काश्मीरराजस्य खनामख्यातो गुरुः । यथा, राजतरङ्गिण्यां । "दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात्" ॥ विष्णुः । इति महाभारते । १३ । १४९ । ५९ ॥ स्त्री, योगिनीभेदः । यथा, कालिकायां । ६० अध्यायः । "महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च" ।)

उग्रकाण्डः पुं, (उग्रः काण्डो यस्य ।) कारवेल्लः । इति राजनिर्घण्टः ॥ करेला इति भाषा । कारवेल्ल-शब्दे ऽस्य गुणादिकं ज्ञेयम् ।)

उग्रगन्धं, क्ली, (उग्रो गन्धो यस्मिन् ।) हिङ्गु । इति राजनिर्घण्टः ॥

उग्रगन्धः, पुं, (उग्रश्चासौ गन्धो यस्मिन् ।) लशुनः । कट्फलः । अर्ज्जकवृक्षः । इति राजनिर्घण्टः ॥ चम्पकः । इति शब्दचन्द्रिका ॥ उत्कटगन्धयुक्ते त्रि ॥ (यथा, हारीते प्रथमस्थानेऽष्टमाध्यायः । "उग्रगन्धं पुराणं स्यादष्टवर्षोषितं घृतम् । यथा यथा जरां याति गुणवत्त्वात्तथा तथा" ॥)

उग्रगन्धा, स्त्री, (उग्रः गन्धो यस्याः ।) अजमोदा । वचा । छिक्किकौषधी । इति मेदिनी ॥ अज-गन्धा । यवानी । इति राजनिर्घण्टः ॥ ("वचा, यमानी च" । इति भावप्रकाशे पूर्व्वखण्डे अनेकार्थ-नामवर्गः ॥)

उग्रचण्डा, स्त्री, (उग्रा चण्डा कोपना स्त्री ।) देवी-भेदः । यथा महिषासुरं प्रति भगवतीवाक्यम् । "उग्रचण्डेति या मूर्त्तिर्भद्रकाली ह्यहं पुनः । यया मूर्त्त्या त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता ॥ एतासु मूर्त्तिषु सदा पादलग्नो ह्यसौ भवान् । पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसाम् ॥ आदिदृष्टौ उग्रचण्डामूर्त्त्या त्वं निहतः पुरा । द्वितीयदृष्टौ तु भवान् भद्रकाल्या मया हतः ॥ दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगम्" । इत्यादि ॥ * ॥ तस्याः प्रादुर्भावो यथा । श्रीभगवानुवाच । "उग्रचण्डा तु या मूर्त्तिरष्टादशभुजाऽभवत् । सा नवम्यां पुरा कृष्णपक्षे कन्यां गते रवौ ॥ प्रादुर्भूता महाभागा योगिनीकोटिभिः सह" ॥ * ॥ अनया मूर्त्त्या दत्तयज्ञभङ्गः कृतः । यथा,— "आषाढ़स्य तु पूर्णायां सज्जं द्वादशवार्षिकम् । दक्षः कर्त्तुं समारेभे कृताः सर्व्वे दिवौकसः ॥ ततोऽहं न कृतस्तेन दक्षेण सुमहात्मना । कपालीति सती चापि तज्जायेति च नो कृता ॥ ततो रोषसमायुक्ता प्राणांस्तत्याज सा सती । त्यक्तदेहा सती चापि चण्डमूर्त्तिस्तदाभवत् ॥

ततः प्रवृत्ते यज्ञे तु तस्मिन् द्वादशवार्षिके । नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिधृक् ॥ योगनिद्रा महामाया योगिनीकोटिभिः सह । सतीरूपं परित्यज्य यज्ञभङ्गमथाकरोत् ॥ शङ्करस्य गणैः सर्व्वैः सहिता शङ्करेण च । स्वयं बभञ्ज सा देवी महासत्त्रं महात्मनः ॥ ततो देव्या महाक्रोधे व्यतीते चिदिवौकसः । पूजयाञ्चक्रुरतुलां देवीं पूर्व्वोदितेन वै ॥ पूर्व्वोदितविधानेन पूजामस्या दिवौकसः । कृत्वैव परमामापुर्निर्वृतिं दुःखहानये ॥ एवमन्यैरपि सदा कार्य्यं देव्याः प्रपूजनम् । विभूतिमतुलां प्राप्तुं चतुर्व्वर्गप्रदायकम् ॥ यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे । न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ॥ क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै । परत्र च महामायावलिर्भूत्वा स जायते ॥ अष्टम्यां रुधिरैर्म्मांसैर्म्महामांसैः सुगन्धिभिः । पूजयेद्भक्तजातीर्यैर्व्वलिभिर्भोजनैः शिवां" ॥ इत्यादि ॥ * ॥ तन्मन्त्रो यथा,— "भद्रकालीमुग्रचण्डां महामायां महोत्सवे । नेत्रबीजन्तु सर्व्वासां पूजने परिकीर्त्तितम् । तत्त्वं यथोग्रचण्डायाः पृथक् त्वं शृणु भैरव ॥ आद्यद्वयं नेत्रबीजं मन्त्रस्योपान्तमन्तरे । वह्निनान्तस्थरेणेन्दुविन्दुभ्यां तत्त्वमौग्रकम्" ॥ इत्यादि च कालिकापुराणे ५९ । ६० अध्यायौ ॥

उग्रतारा, स्त्री, (उग्रादपि भयात् भक्तान् त्रायति तारयति वा या ॥ उग्र + तॄ + णिच् + अच् + टाप् । यथा, निरुक्तौ । "उग्रादपि भयात् त्रायति यस्मात् भक्तान् सदा-म्बिका" ।) देवीविशेषः । अस्या उत्पत्त्यादि यथा,— "सर्व्वेषामेव देवानां यज्ञभागानपाहरत् । स्वयं शुम्भो निशुम्भश्च दिक्पालत्वं तथा गतौ ॥ सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् । गङ्गावतारनिकटे महामायां प्रतुष्टुवुः ॥ अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः । मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥ युष्माभिरमरैरत्र स्तूयते का च भाविनी । किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ॥ एवं ब्रुवन्त्या मातङ्गास्तस्यास्तु कायकोषतः । समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥ शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् । तस्मात्तयोर्बधायाहं स्तूयेऽद्य सकलैः सुरैः ॥ विनिःसृतायां देव्यास्तु मातङ्ग्याः कायतस्तदा । भिन्नाञ्जननिभा कृष्णा साभूद्घोरी च तत्क्षणात् ॥ कालिकाख्याभवत् सापि हिमाचलकृताश्रया । तामुग्रतारामाम्नायो वदन्तीह मनीषिणः ॥ उग्रादपि भयात्त्राति यस्माद् भक्तान् सदाम्बिका । एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च" ॥ * ॥ "एषैवैकजटाख्यातिर्यस्मात्तस्या जटाधिका । शृणु त्वं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ॥ यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।

चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥ खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः । कर्त्रीञ्च खर्परञ्चैव क्रमादामेन बिभ्रतीम् ॥ खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् । मुण्डमालां धरां ग्रीर्षे ग्रीवायामपि सर्व्वदा ॥ वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् । कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥ वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् । विनस्य सिंहपृष्ठे तु लेलिहाना शवं स्वयम् ॥ साट्टहासमहाघोरा रावयुक्तातिभीषणा । चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः" ॥ * ॥ "एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः । महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च । घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ॥ भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" । इति कालिकापुराणे ६० अध्यायः ॥ * ॥ अपिच "ब्रह्मशैलस्य पूर्व्वस्यां भूमिपीठे व्यवस्थिता । "चारुनिम्नं शुभावर्त्तं कामाख्यानाभिमण्डलम् ॥ यत्रोग्रतारारूपेण रमते परमेश्वरी । तत्र तेनैव रूपेण पूजितव्या शुभात्मिका ॥ तस्यास्तु बीजं पूर्व्वस्मिन् उत्तरे प्रतिपादितम् । रूपं शृणु नरश्रेष्ठ येन ध्येया सदाशिवा ॥ कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका । चतुर्भुजा कृष्णकी तु दक्षे कर्त्तृकखर्परौ ॥ खड्गं चैन्दीवरं वामे शीर्षे त्वेकजटां पुनः । वामपादं शवस्योर्व्वे निधायोत्याय दक्षिणम् ॥ शवस्य हृदये न्यस्य साट्टहासं प्रकुर्व्वती । नागहारशिरोमालाभूषिता कामदा परा ॥ चिकोणं मण्डलं चास्या ऊंकारमध्यबीजकम् । द्वारे नानायोगिनीनां नामान्यस्यास्तु तत्त्वके ॥ ज्ञेयानि नरशार्दूल तत्प्रोक्तं वान्यगोचरे" । इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ सा च वशिष्ठशापात् वामा भूता । यथा,—

और्व्व उवाच ।

"एतद्विष्णोर्व्वचः श्रुत्वा विधिना सहितः स तु । अङ्गीचकार हृदये तद्वचः साध्यसाधने ॥ विसृज्य तान् ब्रह्मविष्ण्वमान् हृषभवाहनः । आदाय सगणान् सर्व्वान् कामरूपान्तरं ययौ ॥ उग्रतारां ततो देवीं गणांश्च प्राह शङ्करः । उत्सारयन्तु सकलान् इमान् लोकान् गणा द्रुतम् ॥ उग्रतारे महादेवि त्वञ्चाप्युत्सारय द्रुतम् ॥ ततो गणाः कामरूपादेवीचाप्यपराजिता । लोकानुत्सारयामासुः पीठं कर्त्तुं रहस्यकम् ॥ उत्सार्य्यमाने लोके तु चतुर्व्वर्णैर्द्विजातिभिः । सन्ध्याचलो गतो विप्रो वशिष्ठः कुपिलो मुनिः ॥ सोऽप्युग्रतारया देव्या उत्सारयितुमीश्वया । गणैः सह द्रुतः प्राह शापं कुर्व्वन् सुदारुणम् । यस्मादहं धृतं वामे त्वयोत्सारयितुं मुनिः ॥ तस्मात्त्वं वाम्यभावेन पूज्या भव समन्विका । भर्त्स्यन्ति स्वेच्छवत् यस्मादृणास्ते मन्दबुद्धयः । भवन्तु स्वेच्छास्तस्माद भवत्या कामरूपके ॥

महादेवोऽपि यस्मान्मां निःसारयितुमुद्यतः।
तपोवलं मुनिं दान्तं म्लेच्छवेदपारगम्॥
तस्मात् म्लेच्छप्रियो भूयात् शङ्करस्त्रिभसप्तकः।
एतत्तु कामरूपाख्यं म्लेच्छैर्गम्यं भवद्भुवं॥
स्वयं विष्णुर्न चायाति यावत् कालमिदं पुनः।
विरलास्तागमाः सन्तु यत्र तत्प्रतिपादकाः॥
विरलं यस्तु जानाति कामरूपागमं बुधः।
स एव प्राप्तकालेऽपि पूर्ब्बं फलमवाप्स्यति॥
एवमुक्ता वशिष्ठस्तु तत्रैवान्तरधीयत।
ते गणाः म्लेच्छतां याताः कामरूपे सुरालये॥
वामाऽभूदुग्रतारापि ग्रम्भुर्म्लेच्छरतोऽभवत्"।
इति च कालिकापुराणे ८३ अध्यायः॥

उग्रत्वं, क्ली, (उग्रस्य भावः। उग्र + त्व।) उग्रता। उत्कटता। तत्पर्य्यायः। चण्डता २। इति हेमचन्द्रः॥

उग्रधन्वा, [न्] पुं, (उग्रं धनुर्यस्य। धनुषश्चेत्यनङ्।) इन्द्रः। इति हेमचन्द्रः॥ ("स इषुहस्तैः स निषङ्गिभिर्वशी संस्कर्त्ता सायुध इन्द्रो गणेन। संस्कृजित् सोमपा बाऽऽगद्व्युग्रधन्वा प्रतिहिताभिरस्ता"। इति ऋग्वेदे। १०।१०३।१॥ शिवः। उग्रधनुर्विशिष्टे, त्रि॥)

उग्रनासिकः, त्रि, (उग्रा दीर्घा नासिका यस्य।) दीर्घनासिकाविशिष्टः। इति हेमचन्द्रः॥

उग्रशेखरा, स्त्री, (उग्रस्य महादेवस्य शेखरं मस्तकं वासस्थानत्वेन यस्याः।) गङ्गा। इति शब्दरत्नावली॥

उग्रसेनः, पुं, (उग्रा सेना यस्य।) मथुरादेशस्य राजविशेषः। स च आहुकपुत्रः। कंसराजपिता च। परीक्षित्पुत्रः। इति श्रीभागवतम्॥ (तथा महाभारतेऽपि "जनमेजयः पारिक्षितः सहभ्राद्भिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेनश्च" इति। तथा च तत्रैव १।६५।३२।
"भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा"॥)

उग्रसेनजः, पुं, (उग्रसेनात् जायते इति। उग्रसेन + जन + ड।) कंसनामासुरराजः। इति त्रिकाण्डशेषः॥

उग्रा, स्त्री, (उच्यति क्रुधा सम्बध्यते या। उच समवाये + ऋज्येन्द्रादिना रक् गस्यान्तादेशः। ततष्टाप्।) यवानी। वचा। इति राजनिर्घण्टः॥ ("दन्तचाले हितं श्रेष्ठं तिलोग्राचर्व्वणं सदा"। इति वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे।) हिङ्किकौषधी। इति हेमचन्द्रः॥ उग्रजातिस्त्री। (यथा मनुः १०। १९।
"क्षत्रजातिव्रतोयायां व्यपाक इति कीर्त्यते"॥) धन्याकम्। इति रत्नमाला॥ प्रखरा नारी॥

उङ्गुजः, पुं, उत्कञ्जः। इति शब्दमाला॥ उकुल् इति भाषा।

उच, इ र य समवायने। मिश्रणे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) क्रयादिः। इ र औचत् औचित्। अस्मात् पुरुषादित्वात् नित्यं स इत्यन्ये। य उचते केशः स्नानात्। इति दुर्गादासः॥

उचितं, त्रि, (वच + "शक्तिवचिकुचिकुटिभ्यः कितच्" इति कितच् प्रत्ययः।) विदितम्। न्यस्तम्। परिमितम्। युक्तम्। इति हेमचन्द्रः॥ ग्राह्यम्। इति शब्दरत्नावली॥

उच्चं, त्रि, (उच्चिनोतीति। चिञ चित्यां अन्येभ्योऽपि इति डः। उच्चैस्त्वमस्ति अत्र वा। अर्श आद्यच्, अव्ययानामिति टिलोपः।) उपरि। ऊँचु इति भाषा। तत्पर्य्यायः। प्रांशु २ उन्नतम् ३ उद्यम् ४ उच्छ्रितम् ५ तुङ्गम् ६। इत्यमरः॥ उत्तुङ्गं ७। इति तट्टीका॥ (यथा, रघुः ३।१३।
"ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः,
असूयगैः सूचितभाग्यसम्पदम्"।)
(ज्योतिषोक्तं ग्रहाणामुच्चस्थानम्। यथा,
"अजतुलभमृगाङ्गनाकुलीराः
झषवणिजौ च दिवाकरादितुङ्गाः।
दशशिखिमनुयुक्तिथीन्द्रियांशै-
स्त्रिगवकविंशतिभिश्च तेऽप्यनीचाः"॥
सूर्य्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टा उच्चस्थानानि स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि, तत्रोच्चेष्वपि दशमादयो राशिचिह्नाद्याः यथाक्रमं उच्चेषु परमोच्चा नीचेषु परमनीचा भवन्तीति॥)

उच्चकैः, [स्] व्य, (उच्चैस् + अव्ययसर्व्वनाम्नां इति प्राग्दिवीयेषु अर्थेषु टेः प्रागकच्।) उच्चैः। अतिशयोच्चम्। इति द्विरूपकोषः॥ (यथा विष्णुपुराणम्।
"वशिष्ठाद्यैर्दयासारैः स्रोतः कुर्व्वद्भिरुच्चकैः"।
उन्नतम्। यथा माघे १।१२।
"गिरेस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः"॥)

उच्चटा, स्त्री, (उत् + चट् + अच् + टाप्।) गुञ्जा। भूम्यामलकी।
("उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते।
शृतावश्युटामूलं पेयमेवं बलार्थिना"॥
इति सुश्रुते चिकित्सितस्थाने २६।)
नागरमुस्ता। इति राजनिर्घण्टः॥ दम्भः। चर्य्या। लशुनप्रभेदः। इति हेमचन्द्रः॥ द्रुमविशेषः। निर्व्विषी इति ख्याता। चैंचुया इति केचित्। इत्यमरटीकायां भरतः। तत्पर्य्यायः। चूड़ाला २ चक्रला ३। इत्यमरः॥ अम्बुपर्णा ४ जटिला ५ मुक्तला ६ उत्तानकः ७। इति रत्नमाला॥

उच्चण्डः, त्रि, (उत् चण्डतीति। चडि कोपे + अच्।) त्वरान्वितः। अविलम्बितः। इत्यमरः॥

उच्चतरः, पुं, (उच्चः उन्नतस्तरः।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥ (नारिकेलशब्देऽस्य विवरणं ज्ञातव्यम्॥)

उच्चतालं, क्ली, (उच्चः मत्ततया प्रचण्डस्तालो यत्र।) नागगोष्ठ्यां नृत्यम्। इति हेमचन्द्रः॥

उच्चदेवः, पुं, (उच्चः सर्व्वदेवमयत्वात् श्रेष्ठः देवः।) श्रीखण्डः। इति त्रिकाण्डशेषः॥

उच्चन्द्रः, पुं, (उत् स्वल्पं अवशिष्टश्चन्द्रो यस्मिन्।) रात्रिशेषः। इति शब्दरत्नावली॥

उच्चयः, पुं, (उत् + चि + अच्।) परिधानवस्त्रग्रन्थिः। तत्पर्य्यायः। नीवी २। इति हेमचन्द्रः॥ (पुष्पादीनामुच्चालनम्। यथा, रघुः १०।४४।
"करिष्यामि प्ररोहन्तीरुच्छ्रिरःकमलोच्चयम्"।
"पुष्पोच्चयं नाटयति" इति शाकुन्तले १माङ्के॥ राशिः। समष्टिः। यथा,—
"शिलोच्चयोऽपि क्षितिपालमुच्चैः"। रघुः २।५१।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"।
इति साहित्यदर्पणे। २। १॥)

उच्चलं, क्ली, (उच्चलतीति। उत् + चल् + अच्।) मनः। इति हेमचन्द्रः॥

उच्चललाटा, स्त्री, (उच्चमुन्नतं ललाटं यस्याः।) उन्नतललाटवती। इति त्रिकाण्डशेषः॥

उच्चाटनं, क्ली, (उत् + चट् + णिच् + ल्युट्।) उत्खातम्। उचाटन इति भाषा। षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषः। अस्य देवता दुर्गा। तिथिः क्षणा चतुर्दशी अष्टमी च। वारः शनिः। जपमाला साधस्य केशसूत्रग्रथिततुरङ्गदशनोद्भवा। फलम्। उच्चाटनं स्वदेशादेर्भ्रंशनं परकीर्त्तितम्॥ इति शारदातन्त्रम्॥

उच्चारः, पुं, (उच्चार्य्यते परित्यज्यते इति। उत् + चर + णिच् + घञ्।) विष्ठा। इत्यमरः॥ ("मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः"। इति मनुः। ४।५०।)
"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्लघुकोष्ठस्य स्निग्धस्निग्धोदरामयः"॥
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमोऽध्यायः।)
उच्चारणम्॥

उच्चारणं क्ली, (उत् + चर + णिच् + ल्युट्।) कथनम्। वाङ्निष्पत्तिकरणम्॥ यथा। "हसे अकारउच्चारणार्थः"। इति मुग्धबोधव्याकरणे, सन्धिसंज्ञा २। अपिच।
"कर्म्मोच्चारणमात्रेण स्पृष्टमात्रानुबन्धतः"।
इति कविकल्पद्रुमः॥

उच्चावचः, त्रि, (उदक् च अवाक् च। मयूरव्यंसकादित्वात् साधुः।) अनेकप्रकारः। तत्पर्य्यायः। नैकभेदः २। इत्यमरः॥ (यथा, मनुः १।१८।
("उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च"।
"उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः"।
इति च मनुः ६। ७३॥)

उच्चिलटः, पुं, द्रव्यगुणमत्स्यः। क्षोपणपुरुषः। इति मेदिनी॥

उच्चूलः, पुं, (उद्गता चूडा यस्य। ह्रस्य लत्वम्।) ध्वजोर्द्धमुखकूर्चः। इति हेमचन्द्रः॥ निशानेर पाग इति भाषा। अस्य पटुका अवचूलः॥

उच्चैः, [स्] व्य, (उच्चीयते इति। उत् + चि + डैस्।) उच्चम्। महत्। इत्यमरः॥ (यथा, कुमारे २।४७।
"उच्चैरुच्चैरवास्तेन हयरत्नमहारि च"।
"शिलोच्चयोऽपि क्षितिपालमुच्चैः"।
इति रघुः २।५१। यथा, माघः २। ५१।
"अक्षता हेलया पादमूच्चैर्भूर्जस उद्विदाम्"॥)

उच्चैःश्रवाः [स्] पुं, (उच्चैः श्रवो यशो यस्य। यद्वा उच्चैः श्रवसी यस्य। यद्वा उच्चैः शृणोतीति उच्चैः

+ञु+असुन्।) इन्द्रघोटकः। इत्यमरः॥ स तु श्वेतवर्णः समुद्रमन्थनोत्थितः। इति श्रीभागवतम्॥ ("उच्चैःश्रवैरवास्तेन हयरत्नमहारि च"॥ इति कुमारे। २। ४७॥)

उच्चैर्घुष्टं, क्ली, (उच्चैर्घुष्यते स्म। घुष+क्त।) घोषणा। इत्यमरः॥

उच्छ, इ ग्र उञ्छे। इति कविकल्पद्रुमः॥ (तुदां-इदित्-परं-सकं-सेट्।) ऋक्षादिः। इ उञ्छति। ग्र उञ्छती उञ्छन्ती। उञ्छ उद्धृतशस्यस्य ग्रेषाप-हरणम्। (यथा, हलायुधः।

"सुलभं ग्रस्यमुञ्छन्ति यद्देशे व्रतिनो द्विजाः"।

उञ्छः क्षोटनमित्येके। इति दुर्गादासः॥

उच्छ, इं ग्र वन्धे। समापने। अतिक्रमे। वर्जने। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) इं उच्छः। ग्र उच्छतो उच्छन्ती। चत्वारोऽर्थाः। समापने। (यक०) उच्छति रात्रिः। "मरणां व्युष्टायामुषसि जनयासास तनयम्"। व्युष्टायां समाप्तायामित्यर्थः। इति दुर्गादासः॥

उच्छन्न, त्रि, (उत्+छद्+क्त।) नष्टम्। इति श्रीभगवद्गीता॥

उच्छादनं, क्ली, (उत्+छद्+णिच्+ल्युट्।) उत्-सादनम्। उद्वर्त्तनम्। गन्धद्रव्यद्वारा ग्ररीरनिर्म-लोकरणम्॥ इत्यमरटीका॥

("यथाग्रक्तिप्रदानेन स्नापनोच्छादनेन च"। इति रामायणे। २। १११। १०॥)

उच्छिलीन्ध्र, क्ली, (उत्थितं शिलीन्ध्रम्।) छत्रिका। इति श्रीभागवतम्॥ कोड़क छाता इति भाषा) ("उद्गतशिलीन्ध्रे, त्रि, "कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्"॥ इति मेघदूते। पूर्व्वमेघे। १८॥)

उच्छिष्ट, त्रि, (उत् ग्रिष्यते यत्। उत्+ग्रिष+क्त॥) भुक्तावग्रिष्टम्। इति पुराणम्॥ एँटो इति भाषा। तद्भोजनप्रायश्चित्तं यथा (प्रायश्चित्ततत्त्वे चाण्डालाद्यन्नभक्षणप्रायश्चित्तप्रकरणे।) विष्णुः। "ग्रामग्राद्धाग्ने त्रिरात्र पयसा वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाग्ने च वमनं कृत्वा सप्तरात्रमुपवसेत्" इति। एवं उच्छिष्टे यः पराक उक्तोऽङ्गिरसा सोऽपि प्रागुक्तसकृदापदादिविषये बोध्यः। विष्णु नापि अनुच्छिष्टे पराकोक्तेः। तथाचाङ्गिराः। "चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे। द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुध्यति"॥ यत्तु मिताक्षरायामापस्तम्बः।

"अन्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः। चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्रविशां विधिः"॥ चान्द्रं चान्द्रायणम्। कृच्छ्र तप्तकृच्छ्रम्। एतच्च ब्राह्मणस्य सकृदज्ञानविषयं बलात्कारानुत्तारे-ऽप्यन्नेतरतामूलाद्युत्कृष्टपरञ्च। तचाज्ञाने आप-स्तम्बेन उच्छिष्टे चान्द्रायणविधानात्। अङ्गिरसा अन्यावसायिनामित्यादि प्रागुक्तवचने सामान्यत-स्तप्तकृच्छ्रविधानात् अनुच्छिष्टेऽपि तथात्वादेव सर्व्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं बोध्यम्। प्राय-श्चित्तविवेके संसर्गप्रकरणेऽप्येवम्। क्षत्रियवि-

ग्रीक्षापदि ज्ञेयम्"॥*॥ "सर्व्वत्रोच्छिष्टे तु व्रत-द्वैगुण्यं आपदेज्ञानमुक्तोत्तारिते मासयावकव्रतं तदग्नौ धेनुदयं षट्कार्षापणा वा देयाः। तत्रो-च्छिष्टान्ने पराक इति। अभ्यासभेदे त्वाद्यत्ति-रुक्तेति"। इति प्रायश्चित्ततत्त्वम्॥ *॥ अथो-च्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। (तत्रैव उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तप्रकरणे द्रष्टव्यम्) आपस्तम्बः।

"भुक्तोच्छिष्टस्नानाचान्तखाण्डालैः स्पृष्टे वा। प्रमादात्तु स्पर्शनं गच्छेत् तत्र कुर्य्यादिग्रोधनम्॥ गायत्र्यष्टसहस्रन्तु जपेदां वा ग्रतं जपेत्। चिराचोपोषितो भूत्वा पञ्चगव्येन शुध्यति॥ भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाग्रने तथा"॥ प्राजापत्यं ज्ञाने अर्द्धोच्छिष्टो येनाद्यग्रास आस्ये निक्षिप्तः न तु निगीर्णः। दक्षः।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः। संस्पर्ग्गे यदि गच्छेत्तु ग्रवोदक्यान्त्यजैः सह॥ दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।" दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥ काग्यपः।

स्रमूत्रकरान्त्यचाण्डालमद्यमाद्यरजस्वलाः। यच्चोच्छिष्टः स्पृग्रेत्तच्च कृच्छ्रं सान्तपनं चरेत्॥ एतदज्ञानाभ्यासे सान्तपने धेनुदयं॥ ब्रह्मपुराणे।

"उच्छिष्टेन तु स्पृष्टेन विप्रः स्पृष्टस्तु तादृग्रः। उपवासेन शुद्धिः स्यात् स्नात्वा संस्पृश्य एव वा॥ उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृग्रः। उभौ स्नानं प्रकुर्व्वीत सद्य एव समाहितौ"॥ अनुच्छिष्टशूद्रस्पर्शे उच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः॥ त्यक्तं। इति हेमचन्द्रः॥ (यथा, व्रतपद्यब्राह्मणे २।३१।११। "ऋतोच्छिष्टमिदम्"। इति। अनाचान्तो भक्षकः। यथा मनुः २। ५६।

"नचैवात्यग्नं कुर्य्यात् नचोच्छिष्टः क्वचित् व्रजेत्"।

उच्छिष्टभोजनः, पुं, (उच्छिष्टं देवनैवेद्यावग्रिष्टं भो-जनं यस्य।) देवनैवेद्यबलिभोजनकर्त्ता। इति हेमचन्द्रः॥

उच्छिष्टमोदनं, क्ली, सिक्थम्। इति राजनिर्घण्टः। भोम इति भाषा॥

उच्छीर्षकं, क्ली, (उत् ऊर्द्धस्थापितं ग्रीर्षं मस्तकं येन। बहुव्रीह्यर्थे कन्।) उपधानम्। इति हलायुधः। वालिग्र इति भाषा॥

उच्छून, त्रि, (उत्+ग्वि+क्त। ओदितश्चेति तस्य नः। यजादित्वात् सम्प्रसारणे पूर्व्वरूपे च हल इति दीर्घः।) स्फीतम्। उन्नतम्। वर्द्धितम्। तथा च प्राचीनाः।

"कामिन्याः कियदुच्छूनमुरः प्रेयान् समीक्षते। नव्यं ग्रालिमिवोत्पन्नमतिदोनः क्षणोबलः"॥ (स्वर्गग्रामटिकाविलुण्ठनहथोच्छूनैः किमेभिर्भुजैः। इति साहित्यदर्पणे। १ परिच्छेदे॥)

उच्छृङ्खलं, त्रि, (उद्गतं गृङ्खलं निगड़ं यस्य।) गृङ्ख-लारहितं। तत्पर्य्यायः। अबाधं २ उद्दाम ३ अनि-यन्त्रितं ४ अनर्गलं ५ निरङ्कुग्रं ६। इति हेम-

चन्द्रः॥ (यथा, हितोपदेग्रः ३। ९७।

("अन्यदुच्छृङ्खलं सत्त्वमन्यत् ग्राङ्खनियन्त्रितम्"॥ "सम्मूर्च्छदुच्छृङ्खलग्रङ्खनिस्वनः"। इति माघः। १२। १६॥)

उच्छ्रयः, पुं, (उत्+ग्रि+अच्।) पर्व्वतरुक्षादेरु-न्नता। तत्पर्य्यायः। उच्छ्रायः २ उत्सेधः ३। इत्य-मरः॥ ("प्राप्ते यूपोच्छ्रये तस्मिन् बद्ध्वैवाः खादिराच्च वटे"। इति रामायणे॥)

उच्छ्रायः, पुं, (उत्+ग्रि+घञ्।) उच्छ्रयः। उन्नता। इत्यमरः॥ (यथा, याज्ञवल्क्ये।

"ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च"। "गृहोच्छ्रायैः कुमुदविग्रदैर्यो वितत्य स्थितः खं"॥ इति मेघदूते। ६०॥)

उच्छ्रितं, त्रि, (उत्+ग्रि+क्त।) संजातं। समुन्नद्धं। उच्चं। प्रवृद्धं। इति मेदिनी॥ (यथा, महाभा-रते १३। दानधर्म्मकथने। ८१। २६। "सर्व्व-मर्य्यैर्भान्ति गृहैरभ्रमिरुच्छ्रितैः"।) त्यक्तं। इति हेमचन्द्रः॥

उच्छ्वसितं, त्रि, (उत्+श्वस्+क्त।) प्रफुल्लं। विक-सितं। इति हेमचन्द्रः॥ (भावे+क्त।) जीवितम्। स्फुरितम्। प्राणनम्। यथा, मेघदूते। १०१। "त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव"। "सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्"। इति ग्राकुन्तले ३ अङ्के॥)

उच्छ्वासः, पुं, (उत्+श्वस्+घञ्।) अन्तर्मुखश्वासः। ("प्रियामुखोच्छ्वासविकम्पितं मधु"। इति ऋतु-संहारे ग्रीष्मवर्णनाद्याः ३।) तत्पर्य्यायः। आहरः २ आगः ३। इति हेमचन्द्रः॥ आख्यायिकायामु-च्छ्वासः। आश्वासः। इति मेदिनी। (यथा, काद-म्बर्य्यां आख्यायिकालक्षणकथने,—

"वक्त्रं चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम्"॥)

उज्जयनी, स्त्री, विग्रालानगरी। इति त्रिकाण्डग्रेषः॥ उज्जैन इति पश्चिमदेग्रे ख्याता। बङ्गदेग्रे तु उजनी। इयं मालवदेग्रस्य नगरी। मोक्षदसप्त-पुर्य्यन्तर्गतपुरी। पुरा विक्रमादित्यराजधानी च अधुना महाराष्ट्रेग्राधिग्रता॥ (यथा, मेघदूते पूर्व्वमेघे। २९॥

"सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः"।)

उज्जयन्तः, पुं, रैवतपर्व्वतः। इति हेमचन्द्रः॥

उज्जयिनी, स्त्री, उज्जयनीनगरी। तत्पर्य्यायः। विग्रालाः २ अवन्ती ३ पुष्पकरण्डिनी ४। इति हेमचन्द्रः॥

उज्जासनं, क्ली, (उत्, जसु हिंसायाम्। णिच् भावे ल्युट्।) मारणम्। वधः। इत्यमरः॥

उज्जृम्भं, त्रि, (उत्+जृम्भि+घञ्।) प्रफुल्लम्। प्रस्फुटितम्। इति हेमचन्द्रः॥ ("उज्जृम्भमदनाभोगा भिनत्त्यङ्गानि सारुणा"। इति साहित्यदर्पणे। ३ परिच्छेदे॥)

उज्जृम्भितं, त्रि, (उत्+जृम्भि+क्त॥) प्रफुल्लम्। चेष्टायां, क्ली। इति मेदिनी॥

उज्ज्वलं, त्रि, (उद्गतं ज्वलति प्रकाशते इति। उत्+ज्वल+अच्।) दीप्तम्। विग्रदम्। विकाग्रितम्।

इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ३ परिच्छेदः । "अस्माकं सखि ! वाससी न रुचिरे यैर्वेधकं नोज्ज्वलं" ।
"विचित्रोज्ज्वलवेषा तु बबन्धूपुरनिःस्वना" ॥)

उज्ज्वलं, क्ली, (उत् + ज्वल + अच् ।) स्वर्णम् । इति राजनिर्घण्टः ॥

उज्ज्वलः, क्लीं (उत् + ज्वल + अच्) शृङ्गाररसः । इत्यमरः ॥ (यथा, नैषधे १ । १ ।
"स राजिराजीन्महसां महोज्ज्वलः" ॥)

उज्झ ग् त्यागे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ओपध इत्येके । उज्जिज्झिषति । औज्जिज्झत् । ग उज्झती उज्झन्ती । इति दुर्गादासः ॥ अन्यत् उद्झधातौ द्रष्टव्यम् ॥

उज्झः, पुं, (उज्झतीति । उज्झ + अच् ।) त्यागः । विसर्जनम् । (यथा, मनुः ११ । ५६ ।
"ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः" ॥)

उज्झितं, त्रि, (उज्झ + क्त ।) उत्सृष्टम् । त्यक्तम् । वर्जितं । इति हलायुधः ॥ (यथा किराते । ५ । ६ ।
"अविरतोज्झितवारिविषागुभिः" ।
"उज्झितायास्त्वया नाथ ! तदैव मरणं वरम्" ॥
इति रामायणे २ । ३० । २० ॥)

उज्झं, क्ली, (उज्झि + घञ् ।) पक्षिच्छर्दादानवत् ग्रस्य ग्रहणं । यथा । उपात्तग्रस्यात् क्षेत्रात् ग्रेषावचयने । उज्झेन पक्षिच्छर्दादानवद्ग्रहणेन ग्रिल्यते सङ्गीयते उज्झग्रिलं उज्झिउञ्छे ग्रिल उञ्छे ञ्छोरित्युक्तेः छत्वेति इञुडत्वात् कः उज्झग्रिलम् । संघातं विगर्हीत विपर्य्यस्तञ्च नाम । "ग्रक्या न चेदुञ्छग्रिलेन वृत्तिः । फलेन मूलेन च वारिणा च" इति । समाहारद्वन्द्वे उञ्छं ग्रिलञ्च । उञ्छं भैक्षञ्च यच्चान्यत्तत् परिग्रहणन्तु ऋतम् । इति निगमाभिधाने क्लीवम् । पुमानुञ्छऋतग्रिलं इति वोपालितेः पुंस्युञ्छः । भवभूतिकृतग्रिलोञ्छे इति गोवर्द्धनः । केचिदुञ्छग्रिलयोर्भेदमाहुः । "प्रतिग्रहात् ग्रिलं ग्रेयस्ततोऽप्युञ्छः प्रशस्यते" । इति तच्च शालादेर्निपतितपरित्यक्तमञ्जरीणां ग्रादानं ग्रिलं । ग्रिलं धान्यमञ्जरीसंग्रहः । इति स्वामी च । एकैकग्रः कपोतवद्धान्यकणोद्गृहणमुञ्छः । तदुक्तं उञ्छो धान्यकणोच्चय इति । ग्रिलं शालयादि दन्त्यादि च । धर्म्मोपात्तं सत्यमिति ऋतम् । इति उञ्छग्रिलशब्दटीकायां भरतः ॥

उञ्छः, पुं, (उञ्छि उञ्छं + घञ् ।) उञ्छग्रिलम् । इति जटाधरः ॥ (यथा, रामायणे । २ । २४ । २ ।
"मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत्" ॥)

उञ्छनं, क्ली, (उञ्छि + ल्युट् ।) आपणादिपतितकणोपादानम् । इति श्रीभागवतम् ॥ उञ्छन खुंटिया लच्योन चुनिया लच्योन कुड़ाइया लच्योन इत्यादि भाषा ॥

उञ्छग्रिलं, क्ली, (उञ्छञ्च ग्रीलञ्चेत्येकवद्भावः ।) उञ्छवृत्तिः । सा तु ग्रहीतग्रस्यक्षेत्रात् ग्रेषावचयनम् । तत्पर्य्यायः । ऋतं २ । इत्यमरः ॥ इञ्छग्रिलं ३ उञ्छः ४ उञ्छं ५ ग्रिलं ६ । इति तट्टीका ॥ (यथा, मनुः । ४ । ५ ।
"ऋतमुञ्छग्रिलं ग्रेयमसृतं स्यादयाचितम्" ॥)

उञ्छग्रील, त्रि, (उञ्छः ग्रीलं वृत्तं यस्य ।) उञ्छजीवी । उद्धृतग्रस्यस्य ग्रेषाहरणकर्त्ता । इति पुराणम् ॥ छिचेर इति भाषा ॥

उटः, पुं, तृणपर्णादिः । इत्यमरटीकायां भरतः ॥

उटज, पु, क्ली, (उटात्तृणपर्णादयस्तेभ्योजायते इति । उट + जन + ड ।) मुनीनां पत्तरचितगृहम् । तत्पर्य्यायः । पर्णशाला २ । इत्यमरः ॥ पर्णोटजः ३ । इति शब्दरत्नावली ॥ यथा रघुः ।
('आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः' । १ । ५० ।
'मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु" । १ । ५२ ।)
गृहमात्रम् । इत्यमरमाला ॥

उठ उपघाते । (भादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ क्रखादिः । ओठति खलः साधुम् । इति दुर्गादासः ॥

उड संहतौ । (परं-अक सेट् ।) सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ उडुपः । इति दुर्गादासः ॥

उडु, क्ली स्त्री, (उ रोधोक्तिपूर्व्वकं डयते इति । उ + डी + डु मितद्वादित्वात् ङ्गः ।) नक्षत्रम् । इत्यमरः ॥ ("तदोडुराजः कुकुभः करैर्मुखम्" । इति भागवते । १० । २९ । २ । तथा रघुवंशे । १६ । ६५ ।
"इन्दुप्रकाशान्तरितोडुतुल्याः" ।)
जले क्ली । इत्यमरटीकायां भरतः ॥

उडुपः, पुं क्ली, (उडुने।जलात् पाति रक्षतीति । उडु + पा + क ।) भेलकम् । भेला माड़ इत्यादि भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ । इत्यमरः ॥ भेलकः ४ उडुपः ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥
("तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" ॥ इति रघुवंशे । १ । २ ।) चन्द्रे पुं । इति मेदिनी ॥
("अपश्यत् वदनं तस्य रश्मिवन्तमिवोडुपम्" । इति महाभारते । वनपर्व्वणि ॥ चर्म्मावनद्धपानपात्रं । यथा,—
"चर्म्मावनद्धमुडुपं प्लवः काष्ठ करण्डवत्" ॥
इति सज्जनः ॥)

उडुपतिः, पुं, (उडूनां पतिः ।) चन्द्रः । इति पुराणज्योतिषे ॥ ("अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः" । इति कुमारे । ५ । २२ ।
"परिमुग्धतां वयिगिवोडुपतेः" । इति माघे ।)

उडुपथः, पुं, (उडूनां पथ्याः ।) आकाशम् । इति हेमचन्द्रः ॥

उडुम्बरः, क्ली, (उडुं बृणातीति । उडु + बृ + अच् ।) ताम्रम् । इति मेदिनी ॥ ("ताम्रं शुल्बमुडुम्बरम्" । इति वैद्यकरत्नमाला । कर्षार्थे यथा,—
"उडुम्बरस्य पर्य्यायैः कर्षस्तु निगद्यते" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमाध्यायः ।)
कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

उडुम्बरः, पुं, (उडु + बृ + अच् ।) उदुम्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । जन्तुफलः २ यज्ञाङ्गः ३ हेमदुग्धकः ४ । इत्यमरः ॥ ब्रह्मवृक्षः ५ । इति रत्नमाला ॥ हेमदुग्धी ६ यज्ञफलः ७ यज्ञोडुम्बरः ८ । इति शब्दरत्नावली ॥ सदाफलः ९ क्षीरवृक्षः १० सुपक्षः ११ श्वेतवल्कलः १२ । इति जटाधरः ॥ अस्य गुणाः । उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् । मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥ इति भावप्रकाशः ॥
("उडुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम् । संलिह्येन्मधुना सर्व्वमनुपानं सुखावहम्" ॥ इति वैद्यकरसेन्द्रसारसंग्रहे मूत्राघाताधिकारे ।)
अन्यत् उदुम्बरशब्दे द्रष्टव्यम् ॥ देहली । गोवराटेर निचेर काठ इति भाषा । षण्ढम् । नपुंसकमिति यावत् । कुष्ठरोगभेदः । इति मेदिनी ॥

उडुम्बरपर्णी, स्त्री, (उडुम्बरस्य पर्णमिव पर्णं यस्याः ।) दन्तीवृक्षः । इति शब्दचन्द्रिका । (उदुम्बरपर्णीशब्दे ऽस्या विशेषो ज्ञेयः ॥)

उडुपः, पुं क्ली, (उडुपशब्देऽस्य व्युत्पत्तिर्द्रष्टव्या ।) उडुपः । भेला इति भाषा । चन्द्रे पुं । इति द्विरूपकोषः ॥

उड्डयनं, क्ली, (उत् + डी + ल्युट् ।) नभोगतिः । ओड़ा इति भाषा । यथा नैषधे १ । १२५ ॥
"गतो विरुत्योड्डयने निराश्रताम्" ॥
("सोऽपि तमादाय सम्पातोड्डयनेन प्रस्थितः" । इति पञ्चतन्त्रे ॥)

उड्डामरं, त्रि, (उत्कृष्टः डामरः ।) श्रेष्ठम् । तत्पर्य्यायः । उद्भटं २ उत्तालम् ३ । इति त्रिकाण्डशेषः ॥ (पुं तन्त्रविशेषः ॥)

उड्डीनं, क्ली, (उत् + डी + क्त ।) खगगतिक्रिया । पक्षिणां ऊर्द्धगमनम् । इत्यमरः ॥
("अहं सम्पातादिकानष्टानुड्डीनगतिविशेषान् वेद्मि" । इति पञ्चतन्त्रे ॥)

उड्डीयमानः, त्रि, (उत् + डी + शानच् ।) उड्डयनविशिष्टपक्ष्यादिः । उड़न्त ओड़ता इत्यादि भाषा ॥

उड्डीशः, पुं, (उत् + डी + श । यद्वा उड्डानां उत्पथगामिनां योगिनामित्यर्थः ईशः महादेवस्य योगीश्वरत्वात् ।) आगमशास्त्रविशेषः । शिवः । इति मेदिनी ॥

उत्, व्य, प्रश्नः । वितर्कः । इति मेदिनी ॥ अत्यर्थं । सन्देहः । इति शब्दरत्नावली ॥ (ऊर्द्धम् । अत्यर्थे ॥)

उत व्य, (उ शब्दे + क्त ।) अत्यर्थम् । विकल्पः । समुच्चयः । वितर्कः । प्रश्नः । पादपूरणम् । इति मेदिनी ॥ (अप्यर्थे । एवार्थे । "किमेतदारण्यं उत ग्राम्यम्" । इति पञ्चतन्त्रे । "तत्किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते" । इति शाकुन्तले । "वीरो रक्षः किमयमित्युत दर्पः" । इति उत्तरचरिते ॥)

उतं, त्रि, (वे + क्त । यजादित्वात् सम्प्रसारणम् ।) तन्तुसन्तानः । बोना इति भाषा । तत्पर्य्यायः । ऊतं २ स्यूतम् ३ । इत्यमरः ॥

उतथ्य, पुं, मुनिविशेषः । स च अङ्गिरःपुत्रः । इति पुराणम् ॥
("त्रयस्त्वङ्गिरसः पुत्रा लोके सर्व्वत्र विश्रुताः । बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः" ॥
इति महाभारते आदिपर्व्वणि ॥)

उतथ्यानुजः, पुं, (उतथ्यस्यानुजः ।) बृहस्पतिः । इति चिकाण्डशेषः । (यथा माघे २।६९ ।
"तथ्यामुतथ्यानुजवत् जगादाग्रे गदाग्रजम्" ॥)

उतथ्यानुजन्मा, [न्] पुं, (उतथ्यस्य अनुजन्मा अनुजः ।) बृहस्पतिः । इति भूरिप्रयोगः ॥

उताहो, य, (उत च आहो च अनयोः समाहारः ।) परिप्रश्नः । विचारः । इति मेदिनी ॥ विकल्पः । इत्यमरः ॥
("क्षमा खित् श्रेयसी तात! उताहो तेज इत्युत" । यक्षी वा राक्षसी वा त्वं उताहोऽसि सुराङ्गना" ॥ इति च महाभारते ॥)

उताहोस्वित्, य, उताहो । विकल्पः । इत्यमरटीका ॥ ("अन्यद्वपु विदधातीह गर्भमुताहोस्वित् स्वेन कायेन याति" । इति महाभारते ॥)

उत्कः, त्रि, (उद्गतं मनो यस्य । उत् + कन् ।) उन्मनाः । अन्यमनस्कः । इत्यमरः ॥
("तत् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः" । इति मेघदूते । ११ । तथा कुमारे । ६ । ९५ ।
"अगमयदद्रिसुतासमागमोत्कः" ॥)

उत्कटं, त्रि, (उद्गतः कटः आवरणं आवरको वा यस्य ।) तीव्रम् । मत्तम् । इति मेदिनी ॥ विषमम् । इति शब्दरत्नावली ॥ (यथा रामायणे ५ काण्डे ।
"चन्द्रांशुनिकराभासा हाराः कासाश्चिदुत्कटाः । स्तनमध्ये सुविन्यस्ता विरेजुर्हंसपाण्डराः" ॥)

उत्कटं, क्ली, गुड़त्वक् । तेजपात इति ख्यातं इति केचित् । इत्यमरभरतौ ॥ दारचिनि । इति ख्यातम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायानाह भावप्रकाशे पूर्ब्बखण्डे,
"त्वक्पत्रञ्च वराङ्गं स्याद् भृङ्गश्चोदन्तमुत्कटम्"।)

उत्कटः, पुं, (उद्गतमदश्चक्षेः उच्छब्दात् स्वार्थे सम्मोदश्चेति कटच् ।) मदः । इति शब्दरत्नावली ॥ संजातमदश्चस्ती । इति हारावली ॥ शूरः । रक्षोघ्नः । इति राजनिर्घण्टः ॥

उत्कटा, स्त्री, (उद्गतः कटो यस्याः ।) सैंहलीलता । इति राजनिर्घण्टः ॥

उत्कण्ठः, पुं, (उद्गतः कण्ठो यस्य ।) शृङ्गारस्य षोड़शबन्धान्तर्गतत्रयोदशबन्धः । आसन यस्य प्रसिद्धिः । तस्य लक्षणम् ।
"नारीपादौ च हस्तेन धारयेदूरुके पुनः । स्तनार्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञकः" ॥
इति रतिमञ्जरी ॥

उत्कण्ठा, स्त्री, (उत् + कठि + अ + टाप् ।) उत्कलिका । इष्टलाभे कालक्षेपासहिष्णुता । इत्यमरः ॥ कामादिजातस्मृतिः । इति भरतः ॥ उद्बाहुल्लकेन स्मरणम् । इति मधुः ॥ उत्केन दयितस्मरणम् । इति सुभूतिः ॥ प्रियाभिलाषादुन्मनस्त्वं । इत्यन्ये ॥
("गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालाम्" । इति मेघदूते । ८३ ।
"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया" । इति शाकुन्तले । ४ अं ॥)

उत्कण्ठितं, त्रि, (उत्कण्ठा जातास्य । उत्कण्ठा + इतच् ।) उत्कण्ठायुक्तम् । तत्पर्य्यायः । उत्कं २ उत्सुकं ३ उन्मनः ४ । इति हेमचन्द्रः ॥
("साश्रेणासहृतमविरतोत्कण्ठमुत्कण्ठितेन" । इति मेघदूते । १०३ ॥)

उत्कण्ठिता, स्त्री, (उत्कण्ठा सञ्जातास्याः । उत्कण्ठा + इतच् + टाप् ।) स्वीयादिनायिकाभेदः । अस्याः लक्षणम् ।
"सङ्केतस्थलं प्रति भर्त्तुरना-
गमनकारणं चिन्तयति या" ।
अस्याश्चेष्टाः । अरति-सन्ताप-स्तम्भाक्षाक्षि-कम्प-रुदित-श्वासावस्थाकथनादयः । इति रसमञ्जरी ॥ (इयमेव विरहोत्कण्ठिता । यदुक्तं साहित्यदर्पणे दशमपरिच्छेदे ।
"आगन्तुं क्षतचित्तोऽपि दैवान्नायाति यत्प्रियः । तदागमनदुःखार्त्ता विरहोत्कण्ठिता तु सा" ॥ तत्रैव । १० परिच्छेदे अपरुतेरुदाहरणम् । यथा,—
'उत्कण्ठितासि तरले!
नहि नहि सखि! पिच्छिलः पन्थाः'॥)

उत्कता, स्त्री, (उत्कस्य भावः । उत्क + तल् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ उत्कस्य भावः । उत्कण्ठा ॥

उत्करः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + अप् ।) धान्यादिराशिः । स्तूपः । इत्यमरः ॥
("सिक्तराजपथान् रम्यान् प्रकीर्णकुसुमोत्करान्" । इति रामायणे ॥)

उत्कर्षः, पुं, (उत् + कृष् + घञ् ।) अतिशयः । इत्यमरः ॥ (प्राधान्यं । श्रेष्ठता । यथा, "उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले" । इति शाकुन्तले २ य अङ्के ।
"निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" । इति मनुः ४।२४४ ॥ वृद्धिः । यथा,—
"पक्षानामपि भूतानामुत्कर्षं पुरुषर्गुणाः" । इति रघुः । ४।११ ।) अतिशययुक्ते त्रि ॥ स्वकालात् परकालकर्त्तव्यः । इति स्मृतिः ॥

उत्कलः, पुं, (उत् + कल + अच् ।) ओड्रदेशः । इति चिकाण्डशेषः ॥ उड़िश्या इति भाषा । व्याधः । इति शब्दमाला ॥ पाखिमारा इति भाषा ।
("उत्कलादर्पितपथः कलिङ्गाभिमुखं ययौ" । इति रघुवंशे ४।३८ ॥ सुद्युम्नतनयः खनामख्यातो राजा । यदुक्तं महाभारते ।
"सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः । उत्कलश्च गयश्चैव विनताश्च भारत! ॥
उत्कलस्योत्कला राजन् विनताश्चस्य पश्चिमा" ॥)

उत्कलं, त्रि, (उत् + कल + अच् ।) भारवाहकम् । इति शब्दमाला । मुटे इति भाषा ॥

उत्कलिका, स्त्री, (उत् + कल + वुन् + टाप् ।) उत्कण्ठा । इत्यमरः ॥
("ततोऽन्येद्युः प्रतिपदं तत्तदुत्कलिकाभृता" । कथासरित्सागरे । २२।१०५ ।) कलिका । इति चिकाण्डशेषः ॥ ("उद्दामोत्कलिकां विषाण्डुरत्वं प्रारब्धस्तम्भां चक्षात्" । इति रत्नावली ।) तरङ्गः । ("वनावलीस्तत्कलिकासहस्रप्रतिच्छन्नो-त्कूलितशैवलाभाः" । इति माघः । ३ । ७० ।) हेला । इति हेमचन्द्रः ॥

उत्कलितः, त्रि, (उत् + कल + क्त ।) उन्मनाः । बुद्धिमान् । इति धरणी ॥ (उत्कण्ठितः ॥)

उत्का, स्त्री, (उद्गतं मनो यस्याः । उत् + कन् + टाप् ।) उत्कण्ठिता नायिका । इति रसमञ्जरी ॥

उत्काका, स्त्री, (उत्क + अक + अच् + टाप् ।) प्रतिवर्षप्रसूता गौः । इति शब्दचन्द्रिका ॥

उत्कारः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + घञ् ।) धान्योत्क्षेपणम् । तत्पर्य्यायः । निकारः २ । इत्यमरः ॥ धान सारा इति भाषा । धान्यस्य राशीकरणं वा । इति भरतः ॥

उत्कूटं, क्ली, (उत् + कूट् + क ।) उत्तानशयनम् । इति हारावली ॥ चित् हइया शोया इति भाषा ।

उत्कुणः, पुं, (उत् + कुण + क ।) केशकीटः । उकुण इति भाषा । तत्पर्य्यायः । मत्कुणः २ कोशकुणः ३ उद्दंशः ४ किटिभः ५ । इति हेमचन्द्रः ॥

उत्कूटः, पुं, (उन्नतं कूटमस्य ।) क्षेत्रम् । इति हारावली ॥

उत्कृष्टं, त्रि, (उत् + कृष् + क्त ।) उत्कर्षविशिष्टम् । अतिशययुक्तम् । प्रकृष्टम् । प्रशस्तम् । यथा,—
"उत्कृष्टमथमनिकृष्टजनेषु मैत्री,
यद्वत् शिलासु सिकतासु जलेषु रेखा ।
वैरं क्रमादधममध्यमसज्जनेषु,
यद्वत् शिलासु सिकतासु जलेषु रेखा" ॥
इत्युद्भटः । (कर्षवत्त्वेत्रादिः ॥)

उत्कृष्टभूमः, पुं, (उत्कृष्टा प्रशस्ता भूमिर्यस्मिन् ।) प्रशस्तभूमिः । इति जटाधरः ॥

उत्कोचः, पुं स्त्री, (उत्कोचति अशुभं नाशयतीति । उत् + कुच + क ।) घुस् इति ख्यातः । तत्पर्य्यायः । प्राभृतं २ ढौकनं ३ लम्बा ४ कोशूलिकं ५ आमिषं ६ उपाचारः ७ प्रदा ८ आनन्दा ९ हारः १० ग्राह्यं ११ अयनं १२ । इति हेमचन्द्रः ॥ उपदानकं १३ । इति त्रिकाण्डशेषः ॥ अपप्रदानं १४ । इति भूरिप्रयोगः ॥ (यथा, याज्ञवल्क्ये १ । ३॥ ३८ ।
"उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" ।)

उत्क्रमः, पुं, (उत् + क्रम + अच् ।) व्यतिक्रमः । विपरीतिः । तत्पर्य्यायः । व्युत्क्रमः २ अक्रमः ३ । इति हेमचन्द्रः ॥

उत्क्रोशः, पुं स्त्री, (उत्क्रोशति प्रहरे प्रहरे शब्दं करोतीति । उत् + क्रुश + अच् ।) कुररपक्षी । इत्यमरः ॥

उत्क्षिप्तः, पुं, (उत् + क्षिप + क्त ।) धुस्तूरफलम् । इति शब्दचन्द्रिका । ऊर्द्ध्वत्यक्ते त्रि ॥

उत्क्षिप्तिका, स्त्री, (उत् + क्षिप् + क्तिन् + कन् + टाप् ।) कर्णभूषणविशेषः । तत्पर्य्यायः । कर्णोत्क्षिप्तिः २ । इति हेमचन्द्रः ॥

उत्क्षेपणं, क्ली, (उत् + क्षिप् + ल्युट् ।) व्यजनम् । धान्यमर्द्दनवस्तु । इति मेदिनी ॥ उदञ्चनम् । ऊर्द्ध्वक्षेपणम् ।
("अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्" इति शाकुन्तले प्रथमाङ्के ।) षोड़शपणम् । इति

हेमचन्द्रः॥ (न्यायमते पञ्चकर्म्ममध्यपरिगणितम्। यथा भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"। ६॥)

उत्खला, स्त्री, (उत् + खल + अच् + टाप्।) सुरानाम गन्धद्रव्यम्। तत्पर्य्यायः। तालपर्णी २ तालपर्णं ३ तालास्या ४ खशा ५। इति शब्दचन्द्रिका॥ (सुराशब्देऽस्या विवरणं द्रष्टव्यम्॥)

उत्खातं, त्रि, (उत् + खन + क्त।) उन्मूलितम्। इति जटाधरः॥ उत्पाटन इति भाषा।
("त्यागितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः"। इति रघुवंशे। ४।३३। विदारितः। यथा,—
"ग्रैवेयादास्य त्रिनयनहरोत्खातपद्मानिहस्तः"। इति मेघदूते। ११६॥

उत्तं, त्रि, (उनत्ति स्म। उन्दी क्लेदने अकर्म्मकत्वात् कर्त्तरि क्तः। नुदविदेति पक्षे नत्वाभावः।) आर्द्रवस्तु। इत्यमरः।

उत्तंसः, पुं, (उत्तंसयति उत्तंस्यतेऽनेन वा तस्मिः सौत्रो धातुर्भूषार्थः। पचाद्यच् ह्रस्वश्चेति घञ् वा।) कर्णपूरः। कर्णाभरणम्। शेखरः। शिरोभूषणम्। इत्यमरः॥ मतान्तरे स्त्रीलिङ्गोऽपि॥ ("नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेष्यागसि"। इति साहित्यदर्पणे। १य परिच्छेदे॥)

उत्तप्तं, क्ली, (उत् + तप + क्तः।) शुष्कमांसम्। इत्यमरः॥

उत्तप्तः, त्रि, तप्तः। सन्तप्तः। परिप्लुतः। खातः। इति मेदिनी॥

उत्तभितं, त्रि, उन्नमितम्। इति श्रीभागवतम्॥

उत्तमः, त्रि, (अतिशयेन उत्कृष्टः। उत् + तमप्। द्रव्यप्रकर्षार्थत्वान्नाम्। यद्वा उत्ताम्यति तमु अच् उत्तम्यते वा घञ्। ओदाक्तेति न वृद्धिः।) भद्रः। उत्कृष्टः। तत्पर्य्यायः। प्रधानं २ प्रमुखः ३ प्रवेकः ४ अनुत्तमः ५ मुख्यः ६ वर्य्यः ७ वरेण्यः ८ प्रवरः ९ अनवराः १० पराः ११ अग्र्यः १२ प्राग्र्यहरः १३ प्राग्र्यः १४ अग्र्यः १५ अग्रीयः १६ अग्रियः १७। इत्यमरः॥ मुखः १८ अग्र्यः १९ तट्टीका॥ (उत्तमस्यापि वर्णस्य नीचोऽपि यदाश्रयः"। इति हितोपदेशः।
"उत्तमादेवरात् पुंसः काङ्क्षन्ते पुत्रमापदि"॥ इति महाभारते॥)

उत्तमः, पुं, वैष्णिकनामनायकभेदः। तस्य लक्षणम्।
"दयिताश्रमप्रकोपेऽपि उपचारपरायणः"।
इति रसमञ्जरी॥ प्रियव्रतराजपुत्रः। स च षष्ठेऽयमनुः। अस्मिन् मन्वन्तरे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वशिष्ठसुताः प्रमदादयः सप्तर्षयः। पवनरञ्जयज्ञहोत्राद्या मनुपुत्राः। इति श्रीभागवतम्॥ (उत्तानपादस्य राज्ञः सुनामख्यातः पुत्रभेदः। यथा, विष्णुपुराणे। १। ११। २॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः"॥)

उत्तमपत्निनी, स्त्री, (उत्तमपत्नं विद्यते यस्याः। उत्तमपत्न + इनि + ङीप्।) दुग्धिकावृक्षः। इति रत्नमाला। क्षीराइ इति भाषा॥

उत्तमर्णः, पुं, (उत्तमस्य। ऋणमाधमर्ण्ये इति सूत्रे आधमर्ण्यशब्देन व्यवहारविशेषो लक्ष्यते।) ऋणदाता। इत्यमरः॥ महाजन इति भाषा। तत्पर्य्यायः। ऋणदः २। इति जटाधरः॥
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितम्"॥ इति मनुः। ८। ४७॥)

उत्तमसंग्रहः, पुं, (उत्तमः संग्रहो यस्मिन्।) सम्यक् संग्रहणम्। तत्तु निर्जने परभार्य्यया सह केशाकेशिपरस्परालिङ्गनसहासनादिरूपमिथुनीभावः। इति मिताक्षरा॥

उत्तमसाहसः, पुं, (उत्तमः साहसोऽस्यस्मिन्।) दण्डविशेषः। स तु साग्रोतिपणसाहस्रः। यथा। साग्रोतिपणसाहस्रो दण्ड उत्तमसाहसः"।
इति याज्ञवल्क्यः॥ सहस्रपणमितोऽपि। यथा,
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः"॥
इति मनुः॥

उत्तमा, स्त्री, (अतिशयेन उत्कृष्टा। उत् + तमप् + टाप्।) उत्कृष्टा नारी। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ वरवर्णिनी ४। इत्यमरः॥ मत्तकाशिनी ५। मत्तकासिनी ६। इति तट्टीका॥ दुग्धिकावृक्षः। इति मेदिनी॥ स्त्रीयादिनायिकाभेदः। अस्या लक्षणम्। अहितकारिण्यपि प्रिये हितकारिणी। अन्याश्लेषा उत्तमा एव। इति रसमञ्जरी॥

उत्तमाङ्गं, क्ली, (उत्तमं प्रशस्तमङ्गं।) मस्तकं। इत्यमरः॥ ("कश्चित् दिवत्खड्गहृतोत्तमाङ्गः"। इति रघौ। ७।५१। "बभौ पतद्भङ्गरवोत्तमाङ्गे"। इति कुमारे। ७।४१। मुखम्। यथा, मानवे १।९३।
"उत्तमाङ्गोद्भवाज्ज्यैष्ठ्यात् ब्राह्मणश्चैव धारणात्।
सर्व्वस्यैवास्य सर्गस्य धर्म्मतो ब्राह्मणः प्रभुः"॥
उत्तमाङ्गं मुखं इति तट्टीका॥)

उत्तमारुही, स्त्री, इन्दीवरी। इति राजनिर्घण्टः॥ (इन्दीवरीशब्देऽस्या गुणादिकं बोध्यम्।)

उत्तरं, क्ली, (उत् + तॄ + अप्।) प्रतिवाक्यम्। इत्यमरः॥ जवाब इति यावनी भाषा।
(यथा, माघे २। २२।
"वचसस्तस्य सपदि क्रिया केवलमुत्तरम्"।)
तस्य व्युत्पत्तिः।
"उत्तीर्य्यते निर्णीर्य्यते प्रकृताभियोगोऽनेन"।
तस्य स्वरूपम्।
"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्।
अव्याख्यागम्यभित्येवमुत्तरं तद्विदो विदुः"॥
तस्य भेदाः।
"मिथ्या सम्मतिपत्तिश्च अत्यवस्कन्दनं तथा।
प्राड्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः"॥
इति नारदः॥ (अथ उत्तरं नाम साधर्म्योपदिष्टे वा हेतौ वैधर्म्म्यवचनं वैधर्म्म्योपदिष्टे वा साधर्म्म्यवचनं यथा हेतुमधर्म्माणोविकाराः शीतकस्य द्विद्याधर्हेतुसाधर्म्म्यवचनं हिमाग्निशिरवातसंस्पर्शा इति ब्रुवतः परो ब्रूयात् हेतुविधर्म्माणो विकाराः यथा शरीरावयवानां दाहौष्ण्यं कोपप्रपचने हेतुवैधर्म्म्ये हिमाग्निशिरवातसंस्पर्शा इति। एतत् सविपर्य्ययमुत्तरम्। इति चरके विमानस्थानेऽष्टमोऽध्यायः॥)

उत्तरः, पुं, विराटराजपुत्रः। इति हेमचन्द्रः॥ (यथा महाभारते ३। गोहरणपर्व्वणि ३५।३२ "तमुत्तरं वीक्ष्य रथोत्तमे स्थितम्"। तत्रैव ३४ "सहोत्तरेणाशु तदद्य मङ्गलम्")। (खनामख्यातपर्व्वतभेदः। यथा, "दक्षिणस्योत्तरो गिरिः"। इति रामायणे॥ उत्तरयति संसारसागरात् इति व्युत्पत्तेः। शिवः। हरिः॥ भारते। १३। १४८। ६६॥)

उत्तरः, त्रि, (उदतिशयेन उद्गतः। उत् + तरप्।) ऊर्द्धः। उदीचीनः। (यथा, रामायणे।
"उत्तरे जाह्नवीतीरे हिमवन्तं गिरोत्तमम्"।)
उत्तमः इति मेदिनी अमरश्च॥ (प्रधानं। श्रेष्ठः। यथा, रघुः १३।७।
"नृपा इवोपप्लविनः परेभ्यो,
धर्म्मोत्तरं मध्यममाश्रयन्ते"।
"ब्रह्मधर्म्मोत्तरे राज्ये शान्तनुर्विनयात्मवान्"।
इति महाभारतम्॥) अनन्तरम्।
("वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी। एतानि मान्यस्थानानि गरीयो यद् यदुत्तरम्"॥ इति मनुः। २। १३६॥)

उत्तरकालः, पुं, (उत्तरः कालः।) भविष्यत्कालः। गौणकालः। यथा, हरिहरभट्टोक्तिः।
"श्रवमागामियागीयमुख्यकालादधस्तनः।
स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः"॥

उत्तरकुरुः, स्त्री, (उत्तरः कुरुः।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥
("विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुण्यं वसु वासवोपमः"।
इति किरातार्জ্জुनीये। १। २५॥)

उत्तरकोशला, स्त्री, (उत्तरे स्थिता कोशला।) अयोध्यानगरी। इति त्रिकाण्डशेषः॥
("पितुरनन्तरमुत्तरकोशलान्
ससधिगम्य समाधिजितेन्द्रियः"॥
इति रघुः ९।१।
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला"।
इति उद्भटः॥)

उत्तरक्रिया, स्त्री, (उत्तरा अन्तिमा क्रिया।) अन्त्येष्टिक्रिया। सांवत्सरिकश्राद्धादिपित्र्यक्रिया। यथा,
"प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः"॥
इति विष्णुपुराणम्॥

उत्तरङ्गं क्ली, (उत्तर + गम् + खश्।) दारोर्द्वपक्षदारु। इति हेमचन्द्रः॥ उद्गततरङ्गे त्रि॥
"प्रत्ययहीत् पार्थिवबाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः"॥ इति रघुः। ७। ३६।

उत्तरणं, क्ली, (उत् + तॄ + ल्युट्।) नद्यादिपारगमनम्। उत्तरण इति भाषा॥

उत्तरतः, [स्] व्य, (उत्तर + स्वार्थे + अतसुच् ।) उत्तरदिग्देशकालात्। इति रायमुकुटः ॥ उत्तर इहते इति भाषा। (यथा, रामायणे ४ । ५५ । अध्याये ।
"दक्षिणाग्रेषु दर्भेषु कृत्वा चोत्तरतः शिरः ।
तमेवानुमरिष्यन्तः सर्व्वे संविविशुर्भुवि" ॥)

उत्तरतारं, क्ली, (उत्तरमपरं तारं ।) उत्तरतीरम्। इति सिद्धान्तकौमुदी ॥

उत्तरपक्षः, पुं, (उत्तरः पक्षः ।) विचारसिद्धान्तः। समाधानम्। तत्पर्य्यायः। सिद्धान्तः२ समाधिः३ कृतान्तः ४। इति चिकाण्डशेषः ॥ सिद्धान्तानुकूलतर्कोपन्यासः। इति स्मृतिः ॥ यथा माघे ।
("प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्" ।२।९५॥)

उत्तरपादः, पुं, (उत्तरः पादः ।) चतुष्पाद्व्यवहारान्तर्गतद्वितीयपादः। (यथाह बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः" ।)
उत्तरम्। इति व्यवहारतत्त्वम् ॥

उत्तरफल्गुनी, स्त्री, (उत्तरा फल्गुनी ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वादशनक्षत्रम्। अस्या रूपम्। दक्षिणोत्तरमिलिततारकाद्वयम्। इति कालिदासः ॥ पर्य्यङ्करूपं तारकाद्वयं। इति दीपिकाटीका ॥ अस्या अधिष्ठात्री देवता अर्य्यमा। अस्या मिश्रगुणः। अस्यां जातफलम्।
"दाता दयालुः स्वजने सुशीलो
विख्यातकीर्त्तिः सुमतिः प्रधानः ।
धीरो नरोऽत्यन्तसुदुःखभाव-
श्चोत्तराफल्गुनिकाप्रसूतिः" ॥
इति कोष्ठीप्रदीपः ॥

उत्तरफल्गुनी, स्त्री, (उत्तरा फल्गुनी ।) उत्तरफल्गुनीनक्षत्रम्। तत्पर्य्यायः। उत्तरा २ अर्य्यमदेवा ३। इति हेमचन्द्रः ॥

उत्तरभाद्रपद्, [द्] स्त्री, (उत्तरा भाद्रपत् ।) उत्तरभाद्रपदानक्षत्रम्। इति ज्योतिषम् ॥

उत्तरभाद्रपदा, स्त्री, (उत्तरा भाद्रपदा ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषड्विंशनक्षत्रं। तत्पर्य्यायः। प्रौष्ठपदा २ अहिर्ब्बुध्नदेवता ३। इति हेमचन्द्रः ॥ अस्या रूपम्।
"उत्तरे सुमुखि तारमूर्त्तिभि-
स्तुल्यमार्क्षमभितद्वितारके ।
गोजचामरकचे द्वयुग्मतो
जोचनाचयकलाः फलायिताः" ॥
इति कालिदासः ॥ पर्य्यङ्करूपमृक्षतारात्मकं। इति दीपिकाटीका ॥ अस्यां जातफलम्।
"धनी कुलीनः कुशलः क्रियादौ
भूपाङ्गमान्यो बलवान् महौजाः ।
सत्कर्म्मकर्त्ता निजबन्धुभक्तो
यदुत्तराभाद्रपदाप्रसूतः" ॥
इति कोष्ठीप्रदीपः ॥

उत्तरवादी, [न्] त्रि, (उत्तरं वदति यः। उत्तर + वद + णिन् ।) उत्तरवक्ता। इति व्यवहारतत्त्वम् ॥ आसामी इति भाषा। यथा याज्ञवल्क्यः २ । १७ । ("पूर्व्वपक्षेऽधरीभूते भवेदुत्तरवादिनः" ॥)

उत्तरसाक्षी, [न्] त्रि, स्वपक्षसम्बन्धिसाक्ष्यं परिभाषतां साक्षिणां यः स्वयं गृह्णाति अर्थिना आथते वा सः। तथाच नारदः ।
"साक्षिणामपि यः साक्ष्यं स्वपक्षं परिभाषताम्।
श्रवणात् श्रावणादापि स साक्ष्युत्तरसंज्ञकः" ॥
इति व्यवहारतत्त्वम्। परसाक्षी इति भाषा ॥

उत्तरसाधकः त्रि, (उत्तरः साधकः ।) साधकसहायः। सहकारी ॥

उत्तरा, स्त्री, (उत्तर + टाप् ।) विराटराजकन्या। साभिमन्युपत्नी। इति मेदिनी ॥ (यथा महाभारते ३ । गेहरक्षणपर्व्वणि ३५ । २३ ।
"स तत्र नर्म्मसंयुक्तमकरोत् पाण्डवो बहु ।
उत्तरायाः प्रमुखतः सर्व्वं जानन्नरिन्दम" ॥)
उत्तरा दिक्। तत्पर्य्यायः। कौबेरी २ देवी ३ उदीची ४। इति राजनिर्घण्टः ॥ (यथा महाभारते २ । दिग्विजयपर्व्वणि २८ । १७ ।
"एवं स पुरुषव्याघ्रो विजिग्ये दिशमुत्तराम्" ॥)
अस्या दिशोऽधिपतिः कुबेरः कर्कटलक्ष्मिकमीनराशयश्च। यथा। समयप्रदीपः ॥
"मेषसिंहधनुः प्राच्यां दक्षिणस्यान्तु तत्परे।
प्रतीच्यां तत्परे ज्ञेया उदीच्याञ्च ततः परे" ॥

उत्तरात्, व्य, (उत्तराधरदक्षिणादाति इति उत्तरादातिप्रत्ययः।) उत्तरा दिक्। इत्यमरटीकायां रायमुकुटः ॥ (यथा, ऋग्वेदे ६।१९।९ ।
"आ ते शुष्मा वृत्र एतु पश्चादोत्तरादधरादा पुरस्तात्" ॥)

उत्तराधिकारी, [न्] त्रि, (उत्तरं पूर्व्वस्वामिकस्वत्वनाशानन्तरं अधिकरोति पूर्व्वस्वामिकधनेन स्वाम्यमाप्नोतीति। उत्तर + अधि + कृ + णिन् ।) प्रथमाधिकारिणः पश्चादधिकारी। दायादः। ओयारिस् इति यावनी भाषा। (मृतधनोत्तराधिकारिणो दायभागशब्दे दृश्यः ॥)

उत्तराभासः, पुं, (सदुत्तरम् इव आभासते। आङ् + भास + क्विप् ।) दुष्टोत्तरम्। तथा च कात्यायनः ।
"प्रकृतेन त्वसम्बन्धमत्यल्पमतिभूरि च।
पक्षैकदेशव्याप्येव तच्च नैवोत्तरं भवेत्" ॥
इति व्यवहारतत्त्वम् ॥

उत्तरायणं, क्ली, (उत्तरा उत्तरस्यां अयनं सूर्य्यादेर्गमनम्। पूर्व्वपदात्संज्ञायामिति णत्वम् ।) सूर्य्यस्य उत्तरदिग्गमनकालः। स तु माघादिषण्मासात्मकः। इति हेमचन्द्रः ॥ (यथाह सूर्य्यसिद्धान्तः ।
"भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम्।
कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्" ॥
"माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः।
उत्तरायणमाद्यैस्त्रिभिः स्याद्दक्षिणायनम्" ।)
देवानां दिनम्। इति स्मृतिः ॥ (मकरसंक्रान्तिः।
"वानप्रस्थाश्रमिभिर्विप्रैः करणीयो यागभेदः"।
यदुक्तं मनुना ६।१० ।
"ऋक्षेष्ट्यायणयज्ञैश्च चातुर्मास्यानि चाहरेत्।
उत्तरायणञ्च क्रमशो दाक्षायणमेव च" ॥
"ग्रिष्मिरात्राश्चिभिस्तैस्तु विद्यादयनमुत्तरम्।
आदानञ्च तदा दत्ते नृणां प्रतिदिनं बलम् ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षामार्गखभावतः।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥
तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात्।
तस्मादादानमाग्नेयम्"। इति सूत्रस्थाने त्रयोदशेऽध्याये वाभटेनोक्तं ॥
"तत्र ते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च"।
"उत्तरञ्च ग्रिष्मिरवसन्तयोर्म्मासेषु भगवानाप्याय्यतेऽर्कोत्क्लिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते" ॥
इति सूत्रस्थाने षष्ठेऽध्याये सुश्रुतेनोक्तम् ॥)

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा ।) उत्तराषाढ़ानक्षत्रम्। इति भरतो द्विरूपकोषश्च ॥

उत्तराषाधपतिः, पुं, (उत्तराषाधायाः उत्तरदिग्रूपः अधिपतिः अधिष्ठाता ।) कुबेरः। इति हलायुधः ॥

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकविंशनक्षत्रम्। अस्या रूपम्। सूर्पाकृतितारात्मकम्। अस्या अधिदेवता विश्वः। इति कालिदासः ॥ गजदन्तवदृक्षतारामयम्। इति दीपिकाटीका ॥
तत्र जातफलम्। यथा कोष्ठीप्रदीपे ।
"दाता दयावान् विजयी विनीतः
सत्कर्म्मचेता विभवैः समेतः ।
कान्तासुतावान्नसुखो नितान्तं
वैश्वे सुवेषः पुरुषो मनीषी" ॥)

उत्तरासङ्गः, पुं, (उत्तरे ऊर्द्धभागे आसज्यते। उत्तर + आ + सञ्ज + घञ् ।) उत्तरीयवस्त्रं। इत्यमरः ॥
("कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम्" ।
इति कुमारे ५।१६ ॥ तथा, रामायणे २।५०।४८ ।
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्" ॥)

उत्तरीयं, क्ली, (उत्तरस्मिन् ऊर्द्धदेहभागे भवम्। उत्तर + छ ।) उत्तरीयवस्त्रम्। दोक्होट् दोक्षा इत्यादि भाषा। तत्पर्य्यायः। प्रावारः २ उत्तरासङ्गः ३ दृढतिका ४ संव्यानम् ५। इत्यमरः ॥ कक्षा ६। इति जटाधरः ।
("अधास्य रत्नग्रथितोत्तरीय-
मेकान्तपाण्डुस्तनलम्बिहारम्" ।
इति रघुः १६।४३। यथा रामायणे २ ८८।१७ ।
"उत्तरीयमिवासक्तं सुयुक्तं सीतया तदा" ॥)

उत्तरेण, व्य, (उत्तर + एनप् ।) उत्तरदिग्देशकालः। इत्यमरटीकायां रायमुकुटः॥ यथा मेघदूते १६।७५।
("किञ्चित्पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण" ।
"तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" ॥)

उत्तरेद्युः, [स्] व्य, (उत्तरस्मिन्नहनि इत्यर्थे सद्यःपरुदिति उत्तरशब्दादेद्युस् प्रत्ययो निपातितः।) उत्तरस्मिन्नहनि। आगामिदिने। इति शब्दरत्नावली ॥

उत्तानं, त्रि, (उद्गतस्तानो विस्तारो यस्मात् ।) अगभीरम्। ऊर्द्धमुखस्थितम्। इति मेदिनी ॥ चित्

इति भाषा। (ऊर्द्धतलम्। यथा,
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये"।
इति कुमारे ३।४५। तथा, याज्ञवल्क्यः।
"पिष्टपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत्"।
"उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।
विरेकास्थापनैः स्नेहपानैर्गर्म्मीरमाचरेत्"॥
इति चिकित्सास्थाने द्वाविंशेऽध्याये वाभटेनोक्तं॥
"उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बु शीतदाहनिवारणम्"॥
इति हारीते चिकित्सितस्थाने द्वितीयोऽध्यायः॥)

उत्तानकः, पुं, (उत् + तन + स्वुल्।) उच्चटालशाक्म्। इति रत्नमाला॥ (उच्चटाशब्देऽस्य विशेष उक्तः॥)

उत्तानपत्रकः, पुं. (उत्तानं ऊर्द्धमुखं पत्रं यस्य। बहुव्रीह्यर्थे कन्।) रक्तैरण्डवृक्षः। इति राजनिर्घण्टः॥

उत्तानपादः, पुं, (उत्तानः उन्नतः पादः पदं यस्य।) राजविशेषः। स तु स्वायम्भुवमनुपुत्रः इति पुराणम्॥ (यथा, विष्णुपुराणे १।१२॥
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव"॥)

उत्तानपादजः, पुं, (उत्तानपादात् जायते यः। उत्तानपाद + जन् + ड।) उत्तानपादराजपुत्रः। तत्पर्य्यायः। ध्रौवेयः २ ग्रहाधारः ३ ध्रुवः ४। इति हारावली॥ (उत्तमः। यथा, विष्णुपुराणे १।१२॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।
अभीष्टायामभूद्ब्रह्मन्! पितुरत्यन्तवल्लभः॥२॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज!
स नातिप्रीतिमांस्तस्यां तस्याञ्चाभूद्ध्रुवः सुतः॥३॥)

उत्तानशयः, त्रि, (उत्तानः शेते। शीङ् शयने पार्श्वादिषूपसंख्यानमिति अच्।) अत्यन्तशिशुः। तत्पर्य्यायः। डिम्भा २ स्तनया ३ स्तनन्धयी ४। इत्यमरः॥ उत्तानसुप्तः॥

उत्तापः, पुं, (उत् + तप् + घञ्।) तेजः। उष्मा। सन्तापः॥ (यथा, हितोपदेशे।
"प्रत्यहः सर्व्वसिद्धीनामुत्तापः प्रथमः किल"॥)

उत्तारः, त्रि, (उत् + तॄ + घञ्।) महान्। तत्पर्य्यायः। उदीर्णः २ उद्भटः ३ उदारः ४ उत्तमः ५। इति जटाधरः॥ (यथा प्रबोधचन्द्रोदये।
"संसारसागरोत्तारतरणिः"।) वमनम्। इति प्रायश्चित्तविवेकादयः॥

उत्तारी, [न्] त्रि, (उत् + तॄ + णिन्।) चपलः। इति भूरिप्रयोगः॥

उत्तालः, त्रि, (उत् + तल + घञ्।) उत्कटः। श्रेष्ठः। विकरालः। ज्ञवङ्गमः। इति मेदिनी॥
("ससदुत्तालवेतालतालवाद्यं विवेश तत्।
श्मशानं क्षणदारब्धनिशासभवनोपमम्"॥
इति कथासरित्सागरे २५। १३६॥
"अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः
उत्तालास्तदमेयगभीरपयसः पुण्याः सरित्सङ्गमाः"।
इति उत्तरचरिते। २य अङ्के।) त्वरितः। इति हेमचन्द्रः॥

उत्तीर्णं, त्रि, (उत् + तॄ + क्त।) मुक्तम्। पारगतम्॥
("तुलोत्तीर्णस्यापि प्रकटितहताग्नेयतमसो
रवेस्ताद्दक्तेजो न हि भवति कन्यां गतवतः"।
इति पद्यसंग्रहे १९॥)

उत्तुङ्गः, त्रि, (उत् अतिशयेन तुङ्गः।) उच्चः। इति जटाधरः॥
("उत्तुङ्गशैलशिखरस्थितपादपानां
काकः क्षणोऽपि फलमालभते सपक्षः"।
इति उद्भटः। उन्नतः। "पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रावति"। इति भर्त्तृहरिः १।७२॥)

उत्तुषः, पुं, (उद्गतस्तुषो धान्यत्वक् यस्मात्।) भक्ष्यधान्यम्। तत्पर्य्यायः। खाजिकः २ लाजाः ३। इति हारावली। खइ इति भाषा॥

उत्तेजना, स्त्री, (उत् + तिज् + णिच् + युच्।) प्रेरणा। व्यथकरणम्॥ (तीक्ष्णीकरणम्। यथा, "व्याघट्टनोत्तेजनया मणीनाम्"। इति माघे।)

उत्तेजितं, क्ली, (उत् + तिज् + णिच् + क्त।) अश्वचतुर्थगतिः। सा च मध्यवेगेन या गतिः। तत्पर्य्यायः। रेचितम् २। इति हेमचन्द्रः॥ प्रेरिते त्रि॥

उत्तेरितं, क्ली, (उत् + तॄ + इतच्।) अश्वपञ्चमगतिः। तत्पर्य्यायः। उपकण्ठं २ आस्कन्दितकम् ३। इति हेमचन्द्रः॥ (तथा चोक्तं,—
"उत्तेरितोऽतिवेगान्धो न पश्यति न पश्यति"॥)

उत्तोलनं, क्ली, (उत् + तुल् + ल्युट्।) ऊर्द्धनयनम्। तोला। इति भाषा॥

उत्त्यक्तः, त्रि, (उत् + त्यज् + क्त।) परित्यक्तः। ऊर्द्धक्षिप्तः। विरक्तः॥

उत्त्रासः, पुं, (उत् + त्रस् + घञ्।) भयम्। इति शब्दरत्नावली॥

उत्थानं, क्ली, (उत् + स्था + ल्युट्।) सैन्यम्। युद्धम्। पौरुषम्। पुण्यकम्। उद्यमः। (यथा रामायणे ५।
"मम धर्म्मार्थमुत्थानं न कामक्रोधसंश्रितम्"।)
उद्भवः। (अभ्युदयः। यथा रघुवंशे। ६।३१।
"निदर्शयामास विशेषदृश्य-
मिन्दुं नवोत्थानमिवेन्दुमत्यै"॥)
हर्षः। वास्तव्यन्तः। अङ्गनम्। चैत्यः। (धनार्জ্জननिमित्ता चेष्टा। यथा मनुः ९।२१५॥
"भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह।
न पुत्रभागं विषमं पिता दद्यात् कथञ्चन"॥)
मनोत्सर्गः। इति हेमचन्द्रः॥ तन्त्रम्। तच्च स्वमस्तकम्। सैन्यं चिन्ता च। सन्निविष्टः। उपविष्टः। इत्यमरभरतौ॥ गात्रोत्तोलनम्। उठन इति भाषा। (यथा शाकुन्तले २ य अङ्के। "मेदच्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः"।) यथा च,
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यच्च यादयोगेऽपि द्वादश्यामेव कारयेत्"॥
इति तिथ्यादितत्त्वम्॥ (पुनर्জীবनम्। मरणानन्तरं पुनर्জীবनलाभः। यथा महाभारते।
"स चापि वरयामास पितुरुत्थानमात्मनः"॥)

उत्थानैकादशी, स्त्री, (उत्थानाय हरेः प्रबोधनाय या एकादशी। अस्यां भगवान् क्षीरोदशयनो नारायणः योगनिद्रां विहाय उत्तिष्ठति।) कार्त्तिकशुक्लैकादशी॥ अथ विष्णूत्थानम्। तच्च दिवसे रेवत्यन्तयुक्तायां द्वादश्याम्। रात्रौ रेवत्यन्तपादयोगे तु दिवाद्वितीयभागे रेवतीयुक्तद्वादश्याम्। द्वादश्यामुत्ताभावे एकादशीप्रभृतिपौर्णमास्यन्तान्यतमतिथौ रेवत्यन्तपादयोगे। तदभावे केवलायां द्वादश्यां सन्ध्यायां विष्णुं संपूज्य।
ॐ "महेन्द्ररुद्रैरभिनूयमानो
भवान्धिर्व्वन्दितवन्दनीयः।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ॥
मेघा गता निर्म्मल एष चन्द्रः
शारद्यपुष्पाणि च लोकनाथ।
अहं ददानीति च पुण्यहेतो-
र्जागृध्व जागृध्व च लोकनाथ"॥
ततश्च।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम्"॥
इति पठेत्। इति कृत्यतत्त्वम्॥

उत्थापनं, क्ली, (उत् + स्था + णिच् + ल्युट्।) उत्तोलनम्। उपस्थितीकरणम्॥
("किमु मे सुकृतं भूयात् भर्त्तुरुत्थापनं न वा"।
इति महाभारते १। आस्तीकपर्व्वणि। ४६।१७।)

उत्थितं, त्रि, (उत् + स्था + क्त।) वृद्धिमत्। प्रोद्यतं। उत्पन्नम्। इत्यमरभेदिनीकरौ॥ (कृतोत्थानम्।
"अर्द्धाचिता सत्वरमुत्थितायाः"।
इति कुमारे, ७।६१। रघुवंशे च ७।१०।
"श्रमापनुत्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ"।
इति मेघदूते। ११२। "न यावदेतावुदपश्यदुत्थितौ"। इति माघे। १।१५॥)

उत्थिताङ्गुलिः, पुं, (उत्थिता अङ्गुलयो यत्र।) चपेटः। विस्तृताङ्गुलिकरतलम्। इति शब्दचन्द्रिका। चापड़ इति भाषा॥

उत्पतः, पुं, (उत् ऊर्द्धे पतति गच्छति। उत् + पत् + अच्।) पक्षी। इति त्रिकाण्डशेषः॥

उत्पतनं, क्ली, (उ + पत् + ल्युट्।) उत्पत्तिः। ऊर्द्धगमनम्। इति मेदिनी॥
("अथोत्पतनमन्त्रं सा पठित्वा ससखीजना"।
इति कथासरित्सागरे॥ विंशतरङ्गे॥)

उत्पतिता, [ऋ] त्रि, (उत् + पत् + तृच्।) ऊर्द्धगमनशीलः। उपरिगमनकर्त्ता इत्यमरः॥

उत्पतिष्णुः, त्रि, (उत् + पत् + इष्णुच्।) ऊर्द्धगमनशीलः। तत्पर्य्यायः। उत्पतिता २। इत्यमरः॥
("ससम्भ्रमश्चक्षुषानामेकानामुत्पतिष्णवः"।
इति रघुः। ४। ४७। तथा पञ्चतन्त्रे। ३। ४१।
"मृगपतिरपि कोपात् सङ्कुचत्युत्पतिष्णुः"॥)

उत्पत्तिः, स्त्री, (उत् + पत् + क्तिन्।) उत्पतनम्। तत्पर्य्यायः। जनुः २ जननं ३ जन्म ४ जनिः ५ उद्भवः ६। इत्यमरः॥ संसारः ७ भवः ८ जातिः ९। इति जटाधरः॥ प्रभवः १० भावः ११ सम्भवः १२ जनूः १३। इति शब्दरत्नावली॥

(यथा मनुः। २।६८।
"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत" ।)
(साङ्ख्यादिनते आविर्भावः। यथा, मृत्पिण्डे विद्यमानस्य घटस्याविर्भाव एव उत्पत्तिर्यथा तथैव कारणात्मना विद्यमानानां तत्त्वानां आविर्भाव एवोत्पत्तिर्विवक्षिता ॥)

उत्पन्नः, त्रि, (उत् + पद् + क्त ।) उत्पत्तिविशिष्टः। जातः। उद्भूतः ॥

उत्पलं, क्ली, (उत्पलतीति। पल गतौ पचाद्यच् ।) नीलकमलम्। कुष्ठौषधिः। इति विश्वः ॥ पुष्पम्। इति मेदिनी ॥ जलजपुष्पमात्रम्। तच्च पद्मकुमुदादि। तत्पर्य्यायः। कुवलयम् २। इत्यमरः ॥ कुवलम् ३। इति जटाधरः ॥ कुवेलम् ४। इति शब्दरत्नावली ॥ (यथा रघौ ३।३६। "नवावतारं कमलादिवोत्पलम्" ।) तस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः ॥ जलपुष्पविशेषः। कोञि इति हिन्दी भाषा। तत्पर्य्यायः। अनुष्णम् २ रात्रिपुष्पम् ३ जलाङ्गयम् ४ हिमाह्वम् ५ निशापुष्पम् ६। अस्य गुणाः। शीतत्वम्। स्वादुत्वम्। पित्तरक्तार्त्तिदोषनाशित्वम्। दाहश्रमवमिभ्रान्तिक्लमिच्छर्दहरत्वञ्च। इति राजनिर्घण्टः ॥
("उत्पलानि कषायाणि पित्तरक्तहराणि च"।
इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥
"तस्मादल्पान्तरगुणे विद्यात्कुवलयोत्पले"।
इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमोऽध्यायः॥)

उत्पलः, त्रि, (उद्गतं पलं मांसं यस्मात् सः।) मांसशून्यः। इति विश्वः हेमचन्द्रश्च ॥

उत्पलगन्धिकं, क्ली, (उत्पलस्य गन्धइव गन्धो यस्य। समासे इत् संज्ञायां कन्।) चन्दनविशेषः। तत्पर्य्यायः। क्षणातामम् २ गोशीर्षम् ३। इति शब्दमाला ॥

उत्पलपर्णं, क्ली, (उत्पलस्य पत्रम्। नखक्षतपत्रे पत्रमिव।) कुवलयदलम्। (यथा विष्णुपुराणे १।४।२६।
ततः समुत्क्षिप्य धरां खदंष्ट्रया
महावराहः स्फुटपद्मलोचनः।
रसातलादुत्पलपत्रसन्निभः
समुत्थितो नील इवाचलो महान् ॥)
स्त्रीनखक्षतम्। इति हेमचन्द्रः ॥ तिलकम्। इति धरणी ॥

उत्पलशारिवा, स्त्री, (उत्पलमस्यस्याः उत्पलाकारपुष्पत्वात्। अर्श आद्यच्। यद्वा उद्गतं पलमनया। ततः उत्पला चासौ शारिवा चेति।) श्यामलता। इत्यमरः ॥ (श्यामलताशब्देऽस्या गुणादिकं ज्ञेयम्॥)

उत्पलिनी, स्त्री, (उत्पलानि सन्ति अस्यां तेषां समूहो वा। उत्पल + इनि + ङीप्।) पद्मसमूहः। इति शब्दरत्नावली ॥ जलपुष्पविशेषः। छोटी कोञि इति हिन्दी भाषा। तत्पर्य्यायः। कैरविणी २ कुमुदती ३ कुमुदिनी ४ चन्द्रेष्टा ५ कुवलयिनी ६ इन्दीवरिणी ७ नीलोत्पलिनी ८। (यथा महाभारते तीर्थयात्रापर्व्वणि ३।८६।२५।
"बद्धे सा महाराज बिभ्रती रूपमुत्तमम्।
अग्निवोत्पलिनी शीघ्रमनेरिव शिखा शुभा"॥)

अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। रक्तामयपित्तनाशित्वम्। वातकफकासषण्ढाश्रमवमिश्रमताकारित्वञ्च। तस्या बीजगुणाः। स्वादुत्वम्। रूक्षत्वम्। हिमत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः ॥

उत्पली, स्त्री, तुषचर्पटी। इति मेदिनी। तुँसेर चापड़ा इति भाषा ॥

उत्पवनं, क्ली, (उत् + पू + ल्युट्।) कुशग्रन्थिकायां पवित्रमध्येन जलादेरुत्क्षेपणम्। तच्च क्रमः। "पवित्रद्वयमग्रे वामहस्तानामिकाङ्गुष्ठाभ्यां मूले दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां उत्तानहस्ताभ्यां गृहीत्वा आज्ये प्रक्षिप्य तयोर्म्मध्येनाग्नावाज्योत्क्षेपणम्"। इति कालेसिः ॥ "पवित्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेन अधोमुखो व्यस्तपाणिः पवित्रमध्येन प्रोक्षणीजलस्य किञ्चिदुत्क्षेपणम्"। इति पशुपतिः ॥ "पशुपत्युक्तक्रमेण सामगानां मन्त्रोच्चारणपूर्व्वकं पवित्रद्वयमध्येनाग्नावाज्योत्क्षेपणं। इति भवदेवभट्टः ॥

उत्पश्यः, त्रि, (उर्द्ध्वं पश्यतीति + उत् + दृश् + ख।) उन्मुखः। ऊर्द्धदृष्टिविशिष्टः। इति हेमचन्द्रः ॥

उत्पाटनं, क्ली, (उत् + पट् + णिच् + ल्युट्।) उन्मूलनम्। मूल उपड़ान इति भाषा ॥ (यथा सुश्रुते।
"निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा" ॥)

उत्पाटितं, त्रि, (उत् + पट + णिच् + क्त।) क्षतोत्पाटनं। तत्पर्य्यायः। उन्मूलितम् २ उत्खातम् ३। इति जटाधरः ॥ आवर्हितम् ४ उद्धृतम् ५। इति हेमचन्द्रः ॥

उत्पातः, पुं, (उत् + पत् + घञ्।) उत्पतति अकस्मादायाति यः। प्राणिनां शुभाशुभसूचकमहाभूतविकारभूकम्पादिः। इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः। अजन्यम् २ उपसर्गः ३। इत्यमरः ॥ स त्रिविधः। दिव्यः १ यथा अपर्व्वणि चन्द्रादित्यग्रासादिः। आन्तरीक्ष्यः २ यथा, उल्कापातनिर्घातादिः। भौमः ३ यथा भूकम्पादिः। इति दीपिकाचण्डीटीकेषु ॥ (उत्पातानां लक्षणादिकं ऋतौ स्वभावप्रभवात् अदोषत्वञ्चोक्तं बृहत्संहितायां ४६ अध्याये। यथा,—
"नरपतिदेशविनाशे केतोरुदये ऽथवा ग्रहेऽर्केन्दोः।
उत्पातानां प्रभवः स्वर्तुभवत्वाप्यदोषाय ॥ ८२ ॥
येच न दोषान् जनयन्त्युत्पातास्तान्तुसुखभावकृतान्।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥८३॥
वल्मीकाग्निमहीकम्पसन्ध्यानिर्घातनिःस्वनाः।
परिवेषरजोधूमरक्तार्कास्तमनोदयाः ॥ ८४ ॥
द्रुमेभ्योऽम्बरसङ्क्षेपनक्तपुष्पफलोद्भमाः।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥८५॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
अग्निज्वलनस्फोटधूमवेगनिघातहतम् ॥ ८६ ॥
रूक्षपद्मारुणं सान्ध्यं नभः क्षुद्भार्यवोपमम्।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥८७॥
शक्रायुधपरीवेषविद्युच्छ्वभ्रविरोहणम्।
कम्पोद्वर्त्तनवैक्लव्यं रसनं दरणं क्षितेः ॥ ८८ ॥
सरोनद्युदयानानां वृद्धार्द्रतरणस्रवाः।
सरणं चाद्रिगेहानां वर्षासु न भयावहम् ॥८९॥
दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनम्।
ग्रहनक्षत्रतारायां दर्शनं च दिवाम्बरे ॥ ९० ॥
गीतवादित्रनिर्घोषा वनपर्व्वतसानुषु।
शस्यवृद्धिरयां हानिरपापाः शरदि स्मृताः ॥९१॥
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम्।
रक्तोत्पत्तादिसत्वानां दर्शनं वागमानुषी ॥९२॥
दिशो धूमान्धकाराश्च सनमोवनपर्व्वताः।
उचैः सूर्य्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ॥९३॥
हिमपातानिलोत्पातविरूपांद्भुतदर्शनम्।
लक्षणाञ्जननिभाकाशं तारोल्कापातपिङ्गरम् ॥९४॥
चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥९५॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभप्रदाः।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते भयदारुणाः ॥९६॥
उन्मत्तानाञ्च या गाथाः शिशूनां भाषितञ्च यत्।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः ॥९७॥
पूर्व्वं चरति देवेषु पश्चात् गच्छति मानुषान्।
नचोदिता वाग्वदति सत्या ह्येषा सरस्वती ॥९८॥
उत्पातान् गणितविवर्जितोऽपि बुद्ध्या
विख्यातो भवति नरेन्द्रवल्लभश्च।
एतत्तन्मुनिवचनं रहस्यमुक्तं
यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी" ॥ ९९ ॥

उत्पतनं। उल्लम्फः। यथा, रामायणे ५।६८।२३।
"एकोत्पतेन ते लङ्घामेष्यन्ति हरिपुङ्गवाः"।

उन्नतिः। वृद्धिः। यथा, हितोपदेशे।
"करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणां"।

उत्पत्तिः। यथा, महाभारते, वनपर्व्वणि।
"बुद्धिरात्मानुगतीव उत्पातेन विधीयते।
तदाश्रिता हि सा ज्ञेया बुद्धिस्तस्यैविधी भवेत्"॥)

उत्पादकः, पुं, (उत् + पद + णिच् + ण्वुल्।) पशुविशेषः। तत्पर्य्यायः। शरभः २ कुञ्जरारातिः ३ अष्टपादः ४। इति हेमचन्द्रः ॥

उत्पादकः, त्रि, (उत्पादयतीति। उत् + पद् + णिच् + ण्वुल्।) उत्पादयिता। जनकः। यथा मनुः।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता"।
२।१४६॥

उत्पादनं, क्ली, (उत् + पद् + णिच् + ल्युट्।) जननम्। उत्पन्नकरणम्। इति व्याकरणम्॥(यथा मनुः।६।२७।)
"उत्पादनमपत्यस्य जातस्य परिपालनम्"।

उत्पादशयनः, पुं क्ली, (उत्पाद ऊर्द्धपादः सन् शेते यः सः। उत्पाद + शी + ल्यु।) टिट्टिभपक्षी। इति हेमचन्द्रः ॥

उत्पादिका, स्त्री, (उत् + पद् + णिच् + ण्वुल् + टाप्।) देहिकानामकीटः। इति त्रिकाण्डशेषः ॥ छिलमोचिका इति शब्दचन्द्रिका ॥ पूतिका। इति भरतो द्विरूपकोषश्च ॥

उत्पाली, स्त्री, (उत् + पल् + घञ् + ङीष्।) आरोग्यम्। इति शब्दचन्द्रिका ॥

उत्पिञ्जलः, त्रि, (उद्गतिशयः पिञ्जलो यस्यः।) मद्यमाकुलः। अतिप्रियव्याकुलः। तत्पर्य्यायः। उत्पिञ्जः २ पिञ्जलः ३। इति हेमचन्द्रः ॥

उत्प्रेक्षा, स्त्री, (उत्प्रेक्षते इति उत् + प्र + ईक्ष + अ + टाप्।) अनवधानम्। इति मेदिनी॥ काव्यालङ्कारविशेषः। तस्य लक्षणम्।
"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्"।
"अस्यार्थः। प्रकृतस्य उपमेयस्य समेन उपमानेन यत् सम्भावनं मिथ्यात्वेन वर्णनम्"। इति काव्यप्रकाशः॥ (अस्या भेदा बहवः। यदुक्तं साहित्यदर्पणे, दशमपरिच्छेदे। ५६—६२॥
"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि॥
तदप्यधापि प्रत्येकं भावाभावाभिमानतः।
गुणक्रियास्वरूपत्वात् निमित्तस्य पुनश्च ताः॥
द्वात्रिंशद्विधतां यान्ति तत्र वाच्याभिदाः पुनः।
विना द्रव्यं त्रिधा सर्व्वाः स्वरूपफलहेतुगाः॥
उक्तयनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः।
प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः॥
उक्तयनुक्तोः प्रकृतस्य प्रत्येकं ता अपि द्विधा।
अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः"॥
विस्तृतिस्तु अलङ्कारशब्दे द्रष्टव्या॥)

उत्प्लवनं, क्ली, (उत् + प्लु + ल्युट्।) उल्लम्पनम्। लाफान इति भाषा॥ (यथा, मनुः। ५।११५॥
"द्रव्याणां चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम्"॥)

उत्प्लवा, स्त्री, (उत् + प्लु + अच् + टाप्।) नौका। इति शब्दरत्नावली॥

उत्फालः, पुं, (उत् + फल् + घञ्।) लम्फः॥ ("तत्त्वज्ञं सकृतोत्फालः प्रकृतिदेवोऽपि साध्वसात्"। इति कथासरित्सागरे। १६ तरङ्गे॥)

उत्फुल्लः, त्रि, (उत्फलतीति। उत् + फल् + क्त। आदितश्चेतोऽभावः उत्फुल्लसंफुल्लयोरुपसंख्यानमिति निष्ठातस्य लः।) प्रफुल्लः। विकसितः। इत्यमरः॥ (यथा, किराते।
("उत्फुल्लकमलपरागजन्या-
दुद्भूतः सरसिजसम्भवः परागः"।
स्फीतः। वर्द्धितः। (यथा, विष्णुपुराणे। १।६।१३॥
"हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता"।
आनन्दादिना विस्कारितः। यथा, रामायणे॥
"अवस्थितैः समीपस्थैस्तासादुत्फुल्ललोचनैः"।)
स्त्रीणां करणम्। उत्तानम्। इति मेदिनी॥

उत्सः, पुं, (उनत्ति जलेन। उन्द + उन्दिगुधिकुषिभ्यस्सेति सः। किदित्यनुवृत्तेर्नेत्वं नोपः।) प्रस्रवणम्। इत्यमरः॥ उनइ इति भाषा। यत्र स्थाने खुत्वा जलं गलति तत्र। इति भरतः॥ स्वाम्यादयस्तु यविच्छेदेन खवज्जलं यत्र स्थाने पतति निपत्य च बहुलीभवति तत्रेत्याहुः॥ तथा साह्नोऽप्याह।
"गिरेरुपरि निर्झरादिप्रभवजलसङ्घातः"।
"अजस्रं मन्दवेगेन खवज्जले। इति कोक्काटः"॥

उत्सङ्गः, पुं, (उत्सज्यते मिलति यत्र। उत् + सञ्ज + घञ्।) क्रोडम्। इति जटाधरः॥ ("उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम्"॥ इति मेघदूते ८६। तथा, विष्णुपुराणम्। १।११।५॥
"प्रणयेनागतं पुत्रम् उत्सङ्गारोहणोत्सुकम्"॥
पर्व्वतादीनां शिखरदेशः। सानुः॥ यथा, रघुः।
"शिलाविभङ्गैर्मृगराजशावा-
स्तुङ्गं नगोत्सङ्गमिवारुरोह"॥ ६। ३॥
सौधादीनामुपरिभागः। छाद् इति भाषा॥
"सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः"।
इति मेघदूते। २६। अभ्यन्तरभागः।
"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः"।
इति कुमारे। १। १०। ऊर्द्धतलः। बहिर्भागः।
"दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः"।
इति रघुवंशे। ४। ७४। सङ्गमः॥ आलिङ्गनम्। विवाहः॥ व्रणाधोभागः। पूय इति भाषा॥ यथा सुश्रुते। सूत्रस्थाने।
"अभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति"।
गर्भः। यथा, महाभारते परीक्षिज्जन्मनि। १४। ६८। १८। १९॥
"आसीन्मम मतिः कृष्ण! पूर्णोत्सङ्गा जनार्दन"॥)

उत्सर्गः, पुं, (उत् + सृज् + घञ्।) त्यागः। दानम्। वर्জ্জनम्। (यथा, कुमारे। ७। ३५॥
"श्रीलक्षणोत्सर्गविनीतवेषाः"।
"तयोत्सर्गकृततरगतिरुत्तरं वर्त्म तीर्णः"।
इति मेघदूते। २०॥ यथा, मनुः। ११। १९३।
"तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च"।)
सामान्यविधिः। इति हेमचन्द्रः॥ (यथा, कुमारे। २। २७।
"अपवादैरिवोत्सर्गाः कृतव्याकृत्तयः परैः"।)
साग्निकर्त्तव्यक्रियाविशेषः। इति तिथ्यादितत्त्वम्। अथ वैधोत्सर्गविधिः। स्नानसन्ध्याचमनानि कृत्वा नारायणनमस्कृत्वा गुरून् संपूज्य देयद्रव्यं वामहस्तेन धृत्वा दक्षिणहस्तेन चिरभ्यर्च्य तद्द्रव्याधिपतिदेवतां सम्प्रदानञ्च अर्चयित्वा संकल्प्य कुशतिलजलत्यागपूर्ब्बकदानम्। इति स्मृतिः॥
(अपानवायोर्व्यापारः। मलमूत्रादिवर्জ্জनम्॥ उत्सृज्यते विण्मूत्रमनेनेति व्युत्पत्त्या पायविन्द्रियम्। यथा,—यथा, मनुः। १२। १२१।
"मनसोन्द्रं दिशः श्रोत्रे क्रान्तिं विष्णौ बले हरम्।
वाय्वग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्"॥)

उत्सर्জनं, क्ली, (उत् + सृज् + ल्युट्।) उत्सर्गः। तत्पर्य्यायः। त्यागः १ विहापितं २ दानं ३ विसर्জ্জनं ४ विश्राणनं ५ वितरणं ६ स्पर्शनं ७ प्रतिपादनं ८ प्रादेशनं १० निर्व्वपणं ११ अपवर्জ্জनं १२ अंहतिः १३। इत्यमरः॥ (साग्निकर्त्तव्यक्रियाविशेषः। (यथा, मनुः। ४। ६६।
"पुण्ये तु छन्दसां कुर्य्यात् बहिरुत्सर्জ্জनं द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्ब्बार्द्धे प्रथमेऽहनि"॥)

उत्सर्पिणी, स्त्री, (उत् + सृप् + णिनि + ङीष्। उत्सर्पतीति वाक्ये वाग्लिङ्ग एव।) जिनानां कालविशेषः। यथा,—हेमचन्द्रः॥
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीभेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षड्वा उत्सर्पिण्यां तथैव विपरीताः।
एवं द्वादशभिरैर्विवर्त्तते कालचक्रमिदम्"॥
(उद्गमनशीला। यथा, शाकुन्तले ६ अङ्के।
"उत्सर्पिणी खलु महतां प्रार्थना"। इति॥)

उत्सर्प्या, स्त्री, (उत् + सृ + ण्यत्।) प्रजनकालप्राप्ता गौः। इति जटाधरः॥ गाभ लक्षणेर उपयुक्त गाइ इति भाषा।

उत्सवः, पुं, (उत् + सू + अच्।) नियताकादजनकव्यापारः। तत्पर्य्यायः। क्षणः २ उद्धवः ३ उद्धर्षः ४ महः ५। इत्यमरः॥ (यथा मनुः।३।५९।
"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च"॥)
उत्सेकः। इच्छाप्रसवः। कोपः। इति मेदिनी॥ (उन्नतिः। अभ्युदयः।
"उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे"॥
इति हितोपदेशेः। १। १६४॥)

उत्सादनं, क्ली, (उत् + सद् + णिच् + ल्युट्।) समुल्लेखः। उद्वाहनम्। उद्वर्त्तनम्। इति मेदिनी॥ ("उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने"। इति मनुः। २। २०९॥ विनाशः। उन्मूलनम्॥
"पूर्व्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः।
क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम्"॥
इति रामायणम्। १। ७४। २१॥ औषधलेपनादिना व्रणस्य संशोधनम्। तथा,—सुश्रुते।
"अपामार्गोऽश्वगन्धा च तालपर्णी सुवर्चला।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः"॥
"उत्सादनात् भवेत् स्त्रीणां विशेषाल्लान्तिमद्दवः।
प्रहर्षसौभाग्यमृजालाघवादिगुणान्वितम्"॥
इति चिकित्सितस्थाने २४ अध्याये सुश्रुतेनोक्तम्॥)

उत्सादितं, त्रि, (उत् + सद् + णिच् + क्त।) कृतोत्सादनम्। उद्वर्त्तितम्। निर्म्मलीकृतशरीरम्॥ (यथा, महाभारते ७।८०। १०। प्रतिज्ञापर्व्वणि।
"उत्सादितः कषायेण बलवद्भिः सुधिक्षितैः।
आशुतः साधिवासेन जलेन सुसुगन्धिना"॥)

उत्सारकः, पुं, (उत्सार्य्यन्ते प्रभुद्वारतोऽनेन इति। उत् + सृ + णिच् + वुण्।) द्वारपालः। इति हेमचन्द्रः॥ उत्सारणकर्त्ता॥

उत्सारणं, क्ली, (उत् + सृ + णिच् + ल्युट्।) दूरीकरणम्। चालनम्। स्थानान्तरप्रापणम्॥

उत्साहः, पुं, (उत् + सह + घञ्।) उद्यमः। तत्पर्य्यायः। अध्यवसायः २। इत्यमरः॥ सूत्रम्। इति मेदिनी॥ कल्याणम्। भावविशेषः। इति शब्दरत्नावली॥ (यथा, साहित्यदर्पणे ३य परिच्छेदे।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च"॥)
ध्रुवकविशेषः। तल्लक्षणं यथा,—
"उत्साहः स्यात् रसे हास्ये ताले केन्दुकसंज्ञके।
वंशस्थद्विकरः पादैस्त्रयोदशमितास्तरः"॥
इति सङ्गीतदामोदरः॥

उत्साहवर्द्धनं, क्ली, (उत्साहं वर्द्धयति यत्। उत्साह + वध + ल्युट्।) उद्यमवर्द्धिः। वीररसः। इत्यमरः॥

उत्सिक्तः, त्रि, (उत् + सिच् + क्तः।) उद्धतः। इति चिकित्साशेषः॥ गर्व्वितः। वर्द्धितः। उद्रिक्तः। इति श्रीभागवतम्॥ (यथा, मनुः ८। ७१।
"बालदृद्धातुराणाञ्च साक्ष्येषु वदतां मृषा।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा"।
"वीर्य्योत्सिक्तौ हि तौ पापौ कालपाशवशङ्गतौ"।
इति रामायणे १म काण्डे॥)

उत्सिच्यमानः, त्रि, (उत् + सिच् + शानच्।) उद्रिच्यमानः। वृद्धिमान्। इति श्रीभागवतम्॥

उत्सुकः, त्रि, (उत् उद्योगं सुवति सौति सुनोति वा। सु प्रसवैश्वर्य्ययोः। विचिसंज्ञापूर्ब्बकत्वात् गुणाभावः। क्विपि आगमशास्त्रस्यानित्यत्वात्तद्भावो वा। ततः संज्ञायां कन्॥ यद्वा उत् सुवति। षू प्रेरणे। मितद्वादित्वात् डुः। सत्सिति क्विप् वा। कनिकेण इति ह्रस्वः॥ उत् + सु + क्विप् + कन्।) वाञ्छितकर्म्मोद्यतः। तत्पर्य्यायः। इष्टार्थोद्युक्तः २। इत्यमरः॥ उत्कण्ठितः। इति हेमचन्द्रः॥ (यथा, रामायणे आदिकाण्डे।
("प्रेषयिष्यति राजा तु कुशलार्थं तवानघे।
ब्राह्मणान् नित्यशः पुत्रि मोत्सुका भूः कदाचन"॥
"वत्सोत्सुकापि स्तिमिता सपर्य्याम्"।
इति रघुवंशे २।२२॥)

उत्सूरः, पुं, (सूरं सूर्य्यमतिक्रान्तः।) दिनावसानम्। इति हेमचन्द्रः॥

उत्सृष्टः, त्रि, (उत् + सृज् + क्तः।) त्यक्तोत्सर्गः। तत्पर्य्यायः। त्यक्तः २ हीनः ३ विधुतः ४ समुज्झितः ५ धूतः ६। इत्यमरः॥ (यथा, याज्ञवल्क्यः।
"महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः"॥)

उत्सेचनं, क्ली, (उत् + सिच् + ल्युट्।) ऊर्द्धसेकः। उथलन उपचन इत्यादि भाषा॥

उत्सेधः, पुं, (उत् + सिध् + घञ्।) पर्ब्बतवृक्षादीनां दैर्घ्यम्।
("कूर्म्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः"॥
इति महाभारते गजकूर्म्मयुद्धे। २९। ३१।)
उच्छ्रयः। (यथा, कुमारे ५। ८॥
"पयोधरोत्सेधविशीर्णसंहति"॥
उपरिभागः। यथा, कुमारे ५।२४।
"पयोधरोत्सेधनिपातचूर्णिताः"।)
शरीरम्। इत्यमरः॥ संहननम्। इति हेमचन्द्रः॥
("सोत्सेधमुच्चार्थशिरातनुत्वम्"।
इति भावप्रकाशे शोथाधिकारे॥
"उत्सेधं संहतं शोफं तमाऊर्निचयादतः"।
इति निदानस्थाने त्रयोदशाध्याये वाभटेनोक्तम्॥)

उद् व्य, (उ + क्विप् + तुक्। एधोदरादित्वात् साधुः।) विंशत्युपसर्गान्तर्गत उपसर्गविशेषः। अस्यार्थः। ऊर्द्धम्। उत्कर्षः। प्राकट्यम्। नैकट्यम्। इति दुर्गादासः॥ प्रकाशः। विभागः। प्राबल्यम्। अस्वास्थ्यम्। प्रक्तिः। प्राधान्यम्। बन्धनम्। भावः। मोक्षः। लाभः। ऊर्द्धकर्म्म। इति मेदिनी॥

उदं, क्ली, (उद + अच्।) जलम्। इति शब्दरत्नावली।
("जगन्नद्यान्तोदधिसंस्रवोदे

नारायणस्योदरनाभिनालात्"।
इति श्रीभागवते। तथा च गीतायाम् ।२।४६।
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"॥)

उदक्, [च्] व्य, (उद् + अञ्च् + अस्तातिः।) उत्तरदिग्देशकालाः। इति मेदिनी॥

उदकं, क्ली, (उनत्तीति। उन्दी क्लेदने + क्वन्। उदकमिति २।३६। उणादिसूत्रेण साधु।) जलम्। इत्यमरः॥
("अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठति"।
इति माघः २।३४॥ तथा श्रीभगवद्गीता। २।४६॥
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"।
"उदकस्योदः एकहलादौ। पाणिनिः।६।३।५६।
इति विकल्पः। उदकुम्भः। उदककुम्भः। यथा, भट्टिः। २। २०। "तपःक्लृप्ताः शान्युदकुम्भहस्ताः"॥ उदशब्दोऽप्युदकपर्य्याय इति भाष्यटीका। उदकस्योदः संज्ञायामिति रक्षितः।। यथा, कुमारे ५।२६। "सहस्रराचीरुदवासतत्परा"॥ इति उज्ज्वलदत्तः।
वारिशब्देऽस्य विवरणं बोद्धव्यम्॥)

उदकपरीक्षा, स्त्री, (उदकस्य उदकेन वा परीक्षा।) दिव्यविशेषः। यथा। अथोदकपरीक्षा।
पितामहः।
"तोयस्याथ प्रवक्ष्यामि विधिं धर्म्मं सनातनम्।
मण्डलं पुण्यधूपाभ्यां कारयेत् सुविचक्षणः॥
शरान् संपूजयेद्भक्त्या वैणवञ्च धनुस्तथा"।
तत्र प्रथमतो वरुणं पूजयेत्। यथा नारदः।
"गन्धमाल्यैः सुरभिर्मधुक्षीरघृतादिभिः।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः"॥
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसमन्तकप्रतिज्ञापत्रशिरोनिवेशान्तं कर्म्म कुर्य्यात्।
कात्यायनः।
"शरांस्त्वनायसान्यांस्तु प्रकुर्व्वीत विशुद्धये।
वेणुकाष्ठमयांश्चैव क्षौमा च सुदृढ़ं क्षिपेत्"॥
पितामहः।
"क्षौमा च क्षत्रियः कार्य्यस्तदलाभे ब्राह्मणोऽथवा॥
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः॥
इषून् प्रक्षिपेद्धीमान् मारुते वाति वा शनैः।
विषमे भूप्रदेशे च वृक्षस्याशुसमाकुले"॥*॥
नारदः।
"क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम्।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्विधिः"॥
अङ्गुलीनां समाधिकं शतं यस्य धनुषः परिमाणं तत् सप्तशतम्। एवं षट्शतादिकम्॥*॥
पितामहः।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
हस्तानान्तु शते सार्द्धे लक्ष्यं ज्ञात्वा विचक्षणः॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदर्शनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्जयेत्।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः"॥
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छेदित्यर्थः। तेन प्रसरणपक्षेऽपि पतनस्थानकशर-

ग्रहणं ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने शरः आनेतव्यः॥*॥ नारदः।
"नदीषु नातिवेगासु तड़ागेषु सरःसु च।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्"॥
नातिवेगासु स्थितिविरोधिवेगशून्यासु॥*॥
विष्णुः। पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्জ্জिते तस्य नाभिमात्रजले मग्नस्यारागद्वेषिणः पुरुषस्यान्यस्योरू गृहीत्वा अभिमन्त्रिताभ्यः प्रविशेत्। तत्समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरमोक्षं कुर्य्यादिति तस्य शोधयेत्यर्थः। अन्यथा तस्येति व्यर्थ स्यात्॥*॥
अन्यपुरुषस्य स्तम्भधारणमाह स्मृतिः।
"उदके प्राङ्मुखस्तिष्ठेदर्म्मस्थूणां प्रगृह्य च"॥*॥
प्राङ्विवाककर्त्तृकजलाभिमन्त्रणमाह पितामहः।
तोय त्वं प्राणिनां प्राणः रक्षेरार्चन्तु निर्म्मितम्।
शुद्धेश्च कारणं प्रोक्तं दिव्यानां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"॥*॥
शोधयितृकाभिमन्त्रणमाह याज्ञवल्क्यः।
"सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम्।
नाभिमात्रोदस्थस्य गृहीत्वोरू जलं विशेत्"॥
मा मां। अभिशाप्य शपथं कारयित्वा। कं जलम्। विशेत् निमज्जेत्॥*॥ तीरञ्च निमज्जनसमीपे समे स्थाने शोधयितृप्रमाणोचितं कार्य्यम्। यथा नारदः।
"गत्वा तु तज्जलस्थानं तटे तीरमुचितम्।
कुर्व्वीत कर्णमात्रन्तु भूमिभागे समे शुचौ"॥*॥
शरमोक्षे विशेषमाह तुर्नारदहस्पतौ।
"शरप्रक्षेपणस्थानादद्युवा जवसमन्वितः।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं विनिर्द्दिशेत्॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानादान्यत्र गमनादयस्मिन् पूर्व्वं निवेशयेत्"॥*॥
जयिनौ विशेषयति नारदः।
"पश्चाद्गतो धावकानां यौ स्यातामधिकौ जवे।
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि"॥
एकाङ्गस्य दर्शनादिति कर्णाद्यभिप्रायेण।
"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके।
अम्भु प्रवेशने यस्य शुद्धं तमपि निर्द्दिशेत्"॥
इति विशेषाभिधानात्। कात्यायनः।
"निमज्योत्प्लवते यस्तु दृश्येत प्राणिना करः।
पुनस्तत्र निमज्जेत दंशचिह्नविभावितः"॥
जलान्तर्गतमत्स्यजलौकादिना दष्टः समुत्प्लवते यदि तदा दष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः॥*॥
पितामहः।
"गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम्।
गच्छेत् तीरमूलान्तु शरस्थानं जवी नरः॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय सायकम्।
गच्छेत्तीरमूलन्तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।

अन्तर्ज्जलगतं सम्यक् ततः शुद्धिं विनिर्दिशेत्"॥ अत्र मज्जनसमकालगमनाभिधानात् शरमोक्षसमकालं गमनं शूलपाणियुक्तमयुक्तम्। मज्जनसमकालत्वित्रं मध्यमं शरमादायेत्यपरमुक्तमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु मुक्तेषु एको वेगवान् मध्यमशरपतनस्थानं गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति एवं स्थितयोस्तृतीयायां करतालिकायां प्राड्विवाकदत्तायां शोधो निमज्जति तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्ज्जलगतं यदि न पश्यति तदा शुद्धो भवतीति वक्तुमार्थः॥ *॥ *॥ तत्र प्रयोगः। उक्तलक्षणजलाशयनिकटे तथा तोरणं विधाय उक्तदेशे लक्ष्यं स्थापयित्वा तोरणसमीपे सशरं धनुः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान् हवनान्तमिष्ट्वा दक्षिणां दत्त्वा शोधस्य शिरसि प्रतिज्ञापत्रं बद्ध्वा प्राड्विवाको जलमभिमन्त्रयेत्। वक्ष्यमाणमन्त्रेण।

ॐ "तोयत्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्। शुद्धेषु कारणं प्रोक्तं दयाणां देहिनां तथा॥ अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"। इति॥ शोधयतु ॐ "सत्येन माभिरक्षस्व वरुण" इत्यनेन जलमभिमन्त्र्य गृहीतशूलस्य शोधनाभिमानोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमशरं गृहीत्वा अविन्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणमूलस्थिते प्राड्विवाकेन तालत्रये दत्ते शोधो गृहीतशूलाप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति तत्समकालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति। ततः शरग्राही च तस्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः। कर्णाग्रञ्च विना शिरोमात्रदर्शनेऽपि शुद्धः। मज्जनस्थानादन्यत्रगमनेऽप्यशुद्धः। ततो दक्षिणादिकं दद्यात्"। इति दिव्यतत्त्वम्॥

उदकीर्य्यः, पुं, (उदेन जलेन कीर्य्यः व्याप्यः।) महाकरञ्जः। इति राजनिर्घण्टः॥

उदकीर्य्यः, पुं, (उदेन कीर्य्यः।) करञ्जविशेषः। इति रत्नमाला॥ डालकरमूचा डहरकरञ्ज इत्यादि भाषा। (अस्योक्तः पर्य्यायो भावप्रकाशे। "उदकीर्य्यस्तृतीयोऽन्यः षड्ग्रन्था हरिवारुणी। मर्कटी वायसी चापि करञ्जी कारभञ्जिका"॥ गुणा अस्य करञ्जशब्दे ज्ञातव्याः॥)

उदक्या, स्त्री, (उदकं जलं शुद्धिस्नानार्थमर्हतीति। उदक + संज्ञायामिति यत्।) रजस्वला। ऋतुमती। इत्यमरः॥ (यथा, मनुः। ४।५७।
"नोदक्ययाभिभाषेत यज्ञं गच्छेन्नचाऋतुः"॥)

उदगद्रिः, पुं, (उदगुत्तरे योऽद्रिः।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

उदगयनं, क्ली, (उदक् उत्तरस्यामयनं गमनम्।) उत्तरायणम्। इति स्मृतिः॥ (यथा, मनुः।१।६७।
"दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः। अहस्तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्"॥
"तदादित्यस्योदगयनमादानञ्च वीव्हतून् शिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्"॥ इति सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्। विस्तरश्चास्योत्तरायणशब्दे ज्ञेयः॥)

उदग्भूमः, पुं, (उदगुत्तरदिग्वत् प्रशस्ता भूमिर्यत्र। समासे + अच्।) सद्भूमिः। उत्कृष्टस्थानम्; इति जटाधरः॥

उदग्रं, त्रि, (उद्गतमग्रं यस्य।) उच्छ्रितम्। उच्चम्। इत्यमरः॥ (विशालम्। महत्। दीर्घम्। भीमम्। "नयन् मधुलिहः स्वैत्यमुदग्रदशनांशुभिः"॥ इति माघः। २। २१। तथा, रघुः। २। ५३।
"च्युतात्किल चायत इत्युदग्रः च्युतस्य शब्दो भुवनेषु रूढः"। "अवन्तिनाथोऽयमुदग्रबाहुः"॥ इति च रघुः। ६। ३२॥)

उदग्रदन्, [त्] पुं, (उदग्रौ दन्तौ यस्य। अग्रान्तशुद्धशुभदृषवरहेभ्येति दन्तस्य दत्॥) उच्चदन्तहस्ती। उद्गतदन्तयुक्ते, त्रि। इति हेमचन्द्रः॥

उदञ्जः, पुं, (उत् + अञ्ज् + समुदोरजःपश्व्यभिति अप्।) अघृतपयोरिति पर्य्युदासात् घीभावो न।) पशुप्रेरणम्। इत्यमरः॥

उदञ्चनं, क्ली, (उत् + अञ्च + ल्युट्।) पिधानपात्रम्। इति हेमचन्द्रः॥ ढाकुनि इति भाषा। (यथा, शतपथब्राह्मणे। ४। ३। ५।
"प्रतिप्रस्थाता संखवावानयत्युन्नेता चमसेन वोदञ्चनेन वा"।) ऊर्द्ध्वक्षेपणम्॥

उदञ्चितं, त्रि, (उत् + अञ्च + क्त।) ऊर्द्ध्वक्षिप्तम्। इति हेमचन्द्रः॥ ("उदञ्चिताच्चोऽञ्चितदक्षिणोरुः"। इति भट्टिः॥ (पूजितम्॥)

उदण्डपालः, पुं, (उदण्डस्य उद्भिन्नाण्डस्य पालो गमनं पलायनं यत्र। मत्स्यसर्पविशेषाणामण्डं उद्भिन्नं सत्पलायते इति प्रसिद्धिः।) मत्स्यविशेषः। सर्पभेदः। इति मेदिनी॥

उदधिः, पुं, (उदानि उदकानि वा धीयन्तेऽस्मिन्। उद + वा उदक + धा + कि।) समुद्रः। इत्यमरः॥ ("उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्"। इति रघुः ८। ८॥ मेघः। घटः॥)

उदधिक्रमः, पुं, (उदधि + क्रम + विट्।) समुद्राक्रमणकर्त्ता। इति व्याकरणम्॥

उदधिमलः, पुं, (उदधेः समुद्रस्य मल इव॥) समुद्रफेनः। अस्य गुणाः। शीतलत्वम्। कषायत्वम्। अतिवान्तिकारित्वञ्च। इति राजवल्लभः॥

उदधिमेखला, स्त्री, (उदधिर्मेखलेव यस्याः॥) पृथिवी। इति महाभारतम्॥ ("चतुरुदधिमालामेखलाया भुवो भर्त्ता"। इति कादम्बरीकथामुखे।)

उदन्तः, पुं, (उद्गतो निर्गतिः अन्तो यस्य।) वार्त्ता। ("कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः"॥ इति मेघदूते १०१। तथा, रघुः।१२। ६६।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः"
साधुः। इति मेदिनी॥ वृत्तियाजनम्। इति शब्दरत्नावली॥ (पाकवशात् प्राप्तान्ते, त्रि। यथा, शतपथब्राह्मणे। "शृतमसदिति तदाऽर्द्धर्च्चुदन्तं तर्हि जुह्वयात् तद्वैनोदन्तं कुर्य्यादुप ह दहेत् यद्यदन्तं कुर्य्यादप्रज्ञत्रि वै रेत उपदग्धं तस्मान्नोदन्तं कुर्य्यात्"॥)

उदन्तकः, पुं, (उदन्त + स्वार्थे कन्।) वृत्तान्तः। वार्त्ता। इति शब्दरत्नावली॥

उदन्तिका, स्त्री, (उत् + अन्त + णिच् + ण्वुल् + टाप्।) वृत्तिः। इति शब्दरत्नावली॥

उदन्या, स्त्री, (उदन्यति उदकमेच्छति वा। सुपः आत्मनः क्यच्। अश्नायोदन्येति ईत्वाभावः क्यचि उदकस्योदन्भावोऽपि निपात्यते। अप्रत्ययादित्यः।) पिपासा। इत्यमरः॥ (यथा छान्दोग्योपनिषदि। ६।८।५।। "अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति"॥)

उदन्वान्, [त्] पुं, (उदकानि सन्त्यत्र। उदक + मतुप्। उदन्वानुदधौ चेत्युदकस्य उदन्भावो निपातितः मतुपि।) समुद्रः। इत्यमरः॥ (यथा रघुः ४। ५२॥
"असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता"।
ऋधिबिशेषः। इति पाणिनिः। ८।२।१३॥)

उदप आघाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (परं-सकं-सेट्।) पञ्चमस्वरादिः। उदप्तः। इति दुर्गादासः॥ पानुबन्ध उदधातुरयं भ्रमवशात् उदपेति लिखितः॥

उदपानं, क्ली, पुं, (उदकं पीयतेऽस्मिन्। उदक + पा + अधिकरणे + ल्युट्, उदकस्य उदः।) कूपः। इत्यमरः॥
("तडागान्युदपानानि वाप्यः प्रस्रवणानि च"। इति मनुः २।४८। तथा, रामायणे २।८०।१२॥
"निर्जलेषु च देशेषु खनयामासुरुत्तमान्। उदपानान् बहुविधान् वेदिकापरिमण्डितान्"॥ भावे ल्युट्। जलपानम्। यथा गीतायाम्। २।४६
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"॥)

उदयः, पुं, (उद्यन्ति ग्रहा यस्मात्। उत् + इ + अच्।) पूर्व्वपर्व्वतः। उदयाचलः। (भावे + अच्।) समुन्नतिः। इति मेदिनी॥ दीप्तिः। मङ्गलम्। इति शब्दरत्नावली॥ ग्रहाणामुद्गमः। तच्च सूर्य्यस्योदयविवरणं यथा, विष्णुपुराणे २ अंशे ८ अध्यायः॥ *॥
"उदयास्तमने चैव सर्व्वकालन्तु संमुखे। दिशाखण्डेषु तथा मैत्रेय विदिशासु च॥१३॥
यैर्यत्र दृश्यते भानुः स तेषामुदयः स्मृतः। तिरोभावश्च यत्रैति तत्रैवास्तमनं रवेः॥१४॥
नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः। उदयास्तमनाख्यञ्च दर्शनादर्शनं रवेः॥१५॥
शक्रादीनां पुरे तिसृन् स्पशत्येष पुरत्रयम्। विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा॥१६॥
उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः। ततः परं क्रसन्तीभिर्गोभिरस्तं निगच्छति॥१७॥
उदयास्तमनाभ्याञ्च स्मृते पूर्व्वापरे दिशौ।

यावत् पुरस्तात्तपति तावत् पृष्ठेऽथ पार्श्वयोः ॥१८॥
ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ।
ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम् ॥१९॥
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै ।
तस्मादित्युत्तरस्यां वै दिवाराचिः सदैव हि ।
सर्व्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः" ॥२०॥
उदयास्तमने च सर्व्वकालं भवतः । ते च परस्परं संमुखे समानसूत्रस्थे भवतः । तत्र हेतुमाह । यर्यचेति । रवेरुदयास्तमयौ सर्व्वकालं मध्याह्न एव सतोऽर्कस्य न त्त एव अतो रवेरुदयास्तमयत्वं दर्शनादर्शनमात्रमेव ॥ दर्शनादर्शनयोरवधिमाह । शक्रादीनामिति । इन्द्राद्यन्यतमस्य पुरे मध्याह्ने तिष्ठंस्तदेकं पुरं अभितः पुरद्वयं चेत्येवं पुरद्वयं तदन्तरालस्थौ द्वौ च विकर्णौ कोणौ उदयाद्यवस्थाभिः स्तृणति स्वरश्मिभिर्भासयति । तथा विकर्णस्थः अग्न्याद्यन्यतमकोणे मध्याह्ने स्थितस्तं कोणं अभितः स्थितं कोणद्वयं चेत्येवं चीन् कोणान् तन्मध्यवर्त्तिदे च पुरे तथैवोदयाद्यवस्थाभिः स्तृणति । भूवलयस्यार्द्धे प्रतपन् दृश्यते तावदहः । अर्द्धे तु न दृश्यते तावद्रात्रिरित्यर्थः । तथाहि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति तदा सौम्यपुरस्थानामस्तमयः । ऐशकोणस्थानां द्वतीयो यामः । अग्निकोणस्थानां प्रथमः । याम्ये स्थितानामुदयः । एवं यदा याम्ये मध्याह्ने तिष्ठति तदा ऐन्द्रे अस्तमयः । अग्निकोणे द्वतीयो यामः । नैर्ऋतिकोणे प्रथमो यामः । वारुणे उदयः । यदा च वारुणे मध्याह्नः तदा याम्ये अस्तमयः । नैर्ऋतिकोणे द्वतीयो यामः । वायव्ये प्रथमः । सौम्ये उदयः । यदा सौम्ये मध्याह्नस्तदा वारुणे अस्तमयः । वायव्ये द्वतीयो यामः । ऐशकोणे प्रथमः । ऐन्द्रे उदयः । एवं अग्निकोणे यदा मध्याह्नस्तदा ऐशकोणे अस्तमयः । इन्द्रपुरे द्वतीयो यामः । यमपुरे प्रथमः । नैर्ऋतिकोणे उदयः । इत्यादि योज्यम् । एवं मेरोः सर्व्वतः परिभ्रमन् सूर्य्योऽर्द्धभूवलयं प्रकाशयन् दर्शनादर्शनाद्यपेक्षया अहोरात्रव्यवस्थाकारणमुक्तं भवति ॥ सन्निधानव्यवधानकृतमेव रश्मीनां वृद्धिह्रासतीव्रत्वमन्दत्वादिकमपीत्याह । उदित इति गोभिः रश्मिभिः ॥ दिग्विभागोऽप्युदयास्तमयनिमित्तएवेत्याह उदयेति । यत्र यस्योदेति सा तस्य पूर्व्वा दिक् । यत्रास्तमेति सा अपरा प्रतीची । तथा श्रुतिः । "तस्मादसावादित्यः सर्व्वाः प्रजाः प्रत्युदेति । तस्मात् सर्व्वा एवान्यतः प्रत्युदगादिति" ॥ पुरस्तादुदयन्तं सूर्य्यं पश्यतश्च दक्षिण-वाम-पार्श्वभागौ दक्षिणोत्तरे दिशाविति दर्शयन् रश्मिविस्तारावधिमाह । यावदिति । चतुर्दिक्षु लोकालोकाचलपर्य्यन्तं तपतीत्यर्थः ॥ मेरौ तु विशेषमाह । ऋते इति । ब्रह्मसभावर्जं मेरोरुपर्य्यपि सर्व्वत्रतपति न तु ब्रह्मसभां भासयति । तत्र हेतुमाह । ये ये मरीचय इति ॥ मेरोः सर्व्वतोऽपि विशेषतान्तरमाह । तस्मादिति । यतो यस्मात् सर्व्वेषां द्वीपानां वर्षाणाञ्च मेरुरुत्तरत एव स्थितः तस्मान्मेरोरुत्तरस्यां दिशि सदा दिवापि अन्येषां दिनेऽपि नित्यं रात्रिरेव । अयं भावः । मेरुं प्रदक्षिणीकुर्व्वन्तं सूर्य्यं ये यत्र पश्यन्ति सैव तेषां प्राची । तेषाञ्च वामभाग एव मेरुः । अतः सर्व्वेषां सर्व्वदा मेरुरुत्तरत एव । दक्षिणभागे च लोकालोकाचलः । तस्मादुत्तरस्यां दिशि सदा रात्रिः । दक्षिणस्याञ्च दिशि सदा दिनमिति । यद्वा । भारतादिवर्षस्थानां सम्मुखे सूर्य्यमुद्यन्तं पश्यतामुत्तरस्यां दिशि वामभागे मेरोरेकतः सदा दिनम् । अन्यतश्च सदा रात्रिः । दक्षिणभागे तु सदा दिनमेवेत्यर्थादुक्तं भवति" ॥ इति तट्टीकायां श्रीधरस्वामी ॥

उदयनं, क्ली (उत् + इ + ल्युट्) उदयः । इति मेदिनी ॥ (यथा ऋग्वेदे १।४८।७।
"एषा युक्ते परावतः सूर्य्यस्योदयनादधि" ॥)

उदयनः, पुं, अगस्त्यमुनिः । वत्सराजः । इति मेदिनी॥ ("प्राप्यावन्तीनुदयनकथाकोविदान् ग्रामवृद्धान्"। इति मेघदूते।३१।) उदयनाचार्य्यः । स च कुसुमाञ्जलिग्रन्थकर्त्ता ॥

उदरं, क्ली, (उत् ऋणातीति । "उदिदृणातेरजौ पूर्व्वपदान्यलोपश्च" । उत् + दॄ + अच् । अन्त्यलोपश्च ।) नाभिरन्नयोर्मध्यभागः । पेट इति भाषा । तत्पर्य्यायः । पिचिण्डः २ कुक्षी ३ जठरः ४ तुन्दम् ५ । इत्यमरः ॥ युद्धम् । इति मेदिनी ॥ ("उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" । इति मनुः । ८ । १२५ ॥)

उदरः, पुं, (उदरं अश्नात्यनेनास्येति । अर्श आदित्वात् अच् ।) उदरस्थरोगविशेषः । उदरी इति भाषा । यथा । अथोदराधिकारः । तत्रोदरस्य निमित्तमाह ।

"रोगाः सर्व्वेऽपि मन्देऽग्नौ सुतरामुदराणि च ।
अजीर्णान्मलिनैस्तान्यर्जायन्ते मलसञ्चयात्" ॥
अग्नौ मन्दे सर्व्वे रोगा जायन्ते किन्तु सुतरामतिप्रयेन उदराणि जायन्ते । अपरानपि हेतूनाह । अजीर्णान्मलिनैस्तान्यैः अत्यन्तदोषजनकैः मलसञ्चयात् मलानां दोषाणां पुरीषस्य चातिवृद्धेः । अत्रोदरशब्देनोदरस्थो रोग उच्यते । यत आह ।

"तात्स्थ्यात्तद्धर्म्मताभ्याञ्च तत्समीपतयापि च ।
तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्व्विधा" ॥*॥

संप्राप्तिमाह ।

"रुद्धाः खेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः।
प्राणाग्न्नपानान् संदुष्य जनयन्त्युदरं नृणाम् ॥*॥

सामान्यरूपमाह ।

"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ।
श्लेष्मः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि ॥*॥

सन्निकृष्टनिदानपूर्ब्बिकां संख्यामाह ।

"पृथक्दोषैः समस्तैश्च क्षीहबद्धत्वतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ॥*॥

वातोदरस्य लक्षणमाह ।

"तत्र वातोदरे श्लेष्मः पाणिपाभ्राभिकुक्षिषु ।
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्व्वभेदनम् ॥
शुष्ककासोऽरुमर्द्दश्च गुरुता मलसंग्रहः ।
श्यावारुणत्वगादित्यमकस्माच्मांसवृद्धिमत् ॥
ततोदभेदमुदरं तनुक्षाग्निरातनम् ।
आध्मानादतिवच्छब्दमाहतं प्रकरोति च ॥
वायुश्चात्र सरुक् शब्दो विचरेत् सर्व्वतोगतिः" ॥
पाणिपादित्यत्र अञ्चनान्तः पाच्छब्द आर्षत्वात् । कुक्षिपार्श्वोदरेत्यत्र कुक्षिशब्द उदरस्य वामदक्षिणभागद्वयवाची । सर्व्वतोगतिः सकलकोष्ठे सञ्चरन् ॥*॥ पैत्तिकमाह ।

"पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता ।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् ।
पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते ।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते" ॥
हरित् शाकवर्णम् । सोष्म अन्तस्तापयुक्तम् । दह्यते बहिर्दाहयुक्तम् । धूमायते धूममिवोद्गमति । क्षिप्रपाकं क्षिप्रपाकात् जलोदरतां याति । प्रदूयते व्यथते ॥*॥ कफोदरमाह ।

"श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम् ।
तन्द्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ।
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धिकठिनं श्लीतस्पर्शं गुरु स्थिरम्" ॥
स्वापः स्पर्शाज्ञता । गौरवमङ्गानाम् । तन्द्रा निद्राबाहुल्यम् । उत्क्लेशो हृल्लासः । शुक्लराजीततं शुक्लशिराव्याप्तम् ॥*॥ सन्निपातोदरमाह ।

"स्त्रियोऽन्नपानं नखलोममूत्र-
विड्वार्त्तवैर्युक्तमसाधुवृत्ताः ।
यक्ष्मै प्रयच्छन्त्यरयो गरांश्च
दुष्टाम्बुदूषीविषसेवनाच्च ॥
तेनाशु रक्तं कुपिताश्च दोषाः
कुर्य्युः सुघोरं जठरं त्रिलिङ्गम् ।
तच्छीतवाते भृशदुर्दिने च
विशेषतः कुप्यति दह्यते च ॥
स चातुरो मूर्च्छति हि प्रसक्तं
पाण्डुः क्षुधः शुष्यति क्षामया च ।
दूष्योदरं कीर्त्तितमेतदेव
श्लीहोदरं कीर्त्यतो निबोध" ॥
स्त्रिय इत्यविवेकिसन्निहितजनोपलक्षणम् । ताश्च स्वसौभाग्यमिच्छन्त्यः । विट् मांर्ज्जारादीनाम् । आर्त्तवं रजः । अरयो वा । गरान् संयोगजानि विषाणि । दुष्टाम्बु सविषमत्यद्वणपर्णादियुतं शुक्तितञ्च ॥ दूषीविषं विषमेवाम्राद्युपघातेन स्वल्पप्रभावम् । यत उक्तम् ।

"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितञ्च ।
स्वभावतो वा गुणविप्रयुक्तं
विषं हि दूषीविषतामुपैति" ॥
गुणविप्रयुक्तं गुणवियुक्तं तत् । उदरं शीतलादिषु कुप्यति । दूषीविषस्य कोपात् । मूर्च्छातिविषयोगात् । प्रसक्तं निरन्तरं यतदेव सन्निपातोदरम् । तन्वान्तरे दूष्योदरं कीर्त्तितम् । अथवा परस्परं दूषयन्तीति दोषा एव दूष्याः तैः कृतमुदरं दूष्यो-

दरम् ॥*॥ प्लीहोदरमाह।
"वर्द्धते प्लीहवृद्ध्या यद्दक्षात् प्लीहोदरं हि तत्।
तद्दामे वर्द्धते पार्श्वे निमित्तं तस्य तच्च यत् ॥
प्रवृद्धप्लीहलिङ्गानि यान्युक्तानि भिषग्वरैः।
प्लीहोदरेऽपि दृश्यन्ते तानि सर्व्वाणि देहिनाम्"॥
प्लीहोदरस्यैव भेदो यद्वद्धाल्युदरं न पुनरधिकमित्याह। "सव्यान्यपार्श्वे यद्वृद्धि प्रवृद्धे ज्ञेयं यद्वद्धाल्युदरं तदेव"। यद्वद्धालयति दोषैर्भेदयतीति यद्वद्धाल्युदरं तदेव उदरमेव ॥*॥ बद्धगुदमाह।

"यस्यान्नमन्नैरुपलेपिभिर्व्वा,
बालाश्मभिर्व्वा पिहितं यथावत्।
सञ्चीयते यस्य मलः सदोषः,
शनैः शनैः शुष्करवच्च नाड्याम् ॥
निरुध्यते यस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
वृद्धाभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति" ॥

उपलेपिभिः पिच्छिलैरन्नैः शाकशालुकादिभिः। बालाश्मभिः बालुकाभिः कर्क्करैर्व्वा बालैः केशैः अश्मभिः पाषाणैर्व्वा। यथावत् यस्य यत् सम्भवति। मलः पुरीषम्। शुष्करवत् संमार्জ্জनीक्षिप्तद्रव्यधूल्यादिवत्। "शुष्करोऽवकरः पुमान्" इत्यमरः। शुष्करो घृण इति लोके। नाड्यां अन्त्रनाड्याम्। वृद्धाभिमध्ये वृद्धाभ्योर्मध्ये ॥*॥ क्षतोदरमाह।

"शल्यं यथान्नोपहतं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा।
तस्मात् क्षतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
नाभेरधस्तोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम्।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध" ॥

शल्यं कर्क्करादि। अन्नोपहतं अन्ननिहितम्। भुक्तं यदन्नं भिनत्ति। तथा अन्यथा आगतं भोजनं विना आगतं शरादि। तदपि यदन्नं भिनत्ति एतदुपलक्षणम्। श्लेष्मणमत्यशनं वा यदन्नं भिनत्ति। यत उक्तं चरके।
"शर्क्कराट्यकाष्ठास्थिकरटैरन्नसंयुतः।
भिद्येतान्नं यदा भुक्तं श्लेष्मणात्यशनेन वा"॥ इति। तस्मात् भिन्नादन्नात्। गुदतस्तु भूयः अन्त्रात् संक्षुभ्य पुनर्गुदतः स्रवेदित्यर्थः। दाल्यति विदीर्य्यतइव। पदसिद्धिरार्षत्वात्। एतत् क्षतोदरं तन्मान्तरे परिस्राव्युदरं प्रदिष्टम्॥*॥
उदकोदरमाह।

"यत् स्नेहपीतोऽप्यनुवासितो वा,
वान्तो विरिक्तोऽप्यथवा निरूढः।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि ॥
स्नेहोपलिप्तेष्वथवापि तेषु-
दकोदरं पूर्ब्बवदभ्युपैति।
स्निग्धं महत्तत् परिवृत्तनाभि
समाततं पूर्णमिवाम्बुना च" ॥

यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत्" ॥

स्नेहपीतः पीतइत्यत्राध्यवसितादित्वात् कर्त्तरि क्तः पश्चात् स्नेहं पीतः स्नेहपीत इति तत्पुरुषः। तेन स्नेहं पीतवानित्यर्थः। अनुवासितो वा गृहीतानुवासनवस्तिः। वान्तः अत्रापि पूर्ब्बवत् कर्त्तरि क्तः तेन वान्तवानित्यर्थः। एवं विरिक्तः विरिक्तवान्। तथा निरूढः गृहीतनिरूढवस्तिः। स चेदासु शीतलं जलं पिबेत्। तस्य तद्वहानि जलवहानि स्रोतांसि दुष्यन्ति स्वकर्म्मदुष्टानि भवन्ति जलवहेषु स्रोतःसु दुष्टेषु सत्सु अन्नरसे उपस्नेहन्यायेन बहिर्भूते दकोदरमायाति। अथवा तेषु उदकवहेषु स्रोतःसु स्नेहोपलिप्तेषु पूर्ब्बवत् यथापूर्ब्बम्। अन्नरसे उपस्नेहन्यायेन बहिर्निःसृते दकोदरमायाति। तथा जलेऽपि बहिर्निःसृते दकोदरमायाति। तत् उदरम्। परिवृत्तनाभि गम्भीरनाभि। समाततं स्तब्धम्। यथा दृतिः चर्म्ममयं जलाहरणपात्रम्। क्षुभ्यति अन्तर्जलदोलनेन सञ्चलति कम्पते बहिः शब्दायते कम्यमानं सत् शब्दं करोति॥*॥

साध्यासाध्यलक्षणमाह।

"जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम्।
बलिनस्तदजातास्तु यत्नसाध्यं नवोत्थितम्"॥
बलिनः अजातास्तु नवोत्थितञ्च यत्नसाध्यमित्यन्वयः।
"पश्चाद्बद्धगुदं तृद्धं सर्व्वं जातोदकं तथा।
प्रायो भवत्यभावाय छिद्रान्तञ्च दकोदरम्" ॥
छिद्रान्तं शरादिना छिद्रमन्तं यस्य तदुदरं अभावाय भवति॥*॥
जातोदकस्योदरस्य लक्षणमाह। चरकः।
"पयःपूर्णा दृतिरिव कोभे शब्दकरं मृदु।
अप्रयत्नशिराःशूलं नितान्तमुदरं महत् ॥
आलस्यमाम्यवैरस्यं मूत्रं बद्धं सकृच्छ्रतः।
जातोदकस्य लिङ्गं स्यान्मन्दोऽग्निः पाण्डुतापि च ॥
शूलाढ्यं कुटिलोपस्थमुपक्लिन्नतनुत्वचम्।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्জ্জयेत्" ॥
शूलाढ्यस्थाने शूनाढ्यमिति च पाठः। कुटिलीपस्थं वक्रमेहनम्। उपक्लिन्नतनुत्वचं। उपरि आर्द्रा तन्वो त्वगस्य। तं उदरिणम्।
"पार्श्वभङ्गान्नविद्वेषशोफातीसारपीड़ितम्।
विरिक्तं चाप्युदरिणं पूर्य्यमाणं विवर्জ্জयेत्" ॥
विरिक्तमपि पूर्य्यमाणं पूर्य्यमाणोदरं उदरिणं विवर्জ্জयेत् ॥*॥

अथोदरस्य चिकित्सा।
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा।
निहन्ति वातोदरशोफशूलान्
क्वाथः समूत्रो दशमूलजश्च ॥
कुष्ठं दन्ती यवक्षारः पाठा चित्रवगं वचा।
शुण्ठी चोष्णाम्बुना पीता वातोदररुजापहा" ॥
कुष्ठादिचूर्णम् ॥*॥
"लशुनस्य तुलामेकां जलद्रोणे विपाचयेत्।
त्रिकटु त्रिफला दन्ती हिङ्ग सैन्धवचित्रकम् ॥
देवदारु वचा कुष्ठं मधु शिग्रुः पुनर्नवा।
सौवर्च्चलं विड्लवणं दीप्यको गजपिप्पली ॥
एतेषां पलिकान् भागान् क्षिप्तः षट्पलानि च।
पिष्ट्वा कषायेणैतेन तैलं मद्दग्निना पचेत् ॥
तत्पिबेत् प्रातरुत्थाय यथाग्निबलमात्रया।
निहन्ति सकलान् रोगान् उदराणि विशेषतः ॥
मूत्रकृच्छ्रमुदावर्त्तमन्त्रवृद्धिगुदक्रमोन्।
पार्श्वकुक्षिभवं शूलमामशूलमरोचकम् ॥
यकृदप्लीलिकानाहान् प्लीहानं चाङ्गवेदनाम्।
मासमात्रेण नश्यन्ति अप्रीतिर्यांतजा गदाः" ॥
इति रसोनतैलम् ॥*॥
"पित्तोदरेषु बलिनं पूर्ब्बमेव विरेचयेत्।
दुर्ब्बलं क्षुनुवाप्यादौ शोधयेत् सौम्यवस्तिना।
संजातबलकायाग्निं पुनः स्निग्धं विरेचयेत् ॥
पयसा च त्रिवृत्कल्कैस्त्रिवृत्कस्य प्रवृतेन च ॥
पिप्पल्यादिगणेनाज्यं पाचितं पाययेद्भिषक्।
नरं पथ्यभुजं नित्यं कफोदरनिवृत्तये" ॥*॥
"नागरत्रिफलाकल्कैर्दध्यम्बुपरिपेषितैः।
पाचितं तैलमाज्यञ्च पिबेत् सर्व्वोदरापहम्" ॥
इति नागरादितैलं घृतञ्च ॥*॥
"शालियष्टिकगोधूमयवनीवारभोजनम्।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च ॥
आनूपमोदनं मांसं शाकं पिण्डकृतं तिलाः।
व्यायामश्च दिवास्वप्नपानपानानि वर्জ্জयेत् ॥
तथोष्णलवणोष्णानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरे तोयपानञ्च वर्জ্জयेत् ॥
उदराणां मलाढ्यत्वाद्बद्धशूः शोधनं हितम्।
क्षीरेणैरण्डतैलं वा पिबेन्मूत्रेण वासकृत्" ॥*॥
"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम्।
शर्क्करारास्नचोपेतं स्वादु पित्तोदरी पिबेत् ॥
यवानीहपुषाजाजीव्योषयुक्तं कफोदरी।
सन्निपातोदरी युक्तं त्रिकटुक्षारसैन्धवैः ॥
यवानी हपुषा धान्यं त्रिफला चोपकुञ्चिका।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
शृताङ्गा जीरको व्योषं स्वर्ज्जीरी च त्रिचित्रकम्।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विड्वङ्गञ्च समांसानि दन्त्या भागत्रयं भवेत्।
त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोगगणापहः।
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्वारुणाम्बुना।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड्बन्धे दाड़िमाम्बुभिरर्शसे।
परिकर्त्तषु वृत्ताम्लैरुष्णाम्बुभिर्जीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे।
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे ॥
दंष्ट्राविषे मूलविषे सगरे क्षत्रिमे विषे।
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम्" ॥
उपकुञ्चिका कारवी च वृहज्जीरकः। यस्य भगरैला नाम इति लोके। तस्य भागद्वयं ग्राह्यं पुनरुक्तेः। स्वर्ज्जीरी चोक इति लोके। विशाला इन्द्रवारुणी। सातला सीऊहभेदः सातलेत्येव

प्रसिद्धा । परिकर्त्तो गुदे परिकर्त्तनवत् पीड़ा इति नारायणचूर्णम् ॥ * ॥

"सुकच्चीरदन्तीत्रिफलाविड़ङ्ग-
सिंहीत्रिवृद्विचकसूर्य्यकल्कैः ।
घृतं विपक्वं कुड़वप्रमाणं
तोयेन तस्याच्चसमेन कर्षम् ॥
पीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः ।
नाराचमेनं जठरामयाना-
मुक्तं प्रयुक्तं प्रवदन्ति सन्तः" ॥

इति नाराचघृतम् ॥ * ॥

"वचाखड्याः कर्षमाचायाः कल्कं दध्यादिवेष्टितम् ।
निगिलेद्वारिणा नित्यमुदरव्याधिशान्तये" ॥

वचाखड़ी शूरणपत्नो मागधभेदः । वचाखड़ी इति लोके ॥ * ॥

"पुनर्नवादारुनिशासविश्वा-
पटोलपथ्याः पिचुमर्द्ददारु ।
सनागरच्छिन्नरुहेति सर्व्वैः
कृतः कषायो विधिना विधिज्ञैः ॥
गोमूत्रयुक् गुग्गुलुना च युक्तः
पीतः प्रभाते नियतं नराणाम् ।
सर्व्वाङ्गशोथोदरपार्श्वशूल-
श्वासान्वितं पाण्डुगदं निहन्ति" ॥

पुनर्नवादिक्वाथः । इत्युदराधिकारः । इति भावप्रकाशः ॥ ("उदरं क्लिमितं गुरु" इति वैद्यकमाधवकरधृतरुग्विनिश्चयग्रन्थः । अस्य ग्रन्थस्य रोगविशेषवाचत्वेऽन्याविशेषवाचत्वेऽपि रूढिरुदररोगग्रन्थे ज्ञातव्या ॥)

उदरग्रन्थिः, पुं, (उदरस्य ग्रन्थिरिव ।) गुल्मरोगः । इति हेमचन्द्रः ॥

उदरत्राणं, क्ली, (उदरस्य त्राणं यस्मात् ।) उदरबन्धवस्त्रादि । तत्पर्य्यायः । नागोदं २ । इति हेमचन्द्रः ॥

उदरदरिः, पुं, (उदच्छति उदर्य्यते वा । उत् + ऋ + उद्यत्तौ दरिदिति गधिन् ।) समुद्रः । सूर्य्यः । इति हेमचन्द्रः ॥

उदरपिशाचः, त्रि, (उदराय तत्पूरणाय पिशाच इव ।) सर्व्वान्नखादकः । तत्पर्य्यायः । सर्व्वान्नीनः २ सर्व्वान्नभक्षकः ३ । इति हेमचन्द्रः ॥

उदरम्भरिः, त्रि, (उदरं बिभर्त्तीति । उदर + भृ + इन् + मुम् च । निपातसिद्धः ।) खोदरमात्रपूरकः । तत्पर्य्यायः । कुक्षिम्भरिः २ आत्मम्भरिः ३ । इति हेमचन्द्रः ॥

उदरव्याधिः, पुं, (उदरस्य व्याधिः ।) उदररोगविशेषः । यथा,—गारुड़े १९४ अध्यायः ॥

"कदलीयवक्षारन्तु पानीयेन प्रसाधितम् ।
तदास्वादनान्नश्यन्ति उदरव्याधयोऽखिलाः" ॥

उदररोगः, पुं, (उदरस्य रोगः ।) जठरव्याधिविशेषः । उदरी इति भाषा ॥

("सिद्धविद्याधराकीर्णे कैलासे नन्दनोपमे ।
तप्यमानं तपस्तीव्रं साक्षाद्धर्म्ममिव स्थितम् ॥
आयुर्व्वेदविदां श्रेष्ठं भिषग्विद्याप्रवर्त्तकम् ।
पुनर्व्वसुं जितात्मानमग्निवेशोऽभ्यवादयत् ॥
भगवन्नुदरैर्दुःखैर्दृश्यन्ते क्षुद्दिता नराः ।
शुष्कवक्त्राः कृशैर्गात्रैराध्मातोदरकुक्षयः ॥
प्रणष्टाग्निबलाहाराः सर्व्वचेष्टाक्षमेश्वराः ।
दीनाः प्रतिक्रियाभावाज्जहतोऽसूनयत्नवत् ॥
तेषामायतनं सद्यो प्रायूपाक्तृप्तिभेषजान् ।
यथावज्ज्ञातुमिच्छामि गुरुणा सम्यगीरितम् ॥
सर्व्वभूतहितायर्षिः शिष्येणैवं प्रचोदितः ।
सर्व्वभूतहितं वाक्यं व्याहर्त्तुमुपचक्रमे" ॥

अस्य सनिदानं सम्प्राप्तिकलक्षणं यथा,—

"अग्निदोषान्मनुष्याणां रोगसङ्घाः पृथग्विधाः ।
मलवद्धा प्रवर्त्तन्ते विशेषेणोदराणि तु ॥
मन्देऽग्नौ मलिनैर्भुक्तैरपाकाद्दोषसञ्चयः ।
प्राणान्यपानान् सन्दूष्य मार्गान् बद्धोत्तरोत्तरान्॥
त्वङ्मांसान्तरमागम्य कुक्षिमाध्मापयन् भृशम् ।
जनयत्युदरं तस्य हेतुं शृणु सलक्षणम्" ॥

सामान्यहेतवो यथा,—

"अत्यम्ललवणाच्चारविदाह्यस्करसाशनात् ।
मिथ्यासंसर्ज्जनाद्रूक्षविरुद्धाशुचिभोजनात् ॥
क्षीणार्शोग्रहणीदोषकर्षणात् कर्म्मविभ्रमात् ।
क्षिप्तानामप्रतीकाराद्वौद्यादेगविधारणात् ॥
स्रोतसां दूषणादामात् संक्षोभादतिपूरणात् ।
अग्नेर्वातप्रकोपाद्वोधदन्तस्फुटनभेदनात् ॥
अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम् ।
उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः" ॥

प्रायूपं यथा,—

"क्षुधाशाः खादतिस्निग्धगुर्व्वन्नं पच्यतेऽचिरात् ।
भुक्तं विदाह्यते सर्व्वं जीर्णाजीर्णं न वेत्ति च ॥
सहते नातिसौहित्यमीषच्छोफश्च पादयोः ।
प्रश्वङ्गलक्षयेऽल्पेऽपि व्यायामे श्वासमृच्छति ॥
पुरीषनिचयो वृद्धिरुदावर्त्तकृता च रुक् ।
वस्तिसन्धौ रुगाध्मानं वर्द्धते पाच्यतेऽपि च ॥
आतन्यते च जठरमपि लब्धल्पभोजनात् ।
राजीजन्म वलीनाम्न इति लिङ्गं भविष्यताम्" ॥

सम्प्राप्तिर्यथा,—

"रुद्धा खेदाम्बुवाहानि दोषाः स्रोतांसि सञ्चिताः ।
प्राणापानान् हि सन्दूष्य जनयन्त्युदरं नृणाम्" ॥

सामान्यलक्षणं यथा,—

"कुक्षेराध्मानमाटोपः श्लोफः पादकरस्य च ।
मन्दोऽग्निः श्लक्ष्णगात्रत्वं कार्श्यञ्चोदरलक्षणम्" ॥

वातजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"रूक्षाल्पभोजनायासवेगोदावर्त्तकर्षणैः ।
वायुः प्रकुपितः कुक्षिहृदस्थिगुदमार्गगः ॥
हृत्वाग्निं कफमुद्धूय तेन रुद्धगतिस्तथा ।
आचिनोत्युदरं जन्तोः सान्तरमाश्रितः" ॥

अस्य रूपाणि ।

"कुक्षि-पार्श्व-पाद-हृषण-श्वयथूदर-विपाटनम् अनियतौ च वृद्धिक्षासौ कुक्षि-पार्श्वशूलोदावर्त्ताङ्गमर्द्द-पर्व्वभेद-शुष्ककास-कार्श्य-दौर्ब्बल्यारोचक-विपाका अधोगुरुत्वं वातवर्च्चमूत्रसङ्गः श्यावारुणत्वं नखनयनवदनत्वङ्मूत्रवर्च्चसामपि चोदरं तन्वसितराजीशिरासन्ततमाहतमाध्मातदृतिशब्दवद्भवति । वायुश्चोर्द्धमधस्तिर्य्यक् च सशूलशब्दस्वरत्वे-तद्वातोदरं विद्यात्" ॥

पित्तजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"कटूम्ललवणात्युष्णतीक्ष्णाग्न्यातपसेवनैः ।
विदाह्यध्यशनाजीर्णैस्त्रास्य पित्तं समाचितम् ॥
प्राप्यान्त्रिकमौ रुद्धा मार्गमुन्मार्गमास्थितम् ।
निहत्यामाशये वह्निं जनयत्युदरं ततः" ॥

अस्य रूपाणि ।

"दाहज्वर-तृष्णा-मूर्च्छातिसार-भ्रमाः कटुकास्यत्वं हरितहारिद्रत्वं नख-नयन-वदन-त्वङ्-मूत्र-वर्च्चसामपि चोदरं नील-पीत-हारिद्र-हरित-ताम्रराजीशिरावनद्धं दह्यात् दूषयते धूप्यते रूपायते खिद्यते क्लिद्यते मृद्वग्निं क्षिप्रप्रकाथ्यं भवत्येतत् पित्तोदरं विद्यात्" ॥

श्लेष्मजनितस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"अत्यायामदिवास्वप्नस्वादुस्निग्धपिच्छिलैः ।
दधिदुग्धोदकानूपमांसैस्त्र्याद्युपसेवितैः ॥
क्लेदेन श्लेष्मणा स्रोतः स्वाहृतेष्वाहृतोऽनिलः ।
तमेव पीड़यन् कुर्य्यादुदरं बहिरन्तगः" ॥

अस्य रूपाणि ।

"गौरवारोचकाविपाकाङ्गमर्द्द-सुप्ति-पाणि-पाद-मुष्कोरुश्लोपोत्क्लेश-निद्रा-श्वास-कासाः शुक्लत्वञ्च नख-नयन-वदन-त्वङ्मूत्रवर्च्चसामपि चोदरं शुक्लराजीशिरासन्ततं गुरुस्तिमितस्थिरं कठिनञ्च भवत्येतत् श्लेष्मोदरं विद्यात्" ॥

त्रिदोषजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,

"दुर्ब्बलाग्नेरपथ्यामविरोधिगुरुभोजनात् ।
स्त्रोदत्तैश्च रजोरोम-विण्मूत्रास्थिनखादिभिः ॥
विषैश्च मन्दैर्वाताद्याः कुपिताः सञ्चितास्त्रयः ।
शनैः कोष्ठे प्रकुर्व्वन्तो जनयन्त्युदरं नृणाम्" ॥

अस्य रूपाणि ।

"सर्व्वेषामेव दोषाणां समस्तानि लिङ्गान्युपलभ्यन्ते वर्णाश्च नखादिषूदरमपि नानावर्णराजीशिरासन्ततं भवत्येतत् सन्निपातोदरं विद्यात्" ॥

यकृत्प्लीहसमुद्भवस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"असितस्यातिसङ्क्षोभाद्यानयानाभिघेष्टितैः ।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः ॥
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानात् प्रवर्द्धते ।
प्लीहितं वा रसादिभ्यो विवृद्धन्तं विवर्द्धयेत्" ॥

इति तस्य प्लीहाकठिनोऽछिलेवादौ वर्द्धमानकच्छपसंस्थान उपलभ्यते सचोपेक्षितः क्रमेण कुक्षिं जठरमन्यधिष्ठानञ्च परिक्षिपन्नुदरमभिनिवर्त्तयति" ॥

अस्य रूपाणि यथा,—

"दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रयहृतमःपिपासाङ्गमर्द्द-क्लर्द्दि-मूर्च्छाक्लमाद-कास-श्वास-मृदुज्वरानाहाग्निनाशकार्श्यास्यवैरस्य-पर्व्वभेद-कोष्ठ-वातशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नील-हरित-हारिद्र-राजिमद्भवत्येवमेव यकृदपि दक्षिणपार्श्वस्थं कुर्य्यात्तुल्यहेतुलिङ्गौषधत्वात्तस्य प्लीहजठरेणावबोध इत्येतत् यकृत्प्लीहोदरं विद्यात्" ॥

बद्धगुदोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"पक्वाशयैः सहान्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तेत्थशूलैभिरान्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधाद्वातवह्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्धा जनयत्युदरं ततः"॥

अस्य रूपाणि।

"हृष्णा-दाह-ज्वर-मुख-तालु-ग्रीवोरुसाद-कास-श्वास-दौर्ब्बल्यारोचकाविपाक-वर्च्चोमूत्र-सङ्गाध्मान-च्छर्द्दि-क्लथ्य-शिरोहृन्नाभि-गुदशूलान्यपि चोदरं मूढ़वातं स्थिरमरुणं नीलराजिशिरावनद्धं सराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिवर्त्तत इत्येतद् बद्धगुदोदरं विद्यात्"॥

छिद्रोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"शर्करा-हृद्यकाष्ठास्थि-कण्टकैरन्नसंयुतैः।
भिद्येतान्त्रं यदा भुक्तैर्ज्जम्भयात्यशनेन वा।
इयात् पाकरसस्तेभ्यश्छिद्रेभ्यः प्रस्रवद्बहिः।
पूरयन् गुदमन्त्रञ्च जनयत्युदरं ततः"॥

अस्य रूपाणि।

"इति तदधोनाभ्याः प्रायोऽभिनिवर्त्तमानमुदकोदरस्य च यथाबलञ्च दोषाणां रूपाणि दर्शयत्यपि चातुरः सलोहित-नील-पीत-पिच्छिल-कुणपगन्धामवर्च्च उपवेशते छिक्का-श्वास-कास-हृष्णाप्रमेहा-रोचकाविपाक-दौर्ब्बल्यपरीतश्च भवत्येतत् छिद्रोदरं विद्यात्"॥

प्लीहोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,—
"स्नेहपीतस्य मन्दाग्नेः क्षीणस्यातिक्षुधस्य वा।
अत्यम्बुपानान्नष्टेऽग्नौ मारुतः श्लोष्मि संस्थितः॥
स्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः।
वर्द्धयेतां तदेवाम्बु स्वस्थानादुदराय तौ"॥

अस्य रूपाणि।

"तस्य रूपाण्यन्नकाङ्क्षापिपासा-गुदस्राव-शूल-श्वास-कास-दौर्ब्बल्याण्यपि चोदरं नानावर्णराजिभिरासन्ततमुदकपूर्णदृतिच्छोभसंस्पर्शं भवत्येतदुदकोदरं विद्यात्"॥

एषां साध्यत्वासाध्यत्वादिलक्षणं यथा,—
"तत्राचिरोत्पन्नमनुपद्रवमनुदकप्राप्तमुदरं त्वरमाणचिकित्सेदुपेक्षितानां ह्येषां दोषाः स्वस्थानादपक्वा अपरिपाकादबलीभूताः सन्तो स्रोतांसि चोपलेदयन् खेदञ्च वाह्येषु स्रोतःसु प्रतिहतगतिस्तिर्य्यगवतिष्ठमानस्तदेवोदकमाप्याययति"।

तत्र पिच्छोत्क्लेदौ मण्डलमुदरं गुरुस्तिमितमाकोचितमग्रव्यं मृदुस्पर्शमपगतराजीकमाक्रान्तं नाभ्यां सर्पतीति। ततोऽनन्तरं उदकप्रादुर्भावः॥

तस्य रूपाणि कुक्षेरतिमात्रवृद्धिः शिरान्तर्धाननगमनमुदकपूर्णदृतिसमत्वोभसंस्पर्शत्वञ्च।

तदातुरमुपद्रवाः स्पृशन्ति हृद्द्रवातीसार-तमक-हृष्णा-श्वास-कास-हिक्का-दौर्ब्बल्य-पार्श्वशूलारुचि-स्वरभेद-मूत्रसङ्गादयस्तथाविधमचिकित्स्यं विद्यादिति॥ भवति चात्र,—
"वातात् पित्तात् कफात् क्षीणः सन्निपातात्तथोदकात्।
परस्परं क्षुद्रतरमुदरं भिषगादिशेत्॥
पश्चाद्बद्धगुदन्तूर्द्धं सर्व्वं जातोदकन्तथा।
प्रायो भवत्यभावाय छिद्रान्त्वोदरं नृणाम्"॥
"श्वयथुः सर्व्वमर्म्मोत्थः श्वासो हिक्कारुचिः सदृट्।
मूर्च्छाच्छर्द्द्यतिसारश्च निहन्त्युदरिणं नरम्"॥

जललक्षणमाह।

"अशोधमरुणाभासं सगुरुं नातिभारिकम्।
सदा गुड़गुड़ायान्तं शिराजालगवाच्चितम्॥
नाभिं विश्लथ्य पायौ तु वेगं कृत्वा प्रधावति॥
हृन्नाभिवंक्षणकटीगुदप्रत्येकशूलिनः॥
कर्कशं स्रजतो वातं नातिमन्दे च पावके॥
मूत्रेऽल्पे संहते दोषे लालया विरसे मुखे।
अजातोदकमित्येतैर्लिङ्गैर्विद्याय तत्त्वतः"॥

अतःपरं वातजादिभेदेन चिकित्साविधानं यथा,
"उपक्रामेद्भिषग्दोषबलकालविशेषवित्।
वातोदरे बलवतः पूर्व्वं स्नेहैरुपाचरेत्॥
स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥
हृते दोषे परिस्नानं वेष्टयेद्वाससोदरम्॥
तथास्यानवकाशत्वाद्वायुर्नाप्नापयेत् पुनः।
दोषातिमात्रोपचयात् स्रोतसां सन्निरोधनात्॥
सम्भवन्युदराण्येवं अतो नित्यं विशोधयेत्।
शुद्धं संसृज्य च क्षीरं बलार्थं पाययेत्तु तम्॥
प्रागुत्क्लेशाग्निवर्च्चश्च बले लब्धे क्रमात् पयः।
यूषैरसर्व्वा मन्दाम्ललवणैः रोधितानलम्॥
सोदावर्त्तं पुनः स्निग्धं स्निग्धमास्थापयेन्नरम्।
स्नुरणाक्षेपसन्यस्थिपार्श्वपृष्ठिकास्थिषु।
दीप्ताग्निबद्धविड्वातं रूक्षमप्यनुवासयेत्॥
तीक्ष्णाधोभागयुक्तः स्यान्निरूहो दाशमूलिकः।
वातघ्नाम्लघृतैरङ्गतिलतैलानुवासनः॥
अविरेच्यन्तु यं विद्याद्दुर्ब्बलं स्थविरं शिशुम्।
सुकुमारं प्रकृत्याल्पदोषं वाधोल्वणानिलम्॥
तं भिषक् शमनैः सर्पिर्यूषमांसरसौदनैः।
वस्त्यभ्यङ्गानुवासञ्च क्षीरैश्चोपाचरेद्बुधः॥१॥
पित्तोदरे तु बलिनं पूर्व्वमेव विरेचयेत्।
दुर्ब्बलत्वनुवास्यादौ शोधयेत् क्षीरवस्तिना॥
सञ्जातबलकालाग्निं पुनः स्निग्धं विरेचयेत्।
पयसा सर्पिषोल्लेखनोरुबूकघृतेन वा॥
घृतलाजायमाणाभ्यां घृतेनारग्वधेन वा।
सकफे वा समूत्रेण सवाते तिक्तसर्पिषा॥
पुनः क्षीरप्रयोगञ्च वस्तिकर्म्मविरेचनम्।
क्रमेण ध्रुवमातिष्ठन् युक्तः पित्तोदरं जयेत्॥
स्निग्धं स्निग्धं विशुद्धन्तु कफोदरिणमातुरम्।
संसर्ज्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः॥
गोमूत्रारिष्टपानेन्च चूर्णायस्कृतिभिस्तथा।
सक्षारैस्तैलपानेन्च समयेत्तु कफोदरम्॥
सन्निपातोदरे सर्व्वा यथोक्ताः कारयेत् क्रियाः।
सोपद्रवन्तु निर्हेतुं प्रत्याख्येयं विजानता॥
उदावर्त्तगणाद्धैर्दाहमोहहृल्लाज्यरैः।
गौरवारुचिकाठिन्यैस्त्यानिलादीन् यथाक्रमम्॥
लिङ्गैः क्षीहोदरान् दृष्ट्वा रक्तं वापि स्वलक्षणैः।
चिकित्सां संप्रकुर्व्वीत यथादोषं यथाबलम्॥
स्नेहं स्नेहं विरेकञ्च निरूहमनुवासनम्।
समीक्ष्य कारयेद्धीमान् वामे वा व्यधयेत्सिराम्॥
षट्पलं वा पिबेत्सर्पिः पिप्पलीर्व्वा प्रयोजयेत्।
सगुड़ामभयां वापि क्षारारिष्टगणांस्तथा॥
रोहितकलतानान्तु काण्डेका साभया जले।
मूत्रे वा घृतमेतच्च सप्तरात्रस्थितं पिबेत्॥
कामलागुल्ममेहार्शःक्षीहसर्व्वोदरक्रिमीन्।
तद्वन्याज्याङ्गलरसैर्जीर्णे स्याच्चाच भोजनम्॥
अग्निकर्म्म च कुर्व्वीत भिषग्वातकफोल्वणे।
पैत्तिके जीवनीयानि सर्पींषि क्षीरवस्तयः॥
रक्तावसेकः संशुद्धिः क्षीरपानञ्च शस्यते।
यूषैर्मांसरसैश्चापि दीपनीयसमायुतैः॥
लघून्यन्नानि संस्थ्य भजेत् क्षीहोदरी नरः॥
स्निग्धाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।
सतैललवणं दद्यान्निरूहं सानुवासनम्॥
परिस्रंसीनि चान्नानि तीक्ष्णश्चैव विरेचनम्।
उदावर्त्तहरं कर्म्म कार्य्यं वातघ्नमेव च॥
छिद्रोदरमृते स्नेहात् स्नेहोदरवदाचरेत्॥
जातं जातं जलं स्राव्यमेवं तत्यातयेद्भिषक्"॥

अरिष्टलक्षणं यथा।

"हृष्णाकासज्वरार्त्तन्तु क्षीणमांसाग्निभोजनम्।
वर्ज्जयेत् श्वासिनं तद्वत् शूलिनं दुर्ब्बलेन्द्रियम्"॥
"द्रवेभ्यस्त्वोदकादिभ्यो नियच्छेदनुपूर्व्वशः।
सर्व्वमेवोदरं प्रायो दोषसंघातजं मतम्।
तस्मात्त्रिदोषशमनीं क्रियां सर्व्वेषु कारयेत्"॥

पथ्यनियमो यथा।

"दोषैः कुक्षौ हि संपूर्णे वह्निर्मन्दत्वमृच्छति।
तस्माद्धोज्यानि योज्यानि दीपनानि लघूनि च॥
रक्तशालीन् यवान् मुद्गान् जाङ्गलांश्च मृगद्विजान्।
पयोमूत्रासवारिष्टान्मधुशुक्तीर्धृतं तथा सुराम्॥
यवागूमोदनं वापि यूषैरद्याद्रसैरपि।
मन्दाम्लस्नेहकटुभिर्यच्च मूलोपसाधितैः"॥

अपथ्यानि यथा।

"क्षौद्रकानूपजं मांसं शाकं पिण्यञ्च तिलान्।
व्यायामाध्वदिवास्वप्नं यानयानञ्च वर्ज्जयेत्॥
तथोष्णलवणाम्लानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरी तोयपानञ्च वर्ज्जयेत्"॥

वातजादिभेदेन तक्रपाननियमो यथा।

"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम्।
शर्करामधुकोपेतं स्वादु पित्तोदरी पिबेत्॥
यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी।
पिबेन्मधुयुतं तक्रं व्यक्ताम्लं नातिपेलवम्॥
मधुतैलवचायुक्तशुण्ठीशताह्वाकुरुसैन्धवैः।
युक्तं क्षीहोदराघातं सद्योहन्तु दकोदरी॥
बद्धोदरी तु हृपुषायवान्यजाजीसैन्धवैः।
पिबेच्छिद्रोदरी तक्रं पिप्पलीक्षौद्रसंयुतम्॥
"देवदारुपलाशार्कहस्तिपिप्पलीशिग्रुकैः।
साश्वगन्धैः सगोमूत्रैः प्रदिह्यादुदरं समैः॥
पलाशं कर्त्तृणं राखा तदत्यक्षावसेचयेत्।
मूत्राण्यष्टावुदरिणां सेके पाने च योजयेत्॥
रूक्षाणां बद्धवातानां तथा संशोधनार्थिनाम्।
दीपनीयानि सर्पींषि जठरघ्नानि वक्ष्यते॥
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सक्षारैर्द्वपलिकैर्द्विःप्रस्थं सर्पिषः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च॥

उद

दधिमण्डातकोपेतं तत्सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत्" ॥
इति पञ्चकोलघृतम् ॥ * ॥
"चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात्मजे ।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्" ॥
इति चित्रकघृतम् ॥
"पटोलमूलरजनीविड़ङ्गत्रिफलात्वचम् ।
काम्पिल्यको नीलिनी च त्रिवृता चेति चूर्णयेत् ॥
षडाद्यान् कार्षिकानन्त्यांस्त्रीन् द्वित्रिचतुर्गुणान् ।
क्षत्वा चूर्णमतोमुष्टिं गवां मूत्रेण वा पिबेत् ॥
विरिक्तो मृदु भुञ्जीत भोजनं जाङ्गलैः रसैः ।
मण्डं पेयाञ्च पीत्वा च सव्योषं षड़हं पयः ॥
घृतं पिबेत्ततश्चूर्णं पिबेदेव पुनः पुनः ।
हन्ति सर्व्वोदराण्येतच्चूर्णं जातोदकान्यपि ।
कामलां पाण्डुरोगञ्च श्वयथुञ्चापकर्षति" ॥
इति पटोलाद्यं चूर्णम् ॥ * ॥
"नीलिनीं निचुलं क्षीरं द्वौ क्षारौ लवणानि च ।
चित्रकञ्च पिबेच्चूर्णं सर्पिषोदरगुल्मनुत्" ॥
इति नीलिन्याद्यं चूर्णम् ॥ * ॥
"भावितानां गवां मूत्रे वह्निकानान्तु तण्डुलैः ।
यवागूं पयसा सिद्धां प्रकामं भोजयेन्नरम् ॥
पिबेदिक्षुरसञ्चानु जठराणां निवृत्तये ।
खं खं स्थानं व्रजन्त्येषां तथा पित्तकफानिलाः ॥
क्रियातीते चिरोषे च जठरे चाप्रशाम्यति ।
ज्ञातीन् सहृदयो दारान् ब्राह्मणान् नृपतीन् गुरून् ॥
अनुज्ञाप्य भिषक् कर्म्म विदध्यात्संशयं ब्रुवन् ।
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ॥
एवमाख्याय तस्येदमनुज्ञातः प्रयोजयेत् ।
पानभोजनसंयुक्तं विषमस्मै प्रदापयेत् ॥
यस्मिन् वा कुपितः सर्पो विहजेद्धि फले विषम् ।
तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः ॥
विषेणाशु प्रमाथित्वादाशुभिन्नः प्रवर्त्तते ।
विषेण हृतदोषन्तं शीताम्बुपरिषेचितम् ॥
पाययेत भिषग्दुग्धं यवागूं वा यथाबलम् ।
त्रिवृन्मण्डूकपर्ण्यौ च शाकं सयववास्तुकम् ।
भक्षयेत्कालशाकं वा खरसोदकसाधितम् ॥
निरस्तलवणस्नेहं स्विन्नास्विन्नमनन्नभुक् ।
मासमेकं ततस्त्वेव क्षपितः खरसं पिबेत्" ॥
"इदन्तु शल्यहर्त्तॄणां कर्म्म स्याद्दृक्षकर्म्मणां ।
मात्रायुक्तेन शस्त्रेण पाटयेन्मतिमान् भिषक् ॥
विधाय्यान्त्वन्ततः पश्चाद्दोष्ण बद्धत्वतान्त्रयोः ।
सर्पिर्भाभ्यज्य केशादीनवमृज्य विमोक्षयेत् ॥
मूर्च्छनात् यच्च संमूढमन्त्रं यच्च विमोक्षयेत् ।
छिद्राण्यन्त्रस्य तु स्थूलैर्दग्ध्वा पिपीलिकैः ॥
बद्धगुः संग्रहीतानि मत्वा क्षिप्त्वा पिपीलिकान् ।
प्रतियोगैः प्रवेश्यान्त्रं बहिः सीव्येदनन्ततः ।
तथा जातोदकं सर्व्वमुदरं व्यधयेद्भिषक् ॥
वामपार्श्वे त्वधो नाभेर्नाड़ीं दत्त्वा च गालयेत् ।
निःस्राव्य च विमृज्यैतद्देहयेद्वासशोदरम् ॥
तथा वस्तिविरेकाद्यैर्ज्ञानं सर्व्वञ्च वेक्षयेत् ।
निःसृते लङ्घितः पेयामस्नेहलवणां पिबेत् ॥
अतः परञ्च षण्मासान् क्षीरवृत्तिर्भवेन्नरः ।

उद

त्रीन् मासान् पयसा पेयां पिबेन्नीरापि भोजयेत् ॥
श्यामाकङ्गोरदूष्यं वा क्षीरेण लघुभोजनः ।
नरः संवत्सरेणैवं जयेत् प्राप्तं जलोदरम् ॥
प्रयोगाणाञ्च सर्व्वेषामनुक्षीरं प्रयोजयेत् ।
दोषानुबन्धरक्षार्थं बलरक्षार्थमेव च ॥
प्रयोगपचिताङ्गानां हितं क्षुदरिणां पयः ।
सर्व्वधातुक्षयार्त्तानां देवानामप्यतं यथा" ॥
इति चरके चिकित्सितस्थानेऽरोदशोऽध्यायः ।
"धन्वन्तरिर्धर्म्मभृतां वरिष्ठो
राजर्षिरिक्ष्वाकुप्रतिमो बभूव ।
ब्रह्मर्षिपुत्रं विनयोपपन्नं
शिष्यं शुभं सुश्रुतमन्वशात्सः ॥
पृथक्समस्तैरपि चेह दोषैः
क्षीहोदरं बद्धगुदं तथैव ।
आगन्तुकं सप्तममष्टमञ्च
दकोदरञ्चेति वदन्ति तानि ॥
सुदुर्ब्बलाग्नेरहिताशनस्य
संशुष्कपूयत्वनिषेवणाद्वा ।
खेहादिमिथ्याचरणाच्च जन्तो-
र्दृढिं गताः कोष्ठमभिप्रपन्नाः ॥
गुल्माक्तितिव्यञ्जितलक्षणानि
कुर्व्वन्ति घोराण्युदराणि दोषाः ।
कोष्ठादुपस्नेहवदन्नसारो
निःसृत्य दुष्टोऽनिलवेगनुन्नः ॥
त्वचः समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति" ॥ * ॥
अस्य पूर्व्वरूपं यथा,—
"तत्पूर्व्वरूपं बलवर्णकाङ्गा-
बलीविनाशो जठरे हि राज्यः ।
जीर्णापरिज्ञानविदाहवत्वो
वस्तौ रुजः पादगतञ्च शोफः" ॥
वातजादिभेदेन लक्षणानि यथा,—
"संगृह्य पार्श्वोदरपृष्ठनाभी-
र्यद्वर्द्धते श्लक्ष्णशिरावनद्धम् ।
सशूलमानाहवदुग्रशब्दम्
ततोदभेदं पवनात्मकन्तत् ॥ १ ॥
यत्रोषदम्लाज्वरदाहयुक्तं
पीतं शिरा यत्र भवन्ति पीताः ।
पीताक्षिविण्मूत्रनखाननस्य
पित्तोत्तरं तत्त्वचिराभिवृद्धि ॥ २ ॥
यच्छीतलं शुक्लशिरावनद्धं
श्लक्ष्णं स्थिरं शुक्लनखाननस्य ।
स्निग्धं महच्छोफयुतं ससादं
कफोदरं तच्च चिराभिवृद्धि ॥ ३ ॥
विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसक्तमञ्च ।
क्षीहाभिवृद्धिं सततं करोति
क्षीहोदरन्तत् प्रवदन्ति तज्ज्ञाः ॥
वामे च पार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः ॥

उद

सत्येतरस्मिन् यदति प्रदुष्टे
ज्ञेयं यकृद्दाल्युदरं तदेव" ॥ ४ ॥
प्लीहोदरं बद्धगुदोदरं परिस्राव्युदरं दकोदरञ्चेति चतुर्णामुदराणां सुश्रुतीयं लक्षणादिकं यत् भावप्रकाशे संग्रहीतं तन्नावचान्यविधम् ॥
अस्य चिकित्सा यथा ।
"अष्टावुदराणि पूर्व्वमुद्दिष्टानि तेष्वसाध्यं बद्धगुदं परिस्रावि चावग्रहणि क्षतकृच्छसाध्यानि सर्व्वाण्येव च प्रत्याख्यायोपक्रमेत । तेष्वाद्यश्चतुर्व्वर्गो भेषजसाध्यः । कालप्रकर्षात् सर्व्वाण्येव शस्त्रसाध्यानि वर्ज्जयितव्यानि वा ॥
उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिच्छिलपरिषेकावगाहान् परिहरेत् । शालियष्टिकयवगोधूमनीवारान्नित्यमश्नीयात् ॥
तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा स्नेहयित्वा तिल्वकविषक्तेनानुलोम्य चित्रापलतैलप्रगाढ़ेन विदारिगन्धाकषायेणास्थापयेदनुवासयेच्च शस्त्रेण चोपनाहयेदुदरम् । भोजयेच्चैनं विदारिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन चाभीक्ष्णं स्नेदयेत् ॥ * ॥
पित्तोदरिणन्तु मधुरगणविपक्वेन सर्पिषा स्नेहयित्वा श्यामात्रिफलात्रिवृद्दिपक्वेनानुलोम्य शर्करामधुघृतप्रगाढ़ेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च पायसेनोपनाहयेदुदरं भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा ॥ * ॥ श्लेष्मोदरिणं पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्नेह्य स्नुहीक्षीरविपक्वेनानुलोम्य चिकटुकमूत्रक्षारतैलप्रगाढ़ेन मुष्कादिकषायेणास्थापयेदनुवासयेच्च शुक्लातसीधातकीकिण्वसर्षपमूलकबीजकल्केनोपनाहयेदुदरं भोजयेच्चैनं चिकटुकप्रगाढ़ेन कुलत्थयूषेण पायसेन वा स्नेदयेच्चाभीक्ष्णम् ॥ * ॥
दूष्योदरिणन्तु प्रत्याख्याय सप्तलाशङ्खिनीक्षीरसंसिद्धेन सर्पिषा विरेचयेन्मासमर्द्धं मासं वा महाबलक्षीरसुरागोमूत्रसिद्धेन वा शुद्धकोष्ठन्तु मद्येनाश्वमारकगृञ्जाकाकादनीमूलकल्कं पाययेत् । दृत्तुकाद्यानि वा क्षुद्यसर्पया दंशयित्वा भक्षयेत् । वल्लीफलानि वा मूलजं कन्दं वा विषमासेवयेत् तेनागदो भवत्यन्यं वा भावमापद्यते ॥ * ॥
भवति चात्र,—
"कुप्रितानिलमूलत्वात् सञ्चयित्वान्मलस्य च ।
सर्व्वोदरेषु शूलंसन्ति बद्धशूलवतुलोमनम्" ॥
ज्योतिष्कपलतैलं वा क्षीरेण सर्ज्जिकादिचूर्णमिश्रं पिबेत् ॥ गुडदितीयां वा हरीतकीं भक्षयेत् ॥ स्नुहीक्षीरभावितानां वा पिप्पलीनां सहस्रं कालेन पथ्याक्षाणाचूर्णं वा स्नुहीभावितामुत्कारिकां पक्वां दापयेत्" ॥
"क्षीहोदरिणः स्निग्धस्निग्धस्य दक्षा सुस्रवतो वामबाहौ कुर्य्याभ्यन्तरतः शिरां विध्येद्भिमर्दयेत् पाणिना क्षीहानं रुधिरस्यन्दनार्थं ततः संमृद्नदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत हिङ्गुसौवर्चिकाक्षारेण स्नुहीक्षीरेण वा यवक्षारम् । पारिजातकेक्षरकापामार्गक्षारं वा तैलसंसृष्टम्।

शोभाञ्जनकषायं वा पिप्पलीसैन्धवचित्रकयुक्तम्। पूतिकरञ्जक्षारं वास्रस्रुतं विड्लवण-पिप्पली-प्रगाढ़म् ॥ * ॥

पिप्पलीपिप्पलीमूलचित्रकशृङ्गवेरयवक्षारसैन्धवानां पालिकाभागा घृतप्रस्थं तत्तुल्यं क्षीरं तदैकध्यं विपाचयेदेतत् षट्पलकं नाम सर्पिः श्रीहाग्निषङ्गुल्मोदरोदावर्त्त-श्वयथु-पाण्डुरोग-कास-श्वास-प्रतिश्यायोर्द्ध्ववातविषमज्वरानपहन्ति मन्दाग्निर्वा हिङ्ग्वादिकं चूर्णमुपयुञ्जीत यत्तद्दाल्योऽयेन एव क्रियाविभागः विशेषतस्तु दक्षिणबाहौ शिराव्यधः"।

"मक्षिबन्धं सङ्गृह्य वामाङ्गुष्ठसमीरिताम्। दहेत्सिरां शरेणाशु क्षीरो वैद्यः प्रशान्तये" ॥ * ॥

बद्धगुदे परिस्राविणि च क्षिप्तस्निग्धस्याभ्यक्तस्याधो नाभेर्व्यामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणान्यन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं वालं वा योनेः मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा वाह्मव्रणमुदरस्य सीव्येत्। परिस्राविण्यप्येवमेव शल्यमुद्धृत्यान्त्राण्यवाङ् संशोध्य तच्छिद्रमन्त्रं समाधाय कार्पासपिपीलिकाभिर्दंशयेत् दष्टे च तासां कायानपहरेत् न शिरांसि ततः पूर्ब्ववत् सीव्येत् सन्धानञ्च यथोक्तं कारयेत् यष्टीमधुकमिश्रया च क्षौद्रसर्पिरवलिप्य बन्धनोपचरेत्ततोनिवातमागारं प्रवेश्याचारिकमुपदिशेद्दासयेच्चैनं तैलद्रोण्यां सर्पिर्द्रोण्यां वा पयोद्रोण्यामिति ॥ * ॥ उदकोदरिणस्तु वातहरतैलाभ्यक्तस्योष्णोदकक्षिप्तस्य स्थितस्याग्नेः सुपरिस्रुतीतस्याकृतात् परिवेष्टितस्याधो नाभेर्व्यामतश्चतुरङ्गुलमपहाय रोमराज्या व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येत्। तत्र तथादीनामन्यतमस्य नाड़ीद्विदारां पञ्चनाड़ीं वा संयोज्यादोषोदकमवसिञ्चेत्ततो नाड़ीमपहृत्य तैलबस्त्येनाभ्यज्य ब्रह्मचर्य्येणोपचरेन्नचैवक्षिप्तेनेव दिवसे सर्व्वं दोषोदकमपहरेत् सहसा ह्यपहृते दृष्ट्वाज्वराङ्गमर्द्दातीसारश्वासपाददाहा उत्पद्येरन् आपूर्य्यते वा भृशतरमुदरमसङ्गतप्राणस्य तस्मात्तृतीयचतुर्थपञ्चमषष्ठसप्तमदशमदादशघोड़शराात्रामन्यतममन्तरीक्ष्य दोषोदकमल्पाल्पमवसिञ्चेत्। निःस्रुते निःस्रुते च दोषे गाढ़तरमाविष्कार्य्यं चर्म्मान्यतमेन परिवेष्टयेदुदरं तथा नाध्मायति वायुः षण्मासांश्च पयसा भोजयेदाढ़कसरेण वा तत्र त्रीन् मासान् अर्द्धोदकेन पयसा पलाशेन जाङ्गलरसेन वावग्निं मासत्रयं-मन्नं लघहितं वा सेवेतैवं संवत्सरेणागदो भवति ॥

भवति चात्र,—

आस्थापने चैव विरेचने च
पाने तथाहारविधिक्रियासु।
सर्व्वोदरिभ्यः कुशलैः प्रयोज्यं
क्षीरं घृतं जाङ्गलजो रसो वा"।

इति सुश्रुते चिकित्सितस्थाने उदराधिकारः ॥

औषधान्याह ॥

"शुद्धसूतं द्विधा गन्धं मृतार्कायःशिलाजतु।
रससाम्येन दातव्यं रसस्य द्विगुणं विषम् ॥
चित्रकटुचित्रकाकोलीनिर्गुण्डीमूषलीरजः।
अजमोदाविधांशेन प्रत्येकञ्च प्रकल्पयेत् ॥
निम्बपत्राङ्कुलद्राक्षैर्भावनास्वेकविंशतिम्।
भृङ्गराजरसैः सप्त दत्त्वा क्षौद्रेण लेहयेत् ॥
वदरास्थिप्रमाणेन वटिकां तां दिवा निशि।
श्लेष्मोत्तरं निहन्त्याशु नाम्ना वैश्वानरी वटी ॥
देवदारुवचामूलकल्कं क्षीरेण पाचयेत्।
भोजनं मेषदुग्धेन कौलोत्थेन रसेन च" ॥

इति वैश्वानरी वटी ॥*॥

"पिप्पली मरिचं ताम्र-काञ्चनीचूर्णसंयुतम्।
खुहीक्षीरे दिनं मर्द्यं तुल्यं जैपालबीजकम् ॥
निष्कं खादेत् विरेकाय सद्यो हन्ति जलोदरम्।
रेचनानाञ्च सर्व्वेषां दध्यन्नं स्नेहने हितम्।
दिनान्ते च प्रदातव्यमन्यदा मुद्गयूषकम्"।

इति जलोदरारिरसः ॥*॥

"पारदं गन्धतुल्यञ्च जैपालं पिप्पलीसमम्।
आरग्वधफलान्मज्जां वचीदुग्धेन मर्द्दयेत्।
माषमात्रं वटीं खादेत् स्त्रीणां हन्ति जलोदरम् ॥
चित्रापलाशसक्षारान् पथ्यां दध्योदनं हितम्।
दकोदरहरश्चैव कठिने रेचनेन च"।

इति उदरारिरसः ॥*॥

"द्विकर्षं लौहचूर्णस्य चाभयापि पलार्द्धकम्।
कर्षं शुद्धं मृतं ताम्रं भिन्याकाङ्क्षिक्षीरयोः पलम् ॥
मृगाजिनपलं भस्म सर्व्वमेकत्र कारयेत्।
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ॥
यत्तत्प्लीहोदरहरं कामलाञ्च हलीमकम्।
कासं श्वासं ज्वरं हन्याद्बलवर्णाग्निकारकम्।
यत्तदरि त्विदं लौहं वातगुल्मविनाशनम्"॥

इति यत्तदरिलौहम् ॥*॥

इति वैद्यकरत्नेन्द्रसारसंग्रहे ॥

पथ्यानि यथा,—

"विरेचनं लङ्घनमब्दसम्भवाः
कुलत्थमुद्गाढ़कयावगालयो यवाः।
मृगद्विजाजाङ्गलसंज्ञयान्विताः
पेयाः सुरामात्रिकसीधुमाधवाः ॥
तक्रारसोगोखुरतैलमार्द्रकम्
शालिञ्च शाकं कुलकं कठिल्लकम्।
पुनर्नवा शिग्रुयवं हरीतकी
ताम्बूलमेलायवशूकमायसम्।
अजा-गवोष्ट्री-महिषी-पयोजलं
लघूनि तिक्तानि च दीपनान्यपि।
वस्त्रेण संवेष्टनमग्निकर्म्मता
विषप्रयोगोऽनुयुतो यथायथम्" ॥*॥

अपथ्यानि यथा ॥

"सस्नेहनं धूमपानं जलपानं शिराव्यधः।
कर्द्दियानं दिवानिद्रा व्यायामः पिष्टवैष्टनम् ॥
गौदकानूपमांसानि पत्रशाकानि लानपि।
उष्णानि च विदाहीनि लवणान्यूषणानि च ॥
शिम्बीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च।
महेन्द्रगिरिजातानां सरितां सलिलानि च ॥

विष्टम्भीनि विशेषात्तु खेदं क्षिप्रसमुद्भवे।
वर्ज्जयेदुदरव्याधौ वैद्यो रक्तन्निजं यशः"।

इति वैद्यकपथ्यापथ्यविधिः ॥*॥)

उदरामयः, पुं, (उदरस्य आमयः।) रोगविशेषः। तत्पर्य्यायः। अन्नगन्धिः २ अतिसारः ३। इति चिकित्साशास्त्रम्॥ (अस्योपशमलक्षणं चिकित्सास्थाने नवमाध्याये वाभटेनोक्तम्। यथा,

"यस्योच्चारादिना मूत्रं पवनो वा प्रवर्त्तते।
दीप्ताग्नेर्लघुकोष्ठस्य शान्तस्तस्योदरामयः"॥)

उदरावर्त्तः, पुं, (उदरे आवर्त्त इव।) नाभिः। इति राजनिर्घण्टः॥

उदरिणी, स्त्री, (उदरं तज्जातगर्भोऽस्या अस्तीति। उदर + इनि + ङीप्।) गर्भवती। इति हेमचन्द्रः। (उदरमस्या अस्तीति वाक्ये। दृढदुदरयुक्ता। "लम्बस्तनीमुदरिणीं विदीर्णोत्फुल्लपादकाम्। धात्रा वैरूप्यनिर्म्माणादैदग्धीं दर्शितामिव"। इति कथासरित्सागरे विंशतरङ्गे॥)

उदरिलः, त्रि, (अतिशयितमुदरमस्य। उदर + तुन्दादिभ्यः इलचेति इलच्।) दृढदुदरयुक्तः। भुँड़िया इति भाषा। तत्पर्य्यायः पिचिण्डिलः २ दृढत्वक्कः ३ तुन्दिः ४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७। इति हेमचन्द्रः॥

उदरी, [न्] त्रि, (अतिशयितमुदरमस्य। उदर + इनि।) उदरिलः। इति हेमचन्द्रः॥ (उदररोगयुक्तः। यथा सुश्रुते चिकित्सितस्थाने १४ अध्याये। "उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिच्छितपरिषेकावगाहान् परिहरेत्। ग्राम्यमृष्टिकयवगोधूममनोवाराम्लित्यमन्नीयात्"॥)

उदर्कः, पुं, (उत् + ऋच् + घञ्।) उत्तरकालोद्भवफलम्। इत्यमरः॥ भविष्यत्कालः। इति धरणी॥ ("परित्यजेदर्थकामौ यौ स्यातां धर्म्मवर्জ্জितौ। धर्म्मञ्चाप्यसुखोदर्कं लोकविक्रुष्टमेव च"॥ इति मनुः ४। १७६॥ "उदर्कस्तव कल्याणि! तुष्टो देवगणेश्वरः"॥ इति महाभारते याज्ञवल्क्यस्तुतौ। १। १२३। २९॥) मदनकण्टकम्। इति मेदिनी। मयना गाछेर काँटा इति भाषा॥

उदर्चिः, [स] त्रि, (उद्गतं अर्चिः प्रभा यस्मात्।) उत्प्रभः। इति मेदिनी। (यथा रघौ १५। ७६।

"ऋचेवोदर्चिषं सूर्य्यं रामं मुनिवपस्विनः"॥

"प्रदक्षिणप्रक्रमणात् क्षणानो-
दर्चिर्षमस्त्रमिथुनं चकाशे"।

इति रघुवंशे ७। २४। तथा, कुमारे ३। ७१।

"स्फुरन्नुदर्चिः सहसा तृतीया-
दृष्णः क्षणानुः किल सम्पपात"॥)

उदर्चिः, [स्], पुं, (उद्गतं अर्चिर्यस्य।) अग्निः। इति मेदिनी॥

"प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्"॥ इति माघे २। ४२॥ हरिः। शिवः। कन्दर्पः। इति शब्दरत्नावली॥

उदर्दः, पुं, (उदर्दति पीड़यतीति। उत् + अर्द् + अच्।) रोगविशेषः। तस्य लक्षणम्। यथा, भिदाने॥

"वरटीदष्टसंस्थानः शोथः संजायते बहिः।
सकण्डूस्तोदबहुलः कृच्छ्रज्वरविदाहवान्॥
उदर्दमिति तं विद्याच्छीतपित्तमथापरे।
वाताधिकं शीतपित्तमुदर्दश्च कफाधिकम्"॥
(अस्य चिकित्सा यथा,
"अभ्यङ्गः कटुतैलेन सेकश्चोष्माम्बुभिस्ततः।
उदर्दे वमनं कार्य्यं पटोलारिष्टवारिणा"।
"सगुडं दीप्यकं यस्तु खादेत् पथ्यान्नभुङ्नरः।
तस्य नश्यति सप्ताहादुदर्दः सर्व्वदेहजः"॥
इति वैद्यकचक्रपाणिसंग्रहे॥)

उदलावणिकः, त्रि, (उदलवणेन लवणाम्भसा सिद्धः। उदलवण + ठक्।) लवणोदकसंसिद्धव्यञ्जनादिः। इति हलायुधः॥

उदवसितं, क्ली, (उदूर्द्धमवसीयते स्म। षो अन्तकर्म्मणि णिच् बन्धने वा। क्तः। द्यतिस्यतीतीत्वम्।) गृहम्। इत्यमरः॥

उदश्वित्, क्ली, (उदकेन श्वयति वर्द्धते इति। उद + श्वि + क्विप् + तुक्।) अर्द्धजलयुक्तघोषम्। इत्यमरः॥ अस्य गुणाः। लेपात् कुष्ठरोगनाशित्वम्। दाहदृष्यामुखशोथनाशित्वञ्च। इति राजवल्लभः॥
("अर्द्धोदकमुदश्वित्स्यात्"॥
"उदश्चिच्छेष्मलं वर्च्चस्यं श्रमघ्नं परमं मतम्"॥
इति हारीते प्रथमस्थानेऽष्टमोऽध्यायः॥)

उदात्तं, त्रि, (उत् + आ + दा + क्त।) दयात्यागादिसम्पन्नम्। इति मेदिनी॥ हृद्यम्। दाढ। महत्। इति हेमचन्द्रः॥ (यथा, रामायणे २य काण्डे।)
"उदात्तदत्तानाम् कुञ्जराणाम्"।
नायकभेदः। यथा साहित्यदर्पणे ३ परिच्छेदे॥
"अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः"॥)

उदात्तः, पुं, (उच्चैरादीयते स्म। उत् + आ + दा + क्त।) स्वरभेदः। स तु वेदगाने उच्चैःस्वरः। इत्यमरः॥ दानम्। वाद्यविशेषः। इति शब्दरत्नावली॥
काव्यालङ्कारभेदः। इति मेदिनी॥(यदुक्तं साहित्यदर्पणे। १० म परिच्छेदे। १११।
"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्"॥)

उदानः, पुं, (उद्ऊर्द्धेन आनिति अनेन। उत् + आङ् + अन् + घञ्।) कण्ठस्थवायुः। इत्यमरः॥ तस्य कर्म्म ऊर्द्धनयनम्। इति श्रीधरस्वामी॥
(यथा, सङ्गीतरत्नाकरे, १। ६४।
"उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु।
कर्म्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्त्तितम्"॥)
"ऊर्द्धगमनवान् कण्ठस्थानीयात्क्रमणवायुः"।
इति वेदान्तः॥ (तथा चोक्तम्।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशे स्यात् व्यानः सर्व्वशरीरगः"॥
"उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः"।
इति महाभारते वनपर्व्वणि॥

प्रकुपितोदानस्य लक्षणं यथा।
"हिक्का श्वासः परिश्वासः कासः शीर्षार्त्तिघट्टिकाः।
हृल्लासो हृदि शूलञ्च यस्योद्गारादिका वमिः।
क्षवथुर्ज्जृम्भणञ्चैव तथा वैस्वर्य्यपीनसौ॥
अरुचिश्च प्रतिश्याय एते प्रोक्ता उदानतः।
उदानः श्लेष्मसंयुक्तो दोषात् हृदि प्रकुप्यति"॥
इति चिकित्सितस्थाने २१ अध्याये हारीतेनोक्तम्॥*॥
"उदानः क्षवथूद्गारच्छर्द्दिनिद्रावधारणैः।
गुरुभारातिरुदितहास्याद्यैर्विकृतो गदान्॥
कण्ठरोधमनोभंशच्छर्द्दारोचकपीनसान्।
कुर्य्याच्च गलगण्डादींस्तांस्तान् जत्रूर्द्ध्वसंश्रयान्"।
इति निदानस्थाने षोड़शेऽध्याये वाभटेनोक्तम्॥*॥

अस्य स्थानं कार्य्यञ्च यथा॥
"उदानस्य पुनः स्थानं नाभ्युरःकण्ठ एव च।
वाक्प्रवृत्तिः प्रयत्नोर्ज्जो बलवर्णादि कर्म्म च"॥
इति चिकित्सास्थाने २८ अध्याये चरकेणोक्तम्॥
"उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः॥
तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते।
ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः"॥

दोषान्तरगतस्यास्य लक्षणं यथा॥
"उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः।
अखेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफावृते"॥
इति निदानस्थाने प्रथमेऽध्याये सुश्रुतेनोक्तम्॥
उदरावर्त्तः। नाभिः। सर्पविशेषः। इति मेदिनी॥ पद्म। इति शब्दरत्नावली॥

उदारः, त्रि, (उत्कृष्टमासमन्तात् राति। रा + क्वातस्थेति कः। उदर्य्यते, ऋगतिप्रापणयोः कर्म्मणि घञ् वा।) दाता। महान्। (यथा गीतायां ७।१८॥
"उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम्"॥
"उदारा महान्तः मौक्तभाज एव इत्यर्थः"॥
इति श्रीधरस्वामी।) ऋज्वाशयः। तत्पर्य्यायः। दक्षिणः २ सरलः ३। इत्यमरः॥
("क उदारः समर्थश्च त्रैलोक्यस्यापि रक्षणे"।
इति रामायणे आदिकाण्डे। गभीरः। सारवान्। रम्यः। न्याय्यः।
"इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य"।
इति रघुः ५। १२। असाधारणः। सरलाशयः। श्लिष्टः।
"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम्"। इति रघुः ८।९१॥)

उदावत्सरः, पुं, संवत्सरादिपश्चान्तर्गतवत्सरविशेषः। अस्मिन् वर्षे रौप्यदानं महाफलम्। इति विष्णुधर्म्मोत्तरम्॥

उदावर्त्तः, पुं, (उत् + आङ् + वृत् + घञ्।) रोगविशेषः। तत्पर्य्यायः। गुदग्रहः २। इति हेमचन्द्रः॥ मलमूत्रवायुरोधकरोगः। तस्य निदानं संप्राप्तिश्च। यथा निदाने।
"वातविण्मूत्रच्छर्द्यक्षवोद्गारवमीन्द्रियम्।
क्षुत्तृष्णोच्छ्वासनिद्राणां द्वेषोदावर्त्तसम्भवः"॥
(अपरस्यास्य सनिदानसंप्राप्तिकं लक्षणं यथा,—
"कषायतिक्तोषणरूक्षभोज्यैः
सन्धारणाभोजनमैथुनैश्च।
पक्वाशये कुप्यति चेदपानः
स्रोतांस्यधोगानि बली स रुद्धा॥
करोति विण्मूत्रसमीरसङ्गं
क्रमादुदावर्त्तमतः सुघोरम्।
रुग्वस्तिहृत्कुक्षुदरेष्वभीक्ष्णं
स एकपार्श्वेऽवतिदारुणा स्यात्॥
आध्मानहृल्लासविकर्त्तिकाश्च
तोदोऽविपाकश्च सवस्तिशोथः।
वर्च्चोऽप्रवृत्तिर्जठरे च गाढा-
न्यूर्द्ध्वञ्च वायुर्व्विहतो गुदे स्यात्॥
क्षुद्भेद शुक्रस्य चिरात्प्रवृत्तिः
स्याद्वा तनुः स्यात् खररूक्षगीता।
ततश्च रोगा ज्वरमूत्रकृच्छ्र-
प्रवाहिकाहृद्ग्रहणीप्रदोषाः॥
वस्त्यन्त्र-वाधिर्य्य-शिरोऽतितापः
वातोदरष्ठीलमनोविकाराः।
दृष्यामपित्तारुचिगुल्मकास-
श्वासप्रतिश्यार्दितपार्श्वरोगाः।
अन्ये च रोगा बहवोऽनिलोत्था
भवन्त्युदावर्त्तकृताः सुघोराः"॥

अस्य चिकित्सा यथा,—
"तं तैलसर्पिस्तरुणाग्निशोकैः,
स्वेदैर्यथोक्तैः प्रविलोमदोषम्।
उपाचरेदर्त्तिरुरुःहवस्ति-
स्नेहैर्विरेकैरनुलोमनाग्नेः॥*॥
श्यामात्रिवृन्मागधिकाभिचूर्णं
गोमूत्रमिश्रं दधिभागमाक्षम्।
सनीलिकां हिङ्गवचां गुडेन
वर्त्तिं कराङ्गुष्ठनिभां विदध्यात्॥
पिण्याकसौवर्चलहिङ्गुभिर्व्वा
ससर्षपत्र्यूषणयावशूकैः।
क्रिमिघ्नकम्पिल्लकशङ्खिनीभिः
सुधार्कजक्षीरगुडैर्युतांस्ताभिः।
स्यात् पिप्पलीसर्षपराठवेश्म-
धूमैः सगोमूत्रगुडैश्च वर्त्तिः॥*॥
श्यामात्रिलेत्तु सपिप्पलीकं
नाड्याग्रवा तत् प्रथमेन्तु चूर्णम्।
रक्षोघ्नतुम्बीकरहाटकाख्या-
चूर्णं सगोमूत्रकसैन्धवं वा॥*॥
स्निग्धे गुदे तान्यनुलोमयन्ति
नरस्य वर्च्चोऽनिलमूत्रसङ्गम्।
तेषां विघाते तु भिषग्विदध्यात्
स्वभक्तसुस्निग्धतनोर्निरूहम्॥
ऊर्द्ध्वानुलोमौषधमूत्रतैल-
क्षारास्ल-वातघ्नयुतं सतीक्ष्णम्॥*॥
वातेऽधिकेऽस्रं लवणं सतैलं
क्षीरेण पित्ते तु कफे समूत्रम्।
समूत्रवर्च्चोऽनिलसङ्गमाशु
गुदं शिरश्च प्रगुणीकरोति॥*॥
चिरत्सुधापत्रतिलादिशाकं
यवान्नौदकानूपरसैर्यवान्नम्।
अन्यैश्च रूक्षानिलमूत्रविड्भि-

रद्यात् प्रसन्नागुड़सौधुपायी ॥ *॥
भूयोऽनुबन्धे तु भवेद्विरेको
मूत्रप्रसन्नादधिमण्डयुक्तैः" ॥ *॥
द्विरुत्तरं हिङ्गुवचाभिकुष्ठं
सवर्चिका चैव विड़ङ्गचूर्णम् ।
सुखाम्बुनाहविसूचिकार्त्ति-
हृद्रोगगुल्मोर्द्ध्वसमीरणघ्नम् ॥ *॥
वचाभयाचित्रकयावशूकान्
सपिप्पलीकातिविषान् सकुष्ठान् ।
उष्णाम्बुनाहविमूढ़वातान्
पीत्वा जयेदाशु रसौदनाशी" ॥ *॥
इति चिकित्सास्थाने षड्विंशेऽध्याये चरकेणोक्तम् ॥
सुश्रुतेनोत्तरतन्त्रे ५५ अध्यायेऽस्य सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा चेति यदुक्तं तद्यथा ।
"अधश्चोर्द्ध्वं च भावानां प्रवृत्तानां स्वभावतः ।
न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः ॥
वातविण्मूत्रच्छर्म्माश्रुक्षवोद्गारवमीन्द्रियैः ।
व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते ॥
क्षुत्तृष्णा-श्वास-निद्राणामुदावर्त्तो विधारणात् ।
तस्याभिधास्ये व्यासेन लक्षणञ्च चिकित्सितम् ॥
त्रयोदशविधस्यासौ भिन्न एतैस्तु कारणैः ।
अपथ्यभोजनाद्यापि वक्ष्यते च यथापरः ॥
आध्मानशूलौ हृदयोपरोधं
शिरोरुजं श्वासमतीवहिक्काम् ।
कास-प्रतिश्याय-गलग्रहांश्च
बलासपित्तप्रसरञ्च घोरम् ॥
कुर्य्यादपानाभिहतः स्वमार्गे
हन्यात् पुरीषं मुखतः क्षिपेद्वा ॥ १ ॥
आटोपशूलौ परिकर्त्तनञ्च
सङ्गः पुरीषस्य तथोर्द्ध्ववातः
पुरीषमास्यादथवा निरेति
पुरीषवेगेऽभिहते नरस्य ॥ २ ॥
मूत्रस्य वेगेऽभिहते नरस्तु
शूकैरिव भिन्नमूर्त्तेः ॥ ३ ॥
मन्याग्रहस्तम्भशिरोविकारा
ष्टम्भोपघातात् पवनात्मकाः स्युः ।
श्रोत्राननघ्राणविलोचनोत्था
भवन्ति तीव्राश्च तथा विकाराः ॥ ४ ॥
व्यानन्दजं शोकसमुद्भवं वा
नेत्रोदकं प्राप्तमसृग्वतो हि ।
शिरोगुरुत्वं नयनामयाश्च
भवन्ति तीव्राः सह पीनसेन ॥ ५ ॥
भवन्ति गाढ़ं क्षवथोर्विघाता-
च्छिरोऽक्षिनासास्रवणेषु रोगाः ।
कण्ठास्यपूर्णत्वमतीवतोदः
कूजश्च वायोरथवा प्रवृत्तिः ॥ ६ ॥
उद्गारवेगेऽभिहते भवन्ति
जन्तोर्विकाराः पवनप्रसूताः ॥ ७ ॥

हृद्दौर्विघातेन भवेच्च कुष्ठं
येनैव दोषेण विदग्धमन्नम् ॥ ८ ॥
मूत्राग्नये वा गुदमुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्क्षवथं भवेद्वा
ते ते विकारा विहते तु शुक्रे ॥ ९ ॥
तन्द्राङ्गमर्द्दारुचिः श्रमश्च
क्षुधोऽभिघातात् क्षपणा च दृष्टेः ॥ १० ॥
कण्ठास्यशोषः श्रवणावरोध-
स्तृष्णाभिघाताज्जृम्भथे यथा च ॥ ११ ॥
श्रान्तस्य निश्वासविनिग्रहेण
हृद्रोगमोहावथवापि गुल्मः ॥ १२ ॥
जृम्भाङ्गमर्द्दोऽक्षिशिरोऽक्षिजाड्यं
निद्राभिघातादथवापि तन्द्रा" ॥ १३ ॥
अरिष्टलक्षणं यथा,
"दृष्ट्याहितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ।
शूलाहतन्तं मतिमानुदावर्त्तिनमुत्सृजेत् ॥
अस्य चिकित्सा यथा,
"सर्व्वेष्वेतेषु विधिवदुदावर्त्तेषु क्षुत्क्षयः ।
वायोः क्रिया विघातव्या स्वमार्गप्रतिपत्तये ॥
सामान्यतः पृथक्त्वेन स्निग्धा भूयो निबोध मे ।
आस्थापनं मारुतजे स्निग्धे स्निग्धे विशिष्यते ॥ १ ॥
पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत् ॥ २ ॥
सौवर्चलाढ्यां मदिरां मूत्रेष्वभिहते पिबेत् ।
एलामथ्य मद्येन क्षीरं वापि पिबेन्नरः" ॥ ३ ॥
"स्नेहस्वेदैरुदावर्त्तं श्लेष्माजं समुपाचरेत् ॥ ४ ॥
अश्रुमोक्षोऽक्षजे कार्य्यः स्निग्धस्विन्नस्य देहिनः ॥ ५ ॥
तीक्ष्णाञ्जनावपीड़ाभ्यां तीक्ष्णैर्गन्धोपसिंहनैः ।
वर्त्तिप्रयोगैरथवा क्षवशक्तिं प्रवर्त्तयेत् ॥
तीक्ष्णौषधप्रधमनैरथवादित्यरश्मिभिः ॥ ६ ॥
उद्गारजे क्रमोपेतं स्नेहिकं धूममाचरेत् ।
सुरां सौवर्चलवतीं बीजपूरकसान्विताम् ॥ ७ ॥
कण्ठाघातं यथा दोषं सम्यक् स्नेहादिभिर्जयेत् ।
सच्चारलवणोपेतमभ्यङ्गं वाच दापयेत् ॥ ८ ॥
वस्तिशुद्धिकरावापश्चतुर्गुणजलप्लवः ।
आवारिणाशात् क्षपितं पीतवर्णं प्रकामतः ।
रमयेयुः प्रिया भार्य्याः शुक्रोदावर्त्तिनं नरम् ॥ ९ ॥
क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनम् ॥ १० ॥
दृष्ट्याघाते पिबेन्मद्यं यवागूं वापि शीतलां ॥ ११ ॥
भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः ॥ १२ ॥
निद्राघाते पिबेत् क्षीरं सप्यात्रेष्टकथारतः" ॥ १३ ॥
अपरञ्च सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा च ।
" वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्त्तं करोति हि ॥
वातमूत्रपुरीषाष्ठक्षपमेदोवहानि वै ।
स्रोतांस्युदावर्त्तयति पुरीषघ्नातिवर्त्तयेत् ॥
ततोऽष्ठहृत्तिशूलार्त्तो गौरवारुचिपीड़ितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥
श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ।
दृष्ट्याहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥
लभते च बहूनन्यान् विकारान् वातकोपजान् ।
तत्तैलघृतवसाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ॥

दोषतो भिन्नवर्च्चस्कं भुक्तश्चाप्यनुवासयेत् ।
नचेच्छान्तिं प्रयात्येवमुदावर्त्तः सुदारुणः ॥
अथैनं बद्धगुदं स्निग्धं युञ्जात् स्नेहविरेचनैः ।
पाययेत चिरत्नीलुयवानीरसपानकैः" ॥
"देवदार्व्यभिकं कुष्ठं वचाभय्यां पलङ्कषाम् ।
पौष्करागि च मूलानि तोयस्यार्द्धाढ़कं पचेत् ॥
पादावशिष्टं तत्पीतमुदावर्त्तं व्यपोहति" ।
घृतं यथा ।
"मूलकं शुष्कमार्द्रञ्च वर्षाभूः पञ्चमूलकम् ॥
आरेवतफलञ्चाप्सु पक्त्वा तेन घृतम्यचेत् ।
तत्पीयमानं शमयेत् उदावर्त्तमशेषतः" ॥ *॥
"चूर्णं निकुम्भकम्पिल्लशमेलाक्षमिकोद्भवम् ।
क्षतवेधनसागधो लवणाञ्च साधयेत् ॥
गवां मूत्रेण तां वर्त्तीः कारयेत्तु गुदानुगाः" ।
वैद्यकरेन्द्रसारसङ्गृहे यच्चिन्तितं तद्यथा ॥
"चिकटुपारदं पथ्याकालकफलं द्विगुणं ।
थानकुलीनां खरसैर्गुड़िका कार्य्यास्तरोल्यास्तु ॥
प्रबलजलोदरगुल्मज्वरपाण्डामयनाशिनी ।
प्रोक्ता तिमिरागिपटलविद्रधिप्रबलोदावर्त्तहरी ॥
क्रिमिकोष्ठगात्रकण्डूपिड़काश्च निहन्ति शूलचयं ।
शुद्धगुड़िका कथिता भुवने श्रीवैद्यनाथाख्या" ॥
इति वैद्यनाथवटिका ॥ * ।
अत्र अपथ्यानि यथा ।
"वमनं वेगरोधश्च शमीधान्यानि कोद्रवम् ।
नालीतशाकं शालूकं जाम्बवं कर्कटीफलम् ॥
पिण्याकमालुकं सर्व्वं करीरं पिण्डवैदलम् ।
विष्टम्भीनि विरुद्धानि कषायाणि गुरूणि च ॥
उदावर्त्ती प्रयत्नेन वर्जयेत् सततं नरः ।
इति वैद्यकपथ्यापथ्यविधिः ।)

उदासः, पुं, (उदस्यते इति । उत् + अस् + घञ् ।) उत्क्षेपः । उद्भावः । औदास्ययुक्ते, त्रि ॥

उदासीनः, पुं, (उदास्ते इति । उत् + आस् + शानच् + ईदास इति ईत्वम् ।) परतरः । इत्यमरः ॥ विजिगीषोः शत्रुमित्रभूमितो व्यवहितः व्यवहितत्वादेव नोपकारी नाप्यपकारी केवलमूर्द्धमासीन इव । इति भरतः ॥ (यथा, मनुः ७।१५५।
"मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम् ।
उदासीनप्रचारञ्च शत्रोस्सैव प्रयत्नतः" ॥
मण्डलभेदः । यथा, तत्रैव ७।१५८।
"अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम्" ॥
उपेक्षकः । यथा, —
"उदासीनवदासीनमसक्तं तेषु कर्म्मसु" । इति गीतायाम् ॥ ६ । ९ ॥)

उदास्थितः, पुं, (उत् + आङ् + स्था + क्त ।) द्वारपालः । अध्यक्षः । इति हेमचन्द्रः ॥ प्रव्रज्यावसितः । नग्नसन्न्यासः । इति मेदिनी ॥

उदाहरणं, क्ली, (उत् + आङ् + हृ + ल्युट् ।) दृष्टान्तः । तत्पर्य्यायः । उपोद्घातः २ उदाहारः ३ इति शब्दरत्नावली ॥ (यथा, माघे ।२।३३।
"प्रध्वंसितान्धतमसस्तवोदाहरणं रविः" ।
कथाप्रसङ्गः । कथनम् । यथा, कुमारे ।६।६५।

"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु" ॥)
पद्यन्यायावयवान्तर्गतमिदम् ॥ (नाट्यशास्त्रे सोत्कर्षवचनोपन्यासरूपो गर्भाङ्गभेदः । यदुक्तं साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते" ।
यथा, वेणीसंहारे अश्वत्थामाङ्के ॥
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात्पाण्डवोनां चमूनां, यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा । यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः, क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" ॥
षट्त्रिंशन्नाटकलक्षणान्तर्गतलक्षणभेदः । यथा, साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ।
साध्यतेऽभिमतञ्चार्थस्तदुदाहरणं मतम् ॥)

उदाहारः, पुं, (उत् + आ + हृ + घञ् ।) उदाहरणं । इत्यमरः ॥ प्रकृतोपपादकदृष्टान्तादिः । इति भरतः ॥ युक्तिप्राप्तार्थनिदर्शनं इति साङ्गः ॥ प्रकृतसिद्ध्यर्था चिन्ता । इति रायमुकुटः ॥

उदितः, त्रि, (वद् + क्त । यद्वा । उत् + इण + क्त ।) उक्तः । (यथा, किराते । १ । २८ ।
"भवाटग्रेषु प्रमदाजनोदितं
भवत्यधिक्षेपइवानुशासनम्" ॥)
बद्धः । इत्यमरः ॥ उद्गतः । प्राप्तोदयः । इति मेदिनी ॥ (यथा, रामायणे ।
"उदयादुदितं दीप्तं ज्वालापिण्डसमप्रभम्" ॥
"उदितेऽनुदिते चैव समयाधुषिते तथा" ।
इति मनुः । २ । १५ ॥ तथा, किराते । ५ । ५ ।
"दधतमुच्चगिरेलान्तरगोपुराः,
पुर इवोदितपुष्पवना भुवः" ॥)

उदितोदितः, त्रि, (उदिते कथिते शास्त्रे उदितः अभ्युदितः ।) शास्त्रज्ञः । इति स्मृतिः ॥
("पुरोहितश्च कुर्व्वीत दैवज्ञमुदितोदितम् ।
दण्डनीत्याञ्च कुशलमथर्व्वाङ्गिरसे तथा" ॥
इति याज्ञवल्क्यः ॥)

उदीची, स्त्री, (उत् उत्तरं अञ्चत्यर्कं । उत्क्रान्तं दृष्टिपथं अञ्चति सूर्य्यं वा । उद ईदित्यञ्चेरत ईकारः । ऋत्विगादिना क्विन् । उगितश्चेति ङीप् ।) उत्तरा दिक् । इत्यमरः ॥
("यदोदीच्यां गतिर्भानोस्तदा सूर्य्यबलाधिकम्" ॥
इति हारीतोत्तरे प्रथमस्थाने चतुर्थेऽध्याये ॥)

उदीचीनं, त्रि, (उदीची + ख ।) उदीच्यां भवं । उत्तरदिग्जातवस्तु । इति हेमचन्द्रः ॥ (यथा, शतपथब्राह्मणे १३ । ८ । १ । ६ । "उदीचीनप्रवणे करोत्युदीची वै मनुष्याणां दिक्" ॥)

उदीच्यं, क्ली, (उदीच्यां भवम् । उदीची + यत् ।) बालनामगन्धद्रव्यं । इत्यमरः ॥ बाला इति ख्यातम् । (बालकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

उदीच्यः, पुं, (उदीच्यां भवः । उदीची + यत् ।) शरावतिनद्याः पश्चिमोत्तरदेशः । इत्यमरः ॥ (तद्देशवासिनि त्रि, यथा, रघौ ४ । ६६ ।
"शरैरस्यैरिवोदीच्यानुद्धरिष्यन् रसानिव" ॥
तथा, महाभारते युधिष्ठिरप्रबोधने ८ । ७० । ३४ ॥
"हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विसृंस्ताः" ॥)

उदीरणं, क्ली, (उत् + ईर + ल्युट् ।) कथनम् । इति हलायुधः ॥ (यथा, कुमारे २ । १२ ।
("उद्गातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्" ॥
प्रेरणम् । क्षेपणम् ।
"ब्रह्मास्त्रोदीरणात् पूर्व्वोर्देवदानवकिन्नराः" ।
इति महाभारते ॥)

उदीर्णः, त्रि, (उत् + ऋ + क्त ।) उदारः । महान् । इति जटाधरः ॥
("न हि राज्ञामुदीर्णानामेवम्भूतैर्नरैः क्वचित् ।
सख्यं भवति मन्दात्मन् ! श्रिया हीनैर्धनच्युतैः" ॥
इति महाभारते ॥ उत्तेजितः । उद्दीपितः । उद्धतः । यथा, कुमारे २ । ३२ ।
"भवल्लब्धवरोदीर्णतारकाख्यो महासुरः" ।
"ब्रह्म क्षत्रेण संरुद्धं क्षत्रं च ब्रह्मणा सह ।
उदीर्णौ दहतः पूर्व्वान् वनानीवाग्निमारुतौ" ॥
इति महाभारते । पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनामकथने १३ । १४९ । ८० ।
"उदीर्णः सर्व्वतश्चक्षुरनीशः शाश्वतः स्थिरः" ॥)

उदुम्बरं, क्ली, (उं ब्रह्मभुं बिभर्त्तीति उम्बरम् । उ + बृ + संज्ञायां खच् । अरुर्द्विषदिति मुम् । उत्कृष्टमुम्बरम् ।) ताम्रम् । इत्यमरः ॥ (ताम्रशब्दे ऽस्य विशेषो ज्ञेयः ॥)

उदुम्बरः, पुं, उड़म्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । क्षीरवृक्षः २ हेमदुग्धः ३ सदाफलः ४ कालस्कन्धः ५ यज्ञयोग्यः ६ यज्ञीयः ७ सुप्रतिष्ठितः ८ शीतवल्कः ९ जन्तुफलः १० पुण्यशुन्धः ११ पवित्रकः १२ सौम्यः १३ शीतफलः १४ । अस्य पक्वफलगुणाः । मधुरत्वम् । हिमत्वम् । कृमिकारित्वम् । रक्तपित्तदाहमूर्च्छादाहनाशित्वञ्च । अस्य सुपक्वफलगुणाः । अतिशयशीतलत्वम् । मधुरत्वम् । पित्तश्रमशोषहारित्वञ्च । अस्यामफलगुणाः । कषायत्वम् । अग्निदीपनत्वम् । रक्तविकारित्वञ्च ॥ अस्य त्वग्गुणाः । शीतत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भिणीगर्भसंरक्षकत्वम् । स्तनदुग्धदाढ्यत्वञ्च । इति राजनिर्घण्टः ॥
(अस्य पर्य्यायगुणौ यथा ।
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफापहित् ॥
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे वटादिवर्गे ॥
अस्य फलगुणांश्चाह चरकः सूत्रस्थाने खप्तविंशेऽध्याये यथा,—
"अश्वत्थोदुम्बरप्लक्षन्यग्रोधानां फलानि च ।
कषायमधुरास्यानि वातलानि गुरूणि च ॥ *॥)
कुष्ठविशेषः । देहली । गोबराटेर नीचेर काठ इति भाषा । षण्ढकः । नपुंसकं । इति हेमचन्द्रः ॥

उदुम्बरदला, स्त्री, (उदुम्बरस्य दलमिव दलमस्याः ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥ (अस्या गुणादयो दन्तीशब्दे ज्ञेयाः ॥)

उदुम्बरपर्णी, स्त्री, (उदुम्बरस्य पर्णमिव पर्णमस्याः ।) उड़म्बरपर्णी । दन्तिकावृक्षः । इत्यमरः ॥ (अस्याः पर्य्यायाक्षरक्रमेण कल्पस्थाने १२ अध्याये उक्ताः । यथा,—
"दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः" ॥)

उदूखलं, क्ली, (उदूर्द्ध्वं तत् खञ्च । तत् लाति । आतोनुपेति कः । पृषोदरादित्वात् साधुः ।) गुग्गुलुः । इति मेदिनी ॥ तण्डुलकरणार्थकाष्ठनिर्म्मितपात्रम् । उखलि इति भाषा । तत्पर्य्यायः । उलूखलं २ । इत्यमरः ॥ ("संकुचोदूखले विद्वान्" इत्यादिप्रयोगो भावप्रकाशादौ द्रष्टव्यः ॥)

उदूढः, त्रि, (उत् + वह + क्तः ।) ऊढः । स्थूलः । इति मेदिनी ॥ (यथा, माघे । १ । ३६ ।)
"उदूढलोकचित्तयेन साम्प्रतम्
गुरुर्धरित्री क्रियतेतरां त्वया" ॥)

उद्गतं, त्रि, (उत् + गम + क्त ।) उद्दान्तम् । कुर्द्दितवस्तु । इत्यमरः ॥ ऊर्द्ध्वगतम् । उदितम् ॥

उद्गमः, पुं, (उत् + गम + अप् ।) ऊर्द्ध्वगमनम् । उदयः ॥ (आविर्भावः । यथा, कुमारे । ७ । ७७ ॥
"रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत्" ।
"फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" ॥
इति रघुवंशे । ४ । ९ ॥ प्रस्थानं बहिर्गमनम् ।
"तनयानां क्षुधार्त्तानां पश्यन् प्राणोद्गमव्यथाम्" ।
इति कथासरित्सागरे ४ तरङ्गे ॥)

उद्गमनीयं, क्ली, (उत् + गम + अनीयर् ।) धौतवस्त्रादयं । इत्यमरः ॥ धोया योड़ इति भाषा ।
("सा मङ्गलस्नानविशुद्धगात्री
गृहीतपत्युद्गमनीयवस्त्रा" ।
इति कुमारे । ७ । ११ ॥)

उद्गाढं, क्ली, (उत् + गाह + क्त ।) अतिप्रगयः । तद्युक्ते त्रि । इत्यमरः ॥ ("प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयाः" । इति साहित्यदर्पणे । ३य परिच्छेदे ॥)

उद्गाता, [ऋ] पुं, (उद्गायति साम यः । उत् + गै + तृच् ।) सामवेदज्ञः । सामवेदविदब्राह्मणः इत्यमरः ॥
("ब्रह्माणं परमं वक्त्रादुद्गातारञ्च सामगम् ।
होतारमथ चाध्वर्य्युं बाहुभ्यामसृजत्प्रभुः" ॥
इति हरिवंशे । तथा च मनुः । ८ । २०९ ।
"होता वापि हरेदश्वमुद्गाता चाध्वनःक्रये" ॥
"उद्गाटहोटब्रह्माणो यथाध्वर्य्यु विनाध्वरे" ।
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)

उद्गारः, पुं, (उत् + गृ + घञ् ।) उद्गमनम् । इत्यमरः ॥ (यथा, रघौ । ६ । ६० ।
"आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्िराजः" ॥)
शब्दः । इति भरतः ॥ (यथा महाभारते ३ ।
"तस्य लाङ्गूलनिनदं पर्व्वतः स गुहामुखैः ।
उद्गारमिव गौर्नदद्मुत्ससर्ज समन्ततः" ॥)
कण्ठगर्ज्जनं । इति जटाधरः ॥ ढेकुर इति भाषा । तनु नागवायुकर्म्म । इति श्रीधरस्वामी ॥ (खावः ।

चरणम्। यथा, रघौ। ४।५३।
"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः"।
"अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन च"।
"करोत्युद्गारबाहुल्यम्" इति भावप्रकाशे मध्यखण्डे वातरोगाधिकारे॥ वमनप्रकारादिकं वमनशब्दे द्रष्टव्यम्॥ यथा, शारदातिलकटीकायां,—
"उद्गारे नागदृष्टस्तो नीलजीमूतसन्निभः"॥)

उद्गीतं, त्रि, (उद्गैर्गीयते स्म। उत्+गै+क्त।) उच्चैर्गीतम्। इति देवीमाहात्म्यम्॥ (यथा,—मार्कण्डेये ८४। ६।
"शब्दात्मिकासुविमलर्ग्यजुषां निधान-
मुद्गीतरम्यपदपाठवताञ्च साम्नाम्"॥)

उद्गीथः, पुं, (उत्+गै+थक्।) सामवेदभेदः। प्रणवः। इत्यमरटीकायां भरतः॥
("अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति"॥
इति उत्तररामचरिते। २याङ्के"।)
सामवेदध्वनिः। इत्यमरः॥ सामगानम्। इति सारसुन्दरी॥ साम्नां द्वितीयोऽध्यायः। इति भगीरथः॥ (भवपुत्रः। इति विष्णुपुराणम्॥)

उद्गूर्ण, त्रि, (उत्+गूर+क्त।) उद्यतम्। इत्यमरः॥ उत्तोल्यधृतवस्त्रादि। इति भरतः॥

उद्ग्राहः, पुं, (उत्+ग्रह+घञ्।) उद्ग्रहणम्। ऊर्द्धीकृत्य कस्यचित् ग्रहणम्। इत्यमरः॥ विद्याविचारः। इति भरतः॥

उद्ग्राहितः, त्रि, (उत्+ग्रह+णिच्+क्त।) उद्गीर्णः। बद्धः। ग्राहितः। इति मेदिनी॥ उपन्यस्तः। इति हेमचन्द्रः॥

उद्गः, पुं, (उद्गन्यते इति। उत्+हन्+कर्म्मणि क्यप्। टिलोपात् घत्वं च निपातनात्। यद्वा उद्गन्ति नीचताम्। उत्+हन्+ड।) प्रग्रस्तः। प्रकाण्डः। इत्यमरः॥ (हस्तपुटम्। अग्निः। शरीरस्थो वायुः॥)

उद्घनः, पुं, (ऊर्द्धं हन्यतेऽस्मिन्। उत्+हन+अप्। निपातनात् हस्य घः।) यत्र काष्ठे काष्ठं निधाय तक्ष्यते तत्। इत्यमरः॥ परकाठ इति भाषा॥ (यथा, भट्टिः ७।६२।
"तस्मिन्नन्तर्घने पश्यन् प्रधाने सौधसद्मनः।
लौहीद्घनघनस्कन्धा ललितापयनां स्त्रियम्"॥)

उद्घर्षणं, क्ली, (उत्+घृष+ल्युट्।) गात्रादिघर्षणं। इष्टकया उद्घर्षणगुणाः। कण्डुकोठनाशित्वम्। त्वग्गतामितेश्लेष्मत्वम्। शिरासुखकारकत्वञ्च। इति राजवल्लभः॥
("उद्घर्षणन्तु विज्ञेयं कण्डुकोठानिलापहम्"। इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्॥ समासकथनं। उद्घर्षः। यथा। श्लक्ष्णमिति॥ इति सुश्रुते उत्तरतन्त्रे ६५ अध्याये॥)

उद्घसं, क्ली, (उत्+अद+क्यप्। घसादेशः।) मांसम्। इति हारावली॥

उद्घाटः, पुं, (उत्+घट+घञ्।) गृहभेदः। इति चिकाण्डशेषः। चौकिर घर याना इत्यादि भाषा।

(उद्घाटनम्॥)

उद्घाटकं, क्ली, (उत्+घट+णिच्+ण्वुल्।) कूपाज्जलोत्तोलनार्थयन्त्रविशेषः। तत्पर्य्यायः। घटीयन्त्रम् २। इति हेमचन्द्रः॥

उद्घाटनं, क्ली, (उत्+घट+णिच्+ल्युट्।) कूपात् जलोत्तोलनार्थं रज्जुसहितघटः। तत्पर्य्यायः। घटीयन्त्रम् २। इत्यमरः॥ उत्तोलनम्। इति भरतः॥ (यथा, हितोपदेशे। मित्रप्राप्तौ॥
"धर्म्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनम्"॥)

उद्घाटितः, त्रि, (उत्+घट+णिच्+क्त।) कृतोद्घाटनम्। खोला इति भाषा॥
("मद्देऽनुद्घाटितद्वारि नाङ्कतः प्रविशेन्नरः।
वारितार्थप्रवक्तापि पश्चाद्दमशृणं त्यजेत्"॥
इति स्मृतिः॥ तन्त्रशास्त्रम्॥)

उद्घाटितज्ञः, त्रि, (जानाति इति ज्ञः। उद्घाटितस्य ज्ञः। उद्घाटित+ज्ञा+क।) प्राज्ञः। इति चिकाण्डशेषः॥

उद्घातः, पुं, (उत्+हन्+घञ्।) आरम्भः। इत्यमरः॥ (यथा, कुमारे २।१२।
"उद्घातः प्रणवो यासां न्यायस्त्रिभिरदीरणम्"।
"आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः"।
इति रघुवंशे। ४।२०॥) शस्त्रम्। ग्रन्थपरिच्छेदः। इति चिकाण्डशेषः॥ पादस्खलनम्। ("ययावनुद्घातसुखेन मार्गम्"। इति रघुः।२।७२। "रथेनानुद्घातस्त्रिमितगतिना"। इति शाकुन्तले। ६ अङ्के॥ समुपक्रमः। पवनाभ्यासयोगाय कुम्भकादिचयम्। उच्चुङ्गः। (यथा, रामायणे ४ काण्डे "पृथुपृष्टकृग्लोद्घातः"। इति॥) मुद्गरम्। इति मेदिनी॥

उद्घ्, ग्र त्यागे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) स्फूर्जादिदन्त्यवर्गद्वितीयोपधः। क्विपि समुत्सर्गुद्भ्याम्। स्यादौ नवद्र इति उज्झिभिषति औज्झिभूत्। ग्र उज्झती उज्झन्ती। इति दुर्गादासः॥

उद्दंशः, पुं, (उत्+दन्श+अच्।) कीटविशेषः। तत्पर्य्यायः। मत्कुणः २ कोणकुणः ३ किटिभिः ४ उत्कुणः ५। इति हेमचन्द्रः॥

उद्दण्डपालः, पुं, (उद्दण्ड इव पाल्यते इति। उद्दण्ड+पाल+++घञ्।) सर्पविशेषः। मत्स्यभेदः। इति मेदिनी॥

उद्दन्तुरः, त्रि, (उत् अतिशयेन दन्तुरः।) उत्तङ्गः। कराल। उत्कटदन्तः। इति मेदिनी॥

उद्दानं, क्ली, (उत्+दो+ल्युट्।) बन्धनम्। इत्यमरः॥ (यथा, महाभारते। शान्तिपर्व्वणि।
"उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः"।)
उद्दमः। चुल्ली। वाड़वाग्निः। मथः। लग्नः। इति विश्वः॥

उद्दामः, त्रि, (दाम्नः उद्गतः।) बन्धनरहितः। स्वतन्त्रः। इति मेदिनी॥ (यथा, रघुः।१।७८॥
"मदव्याकृष्टगङ्गायाः स्रोतरुद्दामदिग्गजे"॥
"अत्यङ्कुशमिवोद्दामं गजं मदजलोद्धतम्"।
इति रामायणे॥) महान्। यथा।"उद्दामदन्तुरविधुन्तुददन्तघातैः"। इति प्रबन्ध्याः॥
("उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि"। इति मेघदूते। २७॥ गम्भीरः। यथा भागवते १ स्कन्धे।"उद्दामभावपिशुनामलवल्गुहासं"॥)

उद्दामः, पुं, (उद्दामं दाम यस्य। समासे अच्।) वरुणः। इति मेदिनी॥ (दण्डकभेदच्छन्दोविशेषः। यथा, वृत्तरत्नाकरे।
"यदि नयुगलं ततः सप्तरेफा-
स्तदा दण्डवृद्धिप्रयातो भवेद्दण्डकः।
प्रतिचरणविवृद्धरेफाः स्फुरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशङ्कादयः"॥)

उद्दालः, पुं, (उत्+दल+घञ्।) बब्बूवारकवृक्षः। इत्यमरः॥ वनकोद्रवः। इति रत्नमाला॥

उद्दालकः, पुं, (उद्दाल एव। स्वार्थे कन्।) बब्बूवारकवृक्षः। इति शब्दरत्नावली॥ (मुनिभेदः। स तु आयोदधौम्यस्य शिष्यः। तस्य नामोत्पत्तिस्तु महाभारते १। पौष्योपाख्याने ३ अध्याये।
"एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामायोदस्तस्य शिष्यास्त्रयो बभूवुरुपमन्युरारुणिर्वेदश्चेति। २३॥ स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ केदारखण्डं बधानेति। २४॥ स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत्केदारखण्डं बन्धुं नाशकत्॥ २५॥ स क्लिश्यमानोऽपश्यदुपायं भवत्वेवं करिष्यामीति॥ २६॥ स तत्र संविवेश केदारखण्डे प्रयाते च तथा तस्मिंस्तदुदकं तस्थौ॥ २७॥ ततः कदाचिदुपाध्यायः आयोदो धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत इति॥ २८॥ ते तं प्रोचुः भगवंस्त्वयैव प्रेषितो गच्छ केदारखण्डं बधानेति। स एवमुक्तस्तान् शिष्यान् प्रत्यूवाच तस्मात् तत्र सर्व्वे गच्छामः यत्र स गत इति॥ २९॥ स तत्र गत्वा तस्याज्ञानाय शब्दं चकार भो आरुणे पाञ्चाल्य क्वासि वत्स एहीति॥ ३०॥ स तत् श्रुत्वारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायं उपतस्थे॥ ३१॥ प्रोवाच चैनमुपाध्यायं व्ययमस्मात्र केदारखण्डे निःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवत्शब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भगवन्तमुपस्थितः॥ ३२॥ तदभिवादये भगवन्तमाज्ञापयतु भवान् किमर्थं करवाणीति॥ ३३॥ स एवमुक्तउपाध्यायः प्रत्यूवाच यस्मात् भवान् केदारखण्डं विदार्य्य उत्थितस्तस्मात् उद्दालकएव नाम्ना भविष्यतीत्युपाध्यायेनानुगृहीतः"। २४॥
अपरः खनामख्यात ऋषिभेदः। स तु श्वेतकेतुपिता। यथा तत्रैव कुन्तीपुत्रोत्पत्त्युद्याने १२२॥
"बभूवोद्दालको नाम महर्षिरिति नः श्रुतम्।
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन् मुनिः"॥ ९॥)

उद्दितः, त्रि, (उत्+दो+क्त।) बद्धः। इत्यमरटीकायां भरतः॥

उद्दीपकः, त्रि, (उत्+दीप्+ण्वुल्।) उद्दीपनकर्त्ता॥

उद्दीपनं, क्ली, (उत्+दीप्+ल्युट्।) प्रकाशनम्॥

विभावविशेषः । यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।
उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" ॥ ते च ।
"आलम्बनस्य चेष्टाद्या देशकालादयस्तथा" ॥
चेष्टादीत्यादिशब्दात् रूपभूषणादयः । कालादि
इत्यादिशब्दात् चन्द्रचन्दनकोकिलालापभ्रमर-
झङ्कारादयः । इति साहित्यदर्पणे ॥ इय परि-
च्छेदः ॥)

उद्दीप्तः, त्रि, (उत् + दीप + क्त ।) प्रकाशितः ॥

उद्दीप्रं, क्ली, (उत् + दीप् + रक् ।) गुग्गुलुः । इत्य-
मरटीकायां भरतधृतवाचस्पतिः ॥

उद्देशः, पुं, (उत् + दिश् + घञ् ।) अनुसन्धानम् ।
अन्वेषणम् ॥ (न्यायमते नाम्ना निर्देशः । अभि-
धानं यथा,—"पदार्थोद्देशः" । समासकथनम् ।
यथा, "समासकथनमुद्देशः । यथा, ग्रल्यमिति" ॥
पर्व्वतस्य गण्डकूपः । निर्देशः । विवरणम् ।
"इत्येष ते यज्ञोद्देशो मानुषाणां प्रकीर्त्तितः" ।
इति महाभारते । स्थानम् । प्रदेशः ।
"सपर्व्वतवनोद्देशा दक्षिणार्थे स्वयम्भुवा" ।
इति महाभारते ॥)

उद्देशकः, त्रि, (उत् + दिश + ण्वुल् ।) उद्देशकर्त्ता ।
उदाहरणम् । इति लीलावती ॥

उद्देश्यः, त्रि, (उत् + दिश् + ण्यत् ।) उद्देशयः ।
उद्देशनीयः । प्रयोजनम् । (यत् उद्दिश्य विधेयस्य
प्रवृत्तिः भवति तत् । अनुवाद्यम् ॥)

उद्देहिका, स्त्री, (उद्गतो देहो यस्याः ।) कीटविशेषः ।
तत्पर्य्यायः । उपजिह्विका २ उत्पादिका ३ वटिः
४ दिवी ५ । इति हारावली ॥

उद्द्रावः, पुं, (उद्द्रवणम् । द्रु + उदि श्रयतियौतिपूद्रव-
इति घञ् ।) पलायनम् । इत्यमरः ॥

उद्धतः, पुं, (उत् + हन् + क्त ।) राजमल्लः । इति
त्रिकाण्डशेषः ॥

उद्धतं, त्रि, (उत् + हन् + क्त ।) अविनीतम् । इति
हेमचन्द्रः ॥ (यथा, उत्तरचरिते षष्ठाङ्के ।
"धीरोद्धता नमयतीव गतिर्धरित्रीम्" ।
"मदमाग्रसमुद्धतं रूपं न वियुङ्क्ते नियमेन मूढ़ता" ।
इति किराते । २ । ४९ ॥ उत्थितः । उत्क्षिप्तः ।
आहतः । ताडितः । यथा,—ग्राकुन्तले १म अङ्के ॥
"आत्मोद्धतैरपि रजोभिरलङ्घनीयाः" ।
निविड़ः । घोरः । यथा, पञ्चतन्त्रम् ॥ "तुषार-
वर्षोद्धतप्रवर्षघनधारानिपातसमाहतम्" ॥)

उद्धतमनस्त्वं, क्ली, (उद्धतं गर्व्वितं मनो यस्य तस्य
भावः ।) गर्व्वः । अभिमानः । इति शब्दरत्नावली ॥

उद्धरणं, क्ली, (उत् + हृ + ल्युट् ।) उद्धारः । वान्ता-
न्नम् । उन्मूलनम् । इति मेदिनी ॥ मुक्तिः । इति
शब्दरत्नावली ॥ (कण्टकादीनां ऋणादेर्व्वा प्रो-
धनम् । निराकरणम् । उत्तोलनम् । यथा,—
"यत्नवानपि तु श्रीमाल्लाङ्गूलोद्धरणोद्धरः" ।
इति महाभारते ।
"कण्टकोद्धरणैर्नित्यमातिष्ठेत् यत्नमुत्तमम्" ।
इति मनुः । ९ । २५२ । व्यसनादिभ्यो विमोचनम् ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य" ॥
इति रघुः । २ । २५ ॥)

उद्धर्षः, पुं, (उद्धतो हर्षो यस्मिन् ।) उत्सवः । इत्य-
मरः ॥ (यथा, रामायणे । ४ काण्डे ।
"अप्रक्षोऽस्मि रणोद्धर्षे तपस्विप्ररणं गृहम्" ॥)

उद्धर्षणं, क्ली, (उत् + हृष् + ल्युट् ।) रोमाञ्चः । इति
हेमचन्द्रः ॥ (चि, आनन्दकरम् । रोमाञ्चकरम् ।)
(यथा रामायणे २ । २ । १ ॥
"ततः परिषदं सर्व्वामामन्त्र्य वसुधाधिपः ।
हितमुद्धर्षणं चैवमुवाच प्रथितं वचः" ॥)

उद्धवः, पुं, (उद्धुनोति दुःखमिति । उत् + धूञ् + अच् ।)
उत्सवः । इत्यमरः ॥ यज्ञाग्निः । यादवविशेषः ।
इति मेदिनी । यथा, श्रीभागवतम् ॥
"वृष्णीनां सम्मतो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः" ॥

उद्धानं, क्ली, (उद्धीयतेऽस्मिन् । उत् + धा + ल्युट् ।)
घृतम् । इत्यमरः ॥

उद्धानः, त्रि, (उत् + धा + ल्युट् ।) उद्धृतः । वमितः ।
इति मेदिनी ॥

उद्धान्तः, पुं, (उद्धान्यते इति उत् + धन् + णिच् +
क्त ।) निर्म्मदहस्ती । इत्यमरः ॥ उद्भ्रान्तः । इति
रमानाथः ॥

उद्धारः, पुं, (उत् + हृ + घञ् ।) ऋणम् । इत्यमरः ॥
उद्धृतिः । इति मेदिनी ॥ ("निमग्नस्य पुनरुद्धार-
एव दुर्लभः" । इति बृहदारण्यकोपनिषत् । मोच-
नम् । यथा, शतपथब्राह्मणे १३ । ३ । ४ । २ ।
"अश्वस्य वयमुद्धारमुद्धरामहै" । मोक्षः । निर्व्वा-
णम् ॥ * ॥ उद्धियते साधारणधनात् इत्युद्धारः ।
यद्वा, साधारणधनात् यत् गरिष्ठं तदुद्धारः ।
इति श्रीनाथः । उद्धियते साधारणधनात्
निष्कृष्य विशेषनिष्ठतया एव बोध्यते इत्युद्धार-
इति अच्युतानन्दः । साधारणत्वेन उद्धियते इति
उद्धार इति रघुनन्दनः । उद्धियते साधारणधनात्
बहिर्भाव्यते इत्युद्धार इति श्रीहरिदासः । यथाह
मनुः ९ । ११२ ॥
"ज्येष्ठस्य विंश उद्धारः सर्व्वद्रव्याच्च यद्वरम् ।
ततोऽर्द्धं मध्यमस्य स्यात् तुरीयस्तु यवीयसः" ॥
ज्येष्ठस्य विंश उद्धारः उद्धियते इत्युद्धारः ज्येष्ठस्या-
विभक्तसाधारणधनात् उद्धृत्य विंशतितमो भाग-
इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥ जयानन्तरं ग्र-
ज्येभ्यो लभ्यं धनादिकम् । यदुक्तं मनुना ७ । ९७ ।
"राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथक् जितम्" ॥
"उद्धारं योद्धारः राज्ञे दद्युः । उद्धियते इत्युद्धारः
जितधनाद्यत् उत्कृष्टधनं सुवर्णरजतभूम्यादि राज्ञे
समर्पणीयम्" । इति तट्टीका ॥)

उद्धारं, क्ली, (उत् + हृ + घञ् ।) उद्धानम् । इत्यम-
रटीकायां स्वामी ॥ उनन् आका इत्यादि भाषा ।

उद्धारणं, क्ली, (उत् + हृ + णिच् + ल्युट् ।) उद्धार-
करणम् । उत्तोलनम् ॥

उद्धारा, स्त्री, गुडूची । इति शब्दचन्द्रिका ॥

उद्धूनं, क्ली, (उत् + धूञ् + णिच् + ल्युट् ।) एक-
त्रितैलालवङ्गकर्पूरकस्तूरीमरिचत्वचूर्णम् । इति
पाकरानेश्वरः ॥

उद्धूषणं, क्ली, (उत् + धूष + ल्युट् ।) रोमाञ्चः । इति
हलायुधः ॥

उद्धृतः, त्रि, (उत् + हृ + क्त ।) क्षतोद्धरणम् । लोला
इति भाषा । तत्पर्य्यायः । समुद्धृतः २ । इत्यमरः ॥
उत्क्षिप्तः । परिशुष्कोऽभितः । इति मेदिनी ॥
("उद्धर्तुमैच्छत् प्रसभोद्धृतारिः" । इति रघुः ।
२ । ३० तथा नैषधे । ९ । ६६ ।
"इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधस्तमसुद्धृतं रजः" ॥)

उद्घ्राणं, क्ली, (उत् घ्रायते अग्निरत्र । घ्रा शब्दाग्नि-
संयोगयोः उत्पूर्व्वात् तस्मात् ल्युट् ।) घृतम् । इत्य-
मरटीकायां भरतः ॥

उद्घ्राः, पुं, (उज्झति कूजनमिति । उज्झ + क्वप् । निपा-
तनात् सिद्धम् ।) नदः । इति व्याकरणम् ॥
("तोयदागमइवोद्घ्राभिद्यथोः" । इति रघुः ११ । ८ ।
"कूलं भिद्योद्घ्रसन्निभौ" ॥ इति भट्टिः । ५ । २२ ॥)

उद्बुद्धः, त्रि, (उत् + बुध + क्त ।) विकसितः । इति
हलायुधः ॥ (प्रबुद्धः । यथा तिथितत्त्वे,—
"उद्बुद्धां च जगद्धात्रीं पूजयेत् दीपमालया" ॥
यथा, साहित्यदर्पणे ३ । १६२ ।
"उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः" ॥)

उद्बोधः, पुं, (उत् + बुध् + घञ् ।) किञ्चित् ज्ञानम् ।
(यथा साहित्यदर्पणे द्वितीयपरिच्छेदे ४१ ।
"उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति" ॥)

उद्भटः, पुं, (उत् + भट् + अप् ।) कच्छपः । सूर्य्यः ।
इति मेदिनी ॥ (सूर्य इति केचित् ॥)

उद्भटः, त्रि, (उत् + भट् + अप् ।) प्रवरः । ("पदे
पदे सन्ति भटा रणोद्भटाः" ।) इति नैषधः ॥
श्रेष्ठाश्रयः । तत्पर्य्यायः । महेच्छः २ उदारः
३ उदात्तः ४ उदीर्णः ५ महाशयः ६ महामनाः
७ महात्मा ८ । इति हेमचन्द्रः ॥

उद्भवः, पुं, (उद्भवनं उद्भवत्यस्मादिति वा । उत् + भू
+ अप् ।) जन्म । उत्पत्तिः । इत्यमरः ॥ ("दिलीप-
सूनुर्महिष्याकरोद्भवः" । इति रघुः । ३ । ७ । "वि-
ष्णुपादोद्भवा गङ्गा" । इति पुराणम् । विष्णुः ।
प्रथमं प्रत्युपादानकारणत्वात् ॥)

उद्भिजः, त्रि, उद्भिज्जः । इत्यमरटीकायां रमानाथः ॥

उद्भिज्जं, त्रि, (उद्भेदनमिति उद्भित् सम्पदादित्वात्
क्विप् । तस्मात् जायते यत् । उद्भित् + जन् + ड ।)
उद्भिद्यजातमात्रम् । तच्च तरुगुल्मादि । इत्यमरः ॥
(यथा, मनुः । १ । ४६ । "उद्भिज्जाः स्थावराः सर्व्वे
बीजकाण्डप्ररोहिणः" । "इन्द्रगोपमण्डूकप्रभृतय-
उद्भिज्जाः" ॥ इति सुश्रुतस्थाने प्रथमेऽध्याये सुश्रुते-
नोक्तम् ॥)

उद्भित्, [द्] त्रि, (उद्भिनत्ति भूमिमिति । उत् +
भिद् + क्विप् ।) उद्भिज्जम् । इत्यमरः ॥ तच्च प-
ञ्चधा । वृक्षः १ गुल्मः २ लता ३ वल्ली ४ तृणम् ५ ॥
(यथा, महाभारते आदिपर्व्वणि । "संस्वेदजा

अण्डजा उद्भिदश्च"। उद्भिद्यते पशुफलमनेन इति निरुक्तेः यागभेदः ॥)

उद्भिदं, त्रि, (उद्भिनत्तीति। उद्+भिद्+इगुपधेति कः।) तरणुल्लादि। तत्पर्य्यायः। उद्भित् २ उद्भिज्जम् ३। इत्यमरः॥ उद्भिजम् ४। इति रभसाश्वः॥ (यथा महाभारते १४ पर्व्वणि।

"जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च"॥)

उद्भिदं, क्ली, (उद्भिनत्तीति। उद्+भिद्+क।) पांशुलवणम्। इति रत्नमाला॥ पाडा लुण इति भाषा। ("उद्भिदानि पलाशेक्षुकरीषवेणुक्षितिजानि"। इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये॥)

उद्भूतः, त्रि, (उद्भवति स्म। उद्+भू+क्त।) उत्पन्नः। जातः। यथा। ईशानसंहितायाम्।

"माघे कृष्णचतुर्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः"॥

इति तिथ्यादितत्त्वम्॥ (तथा, भाषापरिच्छेदे ५६।

"उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः"।)

उद्भूतरूपं, क्ली, (उद्भूतं प्रत्यक्षयोग्यं रूपम्।) नयनगोचररूपम्। यथा,—भाषापरिच्छेदे॥

"उद्भूतरूपं नयनस्य गोचरं
द्रव्याणि तद्यन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥५४॥

क्रियाजाती योगयत्ती समवायश्च तादृशम्।
यष्टाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः"॥५५॥

उद्भ्रमः, पुं, (उद्भ्रमणमिति। उत्+भ्रम+घञ्। नोदात्तोपदेशेति न वृद्धिः।) उद्वेगः। इत्यमरः॥

उद्भ्रान्तं, क्ली, (उत्+भ्रम+क्त।) बाह्यमुद्भ्रम्य मण्डलाकारखड्गभ्रामणं। इति महाभारतम्॥ (परिभ्रान्ते, त्रि। यथा, रघौ ४। ४६॥

"मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः"॥

विकले। विह्वले। यथा, रामायणे,—

"उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत्"॥)

उद्यः, पुं, नदः। इति हेमचन्द्रः॥ (उद्यते यत्। वद+क्यप्। कथनीये, त्रि। यथा, स्मृतौ यम वाक्यम्।)

उद्यतं, त्रि, (उत्+यम+क्त।) उत्तोल्यष्टतवस्त्रादि। उद्यतश्चस्त्रादि। तत्पर्य्यायः। उदगूर्णं २॥ इत्यमरः॥ (यथा, रघुवंशे। ४। १६।

"प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्म्मुकौ"॥)

उद्यतः, पुं, (उत्+यम+क्त।) ग्रन्थपरिच्छेदः। इति जटाधरः॥

उद्यमः, पुं, (उत्+यम+घञ्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) उद्योगः। तत्पर्य्यायः। गूरणम् २। इत्यमरः॥ गूरणम् ३ गोरणम् ४। इति तट्टीकायां भरतः॥ उत्साहः ५ अध्यवसायः ६ उद्योगः ७। इति जटाधरः॥ (यथा, कुमारे ५। ३।

("निग्रह्य चैनां तपसे कृतोद्यमाम्"।
"गृह्णाक मेनां न नियन्तुमुद्यमात्"।
इति च कुमारे ५। ५॥)

उद्यानं, क्ली, (उद्यायति क्रीड़ार्थमस्मिन्। उत्+या+ल्युट्।) राज्ञः साधारणं वनम्। तत्पर्य्यायः। आक्रीड़ः २।

("वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्म्या"। इति मेघदूते ७।)निःसरणम्। प्रयोजनम्। इत्यमरः॥

उद्यानपालः, त्रि, (उद्यानं पालयतीति। उद्यान+पालि+अण्।) उद्यानरक्षकः। माली इति भाषा॥

("उद्यानपालसामान्यमृतवस्तुमुपासते"॥
इति कुमारे।२। ३६॥)

उद्युक्तः, त्रि, (उत्+युज्+क्त।) उद्यमयुक्तः। उद्योगविशिष्टः। इत्यमरटीकायां भरतः॥ (यथा, अमरकोषः। "इष्टार्थोद्युक्तउत्सुकः"।)

उद्योगः, पुं, (उत्+युज+घञ्।) यत्नः। चेष्टा। तत्पर्य्यायः। उत्साहः २ अध्यवसायः ३ उद्यमः ४। इति जटाधरः॥ (यथा, मार्कण्डेये ८८।२।

"उद्योगः सर्व्वसैन्यानां दैत्यानामादिदेश ह"।
"उद्योगादनिवृत्तस्य सुसहायस्य धीमतः"।
छायेवानुगता तस्य नित्यं श्रीः सहचारिणी"॥
इति नीतिवाक्यम्।

महाभारतस्य उद्योगपर्व्व। यथा, महाभारते १।१।६३।

"उद्योगः सैन्यनिर्य्याणं श्वेतोपाख्यानमेवच"॥)

उद्योगी, [न्] त्रि, (उद्योगोऽस्यास्तीति। उद्योग+इनि।) उद्योगविशिष्टः। उद्यमी। तथा च।

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः"॥
इति नीतिसारे १३॥

उद्योतः, पुं, (उत्+द्युत+घञ्) आलोकः। ज्योतिः। इति हलायुधः॥

उद्रः, पुं, (उनत्तीति। उन्द+रक्।) जलजन्तुविशेषः। इत्यमरः॥ उदविड़ाल इति भाषा।

उद्रङ्गः, पुं, पुरविशेषः। "व्योमचारि पुरं शौभमुद्रङ्गः प्रतिमार्गकः"। इति जटाधरः॥

उद्रङ्गः, पुं, व्योमचारि पुरम्। तत्पर्य्यायः। खपुरं २ ऊर्द्धगं पुरं ३ हरिश्चन्द्रपुरं ४ शौभं ५ प्रतिमार्गकः ६ चङ्गा ७ चङ्गः ८। इति त्रिकाण्डशेषः॥

उदश्वः, पुं, (उद्गतो रथो यस्मात्।) रथकीलम्। ताम्रचूड़पक्षी। इति मेदिनी॥

उदिक्षं, त्रि, (उदिक्षते स्म। उत्+रिच+क्त।) स्फुटम्। स्पष्टम्। इति जटाधरः॥

उद्रेकः, पुं, (उत्+रिच+घञ्।) उपक्रमः। वृद्धिः॥

"अधुनैव कुरङ्गाक्षि जहार जगतां मनः।
न जाने यौवनोद्रेके जीवनस्यापि का गतिः"॥
इत्युद्भटः॥

"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्"॥
इति महिम्नःस्तोत्रम्॥

("तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः"।
इति वैद्यकरत्नविनिश्चयेऽपस्माराधिकारे॥)

उद्रेका, स्त्री, (उद्रेक+टाप्।) महानिम्बः। इति राजनिर्घण्टः॥

उद्वत्सरः, पुं, (उत्क्रान्तो वत्सरः।) वत्सरः। इति हेमचन्द्रः॥

उद्बन्धनं, क्ली, (उत्+बन्ध+ल्युट्) ऊर्द्धबन्धनम्। इति स्मृतिः॥ गलाय दड़ि देओन फाँसी देओन टाङ्गान इत्यादि भाषा॥

उद्वमनं, क्ली, (उत्+वम+ल्युट्।) उद्गीरणम्। तुलिया फेलन वाँति करण इत्यादि भाषा॥

उद्वर्त्तः, त्रि, (उत्+वृत्+घञ्।) अतिरिक्तः। उवरण वाड़ा इत्यादि भाषा। यथा। "उद्वर्त्तो हि यत्नः समधिकफलमाचष्टे"। इति व्याकरणटीका॥

उद्वर्त्तनं, क्ली, (उत्+वृत्+णिच्+भावे करणे वा ल्युट्।) उत्पतनम्। (यथा, मेघदूते ४२।

मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि"।)

विलेपनम्। घर्षणम्। इति मेदिनी॥ (यथा, मनुः ४। १३२।

"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च।
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः"॥)

शरीरनिर्म्मलीकरणगन्धद्रव्यादि। तत्पर्य्यायः। उत्सादनम् २। इत्यमरः॥ हरिद्रा सेवन आवटन इत्यादि भाषा। सामान्योद्वर्त्तनगुणाः। कफवायुमेदोवातरोगनाशित्वम्। अङ्गस्थैर्य्य-धर्म्मनिर्म्मलकारित्वञ्च॥ हरिद्राद्युद्वर्त्तनगुणाः। कण्डूवैवर्ण्यरूक्षताहारित्वम्॥ तिलोद्वर्त्तनगुणाः। कण्डूरूक्षतात्वग्दोषनाशित्वम्। इति राजवल्लभः॥

("उद्वर्त्तनं वातहरं कफमेदोविलापनम्।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्॥
शिरासुखविविक्तत्वं त्वक्स्थस्यालेख तेजनम्॥
इति चिकित्सितस्थाने २४ अध्याये सुश्रुतेनोक्तम्॥)

उद्वर्द्धनं, क्ली, (उत्+वृध्+ल्युट्।) अन्तर्हासः। इति चिकाण्डशेषः॥

उद्वहितः, त्रि, (उत्+वह्+क्त।) उद्धृतः। इति भूरिप्रयोगः॥ उद्वाहितो वा इति पाठः॥

उद्वहः, पुं, (उद्ध्वं वहति प्रापयतीति। उत्+वह+अच्।) पुत्रः। इति हेमचन्द्रः॥ (यथा,—रघुः। ६। ६।

("उदयमस्तमयञ्च रघूद्वहात्"॥)

समवाय्यन्तर्गतवायुविशेषः। स तु प्रवहवायोरूर्द्ध-स्थितः। इति सिद्धान्तशिरोमणिः॥

("आवहः प्रवहश्चैव विवहश्च समीरणः।
परावहः संवहश्च उदवहश्च महाबलः॥
तथा परिवहः श्रीमानुत्पातभयशंसिनः।
इत्येते क्षुभिताः सप्त मारुता गगनेचराः"॥
इति हरिवंशे। २३६ अध्याये। विवाहः॥)

उद्वहा, स्त्री, (उद्वह+टाप्।) कन्या। पुत्री। इति हेमचन्द्रः॥

उद्वानः, त्रि, (उत्+वन+घञ्।) उद्गमितः। उद्वान्तः। इत्यमरटीकायां रायमुकुटः॥

उद्वान्तं, त्रि, (उत्+वम्+क्त।) वमितवस्तु। तत्-

पर्य्यायः। उद्गतं २। इत्यमरः॥
उद्वान्तः, पुं, (उद्गतं वान्तं मदो यस्मात्।) निर्म्मदहस्ती। इति मेदिनीकरजटाधरौ॥
उद्वासनं, क्ली, (उत्+वस्+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः॥ (संस्कारभेदः। यथा, कात्यायने ६। १। २॥
"अप उपस्पृश्य प्राणाद्यर्थं परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वाग्नीध्र उत्पूय पश्चात् आज्यग्रहणम्"॥)
उद्वाहः, पुं, (उत्+वह+घञ्।) विवाहः। इत्यमरः। तस्य लक्षणं भार्य्यात्वसम्पादकग्रहणम्। तस्य स्वीकाररूपज्ञानविशेषस्य समवायविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्त्तृत्वकर्म्मत्वे। स तु अष्टविधः। वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते स ब्राह्मः १। यत्र यज्ञस्थायर्त्विजे कन्यादानं स दैवः २। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं स आर्षः ३। यत्र अनया सह धर्म्मं चरतां इति नियमं कृत्वा कन्यादानं स प्राजापत्यः ४। यत्र धनं गृहीत्वा कन्यादानं स आसुरः ५। यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः स गान्धर्व्वः ६। यत्र बलात्कारेण कन्याहरणं स राक्षसः ७। यत्र सुप्तायां मत्तायां प्रमत्तायां वा कन्यायां निर्জ্জने गमनं स पैशाचः ८। तस्य निर्णयः। सगोत्रामनवरवयस्कां समानप्रवरां पित्रपेक्षयोर्द्ध्वतनषष्ठां पुरुषाणां पुत्रकन्यासन्ततिपरम्परया प्रत्येकसप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमीपर्य्यन्तां पितृबन्ध्वपेक्षयोर्द्ध्वतनषष्ठां प्रत्येकापेक्षया सप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमी पर्य्यन्तां मातामहसमानोदकां मातामहापेक्षयोर्द्ध्वतनचतुर्थां पुरुषाणां पुत्रकन्यासन्ततिपरम्परया प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्तां मातृबन्ध्वपेक्षयोर्द्ध्वतनचतुर्थां प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्ताञ्च कन्यां परित्यज्य उद्वाहः कर्त्तव्यः॥ पितृबन्धुमातृबन्धुविरहेऽपि तयोर्योग्यतामवलम्ब्य सप्तमीपर्य्यन्तायाः पञ्चमीपर्य्यन्तायाञ्च कन्यायाः परिहारः। वर्জ্জनीयानां कन्यानां मध्येऽपि या त्रिगोत्रान्तरिता सा विवाह्या। अत्र सप्तमगत्वमप्रतियोगिपितृपितृबन्धुपञ्चमगत्वमप्रतियोगिमातामहमातृबन्धुगोत्रमादायैव त्रिगोत्रगत्वम्। सूत्रस्य सगोत्राविवाहे दोषाभावः। मातृसपत्नीभ्रातृकन्यां तद्दौहित्रीं अध्यापयितृकन्यां शिष्यकन्यां ब्रह्मदगुरुकन्याञ्च परित्यज्य विवाहः कर्त्तव्यः॥ अथ कन्यादानाधिकारिणः। आदौ पिता। तदभावे पितामहः। तदभावे भ्राता। तदभावे पितृज्ञातिः। तदभावे मातामहः। तदभावे मातुलः। तदभावे माता। तदभावे मातामहज्ञातिः। एतेषामप्यभावे कन्या स्वयं वरं कुर्य्यात्॥ अथ विवाहपूर्व्वकर्त्तव्यकर्म्म। अवश्यंभावि शुभाशुभयज्ञादिदोषशान्त्यर्थं होमो हिरण्यगोवस्त्रदानम्। ततो नान्दीश्राद्धम्। यज्ञसमये वरे उपस्थिते स्वस्तिवाचनादिकं विधाय वरणम्। ग्न्याचारादि। ततः कन्यादानं यथाशक्ति धनदानञ्च। ततः स्मृह्योक्तविधिनाग्निं संस्थाप्य कुशण्डिकां समाप्य पाणिग्रहणं सप्तपदीगमनञ्च कर्त्तव्यम्॥ ०॥ ज्येष्ठेऽक्षतविवाहे विवाहकर्त्ता कनिष्ठः परिवेदनदोषविशिष्टो भवति। ज्येष्ठः परिविन्नः। सा कन्या परिवेदनीया। कन्यादाता परिदायी। तत्पुरोहितः परिकर्त्ता। ते सर्व्वे पतिताः। किन्तु देशान्तरस्थज्ञीवैकाग्रवैमात्रेयवेश्यासक्तशूद्रतुल्यातिरोगिजड़मूकान्धबधिरकुब्जवामनकुण्ठातिवृद्धनैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुकधिसक्तन्दपसक्तधनवृद्धिप्रसक्तकामकारिदत्तकोन्मत्तचौरेषु ज्येष्ठेष्वनूढ़ेष्वपि कनिष्ठविवाहे न दोषः। एवं विज्ञातरूपानूढ़ा ज्येष्ठा कनिष्ठायाः सोदरायाः ऊढ़ायाः परिवेदनाय न भवति। इत्युद्वाहतत्त्वम्॥
उद्वाहनं, क्ली, (उत्+वह+णिच्+ल्युट्।) विवाहः। तत्पर्य्यायः। रणरणं २। इति त्रिकाण्डशेषः॥ हिसीत्यम्। दिवारत्नटीकायाम्। इति हेमचन्द्रः॥
उद्वाहपटी, स्त्री, (उद्वाहन+ङीप्।) वराटकः। इति हेमचन्द्रः॥ कड़ि इति भाषा॥
उद्वाहिकः, त्रि, (उद्वाहस्यायम्। उद्वाह+ठक्।) उद्वाहसम्बन्धी॥ (यथा, मनुः। ९। ९४।)
"नोद्वाहिकेषु मन्त्रेषु विधवावेदनं क्वचित्"॥)
उद्वाहितः, त्रि, (उत्+वह+णिच्+क्त।) उद्वर्हितः। उद्धृतः। विवाहितः। यथा। राजमार्त्तण्डे देवलः।
"बाले वृद्धे तथैवाल्पे कुरुते दैत्यमन्त्रिणि।
उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्"॥
इति ज्योतिषतत्त्वम्॥ (कलिकाले आगमोक्तान्यमार्गेण विवाहिता गर्हिता भवति। यथा,—
"उद्वाहितापि या नारी ज्ञानीयात् सातु गर्हिता"
इत्यागमसिद्धान्तः॥)
उद्वाहिनी, स्त्री, (उद्वहति उद्वरतीति। उत्+वह+णिनि+ङीप्।) रज्जुः। इति मेदिनी॥
उद्वाह्यः, त्रि, (उद्गूर्द्धं वाह्यर्यस्य।) ऊर्द्धवाह्यः। उद्वेगशब्दार्थे हेमचन्द्रेण लिखितः॥ (यथा, रघु। १।३। ("प्रांशुलभ्ये फले लोभादुद्वाह्यरिव वामनः"॥)
उद्वाह्यकं, क्ली, ऊर्द्धीकृतवाह्यः। उद्वेगशब्दार्थे मेदिनीकरेण लिखितम्॥
उद्विग्नः, त्रि, (उत्+विज+क्त। ओदितश्चेति तस्य नः। श्वीदित इति नेट्।) उद्वेगयुक्तः। यथा,—
"तैर्ब्रह्मरक्षःसंभूतक्षुभिन्नविषपन्नकैः।
निमग्नोद्विग्नसंक्रीडैः पद्मे दीनेव मेदिनी"॥
इति भट्टिकाव्ये ४। ४२॥ (तथा च भारते,—
"नोद्विग्नश्चरते धर्म्मं नोद्विग्नश्चरते क्रियाम्"॥)
उद्विवर्हणं, क्ली, (उत्+वि+वृह+ल्युट्।) उद्धारकरणम्। यथा,—
"कः अद्यधीतान्यतमस्तव प्रभो
रसाङ्कताया भुव उद्विवर्हणम्"।
इति श्रीभागते १२।४२॥ उद्विवर्हणं उद्धरणम्। इति तट्टीकायां श्रीधरस्वामी॥
उद्वृत्तः, त्रि, (उत्+वृत्+क्त। वृत्तादिरित्वात् उत्क्रान्तो वा।) उत्तोलितः। उत्क्षिप्तः। परिमुक्तोज्झितः। उद्दान्तः। इति हेमचन्द्रो मेदिनी च॥ दुर्व्वृत्तः॥ (यथा, महाभारते,—
'उद्वृत्तान् सततं लोकान् राजा धर्म्मेण शास्ति वै"॥)
उद्वेगं, क्ली, (उद्विज्यतेऽनेन इति। उत्+विज्+घञ्।) गुवाकफलम्। इत्यमरः॥
उद्वेगः, पुं, (उत्+विज्+भावे घञ्।) उद्वेजनम्। तत्पर्य्यायः। उद्भ्रमः २। इत्यमरः॥ चमत्कारः। इति भरतः॥ विरहजन्यदुःखम्। इति रसमञ्जरी॥ भयं। इति हेमचन्द्रः। उद्दालकफलम्। उद्वमनम्। इति मेदिनी॥
("त्र्यक्षस्त्वमेव हर पशुपतेरार्द्रनागाजिनेच्छाम्।
प्राप्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या"॥
इति मेघदूते पूर्व्वमेघे ३७ श्लोकः॥
"सद्यः वुसुञ्जे महाभुजः
सहसोद्वेगमियं व्रजेदिति"।
रघुः ८। ७।
"संक्षोभेक्ष्वप्युद्वेगो माधुर्य्यं परिकीर्त्तितम्"।
इति साहित्यदर्पणे॥ इय परिच्छेदः॥)
उद्वेगः, त्रि, (उद्गतो वेगो यस्मात्।) स्खलितः। शीघ्रगामी। ऊर्द्धवाहुः। इति हेमचन्द्रः॥
उद्वेजनं, क्ली, (उत्+विज+ल्युट्।) उद्वेगः॥
("परदाराभिमर्षेषु प्रवृत्तान्नृन् महीपतिः।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्"॥
इति मनुः॥ ८। ३५२॥)
उधः, [स्] क्ली, (वहति उनत्ति वा। वह प्रापणे उन्द क्लेदने वा+असुन्।) ऊधः। इत्यमरटीकायां रमानाथः॥ गवर पालान् इति भाषा॥
उध्रस ग उञ्छे। इति कविकल्पद्रुमः॥ (आदिं-परं-सकं-सेट्।) एतस्यादौ पञ्चमखरः। मध्ये केवलधकारस्याधो रेफः। अयादावुध्रस उञ्छ इत्ययमुदित्त्वादिकः पठ्यते तस्य ध्रासयतीति रूपं अपरं ध्रसाति। येषां ध्रसेः उत्पूर्व्वस्य गणदयेऽपि पठनं तेषां मते त्राविधावुध्रसाति निगदते त्रिचि कृतेऽप्युध्रासयत्यन्यतः। अत्र उत्पूर्व्वस्येति तु उत्कारः मतूपसर्गः। ग उध्रसाति ध्रस्यं दीनः। इति दुर्गादासः॥
उध्रस क उत्क्षेपे। उञ्छे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क उध्रासयति धूलिं वायुः। इति दुर्गादासः॥
उन्द, ई ध क्लेदे। इति कविकल्पद्रुमः॥ (धर्धां-परं-सक-सेट्।) क्त्रादिः। क्लेद आर्द्रभावः। ध उनत्ति वस्त्रं पयसा। ई उन्नः उक्तः। उन्दिदिवातः। इति दुर्गादासः॥
उन्दरः, पुं, उन्दुरः इति द्विरूपकोषः॥
उन्दुरः, पुं, (उन्द+उरः।) मूषिकः। इति भरतो द्विरूपकोषश्च॥ इदुर इति भाषा॥
उन्दूरः, पुं, (उन्द+ऊरः।) मन्तुविशेषः। इदुर इति भाषा। तत्पर्य्यायः। मूषिकः २ आखुः ३। क्षुद्र.

खेत्। गिरिका ४ वालमूषिका ५। नेड्टे इदुंर इति भाषा। इत्यमरः॥ मूषकः ६ मूषः ७ मूषीकः ८ उन्दुरः ९ खनकः १० वभ्रुः ११ दृषः १२ आखनिकः १३ दृशः १४ दीना १५ मुषीका १६। मूषा १७ मूषीका १८ मूषिका १९। इति शब्दरत्नावली॥ विलेशयः २० सुषिरः २१ इन्दूरः २२। इति जटाधरः॥ क्षुद्रस्य तस्य पर्य्यायः। चिक्काः २३ वेश्मनकुलः २४ चिक्का २५। इति च शब्दरत्नावली॥ हालाहला २६ अञ्जनिका २७। इति जटाधरः॥

उन्दूरः, पुं, (उन्द + वाऽऽलकात् ऊरः।) मूषिकः। इति हेमचन्द्रः॥

("उन्दूरश्चान्तरहितं तेन वातघ्नकल्कवत्"। इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

उन्दूरकर्णी, स्त्री, (उन्दूरोः मूषिकस्य कर्णाइव पर्णमस्याः। उन्दूरकर्ण + ङीष्।) आखुकर्णीलता। इति राजनिर्घण्टः॥

उन्नः, त्रि, (उन्द + क्त। नुदविदेति पक्षे नत्वम्।) स्निग्धः। दयापरः। इति हेमचन्द्रः॥

उन्नतः, त्रि, (उत् + नम + क्त।) वर्द्धितः। तत्पर्य्यायः। उच्चः २ प्रांशुः ३ उदयः ४ लक्षितः ५ उत्तुङ्गः ६। इत्यमरः॥ उच्चैः ७। इति शब्दरत्नावली॥ तुङ्गः ८। इति जटाधरः॥ (यथा, रघुः। १।१५। "स्थितः सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना"॥ स्त्री, दिनपरिमाणज्ञानसाधनं उपायः। यथा सिद्धान्तशिरोमणौ। "दिवसस्य यदूनं यच्च ग्रासं तयोर्यदन्तरं तदुन्नतसंज्ञं ज्ञेयम्"। (पुं, चाक्षुषमन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ७६।५४।

"सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः"॥)

उन्नतनाभिः, त्रि, (उन्नतो नाभिः यस्य।) उच्चनाभियुक्तः। तत्पर्य्यायः। तुन्दिः २। इति हलायुधः॥

उन्नतानतं, त्रि, (उन्नतञ्च तत् आनतञ्चेति।) उच्चनीचस्थानादि। तत्पर्य्यायः। वन्धुरम् २। इत्यमरः॥

उन्नतिः, स्त्री, (उत् + नम + क्तिन्।) गरुड़भार्य्या। सम्पद्धिः। ("वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः"। इति साहित्यदर्पणे॥ इयं परिच्छेदे।) उदयः। इति हेमचन्द्रः॥ (यथा, सिद्धान्तशिरोमणौ।

"मासान्तपादे प्रथमेऽथवेन्दोः
ग्रहोन्नतिर्यद्दिवसेऽवगम्या।
तदोदयस्ते निशि वा प्रसाध्यः
ग्रभुर्विधोः खोदितनाड़िकाद्यैः"॥)

उन्नतीशः, पुं, (उन्नत्याख्यदाख्यया प्रसिद्धाया गरुड़पत्न्याः ईशः स्वामी।) गरुड़पक्षी। इति त्रिकाण्डशेषः॥

उन्नमितः, त्रि, (उत् + नम् + णिच् + क्त।) उत्तोलितः। ऊर्द्धीकृतः। इति श्रीधरस्वामी॥

("अथ प्रयत्नोन्नमितानमत्फणै-
र्दृते कथञ्चित् यमिनां गणैरधः"॥

इति माघे। १। १४॥)

उन्नयः, पुं, (उन्नयनम्। उत् + नी + क्वचिदपवाद विषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् क।) ऊर्द्धनयनम्। इत्यमरः॥

उन्नयनं, क्ली, (उत् + नी + ल्युट्।) वितर्कः। इति हेमचन्द्रः॥ ऊर्द्धप्रापणम्। उत्तोलनम्। तोलन उठान इत्यादि भाषा॥

(यथा, कात्यायने। २२।१०।५॥

"तेष्वेवोन्नयनमभ्यभि सोमानुन्नयन्तीति श्रुतेः,"। उदूर्द्धे नयनं यस्येति वाक्ये वाच्यलिङ्गः"॥)

उन्नायः पुं, (उन्नयनं इति। उत् + नी + घञ्।) उन्नयनम्। इत्यमरः॥ (यथा भट्टिः। ७। ३७।

"उन्नायानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम्"॥)

उन्नाहः, क्ली, (उत् + नह + घञ्।) काञ्चिकम्। इति हेमचन्द्रः॥

उन्निद्रः, त्रि, (उद्गता निद्रा स्वप्नो दुःखादिकं वा यस्मात्।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः॥

("उन्निद्रपुष्पचलचम्पकपुष्पभासाः"।
इति माघः। प्रबुद्धः। शयनादुत्थितः।
"तासुन्निद्रामवनिशयनां सौधवातायनस्थः"।
इति मेघदूते। ८८। तथा, शाकुन्तले षष्ठाङ्के।
"शय्याप्रान्तविवर्त्तनैर्विगमयत्यु न्निद्रयेव क्षपाः"॥)

उन्भ प श्र पूर्त्तौ। (तुदां + परं + सकं + सेट्।) रुधादिः। प श्र उम्भति कुम्भं जलेन लोकः। उम्भामास। इति दुर्गादासः॥

उन्मत्तः, त्रि, (उत् + मद् + क्त।) उन्मादयुक्तः। वायुजनितचित्तविभ्रमविशिष्टः। पागल इति भाषा। तत्पर्य्यायः। उन्मादवान् २। इत्यमरः॥ तस्यौषधम्, यथा,—गारुड़े १९९ अध्यायः॥ *॥

"कूर्म्ममत्स्याखुमहिषगोगृहगालाश्च वानराः।
विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः॥
हंस एषाश्च विष्मूत्रं मांसं वा रोमशोणितम्।
धूमं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये॥
एतान्यौषधजातानि धूपितानि महेश्वर।
निहन्ति ज्वरमुन्मादं दत्तमिन्द्राशनिर्यथा"॥
("तमात्मनो हतमुपघ्नन्तो देवादयः कुर्व्वन्त्युन्मत्तम्"। इति निदानस्थाने सप्तमेऽध्याये।
"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य च बुद्धिमान्।
वर्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च॥
सर्पिष्यानादि तस्येह मृदुभैषज्यमाचरेत्"॥
इति च चिकित्सास्थाने १४ अध्याये चरकेणोक्तम्॥
अन्यद्विवरणमस्योन्मादशब्दे ज्ञेयम्॥)
तद्वाक्यप्रामाण्यं यथा,—मलमासतत्त्वे॥
"उन्मत्तानाञ्च या गाथा शिशूनां चेष्टितं च यत्।
स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः॥
आदौ गच्छति देवेषु पश्चात् गच्छति मानुषान्।
नादेशिता वाग्वदति सत्या ज्ञेया सरस्वती"॥

उन्मत्तः, पुं, (उन्मत्तयति। उन्मत्त + तत्करोतीति णिच् + पचाद्यच्।) धुस्तूरः। यथा,—
("श्वेतोन्मत्तस्योत्तरदिङ्मूलसिद्धस्तु पायसः।
गुड़ाख्यसंयुतो हन्ति सर्व्वोन्मादांश्च दोषजान्"॥
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे॥)
मुचुकुन्दवृक्षः। इति मेदिनी॥

उन्मदः, त्रि, (उद्गतो मदो यस्य।) उन्मादयुक्तः। उद्गतमदः। तत्पर्य्यायः। उन्मदिष्णुः २। इत्यमरः॥ ("उदीरयामासुरिवोन्मदानाम्"॥ इति रघुः। २। ६। तथा, माघे ६।२६॥

"मधुकराङ्गनया मुञ्जरुन्मद-
ध्वनिभृता निभृतान्तरमुज्जगे"॥)

उन्मदिष्णुः, त्रि, (उत् + मद् + इष्णुच्।) उन्मदः। उन्मादशीलः। इत्यमरः॥

उन्मनाः, [स्] त्रि, (उद्गतं उत्कण्ठितं मनो यस्य।) उत्कण्ठितचित्तः। तत्पर्य्यायः। उत्सुकः २। इत्यमरः॥

("उन्मनाः प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि बभूव राघवः"।
इति रघुः। ११। २२। "पयोधरेणोरसि काचिदुन्मनाः"॥ इति किराते। ८। १६॥)

उन्मथ्यः, पुं, (उत् + मथि + घञ्।) मारणम्। वधः। इति हेमचन्द्रः॥

उन्माथः, पुं, (उन्मथ्यतेऽनेनेति। उत् + मथ + घञ्। मारणादिपक्षे भावे घञ्।) कूटयन्त्रम्। मृगबधोपयुक्तयन्त्रम्। आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते सः। इत्यमरः॥ मारणम्। घातकः। इति मेदिनी॥

(यथा, प्रबोधचन्द्रोदये।

"प्रभो महाप्राणानां क इव भुवनोन्माथविधिषु"॥)

उन्मादः, पुं, (उत् + मद् + घञ्। (महादेवः। यथा महाभारते। महादेवसहस्रनामकथने १३ १७। ६९॥ "उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः"।) वातिकरोगविशेषः। तत्पर्य्यायः। चित्तविभ्रमः २। इत्यमरः॥ मतिभंशः ३ उन्मनाः ४। इति राजनिर्घण्टः॥ (चित्तविप्लवः ५२।२३०। इति हेमचन्द्रः॥) मानसरोगविशेषः। तस्यौषधं यथा,—

"वचा चिरुटकश्चैव करञ्जं देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम्॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनम् तथा॥
अपस्मारवियोन्मादग्रहोन्मत्तज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्"॥
इति गारुड़े १९९ अध्यायः॥ *॥ अथ उन्मादाधिकारः॥ तत्र उन्मादस्य निरुक्तिमाह।

"मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः"॥
अयमर्थः। यस्माद्धेतोरुद्धताः प्रबुद्धा दोषाः उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्यस्मिन्। अतोऽयमुन्माद इति कीर्त्तितः। सः उन्मादः मानसो व्याधिः मनोवैकृत्यकरत्वात्॥ *॥ तस्यैवावस्थाभेदेन नामान्तरमाह। स चाप्रबुद्धस्तरयो मदसंज्ञां बिभर्त्ति च। स उन्मादस्तरयो नवीनः॥ *॥ उन्मादस्य विप्रकृष्टनिदानमाह।

"विरुद्धदुष्टाशुचिभोजनानि
प्रधर्षणं देवगुरुद्विजानाम्।
उन्मादहेतुर्भयहर्षपूर्व्वो
मनोऽभिघातो विषमाश्च चेष्टाः॥"

दुष्टं धत्तूरबीजादिरहितम्। अशुचि रजस्वलादि-

स्थूलम्। प्रधर्षणमभिभवः। विषमाश्च चेष्टाः बलवद्विग्रहादयः॥*॥ सन्निकृष्टं निदानमाह।

"एकैकशः सर्व्वशश्च दोषैरत्यर्थमुक्लिष्टैः।
मानसेन च दुःखेन स पञ्चविध उच्यते॥
विषाद्भवति षष्ठश्च यथालं तत्र भक्षणम्"॥*॥

तस्य सम्प्राप्तिमाह।

"तैरल्पसत्त्वस्य मलाः प्रदुष्टाः
बुद्धेर्निवासं हृदयं प्रदूष्य।
स्रोतांस्यधिष्ठाय मनोवहानि
प्रमोहयन्त्याशु नरस्य चेतः"॥

अल्पसत्त्वस्य अल्पसत्त्वगुणस्य। मला वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनाश्रयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि दश। एतानि विशेषतो बोद्धव्यानि। यतश्चरकेण सकलशरीरस्रोतांस्येव मनोऽधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विक्लवं कुर्व्वन्ति॥*॥

उन्मादस्य सामान्यं रूपमाह।

"धीविभ्रमः सत्त्वपरिप्लवश्च
पर्य्याकुला दृष्टिरधीरता च।
अबद्धवाक्त्वं हृदयश्च शून्यं
सामान्यमुन्मादगदस्य लिङ्गम्"॥

धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्त्वपरिप्लवः सत्त्वं मनस्तस्य चाचाल्यम्। अबद्धवाक्त्वं असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्॥*॥

वातिकोन्मादस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।

रूक्षाल्पशीताल्पविरेकधातु-
क्षयोपवासैरनिलोऽतिवृद्धः।
चिन्तातिदुःखं हृदयं प्रदूष्य
बुद्धिं स्मृतिं वाप्युपहन्ति शीघ्रम्"॥

प्रदूष्य प्रकर्षेण दूषयित्वा॥*॥

तस्यैव रूपमाह।

"अस्थानहास्यस्मृतिनृत्यगीत-
वाग्रश्चविक्षेपणरोदनानि।
पारुष्यकार्श्यारुणवर्णताश्च
जीर्णे बलञ्चानिलजस्य रूपम्"॥

अस्थाने अनवसरे। हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः॥*॥

पैत्तिकस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।

"अजीर्णकट्वम्लविदाह्यशीतै-
र्भोज्यैश्चितं पित्तमुदीर्णवेगम्।
उन्मादमत्युग्रमनात्मकस्य
हृदि स्थितं पूर्ब्ववदाशु कुर्य्यात्"॥

हृदि स्थितं पित्तं चितं सञ्चितम्। पुनः अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगं सत् उन्मादं कुर्य्यात् पूर्ब्ववत् हृदयं प्रदूष्य इत्यर्थः॥*॥

तस्य रूपमाह।

"अमर्षसंरम्भविनम्रभावाः
सन्तर्जनाभिद्रवणौष्ण्यघोषाः।
प्रच्छायशीतान्नजलाभिलाषाः
पीतावभासः पित्तकृतस्य लिङ्गम्"॥

अमर्षोऽसहिष्णुता। संरम्भः आरभटी आडम्बरः इति यावत्। सन्तर्जनं परत्रासनम्। अभिद्रवणं पलायनम्। औष्ण्यं गात्रे। घोषो दाहविशेषः। प्रच्छाय इत्यादि छायायां शीतयोरन्नजलयोरभिलाषः॥*॥

श्लैष्मिकस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।

"सम्पूरणैर्मन्दविचेष्टितस्य
सोष्मा कफो मर्म्मणि संप्रदुष्टः।
बुद्धिं स्मृतिं वाप्युपहन्ति चित्तं
प्रमोहयन् संजनयेद्विकारम्"॥

संपूरणैर्भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य। सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहायमपेक्षते व्याधिस्वभावात्। मर्म्मणि अत्र मर्म्मशब्देन हृदयमुच्यते। विकारमुन्मादरूपम्॥*॥

तस्य रूपमाह।

"वाक्चेष्टितं मन्दमरोचकत्व
नारीविविक्तप्रियता च निद्रा।
छर्दिश्च लाला च बलञ्च भुक्ते
नखादिपूतीकत्वञ्च कफात्मके स्यात्"॥

वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते सति बलं व्याधेः॥*॥

सान्निपातिकस्य निदानपूर्ब्बकं लक्षणमाह।

"यः सन्निपातप्रभवोऽतिघोरः
सर्व्वैः समस्तैः स तु हेतुभिः स्यात्।
सर्व्वाणि रूपाणि बिभर्त्ति तादृ-
ग्विरुद्धभैषज्यविधिर्व्विवर्ज्यः"॥

स सान्निपातिक उन्मादः। सन्निपातग्रहणेनैव सर्व्वात्मकत्वं लब्धम्। पुनः सर्व्वैरिति यत्कृतं तद्रजस्तमःप्रापणार्थम्। तेन रजस्तमोभिर्मिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्म्मनोदोषैर्मिलिताः। समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्व्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्व्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिप्रभावात् सर्व्वैर्हेतुभिर्म्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः। विरुद्धभैषज्यविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्य्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि तच्चात्रायौगिकम्। अतएव विवर्ज्यः न चिकित्स्य इत्यर्थः॥*॥

मनोदुःखजस्य विप्रकृष्टं निदानमाह।

"चौरैर्नरेन्द्रप्रकृतैररिभिस्तथान्यै-
र्विन्यासितस्य धनबान्धवसंक्षयाद्वा।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत घोरतरो मनसो विकारः"॥

अन्यैर्हिंस्रादिभिः। गाढमतिशयेन। क्षते अभिहते। प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः॥*॥

तस्य रूपमाह।

"चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चातिमूढः"।
चित्रमाश्चर्य्यं। मनोऽनुगतं गोप्यमपि। विसंज्ञो विरुद्धज्ञानः। अतीवमूढः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः॥*॥

विषजस्य रूपमाह।

"रक्तोत्तरो हृतबलेन्द्रियभाः सुदीनः
श्यावाननो विलपते तु भवेत् परासुः"।
परासुः मृतः॥*॥

अरिष्टमाह।

"अवाक्शुखस्त्रूनमुखो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति"॥*॥

अथ देवादिकृतस्योन्मादस्य सामान्यं लक्षणमाह।

"अमर्त्यवाग्विक्रमवीर्य्यचेष्टो
ज्ञानादिविज्ञानबलादियुक्तः।
प्रकोपकालो नियतश्च यस्य
देवादिजन्मा स मनोविकारः"।

अमर्त्यवाग्विक्रमवीर्य्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यत्र सः। विक्रमः पराक्रमः। वीर्य्यं शौर्य्यम्। ज्ञानादिविज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधा-विचारणा-स्मृत्यादयो गृह्यन्ते। विज्ञानं शिल्पादिविषयकं ज्ञानम्। चेष्टा पाटवम्। आदिपदेनाभिमानादि गृह्यते। नियतः वक्ष्यमाणतिथ्यादिभिः। मनोविकार उन्मादः॥*॥

तत्र देवाविष्टस्य लक्षणमाह।

"सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो
निस्तन्द्रोऽवितथसंकृतप्रभाषी।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः"॥

अतिदिव्यमाल्यगन्धः अतिशयेन दिव्यमाल्यस्येव गन्धो यस्य सः। निस्तन्द्रः निरालस्यः। अवितथं सत्यम्। ब्रह्मण्यः ब्राह्मणभक्तः॥*॥

दैत्याविष्टमाह।

"संक्लेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः।
सन्तुष्टो भवति न चान्नपानजातै-
र्दुष्टात्मा भवति स दैत्यजुष्टः"॥

विमार्गदृष्टिः कुमार्गरतः। दुष्टात्मा दुष्टस्वभावः।

गन्धर्व्वाविष्टमाह।

"दुष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्यः"॥

दुष्टात्मा दुष्टजीवात्मा। पुलिनं तोयोत्थितं तटम्; वनान्तरं वनमध्यम्। तयोः सेवी। स्वाचारः प्रनिन्दिताचारः। प्रियाणि परि समन्ततो भावेन गीतगन्धमाल्यानि यस्य स तथा। चारु चाल्पशब्दमिति हसनक्रियाया विशेषणम्॥*॥

यक्षाविष्टमाह।

"ताम्राक्षः प्रथितनुरक्तवस्त्रधारी
गम्भीरोद्भुतगतिरल्पवाक् सहिष्णुः।
तेजस्वी वदति च किं ददामि कस्मै
येा यक्षग्रहपरिपीडितो मनुष्यः"॥*॥

पित्राविष्टमाह ।
"प्रेतानां स दिशति संस्तरेषु पिण्डान्
ग्लानात्मा जलमपि वापसव्यवस्त्रः ।
मांसेक्षुतिलगुडपायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिजुष्टः" ॥
प्रेतानां मृतानां पितृणाम् । दिशति ददाति । अपसव्यवस्त्रः दक्षिणस्कन्धदृतोत्तरीयः ॥ * ॥

नागाविष्टमाह ।
"यस्तूर्ध्वां प्रसरति सर्पवत् कदाचित्
स्कन्धौ मुहुरपि जिह्मयावलेढि ।
क्रोधालुर्दृतमधुदुग्धपायसेषु-
र्विज्ञेयः स खलु भुजङ्गमेन जुष्टः" ।
प्रसरति सर्पवत् उरसा चलति । स्कन्धौ ओष्ठप्रान्तौ ॥ * ॥

राक्षसाविष्टमाह ।
"मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।
क्रोधालुर्विगुलबलो निशाविचारी
क्षौद्रविट् भवति स राक्षसैर्गृहीतः" ॥
अतिनिष्ठुरोऽतिनिर्दयः ॥ * ॥

ब्रह्मराक्षसाविष्टमाह ।
"देवद्विप्रगुरुद्वेषी वेदवेदाङ्गविच्छुचिः ।
आत्मपीडाकरोऽहिंसो ब्रह्मराक्षससेवितः" ॥
अहिंसः अहिंसाशीलः ॥ * ॥

पिशाचाविष्टमाह ।
"उदस्रः क्षुद्भयरुषो विरुद्धमाषी
दुर्गन्धो भृशमशुचिस्त्वघातिलोभः ।
वक्राक्षी विजनवनान्तरोपसेवी
याचेरन् भ्रमति रुदन् पिशाचजुष्टः" ॥
उदस्रः नग्नः । दिगम्बर इति विदेहवचनात् । क्षुद्भयो निर्मांसः । परुषो रूक्षः । अतिलोभः सर्वस्मिन् अन्नपाने लोलुपः । याचेरन् विरुद्धमाचेरन् । ग्रहा हिंसा क्रीड़ा पूजार्थं भक्षन्ति । अतएवोक्तम् ।
"अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाक्षतम् ।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा" ॥ *॥

तत्र हिंसार्थं गृहीतस्य लक्षणमाह ।
"क्षुल्लाप्तो हृतमटनः सवेगवामी
निद्रालुः प्रतति च कम्पते च योऽति ।
यस्माद्विद्विरदनगादिविच्युतः स्यात्
सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे ।"
यस्माद्गौत्यादि यः पर्व्वतादिपतितः सन् यद्वैर्म्यक्षतइत्यर्थः । आदिशब्देन भित्तिप्रासादादेर्यो गृह्यन्ते । त्रयोदशेऽब्दे सर्व्व एव देवादिगृहीतोऽसाध्यः ॥ * ॥

देवादीनामावेशसमयमाह ।
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यपि ।
पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः ।
रक्षःपिशाचा रात्रौ च चतुर्दश्यां विशन्ति हि" ।
कृष्णपक्षे अमायाम् । प्रायशःपदादन्यत्रापि । तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्र तिथौ बलिदानार्थञ्च ॥ * ॥ ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह ।
"दर्पणादीन् यथा छाया प्रीतेराणं प्राणिनो यथा ।
खमणिं भास्करार्चिश्च यथा देहञ्च देहभृक् ॥
विशन्ति न च दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम्" ।
दर्पणादीत्यादिशब्देनान्यदपि निर्म्मलद्रव्यद्वयं गृह्यते । छाया प्रतिबिम्बम् । खमणिं सूर्य्यमणिम् । देहभृक् जीवात्मा ॥ * ॥ *॥

अथोन्मादस्य चिकित्सा ।
"वातिके स्नेहपानं प्राक् विरेकः पित्तसम्भवे ।
कफजे वमनं कार्य्यं परो वस्त्यादिकक्रमः
यश्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् ।
उन्मादे तच्च कर्त्तव्यं सामान्याद्धोबहूच्ययोः ॥
जलादिद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा ।
रक्षेदुन्मादिनं यत्नात् सद्यः प्राणहरा हि ते" ॥
ते जलादयः ॥ * ॥
'ब्राह्मीकुष्माण्डीफलषड्ग्रन्थाः शङ्खपुष्पिकाखरसाः ।
दृष्टा उन्मादहृतः पृथगेते कुष्ठमधुभिश्चाः" ॥
अत्र ब्राह्मीति पदं ब्राह्मीखरसपरम् । कुष्माण्डीफलं तद्बीजपरम् । षड्ग्रन्थे तु यथाश्रुतार्थमेव । तेनायमर्थः । वरमीकरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः । इत्येको योगः ॥ कोहलके बीजकचूर्णमासा २ कूटकचूर्णमासा २ मधुना संलीयावलेह्यम् । द्वितीयो योगः । महाभरीवचकचूर्णमासा २ कूटकचूर्णमासा २ मधुनावलेह्यम् । तृतीयो योगः ॥ शङ्खपुष्पीखरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः । चतुर्थयोगः ॥ * ॥
"सिद्धार्थको हिङ्गु वचाकरञ्जौ देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम् ॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम् ।
वस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम् ॥
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ।
अपस्मारविषोन्मादक्षत्यालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च मुच्यते ।
सर्पिरेतेन संसिद्धं सगोमूत्रं तथार्थकृत्" ।
सिद्धार्थकादि ॥ * ॥
"ब्रूयादिष्टविनाशञ्च दर्शयेदद्भुतानि च ।
वह्निं सर्षपतैलाक्तं रक्षेदुत्तानमातपे ॥
कपिकच्छाथवा तैलैर्लोहतैलजलैः स्पृशेत् ।
कशाभिस्ताडयेत्तं वा सुवर्णं विजने गृहे ।
सर्षपोद्भवदत्तेन दंशैः सिंहैर्गजैश्च तं ।
त्रासयेच्चलद्धस्तेन शुभ्रभिक्षाक्षरैस्तथा ॥
अथवा राजपुरुषा वह्निर्नीत्वा सुसंयतम् ।
त्रासयेयुर्बध्नीरेनं तर्ज्जयन्तो नृपाज्ञया ॥
देहदुःखभयेभ्यो हि यतः प्राणभयं महत् ।
ततस्तस्य भ्रमं याति सर्व्वतो विप्लुतं मनः ॥
इष्टद्रव्यविनाशेन मनो यस्याभिहन्यते ।
तस्य तत्सदृशप्राप्या सान्त्वाश्वासैः भ्रमं नयेत् ॥*॥
व्युषणं हिङ्गु लवणं वचा कटुकरोहिणी ।
शिरीषस्य करञ्जस्य बीजं गौराश्च सर्षपाः ।
गोमूत्रपिष्टैरेभिस्तु वर्त्तिर्नेत्राञ्जने हिता ।
हन्युन्मादमपस्मारं तथा चातुर्थकं ज्वरम्" ।
व्युषणाद्यञ्जनम् ॥ * ॥
"कुष्ठाश्वगन्धे लवणाजमोदे
द्वे जीरके त्रीणि कटूनि पाठा ।
मङ्कुल्यपुष्पी च समान्यमूनि
सर्व्वैः समानाश्च वचां विचूर्ण्य ॥
ब्राह्मीरसेनाखिलमेव मार्थं
वारत्रयं भुक्तमिदं हि चूर्णम् ।
अक्षप्रमाणं मधुना हृतेन
लिह्यान्नरः सप्त दिनानि यावत् ॥
सारस्वतमिदं चूर्णं ब्रह्मणा निर्म्मितं पुरा ।
हिताय सर्व्वलोकानां दुर्म्मेधानां विचेतसाम् ॥
एतस्याभ्यासतः पुंसां बुद्धिर्म्मेधा धृतिः स्मृतिः ।
सम्यक्तिः कविताशक्तिः प्रवर्द्धतोत्तरोत्तरम्" ॥
मङ्कुल्यपुष्पी शङ्खपुष्पी इति लोके । सारस्वतं चूर्णम् ॥ *॥
"विश्वाजमोदरजनीद्वयसैन्धवोग्रा-
वच्याकुष्ठमगधोद्भवजीरकाणाम् ।
चूर्णं प्रभातसमये लिहतः ससर्पि-
र्वाग्देवता निवसति स्वयमेव वक्त्रे" ।
विश्वाद्यं चूर्णम् ॥ * ॥
"क्वाथे विचूर्णिते क्षिप्ता तत्क्षोड्रगुणं जलम् ।
पादशेषं प्रकर्त्तव्यमेष क्वाथविधिः स्मृतः ॥
दशमूली तथा रास्ना वातारिश्लिष्टता बला ।
मूर्व्वा शतावरी चेति क्वाथ्यैस्तु कुड़वैः पृथक् ॥
हृते क्वाथे हृतं प्रस्थद्वयं महिषजं पचेत् ।
कल्कीकृतैर्वक्ष्यमाणद्रव्यैः सम्यक् पुनः पचेत् ॥
विश्वाला त्रिफला कौन्ती देवदार्व्वेलवालुकम् ।
स्थिरानन्ता रजन्यौ द्वे प्रियङ्गुः सारिवाद्वयम् ॥
नीलोत्पलैलामञ्जिष्ठादन्तीदाड़िमकेशरम् ।
विडङ्गं ह्रीबेरी च कुष्ठं चन्दनपद्मके ।
तालीसपत्रं हृतितो मालतीकुसुमं नवम् ।
अष्टाविंशतिभिः कल्कैरेतैः कर्षमितैः पृथक् ॥
चतुर्गुणं जलं दत्त्वा पिष्टैस्तद्विपचेद्धृतम् ।
महाचैतसनामेदं सर्व्वचेतोविकारहृत् ॥
अपस्मारे महोन्मादे मन्देऽग्नौ ज्वरकासयोः ।
वातरक्ते प्रतिश्याये शोषे कार्श्ये तृतीयके ।
मूत्रकृच्छ्रे कटीशूले विसर्पाभिहतेषु च ।
पाण्डुरामये तथा कण्डूं विषे मेहे गरेऽपि च ।
देवादिहृतचित्तानां गद्गदानामचेतसाम् ।
ग्रस्तं स्त्रीणाञ्च बन्ध्यानां धन्यमायुर्बलप्रदम् ।
अलक्ष्मीपापरक्षोघ्नं सर्व्वग्रहनिवारणम् ।
हन्ति भ्रमं मदं मूर्च्छां मेधास्मृतिमतिप्रदम्" ॥
अग्निपत्नी अग्निवतीति लोके अगिया इति च ।
महाचैतसं घृतम् ॥ * ॥

अथ देवाद्याविष्टानां चिकित्सा ।
"पूजाबल्युपहारेर्हिहोममन्त्राञ्जनादिभिः ।
जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक् ॥
कृष्णामरिचसिन्धूत्थमधुगोरोचनाञ्जनम् ।
अञ्जनं सर्व्वदेवादिकृतोन्मादहरं परम्" ॥
कृष्णाद्यञ्जनम् ॥ * ॥
"ऋक्षशम्बुकजोमानि ग्राह्यकी जसुनं तथा ।
हिङ्गु मूत्रञ्च वस्तस्य धूपमस्य प्रयोजयेत् ॥

एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः"।
ऋक्षलोमादिधूपः ॥ * ॥
"कल्याणकञ्च युञ्जीत महदा चेतसं घृतम्।
तैलं नारायणं चाथ महानारायणं तथा ॥
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्।
रोगिणं भिषजं यक्षे क्रुद्धा हन्युर्मुहूर्त्तजः" ॥
इत्युन्मादाधिकारः। इति भावप्रकाशः॥

(आत्रेय उवाच ॥
"अयं मानसको व्याधिरुन्माद इति कीर्त्तितः।
प्रमत्ता ऊर्द्धगा दोषा ऊर्द्धं गच्छन्त्यमार्गताम् ॥
उन्मादो नाम दोषोऽयं कश्मलाधो भिषग्वरैः।
सोऽपि पृथग्विधैर्दोषैर्द्वन्द्वजोऽन्यः प्रकीर्त्तितः।
यथान्यः सन्निपातेन विषाद्भवति चापरः ॥
अशुचिविषयशून्यागारकेऽरण्यमध्ये
समयगहनवीथीदेवतागारके च।
अथ कथमपि भीत्या शङ्कया खिन्नचेतः-
क्षुभितमनसमार्गत्वान्यमुन्मार्गयेति ॥
चिन्ताव्यथासुभयहर्षविमर्षशोकात्
देवातिथिद्विजगरेन्द्रगुरोर्विमानात्।
प्रेमाधिकाद्युवजनादपि विप्रयोगात्
उन्मादहेतु च ऋषां कथितं वरिष्ठैः ॥
तत्र गायति वा रौति विरूपं पठते यदा।
लोलयेच्छर्दते वापि कम्पते हसते तथा ॥
धावते हनने चैव तथा जिह्वा विनश्यति।
नरो वा भ्रमतेऽत्यर्थं प्रशस्येद्धनमथातुरः ॥
तस्यापस्मारकं कर्म्म कर्त्तव्यं भिषजांवरैः।
विशेषेण भूतविद्यां मध्ये वक्ष्यामि चायतः" ॥
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे द्वयीय-
स्थाने उन्मादनिदाननामा विंशोऽध्यायः ॥
अस्य सम्प्राप्तिसहित-निदानलक्षण-चिकित्सिता-
न्याह वाभटः ॥
"उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः।
उन्मादोनाम मनसो दोषैरुन्मार्गगैर्मदः ॥
शारीरमानसैर्दुःखैरहितादच पानतः।
विद्वतासात्म्यसमलादिवमादुपयोगतः ॥
विषमस्याल्पसत्त्वस्य व्याधिवेगसमुद्भवात्।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात् ॥
आधिभिश्चित्तविभ्रंशाद्विषेशोपविषेण च।
एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥
धियो विधाय कालुष्यं हत्वा मार्गान् मनोवहान्
उन्मादं कुर्व्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः।
भ्रमत्यचिन्तितारम्भम्"—

वातादिभेदेन लक्षणं यथा ॥

"तत्र वातात् क्षशाङ्गता ॥
अस्थाने रोदनाक्रोशहसितस्मितनर्त्तनम्।
गीतवादित्रवागङ्गविक्षेपास्फोटनानि च ॥
अक्षाक्षा वेणुवीणादिशब्दानुकरणं मुहुः।
व्याहतं वेगागमोऽजस्रमटनं बद्धभाषिता ॥
अलङ्कारोऽलङ्कारैरयानैर्गमनोद्यमः।
अस्थिरभ्यवहार्य्येषु तल्लाभे वावमानता ॥
उत्पिण्डितास्याच्छित्वं जीर्णे चान्ने गदोद्भवः ॥ १ ॥
पित्तात् सन्तर्ज्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः।
प्रीतच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता।
असत्यज्वलनज्वालातारकादीपदर्शनम् ॥ २ ॥
कफादरोचकश्छर्द्दिरल्पेहाहारवाञ्छता।
स्त्रीकामता रहः प्रीतिर्लालासिङ्घाणकस्रुतिः ॥
वैभत्स्यं शौचविद्वेषो निद्राश्चयथुरागने।
उन्मादो बलवान् रात्रौ शुक्लमासे च जायते ॥ ३ ॥
सर्व्वायतनसंस्थानसन्निपाते तदात्मकम्।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्ज्जयेत् ॥ ४ ॥
धनकान्तादिनाशेन दुःसहेनाभिषङ्गवान्।
पाण्डुर्दीनो मुञ्चमुञ्चन् हाहेति परिदेवते ॥
रोदित्यकस्मात् म्रियते तद्गुणान् वञ्च मन्यते।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ ५ ॥
विषेण श्यामवदनो नष्टच्छायाबलेन्द्रियः।
वेगान्तरेऽपि संभ्रान्तो रक्षाच्चस्तं विवर्जयेत्" ॥ ६ ॥

चिकित्सा यथा ॥

"अथानिलज उन्मादे स्नेहपानं प्रयोजयेत्।
पूर्व्वमाहृतमार्गे तु सस्नेहं मृदुशोधनम् ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम्।
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्थमप्यनुवृत्तौ तु तीक्ष्णं लावणमञ्जनम्।
हर्षणाश्वासनोत्त्रासभयताडनतर्ज्जनम् ॥
अभ्यङ्गोदर्त्तनालेपधूमान् पानञ्च सर्पिषः।
युञ्जीतानि हि शुद्धस्य नयन्ति प्रकृतिं मनः" ॥ * ॥
"द्वौ प्रस्थौ खरसाद्ब्राह्म्या घृतप्रस्थञ्च साधितम्।
व्योषश्यामाचित्रकदन्तीशङ्खपुष्पीत्रपद्रुभैः।
ससप्तलाक्रिमिहरैः कल्कितैरक्षसम्मितैः ॥
पलद्वया प्रयुञ्जीत परं माषाचतुष्पलम्।
उन्मादकुष्ठापस्मारहरं बन्ध्यासुतप्रदम् ॥
वाक्स्मृतिमेधाकृद्वयन्यं ब्राह्मीघृतं स्मृतम्" ॥

इति ब्राह्मीघृतम् ॥ * ॥

"वरा विश्वाला भद्रैला देवदार्व्वेलवालुकैः।
द्विसारिवा द्विरजनी द्विस्थिरा पलिनी नतैः ॥
दृतीकुष्ठमञ्जिष्ठानागकेशरदाड़िमैः।
वेल्लतार्क्षीग्रपत्रैलामालतीसुकुलोत्पलैः ॥
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत्।
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ॥
पाण्डुकण्डुविषे शोफे मोहे मेहे गरे ज्वरे।
अरेतस्यप्रजसि वा दैवोपहतचेतसि ॥
अमेधसि खलद्राचि स्मृतिकामेऽल्पपावके।
वल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च" ॥

इयि कल्याणघृतम् ॥ * ॥

"यभो द्विसारिवादीनि जले पक्त्वैकविंशतिम्।
रसे तस्मिन् पचेत्सर्पिर्यष्टिक्षीरं चतुर्गुणम् ॥
वीरादिमेदाकाकोलीकर्षिकच्छविषाग्निभिः।
क्षीरपर्णीयुतैरेतन्महाकल्याणकं परम् ॥
दंष्ट्रणं सन्निपातघ्नं पूर्व्वमादधिकं गुणैः" ॥

इति महाकल्याणं घृतम् ॥ * ॥

"जटिला पूतना केशी चारटी मर्कटी वचा ॥
चायमाणा जया वीरा चोरकः कटुरोहिणी।
कायस्था शूकरीच्छत्रा अतिच्छत्रा पलङ्कषा ॥
महाशुरुषदन्ता च वनस्था नाकुलीद्वयम्।
कटम्भरा दधिकाली शालिपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम्।
महापैशाचकं नाम घृतमेतदयशस्तम् ॥
बुद्धिमेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्" ॥

इति महापैशाचकं घृतम् ॥ * ॥

"अवपीड़ाश्च विविधाः सर्षपाः स्नेहसंयुताः।
कटुतैलेन चाभ्यङ्गो धूपयेच्चास्य तद्रजः ॥
सहिङ्गुस्त्रीहयधूमश्च सूत्रस्यानोदितो हितः ॥ *॥
मृगगजगृध्रयकोलूककङ्कलूकाश्ववस्तजैः ॥
मूत्रपित्तगृहलोमनखचर्म्मभिराचरेत्।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥
धूपयेत् सततञ्चैनं श्वगोमत्स्यैस्तु पूतिभिः।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः।
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥
विधेच्छिरां यथोक्तां वा दृष्टं मेध्यामिषस्य वा।
निवाते शाययेदेवं मुच्यते मतिविभ्रमात्" ॥
"भूतानुबन्धमीक्षेत प्रोक्ताल्लिङ्गाधिकाकृतिम् ॥
यद्युन्मादे ततः कुर्य्यादभूतनिर्हिष्टमौषधम्।
बलिञ्च दद्यात् पललं यावकं सक्तुपिण्डिकाम् ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान्।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥
अतिमुक्तस्य पुष्पाणि जात्या सह्यरस्य च।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ॥
निशीथमिषमद्यो यो हिताशी प्रयतः शुचिः।
निशागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते ॥
प्रसाद इन्द्रियार्थानां बुद्धात्ममनसान्तथा।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्" ॥*॥
इति वाभटे उत्तरस्थाने सप्तमोऽध्यायः॥

अस्य सनिदानसंप्राप्तिर्यथा।

"इह खलु षड्भ्योन्मादा भवन्ति। तद्यथा,—वातपित्तकफसन्निपातागन्तुनिमित्तात्तच्च दोष-निमित्ताश्चत्वारः।
पुरुषाणामेवंविधानां क्षिप्रमभिनिर्वर्त्तन्ते तद्यथा,
"भीरूणामुपक्लिष्टसत्त्वानामुत्पन्नदोषाणाञ्च मनोविघातोपहितानि अनुचितान्याहारजातानि वैषम्ययुक्तोपयोगविधिनोपयुञ्जानानां तत्तत्प्रयोग वा विषममाचरतामन्यां वा चेष्टां विषमां समा-चरतामल्पपुण्यादेहानाञ्च व्याधिवेगसमुद्भवभि-तानामुपहतमनसां वा काम-क्रोध-लोभ-हर्ष-भय-शोक-चिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायामधृतीर्णाः दोषाः प्रकुपिता हृदयमुपरुध्य मनोवहानि स्रोतांस्याहत्य जनयन्त्युन्मादम्। उन्मादं पुनर्मनो-बुद्धि-संज्ञा-ज्ञान-स्मृति-भक्ति-शील-चेष्टाहार-विभ्रमं विद्यात्" ॥

तस्येमानि पूर्व्वरूपाणि। तद्यथा,—
"शिरसः शून्यभावः चक्षुषोः व्याकुलता स्वनःकर्ण-योरुच्छ्वासस्याधिक्यमास्यसंस्रवणमनभिलाषो-ऽरोचकाविपाकौ हृदयग्रहो ध्यानायास-सम्मो-होद्वेगाश्चास्याने सततं लोमहर्षो ज्वरश्चाभीक्ष्ण-

मुन्मत्तचित्तत्वमुदर्दितत्वमर्दितात्रुतिकरणञ्च व्याधेः स्वप्ने च दर्शनमभीक्ष्णं भ्रान्तचलितानवस्थितानवस्थितागाञ्च रूपाणामप्रशस्तानाञ्च तिलपीड़कचक्राधिरोहणं वातकुण्डलिकाभिश्चोन्मथनं निमज्जनं कलुषाणामम्भसामावर्त्तेषु चक्षुषोश्चापसर्पणमिति दोषनिमित्तानामुन्मादानां पूर्व्वरूपाणि" ॥

अत्र वातादिभेदेनास्य लक्षणानि यथा,—

"ततोऽनन्तरमुन्मादाभिनिर्हृत्तिस्तत्रैदमुन्मादविज्ञानं भवति। तद्यथा,—परिसर्पणमक्ष्णिभ्रुवामोष्ठांस-हनु-हस्त-पादविक्षेपणमकस्मादनियतानाञ्च सत्वस्य क्रियामुत्सर्गः फेनागमनमात्म्यात् स्मित-हसित-नृत्य-गीत-वादित्र-प्रयोगास्थास्थाने वीणावंश-मृदङ्ग-शस्यातालशब्दानुकरणमसाम्ना। यानमयानैरलङ्करणमनलङ्कारिकैर्द्वेषैर्लोभोऽभ्यवहार्य्येष्वलब्धेषु। लब्धेषु चावमानस्तीव्रं मात्सर्य्यं कार्श्यं पारुष्यमुत्पिण्डितारुणात्वता वातोपशय-विपर्य्यासानुपशयिता चेति वातोन्मादलिङ्गानि भवन्ति ॥

अमर्षः क्रोध-संरम्भस्थाने शस्त्रलोष्टकाष्ठमुष्टिभिरभिद्रवणं स्वेषां परेषां प्रच्छाय-प्रीतोदकान्नाभिलाषः। सन्तापोऽतिबेलम्। ताम्रहरितहारिद्रसंरब्धात्विता पित्तोपशयविपर्य्यासादनुपशयिता चेति पित्तोन्मादलिङ्गानि भवन्ति ॥

स्थानमेकदेशे मूत्रीभावोऽल्पशस्त्रसंक्रमणं लालाग्निदाहाक्रमप्रस्रवणमनन्नाभिलाषो रहस्कामता बीभत्सत्वं शौचदेषः स्वप्न-निद्रताश्रयशयनाने शुक्लक्षितिमलोपदिग्धात्वता श्लेष्मोपशयविपर्य्यासादनुपशयिता चेति श्लेष्मोन्मादलिङ्गानि भवन्ति। त्रिदोषलिङ्गसन्निपाते तु सान्निपातिकं विद्यात्। तमसाध्यमित्याचक्षते कुशलाः"॥

साधारणसाधनविधिर्यथा।

"साध्यानान्तु त्रयाणां साधनानि भवन्ति। तद्यथा,—स्नेह-स्वेद-वमन-विरेचनास्थापनानुवासनोपशमनानञ्जन-कर्म्म-धूप-धूम-पानाञ्जनावपीड़-प्रधमनाभ्यङ्ग-प्रदेह-परिषेकानुलेपन-बन्ध-बन्धनावरोधन-वित्रासन-विस्मापन-विस्मारणापतर्पणाग्निकर्म्माद्यधनानि ॥

भोजनविधानञ्च यथास्वं युक्त्या यच्चान्यदपि किञ्चिन्निदानविपरीतमौषधं कार्य्यन्तत्यादिति। उन्मादान् दोषजान् साध्यान् साधयेद्विधिमुत्तमः। अनेन विधियुक्तेन कर्म्मणा यत्कीर्त्तितम्"॥ इति॥

आगन्तुरुन्मादो यथा।

"यस्तु दोषनिमित्तेभ्य उन्मादेभ्यः समुत्थानपूर्व्वरूपलिङ्गविशेषसमन्वितो भवत्युन्मादस्तमागन्तुमाचक्षते ॥

केचित् पुनः पूर्व्वकृतं कर्म्माप्रशस्तमिच्छन्ति। तस्य निमित्तं प्रज्ञापराध एवेति भगवान् पुनर्व्वसुरात्रेय उवाच ॥

प्रज्ञापराधाद्ध्ययं देवर्षि-पिट्ट-गन्धर्व्व-यक्ष-राक्षस-पिशाच-गुरु-वृद्ध-सिद्धाचार्य्य-पूज्यानवमत्याहितान्याचरति अन्यदा किञ्चित् कर्म्माप्रशस्तमारभते।

तमात्मनोहृतमुपलभन्तो देवादयः कुर्व्वन्त्युन्मत्तम्" ॥

आगन्तूनामादस्य पूर्व्वरूपाणि यथा।

"तत्र देवादिप्रकोपनिमित्तेनागन्तूनादेन पुरस्कृतस्येमानि पूर्व्वरूपाणि। तद्यथा—देव-गो-ब्राह्मण-तपस्विनां हिंसारुचित्वं क्रोपनत्वं नृशंसाभिप्रायता अरतिरोजो-वर्णच्छाया-बल-वपुषाञ्चोपतप्तिः स्वप्ने च देवादिभिरभिभर्त्सनं प्रवर्त्तनञ्चेति ततोऽनन्तरमुन्मादाभिनिर्हृत्तिः॥

तत्रायमुन्मादकराणां भूतानामुन्मादयिष्यतामारम्भविशेषो भवति। तद्यथा। अवलोकयन्तो देवा जनयन्त्युन्मादं गुरवृद्धसिद्धर्षयोऽभिशपन्तः पितरो धर्षयन्तः स्पृशन्तो गन्धर्व्वाः समाविशन्तो यक्षराक्षसास्त्वामगन्धमाघ्रापयन्तः पिशाचाः पुनरारुह्य वाहयन्तः॥

तस्येमानि रूपाणि भवन्ति। तद्यथा। अमर्च्चबलवीर्य्य-पौरुष-पराक्रम-ग्रहण-धारण-स्मरण-वचन-ज्ञान-विज्ञानान्यनियतञ्चोन्मादकालः।

उन्मादयिष्यतामपि खलु देवर्षि-पिट्ट-गन्धर्व्व-यक्ष-राक्षस-पिशाचानां गुरवृद्धसिद्धानां वा एष्वन्तरेष्वभिगमनीयाः पुरुषा भवन्ति। तद्यथा—पापस्य कर्म्मणः समारम्भे पूर्व्वकृतस्य वा कर्म्मणः परिणामकाले एकस्य वा शून्यगृहवासे चतुष्पथाधिष्ठाने वा सन्ध्यावेलायामप्रयतभावे वा पर्व्वसन्धिषु वा मिथुनीभावे रजस्वलाभिगमने वा विगुणे वाऽध्ययन-बलि-मङ्गल-होम-प्रयोगे नियमव्रतब्रह्मचर्य्ये वा महाहवे वा देव-कुल-पुरविनाशे वा महायज्ञोपगमने वा स्त्रिया प्रव्रजनकाले विविधभूताशुचिसंस्पर्शने वा वमनरुधिरस्रावासुचेरप्रयतस्य चैत्य-देवायतनाभिगमने वा मांस-मधु-तिल-गुड़-मद्योच्छिष्टे वा दिग्वाससि वा निशि नगर-निगम-चतुष्पथे पवनप्रमाणाभिगमने वा द्विज-गुरु-सुर-यति-पूज्याभिधर्षणे वा धर्म्माख्यातव्यतिक्रमे वा न्यस्तकर्म्मणोऽप्रशस्तस्यारम्भे वा इत्याघातकालाः व्याख्याता भवन्ति ॥

त्रिविधन्तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनमभवति। तद्यथा। हिंसारतिरभ्यर्चनञ्चेति। तेषां तत्प्रयोजनविशेषमुन्मत्ताचारविशेषलक्षणैर्विद्यात्। तत्र हिंसार्थमुन्माद्यमानोऽग्निं प्रविशत्यप्सु वा निमज्जति स्खलात् स्रुचे निपतति शस्त्र-कषा-काष्ठ-लोष्ट-मुष्टिभिर्हन्यात्मानमन्यच्च प्राणवधार्थमारभते। तमसाध्यं विद्यात्। साध्यौ पुनर्द्वावितरौ। तयोः साधनानि। मन्त्रौषधि-मणि-मङ्गल-बल्युपहार-होम-नियम-प्रायश्चित्तोपवास-स्वस्त्ययन-प्रणिपात-गमनादीन्येवमेते पञ्चोन्मादाः व्याख्याता भवन्ति"॥

"नैव देवा न गन्धर्व्वा न पिशाचा न राक्षसाः।
न चान्ये खयमक्लिष्टमुपक्लिश्नन्ति मानवम्॥
ये त्वेनमनुवर्त्तन्ते क्लिश्यमानं स्वकर्म्मणा।
न तन्निमित्तः क्लेशोऽसौ न ह्यस्ति कृतकृत्यता"॥

इति चरके निदानस्थाने सप्तमोऽध्यायः ॥ * ॥

चिकित्साविशेष आगन्तूनामादकारणलक्षणविशेषश्च।

"समूढचेता न सुखं न दुःखं
नाचारधर्म्मैः कुतश्च शान्तिम्।
विन्दत्यपास्तस्मृतिबुद्धिसंज्ञो
भ्रमत्यचेष्टश्चतस्ततश्च॥
समुद्भ्रमं बुद्धिमनःस्मृतीना-
मुन्मादमागन्तुनिजोत्थमाहुः"॥
"देवर्षि-गन्धर्व्व-पिशाच-यक्ष-
रक्षःपितॄणामभिधर्षणानि।
आगन्तुहेतुर्नियमव्रतादि-
मिथ्याकृतं कर्म्म च पूर्व्वदेहे"॥
"अदृश्यन्तः पुरुषस्य देहं
देवादयः स्वैस्तु गुणप्रभावैः।
विशन्त्यदृश्यास्तरसा यथैव
च्छायातपौ दर्पणसूर्य्यकान्तौ॥
आघातकालास्तु सपर्व्वरूपाः
प्रोक्ता निदानेऽथ सुरासुराद्यैः।
उन्मादरूपाणि पृथक् निबोध
कालञ्च गम्यान् पुरुषांस्च तेषाम्"॥

तद्यथा,—सौम्यदृष्टिं गम्भीरमप्रधृष्यमकोपनमसम्प्रमभोजनाभिलाषिणमल्पस्वेदमूष्मपुरीषवाचं सुभगन्धं पुष्पपद्मवदनमिति देवोन्मत्तं विद्यात्॥

गुरवृद्धसिद्धर्षीणामभिशापाभिचाराभिधानानुरूपचेष्टाहारव्याहारं तैरुन्मत्तं विद्यात्॥

अप्रसन्नदृष्टिमप्रयत्नं निद्रालुं प्रतिहतवाचमनन्नाभिलाषारोचकाविपाकपरीतं पिट्टभिरुन्मत्तं विद्यात्॥

चण्डं साहसिकं तीक्ष्णं गम्भीरमप्रधृष्यं मुखवाद्य-नृत्य-गीतान्नपान-स्नान-माल्य-धूप-गन्ध-रक्तवस्त्र-बलिकर्म्म-हास्य-कथायोगप्रियं सुभगन्धमिति गन्धर्व्वोन्मत्तं विद्यात्॥

असक्तं स्वप्रशोदनहास्यं नृत्य-गीत-वाद्य-कथान्नपान-स्नान-माल्य-धूप-गन्धरतिं रक्तविभुतात्वं द्विजातिवैद्यपरिवादिनं रहस्यभाषिणमिति यक्षोन्मत्तं विद्यात्॥

नग्ननिद्रमन्नपानद्वेषिणमनाहारमप्रतिबलिनं शस्त्रशोणितमांसरक्तमाल्याभिलाषिणं सन्तर्ज्जकमिति राक्षसोन्मत्तं विद्यात्॥

प्रहासनृत्यप्रधानं देवविप्रवैद्यद्वेषावज्ञाभिः स्तुतिवेदमन्त्रशास्त्रोदाहरणैः काष्ठादिभिरात्मपीड़नेन च ब्रह्मराक्षसोन्मत्तं विद्यात्॥

अस्वस्थचित्तस्थानमनभिमानं नृत्यगीतहासिनं बद्धाबद्धप्रभाषिणं सङ्करकूटमलिनरथ्याचैत्यश्मशेष्वारोहणरतिं भिन्नरूक्षवर्णस्वरं नग्नं विधावन्तं नैकत्र तिष्ठन्तं दुःखान्यावेदयन्तं नष्टस्मृतिं पिशाचोन्मत्तं विद्यात्॥

भूतादीनामावेशकालो यथा।

"तत्र शौचाचारं तपःस्वाध्यायकोविदं नरं प्रायः शुक्लप्रतिपदि त्रयोदश्याञ्च देवाः, पानशुचिविविक्तसेविनं धर्म्मशास्त्रश्रुतिकाव्यकुशलं प्रायः षष्ठीनवम्योरृषयः, माल्य-पिट्ट-गुरु-वृद्ध-सिद्धाचार्य्योपसेविनं प्रायो दशम्यामामावस्यायाञ्च पितरः, गन्धर्व्वास्तु स्तुतिगीतवादित्ररतिं परदारगन्ध-माल्य-प्रिय-शौचाचारं द्वादश्याञ्चतुर्दश्याञ्च,

सत्त्व-बल-रूप-गर्व्व-शौर्य्य-युक्तं माल्यानुलेपनं हास्यप्रियमतिवाक्करणं प्रायः शुक्लैकादश्यां सम्याच्च यत्नाः,स्वाध्याय-तपोनियमोपवासव्रतचर्य्या-देव-यति-गुरु-पूजारतिं भक्तशौचं ब्राह्मणमब्राह्मणं वा ब्रह्मवादिनं शूरमानिनं देवतागार-सलिल-क्रीड़नरतिं प्रायः शुक्लपक्षस्यां पूर्णाचन्द्रदर्शने च ब्रह्मराक्षसाः, रक्तःपिशाचास्तु हीनसत्त्व-पिशुन-स्तेन-लुब्धं प्रायो द्वितीयाद्यतीयाष्टमीषु पुरुषं क्षिप्रमवेक्ष्याभिधर्षयन्तीत्यपरिसंख्येयानां ग्रहाणामाविस्कृततमा ह्येष्टावेते व्याख्याताः" ॥

अत्र ये असाध्यास्तेषां लक्षणानि यथा।

"सर्व्वेष्वपि तु खल्वेषु यो हस्तावुद्यम्य रोष-संरम्भो निःसंज्ञमन्येष्वात्मनि वा पातयेत् सह्यसाध्यो ज्ञेयस्तथा साश्रुनेत्रो मेढ्रप्रवृत्तरक्तः क्षुतजिह्वः प्रस्रुतनासिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपाणिः सततं विकूजन् दुर्व्वर्णक्षुधार्त्तः पूतिगन्धिश्च हिंसार्थी उन्मत्तो ज्ञेयस्तं परिवर्जयेत्। रत्यर्च्चनाकामोन्मादिनौ तु भिषगभिप्रायाचाराभ्यां बुद्धा तदङ्गोपहारबलिश्रमेण मन्त्रभैषज्यविधिनोपक्रमेत्" ॥

अस्य चिकित्सा यथा।

"लशुनानां घृतं त्रिंशदभयाचूषणात्पलम्।
गवां चर्म्ममसी प्रस्थौ द्वावर्द्धं क्षीरमूत्रयोः॥
पुराणसर्पिषः प्रस्थमेभिः सिद्धं प्रयोजयेत्।
हिङ्गुचूर्णं पलं पीते दत्त्वा च मधुमालिकाम्।
तद्दोषागन्तुसम्भूतानुन्मादान् विषमज्वरान्।
अपस्मारांश्च हन्यात्तु पानाभ्यञ्जननावनैः" ॥

लशुनाद्यं घृतम् ॥*॥

"विशेषतः पुराणञ्च घृतं तं पाययेद्भिषक्।
त्रिदोषघ्नं पवित्रत्वादग्नेर्विशेषाद्ग्रहमोक्षणम्॥
गुणकर्म्माधिकं स्थानादाख्यादात् कटुतिक्तकम्।
उग्रगन्धं पुराणं स्याद्ग्रहवर्षस्थितं घृतम्॥
क्षारासवसमं पीतं तद्धि सर्व्वग्रहापहम्।
मेध्यं विरेचनव्यग्रं प्रदुराणमतः परम्॥
नासाध्यं नाम तस्यास्ति यत्स्यात् वर्षशतं स्थितम्।
दृष्टं स्पृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम्॥
अपस्मारग्रहोन्मादवतां ग्रस्तं विशेषतः" ॥

"शतैरौषधवर्गैर्व्वा विशेषत्वं स गच्छति।
अञ्जनोन्मादनालेपान्नावनादींश्च योजयेत्॥
शिरीषो मधुकं हिङ्गु लशुनं तगरं वचाम्।
कुष्ठञ्च वस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम्" ॥

इति नस्याञ्जनम् ॥*॥

"प्रसेके पीनसे गन्धैर्धूमवर्त्तिं कृताम्बिवेत्।
वैरेचनिकधूमोक्तैः श्वेतादैर्व्वासहिङ्गुभिः" ॥

इति धूमपानम् ॥*॥ [शिरा।

"ग्रहेऽके ग्लानसन्धौ वा मोक्षयेज्ज्ञो भिषक्
उन्मादे विषमे चैव ज्वरेऽपस्मारएव च" ॥

"कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्।
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत्" ॥

"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य तु बुद्धिमान्।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च।
सर्पिःपानादि तस्येह मृदुभैषज्यमाचरेत्।

पूजां बल्युपहारांश्च मन्त्राञ्जनविधौस्तथा॥
ग्रान्तिकर्म्मेष्टिहोमांश्च जपसख्ययनानि च।
वैदोक्तान् नियमांश्चापि प्रायश्चित्तानि चाचरेत्॥
भूतानामधिपं देवमीश्वरं जगतः प्रभुम्।
पूजयन् प्रयतो नित्यं जयत्युन्मादजं भयम्॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये।
तेषां पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते" ॥
इति च चरके चिकित्सास्थाने चतुर्द्दशोऽध्यायः॥

अस्य विशिष्टपूर्व्वरूपं यथा।

"मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति" ॥

वातजादिभेदेन रूपाणि यथा॥

"रूक्षच्छविःपरुषवाक् धमनीततो वा
श्वासातुरः क्षुभितनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात्॥१॥
दृष्टेददाहबलवान् बलमुद्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्तादिवा नभसि पश्यति तारकाञ्च॥२॥
कर्द्दमिसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रकारः।
निद्रापरोऽल्पकथनोऽल्पसुगुप्तसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात्॥३॥
सर्व्वात्मके चिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्" ॥ ४ ॥
अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि।

अस्य चिकित्सा यथा।

"स्विद्यं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनः॥
विविधैरवपीड़ैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत्॥
सततं धूपयेच्चैनं स्वगोमांसैः सुपूतिभिः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा॥
दर्शयेददभुतान्यस्य वदेन्नाग्नं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः॥
भीषयेत् सततं पाप्मैः कशाभिर्वाथ ताड़येत्।
यन्त्रयित्वा सघृतं वा धासयेत्तं हताग्निना॥
प्रतुदैर्दारयेच्चैनं मर्म्माघातं विवर्ज्जयेत्।
सापिधाने जरत्कूपे सततं वा निवासयेत्" ॥
"वह्निक्लुक्लमक्षिकाकटुकैलानिशाकृष्णैः।
तेनेदं त्रिफलाहिङ्गुवाजिगन्धामरदुमैः॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम्॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम्।
ख्यातं फलघृतं स्त्रीणां बन्ध्यानाञ्चाशु गर्भदम्" ॥

इति फलघृतम् ॥*॥

"उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत्।

अपस्मारक्रियाश्चापि ग्रहोक्तिष्टाश्च कारयेत्
ग्रान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत्॥
श्लोकश्लक्ष्णं व्यपनयेदुन्मादे पञ्चमे भिषक्।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम्॥
मृदुपूर्व्वं मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत्।
विषजे मृदुपूर्व्वाश्च विषघ्नीं कारयेत् क्रियाम्" ॥
इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्यायः ॥*॥

"तपांसि तीव्राणि तथैव दानं
व्रतानि धर्म्मो नियमश्च सत्यम्।
गुणास्तथाद्यावपि तेषु नित्याः
यस्ताः समस्ताश्च यथाप्रभावम्॥
न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः।
तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्याः।
अष्टावसामांसभुजः सुभीमाः
निशाविहाराश्च तमाविशन्ति" ॥
"निशाचराणां तेषां हि ये देवगणसंस्तुताः।
ते तु तत्सत्त्वसंसर्गादिज्ञेयास्तु तदङ्गनाः॥
देवग्रहा इति पुनः प्रोच्यन्ते गुह्यकाश्च ये।
देववच्च नमस्यन्ते प्रत्यर्थन्ते च देववत्॥
स्वामिशीलक्रियाचाराः क्रमशश्च सुरादिषु।
नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः॥
सत्यवादपरत्वेषु वृत्तिस्तेषां गणैः कृताः।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।
ग्रहसंज्ञाभिभूतानि यस्माद्वैद्यनया भिषक्॥
विद्यया भूतविद्यात्वमतश्च निरुच्यते।
तेषां ज्ञान्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः॥
जप्यैः सनियमैर्हौमैरारभेत चिकित्सितम्।
रक्तानि गन्धमाल्यानि बीजानि मधुसर्पिषाम्॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते।
वस्त्राणि मद्यमांसानि क्षीराणि रुधिराणि च॥
यानि तेषां यदेष्टानि तानि तेभ्यः प्रदापयेत्।
क्षिपन्ति मनुजान् येषु प्रायशो दिवसेषु च॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।
देवग्रहे देवगृहे कृत्वाग्निं प्राग्नयेद्बलिम्॥
कुशस्रक्तिकपूपाद्यच्छत्रपायससम्भृतम्।
अमुराय यथाकालं विदध्यात्तत्परादिषु॥
चतुष्पथे राजसस्य भीमेषु गहनेषु वा।
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत्॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्" ॥
"नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः।
हरिद्रे च कृतावर्त्तिः पूर्व्ववन्नयनाञ्जनम्" ॥
"न चायुक्तं प्रयुञ्जीत प्रयोगं देवताग्रहे।
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्॥
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः।
हिताहितविधानञ्च नित्यमेव समाचरेत्।
ततः प्राप्स्यति सिद्धिञ्च यशश्च विपुलं भिषक्" ॥

इति च सुश्रुते उत्तरतन्त्रे षष्ठितमोऽध्यायः ॥*॥
"सूतायस्कारमभ्रञ्च मुक्ता चापि समं समम्।
सूतपादोत्तमं वज्रं तालं गन्धं मनःशिला ॥
तुल्यं रसाञ्जनं शुद्धमब्भिर्पेषं शिलाञ्जनम्।
पञ्चानां लवणानाञ्च प्रतिभागं वसोन्मितम्॥
भृङ्गराजचित्रवच्चीदुग्धेनापि विमर्दयेत्।
दिनान्ते पिण्डितं कृत्वा रुद्धा गजपुटे पचेत् ॥
भूताङ्कुशो रसो नाम नित्यं गुल्माद्यं लिहन्।
आर्द्रकस्य रसेनापि भूतोन्मादसवातजित् ॥
पिप्पल्याक्षं पिबेच्चानु दशमूलकषायकम्।
खेदयेत् कटुतुम्बा च तीक्ष्णमुष्णञ्च वर्ज्जयेत् ॥
माहिषञ्च घृतं क्षीरं गुर्व्वन्नमपि भक्षयेत्।
अभ्यङ्गं कटुतैलेन हितो भूताङ्कुशो रसः"॥
इति भूताङ्कुशो रसः॥*॥ उन्मादभञ्जिनी वटी यथा।
"शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी।
वचा शिरीषबीजञ्च हिङ्गुञ्च श्वेतसर्षपम्॥
करञ्जबीजं त्रिकटु मलं पारावतस्य च।
एतानि समभागानि गोमूत्रैर्वटिकां कुरु॥
गिरिमल्लीबीजसमां छायाशुष्काञ्च कारयेत्।
प्रातःसन्ध्यानिशाकाले चक्षुषोरञ्जनं हितम्॥
मधुना दिवसे पाठ्यं रात्रौ चैव जलेन च।
वटिकैषा समाख्याता नाम्ना चोन्मादभञ्जिनी।
चातुर्थकापस्मारहा सर्व्वोन्मादविनाशिनी"॥
इति वैद्यकरत्नसारसंग्रहे उन्मादाधिकारः॥

अत्र पथ्यानि यथा।
"स्नेहो विरेको वमनञ्च पूर्व्वं
क्रमान्मरुत्पित्तकफोद्भवेषु।
ततः परं वस्तिविधिश्च नस्यम्
सन्तर्ज्जनं ताड़नमञ्जनञ्च॥१॥
आश्वासनत्रासनबन्धनानि
भयानि दानानि च हर्षणानि।
धूपो दमो विस्मरणं प्रदेहः
शिराव्यधः संशमनञ्च सेकः॥२॥
आश्वश्यकर्म्माणि च धूमपानं
धीर्धैर्य्यसत्त्वात्मनिवेदनानि।
अभ्यञ्जनं स्नापनमासनञ्च
निद्रासुखीतान्यनुलेपनानि॥३॥
गोधूममुद्गशालिषष्टिकयवाः
धारोष्णदुग्धं घृतधौतसर्पिः।
हृतं नवीनञ्च पुरातनञ्च
कूर्म्मोमिषं धन्वरसा रसालम्॥४॥
पुराणकुम्भाण्डफलं पटोलं
ब्रह्मीदलं वास्तुकतण्डुलीयम्।
खराश्वमूत्रं गगनाम्बुपथ्या
सुवर्णचूर्णानि च नारिकेलम्॥५॥
द्राक्षाकपित्थं पनसञ्च वैद्यै-
र्विधेयमुन्मादगदेषु पथ्यम्"॥६॥
"पूजाबलिप्रहरणशान्तिविधयो हेमेष्टिमन्त्रक्रियाः
दानं स्वस्त्ययनं व्रतानि नियमः सत्यञ्चमो मङ्गलम्॥
प्रायश्चित्तविधानमञ्जनविधीरत्नौषधीधारणं
भूतानामनुरूपमिष्टधरणं गौरीपतेरर्चनम्॥७॥
ये च स्युर्भुवि गुह्यकाश्च प्रमथाश्चेषां समाराधनं
देवब्राह्मणपूजनञ्च शमयेदुन्मादमागन्तुकम्"॥८॥

अपथ्यानि यथा॥
"मद्यं विरुद्धान्नमुष्णभोजनं
निद्राक्षुधाटट्टकृतवेगधारणम्।
व्यवायमाघाढ़फलं कठिन्नकं
शाकानि पत्रप्रभवानि सर्व्वशः॥
तिक्तानि बिम्बी च भिषक् समादिशे-
दुन्मादरोगोपहतेषु गर्हितम्"॥

इति वैद्यकपथ्यापथ्यविधौ उन्मादाधिकारः॥*॥)

औत्सुक्यसन्तापादिकारितमनोविपर्य्याससमुत्थ-प्रियाश्रितवृथाव्यापारः। इति रसमञ्जरी॥ (व्यभिचारिभावभेदः। यथा, साहित्यदर्पणे ३। १३६।
"औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जाः"। इति॥ अस्य लक्षणं सोदाहरणमाह तत्रैव ३। १५५।
"चित्तसम्मोह उन्मादः कामशोकभयादिभिः।
अस्थानहासरुदितगीतप्रलपनादिकृत्"॥
उदाहरणम्।
"भ्रातर्हरेः! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम्?
भृङ्गभ्रुवारमनुभूय सानन्दम्—
"ब्रूमे किमीमिति सखे! कथयामु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम्"॥)

उन्मादः, पुं, (उत्+मद्+घञ्।) उन्मादरोगयुक्तः। क्षिप्तः। उन्मत्तः। इत्यमरटीकायां नीलकण्ठः॥ पागल इति भाषा॥

उन्मादनः, पुं, (उन्मादयत्यनेन इति। उत्+मद्+णिच+ल्युः) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥

उन्मादवान्, त्रि, (उन्मादो विद्यते अस्य। उन्माद+मतुप्। मस्य वः।) उन्मादरोगविशिष्टः। उन्मत्तः। इत्यमरः॥

उन्मानः, पुं, (उत्+मा+ल्युट्।) द्रोणपरिमाणम्। इति वैद्यकपरिभाषा॥
("उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः"। इति पूर्व्वखण्डे प्रथमेऽध्याये श्रार्ङ्गधरेणोक्तम्॥
"स एव कलशः ख्यातो घटस्तून्मान एव च"॥
इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम्॥)

उन्मिषितः, त्रि, (उत्+मिष+क्त।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः॥ यथा कुमारे।
"व्यलोकयन्मिषितैस्तडिन्मयै-
र्महातपःसाक्ष्यइव स्थिताः क्षपाः"। ५। २५॥

उन्मीलनं, क्ली, (उत्+मील+ल्युट्।) उन्मेषः। इति हेमचन्द्रः॥ चक्षुमेला इति भाषा। विकाशः॥ ("अज्ञानतिमिरान्धस्य लोकस्य तु विचेष्टतः। ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः"। इति महाभारते। १। १। ८४॥)

उन्मीलितः, त्रि, (उत्+मील्+क्त।) विकसितः। प्रस्फुटितः। इति हलायुधः॥ ("उन्मीलितं तूलिकयेव चित्रम्"। इति कुमारे। १। ३२॥
"ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः"। इति साहित्यदर्पणे १म परिच्छेदे॥)

उन्मुखः, त्रि, (उद्गूर्द्धं मुखं यस्य।) ऊर्द्धमुखः। तत्पर्य्यायः। उत्पश्यः २। इति हेमचन्द्रः॥
("मनोभिरामाः प्रहसन्मुखैः स्त्रियो रथैर्निरीयुरुदुमुखैः"। इति रघुः। १। ३९।) उत्सुकः। यथा कुमारे। ६। ३४॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे"।
"पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्"। इति रघुः। ३। १२॥
"अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिः"। इति मेघदूते। पूर्व्वमेघे १४।
"इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा"।
इति च मेघदूते उत्तरमेघे ३९ श्लोकः॥)

उन्मुदः, त्रि, (उद्गता मुदा यस्मात्।) प्रफुल्लः। विकसितः। इति त्रिकाण्डशेषः॥

उन्मूलितं, त्रि, (उत्+मूल्+क्त।) उत्पाटितम्। इति हेमचन्द्रः॥ (यथा रामायणे। ५। ६।
"लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः"॥)

उन्मेषः, क्ली, (उत्+मिष्+घञ्।) चक्षुरुन्मीलनम्। इति हेमचन्द्रः॥ चक्षु मेला इति भाषा।
("खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्"। इति मेघदूते उत्तरमेघे २०। स्फुरणम्॥ यथा,
"खकिरणपरिवेषोन्मेषशून्याः प्रदीपाः"॥
इति रघुः। ५। ७४॥ विकाशः २। प्रस्फोटनम्। यथा,—
"दीर्घिकाकमलोन्मेषो यावन्माद्येव साध्यते"।
इति कुमारे। २। ३३॥)

उप व प्रादिविंशत्युपसर्गान्तर्गतउपसर्गविशेषः। अस्यार्थः। अनुगतिः। पश्चाद्भावः। अनुकम्पा। आधिक्यम्। (यथा पाणिनिः २।३।८। "उप परार्द्धे हरेर्गुणाः। परार्द्धादधिका इत्यर्थः।) हीनः। (यथा मुग्धबोधे कारके ७। "विष्णुमन्वर्च्चते भर्गः शक्रादय उपाचुतम्"।) सामीप्यम्। (यथा, मुग्धबोधे समासप्रकरणे ६७। "उपसमिधं उपसमित्। उपनदं। उपनदि"॥) प्राधान्यम्। इति दुर्गादासः॥ दाक्षिण्यम्। सामर्थ्यम्। अत्ययः। भूषणम्। दोषाख्यानम्। निदर्शनम्। आश्चर्य्यकरणम्। दानम्। मारणम्। व्याप्तिः। लिप्सा। उपालम्भनम्। पूजा। उद्योगः। इति शब्दरत्नावली॥

उपकण्ठं, क्ली, (उपगतः कण्ठम्। अव्ययादय इति समासः। उपगतः कण्ठः सामीप्यमस्येति वा॥) ग्रामान्तम्। तत्पर्य्यायः। उपश्लक्ष्णम् २। इति त्रिकाण्डशेषः॥ आस्कन्दितम्। अश्वपञ्चमगतिः। इति हेमचन्द्रः॥ कण्ठसमीपम्॥ (यथा, माघे।
"प्रेङ्खोपकण्ठं मुरजध्वनीनां
रत्नावलीरम्बुधिरावबन्ध"॥)

उपकण्ठः, त्रि, (उपगतः कण्ठः सामीप्यमस्य।) निकटः। इत्यमरः॥ (यथा, कुमारे। ७। ५१॥
"तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः"॥)

उपकरणं, क्ली, (उप+कृ+ल्युट्।) प्रधानाङ्गीभूतोपकारकद्रव्यम्। व्यजादीनां छत्रचामरादि।

तत्पर्य्यायः । परिच्छदः २ परिवर्हः ३ तत्त्वम् ४ । इति हेमचन्द्रः ॥ भोजनादौ व्यञ्जनादि ॥ यथा । "तस्मादन्नं प्रधानं सूपादिकन्तु उपकरणत्वेन गृह्णानामावश्यकम्" । इति श्राद्धतत्त्वम् ॥ पूजादौ नैवेद्यादि । मद्यबन्धनादौ ज्वालादि ॥

उपकारः, पुं, (उप + कृ + घञ् ।) उपक्रतिः । ("उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" । इति माघः । २।३७॥ "कृतोपकारेव रतिर्बभूव" । इति कुमारे । ३ । ७३ ॥) विकीर्य्यपुष्पादिः । इति हेमचन्द्रो मेदिनी च ॥

उपकारिका, स्त्री, (उपकरोतीति । उप + कृ + ण्वुल् + टाप् + इत्वम् ।) उपकारकर्त्री । पिण्डभेदः । इति मेदिनी ॥ राजगृहम् । इत्यमरः ॥ कुश्मूलः । मराथि इति भाषा । इति केचिदाङ्करिति भरतः ॥

उपकारी, स्त्री, (उपकार्य्यतीति । उप + कृ + णिच् + अण् + ङीष् ।) राजगृहम् । इति भरतधृतद्विरूपकोषः ॥

उपकारी, [न्] त्रि, (उपकरोतीति । उप + कृ + णिनि ।) उपकारविशिष्टः । उपकारकर्त्ता । ("उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्" इति हितोपदेशे मित्रलाभे ॥)

तच्च दानादानविधिर्यथा । हारीतः । अथासद्द्रव्यदानमस्वर्ग्यं यच्च दत्त्वा परितप्यते तद्दानमफलं यच्चोपकारिणे ददाति ॥ उपकारिणे व्यसनोपकारिणे । तदितरोपकारिणे तु दत्तः ।

"मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे ।
दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्" ॥

इति शुद्धितत्त्वम् ॥ किञ्च ।

"उपकारिषु यः साधुः स साधुः सद्भिरुच्यते ।
समदृष्टिर्भवात्मा त्वं सर्व्वभूतेषु केशव" ॥

इति जैमिनीये आश्वमेधिके पर्व्वणि ११ अध्यायः॥

उपकार्य्यः, त्रि, (उप + कृ + ण्यत् ।) उपकारोचितः । इति मेदिनी ॥

उपकार्य्या, स्त्री, (उपक्रियते इति । उप + कृ + ण्यत् + टाप् ।) राजगृहम् । इत्यमरः ॥ (यथा, रघौ ५ । ४१ ।

"तस्योपकार्य्यारचितोपचारा
वन्येतरा जानपदोपदाभिः" ॥

"शृङ्गघ्नप्रतिविहितोपकार्य्यमार्य्यः,
साकेतोपवनमुदारमध्युवास" । इति च १३ । ७९ ।) कुश्मूलः । मराथि इति भाषा । इति केचिदाङ्करिति भरतः ॥

उपकुल्यः, स्त्री, (उप + कुल्य + कि ।) सूक्ष्मक्षुद्रजलनीरकः । इति रत्नमाला ॥ (क्षुद्रजलनीरकशब्देऽस्य गुणादयो बोध्याः ॥)

उपकुल्यिका, स्त्री, (उप + कुल्य + ण्वुल् + टाप् ।) क्षुद्रजलनीरकः । क्षुद्रनाला । इत्यमरः ॥

("कारवी करवी तद्वद्विज्ञेया सोपकुल्यिका ।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता" ॥

इति सूत्रस्थाने ४६ अध्याये सुश्रुतेनोक्तम् ॥)

उपकुम्भं, स्त्री, (कुम्भस्य समीपे ।) कुम्भसमीपम् । इति व्याकरणम् ॥

उपकुर्व्वाणः, पुं, (उप + कृ + शानच् ।) ब्रह्मचर्य्यानन्तरं यो गृहस्थो भवति सः । इति पुराणम् ॥ (कृतोपकारः । यथा हितोपदेशे सुहृद्भेदे,—

"यतोऽनुपकुर्व्वाणो न कस्यापि उपायनं गृह्णीयात्" ॥)

उपकुल्या, स्त्री, (उपकोलति । कुल संख्याने बन्धुषु च । अच् न्यादिः ।) पिप्पली । इत्यमरः ॥ पिप्पुल इति भाषा । ("क्षय्योपकुल्या मगधी" इति वैद्यकरत्नमाला ॥ "उपकुल्योषणा शौण्डी" इति भावप्रकाशे पूर्व्वखण्डे प्रथमभागे ॥ गुणादिकमस्य पिप्पलीशब्दे ज्ञातव्यम् ॥) (उपगता कुल्यामिति वाक्ये वाच्यलिङ्गः । क्षुद्रसरःसमीपम् ॥)

उपकूपजलाशयः, पुं, (उपकूपं कूपसमीपे यो जलाशयः ।) कूपसमीपे शिलादिनिबद्धपशूपानार्थं कृतकूपोद्भूताम्बुस्थानम् । इत्यमरः ॥

उपकर्त्ता, [ऋ] त्रि, (उप + क्रम + तृच् ।) उपक्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

उपक्रमः, पुं, (उप + क्रम + घञ् । नोदात्तोपदेशस्य इति न वृद्धिः ।) ज्ञात्वारम्भः । अयमस्योपायः अनेनैतत् सिध्यतीति ज्ञात्वा प्रथमारम्भः ॥ उपधा । राज्ञा धर्म्मकामार्थभयैः अमात्यादेर्यत् परीक्षणं भावतत्त्वनिरूपणम् ॥ प्रक्रमः । प्रथमारम्भः । इत्यमरः ॥ विक्रमः । चिकित्सा । इति मेदिनी ॥ पलायनम् । इति हेमचन्द्रः ॥ (उपायः । यथा,—

"सामादिभिरुपक्रमैः" । इति मनुः । ७ । १०७ ।

आरम्भः । यथा,—"रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्" ॥ १२ । ४२ । इति रघुः । "उपक्रम्यते इत्युपक्रमः कर्म्मणि घञ् । रामस्य कर्तुरुपक्रमः रामोपक्रमं रामेणादौ उपक्रान्तमित्यर्थः । उपक्षोपक्रमं तदाचिख्यासायामिति क्षीरस्वम्" । इति तट्टीका ॥)

उपक्रोशः, पुं, (उप + क्रुश् + घञ् ।) निन्दा । इत्यमरः ॥ (यथा, रघुः । २ । ५३ ।

"राज्ञेन किं तद्विपरीतवृत्तेः
प्रायेणरूपक्रोशमलीमसैर्वा" ॥)

उपक्रोष्टा [ऋ] पुं, स्त्री, (उप + क्रुश् + तृच् ।) गर्द्दभः । इति श्रीभागवतम् ॥ निन्दकः ॥

उपक्रियाः, पुं, (उप + क्रिया + अच् ।) प्रक्रियाः । वीप्सायां शब्दः । इत्यमरटीकायां रायमुकुटः ॥

उपक्षेपणधर्म्मः, पुं, (उपक्षेपणरूपो धर्म्मः ।) शूद्रस्वामिकान्नस्य पाकार्थं ब्राह्मणगृहे समर्पणम् । इति शुद्धितत्त्वे कल्पतरुः ॥

उपगतः, त्रि, (उप + गम् + क्त ।) अङ्गीकृतः । स्त्रीकृतः ॥ इत्यमरः ॥ (यथा रघौ ९ । १५ ।

"उपगतोऽपि च मण्डलनाभिता-
मनुदितान्यसितातपवारणः" ।) कृतमैथुनः ॥

उपगमः, पुं, (उप + गम् + अप् ।) अङ्गीकारः । निकटगमनम् । इति मेदिनी ॥ (यथा रघौ ९ । ६९ ।

"तं प्राप्य सर्व्वावयवानवद्यं
व्यावर्त्ततान्योपगमात् कुमारी" ।)

उपगूहनं, क्ली, (उप + गूह + ल्युट् ।) आलिङ्गनम् । इत्यमरः ॥ ("स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनः" ॥ इति भागवते १ । ५ । १९ ॥ तथा च साहित्यदर्पणे ६ परिच्छेदे ।

"क्षतिः प्रमाद आनन्दः समयोऽप्युपगूहनम्" ॥)

उपग्रहः, पुं, (उपगृह्यते इति । उप + ग्रह + अप् ।) वन्दी । इत्यमरः ॥ वँदुयान् इति भाषा । उपयोगः । अनुकूलः । इति मेदिनी ॥ (ग्रहसदृशो ज्योतिःपदार्थभेदः । यथा महाभारते ३ । स्कन्दशत्रुसमागमे २२६ । १ ॥

"ग्रहाः सोपग्रहाश्चैव ऋषयो मातरस्तथा ।
ऊताशनमुखाश्चैव दीप्ताः परिषदां गणाः" ॥)

उपग्रहणं, क्ली, (उप + ग्रह + ल्युट् ।) उपाकरणम् । संस्कारपूर्व्वकश्रुतिग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥ (स्त्रीकारः । यथा, रामायणे १ । ४ । ४ ।

"वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" ।

वेदोपबृंहणार्थाय इति पाठान्तरम् ॥)

उपग्राह्यः, पुं, (उपगृह्यते इति । उप + ग्रह + ण्यत् ।) उपढौकनम् । इत्यमरः ॥ भेटी डाली इत्यादि भाषा ॥

उपघातः, पुं, (उपहन्यते अनेन । उप + हन + करणे घञ् ।) रोगः । इति राजनिर्घण्टः ॥ (भावे घञ् । विनाशः । यथा,—

"तथात्मन्येदिन्द्रियाणामुपघाते कथं स्मृतिः" ।

इति भाषापरिच्छेदे । ४८ । अपकारः ।

"स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" ॥

इति मनुः । २ । १७६ ॥)

उपघ्नः, पुं, (उप + हन + क ।) निकटाश्रयः । इत्यमरः ॥ (यथा, रघुः । १५ । १ ।

"छेदादिवोपघ्नतरोर्व्रतज्ञौ" ॥)

उपचक्रः, पुं, (चक्रेण चक्रनाम्ना तुल्यः ।) चक्रवाकपक्षिविशेषः । अस्य मांसगुणाः । लघुत्वम् । हृद्यत्वम् । उष्णवीर्य्यत्वम् । कटुपाकित्वम् । बलाग्निवृद्धिकारित्वञ्च । इति राजवल्लभः ॥

("चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः" ॥

इति महाभारते ३ भीमस्याजगरग्रहणे १७८ । ७ ॥)

उपचक्षुः, [स्] क्ली, (उपगतं चक्षुषोर्दर्शनार्थम् ।) दिव्यचक्षुः । चश्मा इति पारस्यभाषा । इति लोकप्रसिद्धम् ॥

उपचयः, पुं, (उप + चि + अच् ।) वृद्धिः । उन्नतिः । ("खलूक्त्युपचये केचित् परस्य व्यसने परे" । इति माघः । २ । ५७ । "तदेतेषामसत्युत्साहां ज्ञानोपचये भवन्तः प्रमाणम्" । इति हितोपदेशे कथामुखम् ।) लग्नात् तृतीयषष्ठदशमैकादशस्थानानि । इति ज्योतिषम् ॥

उपचरितं, त्रि, (उपचर्य्यते स्म । उप + चर + क्त ।) उपासितम् । सेवितम् । इत्यमरः ॥

उपचर्य्या, स्त्री, (उप + चर + क्यप् + टाप् ।) चिकित्सा । इति हलायुधः ॥

उपचाय्यः पुं, (उपचीयतेऽग्निरस्मिन् इति । "अग्नौ परिचाय्योपचाय्यसमूह्याः" ३ । १ । १२१ । इतिण्यदायादेशौ निपात्येते । उप + चि + ण्यत् ।) यज्ञाग्निः । इत्यमरः ॥

उपचारः, पुं, (उप + चर + घञ् ।) रोगप्रतिकारः ।

तत्पर्य्यायः। उपचर्य्या २ चिकित्सा ३ रक्प्रतिक्रिया ४ निग्रहः ५ वेदनानिष्ठा ६ क्रिया ७ उपक्रमः ८ ग्रमः ९। इति राजनिर्घण्टः॥ सेवा। ("स मे चिरायास्खलितोपचाराम्"। इति रघौ, ५। २०।) व्यवहारः। ("प्रयुक्तपाणिग्रहणोपचारौ"। इति कुमारे ७। ८६।) उत्कोचः। इति हेमचन्द्रः। परस्य रञ्जनार्थं असत्यभाषणम्। यथा, कुमारे ४। ६। "उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः"॥ "उपचारच्छवा दाक्ष्यं" इति चरके सूत्रस्थाने नवमेऽध्याये॥)

उपचार्य्यः, पुं, (उप + चर + ण्यत्।) चिकित्सा। इति हेमचन्द्रः॥

उपचितः, त्रि, (उपचीयते स्म। उप + चि + क्त।) दिग्धः। सम्पृक्तः। इति विश्वमेदिन्यौ॥ (यथा रघौ ९ म—सर्गे,। "मृगवयोगवयोपचितं वनम्"।) समाहितः। इति विश्वः हेमचन्द्रश्च॥ निदिग्धः। मेदादिना वर्द्धितः। इत्यमरः॥ ("यथाह हारीतः।

"प्रयतत्वाद्योपचितमशुभं नाशयतीति"॥)

उपचित्रा, स्त्री, (उपगता चित्राम्।) मूषिकपर्णी। इत्यमरः। इंदुरकानि इति भाषा। दन्तीवृक्षः। इति राजनिर्घण्टः॥ (दन्त्यर्थे यथा,—

"चित्रा दन्ती निकुम्भः स्यादुपचित्रा सुकूलकः"। इति वैद्यकरत्नमाला॥)

उपजापः, पुं, (उप + जप् + घञ्।) भेदः। विच्छेदः। इत्यमरः॥

("तेषु तेषु चाक्षतेषु प्रासरन् परोपजापाः"। इति दशकुमारे विश्रुतचरिते। तथा च माघे २। ६६।

"उपजापः क्षतस्तेन तानाकोपवतस्त्वयि"॥)

उपजिह्विका, स्त्री, (उपगता जिह्वा यस्याः।) कीटविशेषः। तत्पर्य्यायः। उपदेहिका २ वल्मी ३ उददीका ४। इति हेमचन्द्रः॥ आलजिह्वा इति ख्याता च॥ ("उपजिह्वा स्त्रिचौ बाह्व"। इति याज्ञवल्क्यः।

"तादृगेवोपजिह्वा तु जिह्वाया उपरि स्थिता"॥ इति वाभटेनोत्तरस्थाने एकविंशेऽध्याये उक्तम्॥

चिकित्सा यथा।

"उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्"। इति च वाभटेनोत्तरस्थाने द्वाविंशेऽध्याये उक्तम्॥)

उपजिह्विका, स्त्री, (उपजिह्वा + स्वार्थे कन्।) घण्टिका। आलजिव इति भाषा। तत्पर्य्यायः। प्रतिजिह्वा २। इति राजनिर्घण्टः॥ (ऋग्वेदे ४। ६१। २१। "यदत्युपजिह्विका यदक्रो अतिसर्पति"।) कीटभेदः। तत्पर्य्यायः। उत्पादिका २ वटिः ३ उद्देहिका ४ दिवी ५। इति हारावली॥ ("यस्य श्लेष्मा प्रकुपितो जिह्वामूलेऽवतिष्ठते। आशु संजनयेत् शोथं जायतेऽसोपजिह्विका"॥ इति चरके सूत्रस्थाने १८ अध्यायः।

"जिह्वायरूपः स्वयथुर्हि जिह्वा-
मुन्मथ्य जातः कफरक्तयोनिः।
प्रसेककण्डूपरिदाहयुक्ता
प्रकथ्यतेऽसावुपजिह्विकेति"॥

इति निदानस्थाने षोड़शेऽध्याये सुश्रुतेनोक्तम्॥

अस्य चिकित्सा यथा।

"उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्। शिराविरेकगण्डूषधूमैस्तेनमुपाचरेत्। जिह्वागतानां कर्म्माणां तालव्यानां प्रवक्ष्यते"॥ इति सुश्रुते चिकित्सितस्थाने २२ अध्यायः।)

उपजीविका, स्त्री, (उपजीव्यतेऽनया। उप + जीव + गुरोश्चेत्यः। संज्ञायां कन् क्रुन् वा।) उपजीव्यम्। जीवनोपायः॥

उपजोषम्, व्य, (उपजोषणम्। उप + जुष + अम्।) आनन्दः। इत्यमरः॥ (यथा, महाभारते १। "यथोपजोषं सर्व्वस्व जनश्चिक्रीड भारत"। सुखं। यथा, रामायणे २। ८६। २२।

"आश्वासयित्वा च चमूं महात्मा
निवेशयित्वा च यथोपयोगम्"॥)

उपज्ञा, स्त्री, (उपज्ञायते। ज्ञा अवबोधने। आतश्चोपसर्गे इति कर्म्मणि अङ्।) आद्यज्ञानम्। इत्यमरः॥ तत्त्व विनोपदेशेन प्रथमज्ञानम्। यथा वाल्मीकेः श्लोकनिर्म्माणे ज्ञानम्॥

("अथ प्राचेतसोपज्ञं रामायणमितस्ततः"॥ इति रघुः १५। ६३॥ "लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः" इति मल्लिनाथटीकामुखम्॥)

उपढौकनं, क्ली, (उप + ढौक + ल्युट्।) पारितोषिकद्रव्यम्। भेट् डाला इत्यादि भाषा। तत्पर्य्यायः। प्राभृतम् १ प्रदेशनम् २ उपायनम् ३ उपग्राह्यः ४ उपहारः ५ उपदा ६। इत्यमरः॥

उपतप्ता, [क्] पुं, (उप + तप् + क्त।) उपतापकमाचम्। तत्पर्य्यायः। स्पर्शः २ स्पृष्टा ३। इत्यमरः॥ स्पर्शः ४ स्पर्शा ५। इति तट्टीका॥ रोगइत्यन्ये। इति भरतः॥

उपतापः, पुं, (उप + तप् + घञ्।) त्वरा। उत्तापः। रोगः। इति मेदिनी॥ अशुभम्। पीड़ा। इति शब्दरत्नावली॥ (यथा, शाकुन्तले।

"विवक्षितं हृनुक्तं उपतापं जनयति"।

पीड़ादायके वाच्यलिङ्गः। यथा, कौशिकसूत्रे। १३५। "धो वनस्पतीनामुपतापो बभूव"॥)

उपत्यका, स्त्री, (उप समीपे आसन्ना भूमिः। उप + "उपाधिभ्यां त्यकन्नासन्नारूढ़योः"। ५। २३४। इति त्यकन्। "त्यकनश्च निषेधः" इति इत्वाभावः।) पर्व्वतनिकटभूमिः। इत्यमरः॥ (यथा, रघुः। ४। ४६।

"मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः"॥)

उपदंशः, पुं, (उपदश्यते इति। उप + दंश + कर्म्मणि घञ्।) मद्यपानरोचकभक्ष्यद्रव्यम्। तत्पर्य्यायः। अवदंशः २ चक्षणम् ३ मद्यपासनम् ४। इति हेमचन्द्रः॥ (यथा दशकुमारे विश्रुतचरिते—

"द्विजान् उपदंशान् उपयाच्य"।

"ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मांसं सूपम् उपदंशं च उपजहार"। इति च।) मेढ़रोगविशेषः। वाघी इति भाषा। अथोपदंशाधिकारः। तत्रोपदंशस्य विप्रकृष्टं निदानमाह।

"हस्तविघातान्नखदन्तघाता-
दधारणादल्पसेवनाद्वा।
योनिप्रदोषाच्च भवन्ति शिश्ने
पञ्चोपदंशा विविधाप्रचारैः"॥

हस्तविघातात् हस्तेन मैथुनात्। नखदन्तघातात् नखदन्तघातस्थानत्वेनानुक्तेऽपि मेहने नखदन्तघातो बलवदनुरागोदयात्। उक्तञ्च कामशास्त्रे।

"शास्त्रस्य विषयत्वाद्यावन्मन्दतरो रसः।
रतिचक्रे प्रवृत्ते तु न शास्त्रं नापि च क्रमः"॥

कलहे दुष्टस्त्रीकृतो वा मेहने नखदन्तघातः। उत्कलादौ स्त्रियो मुखयोनयो भवन्ति। ताभिर्व्वा मेहने नखदन्तघातः। योनिप्रदोषात् दीर्घकर्कशयोनिसोमयोगात्। योनिच्छिद्रस्यातिसङ्कुचत्वाद्वा। वातादिदुष्टत्वाद्वा योनिदोषात्। विविधाप्रचारैः। दुष्टजलप्रक्षालनब्रह्मचारिगीगमनादिभिः पञ्चोपदंशाः। वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगन्तुजश्चेति॥* तत्र वातिकपैत्तिकस्य चोपदंशस्य लक्षणमाह।

"सतोदभेदस्फुरणैस्तु वातैः
स्फोटैर्व्यवस्येन्मरुतोपदंशम्।
पीतैर्व्वदुष्टोदयुतैः सदाहैः
पित्तेन रक्तैः पिशितावभासैः"॥

व्यवस्येत् जानीयात्। पीतैः रक्तैर्व्वेति विकल्पः॥* श्लैष्मिकं सान्निपातिकञ्चाह।

"सकण्डुरैः श्लोफयुतैर्म्महद्भिः
शुक्लैर्घनैः स्रावयुतैः कफेन।
नानाविधस्रावरुजोपपन्न-
मसाध्यमाञ्जस्रिमलोपदंशम्"॥*॥

असाध्यमाह।

"विशीर्णमांसं कृमिभिः प्रजग्धं
मुष्कावशेषं परिवर्ज्जयेत्तम्"।

विशीर्णमांसं गलितमांसम्। प्रजग्धं खादितम्। मुष्कावशेषं विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रम्॥* उत्पन्नमात्रचिकित्सायाः अकरणे दोषमाह।

"सञ्जातमात्रे च करोति मूढ़ः
क्रियां नरो यो विषये प्रसक्तः।
कालेन श्लोफक्रिमिदाहपाकैः
प्रशीर्णशिश्नो म्रियते स तेन"।

विषये प्रसक्तः अतिस्त्रीरतः॥* लिङ्गार्शमाह।

"अङ्कुरैरिव संजातैरुपर्य्युपरि संस्थितैः।
क्रमेण जायते वर्त्तिस्तामभ्यूढ़शिखोपमा।
कोषस्याभ्यन्तरे सन्धौ पर्व्वसन्धिगतापि च।
सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा।
लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति चापरे"॥

लिङ्गवर्त्तेः स्थानमाह। कोषाभ्यन्तरे अण्डकोषाभ्यन्तरे। सन्धौ लिङ्गरन्ध्रसन्धौ। पर्व्वसन्धिगता मणिपर्व्वणोः सन्धिगता॥*॥*॥

अथोपदंशस्य चिकित्सा।

"उपदंशेषु सर्व्वेषु क्षिप्रं स्निग्धस्य देहिनः।

मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रुक्शोथावुपशाम्यतः ।
पाको निवार्य्यो यत्नेन शिश्नत्वयकरः स यत् ॥
वटप्ररोहार्জ্জুনजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः ।
व्यथां तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सकुमुदं पद्मं सौगन्धिकं तथा ।
एषां चूर्णं धूलनार्थं प्रलेपश्चात्र शस्यते ॥
बन्धूकदलचूर्णेन रजसा दाड़िमत्वचः ।
गुण्ठनं तद्व्रणे कुर्य्यात्क्षिपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
प्रलेपेनोपदंशस्य व्रणं सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः" ॥ * ॥
"भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः घृतमाशु चाज्यं
सर्व्वोपदंशापहरं प्रदिष्टम्" ॥
भूनिम्बादिघृतम् ॥ * ॥
"घृतानि यानि प्रोक्तानि कुष्ठे नाड़ीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
क्षारसूत्रेण संछिद्य लिङ्गवर्त्तिमथेषतः ।
दहेच्च तां ततस्ताभ्यां चिकित्सां व्रणवच्चरेत्" ॥
इत्युपदंशाधिकारः । इति भावप्रकाशः ॥ * ॥
अपि च ।
"पटोलनिम्बत्रिफलागुडूचीक्वाथमाविश्येत् ।
सगुग्गुलुं सखदिरमुपदंशी विनश्यति" ॥
ग्रन्थान्तरे प्रथमार्द्धे "पटोलनिम्बगुडूचीमरिच-
क्वाथमापिबेत्" । इति च पाठः ॥
"दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयते व्रणम्" ॥ * ॥
"त्रिफलानिम्बभूनिम्बकरञ्जखदिरादिभिः ।
कल्कैः क्वाथैर्घृतं पक्वमुपदंशहरं परम्" ॥
इति गारुड़े १७५ अध्यायः ॥
(अन्यच्चास्य सनिदानसम्प्राप्तिकं लक्षणमाह। यथा,
"स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाधुषितसंकीर्णमलिनानुरजःपथाम् ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टिदन्तनखोत्पीड़ाविषवच्छुक्रपातनैः ॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान् ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।
एकद्वित्रैः सरुधिरैः समस्तैश्चाथ मारुतात् ॥
मेढ्रशोफे रजश्छिन्नाः स्तम्भत्वक् परिपोटनम् ॥१॥
पक्वोदुम्बरसंकाशः पित्तेन श्वयथुर्ज्वरः ॥ २ ॥

श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः॥३॥
शोणितेनासितस्फोटसम्भवोऽसृक्षुतिर्ज्वरः ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गत्वं श्वयथुर्मुष्कयोरपि" ॥ ५ ॥
असाध्यलक्षणं यथा ।
"तीव्रा रुगाशुपचनं दरणं क्रिमिसम्भवः ।
याप्यो रक्तोद्भवस्फोटो मृत्यवे सन्निपातजः" ॥
इति वाभटे उत्तरस्थाने ३३ अध्याये ।
अस्य चिकित्सा च यथा ॥
"मेढ्रमध्ये शिरां विध्येदुपदंशे नवोत्थिते ।
शीतां कुर्य्यात् क्रियां शुद्धिं विरेकेण विशेषतः ॥
तिलकल्कघृतक्षौद्रैर्लेपः पक्वे तु पाटिते ।
जम्बाम्रसमनोनीपश्वेतकाम्बोजिकाङ्कुरान् ॥
शल्लकीवदरीविल्वपलाशप्रतिनिशोद्भवान् ।
त्वचः क्षीरिद्रुमाणाञ्च त्रिफलाञ्च जले पचेत् ॥
सक्षाद्यः क्षालनं तेन पक्वतैलञ्च रोपणम् ।
तुत्थगैरिकलोध्रैलामनोह्वाञ्जनरसाञ्जनैः ॥
हरेणुपुष्पकाशीससौराष्ट्रीलवणोत्तमैः ।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥
कपाले त्रिफला दग्धा सघृता रोपणं परम् ।
सामान्यं साधनमिदं प्रतिदोषन्तु शोफवत् ॥
न च याति यथा पाकं प्रयतेत तथा भृशम् ।
पक्वैः स्वायुश्चिरामांसैः प्रायो नश्यति हि ध्वजः"॥
इति वाभटे उत्तरस्थाने ३४ अध्यायः ॥
तत्रातिमैथुनादतिब्रह्मचर्य्यादा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढ़रोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करज-दशन-विष-शूकनिपातनादर्दनाङ्गस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥
स पञ्चविधस्त्रिभिर्दोषैः पृथक् समस्तैरक्तजा चैकः ॥
तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफता विविधाश्च वातवेदनाः ॥ १ ॥
पैत्तिके ज्वरः श्वयथुः पक्वोदुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च ॥ २ ॥
श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च ॥ ३ ॥
रक्तजे क्षय्यस्फोटप्रादुर्भावोऽत्यर्थमरुक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहो शोफश्च याप्यश्चैव कदाचित् ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेषसः क्रमिप्रादुर्भावो मरणञ्चेति ॥ ५ ॥
इति सुश्रुते निदानस्थाने १२ अध्यायः ॥
चिकित्साविशेषो यथा ।
"यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ।
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ।

प्रपौण्डरीकयष्ट्याह्ववर्षाभू-कुष्ठदारुभिः ।
सरलागुरुराज्ञाभिर्वातजं संप्रलेपयेत् ।
निचुलैरण्डबीजानि यवगोधूमशुक्तवः ॥
एतैश्च वातजं स्निग्धैः सुखोष्णैः संप्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलेपयेत् ॥
पद्मोत्पलमृणालैश्च ससर्জ্জার্জ্জুनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथ वापि सुशीतेन कषायेण वटादिना ॥
शाल्मलार्জ্জুनजकार्জ্জुधवलम्बिभिः कषैरुत्थितम् ।
सुरापिष्टाभिरुष्णाभिः सतलाभिः प्रलेपयेत् ।
रजन्यतिविषामुस्तसरलासुरदारुभिः ।
सपत्रपाठापत्तूरैरथ वा सम्प्रलेपयेत् ॥
करवीरस्य पत्राणि जात्याराग्वधयोस्तथा ।
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥
गोजिविड्भृङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतम् ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्জ্জिकातुत्थकाशीसं ग्रैवेयञ्च रसाञ्जनम् ।
मनःशिलासमैर्चूर्णं व्रणवीसर्पनाशनम् ॥
गुन्द्रान्दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥
मार्कवस्त्रिफलादन्तीताम्रचूर्णमयो रजः ।
उपदंशं निहन्त्येष कृच्छ्रमिन्द्राशनिर्यथा ॥
उपदंशहृदयेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥
उपदंशे विशेषेण व्रणे भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात् कुधितं लेहनं त्यजेत् ॥
जाम्बवौष्ठेनाग्निवर्णेन पश्चाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धञ्च विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात् कल्कं तैलं हितञ्च यत्" ।
इति च सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥
"लवङ्गं मरिचं शुण्ठी विड़ङ्गञ्च वचान्तथा ।
गन्धकं श्वेतखदिरं जातीकोषफले तथा ।
समभागञ्चतं सर्व्वं मधुना कारयेद्वटीम् ॥
ग्राह्यमाचान्तु मतिमान् योजयेदविकल्पितः ।
अनुपानं दुग्धसारं ततस्ताम्बूलभक्षणम्" ॥
इति उपदंशारी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उपदंशाधिकारः ॥*॥
अत्र पथ्यानि यथा ॥
कृष्णविरेको ध्वजमध्यनाड़ी-
वेधो जलौकःपरिषातनञ्च ।
सेकः प्रलेपो यवशालयश्च
धन्वामिषं मुद्गरसो घृतानि ॥ १ ॥
कठिल्लकं शिग्रुफलं पटोलं
शालिश्शाकं नवमूलकञ्च ।
तिक्तं कषायं मधुकूपवारि
तैलञ्च हन्यादुपदंशरोगम् ॥ २ ॥
अपथ्यानि यथा ॥
"दिवानिद्रां मूत्रवेगं गुर्व्वन्नं मैथुनं गुड़म् ।
आयासमम्लं तक्रञ्च वर्জ্জयेदुपदंशवान् ॥ ३ ॥

इति वैद्यकपथ्यापथ्यविधिः ॥) समष्ठिलक्षणः । शिष्यलक्षणः । इति राजनिर्घण्टः । (भवे घञ् ।) दंशनम् ॥

उपदर्शकः, पुं, (उपदर्शयतीति । उप + दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (दर्शयितरि, त्रि ॥)

उपदा, स्त्री, (उपदीयते इति । उप + दा + आतश्चोपसर्ग इत्यङ् ।) उपढौकनम् । इत्यमरः ॥ ("उपदा विविधुः शश्वत् नोत्सेकः कोशलेश्वरम्" । इति रघुः । ४ । १० ।)

"प्रत्यर्घ्य पूजामुपदाञ्चकेन"। इति रघुः । ७।३०॥)

उपदानकं. क्ली, (उपदान + स्वार्थे कन् ।) उत्कोचः । इति चिकाण्डशेषः ॥

उपदिष्टः, त्रि, (उप + दिश् + क्त ।) उपदेशप्राप्तः । यथा । "ननु शूद्रस्यापि सगोत्रा कथं न निषिध्यते इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति" । इत्युद्वाहतत्त्वम् ॥

उपदी, स्त्री, (उपेत्य दीयते क्षिप्यते इति उप + दो + क + ङीष् ।) वन्दाकः । इति राजनिर्घण्टः ॥ परगाछा इति भाषा ॥

उपदेवता, स्त्रीं, (उपगता सादृश्येन देवताम् ।) यक्षभूतादिः ॥ (उपदेवतास्तु दश । यथाह अमरः ।

"विद्याधरोऽप्सरो यक्षो रक्षो गन्धर्व्वकिन्नरौ ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" ॥)

उपदेशः, पुं, (उप + दिश् + घञ् ।) मन्त्रकथनम् । तत्पर्य्यायः । दीक्षा २। यथा ।

"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" ॥
इति रामार्चनचन्द्रिका ॥ कषावत्यादिदीक्षायामसामर्थ्ये संक्षेपो यथा ।

"तत्राप्यशक्तः कस्मिंश्चेदङ्गमभ्यर्च्च्य साक्षतम् ।
तदम्बुनाभिषिञ्चेद्वारं मूलेन केवलम् ॥
निधायाष्टौ जपेत् कण्ठ उपदेशे त्वयं विधिः" ॥
इति विश्वसारतन्त्रम् ॥ हितकथनम् ।
(यथा, हितोपदेशे विग्रहे उक्तम् ।
"उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये" ॥)
शिक्षणम् ॥ (यथा, मनुः ८। २७२ ।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः" ।
"एवमित्युपदेशः । यथा । तथा न जातुयात् रात्रौ दिवास्वप्नञ्च वर्जयेदनेन कारणेनेत्युपदेशः ॥ अथोपदिश्यते मधुरेण क्षेत्राभिवर्द्धत इति" ।
इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

उपदेशी, [न्] त्रि, (उपदिशति यः । उप + दिश् + णिनि ।) उपदेष्टा ॥ (यथा हितोपदेशे मित्रलाभे ।

"गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् ।
प्रमाणयति नो धर्म्मे यथा गोघ्नमपि द्विजम्" ॥)

उपदेष्टा, [ऋ] त्रि, (उपदिशति यः । उप + दिश् + तृच् ।) उपदेशकर्त्ता । यथा ।

"तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया" ॥

इति तिथ्यादितत्त्वम् ॥ बृहस्पतिः ।
"उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ" ।
इत्याह्निकतत्त्वञ्च ॥

उपदेहिका, स्त्री, (उपदेहो विद्यते यस्याः । उपदेह + ठक् ।) कीटविशेषः । तत्पर्य्यायः । उपजिह्वा २ वम्मी ३ उपदीका ४ । इति हेमचन्द्रः ॥

उपद्रवः, पुं, (उप + द्रु + अप् ।) उत्पातः । इति हेमचन्द्रः ॥ रोगारम्भकदोषप्रकोपजन्योऽन्यो विकारः । (तल्लक्षणमुक्तं वैद्यके । यथा,—

"यो व्याधिलक्षणो यो हेतुर्दोषलक्षणस्य प्रकोपतः ।
योऽन्यो विकारो भवति स उपद्रव उच्यते" ॥
"व्याधेरुपरि यो व्याधिः उपद्रव उदाहृतः ।
सोपद्रवा न जीवन्ति जीवन्ति निरुपद्रवाः" ॥
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
"तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपरुजति स तन्मूलएवोपद्रवसंज्ञः" । इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

उपद्रष्टा, [ऋ] त्रि, (उप + दृश् + बाहुलकात् तृच् ।) उपदर्शकः । उदासीनबोधरूपत्वेन गुणप्रचारदर्शी । इति गीताटीका ॥

("उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः" । इति गीतायां १३ । २२ । साक्षी पुरुषः । यथा,

"ऋत्विग्यज्यजमानेषु यजनकर्म्मव्याप्तेषु तत्समीपस्थोऽन्यः स्वयमव्याप्तो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणां ईक्षिता तद्वत्कार्य्यकारणव्यापारेषु स्वयमव्याप्तो विलक्षणस्तेषां कार्य्यकारणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षी पुरुषः" ॥)

उपधर्म्मः, पुं, (उपहीनोधर्म्मः ।) पाषण्डः । इति श्रीभागवतम् ॥ (यथा मनुः २ । २३७ ।
"एष धर्म्मः परः साक्षात् उपधर्म्मोऽन्य उच्यते" ॥)

उपधा, स्त्री, (उपधीयते शुद्धिज्ञानमत्र । उप + धा + आतश्चोपसर्ग इत्यङ् + टाप् ।) राज्ञां धर्म्मकामार्थभयैरमात्यादेर्यत् परीक्षणम् । इत्यमरः ॥ धर्म्मार्थकाममोक्षद्वारा परीक्षा । यथा ।

"धर्म्मार्थकाममोक्षेषु प्रत्येकं परिशोधनैः ।
उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता ॥
अर्थकामोपधाभ्यान्तु भार्य्याः पुत्रांस्तु शोधयेत् ।
धर्म्मोपधाभिर्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः" ॥
इति कालिकापुराणे ८५ अध्यायः ॥ ("भूयोभूयश्चोपधाभिर्विशेष्य तं मे मतिसहायमकरवम्" । इति दशकुमारचरिते विश्रुतचरिते ।) पदानामुपान्त्यवर्णः । इति व्याकरणम् ॥

उपधातुः, पुं, (उप सादृश्ये । धातुसदृशो धातुः ।) अप्रधानधातुसदृशधातुः । स तु सप्तधा यथा । माक्षिकम् १ तुत्थकम् २ अभ्रम् ३ नीलाञ्जनम् ४ मनःशिला ५ हरितालम् ६ रसाञ्जनम् ७ ॥ शरीरस्थधातुभवोपधातुः सप्तधा यथा । रसात् स्तनदुग्धम् १ रक्तात् स्त्रीरजः २ मांसात् वसा ३ मेदसो घर्म्मः ४ अस्थ्नो दन्तः ५ मज्जनः केशः ६ शुक्रात् ओजः ७ । इति वैद्यकम् ॥
("स्तन्यं रजश्च नारीणां काले भवति गच्छति ।
शुद्धमांसभवस्वेदः सा धमा परिकीर्त्तिता ॥
स्वेदो दन्तास्तथा केशास्तथैवोजश्च सप्तमम् ।
इति धातुभवा ज्ञेया एते सप्तोपधातवः" ॥
इति शार्ङ्गधरेण पूर्व्वखण्डे पञ्चमेऽध्याये उक्तम् ॥
"सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ।
तुत्थं कांस्यं च रीतिश्च सिन्दूरञ्च शिलाजतु" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

उपधानं, क्ली, (उपधीयते आरोप्यते मस्तकमत्र । उप + धा + अधिकरणे ल्युट् ।) शिरोधानम् ॥ बालिश इति भाषा । तत्पर्य्यायः । उपबर्हः २ । इत्यमरः । गण्डुः ३ । इति जटाधरः ।
("सोपधानां धियं धीराः स्त्रियस्तीं खट्टयन्ति ये" । इति माघः २।७७ । "षट्टोपधानाध्यासितशिरोभागेन" । इति कादम्बरी ।) विषम् । प्रणयः । इति मेदिनी । वतम् । इति हेमचन्द्रः ॥

उपधानीयं, क्ली, (उपधीयते यस्मिन् । उप + धा + अनीयर् ।) उपधानम् । इति शब्दरत्नावली ॥

उपधिः, पुं, (उपधीयते आरोप्यतेऽनेन । उप + धा + किः ।) कपटः । इत्यमरः ॥ (यथा, मनुः ८।१६५॥
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यच्च वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ॥
"अरिषु हि विजयार्थिनः क्षितीशाः
विदधति सोपधि सन्धिदूषणानि" ।
इति किराते ॥१ । ४५ ।) रथचक्रम् । इति हेमचन्द्रः ॥

उपधूपितः, त्रि, (उप + धूप् + क्त ।) आसन्नमरणः । परिधूपितः । इति मेदिनी ॥

उपधृतिः, स्त्री, (उप + धृ + क्तिन् ।) किरणः । इति हेमचन्द्रः ॥

उपनतः, त्रि, (उप + नम् + क्त ।) उपस्थितः । इति हेमचन्द्रः ॥ ("अचिरोपनतां स मेदिनीं" । इति रघुः ८ । ७ ॥ नम्रः । यथा, माघे । १२ । ३३ ।
"शौरेः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्त्तिभिः" ॥)

उपनदं, } क्ली, नद्याः समीपम् । इति मुग्धबोध-
उपनदि, } व्याकरणम् ॥ (तथा पाणिनीये ।
"नदीपौर्णमास्यायहायनीभ्यः" । ५ । ४ । ११० ।
इत्यनेन सिद्धम् ॥)

उपनयः, पुं, (उप समीपे नीयते येन कर्म्मणा । उप + नी + अच् ।) उपनयनम् । इति हेमचन्द्रः ॥
("गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।
बालो वेदाय तद्योगात् बालस्योपनयं विदुः" ॥
इति स्मृतिः । भावे + अच् । प्रापणम् । यथा, महाभारते ३ । २ । २४ ।
"मानमस्य प्रियाख्यानैः सम्भोगोपनयैर्नयाम्" ॥
न्यायमते यो यो धूमवान् स सवह्निमान् अयमपि तथेत्यादिरूपः न्यायावयवभेदः ॥)

उपनयनं, क्ली, (अध्ययनार्थं आचार्य्यस्य उप समीपं नीयते येन कर्म्मणा इति । उप + नी ल्युट् ।) ब्राह्मणक्षत्रियवैश्यानां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारः । अध्यापनार्थमाचार्य्यसमीपं नीयते येन कर्म्मणा तदुपनयनम् । यथा स्मृतिः ।
"गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।

बालो वेदाय तदयोगाद्बालस्योपनयं विदुः" ॥*॥
तत्पर्य्यायः । वटूकरणम् २ । इति चिकाण्डशेषः ॥
उपनायः ३ उपनयः ४ आनयः ५ । इति हेमचन्द्रः ॥ तस्य कालः ।
"गर्भाष्टमेऽब्दे बाब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ।
ब्रह्मवर्चसकामस्य कार्य्यं विप्रस्य पञ्चमे" ॥
ब्राह्मणस्य गर्भावधिषोड़शवर्षपर्य्यन्तम् ॥ तत्र गर्भाष्टमवर्षो मुख्यः । क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । तत्रैकादशवर्षो मुख्यः । वैश्यस्य चतुर्विंशतिवर्षपर्य्यन्तम् । तत्र द्वादशवर्षो मुख्यः । इति स्मृतिः ॥ सैके द्वादशे । तत्राशक्तौ प्रायश्चित्तं कृत्वा तदुत्तरे कार्य्यम् ।
"यज्ञोपवीतकर्म्मणा येन समीपं नीयते गुरोः ।
बालो वेदाय तदयोगाद्बालस्योपनयं विदुः ॥
रक्षाभावे तथा शूद्रक्षत्रे पाठनिषेधनात् ।
उपनयनं न तत्र स्यात् इति मन्वादिसम्मतम्" ॥
कृत्यचिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्यां ॥
अस्तं गते दैत्यगुरौ गुरौ वा
क्षत्रोऽपि वा पापयुतेऽप्यनुक्ते ।
व्रतोपनीतो दिवसे प्रणाशं
प्रयाति देवैरपि रक्षितो यः" ॥
उदये लग्ने । व्रतेन उपनयनेन । भुजबलभीमकृत्यचिन्तामण्योः ।
"स्वातीशक्रधनास्विमित्रकरभे पौष्णेज्यचित्राहरिश्विन्दौ तोयपतौ भगे दितिसुते भाद्रद्वये सागरे ।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्कोज्यकाः" ॥
तोयपतिः शतभिषा । अदितिसुतउत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।
जीवार्कोन्दुज्ञशुद्धौ हरिशयनवहिर्भास्करे चोत्तरस्थे,
स्वाध्याये वेदवर्णाधिपदृढ़शुभदे क्षौरिभे नादितौ च ।
शुक्रार्कोज्यर्क्षलग्ने रविमदनतिथिं प्रोह्य षष्ठाष्टमेन्दुं,
नो जीवास्तातिचारेऽर्कसितगुरुदिने काशशुद्धौ व्रतं स्यात्" ॥
रविमदनतिथिं सप्तमीं त्रयोदशीम् ॥*॥
कृत्यचिन्तामणौ ।
"माघे त्रिवाग्नीलाक्षः फाल्गुने च दृढ़व्रतः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ॥
ज्येष्ठे गृहनयनीतिज्ञ आषाढ़े क्रतुभाजनः ।
श्रेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्" ॥
राजमार्त्तण्डे ।
"पुनर्व्वसौ व्रतो विप्रः पुनःसंस्कारमर्हति" ।
बृहद्गर्गः ।
"स्मृतियुक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम् ।
पञ्चयोमाघमासस्य द्वितीयां परिवर्जयेत्" ॥
चैत्रशुक्लतृतीया आषाढ़शुक्लादशमी मन्वन्तरादित्वेन निषिद्धा वैशाखशुक्लतृतीया युगादित्वेन निषिद्धेति । यद्यामशुचिरभार्य्यो रिक्तासु बहुदोषभाक् । शुक्लपक्ष एव विहितः प्रागुक्ताश्वलायनवचनात् ॥*॥ सामगानां कुजवारेऽप्युपनयनं श्रीपतिरत्नमालाकृत्यचिन्तामणिधृतवात्स्यवचनात् । यथा ।
"श्राखाधिपे बलिनि केन्द्रगतेऽथ वास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः" ॥
अस्य श्राखाधिपस्य । दीपिकायां ।
"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः ।
सामवेदाधिपो भौमः श्रुतिजोऽथर्व्ववेदराट्" ॥
वेदाधिपकथनम् ॥*॥
"ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने" ॥
वर्णाधिपकथनम् ॥*॥ पराजयलक्षणं वक्ष्ये याचायाम् ।
अत्रापि विवाहवद्वयोगभङ्गवर्ज्जनम् ।
विष्णुधर्म्मोत्तरे ।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थो च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्धं पतत्यतः" ॥
अत्र षोड़शवर्षस्य उपनयनाकृता प्रतीयते ॥
"पतिता यस्य सावित्री दशवर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः" ॥
इति यमवचने तदनङ्कृता प्रतीयते । अनयोर्गर्भजन्मप्रभृतिगणनाभ्यामविरुद्धार्थता । तथाच माण्डव्यः । "व्रतबन्धविवाहे च वत्सरपरिकल्पनमाऊराचार्य्याः । आधानपूर्व्वमेके प्रसूतिपूर्व्वं सदान्ये तु" ॥*॥ यत्तु द्विजानुपक्रम्य पैठिनसिवचनं द्वादशषोड़शवर्षविंशतिभेदतीता अवरुद्धकाला भवन्ति इति द्वादशवर्षाद्युपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थम् । षोड़शोपरि तु व्रात्यहोमादिगुरुप्रायश्चित्तार्थमिति । इत्युपनयनम् । इति ज्योतिस्तत्त्वम् ॥

अथ उपनयनस्यानुष्ठानक्रमः ।

तत्र प्रथमं प्रातः कृतस्नानः कृतवृद्धिश्राद्धः पिता कृतवृद्धिश्राद्धेन पित्राद्यन्यवाचार्य्यो कृतसदसम्भवे माणवकवृतो वा समुद्भवनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य माणवकं प्रातर्भोजयित्वा अग्न्युत्तरतो नीत्वा श्रिखया सह मुण्डितं स्नापितं कुशकलाद्यलङ्कृतं क्षौमवस्त्रावृतं तदसम्भवे शुक्लावृतकार्पासकवस्त्रावृतं माणवकं दक्षिणे पूर्व्वाभिमुखं निधाय प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीममौ हुत्वा तत्तन्मन्त्रैर्व्यस्तसमस्तमहाव्याहृतिहोमं कुर्य्यात् । तत आचार्य्यः पञ्चभिर्म्मन्त्रैः पञ्चाहुतीर्जुहुयात् । तत आचार्य्यः उदगग्रेषु कुशेषु कृताञ्जलिः प्राङ्मुख ऊर्द्धस्तिष्ठेत् । अन्याचार्य्येऽग्निमध्ये माणवकोऽपि कृताञ्जलिराचार्य्याभिमुख उदगग्रेषु कुशेषु ऊर्द्धस्तिष्ठेत् । माणवकस्य दक्षिणतः स्थितो मन्त्रवान् ब्राह्मणो माणवकस्य अञ्जलिमुदकेन पूरयति पश्चात् आचार्य्यस्यापि । ततो गृहीतजलाञ्जलिराचार्य्यो गृहीतजलाञ्जलिं माणवकं पश्यन् मन्त्रं जपति । तत आचार्य्यो माणवकं मन्त्रं पाठयति । ततो माणवकस्याभिवादनार्थं देवताश्रयं नक्षत्राश्रयं गोत्राश्रयं वा माणवकनाम कल्पयित्वा आचार्य्यो माणवके कथयति । ततआचार्य्यो माणवकं मन्त्रेण नामधेयं पृच्छति । माणवकः पूर्व्वाचार्य्यकल्पितं नाम मन्त्रेण कथयति । तत आचार्य्यमाणवकौ पूर्व्वगृहीतजलाञ्जली त्यजेताम् । आचार्य्यस्तु दक्षिणेन पाणिना माणवकस्य साङ्गुष्ठं दक्षिणं पाणिं मन्त्रेण गृह्णाति । ततो गृहीतमाणवकहस्तो मन्त्रं जपत्याचार्य्यः । ततो माणवकमाचार्य्यो मन्त्रेण प्रदक्षिणेन भ्रामयित्वा प्राङ्मुखं करोति । ततो माणवकस्य दक्षिणस्कन्धं स्पृष्ट्वा अवतीर्य्येण दक्षिणपाणिना अव्यवहितं नाभिदेशं आचार्य्यो मन्त्रेण स्पृशति । ततो माणवकस्य नाभेरुपरिदेशं मन्त्रेण आचार्य्यः स्पृशति । ततो माणवकहृदयदेशं मन्त्रेणाचार्य्यः स्पृशति । ततो दक्षिणे पाणिना आचार्य्यो माणवकस्य दक्षिणस्कन्धं स्पृशन् मन्त्रं जपति । ततो वामेन पाणिना माणवकस्य वामस्कन्धं स्पृशन्नाचार्य्यो मन्त्रं जपति । अथाचार्य्यो माणवकं मन्त्रेण सम्बोधयति । अथ सम्बोधितं माणवकं आचार्य्यो मन्त्रेण प्रेषयति । ब्रह्मचारी तु सर्व्वत्र बाढ़मिति ब्रूयात् । ततोऽग्नेरुत्तरभागे गत्वा आचार्य्यं उदगग्रेषु कुशेषु प्राङ्मुखं उपविशति । तत आचार्य्याभिमुखो माणवकः पतितदक्षिणजानुः उदगग्रेषु कुशेषु उपविशति । ततः प्रवरसंख्यया पञ्च वा त्रयो वा मेखलायज्ञोपवीतरूपग्रन्थयः कर्त्तव्याः । अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं कारयित्वा त्रिवृतां मुञ्जमेखलां परिधापयन् मन्त्रत्रयं वाचयति । ततो यज्ञोपवीतं कृष्णसाराजिनान्वितं आचार्य्यो माणवकं मन्त्रेण परिधापयेत् । ततो माणवकआचार्य्यस्य उपसन्नो भवति । ततस्तमुपसन्नमाणवकं आचार्य्यः प्रथमं पादं पादं ततोऽर्द्धमर्द्धं ततः कृत्स्नां सावित्रीं अध्यापयेत् । तत आचार्य्यो माणवकं महाव्याहृतीः पृथक् पृथक् कृत्वा प्रणवपूर्व्विका अध्यापयेत् । ततो वैल्वं पालाशं वा माणवकपरिमाणदण्डं माणवकाय प्रयच्छन् आचार्य्यो माणवकं मन्त्रं वाचयति । अथ गृहीतदण्डो ब्रह्मचारी प्रथमं मातरं भिक्षां प्रार्थयते । ततो मातृबन्धून् ततः पितरं ततः पितृबन्धून् ततोऽन्यांश्च प्रार्थयेत् । ततः सर्व्वं लब्धमेत्य आचार्य्याय निवेदयेत् । ततः पूर्व्ववदाचार्य्यो व्यस्तसमस्तमहाव्याहृतिहोमं हुत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीममौ हुत्वा प्रकृतं कर्म्म समाप्य उदीचं प्राचायनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्तयेत् । ततः यदि पितैवाचार्य्यस्तदा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात् । अथान्य-

एवाचार्य्यो हृतः तदा येन हृतः स तस्मै दक्षिणां दद्यात्। ब्रह्मचारी तु तत्रैव स्थाने दिनान्तं यावत् वाग्यतस्तिष्ठेत्। ततः प्राग्वायां सन्ध्यायां सन्ध्यामुपास्य कुशखिकोक्तविधानेन समुद्भवनामानमग्निं संस्थाप्य मन्त्रं जप्त्वा दक्षिणं जानुं भूमौ निधाय दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकमग्निपर्य्युक्षणञ्च कृत्वा समिद्धोमं कुर्य्यात्। ततः प्रादेशप्रमाणघृताक्तसमित्त्रयं गृहीत्वा आद्यन्तयोस्तूष्णीं मध्ये समन्त्रकं अग्नौ जुहुयात्। ततः कर्म्मप्रदीपोक्तविधिना पुनरपि अग्निपर्य्युक्षणोपक्रमं दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकं कुर्य्यात्। ततः ब्रह्मचारी अग्निमभिवाद्य मन्त्रेणाग्निं विसृज्य अतीतायां सन्ध्यायां भिक्षालब्धमन्नं क्षारलवणवर्जितं सघृतमुदकेनाभ्युक्ष्य भक्षणप्रकरणोक्तविधिना भुञ्जीत। एतच्चाग्निकर्म्म समावर्त्तनपर्य्यन्तं प्रत्यहं सायं प्रातः कर्त्तव्यम्॥ इत्युपनयनकर्म्म समाप्तम्॥ इति भवदेवभट्टः॥ (ब्राह्मण-क्षत्रिय-वैश्यानामन्यतममन्वय-वयःश्रीशौर्य्य-शौचाचार-विनय-शक्ति-बल-मेधा-धृति-स्मृति-मति-प्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्तायमजुगुप्सितनासं प्रसन्नचित्त-वाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं नोपनयेत्।

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पैर्लाजभक्तैः रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्राह्मणं स्थापयित्वाग्निमुपसमाधाय खदिर-पलाश-देवदारु-बिल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोडुम्बराश्वत्थमधूकानां दधि-मधु-घृताक्ताभिर्द्वाविंशौमिकेन विधिनाजुहुयाज्जुहोतीर्जुहुयात्। सप्तभिर्मन्त्रैर्व्याहृतिभिस्ततः प्रतिदेवतमृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्॥ ब्राह्मणक्षत्रियाणां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो द्वयस्य वैश्यो वैश्यस्यैवेति। शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जं मनुपनीतमध्यापयेदित्येके। ततोऽग्निं त्रिः परिणीयाग्निसाक्षिकं शिष्यं ब्रूयात्। काम-क्रोध-लोभ-मोह-मानाहङ्कारेर्ष्यापारुष्य-पैशुन्याक्षतालस्यायग्म्यानि हित्वा नीच-नख-रोमा शुचिना कषायवाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणावश्यं भवितव्यं मदनुमतस्थान-गमन-शयनासन-भोजनाध्ययन-परेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाम्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग् भवेयमफलविद्यश्च। द्विज-गुरु-दरिद्र-मित्र-प्रव्रजितोपनत-स्राध्वनाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति। व्याधशाकुनिक-पतित-पापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशो धर्म्मार्थकामांश्च प्राप्नोति।

भवतस्त्राच॥

"क्षणेऽष्टमी तन्निधनेऽहनी द्वे
क्षणेतरेऽप्येवमहर्दिसन्ध्यम्।
अकालविद्युत्-स्तनयित्नुघोषे
खतन्त्रराष्ट्रक्षितिपव्यथासु॥
श्मशानयानाव्रतनाहवेषु
महोत्सवौत्पातिकदर्शनेषु।
नाधीयते नाशुचिना च नित्यम्"॥

इति सुश्रुते सूत्रस्थाने द्वितीयोऽध्यायः॥)

उपनायः, पुं, (उपनीयते आचार्य्यसमीपमिति। उप+नी+घञ्।) उपनयनम्। इति हेमचन्द्रः॥

उपनायकः, पुं, (उपमितो नायकेन।) नायकगुणोत्कर्षकथकः। यथा,—

"नायकस्य गुणोत्कर्षकथका उपनायकाः"।

इति सङ्गीतदामोदरः॥ * ॥ उपपतिश्च॥ (उपनयतीति। उप+नी+ण्वुल्। प्रापके, त्रि॥)

उपनाहः, पुं, (उपनह्यते ऽस्मिन्। उप+नह+घञ्।) वीणादितन्त्रबन्धनस्थानम्। तत्पर्य्यायः। निबन्धनम् २। इत्यमरः॥ व्रणालेपपिण्डः। इति मेदिनी॥ प्रलेप इति भाषा। (यथाह सुश्रुतः।

"आदौ विस्रावणं कुर्य्यात् द्वितीयमवसेचनम्।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम्"॥)

उपनिधिः, पुं, (उपनिधीयते इति। उप+नि+धा+कि।) उपन्यस्तवस्तु। स्थाप्यद्रव्यम्। तत्पर्य्यायः। न्यासः। २। इत्यमरः॥

("वासनस्यमनाख्याय हस्ते न्यस्य यदर्पितम्।
द्रव्यमुपनिधिः प्रोक्तः स्मृतिषु स्मृतिवेदिभिः"॥
वासुदेवपुत्रः। इति विष्णुपुराणम्॥)

उपनिषत्, [द्] स्त्री, (उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति। उप+नि+सद्+क्विप्।) धर्म्मः। वेदान्तशास्त्रम्। निर्जनस्थानम्। इति मेदिनी॥ (वेदशिरोभागः। तच्च चतुर्णां वेदानां अशीतिसहितशताधिकसहस्रसंख्यका उपनिषदः। तथाहि। ऋचः एकविंशतिः। यजुषो नवाधिकशतम्। साम्नः सहस्रम्। पञ्चाशदुपनिषदोऽथर्ववेदस्य॥ ब्रह्मविद्या॥) समीपसदनम्। इति त्रिकाण्डशेषः॥ तत्त्वम्। इत्यमरटीकायां भरतः॥ (द्विजातिकर्त्तव्यो व्रतभेदः। यथा, आश्वलायनगृह्यकारिकायाम्।

"प्रथमं स्यात् महानाम्नी द्वितीयञ्च महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानञ्च ततः परम्"॥)

(मुक्तिकोपनिषदि अष्टाधिकशतोपनिषद्भेदाः प्रदर्शिताः। यथा,—

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः॥७॥
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा॥९॥
ब्रह्म कैवल्य-जाबाल-श्वेताश्वा हंस आरुणिः॥१६॥
१ २ ३ ४ ५
गर्भो नारायणो हंसो बिन्दुर्नाद-शिरःशिखा॥२३॥
१
मैत्रायणी कैवल्यकी बृहज्जाबाल-तापनी॥२७॥
कालाग्निरुद्र-मैत्रेयी सुबाल-क्षुरि-मन्त्रिकाः॥३२॥

७
सर्व्वसारं निरालम्बं रहस्यं वज्रसूचिकम्॥३६॥
८ ९ १० ११
तेजोनाद-ध्यान-विद्या-योगतत्त्वात्मबोधकम्॥४२॥
१२ १३ १४ १५
परिव्राट्-त्रिशिखी-सीता-चूड़ानिर्व्वाण-मण्डलम्॥४८॥
१६ १७
दक्षिणाशरभं स्कन्दं महानारायणाऽद्वयम्॥५३॥
१८
रहस्यं रामतपनं वासुदेवञ्च मुद्गलम्॥५७॥
१९ २०
शाण्डिल्यं पैङ्गलं भिक्षु महच्छारीरकं शिखा॥६३॥
२१
तुरीयातीत-संन्यास-परिव्राजाच्छमालिका॥६७॥
२२
अव्यक्तैकाक्षरं पूर्णा सूर्य्याध्यात्म-कुण्डिका॥७४॥
सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम्॥७९॥
२३
त्रिपुरातापनं देवी त्रिपुरा कठ-भावना॥८४॥
२४ २५ २६ २७
हृदयं कुण्डली भस्म रुद्राक्षगण-दर्शनम्॥९०॥
२८
तारसार-महावाक्य-पञ्चब्रह्माग्निहोत्रकम्॥९४॥
गोपालतापनं कृष्ण याज्ञवल्क्यं वराहकम्॥९८॥
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुड़म्॥१०२॥
२९ ३० [॥१०८॥
कलि-जाबालि-सौभाग्य-रहस्य-ऋच-मुक्तिकाः"

अत्र स्थितानामेकदेशवाचिशब्दानां विवृतिः।

१ हंसः परमहंसः। २ बिन्दुरमृतबिन्दुः। ३ नादोऽमृतनादः। ४ शिरोऽथर्व्वशिरः। ५ शिखाथर्व्वशिखा। ६ तापनी नृसिंहतापनी। ७ रहस्यं शुकरहस्यम्। ८ तेजः तेजोबिन्दुः। ९ नादो नादबिन्दुः। १० ध्यानं ध्यानबिन्दुः। ११ विद्या ब्रह्मविद्या। १२ परिव्राट् नारदपरिव्राट्। १३ त्रिशिखी त्रिशिखीब्राह्मणः। १४ चूड़ा योगचूड़ामणिः। १५ मण्डलं मण्डलब्राह्मणः। १६ दक्षिणा दक्षिणामूर्त्तिः। १७ अद्वयं तारकः। १८ रहस्यं रामरहस्यम्। १९ महत् महोपनिषत्। २० शिखा योगशिखा। २१ परिव्राजः परमहंसपरिव्राजकः। २२ पूर्णाऽन्नपूर्णा। २३ कटः कटरुद्रः। २४ कुण्डली योगकुण्डली। २५ भस्मः भस्मजाबालः। २६ गणः गणपतिः। २७ दर्शनं जाबालदर्शनम्। २८ अग्निहोत्रकं प्राणाग्निहोत्रम्। २९। कलिः कलिसन्तरणम्। ३० रहस्यं खरस्वतीरहस्यम्॥

आसां मध्ये या यदेदान्तर्गतास्ता अपि तत्रैव प्रदर्शिताः। यथा,—

सामवेदान्तर्गताः षोड़शसंख्यका उपनिषदः।

अव्यक्तम् १ आरुणिः २ कुण्डिका ३ केनः ४ छान्दोग्यम् ५ (या)जावालदर्शनम् ६ जाबाली ७ महत् ८ मैत्रायणी ९ मैत्रेयी १० योगचूड़ामणिः ११ रुद्राक्षम् १२ वज्रसूचिकम् १३ वासुदेवम् १४ संन्यासम् १५ सावित्री १६॥ * ॥

शुक्लयजुर्व्वेदान्तर्गता ऊनविंशतिसंख्यकाः

उपनिषदः यथा,—

अतीताध्यात्मम् १ ईशावास्यम् २ (जा)बालम् ३

तारसारः४ तुरीयम्५ त्रिशिखी६ निरालम्बम् ७ परमहंसः ८ पैङ्गलम् ९ ब्राह्मणमण्डलम् १० ब्राह्मणद्वयतारकम् ११ भिक्षु १२ मन्त्रिका १३ मुक्तिका १४ याज्ञवल्क्यम् १५ बृहदारण्यकम् १६ शाट्यायनी १७ सुबालः १८ हंसः १९ ॥*॥

कृष्णयजुर्व्वेदान्तर्गता द्वात्रिंशत्-संख्यकाः उपनिषदः यथा,—

अक्षि१ अमृतनादः२ अमृतबिन्दुः ३ अवधूतम्४ एकाक्षर५ कठरुद्र६ कठवल्ली७ कलिसन्तरणम्८ कालाग्निरुद्रः९ कैवल्यम्१० क्षुरिका११ गर्भः १२ तेजोबिन्दुः१३ तैत्तिरीयकम्१४ दक्षिणामूर्त्तिः१५ ध्यानबिन्दुः१६ नारायण१७ पञ्चब्रह्म१८ प्राणाग्निहोत्रम्१९ ब्रह्म२० ब्रह्मविद्या२१ योगकुण्डलिनी२२ योगतत्त्वम्२३ योगशिखा२४ वराह२५ शारीरकम्२६ शुकरहस्यम्२७ श्वेताश्वतरः२८ सर्व्वसारः २९ स्कन्दः ३० सरस्वतीरहस्यम् ३१ हृदयम् ३२ ॥*॥

ऋग्वेदान्तर्गता दशसंख्यका उपनिषदः यथा,—

अक्षमालिका१ आत्मप्रबोधः२ ऐतरेयः३ कौषितकी४ त्रिपुरा५ नादबिन्दुः६ निर्व्वाणम्७ मुद्गलाः८ वज्रसूचिः९ सौभाग्यम्१० ॥ *॥

अथर्व्ववेदान्तर्गता एकत्रिंशत्संख्यका उपनिषदः, अथर्व्वशिखा१ अथर्व्वशिरः२ क्षुरिकाः३ गणपतिः४ गारुडम्५ गोपालतापनम् ६ जाबालम् ७ त्रिपुरातपनम् ८ दत्तात्रेयः ९ देवी१० नारदपरिव्राजकः११ नृसिंहतापनी १२ परब्रह्म१३ परिव्राजकोपनिषत्१४ परमहंसः १५ पाशुपतम् १६ प्रश्नम्१७ भस्म१८ भावना१९ महानारायणम्२० महावाक्यम् २१ माण्डूक्यम्२२ मुण्डकम्२३ रामतापनी २४ रामरहस्यम् २५ बृहज्जाबालम् २६ शरभम्२७ शाण्डिल्यम्२८ सीता२९ सूर्य्यात्म३० हयग्रीवम् ३१॥*॥)

उपनिष्कारं, क्ली, (उपनिष्किरन्ति सैन्यान्यत्र। उप + निस् + कृ + घञ्। ऋदोरप् तु न। अपोवाधकस्य ल्युटोऽपि घस्यापवादत्वात्। यद्वा उपनिष्क्रीर्य्यते सैन्यैर्हन्यते इति। कृ + कर्म्मणि अप्। इदुदुपधस्येति षः।) पुरपथः। इत्यमरः॥ राजपथः। इति हेमचन्द्रः॥

उपनिष्क्रमणं क्ली, (उपक्रम्यतेऽनेन उप + निर् + क्रम + ल्युट्।) राजपथः। इति हेमचन्द्रः॥ निष्क्रमणनामसंस्कारः॥

उपनीतः, पुं, (उप + नी + क्त।) कृतोपनयनः। इति स्मृतिः॥ ("अथोपनीतं विधिवद् विपश्चितः"। इति रघुः। ३। २९।) निकटप्राप्ते च॥

उपन्यासः, पुं, (उप + नि + अस् + घञ्। वाक्योपक्रमः। तत्पर्य्यायः। वाङ्मुखम् २। इत्यमरः॥ ("तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन"। इति शारीरकभाष्ये॥ १। १। ७। विचारः। यथा, मनुः ९। ३१।

"विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत"॥
"वक्ष्यमाणं सर्व्वजनहितं विचारं शृणुत"।
इति तट्टीका।

धनादीनामर्पणम्। गच्छित इति भाषा॥)

उपपतिः, पुं, (उपमितः पत्या। अवादयः क्रुष्टाद्यर्थे ३तीयया इति समासः।) जारः। इत्यमरः॥ नां इति भाषा। तस्य लक्षणम्। आचारहानिहेतुः पतिः। स चतुर्व्विधः। सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः १। सकलनायिकाविषयसमसङ्गानुरागो दक्षिणः२। भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः ३। कामिनीविषयकपटपटुः शठः ४। इति रसमञ्जरी॥ (यथा, मनुः ३। १५५।

"पौनर्भवञ्च काणञ्च यस्य चोपपतिर्गृहे"॥)

उपपत्तिः, स्त्री, (उप + पद् + क्तिन्।) सङ्गतिः। निर्हृतिः। समाधानम्। सिद्धान्तः। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः। इति वेदान्तसारः॥ ("उपपत्तिमदूर्ज्जिताश्रयम्"। इति भारविः। २। १॥) हेतुः। यथा,—

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः"। इत्यत्र उपपत्तिभिर्ब्रह्मभिर्हेतुभिरिति पक्षतायश्चमाथुरी॥ सङ्गतिः। यथा,—

"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः"।
इति भाषापरिच्छेदः। ८२॥ (उपायः। यथा माघे।
"अपेक्षितान्योन्यबलोपपत्तिभिः"। सिद्धिः। प्राप्तिः। "स्वार्थोपपत्तिं प्रति दुर्ब्बलाश्रयः"। इति रघुः॥ ५। १२॥)

उपपदं, क्ली, (उपोच्चारितं पदम्।) लेशः। इति त्रिकाण्डशेषः॥ समीपोच्चारणीयपदम्। (यथा, रघौ १६। ४०। "तस्याः स राजोपपदं निशान्तम्"॥) यथा वा नामोत्तरे शुम्भेवर्म्मादि। समभिव्याहृतस्वार्थपोषकपदम्। यथा प्रहारादौ प्रादि। इति व्याकरणम्॥

उपपातकं, क्ली, (उपपातयति नरके यत्। उप + पत् + णिच् + ण्वुल्। यद्वा उपमितं पातकेन।) पापविशेषः। तत्तु ऊनपञ्चाशद्विधं यथा। गोवधः १ अयाज्ययाजनम् २ परदारगमनम् ३ आत्मविक्रयः ४ गुरुत्यागः ५ माढृत्यागः ६ पितृत्यागः ७ एषां शुश्रूषात्यागः। स्वाध्यायत्यागः ८ स तु सर्व्वदा ब्रह्मयज्ञत्यागः। अधीतवेदविस्मरणञ्च। अग्नित्यागः ९ स तु स्मार्त्ताग्निहोत्रत्यागः। सुतत्यागः १० स तु तस्य संस्कारभरणाद्यकरणम्। परिवित्तिता ११ सा तु कनिष्ठेन आदौ विवाहे कृते ज्येष्ठस्य। परिवेदनं १२ तत्तु अकृतदारज्येष्ठसत्त्वे कनिष्ठस्य। तयोः कन्यादानं १३ तयोर्याजनं १४ तत्तु तयोरेव विवाहादौ पौरोहित्यम्। कन्याया दूषणं १५ तत्तु मैथुनवर्जमङ्गुलीप्रक्षेपादिना रूपणम्। अङ्गुल्या योनिविदारणमिति यावत्। वार्द्धुष्यं १६ तत्तु निषिद्धरद्धिजीवनम्। व्रतलोपः १७ स तु ब्रह्मचारिणो मैथुनम्। तड़ागविक्रयः १८ आरामविक्रयः १९ दारविक्रयः २० अपत्यविक्रयः २१ व्रात्यता २२ सा तु यथाकालमनुपनयनम्। बान्धवत्यागः २३ भृताध्यापनम् २४ तत्तु प्रतिनियतवेतनग्रहणपूर्व्वमध्यापनम्। भृताध्ययनम् २५ तत्तु वेतनप्रदानपूर्व्वकाध्ययनम्। अपण्यानां विक्रयः २६ स तु तिलला़क्षागोरसादीनां ब्राह्मणेन विक्रयः। सर्व्वाकरेष्वधीकारः २७ स तु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञया अधिकारः। महायन्त्रप्रवर्त्तनं २८ तत्तु महता उदकप्रवाहप्रतिबन्धहेतूनां सेतुबन्धादीनाञ्च प्रवर्त्तनं अथवा तैलादियन्त्रस्य शस्त्रतेजनादियन्त्रस्य च। ओषधिहिंसनं २९ तत्तु धान्यादीनां यथाकथञ्चिन्नाशः। स्त्र्याजीवः ३० स तु भार्य्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनम्। अभिचारकर्म्म ३१ तत्तु श्येनादिना यज्ञेन अनपराद्धस्य मारणम्। मूलकर्म्म ३२ तत्तु मन्त्रौषधादिना वशीकरणम्। इन्धनार्थमशुष्कद्रुमाणां छेदनं ३३ आत्मार्थं क्रियारम्भः ३४ स तु अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठानम्। निन्दितान्नस्य भक्षणम् ३५ तत्तु लशुनादेः सक्रदनिच्छया अथवा गव्यकदेवलतस्करान्नभक्षणम्। अनाहिताग्निता ३६ सा तु समर्थस्य श्रौतस्मार्त्ताग्न्यपरित्यागः। स्तेयं ३७ तत्तु सुवर्णद्रव्यादन्यसारद्रव्यापहरणम्। देवर्षिपितॄणां ऋणाशोधनं ३८ असच्छास्त्राभिगमनम् ३९ तत्तु श्रुतिस्मृतिविरुद्धशास्त्रग्रन्थग्रहणम् पाषण्डशास्त्राभ्यासो वा। कौशीलव्यक्रिया ४० सा तु तौर्य्यत्रिकस्य सततानुष्ठानम्। धान्यस्तेयं ४१ पशुस्तेयम् ४२ कुप्यस्तेयम्४३ मद्यपस्त्रीनिषेवनम्४४ स्त्रीवधः ४५ शूद्रवधः ४६ वैश्यवधः ४७ क्षत्रियवधः ४८ नास्तिक्यम् ४९। तत्तु अदृष्टार्थकर्म्माभावबुद्धिः। नास्ति परलोक इति वा। इति मनुः शूलपाणिश्च॥ (अस्य प्रायश्चित्तादिकं प्रायश्चित्तशब्दे द्रष्टव्यम्॥)

उपपापं, क्ली, (उपमितं पापेन।) उपपातकम्। इति स्मृतिः॥

उपपुरं, क्ली, (उप समीपे पुरम्।) शाखानगरम्। इति हेमचन्द्रः॥

उपपुराणं, क्ली, (उपमितं पुराणैः।) व्यासकृताष्टादशपुराणसदृशनानामुन्यादिप्रणीताष्टादशपुराणम्। यथा,—

"अन्यान्युपपुराणानि मुनिभिः कथितान्यपि।
आद्यं सनत्कुमारोक्तं १ नारसिंहं २ ततः परम्॥
तृतीयं वायवीयञ्च ३ कुमारेण च भाषितम्।
चतुर्थं शिवधर्म्माख्यं ४ साक्षान्नन्दीशभाषितम्॥
दुर्व्वाससोक्तमाश्चर्य्यं ५ नारदीयमतःपरम् ६।
नन्दिकेश्वरयुग्मञ्च ७ तथैवोशनसेरितम् ८॥
कापिलं९ वारुणं१० शाम्बं११ कालिकाह्वयमेव च१२।
माहेश्वरं१३ तथा कल्की१४ दैवं१५ सर्व्वार्थसिद्धिदम्॥
पराशरोक्तमपरम् १६ मारीचम् १७ भास्कराह्वयम्१८।
अत्र दैवं देवीपुराणम्। इति मलमासतत्त्वधृतकूर्म्मपुराणम्॥ (एषां विस्तृतिस्तु तत्तच्छब्दे द्रष्टव्या॥)

उपपुष्पिका, स्त्री, (उपगता पुष्पमिव विकाशत्वम्। उत्प्रभणसमये मुखव्यादानात् तथात्वम्।) जृम्भा। हाइ इति भाषा। तत्पर्य्यायः। हाविका २। इति हारावली॥

उपप्रदानं, क्ली, (उप समीपे प्रदानम्।) उत्कोचः। इति हेमचन्द्रः॥ घुस इति भाषा। (यथा कथासरित्सागरे २४ तरङ्गे।
"उपप्रदानं विष्णूनामेकं ह्याकर्षणौषधम्"॥)

उपप्लवः, पुं, (उप+प्लु+अप्।) राहुग्रहः। विप्लवः। उत्पातः। इति मेदिनी॥
("उपप्लवाय लोकानां धूमकेतुरिवोत्थितः"।)
इति कुमारे। २। ३२।) ग्रहणम्। यथा "उपप्लवे चन्द्रमसो रवेश्च"। इति स्मृतिः॥ (उत्पातसूचकोऽनिष्टादिः। यथा, "कच्चिन्न वाय्वादिरुपप्लवो वः"। इति रघुः। ५। ६। भीतिः। "दृष्टा इवोपप्लविनः परेभ्यः"। इति रघुः। १३। ७। "उपप्लविनो भयवन्तः"। इति मल्लिनाथः॥)

उपभूषणं, क्ली, (उपमितं भूषणेन।) घण्टाचामरादि। यथा,—
"घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादृश्यमात्तदुपभूषणम्"॥ इति।
"प्रावारः पानपात्रञ्च गेण्डुको मुहमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्"॥
इति च कालिकापुराणे ६८ अध्यायः॥

उपभृत्, स्त्री, (उप+भृ+क्विप्।) चक्राकारयज्ञपात्रं। इत्यमरः॥ (यथा, औचसूत्रे। १।१०।६॥
"पाणिभ्यां स्रुक्सुवं परिगृह्योपभृत्त्वाधानम्॥)

उपभोगः, पुं, (उप+भुज+घञ्।) भोजनातिरिक्तभोगः। तत्पर्य्यायः। निर्व्वेशः २। इत्यमरः॥
("प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन्"।
इति रघुः। १२। २२। तथा च स्मृतिः।
"आगमेनोपभोगेन नष्टं भाग्यमतोऽन्यथा"।
"न जातु कामः कामानामुपभोगेन शाम्यति"।
इति मनुः। २। ९४॥)

उपमा, स्त्री, (उपमीयते इति। उप+मा+अङ्+टाप्।) उपमानम्। सादृश्यम्। इत्यमरः॥
("स्फटोपमंभूतिसितेन शम्भुना"। इति माघे १।४।
"अपि लक्षितमध्वानं बुबुधे न बुधोपमः"।
इति रघुः। १। ४७।) तस्य वैदिकपर्य्यायः। इदमिव १ इदं यथा २ अग्निर्यथे ३ चतुरस्रिद्दमानात् ४ ब्राह्मणाग्नतचारिणः ५ वृक्षस्यनुतेपुरङ्गतवयाः ६ जारआमगं ७ मेघोभूतोऽभीषग्नपः ८ तदूपः ९ तदर्णः १० तद्वत् ११ तथा १२। इति द्वादशोपमाः। इति वेदनिर्घण्टौ २ अध्यायः॥ (अर्थालङ्कारभेदः। विस्तृतिस्तु उपमालङ्कारशब्दे द्रष्टव्या।)

उपमाता, [ऋ] स्त्री, (उपमिता माता।) धात्री। इति जटाधरः॥ मातुः सदृशी। सा षड्विधा यथाह स्मृतिः।
"मातुःस्वसा मातुलानी पितृव्यस्त्री पितृष्वसा।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः"॥
उपमानकर्त्तरि त्रि॥

उपमानं, क्ली, (उपमीयते इति। उप+मा+ल्युट्।) उपमा। इत्यमरः॥ (यथा, कुमारे। ४।५।
"उपमानमभूदविलासिनां
करणं यत्तव कान्तिमत्तया"।
सादृश्यज्ञानम्। उपमितिकरणम्। यथा गौर्गवयसदृशेतिवाक्ये। "प्रसिद्धसाधर्म्म्यात् साध्यसाधनमुपमानम्"। इति न्यायसूत्रम्। प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणलक्षणम्। अत्र च वैधर्म्म्योपमितिमपि मन्यन्ते टीकाकृतः। यथा च अतिदीर्घग्रीवत्वादिपश्चन्तरवैधर्म्म्याच्च नत्। उष्ट्रे करभपदवाच्यताग्रहः। एवमन्योऽपि उमानस्य विषय इति भाव्यं। तथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमिता विषयीक्रियते इत्यादि॥)

उपमालङ्कारः, पुं, (उपमैव अलङ्कारः।) साम्यालङ्कारः। यथा। उपमामाह।
"साम्यं वाच्यमवैधर्म्म्यं वाक्यैक्ये उपमा द्वयोः"।
तद्भेदाः। सा द्विविधा। पूर्णा लुप्ता च। तल्लक्षणम्। यथा, —
"सा पूर्णा यदि सामान्यधर्म्मे औपम्यवाचि च"।
इयं पुनः औत्पार्थी च। तल्लक्षणन्तु।
"औती यथेववाग्शब्दा इवार्थो वा वतिर्यदि।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः"॥
द्वे विधा। तद्धिते समासेऽथ वाक्ये। उदाहरणम्।
"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले"॥
अत्र क्रमेण त्रिविधा औती।
"मधुरः सुधावदधरः
पल्लववतुल्योऽतिपेलवः पाणिः।
चकितमृगलोचनाभ्यां
सदृशी चपले च लोचने तस्याः"॥
अत्र क्रमेण त्रिविधा आर्थी। पूर्णा षड्वेव तत्।
"लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः॥
त्रयाणां वासुपादाने औत्पार्थी सापि पूर्व्ववत्"॥
इयञ्च तद्धिते औत्पा त्रसम्भवात् पूर्व्वोक्तरीत्या पञ्चप्रकाराः। उदाहरणम्।
"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोऽयवत्"॥
"सा लुप्ता पञ्चधा पुनः।
आधारकर्म्मविहिते द्विविधे च क्यचि क्यङि।
कर्म्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः"॥
उदाहरणम्।
"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः।
वृष्णः प्रियाभिरमृतद्युतिदर्शनेन्द्र-
संचारमत्र भुवि सञ्चरसि क्षितीश"॥
तदेवं दशप्रकारा लुप्ता। सा पुनर्द्विधा। वाक्यगता समासगता च। यथा।
"उपमानानुपादाने द्विधा वाक्यसमासयोः"।
औत्पार्थीत्वभेदेन चतुर्व्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम्। पुनर्द्विधा।
"औपम्यवाचिनो लोपे समासे क्विपि च द्विधा"
उदाहरणम्।
"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्"।
"गर्हयति श्रुतिपरुषं यक्षं निनदन्महात्मनां पुरतः"
पुनर्धर्म्मोपमानयोर्लोपे द्विधा। तद्यथा।
"द्विधा समासे वाक्ये च लोपे धर्म्मोपमानयोः"।
उदाहरणम्।
"तस्या मुखेन सदृशं रम्यं नास्तेन वा नयनतुल्यम्"।
पुनर्द्विधा।
"क्विप्समासगता द्वेधा धर्म्मे वादिविलोपने"।
उदाहरणम्। विधवति मुखाज्ञामस्या इत्यादि।
"उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि"।
उदाहरणम्।
"अरातिविक्रमालोकविकश्वरविलोचनः।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति"॥
धर्म्मोपमेयलोपेऽन्या च। उदाहरणम्। "यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे"।
विलोपे च समासगा। यथा। राजते मृगलोचनेत्यादि।
"तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः"।
पूर्णा षड्विधा। लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा"। इति साहित्यदर्पणस्य १० परिच्छेदात् संगृहीतः॥

उपमितिः, स्त्री, (उप+मि+क्तिन्।) उपमा। इति शब्दरत्नावली॥ न्यायमते सादृश्यज्ञानजन्यज्ञानम्। यथा "गोसदृशो गवयपदवाच्य इत्याकारशक्तिज्ञानम्। अस्य करणं गवादिसादृश्यवत् पिण्डप्रत्यक्षम्। अस्य व्यापारः अतिदिष्टवाक्यार्थस्मरणम्"। इत्युपमानखण्डम्। अपि च। भाषापरिच्छेदे॥ ७९-८०॥
"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सोपमितिः स्मृता॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदागान्तु शक्तिधीरुपमाफलम्॥
पदज्ञानन्तु करणं शक्तिधीरुपमाफलम्"॥

उपमेतः, पुं, (उपमां इतः प्राप्तः।) श्यामलवर्त्तः। इति शब्दचन्द्रिका॥ (श्यामलवर्त्तो हि सर्व्वोन्नतत्वात् उन्नतानामुपमास्थानम्। इत्यर्थः॥)

उपयन्ता, [ऋ] पुं, (उप+यम+तृच्।) पतिः। इति जटाधरः॥ ("अथोपयन्तारमलं समाधिना"। इति कुमारे ५। ४५। "अथोपयन्ता सदृशेन युक्ताम्"। इति रघुः॥७।१॥)

उपयमः, पुं, (उप+यम्+अप्।) विवाहः। इत्यमरः॥

उपयाचकः, त्रि, (उप समीपे याचते इति। उप+याच+ण्वुल्।) समीपे याच्ञाकर्त्ता॥

उपयाचितं, त्रि, (उप+याच्+क्त।) स्वेष्टसिद्धये देवाय देयं वस्तु। तत्पर्य्यायः। दिव्यदोहदम् २। इति त्रिकाण्डशेषः॥ (प्रार्थितम्। यथा, कथासरित्सागरे १३ तरङ्गे।
"तस्योपयाचितान्येत्य तत्रत्याः कुर्व्वते जनाः।
तत्तत्वाञ्छितसंसिद्धिहेतोस्तैस्तैरुपायनैः"॥)

उपयाचितकं, त्रि, (उपयाचित+कन्।) उपयाचि-

तम्। खेऽलब्धये देवदेयम्। इति जटाधरः॥ (यथा, कादम्बरी। "सिद्धायतनानि कृतविविध-देवतोपयाचितकानि"॥)

उपयामः, पुं, (उप+यम्+घञ्।) विवाहः। इत्यमरः। (यज्ञाङ्गपात्रविशेषः। यथा यजुर्व्वेदे ७। ४। ११। "उपयामगृहीतोऽसि"। उपयाम्यतेऽनेन। उप+यम+णिच्+अच्। इति व्युत्पत्त्या सिद्धम्॥)

उपयुक्तः, त्रि, (उप+युज्+क्त।) योग्यः। उचितः॥

उपयोगः, पुं, (उपयुज्यते इति। उप+युज्+घञ्।) आचरणम्। इति विजयरक्षितः। इष्टसिद्ध्यर्थ-व्यापारः। इति विष्णुमिश्रः॥ ("अनङ्गलेखक्रिया-योपयोगम्"। इति कुमारे। १। ७॥ भोजनम्। "औषधान्नविहाराणामुपयोगं सुखावहम्"। इति निदानस्थाने प्रथमेऽध्याये वाभटेनोक्तम्॥)

उपयोगिता, स्त्री (उपयोगिन्+तल्।) उपयोगिनो भावः। फलसाधनता। प्रयोजनम्। आनुकूल्यम्॥

उपयोगी, [न्] त्रि, (उपयोगोऽस्यास्तीति। उप-योग+इनि।) उपयुक्तद्रव्यादिः। क्रियासाधनम्। अनुकूलः॥ ("तदुपयोगीनि शारीरकसूत्रा-दीनि"। इति वेदान्तसारे। २। उपभोगद्रव्यम्। यथा कथासरित्सागरे। १५ तरङ्गे।

"अस्ति कन्यारत्नं मे गृह्यतामुपयोगि चेत्"।)

उपरोषं, व्य, (उपरोषम्। आनन्दः। इत्यमरटीकायां भरतः॥

उपरक्तः, पुं, (उप+रञ्ज+क्त।) राऽग्रस्तः सूर्य्य-चन्द्रश्च। इत्यमरः॥ राऽग्रः। इति हेमचन्द्रः॥

उपरक्तः, त्रि, (उप+रञ्ज+क्त।) व्यसनार्त्तः। दैव-मानुषान्यतरपीड़ायुक्तः। इत्यमरः॥

उपरक्षणं, क्ली (उपगतं रक्षणं यत्र।) रक्षणार्थं सैन्य-स्थापनम्। चौकी इति ख्यातम्। तत्पर्य्यायः। सज्जनम् २। इत्यमरः॥

उपरतः, त्रि, (उप+रम+क्त।) मृतः। इति स्मृतिः। (यथाह नारदः।

"पितुर्य्युपरते पुत्रा विभजेयुर्धनं पितुः"॥)

विरतः॥

उपरतस्पृहः, त्रि, (उपरता नष्टा स्पृहा धनाद्याकाङ्क्षा यस्य।) सत्यपि सत्त्वे स्वगतधनेच्छारहितः। स्व-मागाधिकरणस्वत्वसमानकालीनेच्छा प्रागभावा-समानकालीनेच्छाध्वंसवान्। इति दायतत्त्वम्॥ इच्छारहितः॥ ("पितुर्य्युपरतस्पृहे"। इति याज्ञवल्क्यः॥)

उपरतिः, स्त्री, (उप+रम्+क्तिन्।) विरतिः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये ६१। ८।

"विश्वस्योपरतौ शक्ते नारायणि! नमोऽस्तु ते"॥)

"निगृहीतेन्द्रियाणां विषयेभ्य उपरमणम्। अथवा विहितकर्म्मणां विधिना परित्यागः"। इति वेदान्तः॥

उपरमः, पुं, (उप+रम+घञ्। निपातनात् न वृद्धिः।) उपरतिः। इति हेमचन्द्रः॥ ("येनोपरमे कर्म्मद्रव्यं नियोजयेत्"। इति वैद्यके॥)

उपरसः, पुं, (उपमितं रसेन।) उपधातुः। तद्यथा। खेचरम्। अञ्जनम्। कङ्कुष्ठम्। गन्धारी। गैरिकम्। चित्तिनागः। शैलेयं। इति राजनिर्घण्टः॥

"गन्धो हिङ्गुलमभ्रतालकशिलाः खोतोऽञ्जनङ्कुष्ठम्, राजावर्त्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम्। कासीसं रसकङ्कपर्पटिकता वोलांश्च कङ्कुष्ठकम्, सौराष्ट्री च मता अमी उपरसा सूतस्य किञ्चिद्गुणैः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

उपरागः, पुं, (उप+रञ्ज+घञ्।) राऽग्रस्तचन्द्रः। सूर्य्यश्च। इत्यमरः॥ ("उपरागान्ते शशिनः समु-पगता रोहिणीयोगम्"। इति शाकुन्तले। निकट-स्थितित्वात् निजगुणादेरन्यत्रारोपणम्। यथा स्फटिकस्तम्भे रक्तपुष्पाणां रक्तिमारोपः।) राऽग्रः। विगानम्। परीवादः। इति हेमचन्द्रः॥ दुर्नयः। ग्रहकक्षोलः। व्यसनम्। इति मेदिनी॥ (यथा रघौ १६। ७। "विभर्षि चाकारमनिर्वृतानां मृगाङ्गिनी हैममिवोपरागम्"॥)

उपरामः, पुं, (उप+रम्+घञ्।) निवृत्तिः। तत्प-र्य्यायः। आरतिः २ अवरतिः ३ विरतिः ४ इत्य-मरः॥ विरामः ५ उपरमः ६ इति भरतः॥ आरामः ७ उपरतिः ८ इति हेमचन्द्रः॥

उपरि, व्य, (ऊर्द्धे ऊर्द्धायां ऊर्द्धात् ऊर्द्धायाः ऊर्द्धं ऊर्द्धां वा वसत्यागतो रमणीयं वा। "उपर्य्युपरि-ष्टात्"। ५।३।३१। इति ऊर्द्धस्योपादेशो रिल् प्रत्ययश्च॥) ऊर्द्धम्। इति व्याकरणम्॥ उपर इति भाषा।

("त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः। मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति"॥

इति मेघदूते उत्तरमेघे ३४ श्लोकः।

"अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता"।

इति रघुः। २। ६०॥)

उपरिष्टात्, व्य, (ऊर्द्धे ऊर्द्धायां ऊर्द्धात् ऊर्द्धायाः ऊर्द्धं ऊर्द्धां वा वसति आगतो रमणीयं वा। "उपरि उपरिष्टात्"। ५। ३। ३१। इत्यूर्द्धस्य उपादेशो रिष्टातिल् प्रत्ययश्च।) उपरि। ऊर्द्धम्। इति हेमचन्द्रः॥ (यथा रामायणे ४ काण्डे।

"नाधस्तान्नोपरिष्टाच्च गतिर्गाधिसुतस्य मे"॥)

उपरीतकः, पुं, पृक्कारबन्धविशेषः। आसन बाँधन इत्यादि भाषा। तस्य लक्षणं यथा।

"एकपादमुरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्। नारीं कामयते कामी बन्धः स्यादुपरीतकः"॥ इति रतिमञ्जरी॥ अत्र विपरीतकोऽपि पाठः॥

उपरूपकं, क्ली, (उपमितं रूपकेण।) नाटकविशेषः। स तु अष्टादशविधः। यथा।

"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकन्यथा॥ संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥ अष्टादश प्राऽग्रपरूपकाणि मनीषिणः। विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम्"॥ इति साहित्यदर्पणे ६ परिच्छेदः॥

उपरोधः, पुं, (उप+रुध्+घञ्।) अनुरोधः॥ (प्रतिबन्धः। "अन्येषामपि भैक्षोपजीविनां कृत्यप-रोधं करोषि"। इति महाभारते आदिपर्व्वणि। ३। ७५। "तपोधननिवासिनामुपरोधो माभूत्"। इति शाकुन्तले प्रथमाङ्के॥)

उपरोधकं, क्ली, (उप+रुध्+ण्वुल्।) गर्भागारम्। वासगृहम्। इति शब्दरत्नावली॥

उपर्य्युपरि, व्य, ऊर्द्धोर्द्धं। उपर उपरि इति भाषा। सामीप्यम्। यथा "उपर्य्युपरि यामम्"। इति व्याकरणम्॥

उपलः, पुं, (उपलाति। उप+ला+क।) यहा, उं ग्रभ्नं पलति यः। उ+पल+अच्।) पाषाणः। (यथा,—

"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम्"। इति मेघदूते पूर्व्वमेघे १९ श्लोकः।) रत्नम्। इति मेदिनी॥ (यथा मनुः। ११। १६७।

"मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानाञ्च द्वादशाहं कणाशता"॥

वालुका। यथा, "भिषग्युषाप्रच्छिणी नना"। इति ऋग्वेदे। ६। ११२। ३। "उपलेषु वालुकासु" इति भाष्यम्॥)

उपलक्षणं, क्ली, (उप+लक्ष्+ल्युट्।) अन्यदृत्-स्वार्थलक्षणा।

("खसिद्धये परार्थेऽपि परार्थे स्वसमर्पणम्। उपादानं लक्षणञ्चेत्युक्ता सुद्वैव सा द्विधा॥ यथा कुन्ताः प्रविशन्ति। इत्युपादानम्। गङ्गायां घोषः। इत्युपलक्षणम्"। इति काव्यप्रकाशः॥) एकपदेन तदर्थान्यपदार्थकथनम्। यथा, शुद्धितत्त्वम्।

"देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्ज्वातवेदसम्"॥

अत्र पादुकाद्वयमित्युपलक्षणं द्रव्यान्तरमपि॥

उपलक्ष्यः, पुं, (उप+लक्ष्+ण्यत्।) आश्रयः। अव-लम्बनम्॥

उपलधिप्रियः, पुं, (उपलधिः प्रियो यस्य।) चमर-गामवलजन्तुः। इति राजनिर्घण्टः॥

उपलब्धार्था, स्त्री, (उपलब्धः अर्थो यस्याः।) आख्या-यिका। इत्यमरः॥ हितोपदेशादिकथा॥

उपलब्धिः, स्त्री, (उप+लभ+क्तिन्।) मतिः। प्राप्तिः। (यथा, रघुः ५। ५६। "दृष्टा हि मे स्यात् स्वयदोपलब्धिः"।) ज्ञानम्। इति मेदिनी॥ (यथा महाभारते १४। अनुगीतापर्व्वणि। २२। २९।

"कामन्तु नः खेषु गुणेषु सङ्गः
कामञ्च नान्योन्यगुणोपलब्धिः।
अस्मान् विना नास्ति तवोपलब्धि-
स्तावद्वृते त्वां न भजेत् प्रहर्षः"॥)

उपलभेदी, पुं, (उपलं भिनत्तीति। उपल+भिद्+णिनि।) पाषाणभेदी वृक्षः। इति राजनिर्घण्टः॥ (अश्मभेदशब्देऽस्य गुणादयो ज्ञातव्याः॥)

उपलम्भः, पुं, (उप+लभ+घञ्। उपसर्गात् खल-घञोरिति नुम्।) अनुभवः। इत्यमरः॥ (यथा रघुः १४। २।

"विस्रब्धमन्धतया न दृष्टौ

ज्ञातौ सतसार्ङ्गसुखोपलम्भात्"॥)

उपलम्भः, पुं, (उप + लभ + घञ्। "उपात् प्रशंसायाम्" । ७।१।६६। इत्यनेन सिद्धम्।) स्तवः। स्तवोपयुक्तः। यथा उपलम्भाः साधुः। इति मुग्धबोधव्याकरणम्॥

उपला, स्त्री, (उप + ला + क + टाप्।) शर्करा। इति मेदिनी॥ ("सितोपला तु गोक्षीरी"। इति वैद्यकचक्रपाणिसंग्रहे यक्ष्माधिकारे॥)

उपलिङ्गं, क्ली, (उपमितं लिङ्गेन।) उपद्रवः। अरिष्टम्। इति हेमचन्द्रः॥ ("केनचित् उपलिङ्गानि गायता"। इति हर्षचरिते पञ्चमोच्छ्वासे॥)

उपलेपनं, क्ली, (उप + लिप् + ल्युट्।) गोमयादिलेपनम्। इति त्रिकाण्डशेषः॥ (यथा पञ्चतन्त्रे। "तत्रैव देवायतने संमार्जनोपलेपनमण्डनादिकं कर्म्म समाचापयति"॥)

उपवटः, पुं, (उपमितो वटेन।) प्रियालवृक्षः। इति राजनिर्घण्टः॥ (प्रियालशब्देऽस्य गुणादयो व्याख्येयाः॥)

उपवनं, क्ली, (उपमितं वनेन।) क्षुद्रिमवनम्। बागान इति भाषा। तत्पर्य्यायः। आरामः २। इत्यमरः॥ (यथा, मेघदूते पूर्ब्बमेघे २४ श्लोकः।

"पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः"।
"सा केतुमालोपवना दृषद्वि-
र्विहारशैलानुगतेव नागैः"।

इति रघुः। १६। २६॥)

उपवर्त्तनं, क्ली, (उपागत्य वर्त्तन्ते अत्र। उप + वृत् + ल्युट्।) जनपदः। जनपदसमुदायः। जनपदैकदेशः। सजलनिर्জ্জলস্থানমাত্রম्। इति भरतः॥ तत्पर्य्यायः। देशः २ विषयः ३। इत्यमरः॥ (यथा काशीखण्डे।

"तस्योपवर्त्तनेऽप्येको न श्रुतो गोत्रभित् क्वचित्"॥)

उपवर्षः, पुं, मुनिविशेषः। तत्पर्य्यायः। इलभृतिः २ क्षतकोटिः ३ अयाचितः ४। इति त्रिकाण्डशेषः॥

उपवर्हः, पुं, (उप + वृह + घञ्।) उपधानम्। इत्यमरः॥ बालिश इति भाषा॥

उपवल्किका, स्त्री, अम्लतरुवल्लता। इति राजनिर्घण्टः॥

उपवसथः, पुं, (उपागत्य वसन्ति अत्र। उप + वस् + उपसर्गे वसेः इति अथप्रत्ययः।) ग्रामः। इति हेमचन्द्रः॥ (यथा,—शतपथब्राह्मणे। १। १। ७। "तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः"। यागपूर्ब्बदिनम्॥)

उपवस्त्रं, क्ली, (उप + वस + क्त।) उपवासः। इत्यमरः॥

उपवासः, पुं, (उप + वस + घञ्।) अग्न्याधानम्। इति मलमासतत्त्वम्। अहोरात्रभोजनाभावः। तत्पर्य्यायः। उपवस्तम् २। इत्यमरः॥ उपोषितम् ३ उपोषणम् ४ औपवस्तम् ५। इति तट्टीका॥ अस्य प्रमाणम्।

"उपाहृतस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्ब्बभोगविवर्জ্জितः"॥

अस्यार्थः। उपाहृतस्य निहृतस्य। पापेभ्यः पापकर्म्मभ्यः। गुणाः। सर्ब्बभूतेषु दया क्षान्तिः अनसूया शौचं अनायासः मङ्गलं अकार्पण्यं अस्पृहा च। सर्ब्बभोगविवर्জ্জितः शास्त्राननुमतस्त्रग्गीतादिसुखरहितः। वैधोपवासे भोजनचतुष्टयनिवृत्तिमाह महाभारते।

"सायमाद्यन्तयोरक्तोः सायं प्रातश्च मध्यमे।
उपवासफलं प्रेप्सोर्वर्জ্জ्यं भक्तचतुष्टयम्"॥

उपवासदिने वर्জ্জनीयानि। अञ्जनम्। रोचनम्। गन्धः। पुष्पम्। माल्यम्। अलङ्कारः। दन्तधावनम्। गात्राभ्यङ्गः। शिरोभ्यङ्गः। ताम्बूलम्। यच्चान्यत् बलरागकृत्। दिवास्वापः। अक्षक्रीड़ा। मैथुनम्। स्त्रीणां सरागसम्भोक्तृणस्पर्शौ। व्रतादिषु पुत्रोत्पत्तिपर्य्यन्तं ऋतौ सक्तृत् स्त्रीगमने न दोषः॥ तत्पूर्ब्बापरदिने वर्জ্জनीयानि। कांस्यपात्रे भोजनम्। मांसभोजनम्। सुरापानम्। मधुपानम्। लोभः। वितथभाषणम्। व्यायामः। व्यवायः दिवास्वापः। अञ्जनम्। शिलापिष्टभक्षणम्। मसूरभक्षणम्। पुनर्भोजनम्। अध्वगमनम्। यानम्। व्यायामः। द्यूतक्रीड़ा। अभ्यङ्गः। परान्नम्। तैलम्। चणकम्। कोरदूषकम्। शाकम्। अधिकक्षुतम्। अत्यम्बुपानम्। इति एकादशीतत्त्वम्॥ उपवासासामर्थ्ये प्रतिनिधिः। स्कन्दपुराणम्॥

"पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्"। इति।
"भार्य्या भर्त्तव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा।
असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते"॥

इति गरुड़पुराणम्॥ तदनुकल्पः।

"नक्तं हविष्यान्नमनोदनञ्च
फलं तिलाः क्षीरमथाम्बु चाज्यम्।
यत्यच्चगव्यं यदि वाथ वायुः
प्रशस्तमत्रोत्तरमुत्तरञ्च"॥

इति वायुपुराणम्॥

"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्।
तावद्दानानि वा दद्यादयुङ्मात्रिगुणं भवेत्॥
सहस्रसम्मितां देवीं जपेद्वा प्रागसंयमान्।
कुर्य्याद्वादशसंख्याकान् यथाशक्ति व्रते नरः"॥

इति ब्रह्मवैवर्त्तपुराणम्॥

"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्"॥

इति बौधायनः॥

उपवासी, [न्] त्रि, (उपवासोऽस्यास्तीति। उपवास + इनि।) उपवाससयुक्तः। अहोरात्रभोजनाभावविशिष्टः॥

("विमानैर्हंससंयुक्तैर्यान्ति मासोपवासिनः"। इति महाभारते ३। मार्कण्डेयसमस्यापर्ब्बणि दानकथने। १९९। ५१॥

"दिवोपवासी तु निशामिषाशी
जटाधरः सन् कुलटाभिलाषी।
अयं कषायरसचारदण्डः
शठायणीः सर्पति विश्वभण्डः"॥

इति हास्यार्णवः॥)

उपवाह्यः, पुं, (उत्कृष्टो वाह्यः।) राजवाहकहस्ती। तत्पर्य्यायः। राजवाह्यः २। इति हेमचन्द्रः॥ (गजारोहणादिसम्मानयोग्यः। यथा, रामायणे। २। ४५। १६।

"धर्म्मतः स विशुद्धात्मा वीरः सुदृढ़व्रतः।
उपवाह्यस्तु वो भर्त्ता नोपवाह्यः पुराद्य नः"॥)

उपविषं, क्ली, (उपमितं विषेण।) क्षुद्रिमविषम्। तत्पर्य्यायः। चारं २। गरः ३। इति हेमचन्द्रः॥ (पुं, पारिभाषिकविषः। यथा,—

"अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः"॥

केषाञ्चिन्मते सप्त उपविषाः। यथा,—

"अर्कसेऽण्डधुस्तूरा लाङ्गली करवीरकः।
गुञ्जाहिफेनमित्येताः सप्तोपविषजातयः"॥

इति शार्ङ्गधरे मध्यखण्डे द्वादशाध्याये॥)

उपविषा, स्त्री, (विषमुपगता।) अतिविषा। इत्यमरः॥ आतैष इति भाषा। (अतिविषाशब्देऽस्या गुणादयोऽवगन्तव्याः॥)

उपविष्टः, त्रि, (उप + विश् + क्त।) आसीनः। इति हेमचन्द्रः॥ वसा इति भाषा। (यथा, मार्कण्डेये देवीमाहात्म्ये। ८१। २८। "उपविष्टौ कथाः काश्चित् चक्रतुर्वैश्यपार्थिवौ"॥)

उपवीतं, क्ली, (उप + वि + इ + क्त।) वामस्कन्धार्पितं यज्ञसूत्रम्। यज्ञसूत्रमात्रम्। इत्यमरः॥ पैतर इति भाषा। (यदुक्तमुपनिषदि।

"ऊर्द्धन्तु चिस्तं कार्य्यं तन्तुत्रयमधोस्तम्।
चिस्तञ्चोपवीतं स्यात् तस्यैको ग्रन्थिरिष्यते"॥

देवलश्चाह।

"यज्ञोपवीतकं कुर्य्यात् सूत्राणि नवतन्तवः"।

तदुभयमेव सर्ब्बदा धारणीयं उत्तरीयवस्त्राभावे तु तत्त्रितयं धारणीयम्। यदुक्तम्।

"यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्त्ते च कर्म्मणि।
तृतीयसुत्तरीयार्थं वस्त्रालाभेऽतिदिश्यते"॥

तत्सूत्रभेदञ्च मनुना वर्णभेदेन उक्तः। २। ४४। यथा,

"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्"॥

यथा, माघे। १। ७।

"स्रुतोपवीतं हिमशुभ्रमुत्तकैः"।
"मुक्ताश्चयज्ञोपवीतानि बिभ्रतो हैमवल्कलाः"।

इति कुमारे। ६। ६॥)

उपवेदः, पुं, (उपमितो वेदेन।) प्रधानवेदातिरिक्तवेदः। स चतुर्विधः। आयुर्व्वेदः १ धनुर्व्वेदः २ गान्धर्व्ववेदः ३ स्थापत्यवेदः ४। इति श्रीभागवतम्॥

उपवेशनं, क्ली, (उप + विश् + ल्युट्।) स्थितिः। वैसन इति भाषा। अस्य गुणाः। मेदोदोषश्लेष्मसौकुमार्य्यसुखकारित्वम्। इति राजवल्लभः॥

उपव्याघ्रः, पुं, (उपमितो व्याघ्रेण।) चित्रकः। इति राजनिर्घण्टः॥ चितावाघ इति भाषा। (क्ली, व्याघ्रस्य समीपे इति। शार्दूलसमीपम्॥)

उपशमः, पुं, (उप + शम् + घञ्।) शमता। तत्पर्य्यायः। शमः २ शान्तिः ३ शमथः ४ क्षयान्तयः ५। इति हेमचन्द्रः॥ (यथा, महाभारते १।

पौष्योपाख्याने । ३ । १२० । "न हि मे मन्युरद्यापि उपशमं गच्छति" । तथा प्रबोधचन्द्रोदये । ५ । १५ । "तथायमपि कृतकर्त्तव्यः संप्रति परमामुपशमनिधिं प्राप्तः" ॥)

उपशयः, पुं, (उप + शी + अच् ।) निदानपञ्चकान्तर्गतरोगज्ञानजनकः । तस्य लक्षणम् ।

"हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगं सुखावहम् ॥ विद्यादुपशयं व्याधेः स हि साध्यमिति स्मृतः" । इति निदानम् ॥ ("अस्मिन्नर्थे उपशयः पुनर्हेतुव्याधिविपरीतानां विपरीतार्थकारिणाञ्चौषधान्नविहाराणां उपयोगः सुखानुबन्धः" । इति चरके निदानस्थाने प्रथमोऽध्यायः ॥)

उपशल्यं, क्ली, (उपगतं शल्यम् ।) ग्रामप्रान्तभागः । तत्पर्य्यायः । ग्रामान्तम् २ । इत्यमरः ॥ (यथा, रघौ १५ । ६० ।

"उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ" ॥

"भ्रमंश्च विज्ञानोपशल्ये कमप्याक्रीड़मासाद्य" । इति दशकुमारे ॥)

उपशायः, पुं, (उप + शी + घञ् ।) पर्य्यायशयनार्थकः । प्रहरिकादीनां क्रमेण शयनम् । तत्पर्य्यायः । विशायः २ । इत्यमरः ॥

उपश्रुतं, त्रि, (उप + श्रु + क्त ।) प्रतिश्रुतम् । अङ्गीकृतम् । इत्यमरः ॥

उपश्रुतिः, स्त्री, (उपश्रूयते । उप + श्रु + क्तिन् ।) दैवप्रश्नः । यथाह हारावली ॥

"नक्षं निर्गत्य यत् किञ्चिच्छुभाशुभकरं वचः । श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्" ॥

(उप समीपे श्रुतिः श्रवणम् । समीपश्रवणम् । उपमिता श्रुत्या । वेदसदृशी श्रुतिसदृशत्वात् तथात्वम् ॥)

उपश्लेष्मकः, पुं, (उप + श्लेष्मन् + ण्वुल् ।) व्याधिक्यम् । यथा । उच्चैःश्रवादीन् तेजोभागोपश्लेष्मकतया प्रत्यक्षयोग्यत्वात् । इति बौद्धाधिकारचिन्तामणिः ॥

उपसंग्रहः, पुं, (उपसंगृह्यते इति । उप + सम् + ग्रह् + अप् ।) पादस्पर्शपूर्ब्बकनमस्कारः । तत्पर्य्यायः । पादग्रहणम् २ अभिवादनम् ३ । इति हेमचन्द्रः ॥ (उपकरणम् । यथा, महाभारते ४ । कीचकवधपर्ब्बणि । १६ । १५ ।

"उपातिष्ठन्महाबाहुः पर्य्यङ्के सोपसंग्रहे" ॥)

उपसंग्राह्यं, त्रि, (उपसंगृह्यते इति । उप + सम् + ग्रह् + ण्यत् ।) उपसंग्रहणीयम् । अभिवाद्यम् । पादे ग्रहीतव्यम् । इति हलायुधः ॥ (यथा मनुः । २ । १३२ ।

"भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि" ॥)

उपसंधानं, क्ली, (उपसंधीयतेऽनेन । उप + सम् + धे + ल्युट् इति ल्युट् ।) परिधानवस्त्रम् । इत्यमरः ॥ (यथा मुग्धबोधे शब्दसंज्ञायाम् ।

"बर्हिर्योगोपसंधाने" ॥)

उपसंहारः, पुं, (उपसंहरणम् । उप + सम् + हृ + घञ् ।) अन्तः । शेषः । यथा ।

"उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च" ।

इति सप्तमीप्रकरणे तिथ्यादितत्त्वलिखनम् ॥ (एकत्रीकरणम् । सम्यगाहरणम् ॥)

उपसत्तिः, स्त्री, (उप + सद् + क्तिन् ।) सङ्गमात्रम् । प्रतिपादनम् । सेवा । इति हेमचन्द्रः ॥

उपसद्, पुं, (उप + सद् + क्विप् ।) अग्निविशेषः । यथा । वह्निपुराणे गणभेदनामाध्यायः ॥

"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः । एतेऽग्नयस्त्रयो मुख्या श्रेष्ठाश्चोपसदस्त्रयः" ॥

(स्त्री, यज्ञभेदः । आश्वलायने ४ । ८ । १ "अथोपसद्भिः प्रचरति" । इति । समीपस्थिते व्याचलिङ्गः ॥)

उपसदनं, क्ली, (सदनस्य गृहस्य समीपे । यद्वा, उप + सद + ल्युट् ।) गृहसमीपम् । (यथा रामायणे १ । ५० । १६ ।

"धन्योस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव । यज्ञोपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह" ॥

उपसेवनम् । प्राप्तिः । यथा, महाभारते वनपर्ब्बणि ।

"तत्रोपसदनं चक्रे द्रोणस्येष्वस्त्रकर्म्मणि" ॥)

उपसन्नः, त्रि, (उप + सद् + क्त ।) उपनतः । उपस्थितः । इति हेमचन्द्रः ॥ (यथा, महाभारते १२ । मोक्षधर्म्मपर्ब्बणि । २८७ । ११ ।

"ब्रवीतु भगवांस्तन्नो उपसन्नोऽस्म्यधीहि भोः" ॥)

उपसम्पन्नः, त्रि, (उप + सम् + पद् + क्त ।) यज्ञार्थहतपशुः । तत्पर्य्यायः । प्रमीतः २ प्रोक्षितः ३ । पाकेन रूपरसादिसम्पन्नव्यञ्जनादिः । तत्पर्य्यायः । प्रणीतः २ । इत्यमरः । पर्य्याप्तः । संस्कृतः । प्राप्तः । मृतः । इति हेमचन्द्रः ॥ (यथा, मनुः । ५ । ८१ ।

"श्रोत्रिये तूपसम्पन्ने चिराच्चमसुचिर्भवेत्" ॥)

उपसरः, पुं, (उप + सृ + अप् ।) स्त्रीगम्यादिषु पुरुषादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । तत्पर्य्यायः । प्रजनः २ । इत्यमरः ॥ (यथा, पाणिनिः ३ । ३ । ७१ । "प्रजनन प्रथमगर्भग्रहणम गवामुपसरः" । निरवच्छेदगमनम् । यथा, भट्टिः । "वीनामुपसरं दृष्ट्वा" । अत्र जयमङ्गलस्त्वाह । "वीनां उपसरं नैरन्तर्य्येण निर्गमनम्" ॥)

उपसर्गः, पुं, (उप + सृज् + घञ् ।) रोगभेदः । (यथा, सुश्रुते । "स्त्रीणां हन्युश्चोपसर्गाः प्रभूताः" ।) उपद्रवः । इति मेदिनी ॥ (यथा, मार्कण्डेये ८२ । ७ ।

"उपसर्गानशेषांस्तु महामारीसमुद्भवान्" ।)

धातोः पूर्ब्बवर्त्तिविंशतिसंख्यकप्राद्यवयम् । यथा । प्र । परा । अप । सम् । नि । अव । अनु । निर् । दुर् । वि । अधि । सु । उत् । परि । प्रति । अभि । अति । अपि । उप । आङ् । अस्य प्रमाणम् ।

"निपाताश्चादयो ज्ञेयाः उपसर्गास्तु प्रादयः । द्योतकत्वात् क्रियायोगे लोकादवगता इमे" ॥

स त्रिधा । "धात्वर्थं बाधते कञ्चित्" । यथा आदत्ते । "कञ्चित्तमनुवर्त्तते" । यथा प्रसूते । "तमेव विशिनष्ट्यन्यः" । यथा प्रणमति । "उपसर्गगतिस्त्रिधा" । अपि च ।

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । नीहाराहारसंहारप्रतीहारप्रहारवत्" ॥

इति मुग्धबोधटीकायां दुर्गादासः ॥

उपसर्ज्जनं, क्ली, (उप + सृज् + ल्युट् ।) प्रधानभिन्नम् । तत्पर्य्यायः । अप्रधानम् २ अप्राग्र्यम् ३ । इत्यमरः ॥ (यथा, मनुः ९ । २११ ।

"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते" ॥

(विशेषणम् । त्यागः । उपद्रवः । यथा अनध्यायप्रकरणे मनुः,—

"निर्घाते भूमिचलने ज्योतिषामुपसर्ज्जने" ॥)

उपसर्पकः, त्रि, (उप + सृप् + ण्वुल् ।) उपसर्पणकर्त्ता । उपासकः ॥

उपसर्य्या, स्त्री, (उप + सृ + उपसर्य्या काल्या प्रजने इति साधुः ।) प्राप्तगर्भग्रहणकाला गौः । ऋतुमती गौः । तत्पर्य्यायः । काल्या २ । इत्यमरः ॥ कालप्राप्ता ३ ह्वरत्वा ४ । इति शब्दरत्नावली ॥

उपसार्य्यः, त्रि, (उप + सृ + ण्यत् ।) समीपगमनीयः । (यथा, पाणिनिः ३ । १ । १०४ । "प्रजने काल्येति किम् उपासार्य्या काल्यीप्राप्या इत्यर्थः" ॥)

उपसूर्य्यकं, क्ली, सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे कन् । चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थे कन् ॥ चन्द्रसूर्य्यमण्डलम् । इत्यमरः ॥

उपस्कृतं, क्ली, (उपस्क्रियते स्म इति । उप + स्कृ + क्त ।) मैथुनम् । इति त्रिकाण्डशेषः । उपसर्गग्रस्ते त्रि । तथा च याज्ञवल्क्यः ।

"तेनोपस्कृतो लभते न राज्यं राजनन्दनः" ॥

(ग्रहोपग्रस्तस्वन्नादिः । यथा मनुः,

"नेच्छेत्तोयन्तमादित्यं नास्तं यान्तं कदाचन । नोपस्कृतं न वारिस्थं न मध्यं नभसोगतम्" ॥

व्याप्तम् । यथा, रघुः "रोगोपस्कृततनुर्दुर्बसतिं मुमुक्षुः" ॥)

उपस्करः, पुं, (उप + कृ + अप् समवाये चेति सुट् ।) व्यञ्जनादिसंस्कारार्थधान्याकसर्षपपिप्पलादिः । वेसवार वाटना इत्यादि भाषा । तत्पर्य्यायः । वेसवारः २ । इत्यमरः ॥ (यथा रामायणे । २ । ६५ । ६ ।

"मङ्गलालम्भनीयानि प्राप्तनीयान्युपस्करान् । उपानिन्युस्तथा पुण्याः कुमारीवृद्धलाः स्त्रियः" ॥)

गृहवासोपकरणम् । तच्च दृषदुपलमूर्षादि । कनककुण्डलहारादि । इति श्रीहेमन्तकालिङ्गारः ॥ तथा च याज्ञवल्क्यः ।

"गृहोपस्करवाह्यानां दोह्याभरणकर्म्मणाम् । मूल्यं लब्धन्तु यत्किञ्चित् सुल्कं तत्परिकीर्त्तितम्" ॥ (तथा च मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः" ॥

"सज्योपस्करभेषजः" । इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्यायः ॥)

उपस्त्री, स्त्री, (उपमिता स्त्रिया ।) उपपत्नी । ढेमिनी इति भाषा ॥

उपस्थः, पुं, (उप + स्था + क ।) लिङ्गम् । भगः । क्रोड़ः । इति मेदिनी ॥ ("स्थोपस्थउपाविशत्" । इति गीतायां १ । ४६ ।) गुह्यद्वारम् । इति हेमचन्द्रः ॥ (यथा, मनुः । ८ । १२५ ।

"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चकम्" ॥)

निकटे त्रि । इति शब्दरत्नावली ॥

उपस्थाता, [ऋ] त्रि, (उप समीपे तिष्ठतीति । उप + स्था + तृच् ।) भृत्यः । "प्रेष्यो भृत्य उपस्थाता सेवकोऽभिसरोऽनुगः"। इति शब्दमाला ॥ (ऋत्विग्भेदे, पुं ॥

"भिषगुद्वर्य्यायोपस्थाता रोगी पादचतुष्टयम् । गुणवत् कारणं ज्ञेयं विकारस्योपशान्तये" ॥ इति चरके सूत्रस्थाने नवमोऽध्यायः ।)

उपस्थितः, त्रि, (उप समीपे तिष्ठति स्म । उप + स्था + क्त ।) समीपस्थितः । तत्पर्य्यायः। उपगतः २ उपसन्नः३। इति हेमचन्द्रः ॥ (यथा, रघुवंशे १।८७। "उपस्थितेयं कल्याणी मान्नि कीर्त्तिव एव यत्" । "हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्" । इति च रघुः १ । ४५ ।) मृतः । शोधितः । इति जटाधरः॥ (अनार्षः। यथा पाणिनिः । ६ । १ । २२ । "अद्भुतवदुपस्थिते" अत्र सिद्धान्तकौमुदी । उपस्थितोऽनार्षः" । इति ॥)

उपस्पर्शः, पुं, (उप + स्पृश् + घञ् ।) स्पर्शमात्रम् । स्नानम् । आचमनम् । इति मेदिनी ॥

उपस्पर्शनं, क्ली, (उप + स्पृश् + ल्युट् ।) उपस्पर्शः । इति धरणिः ॥ (यथा रामायणे २ । २५ । २४ । "उपस्पर्शनकाले तु त्वां रक्षन्तु रघूत्तम!" ॥)

उपस्वत्वं, क्ली, (उपगतं स्वत्वम् ।) उत्पन्नम् । लभ्यम् । स्वत्वास्पदीभूतभूम्यादिलब्धधनादि ॥

उपहृतः, त्रि, (उप + हृ + क्त ।) गृहीतः । उत्पातग्रस्तः । अनुग्रहद्रव्यम् । ("करत्यवज्ञोपहृतं पृथक्जनम्" । इति किराते । "किमेभिराशोपहृतात्मवृत्तिभिः"। इति कुमारे । ५ । ७६ ॥)

उपहसितं, क्ली, (उप + हस् + क्त ।) हास्यभेदः इति । जटाधरः॥ (यथा साहित्यदर्पणे इय-परिच्छेदे २२८। "ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च । नीचानामपहसितं तथातिहसितं च षड्भेदाः॥ मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितं । अपहसितं साश्रुं विच्छिन्नाङ्गं भवत्यतिहसितम्" ।) अपहसितमत्र उपहसितम् इत्यपि पाठः ॥

उपहारः, पुं, (उप + हृ + घञ् ।) उपढौकनद्रव्यम् । तत्पर्य्यायः। प्राभृतम् २ प्रदेशनम् ३ उपायनम् ४ उपग्राह्यः ५ उपदा ६। इत्यमरः॥ (यथा,— रघौ ४। ८४।

"रत्नपुष्योपहारेण क्षायमाणार्द्ध पादयोः" । "बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः" । इति मेघदूते पूर्ब्बमेघे ३३ श्लोकः । यथा,— कुमारे । ६ । ४२ ।

"ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्" ॥ उपगतो हारं इति वाक्ये हारनिकटस्थद्रव्यम् । यथा,—नैषधे । १।४८ ॥

"उरोभुवा कुम्भयुगेन शम्भितं नवोपहारेण वरस्त्रुतेन किम्" ॥)

उपहारकः, पुं, कुन्तलदेशः । इति हेमचन्द्रः ॥

उपहासः, पुं, (उप + हस् + घञ् ।) परीहासः । निन्दार्थवाक्यादिः । विदूष ठाट्टा इत्यादि भाषा । "उपहासाय किं न स्यात् असत्सङ्गो मनीषिणाम्"। इति मलमासतत्त्वम् ॥ (तथा, रघुः । १२ । ३७ । "फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम्"॥)

उपहारं, क्ली, (उपहरन्त्यत्र । उप + हृ + घञ् ।) निर्जनस्थानम् । (यथा ऋग्वेदे ८ । ६ । २८ । "उपहरे गिरीणाम्" ।) निकटम् । इत्यमरः॥ ("ऊर्म्मिप्रवाहैर्जाह्नव्याः समानीतमुपहारम्" । इति महाभारते । ३ । कुण्डलाहरणपर्ब्बणि ३०८ ॥ "सर्व्वानाहूय उपहारे वैद्यान्" । इति हर्षचरिते पञ्चमोच्छ्वासे ॥)

उपहरः, पुं, (उप + हृ + घञ् ।) रथः । इत्युणादिकोषः॥ (प्रान्तभागः। यथा ऋग्वेदे । १ । ८७ । २ । "उपहरेषु यदचिध्वं ययिं वय इव मरुतः केनचित्पथा" ॥)

उपांशुः, पुं, (उपगता अंशवो यत्र ।) जपभेदः । इति मेदिनी ॥

"जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः" । इत्यागमः ॥ (निगूढे वाच्यलिङ्गः । यथा, महाभारते । १ । ३ । १६ । "अस्य लोकमुपांशुव्रतं यदेनं कश्चित् ब्राह्मणः कञ्चिदर्थं अभियाचेत्तं तस्मै दद्यादयम्" ॥)

उपांशु, व्य, विजनम् । रहः । इत्यमरो मेदिनी च ॥ (यथा, रघुः ८ । १८ । "परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विस्रसम्" ॥)

उपाकरणं, क्ली, (उपाक्रियतेऽनेन । उप + आ + कृ ल्युट् ।) संस्कारपूर्ब्बकश्रुतिग्रहणम् । इत्यमरः । पशूनां संस्कारपूर्ब्बकबन्धनम् । इति स्मृतिः॥ (यथा, आश्वलायने १ । १ । ४ । "उपाकरणकालेऽश्वमानीय" ॥)

उपाकर्म्म, [न्] (क्ली, उपाक्रियतेऽनेन । उप + आ + कृ + मनिन् ।) उपाकरणम् । इत्यमरटीकायां रायमुकुटः॥ (यथा मनुः । ४ । ११६ । "उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्" ॥)

उपाकृतं, त्रि, (उप + आ + कृ + क्त ।) उपस्कृतम् । इति मेदिनी ॥

उपाकृतः, पुं, (उ + आ + कृ + क्त ।) यज्ञे अभिमन्त्र्य हतः पशुः । इत्यमरः ॥ ("अनुपाकृतमांसानि देवान्नानि हवींषि च" । इति मनुः ।) उपद्रवः । इति हेमचन्द्रः ॥

उपाख्यानं, क्ली, (उप + आ + ख्या + ल्युट् ।) पूर्ब्बवृत्तान्तकथनम् । आख्यानम् । वर्णनम् । विशेषकथनम् । यथा,—

"सर्व्वाख्यानं श्रुतं ब्रह्मन् अतीवपरमाद्भुतम् । अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमुत्तमम्" ॥ इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४४ अध्यायः ॥ "शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम्" । इति च तत्रैव ६८ अध्यायः ॥ ("चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् । उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः" ॥ इति महाभारते १ । १ । १०१ ॥)

उपागमः, पुं, (उप + आ + गम् + अप् ।) स्वीकारः । निकटगमनम् । इत्यजयः ॥

उपाग्रहणं, क्ली, (उप + आ + ग्रह् + ल्युट् ।) उपाकरणम् । संस्कारपूर्ब्बकवेदग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥

उपाङ्कः, पुं, (उपमितं अङ्केन ।) तिलकम् । तत्पर्य्यायः । पत्रावली २ पत्रलेखा ३ पत्राङ्गुलिः ४ पुण्ड्रः ५ तमालपत्रकम् ६ चित्रकम् ७। इति जटाधरः ॥ (पुराण-न्याय-मीमांसा-धर्म्मशास्त्राणि वेदस्य उपाङ्गानि ॥)

उपात्तं, त्रि, (उप + आ + दा + क्त ।) ग्राह्यम् । यथा,— "क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते । अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते ॥ नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिम्" ॥ इति प्रायश्चित्ततत्त्वीयजाबालभविष्यपुराणवचनम् ॥

उपान्तः, पुं, (उप समीपे आन्तः ।) निर्म्मदक्षत्री । इति हलायुधः ॥

उपान्वयः, पुं, (उप + अति + इ + अच् । उपगतस्य अन्वयः अतिक्रम्य गमनं वा ।) शास्त्रतो लोकव्यवहाराच्च अतिक्रमः । अतिक्रमः । क्रमोल्लङ्घनम् । द्वयोः पर्य्यायः । पर्य्यायः २ अतिपातः ३ । इत्यमरः ॥ (यथा पाणिनिः ३ । ३ । ६८ । "परावनुपात्यय इणः" ॥)

उपादानं, क्ली, (उप + आङ् + दा + ल्युट् ।) स्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । प्रत्याहारः २ । इत्यमरः ॥ (ग्रहणम् । "स्यादात्मलाभेऽप्युपादानात् स्वीकारादानशब्दवत्" । इति साहित्यदर्पणे १० परिच्छेदः॥) हेतुः । इति त्रिकाण्डशेषः ॥ न्यायमते ॥ समवायिकारणम् । प्रवृत्तिजनकज्ञानञ्च ॥

उपादेयः, त्रि, (उप + आ + दा + यत् ।) ग्राह्यः । उत्तमः । उत्कृष्टः । इति वेदान्तः ॥ ("भवे सौख्यं हित्वा श्रमसुखमुपादेयमनघम्" । इति शान्तिशतके । १ । २१ ।) विधेयकर्म्म । इति तिथितत्त्वम् ॥

उपाधिः, पुं, (उप + आ + धा + कि ।) धर्म्मचिन्ता । कुटुम्बव्यापृतः । इत्यमरः ॥ छलम् । (यथा रामायणे २ । १११ । २६ ।

"उपाधिर्न मया कार्य्यो वनवासे जुगुप्सितः" ।) विशेषणम् । इति मेदिनी ॥ ("पदार्थविभाजकोपाधिमत्त्वम्" । इति मुक्तावली । ८ ।) नामचिह्नम् । इति शब्दरत्नावली ॥ न्यायमते साध्यव्यापकत्वे सति हेतोरव्यापकः । यथा धूमवान् वह्निरित्यत्र आर्द्रकाष्ठं उपाधिः । अस्य प्रयोजनम् । अभिचारस्यानुमानम् । अलङ्कारमते जातिगुणक्रियायदृच्छाशब्दरूपः ॥

उपाध्यायः, पुं, (उपेत्य अधीयतेऽस्मात् । उप + अधि + इ + घञ् ।) अध्यापकः । इत्यमरः ॥ वेदैकदेशाध्यापकः । यथा,—

"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" ॥ इति भविष्ये २ अध्यायः ॥ मानवे २ । १४५ श्लोके च ॥

उपाध्याया, स्त्री, (उपेत्याधीयतेऽस्याः । इङ्धेति-सूत्रे अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा

ङीषिति घञ्। टाप्।) अध्यापिका। विद्योपदेशिनी। इत्यमरः॥

उपाध्यायानी, स्त्री, (उपाध्यायस्य पत्नी॥ "मातुलोपाध्याययोरानुक् वा" इत्यानुक्।) उपाध्यायपत्नी। इत्यमरः॥ (यथा महाभारते १ ३।६६। "स एवमुक्त उपाध्यायेनोपाध्यायानीमपृच्छत्"॥)

उपाध्यायी, स्त्री, (उपाध्यायस्य पत्नी। आनुगभावपक्षे ङिच्च्।) अध्यापकभार्य्या। इत्यमरः॥

उपानत्, [द्] स्त्री, (उपनह्यते पादावनया। उप+नह+क्विप्। "नहिवृतिवृषीति"। ७३।११६। पूर्व्वपदस्य दीर्घः।) चर्म्मादिनिर्म्मितपादकोषः। जुता इति भाषा। तत्पर्य्यायः। पादुका २ पादूः ३। इत्यमरः॥ पादत्यतिरेकेणात्मोपानद्वहननिषेधो यथा,—

"नाक्षैः क्रीड़ेत् कदाचित्तु स्वयं नोपानहौ वहेत्। अयनस्थो न भुञ्जीत न पाणिस्थं न चासने"॥ इति मानवे ४। ७४॥ "ग्लहं विना कदाचिदपि परिहासेनापि नाक्षादिभिः क्रीड़ेत्। स्वयमित्यभिधानात् आत्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत्। अन्यावस्थितश्च न भुञ्जीत हस्ते च प्रभूतमन्नं क्षत्वा क्रमेण न खादेत्। आसने भोजनपात्रं निधाय न भुञ्जीत। इति तट्टीकायां कुल्लूकभट्टः॥ (यथा नैषधे १।१२३।

"क्षतावहोरस्य हयादुपानहौ"।

"अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत्। पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणाम्"॥ इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

उपान्तः, त्रि, (उपगतोऽन्तात्।) निकटम्। इति हेमचन्द्रः॥ ("दिशामुपान्तेषु ससर्ज दृष्टिम्"। इति कुमारे ३।६६। "उपान्तवानीरगृहाणि दृष्ट्वा"। इति रघुः १६। २१। "ग्रथ्योपान्तनिविष्टसस्मितमुखी"। इति साहित्यदर्पणे ३य परिच्छेदे॥)

उपायः, पुं, (उपाय्यतेऽनेन। उप+अय+घञ्।) राजादीनां शत्रुवशीकरणहेतुचतुष्टयम्। यथा। साम १ दानम् २ भेदः ३ दण्डः। इत्यमरः॥ उपगतिः। इति मेदिनी॥ स्वार्थसम्पादकः। साधनम्। यथा,—

"उपायतः समारम्भाः सर्व्वे सिद्ध्यन्त्युपक्रमाः। उपायं पश्य येन त्वं धारयेथाः प्रजा नृप"॥ इति वह्निपुराणे पृथूपाख्याननामाध्यायः॥ ("उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"। इति हितोपदेशे। तथा, माघः २। ५४।

"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"। "सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः"। इति मनुः ७।१७७। चेष्टा। यत्नः।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः"। इति मनुः ८। ४८।

"अध्ययनमध्यापनं तदिधासमाधेयुपायाः"। "उपायः पुनः कार्य्यादीनां सौष्ठवमभिधानं च सम्यक् कार्य्याकार्य्यफलानुबन्धवर्ज्यानां कार्य्याणामभिनिर्वर्त्तकः इत्यतोऽप्युपायः क्षतेनोपायार्थोऽस्ति न च विद्यते तदात्वे क्षताच्चोत्तरकालं फलं फलस्यानुबन्ध इति ज्ञातं दशविधम्"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपायनं क्ली, (उपेयते उपाय्यते वा। उप+इण वा अय+ल्युट्।) उपहारः। उपढौकनद्रव्यम्। इत्यमरः॥ (यथा, कुमारे। २। ३७।

"तस्योपायनयोग्यानि रत्नानि सरितां पतिः"।) व्रतादिप्रतिष्ठा। इति स्मृतिः॥ समीपगमनम्॥ (यथा ऋग्वेदे २। २८। २।

"उपायन उषसां गोमतीनाम्"॥)

उपार्ज्जनं, क्ली, (उप+अर्ज्ज+ल्युट्।) अर्ज्जनम्। धनाद्याहरणम्। (यथा, रामायणे। ५ काण्डे।

"शस्त्राणां सरथानाञ्च कृत्वा सम्यगुपार्जनम्"।)

"सत्यहेतुभूतव्यापारः"। इति स्मृतिः॥

उपालम्भः, पुं, (उप+आ+लभ्+घञ्। "उपसर्गात् खलघञोः" इति नुम्।) दुर्व्वाक्यम्। इति हलायुधः॥ स च गुणाविष्करणेन स्तुतिपूर्व्वकः। यथा, महाकुलस्य भवतः किमिदमुचितमिति। निन्दापूर्व्वकश्च। यथा बन्धकीसुतस्य भवतस्तदिदमुचितमिति भागुरिः। इत्यमरटीकासारसुन्दरी॥ ("उपालम्भो नाम हेतोर्दोषवचनं यथापूर्व्वमहेतवो हेत्वाभासा व्याख्याताः"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपाहृतः, त्रि, (उप+आ+हृ+क्त।) श्रमशान्त्यर्थं पुनःपुनर्भुमौ लुठितात्मः। इत्यमरः। निकृत्तः। तथाचैकादशीतत्त्वे।

"उपाहृतस्य पापेभ्यो यस्तु वासो गुणैः सह। उपवासः स विज्ञेयः सर्व्वभोगविवर्ज्जितः"॥

उपासकः, पुं, स्त्री, (उपास्ते सेवते यः। उप+आस्+ण्वुल्। द्विजातिसेवकत्वादस्य तथात्वम्।) शूद्रः। इति राजनिर्घण्टः॥

उपासकः, त्रि, (उपासते इति। उप+आस्+ण्वुल्।) उपासनाकर्त्ता। (यथा, वेदान्ते।

"चिन्मयस्यादितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"॥) स च पञ्चविधः। वैष्णवः १ शाक्तः २ शैवः ३ सौरः ४ गाणपत्यः ५। त्रिविधश्च यथा। दिव्यः १ वीरः २ पशुः ३। इत्यागमः॥ अपि च। सात्त्विकः १ राजसिकः २ तामसिकश्च ३॥

उपासङ्गः, पुं, (उपासज्यन्ते शरा अत्र। उप+आङ्+सञ्ज+घञ्।) तूणीरः। इत्यमरः॥ (यथा, महाभारते ४। उत्तरस्य अस्त्रदर्शने ४०। ६।

"इमे च कस्य नाराचा सहस्रं लोमवाहिनः। समन्तात् कलधौताग्रा उपासङ्गे हिरण्मये"॥)

उपासनं, क्ली, (उपास्यन्ते क्षिप्यन्ते शरा अत्र। उप+आस क्षेपे+अधिकरणे ल्युट्। शुश्रूषादिपक्षे आस भावे+ल्युट्।) शराभ्यासः। (यथा रामायणे। २। ६७। २१।

"श्रूयते तत्र निर्घोष इष्वस्त्राणामुपासने"।) शुश्रूषा। इत्यमरः॥ ("नित्यनैमित्तिकप्रायश्चित्तोपासनेन"। "उपासनानि शाण्डिल्यविद्यादीनि"। इति च वेदान्तसारे।) विहिंसनम्। इति विश्वः॥ आसनम्। इति मेदिनी॥ ("मङ्गल्योपासनं शस्तं दृष्टिदं व्यसनापहम्"। इति चक्रपाणिदत्तद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे॥)

उपासना, स्त्री, (उपासनमिति। उप+आस्+युच्+टाप्।) सेवा। तत्पर्य्यायः। परिचर्य्या २ शुश्रूषा ३ परिचर्य्या ४ उपासनम् ५। इत्यमरः॥ ("न विष्णूपासना मिथ्या वेदेनोक्ता तु कुत्रचित्। न विष्णुदीक्षा नित्यास्ति शिवस्यापि तथैव च॥ गायत्र्युपासना नित्या सर्व्ववेदैः समीरिता। यया विना त्वधःपातो ब्राह्मणस्यास्ति सर्व्वथा॥ तावता कृतकृत्यत्वं नान्यापेक्षा द्विजस्य हि। गायत्रीमात्रनिष्ठातो द्विजो मोक्षमवाप्नुयात्॥ कुर्य्यादन्यन्न वा कुर्य्यात् इति प्राह मनुः स्वयम्। विहाय तान्तु गायत्रीं विष्णूपास्तिपरायणः॥ शिवोपास्तिरतो विप्रो नरकं याति सर्व्वथा। तस्मादाद्यगुणे राजन् गायत्रीव्रतपत्तराः॥ देवीपादाम्बुजरता आसन् सर्व्व द्विजोत्तमाः"॥ इति श्रीदेवीभागवतम्॥

सत्यपि ईश्वरे न हि तस्य सर्व्वैश्वर्य्यवत्त्वात् सर्व्वतः पूर्णकामत्वाच्च उपासनयालमिति वाच्यम्। यतः सर्व्वेषामपि भूतजातानामविदितात्मतत्त्वानामपि सुखोत्पत्त्यादिकारणे अलक्षितत्वेनापि प्रीतिरिति नैसर्गिकी वृत्तिरेव। परं यदि च रजस्तमोभ्यामन्धीभूतानां सुतरामात्मानात्मविवेकविहीनानामज्ञमनुष्याणामविद्याकामकर्म्मकलुषीकृते चित्ते नित्यमुक्तशुद्धबुद्धस्वभावः प्रशान्तविमलज्योतिःस्वरूपः स सर्व्वभूतान्तरात्मा न सम्यक् प्रतिभाति। तथा च आत्मस्वरूपमजानन्नपि सर्व्वोऽपि जनः स्वभावत्वेव परमप्रीत्यात्मानं भजते नोचेत् कथमात्मज्ञानविमूढोऽपि अनेनैव मे श्रेयो भविता अस्मिन् कृतेऽहं सुखी भवेयम् इत्याकारेण सर्व्वथा आत्मसुखोत्पादनाय प्रयतते? तस्य सर्व्वान्तरात्मत्वात् सर्व्वैरपि जीवैः सह नित्यसम्बन्धवत्त्वाच्च। यद्यपि तस्मिन् नित्यानन्दस्वरूपे भगवति परमेश्वरे एकान्तप्रीतिकरणमेव तदुपासनं तथापि सर्व्वलोकमोहप्रदायिन्यां अज्ञानावरणकारिण्यामविद्यायां सत्यां कुतः सा सर्व्वसुखप्रदा तापत्रयच्छेत्री परमा प्रीतिरनुभवनीया? अतस्तस्या आत्मज्ञानविलोपिन्या मलिनसत्त्वगुणाया रजस्तमःप्रधानाया अविद्यायाः प्रणाशनार्थमेवावश्यमुपासना करणीयेति सर्व्वेषामपि शास्त्राणां सारमतमिति बोध्यम्। परन्तु सबलदुर्ब्बलाद्यधिकारिभेदेन उपासनाया अपि प्रभेदउपदिष्टत्वदर्शिभिः। यदि च मनुष्याणां निःश्रेयसार्थं बहवः पन्थानः स्वमतानुसारेण शास्त्रकृद्भिरुपदिष्टास्तत्रापि आत्मज्ञानमेवाविद्यानाशनायालमिति वेदान्त-भगवद्गीता-पातञ्जल-साङ्ख्यादिज्ञानशास्त्रोपदेष्टृणां प्रशस्तमतमित्येव दृश्यते। वस्तुतस्तु तज्ज्ञानमेव मुक्तेः साक्षात्कारणनित्यत्र नैव केषाञ्चिदपि संशयावसरः। किन्तु नैव योगाभ्यासादृते प्रायेण तत्त्वज्ञान-

स्योत्पत्तिः। विशेषतः श्लोकमोहनिमित्तमाह। अर्जुनायेदं भगवता वासुदेवेनाप्युपदिष्टम्। यथा, भगवद्गीतायाम्। ६। ४५-४७।

"प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्জ্জুন!॥
योगिनामपि सर्ब्बेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः"॥

तथा च श्रीमद्भागवते। ३। २५। १३।

"स्वमातरं देवभूतिं प्रति कपिलोक्तिः। यथा,

"योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे।
अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च"॥

योगाश्चापि क्रियाभक्तिज्ञानादिभेदेन बहुधा सन्ति तत्र प्रथमतः क्रियायोग एव तत्त्वज्ञानप्रेप्सुनाप्यविद्वषा संसारासक्तमनसा समाचरणीयः॥ ननु "ज्ञानादृते मुक्तिर्नास्ति"। "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। "विद्ययामृतमश्नुते"। इत्यादौ सति कथं क्रियायोग एवारभणीय इत्युपदिश्यते? इति चेत् सत्यम्। किन्तु लोके हि श्रद्धाभक्तितपस्यादिषु सात्त्विकराजसतामसादिप्रकृतिभेदात् तेषामविद्याविमोहितानां स्वस्वगुणानुसारिणीं प्रवृत्तिं विचार्य्य श्रोत्रियांस्तान् प्रत्यनुकम्पाविशेषाभिमानमोहरागद्वेषादिपरिहरणेन शनैः शनैः सत्त्वशोधनार्थं महात्मभिः शास्त्रकृद्भिरादौ क्रियायोगएव विहितः। कीदृशस्तेषां गुणानुसारिण्यः प्रवृत्तयस्ताद्दृशीभिः प्रवृत्तिभिः समन्वितानां कार्य्यं वा किमिति चेत् अवधार्य्यताम्। यथा, भगवद्गीतायाम्। १७। ३—१३॥

"सत्त्वानुरूपा सर्ब्बस्य श्रद्धा भवति भारत!।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥
आहारस्त्वपि सर्ब्बस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। [प्रियाः॥
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम्॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते"॥

"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः"।

इत्यत्र "अतिशुष्कः कट्वादिषु समस्तेषि सम्बध्यते। तेन अतिकटुर्निम्बादिः अत्यम्लोऽतिलवणोऽत्युष्णश्च प्रसिद्धः अतितीक्ष्णो मरिचादिः अतिरूक्षः कङ्कोडवादिः अतिविदाही सर्षपादिः"॥ इति स्वामी। अमेध्यम् अपवित्रम्॥ यष्टव्यं यजनीयमर्च्चनीयमिति यावत्॥ फलमभिसन्धाय उद्दिश्य इज्यते यज्ञः क्रियते इत्यर्थः॥ ब्राह्मणादिभ्यो न दृष्टं दत्तमन्नं यदा न निष्पादितमन्नं भक्ष्यभोज्यादिकं यस्मिन् यज्ञे तम्। विधिहीनं शास्त्रोक्तविधिशून्यम्। अदत्तिणं दत्तिणारहितमिति॥

नन्वेवं चेत् तर्हि कीदृशोऽयमविद्वषानुष्ठेयः क्रियायोगस्तस्य सत्त्वशोधनार्थं इति जिज्ञासायां ब्रूमः॥ यथा, पातञ्जले।

"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"॥

तपः शास्त्रान्तरोपदिष्टं चान्द्रायणादि, स्वाध्यायः प्रणवपूर्ब्बाणां मन्त्राणां जपः। ईश्वरप्रणिधानं सर्ब्बक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणम्। एतानि क्रियायोग उच्यते। इति राजमार्त्तण्डवृत्तिः।

यंचयत्र चान्द्रायणादीति तपसोऽर्थो व्याख्यातः किन्तु शास्त्रान्तरे मतान्तरमपि दृश्यते तच्च कायिकादिभेदेन त्रिविधम्। यथा, भगवद्गीतायाम्। १७। १४—१६।

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्জ্জवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते"॥

एतेषां तपसामपि त्रिगुणानुसारिप्रकृत्यादिभेदेन तपःकर्म्माण्यपि त्रिविधानि परिकीर्त्तितानि। तत्रैव। १७। १७—१९॥

"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्"॥

अपि च अशेषतः कर्म्मणां त्यागः कर्त्तव्यः नित्यादिकं कर्त्तव्यं वेति ज्ञातसंशयमर्জ্জুनं प्रति भगवतउपदेशः। यथा, तत्रैव। १८। ३—१०॥

"त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येवं यत्कर्म्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेऽर्জ্জুन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥
न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः"॥

कार्य्यमिति। कार्य्यं कर्त्तव्यं नियतं नित्यमित्यर्थः॥ फलतः न हि देहधारिणामशेषतः कर्म्मणस्त्यागः सम्भवेत् यथा, तत्रैव। १८। ११॥

"न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते"॥

परं अनिष्टादिफलमत्यागिनामिव न हि सन्न्यासिनां कदाचित् फलसम्बन्धः। तत्रैव। १८। १२॥

"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्"॥

अतः काम्यानां कर्म्मणां परित्यागस्तथा सर्ब्बतः फलाभिसन्धानत्यागपूर्ब्बस्य ईश्वरार्पणपरस्य वा नित्यादेः कर्म्मणः करणमेव सत्त्वशोधनार्थं प्रशस्यते। यतः सर्ब्बत्र सात्त्विकज्ञानस्यैव संसारबन्धनच्छेत्तृत्वं राजसतामसयोस्तु भेदज्ञानत्वात् संकीर्णज्ञानत्वाच्च बन्धमोहकारित्वमेव दृश्यते यथा, तत्रैव। १८। २०-२२॥

"सर्ब्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्ब्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥
यत् तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्"॥

सुतरां तेषां गुणभेदेन कर्म्माण्यपि पृथक्त्वेनोक्तानि। यथा, तत्रैव। १८। २३-२५॥

"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत्सात्त्विकमुच्यते॥
यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत् तामसमुच्यते"॥

कर्त्तारोऽपि त्रिविधाः। तत्रैव। १८। २६-२८॥

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्त्विक उच्यते॥
रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः॥
अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"॥

एवं सति सर्ब्वत्र हि विशुद्धसत्त्वगुणस्यैव ब्रह्मसिद्धये कारणत्वं बोध्यते। विशुद्धसत्त्वाश्रयी साधको हि शनैः शनैः भक्त्यात्मकस्य क्रियात्मकादेर्वा योगादेर्निरन्तराभ्यासबलात् आदिपदेनाच केवलं विद्याबलाद् वेति सूच्यते। निष्कामः सन् सत्त्वोद्रेकेणान्तःकरणस्यानि सर्ब्वाणि पापानि सन्दह्य तत्त्वज्ञानं प्राप्नुयात्। ततस्तज्ज्ञानेनात्मसाक्षात्कारं लब्ध्वा जीवन्मुक्तो भवेत्। ततः कैवल्यं प्राप्य नित्यानन्दमयो भवेत्।

अतएव सर्व्वमङ्गलोपायीभूतस्य सत्त्वगुणस्योद्रेकाय दुर्ब्बलाधिकारिभिः प्रथमं निष्कामेणान्तःकरणेन क्रियायोगादिरूपेश्वरोपासना कार्य्येति लक्ष्यते न हि सत्त्वभावेन परमेश्वरोपासनामृते रजस्तमोभावाः केनापि विलापयितुं शक्येरन्। तदभावे नितरां विशुद्धसत्त्वगुणोद्रेकाशा सुदूरपराहतैव। प्रबलरजस्तमोभ्यामस्याभिभूतत्वात्। एवं सति सर्व्वतः सात्त्विकाहारः सात्त्विकानुष्ठानं सात्त्विकारण्यमित्यादिसत्त्वभावाश्रयेण क्रमशः रजस्तमोभावं विलापयन् कैवल्याकाङ्क्षी परामात्मसाक्षात्काराभिलाषी वा साधकः कालेन परमसिद्धिं ध्रुवमाप्नुयादेव। परन्तु दुर्ब्बलाधिकारिणां प्रथमतश्चित्तस्य स्थिरत्वापादनाय काचित् स्वाभीष्टां भागवतीं मूर्त्तिमालम्बैवोपासना कर्त्तव्या अन्यथा तेषां सर्व्वरूपाद्युपाधिपरिवर्जिते निर्व्विकारे निरञ्जने गुणातीतेऽवाङ्मनसगोचरे परब्रह्मणि चित्तधारणा विडम्बनैव। परन्त्वित्यत्र न हि ईश्वरोपासनामुपलक्षीकृत्य कथं पौत्तलिकाडम्बरं प्रतिपादयितुं प्रयतसे इति वाच्यम् महात्मभिर्ब्रह्मविद्भिः पूर्ब्बाचार्य्यैर्हि कलुषितचित्तानां दुर्ब्बलाधिकारिणाम् चित्तशुद्धौ प्रथमतश्चित्तस्थैर्य्यसम्पादनाय धारणाध्यानावलम्बनरूपायां प्रतिमायामुपासनायाः कर्त्तव्यतयोपदिष्टत्वात्। अयमर्थः यावत् न सत्त्वोद्रेकेण चित्तशुद्धिर्भवेत् यावन्न स्वहृदये निर्गुणपरमात्मधारणया समाधिशक्तिर्भवेत् यावन्न तत्कथादिषु दृढ़ाभक्तिः रतिश्च भवेत् तावदर्चादौ आदिपदेनाच सूर्य्ये वह्नौ जले अभीष्टमूर्त्तौ वा उपासना कर्त्तव्येत्यर्थः। परमेवं मा मन्यध्वं यत् केवलं मच्छिलादिनिर्म्मितप्रतिमूर्त्तिमाश्रित्यैव यावज्जीवं स्थूलोपासना कर्त्तव्येति॥ "आसत्वशोधनात् क्रमेण स्वहृदये दृढ़तरधारणाध्यानप्रभावेन आचित्तसमाधानाच्च"। इति कालनिर्द्देशात्। पश्चात्तु आदौ नित्यावश्यकर्म्म करणीयमेव। एवं कर्म्मणैव हि बहवः सिद्धिं गताः तथा हि भगवद्गीतायाम्। ३। १९-२०॥

"तस्मादसक्तः सततं कार्य्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः"॥

यदा तु रजस्तमोभावानां निवृत्तौ सत्यां बहुजन्मार्ज्जितसौभाग्यवशात् तस्मिन्नेव ऐकान्तिकी रतिरुत्पद्यते तादृशस्यात्मरतेरात्मक्रीड़स्य योगिनः न तदा किञ्चिदपि कर्म्मणा प्रयोजनमस्ति यथा तत्रैव। ३। १७-१८॥

"यस्त्वात्मरतिरेव स्यादात्मक्रीड़श्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः"॥

एवं प्राप्तविद्योऽपि साधारणवत् कर्म्माचरेत् चेत् तत्तु केवलं लोकशिक्षार्थमेव न तु तस्य स्वाभीष्टसिद्धये अविद्याकामकर्म्माद्यभावात् सुखदुःखादिद्वन्द्वनिर्म्मुक्तत्वाच।

यथा तत्रैव ३। २१,२५ श्लोके।

"यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत!।
कुर्य्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्"॥

किन्तु यावदस्मिन् विधातुके श्लेष्मितशुक्रपरिणामपिण्डे शरीरे कर्त्तृत्वाद्यभिमानवान् तावत् "ब्रह्मज्ञोऽस्मि अलं मे कर्म्मणा" इत्येवं मौढ्यात् संसारासक्तोऽतत्त्वज्ञपुरुषः कर्त्तव्यं कर्म्म परित्यजति चेत् उभयतो भ्रश्यत एव। तथाहि योगवाशिष्ठे मोक्षप्रकरणे ७४। ४१।

"संसारविषयासक्तो ब्रह्मज्ञोऽस्मीति वादिनः।
कर्म्मब्रह्मोभयभ्रष्टस्त्यजेदन्त्यज यथा"॥

अतएव कर्म्मत्यागे प्रायशो दोषएव न तु क्वचित् विधिर्लक्ष्यते यतो विद्योदये तत्त्वज्ञानी विधिनिषेधसापेक्षो भवितुं नार्हति सर्व्ववासनाकामकर्म्ममय्यविद्याभावात् न हि विधिनिषेधाभ्यां सह विदुषः कोऽपि सम्बन्धः। किन्तु अदूरदर्शिनो मन्दस्य तत्त्वज्ञानोपदेशेन कर्म्मानुष्ठानाद् बुद्धिभेदो न कर्त्तव्य इत्यादिशति भगवान् वासुदेवः। यथा भगवद्गीतायां ३। २६, २९॥

"न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्"॥
"प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्"॥

भवतु अलं बहुना वाग्जालेन। योऽस्य विश्वस्य आकाशवत् सर्व्वदा सर्व्वत्र ओतप्रोतरूपेण अन्तर्बहिर्विराजते तस्य सर्व्वव्यापिनः सर्व्वान्तर्यामिनः परमपुरुषस्य स्वरूपभावे यावन्न साधकस्य स्वहृदये धारणाध्यानादिभिः स्थैर्य्यमापद्यते तावदर्चादावेवोपासना कार्य्या दुर्ब्बलाधिकारिणेत्येव निष्कर्षः॥ तथा हि कुलार्णवतन्त्रे ६ उल्लासे।

"चिन्मयस्याप्रमेयस्य निर्गुणस्याशरीरिणः।
साधकानां हितार्थाय ब्रह्मणो रूपकल्पना॥
अरूपं रूपिणं कृत्वा कर्म्मकाण्डरता नराः।
ब्रह्मज्ञानामृतानन्दपराः सुकृतिनो नराः"॥

किञ्च तत्रैव ९ उल्लासे।

"निर्व्विशेषं परं ब्रह्म साक्षात् कर्त्तुमनीश्वराः।
ये मन्दास्तेऽनुकल्प्यन्ते सविशेषनिरूपणैः"॥

अधिकारिभेदेनालम्बनीयोपास्यदेवस्यापि भेदः प्रदर्शितः। यथा। तत्रैव ६ उल्लासे।

"अग्नौ तिष्ठति विप्राणां हृदि देवो मनीषिणाम्।
प्रतिमास्वल्पबुद्धीनां सर्व्वत्र विदितात्मनाम्"॥

अपि च कति दिनानि यावत् कर्म्माणि कर्त्तव्यानि अर्थाद्यधिष्ठानेऽर्चनं वा कर्त्तव्यमिति विवित्सायां मूढ़ान् प्रत्यनुकम्प्य तत्रापदिदिक्षुः पूर्ब्बाचार्य्याः। यथा भागवते ११। २०। ९॥

"तावत्कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते"॥

तथा, तत्रैव ३। २९। २५॥

"अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्म्मकृत्।
यावन्न वेद स्वहृदि सर्व्वभूतेष्ववस्थितम्"॥

ननु निःश्रेयसार्थिनां साधकानां यदि प्रथमतः क्रियायोगरूप कर्त्तव्यः तर्हि अलं प्रमाणशतविस्तारेण तत्र परम्पराकर्त्तव्यमेव विधीयतामिति चेत् अवधेहि यत्पदावलम्बनेन सत्त्वे शोधिते सति दुर्ब्बलाधिकार्य्यपि सत्वरं सबलाधिकारित्वं याति। यथा, भागवते ३। २८। १-५।

श्रीभगवानुवाच। (कपिलदेवः।)

"योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे।
मनो येनैव विधिना प्रसन्नं याति सत्पथम्॥
स्वधर्म्माचरणं शक्त्या विधर्म्माच्च निवर्त्तनम्।
दैवाल्लब्धेन सन्तोष आत्मविचरणार्चनम्॥
ग्राम्यधर्म्मनिवृत्तिश्च मोक्षधर्म्मरतिस्तथा।
मितमेध्याद्यनं श्रश्वद् विविक्तक्षेमसेवनम्॥
अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः।
ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्॥
मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः।
प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि"॥

सबीजस्य सकारणस्य योगस्य इत्यर्थः॥ विधर्म्मा-लोकामिश्रकारित्वादिविरुद्धधर्म्मात्॥ दैवाल्लब्धेन प्रारब्धलब्धेन॥ आत्मविदिति। आत्मतत्त्वज्ञानिनां चरणसेवनम्॥ ग्राम्यधर्म्मेति मोक्षपथं विहाय धर्म्मार्थकामादयः ग्राम्यधर्म्मत्वेनोच्यन्ते अतएव ग्राम्यधर्म्मस्त्रैवर्गिकधर्म्मस्तन्निवृत्तिः॥ मितमिति मितं स्वल्पं मेध्यादनं पवित्रद्रव्यभोजनम् विविक्ते निर्जने क्षेमस्य मङ्गलस्य सेवनम्॥ अस्तेयमचौर्य्यम्॥ यावदर्थपरिग्रह इति। यावतार्थेन जीवेत तावन्मात्रस्य परिग्रहः॥ ब्रह्मचर्य्यं योषित्सङ्गराहित्यम्॥ स्वाध्याय इति स्वाध्यायः जपाध्ययनादिः॥ पुरुषार्चनं परमपुरुषस्य उपासनम्॥ मौनमिति मौनं मुनेर्व्रताचरणं मननशीलत्ववाचां संयमत्वं वा॥ आसनानां स्वस्तिकादीनां विजयः॥ स्थैर्य्यं दीर्घकालमवस्थातुं शक्तिः॥ प्राणजयः प्राणायामैः प्राणनिरोधकरणसामर्थ्यम्॥ प्रत्याहारेति॥ मनसा सह इन्द्रियाणां शब्दस्पर्शादिविषयात् हृदि हृदये प्रत्याहारः प्रत्याकर्षणम्॥ तत्रैव। ३। २८। ६-९॥

"स्वाधिष्ठानामेकदेशे मनसा प्राणधारणम्।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम्।
बुद्धा युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः॥
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्।
तस्मिन् स्वस्तिसमासीनः ऋजुकायः समभ्यसेत्॥
प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम्"॥

स्वाधिष्ठानामिति। मूलाधारादिचक्राणामेकस्मिन् स्थाने मनसा सह प्राणानां धारणम्॥ वैकुण्ठेति। वैकुण्ठस्याकुण्ठितस्य सुखदुःखादिभिरपरामृष्टस्य परमपुरुषस्य लीलाभिध्यानं हृष्यादित्यापारसमालोचनम्। आत्मनो मनसः समाधानमैकाग्र्यसाधनम्॥ जितप्राणो निरुद्धप्राणवृत्तिः। अतन्द्रितः निरलसः॥ विजितासनः वशीकृतकरचरणादिसंस्थानविशेषः॥ प्राणस्येति।

प्रतिकूलेन विपर्य्ययक्रमेण वा चित्तं यथा येन प्रकारेण स्थिरमचञ्चलं चाचाल्यरहितं स्यात् तथा प्राणमार्गं शोधयेदित्यर्थः॥ तेन किं स्यादित्यत आह। तत्रैव ३।२।१०॥

"मनोऽचिरात् स्यादिरजं जितश्वासस्य योगिनः।
वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्"॥

निरुद्धप्राणदोषस्य योगिनः मनोऽचिरात् वह्निता-पितलोहवत् अविद्याकामकर्म्मजनितमलं विषय-सङ्गजनितपापनिचयमित्यर्थः विहाय विरजं निर्म्मलं स्यात्। इदानीं पूर्व्वोपदिष्टप्राणायामादिना केन कार्य्येण किं फलं स्यात् तत्सर्व्वं क्रमेण सुयुक्तं बोधयति। तत्रैव ३।२८।११-१२॥

"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्॥
यदा मनः स्वं विरजं योगेन सुसमाहितम्।
कार्ष्णं भगवतो ध्यायेत् खनासाग्रावलोकनः"॥

प्राणायामदारा वातपित्तश्लेष्मादिदोषान् धारणया पापानि प्रत्याहारेण इन्द्रियाकर्षणेन विषय-संसर्गान् ध्यानेन अनीश्वरान् शोकमोहाभिमानदम्भक्रोधमात्सर्य्यादिदोषान् दहेदित्यन्वयः। अनेन विधिना यदा मनः स्थिरतां याति तदा युञ्जानो योगी प्रथमे धारणालम्बनस्वरूपां भगवतः काञ्चित् स्वाभीष्टां मूर्त्तिं ध्यायेदित्युपदिदेश भगवान् कपिलदेवः॥ इदानीं ध्येयमूर्त्तिं विवृणोति। यथा, तत्रैव ३।२८।१३—१९॥

"प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्।
नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम्॥
लसत्पङ्कजकिञ्जल्कपीतकौशेयवाससम्।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम्॥
मत्तद्विरेफकलया परीतं वनमालया।
परार्ध्यहारवलयकिरीटाङ्गदनूपुरम्॥
काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्।
दर्शनीयतमं शान्तम् मनोनयनवर्द्धनम्॥
अपीव्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतम्।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्॥
कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम्।
ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः॥
स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम्।
प्रेक्षणीये हि तं ध्यायेत् शुद्धभावेन चेतसा"॥

ध्येयमूर्त्तेः सकाशात् मनो यावत् विषयान्तरं न याति तावद्ध्यायेदितिभावः। गुहाशयं बुद्धितत्त्वे विराजमानं एवं निरन्तरध्यानेन साधकस्य चित्तं यदा भगवद्रूपे लब्धपदं भवेत् तदा चित्तस्य शनैः शनैः सौक्ष्म्यकरणाय मूर्त्तिं हापयित्वा भगवतस्त्वरारविन्दादीन्येकैकाङ्गानि ततः साभरणान्यस्त्राणि ततो विलासहासादीनि च क्रमेण यथाविधि ध्यातुमुपदिष्टवान् कपिलः॥ ततः किमित्याह। एवं चिरं ध्यात्वा योगी बहुजन्मार्जित-सौभाग्यवशात् यदि हरौ प्राप्तभावो भक्त्या द्रवद्धृदय आनन्दाश्रुवे भासमानो भवेत् तर्हि तस्मिन् मूले भगवद्रूपे वह्निशूवत् संलग्नं चित्तं निर्गुणस्य परब्रह्मणः स्वरूपलाभार्थं तस्मादङ्गादिस्थूलरूपाद् वियोज्य निरालम्बनं निर्व्विषयं कृत्वा उपरत-गुणप्रवाहः सन् धाढ्यध्येयादिज्ञानाभावात् सर्व्वो-पाधिपरिवर्ज्जितमेकमेवाद्वितीयमात्मानं पश्यत्येव। यथा तत्रैव ३।२८।३४-३५॥

"एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते॥
मुक्ताश्रयं यर्हि हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्चिः।
आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः"॥

ननु सुचिरं साधनेन लब्धेऽप्यात्मनि किमायातं। किन्तु अम एवेति चेत् न यतोऽनेकजन्मसाधन-बलात् यदाऽखण्डमात्मानं ईक्षते स योगी सुख-दुःखादिकं सर्व्वमहङ्कारनिष्ठं पश्यति तदा देहा-द्युपाधिनिर्म्मुक्तो जीवन्मुक्तो भवेत्। यथा तत्रैव ३।२८।३६—३७॥

"सोऽप्येतया चरमया मनसो निवृत्त्या
तस्मिन् महिम्न्यवसितः सुखदुःखबाह्ये।
हेतुत्वमस्यति कर्त्तरि दुःखयोर्यत्
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः॥
देहञ्च तं न चरमः स्थितमुत्थितं वा
सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्।
दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः"॥

जीवन्मुक्तस्य देहाद्युपाधिवर्गस्य निवृत्तौ तत्र मनः-संयोगाभावात् कथं देहादेर्वर्त्तनमिति शङ्क्यन् स्वारब्धकं प्रारब्धवेगमेवेत्यर्थः देहादेः स्थिति-कारणमित्याह। तत्रैव ३।२८।३८॥

"देहोऽपि दैववशगः खलु कर्म्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः।
तं सप्रपञ्चमधिरूढसमाधियोगः
स्वप्नं पुनर्न भजते प्रतिबुद्धवस्तुः"॥

ननु यदि परब्रह्मलाभायात्मसाक्षात्कारात्तमेव चरमं देहं मन्यसे तर्हि विद्यैव सुगमोपायः श्रूयते तस्मिन् सति कथं वृथा कर्म्माड़म्बरे प्रवर्त्तयसे इति चेत् न कर्म्मविद्ययोरधिकारिभेदात् आदा-वीश्वरार्पितकर्म्मणा निष्कामकर्म्मणा वा चित्त-शुद्धिं विना कुतो विद्यायामधिकारः। इत्यधि-कारिभेदमुद्दिश्य ज्ञानकर्म्मणोः पृथक् प्रदर्शनेऽपि तत्त्वज्ञानमुपदिशन्तं भगवन्तं वासुदेवं एवकार-जातसंन्यस्योऽनुनः। यथा गीतायां ३।१-२।

"ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्म्मणि घोरे मां नियोजयसि केशव॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्"॥

हे जनार्दन! चेद्यदि ते कर्म्मणः सकाशात् बुद्धिर्बोधः ज्ञानमिति यावत् ज्यायसी गरीयसी मता तर्हि कथं मां घोरे कर्म्मणि नियोजयसीत्यन्वयः। व्यामिश्रेण ज्ञानकर्म्मयोर्मिश्रीभूतेन वाक्येन कथं मे बुद्धिं मोहयसीव। इत्येवं विवि-त्सोरर्জ্জুनस्य संशयं निराकुर्व्वन्नाह भगवान् वासु-देवः। तत्रैव ३।३-४॥

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ!।
ज्ञानयोगेन साङ्ख्यानां कर्म्मयोगेन योगिनाम्॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति"॥

"अतः सम्यक्चित्तशुद्ध्यर्थं ज्ञानोत्पत्तिपर्य्यन्तं वर्णाश्रमोचितानि कर्म्माणि कर्त्तव्यानि अन्यथा चित्तशुद्धभावेन ज्ञानानुत्पत्तेरित्याह न कर्म्मणा-मिति। कर्म्मणां अनारम्भात् अननुष्ठानात् नै-ष्कर्म्म्यं ज्ञानं नाश्नुते न प्राप्नोति। ननु "चेतसैव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुत्या संन्यासस्य मोक्षाङ्गत्वं तर्हि संन्यासादेव मोक्षो भविष्यति किं कर्म्मभिरित्याशङ्क्योक्तं न चेति। नच चित्तशुद्धिं विना कृतात् संन्यसनादेव ज्ञानशून्यात् सिद्धिं मोक्षं समधिगच्छति प्राप्नोति इति तट्टी-काकृत् पूज्यपादश्रीधरस्वामी।

ननु कामं ईश्वरार्पितेन निष्कामकर्म्मणा चित्त-शुद्धिः प्रजायते ततो ज्ञानं लब्ध्वा मोक्षमाप्नुयात् किन्तु भक्तिबलेनापि सत्त्वं संशोध्याचिरादेवा-विद्याबन्धनात् मुक्तो भवेदित्यपि बहुषु शास्त्रेषु दृश्यते। सर्व्वेभ्यो हि भक्तिमाहात्म्यस्याधिक्यं प्रद-र्शितं महात्मभिरतो बहुप्रयाससाध्यं कर्म्माड़म्बरं विहाय भक्तिपथाश्रयएव गरीयान्निश्रेयसार्थ-मिति चेन्न तदप्यधिकारिभेदेनोक्तत्वात् अर्चा-दावर्चनादिक्रियायोगसाध्यत्वाच्च। किञ्च पुरुषाणां निश्रेयसाय शास्त्रविहितमार्गत्रयं मुक्त्वा नह्यपरः पन्थाः क्वापि दृश्यते श्रूयते वा। तथाहि श्रीमद्भा-गवते ११।२०।६-८। तत्त्वजिज्ञासमुद्धवं प्रति-यथोक्तवान् भगवान् वासुदेवः।

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम्॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः"॥
यदृच्छया दैवगत्या। न निर्व्विण्णो न प्राप्तनिर्व्वेदः।

अतः सर्व्वत्रैव भिन्नभिन्नाधिकारमपेक्ष्य ज्ञान-कर्म्मभक्तियोगादयो विहिताः। यथा तत्रैव ११ स्क० २० अध्याये २९॥

"स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः।
कर्म्मणां जात्यशुद्धानां अनेन नियमः कृतः"॥

यथा तत्त्वज्ञानार्थी निःशेषसात्त्विककर्त्ता प्रथ-मतः केवलं अविद्याकर्म्मनिर्हारादीनुद्दिश्य निष्का-मकर्म्मानुष्ठानमाचरति न जातूद्दिश्य विशुद्धसत्त्वो-ऽधिरूढ़योगो योगीव सहसा भेदबुद्ध्यादिकं परि-हातुमर्हति तथा प्रथमं सगुणभक्तियोगाश्रयिणो-ऽपि न हि युगपत् भगवत्स्वरूपतत्त्वज्ञा निर्गुण-भक्ता इव भगवत्प्रतिमाद्यर्चनादिक्रियायोगं परि-त्यक्तुं समर्था भवेयुः किन्तु तादृशेन सगुणभक्ति-योगावलम्बिना दुर्ब्बलाधिकारिणा भगवत्प्रतिमा-पूजादिकर्म्मयोगएव कर्त्तव्यः इत्येतदविहितं

शास्त्रबुद्धिः।

अथ यथाशास्त्रं निकृष्टसात्त्विककर्त्तुर्भेदबुद्धिं प्रदर्श्य दुर्ब्बलाधिकारिणो भक्तियोगावलम्बिनः कर्त्तव्यमपि प्रदर्शयामः। यथा भागवते ३।२९।१०।

"कर्म्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"॥

दुर्ब्बलभक्तियोगाधिकारिकर्त्तव्यता च तत्रैव। ११।११। ३४-४२।

"मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्।
परिचर्य्या स्तुतिः प्रह्वगुणकर्म्मानुकीर्त्तनम्॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव।
सर्व्वलाभोपहरणं दास्येनात्मनिवेदनम्॥
मज्जन्मकर्म्मकथनं मम पर्व्वानुमोदनम्।
गीत-ताण्डव-वादित्र-गोष्ठीभिर्मदगृहोत्सवः॥
यात्रा बलिर्विधानञ्च सर्व्ववार्षिकपर्व्वसु।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्॥
ममार्च्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्म्मणि॥
संमार्জ্জনोपलेपाभ्यां सेकमण्डलवर्त्तनैः।
गृहशुश्रूषणं मह्यं दासवद्यदमायया॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम्॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः।
तत्तन्निवेदितं मह्यं तदानन्त्याय कल्पते॥
सूर्य्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम्।
भूरात्मा सर्व्वभूतानि भद्र पूजापदानि च"॥

हे भद्र! एतानि मम पूजास्थानानि। अधुना कस्मिन् स्थले केन यजेत इत्याह तत्रैव ११।११। ४३-४५।

"सूर्य्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम्।
आतिथ्येन तु विप्राग्ने गोष्वङ्ग यवसादिना॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः॥
स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि।
क्षेत्रज्ञं सर्व्वभूतेषु समत्वेन यजेत माम्"॥

हृदि खे हृदयाकाशे। मुख्यधिया प्राणदृष्ट्या॥ जले जलाञ्जलिप्रदानरूपतर्पणपूर्व्वकैर्द्रव्यैः॥ स्थण्डिले भूमौ मन्त्रान्तैः॥ भोगैरिति। देहे भोगैरात्मानं एतैरन्नादिभिर्देहस्थपरमात्मानं यजेऽहं नत्वविद्याकर्म्मजनितं देहं विभर्म्मीति चिन्तयेत्॥ क्षेत्रज्ञमिति। सर्व्वभूतेषु क्षेत्रज्ञरूपेणावस्थितं कूटस्थब्रह्मचैतन्यस्वरूपं मां समत्वेन यजेत॥ ॥ एतेषु स्थानेषु तव कीदृग्रूपं ध्येयमित्यपेक्ष्याह तत्रैव ११।११। ४६-४७।

"धिष्ण्येष्विति मद्रूपं शङ्खचक्रगदाम्बुजैः।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्च्चेत् समाहितः॥
इष्टापूर्त्तेन मामेवं यो यजेत समाहितः।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया"॥

यदा "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्" इत्यारभ्य "लभते मयि सद्भक्तिम्" इत्यन्तैरेतैस्त्रयोदशश्लोकैर्धारणाध्यानायनभूतप्रतिमाद्याश्रयिण्या भक्तियोगोपयोगिक्रिययैव सद्भक्तिलाभः प्रदर्शयामास स्वयं भगवान्। सुतरां तदा दुर्ब्बलाधिकारिणा भक्तियोगाश्रयिणापि प्रथमे क्रियायोगरूपं कर्त्तव्यः इति बोध्यतेऽन्यथाचित्तशुद्ध्यभावात् ज्ञानं न लभेत इति तात्पर्य्यार्थः॥

ननु मा भूत्तत्त्वज्ञानं किन्तु शास्त्रविहितक्रियायोगशून्यया भक्त्या क्रमेण निर्गुणाया भक्तेरुदयेनैव चरितार्थतेति चेन्न तयोस्तत्त्वज्ञाननिर्गुणभक्तियोगयोर्लक्षणे नैक्यदर्शनात् उभयोरेवात्मसाक्षात्काररूपचरमफलत्वेनोक्तत्वाच्च। यथा श्रीमद्भागवते ३।२९।११-१२।

"मद्गुणश्रुतिमात्रेण मयि सर्व्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे"॥

ईदृग्भक्तिर्यदि बहुजन्मार्জ্জितसुकृतिवशात् कस्यापि क्वचिदुत्पद्येत तर्हि सालोक्यादिमुक्तिं साधकान्तरैः प्रार्थनीयां भगवता स्वयं दीयमानामपि तादृग्भक्तो नेच्छतीति तन्निस्पृहतां दर्शयन्नाह। तत्रैव ३।२९।१३।

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः"॥

अपि च तत्त्वज्ञानिनो निर्गुणभक्तस्य च तयोः शब्दतश्च भेदः न तु लक्षणतः यत उभावेव लक्षणादिना सर्व्वत्र एकाचारौ एकनिष्ठावेकभावापन्नौ लक्ष्येते। यथा भागवते ११।११। २९-३३। भगवद्भक्ततमस्य लक्षणमुपदिष्टवानुद्धवं प्रति भगवान्।

"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः"॥

कविः क्रान्तदर्शी सर्व्वज्ञ इत्यर्थः।

"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत स सत्तमः॥
ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः"॥

तथा, ज्ञानिनोऽपि लक्षणं प्रदर्शयामास। यथा, तत्रैव ११।११।१२-१७।

"न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणान्।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः॥
वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः।
प्रतिबुद्ध इव स्वप्नान् नानात्वाद् विनिवर्त्तते"॥
यस्य स्युर्वीतसङ्कल्पाः प्राणेन्द्रियमनोधियाम्।
वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः॥
यस्यात्मा हिंस्यते हिंस्रैर्येन किञ्चिद् यदृच्छया।
अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः॥
न स्तुवीत न निन्देत कुर्व्वतः साध्वसाधु वा।
वदतो गुणदोषाभ्यां वर्জ্जितः समदृङ्मुनिः॥
न कुर्य्यान्न वदेत् किञ्चिन्न ध्यायेत् साध्वसाधु वा।
आत्मारामोऽनया वृत्त्या विचरेज्जड़वन्मुनिः"॥

ननु भक्तिज्ञानयोश्चरमफलैक्येऽपि भक्तेः समधिकप्रसंशादर्शनात् भक्तिरेवगरीयसीति चेत् न भक्तिवत् ज्ञानस्यापि प्रसंशादर्शनात् आत्मसाक्षात्कृतौ साक्षात्कारणत्वाच्च। यथा श्रीमद्भागवते ११।१९।१—५॥

श्रीभगवानुवाच।

"यो विद्याश्रुतसम्पन्न आत्मवानानुमानिकः।
मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत्॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः।
स्वर्गश्चेवापवर्गश्च नान्योऽर्थो मदृते प्रियः॥
ज्ञानविज्ञानसिद्धाः पदं श्रेष्ठं विदुर्मम।
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्त्ति माम्॥
तपस्तीर्थं जपो दानं पवित्राणीतराणि च।
नालं कुर्व्वन्ति तां सिद्धिं या ज्ञानकलया कृता॥
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः"॥

किञ्च भगवद्गीतायां ४। ३३-३९।

"श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप!।
सर्व्वं कर्म्माखिलं पार्थ! ज्ञाने परिसमाप्यते॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव!।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥
अपिचेदसि सर्व्वेभ्यः पापिभ्यः पापकृत्तमः।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জुन!।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥
श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति"॥

अतएव निर्गुणभक्तिज्ञानयोर्न क्वियदप्यन्तरं मन्यन्ते तत्त्वदृशः स्वरूपतस्तयोरेकात्मत्वात् अतत्त्वदर्शिनोऽज्ञा एवाविद्यामोहितत्वात् भिन्नदृशो भवन्ति॥ वरं भक्तियोगमुपदिश्यानुपसंहारे ज्ञानविज्ञानसम्पन्ना भक्तिरेव ब्रह्मलब्धये सम्यक् हितसाधनीति प्रदर्शितवानुद्धवाय भगवान्। यथा भागवते ११।१८। ४५-४६।

"भक्त्योद्धवानपायिन्या सर्व्वलोकमहेश्वरम्।
सर्व्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः॥
इति स्वधर्म्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः।
ज्ञानविज्ञानसम्पन्नो न चिरात् समुपैति मां"।

निष्कामेनानुष्ठितभक्तिरेव शनैः शनैः सान्द्रत्वेन निर्गुणतां गच्छन्ती सती परमप्रेमानन्दरूपेण परिणमने सुतरां तदा स्वयं सान्द्रानन्दमयं तज्ज्ञानं प्रकाशते। तयोर्हि तत्स्वरूपत्वात् न क्वापि निर्गुणभक्तिज्ञानयोगयोर्भेदः श्रूयते। यथा छान्दोग्ये "सत्यं ज्ञानमनन्तं ब्रह्म। आनन्दरूपममृतं यद् विभाति शान्तं शिवमद्वैतम"। इति ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वात् अतएव क्वचित् केनापि न पृथगानन्दत्वेन परिगतायां निर्गुणस्वरूपायां भक्तेर्ज्ञानेन सह क्वियानपि भेदो दर्शयितुं शक्यते

स्वरूपतस्तयोरेकात्मत्वात्। परन्तु तत्त्वज्ञानोत्पादनद्वारा भक्तिरेवानुष्ठेया न तु संसारबन्धनकारिणी नश्वरफलदात्री अन्यभक्तिवत् सकामा भक्तिरेवानुमोदनीया तत्त्वदर्शिभिरिति बोध्यम्॥ यथा भागवते १।२।७.

"वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम्"॥

विशेषतः प्रह्लादध्रुवयोरिव नित्यानित्यवस्तुविवेकदर्शनात्। असुरकुलजातोऽपि प्रह्लादः निष्कामभक्तियोगमाचरन् तत्प्रभावेन प्रतप्तः पितृप्रयुक्तां बाधामतिक्रम्यात्मप्रसादलब्धं विमलानन्दस्वरूपं जीवन्मुक्तत्वं ततो निर्व्वाणमप्यवाप्तवान्। ध्रुवः पुनः स्वायम्भुवमनुवंशजातोऽपि विमाढवचनादीर्ष्यापरवशः सन् परमतत्त्वज्ञाद्देवर्षिनारदादप्युपदेशं लब्ध्वा अन्तःकामबीजं परिपुष्णन् कठोरतपसापि सकामभक्तियोगमनुष्ठाय कल्पस्थायिनं ध्रुवाख्यलोकं लब्धवान् ततः गृहप्रत्यागमनकाले सहसा जातनिर्व्वेद आत्मधिक्कारेण मुञ्चन्रुरोच। इदानीं प्रदर्शयामो यथाक्रमं तयोः राजपुत्रयोः सकामनिष्कामभक्तियोगानुष्ठाननित्यानित्यफलम्॥

यथा, श्रीमद्भागवते। ४।९।२७-३५॥

"सोऽपि सङ्कल्पजं विष्णोः पादसेवोपसादितम्।
प्राप्य सङ्कल्पनिर्व्वाणं नातिप्रीतोऽभ्यगात् पुरम्॥

विदुर उवाच।

सुदुर्ल्लभं यः परमं पदं हरेः
मायाविनस्तच्चरणार्च्चनार्च्चितम्।
लब्ध्वाऽप्यसिद्धार्थमिवैकजन्मना
कथं स्वमात्मानममन्यतार्थवित्॥

मैत्रेय उवाच।

मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तान् स्मरन्।
नैच्छन् मुक्तिपतेर्मुक्तिं तस्मात् तापमुपेयिवान्॥

ध्रुव उवाच।

समाधिना नैकभवेन यत् पदं
विदुः सनन्दाद्य ऊर्द्धरेतसः।
मासैरहं षड्भिरमुष्य पादयो-
श्छायामुपेत्यापगतः पृथक्मतिः॥

अहोबत ममानात्यं मन्दभाग्यस्य पश्यत।
भवच्छिदः पादमूलं गत्वा याचे यदन्तवत्॥
मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः।
यो नारदवचस्तथ्यं नाग्राहीषमसत्तमः॥
दैवीं मायामुपाश्रित्य प्रसुप्तइव भिन्नदृक्।
तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा॥
मयैतत् प्रार्थितं व्यर्थं चिकित्सेव गतायुषि।
प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम्॥
भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः।
राराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत॥
ईश्वरात् क्षीणपुण्येव प्रलीकारानिवाधनः"।

भगवता नृसिंहदेवेन प्रलोभ्यमानोऽपि प्रह्लादः निष्कामभक्तिज्ञानप्रभावेन किमपि नैच्छदिति धर्म्मनन्दनमजातशत्रुं युधिष्ठिरं आवयामास देवर्षिर्नारदः। यथा, भागवते।७।९।५१-५५॥

"इतावदवर्णितगुणो भक्त्या भक्तेन निर्गुणः।
प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत॥

श्रीभगवानुवाच।

प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम्॥
मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति॥
प्रीयन्ति यद्य मां धीराः सर्व्वभावेन साधवः।
श्रेयस्कामा महाभागाः सर्व्वासामाशिषां पतिम्॥
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः।
एकान्तित्वाद् भगवति नैच्छत्तानसुरोत्तमः"॥

तत्रैव ७।१०।१—५।

नारद उवाच॥

"भक्तियोगस्य तत् सर्व्वमन्तरायतयार्भकः।
मन्यमानो हृषीकेशं स्मयमान उवाच ह॥
मा मां प्रलोभयोत्पन्ना सक्तं कामेषु तैर्वरैः।
तत्सङ्गभीतो निर्व्विण्णो मुमुक्षुस्त्वामुपाश्रितः॥
भृत्यलक्षणमज्ञासुर्भवान् कामेष्वचोदयत्।
भगवन् संसारबीजेषु हृदयग्रन्थिषु प्रभो!।
नान्यथा तेऽखिलगुरो! घटेत करुणात्मनः॥
यस्तु आशिष आशास्ते न स भृत्यः स वै वणिक्।
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः।
नान्यथैहावयोरर्थो राजसेवकयोरिव"॥

अस्तु तस्य निस्पृहत्वादि किन्तु तत्त्वज्ञानं नासीदिति चेत् न यतः उपरिष्टादेव तत्त्वज्ञानमूलाया निर्गुणाया भक्तेर्लक्षणं प्रदर्शितं। यथा, भागवते ७।५।१३॥ हिरण्यकशिपुं प्रति प्रह्लादोक्तिः।

"स एष आत्मा स्वपरेत्य बुद्धिभि-
र्दुरत्ययानुक्रमणो निरूप्यते।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो
ब्रह्मादयो ह्येष भिनत्ति मे मतिम्"॥

किञ्च तत्रैव ३१।

"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः।
अन्धा यथान्धैरुपनीयमाना
वाचीशतन्त्यामुरुदाम्नि बद्धाः"॥

स्वार्थगतिमिति। स्वस्मिन् एवार्थो येषां ते स्वार्थास्तत्त्वज्ञानिनस्तेषां गतिर्ज्ञानस्वरूपम्। बहिरर्थमानिनः इति। बहिर्वाह्यवस्तुषु अर्थो येषां तान् गुरून् इति मन्यन्ते ये इति॥ ननु क्वचिदर्चादेर्निन्दापि लक्ष्यते यदा तदा तदुपासनं निष्फलमिति चेन्न। यतः सर्व्वतः साधुसङ्गलाभस्योत्कर्षः इति प्रदर्शयन् विशेषतः सर्व्वाभ्य उपासाभ्यः हृदेशे आत्मध्यानमेव गरीय इत्येवोपदिदिक्षुः महान्तः शास्त्रकृतः। अन्यथा "मदर्चास्थापने श्रद्धा" "अर्च्चायामर्च्चयेत्तावत्" "यावन्न मे कथारतिः" इत्यादि वचनानां निष्फलत्वं स्यात्। दर्शितञ्च यथासम्भवमुपासनायां दुर्ब्बलाधिकारिणां यत् यत् कर्त्तव्यं इदानीं सबलाधिकारिणां करणीयं यत्प्रकृतपथं तदेव दर्शयामः समासेनेति। यथा, बृहदारण्यकश्रुतौ॥

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च"। अर्थात् आत्मैव साक्षात् कर्त्तव्यः साक्षात्कारे उपायमाह श्रवणं मननं निदिध्यासनञ्च किन्तत् श्रवणादि इति जिज्ञासायां ब्रूमः। यथा। "श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्य्यावधारणम्। लिङ्गानि तु। उपक्रमोपसंहाराभ्यासाऽपूर्व्वताफलार्थवादोपपत्त्याख्यानि। तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ। यथा, छान्दोग्ये षष्ठप्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः एकमेवाद्वितीयमित्यादौ "ऐतदात्म्यमिदं सर्व्वम्"। इत्यन्ते च प्रतिपादनम्॥

प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः। यथा, तत्रैवाद्वितीयवस्तुनो मध्ये "तत्त्वमसीति" नवकृत्वः प्रतिपादनम्॥ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम्। यथा तत्रैवाद्वितीयवस्तुनः तत्त्वौपनिषदं पुरुषं पृच्छामीत्यादिना उपनिषन्मात्रवेद्यत्वप्रतिपादनात्। मानान्तराविषयीकरणं फलन्तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्रैव "आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये"। इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः। यथा, तत्रैव उततमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तु प्रशंसनम्।

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः"। यथा, तत्र "सौम्येकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणविकारो नामधेयं मृत्तिकेत्येव सत्यम्"। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते"। मननन्तु। "श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिन्तनम्"। "विजातीयदेहादिप्रत्ययरहिताऽद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्"॥ इति वेदान्तशास्त्रेषु॥

समाधिस्तु द्विविधः। सविकल्पको निर्व्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञाट्ज्ञानादिविकल्पक्षयानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते॥

निर्व्विकल्पकस्तु ज्ञाट्ज्ञानादिभेदक्षयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायां बुद्धिवृत्तेरितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेनाद्वितीयवस्तुमात्रमेवावभासते॥ इति वेदान्ते उपदिष्टं पूर्व्वर्षिभिः॥

अतो ज्ञानलक्षणानि भगवद्गीतायां।१३।७-११॥
"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्म मृत्यु-जरा-व्याधि-दुःख दोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" ॥
अतो ज्ञेयं वक्ष्ये तच्चैवाध्याये । १२-१७ ॥
"ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतःपाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतःश्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्" ॥
तथा च श्वेताश्वतरश्रुतौ आत्मज्ञानेनैव मुक्तिरिति स्फुटं दर्शयामास । यथा,—
"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं बृहत्" ॥
"आत्मा गुहायां निहितोऽस्य जन्तो-
रणोरणीयान् महतो महीयान् ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम्" ॥
महानिर्व्वाणतन्त्रे च । ५ । १२ ॥
"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् ।
तावतैव किं कार्य्यं लब्धे मलयमारुते" ॥
ननु किमिदानीं वाग्मह्याद्वैतवादं संस्थापयितुं प्रयतते इति चेत् दर्शयामः ।
तथा च श्रीविष्णुधर्म्मे,—
"परात्मनो मनुष्येन्द्र विभागो हि न कल्पितः ।
क्षेत्रे तस्मात्परयोर्विभागाभावश्च हि ॥
आत्मा क्षेत्रज्ञसंज्ञोऽयं संयुक्तः प्राकृतैर्गुणैः ।
तैरेव विगतः शुद्धः परमात्मा निगद्यते ॥
अनादिसम्बन्धवत्या क्षेत्रज्ञोऽहमविद्यया ।
युक्तः पश्यति भेदेन ब्रह्मत्वात्मनि संस्थितम्" ॥
तथाहि श्वेताश्वतरश्रुतिभाष्यधृतवशिष्ठवचन प्रत्यूर्व्वकं दर्शितम् । यथा,—
"यश्चात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः ।
संसृतिः कस्य तात! स्यात् मोक्षो वाऽविद्यया विभो॥
क्षेत्रनाथे कथं तस्य ज्ञायते भगवान् यतः ।
यथावत् सर्व्वमेतं मे ब्रूतुमर्हसि साम्प्रतम् ॥
तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः ।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्त्यते बुधैः ॥
एकश्च हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
भान्त्यारूढः सदात्मा जीवसंज्ञः सदा भवेत् ॥"

तथा च शुक्राग्र्यो गौड़पादाचार्य्यः ॥
"यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्व्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः" ॥
तस्मादद्वितीये परमात्मन्युपाधितो जीवेश्वरयोर्जीवानाञ्च परस्परं भेदव्यवस्थायाः सिद्धत्वान्न विशुद्धसत्वोपाधेरीश्वरस्याविशुद्धोपाधिजीवगताः सुखदुःखमोहाद्यागादयः ॥ तथा च भगवान् पराशरः ।

ज्ञानात्मकस्यामलसत्त्वराशे-
रुपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यस्ति समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य" ॥

कथं तर्ह्युपाधिकभेदेन बन्धमुक्त्यादिव्यवस्था सोपाधिकानां तेषां वा सोपाधिकैश्वरस्य वा स्वरूपस्येति इत्याशङ्क्य दृष्टान्तपूर्व्वकं व्यवस्थां दर्शयति ॥
"एकस्तु सूर्य्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः" ॥
"ब्रह्म सर्व्वशरीरेषु बाह्ये चाभ्यन्तरे स्थितम् ।
आकाशमिव भूतेषु बुद्धावात्मा न चान्यथा" ॥
एवं सति यया बुद्ध्या देहोऽहमिति मन्यते ।
'अनात्मन्यात्मता भ्रान्त्या सा स्यात्संसारबन्धिनी' ॥
सर्व्वैर्विकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरोऽमरः ।
प्रशान्तो व्योमवद्व्यापी चैतन्यात्मा संकल्पभुः ॥
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ।
प्राकृतैरपरामृष्टो विकारैः पुरुषस्तथा ॥
यथैकस्मिन् घटाकाशे जलेधूमादिभिर्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् ॥
यथा दृष्टैरनेकैस्तु जीवे च मलिनीकृते ।
एतस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित्" ॥

परं तु केवलं प्रकृतेः पृथग्भूतचैतन्यज्ञानमात्रेण ब्रह्मज्ञानं सम्भवितुमर्हति । यदि चैके पण्डिताः पृथग्ज्ञानेनैव सिद्धिः स्यादिति मन्यन्ते किन्तु नैव श्रुतय एवं परिचक्षते । यथा, श्वेताश्वतरोपनिषदि "ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत्" ॥ अतएव ब्रह्मजिज्ञासोर्योगिनः अत्रपदिष्टब्रह्मतत्त्वविज्ञानेनैव मुक्तिः स्यात् अन्यथा असत्य । यथा, तत्रैव "क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । तस्याभिध्यानात् योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः ॥ ज्ञात्वा देवं सर्व्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्य्य केवल आप्तकामः" ॥ परं योगाभ्यासादृते नैव कदाचित् तत्त्वज्ञानास्योत्पत्तिरिति श्रुतिस्मृत्यादीनां ज्ञानप्रतिपादकशास्त्राणामुपदेशो दृश्यते यदि च पूर्व्वपूर्व्वप्रकरणे पुराणप्रभृतिविहितयोगादिमतं प्रदर्शितं तत्रापि तत्दृढ़ीकरणाय वैदिकमतमिदानीं प्रदर्शयामः । यथा यजुर्व्वेदोक्तश्वेताश्वतरीययोगप्रकरणम् । ॐ "युञ्जानः प्रथमम् मनस्तत्त्वाय सविता धियः । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

युक्तेन मनसा वय देवस्य सवितुः सवे स्वर्गायाय शक्त्यै ॥ २ ॥
युक्ताय मनसा देवान् सुवर्य्यतो धिया दिवं ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥
युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य बृहतो विपश्चितः ॥
विहोत्रा दधे वयुना विदेक इन् ।
महो देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभिः
विश्लोका यन्ति पथ्येव सूराः" ॥ ५ ॥
परन्तु आत्मज्ञादविशदीकरणाय दक्षसंहितैव श्रेयसी जीवानामिति प्रदर्शयितुं भूयोऽप्यनुसरामः । यथा,
"ऊरस्योत्तानचरणः सख्ये नस्येतरं करम् ।
उत्तानं किञ्चिदुन्नाम्य मुखं विलभ्य चोरसा ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुस्थाग्रजिह्वश्च संवृतास्यः सुनिश्चलः ।
संनियम्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्" ॥
किन्तुएवं मा मन्यध्वं यत् यद्यान्निःसृत्य अरण्यवासादौ योगाभ्यासतत्त्वज्ञानादेः सुगमो भवेत् इत्यत्र यथाह दक्षः सप्तमाध्याये ।
"लोको वशीकृतो येन येन चात्मा वशीकृतः ।
इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहं ॥
प्राणायामास्तथा ध्यानं प्रत्याहारस्तु धारणा ।
तर्कश्चैव समाधिश्च षड़ङ्गो योग उच्यते ॥
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचित् भवेत् ॥
नं च पथ्यान्नभोजनात् योगो न नासाग्रनिरीक्षणात् ।
न चं शास्त्रातिरिक्तेन शौचेन स भवेत् क्वचित् ॥
न मौनमलकुहकैरनेकैः सङ्कटैस्तथा ।
लोकयात्रावियुक्तस्य योगो भवति कस्यचित् ॥
अभियोगात् तथाभ्यासात् तस्मिन्नेव तु निश्चयात् ।
पुनः पुनश्च निर्व्वेदाद् योगः सिध्यति नान्यथा" ॥
अतएव निर्व्वेदादृते केवलं तपःस्वाध्यायादिभिर्न योगसिद्धिः शास्त्रकृद्भिरनुमोदनीया । किन्तु आदरनैरन्तर्य्येण आत्मचिन्तादयएव ब्रह्मलब्धेः सदुपाया इति बोध्यम् यथा तत्रैव ।
"आत्मचिन्ताविनोदेन शौचक्रीड़नकेन च ।
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा ॥
यच्चात्मनि रतो नित्यमात्मक्रीड़स्तथैव च ।
आत्मनिश्च सततमात्मन्येव स्वभावतः ॥
रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः ।
आत्मन्येव सुप्तोऽसौ योगस्तस्य प्रसिध्यति ॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः ।
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्" ॥
परन्तु विषयासक्तिवर्জ্জनं विना क्वापि कस्यचिदपि आत्मसिद्धिर्न प्रजायते । यथा तत्रैव,—
"य आत्मरतिरेकाकी द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः ॥
विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति ।
यत्नेन विषयासक्तिं तस्माद् योगी विवर्জ্জयेत्" ॥

यदि च केचित् विषयेन्द्रियसंयोगेः सिद्धिर्भवेत् इति वदन्ति तच्च तेषां भ्रान्तिरेव सा यथा तत्रैव, "विषयेन्द्रियसंयोगं केचित् योगं वदन्ति हि। अधर्म्मो धर्म्मरूपेण गृहीतस्तैरपण्डितैः" ॥ इति ॥ यदि चाद्वैततत्त्वज्ञानमेव सर्व्वतो निश्रेयसकरं जीवानामित्यग्रेयतः प्रदर्शितम् किन्तु दुर्ब्बलसबलाद्यधिकारिभेदेन यथाक्रमं क्रियाभक्तिज्ञानयोगादयः सन्निवेशिता इत्यलमतिपल्लवितेन ॥*॥)

उपासितः, त्रि, (उप + आस् + क्त।) कृतोपासनः। तत्पर्य्यायः। वरिवसितः २ वरिवस्यितः ३ उपचरितः ४। इत्यमरः ॥

उपास्तिः, स्त्री, (उप + आस् + क्तिन्।) सेवा। इति हेमचन्द्रः ॥ (यथा, मुग्धबोधे कारकप्रकरणे ७। "मुक्तिर्नर्च्चेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः" ॥)

उपाहितः, पुं, (उप आसन्नं आहितं फलं यस्य।) अग्न्युत्पातः। स तु उल्कापातादिः। इत्यमरः ॥

उपाहितः, त्रि, (उप + आ + धा + क्त।) संयोजितः। इत्यमरः ॥ आरोपितः। इति मेदिनी ॥

उपेक्षणं, क्ली, (उप + ईक्ष् + भावे ल्युट्।) वर्জ্জनम्। त्यजनम् ॥ (यथा, महाभारते ३। हनूमद्भीमसंवादे १५०। ४२।
"साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च।
साधनीयानि कर्म्माणि समासव्यासयोगतः" ॥)

उपेक्षा, स्त्री, (उप + ईक्ष् + अ + टाप्।) अस्वीकारः। त्यागः। (औदासीन्यम्। यथा, रघुः १४। ६५। "कुर्य्यामुपेक्षां हतजीवितेऽस्मिन्" ।) युद्धविषये तु क्षुद्रोपायः। "मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः"। इति हेमचन्द्रः ॥

उपेन्द्रः, पुं, (इन्द्रमुपगतः। कश्यपाददितौ वामनावतारे इन्द्रस्यानन्तरं जातत्वात् तथात्वम्।) विष्णुः। इत्यमरः ॥ (उपेन्द्रस्यापरां व्युत्पत्तिमाह हरिवंशे ७५। ४६।
"ममोपरि यथेन्द्रत्वं स्थापितो गोभिरीश्वरः।
उपेन्द्र इति लोका मा गास्यन्ति दिवि देवताः" ॥
तथा च भागवते ८। २३। २१, २२, २३।
"कश्यपस्यादितेः प्रीत्यै सर्व्वभूतभवाय च।
लोकानां लोकपालानामकरोत् वामनं पतिम् ॥
वेदानां सर्व्वदेवानां धर्म्मस्य यशसः श्रियः।
मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥
उपेन्द्रं कल्पयाञ्चक्रे पतिं सर्व्वविभूतये।
तदा सर्व्वाणि भूतानि भृशं मुमुदिरे नृप!" ॥)

उपोढः, त्रि, (उप समीपे उह्यते स्म। उप + वह + क्त।) निकटः। (यथा, किरातेः १३। २३ "तदुपोढेऽह्नि नभश्चरः पृथक्लः" ।) विवाहितः। इति मेदिनी ॥ (धृतः। विहितः। यथा शाकुन्तले ७म अङ्के,—
"उपोढ़शब्दो न रथाङ्गनेमयः
प्रवर्त्तमानं न च दृश्यते रजः" ॥)

उपोढ़ः, पुं, (उप + वह + क्त।) व्यूहः। इति धरणी ॥

उपोती, स्त्री, (उयते स्म या। उप + वे + क्त + ङीष्। पद्मादिषु वयनसाधुरादस्य तथात्वम्।) पूतिका। इति शब्दरत्नावली ॥ ("द्वादश्यामुपोतीं त्यक्त्वा पारणं कुर्य्यात्"। इति स्मृतिः ॥)

उपोदकी, स्त्री, (उपगता उदकम्। रसप्राधान्यात्। गौरादित्वात् ङीष्।) पूतिका। पूँइशाक इति भाषा। तत्पर्य्यायः। कलम्बी २ पिच्छिला ३ पिच्छिलच्छदा ४ मोहनी ५ मदशाकः ६ विशाला ७ बलिपोदकी ८। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्। मधुरत्वम्। निद्रालस्यरुचिविशुम्भश्लेष्मकारित्वञ्च। इति राजनिर्घण्टः ॥ (यथा, एकादशीतत्त्वे द्वादशीनियमे कूर्म्मपुराणधृतवचनम्।
"द्वादश्यां पारणं कुर्य्यात् वर्জयित्वाप्युपोदकीम्" ॥)

उपोदिका, स्त्री, (उपाधिकमुदकमस्याम्। उत्तरपदस्य चेत्युत्तरपदस्योदादेशः। कप्। टाप्।) पूतिका। इत्यमरः ॥ अस्या गुणाः। सारकत्वम्। स्निग्धत्वम्। बलश्लेष्मकारित्वम्। हिमत्वञ्च। इति राजवल्लभः ॥ (यथा, वैद्यके।
"तण्डुलैरानतव्याजैरसत्येषा उपोदिका"।
"मदघ्नी चाप्युपोदिका"।
इति सूत्रस्थाने ६ अध्याये वाभटेनोक्तम् ॥
"उपोदिकादधिभ्यान्तु सिद्धा मदविनाशिनी"।
इति चरके सूत्रस्थाने २ अध्याये ॥
"स्वादुपाकरसा दृष्या वातपित्तमदापहा।
उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

उपोदीका, स्त्री, पूतिका। इति भरतः द्विरूपकोषश्च ॥

उपोद्घातः, पुं, (उप समीपे उद्घननम्। उप + उत् + हन् + घञ्।) उदाहरणम्। इत्यमरः ॥ आरम्भः। इति भरतः ॥ सङ्कृतिविशेषः। यथा,—
"सप्रसङ्गं उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्कृतिरिष्यते" ॥
तल्लक्षणं यथा,—
"चिन्तां प्रस्तुतसिद्धार्थामुपोद्घातं विदुर्बुधाः"।
इत्यनुमितौ जगदीशतर्कालङ्कारः ॥

उपोषणं, क्ली, (उप + उष् दाहे + ल्युट्।) उपवासः। इति चिकाण्डशेषः ॥ (यथा, तिथितत्त्वे।
"उपोषणं नवम्याञ्च दशम्याञ्चैव पारणम्"।
विस्तृतिस्तु उपवासशब्दे द्रष्टव्या ॥)

उपोषितं, क्ली, (उप + वस् + भावे क्त।) उपवासः। इत्यमरटीकायां भरतः ॥ (यथा, मनुः। ५। १५५।
"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्" ॥

उपोषितः, त्रि, (उपोष्यते स्म। उप + वस + कर्त्तरि + क्त।) कृतोपवासः। यथा,—
"उपोषितो द्वितीयेऽह्नि पूजयेत् पुरुषेश्वरौ ताम्"।
इति दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वम् ॥
(यथा रघौ २ १६।
"मघौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्" ॥)

उप्तः, त्रि, (उप्यते स्म यः क्षेत्रादिषु। वप् + क्त।) कृतवपनः। बोना इति भाषा। यथा,—
"तदै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति।
सर्व्वं क्षणेन तदभूदसदीशरिक्तं
भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्" ॥
इति श्रीभागवते १ स्कन्धे १५। २१ ॥
श्रीकृष्णवियोग एवाच हेतुः नान्य इत्याह तदै इति यतो येभ्य ईक्षणेन रिक्तं शून्यं असत् कार्य्यात्तमं सन्मन्त्रविधानेरपि भस्मनि हुतमिव भस्मन्निति लुप्तसप्तम्यन्तं पदम्। अतिप्रीतादपि कुहकान्मायाविनः सकाशाद्राद्धं लब्धं यथा। सम्यक्कर्षणादिनापि उषरभूमौ उप्तं बीजमिव"। इति तट्टीकायां श्रीधरस्वामी ॥*॥ कृतमुण्डनम्। यथा—
"सश्मश्रुं वपनं कार्य्यमास्नानाद्दुश्चरिष्यतः"।
इति कात्यायनकृतच्छन्दोगपरिशिष्टेऽप्येवम्। तदेकश्रुतिमूलकत्वात्। तद्धृतपारस्करीये। पर्य्युप्तशिरसमिति सूत्रेऽपि तथैवार्थः तद्भाष्यकृता हरिस्वामिनापि परि सर्व्वतोभावेनोप्तशिरसं मुण्डितशिरसमिति व्याख्यातम्"। इति प्रायश्चित्ततत्त्वम् ॥

उप्तक्षुरं, त्रि, (आदौ उप्तं पश्चात् क्षुरम्। पूर्व्वकालेति समासः।) बीजवपनानन्तरकर्षितक्षेत्रम्। तत्पर्य्यायः। बीजकृतम् २। इत्यमरः ॥

उब्ज, शु आर्জ্জवे। इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट्।) कुत्सादिः। ओष्ठ्यवकारोपधः। तेन व्यञ्जनत्वमीति दीर्घो न स्यात्। स्यादौ नवद्र इति उज्जिजियति। ऊर्णोर्ज्जिर्दीर्घपाठसामर्थ्यात् स्वरादेर्न दीर्घ इति केचित्। दन्त्यवकारत्वान्न उज्जतीत्यत्र दीर्घ इत्यप्येके। शु उज्जती उज्जन्ती। आर्জ্জवमवक्रीभावः। उज्जति साधुरवक्रः स्यादित्यर्थः। इति दुर्गादासः ॥ (यथा, ऋग्वेदे। ६। ५। २। १ ॥ "उज्जन्तु तं सुभः पर्व्वतासो निहियता मतियाजस्य यष्टौ" ॥)

उभ, शु पूर्त्तौ। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) कुत्सादिः। शु उभति कुम्भं जलेन लोकः। उबोभ। इति दुर्गादासः ॥

उभयः, त्रि, (उभौ अवयवौ अस्य। उभ + तयप्। उभादुदात्तो नित्यमिति। ५। २। ४४। तयपोऽयजादेशः। कथमुभये देवमनुष्या इति यतो बहूनामुभावयवौ न घटतः। नैष दोषः। अत्र हि द्वौ राशी समुदायस्यावयवौ। एको देवानां अपरो मनुष्याणामिति। उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दप्रयोगो माभूत् उभयशब्दस्यैव यथा स्यादिति।) युगलम्। इति शब्दचन्द्रिका ॥ दुइ इति भाषा। (यथा, मनुः। २। ५५ ॥
"पूजितं ह्यशनं नित्यं बलमूर्জ्जञ्च यच्छति।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम्" ॥)

उभयतः, [स्] व्य (उभयस्मात्। उभय + तसिल्।) पार्श्वद्वये। उभयपार्श्वे। इति व्याकरणम् ॥ (यथा, मनुः। ८। ३१५।
"शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा" ॥)

उभयद्युः, [स्] व्य, (उभयोरह्नोः। द्युह्नोभयादह्नश्च इति साधुः।) उभयदिनम्। दिनद्वयम्। इत्यमरः ॥ (यथा, अथर्व्ववेदे। १। २५। ४।
"योऽन्येद्युरुभयद्युरभ्येति" ॥)

उभयेद्युः, [स्] अ (उभयोरह्नोः । सप्तम्यर्थदिति उभयादेद्युस् निपातितः ।) उभयदिनम् । इत्यमरः ॥ (यथा, ऐतरेयब्राह्मणे । ५ । २६ ॥
"अग्निहोत्रमुभयेद्युर्गृह्यत" ॥)

उम्, व्य, (उङ् शब्दे + डुम् ।) रोषः । अङ्गीकारः । प्रश्नः । इति मेदिनी ॥ क्रोधवर्जितः । इति शब्दरत्नावली ॥

उमा, स्त्री, (उ भो मा तपस्यां कुर्व्वेति । यथा, "उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" । इति कुमारोक्तेः । यद्वा ओर्हरस्य मा लक्ष्मीरिव । उं शिवं माति मिमीते वा । आतोऽनुपसर्गेति कः । अजादित्वात् टाप् । अवति ऊयते वा उङ् शब्दे "विभाषा तिलमाषोमेति" । ५ । २ । ४ । निपातनात् मक् ॥) दुर्गा । (यथा, कुमारे । ३ । ६७ ।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि" ॥)
अतसी । कीर्त्तिः । हरिद्रा । कान्तिः । इति मेदिनी ॥ शान्तिः । इति शब्दरत्नावली ॥ तत्तामव्युत्पत्तिर्यथा ।
"यतो हि तपसे पत्नि वनम् गन्तुञ्च मेनका ।
उमेति तेन सोमेति नाम प्राप तदा सती" ॥
इति कालिकापुराणे ४२ अध्यायः ॥

उमाकटः, पुं, (उमाया रजः । उमा "अलावतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्" इति कटच् ।) उमाधूलिः । इति व्याकरणम् ॥ मसिनार धूला इति भाषा ।

उमागुरुः, पुं, (उमाया गुरुः पिता । सती दक्षयज्ञे शिवनिन्दाश्रवणात् योगविमुक्तदेहा हिमालयात्मेनकागर्भे सम्भूतेति पौराणिकी कथात्रानुसन्धेया ।) हिमालयपर्व्वतः । इति त्रिकाण्डशेषः ॥

उमाचतुर्थी, स्त्री, (उमायाश्चतुर्थी । उमाजन्मतिथित्वादस्याः तथात्वम् । ज्यैष्ठशुक्लचतुर्थी । यथा,
"ज्यैष्ठशुक्लचतुर्थ्यान्तु जाता पूर्व्वमुमा सती ।
तस्मात् सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये" ॥
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

उमापतिः, पुं, (उमायाः पतिः ।) शिवः । इत्यमरः ॥ (यथा, महाभारते १४ । संवर्त्तमरुत्तीये । ८ । १
"तप्यते तत्र भगवान् तपो नित्यमुमापतिः" ॥)

उमावनं, क्ली, (उमायाः प्रीतये वनमिव ।) पुरविशेषः । तत्पर्य्यायः । देवीकोटः २ कोटीवर्षम् ३ बाणपुरं ४ शोणितपुरं ५ । इति हेमचन्द्रः ॥

उमासुतः, पुं, (उमायाः सुतः पुत्रः ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥

उमेशः, पुं, (उमाया ईशः पतिः ।) महादेवः । इति हेमचन्द्रः ॥

उम्बरः, पुं, (उम् इत्यव्यक्तशब्दं बिभर्त्तीति । उम् + बृ + अच् ।) दारोर्द्धकाष्ठम् । तत्पर्य्यायः । गृहावग्रहणी २ देहली ३ उम्बरः ४ उदुम्बरः ५ । इति हेमचन्द्रः ॥ (गन्धर्व्वविशेषः । यथा, हरिवंशे पारिजातहरणे । १२६ । १४ ।
"उम्बरस्तुम्बुरुश्चैव जगमुर्यत्र च षड्गणान्" ॥)

उम्बी, स्त्री, (उम् क्रोधवर्ज्जितं स्वभावं वाति प्राप्नोतीति । उम + वा + क । पृषोदरादित्वात् वस्य बः ।) अर्द्धपक्वधानासंभृष्टयवगोधूममञ्जरी । अस्या गुणाः । कफप्रदत्वम् । बलकारित्वम् । लघुत्वम् । पित्तानिलापहत्वञ्च । इति भावप्रकाशः ॥

उम्भ, प पूर्त्तौ इति कविकल्पद्रुमः । (तुदां-परं-सकं-सेट् ।) उन्भ इति च पाठः ॥

उम्मं, क्ली, (उमाया अतस्या हरिद्राया वा क्षेत्रम् । उमा + "विभाषा तिलमाषोमाभङ्गाभ्यः" । ५ । २ । ४ । इति यत् ।) सौमीनम् । अतसीक्षेत्रम् । हरिद्राक्षेत्रञ्च । इति भरतो द्विरूपकोषश्च ॥

उर, गतौ । सौत्रधातुरयम् । इति कविकल्पद्रुमः । (परं-सकं-सेट् ।) पञ्चमस्वरादिः । उरसः । इति दुर्गादासः ॥

उरः, [स्] क्ली, (इयर्त्ति । ऋ गतौ । "अर्त्तेरच्च" । ४ । १६४ इति उणादिसूत्रेण असुन् उरादेशः किच्च ।) वक्षःस्थलम् । इत्यमरः ॥
(यथा, रघुः १० । १० ।
"कौस्तुभाख्यमणेः सारं बिभ्राणं हृदतोरसा" ।
तथा, माघे ७ । २२ ।
"उरसि सरसमादलेखा
प्रतिमतयानुययावसंशयानः" ॥)
तत्पर्य्यायः । वक्षः २ वक्षस् ३ क्रोडम् ४ हृत् ५ भुजान्तरम् ६ । इति राजनिर्घण्टः ॥

उरः [स्] त्रि, (ऋ + असुन् + उरादेशः किच्च ।) उत्तमः । श्रेष्ठः । इति मेदिनी ॥

उरःसूचिका, स्त्री, (उरसः सूचिरिव । इवे प्रतिकृतावितिकन् ।) मुक्ताहारविशेषः । इत्यमरः ॥

उरगः, पुं, । (उरसा गच्छतीति । उरसो लोपश्चेति डप्रत्ययः सकारलोपश्च ।) सर्पः । इत्यमरः ॥ (अङ्गुलीवोरगक्षता" । इति रघुः १ । २८ ।) सीसकम् । इति राजनिर्घण्टः ॥

उरगस्थानं, क्ली, (उरगाणां सर्पाणां स्थानम् ।) पातालम् । इति शब्दरत्नावली ॥

उरगाशनः, पुं, (उरगान् सर्पान् अत्तीति । उरग + अद् + ल्यु ।) गरुड़पक्षी । इति जटाधरः ॥ ("खावासभागमुरगाशनकेतुयष्ट्या" । इति माघः । ५ । १३ ॥)

उरङ्गः, पुं, (उरसा गच्छतीति । उरस् + गम् + ड । निपातनात् सिद्धम् ।) उरङ्गमः । इत्यमरटीकायां रायमुकुटः ॥

उरङ्गमः, पुं, स्त्री, (उरसा गच्छतीति । उरस् + गम + खच् ।) सर्पः । इति व्याकरणम् ॥

उरगः, पुं स्त्री, (ऋ + "अर्त्तेः कुगुच्च" । ५ । १७ । इति उणादिसूत्रेण कुच् उरं रपरत्वञ्च ।) मेघः । इत्यमरः ॥ (यथा, ऋग्वेदे २ । १४ । ४ । "यः उरगं जघान नवचखांसं नवतिञ्च बाहून्" ।
तथा हरिवंशे २६ । २६ ।
"उत्तरद्वारवरणौ दृष्ट्वा राजा गृहागतो गृहम् ॥)
मेघः । इति उणादिकोषः ॥

उरगाक्षः, पुं, (उरगस्य मेघस्याक्षीवाक्षि यस्य । तत्तुल्यपुष्पत्वात् तथात्वम् । अक्षणोदर्शनादित्यच् ॥) रक्तविशेषः । रङ्गाँचि इति भाषा । चाकुन्दा इति केचित् । तत्पर्य्यायः । प्रपुन्नाड़ः २ गड़गजः ३ दद्रुघ्नः ४ चक्रमर्द्दकः ५ पद्माटः ६ । इत्यमरः ॥ उरगाख्यः ७ प्रपुन्नड़ः ८ प्रपुनाड़ः ९ । इति तट्टीकायां (अस्य गुणादयः गड़गजशब्दे ज्ञातव्याः ॥)

उरगाशकः, पुं, (उरगाशत्र + स्वार्थे कन् ।) उरगाशत्रुवृक्षः । इति शब्दरत्नावली ॥

उरगाख्यः, पुं, (उरगस्य मेघस्य आख्या इव आख्या यस्य ।) दद्रुघ्नवृक्षः । इत्यमरटीकायां स्वामी ॥

उरगाख्यकः, पुं, (उरगाख्य + स्वार्थे कन् ।) दद्रुघ्नवृक्षः । इति शब्दरत्नावली ॥

उरभ्रः, पुं, स्त्री, (उरः कठोरं भ्रमति । भ्रमु चलने । अन्येभ्योऽपीति डः । पृषोदरादित्वात् साधुः ।) मेषः । इत्यमरः ॥ (मेषशब्देऽस्य गुणादिर्ज्ञेयम् ॥)

उररी, व्य, (ऋ + बाहुलकात् ररीक् । सप्तम्यर्थेऽव्ययीभावश्च ।) स्वीकारः । विस्तारः । इत्यमरः । (यथा, माघे । ६ । ६६ ।
"इति काव्यनिकं मेदमुररीकृत्य" ॥)

उररीकारः, पुं, (उररीकरणम् । उररी + कृ + घञ् ।) अङ्गीकारः । इति जटाधरः ॥

उररीकृतः, त्रि, (उररी + कृ + क्त ।) अङ्गीकृतः । विस्तृतः । इत्यमरः ॥

उरश्छदः, पुं, (उरो वक्षः स्थलं छादयतेऽनेनेति । उरस + छद + घ ।) कवचः । इत्यमरः ॥ (गमात्रये ३ काण्डे । "कार्ष्णयोरश्छदास्त्रैमे पिशाचवदनाः खराः ॥)

उरसिजः, पुं, (उरसि वक्षःस्थले जायते । उरस् + जन् + ड । सप्तम्या अलुक् ।) स्त्रीस्तनः । इति हलायुधः ॥ (यथा, रामायणे ।)
"परिपस्पृशिरे चैनं पीनैरुरसिजैर्मुजैः" ॥)

उरसिलः, त्रि, (प्रशस्तं अतिशयितं वा उरो वक्षो यस्य । उरस् + इलच् ।) प्रशस्तवक्षोयुक्तः । इत्यमरः ॥

उरस्कटः, पुं, (उरः कथ्यतेऽनेन । उरस + कट + क ।) बालयज्ञोपवीतकम् । बुकवाक्काड़ इति ख्यातम् । पञ्चवटश्च तत्पर्य्यायः । इति त्रिकाण्डशेषः ॥

उरस्त्राणं, क्ली, (उरसस्त्राणं भवत्यस्मात् ।) वक्षस्त्राणकवचम् । तत्पर्य्यायः । नागोदरम् २ । इति हारावली ॥

उरस्यः, त्रि, (उरसा निर्म्मितः । उरस् + यत्) औरसजातः । इत्यमरः ॥

उरस्वान्, [त्] त्रि, (प्रशस्तमतिशयितं वा उरो वक्षःस्थलं यस्य । उरस् + मतुप् + मस्य वः ।) प्रशस्तवक्षोयुक्तः । तत्पर्य्यायः । उरसिलः २ । इत्यमरः ॥

उरी, व्य, (वयतेरीक् बाहुलकात् सम्प्रसारणञ्च ।) स्वीकारः । विस्तारः । इत्यमरः ॥
(यथा रघौ १५ । ७० ।
"उरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत्" ॥)

उरीकृतः, त्रि, (उरी + कृ + क्त ।) अङ्गीकृतः । विस्तृतः । इत्यमरः ॥

उरुः, त्रि, (उर्णोति । ऊर्णु + "सर्व्वधातुभ्यः" ।

यो नोऽनुप्रविशेन्मोहात् स वै द्वादशवार्षिकम् ॥
वने चरेत् ब्रह्मचर्य्यमिति वः समयः कृतः ।
तदिदं द्रौपदीहेतोरन्योन्यस्य प्रवासनम् ॥
कृतवांस्तत्र धर्म्मार्थमत्र धर्म्मो न दुष्यति ।
परिचाणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन ! ॥
कृत्वा मम परिचाणं तव धर्म्मो न लुप्यते ।
यदि वाप्यस्य धर्म्मस्य सूक्ष्मोऽपि स्यात् व्यतिक्रमः ॥
स च ते धर्म्म एव स्यात् दत्त्वा प्राणान् ममाच्युत ! ।
भक्षाश्च भज मां पार्थ ! सतामेतन्नतं प्रभो ! ॥
न करिष्यसि चेदेवं मृतां मामुपधास्यसि ।
प्राणदानान्महादानो वर धर्म्ममनुत्तमम् ॥
शरणञ्च प्रपन्नास्मि त्वामद्य पुरुषोत्तम ! ।
दीनाननाथान् कौन्तेय ! परिरक्षसि नित्यशः ॥
साहं शरणमभ्येमि रोरवोमि च दुःखिता !
याचे त्वाञ्चाभिकामाहं तस्मात्कुरु मम प्रियम् ॥
स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि ॥

वैशम्पायन उवाच ।

एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया ।
कृतवांस्तत्तथा सर्व्वं धर्म्ममुद्दिश्य कारणम् ॥
स नागभवने रात्रिं तामुषित्वा प्रतापवान् ।
उदितेऽभ्युत्पितः सूर्य्ये कौरव्यस्य निवेशनात् ॥
आगतस्तु पुनस्तत्र गङ्गाहारं तया सह ।
परित्यज्य गता साध्वी उलूपी निजमन्दिरम् ॥
दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत ! ।
साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः" ॥*॥)

उल्का, स्त्री, (ओघतीति । उष दाहे "शुकवल्कोल्का" ३।४२। इति उणादिसूत्रेण क-प्रत्ययात् साधुः ।) तेजःपुञ्जः । इत्यमरटीकायां भरतः ॥ अग्निशिखा ॥ अग्निः । इत्यादिकोषः ॥ (यथा,
"तुलाराशिं गते भानौ अमावस्यां नराधिपः ।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च ॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः ।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ॥
लक्ष्मीः सपूज्यतां लोका उल्काभिश्चापि वेष्ट्यताम्" ।
इति तिथितत्त्वे अमावस्याप्रकरणे ।) आकाशात् पतिताग्निः । इति रायमुकुटादयः ॥
("तच्चेदायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः" ।
इति मेघदूते पूर्व्वमेघे ५४ श्लोकः ।
"उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च"
इति मनुः । १ । ३८ ।) अस्या लक्षणम् ।
"दृष्टच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषीयप्रमाणेन उल्का नानाविधा स्मृता" ॥
इति काश्यपः ॥
(अस्याः कारणमाह गर्गसंहितायाम् ।
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारात् नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपराधात् नियतमपवर्जन्ति देवताः ।
ताः स्रजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान् ॥
तत्र त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः संबोधयन्ति च" ॥
अस्या लक्षणादिकमुक्तं बृहत्संहितायां ३२ अध्याये । तद्यथा,—
"दिविभुक्तशुभफलानांपततांरूपाणियानितान्युल्काः ।
धिष्ण्योल्काशनिविद्युत्तारास्तिस्रश्चधा भिन्नाः ॥ १ ॥
उल्का पतेच्च फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पञ्चैः ।
विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ २ ॥
तारा फलप्रदकरी फलार्द्रदात्री प्रकीर्त्तिता धिष्ण्या ।
तिक्तः सम्पूर्णफला विद्युदथोल्काशनिश्चेति ॥ ३ ॥
अशनिःस्वनेन महताद्रिगजाश्वमृगाश्चवेश्मतरुपशुषु ।
निपतति विदारयति धरातलं चक्रसंस्थाना ॥ ४ ॥
विद्युत्तत्त्वत्त्वासं जनयन्ती तटतटस्वना सहसा ।
कुटिलविशालानिपततिज्ञेवेन्धनराशियुज्ज्वलिताप्
धिष्ण्याद्यशाल्यपुच्छाधनूंषिदण्डश्चतेऽन्तराभ्यधिकं ।
ज्वलिताङ्गारनिकाशा द्यौहस्तौ सा प्रमाणेन ॥६॥
तारा ह्रस्वं दीर्घा शुक्ला ताम्राऽतन्तुरूपा वा ।
तिर्य्यगधश्चोर्द्धं वा याति वियत्यूह्यमानेव ॥ ७ ॥
उल्काशिरसिविशालानिपतन्ती वर्द्धतेप्रतनुपुच्छा ।
दीर्घा भवति च पुरुषं भेदा बहवो भवन्त्यस्याः ॥८॥
प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलभृगाभाः ।
गोधाहिधूमरूपाः पापा या चोभयशिरस्काः ॥९॥
ध्वजभूषकरिगिरिकमलेन्दुतुरगसन्नभरजतहंसाभाः । श्रीवत्सवज्रशङ्खस्वस्तिकरूपाः शिवसुमित्राः ॥ १० ॥
अमरसभाद्वङ्गो निपतन्यो राजराष्ट्रनाशाय ।
सम्भ्रमतिगगनोपरिविभ्रममाख्याति लोकस्य ॥११॥
संस्पृशती चन्द्रार्कौ तद्विहता वा सभूप्रकम्पा च ।
परचक्रागमनप्रवधूर्म्मित्राहृष्टिभयजननी ॥ १२ ॥
पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिंसाम्बोः ।
उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥१३॥
शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी ।
क्रमशश्चैतान् हन्युर्मूर्द्धोरःपार्श्वपुच्छस्थाः ॥ १४ ॥
उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा ।
ऋज्वी स्निग्धा खण्डा नीचोपगता च तद्वृद्ध्यै ॥१५॥
श्यामा वारुणनीलाऽरुणदहना सितभस्मनिभारूक्षा ।
सन्ध्या दिनजा वक्रा दलिता च परागमभयाय ॥१६॥
नक्षत्रग्रहघाते तद्भक्तीनां भयाय निर्दिष्टा ।
उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा ॥ १७ ॥
भाग्यादित्यर्धनिष्ठामूलेषूल्काहतेषु युवतीनाम् ।
विप्रक्षत्रिपीड़ा पुष्यानिलविण्डुदेवेषु ॥ १८ ॥
ध्रुवसौम्येषु नृपाणां उग्रेषु सदारुणेषु चैराणां ।
क्षिप्रेषु कलाविदुषां पीड़ा साधारणे च हते ॥१९॥
कुर्व्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् ।
शुक्लोपरि नृपतीनां म्लेच्छपतत्स्वामिनां पीड़ाम् ॥२०॥
आशायहोपघाते तद्देश्यानां खले क्षयिस्तानाम् ।
चैत्यतरौ सम्पतिता सत्कृतपीड़ां करोत्युल्का ॥२१॥
दारिपुरस्यपुरस्यायमधेन्द्रकीले जनक्षयोऽभिहितः ।
ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनोगोष्ठे ॥२२॥
क्ष्वेड़ास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्तियदा ।
उल्कानिपातसमये भयाय राष्ट्रस्य सन्दध्यात् ॥२३॥
यस्याशिरं तिष्ठति खेऽनुबद्धो दण्डाकृतिः सा नृपतेर्भयाय । या चोच्छ्रिते तन्तुधृतेव खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥ २४ ॥
ऐशिनः प्रतीपगा तिर्य्यगा नृपाङ्गनाः ।
हन्त्यधोमुखी नृपान् ब्राह्मणानयोर्द्ध्वगा ॥ २५ ॥
वर्हिपुच्छरूपिणी लोकसंक्षयावहा ।
सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ २६ ॥
हन्ति मण्डलापुरं कृत्तवत्पुरोहितम् ।
वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ २७ ॥
व्यालसूकरोपमा विस्फुलिङ्गमालिनी ।
खण्डशोऽथ वा गता सस्वना च पापदा ॥ २८ ॥
सुरपतिचापप्रतिमा राज्ञां नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिहन्ता वा ॥२९॥
अभिभवति यतः पुरं बलं वा भवति भयं ततएव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात् तया प्रयातः" ॥३०॥)

उल्कामुखी, स्त्री, (उल्का अग्निशिखावत् तेजः मुखे यस्याः ।) जन्तुविशेषः । खँकशआलि इति भाषा । तत्पर्य्यायः । भद्रगालिका २ लोमालिका ३ दीप्तजिह्वा ४ किखिः ५ । इति त्रिकाण्डशेषः ॥

उल्मुकं, क्ली, (ओवतीति । उष दाहे + उल्मुकदर्वीति निपातनात् धातोः धस्य लः मुकप्रत्ययश्च ।) अङ्गारः । इत्यमरः ॥ (यथा, शतपथब्राह्मणे ६ । २ । ७
"अन्वाहार्य्यपचनादुल्मुकमादाय" । ऋषिवंशीयराजा । यथा, महाभारते २। निमन्त्रितराजागमने ३४ । १६ ।
"उल्मुको निशठश्चैव वीरश्चाङ्गावहस्तथा ।
हृष्यायो निखिलाश्चान्ये समाजग्मुर्महारथाः" ॥)

उल्लङ्घनं, क्ली, (उत् + लघि + ल्युट्।) अतिक्रमणम् । इति पुराणम् । डिङ्गान इति भाषा । (यथा, कुमारे ३ सर्गे २५ श्लोकस्य टीकायां मल्लिनाथः । "समयोल्लङ्घनेन पराङ्मुनासकृतिं प्रवृत्ते सति" ॥)

उल्लसः, त्रि, (उत् + लस् + अच् ।) बद्धरोमयुक्तः । तत्पर्य्यायः । रोमशः २ । इति हारावली ॥

उल्लसितः, त्रि, (उत् + लस् + क्त ।) तरलितः । आन्दोलितः । इति जटाधरः ॥

उल्लसनकं, क्ली, (उल्लसन + स्वार्थे कन् ।) रोमाञ्चः । इति हेमचन्द्रः ॥

उल्लाघः, त्रि, (उत् + लाघ् + गत्यर्थेति क्त । निपातनात् सिद्धम् ।) गदाद्विर्गतः । नीरोगः । इत्यमरः ॥ शुचिः । दक्षः । क्षण्यम् । मरीचमितियावत् । इति विश्वमेदिन्यौ ॥ क्षण्यमित्यत्र क्षुण्णमिति कस्याश्चिन्मेदिन्यां पाठः ॥

उल्लापः, पुं, (उत् + लप् + घञ् ।) श्लोकरोगादिना ध्वनिविकारः । तत्पर्य्यायः । काकुवाक् २ । इति हेमचन्द्रः ॥ (यथाह, भर्त्तृहरिः । ३ । ६ ।
"खलोल्लापाः सोढ़ाः कथमपि तदाराधनपरैः ॥")

उल्लासः, पुं, (उत् + लस् + घञ् ।) ग्रन्थपरिच्छेदः । इति भूरिप्रयोगः ॥ यथा काव्यप्रकाशे प्रथम उल्लास इति प्रयोगः । वृद्धिः । इति श्रीभागवतम् ॥ आह्लादः । प्रकाशः ॥
("निपतन्ति कन्दलदुल्लासाः पयोविन्दवः" ।
इति अमरशतके । ४८ ।)

उल्लिखितः, त्रि, (उत् + लिख + क्त ।) उत्कीर्णः । तनूकृतः । इति मेदिनी ॥ चित्रितः । इति शब्द-

रत्नावली ॥ ऊर्द्ध लिखितः ॥ (यथा, रघुः ।६ ३२ ।)
"त्वष्टेव यत्नोल्लिखितो विभाति" ॥)

उल्लेखः, पुं, (उत् + लिख् + घञ् ।) उद्धारणम् । कथनम् । इति स्मार्त्ताः ॥ (अलङ्कारभेदः ॥ तल्लक्षणं यथा, साहित्यदर्पणे १० परिच्छेदे ।

"क्वचिद्वेदादृहीतृणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते" ॥
उदाहरणम् । "प्रियइति गोपवधूभिः शिशुरिति वृद्धैरधीशइति देवैः । नारायणइति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्दैवः" ॥)

उल्लेखनं, क्ली, (उत् + लिख् + ल्युट् ।) वमनम् । इति रत्नमाला ॥ खननम् । यथा "भूमेरुल्लेखनं कुर्य्यात्" । उक्तिः स्मृतिः ॥ (यथा, मनुः ५ ।१२४ । "सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनेन च" ।)
उद्धारणम् । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत्" ॥
इति तिथ्यादितत्त्वम् ॥

उल्लोचः, पुं, (ऊर्द्धं लोचति । उत् + लोच् + अच् । यद्वा ऊर्द्धं लोच्यते । लोच् + घञ् । कुत्वन्तु न निष्ठायामनिट इति वचनात् । अस्य तु तन्न सेट्त्वात् ।) चन्द्रातपः । चाँदोया इति भाषा । तत्पर्य्यायः । वितानम् २ । इत्यमरः ॥

उल्लोलः, पुं, (उल्लोड़यतीति । लोडृ उन्मादे + णिच् + पचाद्यच् । डलयोरैक्यात् डस्य लः ।) महातरङ्गः । बड़ ढेउ इति भाषा । तत्पर्य्यायः । कल्लोलः २ । इत्यमरः ॥

उल्वं, क्ली, (उल्लीयते इति । उत् + लीङ् श्लेषणे उल्वादयश्च ४ ।६५ । इति उणादिसूत्रेण साधुः ।) जरायुः । इत्यमरः ॥ (यथा, गीतायां ३ । ३८ । "यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम्" ।
"जातमात्रं विशोध्योल्वाद्बालं सैन्धवसर्पिषा ।
प्रसूतिक्लेशिते चानु बलातैलेन सेचयेत्" ॥
इति वाभटः उत्तरस्थाने १ अध्याये उक्तवान् ॥
"अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्धि पिचुं दद्यात् ततो नाभिनाड़ीमुत्कृत्तमायम्य सूत्रेण बद्धा छेदयेत्तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग् बध्नीयात् । इति सुश्रुते शारीरस्थाने १० अध्याये ॥)

उल्वणं, त्री, (उत् + वण + अच् । इषोदरादित्वात् साधुः ।) व्यक्तम् । स्पष्टम् । इत्यमरः ॥
("श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः" ॥
इति वाभटे निदानस्थाने ७ अध्याये ॥
"हेतुलक्षणसंसर्गाद्विद्याद्दोषोल्वणानि च" ।
इति रुग्विनिश्चयतन्त्रे अर्शोधिकारे ॥
प्रकाशः । निर्बाधः । यथा, रघुः । ४ । ३२ ।
"तस्यासीदुल्वणो मार्गः पादपैरिव दन्तिनः" ॥)

उशती, त्रि, (वश् + शतृ + ङीप् । सम्भसारणम् ।) अकल्याणवाक् । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे ७ । ८९ । ५ । "आपो हिष्ठा मयोभुवः स्थान ऊर्जे दधातन महेरणाय चक्षसे । ॐ यो वः शिवतमोरसस्तस्य भाजयतेह नः । उशतीरिव मातरः" ॥)

उशनाः, [स्] पुं, (वश् कान्तौ + "वशेः कनसिः" ।४ ।२३८ । इति उणादिसूत्रेण कनसिः । ग्रहादित्वात् सम्प्रसारणम् ।) शुक्राचार्य्यः । इत्यमरः ॥ (यथा, कुमारे ३ । ६ ।
"अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिर्दिधक्षुः" ॥
स च दैत्यगुरुः । तथा च महाभारते ययातिसंवादे १ । ७६ । ६ ।
"पौरोहित्येन याज्यत्वे काव्यस्योशनसं परे" ॥)

उशीक्, [ञ्] पुं, (वशि उश्यते वा । वश् कान्तौ + "वशः कित्" ।२ ।७१ । इति उणादिसूत्रेण इजिः । सम्प्रसारणम् ।) अग्निः । घृतं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

उशिक्, त्रि, (वश् कान्तौ + इजि + सम्प्रसारणम् ।) कमनीयम् ॥
"न यद्वचश्चित्पदं हरेर्यशो
जगत्पवित्रं प्रगृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसाः
न यत्र हंसा निरमन्त्युशिक्क्षयाः" ॥
इति श्रीभागवते १ स्कन्धे ५ अध्यायः । "चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशन्ति मन्यन्ते कुतः मानसाः सत्त्वप्रधाने मनसि वर्त्तमाना हंसाः यतयो यत्र न निरमन्ति कर्हिचिदपि नितरां न रमन्ते । उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते यथा । प्रसिद्धा हंसाः मानससरसि चरन्तः कमनीयपद्मषण्डनिवासास्यक्तविचित्रान्नादियुक्ते उच्छिष्टगर्त्ते काकक्रीड़ास्थाने न रमन्ते इति श्लेषः" । इति तट्टीकायां श्रीधरस्वामी ॥ (कामयमानम् । यथा ऋग्वेदे १ । १३१ । ५ "आदित्ते अस्य वीर्य्यस्य चर्किरन्मदेषु दधन्नृशिश्नो यदाविथ सखीयतो यदाविथ" । "उशिग्नो धर्म्मं कामयमानाः जनाः" । इति भाष्यम् ॥)

उशी, स्त्री, (वश् + ईं । सम्प्रसारणम् ।) वाञ्छा । इत्युणादिकोषः ॥

उशीनरः, पुं, (उशीप्रदो वाञ्छाप्रदो नरो यत्र ।) देशभेदः । तत्पर्य्यायः । गान्धारः २ । इति जटाधरः ॥ चन्द्रवंशोद्भवराजविशेषः । स तु शिविराजपिता । इति श्रीभागवतम् ॥ (एतद्वंशीयो नृपभेदः । यथा महाभारते । श्येनकपोतीये । ३ । १३० । २१-२३ ।
"उशीनरो वै यज्वेष्ट्वा वासवादत्यरिच्यत ॥
तां देवसमितिं तस्य वासवश्च विगाह्यते ।
अभ्यगच्छन्नृपवरं ज्ञातुमग्निञ्च भारत ॥
जिज्ञासमानौ वरदौ महात्मानमुशीनरं ।
इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः" ॥
तस्य चरित्रं तत्रैव १३१ अध्याये द्रष्टव्यम् ॥)

उशीरः, पुं क्ली, (वश् कान्तौ + "वशः कित्" ।४ ।३१ इति उणादिसूत्रेण ईरन् । सम्प्रसारणम् ।) वीरणमूलम् । वेनार मूल् खस् इत्यादि भाषा । तत्पर्य्यायः । अभयम् २ नलदम् ३ सेव्यम् ४ अमृणालम् ५ जलाश्रयम् ६ लामज्जकम् ७ लघुलयम् ८ अवदाहम् ९ इष्टकापथम् १० । इत्यमरः । उशीरम् ११ मृणालम् १२ लघु १३ लयम् १४ अवदानम् १५ इष्टम् १६ कापथम् १७ अवदाहेष्टकापथम् १८ इन्द्रगुप्तम् १९ । इति तट्टीकायां भरतादयः ॥ जलवासम् २० हरिप्रियम् २१ वीरम् २२ वीरणम् २३ समगन्धिकम् २४ रणप्रियम् २५ वीरतरु २६ शिशिरम् २७ शीतमूलकम् २८ वितानमूलकम् २९ जलमेदम् ३० सुगन्धिकम् ३१ सुगन्धिमूलकम् ३२ कम्भ ३३ । इति राजनिर्घण्टः ॥ अस्य गुणाः । घर्म्मदौर्गन्ध्यदाहपित्तरक्तरोगनाशित्वम् । इति राजवल्लभः ॥ अपिच । शीतलत्वम् । तिक्तत्वम् । मोहभ्रमापहृतम् । ज्वरार्त्तिपित्तश्रमनकारित्वम् । जलसौगन्ध्यदायकत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, शाकुन्तले ३ अङ्के । "प्रियंवदे ! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते" । अस्य पर्य्यायगुणाः यथा,
"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि ॥
उशीरमम्बुचन्दनं शीतं स्तम्भनं लघु तिक्तकम् ।
मधुरं ज्वरहृद्दाहतृष्णमदनुत्कपित्तहृत् ।
व्रणास्रविषवीसर्पदाहहृच्छ्रमापहम्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

उशीरकं, क्ली, (उशीर + स्वार्थे कन् ।) वीरणमूलं । इति रत्नमाला ॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः ।)

उशीरी, स्त्री, लघुकाशः । छोट काशा इति भाषा । तत्पर्य्यायः । मिसिः २ गुड़ा ३ अश्वालः ४ नीरजः ५ शूरः ६ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहक्षयरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

उष उ वधे, दहि । इति कविकल्पद्रुमः ॥ (भ्वादिः परं-सकं-सेट् ।) क्रयादिः । उ ओषिता उष्टा । ओषति । क्तावेट्त्वान्नेमडौ त्रीत्वादिना इमो निषेधे निष्ठायां उष्टः । दहि भस्मीकरणे । इति दुर्गादासः ॥

उष वधे । दहि । इति कविकल्पद्रुमः ॥ (भ्वादिः परं-सकं-सेट् ।) ओषति । उषितः । दहि भस्मीकरणे । इति दुर्गादासः ॥ (यथा, मनुः ।८ ।२७३ । "यद्यपि धर्म्मसमयात् प्रच्युतो धर्म्मजीवनः ।
दण्डेनैव तमप्योषेत् स्वकाद्धर्म्माद्धि विच्युतम्" ॥)

उषं, क्ली, (उष + क ।) पांशुजलवणम् । इति रत्नमाला ॥

उषः, पुं, (उष + क ।) कामी । गुग्गुलुः । राजिश्लेषः । दिनम् । इति मेदिनी ॥ (दहनवधकर्त्तरि, त्रि । क्षारवृत्तिका । इति शब्दरत्नावली ॥

उषः, [स्] क्ली, (ओषति नाशयत्यन्धकारम् । उष + "उषः किदिति" ४ ।२२१ । उणादिसूत्रेण असिः ।) प्रत्यूषः । इत्यमरः ।
("आसीदासन्निर्व्वाणः प्रदीपार्चिरिवोषसि" ।
इति रघुः । १२ । १ । तथा, माघे । ११ ।१७ ।
"पुनरुषसि विविक्तैर्मातरिश्वावधूतं" ॥)

उषी

उषणं, क्ली, (उष्+बाहुलकात् क्युन्। ल्युट् वा।) मरिचम्। इत्यमरः। पिप्पलीमूलम्। इति राजनिर्घण्टः॥

उषणा, स्त्री, (उषण+टाप्।) पिप्पली। इत्यमरः॥ शुण्ठी। इति राजनिर्घण्टः॥ चविकम्। इति रत्नमाला॥ ("उषकुल्योषणा शौण्डी" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे पर्य्याय उक्तः।)

उषती, स्त्री, (उष्+शतृ। आगमशासनस्यानित्यत्वात् नुमभावः।) अकाल्याणवाक्। इत्यमरः॥ (यथा, महाभारते १। ८७। ८।

"यया स्य वाचा पर उद्विजेत
न तां वदेदुषतीं पापलोक्याम्"॥)

उषपः, पुं, (ओषतीति। उष्+"उषिकुटिदलिकचिखजिभ्यः कपन्"। ३। १४२। इति कपन्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥

उषर्बुधः, पुं, (उषसि प्रातर्बुध्यते प्रकाशते। उषस्+बुध्+क।) अग्निः। इत्यमरः॥ रक्तचित्रकः। रांचिता इति भाषा॥

उषसी, स्त्री, (उषं दिवसं स्यति दूरीकरोतीति। उष+सो+क+ङीप्।) सन्ध्याकालः। इति मेदिनी॥

उषा, स्त्री, (उष+क+टाप्।) बाणराजसुता। सा तु अनिरुद्धभार्य्या। (यथा, हरिवंशे १७४। बाणयुद्धे १२।

"बाणस्य दुहिता कन्या तत्रोषा नाम भाविनी"।

विस्तृतिस्तु बाणयुद्धशब्दे द्रष्टव्या।) रात्रिः। इति मेदिनी॥ स्त्रीगवी। इति हेमचन्द्रः॥ उखा। स्थालीति यावत्। इत्यमरटीकायां रमानाथः॥ (रात्रिशब्देः। यथा ज्योतिषे।

"उषां गोधूलियोगं वा स्त्रीक्षत्य गमनं चरेत्"॥)

उषा, य, (ओषतीति। उष+क+टाप्।) रात्रिशब्देः। रात्र्यवसानम्। इत्यमरमेदिन्यौ॥ सा तु नक्षत्रतेजःपरिहानिमारभ्य भानोरुदयं यावत् भवति। यथा,—

"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरुषा भानोरुदयं यावत्"॥ इति तिथितत्त्वे वराहवचनम्॥

उषाकालः, पुं, (उषायां कालो यस्य।) कुक्कुटः। इति त्रिकाण्डशेषः॥

उषापतिः, पुं, (उषायाः पतिः।) अनिरुद्धः। स तु कामदेवपुत्रः। इत्यमरः॥ (एतत्कथा बाणयुद्धशब्दे द्रष्टव्या॥)

उषारमणः, पुं, (उषाया रमणः।) अनिरुद्धः। इति हलायुधः॥

उषितः, त्रि, (उष वा वस+क्त।) व्युषितः। दग्धः। इति मेदिनी॥ त्वरितम्। इति धरणिः॥ स्थितः। इति त्रिकाण्डशेषः॥

उषितकक्षीवान्, त्रि, (उषिताः स्थिता गावो यत्र।) आश्रितकक्षीवान्। यत्र पुरा गावो भोजिताः। इत्यमरटीकायां रमानाथः॥

उषीरः, पुं क्ली, (उष्+कीरच्।) उशीरः। वीरणमूलम्। इत्यमरटीकायां रायमुकुटः॥

उष्ट्र

उषेशूरः, पुं, (उषायाः बाणकन्यायाः ईशूरः।) अनिरुद्धः। इति हेमचन्द्रः॥

उष्ट्रः, पुं, (उष+"उषिखनिभ्यां कित्"। ४। १६१। इत्युणादिसूत्रेण ष्ट्रन् किच्च।) वाह्यरथः। इति धरणी॥ पशुविशेषः। उट् इति भाषा। तत्पर्य्यायः। क्रमेलकः २ मयः ३ महाङ्गः ४। इत्यमरः॥ दीर्घगतिः ५ बली ६ करभः ७ दासेरकः ८ धूसरः ९ लम्बोष्ठः १० रवणः ११ महाजङ्घः १२ जवी १३ जाङ्घिकः १४ दीर्घः १५ पृष्ठकूलकः १६ महान् १७ महाग्रीवः १८ महानादः १९ महाध्वगः २० महापृष्ठः २१ बलिष्ठः २२। इति राजनिर्घण्टः॥ दीर्घजङ्घः २३ ग्रीवी २४ धूसरकः २५ शूरभः २६। इति जटाधरः॥ क्रमेलः २७ कण्टकाशनः २८ भोलिः २९ वङ्क्रकरः ३० अध्वगः ३१ मरुद्विपः ३२ वक्रग्रीवः ३३। इति शब्दरत्नावली॥ वासन्तः ३४ कुलनाशूरः ३५। इति त्रिकाण्डशेषः॥ कुशूनामा ३६ मरुप्रियः ३७ द्विककुत् ३८ दुर्गलङ्घनः ३९ भूतघ्नः ४० दासेरः ४१ दीर्घग्रीवः ४२ केलिकीर्णः ४३। इति हेमचन्द्रः॥ (यथा मनुः ४। १२०।

"नाधीयिताश्वमारूढो न रथं न च हस्तिनम्।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः"॥
"उष्ट्रयानं समारुह्य खरयानं तु कामतः"।
इति च मनुः। ११। २९॥)

उष्ट्रकाण्डी, स्त्री, (उष्ट्रइव काण्डोऽस्य। जातित्वात् ङीष्।) पुष्पजातिभेदः। उँटाटी इति ख्याता। तत्पर्य्यायः। रक्तपुष्पी २ करभकाण्डिका ३ रक्ता ४ लोहितपुष्पी ५ कर्णपुष्पी ६। अस्या गुणाः। तिक्तत्वम्। उष्णत्वम्। रुचिकारित्वम्। हृद्रोगहारित्वञ्च। अस्या बीजगुणाः। मधुरत्वम्। शीतत्वम्। ग्रीष्मत्वम्। दृष्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

उष्ट्रधूसरपुच्छिका, स्त्री, (उष्ट्रस्य धूसरः पुच्छइव पुच्छो मञ्जरी यस्याः।) वृक्षविशेषः। इति रत्नमाला॥ विचिटीइति भाषा॥

उष्ट्रपादिका स्त्री, (उष्ट्रस्य पाद इव पादो यस्याः।) वृक्षविशेषः। मदनमालीति ख्याता। तत्पर्य्यायः। शातभीरुः २ भद्रवल्ली ३ भूमिमत्ता ४। इति रत्नमाला॥

उष्ट्रशिरोधरं, क्ली, (उष्ट्रस्य शिरोधरः ग्रीवा इव आकृतिर्यस्य।) भगन्दररोगविशेषः। तस्य लक्षणम्।

"प्रकोपनैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां कदाचित्।
तदाशुपाकां हिमपूतवाहिनीं
भगन्दरन्तूष्ट्रशिरोधरं वदेत्"॥

इति निदानम्। (अस्य लक्षणं चिकित्साञ्चोक्तवान् वाभटे उत्तरस्थाने २८ अध्याये। अस्य नामान्तरमुष्ट्रग्रीवः। यथा।

"पित्तादुष्ट्रग्रीववदुच्छ्रिता॥
रागिणी तनुरुग्राह्या ज्वरधूमायनान्विता"।
"उष्ट्रग्रीवस्तु पित्तजः"।
"अग्निना वा भिषक् साधूक्षारेणैवोष्ट्रकन्धरम्"।

उष्णी

सुश्रुतेन निदानस्थाने ४ अध्याये यत् सम्प्राप्तिपूर्ब्बकं लक्षणमस्योक्तं तद्यथा॥ पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्ब्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्यचोषादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणञ्चाग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितञ्च वातमूत्रपुरीष-रेतांसि विसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते"॥ इति।*॥ सुश्रुते चिकित्सितस्थाने ८ अध्याये चिकित्सा यथा,—

"उष्ट्रग्रीवे क्रियां शृणु।
अधोष्ट्रग्रीवमेषित्वा क्षिप्त्वा क्षारं निपातयेत्।
पूतिमांसव्यपोहार्थमग्निञ्च न पूजितः।
अथैनं घृतसक्तैस्तिलैः पिण्डैः प्रलेपयेत्॥
बन्धं ततोऽनुकुर्व्वीत परिषेकन्तु सर्षपैः।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक्॥
ततः शुद्धं विदित्वा च रोपयेत्तु यथाक्रमं।
उत्क्लेत्यास्रावमार्गन्तु परिस्रावियि बुद्धिमान्॥
क्षारेण वा स्रावगतिं दहेद्घृतवहेन वा।
मुखोष्णेनाग्नितप्तेन सेचयेदगुदमण्डलम्॥
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्वितः।
वामनीयौषधैः कार्य्याः परिषेकाश्च माक्षयाः"॥)

उष्ट्रिका, स्त्री, (उष्ट्रस्याकृतिरिवावयवो यस्याः। उष्ट्रस्य स्त्री वा॥) मृत्तिकाभाण्डभेदः। (यथा माघे १२। १६

"धूर्भङ्गरक्षिप्तेषविदारितोष्ट्रिका"।) उष्ट्रभार्य्या इति मेदिनी॥ वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

उष्ट्री, स्त्री, (उष्+ष्ट्रन्+ङीष्।) मृत्तिकाभाण्डः उष्ट्रस्त्री। इति हेमचन्द्रः॥ तस्याः क्षीरगुणाः कुष्ठशोथपित्तार्शःकफाटोपानाहोदरस्रंसन्तुगुल्मश्वासोच्छ्वासनाशित्वम्। तद्दधिगुणाः। अर्शःकुष्ठकृमिशूलोदररोगनाशित्वम्। कटुत्वम्। स्वादुत्वञ्च। तन्नवनीतगुणाः। विपाके शीतलत्वम्। लघुत्वम्। व्रणकृमिकफास्रवातविषनाशित्वञ्च। तद्घृतगुणाः। मधुरत्वम्। विपाके कटुत्वम्। शीतलत्वम्। कुष्ठकृमिविषवातकफगुल्मोदरनाशित्वञ्च। तन्मांसगुणाः॥ स्निग्धिरत्वम्। चिरोषणमनत्वम्। लघुत्वम्। बलपुष्टिप्रदत्वम्। रुचिकारित्वम्। मधुरत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (अस्या दुग्धगुणा यथा,—

"ईषदूष्णोष्णलवणमौष्ट्रकं दीपनं लघु।
शूलं वातकफानाहकृमिमेहोदरार्शसाम्"॥
इति वैद्यकचक्रपाणिदत्तद्रव्यगुणे पानीयवर्गे।
"औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनन्तथा।
क्रिमिकुष्ठकफानाहशोथोदरहरं सरम्"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥

"रूक्षं तथोष्णं लवणं कफस्य
निवारणं वातविकारहारि।
लघु प्रशस्तं कटुकं क्षमीणां
शोषाग्निनामौष्ट्रपयोऽनुकूलम्"॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये॥
"रूक्षोष्णं क्षीरमुष्ट्रीणामीषत् लवणं लघु।

शूलं वातकफानाहकृमिमेदोविदाहार्शसाम्" ॥
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"रूक्षोष्णं लवणं किञ्चिदौष्ण्यं स्वादुरसं लघु ।
शोफगुल्मोदरार्शघ्नं कृमि-कुष्ठ-विषापहम्" ॥
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)

उष्णः, पुं, (उष दाहे + "इण्षिञ्जिदीङ्ष्व्यिब्योनक्" । ३ । २ । इति उणादिसूत्रेण नक् ।) ग्रीष्मऋतुः । तत्पर्य्यायः । ग्रीष्मः २ उष्मकः ३ निदाघः ४ उष्णोपगमः ५ उष्णागमः ६ तपः ७ । इत्यमरः ॥ आतपः । इति हेमचन्द्रः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्यायः ।
"उष्णे हैमे वसन्ते च कामं ग्रीष्मे तु शीतलम्" ।
क्वचित् क्लीवलिङ्गान्तोऽपि दृश्यते ।
यथा महाभारते संवर्त्तमरुत्तीये । १४ । ८ । ६ ।
"नोष्णं न शिशिरस्तत्र न वायुर्न च भास्करः" ।
अग्निः । सूर्य्यः । यथा, मनुः ११ । ११३ ।
"उष्णे वर्षति शीते वा मारुते वाति वा सदा" ।
("उष्णे आदित्ये मेघे च वर्षति" इति तट्टीकायां कुल्लूकभट्टः ॥) पलाण्डुः । इति राजनिर्घण्टः ॥ उष्णवीर्य्यद्रव्यगुणाः । पित्तबलकारित्वम् । लघुत्वम् । वातश्लेष्मनाशित्वञ्च । इति राजवल्लभः ॥

उष्णः, त्रि, (उष् + नक् ।) निरालस्यव्यक्तिः । तत्पर्य्यायः । दक्षः २ चतुरः ३ पेशलः ४ पटुः ५ सूत्यानः ६ । इत्यमरः । अशीतः । इति मेदिनी ॥ (यथा मनुः । ३ । २३७ ।
"यावदुष्णं भवत्यन्नं यावन्नाति वाग्यतः" ॥)

उष्णकः, पुं, (उष्णं करोतीति । उष्ण + शीतोष्णाभ्यां कारिणीति कन् ।) ग्रीष्मकालः । चंक्रमादिः । इति धरणी ॥ (ज्वरः । इति पाणिनिः ५ । २ । ८१ ॥)

उष्णकः, त्रि, (उष्णं कार्य्यमस्य । उष्ण + कन् ।) क्षिप्रकारी । आतुरः । इदि मेदिनी ॥ प्रगतः । इति धरणी ॥ क्रोधोद्दीप्तः इति पाणिनिः ५ । २ । ७२ ॥)

उष्णनदी, स्त्री, (उष्णा नदी ।) वैतरणी नदी ॥

उष्णरश्मिः, पुं, (उष्णा रश्मयो यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (यथा, कुमारे ३ । २५ ।
"कुबेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य" ॥)

उष्णवारणः, पुं, क्ली, (उष्णमातपं वारयति । उष्ण + वृ + णिच् + ल्युट् ।) छत्रम् । इति हारावली ॥ (यथा, कुमारे ५ । ५२ ।
"यदर्थमम्भोऽभिरवोष्णवारणं
कृतं तपःसाधनमेतया वपुः" ।
छत्रशब्दस्य गुणादिकं ज्ञेयम् ॥)

उष्णवीर्य्यः पुं, (उष्णमुग्रं वीर्य्यं यस्य ।) शिशुमारः । इति हेमचन्द्रः ॥ तीक्ष्णतेजोयुक्तद्रव्यादिः ॥ (प्रचण्डवीर्य्ययुक्ते, त्रि ॥)

उष्णा, स्त्री, (उष्यते बध्यते यया । उष बधे + नक् + टाप् ।) क्षयव्याधिः । सन्तापः । पित्तम् । इति राजनिर्घण्टः ॥ [हेमचन्द्रः ॥

उष्णांशुः, पुं, (उष्णा अंशवो यस्य ।) सूर्य्यः । इति

उष्णागमः, पुं, (उष्णस्यागमो यस्मिन् ।) ग्रीष्मकालः । इत्यमरः ॥

उष्णाभिगमः पुं, (उष्णस्यातपस्याभिगमो यत्र ।) ग्रीष्मऋतुः । इति शब्दरत्नावली ॥

उष्णासहः पुं, (उष्णं आतपं आसह्यते यत्र । उष्ण + आ + सह + अच् ।) हेमन्तऋतुः । इति राजनिर्घण्टः ॥ (उष्णासह्यकारिणि, त्रि ॥)

उष्णिक्, [ह्] स्त्री, (उत् + स्निह् + क्विन् । निपातनात् उपसर्गान्तलोपः षत्वं च ।) समाक्षरच्छन्दः । (यथा छन्दोमञ्जर्य्याम्,—
"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्व्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" ॥
उष्णिक् समाक्षरा वृत्तिः । सा च त्रिधा मधुमती-कुमारललिता-मदलेखाभेदात् । उदाहरणपूर्व्वकं तल्लक्षणं यथा तत्रैव । "ननगि मधुमती" ।
"रविदुहितटते घनकुसुमनतिः ।
व्यधित मधुमती मधुमथनमुदम्" ॥ १ ॥
"कुमारललिता जसगाः" ॥
"मुरारितनुवल्ली कुमारललिता सा ।
व्रजेशनयनानां ततान मुदमुच्चैः" ॥ २ ॥
"मसगौ स्यान्मदलेखा" ॥) "रङ्के बाऊविरुमात् कुम्भीन्द्रान्मदलेखा । लग्नाभून्मरशत्रोः कस्तूरीरसचर्चा" ॥

उष्णिका, स्त्री, (अल्पमन्नमस्याम् । ब्राह्मणकोष्णिके संज्ञायामिति कन् । निपातनादन्नशब्दस्योष्णादेशः ।) यवागूः । इत्यमरः ॥ याउ इति भाषा ।

उष्णीषः, पुं, क्ली, (उष्णमीषते हिनस्तीति । ईष गतिहिंसादर्शनेषु । इगुपधेति कः । शकन्ध्वादिः ।) शिरोवेष्टः । इत्यमरः ॥ पाग इति भाषा । अस्य गुणाः । केशघ्नकुरायुर्वृद्धकत्वम् । धूलिशीतोष्णनिवारकत्वञ्च । इति राजवल्लभः ॥ यथा ।
"उष्णीषं कान्तिकृत् केश्यं रजोवातकफापहम् ।
लघु चेच्छस्यते यस्मात् गुरुपित्तास्रिरोगकृत्" ॥
इति भावप्रकाशः ॥ किरीटः । (यथा, महाभारते सौभवधोपाख्याने ३ । २१ । २४ ।
"विशीर्णमणिनोष्णीषः प्रकीर्णाम्बरमूर्द्धजः" ।
रजोऽवशायसूर्य्यांशुहिमानिलनिवारणं ।
प्रतिश्यायशिरःशूल-हरत्वोष्णीषधारणम् ।
इति वैद्यकचक्रपाणिदत्तद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे ॥
"बाणवारं मृजावर्णतेजोबलविवर्द्धनम् ।
पवित्रं केश्यमुष्णीषं वातातपरजापहम्" ॥
इति सुश्रुते चिकित्सितस्थाने २४ अध्याये ॥)
चिक्कान्तरम् । इति मेदिनी ॥

उष्णोदकं, क्ली, (उष्णञ्च तत् उदकञ्चेति ।) तप्तजलम् । क्वाथ्यमानपादावशेषार्द्धावशेषपादहीनं जलम् । तद्विधिर्यथा ।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत्" ॥
अस्य गुणाः । सदा पथ्यत्वम् । कासज्वरविबन्धकफवातामदोषनाशित्वम् । दीपनत्वम् । वस्तिशोधनत्वञ्च ।

"श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम् ।
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि" ॥
इति भावप्रकाशे प्रथमखण्डम् ॥ * ॥ अथोष्णोदकस्य लक्षणं गुणाश्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलन्तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वर-कास-कफ-श्वास-वात-पित्तास-मेदसाम् ।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥ * ॥
अथर्त्तुभेदे जलस्य पाकभेदः । यदाह,
त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
"हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः" ॥
अन्ये तु ।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिद्बुधाः प्राऽर्जेज्जटागमदर्शनात्" ॥
केचित्त ।
"वसुव्यङ्गेषु बाणेषु वेदेषु त्रिषु पक्षयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात्" ॥
अत्र दोषाणां यथोल्बणता हीनता वा तथा व्यवस्था कल्पनीया ॥
"तत्पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत् ।
त्रिपादहीनं श्लेष्मघ्नं संयाज्यग्निप्रदं लघु" ॥ * ॥
त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणगुणाः ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कास-श्वास-कफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम्" ॥
इति भावप्रकाशे मध्यमखण्डम् ॥ रात्रौ उष्णोदकपानगुणाः । श्लेष्मसङ्घातमेदकत्वम् । मारुतापकर्षित्वम् । आशु जरीर्णकारित्वञ्च ।
"तत्पादहीनं वातघ्नं मध्यहीनं तु पित्तनुत् ।
कफघ्नं पादशेषन्तु पानीयं लघु दीपनम्" ॥
इति राजनिर्घण्टः ॥
("शरदीह तथा ग्रीष्मे क्वाथे पादावशेषितम् ।
शिशिरे च वसन्ते च कुर्य्यादर्द्धावशेषितम्" ॥
विपरीतमृतुं दृष्ट्वा प्राहुषं वार्द्धभागिकम् ।
क्वाथ्यमानञ्च निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ॥
अर्द्धावशिष्टं भवति तदुष्णोदकमुच्यते ।
तत्पादहीनं वातघ्नमर्द्धं पित्तविकारजित् ॥
कफघ्नं पादशेषन्तु पानीयं लघु पाचनम्" ।
"दिवसे क्वथितं तोयं रात्रौ तद्गुणतां व्रजेत् ।
रात्रौ श्रृतन्तु दिवसे गुरुत्वमधिगच्छति" ॥
इति हारीते प्रथमस्थाने ७ अध्याये ।
"दीपनं पाचनं कण्ठ्यं लघुष्णं वस्तिशोधनम् ॥
हिक्काध्मानानिलश्लेष्म सद्यःशुद्धे नवज्वरे ।
कासामपीनसश्वासपार्श्वरुग्घ्न श्रस्यते" ॥
"अवभिस्यन्दि लघु च तोयं क्वथितशीतलम् ।
पित्तयुक्ते हितं दोषे श्रुतं तन्द्रिदोषकृत् ॥
इति वाभटे सूत्रस्थाने ५ अध्याये ॥
"कफमेदोऽनिलामघ्न दीपनं वस्तिशोधनम् ॥

श्वास-कास-ज्वर-हरं पथ्यमुष्णोदकं सदा ।
यत् क्वाथ्यमानं निर्व्वेगं निःफेनं निर्म्मलं लघु ॥
चतुर्भागावशेषन्तु तत्तोयं गुणवत् स्मृतम् ।
न च पर्य्युषितं देयं कदाचिद्वारि जानता ॥
अस्त्रीभूतं कफोत्क्लेशि न हितं तत् पिपासवे ।
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ॥
सन्निपातसमुत्थे च शृतशीतं प्रशस्यते" ।
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
तमुवाच भगवानाचेयो ज्वरितस्य कायसमुत्थान-देश-कालानभिसमीक्ष्य पाचनार्थं पानीयमुष्णं प्रयच्छन्ति भिषजः। ज्वरो ह्यामाशयसमुत्थः प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचन-वमनापतर्पणानि शमनानि भवन्ति पाचनार्थञ्च पानीयमुष्णं तस्मादेतज्ज्वरितेभ्यः प्रयच्छन्ति भिषजो भूयिष्ठम्। तद्धेषां .प्रोतं वातमनुलोमयति अग्निमुदीर्य्यमुदीरयति। क्षिप्रं जरां गच्छति श्लेष्माणञ्च परिशोषयति स्वल्पमपि च पीतं तृष्णा-प्रशमनायोपपद्यते तथा युक्तमपि चैतन्मात्रार्थात्-सन्नपित्ते ज्वरे सदाहभ्रमप्रलापातिसारे वा प्रदेयमुष्णं हि दाह-भ्रम-प्रलापातिसारा भूयो-ऽभिवर्द्धन्ते प्रीतेनोपशाम्यन्तीति" ।
इति चरके विमानस्थाने ३ अध्यायः ॥)

उष्णोपगमः, पुं, (उष्णः उपगमो यत्र ।) ग्रीष्मकालः । इत्यमरः ॥

उष्णः, पुं, (उष+मक् ।) ग्रीष्मकालः । वसन्तकालः । इत्युणादिकोषः ॥ उष्णः । क्रोधः ॥

उष्णकः, पुं, (उष्ण+कन् ।) ग्रीष्मऋतुः । इत्यमरः ॥

उष्मा, [न्] पुं, (उष्+मनिन् ।) ग्रीष्मकालः । उत्तापः । इत्यमरटीकायां नीलकण्ठः ॥
(यथा कुमारे । ५ । २३ ॥
"तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणमुपोढदुर्द्दमम्" ।
"उष्मा पित्ताहते नास्ति ज्वरो नास्त्यक्षया विना ।
तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम्" ॥
इति वाभटे चिकित्सास्थाने १म अध्याये ॥)

उष्मागमः, पुं, (ओषतीति उष्मा । आगच्छतीति आगमः । उष्मा आगमो यत्र ।) ग्रीष्मकालः । इत्यमरटीकायां गायमुकुटः ॥

उषः, पुं, (वस+"स्फायितञ्चिवञ्चिप्रकिञ्चिल्लीति" । २ । १३ । उणादिसूत्रेण रक् ।) वृषः । (यथा, ऋग्वेदे । ६ । १२ । ४ ॥ "वन्वन्कत्यानार्वोसः पितेव" । "उषः वृषभः" । इति भाष्यम् ॥) रश्मिः । इति मेदिनी ॥ (यथा रघुः । ४ । ६६ ।
"अरैरुक्षैरिवोदीच्यानुदरिष्यन् रसानिव" ।
लताभेदः । सूर्य्यः । यथा, ऋग्वेदे । ३ । ५८ । १ ।
"प्र मित्रासो न ददुरुषो अग्ने" । "वसति नभसीत्युषः सूर्य्यः" । इति भाष्यम् । अश्विनीपुत्रौ । यथा तत्रैव । ४ । ४५ । ५ ॥
"अयमु उषा अरन्त प्रतिवस्तोरश्विनौ" ॥)

उषा, स्त्री, (उष+टाप् ।) अर्ज्जुनी । गाइ इति भाषा । उपचित्रा । इन्दुरकाणीति भाषा । इति मेदिनी ॥ (सुरभी गौः । इत्युणादिकोषः ॥)

उह इर् अर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वादिं-परं-सकं-सेट् ।) ऊहादिः । इर् औहत् औहीत् । अर्दं इह वधः । इति दुर्गादासः ॥
उहानः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥

ऊ

ऊ, दीर्घोकारः । स च षष्ठस्वरवर्णः । अस्य उच्चारणस्थानं ओष्ठः ॥ ("उपूपध्मानीयानामोष्ठौ" । स च (द्विमात्रत्वात्) दीर्घः (त्रिमात्रत्वात्) प्लुतश्च भवति । (प्रत्येकं उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि अनुनासिकानुनासिकभेदात् षड्-विधोऽपि भवति ॥
"स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्" ।
इति शिक्षावचनात् अस्योच्चारणे विवार आभ्यन्तरप्रयत्नः । विवृतं जिह्वाग्रादेः स्पर्शनाभावः । यदुक्तं तत्रैव "अचोऽस्पृष्टायणस्त्रीषत् नेमस्पृष्टाः शूलः स्मृताः" । इति ।)
"शङ्खकुन्दसमाकारं ऊकारं परमकुण्डली ।
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं पीतविद्युल्लता तथा ।
धर्म्मार्थकाममोक्षञ्च सदा सुखप्रदायकम्" ॥
इति कामधेनुतन्त्रम् ॥ तस्य (वङ्गीयभाषायाम्) लेखनप्रकारो यथा,—
"तद्रूपाधोगता रेखा कुञ्चिता वामतः शुभा" ।
तद्रूपा पूर्व्वोक्तोकाररूपा ।
"तिष्ठन्ति तासु रेखासु यमाग्निवरुणाः क्रमात् ॥
अधोर्द्ध्वगामिनी मात्रा लक्ष्मीर्वाणी च सा स्मृता" ।
इति वर्णोद्धारतन्त्रम् ॥* तस्य नामानि यथा,—
"ऊः करण्डको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराजः कुजेशश्च महेशो वामकर्णकः ॥
अर्द्धीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ॥
महाविद्येश्वरी षष्ठा षण्ढोभूः कान्यकुब्जकः" ।
इति तन्त्रम् ॥ (माढकान्यासेऽस्य वामकर्णे न्यस्यतया तदाख्ययाप्यभिधानम् । यथा, माढकान्यासमन्त्रे "ऊं नमो दक्षिणकर्णे ऊं नमो वामकर्णे" । अनुबन्धविशेषः । यथाह कविकल्पद्रुमे ।
"ऊः क्लावेभूस्त्र वेटकः । तेन सिध् शास्त्रे इत्यस्य लुडि क्ते असेधीत् असेत्सीत् इति स्यात् ॥)

ऊ, व्य, (वेञ् + क्विप् ।) वाक्यारम्भः । रक्षा । अनुकम्पा । इति मेदिनी ॥ (सम्बोधनम् ॥)

ऊः, पुं, (अवति रक्षतीति । अव् + क्विप् । ज्वरत्वरेत्यूट् । ६ । ४ । २० ।) महेश्वरः । इति पुरुषोत्तमः ॥ चन्द्रः । इति शब्दरत्नावली ॥ (रक्षाकर्त्तरि, त्रि॥)

ऊढ़ः, त्रि, (उह्यते स्म । वह् + क्त ।) विवाहितः । इति स्मृतिः ॥
("भार्य्यामूढ़ां तमवज्ञाय तस्थे सौमित्रयेऽसकौ" । इति भट्टिः । ४ । १५ ॥) क्षतवहनः ॥

ऊढ़कङ्कटः, त्रि, (ऊढ़ो धृतः कङ्कटो येन ।) कवचधारी । तत्पर्य्यायः । सन्नद्धः २ वर्म्मितः ३ सज्जः ४ दंशितः ५ । इत्यमरः ॥

ऊढ़ा, स्त्री, (वह + क्त + टाप् ।) भार्य्या । इति हेमचन्द्रः ॥ (विवाहिता कन्या । यथा,—
"ऊढ़ानूढ़ासमवायेऽनूढ़ैव प्रथमं धनहारिणी" ।
इति स्मृतिः ॥)

ऊतं, त्रि, (वे + क्त ।) तन्तुसन्ततम् । तत्पर्य्यायः । स्यूतम् २ उतम् ३ । इत्यमरः ॥ कापड़ बोना इति भाषा ॥ (ग्रथितम् । अव + क्त । ज्वरत्वरेत्यूट् ६ । ४ । २० । रक्षितम् ॥)

ऊतिः, स्त्री, (अव् + क्तिन् । ज्वरत्वरेत्यूट् । ६ । ४ । २० ।) रक्षणम् । (वे + क्तिन् ।) स्यूतिः । इति मेदिनी ॥ बोना सेलाइ इति भाषा । ज्ञानम् । इति शब्दरत्नावली ॥ जवनम् । इत्यमरटीकायां स्वामी ॥ लीला । इति श्रीभागवतम् ॥ (कर्त्तरि क्तिचि । रक्षाकर्त्री । यथा, ऋग्वेदे । ४ । ४ । २ ॥
"उरुष्यन्तम् माध्वी दक्षा न ऊतीः" । कर्म्मणि क्तिन् । पुराणस्य दशविधलक्षणमध्ये कर्म्मवासना-रूपो लक्षणभेदः । यथा, भागवते । २ । २० — १४ ।
श्रीशुक उवाच ।
"यत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म्म ऊतयः कर्म्मवासनाः" ॥
"कर्म्मवासना ऊतयः" । इति चूर्णिकाटीका ॥)

ऊधः, [स्] क्ली, (उन्द + असुन् । ऊधसो नडिति निर्देशात् ऊधादेशः ।) आपीनम् । इत्यमरः ॥ गाइर पालान् इति भाषा । (यथा महाभारते । चैत्ररथपर्व्वणि । १ । १७६ । १३ ॥
("मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम्" ।
"यदैव स्त्रियै स्तनावाप्यायेते ऊधः पशूनाम्" ।
इति शतपथब्राह्मणे । २ । ५ । १ । ५ ॥)

ऊधस्यं, क्ली, (ऊधसि भवम् । ऊधस् + यत् ।) दुग्धम् । इति हेमचन्द्रः ॥

ऊन, त् क परिहाने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) दीर्घादिदन्त्योपधः । तथा च । "क्षोभमासु हृदयं न यदूनां रागरुद्धिमकरोन्न यदूनाम्" । इति माघयमकम् । परिहानं न्यूनक्रिया । ऊनयति वणिक् स्वर्णं प्रथमपरिमाणात् । परिमाणमाश्रित्यमिति केचित् । मा भवान् ऊनिनत् । ऊनधोर्ज्झिः अड् द्वित्वे स्वस्थानमेव नास्ति अतो नाग्लोपित्वमिति सन्देहनिरासार्थमाह । ओनेर्ज्झदनुबन्धज्ञापकबलात् द्वित्वात् प्राक् प्राप्तो झलो अग्लोपित्वान्न स्यात् । इति दुर्गादासः ॥

ऊनं, त्रि, (अवतीति । अव + "इगुपधज्ञिदीङ्ध्यविभ्यो नक्" । ३ । २ । इति उणादिसूत्रेण नक् । "ज्वरत्वरेति" । ६ । ४ । २० ऊट् । सर्व्वत्रे तु ऊनयतेरूनमिति साधितम् ।) हीनम् । न्यूनम् ॥ ("ऊनं न सत्त्वेष्वधिको बबाधे" । इति रघुः । २ । १४ । तत्रैव । ११ । १ ।

"किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ"।
"ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः"।
इति मनुः। ५। ६८॥)

ऊनविंशः, त्रि, ऊनविंशतेः पूरणः। यथा,—
"तिथ्यङ्कवेदैकदशोनविंश-
भैकादशाष्टादशविंशसंख्याः।
इष्टोऽना सूर्य्ययुतोऽना च
योगादमूस्वेद्दशयोगभङ्गः"॥
इति ज्योतिस्तत्त्वम्॥

ऊनविंशतिः, स्त्री, (एकेन ऊना विंशतिः।) एकोनविंशतिः। ऊनिश इति भाषा। यथा। "ऊनविंशतिदास्यमानपिण्डस्थानानि"। इति तिथ्यादितत्त्वे श्राद्धावस्थाप्रकरणे॥

ऊम्, य (ऊय्यते। ऊय्+मुक्।) रोषोक्तिः। इच्छा। इति मेदिनी॥ निन्दा। स्पर्द्धा। इति शब्दरत्नावली॥

ऊमं, क्ली, (अवतीति। अव+"अविसिविमिशुभिभ्यः कित्"। १।१४३। इति उनादिसूत्रेण मन्। कित् ऊठ् च।) देशविशेषः। इति सिद्धान्तकौमुदी॥

ऊय, ईं ङ सेवने। तन्तुसन्ताने इति यावत्। इति कविकल्पद्रुमः (भ्वादिः-आत्मं-सकं-सेट्।) दीर्घादिः। सेवनमिह स्यूतन्तुततावित्यस्य रूपं ईं ऊतः। ङ ऊयते पटं सौचिकः। इति दुर्गादासः॥

ऊरी, य (ऊय्+बाहुलकात् रीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरव्यः, पुं, (ऊरोर्जातः। ऊरु+शरीरावयवात् यदिति यत्। वैश्यस्य ब्रह्मणः ऊरोर्जातत्वात् तथात्वम्।) वैश्यः। इत्यमरः॥ (यदुक्तं यजुषि। ३१। ११॥
"ब्राह्मणोऽस्य मुखमासीत् बाहूराजन्यः कृतः।
ऊरूतदस्य यत् वैश्यः पद्भ्यां शूद्रोऽजायत"॥ इति॥)

ऊरी, य (ऊरु+बाहुलकात् रीक्।) विस्तारः। अङ्गीकारः। इत्यमरः॥ (यथा हितोपदेशे विग्रहे। "ऊरीकृत्य प्रश्रितः"॥)

ऊरीकृतः, त्रि, (ऊरी+कृ+क्त।) अङ्गीकृतः। विस्तृतः। इत्यमरः॥

ऊर्णः, पुं, (ऊर्ण्यते आच्छाद्यते इति। ऊर्णु+(ऊर्णोतेर्नुलोपः। १। ३१। इति उणादिसूत्रेण कर्म्मणि कुः नुलोपश्च।) जानूपरिभागः। उरत् इति भाषा। तत्पर्य्यायः। सक्थि २। इत्यमरः॥ (यथा, साहित्यदर्पणे।
"भुवनत्रितये न बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"।
"भुजमूर्द्धास्यबाहुल्यादेकोऽपि धनदानुजः"।
इति रघुः। १२। ८८। तथा मनुः। १। ३१।
"लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः"॥)

ऊरुजः पुं, (ऊरोर्जायते इति। ऊरु+जन्+ड।) वैश्यः। स तु ब्रह्मण ऊरुभ्यां जातः। इत्यमरः॥ (यथा, विष्णुपुराणे। १। ६। ४।
रजसा तमसा चैव समुद्रिक्तास्तथोरुजाः"।

भृगुवंशीय ऋषिभेदः। स च और्व्व इति नाम्ना ख्यातः। तस्य जन्मकथा और्व्वशब्दे द्रष्टव्या॥)

ऊरुपर्व्वा, [न्] पुं, क्ली, (ऊरोः पर्व्वेव।) जानु। इत्यमरः॥ हाँटु इति भाषा।

ऊरुरी, य, (ऊरु+रीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरुस्तम्भः, पुं, (ऊरू स्तम्भ्नाति इति ऊरु+स्तम्भ+अण्।) ऊरुरोगविशेषः। यथा। अथोरुस्तम्भाधिकारः। तत्रोरुस्तम्भस्य विप्रकृष्टसन्निकृष्टनिदानसम्प्राप्तिपूर्व्वकं लक्षणमाह।
"श्लीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्न्निषेवितैः।
जीर्णाजीर्णे तथायासक्षोभस्वप्नजागरैः॥
सश्लेष्ममेदः पवनः स्तानमत्यर्थसञ्चितम्।
अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते॥
सक्थ्यस्थिनी प्रपूर्य्यान्तःश्लेष्मणा स्तिमितेन सः।
तदा स्तब्धाति तेनोरू स्तब्धौ शीतावचेतनौ॥
परकीयाविव गुरू स्यातामतिशयव्यथौ।
ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राच्छर्द्दारुचिज्वरैः॥
संयुतौ पादसदनश्लक्ष्णोदरणसुप्तिभिः।
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे"॥
जीर्णाजीर्णे किञ्चिज्जीर्णं किञ्चिदजीर्णं तस्मिन् भोजनमित्यर्थः। अतएव दृढ़बलेन जीर्णाजीर्णे समश्नत इति पठितम्। तत्र श्लीतादिभिर्निषेवितैर्भुक्तैः। संक्षोभेण सङ्घलनेन। स्वप्नेन दिवा। जागरणेन रात्रौ। अभिभूय दूषयित्वा। इतरं दोषं पित्तम्। स्तिमितेन आर्द्रेण द्रुतेनेति यावत्। न तु घनेन। एवंविधेन श्लेष्मणा। सः पवनः। तदा ऊरू स्तभ्नाति तेन स्तब्धौ। अचेतनौ शून्यौ। परकीयाविव अक्रियावित्यर्थः। ध्यानं संमूढ़ता। पादसम्बन्धिनीभिः सदनश्लक्ष्णोदरणसुप्तिभिश्च संयुक्तौ। अयं सुश्रुतेन महावातव्याधिषु पठितः॥* प्रायूपमाह।
"प्रायूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः।
रोमहर्षोऽरुचिश्छर्द्दिर्जङ्घोर्व्वोः सदनं तथा"॥*॥
तस्योपशयमाह।
"वातश्लेष्मभिरज्ञानात्तत्र स्यात् स्नेहनात् पुनः।
पादयोः सदनं सुप्तिः श्लक्ष्णादुदरणं तथा॥
जङ्घोरुस्तानित्यर्थं श्लथदादाहवेदना।
पदश्च श्यथते न्यस्तं शीतस्पर्शं न वेत्ति च॥
संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः।
अन्यनेयौ हि संभ्रान्तावूरू पादौ च मन्यते"॥
अन्यनेयौ अन्यपुरुषचाल्यौ भवत इत्यर्थः। अज्ञानात् अनिश्चयात् स्तम्भ-सुप्ति-कम्पादि-दर्शनेन। वातश्लेष्मभिः वातव्याधिश्लेष्मभिः। तत्र ऊरुस्तम्भे। स्नेहनात् स्नेहादिना स्नेहन्या चिकित्सया। पादसदनादय ऊरुभग्नोपमत्वात् ते विकाराः स्युः। जङ्घोरुस्तानिः जङ्घोर्व्वोर्मार्गमनादावशक्तिः। आदाहवेदना ईषद्दाहेन सह वेदना॥*॥
ऊरुस्तम्भस्यारिष्टं लक्षणमाह।
"यदा दाहार्त्तितोदार्त्ता वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवम्"॥
अन्यथा दाहाद्युक्तोपद्रवरहितं तमपि नवमुत्पन्न-

मात्रं साधयेत्॥*॥*॥
अथोरुस्तम्भस्य चिकित्सा।
"स्नेहाक्तस्वाववमनं वस्तिकर्म्मविरेचनम्।
वर्जयेदाढ्यवाते तु यतस्तैस्तस्य कोपनम्॥
तस्मादत्र सदा कार्य्यं स्वेदनं घनरूक्षजम्।
आमभेदःकफाधिक्यान्मारुतं नयता समम्॥
यत् स्नीत् कफप्रशमनं न तु मारुतकोपनम्।
तत्सर्व्वं सर्व्वदा कार्य्यमूरुस्तम्भस्य भेषजम्॥
सर्व्वो रूक्षक्रमः कार्य्यस्तत्रादौ कफनाशनः।
पश्चाद्वातविनाशाय विधातव्याक्षिला क्रि॥
भोज्याः पुराणाः श्यामाकाकोद्रवोदालशालयः।
जाङ्गलैरघृतैर्म्मांसैः शाकैश्चालवणैर्हितैः"॥
उद्दालो वनकोद्रवः।
"दद्याद्वास्तूकशाकेन हीनेन लवणेन तु।
जीर्णशाल्योदनं रूक्षमूरुस्तम्भवते भिषक्॥
रूक्षणाद्वातकोपश्चेन्निद्रानाशादिसम्भवः।
स्नेहस्वेदक्रमस्तत्र कार्य्यो वातामयापहः॥
प्रतारयेत् प्रतिस्रोतः सरितं श्लीतकोदकाम्।
सरश्च विमलं श्लीतं स्थिरतोयं पुनः पुनः॥
मूलैर्व्वा वाजिगन्धायाः अथवार्कस्य कारयेत्।
गाढ़मुत्सादनं वैद्य ऊरुस्तम्भे सवेदने॥
त्रिफलायश्चिकयोश्चूर्णं लिह्यात् समाक्षिकम्।
ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत्॥
नागरं पिप्पलीश्चापि गुग्गुलुं वा शिलाजतु।
ऊरुस्तम्भी पिबेन्मूत्रैर्द्दशमूलीरसेन वा"॥
इत्यूरुस्तम्भाधिकारः। इति भावप्रकाशः॥
अपि च।
"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी।
ऊरुस्तम्भहरो ह्येष उक्तमन्तु विरेचनम्॥
हरीतकीं शृङ्गवेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाशूलमूरुस्तम्भं सप्तरात्रे तु नाशयेत्"॥*॥
इति गारुड़े १८७ अध्यायः॥
("एक ऊरुस्तम्भ इति आमचिदोषसमुत्थानः"।
इति चरके सूत्रे ऊनविंशोऽध्यायः॥
अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,
"श्रिया परमया ब्राह्म्या परया च तपःश्रिया।
अहीनं चन्द्रसूर्य्याभ्यां सुमेरुमिव पर्व्वतम्॥
धीर्धृतिस्मृतिविज्ञानज्ञानकीर्त्तिक्षमालयम्।
अग्निवेशो गुरुं काले संशयं परिपृष्टवान्॥
भगवन्! पञ्च कर्म्माणि समस्तानि पृथक्पृथक्।
निर्द्दिष्टान्यामयानान्तु सर्व्वेषामेव भेषजम्॥
दोषजोऽस्यामयः कश्चिदयस्यैतानि भिषग्वर!।
न स्युः शुद्धा निशमने साध्यस्य क्रियया ततः॥
अस्यूरुस्तम्भ इत्युक्तो गुरुणा तस्य कारणम्।
सलिङ्गं भेषजं भूयः पृष्टस्तेनाब्रवीद्गुरुः"॥*॥
निदानं सम्प्राप्तिलक्षणं च यथा॥
"स्निग्धोष्णलघुशीतानि जीर्णाजीर्णे समश्नतः।
दध्यशुष्कदधिक्षीरान्युत्तानौदकामिषैः॥
पिष्टान्नपिण्याकतिलवास्तूप्रजागरैः।
जङ्घानाथश्रमायासभयवेगविधारणैः॥
स्नेहाक्षामश्चितङ्कोष्ठे वातादीन् मेदसा सह।

रुद्धात्तु गौरवादूरू यात्यधोगैः शिरादिभिः ॥
पूरयन् सक्थिजङ्घोरुदोषो मेदोबलोत्कटः ।
अविधेयं परिस्पन्दं जनयत्यल्पविक्रमम् ॥
महासरसि गम्भीरे पूर्णोऽम्बु स्तिमितं यथा ।
तिष्ठति स्थिरमल्पोष्मं तद्वदूरुगतः कफः ॥
गौरवायाससङ्कोचदाहरुक्सुप्तिकर्म्मनैः ।
मेदस्फुरणतोदैश्च युक्तो देहं निहन्त्यसून् ॥
गुरुः श्लेष्मासमेदस्को वातपित्तेऽभिभूय तु ।
स्तम्भयेत् स्पर्शशैत्याभ्यामूरुस्तम्भस्ततो मतः" ॥

पूर्व्वरूपाणि यथा ॥

"प्रायूपं ध्याननिद्रातन्द्रैमित्यानोचकज्वराः ।
रोमहर्षश्च हृद्धिश्च जङ्घोर्व्वोः सदनन्तथा" ॥

अन्यदप्येव प्रागुक्तम् ॥ * ॥

चिकित्सा-यथा ॥

"तस्य न स्नेहनं कार्य्यं न वस्तिर्न विरेचनम् ।
न चैव वमनं यस्मात्तन्निबोधत कारणम् ॥
हृदये श्लेष्मणो नित्यं स्नेहनं वस्तिकर्म्म च ।
तत्स्थस्योदरगे चैव न समर्थं विशोधनम् ॥
श्लेष्मस्थानगतः श्लेष्मा पित्तञ्च वमनात्सुखम् ।
हर्त्तुमाशयगौ च संसनात्तावुभावपि ॥
पक्वाशयस्थाः सर्व्वेऽपि वस्तिभिर्मूलनिर्जयात् ।
शुक्ला न त्वामदोषाभ्यां स्तब्धा जङ्घोरुसंस्थिताः ॥
वातस्थाने हितं स्नेह्यात्तयोस्तम्भाच्च तद्गताः ।
न शुक्लाः सुखमुद्धर्त्तुं जलं निम्नादिव स्थलात् ॥
तस्य संशमनं कुर्य्यात् क्षपणं शोधनन्तथा ।
व्याधिक्षयादामकफयोर्युक्त्यपेक्षः सदा भिषक् ॥
सदा रूक्षोपचाराय यवश्यामाकजोद्भवान् ।
शाकैरसवणैर्दद्याज्जलतैलौषसाधितैः ॥
सुनिषण्णकनिम्बार्कवेत्राग्रवधपल्लवैः ।
वायसीवास्तुकैरन्यैस्तिक्तैश्च कुलकादिभिः ॥
क्षारारिष्टप्रयोगैश्च हरीतक्यास्तथैव च ।
मधूदकस्य पिप्पल्या ऊरुस्तम्भविनाशनाः ॥
समङ्गा शाल्मली बिल्वं मधुना सह नापिबेत् ।
तथा ग्रीवेयकोदीच्यदेवदारुनतान्यपि ॥
चन्दनं धातकीकुष्ठं तालीशं नलदन्तथा ।
मुस्तं हरीतकी लोध्रं पद्मकं तिक्तरोहिणी ॥
देवदारु हरिद्रे द्वे वचा कटुकरोहिणी ।
पिप्पली पिप्पलीमूलं सरलं देवदारु च ॥
चव्यं चित्रकमूलानि देवदारु हरीतकी ।
भल्लातकं समूला च पिप्पली पञ्च तान् पिबेत् ॥
सक्षौद्रानर्द्धश्लोकोक्तान् कल्कानूरुग्रहापहान्" ॥
"मूर्व्वामतिविषां कुष्ठं चित्रकं कटुरोहिणीम् ।
पूर्ववद्वा पिबेत्तोये यवक्षिप्तमथापि वा ॥
सप्तपर्णीरोमतिविषां मुस्तं तेजोवतीं वचाम् ।
मञ्जिष्ठां चित्रकं कुष्ठं पाठां कटुकरोहिणीम् ।
लेहयेन्मधुना घृतेन सक्षौद्रं वा जलप्लुतम्" ॥
"अपतर्पणजस्य स्याद्दोषः सन्तर्पयेत्तु तम् ।
यूषा जाङ्गलजैर्मांसैः पुराणैश्चैव शालिभिः ॥
रूक्षणाद्वातकोपश्चेन्निदानाद्यौक्तिपूर्व्वकः ।
स्नेहस्नेहकमस्तत्र कार्य्यो वातामयापहः" ॥
"कुष्ठं श्रीवेष्टकोदीच्यं सरलं दारुकेशरम् ।
अजगन्धाश्वगन्धा च तैलज्ञैः सार्षपं पचेत् ।

सक्षौद्रं माक्षया तच्चाप्यूरुस्तम्भार्दितः पिबेत्" ॥

इति कुष्ठाद्यं तैलम् ॥ * ॥

"पलाभ्यां पिप्पलीमूलनागराद्दशकट्टरः ।
तैलप्रस्थः समो दध्ना यवक्षारयवक्षाम्बुभिः" ॥

इति दशकट्टरं तैलम् ॥ * ॥

"इत्यभ्यन्तरमुद्दिष्टमूरुस्तम्भस्य भेषजम् ।
श्लेष्मणः क्षपणन्त्वन्यद्वाह्यं शृणु चिकित्सितम् ॥
वल्मीकमृत्तिकामूलं करञ्जात् सफलत्वचम् ।
इष्टकानां ततश्चूर्णैः कुर्य्यादुत्सादनं भृशम् ॥
मूलैर्वाप्यश्वगन्धाया मूलैरर्कस्य वा भिषक् ।
पिचुमर्दस्य वा मूलैरथवा देवदारुणः ॥
क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् ।
गाढ़मुत्सादनं कुर्य्यादूरुस्तम्भे प्रलेपनम्" ॥
"श्योनाकं खदिरं बिल्वं वृहत्यौ सरलासनौ ।
अग्निमन्थाढ़कीशिग्रुश्वदंष्ट्रासुरसार्जकान् ॥
तर्कारीं नक्तमालञ्च जलेनोत्क्वाथ्य सेचयेत् ।
प्रलेपो मूत्रपिष्टैर्वाप्यूरुस्तम्भनिवारणः ॥
कफक्षयार्थं व्यायामेष्वेनं शुक्लेषु चोत्सृजेत् ।
स्खलान्याक्रामयेत् कल्यं शुष्कैराः सिकतास्तथा ॥
प्रतारयेत् प्रतिस्रोतो नदीं शीतजलां शिवाम् ।
सरश्च विमलं शीतं स्थिरतोयं पुनः पुनः ॥
तथा विशुष्केऽस्य कफे शान्तिमूरुग्रहो व्रजेत् ।
श्लेष्मणः क्षपणं यत्स्यान्न च मारुतकोपनम् ॥
तत् सर्व्वं सर्व्वदा कार्य्यमूरुस्तम्भस्य भेषजम् ।
शरीरं बलमग्निञ्च कार्य्येषा रक्षता क्रिया" ॥
इति चरके चिकित्सास्थाने २७ अध्यायः ॥ * ॥
"निष्कत्रयं शुद्धसूतं निष्कद्वादशगन्धकम् ।
गुञ्जाबीजञ्च षण्णिष्कं निम्बबीजं जया तथा ॥
प्रत्येकं निष्कमात्रन्तु निष्कं जैपालबीजकम् ।
जया जम्बीरधुस्तूरकाकमाचीद्रवैर्दिनम् ॥
भावयित्वा वटीं कृत्वा दद्याद्गुञ्जाचतुष्टयम् ।
गुञ्जाभद्ररसो नाम हिङ्गुसैन्धवसंयुतः ॥
शूलमत्यूर्द्धगं दुःखमूरुस्तम्भं सुदारुणम्" ॥
इति गुञ्जाभद्रो रसः ॥ इति वैद्यकरसेन्द्रसार-संग्रहे ऊरुस्तम्भाधिकारः ॥ * ॥)

ऊरुस्तम्भा, स्त्री, (ऊरुस्तम्भ इव व्याकृतिर्यस्याः ।) कदलीवृक्षः । इति राजनिघण्टः ॥ (कदलीशब्देऽस्या गुणादयो व्याख्येयाः ॥)

ऊर्ज्ज, क जीवने । बले । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) दीर्घादिः । क ऊर्जयति जनो जीवति बली स्यादित्यर्थः । इति दुर्गादासः ॥

ऊर्ज्ज, क्ली, (उर्ज्यते जीयतेऽनेन । ऊर्ज्ज + घञ् ।) बलम् । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २४ । ३८ ॥

"नम ऊर्ज इषे एष्याः पतये यज्ञरेतसे ।
वृत्तिदाय च जीवानां नमः सर्व्वरसात्मने" ॥)

ऊर्ज्जः, पुं, (ऊर्ज्जयति उत्साहयति जिगीषून् इति । ऊर्ज्ज + णिच् + अच् ।) कार्त्तिकमासः । उत्साहः । बलम् । (यथा, ऋग्वेदे । १ । २६ । १ । "वसिष्ठा हि मित्रेथ्य वस्त्राण्यूर्जां पते" । "ऊर्जां बलपराक्रमादीनाम्" । इति भाष्यम् ।) प्राणनम् । इति मेदिनी ॥ (वीर्य्यम् । यथा, मनुः । २ । ५५ ।

"पूजितं ह्यशनं नित्यं बलमूर्जञ्च यच्छति" ॥
"यस्मात् पूजितमन्नं सामर्थ्यं वीर्य्यं च ददाति" ॥)
इति कुल्लूकभट्टः ॥) कान्तिकनामसंवत्सरः ॥
(स्वारोचिषस्य मनोः पुत्रभेदः । यथा हरिवंशे ७ । १४ ।
"प्रथितस्य नभस्यस्य नभ ऊर्ज्जस्तथैव च ।
स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः" ॥
स्त्री, हिरण्यगर्भकन्या । यथा, हरिवंशे ७ । १७ ।
"हिरण्यगर्भस्य सुता ऊर्ज्जा नाम सुतेजसः" ॥)

ऊर्ज्जस्वलः, त्रि, (अतिशयितः ऊर्जो बलं अस्यास्तीति । ऊर्जस् + ज्योत्खातमिसेति वलच् ।) अतिशयबलवान् । इत्यमरः ॥ ("ऊर्जस्वलं हस्तिनुरङ्गमेतत्" । इति भट्टिः । ३ । ५५ । "भोक्तारमूर्जस्वलमात्मदेहम्" । इति रघुः । २ । ५० ॥)

ऊर्ज्जस्वि, [न्] क्ली, (ऊर्जस् + विनि ।) बलङ्गरविशेषः । तस्य लक्षणम् । साहङ्कारवस्त्वभिधानम् । तथा चोक्तम् । ऊर्जस्वि रूढ़ाहङ्कारम् । तस्योदाहरणं यथा । "प्रचपलमगुरुं भरासहिष्णुं जनमसमानमनूर्जितम् विवर्ल्य । क्षतवसतिमिवार्णवोपकण्ठे स्थिरमतुलोन्नतिमूढ़तुङ्गमेघम्" ॥ इति भट्टिः ॥

ऊर्ज्जस्वी, [न्] त्रि, (अतिशयितं ऊर्जो बलमस्यास्तीति + ऊर्जस् + विनि ।) अतिशयबलवान् । इत्यमरः ॥ (यथा, भारते ।)
"अन्नमूर्जस्करं लोके दत्त्वोर्जस्वी भवेन्नरः" ॥)

ऊर्णनाभः, पुं, (ऊर्णेव तन्तुर्नाभौ यस्य । यद्वा मृदुत्वादूर्णेव नाभिर्यस्य । नाभेरुपसङ्ख्यानमित्यच् । ष्यामपोरिति ६ । ३ । ६३ । ह्रस्वः ।) कीटविशेषः । माकड़सा इति भाषा । तत्पर्य्यायः । लूता २ तन्तुवायः ३ मर्कटकः ४ । इत्यमरः ।
(यथाह उज्ज्वलदत्तः । ५ । ४७ ।
"नाचारेण विना स्रष्टिरूर्णनाभेरपीष्यते ।
न च निःसाधनः कर्त्ता कश्चित् सृजति किञ्चन" ॥
अत्र ऊर्णनाभिरिति चिन्त्यम् ।) (स्वनामख्यातो धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । १ । ६७ । ८७ ।
"ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ" ।
स्वनामख्यातो दैत्यभेदः । यथा, हरिवंशे । ३ । ८६ ।
"सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः" ॥)

ऊर्णनाभिः, पुं, (ऊर्णावत् नाभौ यस्य ।) मर्कटकः । इति शब्दरत्नावली ।
(यथा, भागवते । २ । ५ । ५ ।
"आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्रमः" ॥)

ऊर्णा, स्त्री, (ऊर्णोति । ऊर्णु + "ऊर्णोतेर्डः" । ५ । ४७ । इति उणादिसूत्रेण डः । डित्वात् टिलोपः ।) मेषादिलोम । पसम् इति भाषाभ्रु । वोरन्तरावर्त्तः । इत्यमरः ॥ स तु भ्रूद्वयमध्ये मृदुतन्तुसूक्ष्मः शुभायत एकः प्रशस्तावर्त्तो महापुरुषलक्षणम् चक्रवर्त्त्यादीनां महायोगिनाञ्च भवति । इति भरतः ॥ (चित्ररथपत्नी । यथा, भागवते । ५ । १५ । १२ । "चित्ररथ्यादूर्णायां सम्राडजनिष्ट" ॥)

ऊर्णायुः, पुं, (ऊर्णा अस्यास्तीति । ऊर्णा युस् ।) मेषलोमकम्बलः । मेषः । इत्यमरः ॥ ऊर्णनाभः ।

इति हेमचन्द्रः ॥ क्षणभङ्गः । इति मेदिनी ॥ (गन्धर्वविशेषः । यथा, हरिवंशे ।
"ऊर्णायुश्चित्रसेनश्च हाहा ऊहश्च भारत ! ॥)
ऊर्णु, अ ल आच्छादने । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-सेट् ।) दीर्घादिर्दन्त्योपधः । रेफयोगान्मूर्द्धन्यः । तेन ऊर्णुनाव इत्यादौ निमित्ताभावान्मूलधातोर्णत्वाभावः । लज ऊर्णोति ऊर्णोति ऊर्णुते दिशं मेघः । इति दुर्गादासः ॥ (यथा, भट्टिः । १४ । १०३ ।
"ऊर्णुनाव स मुखोद्वैर्वानराणामनीकिनीम्" ॥)
ऊर्दरः, पुं, (ऊर्जेन बलेन दृणाति विदारयति । ऊर्ज + दृ + "ऊर्जिदृणातेरलचौ पूर्ब्बपदान्त्यलोपश्च" । ५ । ४० । उणादिसूत्रेण अल् अत् वा । स्वरभेदार्थं प्रत्ययद्वयम् ।) मूरः । राक्षसः । इत्युणादिकोषः ॥ (कुसूलम् । धान्याद्याधारः । यथा, ऋग्वेदे । ३ । १४ । ११ ॥ "ऊर्दरं एतता यवेनेद्धम्" । "ऊर्दरं कुसूलम्" इति भाष्यम् ॥)
ऊर्द्ध, त्रि, उपरि । उच्छ्रितः । तुङ्गः । इति अन्त्यस्थवकारान्तोर्द्धशब्दार्थे मेदिनी ॥ अत्र ऊर्द्धशब्दो निर्व्वकारः । तदुक्तं वर्णदेशनायां । उल्लिहीते उद्गच्छति उदो ह्राडो डप्रत्ययः आदिवर्णस्य ऊरादेशः । इति मधुमाधवादयः ॥ इति भरतभेदोर्द्धकशब्दस्य टीकायां भरतः ॥ (यथा, महाभारते । मुद्गलज्ञानप्राप्तौ । ३ । २६० । २ ।
"ऊर्द्धगः सत्पथः शश्वद्देवयानचरो मुनेः" ॥)
ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायतीति । ऊर्द्ध + कै शब्दे + क ।) ऊर्द्धकः । मृदङ्गविशेषः । इत्यमरटीकायां भरतमुकुटौ । (यथा शब्दार्णवे ।
"ऊर्द्धको गोपुच्छवत् सञ्चितालोऽष्टाङ्गुलो मुखे ।
ध्रुवोर्द्धं वाद्यते तेषां वादनं दुर्जनं न वा" ॥
तथाच चिन्तामणौ ।
"हरीतक्याकृतिस्त्वङ्गस्तथालिङ्गो यवाकृतिः ।
ऊर्द्धको दण्डतुल्यः स्यात् मुरजा भेदतो मताः" ॥)
ऊर्द्धः, पुं, दण्डवत्स्थितः । यथा,—
"आसीन ऊर्द्धः प्रक्षो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रक्षेन न तिष्ठता" ॥
इत्यादि छन्दोगपरिशिष्टात् ॥ आसीनः उपविष्टः ।
"ऊर्द्धो दण्डवत् स्थितः प्रक्षोऽवनतपूर्ब्बकायः" ।
इति श्राद्धतत्त्वम् ॥
ऊर्द्धः, त्रि, (उत + हा + ड । आदिवर्णस्य ऊरादेशः ।) उच्छ्रितः । तुङ्गः । उपरिस्थात् । इति मेदिनी ॥ ऊर्द्धशब्दो दीर्घादिः सवकारो निर्व्वकारश्च । तथाच उपरि भन्यते इति व्युत्पत्तिरूर्द्धशब्दो वकारवानिति सुभूत्यादयः ॥
"कुर्व्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्द्धजैः ।
तस्या चलालीवान्येति चित्रानागचमूर्द्धजैः" ॥
इति कीचकवधयमकम् ॥ (यथा, कुमारे १ । १६ ।)
"पद्मानि यस्यायसरोरुहाणि
प्रबोधयत्यूर्द्धमुखैर्मयूखैः" ।
ऊर्द्ध शब्दो मकारान्तोऽव्ययो दीर्घादिर्वकारवान् तथा अदन्तोऽव्ययोऽपीति भरतादिव्याख्याः ॥

ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायति शब्दायते इति । ऊर्द्ध + कै + क ।) मृदङ्गविशेषः । यथा,—
"ऊर्द्धको गोपुच्छवत् स चितालोऽष्टाङ्गुलो मुखे ।
ध्रुवोर्द्धं वाद्यते तेषां वादनं दुर्जनं नना" ॥
इति भरतधृतशब्दार्णवः ॥ अपिच । "हरीतक्याकृतिस्त्वङ्गस्तथालिङ्गो यवाकृतिः । ऊर्द्धको दण्डतुल्यः स्यान्मुरजा भेदतो मताः" ॥ अन्यटीकायान्तु । "यवमध्यस्तथोर्द्धकः" । इत्यमरटीकासारसुन्दरी ॥
ऊर्द्धकराटी, स्त्री, (ऊर्द्धे कराटः कराटको यस्याः ।) महाशृतावरी । इति राजनिर्घण्टः ॥ ("महाशृतावरी चान्या घृतमूल्यूर्द्धकण्टिका" । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
ऊर्द्धजानुः, त्रि, (ऊर्द्धे स्थूले जानुनी यस्य ।) उपरिभागे स्थूलजानुकः । तत्पर्य्यायः । ऊर्द्धजुः २ । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् १ । ५ । ८ । "उपविश्योर्द्धजानुः" । इति ॥)
ऊर्द्धज्ञः, त्रि, (ऊर्द्धे जानुनी यस्य । एषोदरादित्वात् साधुः ।) ऊर्द्धजानुः । इति भरतो द्विरूपकोषश्च ॥
ऊर्द्धज्ञुः, त्रि, (ऊर्द्धे जानुनी यस्य । "ऊर्द्धात् विभाषा" । ५ । ४ । १३० । इति पक्षे ज्ञुः ।) ऊर्द्धजानुः । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् । "ऊर्द्धज्ञुरनवानं यजति" ॥
तथाच माघे ११ । २१ ।
"ज्ञणमयमनुभूय स्वप्नमूर्द्धज्ञुरेव" ॥)
ऊर्द्धदेवः, पुं, (ऊर्द्धः तुङ्गः श्रेष्ठो देवः ।) विष्णुः । इति शब्दरत्नावली ॥
ऊर्द्धन्दमः, त्रि, (ऊर्द्धम् + दम् + अच् ।) ऊर्द्धस्थः ॥ इति विकाण्डशेषः ॥ ऊर्द्धक्रम इति युक्तिसिद्धपाठः ॥
ऊर्द्धपादः, पुं, (ऊर्द्धाः पादा यस्य ।) शरभः । इति शब्दरत्नावली ॥ (ऊर्द्धपदे, त्रि ॥)
ऊर्द्धपुण्ड्रः, पुं, (ऊर्द्धः पुण्ड्रः इव ।) तिलकविशेषः । स तु ब्राह्मणललाटे पुण्ड्रेक्षुवत् चन्दनादिना कृतोर्द्धरेखाचयः । यथा । "ऊर्द्धपुण्ड्रे त्रिपुण्ड्रं स्यात् त्रिपुण्ड्रे नोर्द्धपुण्ड्रकमिति" ।
"ऊर्द्धपुण्ड्रं द्विजः कुर्य्याद्वारिमृद्भस्मचन्दनैः" ।
इत्यादि च बहवः ॥
"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्याच्चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियस्तु त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रन्तु वैश्यस्य वर्त्तुलं शूद्रयोनिजः" ॥
इति आह्निकतत्त्वधृतब्रह्माण्डपुराणम् । (ऊर्द्धपुण्ड्रधारिप्रशंसा यथा, ब्रह्मपुराणे ।
"अशुचिर्वाप्यनाचारो मनसा पापमाचरेत् ।
शुचिरेव भवेन्नित्यमूर्द्धपुण्ड्राङ्कितो नरः ॥
ऊर्द्धपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् ।
श्वपाकोऽपि विमानस्थो मम लोके महीयते" ॥
अस्य धारणे वैदिकद्विजभिन्न एवाधिकारी यदुक्तं देवीभागवते नारायणेन ॥
"ऊर्द्धपुण्ड्रं त्रिशूलं च वर्त्तुलं चतुरस्रकम् ।
अर्द्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ॥

जन्मना सर्व्वजातिस्तु वेदपठ्यानमाश्रितः ।
पुण्ड्रान्तरं भ्रमादापि ललाटेनैव धारयेत् ॥
ख्यातिकान्त्यादिसिद्ध्यर्थं चापि विष्णवगमादिषु ।
स्थितं पुण्ड्रान्तरं नैव धारयेत् वैदिको नरः" ॥
श्राद्धे ऊर्द्धपुण्ड्रादिविधिनिषेधव्यवस्था ।
यथा, निर्णयसिन्धौ हेमाद्रिः ।
"जपे होमे तथा दाने स्वाध्याये पितृकर्म्मणि ।
तत्सर्व्वं नश्यति क्षिप्रमूर्द्धपुण्ड्रं विना कृतम्" ॥
तथा च नारदः ।
"यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म्म च ।
वृथा भवति विप्रेन्द्राः ! ऊर्द्धपुण्ड्रं विना कृतम्" ॥
इत्यादिवचनात् पैत्रे कर्म्मणि ऊर्द्धपुण्ड्रधारणं विहितम् । केचित्तु ।
'ऊर्द्धपुण्ड्रो द्विजातीनामग्निहोत्रसमो विधिः ।
श्राद्धकाले च संप्राप्ते कर्त्ता भोक्ता च वर्जयेत्" ॥
तथा,—
"वामहस्ते च ये दर्भा गृहीते रक्तचन्दनात् ।
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः" ॥
इति संग्रहोक्तवचनात् तथा,—
"ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा ।
श्राद्धकर्त्ता न कुर्व्वीत यावत् पिण्डान्न निर्वपेत्" ।
इति विश्वप्रकाशवचनाच्च श्राद्धकाले ऊर्द्धपुण्ड्रादिकं न धार्य्यमित्याहुः । तन्न, यतः कुलाचारादेव व्यवस्था । यत्तु,—
"ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे माल्यं तथैव च ।
निराशाः पितरो यान्ति दृष्ट्वा च दक्षवीपतिम्" ॥
इति हेमाद्रिधृतवचनम् तत् गन्धत्रिपुण्ड्रकविषयम् । अतः श्राद्धकाले गन्धत्रिपुण्ड्रकञ्च न धार्य्यः । अन्यरूपन्तु धार्य्य एव । तथा च व्यासः ।
"वर्जयेत्तिलकं भाले श्राद्धकाले च सर्व्वदा ।
ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु प्रयत्नतः" ॥)
ऊर्द्धरेताः, [स्] पुं, (ऊर्द्धं रेतो यस्य न पतति वीर्य्यं यस्यार्थः ॥) महादेवः । इति त्रिकाण्डशेषः । (अष्टोत्तरसहस्रनामान्तर्गतो महादेवस्य नामभेदः । यथा महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभःस्थलः" ॥)
भीष्मः । (कृतसमावर्त्तनोऽपि भीष्मदेवः पितुः काम्यविवाहार्थं वैवाहिकधर्म्मं त्यक्तवान् अतस्तस्य ऊर्द्धरेतस्त्वं जातम् । एतद्विवरणन्तु महाभारते १ । सत्यवतीलाभोपाख्याने १०० अध्याये द्रष्टव्यम् ॥)
मुनिविशेषः । तद्यथा । सनक-सनन्द-सनातन-सनत्कुमारादयः । (यथा, महाभारते २ । ब्रह्मसभावर्णने । ११ । ४९ ॥
"अशीतीनि सहस्राणि मुनीनामूर्द्धरेतसाम्" ॥
त्रि, विषयासक्तरहितः । सन्न्यासी । यथा भारते शुकतीर्थोपाख्याने,—
"ऊर्द्धरेता महाभागो भगवान् लोकपूजितः ।
चलेद्धि कृत्ताधर्म्मोऽपि न चलेत् संयितव्रतः" ॥)
ऊर्द्धलिङ्गः, पुं, (ऊर्द्धं लिङ्गं यस्य ।) महादेवः । इति हेमचन्द्रः ॥ (यथा, महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभःस्थलः" ॥)
ऊर्द्धलोकः, पुं, (ऊर्द्धः उपरिस्थो लोकः ।) स्वर्गः । इति

हेमचन्द्रः ॥ (यथा, मुग्धबोधे कारकप्रकरणे। ५ सूत्रम्।
"रक्षांस्यखादयदनायथदूर्द्धलोक-
माक्रन्दयत्कपिभिरायथदाशु रामः" ॥)

ऊर्द्धस्थः, त्रि, (ऊर्द्धे तिष्ठति यः। ऊर्द्ध + स्था + क।) उपरिस्थितः। तत्पर्य्यायः। ऊर्द्धन्दमः २। इति त्रिकाण्डशेषः।

ऊर्द्धस्थितिः, स्त्री, (ऊर्द्धा स्थितिर्यत्र।) ऊर्द्धावस्थानम्। स तु अश्वस्य एकस्थानम्। तत्पर्य्यायः। पुरुषकम् २। इति त्रिकाण्डशेषः॥ उपरिस्थितिः। उपरिस्थानम्॥

ऊर्द्धासितः, पुं, (ऊर्द्धं आसितः।) कारवेल्लः। इति त्रिकाण्डशेषः॥ करला इति भाषा॥

ऊर्म्मिः, स्त्री, पुं, (ऋच्छतीति। ऋ गतौ। "अर्त्तेरूच्च" । ४। ४४। इति उणादिसूत्रेण मिः। अर्त्तेरूरादेशश्च॥) तरङ्गः। (यथा, रघुः। १२। ८५।
"तमाधूतध्वजपटं व्योमगङ्गोर्म्मिवायुभिः" ॥)
प्रकाशः। वेगः। भङ्गः। वस्त्रसङ्कोचरेखा। वेदना। पीड़ा। इति मेदिनी॥ उत्कण्ठा। इति हेमचन्द्रः॥ "शोकमोहौ शरीरस्य जरामृत्यू क्षुत्पिपासे षड़ूर्म्मयः"। इति श्रीभागवतटीका॥
(बुभुक्षादयः षट्, यथा;—
"बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ।
शोकमोहौ शरीरस्य जरामृत्यू षड़ूर्म्मयः" ॥
(अश्वगतिभेदः। तल्लक्षणं यथा वैद्यजयन्त्याम्।
"प्रकीर्णकानामश्वानां नमनोन्नमनाकृतिः।
अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृता" ॥
तथा च माघे ५। ४।
"तूर्णं पयोधर इवोर्म्मिभिरायतन्त्याः" ॥)

ऊर्म्मिका, स्त्री, (ऊर्म्मिरिव। इवे प्रतिकृताविति-कन्। ऊर्म्मिं प्रकाशं कायतीति वा। आतोनुपेति कः।) उत्कण्ठा। भङ्गनादः। वस्त्रभङ्गः। अङ्गुलीयकम्। वीचिः। इति हेमचन्द्रः॥

ऊर्म्मिमान्, [त्] त्रि, (ऊर्म्मिरस्यास्तीति। ऊर्म्मि + मतुप्।) वरुणः। इत्यमरः॥ ढेउखेलानिया इति भाषा। तरङ्गयुक्तः॥ (यथा, महाभारते २। द्रौपदीप्रश्ने ६३। २८।
"दीर्घेषु नीलेष्वच ऊर्म्मिमत्सु
जग्राह केशेषु नरेन्द्रपत्नीम्" ॥)

ऊर्म्मिमाली, [न्] पुं, (ऊर्म्मीणां माला विद्यतेऽस्य। इनिः।) समुद्रः। इति त्रिकाण्डशेषः॥ ("चन्द्रं प्रदक्षोर्म्मिरिवोर्म्मिमाली"। इति रघुः ५। ६१।)

ऊर्व्वरा, स्त्री, उर्व्वरा। सर्व्वशस्याढ्या भूमी। इति शब्दरत्नावली। (व्युत्पत्तिस्तु ऋक्षादौ उर्व्वराशब्दे द्रष्टव्या॥)

ऊर्व्वशी, स्त्री, (ऊरुमश्नुते स्वकारणत्वेन व्याप्नोति या। ऊरु + अश् + अच् + ङीप्। नारायणोरुसम्भवत्वात् तथात्वम्।) उर्व्वशी। स्वर्गवेश्याविशेषः। इत्यमरटीकायां रायमुकुटः॥ (विस्तृतिस्तु ऋक्षादौ उर्व्वशीशब्दे द्रष्टव्या॥)

ऊर्व्वसी, स्त्री, (ऊरौ उषिता इति। एषोदरादित्वात् साधुः।) उर्व्वशी। इत्यमरटीकासारसुन्दरी॥

ऊर्ध्वकं, क्ली, (ऊर्ध्वाः एधिका अङ्कमिव।) गोमयच्छिका। तत्पर्य्यायः। छिल्लीरम् २ श्लिलीन्ध्रकम् ३ वशारोहम् ४ गोलासम् ५। इति हारावली॥

ऊर्षा, स्त्री, देवताड़कृदाम्। इति शब्दचन्द्रिका॥

ऊलुपी, [न्] पुं, उलूपी। शिशुमारः। इत्यमरटीकासारसुन्दरी॥ (जलजन्तुविशेषः॥)

ऊलूकः, पुं, (उलुकशब्देऽस्य व्युत्पत्तिर्द्रष्टव्या।) उलुकः पेचकः। इत्यमरटीकायां रायमुकुटः॥
(यथा, पञ्चतन्त्रे ३। ७७।
"ऊलूकं नृपतिं कृत्वा काननः सिद्धिर्भविष्यति" ॥)

ऊष रोगे। इति कविकल्पद्रुमः॥ (भ्वादि-परं सकं-सेट्।) दीर्घादिः। "ऊषति सन्तं खलः"। इति दुर्गादासः॥ [वली॥

ऊषं, क्ली, (ऊष् + क।) प्रभातम्। इति शब्दरत्नाऊषः, पुं, क्षारमृत्तिका। इत्यमरः॥
(यथा मनुः ५। १२०।
"कौषेयाविकयोरूर्ध्वैः कृतपानामरिष्टकैः"।
"ऊषैः क्षारमृत्तिकाभिः" इति कुल्लूकभट्टः।
कर्णविलम्। चन्दनादिः॥)

ऊषकं, क्ली, (ऊष + स्वार्थे कन्।) प्रत्यूषम्। इति शब्दरत्नावली।

ऊषणं, क्ली, (ऊष् + ल्युट्।) मरिचम्। इति हेमचन्द्रः॥ (मरिचार्थे पर्य्यायो यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्"॥
गुणाश्चास्य मरिचशब्दे ज्ञेयाः॥ शुण्ठी च। एतदर्थे पर्य्यायो यथा,—
"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्"॥
गुणाश्च शुण्ठीशब्दे ज्ञातव्याः॥ पिप्पलीमूलञ्च। एतदर्थे पर्य्यायो यथा,—
"ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः"।
अस्य गुणाश्च पिप्पलीमूलशब्दे बोद्धव्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषणा, स्त्री, उषणा। पिप्पली। इति शब्दरत्नावली॥ (चविका। अस्याः पर्य्यायो यथा,—
"भवेच्चव्यन्तु चविका कथिता सा तथोषणा"।
गुणाश्चास्याश्चविकाशब्दे बोध्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषरः, त्रि, (ऊष् + र।) क्षारभूमौ। लोणा जायगा इति भाषा। तत्पर्य्यायः। ऊषवान् २। इत्यमरः॥ ("तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे"। इति मनुः। २। ११२। ऊषरा मृत्तिकां कोपयेत्। प्रमाणं यथा॥ "पित्तमूषरा" इति वैद्यकमाधवकृतरोगनिश्चये पाण्डूधिकारे॥)

ऊषरजं, क्ली, (ऊषर + जन् + ड।) पांशुलवणम्। रोमकनामायस्कान्तभेदः। इति राजनिर्घण्टः॥

ऊषवान्, [त्] त्रि, (ऊषो विद्यतेऽस्य। ऊष् + मतुप्। मस्य वः।) ऊषरभूमौ। इत्यमरः॥

ऊषा, स्त्री, (उष् + क + टाप्।) उषा। अनिरुद्धभार्य्या। इति शब्दरत्नावली॥ (तत्कथा च भागवते १० स्कन्धे ६२ अध्याये तथा हरिवंशे १७४ अध्याये बाणयुद्धे द्रष्टव्या॥)

ऊह ड वितर्के। सन्देहादिचारे। इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं-सकं-सेट्।) दीर्घादिः। सन्देहादिचारस्तर्कः। ड ऊहते धर्म्मं धीरः। यशः समूहइव दिग्विकीर्णमिति गेर्व्वाणोर्हाढे चेति परस्मैपदविधानाच्छत्वन्तम्। "अनुक्तमप्यूहति पण्डितो जनः"। इति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु पचादित्वादनि ऊह इवाचरतीति क्वौ साध्यम्। इति दुर्गादासः॥

ऊहः, त्रि, (ऊह् + घञ्।) पूर्व्वाप्राप्तस्य उत्क्षेपणम्। तत्पर्य्यायः। अध्याहारः २ तर्कः ३। इत्यमरः॥ वितर्कः ४। वूहः ५ व्यूहः ६ वितर्कणम् ७ अध्याहरणम् ८ ऊहनम् ९ प्रतर्कणम् १०। इति शब्दरत्नावली॥ अपूर्व्वोत्क्षेपणम्। इति जैमिनिः॥ असमवेतार्थकपदत्यागपूर्व्वकसमवेतार्थकपदसमभिव्याहारकरणम्। इति श्राद्धतत्त्वटीका॥ साकाङ्क्षवाक्यस्य पदान्तरेण आकाङ्क्षापूरणम्॥ (ऊहनम्। आरोपः। यथा, महाभारते १३। उमामहेश्वरसंवादे १४५। ४३॥
"इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः।
ज्ञानविज्ञानसम्पन्नाः प्रज्ञावन्तोऽथ कोविदाः" ॥
परीक्षणम्। सिद्धिभेदः॥)

ऊहनी, स्त्री, (ऊह् + ल्युट् + ङीप्।) सम्मार्জनी। इति शब्दरत्नावली॥ झाँटा इति भाषा॥

ऋ, ऋकारः। सप्तमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (ऋटुरषाणामूर्द्धा"। इत्युक्तेः। तथाच शिक्षायां "स्युर्मूर्द्धन्या ऋटुरषाः"। तथा च मुग्धबोधे। "ऋत्वयं टठडढणरषा मूर्द्धन्याः"। इति।) स तु ह्रस्वो दीर्घः प्लुतश्च भवति॥ (एवं त्रिधापि उदात्तानुदात्तस्वरितभेदात् नवविधस्ततः प्रत्येकं अनुनासिकानुनासिकभेदादष्टादशविधश्च।)
"ऋकारं परमेशानि कुण्डली मूर्त्तिमान् स्वयम्।
अत्र ब्रह्मा च विष्णुश्च रुद्रश्चैव वरानने॥
सदाशिवयुतं वर्णं सदा ईश्वरसंयुतम्।
पञ्चवर्णमयं वर्णं चतुर्ज्ञानमयं तथा॥
रक्तविद्युल्लताकारं ऋकारं प्रणमाम्यहम्"।
इति कामधेनुतन्त्रम्॥ (वक्ष्यीयभाषायाम्) तस्य लेखनप्रकारादि यथा।
"ऊर्द्धदक्षगता वक्रा त्रिकोणा वामतस्ततः।
पुनस्त्वधोदक्षगता मात्रा ऋत्तिः परा स्मृता॥
मात्रासु ब्रह्मविष्ण्वीशास्तिष्ठन्ति क्रमतः पराः"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा।
"ऋः पूर्व्वेंधमुखी ब्रह्मा देवमाता त्रिविक्रमः।
भावभूतिः क्रिया क्रूरा रेचिका नाशिका धृतः॥
एकपादशिरो माला मङ्गला शान्तिनी जलम्।
कर्णः कामलता मेधो निवृत्तिर्गणनायकः॥
रोहिणी शिवदूती च पूर्णगिरिश्च सप्तमी"।
इति तन्त्रम्॥ (माहकान्यासेऽस्य दक्षिणग्रामेऽवस्थितिलाभदाख्ययाप्यभिधानम्। यथा, माहका-

न्यासधृतमन्त्रे "ऋं नमो दक्षिणघ्राणे ॠं नमो वामघ्राणे"। इति। अनुबन्धविशेषः। यथा, कविकल्पद्रुमः। "उः क्लावेडस्तु वेट्क ऋः। चडा-ऋक्षः"। एतेन ऊौऋड् गत्यामित्यस्य लुडि अड्ऊौकदिति सिद्धम्।)

ऋ, प्रापे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वादि-परं-सकं-अनिट्।) प्रायः प्राप्तिः। "ऋच्छति धनं क्षतौ"। इति दुर्गादासः॥

ऋ, इर ल गत्याम्। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्॥)

ऋ, र लि गत्याम्। (जुहों-परं-सकं-अनिट्।) र वैदिकः। लि इयर्त्ति। ग्रपो लुङरण्यादस्य ग्रहणानयोरेव ऋच्छादेशः। इयृच्छत् समियृच्छानः। इति दुर्गादासः॥

ऋ, र न हिंसने। इति कविकल्पद्रुमः। (स्वां-परं-सकं-अनिट्।) र वैदिकः। न ऋणोति। रेफादि-स्तृतीयस्वरान्तोऽयमिति केचित्। इति दुर्गादासः॥

ऋ, य गईगाम्। वाक्यम्। देवमातरि स्त्री इति मेदिनी॥(सम्बोधनम्।) परिहासः। वाक्यविकारः। इति शब्दरत्नावली॥ (पुं, स्वर्गः॥)

ऋक्, [च्] स्त्री, (ऋच्यन्ते स्तूयन्ते देवा अनया। ऋच्+क्विप्।) वेदविशेषः। ऋग्वेदः। इत्यमरः॥ अस्य एकविंशतिशाखाः। वेदमन्त्रविशेषः। तस्य लक्षणम्। यत्रार्थवशेन पादव्यवस्थितिः। अस्यार्थः। यत्रार्थवशेन एकान्वयित्वेनानुश्रुवादिपादस्थितिः। इति जैमिनिः॥ (ऋग्यजुःसामाथर्व्ववेदाभिहितैरपरैश्चाग्नीर्विधानैरुपाध्याया भिषजश्च सन्त्यथोः रक्षां कुर्य्युः॥ इति सुश्रुते सूत्रस्थाने ऊनविंशेऽध्याये।)

ऋक्थं, क्ली, (ऋच् स्तुतौ ऋच्+"पाटृतुदिवचि-रिचिसिचिभ्यस्थक्"।२।७। इत्युणादिसूत्रेण थक्।) धनम्। इत्यमरः॥ स्वर्गम्। इत्युणादिकोषः॥ (यदुक्तं शब्दार्णवे। "हिरण्यं द्रविणं द्युम्नं विक्रम-मृक्थं धनं वसु"॥) पुंस्त्वहीनस्य ऋक्थिनः"। इति याज्ञवल्क्यः। "ऋक्थमूलं हि कुटुम्बं"। इति दायभागे पितृधनविभागकालेऽभिहितम्॥)

ऋक्ष, ग र बधे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) र वैदिकः। न ऋक्षणोति। इति दुर्गादासः॥

ऋक्षं, क्ली, पुं, (ऋच्+स। "ऋज्रमिक्षत्यृधिभ्यः कित्"। १। ६६। इत्युणादिसूत्रेण कित्।) नक्षत्रम्। इति मेदिनी॥ (यथा, मनुः।२।६१। "पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात्। पश्चिमान्तु समासीनः सम्यगृक्षविभावनात्"॥ तच्च अश्विन्यादिभेदेन सप्तविंशतिः।) राशिः। इति ज्योतिषम्॥ (राशेश्च मेषवृषादिभेदेन द्वादश। अस्मिन्नर्थे प्रमाणं यथा रघौ। १२।२५। "प्रययावातिथेयेषु वसतिर्ऋषिकुलेषु सः। दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः"॥ "ऋक्षेषु नक्षत्रेषु राशिषु वा भास्कर इव"। इति तट्टीकायां मल्लिनाथः॥)

ऋक्षः, पुं, (ऋच्+अच्।) पर्व्वतविशेषः। (अयं हि कुलाचलानामेकः। यथा, सिद्धान्तशिरोमणौ॥ "माल्येन्द्रसुक्तिमलयर्क्षकपारियात्राः सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः"॥) भल्लूकः। (यथा मनुः। १२। ६७। "रक्षो मृगेभं व्याघ्रोऽश्वं फलमूलन्तु मर्कटः। स्त्रीशूद्रस्तोककोवारि यानान्युष्ट्रः पशूनजः"॥) ग्रोणाकवृक्षः। इति मेदिनी। ग्रोणाकप्रभेदः। इति राजनिर्घण्टः॥ (खनामख्यातोऽजमीढ़पुत्रः। यथा, हरिवंशे पुरुवंशानुकीर्त्तने। ३२। ८७। "धूमिन्या स तया देव्या त्वजमीढ़ः समेयिवान्। ऋक्षं स जनयामास धूमवर्णं सुदर्शनम्"॥ खनामख्यातो विदूरथस्य पुत्रः। यथा, तत्रैव ३२। १०४। "विदूरथस्य दायद ऋक्ष एव महारथः"॥ तथा खनामख्यातोऽरिहस्य पुत्रः। यथा, महाभारते १। पुरुवंशानुकीर्त्तने। ९५। २४। "अरिहः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजीजनदृक्षम्"॥ एतेन पुरुवंशे त्रयस्त्रय ऋक्षनामानो राजानः सम्भूताः॥)

ऋक्षगन्धा, स्त्री, (ऋक्षस्येव गन्धो यस्याः।) वृक्ष-विशेषः। वीरताड़ इति ख्यातः। तत्पर्य्यायः। कृगवान्ती २ आवेगी ३ वृद्धदारकः ४ जुङ्गः ५। इत्यमरः॥ ऋषिजाङ्गल इति ख्यातो वृक्षश्च। तत्पर्य्यायः। ऋष्यगन्धा २ ऋषिजाङ्गलिका ३ इति रत्नमाला। क्षीरविदारीवृक्षः। तत्पर्य्यायः। महाश्वेता २। क्षीरिका ३। ऋक्षगन्धिका ४। इति शब्दरत्नावली॥ (वृद्धदारकशब्देऽस्याः गुणादयो ज्ञेयाः॥)

ऋक्षगन्धिका, स्त्री, (ऋक्षगन्धा+स्वार्थे कन्। अत इत्वम्।) क्षुद्रभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीर-विदारी २ महाश्वेता ३। इत्यमरः॥

ऋक्षरं, क्ली, (ऋषी गतौ। ऋष्+"तन्यृषिभ्यां क्सरन्" ।३।७५। इत्युणादिसूत्रेण क्सरन्।) वारि-धारा। इति मेदिनी॥

ऋक्षरः, पुं, (ऋष+"तन्यृषिभ्यां क्सरन्"। ३। ७५। इत्युणादिसूत्रेण क्सरन्।) ऋत्विक्। इति मेदिनी॥

ऋक्षराजः, पुं, (ऋक्षाणां भल्लूकानां राजा। राजाहःसखिभ्यष्टच्।) जाम्बवान्। इति रामा-यणम्॥ (यथा, हरिवंशे। ३८। ४१। "लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्"॥)

ऋक्षेशः, पुं, (ऋक्षाणां नक्षत्राणामीशः।) चन्द्रः। इति हलायुधः॥

ऋच, ग्र नुत्याम्। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र ऋचति। आनर्च। इति दुर्गादासः॥

ऋचीषं, क्ली, (ऋचतीति। ऋच्+बाहुलकात् कीषन्।) पिण्डकभर्जनपात्रम्। इति हेमचन्द्रः॥

ऋच्छ, ग्र मूर्त्तौ। गमने। मोहे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अकच्छ-सेट्।) ग्र ऋच्छति ऋच्छन्ती। मूर्त्तिः कठिनीभावः। "मूर्त्तिः काठिन्य-कायथोरित्यमरात्। ऋच्छति वृत्तं कठिनं स्यादि-त्यर्थः। ऋच्छति वृद्धो गच्छति सुच्छति वेत्यर्थः। मोहस्थाने इन्द्रियप्रलयं पठन्ति प्राच्यः। ऋच्छति वृद्धस्येन्द्रियं प्रलीयते इत्यर्थः। इति रमानाथः"॥ इति दुर्गादासः॥

ऋच्छरा, स्त्री, (ऋच्छति परपुरुषं प्राप्नोतीति। ऋच्छ+"ऋच्छेररः" ३।१३१। इत्युणादिसूत्रेण अरः। अरन् इति प्रमाद इति पारायणीयम्।) वेश्या। इत्युणादिकोषः॥ (यथा, अथर्व्ववेदे १०। ६२०। "ऋच्छरा ये च ते ग्रपाः"॥)

ऋज, ड गत्याम्। स्थैर्य्ये। ऊर्ज्जने। अर्ज्जने। इति कविकल्पद्रुमः॥ (भ्वादि-ग्रात्मं-सकं-अकच्छ-सेट्।) ड अर्ज्जते। ऊर्ज्जनं जीवनं बलवद्भावश्च। इति दुर्गादासः॥

ऋज, इ ड भर्जि। इति कविकल्पद्रुमः॥ (इदित् भ्वादि-ग्रात्मं-सकं-सेट्।) क्रयादिः। भर्जि भर्त्सने। इ ऋञ्जते। ड ऋञ्जते मत्स्यं सूपकारः। इति दुर्गादासः॥

ऋजीषं, क्ली, (अर्जते रसोऽस्मादिति। ऋज्+"अर्जे-र्ऋजश्च" इत्युणादिसूत्रेण ईषन्।) पिष्टपचनम्। पिष्टकभर्जनपात्रम्। इति हेमचन्द्रामरौ॥ नरक-विशेषः। अत्र पिष्टपचनप्रक्षेपः। (यथा, मनुः ४।९०। "लोहशस्त्रमृजीषञ्च पत्त्यानं ग्रामयाजनं नदीम्"॥ धनम्। सोमलतायां उद्भूतो रसः। यथा, ऋग्वेदे ३। ४३। ५। "कुविदाजानं मघवन्नृजीषिन्"। "ऋजीषिन् सोमवन्"। इति भाष्यम्"॥)

ऋजु, त्रि, (अर्जयति गुणान्। अर्ज अर्जने। "अर्जि-वृशीति"। १। २८। उणादिसूत्रेण साधुः।) अवक्रम्। सोजा इति भाषा। तत्पर्य्यायः। अजिह्मम् २ प्रगुणम् ३। इत्यमरः॥ प्राञ्जलः ४ सरलः ५। इति जटाधरः॥ ("उमां स पश्यन् ऋजुनैव चक्षुषा"। इति कुमारे। ५। ३२॥ यथा, मनुः। २। ७७। "ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः"॥ स्त्रियां ङीष्पक्षे यथा, माघे १२। १८। "ऋज्वीर्दधानैरवतत्य कन्धरा-श्चूलावचूड़ाः कलघर्घरारवैः॥ अनुकूलम्। यथा, ऋग्वेदे ५। ४१। १५। "ऋजुहस्ता ऋजुवनिः"। "ऋजुहस्तास्तदनुकूल-हस्ताः"। इति भाष्यम्॥ शोभनम्। यथा ऋग्वेदे ५। ४४। ५। "धारवाकेष्वृजुगाथः"। "ऋजु-माथः शोभनस्तुतिकः"। इति भाष्यम्॥ वसुदेव-पुत्रभेदे पुं। यथा भागवते ९। २४। ५४। "ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम्"॥)

ऋजुकायः, पुं, (ऋजुः सरलः कायो यस्य।) ग्रक्षप-मुनिः। इति जटाधरः॥ ग्रवक्रशरीरे त्रि॥ ("तस्मिन् खल्विसमासीन ऋजुकायः समभ्यसेत्"। इति भागवते ३। २८। ८॥)

ऋञ्चः, पुं, (ऋज्+"ऋज्रेन्द्राग्रवज्रेति"। २। २८॥ उणादिसूत्रेण निपातनात् रन् गुणाभावश्च।) गायकः। इत्युणादिकोषः॥ (सरलगामिनि, त्रि। यथा ऋग्वेदे १। ११७। १४। "युवं भुज्यु-मर्णसो निः समुद्रादिभिरूहथुः पड्भिरश्वैः"।

"ऋचेभिः ऋजुगामिभिः"। इति भाष्यम्"॥)

ऋक्षासनः, पुं, (ऋजि + "ऋजिदृधिसन्दिसहिभ्यः कित्"। २। ८७। इत्युणादिसूत्रेण असानच्। किच्च।) मेघः। इति सिद्धान्तकौमुदी॥ उणादिकोषश्च॥)

ऋच, द उ अ गतौ। इति कविकल्पद्रुमः॥ (तनां-उभं-सकं-सेट्।) द अ ऋणोति अर्णोति ऋणुते अर्णुते। उ अर्णित्वा ऋत्वा। इति दुर्गादासः॥

ऋणं, क्ली, (ऋ + क्त। ऋणमाधमर्ण्ये इति सूत्रम्।) धारः। देना इति भाषा। तत्पर्य्यायः। पर्य्युदञ्चनम् २ उद्धारः ३। इत्यमरः॥ पुनर्देयत्वेन स्वीकृत्य यत् गृहीतम्। इति जगदीशः॥ अस्य विवरणं ऋणादानशब्दे द्रष्टव्यम्॥ *॥

कुसीदाख्यं ऋणं यथा।

"स्थानलाभनिमित्तं यद्दानग्रहणमिष्यते।
तत्कुसीदमिति ज्ञेयं तेन वृत्तिः कुसीदिनाम्"॥

इति नारदः॥ अस्यार्थः। स्थानं मूलधनावस्थानम्। लाभो वृद्धिः। दानग्रहणपदे कर्म्मण्यनटा साध्ये तेन मूलधनावस्थाने सत्येव यो लाभस्तदर्थं यद्दानं धनिकेन दीयमानं मूलधनं अधमर्णेन च ग्रहणं तथा स्वीकृत्य ग्रह्यमाणं यत्तदृणम्। इति रत्नाकरादयः॥ कलाशून्ये तु अवस्थापाकरणीयत्वरूपगुणयोगाद्गौणप्रयोगः। अतएव वाणिज्यार्थप्रयुक्तस्य नर्णत्वं इति मिश्राः॥ *॥ अपि च।

"कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते।
चतुर्गुणं वाऽष्टगुणं कुसीदाख्यमृणं स्मृतः"॥

इति बृहस्पतिः॥ अस्यार्थः। कुत्सितात् सीदतश्चाधमर्णात् सकलं धनं यत् गृह्यते निर्विशङ्कैरुत्तमर्णैः। चतुर्गुणं वेति वाकारोऽनास्थायां तेन द्वैगुण्यादिलाभः॥ *॥ ऋणत्रयविशेषो यथा।

"देवानाञ्च पितॄणाञ्च ऋषीणाञ्च तथा नरः।
ऋणवान् जायते यस्मात्तन्मोक्षे प्रयतेत् सदा॥*॥

तत्परिशोधनमाह।

"देवानामर्चको नित्यैर्भवति मानवः।
अन्नवित्तञ्च पूजाभिरुपवासव्रतैस्तथा॥
श्राद्धेन प्रजया चैव पितॄणामर्चको भवेत्।
ऋषीणां ब्रह्मचर्य्येण श्रुतेन तपसा तथा"॥

इति विष्णुधर्म्मोत्तरम्॥ (जलदुर्गमभूमिः। यथा मुग्धबोधे १। २८ सूत्रस्य टीकायां दुर्गादासः। "दशार्णो देशः दशार्णा नदी उभयत्र ऋणशब्देन जलदुर्गमभूमिरुच्यते"॥ अङ्गशास्त्रोक्तः कुतश्चिदपि राज्ञस्तरात् वियोज्य संस्थावान् पदार्थः। यथा वीजगणिते।

"धनर्णसङ्क्रमने करणसूत्रं उत्तार्द्धम्।
योगे युतिः स्यात् क्षययोः क्षयोर्व्वा
धनर्णयोरन्तरमेव योगः"॥

ऋणतीति। ऋण गतौ तस्मात्कः। इति उत्पत्त्या वाच्यलिङ्गः। गन्ता। गमनशीलः। यथा, ऋग्वेदे ६। १२। ५। "ऋणो यः स्यन्दो विदितो यवीयाऋणो न तायुरतिधन्वा राट्"। "ऋणः शीघ्रगन्ता" इति भाष्यम्॥)

ऋणमल्कयः, पुं, (ऋणे मल्कयतीव। णमकः। इति शब्दरत्नावली॥ जामिन इति भाषा॥

ऋणमार्गणः, पुं, (ऋणं मार्गयति यः सः। ऋण + मार्ग + ल्यु।) प्रतिभूः। इति हारावली॥ जामिन इति भाषा॥

ऋणमुक्तिः, स्त्री, (ऋणस्य ऋणात् वा 'मुक्तिर्मोचनं भवत्यस्मात्।) ऋणपरिशोधनम्। तत्पर्य्यायः। विगणनम् २। इति त्रिकाण्डशेषः॥

ऋणमोक्षः, पुं, (ऋणात् मोक्षः।) ऋणपरिशोधनम्। इति हारावली॥

ऋणादानं, क्ली, (ऋणस्य आदानम् ग्रहणम्।) अधमर्णात् उत्तमर्णेन सलाभधनग्रहणम्। तत्तु अष्टादशविवादान्तर्गताद्यविवादः। (यदाह मनुः। ८।४।

"तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः"।

इत्यादि।) तच्च सप्तविधं यथा। ईदृशमृणं देयम् १ ईदृशमदेयम् २ अनेनाधिकारिणा देयम् ३ अस्मिन् समये देयं ४ अनेन प्रकारेण देयं ५ इत्यधमर्णे पञ्चविधम्। उत्तमर्णे तु दानविधिः ६ आदानविधिश्च ७ इति द्विविधम्। तथाच नारदः।

"ऋणदेयमदेयञ्च येन यत्र यथा भवेत्।
दानग्रहणधर्म्माश्च ऋणादानमिति स्मृतम्॥
अदेयमिति यदुक्तं तदाह कात्यायनः।
न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम्।
दाता न लभते तत्तु तेभ्यो दत्तन्तु यद्वसु"॥

तत्र विशेषमाह बृहस्पतिः।

"परिपूर्णं गृहीत्वाधिं बन्धं वा साधुसम्मतम्।
लेख्यारूढं साक्षिमद्वा ऋणं दद्यात् धनी सदा"॥

इति विवादार्णवसेतुः॥ अस्य यदवश्यकं ऋणोद्ग्राहणशब्दे द्रष्टव्यम्॥

ऋणान्तकः, पुं, (ऋणमन्तयति यः। ऋण + अन्ति नामधातु + ण्वुल्। मङ्गलग्रहाराधनेन ऋणापनयनात् तथात्वम्।) मङ्गलग्रहः। इति शब्दरत्नावली॥

ऋणापनोदनं, क्ली, (ऋण + अप + नुद + ल्युट्। ततः षष्ठीतत्पुरुषः।) ऋणापनयनम्। धारशोधनम्॥

ऋणी, [न्] त्रि, (ऋणमस्यास्तीति। ऋण + इनि।) ऋणग्रस्तः। धारी॥

("जायमानो वै ब्राह्मणः त्रिभिर्ऋणैर्ऋणी भवति"। इति श्रुतिः। "ऋणी न स्यात् यथा पिता"। इति दायभागे॥)

ऋणोद्ग्राहणं, क्ली, (ऋणस्य उद्ग्राहणं।) अधमर्णगृहीतर्णग्रहणं। यत्र ऋणं प्रार्थनकाले प्रार्थितोऽपि ऋणी न ददाति तत्र धनिकेन यत् कर्त्तव्यं तदाह मनुः। ८।४८—४९।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य साधयेदधमर्णिकम्"॥
धर्म्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च"॥

अयमर्थः। पूर्व्वपूर्व्वसामर्थ्याभावे उत्तरोत्तरम् संगृह्य वशीकृत्य। धर्म्मे बृहस्पतिराह।

"सुहृत्सम्बन्धिसन्दिष्टैः सामोक्तानुगमेन च।
प्रातेव वा ऋणी दाप्यो धर्म्म एष उदाहृतः"॥

अस्यार्थः। ऋणिकस्य ये सुहृत्सम्बन्धिनस्तेषु सन्देशो यो यत्र सामवचनं यच्चानुगमनं प्रायोपवेशनं वा धनिकस्य सधर्म्म ऋणोद्ग्राहणोपायः॥ व्यवहारे कात्यायनः।

"धार्य्योऽविरुद्ध ऋणिकः प्रकाशं जनसंसदि।
यावन्न दद्याद्देयञ्च देशाचारस्थितिर्यथा"॥

अस्यार्थः। यावद्दानं जनसंसदि ऋणिकस्य धनिकेन धारणं व्यवहारः॥ छलाचरितबलात्कारेषु बृहस्पतिः।

"छद्मना याचयित्वार्थमानीय ऋणिकाद्धनी।
अन्नाहितादि वाहृत्य दाप्यते यत्र सोपधिः"॥

अस्यार्थः। ऋणिकस्य धनमन्नाहितादि वा छद्मना आहृत्य वा यत्र दाप्यते तत्र साधनोपायः सोपधिः सच्छलमुच्यते॥

"पुत्रदारपशून् रुद्धा क्षात्वा द्वारोपवेशनम्।
यत्तर्णो दाप्यतेऽर्थं स्वं तदाचरितमुच्यते॥
बद्धा स्वयंहमानीय ताड़नाद्यैरुपक्रमैः।
ऋणिको दाप्यते यत्र बलात्कारः स उच्यते"॥

अनयोरर्थः। पुत्रदारपशुरोधो द्वारोपवेशनञ्च य उद्ग्राहणोपायस्तदाचरितमुच्यते। स्वयंहमानीय ताड़नादिकञ्च उद्ग्राहणोपायो बलात्कार उच्यते॥ *॥ कोऽधमर्णः केनोपायेन साध्यस्तदाह कात्यायनः।

"राजानं स्वामिनं विप्रं सान्त्वेनैव प्रसाधयेत्।
ऋत्थिनं दुर्हृदं वापि छलेनैव प्रसाधयेत्"॥

ऋत्थिनं दायादम्॥ तथा

"वणिजः कर्षकांश्चैव शिल्पिनश्चाप्रवीद् भृगुः।
देशाचारेण दाप्याः स्युर्दुष्टान् संपीड्य दापयेत्॥*॥

यत्र धनं न लभ्यते तत्राह बृहस्पतिः।

"निर्धनं ऋणिकं कर्म्म गृहमानीय कारयेत्।
शौल्किकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनैः"॥

याज्ञवल्क्यः,—

"हीनजातिं परिक्षीणमृणार्थं कर्म्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥
यथोदयं यथा धनोत्पत्तिरित्यर्थः॥ *॥ व्यापारद्वारा न ब्राह्मणस्य ऋणशोधनमाह कात्यायनः।

"कर्म्मणा क्षत्रविट्शूद्रान् समर्हीनांस्तु दापयेत्"॥*

ऋणशोधनाय निन्दितं कर्म्म कारयितुरुत्तमर्णस्य दण्डमाह कात्यायनः।

"यदि ह्यादावनादिष्टमशुभं कर्म्म कारयेत्।
प्राप्नुयात् साहसं पूर्व्वमृणान्मुच्येत वर्णिकः॥ *॥

यदि परमबुद्धिप्राप्तं धनमृणिको दातुं न शक्नोति तदा चक्रवृद्ध्या लेख्या धारयेत्। यथा बृहस्पतिः।

"पूर्णावधौ शतलाभमशक्तौ वृद्धयाहयेद्धनी।
कारयेद्वा धनी लेख्यं चक्रवृद्ध्यवधार्य्यया"॥

तथा च बृहस्पतिः।

"हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके।
देयं तदीयं संगृह्य विक्रीणीत सबान्धवम्॥
रत्नेष्वेतत् शतमूल्यन्तु दशाहं जनसंसदि।
ऋणानुरूपं परतो गृहीतान्यपि वर्जयेत्॥
स्वधनञ्च स्थिरीकृत्य गवादीनुग्रजैर्नरैः।
तद्बन्धुज्ञातिविदितं प्रस्थाप्यापराह्णयात्"॥*॥

यथाविधयं धर्म्मादीन् धनसाधनोपायान् प्रयुञ्जानो

न राज्ञा निवर्त्तनीय इत्याह मनुः।
"यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात्।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनम्"॥*॥
धनवता ऋणिकेनादत्ते ऋणे राजा स्वयं विंशतितमभागं गृहीत्वा उत्तमर्णाय दापयेत् इत्याह नारदः॥
"ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्यात्गृहीत्वांशन्तु विंशकम्"॥*॥
यदा अधमर्णिकः सकलमृणं दातुमसमर्थः शक्त्यनुसारेण दत्त्वा पूर्व्वलिखितस्य लेखस्य एष्ठेऽभिलिखेत् एतावद्दत्तं उत्तमर्णेन उपगतं प्राप्तमिति धनी तस्यैव लेखस्य एष्ठे दद्यादभिलिखेत् इत्याह याज्ञवल्क्यः।
"लेखस्य एष्ठेऽभिलिखेत् दत्त्वा दत्त्वाधनं ऋणी।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्"॥
इति विवादार्णवसेतुः॥

ऋत, गत्याम्। स्पर्द्धने। ऐश्वर्य्ये। दृष्ट्यायाम्। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-ईयड्पक्षे आत्मंगत्यर्थे सकं, अन्यार्थे-अकं-सेट्।) दृष्ट्या दया। ऋतीयते जनः स्पर्द्धते ईश्वरो भवति। किञ्चिद्दयते गच्छति वेत्यर्थः। अरे तु ईयङोऽप्राप्तिपक्षे परस्मैपदमेव। आर्त्तोत् आनर्त्त इत्यादि। इति दुर्गादासः।

ऋतं, क्ली, (ऋ + क्त।) उष्णशिलम्। (यथा, मनुः। ४। ४—५॥
"ऋताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्"॥)
जलम्। (यथा, ऋग्वेदे। ७। १०१। ६। "तन्न ऋतं पातु शृतशारदाय"। "ऋतमुदकम्"। इति भाष्यम्॥) सत्यं इति मेदिनी॥ (यथा, मनुः। ८। ८२।
"साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम्।
"विवशः शतमाजातीस्तस्मात् साक्ष्यं वदेदृतम्"॥
कर्म्मफलं। यथा, "ऋतं पिबन्तौ सुकृतस्य लोके"। इति श्रुतिः॥ विष्णुः॥ यथा, महाभारते। १। १। २५६।
"भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।
स हि सत्यमृतश्चैव पवित्रं पुण्यमेव च।
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्"॥
पुं, सूर्य्यः। यथा, शतपथब्राह्मणे। "ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म ऋतं ब्रह्म वरुणः"॥ परब्रह्म। यथा, श्रुतिः। "ऋतमेकाक्षरं ब्रह्म"॥ सत्याचारः। यथा, ऋग्वेदे। १। १३७। २। "सुतो मित्राय वरुणाय पीतये शार्ङ्ऋताय पीतये"॥ "ऋताय सत्याचाराय"। इति दयानन्दभाष्यम्॥ रुद्रः। यथा, सामगानां सन्ध्यामन्त्रे रुद्रोपस्थाने। "ऋतमित्यस्य कालाग्नी रुद्र ऋषिरनुष्टुप्छन्दो रुद्रो देवता रुद्रोपस्थाने विनियोगः"॥ देवभेदः। यथा, ऋग्वेदे। ४। २३। ८। "ऋतस्य हि शुरुधः सन्ति पूर्व्हीर्ऋतस्य धीतिर्वृजिनानि हन्ति"। "ऋतस्य ऋतदेवस्य"। इति भाष्यम्॥ यज्ञः। यथा, ऋग्वेदे। १। १४५। ५। "ऋतचिद्धि सत्यम्"। "ऋतस्य यज्ञस्य जलस्य वा चित् ज्ञाता"। इति भाष्यम्॥ अग्नेर्ऋषिभेदः। यथा, यजुषि। १७। ८२। "ऋतस्य सत्यस्य"। इति॥)

ऋतः, त्रि, (ऋ + क्त।) दीप्तः। पूजितः। इति मेदिनी॥

ऋतजित्, पुं, (ऋतं जयति ऋत + जि + क्विप्।) यज्ञविशेषः। यथा,—
"त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः॥
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे।
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये"॥
इति श्रीविष्णुपुराणे २। १०। १५—१६। "त्वष्टा सूर्य्यः। कम्बलः सर्पः। ब्रह्मापेतो राक्षसः। ऋतजिदयज्ञः। धृतराष्ट्रो गन्धर्व्वः। इति तट्टीकायां श्रीधरस्वामी॥ (त्रि, यज्ञजेता। यथा, यजुषि १७। ८२। "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च"॥)

ऋतधामा, [न्] पुं, (ऋतं सत्यं धाम भवनं यस्य।) विष्णुः। इति त्रिकाण्डशेषः॥ (यथा यजुर्व्वेदे ५। ३२। "हव्यसूदन ऋतधामासि स्वर्ज्योतिः"॥ इन्द्रभेदः। स तु रुद्रसावर्णिके मनौ भविता। यथा,—
भागवते। ८। १३। २८।
"भविता रुद्रसावर्णी राजन्! द्वादशमो मनुः।
ऋतधामा च देवेन्द्रो देवाश्च हरितादयः"॥
यदुवंशीयो नृपतिभेदः। यथा, भागवते।
"कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि"॥
अविनश्वरस्थानवति, त्रि। यथा यजुर्व्वेदे। १८। ३८।
"ऋतावाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयः"॥)

ऋतिः, स्त्री, (ऋ + करणे + क्तिन्।) कल्याणम्। वर्त्म। जुगुप्सा। स्पर्द्धा। इति मेदिनी॥ (भावे + क्तिन्।) गमनम्। अशुभम्। इति धरणी॥ (पुरुषमेधयज्ञीयदेवभेदः। यथा, यजुर्व्वेदे। ३०। १३। "ऋतये स्वेन हृदयम्"। ग्रन्थौ पुं, इति निरुक्तिः।)

ऋतीया, स्त्री, (ऋत + ईयङ् + टाप्।) दृष्ट्यर्थकः। जुगुप्सा। तत्पर्य्यायः। आर्त्तनम् २ क्रिणीया ३। इत्यमरः॥

ऋतुः, पुं, (ऋ + "अर्त्तेश्च तुः"। इति उणादिसूत्रेण १।७२। तुः चकारात् कित् च।) कालविशेषः। स तु षड्विधः यथा। मार्गपौषौ हिमः १ माघफाल्गुनौ शिशिरः २ चैत्रवैशाखौ वसन्तः ३ ज्यैष्ठाषाढ़ौ ग्रीष्मः ४ श्रावणभाद्रौ वर्षाः ५ आश्विनकार्त्तिकौ शरत् ६। इत्यमरः॥ स त्रिविधोऽपि। कार्त्तिकाग्रहायणपौषमाघाः शीतः १ फाल्गुनचैत्रवैशाखज्यैष्ठाः ग्रीष्मः २ आषाढ़श्रावणभाद्राश्विनाः वर्षाः ३। द्विविधोऽपि। कार्त्तिकादिषण्मासाः शीतः १ वैशाखादिषण्मासाः ग्रीष्मः २॥ इति स्मृतिः॥*॥
(यदुक्तम्।
"मासद्वयात्मकः कालः ऋतुः प्रोक्तो विचक्षणैः"।
यच्च तु "द्वादश मासाः पञ्चर्त्तवः" इति श्रुतं तच्च हेमन्तशिशिरयोरेकत्रीकरणं विवक्षितम्॥
"त्रयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि।
ऋतुषट्क तदाख्यातं रवेः राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्॥
धनुर्म्मकरौ च हेमन्तौ वसन्तः कुम्भमीनयोः"।
मेषवृषौ रविणा संक्रान्तौ। एवं मिथुनकर्कटावित्यादि। अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्भिमाः।
माघादिमासयुग्मेः स्युर्ऋतवः षट् क्रमादमी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः।
ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्त्तिताः॥
पृथक् पृथक् प्रवक्ष्यामि रवेर्गतिविशेषतः"।
इति प्रथमस्थाने चतुर्थेऽध्याये हारीतेनोक्तम्॥
"मासैर्द्विसङ्ख्यैर्माघाद्यैः क्रमात् षड्ऋतवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षा शरद्भिमाः"॥
इति सूत्रस्थाने द्वात्रिंशेऽध्याये वाभटेनोक्तम्॥
"इह खलु संवत्सरं षड्ऋतुविभागेन विद्यात्"।
इति सूत्रस्थाने षष्ठेऽध्यायः।
"तत्र खलु तावत् षोढ़ा प्रविभज्य कार्य्यमुपदेक्ष्यते।
हेमन्तो ग्रीष्मो वर्षाश्चेति त्रीतोष्मावर्षलक्षणाख्यः ऋतवो भवन्ति। तेषामन्तरेष्वितरे साधारणलक्षणाख्याः ऋतवः प्रावृट्शरद्वसन्ता इति। प्रावृडिति प्रथमः प्रवृष्टेः कालस्तस्यानुबन्धो वर्षाः। एवमेते संशोधनमधिकृत्य षड् विभज्यन्ते ऋतवः"।
इति च विमानस्थानेऽष्टमेऽध्याये चरकेणोक्तम्।
"तत्र माघादयो द्वादशमासा द्विमासिकमृतुं कृत्वा षड्ऋतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः। मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षाः। इषोर्जौ शरत्। सहःसहस्यौ हेमन्त इति॥ तत्र ते ग्रीतोष्मावर्षलक्षणाख्या-श्चादित्ययोः कालविभागकरत्वादयने द्वे भवतोदक्षिणमुत्तरञ्च"।
"इह तु वर्षा-शरद्धेमन्त-वसन्त-ग्रीष्म-प्रावृषः षड्ऋतवो भवन्ति दोषोपचय-प्रकोपोपशम-निमित्तम्। ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा। भाद्रपदाश्वयुजौ वर्षाः। कार्त्तिकमार्गशीर्षौ शरत्। पौषमाघौ हेमन्तः। फाल्गुन-चैत्रौ वसन्तः। वैशाख-ज्यैष्ठौ ग्रीष्मः। आषाढ़-श्रावणौ प्रावृडिति"। इति सूत्रस्थाने ६ अध्याये सुश्रुतेनोक्तम्॥)
स्त्रीकुसुमम्। इति विश्वमेदिन्यौ। तत्पर्य्यायः। रजः १ पुष्पम् २ आर्त्तवम् ३। इत्यमरः॥
यथाह मनुः। ३। ४५-४६।
"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा।
पर्व्ववर्ज्यं व्रजेचैनां तद्व्रतो रतिकाम्यया॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः।
चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या।

चतुर्दशी च शेषासु प्रशस्ता दशरात्रयः ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्मात् युग्मासु पत्न्यर्थी संविशेदार्त्तवे स्त्रियम् ॥
पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः" ॥
"रजः सप्तदिनं यावत् ऋतुश्च भिषजां वर"! ।
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवम् ॥"
"नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा ।
ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ॥
मासेनोपचितं काले धमनीभ्यान्तदार्त्तवम् ।
ईषत् स्रव्यं विगन्धञ्च वायुर्योनिमुखं नयेत् ॥
तदर्वाद्वादशात्काले वर्त्तमानमसृक् पुनः ।
जरायुजशरीराणां याति पश्चाच्चतुःस्रवम्" ॥
इति शारीरस्थाने तृतीयेऽध्याये सुश्रुतेनोक्तम् ॥
"द्वादशाद्वत्सरादूर्द्धं मायस्त्रावात् समाः स्त्रियः ।
मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् ॥
आर्त्तवस्रावदिवसात् ऋतुः षोड़शरात्रयः ।
गर्भयहणयोग्यस्तु स एव समयः स्मृतः" ॥
"सर्व्वासामेव चतुर्वर्णस्त्रीणां सर्व्वादिसम्मतः ।
पूर्व्वोक्तसमयः प्रायान्तरेषु विषयः । तद्यथा ।
स्नानदिवसादूर्द्धं द्वादशरात्रावधि ब्राह्मण्याः । दश-
रात्रावधि क्षत्रियायाः । अष्टरात्रावधि वैश्यायाः ।
सप्तरात्रावधि शूद्रायाः गर्भधारणे शक्तिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"पद्मं सङ्कुचमायाति दिनेऽतीते यथा तथा ।
ऋतावतीते योनिः सा शुक्रं नातः प्रतीच्छति ॥
मासेनोपचितं रक्तं धमनीभ्यास्तदा पुनः ।
ईषत्स्रव्यं विगन्धञ्च वायुर्योनिमुखन्नयेत्" ॥
"ऋतुस्तु द्वादशनिशाः पूर्व्वास्तिस्रश्च निन्दिताः" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
शिवः । यथा महाभारते १३ । महादेवसहस्र-
नामकथने १७ । १३९ ।
"ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः" ॥
विष्णुः । यथा, महाभारते १३ । विष्णुसहस्रनाम-
कथने १४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः" ॥)
दीप्तिः । इति मेदिनी । मासः । सुवीरः । इति विश्वः ॥
ऋतुप्राप्तः, त्रि, (ऋतुः प्राप्तोऽनेन ।) पक्षेयहिः ।
अपथ्यरजस्वादिः । इति शब्दचन्द्रिका ।
ऋतुमती, स्त्री, (ऋतुरस्या अस्तीति । ऋतु + मतुप्
+ ङीप् ।) ऋतुयुक्ता स्त्री । तत्पर्य्यायः । रज-
स्वला २ स्त्रीधर्म्मिणी ३ अवी ४ आर्त्तवी ५
मलिनी ६ पुष्पवती ७ उदक्या ८ । इत्यमरः ।
(यथा, महाभारते १ । ३ । ८७ । "उपाध्यायानी
ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या यथाय-
मृतुर्व्यर्थो न भवति तथा क्रियताम्" ॥
ऋतुमतीकृत्यमाह ।
"आर्त्तवस्रावदिवसात् यद्यत् सा ब्रह्मचारिणी ।
शयीत दर्भशय्यायां पश्येदपि पतिं न च ।
करे शरावे पर्णे वा हविष्यं यद्यदाचरेत् ।
अभुञ्जाता नखच्छेदमभ्यङ्गमनुलेपनम् ॥
नेत्रयोरञ्जनं स्नानं दिवास्वप्नं प्रधावनम् ।
अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥
आयासं भूमिखननं प्रवातञ्च विवर्जयेत् ।
ततश्चतुर्थे दिवसे स्नाता सह्यसनादिभिः ।
भूषिताः सुमनाः पश्येत् भर्त्तारं समलङ्कृतम् ॥
पूर्व्वं पश्येत् ऋतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं ततः पश्येत् पतिं प्रियम्" ।
एतदकरणे प्रत्यवायमाह ।
"अज्ञानात् वा प्रमोदाद्वा लौल्याद्वा दैवतश्च वा ।
सा चेत् कुर्य्यात् निषिद्धानि गर्भदोषांस्तदाप्नुयात् ।
एतस्या रोदनात् गर्भो भवेद्विकृतलोचनः ।
नखच्छेदेन कुनखी कुष्ठी त्वभ्यङ्गतो भवेत् ॥
अनुलेपात् तथा स्नानात् दुःखग्रीलोऽञ्जनादन्धक् ।
स्वापशीलो दिवास्वापात् चञ्चलः स्यात् प्रधावनात् ॥
अत्युच्चशब्दश्रवणात् बधीरः खलु जायते ।
तालुदन्तौष्ठजिह्वास्रावो हसनतो भवेत् ॥
प्रलापी भूरिकथनात् उन्मत्तस्तु परिश्रमात् ।
खलतिर्भूमिखननात् उन्मत्तो वातसेवनात्" ।
इति ।
"श्यामप्रसन्नवदनां क्षुरक्षौमिपयोधराम् ।
खलात्तिकुत्तिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
"गते पुराणे रजसि नवे चावस्थिते पुनः शुद्ध-
स्नातां स्त्रियमव्यापन्नयोनिक्षोणितगर्भाशयामृतु-
मतीमाचक्षते" ।
इति शारीरस्थाने चतुर्थेऽध्याये चरकेणोक्तम् ॥
"पीनप्रसन्नवदनां प्रस्निग्धात्मसुखद्विजाम् ।
नरकामां प्रियकथां खलकुक्ष्यक्षिमूर्द्धजाम् ॥
स्फुरदभ्रुकुचश्रोणिनाभ्यूरुजघनस्फिचम् ।
हृष्टोत्सुक्यपराञ्चापि विद्यादृतुमतीमिति" ॥
इति शारीरस्थाने तृतीयेऽध्याये,—
"ततः शुद्धस्नातां चतुर्थेऽहन्यहतवाससमलङ्कृतां
कृतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत् । तत्-
कस्य हेतोः ।
पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः ।
ततो विधानं पुत्रीयमुपाध्यायः समाचरेत् ।
कर्म्मान्ते च क्रमं क्षेमनारभेत विचक्षणः" ॥
"तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायु-
ष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स
प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागारे
वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्व्वा भवति ।
चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति । नच
प्रवर्त्तमाने रक्ते बीजं प्रविशं गुणकरं भवति यथा
नद्यां प्रतिस्रोतः स्रावि द्रव्यं प्रक्षिप्तं प्रतिनिव-
र्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नि-
यमवतीं चिरात्रं परिहरेत् । अतः परं मासा-
दुपेयात्" । इति च शारीरस्थाने द्वितीयेऽध्याये
सुश्रुतेनोक्तम् ।)
ऋतुराजः, पुं, (ऋतूनां राजा । "राजाहःसखिभ्य-
ष्टच्" । ५ । ४ । ९१ । इति टच् ।) वसन्तकालः ।
इति राजनिर्घण्टः ।

ऋतुवृत्तिः, पुं, (ऋतुषु वृत्तिर्वर्त्तनं यस्य ।) वत्सरः ।
इति त्रिकाण्डशेषः ॥
ऋतुसन्धिः, पुं, (ऋत्वोः सन्धिर्मेलनम् ।) ऋतुद्वयसन्धि-
कालः । स च ऋत्वोरन्त्यादिसप्ताहौ । तथाच
वाभटः ।
"ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः ।
तत्र पूर्व्वो विधिस्त्याज्यः सेवनीयः परो विधिः" ।
ऋतुस्नानं, क्ली, (ऋतौ स्नानम् ।) रजस्वलास्त्रियाः
चतुर्थाहकर्त्तव्यस्नानम् । इति स्मृतिः । तत्स्ना-
नानन्तरं भर्त्तृवदनं द्रष्टव्यं नान्यस्य भर्त्तृसन्निधाने
भर्त्तारं मनसि ध्यात्वा सूर्य्यं विलोकयेत् । इति
काशीखण्डम् ॥
("ततः पुण्येक्षणादेव कन्यायाध्यायिनी व्यहम् ।
मृज्जालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षौरेयं यावकं स्तोकं कोरुशोधनकर्षणम् ।
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ।
इच्छन्ती भर्त्तृसदृशं पुत्रं पश्येत् पुरः पतिम्" ।
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥)
ऋते, व्य, (ऋत + के ।) विना । वर्জ্জनम् । इत्यमरः ॥
("अवेहि मां प्रीतमृते तुरङ्गमात्" ।
इति रघुवंशे । ३ । ६३ । तथा, कुमारे २ । ५७ ।
"अंशादृते निक्षिप्तस्य नीललोहितरेतसः" ॥)
ऋत्विक्, [ज्] पुं, (ऋतौ यजतीति । ऋतु + यज् +
ऋत्विगादिना क्विन्तो निपातितः ।) पुरोहितः ।
यथा,—
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ।
यः करोति ऋतौ यस्य स तस्यर्त्विगिहोच्यते" ॥
इति मानवे २ । १४३ । तत्पर्य्यायः । याजकः २ ।
इत्यमरः । भरतः ३ कुरवः ४ वाग्यतः ५ इक्ष्व-
र्हिषः ६ यतश्रुचः ७ मरुतः ८ सबाधः ९ देव-
यवः १० । इत्यष्टाक्षत्विङ्नामानि । इति वैद्यनि-
घण्टौ ३ अध्यायः ॥
अयं हि नायकस्य धर्म्मसहायः । यदुक्तं साहि-
त्यदर्पणे । १ । ५१ । "ऋत्विक्पुरोधसः स्युर्ब्रह्म-
विदस्तापसास्तथा धर्म्मे" ॥)
ऋद्धं, क्ली, (ऋध् + क्त ।) सम्पन्नधान्यम् । इति मे-
दिनी ॥ परिपक्वमर्हितधान्यम् । इत्यमरटीकायां
भरतः ॥ वर्द्धितधान्यम् । इति सुभूतिः ॥ तत्प-
र्य्यायः । आवसितम् २ । इत्यमरः ॥ अवसितम् ३ ।
इति तट्टीका ॥ सिद्धान्तः । इति हेमचन्द्रः ॥
(पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनाम-
कीर्त्तने १३ । १४९ । ४३ ।
"ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः" ॥)
ऋद्धः, त्रि, (ऋध् + क्त ।) समृद्धः । सम्पन्नः । इति
मेदिनीकरहेमचन्द्रौ ॥ (यथा, गीतायाम् । २ । ८ ।
"अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम्" ॥)
ऋद्धिः, स्त्री, (ऋध् + क्तिन् ।) अष्टवर्गान्तर्गतौषध-
विशेषः तत्पर्य्यायः । योग्यम् २ सिद्धिः ३ वृद्धिः
४ । इत्यमरः ॥ प्राणप्रदा ५ वृष्या ६ । इति रत्न-
माला ॥ प्राणदा ७ जीवदात्री ८ सिद्धा ९ योग्या

ऋश्य

१० चेतनीया ११ रथाङ्गी १२ मङ्गल्या १३ लोककान्ता १४ जीवश्रेष्ठा १५ यशस्या १६। अस्याः गुणाः। मधुरत्वम्। सुस्निग्धत्वम्। अतितिक्तत्वम्। शीतलत्वम्। रुचिमेधाकारित्वम्। श्लेष्मकुष्ठकृमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्या रूपं यथा,—

"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले।
श्वेतलोमान्वितः कन्दो लताजालः सरन्ध्रकः॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्वदे।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः"।

औषधकरणे ऋद्धिवृद्धिस्थाने वाराहीकन्दः अथवा बला देया। इति परिभाषा॥*॥ समृद्धिः। इति मेदिनी॥ (यथा, कुमारे २। ५८॥

"परिच्छिन्नप्रभावर्द्धिं मया न च विशुना"।)

पार्व्वती। इति शब्दरत्नावली॥ (लक्ष्मीः॥)

ऋध, उ य न इर वृद्धौ। इति कविकल्पद्रुमः॥ (दिवां, स्वां-परं-सकं-सेट्।) य ऋद्ध्यति। उ अर्द्धित्वा ऋद्धा। न ऋध्नोति। इर आर्धत्। आर्धीत्। क्वचित्तृतौ चायम्। सोऽहं प्राग्भवतेव भूतजगतीमभ्यो मीति भवभूतिः॥ अन्तर्भूतण्यर्थत्वादिदं सिद्धमिति केचित्। इति दुर्गादासः॥

ऋष, ग्र दाने। श्लाघायाम्। हिंसायाम्। निन्दायाम्। यज्ञे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं, अकं च-सेट्।) ग्र ऋषति जनो ददाति श्लाघते हिनस्ति निन्दति युद्धते वेत्यर्थः। आगर्ध। हिंसायामप्ययमित्यन्ये। इति दुर्गादासः॥

ऋषुः, पुं, (ऋ स्वर्गे देवमातुरदितेर्व्वा भवति यः। ऋ+भू+डु।) देवता। इत्यमरः॥ (यथा, ऋग्वेदे। ६। २१। ६।

"ऋषुर्न रथ्यं नवं दधतो केतुमादिशे"॥

देवानामपि देवः। यथा, महाभारते वनपर्व्वणि।

"ऋभवो नाम तत्रान्ये देवानामपि देवताः।
तेषां लोकाः परतरे यान्यजन्तीह देवताः"॥)

चाक्षुषमन्वन्तरे देवगणभेदः। यथा,—

"आद्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः"।

इति हरिवंशे। ७। ३२॥)

ऋभुक्षाः, पुं, (ऋभवो देवाः क्षियन्ति वसन्ति यत्र। ऋभु+क्षि+ड।) स्वर्गः। वज्रम्। इन्द्रः। इति। राजमुकुटः॥ (देवमात्रे। यथा ऋग्वेदे। ४। ३७। १। "उप्रो राजा ऋध्वमृभुक्षाः"।

"ऋभुक्षाः ऋभवः"। इति भाष्यम्॥)

ऋभुक्षाः, [न्] पुं, (ऋभुक्षः स्वर्गः वज्रं वा अस्यास्तीति इनिः। "पथिमथ्यृभुक्षामात्"। ७।१।८५। "इतोत्सर्व्वनामस्थाने"। ७।१।९७। इत्यादिना सिद्धम्। यद्वा ऋच्छति इति अर्त्तेर्भुक्षिनक् प्रत्ययः।) इन्द्रः। इत्यमरः॥ (यथा, ऋग्वेदे। ७। ४७। ३। "इन्द्रो विश्वा ऋभुक्षा वाजो अर्य्यः"। इति॥)

ऋम्फ, प ग्र बधे। (सुचादि-तुदां-परं-सकं-सेट्।) इति रिम्फधातोष्टीकायां दुर्गादासः॥

ऋग्र, गतिस्तुत्योः। सौत्रधातुरयम्। (परं-सकं-सेट्।) ऋग्रः। इति दुर्गादासः॥

ऋष्यः, पुं स्त्री, (ऋग्र+क्यप्।) मृगविशेषः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ४। १०।

"ऋष्यो न तृष्यन्नवपानमागहि"॥)

ऋष, ई ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ऋस्वादिः। ई ऋष्टः। ग्र ऋषति। इति दुर्गादासः॥

ऋषभः, पुं, (ऋष्+"ऋषिवृषिभ्यां कित्"। इति उणादिसूत्रेण ३।१२३। अभच्। कित्च।) वृषः। (यथा, ऋग्वेदे ६। २८। ८। "उप ऋषभस्य रेतस्युपेन्द्र तव वीर्य्ये"॥) कर्कारम्भम्। कुम्भीरपुच्छः। उत्तरपदे श्रेष्ठः। इति मेदिनी॥

("सुरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः"॥

इत्यमरवाक्यात्। यथा पुरुषर्षभः पुरुषश्रेष्ठः इत्यर्थः। असमस्तोऽप्ययं श्रेष्ठार्थवाचकः। यथा, भागवते २। ४। २२॥

"खलक्षणा प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम्"॥

"ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः"। इति तट्टीका॥ गणविशेषः। आकृतिगणोऽयम्। यथा पाणिनिः तत्पुरुषसमासप्रकरणे २। १। ५६॥

"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"। व्याघ्रादिराकृतिगणः। "व्याघ्र-सिंह-ऋक्ष-ऋषभ-चन्दन-वृक-वृष-वराह-हस्तिन्-तरु-कुञ्जर-शर-पृषत्-पुण्डरीक-पलाश-कितवाः"। इत्येते व्याघ्रादयः॥) पर्व्वतविशेषः। इति धरणी॥ वराहपुच्छः। आदिजिनः। इति हेमचन्द्रः॥ भगवदवतारविशेषः। (यथा, भागवते ५।६।७। "तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन चंक्रममाणः"।) स तु सत्ययुगे अग्नीध्रसुतनाभिराजपुत्रत्वेन जातः। तस्य पुत्रः जडभरतः। इति श्रीभागवतं। (तथा, मार्कण्डेये ५३। ३८।

"अग्नीध्रसूनोर्नाभिस्तु ऋषभोऽभूत् सुतो द्विज!।
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताद्वरः"।

खारोचिषे मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ६७। ४।

"उर्जस्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा"॥

ऋषभसहस्रदक्षिण एकाहनिष्पाद्यो यागभेदः। यथाह गर्गः "पूर्व्व ऋषभसंघो राज्ञः"। खनामख्यातः यज्ञतुरपुत्रो नृपभेदः। यथा, शतपथब्राह्मणे १३। ५। ४। १५। "एकविंशस्तोमेन ऋषभो याज्ञतुर ईजे शिल्पानां राजा तदेतदृचाभ्याऽभिगीतम्"॥) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। वृषः १ ऋषभकः २ वीरः ३। इति रत्नमाला॥ गोपतिः ४ धीरः ५ विषाणी ६ दुर्द्धरः ७ ककुद्मान् ८ पुङ्गवः ९ वोढा १० प्रष्ठी ११ धूर्य्यः १२ भूपतिः १३ कामी १४ रूक्षप्रियः १५ उक्षा १६ लाङ्गूली १७ गौः १८ बन्धुरः १९ गोरक्षः २० वनवासी २१। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तविरेकनाशित्वम्। शुक्रश्लेष्मकारित्वम्। दाहक्षयज्वरहरत्वञ्च। इति राजनिर्घण्टः॥*॥

ऋषि

("जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ"॥

"ऋषभो वृषभट्टङ्कवत्"॥

"ऋषभो वृषभो धीरो विषाणी द्राक्षइत्यपि"॥

अनयोर्गुणा यथा॥

"जीवकर्षभकौ वल्यौ शीतौ शुक्रकफप्रदौ।
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सप्तस्वरान्तर्गतद्वितीयस्वरः। (अयं स्वरः चिच्छ्रुतिः। अस्यः तिस्रः श्रुतयो यथा, (१) दयावती, (२) रञ्जनी, (३) रतिका। तिसृभ्यः श्रुतिजातयो यथा, (१) करुणा, (२) मध्या, (३) मृदुः। अयञ्च ऋषिवंश्यीयः, क्षत्रियजातिः, पिङ्गलवर्णश्च। अस्योत्पत्तिः शाकद्वीपे। अस्य ऋषिः देवता च ब्रह्मा; छन्दो गायत्री। यथा सङ्गीतरत्नाकरे,—

"ऋषभस्त्रिश्रुतिस्तस्तः ... ...।
दयावती रञ्जनी च रतिका चर्षभे स्थिता॥
दीप्तायता मृदुर्मध्या षड्जे स्यात् ऋषभे पुनः।
संस्थिता करुणा मध्या मृदुः ... ...॥
पञ्चमः पितृवंश्यस्त्रि-धातृविकुलोद्भवौ।
ऋषौ तु क्षत्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ"॥

रि धौ ऋषभधैवतौ इत्यर्थः। इत्यादि।)

स तु गोस्वरतुल्यस्वरः। चातकस्वरतुल्यस्वर इति केचित्। नारदमते गावः ऋषभस्वरं वदन्ति यथा,—

"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्"।

इति नारदसंहितायाम्। दर्पणरत्नाकरादिमते तु चातकः ऋषभं वदति। यथा सङ्गीतदर्पणे,—

"स्वरमृषभं चातको ब्रूते"।) अस्योत्पत्तिः।

"नाभिमूलादयदा वर्ष्म उत्थितः कुरुते ध्वनिम्।
ऋषभस्येव निर्याति हेलया ऋषभः स्मृतः"॥

इति सङ्गीतदामोदरः॥

("नाभेः समुदितो वायुः कण्ठशीर्षसमाहतः।
ऋषभस्येव नादं यत् तस्मादृषभईरितः"॥

इति च सङ्गीतसमयसारे। अस्योत्पत्तिः ऋग्वेदात्। यथा रत्नावल्यां,—

"ऋग्वेदात् षड्ज-ऋषभौ यजुषो मध्यधैवतौ।
सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ"॥

इति॥)

ऋषभध्वज, पुं, (ऋषभः ध्वजचिह्नमस्य ध्वजेऽस्य वा।) शिवः। अर्हद्विशेषः। इति मेदिनी॥

ऋषभी, स्त्री, (ऋषभ+जातौ ङीष्।) नराकारस्त्री। सूकशिम्बी। शिराला। विधवा। इति मेदिनी॥ (सूकशिम्ब्यर्थे व्यवहारो यथा॥

"ऐन्द्रीषभ्यतिरेत्यादिषु"।

इति चरके सूत्रे चतुर्थेऽध्याये॥ अत्र हि ऋषभी सूकशिम्बी इत्यस्य शिवदासीयटीका॥*॥)

ऋषिः, पुं, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति। ऋष्+"इगुपधात् कित्" ४।११९। इति उणादिसूत्रेण इन्। कित्च।) ज्ञानसंसारयोः पारगन्ता। शास्त्रकृदाचार्य्यः। (यथा, ऋग्वेदे १। १। २। "अग्निः

पूर्व्वेभिर्ऋषिभिरीड्यो नूतनैरुत स देवा एह वक्षति"॥) रिभिर्हसादिषु। "विद्याविदग्धमतयो ऋषयः प्रसिद्धाः"। इति प्रयोगात्। इति भरतः॥ तत्पर्य्यायः। सत्यवचाः २ ग्रापान्त्रः ३। स तु सप्तविधः यथा। व्यासाद्या महर्षयः १ भेलाद्याः परमर्षयः २ कण्वादयो देवर्षयः ३ वशिष्ठाद्या ब्रह्मर्षयः ४ सुश्रुताद्याः श्रुतर्षयः ५ ऋतपर्णादयो राजर्षयः ६ जैमिन्याद्याः काण्डर्षयः। इति चिकाण्डशेषः॥ तथा च रत्नकोषे।

"सप्त ब्रह्मर्षि-देवर्षि-महर्षि-परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः॥"॥

मन्वन्तरभेदे सप्तर्षिनामानि यथा।

१ स्वायम्भुवमन्वन्तरे मरीचिः। अत्रिः। अङ्गिराः। पुलस्त्यः। पुलहः। क्रतुः। वशिष्ठः। (यथा हरिवंशे। ७। ८।

"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः"॥)

२। स्वारोचिषे उर्जस्तम्भादयः।
(यथा, मार्कण्डेये ९७। ४।

"उर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा।
निश्चरश्चार्वरीराश्च तत्र सप्तर्षयोऽभवन्"॥)

३। उत्तमे वशिष्ठसुताः प्रमदादयः।
(यथा, मार्कण्डेये ७३। १३।

"खतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयास्तान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्"॥)

४। तामसे ज्योतिर्धामादयः।
(यथा मार्कण्डेये ७४। ५९।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्"॥)

५। रैवते हिरण्यरोमा वेदश्रिरा ऊर्द्धबाहुरित्यादयः। (यथा मार्कण्डेये ७५। ७३-७४।

"हिरण्यरोमा वेदश्रीरूर्द्धबाहुस्तथापरः।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः"॥)

६। चाक्षुषे हर्य्यश्वसुदीरकादयः।
(मार्कण्डेयमतानुयायिन उचन्ते तत्रैव।७६।५४।

"सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्चयः"॥)

७। वैवस्वताख्यवर्त्तमानमन्वन्तरे कश्यपः। अत्रिः। वशिष्ठः। विश्वामित्रः। गौतमः। जमदग्निः। भरद्वाजः। (यथा मार्कण्डेये ७८। ९-१०।

"अत्रिश्चैव वशिष्ठश्च काश्यपश्च महातपाः।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः॥
तथैव पुत्रो भगवान्दीप्तीकस्य महात्मनः।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे"॥)

८। सावर्णिके गालवः। दीप्तिमान्। परशुरामः। अश्वत्थामा। कृपः। ऋष्यशृङ्गः। व्यासः। (यथा, मार्कण्डेये ८०। ४।

"रामो व्यासो गालवश्च दीप्तिमान् कृपएव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्"॥
रामः परशुरामः। द्रौणिरश्वत्थामा॥)

९। दक्षसावर्णिके द्युतिमदाद्याः।
(यथा मार्कण्डेये ९४।८।

"मेधातिथिर्व्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सवलस्तथान्यो हव्यवाहनः"॥)

१०। ब्रह्मसावर्णिके हविष्मत्सुकृतसत्यनाभयमूर्त्याद्याः। (यथा मार्कण्डेये ९४। १०, १३, १४।

"मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज!।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा।
आपो मूर्तिर्हविष्मांश्च सुकृती सत्यएव च।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः"॥)

११। धर्म्मसावर्णिके अरुणादयः।
(यथा मार्कण्डेये ९४। १९-२०।

"हविष्मांश्च वरिष्ठश्च ऋष्टिरत्यन्तधारणिः।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः"॥)

१२। रुद्रसावर्णिके तपोमूर्त्त्यादयः।
(यथा मार्कण्डेये ९४। २५।

"द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः।
तपोरतिस्तपोधन्यः सप्तमस्तु तपोधृतिः"॥)

१३। देवसावर्णिके निर्म्मोहतत्त्वदर्शाद्याः। (मार्कण्डेयपुराणमते अयं त्रयोदशमनुः रौच्याख्ययाभिहितः। यथा, तत्रैव ९४। २७-३०।

"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान्।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय॥
सधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुधर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम!॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यानघ सप्तर्षीन् गदतो मे निशामय॥
धृतिमान्व्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपास्यान्यो निष्प्रकम्पश्च सप्तमः"॥)

१४। इन्द्रसावर्णिके अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। (मार्कण्डेयपुराणमतेऽयं भौत्याख्ययाभिहितः। यथा तत्रैव ९९। १।

"ततः परन्तु भौत्यस्य समुत्पत्तिं निशामय।
देवान्सप्तर्षींस्तथा पुत्रांस्तथैव वसुधाधिपान्"॥
ततः परं त्रयोदशमन्वन्तरान्तरम्॥ अस्मिन् मन्वन्तरे सप्तर्षिनामान्याह तत्रैव १००। ३१।

"अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः"॥

पुराणान्तरे मतभेदात् मन्वन्तरसप्तर्षीणां नामभेदोऽपि दृश्यते। हरिवंशे ७ अध्याये तथा विष्णुपुराणे ३ अंशे अस्य विवरणादिकं द्रष्टव्यम्॥

॥*॥ ज्योतिःशास्त्रमते वशिष्ठपत्नारुन्धतीसहितवर्त्तमानमन्वन्तरीयसप्तर्षीणां मघानक्षत्रे स्थितिः तस्योदये तेषामुदयो भवति। काश्योखण्डमते ग्रनिलोकादूर्द्ध ध्रुवलोकात् अधः तेषां स्थितिः॥*॥ वेदः। किरणः। इति मेदिनी॥ भृग्वादिमहर्षिसन्तानः। यथा।

"भृगुर्भरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः॥

ईश्वराणां सुतास्तेषामृषयस्तान् निबोधत।
काव्यो बृहस्पतिश्चैव कश्यपश्चावनस्तथा।
उतथ्यो वामदेवश्च अगस्त्यश्चौशिजस्तथा"॥
औशिजस्थाने कौशिक इति वा पाठः।
"कर्दमो वालिखिल्याश्च विश्ववाः शक्तिवर्चसः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषिताङ्कताः"॥
इति। तस्य व्युत्पत्तिर्यथा।
"ऋषि हिंसागतौ धातुर्व्विद्यासत्यतपःश्रुतिः।
एष सन्निचयो यस्मात् ब्राह्मणश्च ततः स्मृतः॥
विवृत्तिसमकालन्तु बुद्ध्या व्यक्तिमधिस्वरम्।
ऋवन्ते परमां यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थाद्दृषतेर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता"॥
इति मत्स्यपुराणे १२० अध्यायः॥

ऋषिकः, पुं, (ऋषेः पुत्रः। ऋषि + कन्।) काव्यादिः। इति हेमचन्द्रः॥

ऋषीकः, पुं, (ऋषेः पुत्रः। ऋषि + कन्।) काव्यादिः। यथा।

"ऋषिपुत्रा ऋषीकास्तु मैथुनादूर्ध्वसम्भवात्।
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः॥
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्रकाः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषिताङ्कताः॥
तेषां पुत्रान्ऋषीकांस्तु गर्भोत्पन्नान्निबोधत।
वत्सरो नड्वलश्चैव भारद्वाजश्च वीर्य्यवान्।
ऋषिर्दीर्घतपाश्चैव बृहद्द्युम्नः शुरत्वतः॥
वाजिश्रवाः सुचित्तश्च श्यावोऽश्वश्च पराशरः।
भृङ्गी च कश्यपश्चैव राजा वैश्रवणस्तदा॥
इत्येते ऋषिकाः सर्व्वे सत्येन ऋषिताङ्कताः"।
इति मात्स्ये १२० अध्यायः॥

ऋषिकुल्या, स्त्री, (ऋषीणां कुल्या क्षत्रियाल्पा सरित् इव।) नदी। इति हेमचन्द्रः॥

("ऋषिकुल्यां समासाद्य नरः स्नात्वा विकल्मषः।
देवान् पितॄन् चार्चयित्वा ऋषिलोकं प्रपद्यते"॥
इति भट्टाभारते। तीर्थयात्रापर्व्वणि ३। ८४। ४६॥

ऋषिकुलाय हितम्। ऋषिकुल + यत्। ऋषिकुलहिते, त्रि। यथा, भागवते ३। १६। १३।

"अथ तस्योपवर्त्तां देवीमृषिकुल्यां सरस्वतीम्।
गोसवाय मनुदृष्टानां तेषामात्मापदृप्यत"॥)

ऋषिजाङ्गलिकी, स्त्री, (ऋषिप्रिया जाङ्गलिकी।) ऋक्षगन्धाख्यः। इति रत्नमाला॥ ऋषिजाङ्गलइति ख्यातः। (रुद्रदारकशब्देऽस्या विशेषो ज्ञेयः॥)

ऋषिप्रोक्ता, स्त्री, (ऋषिणा प्रोक्ता औषधार्थम्।) माषपर्णीवृक्षः। इति रत्नमाला॥ (माषपर्णीशब्देऽस्या गुणादिकं ज्ञेयम्॥)

ऋष्टिः, स्त्री, (ऋष् हिंसायां + क्तिन्।) खड्गः। इत्यमरः॥ (यथा, ऋग्वेदे। ५। ५७। २।

"वाग्मीमन्त ऋष्टिमन्तो मनीषिणः।
सुधन्वान इषुमन्तो निषङ्गिणः"॥

आयुधमात्रम्। यथा ऋग्वेदे १। १६६। ४।

"भयन्ते विश्वाभुवनानि हर्म्मया।
चित्रो वो यामः प्रयताखृष्टिषु"॥

"ऋष्टिषु युद्धस्येतिषु"। इति भाष्यम्।
तथा तत्रैव। ५। ५२। ६।

"या रक्षैरायसा नरः ऋष्वा ऋष्टीरहन्नत"।

"ऋष्टीरायुधविशेषान्"। इति भाष्यम्।
तथा मनुः ३। १३३।
"यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्टयोगुडान्"॥
"ज्वलितशूलर्ष्टाख्यायुधलोहपिण्डान्"। इति तट्टीका। दीप्तिः। यथा, ऋग्वेदे ३। ५४। १३।
"विद्युद्रथा मरुत ऋष्टिमन्तो
दिवो मर्या ऋतजाता अयासः"।
"ऋष्टिमन्तो दीप्तिमन्तः"। इति भाष्यम्॥ गमनागमनशीलः। यथा, ऋग्वेदे १। ६४। ४॥ "अंसेष्वेषां निमिमिक्षुर्ऋष्टयः साकं यक्षिरे स्वधया दिवो नरः"। "ऋष्टयः गमनागमनशीलाः"। इति दयानन्दभाष्यम्॥ पुं, धर्म्मसावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये। ९४। १९।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः"॥)

ऋष्यः, पुं स्त्री, (ऋष्+यत्। निपातनात् सिद्धम्।) मृगविशेषः। इत्यमरः॥ (यथा महाभारते ऋष्यशृङ्गोपाख्याने। ३। ११०। २७।
"ऋष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः"।
ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः।
"ऋष्यो नीलाङ्गको लोके सरोह्य इति कीर्त्तितः"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)
स्वनामख्यातः कुरुवंशीयो देवातिथिपुत्रः। यथा, भागवते। ९। २२। ११।
"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च।
ऋष्यस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः"॥

ऋष्यकेतुः, पुं, (ऋष्यः केतौ यस्य।) अनिरुद्धः। इति त्रिकाण्डशेषः॥ अस्य रूपान्तराणि। ऋक्षकेतुः। ऋष्यकेतनः। रिष्यकेतुः। विश्वकेतुः॥

ऋष्यगता, स्त्री, (ऋष्येण ऋषिसमूहेन गता ज्ञाता।) ऋष्यप्रोक्तालक्ष्मः। इति शब्दरत्नावली॥

ऋष्यगन्धा, स्त्री, (ऋष्यस्य मृगविशेषस्य गन्ध इव गन्धो यस्याः।) वृक्षविशेषः। ऋषिशाकुल इति ख्यातः। तत्पर्य्यायः। ऋक्षगन्धा २ ऋषिशाकुलिकी ३। इति रत्नमाला॥
("महासहा-ऋष्टि-ऋष्यगन्धाश्वगन्धेत्यादिषु"॥ इति चरके विमानस्थाने अष्टमेऽध्याये॥)

ऋष्यप्रोक्ता, स्त्री, (ऋष्येण ऋषिसमूहेन प्रोक्ता।) घृतभूली। स्रुक्चिम्बी। अतिबला। इति मेदिनी॥ (अस्याः पर्य्यायो यथा॥
"अतिबला महाशृतावरी कपिकच्छुश्च"।
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥
व्यवहारो यथा॥
"ऐन्द्र्यभ्यतिरसर्ष्यप्रोक्तापयस्येत्यादिषु"।
इति चरके सूत्रस्थाने चतुर्थेऽध्याये। अत्र तु ऋष्यप्रोक्ता माषपर्णी इति शिवदासीयटीका॥)
"कुक्कुटी सर्पगन्धा च तथा काणविषाणिके।
ऋष्यप्रोक्ता वयस्था च शृङ्गी मोहनवल्लिका"॥
इति उत्तरतन्त्रे बलितमेऽध्याये सुश्रुतेनोक्तम्॥)

ऋष्यमूकः, पुं, (ऋष्यो मृगो मूको यत्र।) पर्ब्बतविशेषः। इति जटाधरः। स तु दक्षिणदेशे पम्पासरोवरकूले स्थितः। यत्र वालिभयात् सुग्रीवादयः यच्च वानराः स्थिताः॥ इति रामायणम्॥
("तार्ष्यमूकस्य समीपचारी
चरन् ददर्शादसुतदर्शनोयौ"।
इति रामायणे। ४। १। १२८॥)

ऋष्यशृङ्गः, पुं, (ऋष्यस्य मृगस्य शृङ्गमिव शृङ्गमस्य।) मुनिविशेषः। स तु विभाण्डकसुतः। तस्य भार्य्या लोमपादराजकन्या शान्ता। इति रामायणम्॥ ("मान्यो मुनिः सां पुरमृष्यशृङ्गः"। इति भट्टिः। १। १०॥ अस्य जन्मनः प्रभृति विवरणमुच्यते।

आसीत्पुरा महातेजास्तपस्विसत्तमः काश्यपो विभाण्डको नाम ऋषिः। स च महाह्रदं समासाद्य दीर्घकालं तपसि स्थितः। एकदाप्सरसमुर्ब्वशीं दृष्ट्वा चलितचित्तस्यास्य रेतः अम्भु प्रचस्कन्द। ततः काचित् मृगी ह्लादिता तोयेन सह तत्पीत्वा गर्भिणी अभवत्। इयं हि मृगी पुरा काचित् देवकन्यासीत् शापवशात् मृगरूपधारिणी वने विचरन्ती स्थिता। अथामोघत्वात् ब्रह्मरेतसस्तस्यां मृग्यामेकः पुत्रः समभवत्। मृगीगर्भजातत्वादस्य शिरसि शृङ्गमजायत तेनास्य ऋष्यशृङ्ग इति नाम समभवत्। अनेन हि पितुरन्यः कोऽपि मानुषो न दृष्टपूर्ब्बस्तस्मादनन्यविषयं अस्य मनः सदा ब्रह्मचर्य्ये एवाभवत्। एतस्मिन्नेव काले दशरथस्य बन्धुर्लोमपाद इति ख्यातोऽङ्गानामीश्वरः समभवत्। तेन कामात् ब्राह्मणस्य मिथ्याकृतम्। अस्मात् सर्व्वे ब्राह्मणास्तं परित्यजुः। प्रणश्यच्चास्य राज्ये न ववर्ष शतक्रतुः। अतः क्लिष्टचित्तः स राजा ब्राह्मणान् सन्तोषयित्वा कश्चिदुपायं पर्य्यपृच्छत्। तेन एतास्ते ब्राह्मणा यज्ञार्थं ऋष्यशृङ्गमानेतुं उपदिदिशुः। अथ स राजा दुष्करत्वादस्य कार्य्यस्य ऋष्यशृङ्गमानेतुं शापाद्यभीतामिर्वाराङ्गनाभिर्यत्नमकरोत्। अथ रूपयौवनसम्पन्नाः काश्चित् वाराङ्गना बहूनि उपायनद्रव्याणि गृहीत्वा जलपथेन तं तपोधनम् लोभयित्वानेतुं प्रतस्थिरे। अथ ताः काश्यपस्याश्रमं समासाद्य आजग्मुस्ताश्रमां नावमदूरे निबध्य तत्रोत्तस्थुः। अथ कदाचित् तासां काचित् कुशला ऋषेः सुतं तं दृष्ट्वा वाग्भिर्मोहयित्वा विचित्राणि माल्यानि वासांसि च दत्त्वा पेयानि च पाययित्वा तेन सह चिक्रीड प्रजहास च। एतादृशेन विविधोपायेन तं प्रापयित्वा कामवशतां अग्निहोत्रस्योपदेशं ज्ञात्वा च स्वस्थानमाजगाम। गतायाञ्च तस्यां मदेन मत्तो विचेतनस्वाभवदृष्यशृङ्गः। अथ विभाण्डकस्तपसः प्रतिनिवृत्य स्वसुतं तथाविधं दृष्ट्वा प्रबोधयामास। प्रबोध्य तपस्यार्थं प्रस्थिते च तस्मिन् पुनः सा ऋषिरूपधारिणी वेश्या तं विभाण्डकसुतं प्रबोध्य नाथाश्रममानीय धृततरं लोमपादराज्यमायता। अथ स राजा तं प्राप्य विभाण्डकसुतं प्रहृष्टमना अन्तःपुरं निवेशयामास। प्रविष्टे च तस्मिन् तपोधने समस्तराज्यं प्रहृष्टं जलेनापूर्य्यमाणमभवत्। एवं स लोमपादः परिपूर्णकामः तपोधनाय गण्यात् विभाण्डकात् शापमुक्तिमिच्छन् स्वमित्रस्य दशरथस्य सुतां शान्तां ऋष्यशृङ्गाय प्रददौ। अथ विभाण्डको मुनिः तपसः प्रतिनिवृत्तः सुतमनवलोक्य ध्यानधिया सर्व्वमवगम्य क्रुधा ज्वलन्निव लोमपादराज्यं आजगाम। आगते च तस्मिन् विभीतैः सर्व्वैः ऋष्यशृङ्गस्य राज्यमिदमिति आचख्ये। पूजितश्च तेन राजर्षिणा दिवि इन्द्रमिव पुत्रं ऋचीमिव शान्तां सुषावावलोक्य ग्रामांश्च घोषांश्च सुतस्य दत्त्वागम्य शान्तकोपः स्वाश्रमं प्रति प्रययौ। अथ स ऋष्यशृङ्गः शान्तया सह तस्मिन् राज्ये सुखमतिचिरमवसत्॥

अथ गच्छति काले सूर्य्यवंशावतंसो राजा दशरथः अनपत्यतया क्लिश्यमानहृदयो निजगुरुं वशिष्ठदेवं पुत्रलाभोपायं प्रपच्छ। एवमुक्तस्तेन ऋषिप्रवरो वशिष्ठः लोमपादराज्यात् ऋष्यशृङ्गं तपोधनं समानीय पुत्रेष्टिं कर्त्तुं समादिशत्। अथासौ राजा एवमभिहितः स्वजामातरमसुं ऋष्यशृङ्गमानेतुं यत्नमकरोत्। तत आगतेन तेन क्रियमाणे यज्ञे दैवस्वर्ब्बक्रिमध्यादुदतिष्ठत्। एतच्चरुभक्षणात् नारायणावतारस्वरूपा रामादयश्चत्वारो दशरथस्य तनया जाताः। अयं विभाण्डकसुतस्तु महाप्रतापवान् यज्ञनिरुद्धेति प्रसिद्धः। एतत्कथा च महाभारते। ३। ११० अध्यायन्तथा रामायणे। १। ९ अध्यायञ्चारभ्य द्रष्टव्या॥ *॥ सावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ८०। ४।
"रामो व्यासो गालवश्च दीप्तिमान् कृपश्च च।
ऋष्यशृङ्गस्तथा द्रोणिश्च सप्तर्षयोऽभवन्"॥)

ऋ

ऋ दीर्घऋकारः। स तु अष्टमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (यथा, सिद्धान्तकौमुद्यां "ऋटुरषाणां मूर्द्धा"। पाणिनीयशिक्षायामपि। "स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः"।) स प्लुतश्च भवति॥ इति व्याकरणम्॥
(स च उदात्तानुदात्तस्वरितभेदात् त्रिधापि पुनः प्रत्येकमनुनासिकाननुनासिकभेदेन द्विधेति षड्विधः।)
ऋकारं परमेशानि स्वयं परमकुण्डलम्।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
चतुर्ज्ञानमयं वर्णं पञ्चप्राणयुतं सदा।
त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये"।
इति कामधेनुतन्त्रम्॥
(वर्णीयभाष्यायाम्।) तस्य लेखनप्रकारो यथा,—
"तद्वयाधोमता दत्ता वामतः कुत्सिता तथः।
पुनर्ह्रस्वगता रेखा तासु ब्रह्मेशविष्णवः॥
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रवक्ष्यते"।
इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा।
"ऋः क्रोधोऽतिथिप्रो वाणी वामनो गोऽथ श्रीर्धृतिः।
ऊर्द्धमुखी निशानाथः पद्ममाला विनश्वधीः॥
अग्निनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता।

ल्ट

एकदन्ताङ्कयो माता हरिता मिथुनोदया ॥
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी ।
ब्रह्मण्यमिव कीलाले पावको गन्धकर्षिणी" ॥
इति तन्त्रशास्त्रम् ॥ वामनासिका । इति बीजवर्णाभिधानम् ॥ (माटकन्यासेऽस्य वामनासिकया न्यस्यतया तथात्वम् । यदुक्तं माटकान्यासमन्त्रे । "क्षं नमो दक्षिणघ्राणे क्षं नमो वामघ्राणे" । इति । अनुबन्धविशेषस्तेन षडङ्गस्रो वा स्यात् । यदुक्तं कविकल्पद्रुमे । "षडङ्गस्रोऽथ ऋवर्णा ल्रऽल्वानिर्वाथ ऽः सिचि" ॥ (एतेन कण्ड आर्त्तस्वरे लुडि क्ते अचीकणत् अचकणत् इति स्यात् ॥)

क्ष गि गत्यां । इति क्रविकल्पद्रुमः । (घादि-क्र्यादिः परं-सकं-सेट् ।) गि क्षणाति । ईर्ष्णः ईर्ष्णिः । इति दुर्गादासः ॥

क्ष, य, (क्ष + क्विप् ।) वाक्यारम्भः । रत्ना । इति मेदिनी ॥ निन्दा । भयम् । इति शब्दरत्नावली ॥

क्ष, स्त्री, (क्षयतीति । क्ष + क्विप् ।) वज्रः । इति मेदिनी ॥

क्षः, स्त्री, देवमाता । दानवमाता । (क्ष + भावे क्विप् ।) स्मृतिः । गतिः । इति मेदिनी ॥

क्षः, पुं, (क्षयति प्राप्नोति विश्वमिति । क्ष + क्विप् ।) भैरवः । (यथा, "क्षनन्दादि ! प्रमथेशसङ्गेः ! ।" इत्युद्भटः ॥) दनुजः । इति मेदिनी ॥

ल्ट

ल्ट ल्टकारः । स तु नवमस्वरवर्णः । अस्योच्चारणस्थानं दन्तः । (यदुक्तम् सिद्धान्तकौमुद्याम् "ल्तुलसानान्दन्ताः" । शिक्षायामपि यथा,—
"सूर्मूर्द्धन्या ऋटुरसा दन्त्या ल्तुलसाः स्मृताः" ।)
स ह्रस्वो दीर्घः प्लुतश्च भवति । इति व्याकरणम् ॥ (अयन्तु उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदेन द्विधेति षड्विधएव ॥)
"ल्टकारं चन्द्रलाषाङ्कि कुण्डली परदेवता ।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये ॥
पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा ।
पञ्चप्राणप्लुतं वर्णं तथा शुक्लत्रयात्मकम् ॥
विन्दुत्रयात्मकं वर्णं पीतविद्युल्लता तथा" ।
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"रेखाधःकुण्डली वक्रा दक्षतो वामतो गता ।
वङ्कीवत्रयवत्लास्य नित्यं सन्ति च नित्यशः" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा,—
"ल्टः स्थाणुः श्रीधरः शुद्धो मेधा धूम्रावको वियत् ।
देवयोनिर्दृढव्रतो महेशः कौलवल्लभौ ॥
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो वाक्प्रकृतिः परा ।
चन्द्रिका पार्षिदो धूम्रा द्विदन्तः कामवर्द्धनः ।
शुचिस्मिता च नवमी कान्तिरायातकेश्वरः ।
चित्राकर्षिणी काश्यश्च तृतीयकुलसुन्दरी" ।
इति तन्त्रशास्त्रम् । (माटकान्यासे दक्षिणगण्डे न्यस्यतया दक्षिणगण्डेनाप्यभिधानम् । यथा माटकान्यासमन्त्रे । "ल्तं नमो दक्षिणगण्डे ल्तं नमो वामगण्डे" । अनुबन्धविशेषः । एतेन लुडि अड् स्यात् । यदुक्तम् कविकल्पद्रुमे ।
"षडङ्कस्रोऽथ ऋवर्णा ल्रऽल्वानिर्वाथ ऽः सिचि" ।
एतेन गम् ल्ट औ गतौ इत्यस्य लुडि अगमदिति स्यात् ॥)

ल्ट, य, देवमाता । इति मेदिनी एकाक्षरकोषश्च ॥ भूमिः । कुभ्रः । पर्व्वतः । इति मेदिनी ॥

ल्ठ

ल्ठ दीर्घ ल्ठकारः । स तु दशमस्वरवर्णः । अस्योच्चारणस्थानं दन्तः । (यथा मुग्धबोधे । "ल्टचयं तयदधनलसाः वो दन्त्याः" ।) स प्लुतश्च भवति । इति व्याकरणम् ॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकानुनासिकभेदात् षड्विधएव ।)
"ल्ठकारं परमेशानि पूर्णचन्द्रसमप्रभम् ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा ॥
गुणत्रयात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"तत्क्रोड़तुल्यरूपा च रेखा सा वैष्णवी स्मृता ।
तासु वन्द्याः सुरेशानि दुर्गा वाणी सरस्वती" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ तन्नामानि यथा,—
"ल्ठकारः कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्व्वामगण्डो रुद्रः कामोदरी सुरा ॥
शान्तिकृत् स्तम्भिका शुक्लो मायावी लोलुपो वियत् ।
कुक्षिमी तुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वधा कालो नित्या शुद्धः शुचिः क्षती ।
सूर्य्या धैर्य्यात्मिकर्षिणी च एकाकी दनुजप्रसूः" ॥
इति तन्त्रशास्त्रम् ॥ (माटकान्यासे वामगण्डे न्यस्यतया तन्नाम्नाप्यभिधानम् । माटकान्यासमन्त्रो यथा ॥ "ल्ठं नमो दक्षिणगण्डे ल्ठं नमो वामगण्डे" ॥ मुग्धबोधमते तन्मते च ल्टकारस्य दीर्घत्वमस्ति पाणिनिमते तु नास्ति । अत्रेदं ज्ञातव्यं ल्टकारस्य दीर्घत्वाभावेऽपि "ल्टि ल्वा" इति वार्त्तिकोक्तेः ल्टकार एव तत्र विधेयः । तेन होत्ल्टकार इत्यादौ ल्टकारस्य व्यवहारः । मुग्धबोधेऽपि एतदनुसारेण एकमात्रद्विमात्रत्रिमात्रापेक्षा "ल्टचयम्" इत्युक्तेन न विरोधः ॥)

ल्ठ, य, देवनारी । गार्य्यात्मा । माता । इति मेदिनी ॥

ल्ठः, स्त्री, दैत्यस्त्री । इत्येकाक्षरकोषः । दनुजमाता । कामधेनुमाता । इति कश्चिदेकाक्षरकोषः ॥

ल्ठः, पुं, सर्व्वः । महादेवः । इति कश्चिदेकाक्षरकोषः ॥

ए

ए एकारः । स तु एकादशस्वरवर्णः । अस्योच्चारणस्थानं तालुकण्ठश्च । (यदुक्तं सिद्धान्तकौमुद्याम् "एदैतोः कण्ठतालु" । तथाच शिक्षायाम् । "ए ऐ तु कण्ठतालव्यावो औ कण्ठोष्ठजौ स्मृतौ" ॥) स दीर्घः प्लुतश्च भवति । इति व्याकरणम् ॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदात् षड्विधएव ॥)
"एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम् ।
रक्षिणीकुसुमप्रख्यं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली" ॥
इति कामधेनुतन्त्रं ॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा ।
"कुञ्चिता वामतो रेखा दक्षकोणायता त्वधः ।
पुनर्व्वामगता सैव तासु वङ्कीशवायवः" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"एकारो वास्तवः शक्तिर्भिरुटी सोष्ठो भगं मरुत् ।
सूक्ष्मा भूतोऽर्द्धकेशी च व्योत्खा श्रद्धा प्रमर्द्दनः ।
भयं ज्ञानं क्षमा धीरा जङ्घा सर्व्वसमुद्भवः ।
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसुः ।
योधिदाधारशक्तिश्च त्रिकोणा दृग्दशंशकः ।
सन्धिरेकादशी भद्रा पद्मनाभः कुलाचलः" ॥
इति तन्त्रशास्त्रम् ॥ * ॥ अन्यच्च ।
"एकारो वामगण्डान्तः शक्तिर्भिरुटी भगन्तथा ।
मात्तवीजञ्च विजया ओष्ठ एकादशस्वरः" ॥
इति बीजवर्णाभिधानम् ॥ (माटकान्यासेऽस्य ओष्ठस्थाने न्यस्यतया ओष्ठशब्देनाप्यभिधानम् । माटकान्यासमन्त्रो यथा,—
"एं नम ओष्ठे ऐं नमोऽधरे" ॥ इति । अनुबन्धविशेषः । तेन लुडि सिचि अडिः स्यात् । यथाह कविकल्पद्रुमे ॥
"ल्रऽल्वानिर्वाथ ऽः सिचि ।
अडिः स्येयजादिः स्यात्" ॥
एतेन कटे वर्षावर्णयोरित्यस्य लुडि अकटीदिति स्यात् ॥)

ए, य, स्मृतिः । असूया । अनुकम्पा । आमन्त्रणम् । आह्वानम् । इति मेदिनी ॥

एः, पुं, (एति प्राप्नोति सर्व्वं विश्वमिति । इण् + अच् ।) "सर्व्वं विष्णुमयं जगत्" इति वाक्यादस्य तथात्वम् ॥) विष्णुः । इत्येकाक्षरकोषः ॥

एकं चि, (एतीति । इण् गतौ । "इणजीकापाशल्यतिमर्चिभ्यः कन्" ॥ ३ । ४३ । इत्युणादिसूत्रेण कन् ।) मुख्यम् । अन्यत् । केवलम् । इत्यमरः ॥ ("त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः" । इति मनौ १ । ३ । "अजामेकां लोहितशुक्लकृष्णाम्" । इति श्रुतिः ॥ "एकातपत्रं जगतः प्रभुत्वम्" । इति रघुवंशे २ । ४७ । "समाधि भावैकरसं मनः स्थिरम्" इति कुमारे ५ । ८२ ॥) आदिसंख्या । इति मेदिनी । अथैकवाचकानि । परमात्मा १ विधुः २ क्षितिः ३ गवेन्द्रदन्तः ४ शुक्रचक्षुः ५ । इति कविकल्पलता ॥ अग्निः ६ सूर्य्यः ७ देवराजः ८ यमः ९ । इति महाभारते वनपर्व्व ॥ (सर्व्वनामशब्दोऽयम् । तथा च सिद्धान्तकौमुद्यां "सर्व्वादयश्च षट्त्रिंशत्" इत्युक्ता "यद्-तद्-एद् एतद्-इदम्-अदस्

एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्" इत्युक्तवान्। यथा शाकुन्तले २ अङ्के। "विश्रान्तेन भवता ममाप्येकस्मिन् कर्म्मणि सहायेन भवितव्यम्"। पुं, स्वनामख्यात ऐलवंशीयो नृपतिभेदः। यथा, भागवते ९।१५।२।

'श्रुतायोर्वसमान् पुत्रः सत्यायोश्च श्रुतं जयः। रयस्य सुतरयस्य जयस्य तनयोऽमितः'॥

परमेश्वरः। विष्णुः। यथा विष्णुसंहितायाम्। "एको नैकः सवः कः किम्"। "परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यादेकः"। इति भाष्यम्। घटे घटान्तरात् भेदः सजातीयभेदः। घटे पटात् भेदः विजातीयभेदः। घटे कपालादेर्भेदः स्वगतभेदः॥)

एककः त्रि, ("एकादाकिनिचासहाये"। ५।३। ५२। इत्यत्र चकारात् पक्षे कन्।) असहायः। एकला इति भाषा। तत्पर्य्यायः। एकः २ एकाकी ३। इत्यमरः॥

("महानप्येकको वृक्षः सर्व्वतः सुप्रतिष्ठितः। प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः"॥ इति पञ्चतन्त्रे ३।५२।॥ तथा नैषधे। २। ३६।

"विधिरेककचक्रचारिणम्
किमु निर्म्मिमीत सान्मथं रथम्"॥)

एककुण्डलः पुं, (एकं कुण्डलं यस्य।) बलरामः। कुबेरः। इति मेदिनी॥

एकगुरुः, पुं, (एको गुरुर्यस्य।) सतीर्थः। इत्यमरः॥ एकगुरुर् शिष्य इति भाषा॥

एकचक्रं, क्लो, (एकं चक्रं यस्य।) पुरीविशेषः। तत्पर्य्यायः। हरिण्यक्षम्२ शुम्भपुरी३। इति त्रिकाण्डशेषः॥ सूर्य्यरथः। त्रि, असहायचारी। यथा, ऋग्वेदे १।१६४।२।

"सप्त युञ्जन्ति रथमेकचक्र-
मेकोऽश्वो वहति सप्तनामा।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थुः"॥

अत्र भाष्यकृता यद्याख्यातन्तदाह।

"एकचक्रमेकरथाङ्गोपेतम्। यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं भर्य्यस्य सम्बन्धिनं सप्तैतत्संज्ञका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्यहोरात्रनिर्वाहाय। किं वस्तुतः सप्त नेत्याह। एकोऽश्वः सप्तनामा। एक एव सप्ताभिधानः सप्तधा गमनप्रकारो वा एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः। वाह्यधीनत्वादन्तरीक्षसञ्चारस्य एकचक्रमित्युक्तम्। कीदृशन्तदित्यत आह। त्रिनाभि बलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम्। अजरममरणधर्म्मकम्। अनर्व्वमश्रिथिलं पुनस्तदेव विशेष्यते। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति। यद्वा एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्य्या असाधारणाः परस्परविलक्षणाः षड्ऋतवः एकः साधारण इत्येवंरूपा यद्वा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थः। स चैकोऽसहायोऽश्वो ल्यापनशील आदित्यः सप्तनामा सप्तरसानां सप्तमयितारो रश्मयो यस्य तादृशः। सप्तर्षिभिः स्तूयमानो वादित्यो वहति धारयति भ्रमतीत्यर्थः। किं भूतम्। त्रिनाभि चक्रम्। त्रयो नाभिस्थानीयाः सन्ध्यासम्बद्धा वा एव ऋतवो यस्य तत्तादृशम्। के ते ग्रीष्मवर्षाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालास्त्रिनाभयः। तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणम्। न हि कदाचिदपि कालो म्रियते अनादिनिधनः कालः इति स्मृतेः। अनर्व्वमप्रतिहतम्। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादर्वाचीनानां तच्चैवान्तर्भावात् युगादीनां तदाकृत्तिसाध्यात् संवत्सरस्य चक्रत्वेन रूपणम्। पुनः कीदृशं तत्। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्व्वस्याः स्थितेः। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षोत्तरप्रशंसा च"॥ नृपतिद्वयविशिष्टम्। एकराजविशिष्टम्। यथा, भागवते।३।१।२०।

"इत्थं व्रजन् भारतमेव वर्षं
कालेन यावत् गतवान् प्रभासम्।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः"॥

पुं, असुरभेदः। यथा, हरिवंशे ३।८४।

"एकचक्रो महाबाहुस्तारकस्य महाबलः"।

अयं हि प्रतिविन्ध्य इति नाम्ना प्रसिद्धः। यथा। महाभारते १। सम्भवपर्व्वणि वैवाहिकपर्व्वणि ६७।२२।

"एकचक्र इति ख्यात आसीद्यस्तु महासुरः। प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ"॥

स्त्री, स्वनामख्याता पुरी। अत्रस्थो भीमसेनो महाबलं बकनामानमसुरं हतवान्॥ यथा,— महाभारते। १। वैवाहिकपर्व्वणि भारतसूत्रे। ६१।२६-२८।

"ते तत्र नियता कालम् कञ्चिदूषुर्नरर्षभाः। माद्र्या सहैकचक्रायां ब्राह्मणस्य निवेशने॥ तत्राससाद क्षुधितं पुरुषादं बकोदरः। भीमसेनो महाबाहुर्व्वृकं नाम महाबलम्॥ तञ्चापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डवः। निहत्य तरसा वीरो नागरान् पर्य्यसान्त्वयत्"॥)

एकचरः, पुं, (एकश्चरति यः। चर + पचाद्यच्।) हिंसपशुविशेषः। गण्डार इति भाषा। तत्पर्य्यायः। वार्द्धीनसः २ गण्डोत्साहः ३ गण्डकः ४। इति त्रिकाण्डशेषः॥

(सर्पादिः। यथा, मनुः। ५।१७।

"न भक्षयेदेकचरान् द्विजातींश्च मृगद्विजान्"।

"ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्"। इति तट्टीकायां कुल्लूकभट्टः॥ (त्रि, एकाकिचारी। यूथभ्रष्टः। यथा, "अयमेकचरोऽभिवर्त्तते माम्"। इति किराते। १३।३। "एकचरो यूथादपेतः"। इति तट्टीका॥)

एकचारी, [न्] पुं, (एकः सन् चरतीति। चर् + णिनि।) बुद्धसहचारी। इति त्रिकाण्डशेषः॥ (एकचारिणि, त्रि॥)

एकजटा, स्त्री, (एका जटा यस्याः।

"एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका'। इति श्रवणात्। यद्वा एका मुख्या जटा यस्याः। "खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्"। इति च श्रवणात्तथात्वम्।) उग्रतारा। तस्या आविर्भावो यथा,—

"सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम्। गङ्गावतारनिकटे महामायां प्रतुष्टुवुः॥ अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः। मातङ्गवनितामूर्त्तिर्भूत्वा देवानुवाच ह॥ युष्माभिरमरैरत्र स्तूयते का च भाविनी। किमर्थमागता यूयं मातङ्ग्यास्याश्रमं प्रति॥ एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः। समुद्भूतान्नवोद्देवी मां स्तुवन्ति सुरा इति॥ शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्। तस्मात्तयोर्व्वधायाहं स्तूयेऽत्र सकलैः सुरैः॥ विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा। भिन्नाञ्जननिभा कृष्णा साभूत् गौरी कृष्णादपि॥ कालिकाख्याभवत् सापि हिमाचलकृताश्रया। तामुग्रतारामाम्नाय वदन्तीह मनीषिणः॥ उग्रादपि भयात् याति यस्माद्भक्तान् सदाम्बिका। एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च॥ एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका। शृणुतं चिन्तनं चास्याः सम्यक् वेतालभैरवौ॥ यथा ध्यात्वा महादेवीं भक्ताः प्राप्नोत्यभीप्सितम्। चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम्॥ खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः। कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्॥ खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्। मुण्डमालाधरां श्रीर्षे ग्रीवायामपि सर्व्वदा॥ वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम्। कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम्॥ वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्। विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम्॥ साट्टहासमहाघोरा रावयुक्तातिभीषणा। चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः॥ एतस्याः संप्रवक्ष्यामि यो अष्टौ योगिनीस्तु ताः। महाकाल्यथ रुद्राणी उमा भीमा तथैव च॥ घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी। भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्"॥ इति कालिकापुराणे ६१ अध्यायः॥

एकजन्मा, [न्] पुं, (एकं मुख्यं जन्म यस्य। दिक्पालांशसम्भूतत्वादस्य तथात्वम्।) राजा। इति त्रिकाण्डशेषः॥ (एकं न द्वितीयं जन्म यस्य इत्यर्थे। शूद्रः। तस्य अद्विजत्वात् तथात्वम्।)

एकतमः, त्रि, (एक + "एकाच प्राचाम्"। ५। ३। ९४। इति डतमच्।) बहूनां मध्ये एकः। इति व्याकरणम्॥ (यथा महाभारते आदिपर्व्वणि। "अस्थानि वा शरीरं वा ब्रह्मन्नेकतमं कुरु"॥)

एकतरः, त्रि, (एक + "एकाच प्राचाम्"। ५। ३। ९४। इति डतरच्।) द्वयोर्म्मध्ये एकः। इति व्याकरणम्। भिन्नः। इत्यमरटीकायां भरतः॥ (यदाह कात्यायनः।

"यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात्"॥)

एकता, स्त्री, (एकस्य भावः। एक + तल् + टाप्।) एकत्वम्। ऐक्यम्। इति व्याकरणम्॥ (यथा, रामायणे ६६। १३।

"बह्वीरपि मतीर्गत्वा मन्त्रिणो मन्त्रनिर्णये।
पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः"॥)

एकतानः, त्रि, (एकेन भावरसेन तन्यते विस्तीर्य्यते इति। तन इज्ञ विस्तारे। कर्म्मण्यण्।) एकाग्रः। एकविषयासक्तचित्तः। इत्यमरः॥ (यथा भागवते ७। ९। ८।

"ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः
सत्त्वैकतानमतयो वचसां प्रवाहैः।
नाराधितुं पुरगुणैरधुनापि पिप्रुः
किं तोष्टुमर्हति स मे हरिरुग्रजातेः"॥

एकस्मिन् तानो विस्तृतिर्यस्येति।) एकताले पुं। इत्यमरटीकायां स्वामी॥

एकतालः, पुं, (एकस्तुल्यस्तालो मानं यत्र।) समन्वितलयः। नृत्यगीतवाद्यानां साम्यं यत्र। समतालं इति यस्याख्या। इत्यमरभरतौ॥ (सङ्गीतशास्त्रे खनामख्यातः तालभेदः। त्रि, एकतालयुक्तसमन्वितः। यथा रघौ १५। २३।

"एकताल इवोत्पातपवनप्रेरितो गिरिः"॥)

एकतीर्थी, [न्] पुं, (एकं समं तीर्थमाश्रमो यस्य।) सतीर्थः। गुरुभाइ इति भाषा॥ ("एकतीर्थी एकाश्रमो" इति मिताक्षरा॥)

एकत्र, व्य, (एक + त्रल्।) एकस्मिन्। इति व्याकरणम्॥ एकसङ्गे इति भाषा। (एकत्र निर्णीतः शास्त्रार्थो बाधकं विनान्यत्रापि प्रयुज्यते"। इति दुर्गादासः। यथा मनुः। ५। १३९।

"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता"॥)

एकदंष्ट्रः, पुं, (एका दंष्ट्रा यस्य। परशुरामेणैकदन्तस्य उत्पाटनात् तथात्वम्।) गणेशः। इति त्रिकाण्डशेषः। (अस्य परशुरामक्षतदन्तोत्पाटनकथा एकदन्तशब्दे द्रष्टव्या॥)

एकदन्तः, पुं, (एको दन्तो यस्य।) गणेशः। इत्यमरः॥ (परशुरामक्षतगजेशदन्तोत्पाटनकथा ब्रह्मवैवर्त्ते उक्ता। एकदा रहसि स्थितयोः शिवाशिवयोर्द्वारपालत्वमङ्गीकृतं गजाननेन। एतस्मिन्नन्तरे परशुरामः शिवं द्रष्टुमागतः। शिवदर्शनव्याकुलस्यान्तर्जिगमिषोर्द्वाररोधे कृते गणपतिना सह तस्य तुमुलं युद्धमभवत्। परशुरामस्त्रिशूलेन परशुना च गजाननस्य एको दन्तः भग्नः। तदा प्रभृत्येव एकदन्तोऽसौ कथ्यते॥)

एकदा, व्य, (एक + "सर्व्वैकान्यकिंयत्तदः काले दा"। ५। ३। १५। इति दाः) एकस्मिन् काले। तत्पर्य्यायः। युगपत् २। इत्यमरः॥ (यथा भागवते ६। ३। २९।

"जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान्"॥)

एकदृक्, [ग्] पुं, (एकं सर्व्वमभिन्नं पश्यति यः। एकादृश् + क्विप्।) महादेवः। (एका दृक् यस्य। रामबाणमोक्षणेन नष्टे एकचक्षुषि काकस्य तथात्वम्।) काकः। काणे त्रि। इति हेमचन्द्रः॥ (एकमेव सर्व्वं ब्रह्मत्वेन पश्यति यः इति व्युत्पत्त्या तत्त्ववेत्ता। ब्रह्मज्ञानी॥ एकमेव पक्षं पश्यतीत्यर्थे एकपक्षाश्रयी॥)

एकदेहः, पुं, (एकः मुख्यो देहो यस्य। ग्रहेषु सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति त्रिकाण्डशेषः॥ (एको मेदरक्तादीनां साम्यात् तुल्यो देहः शरीरं यत्र। गोत्रम्। वंशः। यथा, हरिवंशे ४६ अध्याये।

"बह्वनि विप्र गोत्राणि मुनीनां भावितात्मनाम्।
एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः"॥

दम्पती। "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः"। तथा,—

"शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा"।

इति स्मृत्युक्तेश्च जायापत्योरेकदेहत्वम्"॥)

एकधा, व्य, (एक + "एकाद्धोध्यमुञ्"। ५। २। ४२॥ इति धा।) एकप्रकारम्। इति व्याकरणम्॥ (यथा महाभारते अनुगीतापर्व्वणि १४। ४२। ६०।

"सर्व्ववित् सर्व्वभूतेषु विन्दत्यात्मानमात्मनि।
एकधा बहुधा चैव विकुर्व्वाणस्ततस्ततः"॥)

एकधुरः, त्रि, (एका धूः। ऋक्पूरब्धूःपथामानक्षे"। ५। ४। ७४। इति अः समासान्तः।) एकभारवाहकगवादिः। एकपिठा गरु इति भाषा। तत्पर्य्यायः। एकधुरीणः २ एकधुरावहः ३। इत्यमरः॥ (यथा, पाणिनिः। ४। ४। ७९। "एकधुरान्नक्"।)

एकधुरावहः, त्रि, (वहतीति वहः। वह् + अच्। एकधुरायाः वहः।) एकधुरः। इत्यमरः॥

एकधुरीणः, त्रि, (एकधुरां वहति यः। "एकधुरान्नक् च"। ४। ४। ७९। चकारेण खस्यानुकर्षणसामर्थ्यात् पक्षे अवगम्॥) एकधुरः। एकभारवोढ़ा। इत्यमरः॥ एकस्य रथस्य लाङ्गलादेर्वा धुरं वहति यः। इत्यमरटीकायां भरतः॥

एकनटः, पुं, (एको मुख्यो नटः।) मुख्यनटः। तत्पर्य्यायः। कथकः २। इति त्रिकाण्डशेषः॥ कथाप्राणः ३। इति शब्दरत्नावली॥

एकपक्षः, त्रि, (एकः पक्षो यस्य।) सहायः। इति त्रिकाण्डशेषः॥ (एकः पक्षः इति विग्रहे। अद्वितीयः पक्षः॥ यथा, रघौ १४। ३४।

"इत्येकपक्षाश्रयविक्लवत्वात्
आसीत् स दोलाचलचित्तवृत्तिः॥)

एकपत्नी, स्त्री, (एकोऽद्वितीयः पतिर्यस्याः इति विग्रहे "नित्यं सपत्न्यादिषु" इति एकपतिशब्दस्य नकारान्तादेशे "ऋन्नेभ्यः" इति ङीप्।) पतिव्रता। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। १०॥

"ताभ्यावश्यं दिवसगणनातत्परामेकपत्नीम्"॥)

एकः समानः पतिर्यस्या इति विग्रहे। सपत्नी। यथा मनुः। ९। १८५।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः"॥)

एकपत्रिका, स्त्री, (एकं गन्धवत्त्वात् श्रेष्ठं पत्रं यस्याः।) गन्धपत्रशुक्लः। इति राजनिर्घण्टः॥

एकपदं, क्ली, (एकं पदं पदमात्रोच्चारणकालो यस्मिन्।) तत्कालः। इति मेदिनी॥ (तत्पर्य्यायः। तत्क्षणम्२ इति विश्वः। यथा, रघुः ८। ४८। "कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे"॥ "एकपदे तत्क्षणे। स्यात् तत्क्षणे एकपदमिति विश्वः"। इति तट्टीका॥ एकं प्रशस्तं पदं स्थानम्। "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरोक्तेस्तथात्वम्। वैकुण्ठम्। सुप्तिङन्तरूपपदम्। यथा माघे २। ९५।

"निहन्त्यरीनेकपदे य उदात्तः स्वरानिव"॥

एकं श्रेष्ठं पदं कोष्ठरूपपूजास्थानम्। वास्तुमण्डलस्थमेककोष्ठात्मकस्थानम्। यथा, वास्तुयागतत्त्वधृतदेवीपुराणम्।

"इन्द्रेन्द्रात्मजयोर्भावैकैकपदसंस्थितौ"॥)

एकपदः, पुं, (एकं पदं पदविन्यासो यस्मिन्।) ष्टङ्कारबन्धविशेषः। तस्य लक्षणम्।

पादमेकं हृदि स्थाप्य द्वितीयं स्तन्धसंस्थितम्।
स्तनौ धृत्वा रमेत् कामी बन्धस्त्वेकपदः स्मृतः"॥

इति रतिमञ्जरी॥ (वास्तुयागमण्डलैककोष्ठपूजनीयो देवभेदः। यथा वास्तुयागतत्त्वधृतदेवीपुराणवचनम्। "भृगुश्चैकपदो ज्ञेयः"। इति। एकं पदं चरणं यस्य इति विग्रहे वाच्यलिङ्गः। एकपदविशिष्टः। यथा भागवते १। १६। २०।

"पादैर्न्यूनं शोचसि मैकपाद-
मात्मानं वा दशलैर्भोक्ष्यमाणम्"॥

एकेन पदा चरन् वृषरूपधरो धर्म्मो गोरूपधरां पृथ्वीं रुदतीं दृष्ट्वोवाच। हे भद्रे! पादैर्न्यूनं एकपादं मां तथा शूद्रैर्भोक्ष्यमाणमात्मानं वा शोचसि किम्। इति तट्टीका॥)

एकपदी, स्त्री, (एकः पादो यस्याम्। कुम्भपदीषु चेति निपातः। यद्वा संख्यासु पूर्व्वस्येति पादस्यान्तलोपः। पादोऽन्यतरस्यामिति ङीप्। खाङ्गाच्चेति ङीष् वा। पादः पत्।) पद्याः। इत्यमरः॥

एकपर्णिका, स्त्री, (एकपर्णा + कन्। तपःसाधनार्थं पार्व्वत्याः पञ्चमात्रभक्षणात् तथात्वम्।) दुर्गा। देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥

"अपर्णाश्च निराहारा एकाग्नी एकपर्णिका।
पाटला पाटलाहारा देवी लोकेषु गीयते"॥

एकपात्, [द्] पुं, (एकः पादो यस्य। संख्यासु पूर्व्वस्येति अन्त्यलोपः।) शिवः। इति त्रिकाण्डशेषः॥ (रुद्रः। यथा, महाभारते सम्भवपर्व्वणि १। १२९। ६५।

"अजैकपादहिर्बुध्नः पिनाकी च परन्तपः" ॥
विष्णुः । यथा, विष्णुसंहितायाम् ।
"चतुरात्मा चतुर्भावश्चतुर्व्वेदविदेकपात्" ॥
एकः पादो यस्य इति विग्रहे वाच्यलिङ्गः ॥)

एकपिङ्गः, पुं, (एकं पिङ्गं पिङ्गलवर्णं नेत्रं यस्य ।) कुबेरः । इत्यमरः ॥ (कुबेरस्य पिङ्गनेत्रकथा उक्ता काश्मीरखण्डे । यथा, —
"प्रसार्य्य नयने पूर्व्वमुमामेव व्यलोकयत् ।
शम्भोः समीपे का योषिदेषा सर्व्वाङ्गसुन्दरी ॥
अनया किं तपस्तप्तं ममापि तपसोऽधिकम् ।
अहो रूपमहो प्रेम सौभाग्यश्रीरहो भगम् ।
क्रूरदृग्वीक्षते यावत् पुनः पुनरिदं वदन् ।
तावत् प्रस्फोटितं नेत्रं वामं वामविलोकनात् ॥
अथ देव्यब्रवीद्देवं किमसौ दुष्कृतापसः ।
असह्यक्षितिजोनाम्ना पुनर्मामेव पश्यति ॥
असूयमानो मे रूपं प्रेमसौभाग्यसम्पदः ।
इति देवीगिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः ॥
उमे ! त्वदीयपुत्रोऽयं न च क्रूरेण चक्षुषा ।
संपश्यते तपोलक्ष्मीं तव किन्त्वधिवर्णयन् ॥
इति देवीं समाभाष्य तमीशः पुनरब्रवीत् ।
वरं ददामि ते वत्स ! तपसानेन तोषितः ॥
निधीनामधिनाथत्वं गुह्यकानां भवेश्वरः ।
यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत ! ॥
पतिः पुण्यजनानाञ्च सर्व्वेषां धनदो भव ।
मया सख्यञ्च ते नित्यं वत्स्यामि च तवान्तिके ॥
अलकां निकषामित्र ! तव प्रीतिं विवर्द्धयन् ।
आगच्छ पादयोरस्याः पत ते जननी त्वियम् ॥
इति दत्त्वा वरान् देवः शिवः शिवाम् ।
प्रसादं कुरु देवेशि ! तपस्विन्यङ्गजे तव ।
देव्युवाच ।
वत्स ! ते निर्म्मला भक्तिर्भवे भवतु सर्व्वदा ।
भवैकपिङ्गो नेत्रेण वामेन स्फुटितेन च ॥
देवदत्तास्तु ये तुभ्यं वराः सन्तु तथैव ते ।
कुबेरो भव नाम्ना त्वं मम रूपेर्ष्यया सुत" ॥)

एकपिङ्गलः, पुं, (एकं पिङ्गलं नेत्रं यस्य ।) कुबेरः । इत्यमरटीकायां भरतः ॥ (अस्य पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकभक्तव्रतं, क्ली, (एकं भक्तं भोजनं यत्र तत् व्रतम् ।) रात्रिभोजनाभावविशिष्टदिवाभोजनम् । तथा च स्कन्दपुराणे ।
"दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं रात्रौ तन्न कदाचन" ॥
(अस्य व्रतस्य नियमफलादिकञ्चोक्तं विष्णुधर्म्मोत्तरे । तद्यथा, —
"चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत् ।
सुवर्णमणिमुक्तानां गार्हस्थ्यं समवाप्नुयात् ॥
अहिंसकः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यष्टोत्तरशतं जपेत् ॥
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात् ।
यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः ॥
अहिंसकः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यष्टोत्तरशतं जपेत् ॥
पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥
तत्क्षयादिह चागत्य माहात्म्यं प्रतिपद्यते" ॥ इति ॥)

एकमूला, स्त्री, (एकं मूलं यस्याः ।) शालपर्णी । अतसी । इति वैद्यकम् ॥ (एकमेव मूलं यस्य इति विग्रहे एकमूलविशिष्टे, त्रि ॥)

एकयष्टिका, स्त्री, (एका यष्टिरिव ।) हारविशेषः । एकनरि हार इति भाषा । तत्पर्य्यायः । एकावली २ । इत्यमरः ॥

एकरजः, पुं, (रज्यते इति रजः । एको मुख्यो रजः । रञ्जनद्रव्यम् ।) भृङ्गराजवृक्षः । इति जटाधरः ॥ (भृङ्गराजशब्दस्य गुणादयो बोद्धव्याः ॥)

एकलः, त्रि, (एक + ला + क ।) एक की । इति पद्यावली ॥ एकला इति भाषा । (यथा भागवते ५ । ७ । १० । "तस्मिन् वाव किल स एकलः पुत्रहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्तउपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमाप" ॥)

एकलिङ्गं, क्ली, (एकं लिङ्गं यस्य ।) स्थानविशेषः । तथा च आगमे ।
"पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते ।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" ॥

एकलिङ्गः, पुं, (एकं लिङ्गं पिङ्गलनेत्ररूपं चिह्नं यस्य सः ।) कुबेरः । इति शब्दरत्नावली ॥ (पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकवर्णी, स्त्री, (एकमेव शब्दं वर्णयति या । एक + वर्ण + अच् । गौरादित्वात् ङीष् ।) वाद्यभेदः । तत्पर्य्यायः । करतली २ कङ्कमाला ३ कलङ्कषा ४ इति शब्दरत्नावली ॥

एकवर्षिका, स्त्री, (एको वर्षो यस्याः । कः । इत्वम् ।) एकहायनी गौः । इति हेमचन्द्रः ॥ एकवत्सरेर वकना इति भाषा ॥

एकवादः, पुं, (एकोऽभिन्नस्वरो वादः वाद्यम् । डिण्डिम इति एकरूपवाद्यत्वादस्य तथात्वम् ।) डिण्डिमवाद्यम् । इति शब्दरत्नावली ॥

एकविंशतिः, स्त्री, (एकाधिका विंशतिः ।) एकाधिकविंशतिसंख्या । एकुश इति भाषा । यथा । मनुः ५ । ३५ ।
"नियुक्तस्तु यथान्यायं यो मांसं नात्त्यलोलुपः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्" ॥

एकवीरः पुं, वृक्षभेदः । तत्पर्य्यायः । महावीरः २ सहदीरः ३ सुवीरकः ४ । अस्य गुणाः । मदकारित्वम् । अत्युष्णत्वम् । कटुत्वम् । तोदवातनाशित्वम् । चटुलोकटिएण्डादिचलपत्त्राभिघातहारित्वञ्च । इति राजनिर्घण्टः ॥ (त्रि, एकः अद्वितीयो वीरः । वीरवरः । प्रशस्तवीर्य्यशाली । यथा भागवते ३ । १ । ४० ।
"अहो एषापि ध्रियतेऽर्भकार्थे
राजर्षिवर्य्येण विनापि तेन ।
यस्त्वेकवीरोऽधिरथो विजिग्ये
धनुर्द्वितीयः ककुभश्चतस्रः" ॥)

एकवृक्षः, पुं, (एको वृक्षो यस्मिन् ।) स्थानभेदः । "चतुःक्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते ।
एकवृक्षः स विज्ञेयः" । इति आगमः ॥ (एकोऽद्वितीयो वृक्षः इति विग्रहे एकस्मिन् वृक्षे । यथा सारमञ्जरी । "एकवृक्षः पञ्चनौका भवति" । एको वृक्ष इति पाठान्तरम् ॥)

एकशफः, पुं, (एकः शफः खुरो यस्य । अखण्डखुरत्वात् तथात्वम् ।) घोटकः । इति चिकाण्डशेषः ॥ एकखुरजन्तुमात्रम् । यथा ।
"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्" ॥
इति श्रीभागवतम् ॥ ३ । १० । २२ ॥ (अस्य दुग्धदधि-मूत्र-मांसादिगुणा अश्वशब्दे ऐकशफशब्दे च ज्ञातव्याः ॥)

एकशृङ्गः, पुं, (एकं शृङ्गं यस्य ।) विष्णुः । इति चिकाण्डशेषः ॥ (स्वायम्भुवमन्वन्तरे अकालप्रलयात् मत्स्यरूपधरस्यास्य शृङ्गे मनोर्नौबन्धः । तत्कथा यथा कालिकापुराणे ३२ अध्याये ।
"स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै तदा ।
ततो जलानामुपरि सशृङ्ग इव पर्व्वतः ॥
उद्दीप्तश्चैकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिरात् यत्रास्ते समनुर्हरिः" ॥
विस्तृतिस्तु आकालिकशब्दे द्रष्टव्या ।) एकशृङ्गयुक्तपशुमात्रम् ॥ (पितृगणभेदः । यथा, महाभारते २ । ११ । ४१-४३ ।
"पितॄणाञ्च गणान् विद्धि सप्त वै पुरुषर्षभ ! ।
मूर्त्तिमन्तो हि चत्वारस्त्रयश्चाप्यशरीरिणः ॥
वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत ।
गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥
सोमपा एकशृङ्गाश्च चतुर्व्वेदाः कलास्तथा ।
एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप" ॥)

एकषष्टिः, स्त्री, (एकाधिका षष्टिः ।) संख्यासंख्येयविशेषः । इत्यमरः ॥ ६१ एकषट्टि इति भाषा । (यथा भागवते ६ । ६ । ३० ।
"सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु" ।)

एकसर्गः, त्रि, (एकस्मिन् विषये सर्गो निश्चयो यस्य ।) एकायः । इत्यमरः ॥

एकसूत्रः, पुं, (एकं सूत्रं यस्य । एकसूत्रेण वादनात् तथात्वम् ।) डमरुवाद्यम् । इति शब्दरत्नावली ॥

एकहायनी, स्त्री, (एकः हायनो यस्याः । "दामहायनान्ताच्च" । ४ । १ । २६ । इति ङीष् ।) एकवर्षीयगवी । एकवत्सरेर वाकुर इति भाषा । तत्पर्य्यायः । एकाब्दा २ । इत्यमरः ॥ (ऐसि प्रमाणं यथा, मनुः ११ । १३६ ।
"वासो दद्याद्धयं हत्वा पञ्च नीलान् हयान् गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम्" ॥
"अश्वं हत्वा वस्त्रं दद्यात् हस्तिनं हत्वा पञ्च नीलान् वृषभान् दद्यात् प्रत्येकं छागमेषौ हत्वा वृषभं दद्यात् गर्दभं हत्वा एकवर्षं वत्सं दद्यात्" इति कुल्लूकभट्टः ॥)

एका, स्त्री, (एक + टाप् ।) दुर्गा । यथा ।
"एका गुणार्धा त्रिलोक्ये तस्मादेका स उच्यते" ।

देवी सा परमार्थेति वदन्ते भिन्नदर्शिनः ॥ इति"।
"एका सा तु पृथक्त्वेन विना सर्व्वत्र विश्रुता।
यथा तु व्यज्यते वर्णैर्विचित्रैः स्फटिको मणिः ॥
तथा गुणवशाद्देवी नानाभावेषु वर्ण्यते" ॥
इति च देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥
(अद्वितीया। यथा, मार्कण्डेये ९०।७।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा"।
"अजामेकां लोहितशुक्लकृष्णां"। इति श्रुतिः॥
एकैव। स्त्री। यथा भट्टिः १।१४।
"प्रासोष्ट शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन" ॥)

एकाकी, [न्] त्रि, (एक + "एकादाकिनिच्चासहाये"। आकिनिच्।) सहायरहितः। असहायः। एकला इति भाषा। तत्पर्य्यायः। एकः २ एकक ३। इत्यमरः॥ एकलः ४। इति शब्दरत्नावली॥ (यथा मनुः। ४।२५८।
"एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति" ॥)

एकाक्षः, पुं, (एकमक्षि यस्य। सक्थ्यक्ष्णोः साङ्गात् षच्।) काकः। इति शब्दचन्द्रिका॥ (काकस्य यथा एकनेत्रत्वं जातम्। तत् पाद्मे भरतस्यायोध्यां प्रतिनिवृत्त्यनन्तरमुक्तम्। तद्यथा,—
"राघवश्चित्रकूटाद्रौ सानुजोऽरमत स्त्रिया।
कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥
ऐन्द्रः काकः समागम्य जानकीं वीक्ष्य कामुकः।
विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥
तत् दृष्ट्वा राघवः क्रुद्धः कुशं जग्राह पाणिना।
ब्राह्मेणास्त्रेण संयोज्य चिक्षेप धाङ्कमारणे ॥
तत् दृष्ट्वा घोरसङ्काशं ज्वलत्कालानलोपमम्।
दृष्ट्वा काकः प्रदुद्राव निनदन् दारुणास्वनम् ॥
वायसस्त्रिषु लोकेषु बभ्राम भयपीडितः।
यत्र यत्र ययौ काकः शरणार्थी च वायसः ॥
तत्र तत्र तदस्त्रं तु प्रविवेश भयावहम्।
ब्रह्माणमिन्द्रं रुद्रं मां शरणार्थी जगाम सः ॥
तत् दृष्ट्वा वायसं भीतं देवता न ररक्षिम।
न शक्ताः स्म वयं त्रातुं राघवास्त्राद्भयङ्करात् ॥
इत्यब्रूम महादेवा अन्यत्रास्त्रं दहेच्च नः।
पुनस्त्वागात् विधिं काको दयया विधिराह तम् ॥
भो भो बलिभुजां श्रेष्ठ तमेव शरणं व्रज।
स एव रक्षकः श्रीशः शरणागतवत्सलः ॥
इत्युक्तः सोऽथ बलिभुक् ब्रह्मणा रघुनन्दनम्।
उपेत्य सहसा भूमौ निपपात भयातुरः ॥
प्रायसंशयमापन्नं दृष्ट्वा सीता तु वायसम्।
त्राहि त्राहीति भर्त्तारमुवाच दयिता विभुम् ॥
तच्छिरः पादयोस्तस्य युयुजे चाथ जानकी।
तमुत्थाप्य करेणाथ कृपासीयूषसागरः।
ररक्षासौ निजास्त्राय तदेकाक्षि ददौ तदा ॥
वायसोऽपि मुक्तर्नत्वा सीतायै राघवाय च।
स्वर्लोकं प्रययौ हृष्टो राघवेणाभिपालितः" ॥)

एकाक्षः, त्रि, (एकं एकस्मिन् वा अक्षं पुरोगतं ज्ञेयमस्य।) अनन्यचित्तः। तत्पर्य्यायः। एकतानः २ अनन्यवृत्तिः ३ एकायनः ४ एकसर्गः ५ एकाग्र्यः ६ एकायनगतः ७। इत्यमरः॥ (यथा, मनुः। १।१।
"मनुमेकाग्रमासीनमभिगम्य महर्षयः"।
"एकाग्रं विषयान्तरात्याक्षिप्तचित्तम्"। इति कुल्लूकभट्टः। तथा भागवते ८।१६।३।
"मनश्चैकाग्र्यया बुद्धा भगवत्यखिलात्मनि।
वासुदेवे समाधाय चचार ह परव्रतम्" ॥
तथा गीतायाम् ६।१२।
"तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्जाद्योगमात्मविशुद्धये" ॥
"एकाग्रं चित्तेपरहितं मनः कृत्वा"। इति स्वामिटीका।) अनाकुलः। इति मेदिनी॥

एकाग्र्यः, त्रि, (एकं अग्र्यं अस्य।) एकाग्रः। इत्यमरः॥

एकाङ्गं, क्ली (एकं सुन्दरमङ्गं यस्य। 'एकं सुन्दरमङ्गं भवत्यस्माद्वा।) चन्दनम्। इति हारावली॥ (एकमद्वितीयमङ्गम्। एकस्मिन्नपि अङ्गे। यथा, महाभारते १३। दानधर्म्मकथने। ८२।२१।
"माननामहमिच्छामि भवत्यः सततं शुभाः।
अप्येकाङ्गेऽप्यधोवस्त्रमिच्छामि च सुकुत्सिते" ॥
एकं श्रेष्ठमङ्गमिति विग्रहे मस्तकम्। अस्य पर्य्याये उत्तमाङ्गशब्ददर्शनात्॥)

एकाङ्गः, पुं, (एकं सुन्दरम् अङ्गं यस्य। सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति चिकाण्डशेषः॥

एकादश, [न्] त्रि, (एकाधिका दश।) संख्याविशेषः। ११ एगार इति भाषा। तद्वाचकौ। रुद्रः १ दुर्य्योधनसेनापतिः २। इति कविकल्पद्रुमः॥ (यथा मनुः २।३६।
"गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः"॥)

एकादशी, स्त्री, (एकादशानां पूरणी। एकादश + ङीप्।) तिथिविशेषः। सा तु शुक्लपक्षे सूर्य्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादशकलाक्रियारूपा। कृष्णपक्षे सूर्य्यमण्डले चन्द्रमण्डलस्य प्रवेशरूपैकादशकलाक्रियारूपा। तत्पर्य्यायः। हरिवासरम् २। हरिदिनम् ३। इति स्मृतिः॥ तत्र जातफलम्।
"क्रोधोत्कटः क्रोशसहः सुभाषी
यागादिकर्त्ता स्वजनैकभर्त्ता।
महामतिर्देवगुरुप्रियः स्या-
देकादशीजो मनुजोऽतिहृष्टः"।
इति कोष्ठीप्रदीपः ॥*॥ तत्र उपवासविधिः। पारणादिने द्वादशीलाभे सर्व्वएव पूर्णां त्यक्त्वा खण्डामुपवसेयुः। तदलाभे मही पूर्णां तनयः परां विधवापि उपवसेत्। पूर्णा तु।
"उदयात् प्राक् यदा विप्र मुहूर्त्तार्द्धयसंयुता।
संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद् मही" ॥
इति गारुडोक्ता॥ यदा तु पूर्व्वदिने दशम्या परदिने द्वादश्या युक्तैकादशी तदा उत्तरामुपोष्य द्वादश्यां पारणं कुर्य्यात्। परदिने द्वादश्यनिर्गमे त्रयोदश्यामपि। यदा तु सूर्य्योदयानन्तरं दशमीयुतैकादशी अथ च परदिने न निःसरति तदा तां विहाय द्वादशीमुपवसेत्। यदा तु सूर्य्योदयप्राक्कालीनदशमीविद्धैकादशी परदिने च न निःसरति तदा तामुपवसेत्। यदा तद्विधा सती परदिनेऽपि निःसरति तत्परदिने च द्वादशी तदा तां विहाय खण्डामुपोष्य द्वादश्यां पारयेत्। यदा तूभयदिने तद्विधैकादशी परदिने च न द्वादशी तदा षष्टिदण्डात्मिकां विद्धामुपोष्य परदिने द्वादश्यादयादमुत्तीर्य्य पारयेत्। वैष्णवस्तु तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेत्। सर्व्वस्यां कृष्णैकादश्यां वैष्णवानां सपुत्त्रायां गृहस्थानामप्युपवासो नित्यः। ब्राह्मणस्य विशेषतो नित्यः। वैष्णवेतरेषां तादृशानां हरिशयनमध्यवर्त्तिनीषु कृष्णैकादशीषु उपवासो नित्यः। अपुत्त्रवतां गृहिणान्तु सर्व्वास्वेव नित्याधिकारः। काम्योपवासे त्वविशेषेणैव सर्व्वेषामधिकारः। नित्योपवासे रविशुक्रादिदोषो नास्ति। अष्टाब्दादधिको मर्त्योऽपूर्णाशीतिवत्सरो नित्याधिकारी। विधवानान्तु सर्व्वास्वेव नित्याधिकारः तत्र मलमासादिदोषो नास्ति। इत्येकादशीतत्त्वोक्तव्यवस्था॥ * ॥
अथ हरिभक्तिविलासोक्तैकादशीव्यवस्था लिख्यते। तत्रादौ उपवासपूर्व्वदिनकृत्यम्।
"प्रातःस्नानादिकं कृत्वा सुवेषो धौतवस्त्रकः।
व्रतं संकल्प्य कुर्व्वीत वैष्णवैश्च महोत्सवम्" ॥
इति कारिका॥ संकल्पमन्त्रः।
"दशमीदिनमारभ्य करिष्येऽहं व्रतं तव।
त्रिदिनं देवदेवेश निर्व्विघ्नं कुरु केशव" ॥ * ॥
तत्र रुक्माङ्गदराजवाक्यं नारदीये।
"प्रातर्हरिदिनं लोकास्तिष्ठध्वं चैकभोजनाः।
अत्तारस्तवशाः सर्व्वे हविष्यान्ननिषेविणः॥
अवनीतलशयनाः प्रियासङ्गविवर्जिताः।
स्मरध्वं देवमीशानं पुराणं पुरुषोत्तमम्" ॥ * ॥
अथान्यनियमाः। स्कान्दे।
"कांस्यं मांसं मसूरञ्च चौद्रं चान्नतभोजनम्।
पुनर्भोजनमायासं दशम्यां परिवर्ज्जयेत्" ॥
पारणादिनोक्तनिषिद्धव्यापण्यापि निषिद्धानि॥॥
ततो व्रतस्य नित्यत्वमाह कण्वः।
"एकादश्यामुपवसेन्न कदाचिदतिक्रमेत्"।
आग्नेयेच्च।
"उपोष्यैकादशीं राजन् यावदायुःप्रवृत्तिभिः"॥*॥
भोजननिषेधो नारदीये पाद्मोत्तरखण्डे च।
"रटन्तीह पुराणानि भूयोभूयो वरानने!।
न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे" ॥
प्रवृद्धयेऽपि नित्यत्वम्। विष्णुरहस्ये।
"शुक्ले वा यदि वा कृष्णे विष्णुपूजनतत्परः।
एकादश्यां न भुञ्जीत पुत्रयोरुभयोरपि" ॥ * ॥
संक्रान्त्यादावपि नित्यत्वम्। कात्यायनः।
"संक्रान्तौ रविवारे वा यदा चैकादशी भवेत्।
उपोष्या सा महापुण्या सर्व्वपापहरा तिथिः"॥*॥
उपवासदिने श्राद्धनिषेधः। पाद्मोत्तरखण्डे।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्मृतेऽहनि।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्" ॥*॥
अथ त्र्यधिकारिणः। पाद्मोत्तरखण्डे।
"वर्णानामाश्रमाणाञ्च स्त्रीणाञ्च वरवर्णिनि।

एकादश्युपवासस्तु कर्त्तव्यो नात्र संशयः" ॥
कात्यायनस्मृतौ च ।
"अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि" ॥ * ॥
अशक्तौ प्रतिनिधिः । वायुपुराणे ।
"उपवासे त्वशक्तस्य आहिताग्नेरथापि वा ।
पुत्रान् वा कारयेदन्यान् ब्राह्मणान् वापि कारयेत् ॥
अथवा विप्रमुख्येभ्यो दानं दद्यात् स्वशक्तितः ।
उपवासन्तु कुर्व्वाणः पुण्यं भूतगुणं भवेत्" ॥
मार्कण्डेयपुराणे च ।
"एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्व्वापि न निर्द्वादशिको भवेत्" ॥*॥
अनुकल्पापवादः । गरुड़पुराणे ।
"मत्स्यपने मदुत्याने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि शुल्कं समर्पयेत्" ॥ * ॥
एकादशीमाहात्म्यम् । तत्त्वसागरे ।
"एकादशीसमं किञ्चित् पावनं न च विद्यते ।
स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी" ॥
गारुड़े च ।
"एकादशीव्रतं भक्त्या यः करोति नरः सदा । [॥*॥
स विष्णुलोकं व्रजति यांति विष्णोः सरूपताम्" ।
उपवासदिननिर्णयः । सौरधर्म्मोत्तरे ।
"एकादशीमुपवसेत् द्वादशीमथवा पुनः । [॥*॥
विमिश्रां वापि कुर्व्वीत न दशम्या युतां क्वचित्"
विद्धोपवासदोषमाह वशिष्ठः ।
"दशम्येकादशी यत्र तत्र नोपवसेद्बुधः ।
अपत्यानि विनश्यन्ति स्वर्गलोकं न गच्छति" ॥*॥
द्वादश्युपवासफलम् । स्कान्दे ।
"ऊर्द्ध हरिदिनं न स्यात् द्वादशीं ग्राह्येत्ततः ।
द्वादश्यामुपवासोऽत्र त्रयोदश्यान्तु पारणम् ॥
एवं कुर्व्वन् नरो भक्त्या विष्णुसायुज्यमाप्नुयात् ।
अन्यथा कुरुते यस्तु स याति नरकं ध्रुवम्" ॥*॥
सपूर्णालक्षणेन विद्धालक्षणम् । भविष्यपुराणे ।
"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
एकादशी च संपूर्णा विद्वान्या परिकीर्त्तिता" ॥*॥
अरुणोदयविद्धापरित्यागमाह कण्वः ।
"अरुणोदयवेलायां दशमीसंयुता यदि ।
अतोपोष्या द्वादशी स्यात् त्रयोदश्यान्तु पारणं" ॥
वेधश्चतुर्विधः । ब्रह्मवैवर्त्ते ।
"अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासन्दर्शनाह्नवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्कोऽ न दृश्यते ।
तुरीयस्तत्र विहितो योगः सूर्य्योदये बुधैः" ॥*॥
अरुणोदयविद्धोपवासदोषः । पाद्मे ।
"अरुणोदयकाले तु वेधं दृष्ट्वा चतुर्व्विधम् ।
महिनं ये प्रकुर्व्वन्ति यावदाहूतनारकाः" ॥*॥
गृद्धाविशेषपरित्यागः । गारुड़े ।
सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्यते ॥
गृहस्थोऽपि परां कुर्य्यात् पूर्व्वां नोपवसेत्तदा" ॥*॥
अथाष्टमहाद्वादशीनां विशेषतो निरूपणम् ।

"उन्मीलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
द्वादश्योऽष्टौ महापुण्याः सर्व्वपापहरा द्विज ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥
नक्षत्रयोगाच्च बलात् पापं प्रशमयन्ति ताः" ॥ * ॥
अथोन्मीलनी । यथा ब्रह्मवैवर्त्ते ।
"एकादशी च संपूर्णा वर्द्धते पुनरेव सा ।
द्वादशी च न वर्द्धेत कथितोन्मीलनी च सा" ॥
पद्मपुराणे ॥
"सर्व्वत्रैकादशी कार्य्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्" ॥*॥
अथ वञ्जुली । ब्रह्मवैवर्त्ते ।
"द्वादश्येव विवर्द्धेत नचैवैकादशी यदा ।
वञ्जुलीति भृगुश्रेष्ठ ! कथिता पापनाशिनी" ॥
भागवतादित्यन्ते ।
"संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा द्वादशामेव पारणम्" ॥ * ॥
अथ त्रिस्पृशा । ब्रह्मवैवर्त्तपुराणे ।
"अरुणोदय आद्यां स्यात् द्वादशी सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा हरेः प्रिया" ॥
नारदीये ।
"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति" ॥
अथ पक्षवर्द्धिनी । ब्रह्मवैवर्त्ते ।
"दर्शश्च पौर्णमासी च संपूर्णा वर्द्धते यदि ।
द्वितीयेऽह्नि द्विजश्रेष्ठ सा भवेत् पक्षवर्द्धिनी" ॥*॥
ब्रह्मवैवर्त्ते ।
"कुहूरके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत्" ॥ * ॥
अथ जयादिः । ब्रह्मवैवर्त्ते ।
"पुष्यश्रवणपुष्याद्यरोहिणीसंयुतास्तु ताः ।
उपोषिताः समफला द्वादशोऽष्टौ पृथक् पृथक्" ॥
अथोपवासदिनकृत्यम् । देवलः ।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयादृषीन् संकल्पयेद्बुधः" ॥
तत्र सङ्कल्पमन्त्रः ।
"एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत" ॥ * ॥
पुष्पाञ्जलित्रयदानं मन्त्रपूतजलपानञ्चाह मार्कण्डेयः ।
"अशक्तश्चेत्तु मन्त्रेण त्रिजप्तेनाभिमन्त्रितम् ।
उपवासफलं प्रेप्सुः पिबेत्तोयं समाहितः ॥
देवार्च्चनं ततः कृत्वा पुष्पाञ्जलिमथापि वा ।
संकल्पमन्त्रमुच्चार्य्य देवाय विनिवेदयेत्" ॥ * ॥
संकल्पादौ विशेषः । नारदीये ।
"पूर्व्वायाः सङ्गदोषेणैकादश्याः स्नानपूजने ।
वर्ज्जयन्ति नराः पूर्व्वान् यामांश्च चतुरो द्विज ॥
तदूर्द्धं स्नानपूजादि कर्त्तव्यं तदुपोषितैः ।
न दिवा शुद्धिमाप्नोति तदा रात्रौ विधीयते ॥
दिनकार्य्यमशेषञ्च कर्त्तव्यं पूर्व्वरीमुखे" ॥ * ॥
पूजाजागरणविधिः । ब्राह्मे ।

स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः ॥
संपूज्य विधिवद्विष्णुं श्रद्धायातिसमाहितः ।
पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥
उपहारैर्ब्बहुविधैर्नृत्यगीतवाद्यैर्मनोरमैः ॥
एवं संपूज्य विधिवद्रात्रौ कुर्य्यात् प्रजागरम्" ॥*॥
अथ जागरणलक्षणम् । स्कान्दे ।
"शृणु नारद वक्ष्यामि जागरस्य तु लक्षणम् ।
येन विज्ञातमात्रेण दुर्लभो न जनार्दनः ॥
गीतं वाद्यञ्च नृत्यञ्च पुराणपठनन्तथा ।
धूपं दीपञ्च नैवेद्यं पुष्पगन्धानुलेपनम् ॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः ।
सत्यान्वितं विनिद्रञ्च मुदायुक्तं क्रियान्वितम् ॥
सारूप्यञ्चैव सोत्साहं पापाल्लक्षादिवर्ज्जितम् ।
प्रदक्षिणाभिः संयुक्तं नमस्कारपुरःसरम् ॥
नीराजनसमायुक्तमनिर्व्विण्णेन चेतसा ।
यामे यामे महाभागे कुर्य्यादारात्रिकं हरेः ॥
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः' ॥ *॥
अथ पारणादिनकृत्यम् । कात्यायनः ।
"प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
पारणन्तु ततः कुर्य्यात् व्रतसिद्धौ हरिं स्मरन्" ॥
तत्र समर्पणमन्त्रः ।
"अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव" ॥ * ॥
अथ पारणे द्वादशीलङ्घने दोषः । स्कान्दे ।
"पारणाहनि संप्राप्ते द्वादशीं यो व्यतिक्रमेत् ।
त्रयोदश्यान्तु भुञ्जानः शतजन्मानि नारकी" ॥ * ॥
अथ द्वादश्यल्पत्वे कृत्यसमाधानम् । देवीरहस्ये ।
"अल्पा चेद्द्वादशी कुर्य्यात् नित्यकर्म्मार्चनोदये ।
अत्यल्पा चेन्निशीथोर्द्धमामध्याह्निकमेव तत्" ॥*॥
अथ सङ्कटे पारणासमाधानम् । कात्यायनः ।
"मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
अद्भिस्तु पारणं कुर्य्यात् सङ्कटे विषमे सति" ॥ * ॥
अथ हरिवासरकालपारणानिषेधः । विष्णुधर्म्मोत्तरे ।
"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः" ॥ * ॥
अथ द्वादशीदिने वर्ज्जनीयानि । स्कान्दे ।
"क्षौद्रं मांसं सुरां तैलं व्यायामं क्रोधमैथुने ।
परान्नं कांस्यताम्बूले लोभं निर्म्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्" ॥
अपि च । वितथभाषणम् । प्रवासः । दिवास्वप्नः । अञ्जनम् । घृतालिपिष्टम् । मसूरम् । द्यूतम् । हिंसा । चणकम् । कोरद्रूषकम् । औषधम् । एतानि पुराणान्तरोक्तान्यपि वर्ज्जनीयानि ॥ * ॥ इति श्रीहरिभक्तिविलासोक्तैकादशीव्यवस्था समाप्ता ॥*॥
अथ पञ्चमदेशप्रसिद्धनानापुराणोक्तषड्विंशत्येकादशीनामानि लिख्यन्ते । तत्रहायनस्य कृष्णैकादशी उत्पन्ना १ शुक्ला मोक्षा २ । पौषस्य कृष्णैकादशी सफला ३ शुक्ला पुत्रदा ४ । माघस्य कृष्णैकादशी षट्तिला ५ शुक्ला जया ६ । फाल्गुनस्य कृष्णैकादशी विजया ७ शुक्ला आमलकी ८ ।

चैत्रस्य कृष्णैकादशी पापमोचनी ९ शुक्ला कामदा १०। वैशाखस्य कृष्णैकादशी वरूथिनी ११ शुक्ला मोहनी १२। ज्येष्ठस्य कृष्णैकादशी अपरा १३ शुक्ला निर्जला १४। आषाढस्य कृष्णैकादशी योगिनी १५ शुक्ला पद्मा १६। श्रावणस्य कृष्णैकादशी कामिका १७ शुक्ला पुत्रदा १८। भाद्रस्य कृष्णैकादशी अजा १९ शुक्ला वामना २०। आश्विनस्य कृष्णैकादशी इन्दिरा २१ शुक्ला पापाङ्कुशा २२। कार्त्तिकस्य कृष्णैकादशी रमा २३ शुक्ला प्रबोधिनी २४। मलमासस्य शुक्लैकादशी सुमदा २५ कृष्णा कमला २६॥ *॥ इत्येकादशीप्रकरणं समाप्तम्॥ (संख्याविशेषः। एगार इति भाषा। यथा महाभारते ६।१६।२१।

"एकादशी धार्त्तराष्ट्री कौरवाणां महाचमूः"॥)

एकाङ्गविंशतिः, त्रि, (एकेन न विंशतिः। एकादिरेकस्य चादुक्"।६।३।७६। इत्यनेन सिद्धम्।) एकोनविंशतिः १९। इति व्याकरणम्॥

एकानंशा, स्त्री, (एको न अंशो यस्याः।) पार्व्वती। इति त्रिकाण्डशेषः॥ (इयं हि यशोदागर्भसम्भवा। यदुक्तं हरिवंशे। ५९।१४ ४७।

"देवक्यजनयत् विष्णुं यशोदा तां तु कन्यकाम्"।

"विद्धि चैनामथोत्पन्नां अंशाद्देवीं प्रजापतेः।

एकानंशां योगकलां रक्षार्थं केशवस्य तु"॥)

एकान्तं, क्ली, (एकस्मिन्नेव अन्तः समाप्तिर्यस्य।) अत्यन्तम्। तत्पर्य्यायः। अतिशयः २ भरः ३ अतिवेलम् ४ भृशम् ५ अत्यर्थम् ६ अतिमात्रम् ७ उद्गाढम् ८ निर्भरम् ९ तीव्रम् १० नितान्तम् ११ गाढम् १२ बाढम् १३ दृढम् १४। (यथा माघे २। ८३।

"तेजः क्षमा वा नैकान्तं कालक्षय महीपतेः"॥

तद्धति, त्रि। यथा कुमारे १। ३६।

"नागेन्द्रहस्तास्त्वचि कर्कशत्वा-
देकान्तशैत्यात् कदलीविशेषाः"॥

तथा भागवते। १। ४। ४।

तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः।
एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते"॥)

भेद्यगामिनि त्रि। इत्यमरः॥ (सर्व्वत्र यदवधारणोच्यते स एकान्तः॥ यथा "दृढदृढिरेचयति मदनफलं वामयतीति"॥ इत्युत्तरतन्त्रे ६५ अध्याये सुश्रुतेनोक्तम्॥) निर्ब्बन्धम्॥ (यथा हितोपदेशे विग्रहे। १५। "अथ केनापि ग्रस्तरक्तेक्षः धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्यावनतकायेन एकान्ते स्थितम्"॥)

एकान्ती [न्] (एकान्तमस्यास्य। एकान्त + इनि।) विष्णुभक्तविशेषः। यथा, गारुडे १११ अध्याये।

"एकान्तेनासमो विष्णुर्यस्मादेषां परायणः।
तस्मादेकान्तिनः प्रोक्ता भक्तास्तद्भागवतचेतसः॥
प्रियाणामपि सर्व्वेषां देवदेवस्य स प्रियः।
आपत्स्वपि तदा यस्य भक्तिरव्यभिचारिणी"॥

एकान्नः, त्रि, (एकं एककालपक्वं अन्नं यत्र।) एकभक्तः। यथा। काशीखण्डे।

"ऊर्द्धं यवान्नमश्नीयादेकान्नमथवा पुनः।
दत्तात्रेयं सूरगणैश्च सूकरिम्बीश्च वर्ज्जयेत्"॥

इति तिथ्यादितत्त्वम्॥ एकं अविभक्तमन्नं यस्य इति व्युत्पत्त्या एकपाकावस्थितः। अविभक्तः। यथा,

"एकपाकेन वसतां पिण्डदेवद्विजार्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे"॥

इति प्रायश्चित्ततत्त्वधृतदक्षस्मृतिवचनम्॥

एकान्नविंशति, त्रि, (एकेन न विंशतिः। "एकादिश्चैकस्य चादुक्"। ६।३।७६। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात् समासः। अनुनासिकविकल्पः।) एकोनविंशतिः १९। इति व्याकरणम्॥

एकाब्दा, स्त्री, (एकोऽब्दो यस्याः सा।) एकहायनी। एकवत्सरवयस्कागवी। इत्यमरः॥

एकायनः, त्रि, (एकं अयनं विषयो यस्य।) एकाग्रः। एकविषयासक्तचित्तः। इत्यमरः। (यथा छान्दोग्योपनिषदि। ७। ४। २। तानि हृतानि संकल्पैकायनानि सङ्कल्पात्मकानि संकल्पे प्रतिष्ठितानि"। एकमयनं गतिर्यत्र। एकमाचरणमनयोग्यः। यदुक्तं महाभारते ३। १४६। ६६।

"अनेनैव पथा मा वै गच्छेदिति विचार्य्य सः।
आस्त एकायने मार्गे कदलीषण्डमण्डिते"॥)

एकायनगतः त्रि, (एकायनं गतः प्राप्तः। एकस्मिन्नयने गतं ज्ञानमस्येति वा।) एकाग्रः। इत्यमरः॥

एकावली, स्त्री, (एका श्रेष्ठा आवली माला।) एकयष्टिका। इत्यमरः॥ एकनर हार इति भाषा। (अलङ्कारविशेषः। तल्लक्षणादिकमुक्तं साहित्यदर्पणे १० परिच्छेदे। १०१। यथा,—

"पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम्।
स्थाप्यतेऽर्थोह्यते वा चेत्स्यात्तदैकावली द्विधा"॥

क्रमेणोदाहरणम्। तत्रैव।

"सरो विकसिताम्भोजसम्भोजं भृङ्गसङ्कुलम्।
भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम्"॥

"न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः"॥

भट्टिः। २। १९॥ क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमर्थोहितञ्च दृश्यते। यथा,—

"वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु।
कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम्"॥

एवमर्थोहनेऽपि॥)

एकाश्रितगुणः, पुं, (एकस्मिन् पदार्थे आश्रितो गुणः।) एकवृत्तिधर्म्मः। तद्यथा। रूपम् १ रसः २ गन्धः ३ स्पर्शः ४ एकत्वम् ५ एकपृथक्त्वम् ६ परिमाणम् ७ परत्वम् ८ अपरत्वम् ९ बुद्धिः १० सुखम् ११ दुःखम् १२ इच्छा १३ द्वेषः १४ यत्नः १५ गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः १८ संस्कारः १९ अदृष्टम् २० शब्दः २१। इति सिद्धान्तमुक्तावली॥ ९०॥

एकाष्ठीलः, पुं, (एकमस्मि खाति। खा + क। सुधामादित्वात् षत्वं दीर्घत्वञ्च।) वकवृक्षः। इति कश्चिदमरः॥

एकाष्ठीला, स्त्री, (एकाष्ठील + टाप्।) वकवृक्षः। इत्यमरः॥ पाठा। इति राजनिर्घण्टः॥ आक्नादि इति भाषा। (अस्याः पर्य्यायो यथा॥

"अम्बष्ठाम्बष्ठकी पाठा कुचेला पारचेलिका।
एकाष्ठीला वरा तिक्ता प्राचीनौका शिवावृका"॥
इति वैद्यकरत्नमाला॥)

एकाहः, पुं, (एकमहः। "उत्तमकाभ्याञ्च"।५।४। ९० इत्यनेन सिद्धम्।) एकदिनम्। इति व्याकरणम्॥ (यथा, मनुः ५। ५९।

"अर्व्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च"॥)

एकाहारः, पुं, (एकः न द्वितीय आहारः।) एकदिनवर्त्त्येकवारभोजनम्। यथा।

"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।
पर्य्यङ्कशायिनी नारी विधवा यातयेत् पतिम्"॥
इति शुद्धितत्त्वधृतस्मृतिः॥

एकीयः, त्रि, (एकस्मिन् तिष्ठतीति। एक + छ।) एकपक्षः। सहायः। सहभावी। इति त्रिकाण्डशेषः॥

एकोद्दिष्टं, क्ली, (एकः प्रेत एव उद्दिष्टो यत्र।) प्रेतोद्देश्यकश्राद्धम्। यथा। गोभिलः अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ्यः एकः पिण्डो नावाहनं नाम्नीकरणं नात्र विश्वे देवाः खदितमिति हन्निप्रश्नः सुखदितमिति प्रत्युत्तरम्। उपतिष्ठतामित्यत्तव्यस्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति॥ *॥ एतत् प्रेतश्राद्धमित्युपसंहारात् एकं प्रेतमुद्दिश्य यदीयते श्राद्धं तदेकोद्दिष्टमिति वैदिकप्रयोगाधीनं यौगिकम्। अतएव प्रतिसांवत्सरिकस्य नैकोद्दिष्टत्वं किन्त्वेकोद्दिष्टविधिकत्वं अत्रार्घ्यैक्याद्विदलरूपसङ्केतितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानसार्थक्याय तदवयवैकदलपरम्। अत्र नावाहनं नाम्नी करणमिति निषेधयोः पौर्व्वापर्य्यादग्नौ करणपूर्व्वकालीनं प्रधानसम्बन्धि श्राद्धसूत्रोद्दिष्टं श्राद्धार्थावाहनमेव निषिध्यते न तत्प्रधानसम्बन्धि पिण्डयज्ञवदित्यतिदेशप्राप्तं पिण्डार्थावाहनमिति। एतेन पिण्डार्थावाहननिषेधो मैथिलोक्तो हेयः। अत्राग्नौ करणनिषेधेन ऊतश्रेयस्यालाभे ऊतश्रेयं दत्त्वा पात्रमासाद्य जपति पृथिवीत्यादि स्वाहा इत्यन्तसूत्रोक्तपात्रासादनस्यापि बाधः। आनन्तर्य्याभावात् अमृतमिति मन्त्रलिङ्गविरोधाच्च। खदितमिति हन्निप्रश्न इति हन्नाः स्थ इति हन्निप्रश्ने खदितमिति प्रश्नः। कुशमयब्राह्मणपक्षे तु प्रतिवचनानुपपत्त्या प्रश्नस्यापि निवृत्तिः। अत्तव्यशब्दस्थाने उपतिष्ठतामिति प्रयोगः अत्रोपतिष्ठतामित्यनेन अन्नादिकमित्यस्यान्वये अस्त्वित्यस्य अन्वयानुपपत्त्या तस्याप्यप्रयोगः। अतएव पिण्डदयितायामन्नादिकमुपतिष्ठतामिति लिखितम्। अभिरम्यतामिति वाजे वाजे इति स्थाने अभिरम्यतामित्यनेन विसर्जनमिति। एतदिति पूर्व्वोक्तैककर्त्तृकतावाक्यश्राद्धमित्यर्थः। प्रेतश्राद्धं प्रेतस्य श्राद्धं न तु पार्व्वणविकृतित्वेन प्राप्तपिण्डलोकरूपपितुः श्राद्धं अकृतसपिण्डीकरणस्य तथाविधपिण्डत्वाभावात्। अतएवैतन्न्यायमूलकमेवाश्वलायनगृह्यपरिशिष्टेऽपि पिण्ड-

शब्दं न युञ्जीत पिण्डहा चोपजायते इत्युक्तम्। अतएव विष्णुना प्रेतस्य नामगोत्राभ्यां दत्ताच्छ्योदकेषु इत्यत्र प्रेतनामगोत्राभ्यामित्यनेन प्रेतस्येत्युक्तं न तु सम्बन्धिन इत्युक्तम्। तत्त्व मन्वे प्राप्तपिण्डलोकोपाधिकएव पिण्डपदस्थाने प्रेतपदोक्तो न तु अग्निखात्ताद्युपाधिके एवमभिलापवाक्येऽपि सम्बन्धितेन नोल्लेखः किन्तु प्रेतत्वेन असम्बन्धिनोऽपि मठच्छात्रादेरपि प्रेतश्राद्धाधिकारित्वात्। सांवत्सरिकश्राद्धे एकोद्दिष्टविक्षतीभूतेऽपि प्राप्तपिण्डलोकोपाधिकपिण्डपदवन्मन्त्रे अभिलापे च सम्बन्धिबोधकपिण्डत्वेनैवोल्लेखः। एवञ्च देवताभ्यः पितृभ्यश्च इत्यत्र न प्रेतपदोक्तः पितृपदस्य दिव्यपितृपरत्वात्। एवं नैकवचनोक्तोऽपि तथा मधु द्यौरस्तु नः पिता इत्यस्य द्यौः स्वर्गः पिता पितेव सर्व्वस्याधिगम्यत्वात् मध्वस्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेति पदयोः सामानाधिकरण्यं प्रतीयते अत्र च द्युत्वपितृत्वयोर्भेदेऽपि सामानाधिकरण्येनाभेदावगमात् दिवः पितृसाधर्म्म्यप्राप्तिरिति पितृपदं पितृतुल्यपरं न तु जनकपरं प्राप्तपितृलोकपरं वेति। तेनात्र मन्वे पितेत्येव वक्तव्यं न तु प्रेतपदोक्तः। न वा पिण्डशब्दं न युञ्जीत इत्यनेन निषेधः। एवमामावेति मन्त्रे पितरा इत्यत्र नोक्तः। एवं वृद्धिश्राद्धेऽप्येतेषु नान्दीमुखविशेषणं न देयमेवेति। अन्यत्र सर्व्वत्रोत्सर्गवाक्ये मन्त्रे च पितृपदप्रयोगनिषेधात् प्रेतपदोक्तः कार्य्यः। विष्णुः। एकवन्मन्त्रानूद्देत एकोद्दिष्टे इति एकवत् एकवचनवत् यथा स्यात्तथोक्तेत यथा पवित्रे स्थो वैष्णव्यावित्यत्र पवित्रास्थ वैष्णवीति एवं विष्णोर्मनसा पूते स्थ इत्यत्रापि पूतमसीति। अत्र पितरो मादयध्वं यथाभागं मा वृषायध्वं इति मन्त्रे अत्र प्रेतमादयस्व यथाभागं मा वृषायस्व इत्यूह्यम्। अमी मदन्तः पितर इत्यत्र अमी मदत् प्रेत इति। वृषायिषत इत्यत्र वृषायिष्टेति। एत पितर इति पिण्डार्थावाहनमन्त्रे एहि प्रेत इति। सौम्यास इत्यत्र सौम्येति। दत्तास्मभ्यमित्यत्र देह्यस्मभ्यमिति। नियच्छत इत्यत्र नियच्छेति। नमो व इत्यादिमन्त्रेषु पितर इति स्थानचतुष्टये प्रेतेत्यूह्यम्। एवं व इत्यत्र ते इति। आग्नीःप्रार्थने येभ्य इत्यत्र यस्मै इति। तेषामित्यत्र तस्मैत्यूह्यम्। एतदः पितर इत्यत्र तु प्रेता इति विक्षतावूहो न तु बऋवचनस्य। एतदः पितरो वास इति जल्पन् पृथक् पृथक् इति ब्रह्मपुराणेन प्रकृतावेव पार्व्वणे पित्रादिषु प्रत्येकमेतदः पितर इति बऋवचनान्तमन्त्रप्रयोगात् अत्रानर्थक्येन तद्विकृतावेकोद्दिष्टेऽप्यसमवेतार्थबऋवचनस्यैव युक्तत्वात्। ततश्च प्रकृतौ समवेतार्थस्यैव विकृतावूहः। सांवत्सरिके त्वेकवचनस्यैवोहो न तु पिण्डपदस्य तत्र प्राप्तपिण्डलोकत्वेन तस्यैव युक्तत्वात्। स्मृतिः।

"प्रेतश्राद्धे यदुच्छिष्टं गृहे पर्य्युषितञ्च यत्।
दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन"॥

उच्छिष्टं पाकपात्रे अवशिष्टम्। गृहे उपरागे पर्य्युषितं स्थितम्। दम्पत्योराश्रमस्वामिनोर्भोजनानन्तरं पाकस्थाल्यामवशिष्टमिति श्राद्धचिन्तामणिः॥ यत्तु देवलवचनम्।

"एकोद्दिष्टस्य शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत्।
पश्चात् स्वयञ्च भुञ्जीत पुनर्मङ्गलभोजनम्"॥

इति। तस्यैकोद्दिष्टशेषं ब्राह्मणेभ्यः समुत्सृजेत् न त्ववशेषयेत् पुनर्मङ्गलभोजनं पाकान्तरकृतान्नं भुञ्जीतेत्यन्वय इति॥ * ॥ तत्करणकालो यथा। ब्रह्मपुराणम्।

"पूर्व्वाह्णे मातृकं श्राद्धमपराह्णे तु पैत्रिकम्।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्दैवनिमित्तकम्"॥

मध्याह्ने तु विशेषमाह कालमाधवीये व्यासः।

"कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्"॥

आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः। तत्समीपे कुतपशेषदण्डे।

यदाह गोतमः।

"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्"।

तेन पूर्व्वदिवसीयकुतपरौहिणयोस्तत्तत्तिथ्यैर्लाभे परत्र कुतपमात्रलाभे शुक्लपक्षेऽपि पूर्व्वदिने एकोद्दिष्टं उभयप्राप्त्यनुरोधात्। पूर्व्वदिने कुतपालाभे परत्र तल्लाभे कृष्णपक्षेऽपि परदिनएव समाप्तिकालादारम्भकालस्य बलवत्त्वात्। तथा च बौधायनः।

"यो यस्य विहितः कालः कर्म्मणस्तदुपक्रमे।
तिथिर्यद्यभिमता सा तु कार्य्या नोपक्रमोज्झिता"॥

उभयत्र कुतपमात्रालाभे शुक्लपक्षेऽपि पूर्व्वदिने समाप्तिकालानुरोधात् पूर्व्वदिने रौहिणालाभे परत्र सप्तममुहूर्त्तलाभे कृष्णपक्षेऽपि परदिने मध्याह्नानुरोधात्। इति श्राद्धतत्त्वम्॥ * ॥ एकोद्दिष्टविधिकसांवत्सरिकश्राद्धम्। यथा,—

"एकोद्दिष्टं पुरावृत्तं तद्विशेषं वदे पृथग्"।

प्रथमं निमन्त्रणं पादप्रक्षालनं आसनं अर्घ्य अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रतिसांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्धान्नेन युग्माखण्डं करिष्ये श्राद्धकरणानुज्ञापनम्। आसनं अर्घ्यं। गन्धादिदानं नित्यश्राद्धम्। अन्नसङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूयातिथिश्राद्धं कुर्य्यात्। ततस्तृप्तिं ज्ञात्वा दक्षिणाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम्। ॐ अमुकगोत्र मत्पितरमुकदेवशर्म्मन् एतत्ते जलमवने निक्ष्व ये चात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा। इति रेखोपरि दक्षिणामुखवारिधारादानम्। इति गारुडे २२३ अध्यायः॥

एकोत्रिका, स्त्री, (एका मुख्या उत्रिका कामनीया।) वृक्षविशेषः। इति रत्नमाला॥ आकादि इति भाषा॥

एज, ऋ ङ दीप्तौ इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं-अकं-सेट्।) ऋ मा भवान् एजिजत्। ङ एजते। इति दुर्गादासः।

एज, ऋ कम्पे। इति कविकल्पद्रुमः।(भ्वादिः-परं-सकं सेट्।) ऋ मा भवान् एजजित्। एजति वायुना वृक्षः। इति दुर्गादासः॥

एठ, ङ बाधने। इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं सकं-सेट्।) बाधनं विहृतिः। ङ एठते वत्सरं लोकः। इति दुर्गादासः॥

एड़ः, त्रि, (इलति। इल क्षेपे। अच्। डलयोरैक्यम्। यद्वा आ सर्व्वतः ईड्यते। ईड़ स्तुतौ। घञ्।) वधिरः। इत्यमरः॥ (मेषः। यथाह काव्यायनः।

"स्वैड़वराहेषूदधारा प्राचीदं विष्णुः"॥)

एड़कः, पुं (एड़+स्वार्थे कन्। यद्वा इलति एलयति वा इल+खुल्।) मेषः। इत्यमरः॥ वनच्छागलः। इति चिकाण्डशेषः॥

एड़का, स्त्री, (एड़कस्य स्त्री। अजादित्वात् टाप्। ह्रस्वपकादित्वान्नेत्वम्।) मेषी। इत्यमरटीकायां रायमुकुटः॥

एड़गजः, पुं, (एड़ो मेष एव गजो यस्य मङ्गकत्वात्।) चक्रमर्द्दकः। इत्यमरः॥ चाकुन्दिया इति भाषा। अस्य गुणाः। वायुकफकुष्ठव्रणदोषगुल्मोदररोगार्शोनाशित्वम्। कटुत्वञ्च। इति राजवल्लभः॥ (पर्य्यायः यथा,—

"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः।
पद्माटः स्यादेड़गजश्चक्री पुन्नाट इत्यपि"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। गुणाश्चास्य चक्रमर्द्दशब्दे ज्ञेयाः॥ व्यवहारो यथा,—

"सलोमशः सैड़गजः करञ्जः"।

इति चरके सूत्रस्थाने त्रयस्त्रिंशेऽध्याये॥)

एड़मूकः, त्रि, (एड़ो वधिरो मूकश्च।) वधिरः मूकश्च। वक्तुं श्रोतुमशक्तितः। वाक्श्रुतिवर्जितः। इत्यमरः॥ मूढः। इति मेदिनी॥

एड़ुकं, क्ली, (ईड़+उलूकादयश्चेति ४। ४१। उणादिसूत्रेण साधु। निपातनात् क्रुस्वम्।) एड़ूकम्। इति भरतो द्विरूपकोषश्च॥

एड़ूकं, क्ली, (ईड्यते इति। "उलूकादयश्च" ४। ४१। उणादिसूत्रेण साधु।) अन्तर्न्यस्तकीकसकुड्यम्। इत्यमरः॥ कीकसमिव कीकसं यत् कुड्यम् छिटावेड़ा इति ख्यातमित्यन्ये। इति सारसुन्दरी॥ कीकसमस्थि एतत् काष्ठादिकठिनद्रव्योपलक्षणं कीकसमिव कीकसं किलिञ्जादीति मधुः॥

"मध्यसंस्थापितास्थादि कुड्यमेड़ूकमुच्यते"।

इति माधवः॥ (यथा महाभारते वनपर्व्वणि।

"एड़ूकिञ्चा पृथिवी न देवगृहभूषिता"॥

अस्य शब्दस्य पुंस्त्वमपि दृश्यते महाभारते ३। १९०। ६३। यथा,—

"एड़ूकान् पूजयिष्यन्ति वर्जयिष्यन्ति देवताः।
शूद्राः परिचरिष्यन्ति न द्विजान् युगसंक्षये"॥)

एड़ोकं, क्ली, एड़ूकम्। इति भरतधृतद्विरूपकोषः॥

एणः, पुं स्त्री, (एति द्रतं गच्छतीति। इ+बाहुलकात् णः।) हरिणः। इति राजनिर्घण्टः॥ मृगविशेषः। इत्यमरः॥ अस्य मांसगुणाः। कषायत्वम्। मधुरत्वम् पित्तरक्तकफज्वरनाशित्वम्। संग्राहित्वम्। रोचनत्वम्। हृद्यत्वम्। बलकारि-

त्वञ्च। इति राजवल्लभः॥ (यथा मनुः ३। २६९।
"अश्वावेशस्य मांसेन रौरवेण नवेन तु"॥
अस्य लक्षणं यथा॥ "एणः कृष्णः प्रकीर्त्तितः"।
इति भावप्रकाशस्य पूर्ब्बखण्डे २ भागे॥)

एणकः, पुं, (एण+स्वार्थे कन्।)एणः। इति शब्द रत्नावली॥

एणतिलकः,पुं, (एणो मृगस्तिलकमिव यस्य। चन्द्रस्य मृगाङ्कत्वात्तथात्वम्।) चन्द्रः। इति हारावली॥

एणभृत्, पुं, (एणं बिभर्त्तीति। एण+भृ+क्विप्।) चन्द्रः। इति हेमचन्द्रः॥

एतं, त्रि, (आ+इण्+क्त।)आगतम्। इति मेदिनी॥ कर्ब्बूरवर्णयुक्तम्। इत्यमरः॥ (स्त्रियां एनी एता। पाणिनिः ४। १। ३९॥)

एतः, पुं, (आ सम्यक् एति गच्छतीति। आ+इण्+क्त।) मृगः। इति शब्दरत्नावली॥ कर्ब्बूरवर्णः। इति मेदिनी॥

एतद्, त्रि, (इण्+"एतेस्तुट् च" इति उणादिसूत्रेण १। १३२। अतोऽदि स्यात्तस्य तुड़ागमः।) पुरोवर्त्तिवाचकसर्ब्बनामशब्दः। इति व्याकरणम्॥ एइ इति भाषा।
("एते वयमसी दाराः कन्येयं कुलजीवितम्"। इति कुमारे ६। ६३॥ "एतान् महाराज विशेषधर्म्मान्"। इति शुद्धितत्त्वम्। उक्तस्य पश्चादुक्तौ "द्वितीयाटौस्नेनः" २। ४। ३४। इति एणादेशः स्यात्। यथा "य एनामाश्रमधर्म्मे नियङ्क्ते"। इति शाकुन्तले प्रथमाङ्के॥) [हेमचन्द्रः॥

एतनः, पुं, (आङ्+इ+तन।) निश्वासः। इति

एतर्हि, व्य, (इदम्+"इदमोर्हिल्"। ५। ३। १६। इति र्हिल् ततो "एतेतौ रथोः" ५। ३। ४। इति एतादेशः।) एतस्मिन् काले। सम्प्रति। इत्यमरः॥ (यथा भागवते १। १७। ४२।
"स वय एतर्ह्यध्वन्य आसनं पार्थिवोचितम्"॥)

एतशः, पुं, (इण्+"इणस्तशन्तशसुनौ" ३। १४९। इति उणादिसूत्रेण तशन्।) ब्राह्मणः। इत्युणादिकोषः॥

एतशाः, [स्] पुं, (इण्+"इणस्तशन्तशसुनौ" ३। १४९ इति उणादिसूत्रेण तशसुन्।) ब्राह्मणः। इत्युणादिकोषः॥

एतावत्,त्रि, (एतद्+"यत्तदेतेभ्यः परिमाणे वतुप्"। ५। २। ३९। इति परिमाणे वतुप्। (एतत्परिमाणम्। इति व्याकरणम्॥ (यथा रघुः २। ५१।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन"॥)

एध, ऽ, वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वादिरात्मं-अकं-सेट्।) ऽ एधते। इति दुर्गादासः॥ (यथा मनुः ४। १७०।
"हिंसारतश्च यो नित्यं नेहासौ सुखमेधते"॥)

एधः, पुं, (इध्यतेऽनेनाग्निः। इन्ध+"हलश्च" ३। ३। १२१। इति करणे घञ्। अवोदैधौद्मप्रश्रथहिमश्रथा" इति घञि नलोपो गुणश्च निपातितः॥) इन्धनम्। इत्यमरः॥ जालानि काठ इति भाषा। (यथा रघौ ९। ८१

"एधान् ऋताग्नयवतः स मुनिर्ययाचे"॥)

एधः, [स्] क्ली, (एध्+असुन्।) इन्धनम्। इत्यमरः॥ (यथा गीतायाम्। ४। ३७।
"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জुनः"॥)

एधतुः, त्रि, (एध् वृद्धौ "एधिवह्योश्चतुः" १। ७९ उणादिसूत्रेण चतुः।) वर्द्धितम्। वृद्धियुक्तम्। इति शब्दरत्नावली॥

एधतुः, पुं, (एध+"एधिवह्योश्चतुः"। १। ७९। उणादिः चतुः।) पुरुषः। अग्निः। इति मेदिनी॥

एधितः, त्रि, (एध वृद्धौ+क्त।) वर्द्धितः। वृद्धिप्राप्तः। इत्यमरः॥

एनः, [स्] क्ली, (एति गच्छति प्रायश्चित्तेन। इण् आगसीत्यसुन् नुड़ागमश्च।) पापम्। अपराधः। इति मेदिनी॥ निन्दा। इति शब्दरत्नावली॥
("एनोनिवृत्तेन्द्रियवृत्तिरेनम्
जगाद भूयो जगदेकनाथः॥
इति रघुः। ५। २३॥)

एरका, स्त्री, द्वयविशेषः। तत्पर्य्यायः। गुन्द्रमूला २ गुन्द्री ३ गुन्द्रा ४ गुरी ५। यथा भागवते १। ३। १८।
"चतुर्दंष्ट्रं नारसिंहं बिभ्रद् दैत्येन्द्रमूर्জ্জितम्।
ददार करजैर्वक्षस्येरकां कटकृद् यथा"॥)
अस्या गुणाः। हिमत्वम्। शुक्रवर्द्धिकारित्वम्। चक्षुर्हितत्वम्। वातकोपनत्वम्। मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशित्वञ्च। इति राजनिर्घण्टः॥ (यथा वैद्यके,
"एरका शिशिरा रुच्या चक्षुष्या वातकोपिनी।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी"॥
एषा यत्र व्यवक्रियते तद्यथा,—
"निर्व्वापणाः स्याज्जलमेरका च"।
इति चरके सूत्रस्थाने तृतीयऽध्याये॥ "एरका होग्गलः"। इति चरकस्य शिवदासीयटीका॥)

एरङ्गः, पुं, (एरति सम्यक् भ्रमति यः। आ+ईर् गतौ कम्पने+अङ्गच्।) मत्स्यभेदः। रङ्गा इति ख्यातः। अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। शीतलत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥

एरण्डः पुं, (एरयति वायुम्। आ+ईर् गतौ कम्पने च+बाहुलकात् अण्डच्।) वृक्षविशेषः। भेरेण्डा इति भाषा। तत्पर्य्यायः। व्याघ्रपुच्छः २ गन्धर्व्वहस्तकः ३ उरुवूकः ४ रुवूकः ५ चित्रकः ६ चञ्चुः ७ पञ्चाङ्गुलः ८ मण्डः ९ वर्द्धमानः १० षण्ड्मबकः ११। इत्यमरः॥ उरुवुकः १२ रुवुकः १३ रूवुकः १४ रुवकः १५ वुकः १६ अमण्डः १७ आमण्डः १८ षण्ड्मनः १९। इति तट्टीकायां भरतः॥ कान्तः २० तरुणः २१ शुक्रः २२ वातारिः २३ दीर्घपत्रकः २४। इति राजनिर्घण्टः॥ अस्य तैलस्य गुणाः। मधुरत्वम्। गुरुत्वम्। अतिश्लेष्मवर्द्धनत्वम्। वातरक्तगुल्महृद्रोगजीर्णज्वरनाशित्वञ्च। इति राजवल्लभः॥ अपि च। क्षमिदोषसकलाङ्गशूलकुष्ठनाशित्वम्। स्वादुत्वम्। रसायनोत्तमत्वम्। पित्तप्रकोपनत्वम्। अतिदीपनत्वम्। आमवातनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्य भेदकत्वगुणोऽप्यस्ति॥ श्वेतैरण्डगुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफार्त्तिज्वरवायुकासनाशित्वम्। रसार्हत्वञ्च। इति राजनिर्घण्टः॥ अस्य मूलगुणाः। शूलवायुकफनाशित्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥
(शुक्लरक्तैरण्डयोः पर्य्यायगुणा यथा,—
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥
रक्तोऽपरो रुवुकः स्यादुरुवूको रुवूस्तथा।
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान्॥
वंभ्रश्वासकफानाहकासकुष्ठाममारुतान्।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्॥
मूत्रकृच्छ्रहरश्चापि पित्तरक्तप्रकोपनम्।
वातार्श्यग्रहणं गुल्मं वस्तिशूलहरं परम्॥
कफवातक्रिमीन् हन्ति वृद्धिं सन्निविधामपि।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्॥
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"सतिक्तोषणमेरण्डतैलं स्वादु सरं गुरु।
ब्रध्नगुल्मानिलकफानुदरं विषमज्वरम्॥
रुक्शोफौ च कटीगुह्यकुक्षिष्ठाश्रयाञ्जयेत्।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवन्विति"॥
इति शार्ङ्गधरस्य पूर्ब्बखण्डे चतुर्थेऽध्याये॥
"एरण्डतैलं मधुरमुष्णं तीक्ष्णं दीपनं कटुकषायानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुरविपाकं वयःस्थापनं योनिशुक्रविशोधनमारोग्यमेधाकान्तिस्मृतिबलकरं वातकफहरमधोभागदोषहरञ्च"॥
इति सुश्रुते सूत्रस्थाने पञ्चचत्वारिंशत्तमेऽध्याये॥)

एरण्डजः, पुं, (एरण्ड+स्वार्थे कन्।) एरण्डवृक्षः। इति भरतो द्विरूपकोषश्च॥ (एरण्डशब्देऽस्य विशेषो ज्ञेयः॥)

एरण्डजं, त्रि, (एरण्डात् एरण्डवृक्षात् जायते इति। एरण्ड+जन्+ड।) एरण्डवृक्षजातम्। तत्तैलं स्नेहमध्ये श्रेष्ठविरेचकम्। यथा।
"चूर्णमध्ये त्रिवृत्चूर्णं स्नेहेषु स्नेहे एरण्डजं तैलं फलेष्वेव हरीतकी"॥
इति वाभटः॥
("एरण्डजं घनञ्चापि स्वादुमेव मृदु स्मृतम्।
हृद्वस्तिजङ्घाकट्यूरुशूलानाहविबन्धनुत्॥
आनाहाष्ठीलवान्तारुक्प्लीहोदावर्त्तशूलिनाम्।
वातपित्तविकाराणां विदध्याच्च प्रशान्तये।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डसमुद्भवम्"॥
इति प्रथमस्थाने अष्टमेऽध्याये हारीतेनोक्तम्॥)

एरण्डपत्रिका, स्त्री, (एरण्डस्य पत्रमिव पत्रमस्याः।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

एरण्डफला, स्त्री, (एरण्डस्य फलमिव फलमस्याः।)

दन्तीवृक्षः । इति राजनिर्घण्टः ॥
(अस्याः पर्य्याया यथा,—
"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला श्रीघ्रा श्वेनघण्टा घुणप्रिया ।
वाराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

एरण्डः, स्त्री, (आ + ईर् + बाहुलकात् अण्डच् + टाप् ।) पिप्पली । इति शब्दचन्द्रिका ॥

एर्व्वारुः, पुं, (एरणमिति । आ + ईर् + सम्पदादित्वात् क्विप् । एरं इणोति वारयति वा । इण् + बाहुलकात् उण् ।) कर्कटीभेदः । तत्पर्य्यायः । व्यालपत्रा २ लोमशा ३ स्थूला ४ तोयफला ५ हस्तिदन्तफला ६ कर्कटी ७ । अस्य गुणाः । पित्तहरत्वम् । सुशीतलत्वम् । मधुरत्वम् । मूत्रामयघ्नत्वम् । रुचिप्रदत्वम् । सन्तापमूर्च्छापहरत्वम् । दाहनाशित्वम् । अतिसेवितत्वेत् वातप्रकोपकारित्वञ्च । इति राजनिर्घण्टः ॥
("एर्व्वारुकं स्वादु शीतं सक्षारं कफवातहृत् ।
नातिपित्तकरं रुच्यं दीपनं दाहनाशनम्" ॥
इति प्रथमस्थाने दशमेऽध्याये हारीतेनोक्तम् ॥
"त्रिदोषैर्व्वारुकं स्वादु गुरु विष्टम्भि शीतलम् ।
एर्व्वारुकञ्च सम्यक्तं दाहहृत्पाण्डुमार्त्तिनुत्" ॥
इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम् ॥)

एलकः, त्रि, (एलति विग्रहादिस्थले आत्मानं क्षिपतीति इल् + ण्वुल् ।) मेषः । इति राजनिर्घण्टः ॥

एलङ्कः, पुं, (एरङ्कः + रस्य लः ।) मत्स्यभेदः । रायकड़ा इति भाषा । रायखाँड़ा एलाङ्का इत्यपि ख्यातः । अस्य गुणाः । मधुरत्वम् । दृष्यत्वम् । संग्राहित्वम् । कफवातनाशित्वम् । मेधाग्निपुष्टिकारित्वम् । शीतलत्वम् । गुरुत्वम् । श्लेष्मप्रसादनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा वैद्यकचक्रपाणिदत्तद्रव्यगुणे मांसवर्गाधिकारे ॥
"एलङ्कः स्निग्धो मधुरो गुरुर्विष्टम्भिशीतलः" ॥)

एलबालु, क्ली, (एलतीति । इल प्रेरणे पचाद्यच् । टाप् । एलेव बलते । बल प्राणने । बाहुलकात् उण् । डयापोरिति ह्रस्वः ।) एलबालुकम् । इति शब्दरत्नावली ॥ (यत्र व्यवह्रियते तद्यथा, रोध्रादिगणे ॥
"शैलबालु परिपेलवमोचाः" ॥
इति वाभटे सूत्रस्थाने षष्ठदशेऽध्याये ॥)

एलबालुकं, क्ली, (एलबालु + स्वार्थे कन् ।) सुगन्धिद्रव्यविशेषः । लालुका इति ख्यातम् । तत्पर्य्यायः । ऐलेयम् २ सुगन्धि ३ हरिबालुकम् ४ बालुकम् ५ इत्यमरः ॥ हरिवालुकम् ६ । इति तट्टीका ॥ आलुकम् ७ एलवालुकं ८ कपित्थत्वक् ९ गन्धत्वक् १० कुष्ठगन्धि ११ । अस्य गुणाः । व्यग्र्यत्वम् । कषायत्वम् । कफवातमूर्च्छातिज्वरदाहनाशित्वम् । परमरुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ कक्कोलसदृशं कुष्ठगन्धि ॥ अस्य पर्य्यायगुणाः ॥
"एलबालुकमैलेयं सुगन्धि हरिबालुकम् ।
ऐलबालुकमेलालु कपित्थं पञ्चमीरितम् ॥
एलालु कटुकं पाके कषायं शीतलं लघु ।
हन्ति कण्डूव्रणाच्छर्द्दिहृद्रोगारुचिकृमीन् ॥
बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन्" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

एलविलः, पुं, ऐलविलः । कुबेरः । इत्यमरटीका ॥

एला, स्त्री, (इल् + अच् + टाप् ।) फलवृक्षविशेषः । एलाचि इति भाषा । तत्पर्य्यायः । बहुलगन्धा २ ऐन्द्री ३ द्राविड़ी ४ कपोतपर्णी ५ बाला ६ बलवती ७ हिमा ८ चन्द्रिका ९ सागरगामिनी १० गन्धालीगर्भः ११ एलीका १२ कायस्था १३ । इति राजनिर्घण्टः ॥ सा द्विविधा सूक्ष्मा । गुजराटी एलाचि इति भाषा । स्थूला च । बड़ एलाचि इति भाषा । आद्यायाः पर्य्यायः । उपकुञ्चिका १ तुत्था २ कोरङ्गी ३ त्रिपुटा ४ त्रुटिः ५ । इत्यमरः ॥ वयस्था ६ तीक्ष्णगन्धा ७ सूक्ष्मैला ८ त्रिपुटी ९ । इति रत्नमाला ॥ द्वितीयायाः पर्य्यायः । एष्वीका २ चन्द्रबाला ३ निष्कुटिः ४ बहुला ५ । इत्यमरः ॥ स्थूला ६ मालेया ७ ताड़काफलम् ८ । इति रत्नमाला ॥ एलाद्वयगुणाः । शीतलत्वम् । तिक्तत्वम् । उष्णत्वम् । सुगन्धित्वम् । पित्तरोगकफनाशित्वम् । हृद्रोगकारित्वम् । मलार्त्तिवान्तिपुंस्त्वघ्नत्वम् । स्थविरस्य गुणाधिक्यत्वञ्च । इति राजनिर्घण्टः ॥ अपिच । शूलकोष्ठवह्निदग्धाच्छर्द्दिवायुनाशित्वम् । इति राजवल्लभः ॥ सूक्ष्मैलाविशेषगुणाः । कफश्वासकासार्शोमूत्रकृच्छ्रनाशित्वम् । इति राजनिर्घण्टः ॥
("एला स्थूला च बहुला एष्वीका त्रिपुटापि च" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

एलापत्रः, पुं, (एलापत्रमिवाकारोऽस्यस्य । अर्शआदेरच् ।) नागभेदः । इति जटाधरः ॥ (यथा महाभारते आस्तीके पर्व्वणि १ । ३५ । ६ ।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः" ॥)

एलापर्णी, स्त्री, (एलाया इव पर्णमस्याः । "पावकर्णेति" । ४ । १ । ६४ । ङीष् ।) वृक्षविशेषः । काँटा आमरुली एलानी इति च भाषा । तत्पर्य्यायः । सुवहा २ राखा ३ युक्तरसा ४ । इत्यमरः ॥

एलीका, स्त्री, (आ + इल् + ईकन् + टाप् ।) सूक्ष्मैला । इति राजनिर्घण्टः ॥ (द्राविड़ीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

एव, अ, (अयनमिति । इण् + "इणशीभ्यां वन्" । १ । ५२ । उणादिः वन् ।) अवधारणम् । यथा । त्वमेव जानासि । तत्पर्य्यायः । एवम् २ तु ३ पुनः ४ वा ५ । इत्यमरः ॥ व ६ च ७ । इति सुभूतिः ॥ साहश्यम् । इति भरतः । नियोगः । वाक्यपूरणम् । चारनियोगः । विनिग्रहः । इति मेदिनी ॥ (अनियोगः । यथा "अद्येव" इति मुग्धबोधव्याकरणम् । एवकारस्त्रिविधः । विशेष्यसङ्गतः विशेषणसङ्गतः क्रियासङ्गतश्चेति । तत्र विशेष्यसङ्गतस्य एवकारस्य व्यन्ययोगव्यवच्छेदोऽर्थः । पार्थ एव धनुर्द्धर इत्यादौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्यवच्छेदबोधात् । धनुर्द्धरपदस्य उत्कृष्टधनुर्द्धरे लाक्षणिकत्वात् तथैव तात्पर्य्यात् । पार्थान्ययोगव्यवच्छेदश्च । विशेषणसङ्गतस्य एवकारस्य अयोगव्यवच्छेदोऽर्थः । शुक्लः पाण्डुर एव इत्यादौ विशेष्ये शुक्ले पाण्डुत्वायोगव्यवच्छेदबोधात् । क्रियासङ्गतस्य एवकारस्य चात्यन्तायोगव्यवच्छेदोऽर्थः । सम्भवाभिप्रायके नीलं सरोजं भवत्येव इत्यादौ अन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्त्तृत्वात्यन्तायोगव्यवच्छेदबोधादिति सम्प्रदायः ॥) गमनकर्त्तरि चि । इति सिद्धान्तकौमुदी (यथा ऋग्वेदे ६ । ५१ । २ । "ऋजुमर्त्तेषु वृजिन च पश्यन्नभिचष्टे शूरो अर्य एवान्" । अस्मे पुं, यथा, ऋग्वेदे १ । १५८ । ३ । "उप वामवः शरणम् गमेयं शूरो नाज्म पतयद्भिरेवैः" । "एवैरश्वैः" इति भाष्यम् । गमने क्ली । यथा, ऋग्वेदे १ । १२९ । ३ । "एवेन सद्यः पर्य्येति पार्थिवम्" । "एवेन गमनेन" । इति । भाष्यम् ॥)

एवं, अ, साम्यम् । साहश्यम् । यथा । अग्निरेवं विप्रः । अग्निरिवेत्यर्थः । तत्पर्य्यायः । वत् २ वा ३ यथा ४ तथा ५ इव ६ । वत्स्थाने व इति केचित् पठन्ति । अयं प्रकारः । (यथा, कुमारे । ६ । ८४ ।
"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी" ॥)
तत्पर्य्यायः । इत्थम् २ । अवधारणम् । इत्यमरः ॥ यथा । एवमेतत् । अस्य पर्य्यायः एवशब्दे लिखितः । अङ्गीकारः । अर्थप्रश्नः । परशक्तिः । इच्छा । इति मेदिनी ॥

एष ऋ ऽ गतौ । इति कविकल्पद्रुमः ॥ भ्वादिः आत्मं-सकं-सेट् ।) ऋ मा भवान् एषिवत् । ऽ एषते । इति दुर्गादासः ।
(यथा, भागवते ३ । १४ । ४५ ।
"स वै वत भ्रष्टमतिस्तवैषते
यः कर्म्मणां पारमपारकर्म्मणाम्" ॥)

एषः, पुं, पुरोवर्त्तिपुरुषः । एतद्शब्दस्य पुंलिङ्गे प्रथमैकवचने रूपमिदम् ॥

एषणः, पुं, (इष् + ल्युः ।) लौहमयबाणः । इति हलायुधः ॥ (यथा, भागवते ७ । ९ । ३९ ।
"कामातुरं हर्षशोकभयैषणार्त्तं
तस्यैकथं तव पतिं विशृणामि दीनः" ॥)

एषणिका, स्त्री, (इष्यतेऽनया । इष् गतौ + ल्युट् + स्वार्थे कन् ततो टाप् इत्वञ्च ।) स्वर्णकारादीनां तुला । निक्ति इति भाषा । तत्पर्य्यायः । नाराची २ । इत्यमरः ॥

एषणी, स्त्री, (इष्यते अनया, इष् + ल्युट् + ङीष् ।) व्रणमार्गानुसारिणी । बेलकार इति भाषा । तुलाभेदः । इति मेदिनी ॥ निक्ति इति भाषा ॥

एषा, स्त्री, (इषु शु वाञ्छे + टाप् ।) इच्छा । इति जटाधरः ॥ एतद्शब्दस्य स्त्रीलिङ्गेऽपि रूपमिदम् ॥

ऐ

ऐ ऐकारः । स तु द्वादशस्वरवर्णः । अस्योच्चारणस्थानं तालु कण्ठश्च । ("एदैतोः कण्ठतालु" इ-

त्युक्तः। तथाच शिक्षायाम्। "ए ऐ तु कण्ठ-तालव्यावौ कण्ठौष्ठजौ स्मृतौ"॥) स च ह्रस्वो न भवति। (द्विमात्रत्वात् दीर्घस्त्रिमात्र-त्वात् प्लुतश्च भवति। उदात्तानुदात्तस्वरितभेदै-स्त्रिविधोऽपि पुमः प्रत्येकमनुनासिकाननुनासिक-भेदाभ्यां षड्विध एव॥)

"ऐकारं परमं दिव्यं महाकुण्डलिनी स्वयम्।
कोटिचन्द्रप्रतीकाशं पञ्चप्राणमयं सदा॥
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
सदाशिवमयं वर्णं विन्दुत्रयसमन्वितम्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायाम्) तस्य लेखनप्रकारो यथा,—
"एकाररूपमधो तु किञ्चिदूर्द्ध्वे तदोर्द्ध्वतः।
चन्द्रेन्द्रभानवस्तासु मात्रा शक्तिः क्रमात् स्मृताः॥
त्रिधा शक्तिमयी पूर्व्वा दुर्गा वाणी सरस्वती"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तन्नामानि यथा,—
"ऐलब्जा भौतिकः कान्ता वायवी मोहिनी विभुः।
दत्ता दामोदरप्रज्ञोऽधरो विज्ञतमुख्यपि॥
क्षमात्मको जगद्योनिः परः परनिबोधकृत्।
ज्ञानामृता कर्पर्द्दिश्रीः पीठेशोऽग्निः समाष्टकः॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः।
महेश्वरो द्वादशी च विमलश्च सरस्वती॥
कामकोटो वामजानुरंशुमान् विजयो जटा"।
इति तन्त्रशास्त्रम्॥ दन्त्यान्तः। योनिः। इति बीजवर्णाभिधानम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमः। ("ऐर्यजादिः स्यादोर्निष्ठातन औरनिट्"। एतेन यजादिगणीयत्वात् "ऐ वसौ निवासे इत्यस्य लिटिप्रभृतिषु सम्प्रसारणे कृते उवास इत्यादयो भवेयुः"॥ माष्टकान्यासे अधरे न्यस्तया तदाख्यया प्यभिधानम्। माष्टकान्यास-मन्त्रो यथा। "ऐं नम ओष्ठे ऐं नमोऽधरे"॥ इति॥)

ऐ, अ, (एतीति। आ + इण् + विच्।) आकाशनम्। स्मरणम्। आमन्त्रणम्। इति मेदिनी॥

ऐः पुं, (एति प्राप्नोति सर्व्वम्। आङ् + इण् + विच्।) महेश्वरः। इति एकाक्षरकोषः॥

ऐकागारिकः, त्रि, (एकमसहायमगारं प्रयोजनमस्य। "ऐकागारिकट् चौरे" ५। १। ११३ इति इकट् वृद्धिश्च निपातनात्।) चौरः। इत्यमरः। एका-गारवासी॥

ऐकाहिकं, त्रि, (एकाहे भवम्। एकाह + ठक्।) एकाहनिष्पन्नम्। एकदिनान्तरभवम्। इति वैद्य-कम्॥ (वैद्यकगोपालकृष्णकविभूषणकृतकषाय-संग्रहे दास्यादिपाचने यथा। "भूतोत्थं विषमं त्रिदोषजनितञ्चैकाहिकं द्याहिकम्॥
"काकजङ्घा बला श्यामा ब्रह्मदण्डी कृताञ्जलिः।
एभिपर्णी त्वपामार्गस्तथा भृङ्गराजोऽक्षमः॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः।
रक्तसूत्रेण संवेष्ट्य बद्धमैकाहिकं जयेत्"॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥) एकाहभवम्। यथा,—
"ऐकाहिकं द्वितीयस्थं तृतीयकचतुर्थकम्"।
इत्यादि माहेश्वरकवचम्॥

ऐकाहिकज्वरः, पुं, (ऐकाहिक एकाहभवो ज्वरः।) एकदिनान्तरागतज्वरः। तस्यौषधं यथा,—
"पीतं दधिकमूलन्तु पर्य्युषितजलेन वै।
सार्द्धं विनाशयेद्राहं ज्वरञ्च परमेश्वर!॥
शिखायाश्चैव तद्भस्म भवेदैकाहिकादिनुत्।
एतत् सकाङ्किकं पीतं रक्तकुष्ठज्वरादिनुत्॥
वास्योदकेन पीतं तत् दहद्विषहरं भवेत्"।
इति गारुड़े १९३ अध्यायः॥
("ऐकाहिको द्याहिकश्च स्त्राहिकश्च तथापरः"।
"मुस्तामृतामलक्यश्च नागरं कण्टकारिका।
कणाचूर्णान्वितः क्वाथस्तथा मधुसमन्वितः॥
ऐकाहिकं वा वेलाद्यं ज्वरजातं व्यपोहति।
वानरेन्द्रमुखं दिव्यं तरुणादित्यतेजसम्॥
ज्वरमैकाहिकं घोरं तत्क्षणादेव नश्यति।
वानराकृतिमालिख्य खटिकाभिः पुनः पृथक्॥
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेद्भिषजां वरः"।
मन्त्रो यथा,
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्याहिक-त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर-श्लेष्मज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां बन्ध बन्ध ह्रां ह्रीं ह्रूं फट् स्वाहा। इति हारीते चि-कित्सास्थाने। २ अध्याये॥)

ऐक्यं, क्ली, (एक + भावे ष्यञ्।) एकस्य भावः। एकता। एकत्वम्। एकीभावः। यथा। शारदा-यामू।
"गुरोर्लब्ध्वा पुनर्व्विद्यामकृत्वो जपेत् सुधीः।
गुरुविद्यादेवतानामैक्यं सम्भावयन् धिया॥
प्रणमेद्दण्डवद्भूमौ गुरुं तं देवतात्मकम्"।
इति दीक्षातत्त्वम्॥

ऐक्षवं, त्रि, (इक्षोर्विकारः। इक्षु + अण्।) इक्षु-विकारः। इक्षुसम्बन्धिगुड़ादि। इति स्मृतिः॥ (अस्य गुणादय इक्षुशब्दे ज्ञातव्याः॥)

ऐक्षवं, क्ली, (इक्षोर्भवम्। इक्षु + अण्।) इक्षुभव-गुड़ादि। यथा,—
"कदली लवणी धात्री फलान्यगुड़मैक्षवम्।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्बुधाः"॥
इति तिथ्यादितत्त्वम्॥ इक्षुगुड़ादिगुणा इक्षुशब्दे ज्ञातव्याः॥)

ऐक्षुदं, क्ली, (इक्षुद्या इदम्। "शुक्लादिभ्योऽण्" ४। ३। १६४। विधानसामर्थ्यान्नाद्यो लुक्।) इक्षु-दीक्षस्य फलम्। इत्यमरः॥
("स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैक्षदम्"॥
इति सूत्रस्थाने। ४६ अ। सुश्रुतेनोक्तम्॥)

ऐड़कं, क्ली, (एड़क एव। स्वार्थे अण्।) एड़कम्। इति भरतो द्विरूपकोषश्च॥

ऐणं, त्रि, (एणस्य इदम्। एण + अण्।) एणस्य चर्म्मादि। इत्यमरः॥

ऐणिकः, त्रि, (एणं मृगं हन्तीति। एण + ठक्।) एणहन्ता। इति व्याकरणम्॥

ऐणेयं, त्रि, (एण्या इदम्। एणी + ढञ्।) एण्या-श्चर्म्मादि। इत्यमरः॥ स्त्रीणां रतिबन्धविशेषः। इति हेमचन्द्रः॥

ऐतिह्यं, क्ली, (इतिह उपदेशपारम्पर्य्यम्। तदेव। इतिह "अनन्तावसथेतिहभेषजाञ् ञ्यः"। ५। ४। २३। इति स्वार्थे ञ्यः।) पारम्पर्य्योपदेशः। तत्पर्य्यायः। इतिह। इत्यमरः॥ (यथा रामायणे। ५। ८७। २३।
"ऐतिह्यमनुमानञ्च प्रत्यक्षमपि चागमम्।
ये हि सम्यक् परीक्षन्ते कुतस्तेषामबुद्धिता"॥
"ऐतिह्यं नाम आप्तोपदेशो वेदादिः"।
इति विमानस्थाने। ८ अ। चरकेणोक्तम्॥)

ऐन्दवं, क्ली, (इन्दुर्देवता यस्य। इन्दु + अण्।) मृग-शिरोनक्षत्रम्। इति ज्योतिषम्॥ यथा। मात्स्ये।
"अश्विनी रेवती मूलमुत्तरत्रयमैन्दवम्।
स्वाती हस्तानुराधा च ग्रहारम्भे प्रशस्यते"॥
ऐन्दवं मृगशिरः। इति मठप्रतिष्ठातत्त्वम्॥ (इन्दोश्चन्द्रस्य इदम्। चन्द्रसम्बन्धिनि, त्रि। यथा, मनुः ११। १२५।
"सङ्क्रान्तावन्नमश्नीयात् मासं श्रोधनमैन्दवम्।
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम्"॥)

ऐन्दवी, स्त्री, (ऐन्दव + ङीप्।) सोमराजी। इति वैद्यकम्॥

ऐन्द्रं, क्ली, (इन्द्रो देवता यस्य। इन्द्र + अण्।) ज्येष्ठा-नक्षत्रम्। इति जटाधरः॥ मूलविशेषः। वन आदा इति भाषा। तत्पर्य्यायः। वनार्द्रका २ वनजा ३ अरण्यजार्द्रका ४। अस्य गुणाः। कटु-त्वम्। अम्लत्वम्। रुचिबलाग्निकारित्वञ्च। इति राजनिर्घण्टः॥ (इन्द्रस्य इदम्।) इन्द्रसम्बन्धिनि त्रि। (यथा मनुः ५। ९३।
"न राज्ञामधदोषोऽस्ति व्रतिनां न च सत्रिणाम्।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा"।
"ऐन्द्रं स्थानं राज्याभिषेकाख्यं आधिपत्यकारणम्"
इति तट्टीकायां कुल्लूकभट्टः॥ तथा रघुः २। ५०।
"महीतलस्पर्शनमात्रभिन्न-
मूर्द्धं हि राज्यं पदमैन्द्रमाजुः"॥
"ऐन्द्रमम्बु सुपाचस्यमविपन्नं सदा पिबेत्"॥
इति वाभटे सूत्रे। ५ अ॥)
(इन्द्रस्यापत्यं पुमान्।) वालिवानरे (अर्ज्जुने जयन्ते च पुं॥ जलविशेषः।)

ऐन्द्रजालिकः, पुं, (इन्द्रजालेन दीव्यतीति। इन्द्रजाल + ठक्।) इन्द्रजालकारकः। तत्पर्य्यायः। प्रती-हारकः २ मायाकारकः ३ कौसृतिकः ४ मायावी ५ वंसकः ६ मायी ७ मायिकः ८। इति जटा-धरः॥

ऐन्द्रलुप्तिकः, त्रि, केशभ्रंशरोगविशिष्टः। टेको इति भाषा। तत्पर्य्यायः। खल्लीटः २ खलतिः ३। इति भूरिप्रयोगः॥

ऐन्द्रिः, पुं, (इन्द्रस्यापत्यं पुमान्। इन्द्र + इञ्।) जयन्तनामा इन्द्रपुत्रः। काकः। इति मेदिनी॥ ("ऐन्द्रिः किल नखैस्तस्याः विददार स्तनौ द्विजः"। इति रघुवंशे। १२। २२॥) वालिनामवानरराजः। इति त्रिकाण्डशेषः॥ अर्ज्जुनः। इति हेमचन्द्रः॥

ऐन्द्रियकं, त्रि, (इन्द्रियेणानुभूयते। इन्द्रिय + वुञ्।) प्रत्यक्षम्। इन्द्रियग्राह्यम्। इत्यमरः॥ (व्याधिविशेषः। यथा,—
"मिथ्याभियोगहीनेभ्यो यो व्याधिरुपजायते।
शब्दादीनां स विज्ञेयो व्याधिरैन्द्रियको बुधैः॥
वेदनानामशान्तानामित्येते हेतवः स्मृताः।
सुखहेतुर्मतस्त्वेकः समयोगः सुदुर्लभः॥
नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः।
हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः॥
सन्तीन्द्रियाणि सन्त्यर्था योगो न च न चास्ति रुक्।
न सुखं कारणं तस्मात् योगश्चव चतुर्विधः॥
नात्मेन्द्रियमनोबुद्धिगोचरं कर्म्म वा विना।
सुखं दुःखं यथा यच्च बोद्धव्यं तत्तथोच्यते॥
स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस एव च।
द्विविधः सुखदुःखानां वेदनानां प्रवर्त्तकः।
इच्छा द्वेषात्मिका तृष्णा सुखदुःखात् प्रवर्त्तते॥
तृष्णा च सुखदुःखानां कारणं पुनरुच्यते।
उपादत्ते हि सा भावान् वेदनाश्रयसंज्ञकान्॥
स्पृश्यते नानुपादाने न स्पृष्टो वेत्ति वेदनाः।
वेदनानामधिष्ठानं मनो दैहस्य सेन्द्रियः॥
केशलोमनखाद्यान्नमलद्रवगुणैर्विना"।
इति चरके शारीरे १अः॥)

ऐन्द्री, स्त्री, (इन्द्रस्य शक्रस्य इयम्। इन्द्र + "तस्येदम्"। ४।३। १२०। इत्यण्। टिड्ढेति। ४।१। १५। ङीप्।) शची। (यथा, मार्कण्डेये ८८। २०। "वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता"। इन्द्रस्य योगैश्वर्य्यशालिनो महादेवस्य पत्नी।) दुर्गा। इति शब्दरत्नावली॥ अलक्ष्मीः। इति चिकाण्डशेषः॥ इन्द्रवारुणी। इति रत्नमाला॥ राखाल गशा इति भाषा। पूर्ब्बा दिक्। इत्यमरटीकायां रमानाथः॥ एला। इति राजनिर्घण्टः॥ एलाचि इति भाषा।
"यच्छाङ्गमैन्द्री नलिनानि दूर्व्वा"।
इति सूत्रे ३ अध्याये। चरकेणोक्तम्॥)

ऐभी, स्त्री, (इभ इत्याख्यास्यस्याः। इभ + "प्रज्ञादिभ्यश्च"। ५। ४। ३८। इति अण् + ङीप्।) हस्तिघोषा लता। इति राजनिर्घण्टः॥

ऐरावणः, पुं, (इरया जलेन वणति शब्दायते इति। इरा + वण + पचाद्यच्। तत इरावणश्चव स्वार्थे प्रज्ञाद्यण् ५। ४। ३८। यदा इरा सरा वनमुदकं यस्मिन्। पूर्ब्बपदादिति ८। ४। ३। णत्वम्। तत्र भवः। इरावण + अण्।) ऐरावतहस्ती इत्यमरः॥ यथा, महाभारते १। १८। ४१।
"श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततःपरम्।
ऐरावणो महानागोऽभवद्वप्यभृता धृतः"॥)

ऐरावतं, क्ली, (इरा जलानि सन्त्यस्मिन्। इरा + मतुप्। इरावान् मेघः। तत्र भवः। इत्यण्। जलवति मेघे सूर्य्यकरपतनादस्योत्पत्तेस्तथात्वम्॥) इन्द्रस्य ऋतुदीर्घधनुः।
इति मेदिनी॥ रामधनुक् इति भाषा॥

ऐरावतः, पुं, (इरा जलानि विद्यतेऽस्मिन्। मतुप्। इरावान् समुद्रः। तत्र भवः इति। इरावत् + अण्। समुद्रमथनोत्थितत्वादस्य तथात्वम्। यद्वा इरावत्या विद्युत अयं तस्येदमित्यण्॥ ४। ३। १२०।) इन्द्रहस्ती। स तु शुक्लवर्णः चतुर्दन्तः समुद्रमथनोत्थितः पूर्ब्बदिग्गजश्च। तत्पर्य्यायः। अभ्रमातङ्गः २ ऐरावणः ३ अभ्रमुवल्लभः ४। इत्यमरः॥ श्वेतहस्ती ५ चतुर्दन्तः ६ मल्लनागः ७ इन्द्रकुञ्जरः ८ हस्तिमल्लः ९ सदादानः १०। इति जटाधरः॥ सुदामा ११ श्वेतकुञ्जरः १२ गजाग्रयणीः १३ नागमल्लः १४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। २२॥ ("ऐरावतास्फालनकर्कशेन"। "प्रावर्षेण्यं पयोवाहं विद्युदैरावताविव"। इति रघौ। १। ३६॥)
नागरङ्गः। लकुचवृक्षः। नागभेदः। इति मेदिनी॥ ("ऐरावतं दन्तशूठमस्रं शृङ्गोत्थितिपित्तरुत्"। इति सूत्रे। ४६ अः। सुश्रुतेनोक्तम्॥) (इरावत्या नद्याः सन्निकृष्टो देशः। इरावती + अण्। यथा, महाभारते ३। १६२। ३३।
"बभूव परमाश्वानामैरावतपथे यथा"॥)

ऐरावती, स्त्री, (इरा जलानि विद्यन्तेऽस्य इरावान् मेघस्तस्य इयं। इरावत् + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) विद्युत्। विद्युद्विशेषः इति मेदिनी॥ ऐरावतभार्य्या। इत्यमरटीकायां स्वामी॥ वटपत्रीवृक्षः। इति राजनिर्घण्टः॥ पञ्चालदेशीयनदीविशेषः। अधुना रावी इति ख्याता॥ (उत्तरमार्गे नक्षत्रविशेषाणां संज्ञाभेदः यथा।
"पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता"॥)

ऐरिणं, क्ली, (इरिणे उषरभूमौ भवम्। इरिण + अण्।) पांशुलवणम्। इति राजनिर्घण्टः॥ (पांशुलवणेऽस्य विवरणं ज्ञेयम्॥)

ऐरेयं, क्ली, (इरा + ढक्।) मद्यम्। इरा एव ऐरेयं स्वार्थे ज्ञेयप्रत्यये वृद्धिः॥ (यत्रास्य व्यवहारस्तद्यथा,—
"ऋतेऽप्यूर्द्धमधश्चैवमैरेयास्वसुरासवैः"।
इति वैद्यकचक्रपाणिसंग्रहे विरुध्याधिकारे॥)

ऐलः, पुं, (इलाया अपत्यं पुमान्। इला + अण्।) इलापुत्रः। स तु चन्द्रवंशीयो राजा पुरूरवाः। इति हेमचन्द्रः॥ (यथा महाभारते। १। ७५। १७।
"पुरूरवास्ततो विद्वानिलायां समपद्यत।
स वै तस्याभवन्माता पिता चैवेति नः श्रुतम्"॥
"षट् सुता जज्ञिरेऽमैलादायुर्द्धीमानमावसुः"॥२४॥)

ऐलबालुकं, क्ली, (ऐलबालुकमेव। स्वार्थे अण्।) ऐलबालुकम्। इति शब्दरत्नावली॥

ऐलविलः, पुं, (ऐलविलाया अपत्यं पुमान्। ऐलविल + अण्।) ऐलविलापुत्रः। स तु कुबेरः। इत्यमरः॥ तस्य रूपान्तराणि। ऐड़विड़ः। ऐड़विलः। ऐलविलः॥

ऐलेयं, क्ली, ऐलबालुकनामगन्धद्रव्यम्। इत्यमरः॥ (ऐलबालुकशब्देऽस्य विशेषो ज्ञातव्यः॥) (पुं, इलाया अपत्यम्। इला + ढक्। मङ्गलः। भौमः। पुरूरवाः॥)

ऐशानी, स्त्री, (ईशानस्य महादेवस्य इयम्। ईशान + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) ईशानकोणः। इति जटाधरः॥ ("ऐशानीक्रमतो रेखा" इति स्मृतिः। "ऐशान्यां मरणं ध्रुवं निगदितं दिग्गजत्वं खञ्जने"। इति तिथितत्त्वम्॥)

ऐशिकः, त्रि, (ईशस्य अयम्। ईश + ठक्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐशी, ऐश्वरी } त्रि, (ईशस्य ईश्वरस्य च इयम्। ईश + ईश्वर + अण् + ङीप्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐश्वर्य्यं, क्ली, (ईश्वरस्य भावः। ईश्वर + ष्यञ्।) ईश्वरधर्म्मः। तत्पर्य्यायः। विभूतिः २ भूतिः ३। स चाष्टविधो यथा। अणिमा १ लघिमा २ प्राप्तिः ३ प्राकाम्यम् ४ महिमा ५ ईशित्वम् ६ वशित्वम् ७ कामावशायिता ८। इत्यमरः॥ ("ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना"॥ इति पुराणम्। "ऐश्वर्य्यम प बुद्धिधर्म्मैः यतोऽणिमादिप्रादुर्भावः"। इति वाचस्पतिमिश्रः। सम्पत्तिः। प्रभुत्वम्। नियन्तृत्वम्। यथा रघुवंशे। १२। ६९॥
"तस्मै निशाचरैश्वर्य्यं प्रतिशुश्राव राघवः"॥)
इति॥

ऐश्वर्य्यकर्म्मा, [न्] पुं, (ऐश्वर्य्यं कर्म्म यस्य।) ईश्वरसम्बन्धिकर्म्मयुक्तः। तत्पर्य्यायः। इरज्यति १ पत्यते २ क्षयति ३ राजति ४। इति चत्वार ऐश्वर्य्यकर्म्माणः। इति वेदनिर्घण्टौ २ अध्यायः॥

ऐषमः, [स्] त्र्य, (अस्मिन् वत्सरे इति। "सद्यःपरुत्परारैषमः" ५। ३। २२। इति इदम इश् समसन्प्रत्ययश्च संवत्सरे निपात्यते।) वर्त्तमानवत्सरः। इत्यमरः॥

ऐषमस्तनः, त्रि, (ऐषमोभवः। "ऐषमोह्यःश्वसोऽन्यतरस्याँ"। ४। २। १०५। इति शैषिकेष्वर्थेषु पक्षे खुञ् तुट् च।) ऐषमःसम्बन्धी। एइ वत्सरेर इति भाषा। इति पाणिनिः॥ ७। २। १०५॥

ऐषमस्त्यः, त्रि, (ऐषमोभवः। ऐषमस् + ऐषमोह्यसिति पक्षे त्यप्।) ऐषमस्तनः इति पाणिनिः॥

ऐहिकं, त्रि, (इह + ठञ्।) इह भवम्। इहकालेर इति भाषा। इति व्याकरणम्॥ (यथा भागवते ५। १४। ३२। "क्वचिदुडुमवदैहिकार्थेषु संस्थन् यथा वानरः सुतदारवत्सलो व्यवायच्छदः"॥)

ओ

ओ ओकारः। स तु त्रयोदशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। ("ओदौतोः कण्ठौष्ठम्" इत्युक्तेः। तथा च शिक्षायामुक्तम्॥
"ए ऐ तु कण्ठतालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"॥)
स तु ह्रस्वो न भवति। दीर्घः प्लुतश्च भवति। (प्रत्येकं उदात्तानुदात्तस्वरितभेदैस्त्रिविधोऽपि अनुनासिकाननुनासिकभेदाभ्यां षड्विधः। एतेन द्वादशविध एव निर्णीतः।)

"ओकारं चञ्चलापाङ्गि! पञ्चदेवमयं सदा।
रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरम्॥
पञ्चप्राणमयं वर्णं नमामि देवमातरम्।
एतद्वर्णं महेशानि स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—
"वामतः कुण्डली भूत्वा दत्तान्मध्ये तु कुञ्चिता।
किञ्चिद्वक्रगता या तु कुञ्चिता वामतस्त्वधः॥
ब्रह्मेशविष्णवस्तास् मात्रा तु ब्रह्मरूपिणी।
शक्तिश्च परमा सैव ध्यानमस्य प्रवक्ष्यते"॥
इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा,—
"ओकारः सत्यपीयूषो पश्चिमास्यःश्रुतिः स्थिरा।
सद्योजातो वासुदेवो गायत्री दीर्घनङ्गकः।
आप्यायनी चोर्द्धदन्तो लक्ष्मीर्वाणी मुखी द्विजः॥
उद्देश्यदर्शकस्तीव्रः कैलासो वसुधात्तरः।
प्रणवांशो ब्रह्मसूत्रमनेशः सर्व्वमङ्गला॥
त्रयोदशी दीर्घनासा रतिबाधो दिगम्बरा।
त्रैलोक्यविजया प्रज्ञा प्रीतिवीजादिकर्षिणी"॥
इति तन्त्रशास्त्रम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमे। "ऐर्यजादिः स्यादोर्निष्ठातन औरनिट्"॥ तेन ओ दी क्षये इत्यस्मात् क्षतायां निष्ठायां दीनं दीनवत् इति स्यात्॥ माढकान्यासे ऊर्द्धदन्तपङ्क्तौ न्यसनतया तदाख्यार्थाप्यभिधानम्। माढकान्यासमन्त्रो यथा,—
"ॐ नम ऊर्द्धदन्तपङ्क्तौ ओं नमऽधोदन्तपङ्क्तौ"॥)

ओ, य, सम्बोधनम्। आह्वानम्। स्मरणम्। अनुकम्पा। इति मेदिनी॥

ओं, य, ओम्। प्रणवः। इति वेदागमौ॥

ओः, पुं, ब्रह्मा। इत्येकाक्षरकोषः॥

ओकं, क्ली, (उचेरिगुपधलक्षणे के गुणः कुत्वञ्च "ओक उचः के"। ७। १। ६। ४। इति निपात्यते।) गृहम्। आश्रयः। इत्यमरटीकायां भरतादयः॥ (पुं। पक्षी। वृषलः॥)

ओकः, [स्] क्ली, (उच्यते समवैति अस्मिन्। उच + असुन्। गुणः। न्यङ्क्वादित्वात् कुत्वम्॥) आश्रयः। गृहम्। इत्यमरः॥ ("जलौका अथ भल्लके"। इति अमरकोषः। तथा विष्णुपुराणम् १। ६। ३७। "सप्तधौत्यान्तु यत् स्थानं स्मृतं तद्वै वनौकसाम्"॥)

ओकणः, पुं, केशकीटः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओकणिः, पुं, यूकः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओकुलः, पुं, (उच् + उलच्। निपातनात् सिद्धम्।) गोधूमक्षततप्तापक्वः। अस्य गुणाः। गुरुत्वम्। वृष्यत्वम्। मधुरत्वम्। बलकारित्वम्। रक्तवातापहत्वम्। स्निग्धत्वम्। हृद्यत्वम्। मदविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

ओकोदनी, स्त्री, (ओकः मस्तकरूपाश्रयस्थानमदनं भक्ष्यं यस्याः।) यूकः। इति शब्दरत्नावली॥

ओक्कणी, स्त्री, (ओच् + कण् + अच् + ङीप्।) ओकणः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओख, ऋ, शोषणे। भूषणे। सामर्थ्ये। निवारणे। इति कविकल्पद्रुमः॥ (भ्वादिं-अकं-सकं च परंसेट्।) ऋ मा भवान् ओचिखत्। अत्र द्वित्वात् प्राक् प्राप्तो ऋख ऋदित्त्वान्न स्यात्। शोषः स्नेहरहितीभावः। ओखति पङ्क आतपात्। असमर्थो भूषणं सामर्थ्यं वारणञ्च। इति दुर्गादासः॥

ओघः, पुं, (उच् समवाये + घञ्। एषोदरादित्वात् साधुः।) द्रुतनृत्यगीतवाद्यम्। समूहः। इत्यमरः॥ जलवेगः। (यथा कुमारे ४। ४४।
"रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी"॥) परम्परा। उपदेशः। इति मेदिनी॥

ओङ्कारः, पुं, (ओम् + कारप्रत्ययः।) प्रणवः। इत्यमरः॥ (यथाह स्मृतिः।
"ओङ्कारः पूर्व्वमुच्चार्य्यस्ततो वेदमधीयते"।
"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्जातौ तस्मान्माङ्गलिकावुभौ"।
इति व्याकरणटीकायां दुर्गादासः।
"प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति"॥
इति मनुः। २। ७५॥ अत्राह आवस्तम्बः,
"ओङ्कारः स्वर्गद्वारं तद्ब्रह्म अधीयमाणा एतदापि प्रतिपद्येत विकथां चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते"। लौकिक्या वाचा व्यावर्त्तते तया मिश्रितं न भवतीत्यर्थः।)

ओङ्कारा, स्त्री, बुद्धशक्तिविशेषः। इति चिकाण्डशेषः॥

ओजत्क, वले। तेजसि। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) मा भवान् ओजिजत्! इति दुर्गादासः॥

ओजः, [स्] क्ली, (उज्जयतेन। उज्ज आर्जवे उज्जोर्बले "बलोपश्च" ४।१६१। उणादिः असुन्। बलोपश्च। गुणः।) दीप्तिः। अवष्टम्भः। प्रकाशः। बलम्। इति मेदिनी॥ (यथा रघौ २। ५४।
"तदौजसा तु प्रहृतं त्वयास्याम्"। यथा च मानवे १। १६।
"तेषामिदन्तु सप्तानां पुरुषाणां महौजसाम्"॥)
प्रथमशतीयपञ्चमसप्तमनवमैकादशद्वादशाग्रयः। इति ज्योतिषम्॥ गौड़ी रीतिः काव्यगुणः। तस्य लक्षणम्। बद्धसमासासंयुक्तवर्णपदाडम्बरः। यथा,
"ओजःप्रसादमाधुर्य्यगुणचित्तयभेदतः।
गौड़वैदर्भपञ्चालीरीतयः परिकीर्त्तिताः॥
ओजः समासभूयस्त्वं मांसलं पदडम्बरम्"।
तस्योदाहरणम् यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणि-
स्फुर्जत्स्फुल्कृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा।
आनन्दामृतवापिकां विदधती चित्तं गिरीशप्रभो-
स्त्वां पायान्नवसङ्गमे भगवती लज्जावती पार्व्वती"॥
इति काव्यचन्द्रिका॥ *॥ रसादिसप्तधातुसारभागजधातुविशेषः। तस्य गुणाः। सर्व्वशरीरस्थितत्वम्। स्निग्धत्वम्। शीतलत्वम्। स्थिरत्वम्। शुक्लवर्णत्वम्। कफात्मकत्वम्। शरीरस्य बलपुष्टिकारित्वञ्च॥
"हृदि तिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम्।
ओजः शरीरे संजातं तन्नाशान्नाशमृच्छति॥
भ्रमरैः फलपुष्पेभ्यो यथा संभियते मधु।
तद्वदोजः शरीरेभ्यो धातुः संभियते नृणाम्"॥
इति वैद्यकम्॥ ओजोऽदन्तोऽपि। इति भरतः॥
"हृदयं चेतनास्थानमोजसश्चाश्रयं मतम्"।
इति पूर्व्वखण्डे। ५अ। शार्ङ्गधरेणोक्तम्॥
"तत्परस्यौजसः स्थानं तच्च चैतन्यसंग्रहः"॥
"ओजोवहाः शरीरे वा विधमन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते।
यत्सारमादौ गर्भस्य योऽसौ गर्भरसाग्रजः॥
संवर्त्तमानं हृदयं समाविशति यत्पुरा।
यस्य नाशान्न नाशोऽस्ति धारि यद्धृदयाश्रितम्॥
यच्छरीरबलं देहः प्राणा यत्र प्रतिष्ठिताः।
तत्फला विविधा वाताः फलन्तीति महाफलाः॥
घ्राणाद्वमन्यः खवणात् स्रोतांसि सरणात्सिराः॥
तन्महत्ता महामूलास्तच्चौजः परिरक्षता।
परिहार्य्या विशेषेण मनसा दुःखहेतवः॥
हृद्यं यत्स्यादृयदौजस्यं स्रोतसां यत्सादजम्।
तत्तत्सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च"॥
इति सूत्रस्थाने चिंशेऽध्याये चरकेणोक्तम्॥
"गुरु शीतं मृदु श्लक्ष्णं बहलं मधुरं स्थिरम्।
प्रसन्नं पिच्छिलं स्निग्धं ओजो दशगुणं तथा"॥
मद्यसेवनतोऽन्ये ये गुणा नश्यन्ति तद्यथा॥
"गुरुत्वं लाघवाच्छैत्यं चौष्ण्यमस्वस्वभावतः।
माधुर्य्यं मार्दवं तैक्ष्ण्यात् प्रसादश्चाशुभावनात्॥
शैत्यात् स्नेहं व्यवायित्वात् स्थिरत्वं श्लक्ष्णतामपि।
विकासिभावात् पैच्छिल्यं वैशद्यं सान्द्रतान्तथा॥
सौक्ष्म्यान्मद्यं विहन्त्येवमोजसः स्वगुणैर्गुणान्"।
"रसधात्वादिमार्गाणां सत्त्ववद्धीन्द्रियात्मनाम्।
प्रधानस्यौजसश्चैव हृदयस्थानमुच्यते"॥
"नैवं विघातं जनयेन्मद्यं पैष्टिकमोजसः।
विकाश-रूक्ष-विशदा गुणास्तच्च हि नोल्बणाः"॥
इति च चरके चिकित्सास्थाने। १२ अः॥
"ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम्।
विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम्॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्।
तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम्॥
अभिघातात् क्षयात्कोपाच्छोकाद्ध्यानाक्षयात् क्षुधः।
ओजः संक्षीयते क्षोभ्यो धातुग्रहणनिःसृतम्।
तेजः समीरितं तस्मादिभंशयति देहिनः"॥
इति सूत्रस्थाने। १५ अः। सुश्रुतेनोक्तम्॥)

ओड़वः, पुं, पञ्चस्वरयुक्तरागः। स तु ऋ-ध-वर्ज्जितः। ग-ग-म-ध-नि-युक्तः। यथा मल्लारादयः। इति संगीतदामोदरः॥ (यदुक्तं संगीतरत्नाकरे स्वराध्याये जातिप्रकरणे।
"वान्ति यान्युडवोऽचेति व्योमोक्तमुडवं बुधैः।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा।
ओड़वी सास्ति येषाञ्च स्वरास्तेषोड़वा मताः"॥
"औड़वा मताः" इति क्वचित् पाठः॥ "उडवः नक्षत्राणि वान्ति यान्ति यस्मिन् इत्युडवं व्योम, तच्च भूतेषु पञ्चमम्। तेन पञ्चसङ्ख्या लक्ष्यन्ते। औड़वी सङ्ख्या विद्यते येषां स्वराणां ते औड़वाः पञ्चस्वराः" इत्यादिसिंहभूपालटीका॥)

ओड

ओड्रिका, स्त्री, धान्यविशेषः। उड्रि धान इति भाषा। तत्पर्य्यायः। ओड्री २ नीवारः ३। इति रत्नमाला॥ अस्या गुणाः। ग्रीष्मगत्वम्। रूक्षत्वम्। कफवायुवर्द्धकत्वम्। पित्तनाशित्वञ्च। इति राजवल्लभः॥

ओड्री, स्त्री, ओड्रिकाधान्यम्। इति रत्नमाला॥ (नीवारशब्देऽस्या विवरणं ज्ञातव्यम्॥)

ओड्रः पुं, (आ ईषदुनत्ति। उन्दी + स्फायितञ्चीति रक्। वाऽवलकात् दस्य डत्वम्।) जवापुष्पवृक्षः। देशविशेषः। उड्रिस्या इति ख्यातः। तच्च बहुवचनान्तः। इति मेदिनी॥ (तद्देशवासिनि, त्रि। यथा, मनुः १० । ४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः"।

"पौण्ड्रादिदेशोद्भवाः क्षत्रियाः सन्तः क्रियालोपादिना शूद्रत्वमापन्नाः"।

इति तट्टीकायां कुल्लुकभट्टः॥)

ओड्रपुष्पं, क्ली, (ओड्रं पुष्पम्।) जवा। इत्यमरः॥ रुद्रास्तु "ओड्रपुष्पशब्देन तथा जवाशब्देन ओड्रवृक्षः ओड्रस्य पुष्पञ्चोच्यते" इत्याहुः। वृक्षे व्युत्पत्तिर्यथा। ओड्रं पुष्पमस्य इति।

"ओड्रः स्यादोड्रपुष्पञ्च जवाथ हयमारकः"।

इति रायमुकुटः॥ "ओड्रपुष्पकुसुमप्रियेऽम्बिके"। इति हरानन्दः॥ इत्यमरटीकायां भरतः॥

ओड्राख्या, स्त्री, (ओड्रमाख्या यस्याः।) जवापुष्पवृक्षः। इति राजनिर्घण्टः॥

ओण, ऋ अपसारणे। दूरीकरणे॥ इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) अपसारणमपनयनम्। मा भवान् ओणिनत्। ओणति धनम् चौरः। इति दुर्गादासः॥

ओतुः, पुं स्त्री, (अवति रक्षति आखुभ्यः। अव रक्षणे + "सितनिगमिमसिसचयवीति" १ । ७०। उणादिः तुन्। "ज्वरत्वरेति" ६ । ४ । २०। ऊट् ततो गुणः।) विड़ालः। इत्यमरः। (यथा मुग्धबोधे। "स्थूलोतुः। स्थूलौतुः॥)

ओदनः, पुं क्ली, (उन्द + "उन्देर्नलोपश्च" इति २। ७६। उणादिः युच् + नलोपश्च।) अन्नम्। भक्तम्। इत्यमरः॥ भात इति भाषा।

(यथा मनुः। ८। ३२६।

"अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च"॥

"ओदनः क्वालितः स्विन्नः प्रसृतो विशदो लघुः। भूयस्तण्डुलजोऽत्यर्थमन्यथा स्यादगुरुश्च सः"॥

इति वैद्यकचक्रपाणिकृतद्रव्यगुणे मद्यादिवर्गे॥

"ओदनस्तैः प्रदातो दिग्भिः प्रयोक्तव्यो यथायथम्। दोषदूष्यादिबलतो ज्वरघ्नः क्वाथसाधितः"॥

इति वाभटे चिकित्सास्थाने। १ अध्याये॥

अस्य पर्य्यायश्चाह भावप्रकाशकारः॥

"भक्तमन्नं तथान्यच्च क्वचिदूरच कीर्त्तितम्। ओदनोऽस्त्री स्त्रियां भिक्षा दीदिविः पुंसि भाषितः"॥

अस्य विवरणान्तरञ्चान्नशब्दे द्रष्टव्यम्॥)

ओदनाक्षा, स्त्री, (ओदनस्याक्षा इव अक्षा यस्याः।) महासमङ्गा। इति राजनिर्घण्टः॥

ओल

ओदनिका, स्त्री, महासमङ्गा। बला। इति राजनिर्घण्टः॥

ओदनी, स्त्री, (ओदन इवाचरति। ओदन + क्विप् + ङीष्।) बला। इति मेदिनी॥ वेलेड़ा इति भाषा। (बलाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

ओम्, व्य, (अवति रक्षति इति। "अवतेष्टिलोपश्च"। १। १४१। उणादिः मन् टिलोपश्च। ज्वरत्वरेत्यूट् ६। ४। २०॥ ततो गुणः।) प्रणवः। स तु अकारोकारमकारवर्णत्रयात्मकः। तथा च उक्तम्।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥

("यथा पर्णं पलाशस्य पृङ्खुनैकेन धार्य्यते। तथा जगदिदं सर्व्वमोङ्कारेणैव धार्य्यते"॥

इति याज्ञवल्क्यः। तथा, मनुः। २। ७६।

"अकारश्चाप्युकारश्च मकारश्च प्रजापतिः। वेदत्रयात् निरदुहत् भूर्भुवस्वरितिच त्रिधा"॥

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वाविनिर्यातौ तस्मात् माङ्गलिकावुभौ"॥

इति दुर्गादासः। योगी याज्ञवल्क्यश्च।

"सिद्धानाञ्चैव सर्व्वेषां वेदवेदान्तयोस्तथा। अन्येषामपि शास्त्राणां निष्ठाऽयोङ्कार उच्यते॥ प्रणवाद्या यतो वेदा प्रणवे पर्य्यवस्थिताः। वाङ्मयं प्रणवः सर्व्वं तस्मात् प्रणवमभ्यसेत्"॥)

अनुमतिः। इति विश्वः॥ उपक्रमः। अङ्गीकारः। (यथा, भागवते ११। ४। १५।

"ओमित्यादेशमाश्राय नत्वा तं सुरवन्दिनः। उर्व्वशीमप्सरःश्रेष्ठां पुरःकृत्य दिवं ययुः"॥)

अपाकृतिः। मङ्गलम्। इति मेदिनी॥

ओम्, क्ली, ब्रह्मणो नामविशेषः। यथा,—

"ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणाश्चैव वेदाश्च यज्ञाश्च विहिताः पुरा॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्"॥

इति श्रीभगवद्गीतायां १७ अध्यायः॥

ओलं त्रि, (आङ् + उन्द + क। पृषोदरादित्वात् साधु।) आर्द्रम्। इति त्रिकाण्डशेषः॥ भिजा इति भाषा॥

ओलः, पुं, खनामख्यातमूलविशेषः। सूरणः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा॥

"सूरणः कन्द ओलश्च कन्दलोऽर्शोघ्न इत्यपि"।

गुणा अस्य सूरणशब्दे ज्ञेयाः।)

ओलञ्ज, इ, क्षेपणे। इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) अन्तस्थतृतीययुक्तः। इ ओलञ्जयते धूलिर्वायुना। इति दुर्गादासः॥

ओलड, इ कि उत्क्षेपे। इति कविकल्पद्रुमः॥ (वा चुरां-उमं-सकं-सेट्।) अन्तस्थतृतीयोपधः। इ ओलण्डयते। कि ओलण्डयति ओलण्डति तण्डुलं लोकः। कर्पूरमोलण्डयतीति दर्शनात्। इति दुर्गादासः॥

ओलः, पुं, ओलः। तत्पर्य्यायः। सूरणः २ कन्दः ३ अर्शोघ्नः ४ चित्रदण्डकः ५। इति रत्नमाला॥

ओष

अस्य गुणाः। अग्निदीपनत्वम्। रुचिकारित्वम्। कफनाशित्वम्। विशदत्वम्। लघुत्वम्। अर्शोरोगपथ्यत्वञ्च। ग्राम्यकन्दस्तु दोषलः॥ इति राजवल्लभः॥

ओषः, पुं, (उष + दाहे घञ्।) दाहः। तत्पर्य्यायः। प्रोषः २। इत्यमरः॥ शोषः ३। इति भरतः॥ (पित्तविकारशब्दात्रिंशदत ऊर्द्ध व्याख्यास्यन्ते। यथा ओषश्च शोषश्च इत्यादि। चरके सूत्रे। २० अः॥)

ओषणः, पुं, (उष + ल्युट्।) कटुरसः। इति हेमचन्द्रः॥ झाल इति भाषा॥

ओषणी, स्त्री, (ओषण + ङीष्।) शाकविशेषः। पुदीना इति भाषा। अस्या गुणाः। कफवायुनाशित्वम्। इति राजवल्लभः॥

ओषधिः, स्त्री, (ओषो धीयतेऽत्र। ओष + धा + कि।) फलपाकान्तवृक्षादिः। कदली धान्यमित्यादिः। इत्यमरः॥ (यदाह मनुः। १। ४६।

"उद्भिज्जाः स्थावरा ज्ञेया बीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः"॥

तथा, कुमारे १। १०। "भवन्ति यत्रौषधयो रजन्याम्"। तथा ७। १। "अथौषधीनामधिपस्य वृद्धौ"। "ओषधयः प्रसूयन्ति गवादीनां पयांसि च। इति हारीते प्रथमस्थाने॥ ४ अध्याये॥

"ओषधीर्नामरूपाभ्यां जानते ह्यृत्विजो वने। अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः॥ न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः। ओषधीनाम्यराम्यार्त्तिं कश्चिद्वेदितुमर्हति॥ योगविद्यामरूपज्ञास्तासां तत्त्वविदुच्यते। किं पुनर्यो विजानीयादोषधीः सर्व्वथा भिषक्॥ योगमासाद्य यो विद्याद्दंशकालौषधादितम्। पुरुषं पुरुषं वीक्ष्य स विज्ञेयो भिषक्तमः"॥

इति चरके सूत्रस्थाने॥ १ अध्याये॥)

ओषधिप्रस्थः, पुं, (ओषधिवद्भूलं प्रस्थं यत्र। ओषधीनामाकरत्वात् हिमालयस्य तथात्वम्।) हिमालयस्य नगरम्। (यथा, कुमारे ६। ३३।

"तत्पयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्"।

तत्रैव ६। ३६। "आसेदुरोषधिप्रस्थम्" इति।) तथा,—कालिकापुराणे ४१ अध्यायः।

"एतस्मिन्नन्तरे शम्भुः शिप्रं त्यक्त्वा तदा सरः। गङ्गावतारमगमद्धिमवत्प्रस्थमुत्तमम्॥ यत्र गङ्गा निपतिता पुरा ब्रह्मपुरात् च्युता। ओषधिप्रस्थनगरस्यादूरे सानुरुत्तमः॥ तत्र भर्गः स्वमात्मानमक्षरं परमात्परम्। एकाग्रं चिन्तयामास भगवान् वृषभध्वजः"॥

ओषधी, स्त्री, (ओषधि + ङीष्।) ओषधिः। इति भरतः॥ (फलपाकान्तवृक्षः। स च कदलीधान्यादिः। यथाह मनुः। १। ४६।

"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः"॥

ओषधिशब्देऽस्या विवृतिर्द्रष्टव्या॥)

ओषधीपतिः, पुं, (ओषधीनां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (कर्पूरं। चन्द्रसंसृष्टत्वादस्य तथात्वम्॥)

ओष्ठ

ओषधीशः, पुं, (ओषधीनामीशः) चन्द्रः। कर्पूरम्। इत्यमरः॥ (यथा, हरिवंशे ७६। ८।
"ओषधीशः क्रियायोनिरम्भोयोनिरनुष्णभाक्"॥)

ओष्ठः, पुं, (उष्यते दह्यते उष्णाहारेणेति। उष दाहे + "उषिकुषीति"। २। ४। थन्॥)
दन्ताच्छादकावयवः। उपर ठोंट इति भाषा। तत्पर्य्यायः। रदनच्छदः २ दशनवासः ३। इत्यमरः। दन्तवासः ४ दन्तवस्त्रम् ५ रदच्छदः ६ इति राजनिर्घण्टः॥ तस्य द्विवचने ओष्ठौ ओष्ठाधराविति यावत्॥ (यथा, ऋग्वेदे। २। ३६। ६।
"ओष्ठाविव मध्वास्ये वदन्ता स्तनाविव पिप्यतं जीवसे नः"। तथा मनुः। ८। २८२।
"अवनिष्ठीवतो दर्पाद्द्वारोष्ठौ च्छेदयेन्नृपः"॥
तथा, कुमारे ३। ६०।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि"॥)

ओष्ठपुष्पः, पुं, (ओष्ठ इव पुष्पं यस्य।) बन्धूकपुष्पवृक्षः। इति राजनिर्घण्टः॥

ओष्ठरोगः, पुं, (ओष्ठस्य रोगः।) आस्यरोगान्तर्गतोष्ठभवव्याधिः। स च वातपित्तकफसन्निपातरक्तमांसमेदोऽभिघातजत्वेनाष्टविधः। तेषां यथाक्रमं लक्षणानि यथा,—
"कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः॥
चीयेते पिड़काभिश्च सरुजाभिः समन्ततः।
सदाहपाकपिड़कौ पीताभासौ च पित्ततः॥
सवर्णाभिस्तु चीयेते पिड़काभिरवेदनौ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू॥
सकृत् कृष्णौ सकृत् पीतौ सकृत् श्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिड़काचितौ॥
खर्ज्जूरफलवर्णाभिः पिड़काभिर्निपीड़ितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुन्नतौ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात्॥
सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू।
स्वच्छं स्फटिकसङ्काशमास्रावं स्रवतो भृशम्॥
तयोर्व्रणो न संरोहेन्मृदुत्वच्च न गच्छति।
ओष्ठौ पर्य्यवदीर्य्येते पाट्येते चाभिघाततः"॥
इति निदानम्॥
("ओष्ठौ च स्फुटितौ यस्य वातिवाहेन वातिकात्। तस्य सर्पिर्मक्षणञ्च ओष्ठदारणवारणे॥
सदाहञ्च भवेत्सौख्यं पैत्तिकं तं विनिर्दिशेत्। मधुना नवनीतेन ओष्ठयोर्म्रक्षणं मतम्॥
लेपनञ्चौष्ठरोगेषु शर्करासहितं दधि।
सरक्तमोष्ठरोगञ्च दृष्ट्वा रक्तावसेचनम्॥
धवार्ज्जुनकदम्बानां प्रलेपः स्यात् सुखावहः"॥
इति हारीते चिकित्सिते। २५ अध्याये॥
चिकित्सा यथा॥
"तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतः॥
ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ।
दाल्येते परिपाट्येते परुषासितकर्कशौ॥
पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ।
पिटिकाभिर्भृशोद्दाहदावाशुपाकौ कफात्पुनः॥
शीतासहौ गुरू स्निग्धौ सवर्णपिटिकाचितौ।
सन्निपातादनेकाभौ दुर्गन्धास्रावपिच्छिलौ॥
अकस्मात् स्रानसंशून्नरुजौ विषमपाकिनौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
खर्ज्जूरसदृशश्चात्र क्षीणे रक्तेऽर्ब्बुदं भवेत्।
मांसपिण्डोपमौ मांसात्स्यातां मूर्च्छत्कृमीकृमात्॥
तैलाभस्रवथुक्लेदौ सकण्डौ मेदसा मृदु।
स्रुतजाववदीर्य्येते पाट्येते चासकृत्पुनः॥
ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ।
जलबुद्बुदवद्दातकफादोष्ठे जलार्ब्बुदम्"॥
इति वाभटे उत्तरस्थाने। २१ अध्याये॥
"खण्डोष्ठस्य विलिख्यान्तौ स्रूत्वा व्रणवदाचरेत्।
यष्टी ज्योतिष्मती-रोध्र-श्यामा-सारिवोत्पलैः॥
पटोल्या काकमाच्या च तैलमभ्यञ्जनं पचेत्।
नस्यञ्च तैलं वातघ्नमधुरस्कन्धसाधितम्॥
महास्नेहेन वातौष्ठे सिद्धे नाक्तः पिचुर्हितः।
देवधूपमधूच्छिष्टगुग्गुल्वमरदारुभिः॥
यष्ट्याह्वचूर्णयुक्तेन तेनैव प्रतिसारणम्।
नाड्योष्ठं खेदयेद्दुग्धसिद्धैरेरण्डपल्लवैः॥
खण्डोष्ठविहितं नस्यं तस्य मूर्द्ध्नि च तर्पणम्।
पित्ताभिघातजावोष्ठौ जलौकोभिरुपाचरेत्॥
रोध्रसर्जरसक्षौद्रमधुकैः प्रतिसारणम्।
गुड़ूची यष्टिपत्तङ्गसिद्धमभ्यञ्जने घृतम्॥
पित्तविद्रधिवच्चात्र क्रियाश्शोणितजेऽपि च।
इदमेव भवेत्कार्य्यं कर्म्मौष्ठे तु कफोत्तरे॥
पाठाक्षारमधुयोषैर्हृताक्षे प्रतिसारणम्।
धूमनावनगण्डूषाः प्रयोज्याश्च कफच्छिदः॥
स्निग्धं भिन्नं विमेदस्कं दक्ष्णेमेदोजमभिना।
प्रियङ्गुरोध्रत्रिफलामाक्षिकैः प्रतिसारयेत्॥
सक्षौद्रामर्षणम् तीक्ष्णा भिन्नशुद्धे जलार्ब्बुदे।
अवगाढ़ेऽतिशुद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया"॥
इति च वाभटे उत्तरस्थाने। २२ अध्याये॥
चिकित्सादिविवृतिस्तुमुखरोगशब्दे द्रष्टव्या॥)

ओष्ठी, स्त्री, (ओष्ठ इवाचरति पक्वावस्थायाम्। ओष्ठ + क्विप्। ततोऽच् + ङीप् च।) बिम्बफलम्। इति रत्नमाला॥ तेलाकुचा इति भाषा॥

ओष्ठोपमफला, स्त्री, (ओष्ठोपमानि ओष्ठसदृशानि फलानि यस्याः।) बिम्बिका। इति जटाधरः॥ (तेलाकुचा इति भाषा॥)

औ

औ, औकारः। स तु चतुर्दशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। (ओदौतोः कण्ठौष्ठम्"। इत्युक्तेः। तथा च शिक्षायाम्।
"एऐ तु कण्ठ-तालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"।)
स दीर्घः प्लुतश्च भवति न ह्रस्वः॥ (प्रत्येकमुदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि पुनरनुनासिकाननुनासिकभेदात् षड्विध एतेन द्वादशविध एव।)
"रक्तविद्युल्लताकारं औकारं कुण्डली स्वयम्।

औड़

अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये॥
पञ्चप्राणमयं वर्णं सदाशिवमयं सदा।
सदा ईश्वरसंयुक्तं चतुर्व्वर्गप्रदायकम्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गभाषायां) तस्य लेखनप्रकारो यथा,—
"ओकारमधदक्षे तु गता तूर्द्धगतायता।
किञ्चित् सा वामतो वक्रा तासु ब्रह्मेशविष्णवः॥
शक्तिमध्यगता रेखा ध्यानमस्य प्रचक्षते"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ अस्य नामानि यथा,
"औकारः शक्तिको नादस्तेजसो वामजङ्घकः।
मनुरर्द्धग्रहेशश्च शङ्खकर्णः सदाशिवः॥
अधोदन्तश्च कण्ठौष्ठौ सङ्घर्षणः सरस्वती।
आज्ञा चोर्द्धमुखी शान्तो व्यापिनी प्रकृतः पयः॥
अनन्ता ज्वालिनी व्योमा चतुर्दशी रतिप्रियः।
नेत्रमात्मकर्षिणी च ज्वालामालिनिका भृगुः"॥
इति तन्त्रशास्त्रम्॥ घोषदशनः। सत्यान्तः।
इति वीजवर्णाभिधानम्॥ (माढकान्यासेऽधोदन्तपङ्क्तौ न्यस्यतया तच्छब्देनाप्यभिधानम्। माढकान्यासमन्त्रो यथा,—
ओं नम ऊर्द्धदन्तपङ्क्तौ औं नमोऽधोदन्तपङ्क्तौ"॥
अनुबन्धविशेषः। यदुक्तं कविकल्पद्रुमे। "ओर्निष्ठातन औरनिट्"। तेन दृशि रौ प्रेक्षणे इत्यस्य ल्युटि कृते द्रक्ष्यति इति स्यात्॥)

औ, व्य, आह्वानम्। सम्बोधनम्। इति मेदिनी॥ विरोधः। निर्णयः। इति शब्दरत्नावली॥ (गत्यभेदः। स च चादिः। इति पाणिनिः। १। ४। ५७॥)

औँ, व्य, शूद्राणां प्रणवः। यथा,—
"चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञितः।
स चानुसारनादाभ्यां शूद्राणां सेतुरुच्यते"॥
इति तन्त्रसारधृतकालिकापुराणम्॥

औः, पुं, अनन्तः। इत्येकाक्षरकोषः॥ निखनः। इति मेदिनी॥

औः, स्त्री, विश्वम्भरा। इति मेदिनी॥

औक्षकं, क्ली, उक्षणां समूहः। ("गोचोक्षोष्ट्रोरभ्रेति"। ४। २। ३६॥ वुञ्।) वृषसमूहः। इत्यमरः॥ एँड़े गरुर पाल इति भाषा॥

औखं, त्रि, (उखायां निष्पन्नं, उखा + यत् + स्वार्थे + अण्।) स्थालीपक्वान्नादि। उखायां निष्पन्नम् इत्यर्थे अण्प्रत्ययः॥

औचिती, स्त्री, (उचितस्य भावः। ब्राह्मणादित्वात् ष्यञ् + ङीष्। "हलस्तद्धितस्य"। ६। ४। १५०। इति यलोपः॥) औचित्यम्। इति लिङ्गादिसंग्रहे अमरः॥
("सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः"। इति साहित्यदर्पणम्॥)

औचित्यं क्ली, (उचित + ष्यञ्।) उचितस्य भावः। उपयुक्तता। योग्यत्वम्। इत्यमरः॥
(यथा साहित्यदर्पणे ३य परिच्छेदे।
"एता अपि यथौचित्यादुत्तमाधममध्यमाः"॥)

औड़वः, पुं, (औड़वी संख्या विद्यते यस्य स औड़वः। यद्वा ओडव एव + स्वार्थे अण्।) ओड़वस्वरः। स च रागस्य जातिविशेषः। पञ्चस्वरमिश्रित-

रागरागिण्य इति यावत्। यथा,—
"औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः।
सम्पूर्णा सप्तभिः प्रोक्ता रागजातिस्त्रिधा मता" ॥
इति सङ्गीतरत्नाकरः ॥ अपि च। सम्पूर्णस्वराः
ष ऋ ग म प ध नि ॥ षाड़वस्वराः निषादोज्झिताः ष ऋ ग म प ध ॥ ओड़वस्वराः ऋ-पवर्जिताः ष ग म ध नि ॥ सम्पूर्णरागाः सप्तभिः स्वरैर्यथा। नटवसन्तादयः। षाड़वरागाः षड्भिः स्वरैर्यथा। सैरिन्ध्रीप्रभृतयः। ओड़वरागाः पञ्चभिः स्वरैर्यथा मल्लारादयः। इति सङ्गीतदामोदरः ॥ (तथा च सङ्गीतरत्नाकरे स्वराध्याये जातिप्रकरणे। ५३—५४ ॥
"वान्ति यान्त्युड़वोऽत्रेति व्योमोक्तमुड़वं बुधैः।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा ॥
ओड़वी सास्ति येषाञ्च स्वरास्ते खोड़वा मताः।
ते संजाता यत्र गीते तदौड़वितमुच्यते ॥
तत्सम्बन्धादौड़वञ्च पञ्चस्वरमिदं विदुः"।
"क्रमादल्पाल्पतरते षाडवौडवकारिणोः" ॥)

औड़ुम्बरं, क्ली, कुष्ठरोगविशेषः। इति मेदिनी ॥ तस्य लक्षणम्।
"रक्तदाहरागकण्डूभिः परीतं रोमपिञ्जरम्।
उड़ुम्बरफलाभासं कुष्ठमौड़ुम्बरं वदेत्"॥
इति निदानम् ॥ ताम्रम्। इति जटाधरः ॥ ताम्रपात्रादौ च ॥ (उड़ुम्बरस्य विकारः। उड़ुम्बर + अण्। उड़ुम्बरपात्रम्। यज्ञाङ्गलक्षविकारः। यथाह देवलः।
"गृहीत्वौड़ुम्बरं पात्रं वारिपूर्णमुदङ्मुखः"॥)

औड़ुम्बरः, पुं, चतुर्दशयमान्तर्गतयमविशेषः। इति मेदिनी ॥ मुनिविशेषः। यथा,—
"वैखानसा बालिखिल्यौड़ुम्बराः फेनपा वने।
न्यासे कुटीचकः पूर्व्वं बह्वोदो हंसनिष्क्रियौ" ॥
इति श्रीभागवते ३। १२। ४३। "औड़ुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः"। इति तट्टीकायां स्वामी ॥

औत्कर्ष्यं, क्ली, (उत्कर्षस्य भावः। उत्कर्ष + ष्यञ्।) उत्कर्षता ॥

औत्तानपादिः, पुं, (उत्तानपादस्यापत्यम् पुमान्। उत्तानपाद + इञ्।) ध्रुवः। इत्यमरः ॥ स तु उत्तानपादराजपुत्रः। स्वायम्भुवमनुपौत्रः। (यथा भागवते। ४। १०। ३०।
"औत्तानपादे भगवांस्तव शार्ङ्गधन्वा
देवः क्षिणोत्ववनतार्त्तिहरो विपक्षान्॥
उत्तानपादात् सुरुचां जात उत्तमः। इति महाभारतम्॥) ग्रहाणामुपरिस्थितनिश्चलतारा च ॥

औत्सर्गिकः, त्रि, (सामान्यविधिरुत्सर्गस्तस्य भावः। उत्सर्ग + ठञ्।) सामान्यत्वम्। इति स्मार्त्ताः ॥

औत्सुक्यं, क्ली, (उत्सुकस्य भावः। उत्सुक + ष्यञ्।) उत्कण्ठा। इति हेमचन्द्रः ॥ (यथा रत्नावली।
"औत्सुक्येन क्षतत्वरा सहभुवा व्यावर्त्तमाना क्रिया"॥ "रथचरणसमाक्रान्तावदौत्सुक्यमुद्रा"।
इति माघे ११। २६। तथा मेघदूते पूर्व्वमेघे ॥५॥
"इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे"।
व्यभिचारिभावभेदः।
यथा साहित्यदर्पणे ३। १३७। "औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जाः"।
तल्लक्षणं तत्रैव ३। १५६।
"इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।
चित्तताप-त्वँरा-खेद-दीर्घनिश्वसितादिकृत्" ॥
उदाहरणं यथा तत्रैव।
"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्तेचोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" ॥
इच्छा। यथा, तत्त्वकौमुद्याम्।
"औत्सुक्यमिच्छा सा च इष्यमाणप्राप्तौ निवर्त्तते इष्यमाणश्च स्वार्थ इष्टलक्षणत्वात् फलस्य" ॥)

औदनिकः, त्रि, (ओदनं शिल्पमस्य। ओदन + ठञ्।) सूपकारः। इत्यमरः ॥

औदरिकः, त्रि, (उदरे प्रसितः। उदर + ठक्।) विजिगीषाविवर्ज्जितः। उदरमात्रपूरकः। पेटुक इति भाषा। तत्पर्य्यायः। आद्यूनः २। इत्यमरः ॥ (यथा किराते। ११। ५ श्लोकस्य टीकायां मल्लिनाथः। "अतएवाद्यून औदरिकः। आद्यूनः स्यादौदरिके विदिगीषाविवर्ज्जिते। इत्यमरः"॥)
"विजिगीषाव्यवहारः कश्चित् प्रकर्षो वा आलस्यात् तेन विहीनो यः केवलमुदराधीनः"। इति भरतः॥ "स्वोदरपूरणाग्रक्रियानिमित्तकनिन्दात्यागेच्छा विजिगीषा तया रहितः"।
इति रमानाथः ॥

औदश्वित्तं, क्ली, (उदश्वित् + "उदश्वितोऽन्यतरस्याम्"। ४। २। १९। इति पक्षे अण्।) अर्द्धजलयुक्तघोलं। इति हेमचन्द्रः ॥ (उदश्वित्छब्दे अस्य विशेषो ज्ञातव्यः ॥)

औदश्वित्कं, क्ली, (उदश्वितं संस्कृतम्। "उदश्वितोऽन्यतरस्याम् ४। २। १९ इति ठक्। "इसुसक्तान्तात् कः"। ७। ३। ५१। इति ठस्य कः।) अर्द्धजलमिश्रितघोलम्। इति हेमचन्द्रः ॥

औदार्य्यं, क्ली, (उदारस्य भावः। उदार + ष्यञ्।) उदारता। इति हेमचन्द्रः ॥ (वाग्गुणभेदः। यथा किराते १। ३॥ "स सौष्ठवौदार्य्यविशेषशालिनीम्" इति "औदार्य्यं अर्थसम्पत्तिः" इति मल्लिनाथः ॥ सात्त्विको नायकगुणभेदः। यथा साहित्यदर्पणे ३। ५८।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः" ॥
तल्लक्षणं यथा तत्रैव ३। ६३।
"दानं सप्रियभाषणमौदार्य्यं प्रत्युमित्रयोः समता" ॥
नायिकालङ्कारभेदः। यथा, तत्रैव ३। ९४।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः" ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः" ॥
तल्लक्षणं यथा तत्रैव ३। १०३। "औदार्य्यं विनयः सदा" ॥ अस्य उदाहरणं यथा तत्रैव।

"न ब्रूते परुषं गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्संक्षिपति स्थितौ श्रवणतः सा मेक्षुटेऽयागसि
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्य्यश्रुणी लोचने"॥
मनसो वृत्तिभेदः। यथा पञ्चदश्यौ। १५। ३।
"शान्ता घोरास्तथा मूढ़ा मनसो वृत्तयस्त्रिधा।
वैराग्यं क्षान्तिरौदार्य्यमित्याद्या घोरवृत्तयः" ॥)

औदास्यं क्ली, (उदास + ष्यञ्।) उदासस्य भावः। वैराग्यम्। अनुरागादिशून्यता। यथा।
"औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन् दृशोः पतिततामवलोक्य भैम्याः"।
इत्यादि नैषधम् ॥ "क्षौमेवि किलिखनहेतोर्वयमपि कुशाः किमौदास्यम्"। इति पद्यावली ॥

औद्दालकं, क्ली, (उद्दालेन कीटेन सञ्चितम्। उद्दाल + अण् + संज्ञायां कन्।) वल्मीककारिकीटनिर्म्मितमधु।
तस्य गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्। कुष्ठविषरोगनाशित्वञ्च। इति राजवल्लभः ॥
(अथौद्दालकस्य लक्षणं गुणाश्च यथा।
"प्रायो वल्मीकमध्यस्थाः कपिलाः क्षुल्लकीटकाः।
कुर्व्वन्ति कपिलं क्षौद्रं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम्।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
तीर्थविशेषः। यदुक्तं महाभारते ३। ८४। १५१।
"औद्दालकं महाराज तीर्थं मुनिनिषेवितम्।
तत्राभिषेकं कृत्वा वै सर्व्वपापैः प्रमुच्यते" ॥

औद्धत्यं, क्ली, (उद्धत + ष्यञ्।) उद्धतस्य भावः। यथा। "असूयान्यगुणार्द्धीनामौद्धत्यादसहिष्णुता। भ्रूभङ्गदोषसंघोषरक्षात्विङ्गितादिकृत्" ॥ इति साहित्यदर्पणे ३ परिच्छेदः ॥

औद्भिज्जं, क्ली, (उद्भिद् + जन + ड + स्वार्थे अण्।) पांशुलवणं। इति राजनिर्घण्टः ॥

औद्भिदं, क्ली, (उद्भिद + स्वार्थेऽण्।) सामुद्रिलवणम्। अस्य गुणाः। (यथा सुश्रुते। सूत्रस्थाने ४६ अः ॥
"लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्।
सुतिक्तं कटुसंस्कारं विद्यादौद्भिदमौद्भिदम्" ॥)
तीक्ष्णत्वम्। उत्क्लेदकारित्वम्। क्षारयुक्तत्वम्। कटुत्वम्। तिक्तत्वम्। कोष्ठबद्धतानाहशूलनाशित्वञ्च। इति राजवल्लभः ॥ (अस्य पर्य्यायो गुणाश्च यथा—
"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयं।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे। १ भागे ॥
"सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्"।
इति वाभटे सूत्रस्थाने। ६ अ ॥)
उद्भिदो जातं जलम्। तस्य गुणाः। मधुरत्वम्। पित्तशमनत्वम्। अविदाहित्वम्। इति राजवल्लभः ॥
("औद्भिदं पित्तशमनं मधुरं न विदाहि च" ॥
इति वैद्यकचक्रपाणिदत्तव्यगुणे पाणीयवर्गे ॥

अस्य व्याख्यायां शिवदासेनोक्तं यथा।
"औद्भिदं निम्नप्रदेशादूर्द्ध्वमुत्तिष्ठज्जलम्"॥
उद्भिदो जातं द्रव्यादि। यथा॥
"तत् नस्त्रिविधं ज्ञेयं जाङ्गलौद्भिदपार्थिवम्"।
"भौममौषधमुद्दिष्टमौद्भिदन्तु चतुर्व्विधम्।
वनस्पतिर्वीरुधश्च वानस्पत्यस्तथौषधिः"॥
"मूलत्वक्सारनिर्य्यासनाड़स्वरसपल्लवाः।
क्षाराः क्षीरं फलं पुष्पं भस्मतैलानि कण्टकाः॥
पत्राणि शुङ्गाः कन्दाश्च प्ररोहश्चौद्भिदो गणः"।
इति चरके सूत्रस्थाने। १ अः॥)

औदाहिकं, क्ली, (उदाहसमये लब्धम्। उदाह + ठञ्।) भार्य्याप्राप्तिकाले लब्धं भार्य्याधनम्। इति दायभागः॥ तत् भ्राढभिरविभाज्यम्। यथा।
"पिढद्रव्याविनाशेन यदन्यत् स्वयमर्জ্জयेत्।
मैत्रमौदाहिकञ्चैव दायादानां न तद्भवेत्॥
इति याज्ञवल्क्यः॥ (यथा च मनुः। ९। २०९।
"विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौदाहिकञ्चैव माधुपर्किकमेव च"॥)

औपगवः, पुं, उपगोरपत्यम्। इति भरतः॥ उप समीपे गौर्य्यस्य इति उपगुर्गोपः। लक्षणया तत्पुरोहिते उपगुशब्दः। यथा हारीतः।
"यं वर्षे याजयेद् यस्तु स तद्वर्षत्रयमाप्नुयात्
सद्योवर्षेण वर्षेणैवमेवान्नवीदृभगः"॥* तथाच लक्षणया ब्राह्मण उपगुशब्दवाच्यः। तस्यापत्यमौपगवः। इति श्रीभागवतटीकायां स्वामी। (उपगोरिदमिति व्युत्पत्त्या उपगुसम्बन्धिनि, त्रि-उपगु + "तस्येदम्"। ४। ३। १२०। इत्यण्॥)

औपगवकं, क्ली, (औपगवानां समूहः। "गोचोच्चोष्ट्रेति"। ४। २। ३९। वुञ्।) औपगवसमूहः। इत्यमरः॥

औपग्रस्तिकः, पुं, (उपग्रस्तं ग्रासकालं भूतः। उपग्रस्त + "तमधीष्टो भृतो भूतो भावी"। ५। १। इति ठञ्।) राऽग्रस्तस्वन्द्रः सूर्य्यश्च। इति शब्दरत्नावली॥

औपनिधिकं, क्ली, (उपनिधि + स्वार्थे ठञ्।) उपनिधिः। प्रीत्या भोगार्थमर्पितद्रव्यम्। इति स्मृतिः॥

औपम्यं, क्ली, (उपमैव। चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) सादृश्यम्। तत्पर्य्यायः। अनुकारः २ अनुहारः ३ साम्यम् ४ तुला ५ उपमा ६ कक्षः ७ उपमानम् ८। इति हेमचन्द्रः॥ (यथा, हितोपदेशे १। ७३॥
"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः"॥
"औपम्यं नाम यदन्येनान्यस्य सादृश्यमधिकृत्य प्रकाशनम्। यथा दण्डेन दण्डकस्य धनुषा धानुष्कस्येष्वासेनारोग्यदस्येति"। इति विमानस्थाने। ८ अध्याये॥ चरकेणोक्तम्॥)

औपयिकः, त्रि, (उपायेन सञ्जातः। उपाय + ठक् + ऋस्वश्च।) न्याय्यः। उपयुक्तः। इत्यमरः॥ (यथा, महाभारते विदुरागमनपर्व्वणि १। २०५। १२।
"इतश्चैव महाराज तेषु पुत्रेषु चैव ह।
वृत्तमौपयिकं मन्ये भीष्मेण सह भारत"!॥
तथा रामायणे २। ५४। ३९।
"वासमौपयिकं मन्ये तव राम महाबल"।
स्त्रियां तु ङीप्। यथा महाभारते वैवाहिकपर्व्वणि १। १९४। ११।
"न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजानां कथयन्ति वीराः"॥
स्वार्थे विनयादिभ्यष्ठक्प्रत्यये कृते उपायएव औपयिकम्। यथा भारविः, ३५।
"शिवमौपयिकं गरीयसीम्" इति॥

औपरोधिकः, पुं, (उपरोधः प्रयोजनमस्य। उपरोध + ठक्।) पीलुदण्डः। तत्पर्य्यायः। पैलवः २। इति हेमचन्द्रः॥ उपरोधसम्बन्धिनि त्रि॥

औपवस्तं, क्ली, (उपवस्त + प्रज्ञाद्यण्।) उपवासः। इति हेमचन्द्रः॥

औपसर्गिकः, पुं, (उपसर्ग + ठक्।) सन्निपातरोगविशेषः। तस्य लक्षणम्। यथा,—
"कफोऽनुलोमवातेन यदि पित्तानुगो भवेत्।
खेदग्लैत्यादिभिर्जुष्टस्तदा भवति मानवः॥
प्रतिलोमः पुनस्तेन खास्यमायाति तत्क्षणात्।
औपसर्गिक एवान्यः सन्निपात उदाहृतः"॥
इति वैद्यकम्॥ उपसर्गसम्बन्धिनि त्रि॥
("तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः"। इति सुश्रुते सूत्रस्थाने। ३५ अध्याये॥
"प्रसङ्गात् गात्रसंस्पर्शान्निश्वासात् सहभोजनात्।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्"॥
इति च सुश्रुते निदानस्थाने। ५ अध्याये॥
माधवसंग्रहस्य व्याख्यायां कुष्ठाधिकारे यथा।
"औपसर्गिकरोगा इति औपसर्गिकाः पापरोगादयो भूतोपसर्गजाः संक्रामन्ति आविशन्ति"॥)

औपस्थ्यं, क्ली, (उपस्थाद्भवम्। उपस्थ + ष्यञ्।) उपस्थेन्द्रियसुखम्। इति श्रीभागवतम्॥ (यथा, तत्रैव ७। ६। १३।
"औपस्थ्यजैह्व्यं बत मन्यमानः
कथं विरज्येत दुरन्तमोहः"॥)

औमीनं, त्रि, (उमानां भवनं क्षेत्रं वा। "विभाषातिलमाषोमेति"। ५। २। ४। यञ्छे खञ्।) उमम्। उमाक्षेत्रम्। इत्यमरटीकायां भरतः॥ मसिनार क्षेत इति भाषा॥

औरगं, क्ली, (उरगस्य इदम्। उरग + अण्।) अश्वेषानक्षत्रम्। इति जटाधरः। सर्पसम्बन्धिनि त्रि॥

औरभ्रः, पुं, (उरभ्रस्य मेषस्य इदम्। उरभ्र + अण्।) कम्बलः। तत्पर्य्यायः। उर्णायुः २ आविकः ३ रल्लकः ४। इति हेमचन्द्रः॥ (मेषमांसम्। यथा मनुः। ३। २६८।
"द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनाथ सप्त वै"॥
मेषदुग्धम्। यथा,—
"औरभ्रं मधुरं रूक्षमुष्णं वातकफापहम्।
न श्लक्ष्णं रक्तपित्तानां वातिकानां हितं भवेत्"॥
इति हारीते प्रथमस्थाने। ८ अध्याये॥
धन्वन्तरिं प्रति प्रश्नकारकः ऋषिभेदः। यथा सुश्रुते सूत्रस्थाने १। "अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशीराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः"॥)

औरभ्रकं, क्ली, (उरभ्राणां समूहः। उरभ्र + "गोचोच्चोष्ट्रोरभ्रेति"। ४। २। ३९। वुञ्।) मेषसमूहः। इत्यमरः॥ भेड़ार पाल इति भाषा॥

औरसः, पुं क्ली, (उरसा निर्म्मितः। उरस् + अण्।) स्वजातपुत्रः। तत्पर्य्यायः। औरस्यः २। इत्यमरः॥ उरस्यः ३। इति तट्टीका॥ द्वादशविधपुत्रान्तर्गतश्रेष्ठपुत्रोऽयम्। स तु सवर्णायां भार्य्यायां स्वयं जनितः। यथा। "सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं विद्यात्"। इति बौधायनः॥ (तथा मनुः। ९। १६६।
"क्षेत्रे चैवं संस्कृतायान्तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात् पुत्रं प्रथमकल्पितम्"॥)
"औरसो धर्म्मपत्नीजः" इत्यादि याज्ञवल्क्यः॥ २। १३१॥

औरस्यः, पुं क्ली, (उरसो भवः। उरस् + यत्। ततः स्वार्थेऽण्।) औरसपुत्रः। इत्यमरः॥ (क्ली, उरसो वक्षस उत्पन्नम्। वक्षोभवम्। यथा शिक्षायाम्। १६।
"इकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्"।
औरस्यं तं विजानीयात् कण्ठ्यामाङ्गरसंयुतम्"॥)

और्द्धदेहिकं, त्रि, (ऊर्द्धदेहाय भवम्। ऊर्द्धदेह + ठञ्।) मृतार्थं तदहर्दानम्। इत्यमरः॥ यदङ्गि मृतस्तदहःप्रभृति सपिण्डीकरणात् पूर्व्वं प्रेतत्वनिर्हेतुकं यत् पिण्डादिदानं तत्। इति भरतः॥ (पुत्रदाराद्यवश्यभर्त्तव्यपीड़नेन यत्पारलौकिकधर्म्मबुद्धा दानादि करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवति।
यथा मनुः ११। १०।
"कृत्वानामुपरोधेन यत्करोत्यौर्द्धदेहिकम्।
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च"॥
तथा रामायणे २। ७७। ३।
"दासीदासांश्च यानानि वेश्मानि सुमहान्ति च।
ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्द्धदेहिकम्"॥
(और्द्धदेहिकम् इत्यपि स्यात्॥)

और्द्धस्रोतसिकः, त्रि, (ऊर्द्धस्रोतस् + ठञ्।) ग्रैवः। इति शिकाण्डशेषः॥ (और्द्धस्रोतसिकः। इत्यपि स्यात्॥)

और्व्वं, क्ली, (उर्व्व्या भवम्। उर्व्वी + अण्।) पांशुवज्रवणम्। इति राजनिर्घण्टः॥

और्व्वः, पुं, (और्व्वात् भृगुवंशीयात् ऋषेर्जातः। और्व्व + अण्। और्व्वर्षिक्रोधजत्वात्तथात्वम्।) वाड़वानलः। इत्यमरः॥ स तु भूगोलस्य दक्षिणसीमा। तत्र सर्व्वे नरकाः दैत्याश्च वसन्ति। इति सिद्धान्तशिरोमणिः॥ स्वनामख्यातो भृगुवंशीयऋषिभेदः। तज्जन्मादिकथा, महाभारते चैत्ररथपर्व्वणि १७९ अध्याये। उक्ता। यथा,—

"ततो महीतलं तात क्षत्रियेण यदृच्छया ।
खनताधिगतं वित्तं केनचिद्भृगुवेश्मनि ॥
तद्वित्तं ददृशुः सर्व्वे समेताः क्षत्रियर्षभाः ।
अवमन्य ततः क्रोधाद्भृगूंस्ताष्करणागतान् ॥
निजघ्नुः परमेष्वासाः सर्व्वांस्तान्निशितैः शरैः ।
आगर्भादवशेषान्तस्तेषु सर्व्वां वन्धसुराम् ॥
तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा ।
भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे ॥
तासामन्यतमा गर्भं भयाद्भृगोर्महौजसम् ।
ऊरुणैकेन वामोरुर्भर्त्तुः कुलविवृद्धये ॥
तद्भृगुमुपलभ्याशु ब्राह्मणी या भयार्दिता ।
गत्वैका कथयामास क्षत्रियाणामुपक्करे ॥
ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः ।
दृष्ट्वोर्व्वां ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा" ॥
"अथ गर्भः स भित्त्वोरु ब्राह्मणा निर्ज्जगाम ह ।
सूर्य्यान् दृष्ट्वा क्षत्रियानां मध्याह्नइव भास्करः ॥
ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः" ॥

अयमौर्व्वस्तु पितृवधामर्षात् क्षत्रियवधे कृत-प्रतिज्ञ उग्रे तपसि वर्त्तमानः पितृभिर्निवारितः । ततो दृष्टप्रतिज्ञो नाहं भवितुमुत्सहे इति जातग्रङ्गः अमोघत्वाच्च क्रोधवह्नेः पितॄनुक्तवान् । यथा तत्रैव १८१ अध्याये ।

"यश्चायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति ।
दहेदेव च मामेव निगृहीतः स्वतेजसा ॥
भवतां च विजानामि सर्व्वलोकहितैषिणाम् ।
तस्माद्विधध्वं यज्ञेयो लोकानां मम चेश्वराः ॥

पितर ऊचुः ।

य एव मन्युजस्तेऽग्निर्लोकानादातुमिच्छति ।
अम्भूतं मुञ्च भद्रन्ते लोका ह्यप्सु प्रतिष्ठिताः ॥
आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत् ।
तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥
अयं तिष्ठतु ते विप्र यदिच्छसि महोदधौ ॥
मन्युजोऽग्निर्दहन्नापो लोका ह्यापोमयाः स्मृताः ॥
एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति ।
नचैवं समरा लोका गमिष्यन्ति पराभवम् ॥

वशिष्ठ उवाच ।

ततश्च क्रोधजं तात और्व्वोऽग्निं वरुणालये ।
उत्ससर्ज्ज स चैवाप उपयुङ्क्ते महोदधौ ॥
महद्ययश्चिरो भूत्वा यत्तद्वेदविदो विदुः" ॥)
(उर्व्वस्यापत्यम् ।) षष्ठप्रवरान्तर्गतमुनिविशेषः ।
इति पुराणम् ॥

और्व्वशेयः, पु, (उर्व्वस्याः अपत्यम् । उर्व्वशी + ढक् ।) अगस्त्यमुनिः । इति हेमचन्द्रः ॥
(अस्य जन्मकथा पुराणेषूक्ता यथा,
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत् कुम्भे न्यपतद्दाशतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च द्वावृषी संबभूवतुः" ॥
उर्व्वशीगर्भजातौ पुरूरवसः सप्त पुत्राः ।
तत्कथा हरिवंशे २५ अध्याये द्रष्टव्या ॥)

औलूकं, क्ली, (उलूकानां समूहः । अण् ।) उलूक-समूहः । इति जटाधरः ॥ पेचार भाँक् इति भाषा ॥

और्व्वेयः, पुं, (उलूकस्य मनेरपत्यं पुमान् । उलूक + गर्गादित्वात् यञ् ।) वैशेषिकः । वैशेषिकदर्शन-वेत्ता । इति हेमचन्द्रः ॥ (अयं खलु कणाद-इत्याख्यया प्रसिद्धः ॥)

औशीरं, क्ली, (उश्यते । वश् + ईरन् । प्रज्ञाद्यण् । ५ । ४ ३९ । यद्वा उशीरस्येदं "तस्येदम्" । ४ । ३ । १२० । इत्यण् ।) शयनासनम् । इत्यमरः ॥ शयनं खाप्यः शय्या वा आसनं पीठादि । शयनासनं समुदितमिति स्वामी । एथगिति सुभूतिः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते राज-धर्म्मानुशासनपर्व्वणि १२ । ६० । ३१ ।
"क्षत्रं वेष्टनमौशीरमुपानद्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे" ॥)
उशीरजम् । चामरम् । दण्डः । इति हेमचन्द्रः ॥

औशीरः, पुं, (उशीरस्यायम् । उशीर + अण् ।) चामरदण्डः । इत्यमरः ॥

औषणं, क्ली, (उषण + भावार्थे अण् ।) कटुरसः । उषणं मरीचं तस्य भावः ॥

औषधं, क्ली, (ओषधेरिदम् । ओषधिरेव वा "ओ-षधेरजातौ" ५ । ४ ३७ । इत्यण् ।) रोगनाशकद्रव्यं । ओषधिभवं भवार्थे णप्रत्ययः । तत्पर्य्यायः । भेष-जम् २ भैषज्यम् ३ अगदः ४ जायुः ५ । इत्यमरः ॥ जैत्रम् ६ आयुर्य्यागः ७ गदारातिः ८ अमृतम् ९ आयुर्द्धयम् १० । इति वैद्यकम् ॥
("शोधनं शमनञ्चेति समासादौषधं द्विधा ।
शरीरजानां दोषाणां क्रमेण परमौषधम् ॥
वस्तिर्विरेको वमनं तथा तैलं घृतं मधु ।
धीर्धैर्य्यात्मादिविज्ञानं मनोदोषौषधमुत्तमम्" ॥
इति वाभटे सूत्रस्थाने । १ अध्याये ॥
"धन्वसाधारणे देशे समे सम्मृत्तिके शुचौ ।
श्मशानचैत्ययतनस्वभ्रवल्मीकवर्ज्जिते ॥
मृदौ प्रदक्षिणजले क्षुरशोभिसस्यते ।
अफालकृष्टेऽनाक्रान्ते पादपैर्बहुलतरैः ॥
ग्रस्यते भेषजं जातं युक्तवर्णरसादिभिः ।
जन्त्वदग्धं दवादग्धमविदग्धञ्च वैजातैः ॥
भूतैश्छायातपाभ्याद्यैर्यथाकालञ्च सेवितम् ।
अवगाढ़मूलमुदीचीं दिशमाश्रितम् ॥
अथ कल्याणचरितः आद्यः शुचिरुपोषितः ।
गृह्णीयादौषधं सुस्थं स्थितं काले च कल्पयेत् ।
सक्षीरं तदसम्पत्तावनतिक्रान्तवत्सरम् ।
ऋते गुडघृतक्षौद्रधान्यक्षाविड्घृतैः" ॥
इति तत्रैव कल्पस्थाने । ६ अध्याये ॥
"यथाविधं यथाग्रञ्च यथाग्निश्चानिर्यथा ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥
औषधं ह्यनभिज्ञातं नामरूपगुणैस्त्रिभिः ।
विज्ञातमपि दुर्युक्तमनर्थायोपपद्यते ॥
योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत् ।
भेषजं वापि दुर्युक्तं तीक्ष्णं सम्पद्यते विषम् ॥
तस्मान्न भिषजा युक्तं युक्तिवाह्येन भेषजम् ।
धीमता किञ्चिदादेयं जीवितारोग्यकाङ्क्षिणा ॥
कुर्य्यान्निपतितो मूर्द्धि सप्तरेषं वासवाग्निजः ।
सप्तरेषमातुरं कुर्य्यान्नत्वज्ञमतमौषधम् ॥

तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स एव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत्" ॥
इति चरके सूत्रस्थाने । १ अध्याये ॥

"करणं पुनर्भेषजम् । भेषजं नाम तद्द्रव्यदुपकर-णायोपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायाज्ञेभ्यः तद्विविधं व्यापाश्रयभेदात् । दैव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहार-होमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगम-नादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः एतदेव भेषजमङ्गमेदादपि द्विविधं । द्रव्यभूतमद्रव्यभूतञ्च । तत्र यद्द्रव्यभूतं तदुपायाभि-धास्यतम् । उपायो नाम भयदर्शन-विस्मापन-क्षोभ-ण-हर्षण-भर्त्सन-बध-बन्ध-खप्न-संवाहनादिरमूर्त्तो भावः यथोक्ताः सिद्धुपायाश्च । यत्तु द्रव्यभूतं तदमनादिषु योगमुपैति ।

तस्यापीयं परीक्षा इदमेवं प्रकृत्या एवंगुणमेवं प्रभावमस्मिन् देशे जातमस्मिन्नृतौ एवं गृहीत-मेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तमोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूचा-नेनानेन वा विशेषेण युक्तमिति" । इति च तत्रैव विमानस्थाने ८ अध्याये ॥

पर्य्यायानाह चरकस्चिकित्सास्थाने । १अः ।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत् ।
स्वस्यस्यौजस्करं किञ्चिल्लिखिदार्त्तस्य रोगनुत् ॥
अभेषजञ्च द्विविधं बाधनं सानुबाधनम्" ।
तथा, सुश्रुते सूत्रस्थाने ३७ अध्याये यथा,—
"शतभिषगर्कराम्रविषमवल्मीकाश्मशानाद्यतनदे-वतायतनसिकताभिरनुपहतामनूषरामभङ्गुराम-दूरादेकां स्निग्धां प्ररोहवतीं मृदीं स्थिरां समां श्लक्ष्णां गौरीं लोहितां वा भूमिमौषधार्थं परी-क्षेत तस्यां जातमपि क्रमि-विष-ग्रस्तातप-पवन-दहन-तोयसम्बाध-मार्गैरनुपहतमेकरसं पुष्टं पृथ्व-वगाढ़मूलमुदीच्यां चौषधमाददीतैतौषधभूमिप-रीक्षाविशेषसामान्यं ॥

विशेषस्तु । तत्राम्रवती स्थिरा गुर्व्वी श्यामा श्लक्ष्णा वा स्थूलवृक्षगुल्मप्राया खगगुरुभूयिष्ठा ॥ स्निग्धा शीतला सम्मोदका स्निग्धशस्यवृक्षकोमलवृ-क्षप्राया शुक्लाम्बुगुरुभूयिष्ठा ॥ नानावर्णा लघ्वम्ल-वती प्रविरलाल्पापाण्डुवृक्षप्ररोहाम्बिगुणभूयिष्ठा ॥ रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्ष-प्रायाऽनिलगुणभूयिष्ठा ॥ मृदी समा शुभ्रवल्मयल्प-रसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्ष-प्राया श्यामा चाकाशगुणभूयिष्ठा ॥

तत्र केचिदाङ्गराचार्य्याः । प्रावृट्-वर्षा-शर-द्धेमन्त-वसन्त-ग्रीष्मेषु यथासङ्ख्यं मूल-पत्र-त्वक्-क्षीरसार-फलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येषु ऋतुषु आददीताग्नेयान्याग्नेयेष्वेवेभयोपपन्नगुणानि

भवन्ति । सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धगृहीतानि जायन्ते । एतेन ग्रहेण व्याख्यातम् ॥

तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतो भागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति । सर्व्राण्येव चाभिनवान्यन्यत्र मधु-घृत-गुड़-पिप्पली-विड़ङ्गेभ्यः । सर्व्राण्येव सक्षीराणि वीर्य्यवन्ति तेषामसम्यक्त्वावनतिक्रान्तसंवत्सराण्याददीतेति" ॥)

नानारोगहरौषधादिर्यथा । रुद्र उवाच ।

"एवं धन्वन्तरिर्विष्णुः सुश्रुतादीनुवाच ह ।
हरिः पुनर्हरायाह नानारोगान् रुगर्दनान्" ॥

हरिरुवाच ।

"सर्व्वज्वरेषु प्रथमं कार्य्यं शृङ्गवर! लङ्घनम् ।
क्वथितोदकपानञ्च तथा निर्व्वातसेवनम् ॥
अभिस्वेदो ज्वरान्येवं नाशमायान्ति हीश्वर!।
वातज्वरहरः क्वाथो गुडूच्या मुस्तकेन च ॥
दुरालभयैव कृतं पित्तज्वरहरं भृशम् ।
शुण्ठीपर्पटमुस्तैश्च बालकोशीरचन्दनैः ॥
साध्यः क्वाथः श्लेष्मजन्तु सशुण्ठिः सदुरालभः ।
सवालकः सर्व्वज्वरं सशुण्ठिः सहपर्पटः ॥
किराततिक्तकैर्वापि गुडूचीसुण्ठितिक्तकैः ।
पित्तज्वरहरः स्याच्च भृशन्त्यं योगमुत्तमम् ॥
बालकोशीरपाठाभिः कण्टकारिकमुस्तकैः ।
ज्वरनुच्च कृतक्वाथस्तथा वै सुरदारुणा ॥
धन्याकनिम्बमुस्तानां समधुः स च शृङ्गवर!।
पटोलपत्रयुक्तश्च गुडूचीत्रिफलायुतः ॥
पीतोऽखिलज्वरहरः क्षुधाकृद्दीपनस्त्विदम् ।
हरीतकीपिप्पलीनामामलीचित्रकोद्भवम् ॥
चूर्णं जलञ्च क्वथितं धन्याकोशीरपर्पटैः ।
आमलक्या गुडूच्या च मधुयुक्तं सचन्दनम् ॥
समस्तज्वरनुत् स्याच्च सन्निपातहरं भृशम् ।
हरिद्रानिम्बत्रिफलामुस्तकैर्देवदारुणा ॥
कषायं कटुरोहिण्या सपटोलं सपत्रकम् ।
त्रिदोषज्वरनुत् स्याच्च पीतन्तु क्वथितं जलम् ॥
कण्टकारिनागरेण गुडूच्या पुष्करेण च ।
जग्ध्वा नागबलाचूर्णं श्वासकासादिनुद्भवेत् ॥
कफवातज्वरे देयं जलमुष्णं पिपासिने ।
मण्डो वा मुद्गयूषं वा शाल्यन्नं वाथ यूषवत् ॥
ज्वरार्त्तमानुषे देयं ज्वरहानिस्तदा भवेत् ।
विश्वपर्पटकोशीरघनचन्दनसाधितम् ॥
दद्यात् सुशीतलं वारि छर्दिकृद्दिव्यरदाहनुत् ।
विल्वादिपञ्चमूलस्य क्वाथः स्यादातिके ज्वरे ॥
पाचनं पिप्पलीमूलं गुडूचीविश्वभेषजम् ।
वातज्वरे त्वयं क्वाथो दत्तः शान्तिकरः परः ॥
पित्तज्वरनुत् समधुः क्वाथः पर्पटनिम्बयोः ।
विधाने क्रियमाणेऽपि यस्य संज्ञा न जायते ॥
पादयोस्तु ललाटे वा दहेल्लोहशलाकया ।
तिक्ता पाठा पटोलश्च विशाला त्रिफला त्रिवृत् ॥
सत्तोरो भेदनः क्वाथः सर्व्वज्वरविशोधनः" ॥
इति गारुड़े १७९ अध्यायः ॥ * ॥

भगवानुवाच ।

"सप्तरात्रात् प्रजायन्ते खल्वीटस्य कचाः शुभाः ।
दग्धहस्तिदन्तलेपात् साजात्क्षीररसाञ्जनात् ॥
भृङ्गराजरसेनैव चतुर्भागेण साधितम् ।
केशरञ्जिकरं तैलं गुञ्जाचूर्णान्वितेन च ॥
एला मांसी कुरुमुरायुक्तमभ्यङ्कृतः शिव! ।
गुञ्जाफलं ममाप्येव लेपनं चेन्नलुप्तनुत् ॥
आम्रास्थिचूर्णलेपाद्धि केशाः सूक्ष्मा भवन्ति वै ।
बद्धमूला घना दीर्घाः स्निग्धाः स्युर्नात्यन्ति च ॥
विड़ङ्गगन्धपाषाणसाधितं तैलमुत्तमम् ।
सचतुर्गुणगोमूत्रं समनःशिलमेव च ॥
शिरोऽभ्यङ्काच्छिरोजन्मयूकालिक्षाश्चयं नयेत् ।
नवदग्धशङ्खचूर्णंघृतसीसकलेपिताः ॥
कचाः श्लक्ष्णा मृदाक्षण्या भवन्ति वृषभध्वज! ।
भृङ्गराजं लोहचूर्णं त्रिफला बीजपूरकम् ॥
नीली च करवीरश्च गुड़मेतैः समैः पृथक् ।
पलितानीह कृष्णानि कुर्य्याल्लेपान्मृदौषधम् ॥
आम्रास्थिमज्जा त्रिफला नीली च भृङ्गराजकम् ।
जीर्णं पङ्कलौहचूर्णं काञ्जिकं कृष्णकेशकृत् ॥
चक्रमर्दकबीजानि कुरुमेरण्डमूलकम् ।
अत्युष्णकाञ्जिकं पिष्ट्वा लेपान्मस्तकरोगनुत् ॥
सैन्धवञ्च वचा हिङ्गु कुरुं नागेश्वरं तथा ।
घृतपुष्पा देवदारु एभिस्तैलन्तु साधितम् ॥
गोपुरीषरसेनैव चतुर्भागेण संयुतम् ।
तत्कर्णभरणाद्रुद्र! कर्णशूलं क्षयं नयेत् ॥
मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव! ।
कर्णयोः पूतिनाशः स्यात् क्षमिसावादिकस्य च ॥
मालतीपुष्पदलयो रसेन भरणात् तथा ।
गोजलेनैव पूरेण कर्णस्रावो विनश्यति ॥
कुरुमाधमरीचानि तगरं मधु पिप्पली ।
अपामार्गोऽश्वगन्धा च वृहती सितसर्षपाः ॥
यवाश्चिन्ताः सैन्धवश्च पादिकोद्वर्त्तनं शुभम् ।
लिङ्गबाऊस्तनानाञ्च कर्णयोर्च्छिद्रकृद्भवेत् ॥
कटुतैलं भल्लातकं वृहतीफलदाड़िमम् ।
वल्कलैः साधितं स्निग्धं लिङ्गं तेन विवर्द्धते" ॥
इति गारुड़े १८० अध्यायः ॥ * ॥

हरिरुवाच ।

"शोभाञ्जनपत्ररसं मधुयुक्तं हि चक्षुषोः ।
भरणाद्रोगहरणं भवेन्नात्रास्त्यत्र संशयः ॥
अशीतितिलपुष्पाणि जात्याश्च कुसुमानि च ।
मया निम्बामला सुण्ठी पिप्पली तगरं त्रिफलम् ॥
क्वाथयुष्कां वटिं कुर्य्यात् पिष्ट्वा तण्डुलवारिणा ।
मधुना सह सा चाक्ष्णोरञ्जनात्तिमिरादिनुत् ॥
विभीतकास्थिमज्जा तु शृङ्गनाभिर्मनःशिला ।
निम्बपत्रमरीचानि अजामूत्रेण पेषयेत् ॥
पुष्पं राज्यन्धतां हन्ति तिमिरं पटलं तथा ।
चतुर्भागाणि शृङ्गस्य तदर्द्धेन मनःशिला ॥
सैन्धवश्च तदर्द्धेन एतत् पिष्टोदकेन तु ।
क्वाथयुष्कान्तु वटिकां कृत्वा नयनमञ्जयेत् ॥
तिमिरं पटलं हन्ति पिटकस्य महौषधम् ।
त्रिकटु त्रिफला चैव करञ्जस्य फलानि च ॥
सैन्धवं रजनी द्वे च भृङ्गराजरसेन हि ।
पिष्ट्वा तदञ्जनादेव तिमिरादिविनाशनम् ॥
अटरूषकमूलन्तु काञ्जिकापिष्टमेव च ।
तेनाक्षिभूरिलेपाच्च चक्षुःशूलं विनश्यति ॥
सतक्रं बदरीमूलं पीतमक्ष्ण्यथां हरेत् ।
सैन्धवं कटुतैलञ्च अपामार्गस्य मूलकम् ॥
क्षीरकाञ्जिकसंघृष्टं ताम्रपात्रे च तेन च ।
अञ्जनात् पिटकस्यैव नाशो भवति शृङ्गर! ॥
विल्वनीलीकारमूलं पिष्टमम्बुजलेन च ।
अनेनाञ्जितमात्रेण नश्यन्ति तिमिराणि हि ॥
पिप्पलीकतकञ्चैव हरिद्रामलकं वचा ।
खदिरपिप्पलवर्त्तिश्च अञ्जनं नेत्ररोगनुत् ॥
नीरपूर्णमुखो धौति वृहद्वातेन योऽक्षिणी ।
प्रभाते नेत्ररोगैश्च नित्यं सर्व्वैः प्रमुच्यते ॥
शुक्लैरण्डस्य मूलेन पत्रेणापि प्रसाधितम् ।
छागदुग्धं सेकयुक्तं चक्षुषोर्वातरोगनुत् ॥
चन्दनं सैन्धवं रक्तपलाशश्च हरीतकी ।
पटोलकुसुमं नीली चक्रिका हरतेऽञ्जनात् ॥
गृञ्जामूलं छागमूत्रपृष्टं तिमिरनुच्च तत् ।
रौप्यताम्रसुवर्णानां हस्तघृष्टं शलाकया ॥
घृतं तद्वमनं रुद्र! कामलाव्याधिनाशनम् ।
घोषाफलमधाघ्रातं पीतं कामलनाशनम् ॥
दूर्व्वादाड़िमपुष्पन्तु श्लक्ष्णकहरीतकी ।
नासाश्रिरारक्तनुत् स्यान्नस्याद्वै खरसेन हि ॥
सुपिष्टं जिङ्गिनीमूलं तद्रसेन वृषध्वज! ।
नस्यदानाद्विनश्येत नासार्शो नीललोहित! ॥
गव्यं घृतं सर्व्वरसं रुद्र! धन्याकसैन्धवम् ।
धुस्तूरकं गैरिकञ्च एतैः साधितसिक्थकम् ॥
सतैलं व्रणनुत् स्याच्च स्फुटितोच्चटितोधरे ।
जातीपत्रञ्च चर्व्वित्वा विघृतं मुखरोगनुत् ॥
भक्ष्यात् केशरबीजस्य दन्ताः स्युश्चलिताः स्थिराः
मुस्तकं कुरुमेला च यष्टीमधुकवालुकम् ॥
धन्याकमेतद्दन्तान्मुखदुर्गन्धनुत् हर! ।
कषायं कटुकं वापि तिक्तं वै तस्य भक्षणात् ॥
तैलयुक्तस्य नित्यं स्यात् मुखदुर्गन्धनाक्षयः ।
दन्तव्रणानि सर्व्वाणि क्षयं गच्छन्त्यनेन तु ॥
काञ्जिकस्य सतैलस्य गण्डूषकवलाश्रितिः ।
ताम्बूलचूर्णदग्धस्य मुखस्य व्याधिनुच्छिव! ॥
परित्यक्तः श्लेष्मगणः शुण्ठीचर्वणतो यथा ।
मातुलुङ्गदलान्येला यष्टीमधु च पिप्पली ॥
जातीपत्रमधैश्चाक्ष्णा चूर्णं लीढ़ं तथा घृतम् ।
श्वेतापालिकाजटायाश्च चर्वणं गलगुण्ठिनुत् ॥
नासाश्रिरारक्तकर्षान्नश्येत् शृङ्गर! जिङ्गिका ।
रसः शिरीषबीजानां हृदस्य चतुर्गुणः ॥
तेन पक्वेन भूतेश! नस्यं मस्तकरोगनुत् ।
गलरोगा विनश्यन्ति नस्यमात्रेण तत्क्षणात् ।
दन्तकीटविनाशः स्यात् गुञ्जामूलस्य चर्व्वणात् ।
काकजङ्घा खुही नीली कषायाम्बकमूलकम् ॥
दन्ताक्रान्तं दन्तशूलं क्रिमीन्नाशयते शिव! ।
घृतं कर्कटपादेन दुग्धोन्मिश्रेण साधितम् ।
तेन चाभ्यञ्जिता दन्ताः कुर्य्युः कटकटाम्बहि ।

लिप्ताः कर्कटपादेन केवलेनाथ वा द्विजाः ॥
त्रिसप्ताहं वारिपिष्टा ज्योतिष्मत्याः फलस्य हि ।
मञ्जाभया च शुक्रस्य लेपादङ्गकलङ्गनुत् ॥
लोध्रकुङ्कुममञ्जिष्ठा लोहकालीयकानि च ।
यवतण्डुलमेतैश्च यष्टीमधुसमन्वितैः ॥
वारिपिष्टैर्वक्त्रलेपः स्त्रीणां शोभनवक्त्रकृत् ।
द्विभागच्छागदुग्धेन तैलप्रस्तन्तु साधितम् ॥
रक्तचन्दनमञ्जिष्ठालाक्षाणां कर्षकेण वा ।
यष्टीमधुकुङ्कुमाभ्यां सप्ताहान्मुखकान्तिकृत् ॥
शुण्ठी च पिप्पलीचूर्णं गुडूची कणटकारिका ।
एभिश्च क्वथितं वारि पीतञ्चाग्निं करोति वै ॥
वातशूलक्षयञ्चैव सुरयक्ष्मक्षेश्वर !।
करञ्जपर्पटोशीरं दहती कटुरोहिणी ॥
गोचुरं क्वथितं क्षेभिर्वारि पीतं श्रमापहम् ।
दाहपित्तज्वरं शोषं मूर्च्छाञ्चैव क्षयं नयेत् ॥
मध्वाज्यपिप्पलीचूर्णं क्वथितं क्षीरसंयुतम् ।
पीतं हृद्रोगकासस्य विषमज्वरनुद्भवेत् ॥
क्वाथौषधीनां सर्व्वासां कर्षार्द्धं ग्राह्यमेव च ।
वयोऽनुरूपतो ज्ञेयो विशेषो वृषभध्वज !॥
दुग्धं पीतन्तु संयुक्तं गोपरीषरसेन च ।
विषमज्वरनुत् स्याच्च काकजंघारसस्तथा ॥
सशुण्ठीक्वथितं क्षीरमजाया ज्वरनुद्भवेत् ।
यष्टीमधु मुस्तकञ्च सैन्धवं दहतीफलम् ॥
एतैर्नस्यप्रदानाच्च निद्रा स्यात् पुरुषस्य च ।
मरीचमधुशुण्ठीनां नस्यान्निद्रा भवेच्छिव !॥
मूलन्तु काकजङ्घाया निद्राकृत् स्यात् शिरःस्थितम् ।
सिद्धं तैलं काञ्जिकेन तथा सर्ज्जरसेन च ॥
शीतोदकसमायुक्तं लेपात् सन्तापनाशनम् ।
शोणितज्वरदाहेभ्यो जातसन्तापनुत्तथा ॥
शूकशैवालमञ्याश्च शुण्ठीपाषाणभेदकम् ।
शोभाञ्जनं गोचुरं वा वरुणच्छदमेव च ॥
शोभाञ्जनस्य मूलञ्च एतैः क्वथितवारि च ।
दत्त्वा हिङ्गु यवक्षारं पीतं वातविनाशनम् ॥
पिप्पली पिप्पलीमूलं तथा भल्लातकं शिव !।
वार्य्येतैः क्वथितं पीतं वरशूलापसारकृत् ॥
अश्वगन्धामूलकाभ्यां सिद्धा वल्मीकमृत्तिका ।
एतया मर्द्दनात् रुद्र ! उरुस्तम्भः प्रशाम्यति ॥
दहतीकस्य वै मूलं संपिष्टमुदकेन च ।
पीतं भिञ्जिनिवातस्य विपाटनकृदेव च ॥
पीतं तक्रेण मूलं च आर्द्रस्य तगरस्य च ।
हरेत् भिञ्जिनिवातं वै दत्तमिन्द्राग्निर्यथा ॥
अस्थिसंहारमेकेन भल्लेन सह खादितम् ।
पीतं मांसरसेनापि वातनुच्चास्थिभङ्गकृत् ॥
घृतलिप्तं शल्लकञ्च छागक्षीरेण संयुतम् ।
तल्लेपात् पादयोर्न्नश्येत् सन्तापो नाच संशयः ॥
मध्वाज्यं सैन्धवं सिक्थं गुडगैरिकगुग्गुलैः ।
ससर्ज्जरस-स्फटितः कोमलोऽङ्घ्रिश्च लेपनात् ॥
कटुतैलेन लिप्तो वै विधुमाग्नौ प्रतापितः ।
मृत्तिकाखादितः पादः समः स्याद्वृषभध्वज !॥
सर्ज्जरसः सिक्थकञ्च जीरकञ्च हरीतकी ।
तत्साधितघृताभ्यङ्गो ह्यग्निदग्धव्यथापनुत् ॥
तिलतैलञ्चाग्निदग्धव्रणभस्मसमन्वितम् ।
व्यग्निदग्धं व्रणं नश्येद्वऋक्षशृङ्गः क्षतलेपतः ॥
नवनीतं माहिषञ्च दुग्धपिष्टतिलानि च ।
भल्लातकव्रणं नश्येत् हृच्छल्यं तस्य लेपतः ॥
शूरपुङ्खा लज्जालुका पाठा चैषान्तु मूलकम् ।
जलपिष्टं तस्य लेपात् शस्त्राघातः प्रशाम्यति ॥
मूलञ्च काकजङ्घायास्तिराचैणैव शेषतः ।
पाकपूतिवेदनाञ्च हन्ति वै रोहिते व्रणे ॥
सजलं तिलतैलञ्च अपामार्गस्य मूलकम् ।
तत्सेकदानान्नश्येत प्रहारोद्भववेदना ॥
अभया सैन्धवं शुण्ठिरेतत् पिष्टोदकेन तु ।
भक्षयित्वा ह्यजीर्णस्य नाशो भवति शङ्कर !॥
कटिबद्धं निम्बमूलमञ्जिशूलहरं भवेत् ।
शूलमूलं सताम्बूलं पीतमिन्द्रियकम्पहृत् ॥
अन्नसिद्धं हरिद्रा च श्वेतसर्षपमूलकम् ।
बीजानि मङ्गलदिने एषामुद्वर्त्तनं समम् ॥
सप्तरात्रप्रयोगेण शुभदेहकरं भवेत् ।
श्वेतापराजितापत्रं निम्बपत्रसेन तु ॥
नस्यदानात् डाकिनीनां मातॄणां ब्रह्मरक्षसाम् ।
मोक्षः स्यान्मधुसारेण नस्याच्च वृषभध्वज !॥
मूलं श्वेतजयन्त्याश्च पुष्यर्क्षे तु समाहृतम् ।
श्वेतापराजितार्कस्य तथा चित्रस्य मूलकम् ॥
कृत्वा तु वटिकां नारी तिलकेन वशी भवेत् ॥
पिप्पली लोहचूर्णन्तु शुण्ठिश्यामलकानि च ।
समानि रुद्र ! जानीयात् सैन्धवं मधु शर्करा ॥
उदुम्बरप्रमाणेन सप्ताहं भक्षणात् समम् ।
पुमांश्च बलवान् स्याच्च जीवेद्वर्षशतद्वयम् ॥
ॐ ठ ठ ठ इति ।
सर्व्ववश्यप्रयोगेषु प्रयुक्तः सर्व्वकामकृत् ॥
संगृह्य कृत्तात् काकस्य निलयं प्रदहेच्च तत् ।
चितामौ भस्म तच्छ्वोर्दत्तं शिरसि शङ्कर !॥
तमुद्घाटयते रुद्र ! पृच्छ तं योगमुत्तमम् ।
निश्चिह्नञ्च पुरीषं वै वनमूषिकचर्म्मणि ॥
कक्षां तन्तु निबद्धं वै कुर्य्यान्मलनिरोधनम् ।
कृष्णकाकस्य रक्तेन यस्य नाम प्रलिख्यते ॥
चूतदलेऽमेध्यमध्ये ततो निश्चिप्यते हर !।
स खाद्यते काकरन्दैर्नारी पुरुष एव वा ॥
शर्करा मध्वजाक्षीरं तिलगोचुरकं समम् ।
पाण्डुत्वं नाशयेद्रुद्र ! आखादितमिदं हर !॥
उलूककृष्णकाकस्य चिह्नस्याथ समिच्छतम् ।
रुधिरेण समायुक्तं यथोर्नाम्ना च हूयते ॥
तयोर्दयोर्महद्वैरं भवेन्नास्त्यत्र संशयः ।
भावितं कृत्तदुग्धेन रोहितस्य शल्यस्य च ॥
मांसं तत्साधितं तैलं तदभ्यङ्क्ष रोगनुत् ।
चन्दनोदकनस्याच्च रोमोत्थानं भवेत् पुनः ॥
हस्ते लाङ्गलिकाकन्दं गृहीतं तेन लेपितम् ।
शरीरं येन स पुमान् बुद्धेर्दर्पं व्यपोहति ॥
पराक्रमेण युक्तस्य शूरस्य पुरुषस्य हि ।
वर्त्तिर्य्यस्य पुरीषेण क्षतगर्भा तु भाविता ॥
मयूररुधिरेणैव जीवमाहरते शिव !।
ज्वरितानां भुजङ्गानां विलस्थानामधीश्वर !॥
देहस्थितामौ दग्धस्तु सर्पस्याजगरस्य हि ।
तद्भस्म सम्मुखे क्षिप्तं शल्यूनां भङ्गकृद्भवेत् ॥
मन्त्रेणानेन तत् क्षिप्तं महाभङ्गकरं रिपोः ।
ॐ ठ ठ ठ ठाही ठाही ठाही स्वाहा ।
ॐ उदरः पाही पाही स्वाहा ॥
सुदर्शनाया मूलन्तु पुष्यर्क्षे तु समाहृतम् ।
निःक्षिप्तं गृहमध्ये तु भुजङ्गा वर्जयन्ति तम् ॥
मार्ज्जारपललं विष्ठा हरितालञ्च भावितम् ।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत् ॥
युक्तो हि मन्त्रिरे रुद्र ! नात्र कार्य्या विचारणा ।
त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ॥
लाक्षा सर्ज्जरसञ्चैव विड्ङ्गञ्चैव गुग्गुलुः ।
एतैर्धूपो मक्षिकाणां मशकानां विनाशनः" ॥
इति गारुडे १८१ अध्यायः ॥ * ॥

हरिरुवाच ।

"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुर्नागकेशरम् ।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम् ॥
ॐ नारायणायेति स्वाहा ।
ताम्बूलं यस्य दीयेत स वशी स्यात् समन्ततः ।
ॐ हरि हरि स्वाहा ॥
गोदन्तहरितालञ्च संयुक्तं काकजिह्वया ।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत् ॥
श्वेतसर्षपनिर्म्माल्यं यद्यद्गृहे तद्विनाशकृत् ।
वैभीतकं शाखोटकं मूलं पत्रञ्च संयुतम् ॥
स्थाप्यते यद्यद्गृहद्वारे तत्र वै कलहो भवेत् ॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत् ।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात् ॥
अगुरु गुग्गुलुञ्चैव नीलोत्पलसमन्वितम् ।
गृध्रेण धूपयित्वा तु राजद्वारे प्रियो भवेत् ॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम् ।
यं पश्येत्तिलकेनैव वशी कुर्य्यान्नृपाणये ॥
काकजिह्वा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम् ।
आत्मरक्षं सभावेयं वशी भवति मानवः ॥
आरण्यस्य विड़ालस्य गृहीत्वा रुधिरं शुभम् ।
करञ्जतैले तद्भाव्य रक्ताग्नेः कज्जलं ततः ॥
पातयेत् पद्मसूत्रेण अदृश्यः स्यात् तदञ्जनात् ॥
ॐ नमः खड्गवज्रपाशाय महायक्षसेनापतये स्वाहा । ॐ वज्र क्रीं क्रीं वरसंयुक्ता त्वरिता विद्या ॐ मातर्घोरे स्तम्भय स्वाहा ।
सहस्रं परिजप्या तु विद्येयं घोरवारिणी ।
महासुगन्धिकामूलं शुक्लं स्तम्भेत् कटौ स्थितम् ॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः सिद्धिं कुरु कुरु स्वाहा ।
सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च तत्क्षणाद्वै सा वशा भवेत् ॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत् ।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति ॥
पुत्रदण्डीशिफा वक्त्रे क्षिप्ता शुक्लस्य स्तम्भनम् ।
मूलं जयन्त्या वक्त्रास्यं व्यवहारे जयप्रदम् ॥
अपराजिताशिफां दद्यान्नीलोत्पलसमन्विताम् ।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम् ॥
रोचनागागपुष्पाणि बिल्वपुष्पं प्रियङ्गवः ।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशेत् ॥
ॐ क्रां गौरि देवि सौभाग्यं पुत्रवश्यादि देहि मे ।

ॐ श्रीं लक्ष्मि! देहि सौभाग्यं सर्व्वत्रैलोक्यमोहनम्।
दुरालभा वचा कुष्ठं कुङ्कुमञ्च शतावरी।
तिलतैलेन संयुक्तं योनिलेपादशो नरः॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियाः।
सुभगा स्यात् सा च रुद्र! पतिर्दासो भविष्यति॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका।
सौभाग्यं भगलेपाच्च पतिर्दासो भवेत्तदा॥
मधुयष्टिञ्च तैर्दद्याद्गोक्षीरं कण्टकारिका।
एतानि समभागानि पिबेदुष्णेन वारिणा॥
चतुर्मासावशेषेण गर्भसम्भवमुत्तमम्॥
मातुलुङ्गस्य बीजानि क्षीरेण सह भावयेत्।
तत्पीत्वा लभते गर्भं नात्र कार्य्या विचारणा।
मातुलुङ्गस्य बीजानि मूलान्येरण्डकस्य च॥
घृतेन सह संयोज्य पाययेत् पुत्रकाङ्क्षिणीम्।
अश्वगन्धाकृतं दुग्धं क्षयित पुत्रकारकम्॥
पलाशस्य तु बीजानि क्षौद्रेण सह पेषयेत्।
रजस्वला तु पीत्वा स्यात् पुष्पगर्भविवर्जिता"॥
इति गारुड़े १८२ अध्यायः॥*॥

हरिरुवाच।

"हरितालं यवक्षारं पञ्चाङ्गं रक्तचन्दनम्।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत्।
हरीतकीकषायेण घृष्ट्वा दन्तान् प्रलेपयेत्।
दन्ताः स्युर्लोहिताः पुंसः श्वेता रुद्र! न संशयः॥
मूलकं खेदमग्नौ तु रसं तस्य प्रपेषयेत्।
कर्णयोः पूरणात्तेन कर्णस्रावो विनश्यति॥
अर्कपत्रं ग्रहीत्वा तु मन्दाग्नौ तापयेच्छनैः।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति॥
प्रियङ्गुमधुकाम्बष्ठाधातक्युत्पलपत्रिभिः।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च॥
पचेत्तैलं तथा शुल्कक्षारौ हिङ्गु महौषधम्।
शतपुष्पा वचा कुष्ठं दारु शिग्रु रसायनम्॥
सौवर्चलं यवक्षारं तथा सर्ज्जिकसैन्धवम्।
भृङ्गरञ्जि विड़ं मुस्तं मधुयुक्तं चतुर्गुणम्॥
मातुलुङ्गरसस्तद्वत् कदल्याश्च रसो हि तैः।
पक्वतैलं हरेदासु खावादींश्च न संशयः॥
कर्णयोः क्षमिनाशः स्यात् कटुतैलस्य पूरणात्।
हरिद्रा निम्बपत्राणि पिप्पल्यो मरिचानि च॥
विड़ङ्गं भद्रमुस्तञ्च सप्तमं विल्वभेषजम्।
गोमूत्रेण च पिष्ट्वैव कृत्वा च वटिकां हर!॥
अजीर्णाद्वटिकैकाऽद्य यं विशूचिकापहम्।
पटलं मधुना हन्ति गोमूत्रेण तथाऽर्बुदम्॥
एषा च शङ्करी वर्त्तिः सर्व्वनेत्रामयापहा"।
इति गारुड़े १८३ अध्यायः॥*॥

हरिरुवाच।

"वचा मांसी च विल्वञ्च तगरं पद्मकेशरम्।
नागपुष्पं प्रियङ्गुञ्च समभागानि चूर्णयेत्॥
अनेन धूपितो मर्त्यः कामवद्विचरेन्महीम्।
कर्पूरं देवदारुञ्च मधुना सह योजयेत्।
लिङ्गलेपाच्च तेनैव वशीकुर्य्यात् स्त्रियं किल।
मैथुनं पुरुषो गच्छेत् यत्कीयात् स्वकमिन्द्रियम्॥
वामहस्तेन वामञ्च हस्तं यस्याः स्त्रिया लिपेत्।
आजिघ्रा स्त्री वशं याति नान्यं पुरुषमिच्छति॥
ओम् रक्तचासुखडे अमुकं मे वशमानय वशमानय
क्रीं क्रीं फट्।
इमं जप्त्वायुतं मन्त्रं तिलकेन च शङ्कर!।
गोरोचनासंयुतेन खरक्तेन वशीभवेत्॥
सैन्धवं क्षणलवणं सौवीरं मत्स्यपित्तकम्।
मधु सर्पिः सितायुक्तं स्त्रीणां तद्भगलेपनम्॥
यः पुमान् मैथुनं गच्छेत् नान्यां नारीं गमिष्यति।
शङ्खपुष्पी वचा मांसी सोमराजी च कृष्णकम्॥
माहिषं नवनीतञ्च गाढीकरणमुत्तमम्।
सनालानि च पद्मानि क्षीरेणाज्येन पेषयेत्॥
गुटिकां शोषितां कृत्वा नारी योन्यां प्रवेशयेत्।
दशवारं प्रसूतापि पुनः कन्या भविष्यति॥
सर्षपास्त्र वचा चैव मदनस्य फलानि च।
मार्जारविष्ठाधुस्तूरःस्त्रीकेशेन समन्वितः॥
चातुर्थकहरो धूपो डाकिनीज्वरनाशनः।
अर्ज्जुनस्य तु पुष्पाणि भल्लातकविड़ङ्गके॥
क्षीरेरकं सर्जरसं सौवीरं सर्षपास्तथा।
सर्षपैकामक्षिकाणां धूपो मशकनाशनः॥
भूलतायास्त्र चूर्णेन स्तम्भः स्याद् योनिपूरणात्।
तेन लेपयतो योनौ भगस्तम्भस्त्र जायते"॥
इति गारुड़े १८४ अध्यायः॥*॥

हरिरुवाच।

"साज्यन्त्र घृतं क्षौद्रं लवणं ताम्रभाजने।
घृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम्॥
हरितकी वचा कुष्ठं पिप्पल्यो मरिचानि च।
विभीतकस्य बीजानि हरितालं मनःशिला॥
सर्व्वाक्षिरोगान्नश्येयुरजाक्षीरसमन्विताः।
तत्क्षणात् पुष्पनाशः स्यात् मालतीकुसुमाञ्जनात्॥
विड़ङ्गं सैन्धवं कुष्ठं श्योनं हिङ्गु मनःशिला।
कासे श्वासे च हिक्कायां लिह्यात् क्षौद्रं घृतप्लुतम्॥
पिप्पलीचिफलाचूर्णं मधुना लेहयेन्नरः।
नश्यते पीनसः कासः श्वासश्च बलवत्तरः॥
समूलचित्रकं भस्म पिप्पलीचूर्णकं हरेत्।
कासं श्वासञ्च हिक्काञ्च मधुमिश्रं दृषध्वज!॥
नीलोत्पलं शर्करा च मधुकं पद्मकं समम्।
तण्डुलोदकसंमिश्रं प्रसादं रक्तविक्रियाम्॥
शुण्ठी च शर्करा चैव तथा क्षौद्रेण संयुता।
कोकिलस्वरएव स्यात् गुलिकाभक्षणाच्चतः॥
हरितालं शङ्खचूर्णं कदलीदलभस्मना।
एतद्द्रव्येण चोद्वर्त्य लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्डुल्याश्च फलानि च।
लाक्षारससमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खश्चैव मनःशिला।
सैन्धवेन सहैकत्र काकमूत्रेण पेषयेत्॥
तत्क्षणोद्वर्त्तनादेव लोमशातनमुत्तमम्।
शङ्खमामलकीपत्रं धातक्याः कुसुमानि च॥
पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे।
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः"॥
इति गारुड़े १८५ अध्यायः॥*॥

हरिरुवाच।

"शरदृतौ वसन्तेषु प्रायशो दधि गर्हितम्।
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते॥
शुक्ले तु शर्करा पीता नवनीतेन बुद्धिदम्।
गुड़स्य तु पुराणस्य पलमेकन्तु भक्षयेत्॥
प्रत्यहं वर्षमेकन्तु निरन्तरमथो हर!।
स्त्रीसहस्रञ्च गच्छेच्च पुमान् बलयुतो हर!॥
कुष्ठं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम्।
भक्षणात् खप्नवेलायां वलीपलितनाशनम्॥
अतसीमाषगोधूमं चूर्णं कृत्वा च पिण्यलीम्।
घृतेन लेपयेद्गात्रमेभिः सार्द्धं विचक्षणः॥
कन्दर्पसदृशो मर्त्यो भवते नित्यभक्षणात्।
यवान्तिला अश्वगन्धा मुषला शूरला गुड़म्॥
एभिश्च वटिकां जग्ध्वा तरुणो बलवान् भवेत्।
हिङ्गु सौवर्चलं शुण्ठीं पीत्वा तु क्षुधितोदकैः॥
परिणामाख्यशूलञ्च अजीर्णञ्चैव नश्यति॥
धातकीं सोमराजीञ्च मधुना सह पेषयेत्।
दुर्ब्बलस्य भवेत् स्थूलो नात्र कार्य्या विचारणा।
शर्करामधुसंयुक्तं नवनीतं बली लिहेत्॥
क्षीराशी च क्षयी पुष्टिमेवाप्नोत्यतुलां लभेत्॥
कुलीरचूर्णं सक्षीरं पीतञ्च क्षयरोगनुत्।
भल्लातकं विड़ङ्गञ्च यवक्षारञ्च सैन्धवम्।
मनःशिला शङ्खचूर्णं तैलपक्वं तथैव च॥
लोमानि शातयत्येव नात्र कार्य्या विचारणा।
मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अग्नागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम्॥
वायसी-उदरं गृह्य मण्डूकवसया सह।
गुटिकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्गुटीं।
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमम्॥
मुण्डोलकवचायुक्तं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्॥
गोरोचनाभृङ्गराजं चूर्णक्षैव घृतं समम्।
दिव्याम्भसस्तु स्तम्भः स्यात् मन्त्रेणानेन वै तथा॥
ॐ ह्रीं अग्निस्तम्भनं कुरु। ॐ नमो भगवते जलं
स्तम्भय स्तम्भय संस संस केक केक चर चर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव!॥
शङ्खास्थि च गवास्थि च शतनिर्म्माल्यमेव च।
अरेर्यो निखनेत् द्वारे पक्षत्वमुपयाति सः॥
ब्रह्मदण्डी तु पुष्येण खाने पाने वशीकरा।
यष्टीमधुपलैकेन पक्वमुष्णोदकं पिबेत्।
विशूचिकाञ्च हृच्छूलं हरत्येव महेश्वर!॥
ॐ क्रः जः।
मन्त्रोऽयं हरते रुद्र! सर्व्वदोषिकजं क्षिपम्।
पिप्पली नवनीतञ्च शुष्कवेरञ्च सैन्धवम्॥
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत्।
त्रिफलार्द्रककुष्ठञ्च चन्दनं घृतसंयुतम्॥
एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव!।
पारावतस्य चाक्षीणि हरितालं मनःशिला॥
एष योगो विषं हन्ति वैनतेय इवोरगान्॥
सैन्धवं त्र्यूषणं चूर्णं दधिमध्वाज्यसंयुतम्।
दृष्टिकस्य विषं हन्ति लेपोऽयं दृषभध्वज!।
ब्रह्मदण्डीतिलान् क्षाप्य चूर्णं त्रिकटुकं पिबेत्।
नाशयेद्रुद्र! गुल्मानि निरोधं रक्तमेव च॥

पीत्वा क्षीरं क्षौद्रयुतं नाशयेद्धृदरक्षयुजम् ॥
अटरूषकमूलेन भगं नाभिञ्च लेपयेत् ।
सुखं प्रसूयते नारी नात्र कार्य्या विचारणा ॥
शर्करा मधुसंयुक्ता पीता तण्डुलवारिणा ।
रक्तातिसारशमनं भवतीति वृषध्वज!" ॥
इति गारुडे १८६ अध्यायः ॥ * ॥

हरिरुवाच ।

"मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च ।
पानाच्च ग्रहणी नश्येत् शशाङ्कधृतशेखर! ॥
पिप्पलीं पिप्पलीमूलं मरीचं तगरं वचाम् ।
देवदारुरसं पाठां क्षीरेण सह पेषयेत् ॥
अनेनैव प्रयोगेण अतीसारो विनश्यति ॥
मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम् ।
हरीतकीसमगुड़ा मधुना सह योजिता ।
विरेचनकरी रुद्र! भवतीति न संशयः ॥
त्रिफला चित्रकं चित्रं तथा कटुंकरोहिणी ।
ऊरुस्तम्भहरो ह्येष उत्तमन्तु विरेचनम् ॥
हरीतकीं शृङ्गवेरं देवदारु च चन्दनम् ।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम् ॥
जङ्घाशूलमूरुस्तम्भं सप्तरात्रेण नाशयेत् ॥
नाटाञ्च शृङ्गवेरञ्च सूक्ष्मचूर्णानि कारयेत् ॥
गुग्गुलं गुड़तुल्यञ्च गुलिकामुपयुज्य तु ।
वायुं खायुगतञ्चैव अग्निमान्द्यञ्च नाशयेत् ॥
शृङ्गपुष्पीं तु पुष्येण समुद्धृत्य सपत्रिकाम् ।
समूलीं क्षागदुग्धेन अपस्मारहरां पिबेत् ॥
अश्वगन्धाभये चैव उदकेन समं पिबेत् ।
रक्तपित्तं विनश्येत नात्र कार्य्या विचारणा ॥
हरीतकीकुष्ठचूर्णं कृत्वा आस्यञ्च पूरयेत् ।
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ॥
गुड़ूची पद्मकारिष्टं धन्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥
ॐ भ्रूं नम इति ।
श्रोत्रे बद्धा शृङ्गपुष्पीं ज्वरं मन्त्रेण वै हरेत् ।
ॐ जम्भनि स्तम्भनि विमोहय सर्व्वव्याधीन् मे वज्रेण ठ ठ सर्व्वव्याधीन् मे वज्रेण फट् । इति ॥
पुष्यमृक्षगतं जप्त्वा हस्ते दत्त्वाथ न स्पृशेत् ।
चातुर्थको ज्वरो रुद्र! अन्ये चैव ज्वरास्तथा ॥
जम्बूफलं हरिद्रा च सर्षपस्यैव च कक्षुकम् ।
सर्व्वज्वराणां धूपोऽयं हर! चातुर्थकस्य च ॥
करवीरं शृङ्गपत्रं लवणं कुष्ठकर्कटम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ॥
पामां विचर्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै ॥
पिप्पलीमधुपानाच्च तथा मधुरभोजनात् ॥
प्लीहा विनश्यते रुद्र! तथा सूरणसेवनात् ॥
पिप्पलीञ्च हरिद्राञ्च गोमूत्रेण समन्विताम् ॥
प्रक्षिपेच्च गुदद्वारे अर्शांसि विनिवारयेत् ।
अजादुग्धमार्द्रकञ्च पीतं प्लीहापहं भवेत् ॥
सैन्धवञ्च विड़ङ्गानि सोमराजी तु सर्षपाः ।
रजनी दे विभाङ्गैव गोमूत्रेण च पेषयेत् ॥
कुष्ठनाशञ्च तत्तैलमग्निपत्रादनात्तथा" ॥
इति गारुडे १८७ अध्यायः ॥ * ॥

हरिरुवाच ।

"रजनीकदलीक्षारलेपः सिध्मविनाशनः ।
कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा ॥
उष्णोदकेन संपीत्वा कटिशूलविनाशनम् ।
अभया नवनीतञ्च शर्करा पिप्पलीयुतम् ॥
पानादग्नेर्हरं स्याच्च नात्र कार्य्या विचारणा ।
अटरूषकपत्रेण घृतं मर्द्दयित्वा पचेत् ॥
चूर्णं कृत्वा तु लेपोऽयं अर्शोरोगहरः परः ।
गुग्गुलुं त्रिफलाशुक्लं पीत्वा नश्येत् भगन्दरम् ॥
अजाजीं शृङ्गवेरञ्च दधिमण्डेन पाययेत् ।
लवणेन तु संयुक्तं मूत्रकृच्छ्रविनाशनम् ॥
यवक्षारः शर्करा च मूत्रकृच्छ्रविनाशनम् ॥
चितामिः खञ्जरीटस्य विष्ठा फेनो हयस्य च ।
ग्रीभाञ्जनं नासनेत्रं नर एतैस्तु धूपितः ।
अदृश्यस्त्रिदशैः सर्व्वैः किं पुनर्मानवैः शिव! ॥
तिलतैलं यवान्दग्ध्वा मस्तिं कृत्वा तु लेपयेत् ।
तेनैव सह तैलेन अग्निदग्धः सुखी भवेत् ॥
लज्जालुः शरपुंखा च लेपः साज्यो हराभिधः ।
पञ्चाङ्गं कनकं गृह्य श्लक्ष्णचूर्णन्तु कारयेत् ॥
दुग्धं धूपं तच्च दत्त्वा तत्क्षणात् पतते ध्रुवम् ।
ॐ नमो भगवते किन्द किन्द ज्वरस्य शिरः प्रज्वलितपरशुपाणिपुरुषाय फट् ।
करे बद्धा तु निर्गुण्डया मूलं ज्वरहरं ततः ।
मूलञ्च श्वेतगुञ्जायाः कृत्वा तत् सप्तखण्डकम् ।
हस्ते बद्धं नाशयेच्च अर्शांस्येव न संशयः ॥
विष्णुक्रान्ताज्मूत्रेण चौरव्याघ्रादिरक्षणम् ।
ब्रह्मदण्डान्तु मूलेन सर्व्वकर्म्माणि कारयेत् ॥
त्रिफलाशान्तु चूर्णन्तु साज्यं कुष्ठं विनाशयेत् ॥
आज्यं पुनर्णवाबिल्वैः पिप्पलीभिश्च साधितम् ।
हरेत् हिक्काश्वासकासं पीतं स्त्रीणाञ्च गर्भकृत् ॥
भक्षयेच्चैवमादीनि पयसाज्येन पाचितम् ।
घृतशर्करया युक्तं शुक्रं स्याद्दक्षयं ततः ॥
विड़ङ्गं मधुकं पाठां मांसीं सर्ज्जरसन्तथा ।
हरिद्रा त्रिफलाचैव अपामार्गं मनःशिलाम् ।
उड़ुम्बरं धातकीपुष्पं तिलतैलेन पेषयेत् ।
योनिं लिङ्गञ्च मृक्षेत स्त्रीपुंसोः स्यात् प्रियं मिथः ॥
पुनर्णवामृता दूर्व्वा कनकं चेन्द्रवारुणी ।
बीजेनैषां जातिकाया रसेन रसमर्द्दनम् ।
कृत्वा धमेच्च मूषायां रसमारणमीरितम् ॥
मध्वाज्यसहितं दुग्धं बलीपलितनाशनम् ॥
मध्वाज्यं गुड़ताम्रञ्च करञ्जामाक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं शृणु ॥
पीतं धुस्तूरपुष्पञ्च सीसकस्य पलं मतम् ।
पांठा लाङ्गलशाखा च मूलमावर्त्तनाड्यवेत् ॥
तैलं धुस्तूरजस्य तेन दीपं प्रदापयेत् ।
समाधावुपविशन्तु गगनस्थो न पश्यति ॥
रात्रौ च सार्षपं तैलं कर्णे खद्योतसम्भवम् ।
तद्दीपः प्रज्वलेत् सम्यक् अग्निज्वालाकलापवत् ॥
कुञ्जरस्य मदार्त्तस्य खयं नेत्रे शिवाङ्गयेत् ।
संग्रामं जयते सोऽपि महाशूरश्च जायते ॥
दन्तं दुग्धमसर्पस्य मुखे संगृह्य वै क्षिपेत् ।
तिष्ठते जलमध्ये तु निर्विकल्पं स्थले यथा ॥
कुम्भीरनेत्रदंष्ट्राणि साक्षीणि रुधिरं तथा ।

वज्रतैलसमायुक्तमेकत्र तन्नियोजयेत् ॥
आत्मानं भक्षयेत्तेन जले तिष्ठेद्दिनत्रयम् ।
कुम्भीरकस्य नेत्राणि हृदयं कच्छपस्य च ॥
मूषकस्य वज्रास्थीनि शिशुमारवज्रा तथा ।
एतान्येकत्र संस्थानि जले तिष्ठेत् यथा गृहे ॥
लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ।
तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ॥
कामलादिहरं प्रोक्तं मुखरोगहरं तथा ।
जातीमूलं तक्रपीतं कोलिमूलन्तु जीर्णकृत् ॥
सतक्रकाग्रमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै दन्तरोगनुत् ॥
अथेन्द्रवारुणीमूलं वारिपीतं विषादिहृत् ।
बला चातिबला यष्टी शर्करा मधुसंयुता ॥
बन्ध्यागर्भकरं पीतं नात्र कार्य्या विचारणा ॥
श्वेतापराजितामूलं पिप्पलीशुण्ठिसंयुतम् ।
परिषिक्तं शिरोलेपात् शिरःशूलविनाशनम् ।
शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम् ॥
निर्गुण्डिकाग्निकां पीत्वा गण्डमालाविनाशनम्
केतकीपत्रजं क्षारं गुड़ेन सह भक्षयेत् ॥
तक्रेण शरपुङ्खां वा पीत्वा प्लीहां विनाशयेत् ॥
मातुलुङ्गस्य निर्य्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ।
शुण्ठीं सौवर्चलं हिङ्गु पीत्वा हृदयरोगनुत्" ॥
इति गारुडे १८८ अध्यायः ॥ * ॥

हरिरुवाच ।

ॐ गं गणपतये स्वाहेति ।
"अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः ।
इममष्टसहस्रञ्च जप्त्वा बद्धा शिखान्ततः ॥
व्यवहारे जयः स्याच्च द्यूतं जाप्यानृणां प्रियः ।
तिलानान्तु घृताक्तानां हुत्वानां रुद्र! होमयेत् ॥
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्दिनैः ।
अष्टम्याञ्च चतुर्दश्यामुपोष्याभ्यर्च्य विघ्नराट् ॥
तिलाक्तानां जुहुयादष्टोत्तरसहस्रकम् ।
अपराजितः स्याद्युद्धे च अथ चेदुद्यमे शिव! ॥
जप्त्वा चाष्टसहस्रन्तु ततश्चाष्टशतेन हु ।
शिखां बद्धा राजकुले व्यवहारे जयो भवेत् ।
क्रीकारं सविसर्गञ्च प्रातःसूर्य्यससद्युतिम् ।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयते ध्रुवम् ॥
तथैव नासामुरसि ध्यात्त्वैवोपकारकृत् ।
सुसमाहितचित्तेन न्यस्तन्तु प्रमदालये ॥
सकामां कामिनीं कुर्य्यात् स्खलन्मदजलाकुलाम् ।
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः ॥
दृष्टिमात्रे सदा तस्य वज्रमायान्ति योषितः ॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम् ॥
एभिः कृते च तिलके सदा स्त्री वशतामियात् ॥
सहदेवो भृङ्गराजः सितापराजिता वचा ।
तेनैव तिलकं कृत्वा त्रैलोक्यं वशतां नयेत् ।
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम् ॥
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया ।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः ॥
गोरोचना महादेव! ऋतुस्रोगितभाविता ।
ततो या कृततिलका सा नारी यं निरीक्षते ॥

तत्र शूर्व! वक्ष्यं कुर्य्याद्वाच कार्य्या विचारणा।
नागेश्वरस्य शूलेयं त्वक्पत्रस्य हरीतकी॥
चन्दनं कुष्ठसूक्ष्मैला रक्तशालिसमन्विता।
एतैर्धूपो वशकरः स्मरबाण इवेश्वर!॥
रतिकाले महादेव! पार्व्वतीप्रिय! शङ्कर!।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्॥
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः प्रियः।
सैन्धवस्य महादेव! पारावतमलं मधु॥
एभिर्लिम्पन्तु लिङ्गं वै कामिनीवशकृद्भवेत्।
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च॥
तण्डुलस्य प्रियङ्गोश्च पेषयेदेकयोगतः।
अनेन लिम्पलिङ्गस्य कामिनीवशतामियात्॥
हयलाला च मल्लिष्ठा मालतीकुसुमानि च।
श्वेतसर्षपाख्यैतैश्च लिम्पलिङ्गः स्त्रियाः प्रियः॥
मूलन्तु काकजङ्घाया दुग्धपीतन्तु शोधनम्।
अश्वगन्धानागबलागुडमांसनिषेविणाम्॥
रूपं भवेत् यथा तद्वन्नवयौवनचारिणाम्॥
लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा।
मधुना खादितं रुद्र! परिणामाख्यशूलनुत्॥
क्वथितोदकपानन्तु शम्बूकाक्षारकं तथा।
मद्यशङ्खं ह्यभिदग्धं गव्याज्येन समन्वितम्।
पीतं तृत्पृष्ठशूलानां भवेन्नाशकरं शिव!॥
हिङ्गु सौवर्चलं रुद्र! वृषध्वज! महौषधम्।
एभिस्तु क्वथितं वारि पीतं वै सर्व्वशूलनुत्॥
अपामार्गस्य वै मूलं सामुद्रलवणान्वितम्।
आस्वादितमजीर्णस्य शूलस्य स्याद्विमर्द्दकम्॥
वटरोहाङ्कुरो रुद्र! तण्डुलोदकघर्षितः।
पीतः सतक्रोऽतीसारं क्षयं नयति शङ्कर!॥
अङ्कोठमूलं कर्षार्द्धं पिष्टं तण्डुलवारिणा।
सर्व्वातिसारग्रहणीं पीतं हरति भूतप!॥
मरीचशुण्ठिकुटजत्वक्चूर्णन्तु गुडान्वितम्।
क्रमात्तद्विगुणं पीतं ग्रहणीव्याधिनाशनम्॥
श्वेतापराजितामूलं हरिद्रासिक्थतण्डुलम्।
अपामार्गतिक्तकुटजमेधान्तु वटिकां शिव!।
विसूचिकामहाव्याधिं हरत्येव न संशयः॥
त्रिफला त्रिकटुश्चव शिलाजतु हरीतकी।
एकैकमेषां चूर्णन्तु मधुना च विमिश्रितम्।
पीतं सर्व्वप्रमेहन्तु क्षयं नयति शङ्कर!॥
अर्कक्षीरं प्रस्थमेकं तिलतैलं तथैव च।
मनःशिला मरीचानां सिन्दूरस्य पलं पलम्॥
चूर्णं कृत्वा ताम्रपात्रे क्षातपे शोषयेत्ततः।
पीतं खदीगतं दुग्धं सैन्धवं शूलनुद्भवेत्॥
त्रिकटुत्रिफलायुक्तं पलाशाष्टकसैन्धवम्।
मनःशिला निम्बपत्रं जातीपुष्पमजापयः॥
तन्मूत्रं शङ्खनाभिश्च चन्दनं घर्षयेत्ततः।
एभिश्च वटिकां कृत्वा अक्षिणी चाञ्जयेत्ततः॥
नश्यते पटलं काचं पुष्पञ्च तिमिरादिकम्॥
विभीतकस्य वै चूर्णं समधु श्वासनाशनम्॥
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत्॥
देवदारोश्च वै चूर्णं अजामूत्रेण भावयेत्।
यकृद्विंशति वै वारमक्षिणी तेन चाञ्जयेत्॥
राज्यन्धता पटलता नश्येदिति विनिश्चयः।
पिप्पली केतकं रुद्र! हरिद्रामलकं वचा॥
सर्व्वाक्षिरोगा नश्येयुः सक्षीरादञ्जनात्ततः॥
काकजङ्घाशिग्रुमूले मुखेन विश्रुते शिव!।
चर्व्वित्वा दन्तरोगाणां विनाशो हि भवेद्ध्रुवं"!॥
इति गारुडे १८६ अध्यायः॥ * ॥

हरिरुवाच।

"पीतं सारं गुडूच्याश्च मधुना च प्रमेहनुत्।
पीतं गोहालियामूलं तिलदध्याज्यसंयुतम्॥
निरुद्धमूत्रं क्षथितं प्रवर्त्तयति शङ्कर!।
तथा हिक्कां हरेत् पीता सौवर्चलयुता सुरा॥
गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्क्कराम्॥
पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्क्करयान्वितम्॥
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्क्कराम्॥
द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा।
गण्डमालां हरेल्लेपात् कुरुगण्डगलगण्डकम्॥
रसाञ्जनहरीतक्याक्षूर्णं तेनैव गुडनात्।
नश्येद्वै पुरुषव्याधिं नात्र कार्य्या विचारणा॥
करवीरमूललेपात् लेपात् प्लक्षफलस्य च।
पुंव्याधिर्नश्यते रुद्र! योगमन्यं वदाम्यहम्॥
दन्तीमूलं हरिद्रा च चित्रकं तस्य लेपनात्।
भगन्दरविनाशः स्यादन्ययोगं वदाम्यहम्॥
जलौकाजगधरक्तन्तु भगन्दरमुमापते!॥
त्रिफलाञ्जनघृक्ष्च मार्जारास्थिविलेपितम्।
ततो न प्रसवेत् रुद्र! नात्र कार्य्या विचारणा॥
हरिद्रा त्वेकवारन्तु स्नुहीक्षीरेण भाविता।
भक्षितश्चर्णो निपतति तल्लेपात् वृषभध्वज!॥
घोषाफलं सैन्धवञ्च तल्लिप्ताक्षः पतेत्तथा।
गव्याज्यं साधितं पीतं पलाशक्षारवारिणा॥
त्रिगुणेन त्रिकटुकमर्क्षांसि क्षययेच्छिव!।
बिल्वस्य च फलं दग्धं रक्ताक्षसो विनाशनम्॥
जग्ध्वा कृष्णतिलान्येव नवनीतयुतानि च।
यवक्षारं शुण्ठिचूर्णं युक्तं तुल्यघृतान्वितम्॥
लीढ्वाग्निं करोत्येष प्रत्यूषे वृषभध्वज!।
शुण्ठ्या च क्षथितं वारि पीतञ्चाग्निं करोति वै॥
हरीतकी सैन्धवञ्च चित्रकं रुद्र! पिप्पली।
चूर्णमुष्णोदकेनैषां पीतञ्चातित्रुधाकरम्॥
साज्यं शूकरमांसं वै पीतं चातित्रुधाकरम्"॥
इति गारुडे १९० अध्यायः॥ * ॥

हरिरुवाच।

"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्धर!।
सर्व्वरोगविनिर्मुक्तं चूर्णं पलशतं शिव!॥
सक्षीरं भक्षितं कुर्य्यात् समाहेन वृषध्वज!।
नरं श्रुतिधरं शूरं मृगेन्द्रगतिविक्रमम्॥
पद्मगौरप्रतीकाशं युक्तं दशशतायुषा।
षोड़शाब्दाङ्गतिं रुद्र! सततं दुग्धभोजनम्॥
मधुसर्पिःसमायुक्तं जग्धमायुष्करं भवेत्।
तज्जग्धं मधुना सार्द्धं दशवर्षसहस्रिणम्॥
कुर्य्यान्नरं श्रुतिधरं प्रमदाजनवल्लभम्।
दृष्ट्वा नित्यं भक्षितन्तु वज्रदेहकरं शिव!॥
कृष्णकेशसमायुक्तं नरं वर्षसहस्रिणम्।
तच्च काञ्जिकसंयुक्तं नरं कुर्य्याच्च भक्षितम्॥
घृतशर्षं दिव्यदेहं बलीपलितवर्जितम्।
जग्धं त्रिफलया युक्तं चक्षुष्मन्तं करोति वै॥
अन्धः पश्येत्तु चूर्णस्य साज्यस्यैव तु भक्षणात्।
महिषक्षीरसंयुक्तं तल्लेपः कृष्णकेशकृत्॥
खल्वाटस्य च वै केशा भवन्ति वृषभध्वज!।
तैलयुक्तेन चूर्णेन बलीपलितवर्जितम्॥
तदुद्वर्त्तनमात्रेण सर्व्वरोगैः प्रमुच्यते।
सक्षीरगव्यचूर्णेन दृष्टिः यक्ष्मासतोऽञ्जनात्॥
पलाशस्य तु बीजानि श्रावणे वितुषाणि च।
गृहीत्वा नवनीतेन तेषां चूर्णन्तु भक्षयेत्॥
कर्षार्द्धमेव कुल्माषं नत्वा नित्यं हरिं प्रभुम्।
यष्टिं पुराणधान्यं स्यादम्बुवर्ज्जं वृषध्वज!॥
जीवेद्वर्षसहस्राणि बलीपलितवर्जितः॥
भृङ्गराजस्य वै चूर्णं पुष्यर्क्षे तु समाहृतम्।
विड़ालपदमात्रन्तु ससौवीरञ्च भक्षयेत्।
मासमात्रप्रयोगेण बलीपलितवर्जितः॥
घृतानि पञ्च जीवेच्च नवनागबलो भवेत्।
भवेत् श्रुतिधरो रुद्र! पुष्यर्क्षे चैव भक्षयेत्"॥
इति गारुडे १९१ अध्यायः॥ * ॥

हरिरुवाच।

"निर्व्रणः स्यात् पूयहीनः प्रहारो घृतपूरितः।
अपामार्गस्य वै मूलं हस्ताभ्याञ्च विमर्द्दयेत्॥
तद्रसेन प्रहारस्य रक्तस्रावो न पूरणात्।
रुद्र! लाङ्गलिकामूलं हिज्जलस्य तथैव च॥
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात्।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर!॥
दग्ध्वा भाहिषेण युक्तं जग्धं कोद्रवभक्तकम्।
कङ्कुमूलस्य वै चूर्णं दत्तं नाड़ीव्रणापहम्॥
ब्रह्मयष्टिफलं पिष्टं वारिणा तेन लेपतः।
तेन वृष्टं रक्तदोषः प्रणश्यति न संशयः॥
यवभस्म विड़ङ्गञ्च गन्धपाषाणमेव च।
शुण्ठिरेषाञ्चैव चूर्णं भावितं रुधिरेण वै।
कृकलासस्य तल्लिप्तं व्यर्व्वुदं विद्रवेच्छिव!॥
शोभाञ्जनस्य वीजानि अतसीमसिनां सह।
गोरसन्तु प्रपिष्टान्यत् यष्टिकं नाशयेद्धि वै॥
श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा।
तेन नस्यप्रदानात् स्यादभ्रुवन्दस्य विद्रधेः॥
अगस्त्यपुष्पनस्यो वै समरीचश्च भूतहृत्।
भुजङ्गवर्म्म वै हिङ्गु निम्बपत्राणि वै यवाः।
गौरसर्षप एभिः स्यान्नस्यो भूतहरः कृतः॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु।
अञ्जनं कृतमेभिः स्यात् ग्रहभूतहरं शिव!॥
गुग्गुलूलूकपुच्छाभ्यां धूपो ग्रहहरः कृतः।
चातुर्थिकज्वरैर्मुक्तः कृष्णवस्त्रावगुण्ठितः"॥
इति गारुडे १९२ अध्यायः॥ * ॥

हरिरुवाच।

"श्वेतापराजितामूल्यरसेनाक्ष्णोश्च पूरणे।
पटलं नाशमायाति क्षेत्रदुःसमौषधम्॥
मूलं गोचुरकस्यैव चर्व्वित्वा नीललोहित!।
दन्तकीटव्यथां नश्येदन्यासुरविमर्द्दन!॥

नारी पुष्यदिने पीत्वा गोक्षीरेणोपवासतः ॥
श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलनुत् ॥
श्वेतार्कमूलं विधिना गृहीतं पूर्व्वसंस्थितम् ।
ऋतुस्नाता च ललना कटौ बद्धा नरोऽथ वा ।
नारी पुत्रं हि लभते सुरते वृषभध्वज ! ।
हस्तबद्धं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिनुद्भवेत् ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
साद्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ।
शिखायाश्चैव तद्वद्धं भवेदेकाहिकादिनुत् ॥
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत् ।
वास्योदकेन पीतं तद्वृद्धिघ्नहरं भवेत् ॥
यस्य लज्जालुकामूलं दीयते बद्धवेतसा ।
साद्धं स वै वशं याति पुमान् स्त्री वा न संशयः ॥
पिष्ट्वा गव्यघृतेनैव पाठामूलं पिबेत्तु यः ।
गरं विषं तस्य नश्येन्नात्र कार्य्या विचारणा ॥
वास्योदकयुतं मूलं शिरीषस्य यथा तथा ।
रक्तचित्रकमूलस्य भ्रमनं भरणाद्धर ! ॥
कार्य्ययोः कामलाव्याधिविनाशः स्यान्न संशयः ॥
श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् ।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत् ।
नारिकेलस्य वै पुष्पं छागीक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥
कुर्य्यात् सुदर्शनामूलं आदित्ये तु समाहृतम् ।
कण्ठबद्धं व्याहिकादिग्रहभूतविनाशनम् ॥
पुष्ये धवलगुञ्जाया गृहीतं मूलमुत्तमम् ।
मुखे तु निहितं रुद्र ! हरेत् गरविषं बलं ॥
हस्ते बद्धं कण्ठनुच्च कण्ठबद्धं ग्रहादिनुत्" ॥
इति गारुड़े १९३ अध्यायः ॥ * ॥

हरिरुवाच ।

"अपराजिताया मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गण्डमालां न संशयः ॥
तथेन्द्रवारुणीमूलं विधिना पीतमीश्वर ! ।
त्रिस्निग्धेरण्डकं रुद्र ! शूकशिम्बीसमन्वितम् ॥
शीतोदकञ्च तन्नस्यो बाऽग्र्यीवाथवा हरेत् ॥
माहिषं नवनीतञ्च अश्वगन्धा च पिप्पली ।
वचा कुष्ठं त्वयं लेपो लिङ्गोच्चस्तनर्द्धिकृत् ॥
कुष्ठनागबलाचूर्णं नवनीतसमन्वितम् ।
तल्लेपो युवतीनाञ्च कुर्य्यान्मनोहरं स्तनम् ॥
विटपेन्द्रवारुणीमूलं यस्य नाम्ना सुदूरतः ।
निक्षिप्यते समुत्याय तस्य क्षीघ्रा विनश्यति ॥
पुनर्नवायाः शुक्लाया मूलं तण्डुलवारिणा ।
पीतं विद्यधि नश्येच्च नात्र कार्य्या विचारणा ॥
कदली यवक्षारन्तु पानीयेन प्रसाधितम् ।
तदाखादनान्नश्यन्ति उदरव्याधयोऽखिलाः ॥
वदरीकारवीमूलं गुड़ाज्येन समन्वितम् ।
अग्निना साधितं जग्ध्वा क्षमीन् सर्व्वान् हरेत् शिव !!
नित्यं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विड़ङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य बीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च ॥
एकञ्च त्रिफलाभागस्तथा भागद्वयं शिव ! ।
सोमराजस्य बीजानां जग्धं पथ्या च दह्नुत् ॥
अम्लतक्रं सगोमूत्रं क्षपितं लवणान्वितम् ।
कांस्यघृष्टं खरं लेपात् कुष्ठदद्रुविनाशनम् ॥
हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम् ।
अयं लेपो हन्ति दद्रु पामानं वै गरं तथा ॥
सोमराजस्य बीजानि नवनीतयुतानि च ।
मधुनाक्तादितानि स्युः शुक्लकुष्ठहराणि वै ।
तक्रानुपानतो रुद्र ! नात्र कार्य्या विचारणा ॥
सितापराजितामूलं वर्त्तितं वास्यवारिणा ।
तल्लेपो रुद्र ! मासेन शुक्लकुष्ठविनाशनः ॥
माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिता नश्येद्वल्गुलापि वृषध्वज ! ॥
विशुष्कगम्भारिमूलं पक्वक्षीरेण संयुतम् ।
भक्षितं शुक्रपित्तस्य विनाशकरमीश्वर ! ॥
मूलकस्य च बीजानि अपमार्गरसेन वै ।
पिष्टानि तेन लेपेन सिक्किका रुद्र ! नश्यति ॥
कदलीक्षारसंयुक्ता हरिद्रा सिक्किकापहा ।
रम्भापामार्गयोः क्षार एकस्तैलविमिश्रितः ॥
तदभ्यङ्गान्महादेव ! सद्यः सिध्म विनश्यति ।
कुष्माण्डनालक्षारस्तु सगोमूत्रश्च तत्त्वतः ॥
जलपिष्टा हरिद्रा च सिद्धा मन्दानलेन हि ।
माहिषेण घृतेनैव वेष्टिता वृषभध्वज ! ॥
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ।
तिलसर्षपसंयुक्तं हरिद्राद्वयकुष्ठकम् ॥
तेनोद्वर्त्तितदेहः स्याद्दुज्ज्वलः सुरभिः पुमान् ।
मनोहरश्चानुदिनं दूर्व्वाणां काकजङ्घया ॥
अर्ज्जुनस्य तु पुष्पाणि जम्बुपत्रयुतानि च ।
सलोध्राणि च तल्लेपो देहदुर्गन्धतां हरेत् ॥
मन्दोष्णलोध्रनीरं वै चूर्णन्तु कनकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेदग्रीघ्रप्रसारिकाम् ॥
त्वग्दोषञ्चैव देवेन्द्र ! घर्म्मदोषञ्च नश्यति ।
काकजङ्घोद्वर्त्तनञ्च अङ्गरागकरं भवेत् ॥
यष्टीमधु शर्करा च वासकस्य रसो मधु ।
एतत् पीतं रक्तपित्तकामलापाण्डुरोगनुत् ॥
रक्तपित्तं हरेत् पीतो वासकस्य रसो मधु ।
क्षयकाले तोयपानात् पीनसं प्रहितं हरेत् ॥
विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च ।
पीतं सकाञ्जिकं हन्ति स्वरभेदं महेश्वर ! ॥
चूर्णमामलकस्यैव पीतं शूलहरं परम् ॥
मनःशिला बलामूलं काकपर्णञ्च गुग्गुलुम् ।
जातीपत्रं कोलिपत्रं तथा चैव मनःशिला ।
एभिश्चैव कृता वर्त्तिर्वदराग्नौ महेश्वर ! ॥
धूमपानं काशहरं नात्र कार्य्या विचारणा ॥
त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम् ॥
भोजनादौ हि समधु पिपासां त्वरितं हरेत् ।
विल्वमूलञ्च समधु गुड़ूचीक्षपितं जलम् ॥
पीतं हरेच्च त्रिविधं छर्दिं वै नात्र संशयः ।
पीता दूर्व्वा छर्दिनुत् स्यात् पिष्टा तण्डुलवारिणा" ॥
इति गारुड़े १९४ अध्यायः ॥ * ॥

हरिरुवाच ।

"पुनर्नवाया मूलञ्च श्वेतं पथ्ये समाहृतम् ।
वारिपीतं तस्य पार्श्वे भवनेषु न पन्नगाः ॥
तार्क्ष्यमूर्त्तिं वहेद्यो वै भक्षकदन्तनिर्मिताम् ।
स पन्नगैर्न दश्येत यावज्जीवं वृषध्वज ! ॥
पिबेद्वरुड़मूलं यः पुष्यर्क्षे रुद्र ! वारिणा ।
तस्मिन्नपास्तदशना नागाः स्युर्नात्र संशयः ॥
पुष्ये लज्जालुकामूले हस्तबद्धे तु पन्नगान् ।
गृहीयाल्लेपतो वापि नात्र कार्य्या विचारणा ॥
पुष्ये श्वेतार्कमूलञ्च पीतं शीतेन वारिणा ।
नश्येत दन्तकविषं करवीरादिजं विषम् ॥
महाकालस्य वै मूलं पिष्टं तत् काञ्जिकेन वै ।
वोल्मण्डलिकानाञ्च तल्लेपो हरते विषम् ॥
तण्डुलीयकमूलञ्च पिष्टं तण्डुलवारिणा ।
घृतेन सह पीतन्तु हरेत् सर्पविषाणि च ॥
नीली लज्जालुकामूलं पिष्टं तण्डुलवारिणा ।
पीत्वा दष्टकविषं नश्येदेकेन चोभयोः ॥
कुष्माण्डकफलरसः सगुड़ः सहशर्करः ।
पीतः सदुग्धो मोहन्तु तद्दष्टस्य विषस्य वै ॥
तथा काद्रवभूतस्य मोहस्य हर एव च ।
यष्टीमधुसमायुक्ता पीता च सितशर्करा ।
सदुग्धा च चिराच्चैव मूषाविषहरा भवेत् ॥
घुस्मकक्षयपानाश्च वारिणः शीतलस्य वै ।
ताम्बूलजग्धरोमाञ्च मुखलाला विनश्यति ॥
घृतं सशर्करं पीत्वा मद्यपानमदो न वै ।
क्षणाद्भल्लातस्य मूलेन पीतमुत्क्वथितं जलम् ।
ततो नश्येद्भल्लविषं चिराच्चैव महेश्वर ! ॥
उष्णं गव्यघृतं पीतं सैन्धवेन समन्वितम् ।
नाशयेत्तन्महादेव ! वेदनां वृश्चिकोद्भवाम् ॥
कुसुम्भं कुङ्कुमञ्चैव हरितालं मनःशिला ।
करञ्जपिण्डितञ्चैव अर्कक्षीरञ्च शाल्मली ॥
विषं नृणां विनश्येत एतेषां भक्षणाच्छिव ! ।
दीपतैलप्रदानाच्च दंशे वृश्चिकजे शिव ! ॥
खर्ज्जुरकविषं नश्येत्तदा वै नात्र संशयः ।
दंशस्थानं वृश्चिकस्य रुद्र ! गुग्गुलुधूपितम् ॥
विषं नश्येत्ततो रुद्र ! नात्र कार्य्या विचारणा ॥
अङ्गोठपत्रधूपेन नश्येन्मूषिकजं विषम् ॥
नागेश्वरमरीचानि शुण्ठी तगरपादिका ।
नश्येन्मधुमक्षिकाया एतेषां लेपतो विषम् ॥
घृतपुष्पा सैन्धवञ्च साज्यं वा तेन लेपतः ।
शिरीषस्य च बीजं वै सितक्षीरेण घर्षितम् ॥
तल्लेपेन महादेव ! नश्येदुन्दुरजं विषम् ॥
ज्वलिताग्निना विसेकी तथा दर्द्दुरजं विषम् ॥
धुस्तूरकरसोन्मिश्रं क्षीराज्यगुड़पायतः ।
सूनां विषं विनश्येत शृगालक्षतशेखर ! ॥
वटनिम्बशमीनाञ्च वल्कलैः क्वथितं जलम् ।
तत्सेकान्नखदन्तानां नश्येद्द विषवेदनाम् ॥
देवदारु हरिद्रा च गैरिकस्य च लेपनात् ।
नागेश्वरं हरिद्रे द्वे मञ्जिष्ठा देवदारुकम् ।
एभिर्लेपादिनश्येत लूताविषमुमापते" ! ॥
इति गारुड़े १९५ अध्यायः ॥ * ॥

हरिरुवाच ।

"एकं पुनर्नवामूलं अपामार्गस्य वा शिव ! ।
सरसं योनिविच्छिन्नं वराङ्गस्य यथां हरेत् ॥

प्रसूतिवेदनाश्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै क्षालितण्डुलवारिणा ।
सप्ताहं दुग्धपीतं स्यात् स्त्रीणां बहुपयस्करम् ॥
रुद्रेन्द्रवारुणीमूललेपात् स्त्रीस्तनवेदना ।
नश्येत् घृतविपक्वा च कार्य्यावश्यं तु पालिका ।
भक्षिता सा महेशान ! योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलेनैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साज्यानि तिलवारिणा ॥
पिष्ट्वान्येषां प्रलेपो वै ज्वालागर्हभरोगनुत् ॥
पाठामूलं रुद्र ! पीतं पिष्टं तण्डुलवारिणा ।
पापरोगहरं स्याच्च कुष्ठपानन्तथैव च ॥
वास्यौदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सन्तापनिवृत्तिं कुरुते शिव ! ॥
कदलीमेकुचं पीतं पिष्ट्वा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव ! रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र ! लाक्षा पीता क्षीरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
दिव्ययष्टीचिकटुकं चूर्णं पीतं हरेच्छिव ! ।
तिलक्काथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ! ॥
कुसुमस्य निबद्धञ्च तरुणीनां महेश्वर ! ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवणात् ॥
पीतन्तु काञ्जिकं रुद्र ! क्षपितं शरपुंखया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलमधुकैः पूरितः शिव ! ।
योनिः सुभा स्याद्बाला युवत्याः किं पुनर्हर ! ॥
यस्य बालस्य तिलकः कृतो गोरोचनाख्यया ।
शर्करादुग्धपानञ्च दत्तं स स्याच्च निर्भयः ॥
विषभूतग्रहादिभ्यो व्याधिभ्यो बालकः शिव ! ।
शङ्खनाभिवचाकुष्ठलोहानां धारणं सदा ॥
बालानामुपसर्गेभ्यो रुद्र ! रक्षाकरं भवेत् ।
पलाशचूर्णं समधु गव्याज्यामलकान्वितम् ॥
सविड्कं पीतमात्रं नरं कुर्य्यान्मेधामतिम् ।
सैकेन महादेव ! जरामरणवर्जितम् ॥
पलाशबीजं सघृतं तिलमध्वन्वितं समम् ।
सप्ताहं भक्षितं रुद्र ! जरां नयति संक्षयम् ॥
रुद्रामलकचूर्णं वै मधुतैलघृतान्वितम् ।
जग्ध्वा मांसं युवा स्याच्च नरो वागीश्वरो भवेत् ॥
शिवामलकचूर्णं वै मधुना उदकेन वा ।
बलानि कुर्य्यान्नासायाः प्रत्यूषे भक्षितं शिव ! ॥
कुष्ठचूर्णं साज्यमधु प्रातर्जग्ध्वा भवेन्नरः ।
साक्षात् सुरभिदेहो वै जीवेद्वर्षसहस्रकम् ॥
मासस्य विदलान्येव वितुषाणि महेश्वर ! ।
घृतभावितशुष्काणि पयसा साधितानि वै ॥
शर्करान्नयुतैश्चैव भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव ! तत्क्षणान्नात्र संशयः ॥
रसस्नेहतैलेन गन्धकेन शुभो भवेत् ।
चिरकोदकसंदृष्टो बलकृद्बलभाङ्नरः ॥
दुग्धं वितुषमार्द्रञ्च शिम्बीवीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामदम्" ॥
इति गारुडे १९६ अध्यायः ॥ * ॥

हरिरुवाच ।

"या गौर्द्वेहि सकं वत्सं तस्या देयं सकं पयः ।
लवणेन समायुक्तं तस्या वत्सः प्रियो भवेत् ॥
शुनोऽस्थि करणबद्धं हि महिषीणां गवान्तथा ।
क्षमिजालं पातयति सकलं नात्र संशयः ॥
गोजङ्घलाभिघातः स्यात् गुञ्जामूलस्य भक्षणात् ।
वरणफलस्य रसं करेण मथितं शिव ! ॥
चतुष्पादक्षिपदयोः क्षमिजालं निपातयेत् ।
व्रणञ्च शमयेद्रुद्र ! यवानां पूरणात्तथा ॥
गजमूत्रस्य वै पानं गोमहिष्युपसर्गनुत् ।
समसूरं शालिबीजं पीतं तक्रेण घर्षितम् ॥
क्षीरं गोमहिषस्यैव गोः पुंसश्च हितं भवेत् ।
पत्रञ्च शरपुंखाया दत्तं सलवणं शिव ! ॥
वारिस्फोटं हयानाञ्च वेणूराणां विनाशयेत् ।
अश्वाश्च सुन्दरच्छाया भवन्ति च न संशयः ॥
स्पृहकुमारीपत्रं वै दत्तं सलवणं हर ! ।
तुरङ्गमवेणूराणां कण्डुनुत् स्यादशाहतः" ॥
इति गारुडे १९७ अध्यायः ॥ * ॥

हरिरुवाच ।

"चित्रकस्याष्टभागानि शूरणस्य च षोडश ।
शुण्ठ्याश्चत्वारि भागानि मरीचानां दयं तथा ॥
पिप्पली पिप्पलीमूलं विडङ्गानां चतुष्टयम् ।
अष्टौ सुवलीभागाश्च त्रिफलायाश्चतुष्टयम् ॥
द्विगुणेन गुडेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम् ॥
अतिश्रोणि च मन्दाग्निं क्लीव्याद्यञ्च निवारयेत् ।
विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ॥
प्रसारणश्वगन्धा च रुहती कण्टकारिका ।
बला चातिबला राखा श्वदंष्ट्रा च पुनर्णवा ॥
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ।
एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले ॥
तेन पादावशेषेण तैलपात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ॥
घृतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ।
द्रव्याणि यानि पेयानि तानि वक्ष्यामि तच्छृणु ॥
घृतपुष्पा देवदारु बला पर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्णवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
वृक्कशूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥
अपस्मारं वातरक्तमागुम्फांश्च पुमान् भवेत् ।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ! ॥
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातविकारिणाम् ॥
हिङ्गु तुम्बुरु शुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥
शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावश्च कर्णयोः ।
क्रमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥
शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
घृतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भृङ्गरस्थि विड्ं मुस्तं मधु शुक्लं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
व्याधिजः कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शृगाङ्कृतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥
चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकक्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुर्हीरकस्तुर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलो दमनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डुकुष्ठहरं परम् ।
पुमान् युवा स्यात् शुक्राढ्यः स्त्रीणां चात्यन्तदुर्लभः ॥
स्त्रीशतं गच्छते रुद्र ! बन्ध्यापि लभते सुतम् ॥
यमानी चित्रकं धान्यं शुषणं जीरकं तथा ।
सौवर्चलं विड्ं वयं पिप्पलीमूलराजिकम् ।
एभिः पचेत् घृतप्रस्थं जलप्रस्थाष्टसंयुतम् ॥
मर्म्मार्शोगुल्मशूलघ्नं हन्ति वह्निं करोति वै ॥
मरीचं चित्रतं कुष्ठं हरितालं मनःशिला ।
देवदारुहरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
विशाला करवीरश्च अर्कक्षीरं शुक्लद्रुसम् ॥
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ।
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ॥
मत्स्याजे गौहयाजे वा घृतैर्मर्दग्निना पचेत् ।
पामा विचर्चिका चैव दद्रुविष्फोटकानि च ॥
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते ।
प्रसूतान्यपि स्त्रीचक्षि तैलनानेन स्नेचयेत् ॥
चिरोत्थितमपि स्त्रैत्यं विवर्णं तत्क्षणाद्भवेत् ।
पटोलपत्रं कटुका मञ्जिष्ठा शारिवा निशा ॥
जाती शमी निम्बपत्रं मधुकं क्षपितं घृतम् ।
एभिर्लेपात् सुरूपो वा वै खविणः शिव ! ॥
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया च गुडूची च अटरूषकवासकुची ॥
एतैस्तत्समैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसं प्रस्थं क्षीरप्रस्थसमन्वितम् ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥
अग्निजिह्वा वचा वासा पिप्पली मधु सैन्धवम् ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अपामार्गो गुडूची च कुष्ठं घृतावरी वचा ।
शङ्खपुष्याभया साध्यं विड्ं भक्षितं समम् ।
त्रिभिर्दिनैर्नरं कुर्य्याद्ग्रन्थाश्रुतधारिणम् ॥
अद्विर्वा पयसाज्येन मासमेकन्तु सेविता ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम् ॥

ओष

चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम् ।
वचायास्तत्तुल्यं कुर्य्यात् महाप्रज्ञान्वितं नरम् ॥
भूनिम्बनिम्बचिरायापर्पटैश्च हृतं जलम् ।
पटोलीमुस्तकाभ्याञ्च वासकेन च नाशयेत् ।
विस्फोटकानि व्यक्तानि नात्र कार्य्या विचारणा ।
कतकस्य फलं शुष्कं सैन्धवं त्रुषणं वचा ॥
क्षेनो रसाञ्जनं क्षौद्रं विड्ङ्गानि मनःशिला ।
एषां वर्त्तिर्हरेन्नाशं तिमिरं पटलं तथा ॥
प्रस्थे द्वे गण्डमालानां क्वाथयेद्रोगमप्यसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्ट्वान्येतानि दापयेत् ।
पुनर्नवा गोक्षुरकं सैन्धवं त्रुषणं वचा ॥
सरलं सुरदारुश्च मञ्जिष्ठा कण्टकारिका ।
नस्यपानाञ्जनैश्चैव कर्णशूलं हनुग्रहम् ॥
वाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर ! ॥
पलद्वयं सैन्धवञ्च शुण्ठी चित्रकपञ्चकम् ।
पञ्चप्रस्थं क्षारनालं तैलप्रस्थं पचेत्ततः ।
ग्रहदृष्टस्वरक्षीहसर्व्ववातविकारनुत् ॥
उदुम्बरं वटक्षत्तं जम्बुद्वयमधार्ज्जुनम् ।
पिप्पलञ्च कदम्बञ्च पलाशं लोध्रतिन्दुकम् ॥
मधुकमाम्रसर्जञ्च वदरं पद्मकेशरम् ।
शिरीषबीजं कतकमेतत्क्वाथेन साधितम् ।
तैलं हन्ति व्रणाक्षेपाचिरकालभवानपि"॥
इति गारुडे १९८ अध्यायः ॥ * ॥

हरिरुवाच ।

"पाठा द्वे रजनी कुष्ठमश्वगन्धाजमोदकम् ।
वचा चिकटुकश्चैव लवणं चूर्णमुत्तमम् ॥
ब्राह्मीरसे भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यान्मेधास्यं मतिं पराम् ॥
सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बचिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥
निम्बकुम्भे हरिद्रे द्वे शिग्रु सर्षपजस्तरुः ।
देवदारु पटोलञ्च धान्यं तक्रेण घर्षितम् ॥
देहं तलाक्तगात्रं वै अनेनोद्वर्त्तयेत्ततः ।
पामाः कुष्ठानि नश्येयुः कण्डूं पिटकसक्थिकीम्॥
सामुद्रं सैन्धवं क्षारो राजिका लवणं विड्म् ।
कटुकोद्भवजः कीटं चिक्षत् मूत्रयुतं समम् ।
दधिरोमूत्रपयसा मन्दपावकपाचितम् ।
एतच्चाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णे जीर्णे च भुञ्जीत मासादिघृतभोजनम् ।
नाभिशूलं मूत्रशूलं गुल्मप्लीहभवञ्च यत् ।
सर्व्वशूलहरं चूर्णं जठरानलदीपनम् ।
परिणामसमुत्थस्य शूलस्य च हितं परम् ॥
अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
मृद्वीं पुनर्नवा शुण्ठी जम्बा काश्मं निहन्ति वै ॥
अभयामलकं द्राक्षा पाठा चैव विभीतकम् ।
शर्करा च समञ्चैव जयं ज्वरहरं भवेत् ॥
त्रिफला वदरं द्राक्षा पिप्पली च विरेचनम् ।

अं

हरीतकी सोष्णनीरा लवणञ्च विरेचनम् ॥
कूर्म्ममत्स्याखुसहिमगोमृगालाश्च वानराः ।
विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एणाश्च विण्मूत्रं मांसं वा रोमशोणितम् ।
धूपं दद्यात् ज्वरार्त्तस्य उन्मत्तस्यश्च शान्तये ॥
अपस्माराभिभूतेभ्यो ग्रहार्त्तेभ्यश्च शान्तये ।
एतान्यौषधजातानि कथितानि महेश्वर ! ॥
निहन्ति यानि रोगाणि दत्तमिन्द्राग्निर्यथा ।
औषधे भगवान् विष्णुः स्मृतोऽसौ रोगनुद्भवेत् ॥
ध्यातोऽर्चितः स्तुतो वापि नात्र कार्य्या विचारणा"॥
इति गारुडे १९९ अध्यायः ॥
(विष्णुः । यथा महाभारते विष्णोः सहस्रनामकीर्त्तने । १३ । १४९ । ४४ ।
"अमृतांशूद्भवो भानुः शृङ्गबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः" ॥)
औषरं, क्ली, (उषरे भवं । उषर + अण् ।) पांशुवलवणम् । अयस्कान्तभेदः । इति राजनिर्घण्टः ॥
(पांशुवलवणशब्देऽस्य गुणादिकं द्रष्टव्यम् ॥)
औषरकं, क्ली, (औषर + स्वार्थे कन् ।) मृत्तिकालवणम् । खारी लूण इति भाषा । तत्पर्य्यायः । सार्व्वगुणम् २ सर्व्वसंसर्गलवणम् ३ उषरकम् ४ साम्बरम् ५ बङ्गलवणम् ६ मेलकलवणम् ७ मिश्रम् ८ । अस्य गुणाः । कटुत्वम् । क्षारत्वम् । तिक्तत्वम् । वातकफनाशित्वम् । विदाहित्वम् । पित्तमलबन्धमूत्रसंशोषकारित्वञ्च । इति राजनिर्घण्टः ॥
औष्ट्रकं, क्ली, (उष्ट्राणां समूहः । उष्ट्रस्य विकारः अवयवो वा । उष्ट्र + "गोत्रोक्षोष्ट्रोरभ्रेति" । ४ । २ । ३९ । वुञ् ।) उष्ट्रसमूहः । इत्यमरः ॥ उटेर पाल इति भाषा । (उष्ट्रदुग्धार्थे यथा ॥ वाभटे सूत्रस्थाने । ५ अ ॥
"ईषदूष्णोषणलवणमौष्ट्रकं दीपनं लघु ।
श्लक्ष्णं वातकफानाहकृमिमेदोदरार्शसाम्" ॥)
औष्ण्य, क्ली, (उष्णन् + ष्यञ् ।) उष्णस्य भावः । उष्णता ॥ (यथा रघुः । १७ । ३३ ।
"पूर्व्वराजवियोगौष्ण्यं क्षत्रस्य जगतो हृतम्" ॥)

अं

अं अंकारः । स तु अनुस्वारः । तन्त्रमते पञ्चदशस्वरवर्णः । (स तु पाणिन्यादिमते अयोगवाह एव "अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" । इत्यक्तेः । नहि योगः अक्षरसमाम्नायसूत्रेषु येषां ते अयोगास्तथापि वाहयन्ति ज्ञातबलकार्य्यं निर्व्वाहयन्तीति वाहाः अयोगाश्च ते वाहाश्चेति अयोगवाहा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया इत्यर्थः ।)
विन्दुमात्रानुनासिकवर्णोऽयं अकार उच्चारणार्थः । वोपदेवेनास्य नुरिति संज्ञा कृता । स तु नकारमकारस्थानेऽपि भवति ॥ * ॥
"नुवीपूर्ब्बेण संबद्धौ मूर्द्धौ तु परगामिनौ ।
चत्वारोऽयोगवाहाख्या ज्ञातकर्म्मणश्चयो मताः" ॥
इति दुर्गादासः ॥ * ॥

अः

"अंकारं विन्दुसंयुक्तं पीतविद्युत्समप्रभम् ।
पञ्चप्राणात्मकं वर्णं ब्रह्मादिदेवतामयम् ॥
सर्व्वज्ञानमयं वर्णं विन्दुत्रयसमन्वितम्" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायाम् ।) तस्य लेखनप्रकारो यथा ।
"अकाररूपमूर्द्धे तु दक्षिणे विन्दुरूपिणी ।
ब्रह्मा विष्णुश्च रुद्रश्च क्रमशस्त्रासु तिष्ठति ॥
या तु विन्दुमयी रेखा सैवाद्या शक्तिरीरिता" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"अंकारश्चतुरो दन्तो घटिका समगुह्यकः ।
प्रद्युम्नः श्रीसुखी प्रीतिर्वीजयोनिर्हयध्वजः ॥
परं ब्रह्मी प्रभामौलिः सोमविन्दुः कलानिधिः ।
अक्रूरस्त्रेतना नादपूर्णा दुःखहरः शिवः ॥
शिवः शम्भुर्नरेशश्च सुखदुःखप्रवर्त्तकः ।
पूर्णिमा रेवती शुद्धः कन्याचरवियद्रविः ॥
अमृताकर्षिणी शून्यं विचित्रा व्योमरूपिणी ।
केदारो राधिनाशश्च कुक्षिका चैव वुद्बुदः" ॥
इति तन्त्रशास्त्रम् ॥
अं, क्ली, परं ब्रह्म । इत्येकाक्षरकोषः ॥ (महेश्वरः । यदुक्तम् महाभारते १३ । १७ । १२६ ।
"विन्दुर्विसर्गः सुमुखः शरः सर्व्वायुधः सहः" ॥)

अः

अः अकारः स च विसर्गः । द्विविन्दुमात्रकण्ठावस्थाऽयं अकार उच्चारणार्थः । तन्त्रमते स च षोड़शस्वरवर्णः । (पाणिन्यादिमते अयं अयोगवाहश्च । अयोगवाहस्य व्युत्पत्तिस्तु अनुस्वारशब्दे द्रष्टव्या ।) वोपदेवेनास्य विरिति संज्ञा कृता । स तु सकाररकारयोः स्थानेऽपि भवति ॥ * ॥
"अःकारं परमेशानि ! विसर्गसहितं सदा ।
अःकारं परमेशानि ! रक्तविद्युत्प्रभामयम् ॥
पञ्चदेवमयो वर्णः पञ्चप्राणमयः सदा ।
सर्व्वज्ञानमयो वर्णः आत्मादितत्त्वसंयुतः ॥
विन्दुत्रयमयो वर्णः शक्तित्रयमयः सदा ।
किशोरवयसः सर्व्वे गीतवाद्यादितत्पराः ॥
शिवस्य युवती एताः स्वयं कुण्डली मूर्त्तिमान्" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा ।
"अकाररूपदक्षे तु द्विविन्दुरध ऊर्द्धतः ।
ब्रह्मेशविष्णवस्तासु मात्रा शक्तिः समीरिता ॥
विन्दुद्वयान्विता रेखा सैवाद्या शक्तिरीरिता" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"अः कण्ठको महासेनः कामापूर्णामृता हरिः ।
इच्छा भद्रा गजेशश्च रतिर्विद्यामुखी सुखम् ॥
द्विविन्दुरसना सोमोऽग्निरुद्धो दुःखसूचकः ।
द्विजिह्वः कुण्डलं वह्निः सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गजनाथो महेश्वरः" ॥
इति तन्त्रशास्त्रम् ॥
अः, पुं, महेश्वरः । इत्येकाक्षरकोषः ॥ (यदुक्तम्,— महाभारते १३ । १७ । १२६ ।
"विन्दुर्विसर्गः सुमुखः शरः सर्व्वायुधः सहः" ॥)

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.1

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY